।। श्रीः ।।
चौखम्बा सुरभारती ग्रन्थमाला
620

संस्कृत-मञ्जूषा

यू.जी.सी. नेट (कोड-73 एवं 25) संस्कृत विषय

विषयानुसार विस्तृत अध्ययन एवम् बहुविकल्पीय प्रश्नों का संग्रह

(तृतीय प्रश्नपत्र)

लेखक
डॉ. उदय शंकर झा

चौखम्बा सुरभारती प्रकाशन
वाराणसी

© सर्वाधिकार सुरक्षित। इस प्रकाशन के किसी भी अंश का किसी भी रूप में पुनर्मुद्रण, या किसी भी विधि (जैसे - इलेक्ट्रोनिक, यांत्रिक, फोटो-प्रतिलिपि, रिकॉडिंग या कोई अन्य विधि) से प्रयोग या किसी ऐसे यंत्र में भंडारण, जिससे इसे पुनः प्राप्त किया जा सकता हो, प्रकाशक की पूर्वलिखित अनुमति के बिना नहीं किया जा सकता है।

संस्कृत-मञ्जूषा - डॉ. उदय शंकर झा

प्रकाशक :
चौखम्बा सुरभारती प्रकाशन
(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)
के-37/117, गोपाल मंदिर लेन, पोस्ट बॉक्स नं. 1129
वाराणसी-221001, दूरभाष : (0542) 2335263
e-mail : csp_naveen@yahoo.co.in
website : www.chaukhamba.co.in

© सर्वाधिकार प्रकाशकाधीन

प्रथम संस्करण : 2017
₹ 525

वितरक :
चौखम्बा पब्लिशिंग हाऊस
4697/2, ग्राउण्ड फ्लोर, गली नं० 21-ए
अंसारी रोड, दरियागंज, नई दिल्ली-110002
दूरभाष : (011) 32996391, टेलीफैक्स : 23286537
e-mail : chaukhambapublishinghouse@gmail.com

*

अन्य प्राप्तिस्थान :
चौखम्बा संस्कृत प्रतिष्ठान
38, यू.ए. बंग्लो रोड, जवाहर नगर,
पोस्ट बॉक्स नं. 2113
दिल्ली-110007

*

चौखम्बा विद्याभवन
चौक (बैंक ऑफ बड़ौदा भवन के पीछे)
पोस्ट बॉक्स नं. 1069
वाराणसी-221001

मुद्रक :
रत्ना ग्राफिक्स, दिल्ली

प्राक्कथनम्

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रञ्च विद्याह्येताश्चतुर्दश॥

वेदानां सम्यग्रूपेण अवबोधनार्थं वेदाङ्गानां महत्त्वपूर्णं स्थानं विद्यते। भारतवर्षवाटिकायां संस्कृतशास्त्रवृक्षः प्राचीनकालादेव बहुभिर्विचक्षणैः ग्रन्थकृन्मालाकारैः स्वज्ञानजलेन संसिक्तः सन् पुष्पितः फलितश्च। अस्य संस्कृतशास्त्रवृक्षस्य प्रधानमूलं ऋग्यजुस्सामाथर्वाणः इति चत्वारो वेदाः, उपमूलानि वेदाङ्गानि-शिक्षा, व्याकरणं, निरूक्तं, ज्योतिषं, छन्दः, कल्पश्चेति षडङ्गानि सन्ति। अस्य संस्कृतशास्त्रवृक्षस्य शाखाः भाषाविज्ञानं, दर्शनानि, पुराणेतिहासौ, धर्मशास्त्रंकर्मकाण्डञ्च सन्ति। अस्य पत्राणि कोशाः टीकाग्रन्थाश्च। अस्य फलम् अभ्युदयो निःश्रेयसश्च। इत्थं धर्मार्थकाममोक्षाणां पुरूषार्थचतुष्टयानां संसाधकं साहित्यं संस्कृतशास्त्रमेवास्ति।

पारम्परिकीं पद्धतिमाश्रित्य एवं साधारणपाठ्यक्रममवलम्ब्य बहवश्छात्राः संस्कृतविषये प्रतिसंवत्सरं स्नातकोत्तरोपाधिं प्राप्नुवन्ति। तेषां संस्कृतछात्राणां मुख्यं लक्ष्यं भवति महाविद्यालयेषु विश्वविद्यालयेषु वा सहायक-प्राचार्यरूपेण नियुक्तिलाभः। अस्य कृते विश्वविद्यालयानुदानायोगेन समायोजिता NET (National Eligibility Test) परीक्षा इत्युच्यते। अतः अधुना स्नातकोत्तरपरीक्षायामुत्तीर्णानां छात्राणां कृते NET परीक्षा अतीव महत्त्वपूर्णा। NET पाठ्यक्रमे प्रायशः पञ्चदशाधिकशास्त्राणां तत्त्वदृष्ट्या इतिहासदृष्ट्या च ज्ञानमावश्यकं वर्तते। संस्कृतपाठ्यक्रमे संस्कृतमाध्यमस्य अनिवार्यतया संस्कृतग्रन्थानां संस्कृतभाषया विवेचनं परमावश्यकम्।

ग्रन्थेऽस्मिन् यू.जी.सी. द्वारा प्रतिपादितस्य तृतीयप्रश्नपत्रस्य (Paper 3rd, Code-25/73) समाधानं कृतम्। तत्र **"यू०जी०सी० संस्कृतशास्त्रमञ्जूषा"** चतुर्दशाध्यायात्मिका। यथा-(1) प्रथमाध्याये-वैदिकसाहित्यस्य परिचयः, (2) द्वितीयाध्याये-वैदिक-साहित्ये संहितायाः विवेचनम्, (3) तृतीयाध्याये-वैदिक-साहित्ये ब्राह्मण-आरण्यकग्रन्थानां विवेचनम्, (4) चतुर्थाध्याये-उपनिषदादिशास्त्रविवेचनम्, (5) पञ्चमाध्याये-निरुक्तशास्त्रविवेचनम्, (6) षष्ठाध्याये-व्याकरणशास्त्र-प्रतिपादनम्, (7) सप्तमाध्याये-भाषाविज्ञानविवेचनम्, (8) अष्टमाध्याये-साहित्यशास्त्रनिरूपणम्, (9) नवमाध्याये-ज्योतिषशास्त्रविवेचनम्, (10) दशमाध्याये-दर्शनशास्त्रविवेचनम्, (11) एकादशाध्याये-वेदाङ्ग-परिचयः एवं ऋक्प्रातिशाख्यशास्त्रविवेचनम्, (12) द्वादशाध्याये-आगमशास्त्रविवेचन्, (13) त्रयोदशाध्याये-धर्मशास्त्रविवेचनम्, (14) चतुर्दशाध्याये-पुराणेतिहासविवेचनम्।

कृतज्ञताज्ञापनम्-ग्रन्थस्यास्य सफलतायां येषां विद्वद्वर्याणां साहाय्यं मया लब्धन्तेषु कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालयस्य स्नातकोत्तर विभागीया ममाग्रजाः पूज्यचरणा दर्शन संकायाध्यक्षाः डॉ० भगीरथ मिश्र महानुभावाः, ज्योतिष संकायाध्यक्षाः डॉ० रामचन्द्र झा महानुभावाः, वेद-संकायाध्यक्षाः डॉ० विद्येश्वर झा महोदयाः, दर्शनविभागाध्यक्षाः डॉ० बौआनन्द झा महोदयाः प्रामुख्येन स्मर्यन्ते। यतस्तेषामाशीर्वचोभिः ग्रन्थस्यास्य समाप्तिरगात्।

तथा चास्य ग्रन्थस्य निर्माणक्रमे येषामन्येषां धीमतां सुहृदवर्गाणां साहाय्यमवाप्य विषयाणां परिवर्तनं परिवर्द्धनञ्च मया विहितं, तेषु कामेश्वर सिंह दरभंगा संस्कृत विश्व-विद्यालयस्य वैदिकप्रवराः डॉ० विनय कुमार मिश्र महानुभावाः, साहित्यशिरोमणयः डॉ० विश्राम तिवारी महोदयाः, ज्यौतिषविभागस्य श्री वरुण कुमार झा गवेषक सह वर्गाध्यापकः

(U.G.C.NET-JRF), शिक्षाशास्त्र-प्राध्यापकः डॉ० ऋद्धि नाथ झा, बरौनीस्थ सरस्वती विलास संस्कृत महाविद्यालयस्य ज्योतिष-प्राध्यापकः डॉ० विनोदानन्द झा प्रभृतयः अन्यतमाः सन्ति। अतः एतेषां समेषां कृते कार्तज्ञ्यं समर्पयामि।

एतत्प्रकाशने श्री नवीन/नीरज गुप्तमहोदयाः चौखम्बा सुरभारती प्रकाशनप्रबन्धकाः भृशं साधुवादार्हाः सन्ति। येषां सत्प्रयासेन सौहार्देन च पुस्तकमिदं प्रकाशितम्।

यदि एतेन ग्रन्थेन छात्राणां मनागपि हितं भविष्यति चेत् तदा मदीयः परिश्रमः सफलो भविष्यति।

अन्ते इदमपि निवेदनं यन्ममाज्ञानात् प्रमादात् भ्रमवशात् कम्प्यूटरजन्यदोषाद् वा काश्चन त्रुटयः सञ्जातास्ताः संशोध्य विद्वद्भिः नीरक्षीरविवेकिभिः शास्त्रावगाहनशेमुषीसम्पन्नैः सूचनीयोऽयं जनः इति भूयो भूयः मया प्रार्थ्यते।

विनयावनतः

(डॉ० उदय शंकर झा)
सहायक प्राचार्य (व्याकरण)
पूर्णिमा रामप्रताप संस्कृत महाविद्यालय बैगनी, दरभंगा
का.सिं.दरभंगा संस्कृत विश्वविद्यालय, दरभंगा (बिहार)

विजयादशमी
11.10.2016

डॉ० भगीरथ मिश्र
पूर्व प्राचार्य/संकायाध्यक्ष
स्नातकोत्तर दर्शनविभाग
कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय,
दरभंगा
Mob. : 09430848636

प्रशस्तिवाक्

सा ते वसतु जिह्वायां वीणा पुस्तकधारिणी।
मुरारिवल्लभा देवी सर्वशुक्ला सरस्वती।।

आयुष्मता उदय शंकर झा शर्मणा लिखितं "यू.जी.सी. संस्कृतशास्त्रमञ्जूषा" नामकं ग्रन्थरत्नं आदितः अन्तं यावत् मया अवलोकितम्। ग्रन्थेऽस्मिन् विविध विषयाणां वस्तुनिष्ठप्रश्नानामुत्तरं छात्राणां महते उपकाराय भविष्यतीति मे दृढो विश्वासः।

अतो ज्ञानमिच्छेन्महेश्वरादिति मनसि निधाय भगवन्तं भूतभावनं प्रार्थये यल्लेखकस्य लेखनीतः गंगाप्रवाह इव सदा शब्दधारा निःसरतु।

(डॉ० भगीरथ मिश्र)

विजयादशमी
11.10.2016

M.Katyayana

डॉ० रामचन्द्र झा
(पूर्वप्राचार्य विभागाध्यक्ष सङ्कायाध्यक्ष-प्रभारीकुलपति)
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालय
कामेश्वरनगर, दरभङ्गा-846008, बिहार
पूर्वसदस्य
जनरल कॉन्सिल एवं संस्कृत एडवाइजरी बोर्ड
साहित्य अकादमी, नई दिल्ली-110001
E-mail : varunkjha87@gmail.com

निवास
ग्रा०+पो० जयदेवपट्टी, वाया-कुर्सों (नदियामी)
दरभङ्गा-847405, बिहार
आवास
456, लक्ष्मीपुर, सुन्दरपुर, वार्ड नं. 2
पो०-बासुदेवपुर बीरा, वाया पी.टी.सी.
दरभङ्गा-846005, बिहार
चलदूरवाणी : +91-9430063648

पत्राङ्क .... *दिनाङ्क* ....

शुभाशंसनम्

राष्ट्रिय-पात्रता-परीक्षायाम् (NET) उत्तीर्णतार्थं संस्कृच्छात्राणां कृते विविधविद्यानां ज्ञानमावश्यकं भवति। अस्मिन् क्रमे तथाविधग्रन्थानामत्राभावमनुभूय तत्पूर्त्तये डॉ० उदय शंकर झा शर्मणा व्याकरणाचार्य- एम०ए० (संस्कृत) विद्यावारिधि-बी०एड० पदवीधारिणा महताश्रमेण "यू०जी०सी० संस्कृतशास्त्रमञ्जूषा" इति नामधेयो ग्रन्थो विरचितः। अयं हि ग्रन्थस्तथाविध छात्राणां जिज्ञासूनाञ्च लाभाय स्यादिति।

विजयादशमी
11.10.2016

रामचन्द्र झा
(डॉ० रामचन्द्र झा)

विषय-सूची

प्राक्कथनम् v
प्रशस्तिवाक् vii
शुभशंसनम् ix

1. वैदिकसाहित्यविवेचनम् 1–28

(A) (Code-73)
(क) वैदिकसाहित्यस्य परिचयः, (ख) वेदशब्दस्य स्वरूपम्, (ग) वेदानां वैशिष्ट्यम्, (घ) वेदानां रचनाकालः, (ङ) उपवेदाः एवं एतत्सम्बन्धिप्रश्नोत्तराणि– 1

(B) (Code-73)
(च) वैदिकभाष्यकाराणां परिचयः–(क) सायणाचार्यः, (ख) माधवः, (ग) उव्वटः, (घ) महीधरः, (ङ) स्कन्दस्वामी, (च) वेंकटमाधवः, (छ) हलायुधः, (ज) नारायणः, (झ) आनन्दतीर्थः, (ञ) भरतस्वामी, (ट) शङ्कराचार्यः, (ठ) दयानन्दसरस्वती, (ड) महर्षि अरविन्द, (ढ) प्रो.एच.एच.विल्सनः, (ण) प्रो. ओल्डेनवर्गः एवं तत्सम्बन्धिवस्तु-प्रश्नोत्तराणि– 6

(C) (Code-73)
(छ) वेदस्य पञ्चभागाः (ज) वेदोखिलो धर्ममूलम् एवं एतत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि 12

(D) (Code-73)
(झ) वैदिक्यो देवताः–1. अग्निः 2. सवितृ- 3. विष्णुः 4. इन्द्रः 5. रुद्रः 6. वृहस्पतिः 7. अश्विनौ 8. वरुणः 9. उषस् 10. सोमः एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 16

(E) (Code-73)
(ञ) शुक्लयजुर्वेदवर्णितं सामाजिकं राजनैतिकं च जीवनम् एवं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि 27

2. वैदिक-साहित्ये संहितायाः विवेचनम् 28–57

(F) (Code-25)
(क) संहितायाः स्वरूपम् (ख) ऋक्संहितायाः परिचयः (ग) ऋक्संहितायाः वैशिष्ट्यम् (घ) यजुः संहिताः (ङ) यजुः संहितायाः वैशिष्ट्यम् (च) सामसंहितायाः परिचयः (छ) सामवेदस्य महत्त्वम् (ज) अथर्वसंहितायाः परिचयः (झ) अथर्वसंहितायाः वैशिष्ट्यम्

G-Code-25 (ञ) संहितस्थ-सूक्तानां विवेचनमेवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

1. (ऋग्वेद) अग्निसूक्तम्- (1.1.1) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 33
2. इन्द्रसूक्तम्-(2.12) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 35
3. पुरुषसूक्तम्- (10.90) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 38
4. हिरण्यगर्भसूक्तम्-(10.121) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 41
5. नासदीयसूक्तम् (10.129) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 43
6. वाक्सूक्तम् (ऋक्-10.125) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 45
7. (अथर्व) पृथिवी-सूक्तम् (12.1) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 47

(H-Code-25) (ट) वैकल्पिक वर्ग संहिता विवेचनम्

8. ऋक्-वरुणसूक्तम् (1/25) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 48
9. ऋक्-सूर्यसूक्तम् (1.115) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 50

10. ऋक्-उषस् सूक्तम्- (3.61) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 52
11. ऋक् (5.83) पर्जन्यसूक्तम् इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 53
12. शुक्लयजुर्वेदस्य शिवसंकल्पसूक्तम् (1.6) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि 54
13. शुक्लयजुर्वेदस्य प्रजापतिसूक्तम् (1.5) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि 55
14. अथर्व-राष्ट्राभिवर्धनसूक्तम् (1.29) इत्यस्य विवेचनं तत्सम्बन्धिवस्तु-निष्ठप्रश्नोत्तराणि 55
15. अथर्व-कालसूक्तम् (19.53) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 56

3. वैदिकसाहित्ये ब्राह्मण आरण्यक ग्रन्थानां विवेचन भेदं तत्सम्बन्धि वस्तुनिष्ठ प्रश्नोत्तरणि (I) (Code-25) 57–71

(क) ब्राह्मणस्य (ब्राह्मण-ग्रन्थानां) (ख) ब्राह्मणग्रन्थानां वैशिष्ट्यम् (ग) शतपथब्राह्मणस्य परिचय: (घ) शतपथब्राह्मणस्य वैशिष्ट्यम् (ङ) वाङ्मनस आख्यानम्-शतपथब्राह्मणे (च) पञ्चमहायज्ञा (छ) गृह्यसूत्रोपयोगिता (ज) दर्शपौर्णमासयज्ञ: (झ) शुन:शेपाख्यानम् (ञ) आरण्यकाणां सामान्यपरिचय (ट) आरण्यकानां वैशिष्ट्यम

(J) (Code-25) वैकल्पिक वर्ग ब्राह्मण प्रतिपाद्यविषया

(ठ) वैकल्पिक-वर्ग-ब्राह्मणम् (ड) विधि: (ढ) विधे: प्रकार: (ण) अग्निहोत्रम् (त) अग्निष्टोमयज्ञ: (थ) संहिताभि: ब्राह्मणग्रन्थानां सम्बद्धता (द) व्याकरणं वैदिक-व्याख्यापद्धतिश्च (ध) वैदिकलौकिक-संस्कृतयो: भेद: (न) प्राचीना अर्वाचीनाश्च वैदिकव्याख्या-पद्धति:

4. उपनिषदि शास्त्रम् 71–78

(K) (Code-25) (क) उपनिषदां परिचय: (ख) उपनिषदां वैशिष्ट्यम् (ग) ईशावास्योपनिषद् (घ) प्रश्नोपनिषद् (ङ) केनोपनिषद् (च) तैत्तिरीयोपनिषद् (छ) कठोपनिषद् (ज) छान्दोग्योपनिषद् (झ) बृहदारण्यकोपनिषद् (ञ) ऐतरेयोपनिषद् (ट) मुण्डकोपनिषद् (ठ) श्वेताश्वतरोपनिषद् (ड) कौषीतक्युपनिषद् (ढ) मैत्रायणीयोपनिषद् (ण) उपनिषत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

5. निरुक्तशास्त्रविवेचनम् 78–86

(क) निरुक्तस्य परिचय: (ख) निरुक्तस्य महत्त्वम् (ग) निरुक्ते पदचतुष्टयम् (घ) निर्वचनस्य सिद्धान्त: (ङ) निम्नलिखितानां शब्दानां व्युत्पत्तय: (च) षड्भाव-विकारा: (छ) निरुक्ताध्ययनस्य प्रयोजनम् (ज) निरुक्ते मन्त्राणां प्रकार: (झ) निरुक्तस्य सामान्योद्देश्यानि (ञ) देवतानां स्वरूपाणि (ठ) निरुक्तकार: निघण्टे: व्याख्याकारश्च (ड) निरुक्तस्य टीकाकारा: (ढ) निरुक्तस्य शैली (ण) निरुक्त-व्याकरणयो: सामञ्जस्यम् (त) निरुक्तस्य वस्तुनिष्ठ- प्रश्नोत्तराणि

6. व्याकरणशास्त्रविवेचनम् 87–177

(क) (M) (Code-25/73) (ख) (N) (Code-25) (ग) (O) (Code-25/73)
1. व्याकरणस्य परिभाषा-व्याकरणस्य निर्वचनानि-(निश्चितवचनानि निर्वचनानि) 87
(ग) (O-Code-25/73) सिद्धान्तकौमुदी-(13) पञ्चसन्धि एवं सन्धिविषयकानि-वस्तुनिष्ठप्रश्नोत्तराणि 111
(ग) (O-Code-25/73) सिद्धान्तकौमुदी-(14) सुबन्तविवेचनम् एवं सुबन्त-विषयकानि वस्तुनिष्ठप्रश्नोत्तराणि 121
(ग) (O-Code-25x73) सिद्धान्तकौमुदी-(15) समास: एवं समासविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि 127
(ग) (O-Code-25x73) सिद्धान्तकौमुदी-(16) कारक: एवं कारकस्य (विभक्ते:) विषयकानि वस्तुनिष्ठप्रश्नोत्तराणि 135

(ग) (O-Code-25x73) सिद्धान्तकौमुदी-(17) स्त्रीप्रत्यया: एवं तत्सम्बन्धिवस्तु-निष्ठप्रश्नोत्तराणि 147
(ग) (O-Code-25x73) सिद्धान्तकौमुदी-(18) तद्धितप्रत्यया: (मत्वर्थीय) एवं तद्धितप्रत्ययविषयकानि वस्तुनिष्ठ-प्रश्नोत्तराणि 151
(ग) (O-Code-25x73) सिद्धान्तकौमुदी-(19) कृदन्त (कृत्यप्रक्रिया) एवं कृदन्त-विषयकानि वस्तुनिष्ठप्रश्नोत्तराणि 161
(ग) (O-Code-25x73) सिद्धान्तकौमुदी-(20) तिङन्तप्रक्रिया (भू,एध्) ए परस्मैपद-आत्मनेपद-विधानम् एवं तिङन्त-विषयकानि वस्तुनिष्ठ-प्रश्नोत्तराणि 170
(MNO) (कखग) व्याकरणशास्त्रस्य प्रमुखग्रन्था: ग्रन्थकाराश्च 176

7. भाषाविज्ञानम् (Linguistics)
(P) (Code-25) 177–197

8. साहित्यशास्त्रविवेचनम् 198–269
(Q) (Code-25x73)
काव्यप्रकाश (द्वितीय पञ्चमउल्लाश्च) 198
(R) (Code-25)
(ञ) ध्वन्यालोक: (प्रथमउद्योत:) विवेचनमेवं ध्वनिसम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 209
(S) (Code-73)
(ट) शब्दशक्तय: (अभिधाल॰)- लक्षणा-शक्ति:-व्यञ्जनाशक्ति:-एवं शक्ति-सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 210
(T) (Code-25x73)
(ठ) रसनिरूपणम्, रसगंगाधर: (प्रथमानने रसनिरूपणपर्यन्तम्) एवं रससम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 215
(ड) अलंकार- विवेचनमेवमलंकार-सम्बन्धिवस्तुनिष्ठ प्रश्नोत्तराणि 221
(U) (Code-25)
(ढ) रघुवंशम् (1 एवं 4 सर्ग) विवेचनमेवं वस्तुनिष्ठप्रश्नोत्तराणि 231
(ण) किरातार्जुनीयम् (प्रथमसर्ग:) विवेचनमेवं वस्तुनिष्ठप्रश्नोत्तराणि 234
(त) शिशुपालवधम् (प्रथमसर्ग:) विवेचनमेवं वस्तुनिष्ठप्रश्नोत्तराणि 237
(थ) नैषधीयचरितम् (प्रथमसर्ग:) विवेचनमेवं वस्तुनिष्ठप्रश्नोत्तराणि 240
(द) दशकुमारचरितम् (अष्टमोच्छ्वास:) विवेचनमेवं वस्तुनिष्ठप्रश्नोत्तराणि 242
(ध) हर्षचरितम् (पंचमोच्छ्वास:) विवेचनमेवं वस्तुनिष्ठप्रश्नोत्तराणि 244
(न) कादम्बरी (महाश्वेतावृत्तान्त:) विवेचन-मेवं वस्तुनिष्ठप्रश्नोत्तराणि 246
(फ) नाट्यग्रन्था:-नाटकस्य परिचयात्मकानि वस्तुनिष्ठप्रश्नोत्तराणि 251
(U) (ब) अभिज्ञानशाकुन्तलमेवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 252
(U) (भ) उत्तररामचरितमेवं तत्सम्बन्धिवस्तु-निष्ठप्रश्नोत्तराणि 257
(U) (म) मुद्राराक्षसम् एवं तत्सम्बन्धिवस्तु-निष्ठप्रश्नोत्तराणि 259
(U) (य) रत्नावली एवं तत्सम्बन्धिवस्तु-निष्ठप्रश्नोत्तराणि 262
(U) (र) कर्णभारम् एवं तत्सम्बन्धिवस्तु-निष्ठप्रश्नोत्तराणि 263
(U (ल) नाट्यशास्त्रम् (प्रथम, द्वितीय, षष्ठ, अध्याय:) एवं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि 264
(U) (व) दशरूपकम् (प्रथमतृतीय-प्रकाशश्च) एवं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोतराणि 266
(Q-U) (श) साहित्यशास्त्रस्य प्रमुखग्रन्था: ग्रन्थकाराश्च 267

9. ज्योतिषशास्त्रम् (V Code-73) 270–364

1. नामकरणमुहूर्तः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 270

(V-C-73)

2. चूडाकरणमुहूर्तः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 272
3. उपनयनमुहूर्तः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 274
4. विवाहमुहूर्तः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 277
5. नक्षत्रपरिचयः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 280
6. राशिपरिचयः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 285
7. ग्रहपरिचयः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 290
8. नक्षत्रराशिग्रहाणां पारस्परिकः सम्बन्धः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 295
9. नवविधकालमानानि एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 297
10. ग्रहकक्षाः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 303
11. वारक्रमः–एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 305
12. ग्रहणयोः सामान्यपरिचयः– एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 307
13. अहर्गणोपपत्तिः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 309
14. देशान्तरसंस्कारः तत्साधनञ्च एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 313
15. लग्नानयनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 315
16. ग्रहणम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 317
17. लम्बनं नतिश्च एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 321
18. भूभ्रमणम्, भूभासाधनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 325
19. ग्रहस्पष्टीकरणम्–एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 327
20. दिक्साधनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 330
21. अधिमासः, क्षयमासविचार, वलनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 332
22. दृक्कर्मसाधनम्, अयनांशः, पञ्चाङ्गसाधनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 336
23. उदयान्तरसाधनोपपत्तिः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 342
24. सावनदिवसोपपत्तिः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि– 345
25. सभङ्गबालारिष्टयोगाः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 347
26. आयुर्दायविचारः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 349
27. भावफलविचारः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 352
28. नाभसयोगाः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 355
29. विवाहमेलापनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 357
30. दशाविचारः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 359
31. ज्योतिषशास्त्रे (ग्रन्थाः– ग्रन्थकर्तारः) परिचयात्मकानिवस्तुनिष्ठप्रश्नोत्तराणि 361

10. दर्शनशास्त्रविवेचनम् (Code-25/73) 365–476

(क) द्रव्यम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 365
(ख) प्रमाणविवेचनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 368
(ग) हेत्वाभासः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 370
(घ) सांख्यदर्शनम्–पंचविंशतितत्त्वानि विवेचनम् एवं वस्तुनिष्ठप्रश्नोत्तराणि 371
(ङ) सत्कार्यवादः एवं वस्तुनिष्ठप्रश्नोत्तराणि 373
(च) प्रकृतिपुरुषत्रयः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 375

(छ) ईश्वरानीश्वरवादयोस्तुलना, उपयोगितावादास्तित्ववादयोस्तुलना, भौतिकवादमानवतावादयोस्तुलना एवं वस्तुनिष्ठप्रश्नोत्तराणि 377
(ज) मीमांसा वेदानामपौरुषेयत्वम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 380
(झ) विधिविमर्शः एवं वस्तुनिष्ठप्रश्नोत्तराणि 382
(ञ) अर्थवादः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 383
(ट) अभिहितान्वयवादः–अन्विताभिधानवादयोः विवेचनमेवं वस्तुनिष्ठप्रश्नोत्तराणि 383
(ठ) अपूर्वविमर्शः एवं वस्तुनिष्ठप्रश्नोत्तराणि 385
(ड) श्रौतयागाः, स्मार्तयागाः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 386
(ढ) (नव्यन्याय) पदार्थविमर्शः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 388
(ण) प्रामाण्यवादः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 391
(प) शाब्दबोधप्रक्रिया एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 393
(फ) ईश्वरः तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 394
(ब) आत्मा एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 395
(भ) परमाणुकारणवादः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 396
(म) अभावविमर्शः तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 397
(य) मोक्षविचारः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 398
(र) सांख्ययोग प्रमाणानि एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 398
(ल) सांख्यमते प्रधानकारणवादः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 399
(व) गुणाः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 401
(श) अष्टाङ्गयोगः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 402
(ष) समाधिः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 404
(स) सिद्धयः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 405
(ह) समापत्तयः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 406

(तुलनात्मकदर्शनम्)

(कक) भारतीयदर्शनपरम्परायाः प्रमुखसिद्धान्ताः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 408
(खख) स्याद्वादैकान्तवादयोस्तुलना एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 411
(गग) नास्तिकास्तिकवादः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 412
(घघ) ब्रह्म सत्यं जगन्मिथ्या (सर्वं खल्विदं ब्रह्म) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 416
(ङङ) परिणामवादविवर्तवादयोस्तुलना एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 418
(चच) शून्यवाद–क्षणभङ्गवादयोस्तुलना एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 419

(X-Code-25)

(छ) तर्कसंग्रहः (दीपिका– व्याख्यासहितः) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 420
(जज) तर्कभाषा (प्रमातृ प्रमेय प्रमितीनाम् अध्ययनम्) एवं तत्सम्बन्धि वस्तुनिष्ठ प्रश्नोत्तराणि 426
(झझ) योगसूत्रम् (व्यासभाष्य) 1. चित्तभूमिः, 2. चित्तवृत्तिः, 3. ईश्वरस्वरूपम्, 4. योगाङ्गः, 5. समाधिः, 6. कैवल्यः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 429
(ञञ) (ब्रह्मसूत्रशांकरभाष्यम्–1.1) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 433
(टट) न्यायसिद्धन्तमुक्तावली (अनुमानखण्डम्) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 435
(ठठ) सर्वदर्शनसंग्रहः (जैनमतम् बौद्धमतम्

(चच) एवं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि 438
(Y-Code-25) वेदान्तसार
(डड) वेदान्ताधिकारिविचारः एवं तत्सम्बन्धिवस्तुवस्तुनिष्ठप्रश्नोत्तराणि 443
(ढढ) अविद्या एवं तत्सम्बन्धिवस्तु-निष्ठप्रश्नोत्तराणि 445
(णण) अध्यासः एवं तत्सम्बन्धिवस्तु-निष्ठप्रश्नोत्तराणि 447
(पप) विवर्तवादः एवं तत्सम्बन्धिवस्तु-निष्ठप्रश्नोत्तराणि 448
(फफ) पञ्चविद्या (पञ्चाग्निविद्या) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 450
(बब) अभिनवान्यथाख्यातिवादः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 451
(मध्ववेदान्तः-Code-73)
(भभ) मध्व- वेदान्तस्य अवबोधनम् आगमानामपौरुषेयत्वम्, तत्त्वमसीति महावाक्यार्थविमर्शः, स्वतः प्रमाण्यवादविमर्शः, अनिर्वचनीय-ताख्यातिविचारः, प्रमाणविमर्शः, अहं ब्रह्मास्मीति अनुभूतिवाक्यविमर्शः, नारायणस्य सर्वोत्तमत्वम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि. 453
अद्वैतवेदान्तः-Code-73
(मम) अद्वैतवेदान्तस्य अवबोधनम्-ब्रह्म, जीवः, जगत्, माया, प्रधानकारण-वादनिरासः, प्रस्थानत्रयी, महावाक्यार्थः, मोक्षः एवं तत्सम्बन्धिवस्तुनिष्ठ प्रश्नोत्तराणि 456
Z-(Code-25)
व्याख्यात्मक-समीक्षात्मक- प्रश्नाः) (यय) ईश्वरकृष्णस्य सांख्यकारिका एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 461
(Code-25)
(रर) सदानन्दस्य वेदान्तसारः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 466
(लल) लौगाक्षिभास्करस्य अर्थसंग्रहः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 470
(WXYZ)
(वव) दर्शनशास्त्रस्य ग्रन्थाः ग्रन्थकाराश्च 473
11. वेदाङ्ग-परिचयः एवं ऋक्प्रातिशाख्यशास्त्र-विवेचनम् (AA-Code-25) 476–486
(क) वेदाङ्गानाम् अध्ययनम् सामान्य-संक्षिप्तः परिचयः वस्तुनिष्ठप्रश्नोत्तराणि च 476
AA-Code-25
(ख) ऋक्प्रातिशाख्यम्- (परिभाषा) 1. समानाक्षरः, 2. सन्ध्यक्षरः, 3. अघोषः, 4. सोष्मः, 5. स्वरभक्तिः, 6. यमः, 7. रक्तः, 8. संयोगः प्रगृह्यः, 9. रिफितः विवेचनम् 481
12. आगमशास्त्रविवेचनम् (BB-Code-73) 487–517
(क) शक्तिस्वरूपं तद्भेदाश्च एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 487
(ख) शिवस्वरूपम् एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 492
(ग) प्रत्ययस्वरूपम् एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 497
(घ) बुद्धितत्त्वम् एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 500
(ङ) अध्यासः एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 503
(च) मन्त्ररहस्यम् एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 504
(छ) आगमोपयोगिता एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 509
(ज) मोक्षः एवं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि 513
(झ) आगमशास्त्रस्य ग्रन्था एवं ग्रन्थकाराश्च 515
13. धर्मशास्त्र विवेचनम् (CC-Code-73) 518–571
(क) धर्मलक्षणम् एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 518
(ख) भावनाविचारः-भावनानिरूपणम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 522

(ग) प्रामाण्यविचारः एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 524
(घ) वर्णाश्रमधर्मः एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 525
(ङ) अशौच-निर्णयः- (अशौचविचारः) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 530
(च) धर्मस्रोतांसि एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 534
(छ) राजधर्माः एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 539
(ज) दायभागः (सम्पत्तिविभाजनं) दत्तकपुत्र-मीमांसा एवं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि 542
(झ) श्राद्धविमर्शः एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 544
(ञ) प्रायश्चित्त-विचारः एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 547
(ट) दत्तकपुत्रमीमांसा एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 550
(ठ) अष्टविधविवाहवर्णनम् एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 552
(ड) नारीधर्माः एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 555
DD-Code-25
(ढ) कौटिलीयअर्थशास्त्रम् (आदितः दश-अध्यायपर्यन्तम्) वस्तुनिष्ठप्रश्नोत्तराणि 557
(ण) मनुस्मृतिः (प्रथम-द्वितीय-सप्तम्-अध्यायमात्रम्) एवं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि 561
(त) याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायमात्रम्) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 568
14. पुराणेतिहासविवेचनम् (EE-Code-73) 572–652
(क) पुराणलक्षणम् एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 572
(ख) पुराणभेदाः एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 576
(ग) भुवनकोशः एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 578
(घ) राजधर्मः एवं तत्सम्बन्धिवस्तु-निष्ठप्रश्नोत्तराणि 581
(ङ) महाविद्या एवं तत्सम्बन्धिवस्तु-निष्ठप्रश्नोत्तराणि 583
(च) मुद्राः एवं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि 586
(FF-Code-25)
(छ) रामायणः-1. रामायणस्य क्रमः 2. रामायणे आख्यानम्, 3. रामायणकालिकः समाजः, 4. रामायणस्य उपजीव्यत्वं प्रेरकत्वं वा, 5. रामायणस्य साहित्यिकं महत्त्वम् एवं तत्सम्बन्धिवस्तु-निष्ठप्रश्नोत्तराणि 590
(ज) महाभारतम्- (क) महाभारतस्य क्रमः, (ख) महाभारते आख्यानम्, (ग) महाभारतकालिकः समाजः, (घ) महाभारतस्य उपजीव्यत्वं प्रेरकत्वं वा, (ङ) महाभारतस्य साहित्यिकं महत्त्वम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि 596
(GG.Code.73/25)
(झ) (क) पुराण- व्युत्पत्तिः परिभाषा च, (ख) पुराणमहत्त्वम्, (ग) महापुराणानि उपपुराणानि च, (घ) पौराणिक-सृष्टिविज्ञानम्, (ङ) पुराणानि लौकिक-कलाश्च, (च) पौराणिकाख्यानञ्च एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि (छ) पुराणेतिहासस्य ग्रन्थाः ग्रन्थकाराश्च 604
(HH-Code-73)
(ञ) ब्रह्मचारिगृहस्थ- वानप्रस्थ-संन्यासिनां कर्त्तव्यानि एवं तत्सम्बन्धिवस्तु-निष्ठप्रश्नोत्तराणि 617
(ट) नारायणस्वरूपम् एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 621
(ठ) दशावताराः (1. मत्स्यः, 2. कच्छपः, 3. वाराहः, 4. नृसिंहः, 5. वामनः, 6.

परशुरामः, 7. रामः, 8. कृष्ण- बलरामौ, 9. बुद्धः, 10. कल्किः) एवं तत्सम्बन्धि-वस्तुनिष्ठ प्रश्नोत्तराणि 622
(ड) मणिद्वीपवर्णनम् एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 642
(ढ) श्रीकृष्णचरितम् एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि 645
(ण) महाभारतकालीन-सामाजिक-व्यवस्था एवं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि 648
विदुरनीतिः एवं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि 650

विगत वर्षों के वस्तुनिष्ठ प्रश्न एवं उनके उत्तर 653-665
Code-73
June-12 Paper-III Sanskrit
Traditional Subjects
संस्कृत परम्परागत विषयः प्रश्नपत्र-111 666-669
Code-25
June-12 Paper-III Sanskrit
Traditional Subjects
संस्कृत परम्परागत विषयः प्रश्नपत्र-111 670-673

समेषां वस्तुनिष्ठानां प्रश्नानामुत्तरं मया।
संकलय्य कृतो ग्रन्थश्छात्राणां ज्ञानवृद्धये।।
साफल्यं ये परीक्षायां वाञ्छन्ति प्रतियोगिनः।
बोधाय कृतवान् तेषां मन्दोऽप्युदयशंकरः।।

1

वैदिकसाहित्यविवेचनम्

(A) (Code-73) (क) वैदिकसाहित्यस्य परिचयः, (ख) वेदशब्दस्य स्वरूपम्, (ग) वेदानां वैशिष्ट्यम्, (घ) वेदानां रचनाकालः, (ङ) उपवेदाः एवं एतत्सम्बन्धिप्रश्नोत्तराणि–

(क) वैदिकसाहित्यपरिचयः–वेदः "सर्वज्ञानमयो हि" इति व्यवहारः प्रचलति। अयं वेदः संस्कृते आधाररूपः, सर्वेषां ज्ञानरत्नानां भाण्डागारं, सुखशान्तिसाधकः। सायणानुसारम्–**इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकमुपायं वेदयते स वेदः अपौरुषेयं वाक्यं वेदः।** संहिता-ब्राह्मणारण्यकोपनिषच्चतुर्विधभेदात्मको हि वेदशब्दः, ज्ञानलाभसत्तेत्यादिनानार्थकविद्धातोर्निष्पन्नः, सम्पूर्णज्ञान-रूपापौरुषेयशब्दराशिमभिव्यनक्ति। वेदानां संहिताभागे यज्ञे प्रयुक्तानां मन्त्राणां शुद्धस्वरूपं विद्यते। चतुर्णां वेदानां चतस्रः संहिताः, तासु ऋक्संहिता प्रचीनतमा। यज्ञस्वरूपप्रतिपादकः गद्यात्मको ब्राह्मणरूपो वेदभागः संहिताभागस्य व्याख्या-विनियोगविधायकरूप एव। ब्राह्मणेषु कौषितीकिशत-पथगोपथादयः प्रमुखाः। अरण्ये पठिता यज्ञस्याध्यात्मिक-स्वरूपप्रतिपादकाः वेदभागाः आरण्यकाणि, एतानि छन्दोबद्धरूपाणि गाथारूपाणि च। आरण्यकेषु ऐतेरयबृहदारण्यकमैत्रायणीत्यादीनि प्रमुखानि।

उपनिषदो हि ब्रह्मबोधिका मोक्षसाधनभूता पराविद्या वेदस्य चरमभागत्वेन वेदान्त इत्युच्यते। उपनिषत्सु ईशादयः एकादशप्रमुखाः। एषु ब्राह्मणभागः गृहस्थानां, आरण्यभागो वानप्रस्थानां उपनिषदश्च संन्यासिनां कृते विद्यते। एतैस्सह षण्णां वेदाङ्गानामपि ग्रहणं वैदिकसाहित्ये एव अन्तर्भवति।

वेदः	ब्राह्मणग्रन्थाः	आरण्यकग्रन्थाः	उपनिषदः
1. ऋग्वेदः	ऐतरेयः शांखायनः (कौषीतकी)	ऐतरेयः, शांखायनः	ऐतरेयः, कौषीतकी, माण्डूक्यः
2. यजुर्वेदः	शतपथब्राह्मणः, तैत्तिरीयब्राह्मणः	बृहदारण्यकः, तैत्तिरीयारण्यकः,	तैत्तिरीयोपनिषद्, कठोपनिषद् श्वेताश्वतरोपनिषद्
3. सामवेदः	पंचविंशः, षड्विंशः, आर्षेयः, दैवतः, छान्दोग्यः, संहिता, वंशः, जैमिनीयः, सामविधानम्	तवक्कारः, छान्दोग्यः	छान्दोग्यः, केनः
4. अथर्ववेदः	गोपथब्राह्मणः		

संस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि वर्त्तते। अखिलभूमण्डलेऽस्मिन् समुपलब्धेषु विविधभाषागत-प्राचीनग्रन्थेषु वेदः सर्वेभ्यः प्राचीनतम इति सर्वैरेव अङ्गीक्रियते। वेदो धर्मनिरूपणे स्वतन्त्रभावेन प्रमाणम्, स्मृत्यादयस्तु तन्मूलकतया। श्रुतिस्मृत्योर्विरोधे श्रुतिरेव गरीयसी। न केवलं धर्ममूलतयैव वेदाः समादृताः, अपितु विश्वस्मिन् सर्वप्राचीनग्रन्थतयाऽपि। प्राचीनानि धर्मसमाज-व्यवहार-प्रभृतीनि वस्तुजातानि बोधयितुं श्रुतय एव क्षमन्ते। प्रधानतया वेदो द्विविधः मन्त्ररूपो ब्राह्मणरूपश्च। तथा च संहिता-ब्राह्मण-आरण्यक-उपनिषद इति वेदस्य चत्वारः विभागाः विद्यन्ते। यथा–

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।।
(ऋक्-10.90.8)

यस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन्।
सामानि यस्य लोमानि अथर्वाङ्गिरसो मुखम्।।
स्कम्भं तं ब्रूहि कतमः स्विदेव सः।।
(अथर्व.10.7.20)

(ख) वेदशब्दस्य स्वरूपम्–ज्ञानलाभसत्तेत्यादि-नानार्थकविद्धातोः निष्पन्नोऽयं वेदशब्दः सम्पूर्णज्ञानरूपा-पौरुषेयशब्दराशिमभिव्यनक्ति। **विद्यन्ते धर्मादयः पुरुषार्थाः यैः ते वेदाः।** सायणाचार्येण **अपौरुषेयं वाक्यं वेदः** इति। ऋग्वेदभाष्यभूमिकायां सायणेनैव **इष्टप्राप्त्यनिष्टपरिहारयोर-लौकिकमुपायं यो वेदयति स वेद** इति प्रोक्तम्।

प्रातिशाख्येऽपि **विद्यन्ते धर्मादयः पुरुषार्था यैः ते वेदाः।** वेदशब्दस्य प्रयोगः चतुर्ष्वर्थेषु यथा–

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे।
विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात्।।

सत्तार्थकाद् विद्धातोः घञ् प्रत्यये कृते **विद्यते सत्तां गृह्णाति वस्तु अनेनेति वेदः।** विचारार्थकाद् विद्धातोः घञ् प्रत्यये कृते **विन्ते विचारयति धर्मब्रह्मणी क्रियाज्ञानमयं ब्रह्म वेति वेदः।** ज्ञानार्थकात् विद्धातोः घञ्प्रत्ययेन **विदन्त्येभिः धर्मब्रह्मणी क्रियाज्ञानमयं इति वेदः।** लाभार्थकात् विद्धातोः घञ् प्रत्ययेन **विदन्ते स्वरूपं लभन्ते वस्तु अनेनेति वेदः।** आपस्तम्बेन तु **मन्त्रब्राह्मणयोर्वेद नामधेयम्।**

ऋग्वेदभाष्यभूमिकायां तु विदन्ति, जानन्ति, विद्यन्ते, भवन्ति, विन्ते, विचारयति, विन्दन्ते, लभन्ते सर्वे मनुष्याः यैर्येषु वा तथा विद्वांसश्च भवन्ति ते वेदाः। यथा–

प्रत्यक्षेनानुमित्या वा यस्तूपायो न विद्यते।
एवं विदन्ति वेदेन तस्माद् वेदस्य वेदता।।

संहिताब्राह्मणारण्यकोपनिषच्चतुर्विधभेदात्मको हि वेदशब्दः। (क) संहिता छन्दोबद्धमन्त्रयुक्ता, ब्राह्मणभागो गद्यात्मको यागादिवर्णनपरकः, (ख) आरण्यकभागो छन्दोबद्धयुक्तो गाथारूपो वा विद्यते, (ग) उपनिषद्भागे तत्तत्संहितागतब्रह्मज्ञानादिविषयाणां वर्णनरूपेण संकलनम्। एते चत्वारो विभागाः चतुर्षु वेदेषु समुपलभ्यन्ते।

(ग) वेदानां वैशिष्ट्यम्–ज्ञानलाभसत्तेत्यादि-नानार्थकविद्धातोः निष्पन्नोऽयं वेदशब्दः सम्पूर्णज्ञानरूपा-पौरुषेयशब्दराशिमभिव्यनक्ति। अतः विन्ते विचारयति धर्मब्रह्मणी क्रियाज्ञानमयं ब्रह्म वेति वेदः। वेदास्तु धर्मप्रतिपादकाः, विश्वकोषरूपाः, अत एव वेदोऽखिलो धर्ममूलमिति। किञ्च इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेद इति। अत एव भाष्यभूमिकायां सायणाचार्यः–

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।
एतं विदन्ति वेदेन तस्मात् वेदस्य वेदता।।

धर्ममूलकत्वमपि प्रतिपाद्यते यथा–

यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।
स सर्वोभिहितो वेदे सर्वज्ञानमयो हि सः।।

अत एव **ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च** इति प्रोक्तम्। न केवलं आध्यात्मिकदृष्ट्यापि तु ऐतिहासिकभौगोलिकवैज्ञानिकविषयाणां अर्थात् यत् किंचिदिह जगति विद्यते तेषां सर्वेषां बीजरूपो वेद एव। समालोचकैरपि 'विश्वकोष' इत्युपाधिना वेदान् अलङ्कुर्वन्तीति। उक्तञ्च स्मृतीषु–

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति मानवः।।

(घ) वेदानां रचनाकालः–भारतीयावैदिकाचार्याणां कृते वेदानामपौरुषेयत्वात् सृष्ट्युत्पत्ति एवास्य सत्ता विद्यते। परन्तु पाश्चात्यैः कतिपयैः भारतीयैश्च वेदानां कालनिर्धारणं कृतम्। तेषु–

1. मैक्समूलरमहोदयेन छन्दमन्त्रब्राह्मणसूत्रात्मकानि चत्वारि युगानि स्वीकृत्य प्रत्येकयुगविकासकालः 200 वर्षखण्डः स्वीकृतं तेन 3210 वर्षेभ्यः पूर्वमर्थात् ईसातः 1200 वर्षपूर्वमेव ऋग्वेदरचनाकालः। वैदिकः कालः चतुर्षु (छन्दकालः-मन्त्र-ब्राह्मण-सूत्र) भागेषु विभक्तः।

(क) छन्दकालः 1200-1000 ई. पू. ऋग्वेदः सामवेदश्च। (ख) मन्त्रकालः 1000-800 ई. पू. यजुर्वेदोऽथर्ववेदश्च। (ग) ब्राह्मणकालः 800-600 ई. पू. ब्राह्मणग्रन्था उपनिषदः। (घ) सूत्रकालः 600 ई. पू. सूत्रसाहित्यम्।

2. बेबरमहोदयेन अनुमानेन 1500 B.C. कालः स्वीकृतम्।

3. जैकोबीमहोदयेन ज्योतिषीयगणनानुसारं 2500 B.C. स्वीकृतम्।
4. बालगङ्गाधरतिलकेन वसन्तसम्पातमधिकृत्यैव ज्योतिषगणनया चतुर्षु भागेषु स्वीकृतम्।
   (क) अदितिकालः 6000-4000 ई.पू.।
   (ख) मृगशिराकालः 4000-2500 ई.पू.।
   (ग) कृत्तिकाकालः 2500-1400 ई.पू.।
   (घ) अन्तिमकालः 1400-500 ई.पू.।
5. ओरायननामके ग्रन्थे 4000 B.C. तः 6000 B.C. स्वीकृतम्।
6. शङ्करबालकृष्णदीक्षितेन शतपथब्राह्मणदिशा नक्षत्रगणया 3500 B.C. वेदरचनाकालः स्वीकृतः।

एवमेव विन्टरनित्ज अश्विनामदासैरपि तत्समकालीनमेव वेदकालः निर्णीयते, तथापि तिलकमहोदयस्य काल-निर्धारणमतीव वैज्ञानिकमिति इतिहासज्ञानामभिमतम्। पुरुष-सूक्ते सृष्ट्यादितो एव वेदाः आसन् इति अष्टममन्त्रेण ज्ञायते दिगिति।

(ङ) उपवेदाः–चतुर्भिर्वेदैस्सह सम्बद्धाः चत्वारो उपवेदाः। ऋग्वेदसम्बद्धो आयुर्वेदः वैद्यविद्याबोधकः। यजुर्वेदसम्बद्धो धनुर्वेदः शस्त्रविद्याप्रतिपादकः। सामवेदसम्बद्धो गन्धर्ववेदः गायनविद्याप्रतिपादकः। अथर्ववेदसम्बद्धो स्थापत्यवेदः शिल्पविद्याप्रतिपादकः। चरणव्यूहानुसारेण अथर्ववेदस्य अर्थशास्त्रं उपवेदमिति।

वेदः (अपौरुषेयः)

1. ऋग्वेदः (आयुर्वेद) — शाकल, वाष्कल
2. यजुर्वेदः (धनुर्वेद) — काण्व, माध्यन्दिन
3. सामवेदः (गान्धर्ववेद) — कौथुम, जैमिनीय, राणायणीय
4. अथर्ववेदः (शिल्पवेद) — पैप्पलाद, शौनक

वैदिकसाहित्यस्य परिचयात्मकः वैशिष्ट्यात्मकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—कति वेदाः सन्ति, के च ते?
उत्तरम्—चत्वारो वेदाः, 1. ऋग्वेदः, 2. यजुर्वेदः, 3. सामवेदः, 4. अथर्ववेदः।

2. **प्रश्नः**—वेदानां कति संहिताः सन्ति?
उत्तरम्—चत्वारि- ऋग्यजुःसामाथर्वभेदात्।

3. **प्रश्नः**—वेदस्य का परिभाषा?
उत्तरम्—मन्त्रब्राह्मणयोर्वेद नामधेयम्। इष्टप्राप्त्य-निष्टपरिहारयोः अलौकिकम् उपायं यो ग्रन्थो वेदयति स वेदः।

4. **प्रश्नः**—'वेदत्रयी' इत्यस्य किं तात्पर्यम्?
उत्तरम्—1. ऋग्वेदः, 2. यजुर्वेदः, 3. सामवेदश्च।

5. **प्रश्नः**—पद्यात्मको वेदः कः?
उत्तरम्— ऋग्वेदः।

6. **प्रश्नः**—वैदिकसाहित्यं कतिविधं विभज्यते? के च ते?
उत्तरम्—चतुर्विधं विभज्यते, 1. वेदानां संहिताः, 2. ब्राह्मणग्रन्थाः, 3. आरण्यकग्रन्थाः, 4. उपनिषद्ग्रन्थाः।

7. **प्रश्नः**—चत्वारो वेदविषयाः के सन्ति?
उत्तरम्—विज्ञानकर्मोपासनाज्ञानकाण्डभेदात्।

8. **प्रश्नः**—वेदेषु कति स्वराः? के च ते?
उत्तरम्—त्रयः स्वराः, 1. उदात्तः, 2. अनुदात्तः, 3. स्वरितः।

9. **प्रश्नः**—वेदेषु कति विकृतयः? के च ते?
उत्तरम्—अष्ट विकृतयः, 1. जटा पाठः, 2. माला, 3. शिखा, 4. रेखा, 5. ध्वजः, 6. दण्डः, 7. रथः, 8. घनः।

10. **प्रश्नः**—वेदानां कियत्यः ऋत्विजः सन्ति?
उत्तरम्—चत्वारः, 1. ऋग्वेदः-होता, 2. यजुर्वेदः-अध्वर्युः, 3. सामवेदः-उद्गाता, 4. अथर्ववेदः-ब्रह्मा।

11. **प्रश्नः**—सर्वेषां वेदानां कियत्यः शाखाः सन्ति?
उत्तरम्—एकत्रिंशदधिकैकादशशतानि (1131) शाखाः।

12. **प्रश्नः**—वर्तमानकाले कियत्यः शाखाः उपलब्धाः?
उत्तरम्— (12) द्वादशशाखाः उपलब्धाः।

13. प्रश्नः—वेदः इत्यत्र कः प्रत्ययः?
उत्तरम्—विद् + घञ् प्रत्ययः। (विद् ज्ञाने–ज्ञानप्राप्तिः करणम्)

14. प्रश्नः—सम्प्रति कति वेदाः वर्तन्ते?
उत्तरम्—चत्वारो वेदाः।

15. प्रश्नः—प्राचीनतमः वेदः कः?
उत्तरम्— ऋग्वेदः।

16. प्रश्नः—कस्य वेदस्य कः उपवेदः, के च ऋषयः इति निर्दिशत?
उत्तरम्—1. ऋग्वेदस्य आयुर्वेदः (अग्निऋषिः), 2. यजुर्वेदस्य धनुर्वेदः (वायुऋषिः), 3. सामवेदस्य गान्धर्ववेदः (आदित्यऋषिः), 4. अथर्ववेदस्य अर्थवेदः (अंगिराऋषिः)।

17. प्रश्नः—कस्य वेदस्य 'ऋत्विक्' कः इति दर्शयत?
उत्तरम्—ऋग्वेदस्य होता, यजुर्वेदस्य अध्वर्युः, सामवेदस्य उद्गाता, अथर्ववेदस्य ब्रह्मा।

18. प्रश्नः—चतुर्णां वेदानां कति संहिताः सन्ति?
उत्तरम्—चतस्रः संहिताः।

19. प्रश्नः—चतसृषु संहितासु के प्राचीनतमा?
उत्तरम्— ऋक्संहिता प्राचीनतमा।

20. प्रश्नः—यज्ञस्वरूपप्रतिपादकः गद्यात्मको ब्राह्मणरूपो वेदभागः कः?
उत्तरम्—संहिताभागस्य व्याख्याविनियोगविधायकरूप एव।

21. प्रश्नः— ब्राह्मणेषु के सन्ति प्रमुखाः?
उत्तरम्—कौषितीकिशतपथगोपथादयः प्रमुखाः।

22. प्रश्नः—छन्दोबद्धरूपाणि गाथारूपाणि च के सन्ति?
उत्तरम्—आरण्यकाणि।

23. प्रश्नः—अरण्ये पठिता यज्ञस्याध्यात्मिकस्वरूप-प्रतिपादकाः वेदभागाः कानि सन्ति?
उत्तरम्—आरण्यकाणि।

24. प्रश्नः—आरण्यकेषु कानि प्रमुखानि सन्ति?
उत्तरम्—ऐतरेयबृहन्मैत्रायणीत्यादीनि प्रमुखानि।

25. प्रश्नः—वैदिकसाहित्ये वेदान्तशब्देन किं बोध्यते?
उत्तरम्—उपनिषदो हि ब्रह्मबोधिका मोक्षसाधनभूता पराविद्या वेदस्य चरमभागत्वेन वेदान्त इत्युच्यते।

26. प्रश्नः—उपनिषत्सु के सन्ति एकादशप्रमुखाः?
उत्तरम्—उपनिषत्सु ईशादयः एकादशप्रमुखाः।

27. प्रश्नः—ब्राह्मणभागः केषां कृते विद्यते?
उत्तरम्— गृहस्थानाम्।

28. प्रश्नः—आरण्यभागः केषां कृते वर्तते?
उत्तरम्—वानप्रस्थानाम्।

29. प्रश्नः—उपनिषदः केषां कृते अस्ति?
उत्तरम्—संन्यासिनां कृते विद्यते।

30. प्रश्नः—धर्मप्रतिपादकाः, विश्वकोषरूपाः के सन्ति?
उत्तरम्—वेदाः।

31. प्रश्नः— पतञ्जलेः अनुसारं ऋग्वेदस्य शाखा?
उत्तरम्—21 एकविंशतिः।

32. प्रश्नः—ऋग्वेदे सूक्तानां संख्या?
उत्तरम्—1028।

33. प्रश्नः— शौनकानुसारं ऋग्वैदिकऋचाः?
उत्तरम्—10५580।

34. प्रश्नः—ऋग्वेदे कतिपयानि मण्डलानि?
उत्तरम्— 10 दश।

35. प्रश्नः—के सन्ति चतुर्विधभेदात्मको वेदशब्दः?
उत्तरम्—संहिताब्राह्मणारण्यकोपनिषच्चतुर्विधभेदात्मको हि वेदशब्दः।

36. प्रश्नः—यज्ञे प्रयुक्तानां मन्त्राणां शुद्धस्वरूपं कुत्र विद्यते?
उत्तरम्—वेदानां संहिताभागे।

37. प्रश्नः—वेदस्य प्रधानतया कति भेदौ स्तः?
उत्तरम्—द्वौ भेदौ स्तः (संहिता-ब्राह्मणश्चेति)।

38. प्रश्नः—श्रुतिस्मृत्योर्विरोधे कः गरीयसी?
उत्तरम्— श्रुतिरेव गरीयसी।

39. प्रश्नः—'वेदोऽखिलो धर्ममूलम्' इति केन कथितम्?
उत्तरम्— महर्षिणा मनुना।

40. प्रश्नः— मन्त्रसमुदायः किमुच्यते?
उत्तरम्— संहिता।

41. प्रश्नः—यज्ञस्य वर्णनात्मको भागं किमभिधीयते?
उत्तरम्— ब्राह्मणः।

42. प्रश्नः—ऋग्वेदस्य प्रवक्ता कः?
उत्तरम्— व्यासः।

43. प्रश्नः— ऋग्वेदे प्रमुखसूक्तानि कानि सन्ति?
उत्तरम्— यम-यमी, पुरुरवा-उर्वशी, सरमा-पणि, नासदीय, विश्वामित्र-नदी संवाद।

44. प्रश्नः— सामवेदे ऋचायाः काः संख्या?
उत्तरम्— 1549

45. प्रश्नः— सामवेदस्य प्रवक्ता कः?
उत्तरम्— व्यासः।

46. प्रश्नः— सामवेदस्य ज्ञाता कः?
उत्तरम्— जैमिनी।

47. प्रश्नः—पतंजल्यनुसारं सामवेदस्य कियत्यः संख्या?
उत्तरम्—1000

48. प्रश्नः—पूर्वार्चिक-उत्तरार्चिकौ कस्याः संहितायाः भागः?
उत्तरम्—साम-संहितायाः।

49. प्रश्नः—सामवेदे का शिक्षा प्रचलिता?
उत्तरम्—नासदीयशिक्षा।

50. प्रश्नः—अथर्ववेदे सूक्तानां का संख्या?
उत्तरम्— 639

51. प्रश्नः—यजुर्वेदे मन्त्राणां संख्या कियत्यः?
उत्तरम्— 1975

52. प्रश्नः—यजुर्वेदे कण्डिकाणां संख्या कियत्यः?
उत्तरम्— 1975

53. प्रश्नः—यजुर्वेदस्य प्रथमश्रोता कः?
उत्तरम्—वैशम्पायनः।

वेदशब्दार्थविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—सायणाचार्येण का परिभाषा प्रतिपादिता?
उत्तरम्— 'अपौरुषेयं वाक्यं वेदः'

2. प्रश्नः—ऋग्वेदभाष्यभूमिकायां का परिभाषा कृता?
उत्तरम्—'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेदः'।

3. प्रश्नः—प्रातिशाख्ये का परिभाषा विहिता?
उत्तरम्— 'विद्यन्ते धर्मादयः पुरुषार्था यैः ते वेदाः।'

4. प्रश्नः—सत्तार्थकाद् विद्धातोः घञ् प्रत्यये कृते कोऽर्थः?
उत्तरम्—'विद्यते सत्तां गृह्णाति यस्तु अनेनेति वेदः।'

5. प्रश्नः—विचारार्थकाद् विद्धातोः घञ् प्रत्यये कृते कोऽर्थः?
उत्तरम्—'विन्ते विचारयति धर्मब्रह्मणी क्रियाज्ञानमयं ब्रह्म वेति वेदः।'

6. प्रश्नः—ज्ञानार्थकात् विद्धातोः घञ्प्रत्ययेन वेदशब्दस्यार्थः भवति?
उत्तरम्—'विदन्त्येभिः धर्मब्रह्मणी क्रियाज्ञानमयं इति वेदः।'

7. प्रश्नः—लाभार्थकात् विद्धातोः घञ् प्रत्ययेन वेदशब्दस्यार्थः भवति–
उत्तरम्— 'विदन्ते स्वरूपं लभन्ते यस्तु अनेनेति वेद।'

8. प्रश्नः—आपस्तम्बेन तु का परिभाषा कृता?
उत्तरम्— मन्त्रब्राह्मण्योर्वेद नामधेयम्।

9. प्रश्नः—वैशेषिकदर्शने का परिभाषा प्रतिपादिता?
उत्तरम्— 'बुद्धिपूर्वा व्याकृतिर्वेदे'

10. प्रश्नः— यास्काचार्येण का परिभाषा विहिता?
उत्तरम्— 'पुरुषविद्याऽनित्यत्वात् कर्मसम्पत्तिर्मन्त्रे वेदे।'

11. प्रश्नः—वेदशब्दस्य सिद्धेः प्रकारः?
उत्तरम्— विद्+घञ्।

12. प्रश्नः— वेदशब्दस्य ज्ञानम्?
उत्तरम्— मंत्र-संहितानां ज्ञानम्।

13. प्रश्नः— संहितायाः का परिभाषा?
उत्तरम्—छन्दोबद्धमन्त्रयुक्ता, ब्राह्मणभागो गद्यात्मको यागादिवर्णनपरकः।

14. प्रश्नः—आरण्यकभाग इत्यस्य का परिभाषा?
उत्तरम्—छन्दोबद्धयुक्तो गाथारूपो वा विद्यते।

15. प्रश्नः—उपनिषद्भागस्य किं स्वरूपम्?
उत्तरम्—तत्तत्संहितागत-ब्रह्मज्ञानादिविषयाणां वर्णन-रूपेण संकलनम्।

वेदानां रचनाकालविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः— मैक्समूलरमहोदयेन ऋग्वेदरचनाकालः मन्यते?
उत्तरम्— ईसातः 1200 वर्षपूर्वमेव।

2. **प्रश्नः**—विन्टरनित्सानुसारं वेदानां कालक्रमः?
उत्तरम्— 3500 ई.पू.।

3. **प्रश्नः**—ज्योतिषानुसारं वैदिकतिथेः निर्धारणं केन कृतम्?
उत्तरम्— लोकमान्यबालगंगाधरतिलकमहोदयेन।

4. **प्रश्नः**— तिलकमहोदयेन अदितिकालः मन्यते?
उत्तरम्— 6000–4000 ई.पू.।

5. **प्रश्नः**— तिलकमहोदयेन मृगशिराकालः मन्यते?
उत्तरम्— 4000–2500 ई.पू.।

6. **प्रश्नः**— तिलकमहोदयेन कृत्तिकाकालः मन्यते?
उत्तरम्— 2500–1400 ई.पू.।

7. **प्रश्नः**—तिलकमहोदयेन अन्तिमकालः मन्यते?
उत्तरम्— 1400–500 ई.पू.।

8. **प्रश्नः**— ओरायननामके ग्रन्थे वेदानां कालक्रमः?
उत्तरम्— 4000B.C. तः 6000B.C. स्वीकृतम्।

9. **प्रश्नः**—शङ्करबालकृष्णदीक्षितानुसारं वेदानां कालक्रमः?
उत्तरम्— 3500 B.C.

10. **प्रश्नः**—जैकोबीमहोदयज्योतिषीयगणनानुसारं वेदानां कालक्रमः?
उत्तरम्— 2500 B.C. स्वीकृतम्।

उपवेद-विषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—वैदिकसाहित्ये चतुर्भिर्वेदैस्सह सम्बद्धाः कति उपवेदाः सन्ति?
उत्तरम्—चत्वारो उपवेदाः।

2. **प्रश्नः**—ऋग्वेदसम्बद्धो उपवेदः कः?
उत्तरम्—आयुर्वेदः वैद्यविद्याबोधकः।

3. **प्रश्नः**—यजुर्वेदसम्बद्धो उपवेदः कः?
उत्तरम्—धनुर्वेदः शस्त्रविद्याप्रतिपादकः।

4. **प्रश्नः**—सामवेदसम्बद्धो उपवेदः कः?
उत्तरम्—गन्धर्ववेदः गायनविद्याप्रतिपादकः।

5. **प्रश्नः**—अथर्ववेदसम्बद्धो उपवेदः कः?
उत्तरम्— स्थापत्यवेदः/ अर्थशास्त्रं वा।

(B) (Code-73) (च) वैदिकभाष्यकाराणां परिचयः- (क) सायणाचार्यः, (ख) माधवः, (ग) उव्वटः, (घ) महीधरः, (ङ) स्कन्दस्वामी, (च) वेंकटमाधवः, (छ) हलायुधः, (ज) नारायणः, (झ) आनन्दतीर्थः, (ञ) भरतस्वामी, (ट) शङ्कराचार्यः, (ठ) दयानन्दसरस्वती, (ड) महर्षि अरविन्द, (ढ) प्रो.एच.एच.विल्सनः, (ण) प्रो.ओल्डेनवर्गः एवं तत्सम्बन्धिवस्तुप्रश्नोत्तराणि-

(च) वैदिकभाष्यकाराणां परिचयः

(क) सायणाचार्यः (1364.1387) बुक्कहरिहरकालः)—वैदिकभाष्यकारेषु अन्यतमः सायणाचार्यः विजयनगरसाम्राज्ञः बुक्कस्य हरिहरस्य च आमात्यः सेनानीश्चासीत्। भारद्वाजगोत्रोत्पन्नस्य सायणस्य पितुर्नाम मायणः मातुश्च श्रीमती सती देवी। सायणस्य ज्येष्ठभ्राता विख्यातो दार्शनिकः, मीमांसकः, धर्मशास्त्रविद् माधवाचार्यः आसीत्। सायणस्य कनिष्ठभ्रातुर्नाम भोगनाथः आसीत्, असौ भोलानाथः प्रसिद्धकविः आसीत्। वैदिकसमुदायस्य यथार्थवेत्ता सायणः महाराजबुक्काज्ञया स्वज्येष्ठभ्रातुः माधवाचार्यस्याभिप्रेरणया वेदभाष्यरचनायां प्रवृत्तोऽभूत्। महाराजबुक्कस्य हरिहरस्य च कालात् चतुर्दशशताब्देरुत्तरार्द्ध एवास्य भाष्यरचनाकालः स्वीक्रियते।

आचार्यसायणः वाजसनेयिसंहितां विहाय अन्यासु सर्वासु संहितासु प्रायशः अष्टब्राह्मणग्रन्थेषु च भाष्यं कृतवान्। सम्प्रति उपलब्धेषु वेदभाष्येषु सायणकृतभाष्यं सर्वतोप्रामाणिकम्। शैली-भाष्यं भूमिकापूर्वम्, पुष्पिकायां समानः परिचयः, क्रमानुसारं वर्णनम्।

अन्यकृतयः—सुभाषितसुधानिधिः, प्रायश्चित्तसुधानिधिः, पुरुषार्थः, आयुर्वेदः, यज्ञतन्त्रः।

सायणाचार्यस्य वैशिष्ट्यम्-सायणाचार्यः सायणकृतवेदभाष्यश्च वैदिकवाङ्मये महत्त्वपूर्णं स्थानं बिभर्ति। यतोहि-

1. सायणः-वैदिकसम्प्रदायस्य यथार्थवक्ता, तस्मात्तेन परम्परागतार्थमेव अङ्गीकृतम्। तत्कृतभाष्यावलोकनेन तस्य वेदानां षडङ्गानाञ्चाधिपत्यं परिलक्षितो भवति।
2. सायणकृतवेदानां भाष्यभूमिका अत्यन्तविलक्षणा।
3. ब्राह्मणारण्यकादीनामपि परम्परया भाष्यं (लेखनं) कृतम्।
4. प्रत्येकमहत्त्वपूर्णशब्दस्य व्युत्पत्तेः सिद्धेः स्वराघातस्य च वर्णनं पाणिनीयसूत्रसाहाय्येन प्रातिशाख्यसाहाय्येन च कृतम्।
5. विवादस्थलेषु यथा वेदानां कालनिर्धारणे, पौरुषेयापौरुषेयत्वविचारे निर्णयः स्थापितं, शास्त्रसम्मतम्।
6. आख्यायिकानां सूक्तीनाञ्च सप्रामाणिकविवेचनं कृतम्।
7. पुष्पिकायां परिचयः क्रमानुसारवर्णनञ्च वैशिष्ट्यम्।

इत्थं सर्वप्रथमतया एतद्बृहत्परिमितेन भाष्यः सम्पादनाय पूर्वापरविरोधमपसार्य नवीना दृष्टिः सायणाचार्येण दत्ता। पाश्चात्यानां बोधनेऽपि सायणभाष्यमेव साफल्यम्। अत एव केनचिदुक्तम्—**वेदार्थज्ञाने वस्तुतः सायणाचार्यः अन्धानां यष्टिरिवास्ति।** कैश्चित्तु एक एव भाष्यकर्ता सायणः इति स्वीकृतम्। सायणपरिचयसम्बन्धिपद्यद्वयम्–

सेनापत्यं च राज्यं च दण्डनेतृत्वमेव च।
सूर्यलोकाधिपत्यञ्च वेदभाष्यविदर्हति।।

अपि च—

दिष्ट्या दैष्टिकभावसंभृतं महासम्पद्विशेषोदयन्।
जित्वा चम्पनरेन्द्रमूर्जितयशाः, पत्यंगतः सायणः।।

(ख) माधवः—माधवनामधेयाः चत्वारो भाष्यकाराः। सायणभाष्यात्प्रागेव द्वित्राः सामसंहिताभाष्यकाराः तेषु प्रथमः माधवः। अस्य कालः षष्ठशताब्द्यां स्वीक्रियते। माधवाचार्यस्य पितुर्नाम नारायणः। साम(वेद)-संहितायाः खण्डयोः छन्दार्चिकोत्तरार्चिकयोरुपरि विवरणनामकं भाष्यं कृतम्। अद्यावधि भाष्यमिदं अमुद्रितावस्थायामेवास्ति। छन्दार्चिकोपरि कृतं भाष्यं छान्दसिकविवरणं, उत्तरविवरणभाष्यं तु उत्तरार्चिकभाष्यं नाम।

सामविवरणभाष्ये मङ्गलाचरणे त्रयीमयाय त्रिगुणात्मने नमः इति पद्यं बाणभट्टस्य कादम्बर्यां श्लोकांशे उपलब्धत्वात् ज्ञायते यत् बाणभट्टस्य पूजकाचार्योऽयम्। बाणभट्टकालः सप्तमशताब्द्यामिति कृत्वा षष्ठशताब्द्यां माधवोऽभूदिति। सामभाष्ये स्वराणां तद्भेदानां गेयानां मन्त्राणाञ्चातीवमनोहरतया वर्णनं कृतं माधवेन। माधवोऽयं ऋग्वेदस्यापि महान् विद्वान् आसीत्।

(ग) उव्वटः—शुक्लयजुर्वेदस्य माध्यन्दिनसंहितायाः भाष्यकारः उव्वटः क्वचित् औवटनामधेयः काश्मीरिको वैदिकविद्वान् आसीत्। जैयटगोत्रस्य वज्रटाख्यस्य दत्तकपुत्रोऽयमिति भोजसमकालिकः प्रतिपाद्यते, वस्तुतः ज्येष्ठभ्रातुः मम्मटस्य भोजराजादर्वाचीनत्वे सति उव्वटः सुतरां भोजकालिकः (1018) ईशवीयः दशमशताब्द्याः सिद्ध्यति। उज्जयिन्यां वसता क्वचिच्च गुर्जरप्रदेशे आनन्दपुरे वसता भाष्यं लिखितमिति मतद्वयं प्रचलति। उव्वटकृतभाष्यनाम 'मातृमोदः'।

अस्य भाष्यं लघ्वक्षरोऽपि सन् अतीवप्रामाणिकं प्रोज्ज्वलञ्चास्ति। माध्यन्दिनसंहितायाः अधिकृतवि[illegible]नयम्। अस्य भाष्यावलोकनेन ज्ञायते यत् अयं नितान्तः प्रौढदैवज्ञः आसीत्।

अन्यकृतयः—1. ऋक्प्रातिशाख्यटीका, 2. यजुःप्रातिशाख्यटीका, 3. ऋक्सर्वानुक्रमणीभाष्यम्, 4. ईशावास्योपनिषद्भाष्यञ्च।

(घ) महीधरः—शुक्लयजुर्वेदस्य माध्यन्दिनसंहितायाः भाष्यकारस्य महीधरस्य जन्म षोडशशतकस्योत्तरार्द्धे काश्यामभूदिति स्वरचितग्रन्थे मन्त्रमहोदधौ एव लिखितमनेन यत्–

अब्दे विक्रमतो जाते बाणवेदनृपर्मिते।
ज्येष्ठाष्टम्यां शिवस्याग्रे पूर्णो मन्त्रमहोदधिः।।

काशीब्राह्मणवंशीयो महीधरः काश्यामेव अध्ययनं विधाय काशीराज्ञः सान्निध्ये वेददीपनामकं भाष्यं माध्यन्दिनसंहितोपरि कृतवान्। अस्य मातुर्नाम लक्ष्मी, पितुर्नाम नृसिंहः फतुहदृष्टे वा गणेशो नाम गुरुश्चासीत्। यद्यपि भाष्यमिदं न मौलिकं तथाप्यर्थस्य विशदतया प्रतिपादकत्वेन नितान्तोपादेयम्। अस्य भाष्यस्य पाण्डुलिपिः सरस्वतीभवने संग्रहीताऽस्ति। अस्य भाष्योपरि उव्वटभाष्यस्य स्पष्टछाया प्रतिलक्षितो भवति। महीधरोऽयं वैष्णवाचार्यतन्त्ररहस्यज्ञो वैदिकसाहित्ये पारङ्गतश्चासीत्। अनेन वेदानां तन्त्ररहस्यप्रतिपादकानां विषये मन्त्रमहोदधिः नामकः ग्रन्थः 1645 ईसवीये लिखितः। महीधरः नृसिंहोपासकः।

(ङ) स्कन्दस्वामी—ऋग्वेदसंहितायाः सर्वप्रथमभाष्यकारः स्कन्दस्वामी गुजरातस्य वल्लभीवास्तव्यः आसीत्। अस्य कालनिर्णये भेदः दृश्यते तथापि शतपथब्राह्मणभाष्यकारस्य हरिहरस्वामिनः अयं गुरुरिति तद्वचनेनैव यथा–**व्याख्यां कृत्वाऽध्यापयन्मां श्रीस्कन्दस्वाम्यस्ति मे गुरुः** परिलक्षितो भवति, तेन हरिहरस्वामिनः 695 भाष्यकृतं, तेन एतत्पूर्वं स्कन्दस्वामिनः कालः 625 खीष्टाब्दसमः सिद्ध्यति। अनेन हर्षबाणयोः समकालिकोऽयम्। स्कन्दस्वामिना ऋग्वेदे नितरां विशदं भाष्यं विधाय निरुक्तेऽपि टीका कृता। भाष्ये सूक्तानामादौ देवानामुल्लेखः, प्राचीनानाम् अनुक्रमणीणामुद्धरणं, निघण्टुनिरुक्तादिभ्यः ग्रन्थेभ्यः प्रमाणानि प्राप्यन्ते, अतः अतीवं सरलं गाम्भीर्यरूपञ्चास्य भाष्यम्। सम्प्रति ऋग्वेदस्य चतुर्थाष्टकं यावदेव भाष्यं समुपलभ्यते। इत्थं

भाष्यप्रवृत्तिः प्रथमतया प्रवर्तनात् आदरणीयाः स्कन्दस्वामिनः वैदिकभाष्यकारेषु विशिष्टतमाः। ज्ञायते यथा–

वलभीविनवास्थेतामृगर्थामृगसंहृतिम् ।
भर्तृध्रुवसुतश्चक्रे स्कन्दस्वामी यथा स्मृतिः ।।

(च) वेंकटमाधवः–सम्पूर्ण-संहितायाः भाष्यकारः कौशिकगोत्रोत्पन्नः चैलदेशीयः वेंकटमाधवः वैदिकभाष्यकारेषु महत्त्वपूर्णं स्थानं भजते। अस्य पितुर्नाम वेंकटार्यः माता च सुन्दरीदेवी। सायणेन ऋग्वेदस्य एकस्मिन् भाष्ये अस्योल्लेखः कृतः, तेन सायणात्पूर्ववर्तित्वं माधवोऽयमिति सिद्ध्यति। अस्य द्वौ पुत्रौ आस्ताम्, वेंकटः गोविन्दश्च। अयं चोलदेशवास्तव्यः इति ज्ञायते। भिन्नैः प्रमाणैः 1300 संवततः पूर्वमस्य कालः स्वीक्रियते।

वेंकटमाधवविरचितं भाष्यं अतीवसंक्षिप्तं विद्यते। तद्वचनेनैव परिलक्ष्यते यथा–वर्जयन् शब्दविस्तारं शब्दैः कतिपयैरिति। अतः केवलं मन्त्रपदानामेव व्याख्या अनेन कृता। व्याकरणजन्यतथ्यानां निर्देशः भाष्येऽस्मिन् नास्ति, तथापि ब्राह्मणग्रन्थानां प्रामाण्यं सुष्ठुतया सन्निविशिष्येऽस्ति, अतः प्रामाणिकतया वेदार्थप्रतिपादने विशिष्टमस्य भाष्यम्। सम्प्रत्यपि अस्य भाष्यः मोतीलालबनारसीदासेन प्रकाशितं यस्य सम्पादकः डॉ. लक्ष्मणस्वरूपः। कतिपयविद्वांसैरनुमीयते यदनेन भाष्यद्वयं लिखितम्।

(छ) हलायुधः–सायणाचार्यात्पूर्ववर्तिषु शुक्ल-यजुर्वेदीयकाण्वसंहितायां भाष्यकर्तृषु महत्त्वपूर्णं स्थानं भजन्ते हलायुधाचार्याः। अस्य भाष्यारंभेऽवलोकनेन एव ज्ञायते यदयं बंगप्रदेशस्य हिन्दुराज्ञः सुप्रसिद्धलक्ष्मणसेनस्य व्यवहारमण्डपे धर्माधिकारीति गौरवपूर्णपदे प्रतिष्ठितो आसीत्। बाल्ये एवायं राजपण्डितो अभवत्। तदनुसारेण त्रयोदशशताब्दीयः हलायुधः इति निर्णीयते। अस्य भाष्यस्य नाम ब्राह्मणसर्वस्वम्। हलायुधः निष्णातवैदिकविद्वान् आसीत्। वैदिकधर्मस्य साक्षान्मूर्तिरयं हलायुधः ब्राह्मणसर्वस्वमलिखत। हलायुधः शैवदर्शन-वेद-मीमांसाआगमशास्त्रेषु पारङ्गतः।

अन्यकृतयः—1. ब्राह्मणसर्वस्वम्, 2. मीमांसासर्वस्वम्, 3. शैवसर्वस्वम्, 4. वैष्णवसर्वस्वम्, 5. पण्डितसर्वस्वम्।

(ज) नारायणः–ऋग्वेदीयभाष्यकारेषु विशिष्टोऽयं नारायणः। वेंकटमाधववचनं तु–

स्कन्दस्वामी नारायण उद्गीत इति ते क्रमात्।
चक्रुः सहैकमृग्भाष्यं पदवाक्यार्थगोचरम्।।

अनेन ज्ञायते यत् अस्यापि कालः सप्तशताब्दामेव। ऋग्वेदभाष्ये स्कन्दस्वामिनं साहाय्यं नारायणेन कृतमिति वेंकटमाधवो ब्रवीति। अतः अस्यापि भाषाशैली स्कन्दस्वामिसदृशी एव। अनेन पद्येनेदमप्यनुमीयते यत् ऋग्वेदस्य मध्यभागस्य भाष्यमनेन कृतम्।

केचन विद्वांसः सामभाष्यकर्तुः माधवस्य पिता नारायणः, ऋग्भाष्यकारश्च नारायणः एक एवेति स्वीकुर्वन्ति। निश्चयेन अद्यावधि अस्य कालविषयकं प्रमाणं नोपलभ्यते।

(झ) आनन्दतीर्थः–आनन्दतीर्थ एव मध्वनामधेयः। अयं मध्व एव द्वैतवादं प्रवर्तयामास। आनन्दतीर्थस्य कालः विक्रमस्य 1255 संवते स्वीक्रियते। अस्य अनेके ग्रन्थाः उपलभ्यन्ते, परन्तु ऋग्वेदस्य कतिपयमन्त्रेष्वेवास्य भाष्यं विद्यते। वैष्णवसम्प्रदायस्य आनन्दतीर्थः, तस्मात् वेदेष्वपि सर्वत्र नारायणस्य प्रतिपादनमेव मुख्यतया कृतमनेन। तेन स्वभाष्ये प्रोक्तम्–

स पूर्णत्वात् पुमान् नाम पौरुषे सूक्त ईरितः।
स एवाखिलवेदार्थ सर्वशास्त्रार्थ एव सः।।

जयतीर्थस्य कथनानुसारेण भाष्येऽस्मिन् आधिभौतिकाधिदैविकयोरर्थस्यातिरिक्तः आध्यात्मिकोऽर्थोऽपि सुष्ठुतया प्रतिपादितः। अध्यात्मरूपं चेदं भाष्यम्। द्वैतवादिषु प्रसिद्धं प्रशस्तञ्च आनन्दतीर्थस्य भाष्यम्। आनन्दतीर्थोऽयं अशीतिवर्षपर्यन्तमैहिकसुखं भुक्त्वा परलोकं ययौ इति दिक्।

(ञ) भरतस्वामी–सामसंहितायाः भाष्यकारः भरतस्वामी वैदिकभाष्यकारेषु विशिष्टं स्थानं भजते। तत् कृतभाष्येणैव ज्ञायते यदयं काश्यपगोत्रीयः, पितुर्नाम नारायणः, माता च यज्ञदादेवी। कालानुसारेण रामनाथनृपस्य शासनकालात् 1295 ईशवीतः समीपवर्ति वर्ततेऽयम्। अंतः त्रयोदश-शतकमस्य कालम्। अनेन सामवेदस्य सर्वेषामृचाणां व्याख्या कृता, उक्तञ्च–

इत्थं श्रीभरतस्वामी काश्यपो यज्ञदासुतः।
नारायणार्यतनयो व्याख्यात् साम्नामृचोऽखिलाः।।

स्वकालविषयेऽपि समकालीननृपस्य वर्णनं यथा–

होसलाधीश्वरे पृथ्वीं रामनाथे प्रशासति।

पूर्ववर्तिभिः भाष्यकारैः पर्याप्तसाहाय्यमनेन गृहीतम्। सामब्राह्मणानां भाष्यमप्यनेन विहितमिति दिक्।

(ट) शङ्कराचार्यः–भारतवर्षे अद्वैतवेदान्तदर्शनप्रवर्तकाः

भगवत्पादाः श्रीमच्छङ्कराचार्याः वैदिकभाष्यकारेषु विशिष्टतया महत्त्वपूर्णं स्थानं भजन्ते। एतेषां जन्म अद्यतः 1200 वर्षपूर्वं केरलप्रान्ते कालकटीग्रामे नम्बूदरीब्राह्मणपरिवारेऽभूदिति। गुरोर्नाम भगत्पादः।

साक्षाद्भगवत्स्वरूपेण शङ्कराचार्येण षोडशे वर्षे एव प्रस्थानत्रयीणां भाष्यं कृतम्। द्वादशात्मके वयसि ब्रह्मसूत्रं तदुपरि शारीरकभाष्यञ्च प्रणीतम्। एवमेव ईशकेनकठादिदशोपनिषदां, गीतायाश्च भाष्यं विलिख्य वैदिकसाहित्यं संवर्द्धितम्। उपनिषदां ब्रह्म परमतत्त्वरूपेण प्रतिपादनं कृत्वा अद्वैत-सिद्धान्तस्य प्रतिष्ठा कृता।

तत्त्वानां सवैदुष्यं निर्वचनं ज्ञानस्वरूपस्य सविवृतं विश्लेषणं विवादग्रस्तस्थलेषु प्रज्ञाज्ञापकमेतेषां भाष्यं वैदिकसाहित्ये विशिष्टं स्थानं विभर्ति।

(ठ) दयानन्द सरस्वती–अयं महात्मा गुजरात-प्रान्तान्तर्गत-टंकारानगरे 1824 ईसवीये जनिं लेभे। पितुर्नाम कर्षणः माता च रुक्मिणी। वैराग्येन गृहं परित्यज्य पूर्णानन्दयतेः संन्यासं गृहीत्वा 'दयानन्दसरस्वती' इत्याख्यां जगाम। अनेन आर्यसमाजस्य स्थापना कृता, तत्र मूर्तिपूजा वेदविरुद्धा इति। किञ्च स्त्रीशूद्रौ नाधीयाताम् अस्य वाक्यस्य सारतामुपस्थाप्य स्त्रीणामपि वेदाध्ययनाध्यापनं व्यवस्थापितम्। मातृपितृ-श्राद्धतर्पणादिविधिरपि वेदविरुद्धत्वेन खण्डनं कृतम्।

कृतयः—सत्यार्थप्रकाशः, ऋग्वेदभाष्यम्, यजुर्वेदभाष्यम्, ऋग्वेदादिभाष्यभूमिका, संस्कारविधिः, गोकरुणानिधिः, व्यवहारभानुः, आर्याभिविनः, एतेषु सत्यार्थप्रकाशः प्रमुखः। यस्योपरि युधिष्ठिरमीमांसककृतो भाष्योऽपि समुपलभ्यते।

दयानन्देन प्रथमतया नवीनदृष्ट्या वेदानां भाष्यं कृतम्। एते संहिताभागस्यैव वेदत्वं स्वीकुर्वन्ति। महर्षिपदं अलङ्कृतस्य दयानन्दस्य मृत्युः 1883 ईसवीये अभवत्। एतेषां ध्येयवाक्यं–

विश्वानि देव सवितर्दुरितानि परासुव
यद्भद्रन्तन्न आसुव।

दयानन्दस्य वैशिष्ट्यम्

महर्षिदयानन्दः वेदानां भाष्यकर्ता सन्नपि सामाजिक-धार्मिक-सांस्कृतिकदृष्ट्या महत्त्वपूर्णं स्थानं भजते–

1. स्त्री-शूद्राणामपि वेदाध्ययने अर्हतां प्रतिपाद्य विधवा-विवाहम्, विधवाश्रमम्, अनाथालयादिकञ्च प्रावर्तयत।
2. मूर्तिपूजायाः, पितृतर्पणादीनाञ्च वेदविरुद्धतया खण्डनं कृत्वा आर्यधर्मपुष्ट्यर्थं आर्यसमाजस्य स्थापनं कृता 1875 ईशवीये सत्यार्थप्रकाश इति ग्रन्थं चकार।
3. चतुर्णां वर्णानां कर्मणा विभाजनं न तु जन्मना इत्यनेन सामाजिकव्यवस्था पोषिता। जातिप्रथा च खण्डिता।
4. समाजे सर्वविधपाखण्डं, अन्धविश्वासं अस्पृश्यादिकं भूतप्रेतवादञ्च निराकरोत्।
5. वेदाध्ययने जनान् प्रेरयामास। स्वराष्ट्रसंस्कृतिपोषकश्च।
6. वेदरक्षा-गोरक्षा-गुरुकुलशिक्षापद्धतेः पोषकाः दयानन्दसरस्वतीमहोदयाः भारतीयसमाजे समाजसुधारकरूपेण विशिष्टं स्थानं भजते।

दयानन्दविषयकाः श्लोकाः–

गुणानामाधारो विदितश्रुतिशास्त्रार्थनिचयः,
समुद्धर्ता भर्ता पतितजनचिन्तार्तिहरिणः।
नयनात्मोत्सर्गं परहितरतः स्वार्थविरतो,
दयानन्दः स्वामी जयतु भुवने भास्कररुचिः।।
जयत्यसौ दयानन्दः निगमेन्दुः विचक्षणः।
योगीश्वरश्च वर्चस्वी ब्रह्मविद्वेदपारगः।।

(ड) महर्षि अरविन्दः–आधुनिकवेदव्याख्याकारेषु महर्षेररविन्दस्य विचारः सर्वथा प्रशंसनीयः उपादेयश्चास्ति। वेदमन्त्रेषु उच्चतमं, महत्तमं व्यापकं शाश्वतम् अपौरुषेयञ्च सत्यं निहितमिति महर्षेः मन्तव्यमस्ति। वेदमन्त्राः तु दिव्यस्रोतैः प्रस्फुरिताः प्रादुर्भूताः वा सन्ति। एतेषां मन्त्राणां द्रष्टारः ऋषिगणाः आध्यात्मिकशक्तिसम्पन्नाः गुह्यज्ञानयुक्ताश्च आसन्; यतः तत्र पर्यन्तं सर्वेषां सामान्यजनानां गतिः दृष्टिर्वा सम्भवा नास्ति। समाधिनिष्ठाः योगिनः ऋषयः एव मन्त्राणां अर्थप्रकटने समर्थाः सन्ति। सिद्धपुरुषाणां वाण्य एव वैदिकमन्त्राः। या वाणी आध्यात्मिकशक्तिसम्पन्ना वर्तते।

(ढ) प्रो.एच.एच.विल्सनः–प्रो.एच.एच.विल्सनः ऋग्वेदस्य प्रथम-आंग्ल-अनुवादकः अस्ति। चिकित्सा-विज्ञानस्य उच्चशिक्षां लब्ध्वा विल्सनः 'ईस्ट-इण्डिया-कम्पनी' इत्यस्याः संस्थायाः टकसाले पर्यवेक्षकरूपेण भारतवर्षं सम्प्राप्य स्वसौभाग्यम् अनुशंसन्तम् अत्रैव ऋग्वेदस्य प्रथम-आंग्ल-अनुवादं चकार। यस्य ग्रन्थस्य प्रकाशनं 1850 खीष्टाब्दे अभवत्।

(ण) प्रो.ओल्डेनवर्गः–वैदिकव्याख्याकारेषु ओल्डेन-

वर्गस्य विशिष्टं महत्त्वपूर्णं च स्थानं विद्यते। अनेन जर्मन विद्वद्वरेण ऋग्वेदस्योपरि स्वकीयं मार्मिकं विवेचनात्मकञ्च भाष्यं कृतम्, यत् 1909–1912 खीष्टाब्दे वर्लिनदेशत: प्रकाशितश्च।

(च) वैदिकभाष्यकाराणां परिचयात्मकानि वस्तुनिष्ठानि

1. **प्रश्नः**— प्रमुखवेद-भाष्यकाराः के सन्ति?
उत्तरम्—चत्वारः सायणः, महीधरः, कात्यायनः, दयानन्दः।

2. **प्रश्नः**—सायणाचार्यः कः आसीत्?
उत्तरम्—विजयनगरसाम्राज्ञः बुक्कस्य हरिहरस्य च आमात्यः सेनानीश्चासीत्।

3. **प्रश्नः**—भारद्वाजगोत्रोत्पन्नस्य सायणस्य पितुर्नाम कः आसीत्?
उत्तरम्—मायणः।

4. **प्रश्नः**—सायणस्य मातुः नाम किम्?
उत्तरम्— श्रीमती सती देवी।

5. **प्रश्नः**—सायणः कस्याज्ञया वेदभाष्यरचनायां प्रवृत्तोऽभूत्?
उत्तरम्— महाराजबुक्काज्ञया।

6. **प्रश्नः**—सायणः कस्याभिप्रेरणया वेदभाष्यरचनायां प्रवृत्तोऽभूत्?
उत्तरम्—स्वज्येष्ठभ्रातुः माधवाचार्यस्याभिप्रेरणया।

7. **प्रश्नः**— उपलब्धेषु वेदभाष्येषु सर्वतोप्रामाणिकं भाष्यम्?
उत्तरम्— सायणकृतभाष्यम्।

8. **प्रश्नः**—अष्टब्राह्मणग्रन्थेषु भाष्यं कः कृतवान्?
उत्तरम्—सायणः कृतवान्।

9. **प्रश्नः**—पाश्चात्यानां बोधनेऽपि कस्य भाष्यस्य साफल्यम्?
उत्तरम्—सायणभाष्यस्यैव साफल्यम्।

10. **प्रश्नः**—सायणस्य ज्येष्ठभ्राता कः आसीत्?
उत्तरम्—विख्यातो दार्शनिकः, मीमांसकः, धर्मशास्त्रविद् माधवाचार्यः।

11. **प्रश्नः**—सायणस्य कनिष्ठभ्रातुर्नाम किम्?
उत्तरम्—प्रसिद्धकविः भोगनाथः।

12. **प्रश्नः**—आचार्यसायणाचार्येण लिखितानि वैदिक-भाष्याणि कानि?
उत्तरम्—वाजसनेयिसंहितां विहाय अन्यासु सर्वासु संहितासु प्रायशः अष्टब्राह्मणग्रन्थेषु च भाष्याणि।

13. **प्रश्नः**— माधवनामधेयाः कति भाष्यकाराः?
उत्तरम्— चत्वारो भाष्यकाराः।

14. **प्रश्नः**—माधवस्य कालः कः स्वीक्रियते?
उत्तरम्—षष्ठशताब्द्यां स्वीक्रियते।

15. **प्रश्नः**—माधवाचार्यस्य पितुर्नाम किमासीत्?
उत्तरम्—नारायणः।

16. **प्रश्नः**—सामभाष्ये स्वराणां तद्भेदानां गेयानां मन्त्राणाञ्चातीवमनोहरतया वर्णनं केन कृतम्?
उत्तरम्—माधवेन कृतम्।

17. **प्रश्नः**—शुक्लयजुर्वेदस्य माध्यन्दिनसंहितायाः भाष्यकारः कः?
उत्तरम्— उव्वटः।

18. **प्रश्नः**—उव्वटस्य अपरनाम किमासीत्?
उत्तरम्—औवटनामधेयः काश्मीरिको वैदिक-विद्वान् आसीत्।

19. **प्रश्नः**—उव्वटकृतभाष्यनाम किम्?
उत्तरम्—मातृमोदः।

20. **प्रश्नः**— भोजकालिकः उव्वटस्य समयः कः?
उत्तरम्— (1018) ईसवीयः दशमशताब्द्याः सिद्ध्यति।

21. **प्रश्नः**— उव्वटस्य अन्यकृतयः के सन्ति?
उत्तरम्—1. ऋक्प्रातिशाख्यटीका, 2. यजुःप्रातिशाख्य-टीका, 3. ऋक्सर्वानुक्रमणीभाष्यम्, 4. ईशावास्योप-निषद्भाष्यञ्च।

22. **प्रश्नः**—शुक्लयजुर्वेदस्य माध्यन्दिनसंहितायाः भाष्यकारः कः?
उत्तरम्—महीधरः।

23. **प्रश्नः**—महीधरभाष्यकारस्य जन्मकालः कः?
उत्तरम्—षोडशशतकस्योत्तरार्द्धे (काश्यामभूदिति)।

24. **प्रश्नः**— माध्यन्दिनसंहितोपरि वेददीपनामकं भाष्यं कः कृतवान्?
उत्तरम्—महीधरः।

25. **प्रश्नः**—वेददीपनामकभाष्यस्य पाण्डुलिपिः कुत्र संगृहीताऽस्ति?
उत्तरम्—सरस्वतीभवने संगृहीताऽस्ति।

26. **प्रश्नः**—वेदानां तन्त्ररहस्यप्रतिपादकानां विषये मन्त्रमहोदधिः नामकः ग्रन्थः कः लिखितः?
उत्तरम्— महीधरः।

27. **प्रश्नः**— मन्त्रमहोदधिः नामकं ग्रन्थं कस्मिन् ईसवीये महीधरेन लिखितम्?
उत्तरम्—1645 ईसवीये लिखितम्।

28. **प्रश्नः**—महीधरः कस्य देवस्य उपासकः?
उत्तरम्—नृसिंहोपासकः।

29. **प्रश्नः**—महीधरस्य मातुर्नाम किम्?
उत्तरम्—लक्ष्मी।

30. **प्रश्नः**—महीधरस्य पितुर्नाम किम्?
उत्तरम्—नृसिंहः फतेहदृष्टो वा।

31. **प्रश्नः**— सम्पूर्ण-संहितायाः भाष्यकारः कः?
उत्तरम्—कौशिकगोत्रोत्पन्नः चैलदेशीयः वेंकटमाधवः।

32. **प्रश्नः**— वेंकटमाधवस्य पितुर्नाम किम्?
उत्तरम्— वेंकटाचार्यः।

33. **प्रश्नः**— वेंकटमाधवस्य मातुर्नाम किम्?
उत्तरम्—सुन्दरीदेवी।

34. **प्रश्नः**— वेंकटमाधवस्य कालः किमासीत्?
उत्तरम्—1300 संवतत: पूर्वमस्य कालः स्वीक्रियते।

35. **प्रश्नः**— वेंकटमाधवस्य भाष्यः केन प्रकाशितम्?
उत्तरम्—मोतीलालबनारसीदासेन प्रकाशितम्।

36. **प्रश्नः**— वेंकटमाधवस्य भाष्यस्य सम्पादकः कः?
उत्तरम्— डॉ. लक्ष्मणस्वरूपः।

37. **प्रश्नः**— वेंकटमाधवस्य कौ द्वौ पुत्रौ आस्ताम्?
उत्तरम्—वेंकटः गोविन्दश्च।

38. **प्रश्नः**— वेंकटमाधवस्य निवासस्थानं कुत्र वर्तते?
उत्तरम्—चोलदेशवास्तव्यः इति ज्ञायते।

39. **प्रश्नः**—शुक्लयजुर्वेदीयकाण्वसंहितायाः भाष्यकारःकः?
उत्तरम्—हलायुधः।

40. **प्रश्नः**— हलायुधस्य समयः कः निर्णीयते?
उत्तरम्—त्रयोदशशताब्दीयः हलायुधः इति निर्णीयते।

41. **प्रश्नः**—हलायुधः केषु शास्त्रेषु पारङ्गतः?
उत्तरम्—शैवदर्शन-वेद-मीमांसा-आगमशास्त्रेषु पारङ्गतः।

42. **प्रश्नः**—हलायुधस्य अन्यकृतयः के सन्ति?
उत्तरम्—1. ब्राह्मणसर्वस्वम्, 2. मीमांसासर्वस्वम्, 3. शैवसर्वस्वम्, 4. वैष्णवसर्वस्वम्, 5. पण्डितसर्वस्वम्।

43. **प्रश्नः**—ऋग्वेदीयभाष्यकारेषु विशिष्टः कः?
उत्तरम्—नारायणः।

44. **प्रश्नः**—नारायणस्य कालः कः?
उत्तरम्—सप्तमशताब्द्यामेव।

45. **प्रश्नः**—मध्वनामधेयः कः?
उत्तरम्—आनन्दतीर्थः।

46. **प्रश्नः**—आनन्दतीर्थस्य कालः कः?
उत्तरम्—विक्रमस्य 1255 संवत्।

47. **प्रश्नः**—सामसंहितायाः भाष्यकारः कः आसीत्?
उत्तरम्—भरतस्वामी।

48. **प्रश्नः**— भरतस्वामीमहोदयस्य पितुर्नाम किम्?
उत्तरम्— नारायणः।

49. **प्रश्नः**— भरतस्वामीमहोदयस्य मातुर्नाम किम्?
उत्तरम्— यज्ञदादेवी।

50. **प्रश्नः**— भरतस्वामीमहोदयस्य समयः कः?
उत्तरम्— त्रयोदशशतकम्।

51. **प्रश्नः**— अद्वैतवेदान्तदर्शनप्रवर्तकः कः आसीत्?
उत्तरम्— शङ्कराचार्यः।

52. **प्रश्नः**— शङ्कराचार्यस्य जन्म कदा अभूत्?
उत्तरम्—1200 वर्षपूर्वं केरलप्रान्ते कालकटीग्रामे नम्बूदरीब्राह्मणपरिवारेऽभूदिति।

53. **प्रश्नः**—शङ्कराचार्येण प्रस्थानत्रयीणां भाष्यं कस्मिन् वर्षे कृतम्?
उत्तरम्—षोडशे वर्षे एव।

54. **प्रश्नः**— दयानन्दसरस्वतीमहोदयस्य समय कः?
उत्तरम्—गुजरातप्रान्तान्तर्गत-टंकारानगरे 1824 ईसवीये।

55. **प्रश्नः**— दयानन्दसरस्वतीमहोदयस्य पितुर्नाम किम्?
उत्तरम्— कर्षणः।

56. **प्रश्नः**— दयानन्दसरस्वतीमहोदयस्य मातुर्नाम किम्?
उत्तरम्—रुक्मिणी।

57. **प्रश्नः**— आर्यसमाजस्य स्थापना केन कृता?
उत्तरम्—दयानन्दसरस्वतीमहोदयेन।

58. **प्रश्नः**—सत्यार्थप्रकाशस्य रचनाकारः कः?
उत्तरम्—दयानन्दः।

59. **प्रश्नः**— दयानन्दस्य मृत्युः कदा अभवत्?
उत्तरम्—1883 ईसवीये अभवत्।

60. **प्रश्नः**—दयानन्दस्य ध्येयवाक्यं किम्?
उत्तरम्—'विश्वानि देव सवितर्दुरितानि परासुव यद्भद्रन्तन्न आसुव।'

61. **प्रश्नः**—आधुनिकवेदव्याख्याकारेषु कस्य विचारः सर्वथा प्रशंसनीयः उपादेयश्चास्ति?
उत्तरम्—महर्षेररविन्दस्य।

62. **प्रश्नः**—मन्त्राणां अर्थप्रकटने के समर्थाः सन्ति?
उत्तरम्—समाधिनिष्ठः योगिनः ऋषयः।

63. **प्रश्नः**—सिद्धपुरुषाणां वाणी का?
उत्तरम्—वैदिकमन्त्राः।

64. **प्रश्नः**—आध्यात्मिकशक्तिसम्पन्ना कस्या वाणी?
उत्तरम्—सिद्धपुरुषाणां वाणी।

65. **प्रश्नः**—ऋग्वेदस्य प्रथम-आंग्ल-अनुवादकः कः?
उत्तरम्—प्रो.एच.एच.विल्सनः।

66. **प्रश्नः**— चिकित्साविज्ञानस्य उच्चशिक्षां केन लब्धम्?
उत्तरम्— विल्सनमहोदयेन।

67. **प्रश्नः**—ऋग्वेद-सायणभाष्यग्रन्थस्य प्रकाशनं कस्मिन् खीष्टाब्दे अभवत्?
उत्तरम्—1850 खीष्टाब्दे अभवत्।

(C) (Code-73) (छ) वेदस्य पञ्चभागाः (ज) वेदोऽखिलो धर्ममूलम् एवं एतत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(छ) वेदस्य पञ्चभागाः

विधिमन्त्रनामधेयनिषेधार्थवादभेदैः पञ्चविधः।

1. विधिभागः, 2. मन्त्रभागः, 3. नामधेयभागः, 4. निषेधभागः, 5. अर्थवादः इति पञ्चविधः।

1. विधिभागः—अर्थसंग्रहे तत्राज्ञातार्थज्ञापको वेदभागो विधिः। स च विधिः यादृशमर्थं प्रमाणान्तरेणाप्राप्तं भवति, तादृशमर्थं विधत्ते। यथा—**अग्निहोत्रं जुहुयात् स्वर्गकामः** इति विधिर्मानान्तरेणाप्राप्तं स्वर्गप्रयोजनवद्धोमं विधत्ते। अग्निहोत्रहोमेन स्वर्गं भावयेदिति वाक्यार्थबोधः। प्रथमतया विधिर्द्विविधः—1. गुणविधिः, 2. विशिष्टविधिः।

(क) गुणविधिः—यत्र कर्ममानान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते। यथा 'दध्ना जुहोति' इत्यत्र होमस्य अग्निहोत्रं जुहुयादित्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानं दध्ना होमं भावयेदिति।

(ख) विशिष्टविधिः—यत्र तूभयप्राप्तं तत्र विशिष्टं विद्यते यथा सोमेन यजेत। अत्र सोमयागयोरप्राप्तत्वात् सोमविशिष्टयागविधानम्।

द्वितीयतया विधिः चतुर्विधः—उत्पत्तिविधिः-विनियोगविधिः-अधिकारविधिः-प्रयोगविधिश्चेति।

1. **उत्पत्तिविधिः**—तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः। यथा—अग्निहोत्रं जुहोति, अत्र विधौ कर्मणः करणत्वेनान्वयः, अग्निहोत्रहोमेनेष्टं भावयेदिति।
2. **विनियोगविधिः**—अङ्गप्रधानसम्बन्धप्रधानबोधको विधिर्विनियोगविधिः। यथा—दध्ना जुहोति, एतस्य विधेः सहकारिभूतानि श्रुतिलिङ्गवाक्यप्रकरणस्थान-समाख्याऽरूपाणि षट् प्रमाणानि।
   अस्या अपि त्रयो भेदाः विभक्तिरूपा एकाभिधानरूपा एकपदरूपा।
3. **अधिकारिविधिः**—कर्मजन्यफलस्वाम्यबोधको अधिकारिविधिः। कर्मजन्यफलस्वाम्यत्वं कर्मजन्यफल-भोक्तृत्वम्। यजेत स्वर्गकामः इत्यत्र स्वर्गमुद्दिश्य यागं विदध्यादनेन स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते।
4. **प्रयोगविधिः**—प्रयोगप्रांशुभावबोधको विधिः प्रयोगविधिः। स च अङ्गवाक्यैकवाक्यतापन्नः प्रधानविधिरेव।

तृतीयतया विधेस्त्रैविध्यम्- अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्च।

1. **अपूर्वविधिः**-उत्पत्तिविधिरेव अपूर्वविधिः।
2. **नियमविधिः**-नानासाधनसाध्यक्रियायामेकसाधन-प्राप्तावप्राप्तस्यापरसाधनस्य प्रापको विधिः नियमविधिः। यथा-व्रीहीनवहन्तीत्यत्र।
3. **परिसंख्याविधिः**-उभयोश्च युगपत्प्राप्तावितरव्यावृत्तिपरो विधिः परिसंख्याविधिः। यथा-पञ्चपञ्चनखा भक्ष्या, इदं हि वाक्यं न पञ्चनखभक्षणपरं, तस्य रागतः प्राप्तत्वात् नापि नियमपरं, पञ्चनखा पञ्चनखभक्षणस्य युगपत्प्राप्तेऽ-प्राप्त्यभावात्। अतः इदं पञ्चपञ्चनखभक्षणनिवृत्तिपरमिति परिसंख्याविधिः। परिसंख्याविधिः द्विविधा श्रौती लाक्षणिकी च। अत्र हि एव आवपन्तीति श्रौती परिसंख्या। एवकारेण पवमानातिरिक्तस्तोत्रव्यावृत्तेरभिधानात्। पञ्चपञ्चनखा भक्ष्याः इति लाक्षणिकी, इतरनिवृत्तिवाचक-पदाभावात्। अस्य त्रयो दोषाः-

श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात्।
प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदूषणा।।

यथा श्रुतस्य पञ्चनखभक्षणस्य हानात्, अश्रुतायाः अपञ्चपञ्चनखभक्षणावृत्तेः कल्पनात्, प्राप्तस्य चापञ्चपञ्चनखभक्षणस्य बाधनादिति। दोषत्रये दोषद्वयं शब्दनिष्ठं प्राप्तबाधस्त्वर्थनिष्ठमिति।

2. मन्त्रभागः-प्रयोगसमवेतार्थस्मारकाः मन्त्राः। मन्त्राणां तादृशार्थस्मारकत्वेनैवार्थत्वम्। मन्त्रोच्चारणे दृष्टफलकत्वे अदृष्टकल्पनायाः अन्याय्यत्वात् मन्त्रोच्चारफलं सर्वत्र अदृष्टार्थं नाङ्गीकरणीयमिति।

न च दृष्टार्थस्मरणस्य प्रकारान्तरेणापि सम्भवान्मन्त्राम्नानं व्यर्थमिति वाच्यम्। मन्त्रैरेव स्मर्तव्यमिति नियमविध्याश्रयणात्।

3. नामधेयभागः-नामधेयानां च विधेयार्थपरिच्छेदक-तयार्थवत्त्वम्। यथा उद्भिदा यजेत पशुकामः इत्यत्र उद्भिच्छब्दो यागनामधेयं, तेन च विधेयार्थः परिच्छेदः क्रियते। तथा हि अनेन वाक्येनाप्राप्तत्वात् फलोद्देशेन यागो विधीयते। यागसामान्यस्याविधेयत्वात् यागविशेष एव विधीयते। तत्र कोऽसौ यागविशेषः इत्यपेक्षायामुद्भिद् शब्दात् उद्भिद्रूपो याग इति ज्ञायते। 'उद्भिदा यागेन पशुं भावयेत्' इति सामानाधिकरण्येन नामधेयान्वयात्। नामधेये निमित्तचतुष्टयं, तत्त्व-मत्वर्थलक्षणाभयात्, वाक्यभेदभयात्। तत्प्रख्यशास्त्रात्, तद्व्यपदेशात्। उद्भिदा यजेत पशुकाम इत्यत्रोद्भिद्शब्दस्य यागनामधेयत्वं मत्वर्थलक्षणभयात्। उद्भिदा यागेन पशुं भावयेदिति विशिष्टविधौ मत्वर्थलक्षणेत्युक्तमेव। अत्र उद्भिद शब्दः यागस्यनामधेयः।

'चित्रया यजेत पशुकामः' इत्यत्र चित्राशब्दस्य कर्मनामधेयत्वं वाक्यभेदभयात्, तत्र चित्रायागेन पशुं भावयेदिति अर्थः। प्रकृतेष्टेरनेकद्रव्यवत्वेन चित्राशब्दवाच्यत्वोपपत्तिः।

अग्निहोत्रं जुहोतीत्यत्र अग्निहोत्रशब्दस्य कर्मनामधेयत्वम् तत्प्रख्यशास्त्रात्। तत्र गुणस्य प्रख्यापकस्य शास्त्रस्य विद्यमानत्वात् अग्निहोत्रशब्दः कर्मनामधेयमिति।

श्येनेनाभिचरन् यजेदित्यत्र श्येनशब्दस्य कर्मनामधेयत्वं तद्व्यपदेशात्।

4. निषेधभागः-पुरुषस्य निवर्तकं वाक्यं निषेधः। निषेधवाक्यानामनर्थहेतुक्रियानिवृत्तिजनकत्वेनैवार्थवत्वात्। यथा विधिः पुरुषं यागे प्रवर्तयति तथैव निषेधवाक्येन निवर्तनां प्रतिपादयन् स्वनिवर्तकत्वनिर्वाहार्थं निषेध्यस्य परानिष्ट-साधनत्वमाक्षिपन् पुरुषं ततो प्रवर्तयति। यथा-न कलञ्जं भक्षयेदिति। भिन्न-भिन्ननञर्थकैः भिन्नं-भिन्नं निषेधार्थं प्रतीयते।

5. अर्थवादः-प्रशस्तिनिन्दान्यतरपरं वाक्यमर्थवादः। अर्थवादवाक्यं हि स्वार्थप्रतिपादने प्रयोजनाभावाद्विधेयनिषेधयोः प्राशस्त्यनिन्दितत्वे लक्षणया प्रतिपादयति। अर्थवादस्य द्वौ प्रभेदौ-विधिशेषः निषेधशेषश्च।

वायुवै क्षेपिष्ठा देवता इत्यादिषु विधेयार्थप्राशस्त्यम्।
बर्हिषि रजतं न देयमित्यत्र निषेधस्य सोऽरोदीत।।

यद् अरोदीत् तत् रुद्रस्य रुद्रत्वमित्यादेर्निषेधस्य निन्दितत्वबोधकार्यतया निषेधशेषार्थवादः। पुनरपि अर्थवादः त्रिविधः-

गुणवादानुवादभूतार्थवादभेदात्। तच्च-
विरोधे गुणवादः स्यादनुवादोऽवते।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः।।

गुणवादः यथा-
आदित्यो यूपः अनुवादः-अग्निर्हिमस्य भेषजम्।
भूतार्थवादः यथा-इन्द्रो वृत्राय वज्रमुदयच्छत्।।

(ज) वेदोऽखिलो धर्ममूलम्-वेदेषु ज्ञान-विज्ञान-धर्म-दर्शन-सदाचार-संस्कृति-नैतिक-सामाजिक-राजनैतिक-प्रभृतीनां जीवनोपयोगिविषयाणां सन्निवेशोऽस्ति। अतएव यजुर्वेदे प्राप्यते-**सा प्रथमा संस्कृतिर्विश्ववारा** (यजु०7/14), वैदिकी संस्कृतिः प्रथमा संस्कृतिः आसीत्। वेदाः विश्वसाहित्यस्य प्राचीनतमाः ग्रन्थाः सन्ति।

वैदिकसाहित्य-शब्देन समग्रोऽपि मन्त्र-ब्राह्मण-आरण्यक-उपनिषत्-संग्रहरूपो निधिः गृह्यते। वेदानाम् आचारशिक्षा-दृष्ट्या नैतिक-दर्शनरूपेण च अतीव महत्त्वं वर्तते। कर्म-अकर्म, कर्तव्य-अकर्तव्येति चिन्तायां वेदा एव आदर्शरूपेण प्रस्तूयन्ते। वेदा मन्वादिभिः परमप्रमाणत्वेन उपन्यस्ताः। 'वेदोऽखिलो धर्ममूलम्' (मनुस्मृति 2.6) इति समुद्घोषयता मनुना समग्रस्यापि वेदस्य धर्माधाररूपेण प्रतिष्ठा विहिता। अतएव मनुना उच्यते–

वेदः स्मृतिः सदाचारः, स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षात् धर्मस्य लक्षणम्।।
(मनु० 2/12)

श्रुतिस्मृत्युदितं धर्मम्, अनुतिष्ठन् हि मानवः।
इह कीर्तिमवाप्नोति, प्रेत्य चानुत्तमं सुखम्।।
(मनु० 2/9)

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।
(मनु०)

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
सम्यक् संकल्पजः कामो धर्ममूलमिदं स्मृतम्।।
(याज्ञ०)

धर्मचिन्तायां कर्तव्यविचारणे च वेदाः परमप्रमाणभूताः सन्ति। **धर्मो विश्वस्य जगतः प्रतिष्ठा** विश्ववासिनां जनानामभ्युदयनिःश्रेयससिद्ध्यर्थां जगति विराजमानस्य धर्मस्य महती प्रतिष्ठा। स्वावयवार्थप्रतिपादकत्वेऽपि धर्मसूत्रं भारतीयानां प्राणभूतवेदस्य बहुत्र बह्वर्थेषु प्रयुक्तम्। भारतीयाः सनातनधर्मं दृढं विश्वसन्ति। तदनुसारं वेद एव हिन्दूसंस्कृतेः प्राचीनप्रमाणरूपेण स्वीकृतः। वेदस्य परमं प्रामाण्यं सर्वैः स्मृतिकारैः मन्वादिभिरपि स्वीकृतमस्ति। यथा–

धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः।।
(मनु०2/13)

वेदः सर्वासां विद्यानां मूलभूतः।'वेदोऽखिलो धर्ममूलम्' (मनुस्मृति-2/6)। धर्मो विश्वस्य जगतः प्रतिष्ठा। शुक्लयजुर्वेदे-'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्' इत्यनेन 'धर्मो रक्षति रक्षितः' इति मनुवचनेन च धर्मपालनार्थं धर्मरक्षणार्थं च उपदिश्यते। धर्मार्थकाम-मोक्षाख्येषु चतुर्षु पुरुषार्थेषु धर्मः प्रधानः विद्यते। धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रमुच्यते। धर्मशास्त्रं मुख्यतः पुरुषार्थचतुष्टयं प्रतिपादयति। तेषु सर्वेषु पुरुषार्थेषु मनुष्यजीवनस्य मार्गप्रवर्तकरूपेण तथा नियंत्रकरूपेण धर्मस्य प्राधान्यं स्वीक्रियते। जीवनस्य सर्वेषु कालेषु धर्मस्य प्रभावः साक्षात् परम्परया वा विद्यते। धर्मणोपार्जितोऽर्थः मनुष्यं सर्वविधानन्देन संयोज्य परवर्तिजीवनमपि सुखमयं करोति धर्मशास्त्रम्। धर्मशास्त्राणि पुराणानि अपि शास्त्रकोट्यवन्तर्भूतानि भवन्ति। धर्मशास्त्राणि एव स्मृतय इति व्यवह्रियते। वेदे विद्यमानाः धर्माः पुनः धर्मशास्त्रेषु स्मृताः। अतस्ताः स्मृतयः इति ख्याताः। मनुस्मृतिः समाजशास्त्रस्य अद्वितीया कृतिरस्ति। मन्वत्रि-विष्णुहारीतादिस्मृतयः विंशतयः सन्ति। देवल-चान्द्रायण-कपिलादिभिश्च विरचिताः स्मृतयः पञ्चाशत् सन्ति। आहत्य सप्ततिः स्मृतयस्सन्ति। मनुस्मृत्यादिग्रन्थेषु धर्मविषयकचर्चा, आध्यात्मिक-चर्चा-कारणात् धर्मशास्त्राण्यपि शास्त्ररूपेण गृहीतानि भवन्ति। अमरसिंहस्तु विश्वं धर्मः धारयति, जनाः धर्मं धारयन्तीति धर्मशब्दं व्युत्पादितवान्। मेदनी-हेमकोषयोस्तु पुण्यार्थे धर्मशब्दः प्रयुक्तः।

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत।।
(मनु-2×1)

'चोदनालक्षणोऽर्थो धर्मः' 'स्वर्गसाधनस्य शास्त्रैकसमधिगम्यातिशयस्य धर्मत्वेन सर्वसम्प्रतिपत्तेः' इति धर्मस्य परिभाषा कृता स्मृतिकारैः। मनुयाज्ञवल्क्या-दिभिः महर्षिभिः प्रणीतमिदं धर्मशास्त्रं समाजस्योपकारायैव प्रवर्त्तते। सर्वेषां धर्मशास्त्रग्रन्थानां प्रवर्त्तनं धर्ममार्गस्य प्रतिपादनार्थमेव। अतः प्रतिवेदं प्रतिशाखं प्रतिप्रान्तमपि धर्मशास्त्राणि विरचितानि सन्ति। अतएव वेदाः आचार-संहिता-रूपेण प्रमाणीक्रियन्ते।

सर्वेऽपि विद्वांसः भारतीयाः दार्शनिकाः, आचारशिक्षणप्रवणाः स्मृतिकाराः, वैयाकरणाः, अन्ये च शास्त्रकारा वेदानां परमप्रामाण्यं प्रतिपदम् उद्घोषयन्ति। अतएव महर्षिणा पतञ्जलिना कर्तव्यत्वेन समादिश्यते यत्–

'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।' (महा०आह्नि०1)

एते धर्मस्य गुणाः खलु मानवसमाजस्य विकासस्य बीजम् अस्ति। अन्येऽपि शास्त्रकाराः 'वैदिकमन्त्रोपदेशा-नुष्ठितकर्मभिरुत्पादितं पुण्यमेव धर्मः' इति स्वीकृतवन्तः। वैशेषिकशास्त्रमपि 'येन कर्मणा ऐहलौकिकपारलौकिक-

कल्याणसिद्धिः भवति स एव धर्मः' इति। ब्राह्मणस्य वेदाध्ययनं परमं तपः।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—पञ्चविधवेदभागाः के सन्ति?
उत्तरम्—1. विधिभागः, 2. मन्त्रभागः, 3. नामधेयभागः, 4. निषेधभागः, 5. अर्थवादः इति पञ्चविधः।

2. **प्रश्नः**—विधिभागः केन ज्ञायते?
उत्तरम्—अर्थसंग्रहे तत्राज्ञातार्थज्ञापको वेदभागो विधिभागः।

3. **प्रश्नः**—प्रथमतया विधिः कतिविधः के च ते?
उत्तरम्—विधिर्द्विविधः–1. गुणविधिः, 2. विशिष्टविधिः।

4. **प्रश्नः**— द्वितीयतया विधिः कतिविधः के च ते?
उत्तरम्—चतुर्विधः–उत्पत्तिविधिः–विनियोगविधिः–अधिकारिविधिः–प्रयोगविधिश्चेति।

5. **प्रश्नः**— विनियोगविधिः इत्यस्य का परिभाषा?
उत्तरम्—अङ्गप्रधानसम्बन्धप्रधानबोधको विधि-र्विनियोगविधिः।

6. **प्रश्नः**—अधिकारिविधिः इत्यस्य का परिभाषा?
उत्तरम्— कर्मजन्यफलस्वाम्यबोधको अधिकारिविधिः।

7. **प्रश्नः**—प्रयोगविधिः इत्यस्य का परिभाषा?
उत्तरम्—प्रयोगप्रांशुभावबोधको विधिः प्रयोगविधिः।

8. **प्रश्नः**—तृतीयतया विधिः कतिविधः के च ते?
उत्तरम्—त्रैविध्यम्-अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्च।

9. **प्रश्नः**—अपूर्वविधिः इत्यस्य का परिभाषा?
उत्तरम्—उत्पत्तिविधिरेव अपूर्वविधिः।

10. **प्रश्नः**— नियमविधिः इत्यस्य का परिभाषा?
उत्तरम्—नानासाधनसाध्यक्रियायामेकसाधनप्राप्ताव-प्राप्तस्यापरसाधनस्य प्रापको विधिः नियमविधिः। यथा–व्रीहीनवहन्ति।

11. **प्रश्नः**—परिसंख्याविधिः इत्यस्य का परिभाषा?
उत्तरम्—उभयोश्च युगपत्प्राप्तावितरव्यावृत्तिपरो विधिः परिसंख्याविधिः।

12. **प्रश्नः**—मन्त्रभाग इत्यस्य का परिभाषा?
उत्तरम्—प्रयोगसमवेतार्थस्मारकाः मन्त्राः।

13. **प्रश्नः**— नामधेयभागस्य का परिभाषा?
उत्तरम्—विधेयार्थपरिच्छेदकतयार्थवत्त्वम्।

14. **प्रश्नः**— निषेधभागः इत्यस्य का परिभाषा?
उत्तरम्—पुरुषस्य निवर्तकं वाक्यं निषेधः।

15. **प्रश्नः**— अर्थवादः इत्यस्य का परिभाषा?
उत्तरम्—प्रशस्तिनिन्दान्यतरपरं वाक्यमर्थवादः।

16. **प्रश्नः**— अर्थवादः कतिविधः के च ते?
उत्तरम्—त्रिविधः–'गुणवादानुवादभूतार्थवादभेदात्।"

वेदोऽखिलो धर्ममूलमिति विषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

17. **प्रश्नः**—वैदिकसाहित्य-शब्देन के गृह्यन्ते?
उत्तरम्— मन्त्र-ब्राह्मण-आरण्यक-उपनिषत् गृह्यते।

18. **प्रश्नः**—वेदेषु जीवनोपयोगि केषां विषयाणां सन्निवेशोऽस्ति?
उत्तरम्—ज्ञान-विज्ञान-धर्म-दर्शन-सदाचार-संस्कृति-नैतिक-सामाजिक-राजनैतिकप्रभृतीनाम्।

19. **प्रश्नः**—प्रथमा संस्कृतिः का आसीत्?
उत्तरम्—वैदिकी संस्कृतिः। 'सा प्रथमा संस्कृतिर्विश्ववारा' (यजु०7/14)।

20. **प्रश्नः**—विश्वसाहित्यस्य प्राचीनतमाः ग्रन्था के सन्ति?
उत्तरम्— वेदाः।

21. **प्रश्नः**—आचारशिक्षा-दृष्ट्या, नैतिक-दर्शनरूपेण च केषाम् अतीव महत्त्वं वर्तते?
उत्तरम्—वेदानाम्।

22. **प्रश्नः**—कर्म-अकर्म, कर्तव्य-अकर्तव्येति चिन्तायां आदर्शरूपेण केः प्रस्तूयन्ते?
उत्तरम्— वेदा एव।

23. **प्रश्नः**—मन्वादिभिः परमप्रमाणत्वेन केः उपन्यस्ताः।
उत्तरम्—वेदैः।

24. **प्रश्नः**—समग्रस्यापि वेदनिधेर्धर्माधाररूपेण केन प्रतिष्ठा विहिता?
उत्तरम्—मनुना–'वेदोऽखिलो धर्ममूलम्' (मनुस्मृति 2.6) इति समुद्घोषयता।

25. प्रश्नः—परमप्रमाणभूताः धर्मचिन्तायां कर्तव्यविचारकाः च के सन्ति?
उत्तरम्— वेदाः।

26. प्रश्नः—हिन्दूसंस्कृतेः प्राचीनप्रमाणरूपेण कः स्वीकृतः?
उत्तरम्— वेद एव।

27. प्रश्नः— 'वेदोऽखिलो धर्ममूलं' कस्मिन् ग्रन्थेऽस्ति?
उत्तरम्—मनुस्मृतौ।

28. प्रश्नः—'मन्त्रब्राह्मणयोर्वेद नामधेयम्' कस्येयमुक्तिः?
उत्तरम्— सायणस्य।

29. प्रश्नः—अथर्ववेदः कस्य घटकस्य प्रतीकः वर्तते?
उत्तरम्—आत्मायाः।

30. प्रश्नः—संहिताचतुष्टयस्य संकलनकर्ता कः?
उत्तरम्— महर्षिवेदव्यासः।

31. प्रश्नः—ऋत्विक्-शब्दस्य कोऽर्थः?
उत्तरम्—यज्ञकर्ता (होता)।

32. प्रश्नः—वेदस्य के त्रयो विभागाः?
उत्तरम्—1. संहिता, 2. ब्राह्मणम्, 3. आरण्यकम्।

33. प्रश्नः—सर्वासां विद्यानां मूलभूतः कः?
उत्तरम्— वेदः।

34. प्रश्नः—मनुना धर्मपालनार्थं धर्मरक्षणार्थं च किम् उपदिश्यते?
उत्तरम्—'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्' इत्यनेन 'धर्मो रक्षति रक्षितः'।

35. प्रश्नः—धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु कः प्रधानः?
उत्तरम्—धर्मः।

36. प्रश्नः—धर्मप्रतिपादकं शास्त्रं किम्?
उत्तरम्—धर्मशास्त्रम्।

37. प्रश्नः—धर्मणोपार्जितोऽर्थः किं करोति?
उत्तरम्—मनुष्यं सर्वविधानन्देन संयोज्य परवर्तिजीवनमपि सुखमयं करोति।

38. प्रश्नः—कस्मात् कारणात् धर्मशास्त्राण्यपि शास्त्ररूपेण गृहीतानि भवन्ति?
उत्तरम्—मनुस्मृत्यादिग्रन्थेषु धर्मविषयकचर्चा, आध्यात्मिक-चर्चाकारणात्।

39. प्रश्नः—विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत।।
धर्मविषये उक्तश्लोकः केन कथ्यते?
उत्तरम्— मनुना।

40. प्रश्नः—स्मृतिकारैः धर्मस्य का परिभाषा कृता?
उत्तरम्—'चोदनालक्षणोऽर्थो धर्मः' 'स्वर्गसाधनस्य शास्त्रैकसमधिगम्यातिशयस्य धर्मत्वेन सर्वसम्प्रतिपत्तेः'।

41. प्रश्नः—महर्षिणा पतञ्जलिना कर्तव्यत्वेन किं समादिश्यते?
उत्तरम्—'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।'।

42. प्रश्नः—शास्त्रकाराः मानवसमाजेभ्यः विकासस्य बीजं कानि स्वीकृतवन्तः?
उत्तरम्—'वैदिकमन्त्रोपदेशानुष्ठितकर्मभिरुत्पादितं पुण्यमेव धर्मः' इति।

(D) (Code-73) (झ) वैदिक्यो देवताः-1. अग्निः 2. सवितृ- 3. विष्णुः 4. इन्द्रः 5. रुद्रः 6. वृहस्पतिः 7. अश्विनौ 8. वरुणः 9. उषस् 10. सोमः एवं तत्सम्बन्धि-वस्तुनिष्ठप्रश्नोत्तराणि

(झ) प्रमुखाः वैदिक्यो देवताः:—निरुक्तकारयास्कः 'देव' शब्दस्य व्युत्पत्तिं इत्थं कृतवान् यत् 'देवो दानाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा'। यास्काचार्यः आह 'तिस्र एव देवता इति नैरुक्ताः। अग्निः पृथिवीस्थानः। वायुः वा इन्द्रो वा अन्तरिक्षस्थानः। सूर्यो द्युलोकस्य देवता।'

1. द्युलोकस्य देवताः—सूर्यः, वरुणः, मित्रः।
2. अन्तरिक्षस्य देवताः—पर्जन्यः, वायुः, इन्द्रः, मरुतश्च।
3. पृथ्वीलोकस्य देवताः—पृथ्वी, उषा, अग्नि, सोमादयः।

ऋग्वेदानुसारं 33 त्रयस्त्रिंशत् देवताः सन्ति।8 अष्ट वसुः, 11 एकादश रुद्राः, 12 द्वादश आदित्यः, 1 एकः इन्द्रः, एकः प्रजापतिः 33 देवता भवन्ति। पुराणेषु 33 कोटिः (प्रकारवाचकाः) देवतायाः उल्लेखो प्राप्यन्ते। अत्र प्रमुखा वैदिक्यो देवताः क्रमशः—1. अग्निः, 2. सवितृ, 3. विष्णुः, 4. इन्द्रः, 5. रुद्रः, 6. वृहस्पतिः, 7. अश्विनौ, 8. वरुणः, 9. उषस्, 10. सोमश्च सन्ति।

1. **अग्निः**—वैदिकसाहित्ये पृथ्वी इत्यादयः स्थानीय-देवतासु अग्ने इत्यस्य सर्वप्रमुखं स्थानं वर्तते। अग्रणीर्भवति (यः सर्वेषां नेताऽस्ति)।ऋग्वैदिकपृथिवीस्थानीयानां देवानाम् अग्नेः स्थानं महत्त्वपूर्णो विद्यते। अस्य स्तुतिः 200 ऋग्वेदसूक्तेषु गीयते। यज्ञविधानेषु क्रियास्वरूपस्य अस्य महत्त्वपूर्णं स्थानमस्ति। ऋग्वेदे प्रारम्भिको मन्त्रोऽनेनैव सम्बद्धोऽस्ति। यथा-**अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजं। होतारं रत्नधातमम्।** वैदिकमन्त्रेषु अग्नेः त्रयो प्रमुखो विशेषता कथ्यते। 1. नेतृत्वशक्तेः सम्पन्नम्, 2. यज्ञस्य आहुति-ग्रहणकर्ता, 3. तेजप्रकाशोश्च अधिष्ठाता। ऋग्वेदस्य पुरुष-सूक्तानुसारं अग्नेः उत्पत्तिः विराट्पुरुषस्य मुखात् अभूत्। वैदिकऋषिः अग्नेः जनकं धौस् इति संज्ञा प्रदत्तः। कश्चित् अग्निं त्वष्टपुत्ररूपं, कश्चित् द्यावापृथ्वीपुत्ररूपं कथयन्ति स्म। ऋग्वैदिकविवरणानुसारं इन्द्रः द्वौ सिलाखण्डौ घर्षणमध्ये अग्निमुत्पन्नं कृतवान्। अग्निं 'जातवेदा' (ज्ञानाधारः/कल्यानकरः) इति कथ्यते। "अग्निः" "द्विमातुरः" इत्यपि कथ्यते। यतः द्वाभ्यां समिद्भ्यामस्योत्पत्तिर्भवति। त्र्यम्बकं एषः जात एव स्व पितरौ अत्ति। "द्युः अन्तरिक्षपृथिव्यः अस्य मातरः।" इत्यमेवापि कथ्यते। घृतेन सह घनिष्ठसम्बन्धकारणात् अग्निं 'घृतपृष्ठः', शोचिष्केशः', 'रक्तश्मश्रु' 'तीक्ष्णदंष्ट्रः', 'रुक्मदन्तः', 'गृहपतिः', 'विश्वपतिः', 'दमनूस' इत्याद्यन्ये-कान्यस्य नामानि सन्ति। अग्नेः मुख्यगुणः प्रकाशमयो भवति। 'अग्निः' हिरण्यरूपमस्ति एवं सूर्यसदृशः प्रकाशितो भवति। तस्य पथः कृष्णवर्णः। कतिवारं तेभ्यः 'धूमकेतु' इति विशेषणं प्रयुक्तोऽभूत्। वडवानलरूपोऽयम् 'अपांनपात्' इति कथ्यते। देवानां मनुष्याणामयं दौत्यकर्म करोति। यथा-**अग्निर्वै देवानां होता यतः अनेनैव रक्षितामाहुतिं देवा गृह्णन्ति।" "अग्ने य यज्ञमध्वरं विश्वतः परिभूरसि। स इद्देवेषु गच्छति।"** (ऋ.सं.1/1/4) पुरुषसूक्ते सृष्ट्युत्पत्तेर्विषयके प्रसंगे कथितमित्थमेव-"**मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत।**" (पु.सू. 10/90/13) शुक्लयजुर्वेदसंहितायाम्-'**श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत।**'

(इन्द्र सू. 2/12/3)

2. **सवितृ**-सवितृ इत्यस्य शब्दस्य व्युत्पत्तिः सूधातोः योगे तृच् इति प्रत्ययेन मिलित्वाऽभवत्। **सर्वस्य प्रसविता** इति यास्कस्य निर्वचनम्। सवितृ द्युस्थानीयो देवता अस्ति। ऋग्वेदस्य 11एकादश सूक्तेषु सवितृदेवतायाः गुणगानं कृतं स्यात्। अस्य स्वरूपं हिरण्मयमस्ति। एतदर्थ एषः हिरण्याक्षः स्वर्णहस्तः, स्वर्णनेत्रः, स्वर्णपादः, स्वर्णजिह्वादिभिर्नामान्यपि आहूयते। सवितृदेवतायाः सूर्यदेवतया अत्यधिकसाम्यं वर्तते। मुख्यरूपेण 'सवितृ' सर्वेषां प्रकाशकदेवता अस्ति। इमाः पृथिवी, अन्तरिक्ष, द्युलोकादिसर्वाः प्रकाशितं करोति। यथा-**वेति सूर्यमभिकृष्णेन रजसा द्यामृणोति।** सविता देवरूपे वर्णितोऽस्ति। तत्रैव सूर्यः प्रत्यक्षगोचरोऽस्ति, तस्य भौतिकस्वरूपं वर्तते। स स्वहिरण्मयेन रथेन सर्वान् लोकान् पश्यन्नेवागच्छति। तस्य रथस्य अश्वौ श्वेतवर्णौ स्तः। सः लोकानां सर्वाणि पापानि विनाशयति। तस्य रथः सुवर्णमयालङ्कारैः सुसज्जितोऽस्ति। पुनः **द्यावापृथिवी अन्तरीयते** (ऋग्वेदे1/35/9) सः पृथिव्याः सम्बन्धिनीः अष्टौ दिशः प्रकाशितवान्। सः यजमानाय वरणीयं कल्याणं प्रयच्छति। सः रोगान् विनश्यति। यथा-**अपामीवां बाधते** (ऋग्वेदे-1/35/9)।

सवितृ देवता दिवारात्रौ स्वामी वर्तते। ऋग्वेदस्य प्रसिद्धो गायत्रीमन्त्रोऽपि तस्यैव स्तुतौ रचितः। ते च अन्तरिक्षे सुष्ठु सम्पादिताः सन्ति। यथा-

ये ते पन्थाः पूर्व्यासोऽरणेवः सुकृता अन्तरिक्षे।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देवः।।

(ऋ.सं.1235/11)

चराचरजगतः स्वामिनः तस्याज्ञां कोऽपि उल्लंघनं न कुर्वन्ति। यथा-

न यस्येन्द्रो वरुणो न मित्रो व्रतमर्यमानमिनन्ति रुद्रः।
नारातयस्तनिदं स्वस्ति हवे देवं सवितारं नमोभिः।

(ऋ.सं.2/38/9)

3. **विष्णुः**—'विष्णुः' इत्यस्य शब्दस्य निष्पन्नता व्याप्त्यर्थे विष् धातोः भवति। विष्णुः एका द्युस्थानीया देवता अस्ति। अस्य स्तुतौ केवलं पञ्चैव सूक्तानि सन्ति, परन्तु महत्तादृष्ट्या तु अत्यधिकं वर्तते। सर्वे लोकाः अस्य त्रिषु पदेषु निवसन्ति। अस्य विशेषणानि 'उरुगायः, त्रिविक्रमः, उरुक्रमः' इत्यादयः सन्ति। तीव्रगतिशीलो विष्णुः 'तीव्रजवा एवयावनः' इत्येषोऽपि कथ्यते। वैदिकसाहित्ये विष्णवे ऋषिः स्तुतिं कुर्वन्नित्यमेव कथयति। यथोच्यते विष्णुसूक्ते-

प्र विष्णवे शुषमेतु मन्म गिरिक्षित उरुगायाय विष्णवे।
य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित् पदेभिः।।

(विष्णुसूक्ते-1/154/3)

बृहद्देवतानामकग्रन्थो कथयति यत्–

विष्णुः सूर्यस्य क्रियाशीलरूपस्य प्रतिनिधिरस्ति।
विष्णते विंशतेवा स्याद् वेवेष्टेर्व्याप्तिकर्मणः।
विष्णुर्निरुच्यते सूर्यः सर्वः सर्वान्तरश्च यः।।
(बृहद्देवतायां-2/69)

प्रथमभाषावैज्ञानिकः यास्कः अपि कथयति यत्–निरुक्तकारः अस्यान्याभिधानं 'शिपिविष्टः' इत्यपि कथयति।

'शिपिविष्टो विष्णुरिति विष्णुर्द्वे नामनी भवतः।।'
(निरुक्ते-5/2/2)

ऋग्वेदे विष्णोः त्रीणि पदानि आनन्दमयानि विद्यन्ते। यथा–

यस्य त्री पूर्णा मधुना
पदान्यक्षीयमाणा स्वधया पदन्ति।
य उ त्रिधातु पृथिवीमुत द्यामेको
दाधार भुवनानि विश्वा।।
(ऋग्वेदे-12154/4)

विष्णोः अन्याभिधानानि सन्ति–त्रिविक्रमः, उरुक्रमः, विक्रमः, गिरिक्षितः, गिरिष्ठा, वृष्णः, कुचरः, उरुगाय, भीमः इत्यादयः।

4. **इन्द्रः**–अन्तरिक्ष-स्थानीय इन्द्रं वैदिकदेवतासु सर्वप्रथमस्थानं प्राप्तो वर्तते। ऋग्वेदेऽस्य स्तुतिः 250 सूक्तेषु एवं अन्यान्यदेवताभिः सह अनेकसूक्तेषु इन्द्रस्य स्तुतिः विद्यते। स्वगुणकारणात् इन्द्रः आर्यस्य जातीयदेवता वर्तते। यास्कानुसारेणास्य निरुक्तिरित्थमेव वर्तते—1. इरो दृणाति इरां दारयते वा। 2. इरां ददाति दधाति धारयते वा। 3. इन्दवे द्रवति। 4. इन्दौ रमते। ऋग्वेदस्य ऋचानुसारं इन्द्रस्य त्रिगुणाः कथ्यन्ते। महान् कार्यसम्पादनशक्तिः, अतुलपराक्रमशीलः असुराणां युद्धे विजयश्च। इन्द्रः वर्षा अवरोधकः, राक्षसानां संहारकर्ता, अन्धकाराणां दूरकर्ता च वर्तते। इन्द्रस्य प्रमुखशस्त्रं 'वज्रं' अस्ति। एतत्कारणात् तं 'वज्री' 'वज्रबाहु' इति नामभ्यामपि सम्बोद्ध्यते। केचिद् विद्वज्जना अस्य व्युपत्तिरित्थमेव कुर्वन्ति–**इन्द्राच्छत्रूणां दारयिता वा द्रावयिता वा।** यः सर्वेषां स्वामी भवन् शत्रून् नश्यति। इन्द्रस्य उत्पत्तिः पुरुषसूक्तानुसारं विराट्पुरुषस्य मुखात् मन्यते। मरुतः मित्रकारणात् इन्द्रस्य मरुत्सखा, मरुत्वान इत्यादयः विशेषणानि सन्ति। इन्द्रः आधिभौतिके पक्षे 'जलमित्यर्थे' प्रयुक्तोऽभवत्। आध्यात्मिकपक्षे 'मनः' इति अस्ति। आधिदैविके पक्षे एष 'इन्द्रः देवता' वर्तते। गोपथब्राह्मणेऽपि कथितं यत्–"यन्मनः स इन्द्रः।" "द्यौरिन्द्रस्य कर्त्ता" अप्येषः कथ्यते।

देवशिल्पी त्वष्टा इन्द्रस्य पिताऽस्ति। अस्य माता निष्टिग्री अस्ति। "निष्टिग्रः पुत्रमाच्यावयोतय इन्द्रम्" (ऋग्वेदे-10/101/12)। इन्द्रस्य स्वर्णिमो रथो द्वौ अश्वाभ्यां उह्यते। अस्य रथस्य गतिः मनसोऽपि तीव्रतरः–**यस्ते रथो मनसो जवीयानेन्द्रतेन सोमपेयाय याहि"** (ऋग्वेदे-10/112/02) जलानां नेता इन्द्रः सूर्यमुषसञ्च उत्पन्नं कृतवान्। इन्द्रः उपासकानां महान् सहायकोऽस्ति। सः निर्धनान् धनवतश्च धनेभ्यः प्रेरयति। स्व उदारतायाः कारणात् सः 'मघवा' इत्यादयः कथ्यते। वरुण-अग्नि-मरुद्-वायु-सोम-विष्णु-पूषन्-वृहस्पतिभिः सह इन्द्रस्य सम्बन्धो घनिष्ठोऽस्ति। इन्द्रः सम्पूर्णविश्वस्य प्रतिरूपः अस्ति। पुराणेषु सः देवानामधिपतिः अभूत्। तस्य पत्नी शची आसीत्। जयन्तः तस्य पुत्रः आसीत्। इन्द्रस्य अन्याभिधानानि–शचीपतिः, वृत्रहा, सुशिप्रः, सोमपा, शक्रः, पुरन्दरः, वज्री, वृषा, वज्रबाहुः, सोमी, वज्रहस्तः, आखण्डलः, मरुत्सखा, मरुत्थानः, मरुत्वान्, धनञ्जयः, गोत्रभिद्, संवृक्समत्सुः, सप्तरश्मिः, अच्युतच्युतः, अपांनेता, हरिकेशः, हरिश्मश्रुः, हिरण्यबाहुः, चित्रभानुः, पुरूहूतः इत्यादयः सन्ति।

5. **रुद्रः**–रुद्रः अन्तरिक्षस्थानीयो देवता वर्तते। रुद्रशब्दस्य निर्वचनमस्ति-**रुतौ नादान्ते द्रवति द्रावयति वा।** (तैत्तिरीयकारण्यके भट्टभास्करमिश्रकृतभाष्ये)। अस्य स्तुतौ ऋग्वेदे केवलं त्रीणि सूक्तानि वर्तन्ते। परन्तु अन्यैः देवैः सह इन्द्रोऽस्य स्तुतिः 50 पञ्चाशद्वारं क्रियते स्म। यास्कानुसारेण रुद्रशब्दस्य व्युत्पत्तिः इत्थमेव वर्तते। यथा–**रुद्रो रौतीति सतः रोरूयमाणो द्रवतीति वा रोदयतेर्वा।** 'रु'धातोः 'द्रु' इति धातोर्वाऽस्य व्युत्पत्तिरभवत्। सर्वाधिकः शक्तिशाली रुद्रः वज्रबाहुः वर्तते। श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रवाहो (ऋग्वेदे-2/33/3)। सर्वत्र रुद्रस्य स्तुतिः ऋषिणा स्वहितार्थायैव कृता। बभ्रुवर्णो श्वेतवर्णो सः रुद्रः मनुष्यपशूनां वधं कर्तुं समर्थोऽस्ति। सः अनेके औषधयः धारयति। सुवर्णनिर्मितः रुद्रस्य धनुः सहस्रान् हन्तुं समर्थोऽस्ति।

स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशैः
हिरण्यैः ईशानादस्य भुवनस्य भूरेर्न वा उ
योषद्यद्रादसुर्यम्।।
(ऋग्वेदे-2/33/9)

बृहदारण्यकोपनिषदि उक्तम् इत्थमेव ते सदाऽस्माच्छरीरानमर्त्यादुत्क्रन्ति अथ रोदयन्ति तद् यद् रोदयन्ति। तस्माद् रुद्रा इति (बृहदारण्यकोपनिषदि)। रुद्राः एकादशाः सन्ति। इन्द्रियाण्यपि एकादश एव विद्यन्ते। रुद्रस्य अन्याभिधानानि–भूतपतिः, पशुपतिः, त्र्यम्बकः, नीललोहितः, शर्वः, भवः, कृत्तिवासः, असुर, मरुत्पिता, मरुत्वान्, मीलवान्, तव्यान्, भिषक्तम्, वङ्कुः, जलावभेषजः, सुशिप्रः, बभ्रुः, रक्तवर्णो, मृण्याकुः, शिवः इत्यादयः।

6. **वृहस्पतिः**–वृहस्पतिशब्दस्य व्युत्पत्तिः 'वृह्' (वर्धन) धातोः भवति। यस्यार्थः मन्त्राणां प्रार्थनानाञ्च अधिपतिः वर्तते। सः पृथिवीस्थानीयदेवताऽस्ति। एषः वृहस्पतिः मन्त्राणां स्वामी वा इत्यपि कथ्यते। ऋग्वेदस्य 11 एकादशसम्पूर्णसूक्तेषु अस्य स्तुतिः क्रियते। आंशिकरूपेण च द्वयोः सूक्तयोरप्यस्य स्तुतिः इन्द्रेण सह वर्तते। वृहस्पतेः अपरनाम ब्रह्मणस्पति (मन्त्रस्य पति) अपि विद्यते। अस्य रथं रक्तवर्णाः अश्वाः वाहयन्ति। अस्याकृतिः तीक्ष्णविषाणयुक्तः पृष्ठभागः कृष्णोऽस्ति। सुवर्णवान् देदीप्यमान् वृहस्पतिः धनुष-बाणं स्वर्णिमं परशुंश्च धारयति। तान् सप्तमुख, सप्तरश्मि, सप्तजिह्व, नीलपृष्ठादि अपि कथ्यन्ते। वृहस्पतिं विना यज्ञानुष्ठानानि निष्फलानि सन्ति। स स्तोतुः यजमानस्य अङ्गानां पुत्रादीनां वा रक्षां कर्तुं समर्थोऽस्ति। यथोच्यते ऋग्वेदे–

गणानां त्वा गणपतिं हवामहे,
कविं कवीनामुपमश्रवस्तमम्।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत
आ नः शृण्वन्नूतिभिः सीदसादनम्।।
(ऋग्वेदे-2/23/1)

न तमंहो न दुरितं कुतश्चन
नारातयस्तितिरून द्वयाविनः।
विश्वा इदस्माद्ध्वरसो वि बाधसे
यं सुगोपा रक्षति वृहणस्पते।।
(ऋग्वेदे-2/23/5)

अग्निसदृशः वृहस्पतिरपि एकः पुरोहितः वर्तते। यं शक्तेः पुत्रः एवं च अंगिरस् अपि कथ्यते।

वृहस्पतिदेवतायाः अन्याभिधानानि–गणपतिः, वृहस्पतिः, सदस्पतिः, सप्तमुखः, सप्तरश्मिः, सप्तजिह्वः, नीलपृष्ठः, मन्द्रजिह्वः, पथिकृत्, तीक्ष्णशृङ्गः इत्यादीनि।

सर्वत्र पूज्यो वृहस्पतिदेवता वेदेषु समादरणीयस्वरूपेण वर्णितोऽस्ति।

7. **अश्विनौ**–अश्विनौ युगलदेवते रूपे उपस्थिते स्तः। अनयोः द्युस्थानीयदेवतयोः महत्त्वमपि ऋग्वेदे वर्णितमस्ति। ऋग्वेदे पञ्चाशत् सूक्तेषु आभ्यां स्तुतिः कृता। इन्द्र-अग्नि-सोमानां परं अनयोर्महत्त्वं सर्वाधिकं वर्तते। ऋग्वेदस्य द्वितीयमण्डलस्य इन्द्रसूक्ते युगलहंसयोः उपमा कृताऽस्ति। द्युः एतयोः पिताऽस्ति। उषा अश्विनोः भगिन्यस्ति। सूर्यपुत्री सूर्या अनयोः भार्या। पूषा अनयोः पुत्रोऽस्ति। वैदिकसाहित्ये अनेकस्थलेषु त्वष्टुः अनयोः पुत्री, एवं सरयू 'मातेति' कथ्यते। तयो वाहनः रासभः वर्तते। कथ्यते यथा ऋग्वेदे–

वीडुपत्यभिरासुहेमभिर्वा देवानां
वा जूतिभिः शाशदाना।
तद्रासभो नासत्या सहस्त्रमाजा
यमस्य प्रधने जिगाया।।

अश्विनोः प्रियपेयः मधु अस्ति। अनयोः विशेषणानि–माध्वी-मधुपा-मधुयुवा-मधूयुः विद्यते। द्वौ भूते सति इमौ अविभक्तरूपेण संयुक्तो वर्तते। इमौ द्वौ प्रकाशमानोऽस्ति, एवं कमलपुष्पाणां मालाधारणं कुरुतः। उषा एवं सूर्योदयकालयोर्मध्ये अनयोः आविर्भावो भवति।

अश्विनौ देवतायाः एकः कुशलवैद्यरूपेऽपि प्रतिष्ठितौ। अन्याभिधानानि–नासत्या, सुदानुः, दानी, तुविष्मा, अधिग्रू, दिवोनपात्, दस्रा, हिरण्यवर्त्तनि, मधुयुवा, नराः, शुचिव्रतः, पुरूभुज् गृह्यशक्तिसम्पन्नः इत्यादयः।

8. **वरुणः**–सायणाचार्यानुसारेण वरुणशब्दस्य निर्वचनं 'वृ' आवरणे इति धातोः भवति। यस्यार्थः आच्छादितकरणं वर्तते। वरुणः द्युस्थानीयदेवता अस्ति। वरुणस्य स्तुतिः ऋग्वेदे द्वादशसूक्तेषु कृता। चतुर्विंशतिसूक्तेषु च अन्यैः देवैः सह तस्य स्तुतिः कृताऽस्ति। ऋग्वेदे 'असुर'विशेषणेन विशिष्टः वरुणमेकं सम्राटस्य रूपे उपस्थाप्यते। सर्वे लोकाः वरुणे एव समाहितोऽस्ति। विश्वस्य नैतिक-अध्यक्षस्य रूपेण वरुणः सर्वश्रेष्ठो वर्तते। पुराणेषु वरुणं जलस्य देवता इति कथ्यते। ऋग्वेदे वरुणस्य अन्यविशेषणानि–क्षत्रियः, स्वराटः, मायावी, अरुशंसः, पूतदक्षः, धृतव्रतः, सुक्रतुः, चिकिवान्, उरूचक्षा, सहस्त्रचक्षाः, असुरः, अमृतस्य गोप्ता, दूतदक्षः इत्यादयः।

9. **उषस्**–यास्काचार्यः 'उषा'शब्दस्य व्युत्पत्तिं उच्छ

(विवासे) इति धातोः स्वीकरोति। एवं च मैक्डॉनलः 'उषा'शब्दस्य व्युत्पत्तिं वस् (दीपने) इति धातोः स्वीकरोति। उषसः द्युस्थानीयदेवता वर्तते। ऋग्वेदे उषसः स्तुतिः विंशतिसूक्तेषु वर्तते। मानवजीवनस्य कल्याणकारितत्त्वानां आशा-उत्साहनवीनोर्जेत्यादीनां प्रस्फुटमत्र वर्तते। मानवाकृतौ तु उषा एका सुन्दरी नवयुवती विद्यते। यथा-

उषो रूरूचे युवतिर्न योषा (ऋग्वेदे-7/77/1)

दिवः दुहिता उषा प्रकाश-
वस्त्राणि धारयन्ती आगच्छति।

विश्वं प्रतीची सपथा उदस्था-
दुशद्वासो बिभ्रती शुक्रमयवैत्।
हिरण्यवर्णा सुदृशीकसंदृग्गवां
माता नेत्र्यह्नामरोचित॥

(ऋग्वेदे-7/77/2)

नर्तकी इव उषा सर्वत्र गच्छति। उषः सूर्ययोः प्रगाढः सम्बन्धोऽस्ति। प्रेमी इव सूर्यः उषसमनुगच्छति। सूर्यात् प्रागागमनकारणात् कतिपयेषु स्थलेषु एषा तस्य माता भगिनीर्वा इत्यपि कथ्यते। अतिशयबलयुक्ता हिरण्यवर्णा उषा स्वर्णमय-रथारूढाभूय प्रतिदिनं प्रियसत्यवाचमुच्चारयन्ती सूर्यतेजसा दीप्तिमती भवति। समस्तानि भुवनानि अभिमुखे च परिक्रमति। उषा सर्वान् लोकाश्च स्वप्रकाशेन प्रकाशयति। उषा रात्रौ ज्येष्ठभगिनी, एवं च द्यौस् इत्यस्यात्मजा अस्ति। उषस अन्य अभिधानानि-मघोनी, हिरण्यर्था, विश्वावारा, गवांमाता, सुभगा, सुनृतावती चित्रामघा, रेवती-सुजाता, अन्तिवामा, गोमती, अश्ववती, विश्वावारा, युवतिः, ऋतावरी, पुराणी, दिवः, दुहिता, अमृत्यकेतुः, भास्वती, अमृता, अर्जुनी, अरुषा, सप्रतीका, भद्रा, अह्नां नेत्री, सुनूरी, ऋतपा इत्यादयः।

10. सोमः-सूक्तेषु संख्यायाः आधारोपरि अग्निपश्चात् सोमस्य स्थानं वर्तते। सोमः पृथ्वीस्थानीयः देवता। ऋग्वेदे अस्य महत्त्वपूर्णं स्थानमस्ति। अस्य स्तुतिः 120 सूक्तेषु क्रियते। नवममण्डलस्य अभिधानमेव 'सोम पवमान इति' वर्तते। यज्ञेषु अस्य अत्यधिकं महत्त्वम्। यज्ञविधाने सोमलतया हविर्द्रव्यं क्रियते। सोमस्य वर्णं बभ्रुः हरिद्रक्तश्चास्ति। सः वने गर्जति 'वृषाव चक्रद्वने।' सोमं स्वर्गस्य पुत्रः अथवा स्वर्गस्य दुग्ध इति कथ्यते। अतः तं 'अमृत' 'वनस्पति' वा इति कथ्यते। **सोमः** एकः रोगनिवारक-औषधिं वर्तते। ऋग्वैदिकाथ-वैदिकाख्यानेषु अस्य समीकरणं चन्द्रेण सह क्रियते।

प्रमुखाः वैदिक्यो देवताः विषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—निरुक्तानुसारं कतिपयाः देवताः?
   उत्तरम्—33 त्रयस्त्रिंशत्।
2. **प्रश्नः**—देवताशब्दः कस्मिन् लिङ्गे प्रयुंक्ते?
   उत्तरम्—स्त्रीलिङ्गे।
3. **प्रश्नः**— का देवता सूर्यस्य पत्नी माता वा?
   उत्तरम्— अदितिः।
4. **प्रश्नः**— पुरुरवा कस्य प्रतीकः?
   उत्तरम्—सूर्यस्य।
5. **प्रश्नः**— द्युलोकस्य देवताः के सन्ति?
   उत्तरम्—सूर्यः, वरुणः, मित्रः।
6. **प्रश्नः**— अन्तरिक्षस्य देवताः के सन्ति?
   उत्तरम्—पर्यन्यः, वायुः, इन्द्रः, मारुतश्च।
7. **प्रश्नः**— पृथ्वीलोकस्य देवताः के सन्ति?
   उत्तरम्—पृथ्वी, उषा, अग्नि, सोमादयः।
8. **प्रश्नः**— ब्रह्मा कस्य वेदविशेषस्य ऋत्विगस्ति?
   उत्तरम्—अथर्ववेदस्य।
9. **प्रश्नः**— 'ब्रह्मवेद' इत्यभिधानेन अभिहितः वेदः कः?
   उत्तरम्—अथर्ववेदः।
10. **प्रश्नः**— अथर्ववेदस्य शाखा कोऽस्ति?
    उत्तरम्—स्तौदशाखा।
11. **प्रश्नः**— अन्तरिक्षस्थानीयदेवता का?
    उत्तरम्—वायुः।
12. **प्रश्नः**— द्युस्थानीयदेवता का?
    उत्तरम्—सूर्यः।
13. **प्रश्नः**—के सन्ति प्रमुखा वैदिक्यो देवताः?
    उत्तरम्—1. अग्निः, 2. सवितृ, 3. विष्णुः, 4. इन्द्रः, 5. रुद्रः, 6. वृहस्पतिः, 7. अश्विनौ, 8. वरुणः, 9. उषस्, 10. सोमश्च सन्ति।

(1) अग्निर्देवता

14. **प्रश्नः**— देवताशब्दः कस्मिन् लिङ्गे प्रयुक्ते?
    उत्तरम्—स्त्रीलिङ्गे।
15. **प्रश्नः**— वैदिकदेवतानां संख्या कति?
    उत्तरम्—33 त्रयस्त्रिंशत्।

16. **प्रश्नः**— स्थानीयदेवतासु सर्वप्रमुखः कः?
    उत्तरम्—अग्निः।
17. **प्रश्नः**— पुरोहितः इति सम्बोधनेन को ज्ञायते?
    उत्तरम्— अग्निः।
18. **प्रश्नः**— ऋग्वेदे असुरः कः?
    उत्तरम्— देवताः।
19. **प्रश्नः**— अस्य स्तुतिः कति ऋग्वेदसूक्तेषु गीयते?
    उत्तरम्— 200 द्विशतम्।
20. **प्रश्नः**—यज्ञविधानेषु क्रियास्वरूपस्य कस्य महत्त्वपूर्णं स्थानमस्ति?
    उत्तरम्—अग्नेः, यथा-**अग्निमीले पुरोहितं। यज्ञस्य देवमृत्विजं। होतारं रत्नधातमम्।**
21. **प्रश्नः**— नेतृत्वशक्तेः सम्पन्ना का देवता?
    उत्तरम्—अग्निर्देवता।
22. **प्रश्नः**—यज्ञस्य आहुतिग्रहणकर्ता का देवता?
    उत्तरम्—अग्निर्देवता।
23. **प्रश्नः**— तेजः प्रकाशोश्च अधिष्ठाता देवता का?
    उत्तरम्—अग्निर्देवता।
24. **प्रश्नः**— ऋग्वेदस्य पुरुषसूक्तानुसारं अग्नेः उत्पत्तिः कुतः अभूत्?
    उत्तरम्—विराट्पुरुषस्य मुखात् अभूत्।
25. **प्रश्नः**— वैदिकऋषिः अग्नेः जनकं का संज्ञा प्रदत्तः?
    उत्तरम्—धौस् इति संज्ञा प्रदत्तः।
26. **प्रश्नः**— अन्यै: अग्नेः जनकविषये किं कथयन्ति?
    उत्तरम्—कश्चित् अग्निं त्वष्ट्पुत्ररूपे, कश्चित् द्यावापृथ्वीपुत्ररूपे कथयन्ति स्म।
27. **प्रश्नः**—ऋग्वैदिकविवरणानुसारमग्नेरुत्पत्तिः कथं स्यात्?
    उत्तरम्—इन्द्रः द्वौ शिलाखण्डौ घर्षणमध्ये अग्निमुत्पन्नं कृतवान्।
28. '**प्रश्नः**—जातवेदा (ज्ञानाधारः/कल्याणकरः) कं कथ्यते?
    उत्तरम्—अग्निम्।
29. **प्रश्नः**—घृतेन सह घनिष्ठसम्बन्धकारणात् अग्नेः कानि नामानि सन्ति?
    उत्तरम्—'घृतपृष्ठः', शोचिष्केशः', 'रक्तश्मश्रु' 'तीक्ष्णदंष्ट्रः', 'रूक्मदन्तः', 'गृहपतिः', 'विश्वपतिः', 'दमूनस्' इत्यादिन्यनेकान्यस्य नामानि।
30. **प्रश्नः**—अग्नेः मुख्यगुणः कः?
    उत्तरम्—प्रकाशमयः।
31. **प्रश्नः**—अग्नेः स्वरूपं किम्?
    उत्तरम्—'अग्निः' हिरण्यरूपमस्ति एवं सूर्यसदृशः प्रकाशितो भवति।
32. **प्रश्नः**— अग्नेः पथस्य वर्णः कः?
    उत्तरम्— कृष्णवर्णः।
33. **प्रश्नः**— वडवानलरूपे अग्निं किं कथ्यते?
    उत्तरम्—'अपांनपात्' इति कथ्यते।
34. **प्रश्नः**— अग्निः देवानां मनुष्याणां किं कर्म करोति?
    उत्तरम्— दौत्यकर्म करोति।
35. **प्रश्नः**— 'दमूना' इति कस्य विशेषणम्?
    उत्तरम्— अग्निः।
36. **प्रश्नः**—यास्कानुसारम् अग्नेः निर्वचनं किम्?
    उत्तरम्—अग्रणीर्भवति।
37. **प्रश्नः**— अग्नये भोजनं कति वारं दीयते?
    उत्तरम्— त्रिवारम्।
38. **प्रश्नः**— पृथ्वीस्थानीयदेवता का?
    उत्तरम्—अग्निर्देवता।
39. **प्रश्नः**— अक्नोपनो भवति (सर्वान् शोषयति) इति का?
    उत्तरम्—अग्निर्देवता।
40. **प्रश्नः**— अग्रं यज्ञेषु प्रणीयते (यः यज्ञेषु प्रथमो भवति) इति का?
    उत्तरम्—अग्निर्देवता।
41. **प्रश्नः**— "अग्निं" द्विमातुरः" कथं कथ्यते?
    उत्तरम्—द्वाभ्यां समिद्भ्यामस्युत्पत्तिर्भवति।
42. **प्रश्नः**— अग्नेः मातरः काः?
    उत्तरम्— द्युः अन्तरिक्षपृथिव्यः अस्य मातरः।
43. **प्रश्नः**— आधिभौतिकपक्षेऽग्नेरर्थो कः?
    उत्तरम्—याज्ञिकाग्निरेव।
44. **प्रश्नः**—आधिभौतिकपक्षेऽग्नेरर्थो कः?
    उत्तरम्—अग्निर्देवता।

(2) सवितृदेवता

45. **प्रश्नः**—सवितृ कस्या स्थानीयदेवता अस्ति?
उत्तरम्—द्युस्थानीयदेवता।

46. **प्रश्नः**—प्रातः-सायंकालयोः सम्बद्धः कः?
उत्तरम्— सविता।

47. **प्रश्नः**—11 एकादशसूक्तेषु सवितृदेवतायाः गुणगानं कुत्र कृतं स्यात्?
उत्तरम्—ऋग्वेदे।

48. **प्रश्नः**—हिरण्मयं कस्या स्वरूपम्?
उत्तरम्—सवितृदेवतायाः।

49. **प्रश्नः**—सवितृदेवता कानि नामान्यपि आहूयते?
उत्तरम्—हिरण्याक्षः, स्वर्णहस्तः, स्वर्णनेत्रः, स्वर्णपादः, स्वर्णजिह्वादिभिर्नामान्यपि आहूयते।

50. **प्रश्नः**—सूर्यदेवतायाः अत्यधिकसाम्यं कस्याः वर्तते?
उत्तरम्— सवितृदेवतायाः।

51. **प्रश्नः**—मुख्यरूपेण सर्वेषां प्रकाशकदेवता काऽस्ति?
उत्तरम्—सवितृ।

52. **प्रश्नः**—पृथिव्याः सम्बन्धिनी अष्टौ दिशः का प्रकाशितवान्?
उत्तरम्— 'सवितृ' देवता।

3. **प्रश्नः**—यजमानाय वरणीयं कल्याणं का प्रयच्छति?
उत्तरम्— 'सवितृ' देवता।

4. **प्रश्नः**—सर्वान् रोगान् का विनश्यति?
उत्तरम्— 'सवितृ' देवता।

5. **प्रश्नः**—दिवारात्रौ स्वामी का वर्तते?
उत्तरम्— सवितृ देवता।

6. **प्रश्नः**—ऋग्वेदस्य प्रसिद्धो गायत्रीमन्त्रोऽपि कस्यैव स्तुतौ रचितः?
उत्तरम्— सवितृदेवतास्तुतौ रचितः।

. **प्रश्नः**—आकृष्णेन रजसा वर्तमानो निवेशयन् केन सह सम्बन्धितः?
उत्तरम्—सविता।

. **प्रश्नः**—'गायत्री' मन्त्रस्य का देवता?
उत्तरम्— सविता।

59. **प्रश्नः**—अन्यैः देवैः सह प्राणिनोऽपि कस्याज्ञामनुसरन्ति?
उत्तरम्— सवितृदेवतायाः।

60. **प्रश्नः**—देवेभ्यः कः अमृतं यच्छति?
उत्तरम्— सवितृ।

61. **प्रश्नः**—चराचरजगतः स्वामी कः?
उत्तरम्— सवितृ।

62. **प्रश्नः**—सवितृ इत्यस्य शब्दस्य का व्युत्पत्तिः?
उत्तरम्—सूधातोः योगे तृच् इति प्रत्ययेन मिलित्वाऽभवत्।

63. **प्रश्नः**—यास्काचार्येण निरुक्ते सवितृ इत्यस्य निवर्चनं किं कृतम्?
उत्तरम्— "सर्वस्य प्रसविता"।

(3) विष्णुर्देवता

64. **प्रश्नः**—विष्णोः निवासस्थानं कुत्रास्ति?
उत्तरम्—द्युलोके।

65. **प्रश्नः**—'उरुगाय' इति कस्य उपाधिः?
उत्तरम्— विष्णोः।

66. **प्रश्नः**—'सधस्थमेको त्रिभिरित्पदेभिः' मन्त्रस्य सम्बन्धः केन सह?
उत्तरम्— विष्णुना सह।

67. **प्रश्नः**—व्याप्त्यर्थे विष् धातोः निष्पन्नता कस्य शब्दस्य भवति?
उत्तरम्— 'विष्णुः' इत्यस्य शब्दस्य।

68. **प्रश्नः**—विष्णोः स्तुतौ कति सूक्तानि सन्ति?
उत्तरम्— केवलं पञ्चैव।

69. **प्रश्नः**—सर्वे लोकाः कस्य त्रिषु पदेषु निवसन्ति?
उत्तरम्— विष्णोः।

70. **प्रश्नः**— कस्य विशेषणानि उरुगायः, त्रिविक्रमः, उरुक्रमः इत्यादयः सन्ति?
उत्तरम्— विष्णोः।

71. **प्रश्नः**—तीव्रगतिशीलो, तीव्रजवा, एवयावनः इत्येषोऽपि कस्य विशेषणानि ?
उत्तरम्— विष्णोः।

72. **प्रश्नः**—विष्णोः अन्याभिधानानि कानि सन्ति?
उत्तरम्— त्रिविक्रमः, उरुक्रमः, विक्रमः, गिरिक्षितः, गिरिष्ठा, वृष्णः, कुचरः, उरुगाय, भीमः इत्यादयः।

73. **प्रश्नः**—विष्णुः शब्दस्य का व्युत्पत्तिः?
उत्तरम्—विष् धातोः निष्पन्नोऽस्त्येषः विष्णुशब्दः।

74. **प्रश्नः**—वृत्रवधे इन्द्रस्य रक्षां कः कृतवान्?
उत्तरम्— विष्णुः।

75. **प्रश्नः**—उदारो वरिष्ठदाता विष्णुः किं प्रयच्छति?
उत्तरम्— अभीष्टम्।

76. **प्रश्नः**—उपेन्द्रः कः?
उत्तरम्— विष्णुः।

77. **प्रश्नः**—सुबुद्धि-प्रदाता सः सर्वैः किं प्रार्थ्यते?
उत्तरम्—"त्वं विष्णो सुमतिं विश्वजन्याम-प्रयुतामेवयावोमति दाः।

(4) इन्द्रदेवता

78. **प्रश्नः**— वैदिकदेवतासु सर्वप्रथमस्थानं कं प्राप्तो वर्तते?
उत्तरम्— अन्तरिक्ष-स्थानीय इन्द्रम्।

79. **प्रश्नः**—ऋग्वेदेऽस्य स्तुतिः कति सूक्तेषु वर्तते?
उत्तरम्— 250 सूक्तेषु।

80. **प्रश्नः**—स्वगुणकारणात् आर्यस्य जातीयदेवता को वर्तते?
उत्तरम्— इन्द्रः।

81. **प्रश्नः**—यास्कानुसारेण इन्द्रस्य निरुक्तिः वर्तते?
उत्तरम्— 1. इरो दृणाति इरां दारयते वा। 2. इरां ददाति दधाति धारयते वा। 3. इन्दौ द्रवति। 4. इन्द्रौ रमते।

82. **प्रश्नः**—इन्द्रस्य उत्पत्तिः पुरुषसूक्तानुसारं कस्मात् मन्यते?
उत्तरम्—विराट्पुरुषस्य मुखात् मन्यते।

83. **प्रश्नः**—मरुतः मित्रकारणात् इन्द्रस्य कानि विशेषणानि सन्ति?
उत्तरम्— मरुत्सखा, मरुत्वान इत्यादयः।

84. **प्रश्नः**—इन्द्रः अधिभौतिके पक्षे कस्मिन् अर्थे प्रयुक्तोऽभवत्?
उत्तरम्— जलमित्यर्थे।

85. **प्रश्नः**—आध्यात्मिकपक्षे कस्मिन् अर्थे एषः प्रयुक्तोऽभवत्?
उत्तरम्— मनः।

86. **प्रश्नः**—आधिदैविके पक्षे कस्मिन् अर्थे एषः प्रयुक्तोऽभवत्?
उत्तरम्— 'इन्द्रः देवता'।

87. **प्रश्नः**— गोपथे ब्राह्मणे अप्येषः किं कथ्यते?
उत्तरम्— "यन्मनः स इन्द्रः।" "द्यौरिन्द्रस्य [illegible]"।

88. **प्रश्नः**—इन्द्रस्य पिता कोऽस्ति?
उत्तरम्— देवशिल्पी त्वष्टा।

89. **प्रश्नः**—इन्द्रस्य माता कोऽस्ति?
उत्तरम्— निष्टिग्री अस्ति।

90. **प्रश्नः**—इन्द्रस्य स्वर्णिमो रथो कौ अश्वाभ्यां उह्यते?
उत्तरम्— द्वौ अश्वाभ्यां उह्यते।

91. **प्रश्नः**—इन्द्रस्य रथस्य गतिः किदृशः?
उत्तरम्— मनसोऽपि तीव्रतरः।

92. **प्रश्नः**—जलानां नेता इन्द्रः कौ उत्पन्नं कृतवान्?
उत्तरम्— सूर्यमुषसौ।

93. **प्रश्नः**—इन्द्रस्य सम्बन्धो कैः सह घनिष्ठोऽस्ति?
उत्तरम्—वरुण-अग्नि-मरुद्-वायु-सोम-विष्णु-पूषन्-वृहस्पतिभिः सह।

94. **प्रश्नः**—सम्पूर्णविश्वस्य प्रतिरूपः कः?
उत्तरम्— इन्द्रः।

95. **प्रश्नः**— सः देवानामधिपतिः केषु अभूत्?
उत्तरम्— पुराणेषु।

96. **प्रश्नः**—इन्द्रस्य पत्नी का आसीत्?
उत्तरम्— शची।

97. **प्रश्नः**—तस्य पुत्रः कः आसीत्?
उत्तरम्—जयन्तः।

98. **प्रश्नः**—इन्द्रस्य अन्याभिधानानि कानि सन्ति?
उत्तरम्—शचीपतिः, वृत्रहा, सुशिप्रः सोमपा, शक्रः, पुरन्दरः, वज्री, वृषा, वज्रबाहुः, सोमी, वज्रहस्तः, आखण्डलः, मरुत्सखा, मरुत्वानः, मरुत्वान्, धनञ्जयः, गोत्रभिद्, संवृक्समत्सुः, सप्तरश्मिः, अच्युतच्युतः, अपांनेता, हरिकेशः, हरिश्मश्रुः, हिरण्यबाहुः, चित्रभानुः, पुरूहूतः इत्यादयः।

99. **प्रश्नः**—शतक्रतुः इति कस्य उपाधिः?
उत्तरम्— इन्द्रस्य।

100. **प्रश्नः**—इन्द्रस्य प्रतीकः कः?
उत्तरम्— सूर्यः।

(5) रुद्रदेवता

101. **प्रश्नः**— रुद्रस्य निवासस्थानं कुत्र अस्ति?
उत्तरम्— अन्तरिक्षलोके।

102. **प्रश्नः**— रुद्रशब्दस्य कानि निर्वचनानि?
उत्तरम्— रुतौ नादान्ते द्रवति द्रावयति वा।

103. **प्रश्नः**—रुद्रस्य स्तुतौ केवलं त्रीणि सूक्तानि कुत्र वर्तन्ते?
उत्तरम्— ऋग्वेदे।

104. **प्रश्नः**—अन्यैः देवैः सह इन्द्रस्य स्तुतिः कतिवारं क्रियते स्म?
उत्तरम्—50 पञ्चाशद्वारम्।

105. **प्रश्नः**—यास्कानुसारेण रुद्रशब्दस्य व्युत्पत्तिः कीदृशी वर्तते?
उत्तरम्—रुद्रो रौतीति सतः रोरूयमाणो द्रवतीति वा रोदयतेर्वा।

106. **प्रश्नः**— सर्वाधिकः शक्तिशाली वज्रवाहुः कः वर्तते?
उत्तरम्—रुद्रः।

107. **प्रश्नः**— मरुतां पिता कः?
उत्तरम्—रुद्रः।

108. **प्रश्नः**— बभ्रुवर्णी श्वेतवर्णी कः मनुष्यपशूनां वधं कर्तुं समर्थोऽस्ति?
उत्तरम्—रुद्रः।

109. **प्रश्नः**—कः अनेकाः औषधीः धारयति?
उत्तरम्—रुद्रः।

110. **प्रश्नः**— सुवर्णनिर्मितः कस्य धनुः सहस्रान् हन्तुं समर्थोऽस्ति?
उत्तरम्— रुद्रस्य।

111. **प्रश्नः**— रुद्राः कति सन्ति?
उत्तरम्—11 एकादशः।

112. **प्रश्नः**— इन्द्रियाण्यपि कति विद्यन्ते?
उत्तरम्—11 एकादशः।

113. **प्रश्नः**— रुद्रस्य अन्याभिधानानि कानि सन्ति?
उत्तरम्—भूतपतिः, पशुपतिः, त्र्यम्बकः, नीललोहितः, शर्वः, भवः, कृत्तिवासः, असुर, मरुत्पिता, मरुत्वान्, मीलवान्, तव्यान्, भिषक्तम्, वङ्कुः, जलाषभेषजः, सुशिप्रः, बभ्रुः, रक्तवर्णी, मृण्याकुः, शिवः इत्यादयः।

114. **प्रश्नः**— वैदिकविवरणानुसारं 'पिनाकधनुषः' केन सह सम्बद्धः?
उत्तरम्— रुद्रेण।

(6) वृहस्पतिर्देवता

115. **प्रश्नः**—मन्त्राणां प्रार्थनानाञ्च अधिपतिः कः?
उत्तरम्—वृहस्पतिः।

116. **प्रश्नः**—वृहस्पतिः कुत्रः स्थानीयदेवता?
उत्तरम्—पृथिवीस्थानीयदेवता।

117. **प्रश्नः**— 'मन्त्राणां स्वामी' कः?
उत्तरम्— 'वृहस्पतिः'

118. **प्रश्नः**—11 एकादश सम्पूर्णसूक्तेषु कस्य स्तुतिः क्रियते?
उत्तरम्— बृहस्पतेः।

119. **प्रश्नः**— वृहस्पतेः अपरनांम किम्।
उत्तरम्— ब्रह्मणस्पति (मन्त्रस्य पति)।

120. **प्रश्नः**— रक्तवर्णाः अश्वाः कस्य रथं वाहयन्ति।
उत्तरम्— वृहस्पतेः।

121. **प्रश्नः**— वृहस्पतेः आकृतिः का?
उत्तरम्— तीक्ष्णविषाणयुक्तः पृष्ठभागः कृष्णोऽस्ति।

122. **प्रश्नः**—सुवर्णवान् देदीप्यमान् वृहस्पतिः कानि अस्त्राणि धारयति?
उत्तरम्— धनुष-बाण-स्वर्णिमं परशुश्च।

123. **प्रश्नः**— तान् अपरनामानि कानि सन्ति?
उत्तरम्—सप्तमुख, सप्तरश्मि, सप्तजिह्व, नीलपृष्ठादि।

124. **प्रश्नः**— केन विना यज्ञानुष्ठानानि निष्फलानि सन्ति?
उत्तरम्— वृहस्पतिना।

125. **प्रश्नः**—वृहस्पतेः अन्याभिधानानि कानि सन्ति?
उत्तरम्—गणपतिः, वृहस्पतिः, सदसस्पतिः, सप्तमुख, सप्तरश्मिः, सप्तजिह्वः, नीलपृष्ठः, मन्द्रजिह्वः, पथिकृत्, तीक्ष्णशृङ्गः इत्यादीनि।

(7) अश्विनौ-देवता

126. **प्रश्नः**—अश्विनौ कयोः देवतारूपे उपस्थिते स्तः?
उत्तरम्—युगलदेवते रूपे।

127. **प्रश्नः**—एतौ कुत्रस्थदेवता वर्तते?
उत्तरम्—द्युस्थानीयदेवता।

128. **प्रश्नः**—ऋग्वेदे कति सूक्तेषु आभ्यां स्तुतिः कृता?
उत्तरम्—पञ्चाशत् सूक्तेषु।

129. **प्रश्नः**—ऋग्वेदस्य द्वितीयमण्डलस्य इन्द्रसूक्ते अनयोः उपमा केन कृताऽस्ति?
उत्तरम्—युगलहंसयोः।

130. **प्रश्नः**—एतयोः पिता कोऽस्ति?
उत्तरम्— द्युः।

131. **प्रश्नः**— अश्विनोः भगिनी काऽस्ति?
उत्तरम्— उषा।

132. **प्रश्नः**— अनयोः भार्या काऽस्ति?
उत्तरम्— सूर्यपुत्री सूर्या।

133. **प्रश्नः**— पूषा अनयोः कोऽस्ति?
उत्तरम्— पुत्रः।

134. **प्रश्नः**—अनयोः पुत्री काऽस्ति?
उत्तरम्— त्वष्टुः।

135. **प्रश्नः**— अनयोः 'मातेति' कां कथ्यते?
उत्तरम्— सरयू।

136. **प्रश्नः**— तयोः वाहनः को वर्तते।
उत्तरम्— रासभः।

137. **प्रश्नः**—अश्विनोः प्रियपेयः किम् अस्ति?
उत्तरम्— मधुः।

138. **प्रश्नः**— कमलपुष्पाणां माला कौ धारणं कुरुतः?
उत्तरम्— अश्विनौ।

139. **प्रश्नः**—अनयोः आविर्भावो कदा भवति?
उत्तरम्—उषा एवं सूर्योदयकालयोर्मध्ये।

140. **प्रश्नः**— अश्विनोः देवतायाः किं रूपेऽपि प्रतिष्ठितः?
उत्तरम्—एकः कुशलवैद्यः।

141. **प्रश्नः**— अश्विनौ अन्याभिधानानि कानि सन्ति?
उत्तरम्—नासत्या, सुदानुः, दानी, तुविष्मा, अधिग्रू, दिवोनपात्, दस्रा, हिरण्यवर्त्तनि, मधुयुवा, नराः, शुचिव्रतः, पुरूभुज्-गृह्यशक्तिसम्पन्नादयः।

142. **प्रश्नः**— वृद्धाय यौवनं कः ददाति?
उत्तरम्— अश्विनौ।

143. **प्रश्नः**— भगानामध्यक्षः कः?
उत्तरम्— पूषा।

144. **प्रश्नः**— 'बल' नामक राक्षसात् गाः कः मुक्तवान्?
उत्तरम्— अश्विनौ।

145. **प्रश्नः**— अर्धरात्रिं सूर्योदयं यावत् कस्याः देवतायाः कालः?
उत्तरम्— अश्विनोः।

146. **प्रश्नः**— भुज्योः कः उद्धारं कृतवान्?
उत्तरम्— अश्विनौ।

147. **प्रश्नः**— दस्रा कस्याः उपाधिः?
उत्तरम्— अश्विनोः।

148. **प्रश्नः**—'नासत्या' विशेषणेन विशिष्टः कः?
उत्तरम्— अश्विनौ।

149. **प्रश्नः**—गुहानिरुद्धस्य अत्रेः समुद्धर्ता कः?
उत्तरम्— अश्विनौ।

150. **प्रश्नः**— युगल-देवता कः अस्ति?
उत्तरम्— अश्विनौ।

(8) वरुणदेवता

151. **प्रश्नः**—वरुणशब्दस्य निर्वचनं केन धातोः भवति?
उत्तरम्— 'वृ' आवरणे इति धातोः।

152. **प्रश्नः**— वरुणदेवतायाः स्थानमस्ति?
उत्तरम्— द्युस्थानम्।

153. **प्रश्नः**—वरुणस्य स्तुतिः ऋग्वेदे कति सूक्तेषु कृता?
उत्तरम्—12 द्वादशसूक्तेषु।

154. **प्रश्नः**—ऋग्वेदे 'असुर' विशेषणेन विशिष्टः वरुणं केन रूपेण उपस्थाप्यते?
उत्तरम्— सम्राड् रूपेण।

155. **प्रश्नः**—सर्वे लोकाः कुत्र समाहिताः सन्ति?
उत्तरम्—वरुणे एव।

156. **प्रश्नः**—पुराणेषु वरुणं कस्य देवता कथ्यते?
उत्तरम्— जलस्य।

157. **प्रश्नः**—ऋग्वेदे वरुणस्य अन्यविशेषणानि कानि सन्ति?
उत्तरम्—क्षत्रियः, स्वराटः, मायावी, अरुशंसः, पूतदक्षः, धृतव्रतः, सुक्रतुः, चिकिवान्, उरूचक्षा, सकलचक्षाः, असुरः, अमृतस्य गोपा, दूतदक्षादयः।

158. **प्रश्नः**— धृतव्रतः इति कस्य उपाधिः?
उत्तरम्—वरुणस्य।

159. **प्रश्नः**—वृहस्पतिः इति कस्य विशेषणम्?
उत्तरम्—वरुणस्य।

(9) उषस्देवताविषयकवस्तुनिष्ठप्रश्नोत्तराणि

160. **प्रश्नः**—उषा-देवता-सम्बद्धलोकविशेषः कः?
उत्तरम्— द्युलोकः।

161. **प्रश्नः**—यास्काचार्यानुसारं 'उषा' शब्दस्य व्युत्पत्तिः कस्माद्धातोः?
उत्तरम्—उच्छ (विवासे) इति धातोः स्वीकरोति।

162. **प्रश्नः**—मैक्डॅनलानुसारेण 'उषा' शब्दस्य व्युत्पत्तिः कस्माद्धातोः?
उत्तरम्— वस् (दीपने) इति धातोः।

163. **प्रश्नः**—उषसः कुत्रस्थ देवता वर्तते?
उत्तरम्— द्युस्थानीयदेवता।

164. **प्रश्नः**— ऋग्वेदे उषस स्तुतिः कति सूक्तेषु वर्तते?
उत्तरम्— विंशतिसूक्तेषु।

165. **प्रश्नः**—मानवाकृतौ तु उषास्वरूपं किम्?
उत्तरम्— एका सुन्दरी नवयुवती।

166. **प्रश्नः**— उषा सर्वत्र किमिव गच्छति?
उत्तरम्— नर्तकी इव।

167. **प्रश्नः**—उषा-सूर्ययोर्मध्ये कः सम्बन्धोऽस्ति?
उत्तरम्— प्रगाढः।

168. **प्रश्नः**—किमिव सूर्यः उषसमनुगच्छति?
उत्तरम्— प्रेमी इव।

169. **प्रश्नः**— सूर्यात् प्रागागमनकारणात् कतिपयेषु स्थलेषु एषा किं कथ्यते?
उत्तरम्— माता भगिनीर्वा इत्यपि कथ्यते।

170. **प्रश्नः**—उषायाः ज्येष्ठभगिनी का?
उत्तरम्— रात्रिः।

171. **प्रश्नः**—उषायाः आत्मजा का अस्ति?
उत्तरम्— द्यौस्।

172. **प्रश्नः**—उषायाः अन्यानि अभिधानानि कानि सन्ति?
उत्तरम्—मघोनी, हिरण्यर्था, विश्ववारा, गवांमाता, सुभगा, सुनृतावती, चित्रमघा, रेवती-सुजाता, अन्तिवामा, गोमती, अश्ववती, विश्वावारा, युवतिः, ऋतावरी, पुराणी, दिवः, दुहिता, अमृत्यकेतुः, भास्वती, अमृता, अर्जुनी, अरुषा, सप्रतीका, भद्रा, अहानेत्री सुनूरी, ऋतपा, इत्यादयः।

173. **प्रश्नः**—उषसः निर्वचनं किम्?
उत्तरम्— उच्छ्ती।

174. **प्रश्नः**—ऋतावरी कस्याः विशेषणम्?
उत्तरम्— उषसः।

(10) सोमदेवता

175. **प्रश्नः**—सूक्तेषु संख्यायाः आधारोपरि अग्निपश्चात् कस्य स्थानं वर्तते?
उत्तरम्— सोमस्य।

176. **प्रश्नः**—सोमः कुत्रस्थानीयः देवता?
उत्तरम्— पृथिवीस्थानीयः।

177. **प्रश्नः**—सोमस्य स्तुतिः कति सूक्तेषु क्रियते?
उत्तरम्—120 विंशत्यधिकं शतम्।

178. **प्रश्नः**—'पवमान' इति कस्य उपाधिः?
उत्तरम्— सोमस्य।

179. **प्रश्नः**—यज्ञविधाने सोमलतया किं क्रियते?
उत्तरम्— हविर्द्रव्यम्।

180. **प्रश्नः**—सोमस्य वर्णं किमस्ति?
उत्तरम्— बभ्रुः हरित् रक्तश्चास्ति।

181. **प्रश्नः**—सोमः एकः कीदृशः औषधिः वर्तते?
उत्तरम्— रोगनिवारकः।

182. **प्रश्नः**—दिवः शिशुः कः कथ्यते?
उत्तरम्— सोमः।

183. **प्रश्नः**— सोमः कस्मै अत्यधिकं रोचते?
उत्तरम्— अश्विभ्याम्।

(E) (Code-73) (ज) शुक्लयजुर्वेदवर्णितं सामाजिकं राजनैतिकं च जीवनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(ज) शुक्लयजुर्वेदवर्णितं सामाजिकं राजनीतिकं च जीवनम्—वेदेषु सामाजिकव्यवस्थायाः अतिविस्तीर्णं वर्णनमुपलभ्यते। शुक्लयजुर्वेदे विनियोगवाक्यरहिताः केवलाः मन्त्राः विद्यन्ते, अतोऽमिश्रितरूपतया शुक्लयजुर्वेदः। शुक्लयजुर्वेदस्य संहितैव वाजसनेयिसंहिता कथ्यते। तादृशनामकरणे बीजं तु इदं कथ्यते यत् याज्ञवल्क्येनाराधितः सूर्यो वाजी भूत्वा तस्मै वेदं प्रोक्तवान् अतस्तदुक्ता संहिता वाजसनेयी संहिता समाख्याता।

शुक्लयजुर्वेदस्य शाखाः-काण्वमाध्यन्दिनभेदेन शुक्लयजुर्वेदस्य अपि द्वे शाखे विद्यते। समाजस्य अभ्युदये परिवारस्य महद्योगदानं भवति। समाजिकदृष्ट्या अपि वेदाः अत्यन्तं महत्त्वपूर्णाः सन्ति। सर्वेषां प्राणिनां प्रवृत्तिः सुखार्था न तु दुःखार्था। किन्तु कानि सुखोपकरणानीति यथार्थतयाऽजानन्तो यथेष्टमीहमानाः पुनः पुनः संसरन्ति तान् उद्धर्तुकामो भगवान्परमेष्ठी शतसहस्रश्लोकात्मकं धर्मशास्त्रं विरचय्य भगवते मनवे प्रोवाच। सामाजिक-विकासस्य, सभ्यतायाः समुन्नतेः, नराणां क्रियाकलापस्य, सामाजिक्या व्यवस्थायाश्च महत्त्वपूर्णं इतिवृत्तं वेदेषु प्राप्यते। यथा—**1. सामाजिकवर्णव्यवस्था, 2. आश्रमव्यवस्था, 3. पञ्चमहायज्ञम्, 4. स्त्रीशिक्षाव्यवस्था, 5. संस्कार-व्यवस्था।**

राजनीतिशास्त्रदृष्ट्यापि वैदिकसाहित्यं महत्त्वपूर्णम् अस्ति। 1. वेदेषु राज्ञः प्रजायाश्च कर्माणि, 2. राजतन्त्रस्य विविधं स्वरूपम्, 3. नृपस्य निर्वाचनम्, 4. सभायाः समितेश्च संस्थापना, 5. मन्त्रिपरिषदो चयनम्, 6. राजतन्त्रस्य प्रजातन्त्रस्य च शासनव्यवस्था, 7. अश्वमेधयज्ञम्, 8. विश्वविजयस्य प्राप्तिः, शत्रुदमनम्, एवं चक्रवर्तीकामना, भुक्तभोग्यसन्तानस्य प्राप्तिः यथा-रामः, युधिष्ठिरः, दिलीपादिः। 9. सामदण्डादिविधानम्, राजसूययज्ञम्-राज्याभिषेकः, सर्वभूतयज्ञम्, सोमयज्ञम् इत्यादीनां प्रयोगः समुपलभ्यन्ते। यथा-**विशस्त्वा सर्वा वाञ्छन्तु॰** (अथर्व॰6/87/1) **त्वां विशो वृणतां राज्याय** (अथर्व॰3/4/2) **महते जानराजाय॰**। (यजु॰9/40)

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— सामाजिकव्यवस्थायाः अतिविस्तीर्णं वर्णनं कुत्र उपलभ्यते?
उत्तरम्—वेदेषु।

2. **प्रश्नः**—विनियोगवाक्यरहिताः केवलाः मन्त्राः कुत्र विद्यन्ते?
उत्तरम्—शुक्लयजुर्वेदे।

3. **प्रश्नः**— शुक्लयजुर्वेदस्य संहितैव किं कथ्यते?
उत्तरम्—वाजसनेयिसंहिता।

4. **प्रश्नः**—याज्ञवल्क्येनाराधितः सूर्यो वाजी भूत्वा कस्मै वेदं प्रोक्तवान्?
उत्तरम्—याज्ञवल्क्याय।

5. **प्रश्नः**— शुक्लयजुर्वेदस्य शाखाः के?
उत्तरम्—काण्वमाध्यन्दिनभेदेन शुक्लयजुर्वेदस्य अपि द्वे शाखे विद्यते।

6. **प्रश्नः**— काण्वमाध्यन्दिनयोः किं भवति?
उत्तरम्—समाजस्य अभ्युदये परिवारस्य महद्योगदानं भवति।

7. **प्रश्नः**— समाजिकदृष्ट्या अपि अत्यन्तमहत्त्वपूर्णाः के सन्ति?
उत्तरम्—वेदाः।

8. **प्रश्नः**— सर्वेषां प्राणिनां प्रवृत्तिः सुखार्था दुःखार्था वा?
उत्तरम्—सुखार्था।

9. **प्रश्नः**—सुखोपकरणानीति यथार्थतयाऽजानन्तो यथेष्ट-मीहमानाः पुनः पुनः संसरन्ति तान् उद्धर्तुकामो भगवान्परमेष्ठी किं विरचय्य भगवते मनवे प्रोवाच?
उत्तरम्—शतसहस्रश्लोकात्मकं धर्मशास्त्रम्।

10. **प्रश्नः**—सामाजिकविकासस्य, सभ्यतायाः समुन्नतेः, नराणां क्रियाकलापस्य, सामाजिक्या व्यवस्थायाश्च महत्त्वपूर्णं इतिवृत्तं वेदेषु कानि प्राप्यन्ते?
उत्तरम्—1. सामाजिकवर्णव्यवस्था, 2. आश्रमव्यवस्था,

3. पञ्चमहायज्ञम्, 4. स्त्रीशिक्षाव्यवस्था, 5. संस्कार-व्यवस्था।

11. **प्रश्नः**—राजनीतिशास्त्रदृष्ट्यापि किं महत्त्वपूर्णम् अस्ति?
उत्तरम्—वैदिकसाहित्यम्।

12. **प्रश्नः**—राजनीतिशास्त्रदृष्ट्या वेदेषु कानि उदाहरणानि प्राप्यन्ते?
उत्तरम्—1. राज्ञः प्रजायाश्च कर्माणि, 2. राजतन्त्रस्य विविधं स्वरूपम्, 3. नृपस्य निर्वाचनम्, 4. सभायाः समितेश्च संस्थापना, 5. मन्त्रिपरिषदो चयनम्, 6. राजतन्त्रस्य प्रजातन्त्रस्य च शासनव्यवस्था, 7. अश्वमेधयज्ञम्, 8. विश्वविजयस्य प्राप्तिः, शत्रुदमनम्, एवं चक्रवर्तीकामना, भुक्तभोग्यसन्तानस्य प्राप्तिः; यथा-रामादि।

13. **प्रश्नः**—सामदण्डादिविधानम्, राजसूययज्ञम्-राज्याभिषेकः, सर्वभूतयज्ञम्, सोमयज्ञम् इत्यादीनां प्रयोगः कुत्र समुपलभ्यते?
उत्तरम्—वेदेषु; यथा-विशस्त्वा सर्वा वाञ्छन्तु0, त्वां विशो वृणतां राज्याय (अथर्ववेद, महते जानराया0। (यजुर्वेद।)

2
वैदिक-साहित्ये संहितायाः विवेचनम्

(F) (Code-25)

(क) संहितायाः स्वरूपम्—मन्त्राणां समूहो संहिता। विभिन्नेषु यज्ञेषु प्रयुक्तानां मन्त्राणां शुद्धस्वरूपः संहितासु विद्यते। वेदानां चतुर्धा विभक्तत्वात् मुख्यतया संहिताः अपि ऋग्यजुस्सामाथर्वभेदात् चतस्रः। एतेषु चतुर्षु विभागेषु छन्दोबद्धो मन्त्ररूपो वैदिकदेवतास्तुतिपरको वैदिकमहर्षिभिः साक्षात्कृतो मुख्यविभागः संहिताशब्देन ज्ञायते। 1. ऋक्संहितायां स्तुतिपरकमन्त्राणां संग्रहः विद्यते। 2. यजुःसंहितायां याजकीयानां मन्त्राणां संग्रहः वर्तते। 3. सामसंहितायां गेयात्मकमन्त्राणां संकलनं विद्यते। 4. अथर्ववेदसंहितायां विविधविधविघ्नविनाशकाऽऽभिचारिकमन्त्राणां संकलनं विद्यते। संहितायाः अपरं नाम वेद एव।

1. ऋग्वेदसंहितायां ऋचां संग्रहः। तस्य हेतुः कृते ऋग्वेदः। तल्लक्षणञ्च-**पादेनार्थेन चोपेता वृत्तबद्धाः मन्त्राः**। अस्य होता ऋत्विक्, आचार्यश्च पैलः।
2. यजुर्वेदसंहितायां अध्वर्युकर्मसम्पादनाय यजुषां संकलनं विद्यते। अध्वर्य्यो कृते यजुर्वेदः। वेदोऽयं द्विधा विभज्यते, कृष्णशुक्लभेदात्। ब्रह्मसमुदाय-शुक्लयजुर्वेदसंहिता वाजसनेयी, आदित्य-कृष्णयजुर्वेदसंहिता मैत्रायणी इति। अस्य ऋत्विक् अध्वर्युः आचार्य वैशम्पायनः।
3. सामसंहितायां गेयात्मकमन्त्राणां संकलनं विद्यते। उद्गातुः कृते सामवेदः। अस्य ऋत्विक् उद्गाता आचार्यः जैमिनिः।
4. अथर्वसंहिता यज्ञानुपयुक्तः शान्तिपौष्टिकाभिचार-कर्मप्रतिपादकः। ब्रह्मणः कृते अथर्ववेदः। अस्य ऋत्विक् ब्रह्मा, आचार्यः अङ्गिरसः।

(ख) ऋक्संहितायाः परिचयः—ऋच्यते स्तूयते अनया सा ऋक् इति ऋक्शब्दस्य व्युत्पत्तिः। अतः स्तूयमानां ऋचां समूहः ऋक्संहितायां विद्यते। यत्रार्थवशेन पादव्यवस्था सा ऋगिति मीमांसकाः, अत एव जैमिनिः-पादेनार्थेन चोपेता वृत्तबद्धाः मन्त्राः। सर्वतो प्राचीनतमायाः संहितायाः द्विधा विभागः क्रियते-अष्टकक्रमेण मण्डलक्रमेण च। यथा-

1. परिमाणम्-10 मण्डलाः, 85 अनुवाकाः, 8अष्ट अष्टकाः, 64 अध्यायाः, 1017 सूक्ताः, 10580 मन्त्राः, 153826 शब्दाः, 4320000 अक्षराणि सन्ति।
2. शाखाः-पञ्च 1. शाकलः, 2. वाष्कलः, 3. आश्वलायनशाखा, 4. शांखायन, 5. माण्डूकायनशाखा च। महाभाष्ये 21 शाखाः प्रोक्ताः।
3. ब्राह्मणाणि-द्वौ ब्राह्मणग्रन्थौ ऐतरेयकौषीतकी च।
4. आरण्यकाणि-ऐतरेयशांखायने द्वे।
5. उपनिषद्-ऐतरेयकौषीतकीवाष्कलोपनिषदः तिस्रः। 10 उपनिषदः।
6. होता-ऋत्विक्, आचार्यः-पैलः (ऋषयः), उपवेदः-आयुर्वेदः, विषयः-स्तुतिः शस्त्रञ्च, देवता-इन्द्रः अग्निश्च। ऋग्वेदगतमन्त्रद्रष्टारो ऋषयः गृत्समद-विश्वामित्र-वामदेव-दीर्घतमाऽत्रि-भरद्वाज-वशिष्ठादयः सन्ति। द्वितीय-मण्डलादारभ्य सप्तम- मण्डलपर्यन्तानां मण्डलानां तस्य तस्य ऋषेः वंशेन सह सम्बन्धमस्ति। सम्प्रति ऋग्वेदस्य प्रचलिता संहिता शाकलशास्त्रीया एव वर्तते। अस्याः संहितायाः अन्ते ऋक्परिशिष्टनाम्ना संगृहीतानि षट्त्रिंशत्संख्यकानि सूक्तानि सन्ति। अस्यां शाखायां दशमण्डलानि, पंचाशीत्यनुवाकाः, सप्तदशोत्तरसहस्राणि सूक्तानि सन्ति।

(ग) ऋक्संहितायाः वैशिष्ट्यम्-विश्वस्य सर्वतः प्राचीनतमः ऋग्वेदः। धार्मिकसांस्कृतिकैतिहासिक-राजनीतिक-काव्यशास्त्रीयविषयाणां प्रतिपादकत्वेन महत्त्वपूर्णं स्थानं भजते, यतो हि ऋग्वेदः-1. यज्ञस्य मूलस्वरूप-प्रतिपादनपुरस्सरं कर्मणोऽकर्मणोः धर्माधर्मयोः पापपुण्ययोश्च सूक्ष्मतया प्रतिपादकः। 2. सृष्ट्युत्पत्तिस्थितिप्रलयादीनां वर्णने मन्वादिकालमानानां वंशपरम्पराणामपि ज्ञापकः। 3. ब्रह्मजीवेश्वरादिदार्शनिकविषयाणां सूक्ष्मविवेचकः। 4. विभिन्नाख्यानदेवस्तुतिवर्णनेषु वैदिकछन्दसां सूक्ष्मतया विवेचकः। 5. अग्नि-इन्द्रादिदेवानां सूक्तसङ्कलनत्वेन धर्मकोषः। 6. ग्रहनक्षत्रभूगोलादीनां व्याख्यापकः। इत्थं सर्वेषां वेदवेदाङ्गानां लौकिकशास्त्राणाञ्च बीजरूपोऽयं ऋग्वेदः।

(घ) यजुःसंहिताः-यजुर्यजते इति व्युत्पत्त्या अध्वर्युकर्मसम्पादनाय यज्ञसम्बन्धियजुषां संकलनं यजुस्संहितायां विद्यते। अत एव इज्यतेऽनेनेति यजुः, अनियताक्षरावसानो यजुः, अतः पद्यबन्धैः गीतादिभिश्च रहिता मन्त्रात्मिका रचना यजुष् इत्युच्यते। संहितेयं शुक्ल-कृष्णभेदाद्द्विधा। शुक्लयजुर्वेदसंहिता ब्रह्मसम्प्रदायप्रधानिका वाजसनेयीसंहिता, कृष्णयजुर्वेदसंहिता च आदित्य-सम्प्रदायप्रधानिका मैत्रायणीसंहिता। अत्र केवलं मन्त्राणां सन्निवेशं विद्यते यस्यां सा तु शुक्लयजुर्वेदसंहिता इत्यभिधीयते। एवं मन्त्र-ब्राह्मणयोः द्वयोरपि मिश्रीभावः कृष्णयजुर्वेदसंहिता इत्यभिधानेनाभिधीयते।

यजुर्वेदसंहितायाः परिचयः—1. परिमाणम्-शुक्लयजु०-40 अध्यायाः, 303 अनुवाकाः, 1975 मन्त्राः/कण्डिका। कृष्णयजु०-40 अध्यायाः, 328 अनुवाकाः, 2086 मन्त्राः सन्ति। 2. शाखा-शुक्लयजुःभाष्ये 100 शाखा, माध्यन्दिनशाखा काण्वशाखा च। कृष्णयजु० चतस्रः शाखाः तैत्तिरीयमैत्रायणीकठकपिष्ठलाः। 3. ब्राह्मणाणिशतपथ-ब्राह्मणम् (द्वयोः) (माध्यन्दिनकाण्वयोः) अन्ये च तैत्तिरीयमैत्रायणीकठकपिष्ठलब्राह्मणाणि। 4. आरण्यकाणि-शुक्लयजुः-बृहदारण्यकम्, कृष्णयजु०-द्वे, तैत्तिरीयमैत्रायणी च। 5. उपनिषद्-शुक्लयजु०-ईशावास्योपनिषत्, बृहदारण्य-कोपनिषत्-सम्पूर्णतया 19 संख्यकाः। कृष्णयजु०-कठतैत्तिरीयादयः 32 उपनिषदः। 6. होता-अध्वर्युः, 7. आचार्यः-शुक्लयजु० याज्ञवल्क्यः, यजु० वैशम्पायनः। 8. उपवेदः-धनुर्वेदः, 9. विषयः-यागः, 10. देवता-वायुः।

(ङ) यजुःसंहितायाः वैशिष्ट्यम्-यजुसंहितायां अध्वर्युकर्मसम्पादनाय यज्ञीयविधीनां सम्पादनमन्त्राणां संकलनं विद्यते। संहितायाः अस्याः वैशिष्ट्यं इत्थं विभक्तुं शक्यते-

1. "यज्ञो वै श्रेष्ठतमं कर्म" इत्यादिना यज्ञमहत्त्वप्रतिपादन-पुरस्सरं विभिन्नयागाणां सम्पादनं कथं कीदृङ्मन्त्रैः कर्तव्यमिति सविशदं प्रतिपादयति।
2. वर्णानुसारं यज्ञविभाजनं यथा ब्राह्मणाणां कृते वाजपेयादीनां, क्षत्रियाणां कृते अश्वमेधराजसूयादीनां, सर्वजनहिताय सर्वमेधादियज्ञानां वर्णनं विद्यते।
3. सामाजिकसांस्कृतिकसौहार्दतायाः वर्णव्यवस्थायाश्च ज्ञापकः।
4. यजुर्वेदे रूद्रविष्णुप्रजापतीनां महत्त्वं ऋग्वेदापेक्षया दृढीक्रियते।

एतदतिरिच्यमपि ऐतिहासिकराजनीतिककाव्यशास्त्रीय-भौगोलिकविषयाणाञ्च प्रतिपादकोऽयं यजुर्वेदः।

(च) सामसंहितायाः परिचयः-सा च अमश्चेति तत्साम्नः सामत्वम्। सा नाम अमो नाम स्वरः। अतः स्वरबद्धरीत्या गेयात्मकर्चाणां समूहः साम-संहिता। यज्ञे उद्गाता यो हि देवाहूतये स्वरबद्धान् मन्त्रान् उच्चैर्गायति तदपेक्षितमन्त्रसंग्रहः सामवेदसंहितायां विद्यते। संहितायाः द्वौ भागौ पूर्वार्चिक उत्तरार्चिकश्च। परिचयः सामसंहितायाः-पूर्वार्चिके-6 प्रपाठकाः। 1. परिमाणम्-पूर्वार्चिके 650 मन्त्राः, उत्तरार्चिके-1225 मन्त्राः, आहत्य-1875 मन्त्राः, 1504 मन्त्राः ऋग्वेदीयाः। 2. शाखाः-पतंजलिना सहस्रवर्त्मा सामवेदः इति प्रोक्तम्। त्रयोः प्रमुखाः कौथुमीयराणायनीयजैमिनीयशाखाः। 3. ब्राह्मणाणि-पञ्च ब्राह्मणग्रन्थाः-1. पञ्चविंशः 2. षड्विंशः, 3. अद्भुतः, 4. मन्त्रः, 5. ताण्ड्यः छान्दोग्यः।

4. आरण्यकाणि द्वौ ग्रन्थौ-1. तवलकारारण्यकम्, 2. छान्दोग्यारण्यकम्। 5. उपनिषदः-केनछान्दोग्यमैत्रायण्यादयः 16 संख्यकाः। 6. होता-उद्गाता, 7. आचार्यः-जैमिनिः, 8. उपवेदः-गन्धर्ववेदः। 9. विषयः-गानम्, विकारश्च, स्तुतिः। गानम्-प्रस्तावः, उद्गीथः, प्रतिहारः, उपद्रवः, निधश्च। विकारश्च-वकारः, विश्लेषणः, विकर्षणः, अभ्यासः, विरामः, स्तोमश्च।

(छ) सामवेदस्य महत्त्वम्-"वेदानां सामवेदोऽस्मि" इति भगवद्वचनात् विशिष्टोऽयं सामवेदः।

1. ऋग्वेदस्य गेयात्मकमन्त्राणां समूहेयं संहिता। अतः गेयपद्धति-विशेषप्रतिपादिकेयं संहिता। 2. सामसंहितायां पूर्वार्चिके अग्नि-इन्द्र-सोमसम्बद्धा गेयमन्त्राः। 3. सोमः सोमरस-सोमपान-सोमपानानाञ्च महत्त्वं प्रतिपादितं विद्यते। सोम एव ब्रह्मतत्त्वं, अतः तत्प्राप्तिः भक्त्यैवेति सामवेदे प्रतिपादितम्।

4. प्रस्तारः, उद्गीथः, प्रतिहारः, उपद्रवः, निधनश्च गानभेदाः, वकारः विश्लेषणः अभ्यासः विरामः गानविकाराः। 5. सामवेदादेव लौकिकवैदिकस्वराणाञ्च क्रमबद्धोत्पत्तिर्जातेति विदुषामभिमतम्।

इत्थं 'स्तोत्रं कस्य न तुष्टये' इति स्तोत्रपद्धतिमनुसरन् विशिष्टतां भजतेऽयं सामवेदः।

(ज) अथर्वसंहितायाः परिचयः- आमुष्मिकमैहिकञ्चोभयफलप्रदाता अथर्ववेदस्तु यज्ञानुपयुक्तः शान्ति-पौष्टिकाभिचारादिकर्मप्रतिपादकत्वेनात्यन्तविलक्षण एव। गोपथब्राह्मणानुसारेण आत्मानं स्वान्तसि द्रष्टुं शिक्षा यस्मिन् वेदे प्रदीयते सोऽथर्ववेदः। संहितायामस्यां विषयाणां त्रिविधता सम्पादिता आध्यात्मिकाधिदैविकाधिभौतिकाधारेण। परिचयः- 1. परिमाणम्-विंशतिकाण्डाः, 731 सूक्ताः, 6000मन्त्राः। 2. शाखाः "नवधाथर्वणो वेदाः"। 1. पिप्पलादः, 2. शौनकः प्रमुखौ द्वावेवोपलभ्यते। 3. ब्राह्मणम्-एकमेव गोपथब्राह्मणम्। 4. आरण्यकम् नास्ति। 5. उपनिषदः- प्रश्नमुण्डक-माण्डूक्यादयः 31 उपनिषदः। 6. होता-ब्रह्मा, 7. आचार्यः-अङ्गिरसः (सुमन्तः), 8. उपवेदः स्थापत्यवेदः। 9. विषयः-शान्तिपौष्टिकाभिचारमन्त्राः, 10. उपाधिः-ब्रह्मवेदः, अङ्गिरोवेदः, भैषज्यवेदः।

(झ) अथर्वसंहितायाः वैशिष्ट्यम्- आमुष्मिकैहिकञ्चोभयफलप्रदातृत्वेन संहितेयं विशिष्टतमः।

1. आध्यात्मिकं आधिभौतिकं आधिदैवतञ्चेति त्रिविधानां विषयाणां सङ्कलनं अथर्वसंहितायां विद्यते।
2. शान्तिपौष्टिकाभिचारादिकर्मप्रतिपादकत्वेन संहितेयं विलक्षणा।
3. अथर्ववेदे भैषाज्यायुष्यसूक्तेषु नानाविधायुर्वेदीय-सिद्धान्तानां वर्णनं विशिष्टतया प्राप्यते।
4. संस्काराणां विवेचनं दार्शनिकभौगोलिकराजनैतिक-वैज्ञानिकविषयाणां च समष्टितया प्रतिपादकत्वेन विशिष्टेयं संहिता।
5. एतत्सर्वं पर्यालोच्यैव तात्त्विकदृष्ट्या अथर्ववेदस्य वैशिष्ट्यं स्वीकुर्वन्ति।

तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— संहिता कतिप्रकारकाः भवन्ति?
उत्तरम्—चतस्रः।

2. **प्रश्नः**— चतुष्टय-संहिता काः सन्ति?
उत्तरम्—ऋग्यजुस्सामाथर्वभेदात् चतस्रः।

3. **प्रश्नः**— संहितायाः किं स्वरूपम्?
उत्तरम्—मन्त्राणां समूहो संहिता। विभिन्नेषु यज्ञेषु प्रयुक्तानां मन्त्राणां शुद्धस्वरूपः संहितासु विद्यते।

4. **प्रश्नः**— संहिताशब्देन किं ज्ञायते?
उत्तरम्—चतुर्षु विभागेषु छन्दोबद्धो मन्त्ररूपो वैदिक-देवतास्तुतिपरको वैदिकमहर्षिभिः साक्षात्कृतो मुख्यविभागः।

5. **प्रश्नः**— स्तुतिपरकमन्त्राणां संग्रहः कुत्र विद्यते?
उत्तरम्— ऋक्संहितायाम्।

6. **प्रश्नः**—याजकीयानां मन्त्राणां संग्रहः कुत्र वर्तते?
उत्तरम्—यजुःसंहितायाम्।

7. **प्रश्नः**— गेयात्मकमन्त्राणां संकलनं कुत्र विद्यते?
उत्तरम्— सामसंहितायाम्।

8. **प्रश्नः**— विविधविधविघ्नविनाशकाऽऽभिचारिकमन्त्राणां संकलनं कुत्र विद्यते?
उत्तरम्— अथर्ववेदसंहितायाम्।

9. **प्रश्नः**— संहितायाः अपरं नाम किमस्ति?
उत्तरम्— वेद एव।

10. **प्रश्नः**— होतुः कृते ऋचां संग्रहः कुत्र विद्यते?
उत्तरम्— ऋग्वेदसंहितायाम्।

11. **प्रश्नः**— ऋग्वेदस्य किं लक्षणम्?
उत्तरम्— "पादेनार्थेन चोपेता वृत्तबद्धाः मन्त्राः" अस्य होता ऋत्विक्, आचार्यश्च पैलः।

12. **प्रश्नः**—अध्वर्युकर्मसम्पादनाय यजुषां संकलनं कुत्र विद्यते?
उत्तरम्—यजुर्वेदसंहितायाम्।

13. **प्रश्नः**—यजुर्वेदोऽयं कतिधा विभज्यते?
उत्तरम्— द्विधा, कृष्णशुक्लभेदात्।

14. **प्रश्नः**—उद्गातुः कृते गेयात्मकमन्त्राणां संकलनं कुत्र विद्यते?
उत्तरम्—सामसंहितायाम्।

15. **प्रश्नः**—ब्रह्मणः कृते यज्ञानुपयुक्तः शान्तिपौष्टिकाभिचारकर्मप्रतिपादनं कुत्र वर्तते?
उत्तरम्—अथर्वसंहितायाम्।

16. **प्रश्नः**—ऋक्शब्दस्य का व्युत्पत्तिः?
उत्तरम्—ऋच्यते स्तूयते अनया सा ऋक् इति।

17. **प्रश्नः**— स्तूयमानां ऋचां समूहः कुत्र विद्यते?
उत्तरम्— ऋक्संहितायाम्।

18. **प्रश्नः**— संहितायाः द्विधा विभागः केन क्रमेण क्रियते?
उत्तरम्— अष्टकक्रमेण मण्डलक्रमेण च।

19. **प्रश्नः**—ऋक्संहितायाः अन्यानि विवरणानि कानि सन्ति?
उत्तरम्—परिमाणम्-10मण्डलाः, 85अनुवाकाः, 8अष्टअष्टकाः, 64अध्यायाः, 1017सूक्ताः, 10580 मन्त्राः, 153826 शब्दाः, 4320000 अक्षराणि सन्ति।

20. **प्रश्नः**— ऋक्संहितायाः अन्यानि शाखादयः कानि सन्ति?
उत्तरम्—शाखा-पञ्च-1. शाकलः, 2. वाष्कलः, 3. आश्वलायनशाखा, 4. शांखायन, 5. माण्डूकायनशाखा च।

21. **प्रश्नः**—ऋक्संहितायां कति ब्राह्मणानि?
उत्तरम्—द्वौ ब्राह्मणग्रन्थौ ऐतरेयकौषीतकी च।

22. **प्रश्नः**— ऋक्संहितायां कति आरण्यकाणि?
उत्तरम्—ऐतरेयशांखायने द्वे।

23. **प्रश्नः**— ऋक्संहितायां कति उपनिषदः सन्ति?
उत्तरम्—ऐतरेयकौषीतकीवाष्कलोपनिषदः तिस्रः।

24. **प्रश्नः**— ऋक्परिशिष्टनाम्ना संगृहीतानि कानि सूक्तानि सन्ति?
उत्तरम्— षट्त्रिंशत्संख्यकानि।

25. **प्रश्नः**— विश्वस्य सर्वतः प्राचीनतमः वेदः कः?
उत्तरम्— ऋग्वेदः।

26. **प्रश्नः**—ऋग्वेदः कथं महत्त्वपूर्णं स्थानं भजते?
उत्तरम्—धार्मिकसांस्कृतिकैतिहासिक-राजनीतिक-काव्यशास्त्रीयविषयाणां प्रतिपादकत्वेन।

27. **प्रश्नः**—ग्रहनक्षत्रभूगोलादीनां व्याख्यापकः, सर्वेषां वेदवेदाङ्गानां लौकिकशास्त्राणाञ्च बीजरूपः कः?
उत्तरम्— ऋग्वेदः।

28. **प्रश्नः**—सृष्ट्युत्पत्तिस्थितिप्रलयादीनां वर्णने मन्वादि-कालमानानां वंशपरम्पराणामपि ज्ञापकः कः?
उत्तरम्— ऋग्वेदः।

29. **प्रश्नः**—अग्नि-इन्द्रादिदेवानां सूक्तसङ्कलनत्वेन धर्मकोषः कः?
उत्तरम्— ऋग्वेदः।

30. **प्रश्नः**—यजुःसंहितायाः का व्युत्पत्तिः?
उत्तरम्—यजुर्यजते इति व्युत्पत्त्या, इज्यतेऽनेनेति यजुः, अनियताक्षरावसानो यजुः।

31. **प्रश्नः**—अध्वर्युकर्मसम्पादनाय यज्ञसम्बन्धियजुषां संकलनं कुत्र वर्तते?
उत्तरम्—यजुःसंहितायाम्।

32. **प्रश्नः**—यजुःसंहितायाः का परिभाषा?
उत्तरम्— पद्यबन्धैः गीतादिभिश्च रहिता मन्त्रात्मिका रचना यजुष् इत्युच्यते।

33. **प्रश्नः**—यजुःसंहितेयं कतिधा?
उत्तरम्— शुक्लकृष्णभेद् द्विधा।

34. **प्रश्नः**—शुक्लयजुर्वेदसंहितायाः का परिभाषा?
उत्तरम्—ब्रह्मसम्प्रदायप्रधानिका वाजसनेयीसंहिता, केवलं मन्त्राणां सन्निवेशम्।

35. **प्रश्नः**— कृष्णयजुर्वेदसंहितायाः का परिभाषा?
उत्तरम्— आदित्यसम्प्रदायप्रधानिका मैत्रायणीसंहिता, एवं मन्त्र-ब्राह्मणयोः द्वयोरपि मिश्रीभावः।

36. **प्रश्नः**—यजुर्वेदसंहितायां शुक्लयजुर्वेदसंहितायाः किं परिमाणम्?
उत्तरम्—शुक्लयजु०-40 अध्यायाः, 303 अनुवाकाः, 1975 मन्त्राः/ कण्डिका।

37. **प्रश्नः**—यजुर्वेदसंहितायां कृष्णयजुर्वेदसंहितायाः किं परिमाणम्?
उत्तरम्— कृष्णयजुर्वेदे-40 अध्यायाः, 328 अनुवाकाः, 2086 मन्त्राः।

38. **प्रश्नः**—कृष्णयजुर्वेदे काः चतस्रः शाखाः?
उत्तरम्—तैत्तिरीयमैत्रायणीकठकपिष्ठलाः।

39. प्रश्नः—शुक्लयजुर्वेदे उपनिषद् संख्यकाः काः?
उत्तरम्—ईशावास्योपनिषत्, बृहदारण्यकोपनिषत्-सम्पूर्णतया 19 संख्यकाः।

40. प्रश्नः—कृष्णयजुर्वेदे उपनिषत्संख्यकाः काः?
उत्तरम्—कठतैत्तिरीयादयः, 32-उपनिषदः, 6. होता-अध्वर्युः, 7. आचार्यः-शुक्लयजु०याज्ञवल्क्यः, यजु०वैशम्पायनः। 8. उपवेदः-धनुर्वेदः, 9. विषयः-यागः, 10. देवता-वायुः।

41. प्रश्नः—यजुःसंहितायाः वैशिष्ट्यं किम्?
उत्तरम्—यजुःसंहितायां अध्वर्युकर्मसम्पादनाय यज्ञीयविधीनां सम्पादकमन्त्राणां संकलनं विद्यते।

42. प्रश्नः—यजुःसंहितायां वर्णानुसारं यज्ञविभाजनं किम्?
उत्तरम्—ब्राह्मणानां कृते वाजपेयादेः, क्षत्रियाणां कृते अश्वमेधराजसूयादीनां, सर्वजनहिताय सर्वमेधादियज्ञानां वर्णनं विद्यते।

43. प्रश्नः— सामसंहितायाः का परिभाषा?
उत्तरम्— सा च अमश्चेति तत्साम्नः सामत्वम्। सा नाम अमो नाम स्वरः।

44. प्रश्नः— स्वरबद्धरीत्या गेयात्मकर्चाणां समूहः कः?
उत्तरम्— साम-संहिता।

45. प्रश्नः—सामसंहितायाः द्वौ भागौ कौ?
उत्तरम्—पूर्वार्चिकः उत्तरार्चिकश्च।

46. प्रश्नः— सामसंहितायाः पूर्वार्चिके कति प्रपाठकाः मन्त्राश्च?
उत्तरम्— 6 पद्, 650 मन्त्राः।

47. प्रश्नः— सामसंहितायाः उत्तरार्चिके कति मन्त्राः?
उत्तरम्— 1225 मन्त्राः, आहत्य-1875 मन्त्राः, 1504 मन्त्राः ऋग्वेदीयाः।

48. प्रश्नः— सामसंहितायाः कति ब्राह्मणाणि?
उत्तरम्— पञ्चब्राह्मणग्रन्थाः-1. पञ्चविंशः 2. षड्विंशः, 3. अद्भुतः, 4. मन्त्रः, 5. ताण्ड्यः छान्दोग्यः।

49. प्रश्नः—सामसंहितायाः आरण्यकाणि द्वौ ग्रन्थौ कौ?
उत्तरम्—1. तवलकारारण्यकम्, 2. छान्दोग्यारण्यकम्।

50. प्रश्नः— "वेदानां सामवेदोऽस्मि" इति कस्य कथनम्?
उत्तरम्— भगवतः श्रीकृष्णस्य वचनम्।

51. प्रश्नः— सामसंहितायां पूर्वार्चिके के सम्बद्धाः गेयमन्त्राः?
उत्तरम्— अग्नि-इन्द्र-सोमाश्च।

52. प्रश्नः— सामसंहितायां सोम-सम्बन्धिमहत्त्वं किम्?
उत्तरम्—सोमरस-सोमपान-सोमपानानाञ्च महत्त्वमेवं ब्रह्मतत्त्वं, अतः तत्प्राप्तिः भक्त्यैवेति सामवेदे प्रतिपादितम्।

53. प्रश्नः—सामसंहितायां गानभेदाः के सन्ति?
उत्तरम्—प्रस्तारः, उद्गीथः, प्रतिहारः, उपद्रवः, निधनश्च वकारः विश्लेषणः अभ्यासः विरामः गानविकाराः।

54. प्रश्नः—लौकिकवैदिकस्वराणाञ्च कुत्र क्रमबद्धोत्पत्ति-र्जातेति विदुषामभिमतम्?
उत्तरम्— सामवेदादेव।

55. प्रश्नः—अथर्वसंहितायाः का परिभाषा?
उत्तरम्—आमुष्मिकमैहिकञ्चोभयफलप्रदाता अथर्ववेदस्तु यज्ञानुपयुक्तः शान्तिपौष्टिकाभिचारादि-कर्मप्रतिपादकत्वेनात्यन्तम्।

56. प्रश्नः— गोपथब्राह्मणानुसारेण आत्मानं स्वान्तसि द्रष्टुं शिक्षा कस्मिन् वेदे प्रदीयते?
उत्तरम्— अथर्ववेदे।

57. प्रश्नः— अथर्वसंहितायाः परिमाणं किम्?
उत्तरम्— विंशतिकाण्डः, 731 सूक्ताः, 6000मन्त्राः।

58. प्रश्नः— अथर्वसंहितायाः कति उपनिषदः?
उत्तरम्— प्रश्नमुण्डकमाण्डूक्यादयः 31 उपनिषदः।

59. प्रश्नः— अथर्वसंहितायाः अन्य-वैशिष्ट्यं किम्?
उत्तरम्—होता-ब्रह्मा, आचार्यः-अङ्गिरसः (सुमन्तः), उपवेदः स्थापत्यवेदः। विषयः- शान्तिपौष्टिका-भिचारमन्त्राः, उपाधिः-ब्रह्मवेदः, अङ्गिरोवेदः, भैषज्यवेदः।

60. प्रश्नः—आध्यात्मिकं-आधिभौतिकं आधिदैवतञ्चेति त्रिविधानां विषयानां सङ्कलनं कुत्र विद्यते?
उत्तरम्— अथर्वसंहितायाम्।

61. प्रश्नः—संस्काराणां विवेचनं दार्शनिकभौगोलिक-राजनैतिकवैज्ञानिक-विषयाणां च समष्टितया प्रतिपादकत्वेन विशिष्टेयं संहिता का?
उत्तरम्— अथर्वसंहिता।

G-Code-25 (ञ) संहितस्थ-सूक्तानां विवेचनमेवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि-

1. (ऋग्वेद) अग्निसूक्तम् (1.1.1) 2. इन्द्रसूक्तम्- (2.12) 3. पुरुषसूक्तम्- (10. 90) 4. हिरण्यगर्भसूक्तम्- (10.121), 5. नासदीयसूक्तम् (10.129), 6. वाक्सूक्तम् (ऋक्-10.125), 7. अथर्व-पृथिवी-सूक्तम् (12.1), 8. ऋक्-वरुणसूक्तम् (1×25), 9. ऋक्-सूर्यसूक्तम् (1.115), 10. ऋक्-उषस् सूक्तम्-3.61), 11. ऋक् (5.83) पर्जन्यसूक्तम्, 12. शुक्लयजुर्वेदस्य शिवसंकल्पसूक्तम् (1.6), 13. शुक्लयजुर्वेदस्य प्रजापतिसूक्तम् (1.5), 14. अथर्व-राष्ट्राभिवर्धनसूक्तम् (1.29), 15. अथर्व-कालसूक्तम् (19.53)

1. (ऋग्वेद) अग्निसूक्तम्- (1.1.1) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजं।
होतारं रत्नधातमम्।। 1।।

व्याख्या–पुरोहितं, यस्य देवम्, ऋत्विजं, होतारं, रत्नधातमम्, अग्निम् इले। अर्थात् अग्नेः स्तुतिमुपस्थापयति–अग्निर्देवता। विश्वामित्रपुत्रो मधुच्छन्दा ऋषिः। गायत्री छन्दश्च। अत्र भगवान् वेदपुरुषः आह–अग्निनामकं देवम् ईले स्तौमि। अयमग्निः यज्ञस्य पुरोहितः अस्ति। यतः यथा राज्ञः पुरोहितः तदभीष्टं सम्पादयंति, तथा अग्निरपि यज्ञस्य अपेक्षितं होमं सम्पादयति। ... रत्नधातमं, ... यज्ञफलरूपाणां रत्नानामतिशयेन धारयितारम्।

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत।
स देवाँ एह वक्षति।।2।।

व्याख्या–अस्य अग्निदेवस्य पुरातन-भृगु-अंगिराप्रभृति-ऋषिभिः स्तुतिः सम्पाद्यते। सः अग्निः अस्मिन् यज्ञे अस्मात् वरणीयान् देवान् प्राप्यतु।

अग्निना रयिमश्नवत्पोषमेव दिवेदिवे।
यशसं वीरवत्तमम्।।3।।

व्याख्या–योऽयं होत्रा स्तुत्योऽग्निः तेन अग्निना निमित्तभूतेन यजमानो रयिं धनम् अश्ववत् प्राप्नोति। तद्दिवे दिवे पोषमेव प्रतिदिनं पुष्यमानतया वर्धमानमेव न तु कदाचिदपि क्षीयमाणम्। यशसं दानादिना यशोयुक्तम्। वीरवत्तमम्, अतिशयेन पुत्रभृत्यादिवीरपुरुषोपेतं सति हि धने पुरुषाः सम्पद्यन्ते।

अग्ने यं यामध्वरं विश्वतः परिभूरसि।
स इद्देवेषु गच्छति।।4।।

व्याख्या–हे अग्ने! यं यज्ञं त्वं विश्वतः सर्वासु दिक्षु प्राप्तवान् असि, सदत् स एव यज्ञो देवेषु तृप्तिं प्रणेतुं स्वर्गे गच्छति। कीदृशः यज्ञः। अध्वरं हिंसारहितम्। न हि अग्निना सर्वतः पालितं यज्ञं राक्षसादयो हिंसितुं प्रभवन्ति।

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः।
देवो देवेभिरागमत।।5।।

व्याख्या–अयमग्निदेवः दानादिगुणयुक्तः देवस्वरूपः क्रान्तप्रज्ञः असत्य-रहितः चित्रश्रवस्तमः विविधकीर्तियुक्तः देवेभिः अन्यैः देवैः हविर्भोजिभिः सह आगमत् अस्मिन् यज्ञे समागच्छतु।

यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि।
तवेत्तत्सत्यमङ्गिरः।।6।।

व्याख्या–हे अग्ने! त्वं दाशुषे हविर्दत्तवे यजमानाय तत्प्रीत्यर्थं यद् भद्रं वित्तगृहप्रजापशुरूपं कल्याणं करिष्यसि तद् भद्रं तव इत् तवैव। सुखहेतुरिति शेषः। हे अङ्गिरः! अग्ने! एतच्च सत्यं न त्वत्र विसंवादोऽस्ति।

उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्।
नमो भरन्त एमसि।।7।।

व्याख्या–हे अग्ने! वयम् अनुष्ठातारो दिवेदिवे प्रतिदिनं दोषावस्तः रात्रावहति च धिया बुद्ध्या नमो भरन्तः नमस्कारं सम्पादयन्तः उप समीपे त्वा एमसि त्वामागच्छामः।

राजन्तमध्वराणां गोपामृतस्य दीदिविम्।
वर्धमानं स्वे दमे।।8।।

व्याख्या–अग्ने व्यक्तित्वमुद्भावयन्भगवान्वेद आह–राजन्तमिति। पूर्वमन्त्रे, त्वामुपैम इत्यग्निमुद्दिश्योक्तम्। कीदृशं त्वाम्। राजन्तं दीप्यमानम् अध्वराणां राक्षसकृतहिंसारहितानां यज्ञानां गोपां रक्षकं ऋतस्य सत्यस्यावश्यम्भाविनः कर्मफलस्य दीदिविम् पौनःपुन्येन भृशं वा द्योतकम्। आहुत्याधारमग्निं दृष्ट्वा शास्त्रप्रसिद्धं कर्मफलं स्मर्यते। स्वे दमे स्वकीयगृहे यज्ञशालायां हविर्भिः वर्धमानम्।

स नः पितेव सूनवेऽग्ने सूपायनो भव।
सचस्वा नः स्वस्तये।।9।।

व्याख्या–हे अग्ने! स त्वं नः अस्मदर्थं सूपायनः शोभनप्राप्तियुक्तः भव, तथा नः अस्माकं स्वस्तये विनाशराहित्यार्थं सचस्व।

(1) अग्निसूक्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—ऋग्वैदिक, क्रमांक-1, 1, 1, इति सूक्तस्य देवः कः?
   उत्तरम्—अग्निः।
2. **प्रश्नः**—ऋग्वेदे अग्निसम्बद्धानि कति सूक्तानि सम्प्राप्यन्ते?
   उत्तरम्—200 सूक्तानि।
3. **प्रश्नः**— 'मधुच्छदः' कस्य सूक्तस्य ऋषिः अस्ति?
   उत्तरम्—अग्निसूक्तस्य।
4. **प्रश्नः**—ऋग्वेदप्रथममण्डलस्य प्रथमसूक्तस्य देवता कः अस्ति?
   उत्तरम्—अग्निः।
5. **प्रश्नः**—ऋग्वेदस्य प्रारम्भिक-सूक्तं किमस्ति?
   उत्तरम्—अग्निसूक्तम्।
6. **प्रश्नः**—'द्यौस्-पुत्रः' कं कथ्यते?
   उत्तरम्—अग्निम्।
7. **प्रश्नः**—'घृतलोमः' कस्य दैवतस्य विशेषणमस्ति?
   उत्तरम्—अग्नेः।
8. **प्रश्नः**— ऋत्विक् होता पुरोहितश्च कः?
   उत्तरम्—अग्निः।
9. **प्रश्नः**— ऋग्वेदे अग्निं कं स्थानं लभते?
   उत्तरम्—द्वितीयम्।
10. **प्रश्नः**— अग्निः केन सम्बोधनेन सम्बोधितो भवति?
    उत्तरम्—होता।
11. **प्रश्नः**—"राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमानं स्वे दमे।।" इति मन्त्रांशेन सम्बद्धदेवता कः?
    उत्तरम्—अग्निः।
12. **प्रश्नः**—'जातवेदाः' अनेन विशेषणेन विशिष्टः देवः कः?
    उत्तरम्—अग्निः।
13. **प्रश्नः**—ऋग्वैदिक, क्रमांक-1, 1, 1, इति सूक्ते कति मन्त्राः सन्ति?
    उत्तरम्— 9 नवमन्त्राः।
14. **प्रश्नः**—'दमुनाः' कस्य विशेषणमस्ति?
    उत्तरम्—अग्नेः।
15. **प्रश्नः**—पृथ्वीस्थानीयः देवता कः?
    उत्तरम्— अग्निः।
16. **प्रश्नः**—'पुरोहित' इत्यभिधानेन अभिहितः कः?
    उत्तरम्—अग्निः।
17. **प्रश्नः**—"स नः पितेव सूनवेऽग्ने" इति मन्त्रांशेन सम्बद्धदेवता कः?
    उत्तरम्—अग्निः।
18. **प्रश्नः**—"होतारं रत्नधातमम्" इति मन्त्रांशेन सम्बद्धदेवता कः?
    उत्तरम्—अग्निः।

2. इन्द्रसूक्तम्-(2.12) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

इन्द्रदेवतायाः स्तुतिः 1028 सूक्तेषु कृताऽस्ति। ऋग्वेदस्य मन्त्रानुसारम् इन्द्रस्य त्रयः विशिष्टः गुणाः कथिताः सन्ति–महतां कार्याणां सम्पादनशक्तिः अतुल्यः पराक्रमः युद्धे असुरेषु विजयः। अस्य सूक्तस्य ऋषिः गृत्समदः। इन्द्रः देवता। त्रिष्टुप् छन्दः। अस्य बाह्यरूपं विद्युत् अस्ति। इत्थमयं विद्युतो देवः। अयमिन्द्रः अतिशयेन प्रेम्णा सोमरसं पिबति, येन प्रचुर-शक्तिः उत्पन्ना भवति। तदानीं सः महान्ति कार्याणि सम्पादयति। द्यौः इन्द्रस्य पिता उक्तः। अग्निः पूषा च तस्य भ्रातरौ स्तः। इन्द्राणी शची वा पत्नी आस्ते। इन्द्रं शचीपतिः शतक्रतुः, मरुतसखा, मरुत्वान् वज्री प्रभृतिनामभिः सम्बोध्यते।

यो जात एव प्रथमो मनस्वान्,
देवो देवान् क्रतुना पर्यभूषत्।
यस्य शुष्माद् रोदसी अभ्यसेतां,
नृम्णस्य मह्ना स जनास इन्द्रः।।1।।

व्याख्या–गृत्समदो ऋषिः ब्रूते–हे जनासः जनाः अथवा असुराः। यः इन्द्रः जायमानः एव सन् देवानां प्रधानभूतः, मनस्वान् मनस्विनामग्रगण्यः, देवः द्योतमानः मनु, क्रतुना वृत्रवधादि स्वकीयेन कर्मणा सर्वान् देवान्, पर्यभूषयत् पर्यभवत् अत्यक्रमत् वा। यस्य इन्द्रस्य शुष्मात् शारीरिकबलात्, रोदसी द्यावापृथिव्यौ, अभ्यसेतान् अविभीताम् अर्थात् भयभीतौ अभवताम्। भ्यस भयवेपनयोरिति निरुक्तः। नृम्णस्य महान् सेनालक्षणस्य बलस्य महत्त्वेन युक्तः स इन्द्रः अस्ति।

यः पृथिवीं व्यथमानामदृंहद्,
यः पर्वतान् प्रकुपिताँ अरम्णात्।
यो अन्तरिक्षं विममे वरीयो,
यो द्यामस्तभ्नात् स जनास इन्द्रः।।2।।

व्याख्या–हे जना! यः इन्द्रः व्यथमानाम् चलन्तीं पृथिवीम् अदृंहत् दृढमकरोत्। यश्च प्रकुपितान् इतस्ततः चलितान् पक्षयुक्तान् पर्वतान्, अरम्णात् नियमितवान् स्वे स्वे स्थानं स्थापितवान्। यश्च वरीयः उरुतमम् अन्तरिक्षम् विममे विस्तीर्णं चकारः। यश्च द्याम् आकाशम्, अस्तभ्नात् निरुद्धामकरोत्। स इन्द्रो नाहम्।

यो हत्वाहिमरिणात्सप्त सिन्धून्,
यो गा उदाजदपधा वलस्य।
यो अश्मनोरन्तरग्निं जजान,
संवृक्समत्सु स जनास इन्द्रः।।3।।

व्याख्या–इन्द्रस्य पराक्रमं प्रदर्शयन् गृत्समदो ब्रूते—यो हत्वाहिमिति। यो इन्द्रः अहिं-मेघं हत्वा सप्त सिन्धून् अरिणात् सर्पणशीला सिन्धून् स्यन्दनशीला अपः प्रेरयत्। सप्तनद्यः गंगायमुनादयः सन्ति। बलस्य बलनामक असुरद्वारा गुहायाम्, अपधा गाः उदाजन निरुद्धाः गाः धेनून् उद्धारयामास। यश्च अश्मनोः मेघयोरन्तः मध्ये वैद्युतमग्निम् उत्पादयामास। यश्च समत्सु सम्भक्षयन्ति योद्धृणामायूंषि, इति समदः संग्रामाः। तेषु संवृक् भवति। वृणक्ते हिंसार्थस्य क्विपि रूपम्।

येनेमा विश्वा च्यवना कृतानि,
यो दासं वर्णमधरं गुहाकः।
श्वघ्नीव यो जिगीवां लक्षमादद्,
अर्यः पुष्टानि स जनास इन्द्रः।।4।।

व्याख्या–गृत्समदो ब्रूते, हे जनासः! येन इन्द्रेण इमानि विश्वा च्यवना नश्वराणि भुवनानि स्थिरीकृतानि। यश्च दासं वर्णम् शूद्रादिकम् अधरम् निकृष्टमसुरं वा गुहायां गूढस्थाने नरके वा अकार्षीत्, यश्च लक्षम् स्वलक्ष्यम् जिगीवान् प्राप्तवान्। यः शत्रूणां धनानि तथैव आदत्तवान् यथा श्वघ्नी व्याधः जिघृक्षन्तं मृगं परिगृह्णाति।

यं स्मा पृच्छन्ति कुहसेति घोर,
मुतेमाहुर्नैषो अस्तीत्येनम्।
सो अर्यः पुष्टीर्विजइवा मिनाति,
श्रदस्मै धत्त स जनास इन्द्रः।।5।।

व्याख्या–यस्य भयंकर-इन्द्रस्य विषये जनाः पृच्छन्ति यत् स इन्द्रः कुत्र वर्तते? सर्वव्यापक-इन्द्रस्य सम्बन्धे केचिज्जनाः कथयन्ति यत्सः नास्तीति। सः पराक्रमशाली इन्द्रः क्रुद्धः सन्शत्रोः पोषक-सम्पत्तीः सर्वतो हिनस्ति तस्मिन् इन्द्रे श्रद्धां विश्वासं च कुरुत। हे असुरा! सः इन्द्रः वेदितव्यः।

यो रध्रस्य चोदिता यः कृशस्य,
यो ब्रह्मणो नाधमानस्य कीरेः।
युक्तग्राव्णो योऽविता सुशिप्रः,
सुतसोमस्य स जनास इन्द्रः।।6।।

व्याख्या–यः इन्द्रः समृद्धजनस्य, क्षीणस्य दुर्बलस्य च

स्तुतिपरायणस्य ब्राह्मणस्य एवं याचकस्य धनानां प्रेरयिता वर्तते। यश्च शोभनहनु अभिषुतसोमस्य यजमानस्य रक्षको भवति। स एव इन्द्रो नाहमिति गृत्समदः कथयति।

यस्याश्वासः प्रदिशि यस्य गावो,
यस्य ग्रामा यस्य विश्वे रथासः।
यः सूर्यं य उषसं जजान,
यो अपां नेता स जनास इन्द्रः।।7।।

व्याख्या–इन्द्रस्य शासने अश्वाः वर्तन्ते। यस्य अनुशासने धेनवः ग्रामाश्च वर्तन्ते। यस्य आज्ञायां सर्वे रथाः वर्तन्ते। यः वृत्रं हत्वा सूर्यम् उषसं च प्रकटयामास। यश्च मेघभेदनद्वारा जलानां प्रेरकः इन्द्रः अस्ति।

यं क्रन्दसी संयती विह्वयेते,
परेऽवर उभया अमित्राः।
समानं चिद्रथमातस्थिवांसा,
नाना हवेते स जनास इन्द्रः।।8।।

व्याख्या–गृत्समदो ब्रूते, यं द्युलोकः पृथिवीलोकश्च परस्परं सम्मिलितभावेन स्वरक्षार्थं विविधम् आह्वयतः। उत्कृष्टः अधमाश्च शत्रवः यमाह्वयन्ति। इन्द्रस्य सदृशं रथमातस्थिवांसौ रथिनौ नाना पृथक् पृथक् आह्वयेते। हे असुराः सः इन्द्रः विद्यते।

यस्मान्न ऋते विजयन्ते जनासो,
यं युध्यमाना अवसे हवन्ते।
यो विश्वस्य प्रतिमानं बभूव,
यो अच्युतच्युत स जनास इन्द्रः।।9।।

व्याख्या–गृत्समदो ब्रूते, असुराः! यमन्तरेण मनुष्याः विजयं न प्राप्नुवन्ति। युद्धं कुर्वाणाः सैनिकाः स्वरक्षणाय यम् इन्द्रम् आह्वयन्ति यः स विश्वस्य समग्रजगतः प्रतिनिधिभूतः संजातः। यः नाशरहितपर्वतानां विनाशकः विद्यते। सः इन्द्रः अस्ति।

यः शश्वतो मह्येनो दधानान-
मन्यमानाञ्छर्वा जघान।
यः शर्धते नानुददाति शृध्यां,
यो दस्योर्हन्ता स जनास इन्द्रः।।10।।

व्याख्या–गृत्समदो ब्रूते, यः महत् पापं दधानान्, बहून् अवमन्यमानान् जनान् शत्रून् वा स्ववज्रेण वधमकरोत्। यः हिंसकाय अनात्मज्ञाय जनाय उत्साहयुक्तं कर्म न प्रयच्छति। यश्च दस्योः शत्रोः हन्ता इन्द्रः अस्ति।

यः शम्बरं पर्वतेषु क्षियन्तं,
चत्वारिंश्यां शरद्यन्वविन्दत्।
ओजायमानं यो अहिं जघान,
दानुं शयानं स जनास इन्द्रः।।11।।

व्याख्या–गृत्समदो ब्रूते, यः पर्वतेषु भयेन बहून् संवत्सरान् प्रच्छन्नो भूत्वा निवसन्तः शम्बरनामके मायाविनम् असुरं चत्वारिंशे वर्षे अलभत् लब्ध्वा च तं बलवन्तं दानवं जघान। सः इन्द्रः वर्तते।

यः सप्तरश्मिर्वृषभस्तुविष्मा-
नवासृजत्सर्तवे सप्त सिन्धून्।
यो रौहिणमस्फुरद्वज्रबाहु-
र्द्यामारोहन्तं स जनास इन्द्रः।।12।।

व्याख्या–गृत्समदो ब्रूते, यः सप्तरश्मिः सप्तसंख्यकाः पर्जन्या (मेघाः) रश्मयो: यस्य अर्थात् सप्तमेघरूपैः रश्मिभिः युक्तः सन् वर्षणशीलः बुद्धिमान् एवं बलवान् इन्द्रः सिन्धून् जलानि प्रवहणशीलानि सरणाय अर्थात् प्रवाहयितुम् अवसृष्टवान्। यद् वा अयम् इन्द्रः गंगायमुनाद्याः सप्त मुख्याः नदीः असृजत्।

द्यावा चिदस्मै पृथिवी नमेते,
शुष्माच्चिदस्य पर्वता भयन्ते।
यः सोमपा निचितो वज्रबाहुर्यो
वज्रहस्तः स जनास इन्द्रः।।13।।

व्याख्या–गृत्समदो ब्रूते, अस्मै इन्द्राय आकाशः पृथ्वी च नमेते प्रह्वीभवतः। सदैव नमनं कुरुतः। अस्य बलात् पर्वताः विनीयति। अयम् इन्द्रः सोमपानकर्ता, सुदृढ-अङ्गवान् वज्रसदृशबाहुश्च सदैव शोभते।

यः सुन्वन्तमवति यः पचन्तं,
यः शंसन्तं यः शशमानमूती।
यस्य ब्रह्मवर्धनं यस्य सोमो,
यस्येदं राधः स जनास इन्द्रः।।14।।

व्याख्या–गृत्समदो ब्रूते, हे असुराः जनाः! यः सुन्वन्तं सोमाभिषवं कुर्वन्तं यजमानम् अवति रक्षति। यश्च पुरोडाशादीनि हवींषि पचन्तं यश्च ऊती ऊतये। स्वरक्षार्थं शस्त्राणि शंसन्तं यश्च शशमानमवति स्तोत्रं कुर्वाणं रक्षति। ब्रह्मपरिवृढं स्तोत्रं यस्य वर्धनं वृद्धिकरं भवति तया यस्य सोमः वृद्धिहेतुर्भवति। यस्य चेदम् अस्मदीयः राधः पुरोडाशादिलक्षणमन्नं वृद्धिकरं भवति। सः इन्द्रः प्रसिद्धः।

यः सुन्वते पचते दुध्र आ चि-
द्वाजं दर्दर्षि स किलासि सत्यः।
वयं त इन्द्र विश्वह प्रियासः,
सुवीरासो विदथमा वदेम।।15।।

व्याख्या–गृत्समदो ब्रूते, हे इन्द्रः, यः दुध्रः दुर्धरः सन् सुन्वते सोमाभिषवं कुर्वते। पुरोडाशादिहवींषि पचते यजमानाय निश्चयेन वाजम् अन्नं बलं च प्रापयति सः तादृशस्त्वं सत्यः यथार्थभूतोऽसि न पुनर्नास्तीति बुद्धियोग्योऽसि। हे इन्द्र! वयं तव प्रियाः सन्तः पुत्र-पौत्रसमन्विताः सर्वेषु दिवसेषु तव स्तुतिगानं कुर्वाम।

(2) इन्द्रसूक्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—वज्रिन्-विशेषण-विशिष्टः कः?
   उत्तरम्— इन्द्रः।
2. **प्रश्नः**—ऋग्वैदिकक्रमांक-2, 12 इति सूक्तस्य देवता कः?
   उत्तरम्—इन्द्रः।
3. **प्रश्नः**—इन्द्रदेवतायाः स्तुतिः कतिसूक्तेषु कृताऽस्ति?
   उत्तरम्— 1028 सूक्तेषु।
4. **प्रश्नः**—"यो जात एव प्रथमो मनस्वान्, देवो देवान् क्रतुना पर्यभूषत्। यस्य शुष्माद् रोदसी अभ्यसेतां, नृम्णस्य मह्ना स जनास इन्द्रः।।"इति मन्त्रांशेन सम्बद्धदेवता कः?
   उत्तरम्— इन्द्रः।
5. **प्रश्नः**—वृत्रं हत्वा सूर्यम् उषसं च कः प्रकटयामास?
   उत्तरम्— इन्द्रः।
6. **प्रश्नः**—मेघभेदनद्वारा जलानां प्रेरकः कोऽस्ति?
   उत्तरम्— इन्द्रः।
7. **प्रश्नः**—गंगायमुनाद्याः सप्त मुख्याः नदीः कः असृजत्?
   उत्तरम्— इन्द्रः।
8. **प्रश्नः**—इन्द्रस्य त्रयः विशिष्टाः गुणाः के कथिताः सन्ति?
   उत्तरम्— महतां कार्याणां सम्पादनशक्तिः अतुल्यः पराक्रमः युद्धे असुरेषु विजयः।
9. **प्रश्नः**—इन्द्रसूक्तस्य ऋषिः कः?
   उत्तरम्— गृत्समदः।
10. **प्रश्नः**—'वज्री' कस्य दैवतस्य विशेषणमस्ति?
    उत्तरम्— इन्द्रस्य।
11. **प्रश्नः**—"यं क्रन्दसी संयती विह्वयेते, परेऽवर उभया अमित्राः। समानं चिद्रथमातस्थिवांसा, नाना हवेते स जनास इन्द्रः।। इति मन्त्रांशेन सम्बद्धदेवता कः?
    उत्तरम्— इन्द्रः।
12. **प्रश्नः**—इन्द्रसूक्तस्य छन्दनाम किम्?
    उत्तरम्— त्रिष्टुप् छन्दः।
13. **प्रश्नः**—वृत्रहन्ता कः?
    उत्तरम्— इन्द्रः।
14. **प्रश्नः**—'सोमपा' कस्य विशेषणमस्ति?
    उत्तरम्— इन्द्रस्य।
15. **प्रश्नः**—'मरुत्वान्' विशेषणेन विशिष्टः कः?
    उत्तरम्— इन्द्रः।
16. **प्रश्नः**—'अहन्नहिं पर्वते शिश्रियाणं' इति मन्त्रेण सम्बद्धः कः?
    उत्तरम्— इन्द्रः।
17. **प्रश्नः**— ऋग्वेदे इन्द्रस्य कति स्वतंत्र-सूक्तानि?
    उत्तरम्— 250 सूक्तानि।
18. **प्रश्नः**— 'शचीपति' कस्य दैवतस्य विशेषणमस्ति?
    उत्तरम्— इन्द्रस्य।
19. **प्रश्नः**— ऋग्वेदस्य प्रमुखा देवता का?
    उत्तरम्— इन्द्रः।
20. **प्रश्नः**— 'शतक्रतुः' अनेन विशेषणेन विशिष्टः देवः कः?
    उत्तरम्— इन्द्रः।
21. **प्रश्नः**— 'मरुत्सखा' कस्य विशेषणमस्ति?
    उत्तरम्— इन्द्रस्य।
22. **प्रश्नः**— का देवता दासवर्णम् अधरं गुह्यकः?
    उत्तरम्— इन्द्रः।
23. **प्रश्नः**— अग्निः पूषा च कस्य भ्रातरौ स्तः?
    उत्तरम्— इन्द्रस्य।
24. **प्रश्नः**— अन्तरिक्षस्थानीयः देवता का?
    उत्तरम्— इन्द्रः।
25. **प्रश्नः**— सप्तरश्मिः देवता का अस्ति?
    उत्तरम्— इन्द्रः।

26. प्रश्नः— अपाम् नेता: कः वर्तते?
उत्तरम्— इन्द्रः।
27. प्रश्नः— द्यौः कस्य पिता उक्तः?
उत्तरम्— इन्द्रस्य।
28. प्रश्नः— वृत्रवधः कस्य प्रमुखं कार्यम् अस्ति?
उत्तरम्— इन्द्रस्य।

3. पुरुषसूक्तम्- (10.90) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

ऋग्वेदस्य दशममण्डलस्य नवतितमं 'सहस्त्रशीर्षा' इति षोडशर्चं सूक्तं 'पुरुषसूक्तम्' इत्यभिधानेन अभिधीयते। अस्य सूक्तस्य ऋषिः नारायणः। देवता पुरुषः। छन्दः-अनुष्टुप् त्रिष्टुप् च। प्रस्तुतसूक्ते ईश्वरादि अवधारणायाः तथा व्यावहारिकपारमार्थिकसत्तायाः निरूपणम् एवं सम्पूर्ण-ब्रह्माण्डस्य रचनायाः आलङ्कारिकं विवेचनं प्रस्तुतीकृतमस्ति। प्रामुख्येन अस्मिन् सूक्ते सृष्टेः रचयिता पुरुषः अनन्तैः शिरोभिः युक्तः, अनन्तनेत्रयुक्तः, अनन्तचरणैः विभूषितः महापुरुषो वर्तते। इदं सम्पूर्ण-जगत् पुरुष एवास्ति। तस्मादेव यजुर्वेदः उत्पन्नोऽभवत्। अस्माद् विराट्-आख्यातपुरुषात् अश्वाः उभयादयः समुत्पन्नाऽभवन् अयं समग्रसृष्टेः कर्ता आसीत्। अस्मात् पुरुषादेव ब्राह्मणादीनां समुत्पत्तिर्निगदितास्ति। अस्य मुखाद् ब्राह्मणानाम्, भुजाभ्यां क्षत्रियाणाम्, ऊरुभ्यः वैश्यानाम् एवं पादाभ्यां शूद्राणामुत्पत्तिर्जाता। तस्य पुरुषस्य मनसः चन्द्रमाः, नेत्राभ्यां सूर्यः, मुखाद् इन्द्रश्च अग्निश्च प्राणात् वायुरुत्पन्ना अभवन्।

सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात्।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्॥1॥

व्याख्या–सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराडाख्यो यः पुरुषः सोऽयं सहस्त्रशीर्षा। अत्र सहस्त्रशब्दस्य उपलक्षणत्वाद् अनन्तैः शिरोभिर्युक्तः इत्यर्थः। अर्थात् यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात् तदीयान्येवेति सहस्त्रशीर्षत्वम्। एवं सहस्त्राक्षित्वं सहस्त्रपादत्वं च। सः पुरुषः भूमिं ब्रह्माण्डगोलकरूपां विश्वतः सर्वतः वृत्वा परिवेष्ट्य दशांगुलं दशांगुलपरिमितं देशम् अत्यतिष्ठद् अतिक्रम्य व्यवस्थितः। दश च तानि अंगुलानि दशांगुलानि इन्द्रियाणि। ब्रह्माण्डाद् बहिरपि सर्वतो व्याप्त अवस्थितः इत्यर्थः।

पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति॥2॥

व्याख्या–यदिदं वर्तमानं जगत् तत्सर्वं पुरुष एव। यच्च भूतमतीतं जगत् यच्च भाव्यं भविष्यं जगत् तदपि पुरुष एव। उत अपि च, अमृतत्वस्य देवस्य ईशानः स्वामी स पुरुषो यद् यस्माद् अन्नेन प्राणिनां भोग्येन अन्नेन फलेन निमित्तभूतेन अतिरोहति स्वीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति तस्मात् पुरुष एव प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारान्नेदं तस्य वस्तुत्वमित्यर्थः।

एतावानस्य महिमातो ज्यायाँश्च पूरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥3॥

व्याख्या–अतीत-अनागत-वर्तमानकालसम्बद्धं जगद् यावदस्ति, एतावान् सर्वोऽप्यस्य पुरुषस्य महिमा स्वकीय-सामर्थ्यविशेषो विभूतिः, न तु तस्य वास्तवं स्वरूपम्। वास्तवस्तु पुरुषः अतो महिम्नोऽपि ज्यायान् अतिशयेनाधिकः। एतच्चोभयं स्पष्टीक्रियते। अस्य पुरुषस्य विश्वा सर्वाणि भूतानि कालत्रयवर्तीनि प्राणिजातानि पादश्चतुर्थोऽशः। अस्य पुरुषस्य अवशिष्टं त्रिपात्स्वरूपम् अमृतं विनाशरहितं सद् दिवि द्योतनात्मके स्वप्रकाशस्वरूपे व्यवतिष्ठत् इति।

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः।
ततो विश्वङ्व्यक्रामत् साशनानशने अभि॥4॥

व्याख्या–योऽयं त्रिपात् पुरुषः संसारहितो ब्रह्मस्वरूपः सोऽयं ऊर्ध्व उदैत्। तस्यास्य सोऽयं पादो लेशः सोऽयम् इह मायायां पुनः अभवत्। सृष्टिसंहाराभ्यां पुनः पुनरागच्छति। साशनानशने अभिलक्ष्य। साशनं भोजनादि व्यवहारोपेतं चेतनं प्राणिजातम्। अनशनं तद्रहितमचेतनं गिरिनद्यादिकम्। तदुभयं यथा स्यात्तथा स्वयमेव विविधो भूत्वा व्याप्तवान् इत्यर्थः।

तस्माद् विराडजायत विराजो अधिपूरुषः।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥5॥

व्याख्या–तस्माद् आदिपुरुषात् विराट् ब्रह्माण्डदेहः अजायत उत्पन्नः। विविधानि राजवस्तून्यत्रेति विराट्। विराजोऽधिविराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा पुरुषः तद्देहाभिमानी कश्चित् पुमान् अजायत। स जातः विराट्पुरुषः अत्यरिच्यत अतिरिक्तोऽभूत्। विराड्व्यतिरिक्तो देवतिर्यङ्-मनुष्यादिरूपोऽभूत्। पश्चात् देवादिजीवभावादूर्ध्वं भूमिं

ससर्जेति शेषः। अथो भूमिसृष्टेरनन्तरं तेषां जीवानां पुरः ससर्ज। पूर्यन्ते सप्तधातुभिरिति पुरः शरीराणि।

यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः॥6॥

व्याख्या–भगवान् वेदपुरुष आह-यत्पुरुषेण। यत् यदा पूर्वोक्तक्रमेणैव शरीरेषूत्पन्नेषु सत्सु देवा उत्तरसृष्टिसिद्ध्यर्थं ब्रह्मद्रव्यस्य अनुत्पन्नत्वेन हविरन्तरासम्भवात् पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्पपुरुषेण पुरुषाख्येन हविषा मानसं यज्ञम् अतन्वत अन्वतिष्ठन्। तदानीमस्य यज्ञस्य वान्तो वसन्तर्तुरेव आज्यम् आसीत्। तमेव आज्यत्वेन सङ्कल्पितवन्तः इत्यर्थः। एवं ग्रीष्मः इध्मः आसीत्। तमेवेध्मत्वेन संकल्पितवन्त इत्यर्थः। तथा शरद्धविः आसीत्। तामेव पुरोडाशादिहविष्ट्वेन संकल्पितवन्तः इत्यर्थः। पूर्वं पुरुषस्य हविः सामान्यरूपत्वेन संकल्पः अनन्तरं वसन्तादीनाम् आज्यादिविशेषरूपत्वेन संकल्पः इति बोधव्यम्।

तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः।
तेन देवा अयजन्त साध्या ऋषयश्च ये॥7॥

व्याख्या–यज्ञं यज्ञसाधनभूतं तं पुरुषं पशुत्वभावनया यूपे बद्धं बर्हिषि मानसे मानसे यज्ञे प्रौक्षन् प्रोक्षितवन्तः। कीदृशम् इत्यत्र आह अग्रतः। सर्वसृष्टेः पूर्वं पुरुषं जातं पुरुषत्वेन उत्पन्नम्। एतस्य प्रागेव उक्तम्–"तस्माद् विराड् अजायत विराजो अपि पूरुषः" इति। तेन पुरुषेण पशुना देवा अयजन्त। मानसं यागं निष्पादितवन्त इत्यर्थः। के ते देवा इत्यत्राह–साध्याः सृष्टिसाधनयोग्याः प्रजापति-प्रभृतयः तदनुकूला ऋषयो मन्त्रद्रष्टारश्च ये सन्ति। ते सर्वेऽप्ययजन्तेत्यर्थः।

तस्माद्यज्ञात् सर्वहुतः संभृतं पृषदाज्यम्।
पशूनाँश्चक्रे वायव्यानारण्यान् ग्राम्यांश्च ये॥8॥

व्याख्या–तस्माद्यज्ञात् सर्वहुतः। सर्वात्मकः पुरुषः यस्मिन् यज्ञे हूयते सोऽयं सर्वहुत्। तादृशात् तस्मात् पूर्वोक्तान्मानसाद् यज्ञात् पृषदाज्यं दधिमिश्रमाज्यं सम्भृतं सम्पादितम्। दधि चाज्यं चेत्येवमादिभोग्यजातं सर्वं सम्पादितमित्यर्थः। तथा वायव्यान् वायुदेवताकाँल्लोकप्रसिद्धान् आरण्यान् पशून् चक्रे उत्पादितवान्। आरण्या हरिणादयः। तथा ये च ग्राम्याः गवाश्वादयः तानपि चक्रे।

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥9॥

व्याख्या–वेदपुरुष आह यत् नारायणऋषिः सर्वात्मकः पुरुषः यस्मिन् यज्ञे हूयते सोऽयं सर्वहुत्। तस्मात् तादृशात् पूर्वोक्तात् मानसात् यज्ञात् ऋचः सामानि च जज्ञिरे उत्पन्नाः। तस्मात् यज्ञात् छन्दांसि गायत्र्यादीनि जज्ञिरे। तस्मात् यज्ञात् यजुः अपि अजायत। ऋग्यजुःसामभिः छन्दोभिश्च यज्ञाः सिद्ध्यन्ति।

तस्मादश्वा अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः॥10॥

व्याख्या–भगवान्वेदपुरुषः अनुष्टुपछन्दमाश्रित्य आह–तस्मात् पूर्वोक्तात् मानसात् यज्ञात् अश्वाः अजायन्त उत्पन्नाः। तथा ये के च अश्वव्यतिरिक्ता गर्दभा अश्वतराश्च उभयादतः ऊर्ध्वाधोभागयोरुभयोः दन्तयुक्ताः सन्ति तेऽप्यजायन्त। तथा तस्माद् यज्ञात् गावश्च जज्ञिरे। किंच तस्माद् यज्ञात् अजावयः जाताः।

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते॥11॥

व्याख्या–प्रजापतेः प्राणरूपा देवाः यत् पुरुषं विराड्रूपं व्यदधुः संकल्पेन उत्पादितवन्तः तदानीं कतिधा कतिभिः प्रकारैः व्यकल्पयन् विविधं कल्पितवन्तः। अस्य पुरुषस्य मुखं किम् आसीत्। कौ बाहू अभूताम्। का ऊरू! कौ च पादावुच्येते। प्रथमं सामान्यरूपः प्रश्नः, पश्चात् मुखं किम् इत्यादिना विशेषविषयाः प्रश्नाः।

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥12॥

व्याख्या–अस्य प्रजापतेः ब्राह्मणः ब्राह्मणत्वजाति-विशिष्टः पुरुषः मुखमासीत्। मुखाद् उत्पन्नः इत्यर्थः। योऽयं राजन्यः क्षत्रियत्वजातिमान् पुरुषः सः बाहू कृतः, बाहुत्वेन निष्पादितः। बाहुभ्यामुत्पादितः इत्यर्थः। तत् तदानीम् अस्य प्रजापतेः यत् ऊरू तद्रूपो वैश्यः सम्पन्नः। ऊरूभ्यामुत्पन्नः इत्यर्थः। तथाऽस्य पद्भ्यां पादाभ्यां शूद्रः शूद्रत्वजातिमान् पुरुषः अजायत।

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत॥13॥

व्याख्या–चन्द्रमा मनसो जातः। यथा दध्याज्यादिद्रव्याणि गवादयः पशवः ऋगादिवेदाः ब्राह्मणादयो मनुष्याश्च तस्माद् यज्ञपुरुषाद् उत्पन्नाः इत्याह। प्रजापतेः मनसः सकासात्

चन्द्रमाः जातः। चक्षोश्च चक्षुषः सूर्यः अपि अजायत। अस्य मुखाद् इन्द्रश्च अग्निश्च देवौ उत्पन्नौ। अस्य पुरुषस्य प्रजापतेर्वा प्राणाद् वायुः अजायत।

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ
अकल्पयन्।।14।।

व्याख्या–भगवान् वेदपुरुष आह–नाभ्या आसीदन्तरिक्षं। यथा चन्द्रादीन् प्रजापतेः मनःप्रभृतिभ्योऽकल्पयन् तथा अन्तरिक्षादीन् लोकान् प्रजापतेः नाभ्यादिभ्यो देवाः अकल्पयन् उत्पादितवन्तः। एतदेव दर्शयति। नाभ्याः प्रजापतेर्नाभेः अन्तरिक्षमासीत्। शीर्ष्णः द्यौ समवर्तत उत्पन्नः। अस्य पद्भ्यां पादाभ्यां भूमिः उत्पन्ना। अस्य श्रोत्रात् दिशः उत्पन्नाः।

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम्।।15।।

व्याख्या–ऐष्टिकस्य आहवनीयस्य त्रयः परिचितः उत्तरवेदिकास्त्रयः आदित्यश्च सप्तमः परिधिः प्रतिनिधिरूपः। यः पुरुषो वैराजोऽस्ति तं पुरुषं देवाः प्रजापतिप्राणेन्द्रियरूपाः यज्ञं तन्वानाः मानसं यज्ञं तन्वानाः कुर्वाणाः पशुम् अबध्नन् विराट्-पुरुषमेव पशुत्वेन भावितवन्तः। एतदेवाभिप्रेत्य पूर्वत्र पुरुषेण हविषा इत्युक्तम्।

यज्ञेन यज्ञमयजन्त देवा,
स्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त,
यत्र पूर्वे साध्याः सन्ति देवाः।।16।।

व्याख्या–पुरुषसूक्तस्य मन्त्रेऽस्मिन् पूर्वं प्रपञ्चेन उक्तम् अर्थं संक्षिप्य अत्र दर्शयति देवाः प्रजापतिप्राणरूपाः यज्ञेन यथोक्तेन मानसेन संकल्पेन यज्ञं यथोक्तस्वरूपं प्रजापतिम् अयजन्तः पूजितवन्तः। तस्मात् पूजनात् तानि प्रसिद्धानि धर्माणि जगद्रूपविकाराणां धारकाणि प्रथमानि मुख्यानि आसन्। एतावता सृष्टिप्रतिपादकसूक्तभागार्थः संगृहीतः। अथोपासन-तत्फलानुवादकभागार्थः संगृह्यते। यत्र यस्मिन् विराट् प्राप्तिरूपे नाके पूर्वे साध्याः पुरातनविराडुपास्तिसाधकाः देवाः सन्ति तिष्ठन्ति तत् नाकं विराट्प्राप्तिरूपं स्वर्गं ते महिमानः तदुपासका महात्मानः सचन्त समवयन्ति प्राप्नुवन्ति।

(3) पुरुषसूक्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—ऋग्वेद-10/90 क्रमांकस्य सूक्तं किमस्ति?
   उत्तरम्— पुरुषसूक्तम्।

2. **प्रश्नः**— ऋग्वेदे पुरुषसूक्ते कति मन्त्राणि सन्ति?
   उत्तरम्—16 षोडश।

3. **प्रश्नः**—सहस्रशीर्षा इत्यनेन कः गृह्यते?
   उत्तरम्—पुरुषः।

4. **प्रश्नः**— कस्मात् ब्राह्मणादीनां समुत्पत्तिर्निगदितास्ति?
   उत्तरम्—पुरुषात्।

5. **प्रश्नः**—पुरुषसूक्ते आज्य-रूपेण परिकल्पितः कः?
   उत्तरम्—वसन्तः।

6. **प्रश्नः**—कस्य मुखात् ब्राह्मणानाम्, भुजाभ्यां क्षत्रियाणाम्, ऊरुभ्यः वैश्यानां तथा पदाभ्यां शूद्राणामुत्पत्तिः जाता?
   उत्तरम्—पुरुषस्य।

7. **प्रश्नः**— चन्द्रमा कुतः अजायत?
   उत्तरम्—मनसः।

8. **प्रश्नः**—तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।। इति मन्त्रः कस्मिन् सूक्ते समुपलभ्यते?
   उत्तरम्—पुरुषसूक्ते।

9. **प्रश्नः**—पुरुषसूक्तस्य अन्तिमः मन्त्रः किमस्ति?
   उत्तरम्—यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त, यत्र पूर्वे साध्याः सन्ति देवाः।।16।।

10. **प्रश्नः**—"सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्।।" इति मन्त्रेण सम्बद्धदेवता कः?
    उत्तरम्—पुरुषः।

11. **प्रश्नः**— पुरुषसूक्तस्य ऋषिः कः?
    उत्तरम्—नारायणः।

12. **प्रश्नः**—'सहस्रशीर्षा' इति षोडशर्चं सूक्तं 'पुरुषसूक्तम्' कस्य वेद-मण्डलस्य विद्यते?
    उत्तरम्—ऋग्वेदस्य दशममण्डलस्य।

13. **प्रश्नः**—कस्मिन् सूक्ते केवलम् ईश्वरादि अवधारणायाः एव व्यावहारिकपारमार्थिकसत्तायाः एव निरूपणं कृतं न विद्यते, प्रत्युत सम्पूर्णब्रह्माण्डस्य रचनायाः आलङ्कारिकं विवेचनं प्रस्तुतीकृतमस्ति?
    उत्तरम्—पुरुषसूक्ते।

14. **प्रश्नः**—चन्द्रमा मनसो जातश्चक्षो र्यो अजायत। मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजा ।। इति मन्त्रः कस्मिन् सूक्ते समुपलभ्यते?
    उत्तरम्—पुरुषसूक्ते।

15. **प्रश्नः**—पुरुषसूक्ते को छन्दः?
    उत्तरम्—अनुष्टुप् त्रिष्टुप् च।

16. **प्रश्नः**—कस्य नेत्राभ्यां सूर्यः, मुखाद् इन्द्रश्च अग्निश्च प्राणात् वायुरुत्पन्ना अभवन्?
    उत्तरम्—पुरुषस्य।

4. हिरण्यगर्भसूक्तम्-(10.121) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

ऋग्वेदसंहितायाः दशममण्डले हिरण्यगर्भसूक्तस्य महत्त्वपूर्णं स्थानं वर्तते। प्रजापतिपुत्रो हिरण्यगर्भः ऋषिः, त्रिष्टुप् छन्दःशब्दाभिधेयः प्रजापतिः देवता। अस्मिन् हिरण्यगर्भसूक्ते दश-मन्त्राः सन्ति। सृष्टेरारम्भे केवलं जलमेव आसीत्, तस्मिन् एकः हिरण्मयः अण्डः समजायत। तस्मादण्डाद् एकः पुरुषः अजायत, यो हिरण्यगर्भ अभिहितः। हिरण्यगर्भः सर्वेषां प्राणिनां स्वामी एव पृथ्वी-द्युलोकादीनां धारणकर्ता निगदितोऽस्ति। यः हिरण्यगर्भः द्युलोकम् उपरि उत्थाप्य पृथ्वीं स्थिरां कृत्वा स्वर्गम् उपरि उत्थाप्य सूर्यमपि स्थिरीकृतवान् यः आकाशस्य जलानां स्वामी अस्ति। संसारस्य रक्षार्थं स्थिता द्युलोक-पृथिवीलोकौ यं हिरण्यगर्भं मनसा ध्यायतः यमाधारीकृत्य सूर्यं उदयते। हिरण्यगर्भः सत्यनियमधारणकर्ता अस्ति।

हिरण्यगर्भः समवर्तताग्रे, भूतस्य
जातः पतिरेक आसीत्।
स दधार पृथिवीं द्यामुतेमां,
कस्मै देवाय हविषा विधेम।।1।।

व्याख्या–परमात्मनः हिरण्यगर्भरूपं सर्वप्रथमं सृष्ट्युत्पत्तेः पूर्वम् उत्पन्नमभवत्। सञ्जात एव सः सर्वप्राणिनाम् एकमात्रं स्वामी अभवत्। सः पृथिवीलोकं द्युलोकमाकाशं च अधारयत्। सुखस्वरूपं 'क'संज्ञकं दिव्यैर्गुणैर्युक्तं तं हिरण्यगर्भदेवं वयं हविषा हव्येन भक्तिभावपूर्वकं पूजयामः। के प्रजापतिं देवाय देवं दानादिगुणयुक्तं हविषा प्राजापत्यस्य पशोर्वपारूपेण एककपालात्मकेन पुरोडाशेन वा विधेम वयमृत्विजः परिचरेम।

य आत्मदा बलदा यस्य विश्व,
उपासते प्रशिषं यस्य देवाः।
यस्य च्छायामृतं यस्य मृत्युः,
कस्मै देवाय हविषा विधेम।।2।।

व्याख्या-य आत्मदा। यः प्रजापतिः आत्मानां दाता। आत्मनो हि सर्वे तस्मात् परमात्मनः उत्पद्यन्ते। यथाग्नेः सकाशाद् विस्फुलिङ्गा जायन्ते तद्वत् यद्वा आत्मानां शोधयिता। बलदाः बलस्य च दाता शोधयिता वां यस्य च प्रशिषं प्रकृष्ट शासनमाज्ञां विश्वे सर्वे प्राणिनः उपासते। प्रार्थयन्ते सेवन्ते वा। देवा अपि यस्य प्रशासनम् उपासते। अपि च अमृतम् अमृतत्वम् यत् वा अमृतं मरणं नास्त्यस्मिन् इति अमृतं सुधा। यस्य प्रजापतेः छाया छायेव वर्ति भवति। मृत्युः यमस्य प्राणापहारी छायेव भवति। तं विहाय कस्मै देवाय हविषा विधेम।

यः प्राणतो निमिषतो महित्वै-
क इन्द्राजा जगतो बभूव।
य ईशे अस्य द्विपदश्चतुष्पदः
कस्मै देवाय हविषा विधेम।।3।।

व्याख्या-यः प्राणतः। यः हिरण्यगर्भः प्राणतः प्राणनं कुर्वतः प्रश्वसतः, निमिषतः अक्षिपक्ष्मचलनात्मकं निमेषणं कुर्वतः। महित्वा स्वकीयेन महाभाग्येन महत्वेन। ऐ इत्, एक एव। समस्तस्य जगतः राजा बभूव संवृतः। यश्च अस्य परिदृश्यमानस्य द्विपदः पादद्वययुक्तस्य मनुष्यादेः, चतुष्पदः गवाश्वादेश्च ईशे ईष्टे। ईदृशो यः प्रजापतिः तस्मै कस्मै देवाय प्रजापतये हविषा विधेम, हविर्दद्मः।

यस्येमे हिमवन्तो महित्वा
यस्य समुद्रं रसया सहाहुः।
यस्येमाः प्रदिशो यस्य बाहू
कस्मै देवाय हविषा विधेम।।4।।

व्याख्या-यस्येमे हिमवन्तः-हिमा अस्मिन् सन्तीति हिमवान्। तेन बहुवचनान्तेन सर्वे पर्वताः लक्ष्यन्ते, यथा छत्रिणो गच्छन्तीति। हिमवन्तो हिमवदुपलक्षिता इमे दृश्यमानाः सर्वे पर्वताः यस्य प्रजापतेः महित्वा महत्त्वम्। माहात्म्यमैश्वर्यम् इत्याहुः। तेन सृष्टत्वात् तद्रूपेणावस्थानाद् वा। तथा रसया, रसौ जलम्। तद्वती रसा नदी। रसादिभिः नदीभिः सह, समुद्रम्।

सर्वान् समुद्रान् यस्य महाभाग्यमिति आहुः कथयन्ति सृष्ट्यभिज्ञाः। यस्य च इमाः प्रदिशः प्राच्यारम्भा आग्नेय्याद्याः कोणदिश ईशितव्याः। तथा बाहू-बाहवो भुजाः। भुजवत् प्राधान्ययुक्ताः प्रदिशश्च यस्य स्वीकृताः। तस्मै कस्मै देवाय प्रजापतये हविर्दद्मः।

येन द्यौरुग्रा पृथिवी च दृळ्हा,
येन स्वः स्तभितं येन नाकः।
यो अन्तरिक्षे रजसो विमानः,
कस्मै देवाय हविषा विधेम॥5॥

व्याख्या–येन प्रजापतिना द्यौरन्तरिक्षम् उग्रा उद्गूर्णविशेषा गहनरूपं वा। पृथिवी भूमिश्च दृळ्हा येन स्थिरीकृता। सर्वप्राणिधारणं वृष्टिग्रहणमन्नादिनिष्पादनं चेति भूमेः दार्ढ्यम् येन स्वः आदित्यमण्डलं स्वर्गः स्तभितं स्तब्धं कृतम्। यथाधो न पतति तथोपर्यवस्थापितमित्यर्थः। तथा नाक आदित्यश्च येन अन्तरिक्षे स्तभितः। यश्च अन्तरिक्षे रजसो जलस्य दृष्टिरूपस्य विमानो विमितीते–निर्माता। तं विहाय कस्मै देवाय हविषा विधेम हविर्दद्मः, न कस्मैचिदित्यर्थः।

यं क्रन्दसी अवसा तस्तभाने,
अभ्यैक्षेतां मनसा रेजमाने।
यत्राधि सूर उदितो विभाति,
कस्मै देवाय हविषा विधेम॥6॥

व्याख्या–यं क्रन्दसी, क्रन्दितवान् रोदितवान् अनयोः प्रजापतिरिति क्रन्दसी द्यावापृथिवी। श्रूयते हि यदरोदीत्त-दनयोरोदस्त्वम् (तै०ब्रा०) इति। ते अवसा रक्षणेन हेतुना लोकस्य रक्षणार्थं। तस्तभाने प्रजापतिना सृष्टे लब्धस्थैर्ये सत्यौ यं प्रजापतिं मनसा बुद्ध्या अभ्यैक्षेताम् आवयोर्महत्त्वमनेन इत्यभ्यपश्येताम्। कीदृश्यौ द्यावापृथिवी। रेजमाने राजमाने दीप्यमाने। यत्राधि यस्मिन्नाधारभूते प्रजापतौ सूरः सूर्यः उदितः उदयं प्राप्तः सन् विभाति प्रकाशते। तं विहाय कस्मै देवाय हविषा विधेम।

आपो ह यद् बृहतीर्विश्वमायन्,
गर्भं दधाना जनयन्तीरग्निम्।
ततो देवानां समवर्ततासुरेकः,
कस्मै देवाय हविषा विधेम॥7॥

व्याख्या–आपः पुराकल्पद्योतकः, ह इति निपातः। यत् बृहतीर्बृहत्यो महत्यः। विश्वं सर्वमात्मत्वेन। आयन् प्रापुः। अग्न्युपलक्षितं सर्वं वियदादिभूतजातं जनयन्तीर्जनयन्त्यस्तदर्थं गर्भं हिरण्मयाण्डस्य गर्भभूतं प्रजापतिं दधानाः धारयन्त्य आपो ह विश्वमायन् सर्वं जगद्व्याप्नुवन् यद् यस्मात् ततस्तस्माद् हेतोर्देवानां देवादीनां सर्वेषां प्राणिनामसुः प्राणभूतः एकः प्रजापतिः समवर्तत समजायत। यद्वा यं गर्भं दधाना आपो विश्वात्मना अवस्थितास्ततो गर्भभूतात् प्रजापतेर्देवादीनां प्राणात्मको वायुरजायत। अथवा अद्भ्यः सकाशाद् एकोऽद्वितीयोऽसुः प्राणात्मकः प्रजापतिः समवर्तत निश्चक्राम। तं विहाय कस्मै देवाय हविषा विधेम।

यश्चिदापो महिना पर्यपश्यद्
दक्षं दधाना जनयन्तीर्यज्ञम्।
यो देवेष्वधि देव एक आसीत्
कस्मै देवाय हविषा विधेम॥8॥

व्याख्या–यश्चित्, यः देवः अन्तर्यामी, चिद् अपि महिना-महिम्ना यां यज्ञोपलक्षितं विकारजातं जनयन्तीः उत्पादयन्तीः तदर्थं दक्षं प्रपञ्चात्मना वर्धिष्णुं प्रजापतिं दधानाः धारयित्रीः। आपः विभक्तिव्यत्ययः। अपः पूर्वोक्ताः प्रलयकालीनाः। स्वमाहात्म्येन यः प्रजापतिः परितो दृष्टवानपः। यश्च देवेष्वधि देवेषु मध्ये देवः तेषामपीश्वरः सन् एकः अद्वितीयः आसीत्। तं देवाधिदेवं विहाय कस्मै देवाय हविषा विधेम।

मा नो हिंसीज्जनिता यः पृथिव्या,
यो वा दिवं सत्यधर्मा जजान।
यश्चापश्चन्द्रा बृहतीर्जजान,
कस्मै देवाय हविषा विधेम॥9॥

व्याख्या–मा नो हिंसीत्, सः प्रजापतिः नः अस्मान् मा हिंसीत् मा बाधताम्। यः पृथिव्याः भूमेः जनिता जनयिता स्रष्टा। यो वा यश्च सत्यधर्मा सत्यम् अवितथधर्मो जगतो धारणं यस्य स तादृशः प्रजापतिः दिवम् अन्तरिक्षोपलक्षितान् सर्वांल्लोकान् जजान जनयामास। 'जनी प्रादुर्भावे'। यश्च बृहतीर्महतीश्चन्द्रा आह्लादिनीः अपः उदकानि जजान जनयामास। तं देवाधिदेवं विहाय कस्मै देवाय हविषा विधेम।

प्रजापते न त्वदेतान्यन्यो विश्वा
जातानि परि ता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु
वयं स्याम पतयो रयीणाम्॥10॥

व्याख्या–हे प्रजापते! त्वत् त्वत्तोऽन्यः कश्चिद् एतानि इदानीं वर्तमानानि विश्वा विश्वानि सर्वाणि। जातानि

प्रथमविकारभाञ्जि ता तानि सर्वाणि भूतजातानि न परि बभूव न परिगृह्णाति न व्याप्नोति। त्वमेवैतानि परिगृह्य स्रष्टुं शक्नोषि, इति भावः परि पूर्वो भवति परिग्रहार्थः। वयं च यत्कामाः यत्फलं कामयमानाः ते तुभ्यं जुहुमः हवींषि प्रयच्छामः, तत् फलं नः अस्माकम् अस्तु भवतु तथा वयं च रयीणां धनानां पतयः ईश्वराः स्याम भवेम।

(4) हिरण्यगर्भसूक्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— हिरण्यगर्भसूक्तस्य कः क्रमांकः?
   उत्तरम्—ऋक्-10/121
2. **प्रश्नः**— "कस्मै देवाय हविषा विधेम" इति कस्य सूक्तस्य मन्त्रांशः?
   उत्तरम्—हिरण्यगर्भसूक्तस्य।
3. **प्रश्नः**— कस्य कल्पना उदीयमानं सूर्यमाधृत्य कृतास्ति?
   उत्तरम्—हिरण्यगर्भसूक्तस्य।
4. **प्रश्नः**— द्युलोकम् उपरि उत्थाप्य पृथ्वीं स्थिरां कृत्वा स्वर्गम् उपरि उत्थाप्य सूर्यमपि कः स्थिरीकृतवान्?
   उत्तरम्—हिरण्यगर्भः।
5. **प्रश्नः**— हिरण्यगर्भसूक्तस्य मन्त्रसंख्या का?
   उत्तरम्—10 दशमन्त्रसंख्या।
6. **प्रश्नः**— हिरण्यगर्भसूक्तस्य देवता का?
   उत्तरम्—प्रजापतिः।
7. **प्रश्नः**— हिरण्यगर्भः कः?
   उत्तरम्—प्रजापतिपुत्रो हिरण्यगर्भः ऋषिः।
8. **प्रश्नः**— हिरण्यगर्भसूक्तस्य प्रकृतिः कीदृक् अस्ति?
   उत्तरम्—दार्शनिकसूक्तम्।
9. **प्रश्नः**—हिरण्यगर्भसूक्तस्य महत्त्वपूर्णं स्थानं कुत्र वर्तते?
   उत्तरम्—ऋग्वेदसंहितायाः दशममण्डले।
10. **प्रश्नः**— हिरण्यगर्भसूक्तस्य छन्दः कः?
    उत्तरम्—त्रिष्टुप् क-शब्दाभिधेयः।
11. **प्रश्नः**—एकः हिरण्मयः अण्डः कुत्र समजायत?
    उत्तरम्—सृष्टेरारम्भे जले।
12. **प्रश्नः**—तस्मादण्डाद् एकः पुरुषः अजायत, तस्य किं नाम?
    उत्तरम्—हिरण्यगर्भः।
13. **प्रश्नः**— सर्वेषां प्राणिनां स्वामी एवं पृथ्वी–द्युलोकादीनां धारणकर्ता कः निगदितोऽस्ति?
    उत्तरम्—हिरण्यगर्भः।
14. **प्रश्नः**—आकाशस्य जलानां स्वामी कः?
    उत्तरम्—हिरण्यगर्भः।
15. **प्रश्नः**— सत्यनियमधारणकर्ता को वर्तते?
    उत्तरम्—हिरण्यगर्भः।

5. नासदीयसूक्तम् (10.129) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

ऋग्वेदसंहितायाः दशममण्डलस्य एकोनत्रिंशत्तमं सप्तर्चसूक्तं 'नासदीयसूक्तम्' इति अभिधानेनाभिधीयते। अस्य सूक्तस्य परमेष्ठी नाम प्रजापतिर्ऋषिः। वियदादिभावानां सृष्टि-स्थिति-प्रलयादीनाम् अत्र प्रतिपाद्यत्वात् तेषां कर्ता परमात्मा देवता। त्रिष्टुप् छन्दः। अस्मिन् सूक्ते सृष्टेः प्रागवस्था निरस्त-समस्तप्रपञ्चा या प्रलयावस्था सैव निरूपिता। तदानीं प्रलयदशायाम् अवस्थितं यदस्य जगतो मूलकारणं तत् असत् शशविषाणवन्निरुपाख्यं न आसीत्। न हि तादृशात् कारणाद् अस्य सतो जगतः उत्पत्तिः सम्भवति। तथा नो सत् नैव सदात्मवत् सत्त्वेन निर्वाच्यम् आसीत्। यद्यपि सदसदात्मकं प्रत्येकं विलक्षणं भवति तथापि भावाभावयोः सहावस्थानमपि सम्भवति। कुतस्तयोः तादात्म्यम् इति उभयविलक्षणम् अनिर्वाच्यम् एव आसीद् इत्यर्थः। सृष्टेः प्राक् प्रलयदशायां न मृत्युः आसीत्, नामृतम् आसीत्। सर्वत्र केवलं गहनान्धकारमेव आसीत्। यत्किंचिदपि आसीत् तत्सर्वम् भावरूपात्मकेन अज्ञानेन आवृतमासीत्। तदानीं महिना महात्मेन तदैकमजायत। केवलं तदेव ज्ञातुं शक्नोति यदियं विसृष्टिः कुत आबभूव। कोऽपि अन्यः किमपि, ज्ञातुं वक्तुं वा न शक्नोति। सर्वज्ञ ईश्वर एव तां सृष्टिं जानीयात् नान्यः इत्यर्थः।

नासदासीन्नो सदासीत्तदानीं,
नासीद्रजो नो व्योमा परो यत्।
किमावरीवः कुह कस्य शर्मन्नम्भः
किमासीद्गहनं गभीरम्॥1॥

व्याख्या–भगवान् वेदपुरुष आह–नासदासीत्। सृष्टेः

उत्पत्तेः पूर्वं महाप्रलयदशायाम् असत् अर्थात् अभावात्मकं तत्त्वं नैवासीत्, सत्तात्मकं तत्त्वमपि न आसीत्। भू-लोकात् पातालपर्यन्तं लोकाः नैवासन्। अयम् आकाशः नो आसीत् यः सर्वोन्नतः वा सर्वोच्चः अस्ति। तस्मादाकाशात्परं किमपि नैवासीत्। पुनः आवरकं तत्त्वं किमासीत्, तद् आवरकं तत्त्वं कुत्र वर्तते स्म स्वयं कस्य संरक्षणे आसीत्। अपि तदानीम् अगाधं जलं वा सर्वं शून्यवत् आसीत्।

न मृत्युरासीदमृतं न तर्हि,
न रात्र्या अह्न आसीत्प्रकेतः।
आनीदवातं स्वधया तदेकं,
तस्माद्धान्यन्न परः किं चनास॥2॥

व्याख्या—तदा महाप्रलय-अवस्थायां मृत्युः न आसीत् मृत्योरभावरूपं जीवनं न आसीत्। तस्मिन् काले रात्रेः दिवसस्य च परिज्ञानं नासीत्। तद् एकमात्रमेव एकाकी केवली सचेतनः नामरूप-गुणविहीनः कोऽपि परमसत्तावान् वायुं विनैव स्वशक्त्या श्वसन-प्रश्वसनक्रियामकार्षीत्। तस्मात् मायाशक्तियुक्तात् ब्रह्मणः भिन्नः कश्चिदपि नासीत्। परमपि किमपि न आसीत्।

तम आसीत्तमसा गूळ्हमग्रे-
ऽप्रकेतं सलिलं सर्वमा इदम्।
तुच्छ्येनाभ्वपिहितं यदासीत्
तपसस्तन्महिनाजायतैकम्॥3॥

व्याख्या—सृष्टेः प्राक् प्रलयकाले इदं जगद् अन्धकारेण आच्छन्नम् आसीत्। सम्प्रति इदं व्यक्तं जगत् तदानीं स्वतमस्-रूपमूलकारणे विद्यमानम् आसीत्। अस्य विश्वस्य कारणभूतात् जलाद् भिन्नं किमपि चिह्नं नासीत्, केवलं सर्वत्र जलमासीत्। तद् यत् स्थितमासीत्, तत्सर्वव्यापकं भावरूपात्मकाज्ञानम् आसीत्। स्वकारणजले वा तमसि स्थितं जगत् तत्परमतत्त्वरूपसंकल्पात्मकतपसः सामर्थ्येन विविधैः रूपैः सह समुत्पन्नोऽभूत्।

कामस्तदग्रे समवर्तताधि,
मनसो रेतः प्रथमं यदासीत्।
सतो बन्धुमसति निरविन्दन्,
हृदि प्रतीष्या कवयो मनीषा॥4॥

व्याख्या—प्रलयकाले कामः परमतत्त्वम् अधिकृतवान्, अस्मिन् रूपे तत्त्ववेत्तृजनैः स्वप्रज्ञया स्वहृदयेषु विचार्य बुद्धिद्वारा अनुसन्धानं कृत्वा इदमवगतं यन्नामरूपगुण-विहीनअव्यक्त[illegible] कारणे एव नामरूपगुणादियुक्त-रूपव्यक्त-जग[illegible] अस्तित्वं विद्यमानमस्ति।

तिरश्चीनो विततो रश्मिरेषामधः
स्विदासी३दुपरि स्विदासी३त्।
रेतोधा आसन् महिमान आसन्-
त्स्वधा अवस्तात्प्रयतिः परस्तात्॥5॥

व्याख्या—[illegible] तत्त्वस्य संकल्पस्य अनन्तरं चेतन-अचेतन-पदार्थानां सूत्राणि वा जालानि मध्ये, उपरि, नीचैः सर्वत्र प्रसृतानि। [illegible] केचित्कामनावन्तः सचेतनाः पदार्थाः भोक्तृ-रूपाः उत्[illegible] आसन्, अन्ये च कामविहीना जडीभूताः अचेतनाः भोग्याः [illegible]धमाः आसन्।

को अद्धा वेद क इह प्र वोचत्
कुत आजाता कुत इयं विसृष्टिः।
अर्वाग्देवा अस्य विसर्जनेना-
था को वेद यत आबभूव॥6॥

व्याख्या—[illegible]-वास्तविकरूपेण क इदं रहस्यं जानाति तथा क अस्मिन् विषये वक्तुं शक्नोति यदिदं विविधा सृष्टिः कथं केन उपादानकारणेन, केन निमित्तकारणेन कर्तृरूपेण समुत्पन्ना। देवा अपि अस्यः सृष्टेः परवर्तिनः सन्ति, तेऽपि नो रहस्यं वक्तुं [illegible] पुनः कः वेत्ति, यतः इदं जगत् उत्पन्नमभूत्।

इयं विसृष्टिर्यत आबभूव यदि
वा दधे यदि वा न।
यो अस्याध्यक्षः परमे व्योमन्त्सो
अङ्ग वेद यदि वा न वेद॥7॥

व्याख्या—इयं विविधा सृष्टिः यस्माद् उपादानकारणाद् निमित्तकारणाद् वा महाकारणात् उत्पन्नाऽभवत्, सः अस्याः कारणरूप-परम-ईश्वर एव इमां सृष्टिं धारयति। तस्माद् भिन्नः अन्यः कोऽपि इमां न धारयति। अस्याः सृष्टेः स्वामी वा अध्यक्षः आध्यात्मिके आकाशे स्वप्रकाशमये परमानन्दस्वरूपे प्रतिष्ठितोऽस्ति। सः सुखस्वरूपः परमात्मा एव सर्वं रहस्यं जानाति; अन्यः कोऽपि न वेत्ति।

नासदीयसूक्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— नासदीयसूक्तस्य कः क्रमांकः?
   उत्तरम्— (ऋक्-10.129)।
2. **प्रश्नः**— नासदीयसू[illegible] [illegible]ति मन्त्राणि सन्ति?
   उत्तरम्— 7 सप्तमन्त्राणि।

3. **प्रश्नः**—नासदीयसूक्तस्य प्रकृतिः कीदृगस्ति?
   उत्तरम्— दार्शनिकी।
4. **प्रश्नः**— 'कामस्तदग्रे समवर्तताधि' मन्त्रोऽयं कस्मिन् सूक्ते वर्तते?
   उत्तरम्— नासदीयसूक्ते।
5. **प्रश्नः**—'नासदासीनो सदासीत्तदानीम्' इति मन्त्रः कस्मिन् सूक्ते प्राप्यते?
   उत्तरम्— नासदीयसूक्ते।
6. **प्रश्नः**—कस्मिन् सूक्ते सृष्टेः प्रागवस्था निरस्त-समस्तप्रपञ्चा या प्रलयावस्था सैव निरूपिता?
   उत्तरम्—नासदीयसूक्ते।
7. **प्रश्नः**—ऋग्वेदसंहितायाः दशममण्डलस्य एकोनत्रिंशत्तमं सप्तर्चसूक्तं नाम किम्?
   उत्तरम्—'नासदीयसूक्तम्'।
8. **प्रश्नः**—कस्य सूक्तस्य परमेष्ठी नाम प्रजापतिर्ऋषिः वर्तते?
   उत्तरम्—नासदीयसूक्तस्य।
9. **प्रश्नः**—नासदीयसूक्तस्य देवता कः?
   उत्तरम्—परमात्मा देवता।
10. **प्रश्नः**— नासदीयसूक्तस्य को छन्दः?
    उत्तरम्—त्रिष्टुप् छन्दः।
11. **प्रश्नः**—सृष्टेः प्राक् प्रलयदशायां न मृत्युः आसीत्, नामृतम् आसीत्। सर्वत्र केवलं किं आसीत्?
    उत्तरम्—गहनान्धकारमेव।
12. **प्रश्नः**— इयं विविधा सृष्टिः कस्माद् उत्पन्नाऽभवत्?
    उत्तरम्—उपादानकारणाद् निमित्तकारणाद् वा महाकारणात्।

6. वाक्सूक्तम् (ऋक्-10.125) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

ऋक्संहितायाः दशममण्डलस्य पञ्चविंशत्यधिकशततमं सूक्तं 'वाक्सूक्तम्' इति अभिधानेन अभिधीयते। अस्य सूक्तस्य अम्भृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी वागाम्भृणी स्वात्मानमस्तौत्। अतः ऋषिः। सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता। वाक् ब्रह्मणः एकं रूपमस्ति। देवानामपि प्रेरिका अस्ति तेषां च कर्तव्यपालने सहायतां करोति। सा स्वभक्तान् स्वतेजसा ऋषिं ब्राह्मणं सुमेधासम्पन्नं विद्वांसं विदधाति। वाण्याः महत्त्वमुपलब्धुं वाक्शक्तेः विकासाय च वाक्-सूक्तस्य पाठः करणीयः। अस्मिन् सूक्ते [illegible] प्रत्यक्ष-परोक्षरूपाणि वर्णितानि सन्ति।

अहं रुद्रेभिर्वसुभिश्चराम्य-
हमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा
बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥1॥

व्याख्या—भगवान् वेदपुरुष आह–जगतः कारणमेव ब्रह्मणा सह तादात्म्यमनुभवन्ती महर्षेः अम्भृणस्य आत्मजा अहं वाक् एकादशरुद्रात्मना विचरणं करोमि। अहम् अष्टवसुरूपेण विचरामि। अहमेव द्वादशादित्यानां रूपे, एवं च विश्वदेवानां रूपे विचरामि। अहमेव मित्रं वरुणञ्च धारयामि। अहम् इन्द्रम् अग्निं च धारयामि। अहमेव उभौ अश्विनौ धारयामि।

अहं सोममाहनसं बिभर्म्यहं
त्वष्टारमुत पूषणं भगम्।
अहं दधामि द्रविणं हविष्मते
सुप्राव्ये यजमानाय सुन्वते॥2॥

व्याख्या—अहम् अभिषवं कृत्वा निर्मितं सोमं धारयामि। अहं त्वष्टारं, पूषणं तथा भगनामकं देवं धारयामि। अहं देवेभ्यः हव्य[illegible]तृभ्यः सोमाभिषेकं कुर्वद्भ्यो यजमानेभ्यो यज्ञफल-रूपं धनं धारयामि।

अहं राष्ट्री संगमनी वसूनां,
चिकितुषी प्रथमा यज्ञियानाम्।
तां मा देवा व्यदधुः पुरुत्रा,
भूरिस्थात्रां भूर्यावेशयन्तीम्॥3॥

व्याख्या—अहं राष्ट्री समग्रस्य जगतः ईश्वरी। धनानां प्रापयित्री, अनुसन्धानकर्त्री, तत्त्वज्ञात्री, परब्रह्मज्ञानसम्पन्ना तथा पूजनीयेषु देवेषु अग्रगण्या अस्मि। अनेकेषु रूपेषु अवस्थिता बहुषु पदार्थेषु आवेशयन्तीं मां देवाः स्थापितवन्तः। विभिन्नाः देवाः पूज्यन्ते यत्तत् ममैव पूजनं भवति।

मया सो अन्नमत्ति यो विपश्यति
यः प्राणिति य ईं शृणोत्युक्तम्।
अमन्तवो मां त उपक्षियन्ति श्रुधि
श्रुत श्रद्धिवं ते वदामि॥4॥

व्याख्या—यः अन्नमत्ति सः भोक्तृशक्तिरूपया मया एव अन्नमन्ति। यश्च प्राणिति श्वासोच्छ्वासरूपं व्यापारं करोति सोऽपि मयैव। यश्च उक्तं शृणोति। य ईदृशीम् अन्तर्यामिरूपेण स्थितां मां न जानन्ति ते अमन्तवः अमन्यमाना अजानन्तः उपक्षियन्ति। उपक्षीणाः संसारेण हीना भवन्ति। माममन्तवो मद्विषयज्ञानरहिता इत्यर्थः। श्रद्धिवम्। श्रद्धिः श्रद्धा। तथा युक्तम्। श्रद्धावत्वेन लभ्यमित्यर्थः। ईदृशं ब्रह्मात्मकं वस्तु ते तुभ्यं वदामि उपदिशामि।

अहमेव स्वयमिदं वदामि
जुष्टं देवेभिरुत मानुषेभिः।
यं कामये तं तमुग्रं कृणोमि
तं ब्रह्माणं तमृषिं तं सुमेधाम्॥5॥

व्याख्या—अहं स्वयम् इदं वस्तु ब्रह्मात्मकं वदामि उपदिशामि। देवेभिः देवैः इन्द्रादिभिः अपि जुष्टं सेवितम्। उत अपि च मानुषेभिः मनुष्यैरपि जुष्टम्। ईदृग्वस्त्वात्मिकाहं यं कामये यं पुरुषं रक्षितुम् अहं वाञ्छामि तं पुरुषम् उग्रं कृणोमि। सर्वेभ्योऽधिकं करोमि। तमेव स्रष्टारं ब्रह्माणं करोमि। तमेव अतीन्द्रियार्थदर्शिनम् ऋषिं करोमि। तमेव सुमेधां शोभनप्रज्ञं च करोमि।

अहं रुद्राय धनुरातनोमि
ब्रह्मद्विषे शरवे हन्तवा उ।
अहं जनाय समदं कृणो-
म्यहं द्यावापृथिवी आ विवेश॥6॥

व्याख्या—पुरा त्रिपुरविजयसमये रुद्राय रुद्रस्य। षष्ठ्यर्थे चतुर्थी। महादेवस्य धनुः चापम् अहम् आतनोमि। ज्ययाततं करोमि। किमर्थम्। ब्रह्मद्विषे ब्राह्मणानां द्वेष्टारं शरवे शरु हिंसकं त्रिपुरनिवासिनमसुरं हन्तवै हन्तुं हिंसितुम्। उ-शब्दः पूरकः। अहम् एव समदम्। समानं माद्यन्त्यस्मिन्निति समत्संग्रामाः। स्तोतृजनार्थं शत्रुभिः सह संग्राममहमेव कृणोमि। तथा द्यावापृथिवी दिवं च पृथिवीं च अन्तर्यामितया अहम् एव आ विवेश प्रविष्टवती।

अहं सुवे पितरमस्य मूर्धन्
मम योनिरप्स्वन्तः समुद्रे।
ततो वि तिष्ठे भुवनानु विश्वो-
तामूं द्यां वर्ष्मणोप स्पृशामि॥7॥

व्याख्या—ब्रह्मणः शिवस्थानीयं द्युलोकं अथवा ब्रह्मणः शिरसि स्थितम् आध्यात्मिकमाकाशम् उत्पादयामि। मम मुख्यं समुद्रस्य अन्तः जलेषु विद्यते। तत एव सर्वेषु लोकेषु व्याप्नुवन्ती विविधरूपेषु अवस्थिता भवामि, स्वव्यापारकरूपेण उपरिवर्तिन-द्युलोकं स्पृशामि।

अहमेव वात इव प्र वा-
म्यारभमाणा भुवनानि विश्वा।
परो दिवा पर एना पृथि-
व्यैतावती महिना सं बभूव॥8॥

व्याख्या—अहमेव समस्तान् लोकान् एव पञ्चमहाभूतानि जनयन्ती वायुरिव सर्वत्र विचरामि आकाशात्परं च अस्मात् पृथिवी-लोकात्परमहं स्वमहिम्ना एवंविधा समभूतास्मि।

(6) वाक्सूक्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—वाक्सूक्तस्य क्रमांकः कः?
   उत्तरम्—ऋक्-10/125।
2. **प्रश्नः**—ऋक्-10/125 इति क्रमांके कति मन्त्राणि सन्ति?
   उत्तरम्—8 अष्टमन्त्राणि।
3. **प्रश्नः**—वाक्सूक्तस्य ऋषिका का?
   उत्तरम्—वागाम्भृणी।
4. **प्रश्नः**—ऋक्-10/125 इति क्रमांके वाक्सूक्ते सर्वाधिकमन्त्राः कस्य छन्दस्य?
   उत्तरम्— त्रिष्टुप् छन्दस्य।
5. **प्रश्नः**—"अहं रुद्राय धनुरातनोमि" इति मन्त्रः कस्मिन् सूक्ते वर्तते?
   उत्तरम्—वाक्सूक्ते।
6. **प्रश्नः**—ऋक्संहितायाः दशममण्डलस्य पञ्चविंशत्यधिकशततमं सूक्तं किम्?
   उत्तरम्—'वाक्सूक्तम्'।
7. **प्रश्नः**—इन्द्रम् अग्नि उभौ अश्विनौ च कः धारयति?
   उत्तरम्—वाग्देवी।
8. **प्रश्नः**—अस्य सूक्तस्य देवता कः?
   उत्तरम्—सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता।

9. **प्रश्नः**—वाण्याः महत्त्वमुपलब्धुं वाक्शक्तेः विकासाय च कस्य पाठः करणीयः?
   उत्तरम्—वाक्सूक्तस्य।
10. **प्रश्नः**—अस्मिन् सूक्ते किं वर्णितानि सन्ति?
    उत्तरम्—वाण्याः प्रत्यक्ष-परोक्षरूपाणि।

7. (अथर्व) पृथिवी-सूक्तम् (12.1) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

अथर्ववेदसंहितायाः द्वादशकाण्डस्य प्रथमसूक्तस्य भूमिः पृथ्वी वा देवता, अथर्वा ऋषिः। सूक्तेऽस्मिन् पृथिव्याः भूमेर्वा वैशिष्ट्यं विस्तरेण उपन्यस्तमस्ति। ऋषिः अथर्वा ब्रूते यत् बृहत् सत्यम्, उग्रम् ऋतं, दीक्षा, तपः, ब्रह्म, यज्ञः, एते पृथिवीं धारयन्ति। इयं भूमिः मानवानां मध्ये असम्बाधमस्ति। अस्याः उद्वतः, प्रवतः समं बहु प्रदेशाः सन्ति। इयमेव नानावीर्याः ओषधीः बिभर्ति। पृथिव्यामेव समुद्रः, सिन्धुः आपश्च प्रवहन्ति। पृथिव्यामेव सर्वे जडजंगमाः आनन्दिताः भवन्ति। अस्याः पृथिव्याः चतस्रः प्रदिशः सन्ति। इत्थं विश्वम्भरा, वसुधानी, प्रतिष्ठा, हिरण्यवक्षा, जगतो निवेशनी, इन्द्रऋषभा भूमिः वैश्वानरम् अग्निं बिभ्रती अस्मान् द्रविणे दधातु। या पृथिवी प्रलयावस्थायां सृष्टेः प्राक्सलिले निमग्ना आसीत्। मनीषिणः यां पृथिवीं बुद्ध्या अन्वचरन्। यस्याः पृथिव्याः सत्येन आवृतम् अमृतं हृदये परमे व्योमन् प्रतिष्ठितम् अस्ति। यस्यां पृथिव्यां परिचराः समानीः सार्वभौमिकाः आपः अहोरात्रे अप्रमादं क्षरन्ति, सा भूरिधारा भूमिः असमान् पयः दुह्राम्, तेजसाऽभिसिञ्चतु। सा माता भूमिः मे पुत्राय पयः विसृजताम्। भूमिः माता अहं पृथिव्याः पुत्रः अस्मि-"माता भूमिः पुत्रोऽहं पृथिव्याः"।

ऋषिः अथर्वा कथयति—मम विस्तृता मातृभूमिः या शान्तिप्रदा, शक्तिसम्पन्ना, आनन्ददायिनी, अमृतसदृशैः भोज्य-पदार्थैरुपेताऽस्ति, अस्मासु अनुग्रहं विहाय अस्मभ्यं दुग्धं भोजनञ्च प्रददातु। समुद्रस्य अन्तः जलेषु निमग्नायाः यस्याः पृथिव्याः विश्वकर्मा भगवान् विष्णुः स्वकर्मणा अन्वेषणम् अकरोत्। हे पृथ्वि ! त्वं कामानां पूरयित्री असि, अस्य विश्वस्य क्षेत्ररूपा एव विस्तारवती असि। तव क्षीणं भागं प्रजापतिः पूर्णं विदधाति। तव उत्संगं अस्माकं कृते रोगरहितो यक्ष्माहीनश्च भवेत्। वयं स्वदीर्घजीवनं प्राप्नुमः। पुनः ऋषिः प्रार्थनां कुरुते, हे पृथ्वि मातः! भवति, मां मंगलमयी प्रतिष्ठा प्रयच्छन्ती लक्ष्म्यां विभूत्याञ्च स्थितं विधाय स्वर्गं प्राप्तिः कारयतु।

(7) पृथिवीसूक्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— अथर्व-12×1 इति क्रमांकस्य सूक्तं नाम किम्?
   उत्तरम्—पृथिवी-सूक्तम्।
2. **प्रश्नः**—अथर्व-12/1 इति पृथिवी-सूक्तस्य ऋषिः कः?
   उत्तरम्—अथर्वन्।
3. **प्रश्नः**— अथर्व-12/1 इति पृथिवी-सूक्ते मन्त्राणां संख्या का?
   उत्तरम्—63 त्रिषष्टिः।
4. **प्रश्नः**— "माता भूमिः पुत्रोऽहं पृथिव्याः" इति मन्त्रः कस्मिन् सूक्ते मिलति?
   उत्तरम्—पृथ्वीसूक्ते।
5. **प्रश्नः**—'विश्वम्भरा, वसुधानी, प्रतिष्ठा, हिरण्यवक्षा, जगतो निवेशनि' इति मन्त्रः कस्मिन् सूक्ते प्राप्यते?
   उत्तरम्—पृथिवीसूक्ते।
6. **प्रश्नः**—"ये ग्रामा यदरण्यं या सभा अधि भूम्याम्। ये संग्रामा समितयस्तेषु चारु वदेम।।" अयं मन्त्रः अथर्ववेदस्य कस्मिन् सूक्ते मिलति?
   उत्तरम्—पृथ्वीसूक्ते।
7. **प्रश्नः**— पृथिवी के अष्टगुणाः धारयन्ति?
   उत्तरम्—सत्यं, गाम्भीर्यं, यथार्थसंकल्पः, शासनम्, नियम-पालनम्, सात्विकं तपः, वैदिक-यज्ञश्च।
8. **प्रश्नः**—तेजस्विनीः औषधीः का धारयति?
   उत्तरम्—पृथ्वी।
9. **प्रश्नः**— अस्यां पृथिव्यां कति दिशः सन्ति?
   उत्तरम्—चतस्रः।
10. **प्रश्नः**— विश्वस्य भरणकर्त्री का?
    उत्तरम्—पृथिवी।
11. **प्रश्नः**— अहर्निशं सर्वत्र प्रवहणशीलानि जलानि निर्बाधं कुत्र वहन्ति?
    उत्तरम्—पृथिव्याम्।
12. **प्रश्नः**—ग्रीष्म-वर्षा-शरद-हेमन्त-शिशिर-वसन्त-ऋतवः कस्याः सन्ति?
    उत्तरम्—पृथिव्याः।

13. **प्रश्नः**—अथर्ववेदसंहितायां पृथ्वीसूक्तं कुत्र वर्तते?
उत्तरम्—द्वादशकाण्डस्य प्रथमसूक्ते।

14. **प्रश्नः**— पृथिवी कानि धारयन्ति?
उत्तरम्—बृहत् सत्यम्, उग्रम् ऋतं, दीक्षा, तपः, ब्रह्म, यज्ञः।

15. **प्रश्नः**— समुद्रः, सिन्धुः ओषधीः आपश्च कुत्र प्रवहन्ति?
उत्तरम्—पृथिव्यामेव।

16. **प्रश्नः**—"माता भूमिः पुत्रोऽहं पृथिव्याः" इति कुत्र कथितमस्ति?
उत्तरम्— पृथ्वीसूक्ते।

(H-Code-25) (ट) वैकल्पिक वर्ग संहिता विवेचनम्
8. ऋक्-वरुणसूक्तम् (1/25) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

ऋग्वेदीयेषु प्रमुखदेवेषु वरुणः प्रमुखतमदेवो वर्तते। वरुणः विश्वस्य राजा अस्ति। एकविंशतिमन्त्रात्मकस्य सूक्तस्यास्य ऋषिः शुनःशेपः। गायत्री छन्दः। वरुणो देवता। वरुणः सर्वशः एव परमशक्तिमान् अस्ति। ईरानदेशीयः जनाः वरुण-नाम्ना वरुणदेवस्य पूजार्चनां च कुर्वन्ति। ग्रीकदेशस्थाः वरुणम् 'उरानोस' एतन्नाम्ना सम्बोधयन्ति, त इमं सर्वदेवानां पितरं मन्यन्ते। ऋग्वेदे वरुणः समुद्रदेवरूपेण प्रतिष्ठाप्यते। वरुणः पूर्वसंपादितानि अन्यान्याश्चर्यमयानि कर्तव्यानि च सर्वतोऽवलोकयति। एतादृशः सुक्रतुः अदितेः पुत्रः वरुणः अस्मान् शोभनमार्गेण सहितान् करोतु, अस्माकम् आयूंषि च प्रवर्धयतु। हे वरुण! अस्माकम् उत्तमं शिरोगतं पाशम् उत्कृत्य मोचय, मध्यमम् उदरगतं पाशं वियुज्य नाशय, मे जीवितुं महीयान् अधमानि पादगतानुपाशान् अवकृष्य नाशय इति। स्वनिर्मितनियमानां पालनकर्तॄणां श्रेष्ठकर्मकर्तॄणां प्रजाजनानां सिद्ध्यर्थं वरुणदेवः स्वसन्तानमध्ये आगत्य प्रतिष्ठितः सञ्जातोऽस्ति। सः सदैव प्रजाजनानां कल्याणं कामयते।

यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतम्।
मिनीमसि द्यविद्यवि ।।1।।

व्याख्या–ऋषिः शुनःशेपः वरुणस्य स्तुतिं कुर्वन् आह–हे वरुण! यथा अस्मिन् लोके प्रजाः कदाचित् प्रसादमपि कुर्वन्ति तथैव स्वाभाविकरूपेण मानवस्वभावाद्वा अहमपि प्रभावः कर्तुं शक्नोमि। अतः तं प्रसादम् अभिलक्ष्य माम् मा दण्डयतु। अपराधं मे क्षम्यताम् इत्यभिप्रायः।

मा नो वधाय हत्नवे जिहीळानस्य रीरधः।
मा हृणानस्य मन्यवे।।2।।

व्याख्या–ऋषिः शुनःशेपः वरुणस्य स्तुतिं कुर्वन् आह–हे वरुण! जिहीळानस्य अनादरं कृतवतः हत्नवे हन्तुः हननशीलस्य तव सम्बन्धिने त्वत्कर्तृकाय वधाय अस्मान् मा रीरधः संसिद्धान् विषयभूतान् मा कुरु। हृणीयमानस्य क्रुद्धस्य तव मन्यवे क्रोधाय मा अस्मान् रीरधः।

विमृळीकाय ते मनो रथीरश्वं न संदितम्।
गीर्भिर्वरुण सीमहि।।3।।

व्याख्या–ऋषिः शुनःशेपः वरुणस्य स्तुतिं कुर्वन् आह–हे वरुण! विमृळीकाय अस्मत्सुखाय तव मनः स्तुतिभिः विशेषेण प्रसादयामः। यथा रथी: रथस्वामी सम्यक् खण्डितं दूरगमनेन श्रान्तम् अश्वं घासप्रदानादिना प्रसादयति, तद्वत् अहमपि भवन्तम् प्रसादयामि।

परा हि मे विमन्यवः पतन्ति वस्यइष्टये।
वयो न वसतीरुप।।4।।

व्याख्या–ऋषिः शुनःशेपः जीवनप्राप्त्यर्थं वरुणस्य स्तुतिं कुर्वन् आह–हे वरुण! यथा पक्षिणः अतीव आतुरतां प्रदर्शयन् स्वकीयं निवासस्थानं प्रति गच्छन्ति, तथैव मम क्रोधरहिता बुद्धयः जीवनप्राप्त्यर्थम् अतिशयेन पुनरावृत्तिरहिताः तवाभिमुखं प्रसरन्ति।

वेदा यो वीनां पदमन्तरिक्षेण पतताम्।
वेद नावः समुद्रियः।।7।।

व्याख्या–ऋषिः शुनःशेपः वरुणस्य स्तुतिं कुर्वन् आह–हे वरुण! अन्तरिक्षेण पतताम् आकाशमार्गेण गच्छतां वीनां पक्षिणां पदं निवासस्थानं यः वरुणः वेद तथा समुद्रियः समुद्रेऽवस्थितः यः वरुणः नावः जले गच्छन्त्याः पदं जानाति, सोऽस्मान् बन्धनान् मोचयतु।

वेद वातस्य वर्तनिमुरोर्ऋष्वस्य बृहतः।
वेदा ये अध्यासते।।9।।

व्याख्या–ऋषिः शुनःशेपः वरुणस्य स्तुतिं कुर्वन् आह–हे वरुण! विस्तीर्णस्य दर्शनीयस्य बृहतः गुणैरधिकस्य वातस्य वायो मार्गं यः वरुणः जानाति। ये देवाः अध्यासते उपरि तिष्ठन्ति, तान् अपि यः वरुणः वेदः, सः अस्मान् बन्धनात् मोचयतु।

स नो विश्वाहा सुक्रतुरादित्यः सुपथा करत्।
प्र नः आयूंषि तारिषत्।।12।।

व्याख्या–ऋषिः शुनःशेपः वरुणस्य स्तुतिं कुर्वन् आह–हे वरुण! सुक्रतुः शोभनप्रज्ञः सः आदितेः पुत्रः आदित्यः वरुणः सर्वेषु अहःसु अस्मान् सुपथा शोभनमार्गेण सहितान् करोतु। किंच अस्माकम् आयूंषि प्रवर्धयतु।

न यं दिप्सन्ति दिप्सवो न द्रुह्वाणो जनानाम्।
न देवमभिमातयः।।14।।

व्याख्या–ऋषिः शुनःशेपः वरुणस्य स्तुतिं कुर्वन् आह–हे वरुण! दिप्सव हिंसितुमिच्छन्तो ये वैरिणः, वरुणं न दिप्सन्ति भीताः सन्तो हिंसितुमिच्छां परित्यजन्ति। जनानां प्राणिनां द्रुह्वाणः द्रोग्धारोऽपि यं वरुणं प्रति न द्रुह्यन्ति, तथा यं वरुणं पाप्मानः न स्पृशन्ति, स वरुणः अस्मान् बन्धनात् मोचयतु।

परा मे यन्ति धीतयो गावो न गव्यूतीरनु।
इच्छन्तीरुरुचक्षसम्।।16।।

व्याख्या–ऋषिः शुनःशेपः वरुणस्य स्तुतिं कुर्वन् आह–हे वरुण! मे शुनःशेपस्य धीतयः उरुचक्षसम् वरुणं इच्छन्ती निवृत्तिरहिताः गच्छन्ति, यथा गावः गोष्ठानि अनुलक्ष्य गच्छन्ति, तद्वत् मे स्तुतिरपि इत्यभिप्रायः।

इमं मे वरुण श्रुधी हवमद्या च मृळय।
त्वामवस्युरा चके।।19।।

व्याख्या–ऋषिः शुनःशेपः वरुणस्य स्तुतिं कुर्वन् आह–हे वरुण! मदीयम् इमम् आह्वानम् शृणु। किं च अद्य अस्मान् सुखय। अवस्युः दक्षणेच्छुः अहं त्वां वरुणम् आभिमुख्येन स्तौमि।

उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत।
अवाधमानि जीवसे।।21।।

व्याख्या–सूक्तस्यास्य अन्तिमे मन्त्रे ऋषिः शुनःशेपः वरुणस्य स्तुतिं कुर्वन् आह–हे वरुण! अस्माकम् उत्तमं शिरोगतं पाशम् उत्कृष्य मोचय, मध्यमम् उदरगतं पाशं वियुज्य नाशय, मे जीवसे प्राणहेतवे मदीयान् अधमानि पादगतान् पाशान् अवकृष्य नाशय। अर्थात् अस्मान् सफलान् बन्धनात् मोक्षय इत्यर्थः।

ऋक्-वरुणसूक्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— ऋक्-1/25 इति क्रमांकस्य सूक्तस्य ऋषिः कः?
उत्तरम्—शुनःशेपः।

2. **प्रश्नः**—ऋक्-1/25 इति क्रमांकस्य सूक्तस्य देवता का?
उत्तरम्— वरुणः।

3. **प्रश्नः**—ऋक्-1/25 इति क्रमांके वरुणसूक्ते कति मन्त्राः सन्ति?
उत्तरम्— 21 एकविंशतिमन्त्राः।

4. **प्रश्नः**— ऋक्-1/25 इति क्रमांकस्य सूक्तस्य मन्त्राः कस्मिन् छन्दे निबद्धाः सन्ति?
उत्तरम्—गायत्री।

5. **प्रश्नः**—स्वीयया मायया जगद्संचालनं कस्य विशिष्टं कार्यमस्ति?
उत्तरम्—वरुणस्य।

6. **प्रश्नः**— उरुशंसः कः अस्ति?
उत्तरम्—वरुणः।

7. **प्रश्नः**— ऋतगोपा कः अस्ति?
उत्तरम्—वरुणः।

8. **प्रश्नः**— 'क्षत्रश्रियः' इति पदेन कः गृह्यते?
उत्तरम्— वरुणः।

9. **प्रश्नः**—वीनां पदमन्तरिक्षेण पतताम् कः वेद?
उत्तरम्—वरुणः।

10. **प्रश्नः**— आकाशे स्तम्भितमण्डितः कस्य प्रसादः श्रूयते?
उत्तरम्—वरुणस्य।

11. **प्रश्नः**— 'धृतव्रतः' कस्य विशेषणम् अस्ति?
उत्तरम्— वरुणस्य।

12. **प्रश्नः**—रक्तवर्णा बलशालिनः अश्वाः कस्य स्वर्णिमरथं वहन्ति?
उत्तरम्—वरुणस्य।

13. **प्रश्नः**— 'असुर' विशेषणेन विशिष्टः कः?
उत्तरम्—वरुणः।

14. **प्रश्नः**— 'वरुण' पदस्य व्युत्पत्तिः किमस्ति?
उत्तरम्—वरुणो वृणोतीति सतः।

15. **प्रश्नः**— सूर्यः कस्य नेत्रः अस्ति?
उत्तरम्—वरुणस्य।

16. **प्रश्नः**— 'उरुचक्षसः' इति कस्य विशेषणम्?
उत्तरम्—वरुणस्य।

17. **प्रश्नः**— वैदिकदैवतेषु मार्गाध्यक्षः कः?
उत्तरम्—वरुणः।

18. **प्रश्नः**— वरुणदेवता-सम्बद्धलोकविशेषः कः?
उत्तरम्—द्युलोकः।

19. **प्रश्नः**— 'मायावी' कः अस्ति?
उत्तरम्—वरुणः।

20. **प्रश्नः**—वेदा यो वीनां पदमन्तरिक्षेण पतताम्। वेद नावः समुद्रियः।। अस्य मन्त्रस्य सम्बद्धदेवता कः?
उत्तरम्—वरुणः।

9. ऋक्-सूर्यसूक्तम् (1.115) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

ऋग्वेदस्य प्रथम-मण्डलस्य अस्य सूर्यसूक्तस्य देवता सूर्यः, ऋषिः कुत्सः, छन्दः त्रिष्टुप्। सूक्तेऽस्मिन् ऋषिः भगवतः सूर्यस्य स्तुतिं कुर्वन् आह–जगतां चक्षुरिन्द्रियस्थानीयः सूर्यः उदयं प्राप्त दिवं पृथिवीम् अन्तरिक्षं च स्वकीयेन तेजसा समन्तात् अपूरयत्। ईदृग्भूतमण्डलान्तर्वर्ती सूर्यः अन्तर्यामितया सर्वस्य प्रेरकः परमात्मा एव अस्ति। स हि सर्वस्य स्थावरजंगमात्मकस्य कार्यवर्गस्य कारणम्। उदिते हि सूर्ये मृतप्रायं जगत्सर्वं पुनश्चेतनयुक्तं सदुपलभ्यते। सूर्य एव दानादिगुणयुक्तां दीप्यमानाम् उषसम् अभ्येति। अर्थात् उषसः प्रादुर्भावानन्तरं ताम् अभिलक्ष्य गच्छति। यथा कश्चिन्मनुष्यः लावण्यमयीं गच्छन्तीम् युवतिं सततमनुगच्छति, तद्वत्। एवंविधं सूर्यं प्रति भद्राय कल्याणरूपाय कर्मफलाय स्तुमः। इत्थम् अस्माभिः नमस्यमानः सूर्यः अन्तरिक्षस्य पृष्ठम् नभः स्थानम् आतिष्ठन्ति। उदयसमये मित्रस्य वरुणस्य एतल्लक्षितस्य सर्वस्य जगतः आभिमुख्येन प्रकाशनाय नभसः उपस्थानं मध्ये सूर्यः सर्वस्य प्रेरकः सवितारूपं सर्वस्य निरूपकं प्रकाशकं तेजः करोति। एवं अस्य सूर्यस्य रसहरणशीलाः रश्मयः हरिद्वर्णाः अश्वाः वा अनन्तम् अवमानरहितं कृत्स्नस्य जगतः व्यापकं दीप्यमानं श्वेतवर्णं बलयुक्तं नैशस्य तमसो निवारणे समर्थम् अन्यत् तमसो विलक्षणं तेजः सम्भरन्ति स्वकीयागमनेन निष्पादयन्ति।

चित्रं देवानामुदगादनीकं,
चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवी अन्तरिक्षं,
सूर्य आत्मा जगतस्तस्थुषश्च।।1।।

व्याख्या–दीवयन्तीति देवाः रश्मयः, तेषाम् देवानाम्, समूहरूपं आश्चर्यकरम् सूर्यस्य मण्डलम् उदयाचलं प्राप्तम् आसीत्। मित्रस्य वरुणस्य अग्नेः अथवा तदुपलक्षितानां जगतां प्रकाशकं चक्षुरिन्द्रियस्थानीयम् उदयं प्राप्य दिवम् पृथिवीम् अन्तरिक्षं च स्वकीयेन तेजसा समन्तात् अपूरयत्। ईदृग्भूतमण्डलान्तर्वर्ती सूर्यः अन्तर्यामितया सर्वस्य प्रेरकः परमात्मा एव अस्ति। स हि सर्वस्य स्थावरजंगमात्मकस्य कार्यवर्गस्य कारणम्, स्थावरजंगमात्मकस्य सर्वस्य प्राणिजातस्य जीवात्मा एव अस्ति। उदिते हि सूर्ये मृतप्रायं जगत्सर्वं पुनश्चेतनयुक्तं सदुपलभ्यते। कथ्यते यथा तैत्तिरीयारण्यके–योऽसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायोदेति।

सूर्यो देवीम् उषसं रोचमानां,
मर्यो न योषामीयेति पश्चात्।
यत्रा नरो देवयन्तो युगानि,
वितन्वते प्रति भद्राय भद्रम्।।2।।

व्याख्या–अस्मिन् मन्त्रे ऋषिः कुत्स आह–सूर्यः दानादिगुणयुक्तां दीप्यमानाम् उषसः पश्चात् अभ्येति, अर्थात् उषसः प्रादुर्भावानन्तरं ताम् अभिलक्ष्य गच्छति। यथा कश्चित् मनुष्यः शोभनावयवां गच्छन्तीं युवतिं सततम् अनुगच्छति। एवंविधं कल्याणं सूर्यं प्रति कल्याणरूपाय कर्मफलाय स्तुमः।

भद्रा अश्वा हरितः सूर्यस्य,
चित्रा एतगवा अनुमाद्यासः।
नमस्यन्तो दिव आ पृष्ठमस्थुः,
परिद्यावापृथिवी यन्ति सद्यः।।3।।

व्याख्या–अश्वाः तुरगाः व्यापनशीला वा हरितः चित्राः विचित्रावयवाः अनुमाद्यासः अनुक्रमेण सर्वे स्तुत्या मादनीया एवंभूताः सूर्यस्य अश्वाः। एवं गन्तव्यं मार्गं गन्तारोऽश्वाः। नमस्यन्तः अस्माभिः नमस्यमानाः सन्तः दिवः अन्तरिक्षस्य पृष्ठम् उपरिप्रदेशं पूर्वभागलक्षणम् आ अस्तुः आतिष्ठन्ति प्राप्नुवन्ति वा। हरितः रसहरणशीलाः रश्मयः भद्रादिलक्षणविशिष्टः दिवः पृष्ठं नभस्थलम् आतिष्ठन्ति।

तत्सूर्यस्य देवत्वं तन्महित्वं,
मध्या कर्तोर्विततं संजभार।
यदेदयुक्त हरितः सधस्था-
दाद्रात्रीवासस्तनुते सिमस्मै।।4।।

व्याख्या–सूर्यस्य सर्वप्रेरकस्य आदित्यस्य तत् देवत्वम्,

स्वातन्त्र्यमिति। महित्वं महत्वं माहात्म्यं च तत् एषा प्रारब्धापरिसमाप्तस्य वृत्यादिलक्षणस्य कर्मणः मध्या मध्ये अपरिसमाप्ते एव तस्मिन् कर्मणि विततं विस्तीर्णं स्वकीयं रश्मिजालं अस्तं गच्छन् सूर्यः संजभार अस्माल्लोकात् स्वात्मन्युपसंहरति। ईदृशं स्वातन्त्र्यं महिमानं च अवगाहते।

तन्मित्रस्य वरुणस्याभिचक्षे,
सूर्यो रूपं कृणुते द्योरुपस्थे।
अनन्तमन्यद्रुशदस्य पाजः,
कृष्णमन्यद्धरितः सं भरन्ति।।5।।

व्याख्या–तत् तदानीम् उदयसमये मित्रस्य वरुणस्य एतदुभयोपलक्षितस्य सर्वस्य जगतः अभिचक्षे आभिमुख्येन प्रकाशनाय द्योः नभसः उपस्थे उपस्थानं मध्ये सूर्यः सर्वस्य प्रेरकः सविता रूपं सर्वस्य निरूपकं प्रकाशकं तेजः कृणुते। अपि च अस्य सूर्यस्य हरितः रसहरणशीला रश्मयः हरिद्वर्णा अश्वा वा अनन्तम् अवसानरहितं कृत्स्नस्य जगतो व्यापकं रुशत् दीप्यमानं श्वेतवर्णं बलयुक्तं नैशस्य तमसो निवारणे समर्थम् अन्यत् तमसो विलक्षणं तेजः संभरन्ति अहनि स्वकीयागमनेन निष्पादयन्ति।

अद्या देवा उदिता सूर्यस्य,
निरंहसः पिपृता निरवद्यात्।
तन्नो मित्रो वरुणो मामहन्ता-
मदितिः सिन्धुः पृथिवी उत द्यौः।।6।।

व्याख्या–हे देवाः द्योतमानाः सूर्यरश्मयः अद्य अस्मिन्काले सूर्यस्य आदित्यस्य उदिता उदितौ उदये सति इतस्ततः प्रसरन्तो यूयम् अस्मान् अंहसः पापात् निःपिपृत निष्कृष्य पालयत। यदिदमस्माभिरुक्तं नः अस्मदीयं तत् मित्रः, वरुणः, अदितिः, सिन्धुः पृथिवी, द्यौश्च षड्देवताः ममहन्तां पूजयन्तु अनुमन्यन्ताम्। अत्र मित्रः प्रमीतेस्त्रायकः अहरभिमानी देवः, वरुणः अनिष्टानां निवारयिता रात्र्यभिमानी देवः, अदितिः अखण्डनीया अदीना वा देवमाता, सिन्धुः स्यन्दनशीलोदकाभिमानिनि देवता, पृथिवी भूलोकस्याधिष्ठात्री देवता, द्यौः द्युलोकस्य अभिमानी देवः।

(9) ऋक्- (1.115) सूर्यसूक्तस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—ऋक्- (1.115) इति सूक्तस्य ऋषिः कः?
उत्तरम्— आंगिरसः कुत्सः।

2. **प्रश्नः**—सूर्यसूक्तस्य ऋग्वैदिकक्रमः कः?
उत्तरम्—ऋक्-1/115,

3. **प्रश्नः**—ऋक्- (1.115) इति सूक्तस्य देवता कः?
उत्तरम्— सूर्यः।

4. **प्रश्नः**—ऋक्- (1.115) इति सूक्ते कति मन्त्राः सन्ति?
उत्तरम्— 06 षट्।

5. **प्रश्नः**— ऋक्- (1.115) इति सूर्यसूक्तस्य मन्त्राः कं वृत्तमाश्रयन्ति?
उत्तरम्— त्रिष्टुप्-वृत्तम्।

6. **प्रश्नः**—अद्या देवा उदिता सूर्यस्य, निरंहसः पिपृता निरवद्यात्। तन्नो मित्रो वरुणो मामहन्ता-मदितिः सिन्धुः पृथिवी उत द्यौः।। अस्य मन्त्रस्य सम्बद्धदेवता कः?
उत्तरम्—सूर्यः।

7. **प्रश्नः**—जगतस्तस्थुषश्च आत्मा कः अस्ति?
उत्तरम्—सूर्यः।

8. **प्रश्नः**—तन्मित्रस्य वरुणस्याभिचक्षे, सूर्यो रूपं कृणुते द्योरुपस्थे। अनन्तमन्यद्रुशदस्य पाजः, कृष्णमन्यद्धरितः सं भरन्ति।। अस्य मन्त्रस्य सम्बद्धदेवता कः?
उत्तरम्—सूर्यः।

9. **प्रश्नः**—"योऽसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायोदेति।" इति कुतः उद्धृतोऽस्ति?
उत्तरम्—तैत्तिरीयारण्यकात्।

10. **प्रश्नः**—ऋग्वेदस्य कस्य मण्डलस्य सूर्यसूक्तम्?
उत्तरम्—प्रथम-मण्डलस्य।

11. **प्रश्नः**—उदिते हि सूर्ये मृतप्रायं जगत्सर्वं पुनः किं युक्तं सदुपलभ्यते?
उत्तरम्—चेतनयुक्तम्।

12. **प्रश्नः**—अन्तरिक्षस्य पृष्ठम् नभःस्थानम् कः आतिष्ठति?
उत्तरम्—सूर्यः।

13. **प्रश्नः**—भूलोकस्याधिष्ठात्री देवता, द्यौः द्युलोकस्य अभिमानी देवः कः?
उत्तरम्—सूर्यः।

10. ऋक्-उषस् सूक्तम्- (3.61) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

ऋतस्य बुध्न उषसामिषण्यन्,
वृषा मही रोदसी आ विवेश।
मही मित्रस्य वरुणस्य माया,
चन्द्रेव भानुं विदधे पुरुत्रा।।

व्याख्या–अस्य सूक्तस्य देवता उषा वर्तते। ऋषि:-विश्वामित्र:, त्रिष्टुपृछन्दश्च। ऋषि: उषस: स्तुतिं कुर्वन् आह, हे भगवति! त्वमेव वाजिनी, त्वमेव मघोनि, त्वमेव प्रकृष्टज्ञानवती, त्वमेव विश्ववारा, पुराणी, युवती च असि। हे देवि! त्वं मरणधर्मरहिता, सुवर्णमयरथोपेता असि। एतादृशीं त्वां प्रभूतबलयुक्ता: अश्वा आवहन्तु। हे भगवति! त्वमेव वस्त्रमिव तम: अवचिन्वती, स्वकीयं तेज: जनयन्ती द्युलोकात् पृथ्विलोकपर्यन्तं प्रथते प्रकाशते वा। इयमेव उषा नभसि तेज: श्रयति तथा स्वतेजसा लोकान् प्रकाशयति इयम् ऋतावरी उषा द्युलोकात् तेजोभि: सर्वै: ज्ञायते। इयमेव धनवती द्युलोके पृथिवीलोके च विविधरूपै: आत्मानम् उपस्थापयति। दिनस्य प्रारम्भे उषसाम् प्रेरयन् अपां प्रेरक: आदित्य: स्वतेजोभि: द्यावापृथिव्यौ आविवेश। यद्वा, वृषा वर्षितेषण्यन् सर्वतो गच्छन् उषसां सम्बन्धी रश्मिसमूहो द्यावापृथिव्यौ विष्टवान्। तत: उषा मित्रावरुणयो: प्रभारूपा सती चन्द्रेव सुवर्णानीव स्वप्रभां सर्वत्र प्रसारयति।

(10) ऋक्- (3.61) उषस्सूक्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्न:**—ऋक्- (3.61) इति क्रमांकस्य उषस् सूक्तस्य नाम किम्?
   उत्तरम्— गाथिनो विश्वामित्र:।
2. **प्रश्न:**— ऋक्- (3.61) इति क्रमांकस्य उषस् सूक्तस्य देवता नाम किम्?
   उत्तरम्— उषा।
3. **प्रश्न:**—प्रात:कालस्य देवी का?
   उत्तरम्—उषस्।
4. **प्रश्न:**—उषादेवता-सम्बद्धलोकविशेष: क:?
   उत्तरम्—द्युलोक:।
5. **प्रश्न:**—उषस्-सूक्तस्य ऋषि: क:?
   उत्तरम्—विश्वामित्र:।
6. **प्रश्न:**— 'दुहिता दिव:' का अस्ति?
   उत्तरम्—उषस्।
7. **प्रश्न:**— रात्रि: कस्या: भगिनी अस्ति?
   उत्तरम्—उषस:।
8. **प्रश्न:**— 'मघोनि' का अस्ति?
   उत्तरम्—उषस्।
9. **प्रश्न:**— ऋक्- (3.61) इति क्रमांके उषस्सूक्ते कति मन्त्रा: सन्ति?
   उत्तरम्— 07 सप्त।
10. **प्रश्न:**— उषस्सूक्ते प्रयुक्त: छन्दविशेष: क:?
    उत्तरम्—त्रिष्टुपृछन्दविशेष:।
11. **प्रश्न:**—उषस्सूक्ते उषादेवताया: किं विशेषणम्?
    उत्तरम्—पुराणी।
12. **प्रश्न:**— 'युवति:' इत्यनेन का गृह्यते?
    उत्तरम्—उषा।
13. **प्रश्न:**—सूर्यस्य माता जाया वा का अस्ति?
    उत्तरम्—उषा।
14. **प्रश्न:**— ऋक्- (3.61) इति सूक्ते 'हिरण्यवर्णा' का?
    उत्तरम्— उषा।
15. **प्रश्न:**—सुभगा सुदंसा स्त्री का?
    उत्तरम्—उषा।
16. **प्रश्न:**—पुराणी युवती का?
    उत्तरम्— उषस्।
17. **प्रश्न:**—'विश्ववारा' का अस्ति?
    उत्तरम्— उषस्।
18. **प्रश्न:**— उषस: इत्यस्य विशेषणं किम्?
    उत्तरम्— ऋतावरी।
19. **प्रश्न:**— मित्र-वरुणयो: माया नाम किम्?
    उत्तरम्— उषा।
20. **प्रश्न:**—यास्कमते 'उषा' पदस्य निर्वचनं किम्?
    उत्तरम्—उच्छति:।
21. **प्रश्न:**—ऋतस्य बुध्न उषसामिषण्यन्, वृषा मही रोदसी आ विवेश। मही मित्रस्य वरुणस्य माया, चन्द्रेव भानुं विदधे पुरुत्रा।। इति मन्त्रं कस्य सूक्तस्य वर्तते?
    उत्तरम्—उषस्सूक्तस्य।
22. **प्रश्न:**—मरणधर्मरहिता, सुवर्णमयरथोपेता का?
    उत्तरम्—उषा।
23. **प्रश्न:**—'स्वर्णिमवस्त्रसुसज्जिता नवयौवना नर्तकी' का?
    उत्तरम्—उषा।

11. ऋक् (5.83) पर्यन्यसूक्तम् इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

यत्पर्जन्य कनिक्रदत् स्तनयन् हंसि दुष्कृत:।
प्रतीदं विश्वं मोदते, यत्किं च पृथिव्यामधि।।

व्याख्या–अस्य सूक्तस्य ऋषि: अत्रि: विद्यते। अत्र पर्यन्य-शब्दस्य शाब्दिकोऽर्थ: अस्ति उत्पद्यमानानां चराचरप्राणिनां पूर्तिकर्ता। पर्यन्य: जलवर्षणशीलं मेघरूपेण प्रतिष्ठाप्यते। ऋग्वेदे पर्यन्यस्य सामान्यं स्थानं विद्यते। त्रिषु सूक्तेषु अस्य स्तुति: कृताऽस्ति। पर्जन्य: द्यौस-पुत्र: तथा पृथिव्या: पतिरुक्त: जलरूपेण पर्जन्य: पृथिव्यां स्वप्रेम अभिवर्षति येन पृथिवी विविधै: वनस्पतिभि: औषधिभि: अन्नै: तथा जीवजन्तुभि: परिपूर्णा जायते। पर्जन्य: महद्दानिरूपेण पृथिव्यां वृष्टिपातं कृत्वा जनान् भयभीतान् करोति, येन जना: पलायमाना: भवन्ति। पर्जन्य: जलरूपेण पृथिव्यां प्रवातवत् वर्षणं करोति, येन सर्वे वृक्षा: नष्टा: भवन्ति। राक्षसानां संहारो भवति तथा अखिलोऽपि लोक: भयग्रस्तो जायते। स्वतीव्रगर्जनया पापिन: विनाशयन् निरपराधिनो जनान् पाप-अकरणस्य प्रेरणां ददाति। पर्जन्यद्वारेण मेघवर्षणेन पृथ्वी जलेन पूर्णा भवति, सर्वत्र समाना जायते। सर्वे जीवा: जीवनं धारयन्ति। जलवर्षणेन एव ओषधय: विभिन्न-रूपाणि धारयन्ति येन जना: प्रसन्नतां प्राप्नुवन्ति। पर्जन्य: जलवर्षणं कुर्वन् विद्युद्वत् सिंहगर्जनरूपनिर्घोषेण सह जलमयरथमारुह्य आकाशे भ्राम्यति। पर्जन्य: ओषधीनाम्, तृणानाम्, अंकुराणाञ्च जन्मदाता कथित:। अयं गोषु, घाटिकासु, औषधिषु एवमन्यस्त्रिजन्तुषु गर्भाधानस्य सामर्थ्यं जनयति। पर्जन्य: जलेन पूर्ण: मशकसमान: अस्ति य: दृतिरप्युच्यते। अस्य विरोचनेन सम्पूर्णं जलं पृथिव्यां पतति, इदमेव जलवर्षणं प्रोच्यते। यदा पर्जन्य: सम्यक्तया जलवर्षणं करोति, सर्वत्र जलमेव दरीदृश्यते। नद्य: सम्यक् प्रकारेण जलेन पूर्णा: भवन्ति। गवां तथा अन्य-जीवजन्तूनां पानाय जलं प्राचुर्येण संगृहीतं भवति। तदा मेघा: वृष्टिपातेन विरता: भवन्ति। वृष्टिपातानन्तरं पर्यन्य: प्रार्थ्यते यदधुना अलम् अनेन वर्षणेन त्वया जनस्थानं सरलं सुगम्यं च कृतम्। सर्वे अन्नादय: समुत्पन्ना: अत: वर्षणकर्मणा सम्प्रति अस्माद् जलवर्षणकर्मण: विरमतु।

(11) पर्यन्यसूक्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्न:**—ऋक् (5.83) पर्यन्यसूक्तस्य ऋषे: नाम किम्?
   उत्तरम्—अत्रि:।
2. **प्रश्न:**—क: देवता जलवर्षणशीलं मेघरूपेण प्रतिष्ठाप्यते?
   उत्तरम्—पर्यन्य:।
3. **प्रश्न:**—ऋक् (5.83) पर्यन्यसूक्तस्य देवता नाम किम्?
   उत्तरम्— सोम:।
4. **प्रश्न:**—ऋक् (5.83) पर्यन्यसूक्ते कति मन्त्रा: सन्ति?
   उत्तरम्—10 दश।
5. **प्रश्न:**—औषधीनाम्, तृणानाम् अंकुराणाञ्च जन्मदाता क:?
   उत्तरम्—पर्यन्य:।
6. **प्रश्न:**—ऋक् (5.83) पर्यन्यसूक्ते कति वृत्ता: के च ते?
   उत्तरम्—3 त्रय:, 1. त्रिष्टुप्, 2. जगती, 3. अनुष्टुप्।
7. **प्रश्न:**—कस्य व्रते पृथिवीमन्नयीति कथ्यते?
   उत्तरम्— पर्यन्यस्य।
8. **प्रश्न:**—कस्य व्रते औषधीर्विश्वरूपा: इति कथ्यते?
   उत्तरम्—पर्यन्यस्य।
9. **प्रश्न:**—'अवर्षीर्वर्षमुदुषू गृभायाकर्धनवान्यत्येतवा उ। अजीजन ओषधीर्भोजनाय कमुत प्रजाभ्योऽविदो मनीषाम्।' इति मन्त्रस्य सम्बद्धदेवता क:?
   उत्तरम्—पर्जन्य:।
10. **प्रश्न:**—केषु सूक्तेषु पर्यन्यस्य स्तुति: कृताऽस्ति?
    उत्तरम्—त्रिषु।

12. शुक्लयजुर्वेदस्य शिवसंकल्पसूक्तम् (1.6) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

सुसारथिरश्वानिव यन्मनुष्यान्,
नेनीयतेऽभीशुभिर्वाजिन इव।
हृत्प्रतिष्ठं यदजिरं जविष्ठं,
तन्मे मनः शिवसंकल्पमस्तु।।
यजाग्रतो दूरमुदैति देवं
तदु सुप्तस्य तथैवैति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं
तन्मे मनः शिवसंकल्पमस्तु।

व्याख्या–यजुर्वेदस्य चतुःत्रिंशतम् अध्यायस्य प्रथमं सूक्तं वर्तते। षड्ऋचात्मकस्य अस्य सूक्तस्य ऋषिः याज्ञवल्क्यः, मनः देवता, त्रिष्टुप् छन्दश्च वर्तते। अस्य सूक्तस्य प्रत्येकं मन्त्रस्य अन्तिमो पादः "तन्मे मनः शिवसंकल्पमस्तु" द्वारा समाप्यते। समाजस्य संरचनायां वाण्या: विशिष्टं महत्त्वमस्ति। सर्वेषां कर्मणाम् आधाररूपं संकल्पं कल्याणमयं विधातुं प्रस्तुतसूक्ते कामना अभिव्यक्ता विद्यते। अस्मिन् सूक्ते ऋषिः वदति यन्मनः जाग्रतः पुरुषस्य दूरमुद्गच्छति। यच्च मनः-सुप्तस्य पुंसः तथैव एति यथा गतं तथैव पुनरागच्छति, यच्च दूराद् गच्छति इति दूरंगमम्, यत् च प्रकाशकानां श्रोत्रादीन्द्रियाणाम् एक एव ज्योतिः तादृशं मे मनः शिवसंकल्पः धर्मविषयकः वा भवतु अर्थात् शरीरे पञ्चकर्मेन्द्रियाणि, पञ्चज्ञानेन्द्रियाणि, मनः। इदं मनः इन्द्रियाणां स्वामी अस्ति।

ऋषयः येन मनसा कर्माणि कुर्वन्ति। येन धीमन्तः विधिविधानपूर्वकं यज्ञसम्पादनं कुर्वन्ति, यत् च सर्वासाम् इन्द्रियाणां मूलभूतम् अपूर्वं पूज्यं च अस्ति। इदं मनः ज्ञाने अपूर्वां वृद्धिः विदधाति। अन्यश्च यन्मनः प्रज्ञानं यन्मनः प्रज्ञासु अन्तर्ज्योतिः अमृतं च अस्ति, येन विना न किंचन कर्म क्रियते, तन्मे मनः शिवसंकल्पमस्तु। येन मनसा इदं सर्वं सर्वतो ज्ञानम्, येन च मनसा यज्ञस्तायते सप्तहोतारः। अन्यच्च यस्मिन् मनसि ऋचः प्रतिष्ठिताः, यस्मिन् सामानि प्रतिष्ठितानि, यस्मिन् यजूंषि प्रतिष्ठितानि, यथा रथनाभौ अराः प्रतिष्ठिताः भवन्ति, यस्मिन् प्रजानां सर्वपदार्थविषयकं ज्ञानं निहितमस्ति, यन्मनः मनुष्यान् यतस्ततः नेनीयते, यथा सुसारथिः अश्वान् नेनीयते, तथैव मनः प्रवर्तयति नियच्छति च नरान् इत्यर्थः। यच्च मनः हृत्प्रतिष्ठं, यच्च अजिरं जरारहितम्, यच्च जविष्ठम् अतिजववदस्ति, तन्मे मनः शिवसंकल्पमस्तु।

(12) शुक्लयजुर्वेदस्य शिवसंकल्पसूक्तविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—शिवसंकल्पसूक्तसम्बद्धः वेदविशेषः कः?
उत्तरम्—शुक्लयजुर्वेदः।
2. **प्रश्नः**— केन यज्ञस्तायते सप्तहोता?
उत्तरम्—मनसा।
3. **प्रश्नः**—रथनाभाविवाराः कस्मिन् ऋचः साम यजूंषि प्रतिष्ठिता?
उत्तरम्—मनसि।
4. **प्रश्नः**—शिवसंकल्पसूक्तस्यानुसारं हृत्प्रतिष्ठः कः?
उत्तरम्—मनः।
5. **प्रश्नः**—शिवसंकल्पसूक्तस्यानुसारं अजिरं जविष्ठं जरारहितं च कः?
उत्तरम्—मनः।
6. **प्रश्नः**—शुक्लयजुर्वेदे माध्यन्दिनिसंहितायां शिव-संकल्पसूक्तं कस्मिन् अध्याये वर्णितमस्ति?
उत्तरम्— 34 अध्याये।
7. **प्रश्नः**— शिवसंकल्पसूक्तस्य ऋषिः कः?
उत्तरम्— याज्ञवल्क्यः।
8. **प्रश्नः**— शिवसंकल्पसूक्तस्य देवता का?
उत्तरम्—मनः।
9. **प्रश्नः**— शिवसंकल्पसूक्ते कति मन्त्राः सन्ति?
उत्तरम्—06 षट् मन्त्राः।
10. **प्रश्नः**—शिवसंकल्पसूक्ते प्रयुक्तः छन्दविशेषः कः?
उत्तरम्—जगती (त्रिष्टुप्)।
11. **प्रश्नः**—शिवसंकल्पसूक्तस्य अन्तिमो पादः केन द्वारा समाप्यते?
उत्तरम्—तन्मे मनः शिवसंकल्पमस्तु।
12. **प्रश्नः**—समाजस्य संरचनायां कस्य विशिष्टं महत्त्वमस्ति?
उत्तरम्—वाण्याः।

13. **प्रश्नः**— इन्द्रियाणां स्वामी कोऽस्ति?
उत्तरम्—मनः।
14. **प्रश्नः**—"यज्जाग्रतो दूरमुदैति देवं तदु सुप्तस्य तथैवैति। दूरङ्गमं ज्योतिषां ज्योतिरेकं" इति मन्त्रांशेन सम्बद्धः कः?
उत्तरम्—मनः।

13. शुक्लयजुर्वेदस्य प्रजापतिसूक्तम् (1.5) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

यस्माज्जातं न पुरा किंच नैव,
य आबभूव भुवनानि विश्वा।
प्रजापतिः प्रजया संरराणःस्त्रीणि
ज्योतींषि सचते स षोडशी।।

व्याख्या–पञ्चमन्त्रात्मके अस्मिन् सूक्ते वर्णितमस्ति यत् अस्मिन् ब्रह्माण्डे यत्किञ्चिदपि दृश्यते, तत्सर्वं प्रजापतिरेवास्ति। यस्मात् पुरा किमपि न जातमेव। यश्च सर्वाणि भूतजातानि आबभूव, स षोडशावयवलिंगशरीरी प्रजापतिः एव अस्ति। अग्नि-आदित्य-वायु-चन्द्रः-शुक्र-ब्रह्म-ओंकारादि-रूपैः सः प्रजापतिरेव व्याख्यातः प्रसिद्धश्च। किंचिदपि एवं पुरुषम् ऊर्ध्वम् च परिगृह्णाति। सर्वे निमेषाः कालविशेषाः प्रजापतिपुरुषात् अधिपुरुषसकाशात् जज्ञिरे। तस्य पुरुषस्य प्रतिमानं किंचिद्वस्तु नास्त्येव। एषो ह देवः सर्वाः प्रदिशि व्याप्य स्थितः। एष प्रथमोत्पत्तिः सुप्रसिद्ध एव। गर्भमध्ये स एव तिष्ठति। जातोऽपि स एव जनिष्यमाणः। इत्थं स प्रजापतिः प्रजया संरराणः त्रीणि ज्योतींषि रवीन्द्वग्निरूपाणि सेवते।

(13) शुक्लयजुर्वेदस्य प्रजापतिसूक्तविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—शुक्लयजुर्वेदे माध्यन्दिनिसंहितायां प्रजापतिसूक्तं कस्मिन् अध्याये समुपलभ्यते?
उत्तरम्— 32 अध्याये।
2. **प्रश्नः**—शुक्लयजुर्वेदीयस्य प्रजापतिसूक्तस्य ऋषिः कः?
उत्तरम्—स्वयंभू ब्रह्मा।
3. **प्रश्नः**—शुक्लयजुर्वेदीयस्य प्रजापतिसूक्तस्य देवता नाम किम्?
उत्तरम्—आत्मदेवता।
4. **प्रश्नः**—शुक्लयजुर्वेदीयस्य प्रजापतिसूक्तस्य प्रथम-द्वितीयौ मन्त्रौ कौ स्तः?
उत्तरम्—अनुष्टुप् छन्दः।
5. **प्रश्नः**—शुक्लयजुर्वेदीयस्य प्रजापतिसूक्तस्य तृतीय-मन्त्रसम्बद्धः छन्दविशेषः कः?
उत्तरम्— निचृत् पंक्तिः।
6. **प्रश्नः**—शुक्लयजुर्वेदीयस्य प्रजापतिसूक्तस्य चतुर्थ-पंचमौ मन्त्रौ कौ स्तः?
उत्तरम्—भुरिक् त्रिष्टुप्।
7. **प्रश्नः**—शुक्लयजुर्वेदीये प्रजापतिसूक्ते कति मन्त्राः सन्ति?
उत्तरम्—16 षोडशमन्त्राः।
8. **प्रश्नः**— 'षोडशी' इति कस्य विशेषणम्?
उत्तरम्— प्रजापतेः।
9. **प्रश्नः**— ब्रह्माण्डे यत्किञ्चिदपि दृश्यते, तत्सर्वं किमस्ति?
उत्तरम्—प्रजापतिरेवास्ति।
10. **प्रश्नः**—अग्नि-आदित्य-वायु-चन्द्रः-शुक्र-ब्रह्म ओंकारादि-रूपैः कः प्रसिद्धः?
उत्तरम्—प्रजापतिरेव।

14. अथर्व-राष्ट्राभिवर्धनसूक्तम् (1.29) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

षड्मन्त्रात्मकस्य अस्य सूक्तस्य वशिष्ठः ब्रह्मणस्पतिः अभीवर्तमणिः वा देवता, अनुष्टुप्-छन्दः। सूक्तेऽस्मिन् ऋषिः लोककल्याणाय राष्ट्रहिताय वा अभिलषति सत् येन अभीवर्तेन मणिना इन्द्रः देवानाम् अधिपतिर्देवः अभिवावृधे, तेन मणिना रक्षितं राष्ट्रं शत्रुभयरहितम् अभिवृद्धं भवतु। ज्ञातव्यमस्ति यत् अभितः सर्वतः परराष्ट्रादौ अप्रतिहतगतिः वर्तते अनेन पुरुषः इति अभीवर्तो मणिः। तेन मणिना धृतेन इन्द्रः देवानाम् अधिपतिर्देवः अभिवावृधे, परमैश्वर्योपेतस्त्रिलोकीपतिर्बभूव इत्यर्थः। अतः ऋषिः वशिष्ठः कामयते, हे ब्रह्मणस्पते वेदराशेरधिपते। त्वत्प्रसादात् समृद्धैरस्माभी रक्षितं राष्ट्रं शत्रुभयरहितं अभिवृद्धिं भवतु यथा, तथैव कुरु इत्यर्थः।

हे अभिवर्तमणे! त्वं सपत्नान् सहजशत्रून् अभिवृत्य तिष्ठ, त्वमेव प्रतिपक्षी भूत्वा तान् पराकुरु इत्यर्थः। त्वां सवितृदेवः सोमश्च अभितः समृद्धम् अकार्षीत्। अतः राष्ट्राभिवृद्धये वध्यमानोऽयं मणिः पूर्वं शत्रुभिः पीडितस्य स्वराष्ट्रस्य अभिवृद्धिं बाधकानां शत्रूणां नाशनं च करोतु इत्यर्थः। अन्यच्च मणिप्रभावात् अद्यतन-सूर्योदयः अधुना प्रयुज्यमानवचश्च शत्रुहननानुकूलम् अभूद्, अहं च सपत्नहा शत्रूणां हन्ता भवामि। मणिधारकोऽहं येन प्रकारेण एषाम् शत्रुसम्बन्धिनां पूर्वम् आत्मनो बाधकानां वीराणां शत्रुभटानां जनस्य स्वकीयस्य परकीयस्य प्राणिजातस्य च विराजानि तथा इति। मणि-प्रभावात् शत्रुप्रभृतीनां सर्वेषां शासिता भवामि इति भावः, यद्वा उक्तगुणोपेतः सन् अहं वीराणां जनस्य च यथा विराजानि, हे मणे त्वत्प्रभावात् तथा भूयासम् इति।

अथर्व-राष्ट्राभिवर्धनसूक्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—अथर्ववेदस्य कस्मिन् अध्याये राष्ट्राभिवर्धनसूक्तं प्राप्यते?
   उत्तरम्—1.29अध्याये।
2. **प्रश्नः**—राष्ट्राभिवर्धनसूक्तस्य ऋषेः नाम किम्?
   उत्तरम्— वशिष्ठः।
3. **प्रश्नः**—राष्ट्राभिवर्धनसूक्तस्य देवता नाम किम्?
   उत्तरम्—अभीवर्तमणिः।
4. **प्रश्नः**—राष्ट्राभिवर्धनसूक्ते कति मन्त्राः सन्ति?
   उत्तरम्— 6 षट् मन्त्राः।
5. **प्रश्नः**—राष्ट्राभिवर्धनसूक्ते प्रयुक्तः छन्दविशेषः कः?
   उत्तरम्—अनुष्टुप्।
6. **प्रश्नः**—शत्रुप्रभृतीनां सर्वेषां शासिता केन भवति?
   उत्तरम्—मणिना।
7. **प्रश्नः**—लोककल्याणाय राष्ट्रहिताय वा कः अभिलषति?
   उत्तरम्—ऋषिः।

15. अथर्व-कालसूक्तम् (19.53) इत्यस्य विवेचनं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

काले मनः काले प्राणः काले नाम समाहितम्।
कालेन सर्वा नन्दन्त्यागतेन प्रजा इमाः॥7॥
काले तपः काले ज्येष्ठं काले ब्रह्म समाहितम्।
कालो ह सर्वस्येश्वरो यः पितासीत् प्रजापतेः॥8॥
तेनेषितं तेन जातं तदु तस्मिन् प्रतिष्ठितम्।
कालो ह ब्रह्म भूत्वा बिभर्ति परमेष्ठिनम्॥9॥

दश-मन्त्रात्मकस्य अस्य सूक्तस्य ऋषिः, कालः देवता, त्रिष्टुप् बृहती अनुष्टुप् छन्दांसि। अस्मिन् सूक्ते भृगुः कालस्य स्वरूपम् उपस्थापयन् आह-कालस्वरूपः अश्व एव विश्वरथस्य वाहकः अस्ति। स कालः सप्तरश्मिः सहस्राक्षश्चास्ति। अन्यच्च स जरारहितः पराक्रमयुक्तश्चास्ति। भुवनान्येव तस्य विश्वरथस्य चक्राः सन्ति। इत्थं स कालः सप्तचक्राणां वाहकः अश्वरूपः अस्ति। स काल एव भुवनान्युद्भावयति गतिशीलं च करोति। विज्ञैः सः कालः अहर्निशात्मकः आकाशवत् निर्लेपश्च उच्यते। स काल एव सृष्टेः प्राक् सर्वेषां पितृरूपेण स्थितः आसीत्, इदानीं च स एव पुत्ररूपेण दरीदृश्यते। तस्मात् कालादुत्तमः नास्ति अन्यत् तेजः। कालो अमूं द्युलोकम् अजनयत्। तस्माद् कालादेव भूमिः, भूत-भविष्यत्-वर्तमान-कालः सर्वे प्रणिनश्च समुत्पन्नाः। मनः, प्राणाः सर्वाणि नामानि च अस्मिन्नेव काले समाहितानि सन्ति। ते सर्वे यथासमयम् समुद्भूय प्रजारञ्जनं कुर्वन्ति। अन्यच्च तपःशक्तिः, ज्येष्ठत्वं ब्रह्मविद्या च सर्वम् काले एव समाहितम् ओतप्रोतञ्च। अतः काल एव सर्वेश्वरः। इत्थं कालप्रेरितं जगदिदं कालादेव समुद्भूय काले एव प्रतिष्ठितमस्ति।

(15) अथर्व-कालसूक्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—अथर्व (19.53) इति क्रमांकस्य सूक्तस्य नाम किम्?
   उत्तरम्— कालसूक्तम्।
2. **प्रश्नः**—अथर्व (19.53) इति क्रमांकस्य कालसूक्तस्य ऋषेः नाम किम्?
   उत्तरम्—भृगुः।
3. **प्रश्नः**— अथर्व (19.53) इति क्रमांकस्य कालसूक्तस्य देवता नाम किम्?
   उत्तरम्—कालः।

4. **प्रश्नः**— अश्वरूपस्य कालस्य रथे कति चक्राः सन्ति?
   उत्तरम्—07 सप्तचक्राः।
5. **प्रश्नः**— भूते पिता, भविष्ये पुत्रश्च इति कस्य भवति?
   उत्तरम्—कालस्य।
6. **प्रश्नः**— ब्रह्मविद्या कुत्र समाहिता भवति?
   उत्तरम्—काले।
7. **प्रश्नः**—कालो ह ब्रह्म भूत्वा कं बिभर्ति?
   उत्तरम्—परमेष्ठिनम्।
8. **प्रश्नः**— कालसूक्तं कति मन्त्रात्मकः?
   उत्तरम्—दश-मन्त्रात्मकः।
9. **प्रश्नः**— विश्वरथस्य वाहकः कः?
   उत्तरम्—कालस्वरूपः अश्वः।
10. **प्रश्नः**—काले मनः काले प्राणः काले नाम समाहितम्। कालेन सर्वा नन्दन्त्यागतेन प्रजा इमाः॥ इति मन्त्रेण सम्बद्धसूक्तं किम्?
    उत्तरम्—कालसूक्तम्।
11. **प्रश्नः**— कालसूक्तस्य छन्द-नाम किम्?
    उत्तरम्—त्रिष्टुप्-बृहती-अनुष्टुप् छन्दांसि।
12. **प्रश्नः**—भुवनान्युद्भावयति गतिशीलं च कः करोति?
    उत्तरम्—कालः।
13. **प्रश्नः**—सृष्टेः प्राक् सर्वेषां पितृरूपेण स्थितः कः आसीत्?
    उत्तरम्—कालः।
14. **प्रश्नः**—भूमिः, भूत-भविष्यत्-वर्तमान-कालाः सर्वे प्रणिनश्च कस्मात् समुत्पन्नाः?
    उत्तरम्—कालादेव।
15. **प्रश्नः**—मनः, प्राणाः सर्वाणि नामानि च कस्मिन् समाहितानि सन्ति?
    उत्तरम्—काले।
16. **प्रश्नः**—तपःशक्तिः, ज्येष्ठत्वं ब्रह्मविद्या च सर्वं कस्मिन् समाहितम्?
    उत्तरम्—काले एव।

3
वैदिकसाहित्ये ब्राह्मण आरण्यक ग्रन्थानां विवेचन भेदं तत्सम्बन्धि वस्तुनिष्ठ प्रश्नोत्तरणि

(I) (Code-25)

(क) ब्राह्मणस्य (ब्राह्मणग्रन्थानां)

परिचयः—मन्त्राणां व्याख्याविनियोगविधायकाः गद्यात्मकाः यज्ञस्वरूपप्रतिपादकाः ब्राह्मणग्रन्थाः। तद्यथा वाचस्पतिमिश्रेण-

नैरुक्तं यस्य मन्त्रस्य विनियोगः प्रयोजनम्।
प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते॥

ब्राह्मणग्रन्थाः वैज्ञानिकाध्यात्मिकाधिभौतिकरहस्यानां मीमांसकाः विश्वकोषरूपाः इति बलदेवोपाध्यायाः। "**ब्राह्मणं वेदसंघाते वेदभागे नपुंसकम्**" इति वचनानुसारेण ग्रन्थार्थे ब्राह्मणशब्दस्य प्रयोगः नपुंसकलिङ्गे एव भवति। व्याख्यानात्मकग्रन्थानां नाम ब्राह्मणमस्ति। यज्ञीयकर्मकाण्डस्य व्याख्याविवरणयोः सम्पादनं ब्राह्मणग्रन्थानां मुख्यो विषयः। गृहस्थानां कृते कस्य यज्ञस्य विधानं केन मन्त्रेण कदा कथञ्च कर्तव्यमिति ब्राह्मणग्रन्थानां विषयः। विषयाः विधिः- विनियोग-हेतु-अर्थवाद-निरुक्तिः-आख्यानरूपाः। संहितानां पृथग् पृथग्ब्राह्मणग्रन्थाः यथा-

1. ऋग्वेदसंहितायाः-ऐतरेयकौषीतकी। 2. यजुर्वेदस्य-शतपथतैतिरीयौ ब्राह्मणग्रन्थौ। 3. सामसंहितायाः-पंचविंशषड्विंशाद्भुतमन्त्रछान्दोग्यञ्च। 4. अथर्वस्य-गोपथब्राह्मणम्।

(ख) ब्राह्मणग्रन्थानां वैशिष्ट्यम्-ब्राह्मणग्रन्थेषु नानाविधानां यज्ञानाम्, विविधानुष्ठानानाम्, आख्यानानाम्, कर्ममीमांसादिविविधशास्त्राणामुदयस्य कथायाः विवेचनं सम्प्राप्यते। ब्राह्मणानां मुख्यो विषयो विधिरस्ति। कर्मणां विधानं कदा स्यात्? केन प्रकारेण तत् कर्म कृतं भवेत्? तेषां कर्मणा साधनानि कानि सन्ति? तेषां यज्ञानाम् अधिकारिणः के भवन्ति? इत्यादिकानां प्रश्नानां समाधानं ब्राह्मणग्रन्थेषु एव समुपलभ्यते। यज्ञानाम् अधिकार्यादिविषये प्रतीयमानस्य विरोधस्य उपशमनमपि ब्राह्मणग्रन्थेष्वेव दृश्यते। ब्राह्मणग्रन्थानां प्रतिपाद्यस्य विधेः दशप्रकाराः भवन्ति। कथ्यते यथा- -।

हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना॥
उपमानं दशैते तु विधयो ब्राह्मणस्य तु॥

मन्त्राणां व्याख्याविनियोगविधायकानां यज्ञस्वरूप-प्रतिपादकानां ब्राह्मणग्रन्थानां वैशिष्ट्यं यत्-

1. गृहस्थाश्रमे नानाविधयज्ञानां कर्मोपासनादीनाञ्च विधानं केन मन्त्रेण, कया रीत्या, कदा कथञ्च कर्तव्यमिति वर्णनं विशिष्टतया कृतम्।
2. कर्मकाण्डपरम्परायाः व्यवस्था ज्ञापयति।
3. विधिविनियोगहेतुरर्थवादनिरुक्ति-आख्यानञ्चेति ब्राह्मण-ग्रन्थानां प्रतिपाद्यविषयाः।
4. यज्ञाद्यनुष्ठानप्रसङ्गे यज्ञविभाजनपुरःसरं यज्ञफलस्वरूप-होतृनियमानां यज्ञे निषिद्धकर्मणाञ्च विवेचकत्वेन मीमांसारूपाः ब्राह्मणग्रन्थाः।
5. पञ्चमहायज्ञानां सत्यपरोपकारवर्णाश्रमधर्मादीनां भारतीय-संस्कृतस्य मूलतत्त्वानां सूक्ष्मेक्षिकया प्रतिपादकाः। अत एव मन्त्रब्राह्मणयोर्वेद नामधेयमिति आपस्तम्बः।

इत्थं अलसस्वभावानां पुरुषाणां स्वरसतः प्रवृत्त्यनुदयात् तत्सम्पादनार्थं विशिष्य: ब्राह्मणसाहित्याः। धार्मिक-सामाजिकस्थितेरपि ज्ञापकाः।

विधिः-यज्ञस्य अनुष्ठानोपदेश एव विधिः। यस्मिन् यज्ञाय, तत्सम्बद्धकर्मकलापाय नियमाः निर्दिष्यन्ते। 'यज्ञो वै श्रेष्ठतमं कर्म' अस्य उद्घोषो विधिभागस्य प्राणः। वेदमन्त्राणां विश्लेषणं वैदिकपदानां व्याख्यानमपि ब्राह्मणानां विधिभागस्य मुख्यो विषयोऽस्ति।

अर्थवादः-अर्थवादे निन्दायाः तथा प्रशंसाया उभयोरेव निवेशो दृश्यते। ब्राह्मणग्रन्थेषु निषिद्धानाममेध्यानां प्रयोगः अनेकत्र समुपलभ्यते, यथा-'अमेध्या वै माषाः" "वहिष् पावमान" इति। प्रशंसात्मकानि वाक्यान्यपि सर्वत्र उपलभ्यन्ते एव, यथा-"वायुर्वै क्षेपिष्ठा देवता" इति।

हेतुः-येन हेतुना कर्मकाण्डविधिः विशेषरूपेण सम्पन्नो भवति, तस्य हेतोः निर्देशः एव हेतुः इत्यभिधीयते। ब्राह्मणग्रन्थेषु यज्ञीयविधिविधाननिमित्तकसमुचितकारणस्य अपि निर्देशो विस्तारेण क्रियते। अनेन प्रकारेण हेतुवचनेन द्वारा यजमानाः अनुष्ठानस्य कारणेन परिचिताः भवन्ति, तेन च जायते तेषु यजमानेषु समधिकायाः श्रद्धायाः समुत्पत्तिः।

विनियोगविधिः-अंगप्रधानसम्बन्धबोधको विधिः विनियोगविधिः। यथा-'दध्ना जुहोति' इति। ज्ञातव्यमस्ति यत् मन्त्राणां विनियोगस्य प्रथमावतारो ब्राह्मणग्रन्थेषु समुपलभ्यते। 'स नः पवस्व शङ्गवे' इत्यस्य मन्त्रस्य विनियोगः पशूनां रोगनिवृत्तये भवति।

(ग) शतपथब्राह्मणस्य परिचयः-शुक्लयजुर्वेदस्य काण्वमाध्यन्दिनशाखयोः शतपथब्राह्मणं ब्राह्मणग्रन्थेषु विशालतमं विशिष्टञ्चास्ति। शतपथब्राह्मणे सम्पूर्णानां यज्ञयागादीनां समग्रं वर्णनमुपलभ्यते यदन्यब्राह्मणग्रन्थेषु दुर्लभमस्ति। अस्य रचयितारः याज्ञवल्क्यर्षयः इति स्वीक्रियते। शतपथब्राह्मणे परिमाणदृष्ट्या 100 अध्यायाः 14 काण्डानि 68 प्रपाठकाः 6806 कण्डिकाश्च सन्ति, तथापि शाखाभेदात् क्रमभेदः दृश्यते। सामान्यतया शतपथब्राह्मणे दर्शपौर्ण-मासाग्निहोत्रचातुर्मासस्य वाजपेयराजसूयादिसर्वविधयागानां साङ्गोपाङ्गं सविधं विवेचनमेव अस्य प्रतिपाद्यविषयः।

महाभारतस्यानेकानामुपाख्यानानामुपजीव्यत्वेन कालक्रमे वर्णने च अस्यैतिहासिकसाहित्यिकञ्च महत्त्वं वरीवर्ति। शतपथब्राह्मणे भाष्यत्रयं समुपलभ्यते—हरिस्वामिकृतः, सायणकृतः कवीन्द्रसरस्वतीकृतश्च। अस्मिन् 12000 ऋचः, 8000यजुः 4000 साममन्त्राश्च सन्ति। अस्यैवान्ते बृहदारण्यकोपनिषद् वर्तते।

(घ) शतपथब्राह्मणस्य वैशिष्ट्यम्-शुक्लयजुर्वेदस्य काण्वमाध्यन्दिनशाखयोः शतपथब्राह्मणं ब्राह्मणसाहित्ये धार्मिकैतिहासिकसाहित्यिकदृष्ट्या च विशिष्टं स्थानं भजते।

1. सर्वेषां यागानां संस्काराणाञ्च वर्णक्रमानुसारं सविधं साङ्गोपाङ्गं विवेचनं ब्राह्मणेऽस्मिन् समुपलभ्यते।
2. यज्ञविभाजनपुरस्सरं तत्फलस्वरूपस्य होतृनियमाणाञ्च निषेधमुखेन विधिमुखेन च वर्णनं समुपलभ्यते।
3. रामकद्रुसुपर्णादीनां कालक्रमानुसारवर्णनं प्राप्यते; अतः ऐतिहासिकं महत्त्वम्।
4. महाभारतस्यानेकेनामुपाख्यानानामुपजीव्यत्वेन साहित्यिकदृष्ट्यापि वैशिष्ट्यम्।
5. वर्णक्रमानुसारं कर्मणां विभाजकत्वेन आचारविचारव्यवहाराणां नियामकत्वेन सामाजिकं सांस्कृतिकञ्च महत्त्वम्।

ब्राह्मणोचिताख्यायिकानामपि यत्र-तत्र समावेशः, येन यासिकशुष्कवर्णनमपि रोचकं प्रतीयते।

(ङ) वाङ्मनस आख्यानम्-शतपथब्राह्मणे (1.4.5.8-13) संवादरूपेण निरूपितं वाङ्मनस् विषयक-

माख्यानमस्ति। एकदा वाङ्मनसोर्मध्ये विवादः अभूत्। तदा मन उवाच—अहमेव त्वच्छ्रेयोऽस्मि यतः यदहं जानामि, तदेव त्वं भणसि। यद् अहं न जानामि तद् विषयं त्वं वक्तुं न शक्नोसि। एवं मे अनुकरणशीला त्वं मत्तः श्रेयः कथं भविष्यसि। एतत् श्रुत्वा वाग् उवाच, अहम् एव त्वच्छ्रेयोऽस्मि यतः यद्वै त्वं वेत्थ तद् अहमेव विज्ञापयामि। श्रेष्ठताप्रमाणाय ते प्रजापतिं प्रति प्रश्नमेयतुः। स प्रजापतिः मनसः एव अनु उवाच, मन एव त्वच्छ्रेयो, मनसः अनुवर्त्मा त्वमेवासि। अनुगमनकर्ता तु लघुः पापीयान् एव भवति। एवं प्रजापतेः मुखात् प्रतिकूलं निर्णयं श्रुत्वा सा उद्विग्ना वाणी गर्भं त्यक्तवती प्रजापतिम् उवाच अहं तुभ्यं हविर्द्व्यनेत्री न भविष्यामि, अपितु ते अहव्यवाट् एव भूयासम्, यतः त्वया अहं निन्दिता विनिपातिताऽस्मि। तस्मात् यत्किञ्च प्राजापत्यं यज्ञे क्रियते तद् उपांशु एव क्रियते। भगवत्याः वाग्देव्याः स एव गलितः पतितः गर्भः अत्रिः अभूत्। अत एव तस्माद् कालाद् आरभ्य अद्यावधिपर्यन्तं गलितगर्भा रजस्वला स्त्री आत्रेयी इति उच्यते। इति वाङ्मनस् विषयकमाख्यानम्।

(च) पञ्चमहायज्ञाः-वैदिकसाहित्ये पञ्चमहायज्ञानां (ब्रह्म-पितृ-देव-भूत-नृ) महत्त्वपूर्णं स्थानमस्ति। स्मृतिग्रन्थानां वर्णनमस्ति यत् प्रत्येकं गृहस्थं प्रति पञ्चमहायज्ञानाम् अनुष्ठानम् आवश्यकम् अनिवार्यं च वर्तते। मनुस्मृत्यनुसारं चुल्लीपेषणीकण्डनी-उपस्कर-उदकादि-विषयानां पापानां नोदनार्थं पञ्चमहायज्ञानाम् अनुष्ठानं न केवलं प्रामुख्यं भजते; अपितु अनिवार्यं च वर्तते। यथोच्यते मनुना-

> **अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।**
> **होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्।।**
> (मनुस्मृते-3/70)

ब्रह्म-पितृ-देव-भूत-नृ इति पञ्चमहायज्ञेषु 1. प्रथमम् अध्ययन-अध्यापनं ब्रह्मयज्ञः, 2. द्वितीयं तर्पणादिकं पितृयज्ञः, 3. तृतीयं देवाणां प्रीत्यर्थं कृतं होमादिकं देवयज्ञः, 4. चतुर्थं भूतबलिस्तु भूतयज्ञः, 5. अतिथिपूजनं नृयज्ञः इति कथ्यते।

यथाशक्ति पञ्चमहायज्ञानां ब्रह्म-पितृ-देव-भूत-नृयज्ञानां कर्ता गृहे वसन्नपि चुल्ली-पेषण्युपस्करादिजन्यैः पापैः न लिप्यते। एपद् विपरीतं तु जीवन्नपि गृहस्थः मृतक एव। यथोच्यते मनुना-

> **पञ्चैतान्यो महायज्ञान्न हापयति शक्तितः।**
> **स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते।।**
> (मनुस्मृते-3/71)

> **देवताऽतिथिभृत्यानां पितॄणामात्मनश्च यः।**
> **न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति।।**
> (मनुस्मृते-3/72)

(छ) गृह्यसूत्रोपयोगिता-गृह्यसूत्रेषु षोडशसंस्काराणाम्, पञ्चमहायज्ञानाम्, सप्तपाकयज्ञानाम्, मुहूर्तादिविविध-विधानामुत्सवानां विधिवत् वर्णनं कृतं स्यात्। येषु प्रमुखगृह्यसूत्राणि-आश्वलायनः, पारस्करः, शांखायनः, बौद्धायनः, आपस्तम्बः, मानवहिरण्यकेशी, भारद्वाजः, काठकः, लौगाक्षिः, गोभिलः, जैमिनीयः, खदिरः सन्ति। प्रत्येकगृह्यसूत्राणि अपि कोऽपि वेदविशेषेण सम्बद्धोऽस्ति। गृह्यसूत्रेषु त्रैवर्णिकैरवश्यानुष्ठेयानामनुष्ठानानां यागविशेषाणां वर्णनं विद्यते। षोडशसंस्काराणां विशिष्टं वर्णनं च वर्तते। वेदानां कल्पसूत्राणाम् आध्यात्मिकविचारधारायाः वर्णनं वर्तते।

गृह्यसूत्रेषु त्रैवर्णिकवैदिकवाङ्मये आश्वलायनगृह्यसूत्रस्य पारस्करगृह्यसूत्रस्य च प्रसिद्धिर्वर्तते। आश्वलायनगृह्यसूत्रे कारिकाबद्धमपि प्राप्यते। शाङ्खायनगृह्यसूत्रे षडध्यायाः सन्ति। तेषु विषयाणां समावेशः यथा-विविधसंस्काराणां वर्णनं, गृहनिर्माण-गृहप्रवेशयोश्च यथास्थानं वर्णनं विद्यते। कौषीतकिगृह्यसूत्रस्य च रचना शाम्भव्येन कृताऽस्ति। इदं सूत्रं शाम्भव्यगृह्यसूत्रनाम्नाऽपि प्रख्यातमस्ति। अस्मिन् गृह्यसूत्रे पञ्चाध्यायाः सन्ति। येषु विवाहसंस्कारः, कृषिकर्मणः, शिशोः प्रारम्भिकसंस्काराणां सामान्यपरिचयः, श्राद्धवर्णनादिकञ्च विद्यते।

पारस्कर-गृह्यसूत्रमिति नाम्ना जगति सुविख्यातमस्ति। अस्य त्रिषु काण्डेषु प्रथमे काण्डे आवसथ्यानेयाधानम्, विवाहकार्यम्, गर्भाधानादारभ्यान्नप्राशनं यावत् वर्णितमस्ति। द्वितीयकाण्डे चूडाकरणोपनयन-समावर्तन-पञ्चमहायज्ञ-श्रवणकर्म-सीता-यज्ञादीनां महत्त्वपूर्णं विवरणमस्ति। अन्तिमे तृतीये काण्डे च श्राद्धकृत्यानन्तरम् अवकीर्णि-प्रायश्चित्तादीनां विविधविधानानां गूढं प्रतिपादनमस्ति।

(ज) दर्शपौर्णमासयज्ञः-वैदिकानां सप्तप्रमुखयागेषु दर्शपौर्णमासयागः अन्यतमः अस्ति। दर्शपौर्णमासयोः दर्शस्तु अमावस्यायां करणीयानां त्रयाणां यज्ञानां समन्वयम् अस्ति। इमे दर्शयागाः, अग्नि-इन्द्रप्रीत्यर्थकपुरोडाशयागौ स्तः। एतद् अतिरिक्तं पौर्णमासयागः तु पूर्णिमायां करणीयानां त्रयाणां यागानां सामूहिकं स्वरूपम् उपस्थापयति। इमे अष्टकपालपुरोडाशयागः, उपांशुयागः, एकादशकपाल-

पुरोडाशयागश्च विद्यन्ते। इत्थं अमावस्यायां त्रयाणां, पूर्णिमायां त्रयाणां, समन्वितं षण्णां यागानां स्वरूपमेव दर्शपौर्णमासयागः इत्यभिधीयते। परञ्च यागविधिः प्रतिपदायामेव सम्पद्यते। मध्यन्दिनशतपथस्य प्रथमकाण्डे एवं काण्वशतपथस्य द्वितीयकाण्डे दर्शपौर्णमासयागस्य विस्तृतविवेचनमुपलभ्यते।

(झ) शुनःशेपाख्यानम् (ऐतरेय ब्राह्मणस्य आख्यानम्)—इक्ष्वाकुवंशे हरिश्चन्द्रनामकः कश्चित् सन्तानविहीनः राजा आसीत्। यस्य शतभार्या आसीत्। सः वरुणदेवम् उपास्य पुत्रं प्राप्तवान्, वरुणेनाभिहितं च यद् उत्पन्नपुत्रस्य त्वयां मह्यं बलिः देयो इति। द्वादशवर्षीयो जातः हरिश्चन्द्रपुत्ररोहितः वनं जगाम। वचनभंगदोषकारणात् हरिश्चन्द्रः वरुणस्य कोपेन जलोदररोगग्रस्तो बभूव। यदा यदा रोहितः वनात् गृहे गन्तुमना बभूव, तदा तदा इन्द्रः तस्मै "चरैवेति चरैवेति" उपदिदेश। अन्ते हरिश्चन्द्रः अजीगर्तनामकब्राह्मणस्य मध्यमं ब्राह्मणबालकं 'शुनःशेपं' बलिकर्मणे क्रीतवान्। हरिश्चन्द्रेण आयोजिते यागे यूपे संयतं शुनःशेपं शतगोमूल्येन यदा हन्तुमुद्यतो बभूव अजीगर्तः, तदा महर्षिविश्वामित्रः शुनःशेपाय गाथात्रयम् उपादिशत्। यासां पाठमात्रेण वरुणो बलिं विनैव प्रसन्नो बभूव। तदनन्तरं विश्वामित्रः शुन-शेपं पोष्यपुत्रं कृत्वा स्वकीयेषु शतसंख्यकेषु पुत्रेषु एकपञ्चाशत्तमं पुत्रं चकार। महर्षिविश्वामित्रस्य अनेन व्यवहारेण तस्माद् अधो विद्यमानाः रुष्टः पुत्राः तस्य शापेन आन्ध्र-पुलिन्द-म्लेच्छादिकाः भूत्वा तत्र तत्र निवसन्ति स्म। अस्मिन् प्रसङ्गे पुत्रविक्रयी अजीगर्तं प्रति समीचीना उक्तिः–

यः सकृत्पापकं कुर्यात्कुर्यादेनत्ततोऽपरम्।
नापागाः शौद्रान्यायादसंधेयं त्वया कृतम्।।

(ऐ.ब्रा.आ.5)

(ञ) आरण्यकाणां सामान्यपरिचयः–अरण्ये पाठ्यानां यज्ञस्याध्यात्मिक- स्वरूपप्रतिपादकानां मन्त्राणां संग्रहभागः आरण्यकम्। मन्त्रब्राह्मणात्मकवेदस्य यस्मिन्नंशे प्राणविद्यायाः प्रतीको- पासनायाश्च विषयः प्रतिपाद्यते तदारण्यकम्। वस्तुतः शान्तैकान्तनिर्जनवनेषु निवसन्तो ब्रह्मविद्याविषयकज्ञानस्य साक्षात्कारः ऋषिभिः कृतः तत्संग्रह एव आरण्यकम्। अरण्ये एवाध्ययनादेतत् आरण्यकमिति प्रोच्यते, प्रोक्तञ्च–

अरण्येऽध्ययनादेतदारण्यकमितीर्यते ।
अरण्ये तदधीयेतेत्येवं वाक्यं प्रचक्षते।।

वानप्रस्थानां यावन्तो यज्ञमहाव्रतोपासनादयः तेषां वर्णनमारण्यकेष्वेव प्राप्यते, अत एव प्रोक्तमस्ति–

आरण्यकञ्च वेदेभ्यः औषधिभ्योऽमृतं यथा।

संहिताभेदात् पृथक् पृथक् आरण्यकग्रन्थाः सन्ति यथा–

ऋग्वेदस्य ऐतरेयशांखारण्यके प्रसिद्धे। शुक्लयजुर्वेदस्य बृहदारण्यकं कृष्णस्य च तैत्तरीयमैत्रायणी प्रसिद्धे। सामवेदस्य तवलकाराख्यक-छान्दोग्यारण्यके। अथर्ववेदस्य न किमप्यारण्यकम्। एतेषामारण्यकग्रन्थानां प्रतिपाद्यविषयः आत्मतत्त्वस्य मीमांसा अस्ति, अस्यां दिशायां प्राणविद्या प्रतीकोपासना च आरण्यकग्रन्थानां महनीया विशेषता अस्ति। दार्शनिकविचाराणां तथ्यानां वाऽपि व्याख्या आरण्यकग्रन्थेषु यत्र-तत्र समुपलभ्यते। सामान्यतया मन्त्र-ब्राह्मणात्मकस्य वेदस्य यस्मिन् अंशे प्राणविद्यायाः प्रतीकोपासनायाश्च विशिष्टं वर्णनम् अस्ति। आरण्यकग्रन्थानां मुख्यप्रतिपाद्यविषयः प्राणविद्या एवास्ति। तैत्तिरीयारण्यके ऐतरेयारण्यके च प्राणविद्या सविशेषेण प्रतिपादिताऽस्ति। अस्मिन् संसारे सर्वे प्राणिनः प्राणाद् एव शरीरं धारयन्ति। यथा ऐतरेयारण्यके–

सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः
प्राण एव। प्राण ऋच इत्येव विद्यात्।।

(ऐतरेयारण्यकम्-222/10)

(ट) आरण्यकानां वैशिष्ट्यम्–अरण्ये शान्त-वातावरणे पाठ्यानां यज्ञस्वरूपप्रतिपादकानां मन्त्राणां समूहो आरण्यकं विशिष्टं स्थानं वैदिकसाहित्ये भजते।

1. वानप्रस्थस्य सर्वेषां यज्ञानां कर्मोपासनादीनाञ्च विधानं केन मन्त्रेण, कदा, कया रीत्या कथं कर्तव्यमिति प्रतिपाद्यते।
2. प्राणविद्याप्रतीकोपासनादिविषयाणां प्रतिपादकत्वेन आध्यात्मकाण्डं प्रथितम्।
3. उपनिषदां तत्त्वानां प्रारंभिकस्वरूपं आरण्यकेष्वेव विद्यते।
4. यज्ञस्य श्रेष्ठत्वं प्रतिपादयन् संन्यासिभ्यः व्रतशौचाचारनियमानां विशिष्टं विवेचनम्। अत एव महाभारतस्य आदिपर्वे प्रोक्तम्–

नवनीतं यथा दध्नो, मलयाच्चन्दनं यथा।
आरण्यकञ्च वेदेभ्यः औषधिभ्योऽमृतं यथा।

इत्थं धार्मिक-आध्यात्मिक-सांस्कृतिकदृष्ट्या च सारभूताः आरण्यकग्रन्थाः। आरण्यके कर्मकाण्ड-

ज्ञानकाण्डयोः चर्चा वर्तते। आरण्यकग्रन्थः उपनिषदि प्रारम्भिकं रूपं वर्तते।

(J) (Code-25) वैकल्पिक वर्ग ब्राह्मण प्रतिपाद्यविषया
(ठ) वैकल्पिक-वर्ग-ब्राह्मणम्- (Brahmanam)
1. प्रतिपाद्यविषयं वैशिष्ट्यं वा

तैत्तिरीयसंहितायां, पाणिनीयव्याकरणे, निरुक्ते, शतपथब्राह्मणे, ऐतरेयब्राह्मणे च ब्राह्मणशब्दस्य ग्रन्थस्यार्थे प्रयोगः समुपलभ्यते। यज्ञीयकर्मकाण्डस्य व्याख्याविवरणयोः सम्पादनं ब्राह्मणग्रन्थानां मुख्यो विषयः। यथोक्तं विद्वद्वरेण वाचस्पतिमिश्रेण–

नैरुक्तं यस्य मन्त्रस्य विनियोगः प्रयोजनम्।
प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते।।

वेदस्य शेषभूताः यज्ञयागादिमीमांसकाः ब्राह्मणग्रन्थाः प्रायेण गद्यात्मका एव भवन्ति। एतेषां ब्राह्मणग्रन्थानां विषया ऋक्-यजु:-सामार्थेभ्यः नितरां भिद्यते। ब्राह्मणग्रन्थानां मुख्यो विषयः विधिः अस्ति। कर्मणां विधानम्? कर्मस्य कर्तव्यता? कर्मणां साधनानि? यज्ञानां अधिकारिणः? इत्यादिकानां प्रश्नानां समाधानं ब्राह्मणग्रन्थेषु दृश्यते। ब्राह्मणग्रन्थानां प्रतिपाद्यस्य विधेः दश प्रकाराः भवन्ति। यथोक्तम्–

हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना।।
उपमानं दशैते तु विधयो ब्राह्मणस्य तु।।

ऋग्वेदस्य द्वे ब्राह्मणे स्तः, 1. ऐतरेयब्राह्मणम्, 2. शांखायनब्राह्मणम्। ब्राह्मणेऽस्मिन् अष्टौ पंजिकाः सन्ति, तासु पंजिकासु पञ्च पञ्च अध्यायाः सन्ति। इदं सम्पूर्णं ब्राह्मणसाहित्यं गद्यात्मकमेवास्ति।

ब्राह्मणानां प्रतिपाद्यविषयस्य विवरणम्

विधिः–यज्ञस्य अनुष्ठानोपदेश एव विधिरित्यभिधीयते। अज्ञातार्थज्ञापको वेदभागो विधिः। तत्र विधिश्चतुर्विधः, 1. उत्पत्तिविधिः, 2. विनियोगविधिः, 3. अधिकारविधिः, 4. प्रयोगविधिश्चेति।

1. **उत्पत्तिविधिः**–तत्र कर्मस्वरूपमात्रबोधको विधिः उत्पत्तिविधिः। यथा-'अग्निहोत्रं जुहोति' इति।
2. **विनियोगविधिः**-अंगप्रधानसम्बन्धबोधको विधिः विनियोगविधिः। यथा–'दध्ना जुहोति' इति। ज्ञातव्यमस्ति यत् मन्त्राणां विनियोगस्य प्रथमावतारो ब्राह्मणग्रन्थेषु समुपलभ्यते। 'स नः पवस्व शङ्गवे' इत्यस्य मन्त्रस्य विनियोगः पशूनां रोगनिवृत्तये भवति।
3. **अधिकारविधिः**–कर्मजन्यफलस्वाम्यवबोधको विधिः अधिकारविधिः।
4. **प्रयोगविधिः**-प्रयोगप्रांशुभावबोधको विधिः प्रयोगविधिः।
5. **नियमविधिः**–नानासाधन-साध्य-क्रियायाम् एकसाधन-प्राप्तौ अप्राप्तस्य अपरसाधनस्य प्रापको विधिः नियमविधिः। यथा–'यजेत स्वर्गकामः' इत्यादि।
6. **परिसंख्याविधिः**–उभयोः युगपत्प्राप्तौ इतरव्यावृत्तिपरो विधिः परिसंख्याविधिः। यथा–'पंच-पंचनखाः भक्ष्याः' इति।
7. **हेतुः**–येन हेतुना कर्मकाण्डविधिः विशेषरूपेण सम्पन्नो भवति, तस्य हेतोः निर्देश एव हेतुः इत्यभिधीयते।
8. **निरुक्तिः**–ब्राह्मणग्रन्थेषु यत्र-तत्र समागतानां विशिष्टानां पदानां निर्वचनमपि कृतमस्ति। निर्वचनमिदं मार्मिकं वैज्ञानिकञ्च भवति।
9. **अर्थवादः**–यज्ञेषु मेध्यपदार्थानां निन्दा एव अर्थवाद इति कथ्यते। यथा–'अमेध्या वै माषाः' इति। 'वायुर्वै क्षेपिष्ठा देवता' इति।

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भूतो नृयज्ञोऽतिथिपूजनम्।।

(मनु. 3/70)

(ड) विधिः–यज्ञस्य अनुष्ठानोपदेश एव विधिरित्यभिधीयते। अज्ञातार्थज्ञापको वेदभागो विधिः। यथा बहिष्पवमानाय अध्वर्यु उद्गातादिपञ्चानाम् ऋत्विजां प्रसर्पणस्य विधानम्। तस्मिन् प्रसर्पणकर्मणि ऋत्विजः पिपीलिकापंक्तिवत् शनैः शनैः परस्परमन्योन्यस्य कक्षं गृहीत्वा प्रचलन्ति। ते तूष्णीं भूत्वा प्रसर्पणं कुर्वन्ति। तत्र अध्वर्यु प्रस्तोता-उद्गाता-प्रतिहर्ता-ब्रह्माख्याः ऋत्विजः पंक्तिबद्धास्सन्तो प्रसर्पन्ति। पंक्तिभंगे सति प्रत्यवायो जायते। शतपथब्राह्मणं तु अनेकेषां विधीनाम् उपदेशं करोति। अत्र प्रथमे काण्डे दर्शपौर्णमासविधेः वर्णनमस्ति। पौर्णमास्यां दीक्षितो यजमान आहवनीय-गार्हपत्याग्न्योर्मध्ये पूर्वस्यां दिशि उपविश्य जलस्य स्पर्शं करोति। यतः जलं मेध्यं भवति, यज्ञाय उपयोगी पदार्थो भवति इत्यर्थः। मिथ्यावादी जनः यज्ञाय नोपयोगी भवति, अत एव जलस्पर्शेनासौ पापमपहाय मेध्यो भवति। जलस्पर्शेन सः पवित्रो भूत्वा दीक्षितो भवति, अत एव जलस्पर्शं करोति। यथोच्यते शतपथब्राह्मणे–

अमेध्यो वै पुरुषो यदनृतं वदति तेन पूतिरन्तरतः। मेध्यो वै आपः। पवित्रं वा आपः। पवित्रपूतो व्रतमुपायानीति तस्माद् वा अप उपस्पृशति।। इति

(ढ) विधेः प्रकारः–अज्ञातार्थज्ञापको वेदभागो विधिः। तत्र विधिश्चतुर्विधः–1. उत्पत्तिविधिः, 2. विनियोगविधिः, 3. अधिकारविधिः, 4. प्रयोगविधिश्चेति।

1. **उत्पत्तिविधिः**–कर्मस्वरूपमात्रबोधको विधिः उत्पत्तिविधिः, यथा 'अग्निहोत्रं जुहोति' इति। अत्र विधौ कर्मणः करणत्वेन अन्वयः, अग्निहोत्रहोमेन इष्टं भावयेद् इति। न तु होमं कुर्यादिति साध्यत्वेन। अग्निहोत्रशब्दस्य तु तत्प्रख्यन्यायेन नामधेयत्वं नैव भवति, रूपाश्रवणेऽप्यस्य उत्पत्तिविधित्वात्। अन्यथा रूपश्रवणात् 'दध्ना जुहोति' इति अयमेव उत्पत्तिविधिः स्यात्। उत्पत्तिविधौ कर्मणा करणत्वेन अन्वयो भवति।

2. **विनियोगविधिः**–अङ्गप्रधानसम्बन्धबोधको विधिः विनियोगविधिः। यथा– 'दध्ना जुहोति' इति। स हि तृतीयया प्रतिपन्नाङ्गभावस्य दध्नो होमसम्बन्धं विधत्ते 'दध्ना होमं भावयेद्' इति। विनियोगविधेः सहकारिभूतानि षट्प्रमाणानि–1. श्रुतिः–निरपेक्षो रवः श्रुतिः। 2. लिङ्गः–शब्दसामर्थ्यं लिङ्गम्। 3. वाक्यं–समभिव्याहारो वाक्यम्। 4. प्रकरणं–उभयाकाङ्क्षा प्रकरणम्। 5. स्थानं–देशसामान्यं स्थानम्। 6. समाख्या–यौगिकः शब्दः लौकिकी वैदिकी च द्विविधो भवति। एतत् सहकारित्वेन अनेन विधिना अंगत्वं परोद्देशप्रवृत्त-कृतिसाध्यत्वरूपं पारार्थ्यापरपर्यायं ज्ञाप्यते। मन्त्राणां विनियोगस्य प्रथमप्रयोगो ब्राह्मणग्रन्थेषु समुपलभ्यते।

3. **अधिकारविधिः**–कर्मजन्यफलस्वाम्यबोधको विधिः अधिकारविधिः। कर्मजन्यफलस्वाम्यं कर्मजन्यफलभोक्तृत्वम्। यथा–'यजेत स्वर्गकामः'। अत्र स्वर्गम् उद्दिश्य यज्ञं विदधता अनेन स्वर्गकामस्य यज्ञजन्यफलभोक्तृत्वं प्रतिपाद्यते।

4. **प्रयोगविधिः**–प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। स च अंगवाक्यैकवाक्यतापन्नः प्रधानविधिः एव। प्रयोगविधिः एव स्वविधेयप्रयोगप्राशुभावसिद्ध्यर्थं नियतं क्रमम् अपि पदार्थविशेषणतया विधत्ते। एतदर्थं अंगानां क्रमबोधको विधिः प्रयोगविधिः इत्यपि लक्षणम्। प्रयोगविधेः अपि षट् प्रमाणानि सन्ति–1. श्रुतिः–क्रमपरवचनं श्रुतिः। 2. अर्थः–प्रयोजनवशेन क्रमनिर्णयो नाम अर्थक्रमः। 3. पाठः–पदार्थबोधकवाक्यानां क्रमः पाठक्रमः। 4. स्थानम्–स्थानं नाम उपस्थितिः। 5. मुख्यः–प्रधानक्रमेण अंगानां क्रमः मुख्यक्रमः। 6. प्रवृत्याख्यम्–सहप्रयुज्यमानेषु प्रधानेषु संनिपातिनाम् अंगानाम् आवृत्त्यानुष्ठाने कर्त्तव्ये हि द्वितीयादि-पदार्थानां प्रथमानुष्ठितपदार्थक्रमाद् यः क्रमः स प्रवृत्तिक्रमः।

(ण) अग्निहोत्रम्–ब्राह्मणसाहित्ये सप्तहविःयज्ञेषु अग्निहोत्रयागं द्वितीये स्थाने परिगण्यते। अनेन यज्ञेन प्रतिदिनं प्रातःकाले सायंकाले च सूर्यस्य अग्नेश्च उपासना क्रियते। अस्मिन् यज्ञे मुख्यतः दुग्धस्य, गौणतः यवागू- तण्डुल-दधि-घृतानां च आहुतिः दीयते। यः पुरुषः तथ्यमिदं ज्ञात्वा अग्निहोत्रं करोति, सः ब्रह्मवर्चस्वी भवति। यज्ञोऽयं पाकयज्ञेषु परिगणितमस्ति। शतपथब्राह्मणे अग्निहोत्रस्य स्वरूपं सुस्पष्टरूपेण वर्णितमस्ति, यथा–यज्ञानां यदग्निहोत्रं शीर्षम् (14/3/1/29)। शुक्लयजुर्वेदस्य मन्त्रेण प्रातःसायंकालयोः आहुतीनां विधानं वर्णितमस्ति–

अग्निर्ज्योतिरग्निः स्वाहा। सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा। अग्निर्वर्चो ज्योतिर्वचः स्वाहा। सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा। ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा। (यजुर्वेद–3/9)

(त) अग्निष्टोमयज्ञः–ब्राह्मणसाहित्ये अग्निष्टोमयागस्तु सोमयागस्य प्रतिनिधिरूपेण ऐतरेयब्राह्मणे वर्णितमस्ति। अस्य ब्राह्मणग्रन्थस्य द्वितीयपंचिकायां अहोरात्रात्मकस्य अग्निष्टोम-यज्ञस्य विपुलं वर्णनं दृश्यते। अस्मिन् यज्ञे प्रातःकाले सन्धिस्तोत्राणां पाठविधानं वर्तते। ताण्ड्यब्राह्मणेऽपि द्वादशाह-अग्निष्टोमयज्ञस्य विस्तृतं वर्णनं समुपलभ्यते।

(थ) संहिताभिः ब्राह्मणग्रन्थानां सम्बद्धता–संस्कृतवाङ्मये वेदानां स्थानं सर्वोपरि वर्तते। संहिता–ब्राह्मण–आरण्यक–उपनिषदभिप्रायेण वेदस्य चतुर्विभागाः विद्यन्ते। एतेषु चतुर्षु विभागेषु छन्दोबद्धा मन्त्ररूपो वैदिकदेवता स्तुतिपरको वैदिकमहर्षिभिः साक्षात्कृतो मुख्यभागः संहिताशब्देन व्यवह्रियते। ऋक्संहितायां स्तुतिपरकमन्त्राणां संग्रहः, यजुःसंहितायां याजकीयानां मन्त्राणां संग्रहः, सामसंहितायां गायनपरकमन्त्राणां संग्रहः, अथर्वसंहितायां विविधविधविघ्नविनाशकमन्त्राणां संग्रहः विद्यते। वेदस्य शेषभूताः यज्ञयागादिमीमांसकाः ब्राह्मणग्रन्थाः प्रायेण गद्यात्मका एव भवन्ति। एतेषां ब्राह्मणग्रन्थानां विषयाः ऋक्-यजुष्-साम-अथर्वभ्यः नितरां [illegible]। ब्राह्मणानां मुख्यो विषयो विधिः वर्तते। तैत्तिरीयसंहितायां पाणिनिव्याकरणे, निरुक्ते,

शतपथब्राह्मणे, ऐतरेयब्राह्मणे च ब्राह्मणशब्दस्य ग्रन्थस्यार्थे प्रयोगः समुपलभ्यते। यज्ञीयकर्मकाण्डस्य व्याख्या-विवरणयोः सम्पादनं ब्राह्मणग्रन्थानां मुख्यो विषयः। प्रायः सिद्धान्तस्तु अयमस्ति यत् कस्यापि वैदिकसंहितायाः याः शाखाः भविष्यन्ति, ताः एव ब्राह्मणग्रन्थानां सम्बद्धा भविष्यन्ति। यथा–

1. ऋक्संहितायैः सम्बद्धब्राह्मणग्रन्थानां नामानि–ब्राह्मणानि–द्वौ ब्राह्मणग्रन्थौ 1. ऐतरेयः 2. कौषीतकी (शांखायन) च। द्वयोः ब्राह्मणग्रन्थयोः परस्परं घनिष्ठसम्बन्धः वर्तते। द्वयोः ब्राह्मणग्रन्थयोः स्थाने-स्थाने च विषयस्य आलोचना कृता स्यात्। एकब्राह्मणे द्वितीयब्राह्मणस्य विपरीतार्थप्रकटनं कृतं स्यात्। अतः भाष्यकारेषु गम्भीरमतभेदो वर्तते। यथा–"नैको ऋषिर्यस्य वचः प्रमाणम्"।

2. यजुःसंहितायैः सम्बद्धब्राह्मणग्रन्थानां नामानि–ब्राह्मणानि–शतपथब्राह्मणम् (द्वयोः) (माध्यन्दिनकाण्वयोः) अन्ये च तैत्तिरीय-मैत्रायणी-कठ-कपिष्ठल-ब्राह्मणानि। कृष्णयजुर्वेदस्य तैत्तिरीयब्राह्मणग्रन्थो वर्तते।

3. सामसंहितायैः ब्राह्मणानि-पञ्च ब्राह्मणग्रन्थाः–1. ताण्ड्यब्राह्मणः, 2. षड्विंशब्राह्मणः, 3. दैवतब्राह्मणः, 4. मन्त्रब्राह्मणः, 5. आर्षेयब्राह्मणः, 6. सामविधानब्राह्मणः, 7. संहितोपनिषद् ब्राह्मणः, 8. वंशब्राह्मणः, 9. जैमिनीब्राह्मणग्रन्थाः सन्ति।

4. अथर्वसंहितायैः ब्राह्मणम्–एकमेव गोपथब्राह्मणम्।

(द) व्याकरणं वैदिक-व्याख्यापद्धतिश्च

1. **पदपाठः**–"सुप्तिङन्तं पदम्" परिभाषितं महर्षि-पाणिनिना पदम्। स्वर-वर्णादीनां सन्धिं विच्छेद्य वैदिकमन्त्राणां सस्वरपाठ एव भवति पदपाठः। यथा–

यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत्।
यस्य शुष्माद्रोदसी अभ्यसेतां, नृम्णस्य मह्ना स जनास इन्द्रः।।

अस्य मन्त्रस्य पदपाठः निम्नलिखितमस्ति–

यः। जातः। एव। प्रथमः। मनस्वान्। देवः। देवान्। क्रतुना। परिऽअभूषयत्। यस्यय। शुष्मात्। रोदसी इति। अभ्यसेताम्। नृम्णस्य। मह्ना। सः। जनासः इन्द्रः।।

रमध्वम्। मे। वचसे। सोमयायज्ञ ऋतावरी रूपं मुहूर्तम्। एवैः।

प्र। सिन्धुम्। अच्छ। बृहती। मनीषा। अवस्युः। अह्वे। कुशिकस्य। सूनुः।

संहितापाठे समुपलब्धानां छान्दसदीर्घाणां ह्रस्वप्रयोगः पदपाठस्य नियमः–

रक्षा च नो (ऋग्वेद- (1/35/11)

रक्ष। च। न।। इति पदपाठः इत्यादयः।

2. **उदात्तानुदात्तस्वरितस्वराः**–उदात्तानुदात्तस्वरितानां वैदिकस्वराणां सत्ता, वैदिकभाषायाः महती विशेषताऽस्ति। अद्यपर्यन्तमुपलब्धेषु सर्वेषु संहिताग्रन्थेषु स्वरचिह्नाः संलग्नाः सन्ति। स्वराणां त्रिविधभेदाः भवन्ति। यथोक्तम्–

उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः।
आयाम-विश्रम्भाक्षेपैस्त उच्यन्ते स्वरास्त्रयः।।

1. **उदात्तः**–1. **उच्चैरुदात्तः (1.2.29)** ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसञ्ज्ञः स्यात्। अर्थात् यस्य स्वरस्य उच्चारणं स्वनिर्धारितस्थानस्य उर्ध्वभागे (उच्चैः) भवति, सः उदात्तः। ऋग्यजुषथर्ववेदेषु उदात्तस्तु सर्वत्र चिह्नरहित एव भवति। यथा–इन्द्रः, अत्र चिह्नरहितः।

उदात्तस्वरेण सम्बद्धाः तथ्याः–

(क) प्रतिपदे एकः उदात्तस्वरः भवति।

(ख) बहुव्रीहिसमासे प्रथमपदः उदात्तस्वरस्तु भवति।

(ग) आदौ प्रयुक्तः क्रियापदः उदात्तस्वरः भवति।

(घ) द्वन्द्वसमासे उत्तरपदः उदात्तस्वरः भवति।

(ङ) मुख्यवाक्येषु उपसर्गाः उदात्तस्वराः भवन्ति।

(च) उदात्त-अनुदात्त-स्वरितैः सह उदात्तस्य सन्धिः उदात्त एव भवति।

2. **नीचैरनुदात्तः (1.2.3)** ताल्वादिषु सभागेषु स्थानेष्वधोभागनिष्पन्नोऽजनुदात्तसञ्ज्ञः स्यात्। अर्थात् यस्य स्वरस्य उच्चारणं स्वनिर्धारितस्थानस्य अधोभागे (नीचैः) भवति सः अनुदात्तः। ऋग्यजुषथर्ववेदेषु अनुदात्तस्वरज्ञानाय वर्णस्य वर्णानां वा अधस्तले एका संकेतरेखा भवति। उदाहरणार्थं-बृहती। अवस्युः। अ-ह अ व अनुदात्तस्वराः सन्ति।

3. **समाहारः स्वरितः (1.2.31)** उदात्तानुदात्तत्वे

वर्णधर्मौ समाह्रियेते यत्र सोऽच् स्वरितसञ्ज्ञः स्यात्। अर्थात् येषु स्वरेषु उदात्त-अनुदात्तयोः गुणानां मेलनं भवति सः स्वरितः। स्वरितस्यादितोऽर्धमुदात्तं बोध्यम्। स्वरिते पूर्वभागस्य उदात्तत्वे सति परः शेषः उत्तरभागः अनुदात्तः। ऋग्यजुषथर्ववेदेषु स्वरितवर्णस्य उपरि एका लम्बवत् रेखा भवति। यथा-इन्द्रः। अत्र द्रह्र स्वरितवर्णः अस्ति। यथा उक्तं प्रातिशाख्ये-

अनुदात्तः परः शेषः स उदात्तश्रुतिर्न चेत्।
उदात्तं वोच्यते किञ्चित्स्वरितं वाक्षरं परम्॥

वैदिकस्वर-रेखांकनम्–



अचामष्टादशभेदानां विवरणमाध्यमेन अवबोधनम्

अ इ उ ऋ लृ	अ इ उ ऋ ए ऐ ओ औ	अ इ उ ऋ लृ ए ओ ऐ औ
ह्रस्वभेदाः	**दीर्घभेदाः**	**प्लुतभेदाः**
1. उदात्तानुनासिकः	7. उदात्तानुनासिकः	13. उदात्तानुनासिकः
2. उदात्ताननुनासिकः	8. उदात्ताननुनासिकः	14. उदात्ताननुनासिकः
3. अनुदात्तानुनासिकः	9. अनुदात्तानुनासिकः	15. अनुदात्तानुनासिकः
4. अनुदात्ताननुनासिकः	10. अनुदात्ताननुनासिकः	16. अनुदात्ताननुनासिकः
5. स्वरितानुनासिकः	11. स्वरितानुनासिकः	17. स्वरितानुनासिकः
6. स्वरिताननुनासिकः	12. स्वरिताननुनासिकः	18. स्वरिताननुनासिकः

(ध) वैदिक-लौकिकसंस्कृतयोः भेदः–वैदिक-लौकिकसंस्कृतयोर्मध्ये यद्यपि बहवः भेदाः सन्ति, तथाप्यत्र प्रमुखाः भेदाः निरूप्यन्ते–

(क) वैदिकसंस्कृते ळ, ᳵ क जिह्वामूलीयः, ᳶ प उपध्मानीयः च विशिष्टाः ध्वनयः वर्तन्ते, लौकिकसंस्कृते एतेषां ध्वन्याभावः।

(ख) वैदिकसंस्कृते उदात्तानुदात्तस्वरितानां प्रयोगो भवति, किन्तु लौकिकसंस्कृते न भवति।

(ग) वैदिकसंस्कृते स्वरप्रयोगः संगीतात्मको वर्तते, किन्तु लौकिकसंस्कृते बलाघातात्मकोऽस्ति।

(घ) वैदिकसंस्कृते 'ळ्ह' 'ळ्ह' इत्यस्य स्वरस्य प्रयोगो भवति, लौकिकसंस्कृते न भवति।

(ङ) वैदिकसंस्कृते प्लुतस्वराः प्रचलन्ति, लौकिक-संस्कृते सम्प्रति न भवति।

(च) सन्धिनियमः वैदिकसंस्कृते ऐच्छिकः, लौकिक-संस्कृते आवश्यकाः सन्ति।

(छ) लेट्-लकारस्य प्रयोगः वैदिकसंस्कृते भवति, लौकिकसंस्कृते न भवति।

(ज) उपसर्गाणां प्रयोगः वैदिकसंस्कृते स्वतन्त्ररूपेण भवति, लौकिकसंस्कृते न भवति।

(झ) लिट्-लकारस्य प्रयोगः वैदिकसंस्कृते वर्तमानकाले, लौकिकसंस्कृते परोक्षे भवति।

(न) प्राचीना अर्वाचीनाश्च वैदिकव्याख्या–पद्धतिः

(क) प्राचीनव्याख्याकारः सायणः–वैदिकसाहित्ये वेदमन्त्राणां सर्वप्रथमं व्याख्या ब्राह्मण-आंरण्यक-उपनिषत्सु उपलब्धा भवन्ति। सायणाचार्यस्तु वैदिकसम्प्रदायस्य यथार्थवेत्तासीत्। वेदानामर्थनिर्णये अद्यापि सायणभाष्यमेव प्रमाणरूपेण स्वीक्रियते। सायणः वेदवेत्ता तैत्तिरीयशाखाध्यायी आन्ध्रब्राह्मणः आसीत्। सायणाचार्यः विजयनगरसाम्राज्ञः बुक्कस्य हरिहरस्य च आमात्यः सेनानीश्चासीत्। अस्य समयः 1364.1387 बुक्कहरिहरकालः आसीत्। भारद्वाजगोत्रोत्पन्नस्य सायणस्य पितुर्नाम मायणः मातुश्च श्रीमती सती देवी। सायणस्य ज्येष्ठभ्राता विख्यातो दार्शनिकः, मीमांसकः, धर्मशास्त्रविद् माधवाचार्यः आसीत्। सायणस्य कनिष्ठभ्रातुर्नाम भोगनाथः आसीत्, असौ भोलानाथः प्रसिद्धकविः आसीत्। वैदिकसमुदायस्य यथार्थवेत्ता सायणः महाराजबुक्काज्ञया स्वज्येष्ठभ्रातुः माधवाचार्यस्याभिप्रेरणया वेदभाष्यरचनायां प्रवृत्तोऽभूत्। महाराजबुक्कस्य हरिहरस्य च कालात् चतुर्दशशताब्देरुत्तरार्द्ध एवास्य भाष्यरचनाकालः स्वीक्रियते। आचार्यसायणः वाजसनेयिसंहितां विहाय अन्यासु सर्वासु संहितासु प्रायशः अष्टब्राह्मणग्रन्थेषु च भाष्यं कृतवान्। सम्प्रति उपलब्धेषु वेदभाष्येषु सायणकृतभाष्यं सर्वतोप्रामाणिकम्।

शैली—भाष्यं भूमिकापूर्वम्, पुष्पिकायां समानः परिचयः, क्रमानुसारं वर्णनम्।

अन्यकृतयः—सुभाषितसुधानिधिः, प्रायश्चित्तसुधानिधिः, पुरुषार्थः, आयुर्वेदयज्ञतन्त्रः। अत एव केनचिदुक्तम्– "वेदार्थज्ञाने वस्तुतः सायणाचार्यः अन्धानां यष्टिरिवास्ति।" कैश्चित्तु एक एव भाष्यकर्ता सायणः इति स्वीकृतम्।

(ख) प्राचीनव्याख्याकारः यास्कः–षट्सु वेदाङ्गेषु निरुक्तं चतुर्थं स्थानं भजते। तच्च वेदपुरुषस्य श्रोत्रमुच्यते। निरुक्तकारो यास्कः तेषां वैदिकानां शब्दानां सविस्तरं विवेचनं करोति। निरुक्तं निरूपयन् सायणाचार्यो ऋग्वेदभाष्य-भूमिकायाम् आह–"अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्।" निरुक्तं वेदस्य अन्तर्भूतानि तत्त्वानि व्याकरोति। वेदागतकठिनशब्दसंग्रहरूपो निघण्टुग्रन्थश्चिरा- दागच्छति स्म। तत्रैव यास्केन तद् व्याख्याभूतं निरुक्तं विरचितम्। निघण्टवो वेदा एव न वेदाङ्गानि तद् व्याख्याभूतं यास्कप्रणीतं निरुक्तमेव वेदाङ्गमिति सम्प्रदायः। पाणिनेः प्राचीनोऽयं यास्कः। यास्कः वैदिकानां शब्दानां निर्वचनं करोति। निघण्टोः पञ्चानाम् अध्यायानां द्वादशाध्यायेषु व्याख्यां चकार यास्कः। वैदिकमन्त्राणां सार्थकतां प्रतिपादयन् निरुक्तकारः यास्कः लिखति, वेदाः वैदिकमन्त्राः वा सर्वथा सार्थकाः एव सन्ति।

(ग) प्राचीनव्याख्याकारः हलायुधः–सायणा-चार्यात्पूर्ववर्तिषु शुक्लयजुर्वेदीयकाण्वसंहितायां भाष्यकर्तृषु महत्त्वपूर्णं स्थानं भजन्ते हलायुधाचार्याः। अस्य भाष्यारंभेऽ-वलोकनेन एव ज्ञायते यदयं बंगप्रदेशस्य हिन्दुराज्ञः सुप्रसिद्धलक्ष्मणसेनस्य व्यवहारमण्डपे धर्माधिकारीति गौरवपूर्णपदे प्रतिष्ठितो आसीत्। बाल्ये एवायं राजपण्डितो अभवत्। तदनुसारेण त्रयोदशशताब्दीयः हलायुधः इति निर्णीयते। अस्य भाष्यस्य नाम ब्राह्मणसर्वस्वम्। हलायुधः निष्णातवैदिकविद्वान् आसीत्। वैदिकधर्मस्य साक्षान्मूर्तिरयं हलायुधः ब्राह्मणसर्वस्वमलिखत। हलायुधः शैवदर्शन-वेद-मीमांसा-आगमशास्त्रेषु पारङ्गतः।

अन्यकृतयः—1. ब्राह्मणसर्वस्वम्, 2. मीमांसासर्वस्वम्, 3. शैवसर्वस्वम्, 4. वैष्णवसर्वस्वम्, 5. पण्डितसर्वस्वम्।

(घ) उव्वटः–शुक्लयजुर्वेदस्य माध्यन्दिनसंहितायाः भाष्यकारः उव्वटः क्वचित् औवटनामधेयः काश्मीरिको वैदिक-विद्वान् आसीत्। जैयटगोत्रस्य वज्रटाख्यस्य दत्तकपुत्रोऽयमिति भोजसमकालिकः प्रतिपाद्यते, वस्तुतः ज्येष्ठभ्रातुः मम्मटस्य भोजराजादर्वाचीनत्वे सति उव्वटः सुतरां भोजकालिकः (1018) ईश्वीयः दशमशताब्द्याः सिद्ध्यति। उज्जयिन्यां वसता क्वचिच्च गुर्जरप्रदेशे आनन्दपुरे वसता भाष्यं लिखितमिति मतद्वयं प्रचलति। उव्वटकृतभाष्यनाम "मातृमोदः"।

अस्य भाष्यं लघ्वक्षरोऽपि सत् अतीवप्रामाणिकं प्रोज्ज्वलञ्चास्ति। माध्यन्दिनसंहितायाः अधिकृतविद्वानयम्। अस्य भाष्यावलोकनेन ज्ञायते यत् अयं नितान्तः प्रौढवैज्ञः आसीत्।

अन्यकृतयः—1. ऋक्प्रातिशाख्यटीका, 2. यजुःप्राति-शाख्यटीका, 3. ऋक्सर्वानुक्रमणीभाष्यम्, 4. ईशावास्यो-पनिषद्भाष्यञ्च।

(ङ) माधवाचार्यः–माधवनामधेयाः चत्वारो भाष्यकाराः। सायणभाष्यात्प्रागेव द्वित्राः सामसंहिताभाष्यकाराः, तेषु प्रथमः माधवः। अस्य कालः षष्ठशताब्द्यां स्वीक्रियते।

माधवाचार्यस्य पितुर्नाम नारायणः। साम(वेद)संहितायाः खण्डयोः छन्दर्चिकोत्तरार्चिकयोरुपरि विवरणनामकं भाष्यं कृतम्। अद्यावधि भाष्यमिदं अमुद्रितावस्थायामेवास्ति। छन्दर्चिकोपरि कृतं भाष्यं छान्दसिकविवरणं, उत्तरविवरणभाष्यं तु उत्तरार्चिकभाष्यं नाम।

सामविवरणभाष्ये मङ्गलाचरणे त्रयीमयाय त्रिगुणात्मने नमः इति पद्यं बाणभट्टस्य कादम्बर्यां श्लोकांशे उपलब्धत्वात् ज्ञायते यत् बाणभट्टस्य पूजकाचार्योऽयम्। बाणभट्टकालः सप्तमशताब्दीमिति कृत्वा षष्ठशताब्द्यां माधवोऽभूदिति। सामभाष्ये स्वराणां तद्भेदानां गेयानां मन्त्राणाञ्चातीवमनोहरतया वर्णनं कृतं माधवेन। माधवोऽयं ऋग्वेदस्यापि महान् विद्वान् आसीत्।

(च) अर्वाचीनव्याख्याकारः महर्षिदयानन्दः–अयं महात्मा गुजरातप्रान्तान्तर्गत-टंकारानगरे 1824 ईश्वीये जनिं लेभे। पितुर्नाम कर्षणः माता च रुक्मिणी। वैराग्येण गृहं परित्यज्य पूर्णानन्दयते: संन्यासं गृहीत्वा "दयानन्दसरस्वती" इत्याख्यां जगाम। अनेन आर्यसमाजस्य स्थापना कृता, तत्र मूर्तिपूजा वेदविरुद्धा इति, किञ्च स्त्रीशूद्रौ नाधीयाताम् अस्य वाक्यस्य सारतामुपस्थाप्य स्त्रीणामपि वेदाध्ययनाध्यापनं व्यवस्थापितम्। मातृपितृश्राद्धतर्पणादिविधेरपि वेदविरुद्धत्वेन खण्डनं कृतम्।

कृतयः—सत्यार्थप्रकाशः, ऋग्वेदभाष्यम्, यजुर्वेदभाष्यम्, ऋग्वेदादिभाष्यभूमिका, संस्कारविधिः, गोकरुणानिधिः, व्यवहारभानुः, आर्याभिविनः। एतेषु सत्यार्थप्रकाशः प्रमुखः, यस्योपरि युधिष्ठिरमीमांसककृतो भाष्योऽपि समुपलभ्यते।

दयानन्देन प्रथमतया नवीनदृष्ट्या वेदानां भाष्यं कृतम्। एते संहिताभागस्यैव वेदत्वं स्वीकुर्वन्ति। महर्षिपदं अलङ्कृतस्य दयानन्दस्य मृत्युः 1883 ईश्वीये अभवत्। एतेषां ध्येयवाक्यं–

विश्वानि देव सवितर्दुरितानिपरासुव
यद्भद्रन्नन आसुव।

(छ) महर्षि-अरविन्दः–आधुनिकवेदव्याख्याकारेषु महर्षेः अरविन्दस्य विचारः सर्वथा प्रशंसनीया उपादेयाश्चास्ति। वेदमन्त्रेषु उच्चतमं, महत्तमं व्यापकं शाश्वतम् अपौरुषेयञ्च सत्यं निहितमिति महर्षेः मन्तव्यमस्ति। वेदमन्त्राः तु दिव्यस्रोतैः प्रस्फुरिताः प्रादुर्भूताः वा सन्ति। एतेषां मन्त्राणां द्रष्टारः ऋषिगणाः आध्यात्मिकशक्तिसम्पन्नाः गुह्यज्ञानयुक्ताश्च आसन्। यतः तत्र पर्यन्तं सर्वेषां सामान्यजनानां गतिः दृष्टिर्वा सम्भवा नास्ति। समाधिनिष्ठाः योगिनः ऋषय एव मन्त्राणां अर्थप्रकटने समर्थाः सन्ति। सिद्धपुरुषाणां वाणी एव वैदिकमन्त्राः। या वाणी आध्यात्मिकशक्तिसम्पन्ना वर्तते।

(ज) आधुनिकवेदव्याख्याकारः प्रो.एच.एच. विल्सनः–प्रो.एच.एच.विल्सनः ऋग्वेदस्य प्रथम-आंग्ल-अनुवादकः अस्ति। चिकित्साविज्ञानस्य उच्चशिक्षां लब्ध्वा विल्सनः 'ईस्ट-इण्डिया-कम्पनी' इत्यस्याः संस्थायाः टकसाले पर्यवेक्षकरूपेण भारतवर्षं सम्प्राप्य स्वसौभाग्यम् अनुशंसन्तम् अत्रैव ऋग्वेदस्य प्रथम-आंग्ल-अनुवादं चकार। यस्य ग्रन्थस्य प्रकाशनं 1850 खीष्टाब्दे अभवत्।

(झ) आधुनिकवेदव्याख्याकारः प्रो.ओल्डेनवर्ग–वैदिकव्याख्याकारेषु ओल्डेनवर्गस्य विशिष्टं महत्त्वपूर्णं च स्थानं विद्यते। अनेन जर्मनविद्वद्वरेण ऋग्वेदस्योपरि स्वकीयं मार्मिकं विवेचनात्मकञ्च भाष्यं कृतम्, यत् 1909-1912 खीष्टाब्दे वर्लिनदेशात् प्रकाशितञ्च।

(I-J) ब्राह्मण-आरण्यकविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—मन्त्र-ब्राह्मणयोः का संज्ञा?
उत्तरम्—वेदः।

2. **प्रश्नः**—ब्राह्मणसाहित्यम् कस्य पर्यायम् अस्ति?
उत्तरम्—वेदस्य।

3. **प्रश्नः**—ऋग्वेदस्य 'ऋत्विक्' कोऽस्ति?
उत्तरम्—होता।

4. **प्रश्नः**—वेदानां कौ द्वौ भेदौ?
उत्तरम्— संहिता ब्राह्मणञ्च (वेदो हि मन्त्रब्राह्मणभेदेन द्विविधः।)

5. **प्रश्नः**—संहिता कां कथ्यते?
उत्तरम्— वेदस्य मन्त्रभागं संहिता कथ्यते।

6. **प्रश्नः**—आरण्यकब्राह्मणयोर्मध्ये को भेदः?
उत्तरम्—आरण्यके संहितापरकविवेचनमस्ति, तथा ब्राह्मणे संहितापरकभाष्यम्।

7. **प्रश्नः**—ब्राह्मणग्रन्थानां कियती संख्या अस्ति?
उत्तरम्—13 त्रयोदश।

8. **प्रश्नः**—ब्राह्मणग्रन्थानां प्रमुखः प्रतिपाद्यविषयः कः?
उत्तरम्—विधिः।

9. **प्रश्नः**—ब्राह्मणग्रन्थानां प्रतिपाद्यस्य विधेः दशप्रकारा के भवन्ति?
उत्तरम्—हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः। परक्रिया पुराकल्पो व्यवधारणकल्पना। उपमानं दशैते तु विधयो ब्राह्मणस्य तु।।

10. **प्रश्नः**—अज्ञातार्थज्ञापको वेदभागः कः?
उत्तरम्— विधिः।

11. **प्रश्नः**—अंगप्रधानसम्बन्धबोधको विधिः कः?
उत्तरम्—विनियोगविधिः।

12. **प्रश्नः**—कर्मस्वरूपमात्रबोधको विधिः कः?
उत्तरम्—उत्पत्तिविधिः।

13. **प्रश्नः**—कर्मजन्यफलस्वाम्यबोधको विधिः कः?
उत्तरम्—अधिकारविधिः।

14. **प्रश्नः**—प्रयोगप्राशुभावबोधको विधिः कः?
उत्तरम्—प्रयोगविधिः।

15. **प्रश्नः**—पक्षे अप्राप्तस्य प्रापको विधिः कः?
उत्तरम्—नियमविधिः।

16. **प्रश्नः**—"पञ्च-पञ्चनखाः भक्ष्याः" इत्यत्र कः विधिः?
उत्तरम्—परिसंख्याविधिः।

17. **प्रश्नः**—विनियोगविधेः सहकारिभूतानि प्रमाणानि कति?
उत्तरम्—6 षट्।

18. **प्रश्नः**—विनियोगविधौ निरपेक्षो रवः कः?
उत्तरम्—श्रुतिः।

19. **प्रश्नः**—श्रुतिः कतिविधः?
उत्तरम्— 03 त्रयः।

20. **प्रश्नः**—"हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः" इति कस्य सम्बन्धः?
उत्तरम्—ब्राह्मणानाम्।

21. **प्रश्नः**—प्रयोगसमवेतार्थस्मारकाः काः?
उत्तरम्—मन्त्राः।

22. **प्रश्नः**—सप्त-प्रमुख-हविर्यागेषु द्वितीयः यागः कः?
उत्तरम्—अग्निहोत्रः।

23 **प्रश्नः**—"यज्ञानाम् यदग्निहोत्रम् शीर्षम्" इति कुतः उद्धृतः?
उत्तरम्—शतपथब्राह्मणात्।

24. **प्रश्नः**—ब्राह्मणानां कति प्रतिपाद्यविषयाः सन्ति?
उत्तरम्—10 दश।

25. **प्रश्नः**—ऋग्वेदसंहितायाः कौ ब्राह्मणग्रन्थौ?
उत्तरम्—ऐतेरयकौषीतकी।

26. **प्रश्नः**—यजुर्वेदस्य कौ ब्राह्मणग्रन्थौ?
उत्तरम्—शतपथतैत्तिरीयौ ब्राह्मणग्रन्थौ।

27. **प्रश्नः**—अथर्वस्य कः ब्राह्मणग्रन्थः?
उत्तरम्—गोपथब्राह्मणम्।

28. **प्रश्नः**—ऋग्वैदिक-ब्राह्मणग्रन्थः कः?
उत्तरम्—ऐतेरयब्राह्मणम्।

29. **प्रश्नः**—कृष्णयजुर्वेदीय-ब्राह्मणग्रन्थः कः?
उत्तरम्—कपिष्ठलब्राह्मणम्।

30. **प्रश्नः**—सामवेदीय-ब्राह्मणग्रन्थः कः?
उत्तरम्— छान्दोग्यब्राह्मणम्।

31. **प्रश्नः**—सामवेदस्य ब्राह्मणग्रन्थः कोऽस्ति?
उत्तरम्—मन्त्रब्राह्मणम्।

32. **प्रश्नः**—शांखायनब्राह्मण-सम्बद्धः वेदविशेषः कः?
उत्तरम्—ऋग्वेदः।

33. **प्रश्नः**—कस्मिन् यागे औदुम्बर-वृक्षस्य शाखायाः उच्छ्रयणं भवति?
उत्तरम्—अग्निष्टोमयागे।

34. **प्रश्नः**—शावरभाष्यानुसारेण ब्राह्मणग्रन्थानां प्रतिपाद्यविषयाः कतिविधयः?
उत्तरम्—(10) दश।

35. **प्रश्नः**—ऐतेरयब्राह्मणे कति अध्यायाः विद्यन्ते?
उत्तरम्— (40) चत्वारिंशत्।

36. **प्रश्नः**—'चरैवेति' इति वाक्यांशेन सम्बद्धः ग्रन्थः कः?
उत्तरम्— ऐतेरयब्राह्मणम्।

37. **प्रश्नः**—कौषीतकिब्राह्मणे कति अध्यायाः सन्ति?
उत्तरम्— (30) त्रिंशतिः।

38. **प्रश्नः**—राजसूययागः शतपथब्राह्मणस्य कस्मिन् काण्डे उपलभ्यते?
उत्तरम्— पंचमकाण्डे।

39. **प्रश्नः**—ताण्ड्यमहाब्राह्मणस्य प्रमुखप्रतिपाद्यविषयः कः?
उत्तरम्— सामः सोमयागश्च।

40. **प्रश्नः**—वत्स-मेधातिथेः आख्यायिका कस्मिन् ब्राह्मणे समुपवर्णिताऽस्ति?
उत्तरम्—ताण्ड्यमहाब्राह्मणे।

41. **प्रश्नः**—षड्विंशब्राह्मणे कति प्रपाठकाः सन्ति?
उत्तरम्— (05) पञ्च।

42. **प्रश्नः**—सामविधानब्राह्मणे कति प्रकरणानि सन्ति?
उत्तरम्— (03) त्रीणि।

43. **प्रश्नः**—आर्षेयब्राह्मणे कति प्रपाठकाः सन्ति?
उत्तरम्—(03) त्रयः।

44. **प्रश्नः**—गोपथब्राह्मणस्य विभागसंख्या अस्ति?
उत्तरम्— (02) द्वे।

45. **प्रश्नः**—सम्पूर्णे गोपथब्राह्मणे कतिं प्रपाठकाः सन्ति?
उत्तरम्— (11) एकादश।

46. **प्रश्नः**— दर्शपौर्णमासयज्ञः कस्मिन् ब्राह्मणे वर्णितमस्ति?
उत्तरम्—शतपथब्राह्मणे।

47. **प्रश्नः**—हरिश्चन्द्रोपाख्यानं कस्मिन् ब्राह्मणे उपलभ्यते?
उत्तरम्— ऐतरेयब्राह्मणे।

48. **प्रश्नः**— शुनःशेप-आख्यानं कस्मिन् ब्राह्मणे उपलभ्यते?
उत्तरम्— ऐतरेयब्राह्मणे।

49. **प्रश्नः**—शुनःशेप-आख्यानं कुत्र उपलभ्यते?
उत्तरम्—ऋग्वेदस्य प्रथममण्डले।

50. **प्रश्नः**— शुनःशेपाय गाथात्रयं कः उपदिशत्?
उत्तरम्—विश्वामित्रः।

51. **प्रश्नः**— ताण्ड्यब्राह्मणस्य (6.7.16) इति क्रमांकस्य विषयं किम्?
उत्तरम्—बहिष्पवमानः।

52. **प्रश्नः**—ब्राह्मणग्रन्थेषु किं निरूपितो भवति?
उत्तरम्—यज्ञानुष्ठानस्य पद्धत्या सह फलप्राप्तिः तत् विधेः निरूपणञ्च।

53. **प्रश्नः**— वाङ्मनस्-आख्यानं कस्मिन् ब्राह्मणे प्राप्यते?
उत्तरम्—शतपथब्राह्मणे।

54. **प्रश्नः**—वाङ्मनस्-आख्यानं कुत्र मिलति?
उत्तरम्—शतपथब्राह्मणे।

55. **प्रश्नः**—ब्राह्मणग्रन्थस्य का परिभाषा?
उत्तरम्—मन्त्राणां व्याख्याविनियोगविधायकाः गद्यात्मकाः यज्ञस्वरूपप्रतिपादकाः ब्राह्मणग्रन्थाः।

56. **प्रश्नः**—वैज्ञानिकाध्यात्मिकाधिभौतिकरहस्यानां मीमांसकाः विश्वकोषरूपाः इति कस्य वचनम्?
उत्तरम्— बलदेवोपाध्यायस्य।

57. **प्रश्नः**—नचिकेतसः पित्रा कृतः यागविशेषः कः?
उत्तरम्—विश्वजित् यागः।

58. **प्रश्नः**—अरण्ये पाठ्यानां यज्ञस्याध्यात्मिक-स्वरूपप्रतिपादकानां मन्त्राणां संग्रहभागः कः?
उत्तरम्—आरण्यकम्।

59. **प्रश्नः**—आरण्यकग्रन्थे प्रतिपाद्यविषयः कः?
उत्तरम्—मन्त्रब्राह्मणात्मकवेदस्य यस्मिन्नंशे प्राणविद्यायाः प्रतीकोपासनायाश्च।

60. **प्रश्नः**—ऋग्वेदस्य आरण्यकग्रन्थे के?
उत्तरम्—ऐतरेयशांखारण्यके।

61. **प्रश्नः**— शुक्लयजुर्वेदस्य आरण्यकग्रन्थः कः?
उत्तरम्—बृहदारण्यकम्।

62. **प्रश्नः**—कृष्णयजुर्वेदस्य आरण्यकग्रन्थे के?
उत्तरम्—तैत्तरीयमैत्रायणी प्रसिद्धे।

63. **प्रश्नः**—सामवेदस्य आरण्यकग्रन्थे के?
उत्तरम्—तवलकाराख्यक-छान्दोग्यारण्यके।

64. **प्रश्नः**—अथर्ववेदस्य आरण्यकग्रन्थः कः?
उत्तरम्—न किमप्यारण्यकम्।

65. **प्रश्नः**—उपनिषदि प्रारम्भिकं रूपं किम्?
उत्तरम्—आरण्यकम्।

66. **प्रश्नः**—'अरण्याध्ययनादेतद् आरण्यकम्' इति कस्येयमुक्तिः?
उत्तरम्—सायणस्य।

67. **प्रश्नः**—आरण्यकग्रन्थानां प्रतिपाद्यविषयः किमस्ति?
उत्तरम्— प्राणविद्या।

68. **प्रश्नः**—'सर्वा ऋचः सर्वे वेदाः सर्वे घोषः एकैव व्याहृतिः प्राण एव प्राण' इत्यनेन वाक्येन सम्बद्धः आरण्यक-ग्रन्थः कः?
उत्तरम्—ऐतरेयारण्यकम्।

69. **प्रश्नः**—'कश्यपः पश्यको भवति। यत् सर्वं पश्यतीति सौक्ष्म्यात्' वाक्यमिदं केनारण्यकेन सम्बद्धमस्ति?
उत्तरम्— तैत्तिरीयारण्यकेन।

70. **प्रश्नः**—तवलकारारण्यके कति अध्यायाः सन्ति?
उत्तरम्— (04) चत्वारः।

71. **प्रश्नः**—'अथा अर्धो वा एष आत्मनः यत् पत्नी' वाक्यमिदं केनारण्यकेन सम्बद्धमस्ति?
उत्तरम्— तैत्तिरीयारण्यकेन।

72. **प्रश्नः**—"आरण्यकम् च वेदेभ्य ओषधिभ्योऽमृतं यथा" कुतः उद्धृतम् अस्ति?
उत्तरम्—महाभारतात्।

73. **प्रश्नः**—कस्य वेदस्य कोऽपि आरण्यकग्रन्थः नास्ति?
उत्तरम्—अथर्ववेदस्य।

74. **प्रश्नः**—आरण्यकानाम् नामान्तरं किमस्ति?
उत्तरम्— रहस्यम्।

75. **प्रश्नः**—रहस्य इति शब्दस्य किम् अभिप्रायम्?
उत्तरम्—ब्रह्मविद्या।

76. **प्रश्नः**—"आरण्यम्' इत्यस्य विग्रहः कः?
उत्तरम्—अरण्ये भवः।

77. **प्रश्नः**—'वेदत्रयी' इत्यस्य संहिता कस्य घटकस्य प्रतीको भवति?
उत्तरम्—1. ऋग्वेदस्य शरीरम्, 2. यजुर्वेदस्य मनः, 3. सामवेदस्य बुद्धिः।

78. **प्रश्नः**—दर्शयागः कदा भवति?
उत्तरम्—अमावस्यायाम्।

79. **प्रश्नः**—पौर्णमासयज्ञः कदा भवति?
उत्तरम्—पूर्णिमायाम्।

80. **प्रश्नः**—दर्शपौर्णमासयज्ञः कति यागानां समुच्चयः वर्तते?
उत्तरम्—6 षट्।

81. **प्रश्नः**—दर्शपौर्णमासयज्ञः कति वर्षाणि यावत् प्रचलति?
उत्तरम्—30 त्रिंशतिः।

82. **प्रश्नः**— वाङ्मनसाख्याने कस्मिन् मध्ये विवादः सञ्जातः?
उत्तरम्—वाङ्मनसयोर्मध्ये।

83. **प्रश्नः**— कः पञ्चमहायज्ञः नास्ति?
उत्तरम्—गृहयज्ञः।

84. **प्रश्नः**— पञ्चमहायज्ञेषु के आगच्छन्ति?
उत्तरम्—ब्रह्म-पितृ-देव-भूत-नृ।

85. **प्रश्नः**— गृह्यसूत्रोपयोगिता का?
उत्तरम्—गृह्यसूत्रेषु षोडशसंस्काराणाम्, पञ्चमहायज्ञानाम्, सप्तपाकयज्ञानाम्, मुहूर्त्तादिविविध-विधानामुत्सवानां च।

86. **प्रश्नः**— दर्शपौर्णमासयागस्य विस्तृतविवेचनं कुत्र उपलभ्यते?
उत्तरम्—मध्यन्दिनशतपथस्य प्रथमकाण्डे एव काण्वशतपथस्य द्वितीयकाण्डे।

87. **प्रश्नः**—पदपाठस्य का परिभाषा?
उत्तरम्—"सुप्तिङन्तं पदम्" परिभाषितं महर्षिपाणिनिना पदम्। स्वर-वर्णादीनां सन्धिं विच्छेद्य वैदिकमन्त्राणां सस्वरपाठः एव।

88. **प्रश्नः**—'सहस्रऽशीर्षा पुरुषः' अस्य पदपाठः को भवति?
उत्तरम्—'सहस्रऽशीर्षा। पुरुषः।

89. **प्रश्नः**— उदात्तसंज्ञा केन सूत्रेण भवति?
उत्तरम्—'उच्चैरुदात्तः'।

90. **प्रश्नः**—अनुदात्तसंज्ञा केन सूत्रेण भवति?
उत्तरम्—'नीचैरनुदात्तः'।

91. **प्रश्नः**—स्वरितसंज्ञा केन सूत्रेण भवति?
उत्तरम्—'समाहारः स्वरितः'।

92. **प्रश्नः**—कस्मिन् उदात्तादि-स्वराणां प्रयोगो न विधीयते?
उत्तरम्—लौकिक-संस्कृते।

93. **प्रश्नः**—लौकिक-संस्कृते कस्य लकारस्य प्रयोगो न विधीयते?
उत्तरम्—लेट्-लकारस्य।

94. **प्रश्नः**—स्वराः कतिधा भवन्ति?
उत्तरम्—त्रिधा।

95. **प्रश्नः**—स्वरेषु कः नास्ति?
उत्तरम्—अनुनासिकः।

96. **प्रश्नः**—संहितापाठे ये प्रगृह्य-संज्ञका स्वरा भवन्ति, पदपाठे तै सह किं भवति?
उत्तरम्—इति करणम्।

97. **प्रश्नः**—यास्केन निरुक्ते केषां शब्दानां निर्वचनं कृतम्?
उत्तरम्—वैदिकानाम्।

98. **प्रश्नः**— सायणाचार्यः कः आसीत्?
उत्तरम्—विजयनगरसाम्राज्ञः बुक्कस्य हरिहरस्य च आमात्यः सेनानीश्चासीत्।

99. **प्रश्नः**—भारद्वाजगोत्रोत्पन्नस्य सायणस्य पितुर्नाम कः आसीत्?
उत्तरम्—मायणः।

100. **प्रश्नः**—सायणस्य मातुः नाम किम्?
उत्तरम्— श्रीमती सती देवी।

101. **प्रश्नः**—सायणः कस्याज्ञया वेदभाष्यरचनायां प्रवृत्तोऽभूत्?
उत्तरम्— महाराजबुक्काज्ञया।

102. **प्रश्नः**—उपलब्धेषु वेदभाष्येषु सर्वतोप्रामाणिकं भाष्यम्?
उत्तरम्— सायणकृतभाष्यम्।

103. **प्रश्नः**— अष्टब्राह्मणग्रन्थेषु भाष्यं कः कृतवान्?
उत्तरम्—सायणः कृतवान्।

104. **प्रश्नः**—सायणस्य ज्येष्ठभ्राता कः आसीत्?
उत्तरम्—विख्यातो दार्शनिकः, मीमांसकः, धर्मशास्त्रविद् माधवाचार्यः।

105. **प्रश्नः**—सायणस्य कनिष्ठभ्रातुर्नाम किम्?
उत्तरम्—प्रसिद्धकविः भोगनाथः।

106. **प्रश्नः**—आचार्यसायणाचार्येण लिखितानि वैदिक-भाष्याणि कानि?
उत्तरम्—वाजसनेयिसंहितां विहाय अन्यासु सर्वासु संहितासु प्रायशः अष्टब्राह्मणग्रन्थेषु च भाष्याणि।

107. **प्रश्नः**— माधव नामधेयाः कति भाष्यकाराः?
उत्तरम्— चत्वारो भाष्यकाराः।

108. **प्रश्नः**— माधवस्य कालः कः स्वीक्रियते?
उत्तरम्—षष्ठशताब्द्यां स्वीक्रियते।

109. **प्रश्नः**— माधवाचार्यस्य पितुर्नाम किमासीत्?
उत्तरम्—नारायणः।

110. **प्रश्नः**—सामभाष्ये स्वराणां तद्भेदानां गेयाणां मन्त्राणाञ्चातीवमनोहरतया वर्णनं केन कृतम्?
उत्तरम्—माधवेन कृतम्।

111. **प्रश्नः**—शुक्लयजुर्वेदस्य माध्यन्दिनसंहितायाः भाष्यकारः कः?
उत्तरम्— उव्वटः।

112. **प्रश्नः**— उव्वटकृतभाष्यनाम किम्?
उत्तरम्—"मातृमोदः"।

113. **प्रश्नः**— भोजकालिकः उव्वटस्य समयः कः?
उत्तरम्—(1018) ईश्वीयः दशमशताब्द्याः सिद्ध्यति।

114. **प्रश्नः**— उव्वटस्य अन्यकृतयः के सन्ति?
उत्तरम्—1. ऋक्प्रातिशाख्यटीका, 2. यजुःप्रातिशाख्यटीका, 3. ऋक्सर्वानुक्रमणीभाष्यम्, 4. ईशावास्योपनिषद्भाष्यञ्च।

115. **प्रश्नः**—शुक्लयजुर्वेदस्य माध्यन्दिनसंहितायाः भाष्यकारः कः?
उत्तरम्—महीधरः।

116. **प्रश्नः**—महीधरभाष्यकारस्य जन्मकालः कः?
उत्तरम्— षोडशशतकस्योत्तरार्द्धे (काश्यामभूदिति)।

117. **प्रश्नः**— माध्यन्दिनसंहितोपरि वेददीपनामकं भाष्यं कः कृतवान्?
उत्तरम्—महीधरः।

118. **प्रश्नः**—वेदानां तन्त्ररहस्यप्रतिपादकानां विषये मन्त्रमहोदधिः नामकः ग्रन्थः कः लिखितः?
उत्तरम्— महीधरः।

119. **प्रश्नः**— मन्त्रमहोदधिः नामकं ग्रन्थं कस्मिन् ईश्वीये महीधरेन लिखितम्?
उत्तरम्—1645 ईश्वीये लिखितम्।

120. **प्रश्नः**—महीधरः कस्य देवस्य उपासकः?
उत्तरम्—नृसिंहोपासकः।

121. **प्रश्नः**—महीधरस्य मातुर्नाम किम्?
उत्तरम्—लक्ष्मी।

122. **प्रश्नः**—महीधरस्य पितुर्नाम किम्?
उत्तरम्—नृसिंहः फतुहदृष्टे वा।

123. **प्रश्नः**— शुक्लयजुर्वेदीयकाण्वसंहितायाः भाष्यकारः कः?
उत्तरम्—हलायुधः।

124. **प्रश्नः**— हलायुधस्य समयः कः निर्णीयते?
उत्तरम्—त्रयोदशशताब्दीयः हलायुधः इति निर्णीयते।

125. **प्रश्नः**— हलायुधः केषां शास्त्राणां पारङ्गतः?
उत्तरम्—शैवदर्शन-वेद-मीमांसा-आगमशास्त्रेषु पारङ्गतः।

126. **प्रश्नः**— हलायुधस्य अन्यकृतयः के सन्ति?
उत्तरम्—1. ब्राह्मणसर्वस्वम्, 2. मीमांसासर्वस्वम्, 3. शैवसर्वस्वम्, 4. वैष्णवसर्वस्वम्, 5. पण्डितसर्वस्वम्।

127. **प्रश्नः**— दयानन्द सरस्वती महोदयस्य समय कः?
उत्तरम्—गुजरातप्रान्तान्तर्गत-टंकारानगरे 1824 ईश्वीये।

128. **प्रश्नः**— दयानन्द सरस्वती महोदयस्य पितुर्नाम किम्?
उत्तरम्— कर्षणः।

129. **प्रश्नः**— दयानन्द सरस्वती महोदयस्य मातुर्नाम किम्?
उत्तरम्—रुक्मिणी।

130. **प्रश्नः**— आर्यसमाजस्य स्थापना केन कृता?
उत्तरम्—दयानन्द सरस्वती महोदयेन।

131. **प्रश्नः**— सत्यार्थप्रकाशस्य रचनाकारः कः?
उत्तरम्—दयानन्दः।

132. **प्रश्नः**— दयानन्दस्य मृत्युः कदा अभवत्?
उत्तरम्— 1883 ईश्वीये अभवत्।

133. **प्रश्नः**— दयानन्दस्य ध्येयवाक्यं किम्?
उत्तरम्— "विश्वानि देव सवितर्दुरितानि परासुव यद्भद्रन्तन्न आसुव।

134. **प्रश्नः**—आधुनिकवेदव्याख्याकारेषु कस्य विचारः सर्वथा प्रशंसनीया उपादेयाश्चास्ति?
उत्तरम्—महर्षे अरविन्दस्य।

135. **प्रश्नः**—ऋग्वेदस्य प्रथम-आंग्ल-अनुवादकः कः?
उत्तरम्—प्रो.एच.एच.विल्सनः।

136. **प्रश्नः**— चिकित्साविज्ञानस्य उच्चशिक्षा केन लब्धा?
उत्तरम्— विल्सन महोदयेन।

137. **प्रश्नः**—ऋग्वेद-सायणभाष्यग्रन्थस्य प्रकाशनं कस्मिन् ख्रीष्टाब्दे अभवत्?
उत्तरम्—1850 ख्रीष्टाब्दे अभवत्।

4
उपनिषदि शास्त्रम्

(K) (Code-25) (क) उपनिषदां परिचयः (ख) उपनिषदां वैशिष्ट्यम् (ग) ईशावास्योपनिषद् (घ) प्रश्नोपनिषद् (ङ) केनोपनिषद् (च) तैत्तिरीयोपनिषद् (छ) कठोपनिषद् (ज) छान्दोग्योपनिषद् (झ) बृहदारण्यकोपनिषद् (ञ) ऐतरेयोपनिषद् (ट) मुण्डकोपनिषद् (ठ) श्वेताश्वतरोपनिषद् (ड) कौषीतक्युपनिषद् (ढ) मैत्रायणीयोपनिषद् (ण) उपनिषत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) उपनिषदां परिचयः- (Upanisad) उपनिषद् शब्दस्य निष्पत्तिः-उप + नि + सद् + क्विप् इति सद्लृ धातोः भवति। प्रस्थानत्रयीष्वाद्या उपनिषदो हि ब्रह्मबोधिकाः मोक्षसाधनभूताः पराविद्याः वेदस्यान्तरूपतया चरमभागत्वेन वेदान्तपर्यायाः ज्ञानकाण्डसंज्ञिकाश्च। उप समीपं निषद्यते प्राप्यते ब्रह्मविद्या अनया इत्युपनिषद्। उपनिषदः सर्वत्र विद्याविद्ययोः संभूत्यसंभूत्ययोः श्रेयस्प्रेयसोः ज्ञानकर्मणोः प्रवृत्तिनिवृत्तयोः एकत्व-अनेकत्वयोः द्वैताद्वैतयोश्च विवादग्रस्तस्थलेषु प्रज्ञां स्थापयन्ति। अतः माया-अविद्या-अध्यास एव उपनिषदां प्रतिपाद्य-विषयः। अत एव शङ्कराचार्येणोक्तं यत्-'या सकलाप्यनर्थकरीं सांसारिकक्रियां नाशयति मायारूपमविद्यां शिथिलयति ब्रह्मज्ञानञ्च प्रतिपादयति सा विद्योपनिषदिति।' एवं उपशब्दो हि सामीप्यमाह, नि शब्दश्च निश्चयार्थः, तस्मादैकात्म्यं निश्चितम्। सा विद्या सहेतुं संसारं सादयतीत्युपनिषदुच्यते।

वेदान्तसारकारः सदानन्दः आह-'वेदान्तो नाम उपनिषत्प्रमाणम्'।

गुरुसमीपमासाद्यैषेयं श्रवणात्मिका विद्या संन्यासिनां कृते विद्यते। ऋग्वेदसम्बन्धिनः ऐतरेयादयः 10 उपनिषदः, शुक्लयजुर्वेदस्य ईशादयः 19 उपनिषदः कृष्णयजुर्वेदस्य

कठादय: 32 उपनिषद:, सामसंहितायां 16 उपनिषद: केनादय:, अथर्वस्य तु प्रश्नमाण्डूक्यादय: 31 उपनिषद:। एषु निम्नलिखिता: दश एव प्रमुखा:–

ईशकेनकठप्रश्न: मुण्डमाण्डूक्यतित्तिरि:।
ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं दश।।

(ख) उपनिषदां वैशिष्ट्यम्–प्रस्थानत्रयीष्वाद्या उपनिषदो हि ब्रह्मबोधिका: मोक्षसाधनभूता: पराविद्या: वेदस्यान्तरूपतया चरमभागत्वेन वेदान्तपर्यायभूता: ज्ञानकाण्ड-संज्ञिका:। वैदिकवाङ्मये उपनिषद: महत्त्वपूर्णं स्थानं भजन्ते–

1. सर्वत्र विद्याविद्ययो: संभूत्यसंभूत्यो: श्रेयस्प्रेयसो: ज्ञानकर्मणो: प्रवृत्तिनिवृत्तयो: द्वैताद्वैतयोश्च विवादग्रस्तस्थलेषु प्रज्ञां स्थापयन्ति (विदधति)।
2. ब्रह्मस्वरूपप्रतिपादकत्वात् 'ज्ञानकाण्ड:' इत्युच्यते।
3. उपनिषद् एव परमपुरुषार्थस्य मोक्षस्य साधक:।

अत एव भगवत्पादशङ्कराचार्या: अपि–या सकलाप्यनर्थकर्त्री सांसारिकक्रियां नाशयति मायारूपमविद्यां शिथिलयति ब्रह्मज्ञानञ्च प्रतिपादयति सा विद्योपनिषदिति।

उपनिषद् एव स्वकीयं वास्तविकं आत्मस्वरूपं बोधयतीति दिक्। इत्थं आध्यात्मिकसांस्कृतिकदृष्ट्या मिथ्याज्ञानं अपसार्य ब्रह्मज्ञानं जनयतीति। उपनिषदां मूला प्रवृत्ति: दार्शनिकी। यथा–1. आत्मनिरीक्षणम्, 2. तात्विकं ज्ञानम्, 3. श्रेय:-प्रेयविवेक:, 4. मृत्यु-पुनर्जन्म-अमृतत्वप्राप्ति: वैराग्य-प्राप्तिश्च।

(ग) ईशावास्योपनिषद्–'ईशावास्यमिदं सर्वम्' इति मन्त्रेण प्रारभ्यते, शुक्लयजुर्वेदसंहिताया: चत्वारिंशत्तमोऽध्याये। अद्वैतवादस्य महत्त्वं प्रतिपादितम्। अत: अध्यायोऽयम् ईशावास्योपनिषद् इत्युच्यते। उपनिषदियं सर्वासु उपनिषत्सु प्रथमा विद्यते। इयमुपनिषद् मौलिकरूपेण संहिताभागो वर्तते। अष्टादशमन्त्रात्मके अस्याम् उपनिषदि प्रथमेण मन्त्रेण जगत: परमात्मव्यापकत्वमुपदिशति। द्वितीये मन्त्रे कर्मानुष्ठानस्य, तृतीये मन्त्रे पारलौकिकगति:, चतुर्थ-पंचम-मन्त्रयो: परमात्मन: सर्वव्यापकं स्वरूपम्, षष्ठे मन्त्रे सर्वभूतात्मकत्वम्, सप्तमे फलम्, अष्टमे मन्त्रे परमात्मप्राप्ते: फलम्, नवत: एकादश-मन्त्रपर्यन्तं विद्या-अविद्याविषयकम्, द्वादशत: चतुर्दश-मन्त्रपर्यन्तं ब्रह्मप्राप्ते: साधनम्, पञ्चदशत: षोडशमन्त्रपर्यन्तं परमात्मानं प्रति प्रार्थना, सप्तदश-अष्टदशयो: मन्त्रयो: मुमुक्षु: परमात्मानं स्वापेक्षितप्राप्तये प्रार्थयति।

(घ) प्रश्नोपनिषद्–अथर्ववेदस्य पिप्पलादशाखाया: उपनिषदियं प्रश्नानां समष्टिकारणात् प्रश्नोपनिषद् इत्युच्यते। भार्गव-शैव्य-सुकेशा-आश्वलायन-गार्ग्य-कबन्धीनामका: ब्रह्मतत्त्व-अन्वेषमाणा: ऋषय: पिप्पलादस्य सविधे आजग्मु:। इमे सर्वे ब्रह्मनिष्ठा: ऋषय: स्वकीयानां प्रश्नानां समाधान-मधिगम्य महर्षे: पिप्पलादस्यार्चाम् अकार्षु:। गुरु: पिप्पलाद उत्तरे सम्पूर्णाध्यात्मवादं प्रस्तुतवान्।

(ङ) केनोपनिषद्–'केनेषितं पतति प्रेषितं मन:' इति मन्त्रेण प्रारभ्यते इयमुपनिषद्। अस्यामुपनिषदि चत्वार: खण्डा: सन्ति। प्रथमखण्डे अष्टौ मन्त्रा:–उपास्यब्रह्मण: निर्गुणब्रह्मणश्च मध्ये भेद:। द्वितीयखण्डे पञ्चमन्त्रा:–ब्रह्मण: गहनस्वरूपस्य वर्णनम्। तृतीयखण्डे द्वादशमन्त्रा: तथा चतुर्थे खण्डे नवमन्त्रा: समुपलभ्यन्ते, ययो: ब्रह्मण: सार्वभौमिकता सर्वशक्तिमत्ता च प्रतिपादिता। अस्या: उपनिषद् सर्वत्र परमात्मन: शक्तिरनुसन्धेया मुमुक्षुभि: इति सारांश:।

(च) तैत्तिरीयोपनिषद्–तैत्तिरीयारण्यकस्य सप्तम-अष्टम-नवमखण्डानां सम्मिलितमभिधानं तैत्तिरीयोपनिषद् इति वर्तते। अस्याम् उपनिषदि तिस्रो वल्लयो भवन्ति, 1. **शिक्षावल्ली**–संहितादयो विषया:, गुरुप्रदत्तोपदेश:, ब्रह्मणोऽनुपमं लक्षणं प्रतिपादितमस्ति। शिक्षाप्राप्तये आचार्य: उपदिशति–सत्यं वद। धर्मं चर। स्वाध्यायान् मा प्रमद। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। 2. **आनन्दवल्ली**–ब्रह्मविवेचनम् "सत्यं ज्ञानमनन्तं ब्रह्म।" 3. **भृगुवल्ली**–पञ्चकोशानां महत्त्वम्, ब्रह्मसम्बन्धिजिज्ञासा शान्ता कृता।

यतो वा इमानि भूतानि जायन्ते तद्ब्रह्म–इति।

(छ) कठोपनिषद्–कृष्णयजुर्वेदस्य कठशाखासम्बन्धे अस्याम् उपनिषदि द्वौ अध्यायौ स्त:। प्रत्याध्यायं तिस्र: तिस्रो वल्लय: सन्ति। यत: "अणोरणीयान् महतो महीयानात्मा"। नचिकेतोपाख्यानम् अत्र अतीव प्रसिद्धमस्ति। यमद्वारा बहुधा परीक्षितोऽपि ऐहिकामुष्मिकफलभोगविरागसम्पन्न: शान्तो दान्त: नचिकेता आह–

श्वोभावा मर्त्यस्य यदन्तकेतत्, येन जातानि जीवन्ति,
यत् प्रयन्त्यभिसंविशन्ति,
तद्विविजिज्ञासस्व सर्वेन्द्रियाणां जरयन्ति तेज:।
अपि सर्वं जीवितमल्पमेव, तवैव वाहास्तव नृत्यगीते।।

(ज) छान्दोग्योपनिषद्–सामवेदस्य ताण्ड्यशाखाया: अष्टम: प्रपाठक: 154 खण्डानि एव छान्दोग्योपनिषत्-शब्देन अभिधीयते। सूर्योपासना- मधुविद्या-पुरुषविद्या-अग्निविद्या-प्राणविद्या- वैश्वानरविद्या-भूमाविद्या-आत्मविद्या-प्रभृतीनां विद्यानां वर्णनम् अस्यामेव उपनिषदि समुपलभ्यते। आत्मविद्याया अनुपमम् अलौकिकञ्च वर्णनमस्ति।

(झ) बृहदारण्यकोपनिषद्–शुक्लयजुर्वेदीय एषो ग्रन्थ: तत्त्वज्ञानं गम्भीररूपेण प्रतिपादयति। महर्षे: याज्ञवल्क्यस्य आध्यात्मिक-दार्शनिक्या शिक्षया परिपूर्ण एष ग्रन्थ:। इयं बृहदारण्यकोपनिषद् न केवलं तत्त्वज्ञानदृष्ट्या अतीवप्रामाणिकी वर्तते, अपितु आकारदृष्ट्यापि अतीवविशालास्ति। षडध्याय-समन्वितेऽस्मिन् उपनिषद्ग्रन्थे याज्ञवल्क्यस्य ब्रह्मविषयकं तत्त्वज्ञानमतीव विस्तरेण निरूपितमस्ति। सृष्टि-नीति-परलोक-विषयाणां दार्शनिकविवेचनमस्ति। याज्ञवल्क्यस्यान्यै: ऋषिभि: सह सुन्दरं दार्शनिकतत्त्व-विवेचन-पूर्णसंवादोऽस्ति।

(ञ) ऐतरेयोपनिषद्–ऐतरेयारण्यकस्य चतुर्थादध्यायात् षष्ठाध्यायपर्यन्तस्य नामैतरेयोपनिषद् वर्तते। अस्यामुपनिषदि त्रयो अध्याया: पञ्चखण्डानि च सन्ति। ब्रह्मणा विश्वस्योत्पत्ति: वर्णिता। आत्मन: श्रेष्ठता-जीवोत्पत्ति-सृष्टितत्त्वानि प्रज्ञानानि च वर्णितानि।

(ट) मुण्डकोपनिषद्–इयमुपनिषत् अथर्ववेदीया वर्तते। इयं मुण्डकनिमित्ताय निर्मिताऽस्ति। अस्यामेवोपनिषदि आयाति–

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्य: पिप्पलं स्वाद्वत्ति अनश्नन् चान्यः
अभिचाकशीति।।

माण्डूक्योपनिषद्–इयमुपनिषदतीव लघ्वी वर्तते, परन्तु विषयोऽस्य वैशाल्यं नूनं बिभर्ति। अस्यामुपनिषदि केवलं द्वादशवाक्यानि सन्ति। अस्यां परा-अपरा विद्याया: स्वरूपम्, अक्षर-ब्रह्मणि विश्वस्य धारणा, ब्रह्मण: स्वरूपञ्च प्रतिपादितमस्ति।

(ठ) श्वेताश्वतरोपनिषद्–इयमुपनिषत् कृष्ण-यजुर्वेदीया वर्तते। अस्यामुपनिषदि षडध्याया: सन्ति। अस्यामुपनिषदि जीवतत्त्वस्य, ब्रह्मतत्त्वस्य, प्रकृतितत्त्वस्य च वर्णनं सविस्तरं समुपलभ्यते। उपनिषद्वाक्यमहाकोशे 181 एकाशीत्युत्तरशतोपनिषदां वाक्यानि संगृहीतानि सन्ति। अत्र शिव एव परमात्मरूपे प्रतिष्ठितोऽस्ति। ब्राह्मण: महिमाऽपि प्रतिपादितोऽस्ति।

(ड) कौषीतकी उपनिषद्–शांखायन-ब्राह्मणस्य चत्वार: अध्याया: कौषीतकी-उपनिषदस्ति। प्रथमे[illegible] देवयान-पितृयानयो: वर्णनमस्ति। द्वितीयेऽध्याये दार्शनिकसिद्धान्तानां व्याख्या वर्तते। तृतीयेऽध्याये प्रतर्दनाय इन्द्रो ब्रह्मविद्या ज्ञानं यच्छति। पुन: प्राणतत्त्वस्यापि अत्र विवेचनं वर्तते। चतुर्थेऽध्याये बृहदारण्यकस्याख्यानस्य पुनरावृत्तिरस्ति।

(ढ) मैत्रायणीयोपनिषद्– कृष्ण-यजुर्वेदीयास्या-मुपनिषदि सांख्य-गादीनां सिद्धान्तानां वर्णनमस्ति। गद्यपद्यात्मका सप्ताध्याया: सन्ति।

(ण) उपनिषद्विषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्न:**— आरण्यकग्रन्थेषु स्फुरिता आध्यात्मिकजिज्ञासा कुत्र शान्तो भवति?
   उत्तरम्— उपनिषद्ग्रन्थे।
2. **प्रश्न:**— उपनिषद् शब्दस्य निष्पत्ति: केन धातो: भवति?
   उत्तरम्— उप+नि+सद्+क्विप् इति सद्लृ धातो: भवति।
3. **प्रश्न:**—प्रस्थानत्रयीष्वाद्या ब्रह्मबोधिका: मोक्षसाधनभूता: पराविद्या: वेदस्यान्तरूपतया चरमभागत्वेन वेदान्तपर्याया: ज्ञानकाण्डसंज्ञिकाश्च के?
   उत्तरम्— उपनिषदो हि।
4. **प्रश्न:**— उप समीपं निषद्यते प्राप्यते ब्रह्मविद्या अनया इति क:?
   उत्तरम्— उपनिषद्।
5. **प्रश्न:**— उपनिषदां प्रतिपाद्य-विषय: क:?
   उत्तरम्— माया-अविद्या-अध्यास एव।
6. **प्रश्न:**— शङ्कराचार्येणोक्तं का परिभाषा उपनिषदित्यस्य?
   उत्तरम्—"या सकलाप्यनर्थकर्त्री सांसारिकक्रियां नाशयति मायारूपमविद्यां शिथिलयति ब्रह्मज्ञानञ्च प्रतिपादयति सा विद्योपनिषदिति।"
7. **प्रश्न:**— वेदान्तसारकार: सदानन्द: उपनिषत्प्रमाणं किम् मन्यते?
   उत्तरम्—वेदान्तो नाम उपनिषत्प्रमाणम्।
8. **प्रश्न:**— ऋग्वेदसम्बन्धिन: ऐतरेयादय: कति उपनिषद:?
   उत्तरम्—10 उपनिषद:।
9. **प्रश्न:**— शुक्लयजुर्वेदस्य ईशादय: कति उपनिषद:?
   उत्तरम्— 19 उपनिषद:।

10. **प्रश्नः**— कृष्णयजुर्वेदस्य कठादयः कति उपनिषदः?
उत्तरम्— 32 उपनिषदः।

11. **प्रश्नः**— सामसंहितायां केनादयः कति उपनिषदः?
उत्तरम्— 16 उपनिषदः।

12. **प्रश्नः**— अथर्वस्य तु प्रश्नमाण्डूक्यादयः कति उपनिषदः?
उत्तरम्— 31 उपनिषदः।

13. **प्रश्नः**— के सन्ति दश प्रमुखाः उपनिषदः?
उत्तरम्—ईश-केन-कठ-प्रश्नः मुण्ड-माण्डूक्य-तित्तिरिः। ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं दश।

14. **प्रश्नः**—ब्रह्मस्वरूपप्रतिपादकत्वात् उपनिषदि किमुच्यते?
उत्तरम्— ज्ञानकाण्डम्।

15. **प्रश्नः**— सामवेदसय कौथुमशाखायां पूर्वार्चिके कति मन्त्राः वर्तन्ते?
उत्तरम्— 650 मन्त्राः।

17. **प्रश्नः**— सामवेदस्य कौथुमशाखायां उत्तरार्चिके कति मन्त्राः वर्तन्ते?
उत्तरम्— 1225 मन्त्राः।

18. **प्रश्नः**—सामवेदस्य ऋत्विक् कः?
उत्तरम्— उद्‌गाता।

19. **प्रश्नः**— 'ब्रह्मवेदः' इत्यभिधानेन अभिहितः वेदः कः?
उत्तरम्— अथर्ववेदः।

20. **प्रश्नः**— अथर्ववेदस्य का शाखा विद्यते?
उत्तरम्— स्तादशाखा।

21. **प्रश्नः**— परमपुरुषार्थस्य मोक्षस्य साधकः कः?
उत्तरम्— उपनिषद एव।

22. **प्रश्नः**— उपनिषदां मूला प्रवृत्तिः दार्शनिकी तत्त्वानि कानि?
उत्तरम्—1. आत्मनिरीक्षणम्, 2. तात्त्विकं ज्ञानम्, 3. श्रेयःप्रेयविवेकः, 4. मृत्यु-पुनर्जन्म-अमृतत्वप्राप्तिः वैराग्यप्राप्तिश्च।

23. **प्रश्नः**— शुक्लयजुर्वेदस्य काण्वशाखायां कति मन्त्राः विद्यन्ते?
उत्तरम्— 2086 मन्त्राः।

24. **प्रश्नः**— ब्रह्मा कस्य वेदविशेषस्य ऋत्विगस्ति?
उत्तरम्— अथर्ववेदस्य।

25. **प्रश्नः**— जैमिनीयोपनिषदः सम्बन्धितः वेदः कः?
उत्तरम्— सामवेदः।

26. **प्रश्नः**— उपनिषद्-शब्दे धातुरस्ति?
उत्तरम्— षद्।

27. **प्रश्नः**— उपनिषदां प्रतिपाद्यविषयं किमस्ति?
उत्तरम्—जीवब्रह्मैक्यम्।

28. **प्रश्नः**— 'आत्मा' इति शब्दे को धातुः?
उत्तरम्—अत्।

29. **प्रश्नः**—'आत्मा' शब्दे कः प्रत्ययः अस्ति?
उत्तरम्—मनिण्।

30. **प्रश्नः**— पंचकोशानां क्रमः किमस्ति?
उत्तरम्—आनन्दमयः, विज्ञानमयः, मनोमयः, प्राणमयः, अन्नमयः।

31. **प्रश्नः**— षड्मन्त्रात्मकं शिवसंकल्पसूक्तं वाजसनेयि-संहितायाः कस्मिन् अध्याये वर्तते?
उत्तरम्—34 चतुस्त्रिंशत् अध्याये।

32. **प्रश्नः**— सामवेदस्य कति शाखाः श्रूयन्ते?
उत्तरम्— 1000 शाखाः।

33. **प्रश्नः**— वर्तमानसमये सामवेदस्य कति शाखाः समुपलभ्यन्ते?
उत्तरम्— 03 शाखाः समुपलभ्यन्ते।

34. **प्रश्नः**— सामगानस्य कति विभागाः विद्यन्ते?
उत्तरम्— 05 विभागाः।

35. **प्रश्नः**— राणायनीय-शाखा-सम्बद्धः कः वेदविशेषः?
उत्तरम्— सामवेदः।

36. **प्रश्नः**— सामवेदस्य का शाखा विद्यते?
उत्तरम्— जैमिनीयशाखा।

37. **प्रश्नः**—उपनिषद् इत्यस्य अपरनाम किम्?
उत्तरम्— 'वेदान्तः।'

38. **प्रश्नः**— हिरण्मयेन पात्रेण सत्यस्यापिहितम्?
उत्तरम्— ईशावास्योपनिषद्।

39. **प्रश्नः**— यजुर्वेदस्य उपनिषत् कोऽस्ति?
उत्तरम्— ईशावास्योपनिषत्।

40. **प्रश्नः**— यजुर्वेदस्य अन्तिमः अध्यायः कोऽस्ति?
उत्तरम्— ईशावास्योपनिषद्।

41. **प्रश्नः**— "मा गृधः कस्यस्विद् धनम्" इति कस्यामुपनिषदि?
उत्तरम्— ईशावास्योपनिषदि।

42. **प्रश्नः**— विद्यायाः अविद्यायाश्च वर्णनं कुत्र उपलभ्यते?
उत्तरम्— ईशावास्योपनिषदि।

43. **प्रश्नः**— "तत्र को मोहः कः शोकः, एकत्वमनुपश्यतः" इति मन्त्रांशः कुत्र उपलभ्यते?
उत्तरम्— ईशावास्योपनिषदि।

44. **प्रश्नः**— ईशावास्योपनिषद् वाजसनेयिसंहितायाः कस्मिन् अध्याये विद्यते?
उत्तरम्— 40 चत्वारिंशत् अध्याये।

45. **प्रश्नः**— अथर्ववेदस्य पिप्पलादशाखायाः उपनिषत् का?
उत्तरम्— प्रश्नोपनिषद्।

46. **प्रश्नः**— प्रश्नानां समष्टिकारणात् उपनिषदियं का उच्यते?
उत्तरम्— प्रश्नोपनिषद्।

47. **प्रश्नः**—भार्गव-शैव्य-सुकेशा-आश्वलायन-गार्ग्य-कबन्धीनामकाः ब्रह्मतत्त्व-अन्वेषमाणाः ऋषयः कस्य सविधे आजग्मुः?
उत्तरम्— पिप्पलादस्य।

48. **प्रश्नः**— इमे सर्वे ब्रह्मनिष्ठाः ऋषयः स्वकीयानां प्रश्नानां समाधानमधिगम्य कस्य महर्षेरर्चाम् अकार्षुः?
उत्तरम्— महर्षेः पिप्पलादस्यार्चाम् अकार्षुः।

49. **प्रश्नः**— गुरुः पिप्पलादः उत्तरे किं प्रस्तुतवान्?
उत्तरम्— सम्पूर्णाध्यात्मवादम्।

50. **प्रश्नः**— "**केनेषितं पतति प्रेषितं मनः**" इति मन्त्रेण को उपनिषत् प्रारभ्यते?
उत्तरम्— केनोपनिषत्।

51. **प्रश्नः**— उमा-हेमवती-आख्यानं कुत्र मिलति?
उत्तरम्— केनोपनिषदि।

52. **प्रश्नः**— केनोपनिषदि कति खण्डाः सन्ति?
उत्तरम्— चत्वारः खण्डाः।

53. **प्रश्नः**— प्रथमखण्डे कति मन्त्राः वर्तन्ते?
उत्तरम्— अष्टौ मन्त्राः।

54. **प्रश्नः**— प्रथमखण्डे को विषयः वर्तते?
उत्तरम्— उपास्यब्रह्मणः निर्गुणब्रह्मणश्च मध्ये भेदः।

55. **प्रश्नः**— द्वितीयखण्डे कति मन्त्राः वर्तन्ते?
उत्तरम्— पञ्चमन्त्राः।

56. **प्रश्नः**— द्वितीयखण्डे विवेच्यविषयः कः?
उत्तरम्— ब्रह्मणः गहनस्वरूपस्य वर्णनम्।

57. **प्रश्नः**— तृतीयखण्डे कति मन्त्राः विद्यन्ते?
उत्तरम्— द्वादशमन्त्राः।

58. **प्रश्नः**—चतुर्थे खण्डे कति मन्त्राः विद्यन्ते?
उत्तरम्— नवमन्त्राः समुपलभ्यन्ते।

59. **प्रश्नः**— 'रसो वै सः रसः' कस्यामुपनिषदि?
उत्तरम्— तैत्तिरीयोपनिषदि।

60. **प्रश्नः**—'मातृदेवो भव पितृदेवो भव' इति कस्यामुपनिषदि?
उत्तरम्— तैत्तिरीयोपनिषदि।

61. **प्रश्नः**— 'सत्यम् ज्ञानमनन्तं ब्रह्म' महावाक्यं कस्यामुपनिषदि?
उत्तरम्— तैत्तिरीयोपनिषदि।

62. **प्रश्नः**— 'आनन्दं ब्रह्मणो विद्वान् न विभेति कदाचन' इति कुत्र प्राप्नोति?
उत्तरम्— तैत्तिरीयोपनिषदि।

62. **प्रश्नः**— 'अन्नं न निन्द्यात्' इति कुत्र मिलति?
उत्तरम्— तैत्तिरीयोपनिषदि।

63. **प्रश्नः**— तैत्तिरीयोपनिषदि कति वल्लयो भवन्ति?
उत्तरम्— तिस्रो वल्लयः।

64. **प्रश्नः**— 'यतो वा इमानि भूतानि जायन्ते' इति कस्यामुपनिषदि?
उत्तरम्— तैत्तिरीयोपनिषदि।

65. **प्रश्नः**— तैत्तिरीयोपनिषत्-सम्बद्धः वेदः कः?
उत्तरम्— कृष्णयजुर्वेदः।

66. **प्रश्नः**— शिक्षावल्ली कस्य भाग-विशेषः?
उत्तरम्— तैत्तिरीयोपनिषदः।

67. **प्रश्नः**— पञ्चकोशविवेक: कुत्र मिलति?
उत्तरम्— भृगुवल्ल्याम्।

68. **प्रश्नः**— 'अणोरणीयान् महतो महीयानात्मा' इति कस्यामुपनिषदि?
उत्तरम्— कठोपनिषदि।

69. **प्रश्नः**— "अणोरणीयान् महतो महीयान्" कोऽस्ति?
उत्तरम्— आत्मा।

70. **प्रश्नः**— कठोपनिषदि कतिपया: अध्याया:?
उत्तरम्— द्वौ।

71. **प्रश्नः**— तयो: श्रेय आददानस्य साधु: भवति?
उत्तरम्— कठोपनिषदि।

72. **प्रश्नः**— 'एकतस्या: सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बभूव?
उत्तरम्— कठोपनिषदि।

73. **प्रश्नः**— 'अंगुष्ठमात्र: पुरुष:' इति वचनं कस्य उपनिषद्-ग्रन्थस्य?
उत्तरम्— कठोपनिषद:।

74. **प्रश्नः**— वित्तेन तर्पणीय: कस्य नास्ति?
उत्तरम्— मनुष्यस्य।

75. **प्रश्नः**— रथ-रूपकस्य निरूपक: उपनिषद: क:?
उत्तरम्— कठोपनिषद:।

76. **प्रश्नः**— कठशाखानुयायी उपनिषद् कोऽस्ति?
उत्तरम्— कठोपनिषद्।

77. **प्रश्नः**— उद्दालकेन सम्पादित: यागविशेष: क:?
उत्तरम्— विश्वजित:।

78. **प्रश्नः**— उद्दालकस्य पुत्र: क:?
उत्तरम्— नचिकेता।

79. **प्रश्नः**— कठोपनिषदि मृत्युं दृष्ट्वा पुन: भूलोकं क: प्राप्नोति?
उत्तरम्— नचिकेता।

80. **प्रश्नः**— अग्निविद्यां क: जानाति?
उत्तरम्— मृत्यु:।

81. **प्रश्नः**— **"क्षुरस्य धारा निशिता दुरत्यया, दुर्गं पथस्तत्कवयो वदन्ति"** इति कस्योक्ति:?
उत्तरम्— कठोपनिषद:।

82. **प्रश्नः**— श्रेयमार्गस्य प्रेयमार्गस्य च व्याख्यां क: करोति?
उत्तरम्— कठोपनिषद्।

83. **प्रश्नः**— **"श्रेयश्च प्रेयश्च मनुष्यमेत:, तौ सम्परीत्य विनिनक्ति"** इति क:?
उत्तरम्— धीर:।

84. **प्रश्नः**— छन्दोग्योपनिषत्-शब्देन किं अभिधीयते?
उत्तरम्—सामवेदस्य ताण्ड्यशाखाया: अष्टम: प्रपाठक: 154 खण्डानि।

85. **प्रश्नः**— अस्याम् उपनिषदि कति विद्यानां वर्णनं समुपलभ्यते?
उत्तरम्—सूर्योपासना-मधुविद्या-पुरुषविद्या-अग्निविद्या-प्राणविद्या-वैश्वानरविद्या-भूमाविद्या-आत्मविद्या-प्रभृतीनां विद्यानां वर्णनम्।

86. **प्रश्नः**— सर्वं खल्विदं ब्रह्म: इति कुत्र वर्णितम्?
उत्तरम्—छान्दोग्योपनिषदि।

87. **प्रश्नः**— तत्त्वमसि कुत्र वर्णितम्?
उत्तरम्—छान्दोग्योपनिषदि।

88. **प्रश्नः**— छान्दोग्योपनिषदि नारद-सनत्कुमार आख्यानं कस्मिन् अध्याये वर्तते?
उत्तरम्— पञ्चमे।

89. **प्रश्नः**— छान्दोग्योपनिषदि कतिपया: अध्याया:?
उत्तरम्—पञ्चदश।

90. **प्रश्नः**— इन्द्रविरोचनयो: कथा कस्यामुपनिषदि?
उत्तरम्— छान्दोग्योपनिषदि।

91. **प्रश्नः**— विज्ञानानन्दं ब्रह्म कस्यामुपनिषदि?
उत्तरम्— छान्दोग्योपनिषदि।

92. **प्रश्नः**— मैत्रेयीं प्रति याज्ञवल्क्योपदेश: कस्यामुपनिषदि?
उत्तरम्— बृहदारण्यकोपनिषदि।

93. **प्रश्नः**— 'आत्मा वारेद्रष्टव्य:' विवेचनं कस्यामुपनिषदि?
उत्तरम्— बृहदारण्यकोपनिषदि।

94. **प्रश्नः**— पूर्णमद: पूर्णमिदं कस्याम् उपनिषदि?
उत्तरम्— बृहदारण्यकोपनिषदि।

95. **प्रश्नः**— 'असतो मा सद्गमय' इति कस्याम् उपनिषदि?
उत्तरम्— बृहदारण्यकोपनिषदि।

96. **प्रश्नः**— 'अयमात्मा ब्रह्म' इति कस्याम् उपनिषदि?
उत्तरम्— बृहदारण्यकोपनिषदि।

97. **प्रश्नः**— 'अहं ब्रह्मास्मि' इति कस्याम् उपनिषदि?
उत्तरम्— बृहदारण्यकोपनिषदि।

98. **प्रश्नः**— "अनन्तं वै ब्रह्म" इति कुत्र उपलभ्यते?
उत्तरम्— बृहदारण्यकोपनिषदि।

99. **प्रश्नः**— बृहदारण्यकोपनिषत्-सम्बद्ध: वेद: क:?
उत्तरम्— शुक्लयजुर्वेद:।

100. **प्रश्नः**— बृहदारण्यकोपनिषदि कति अध्याया: सन्ति?
उत्तरम्— 6 षडध्याया:।

101. **प्रश्नः**— 'याज्ञवल्क्य-गार्गी-संवाद:' कुत्र उपलभ्यते?
उत्तरम्— बृहदारण्यकोपनिषदि।

102. **प्रश्नः**— याज्ञवल्क्य-गार्गी-संवादे विदेहराजस्य पुरोहित: क:?
उत्तरम्—अश्वल:।

103. **प्रश्नः**— याज्ञवल्क्यस्य पिता क: वर्तते?
उत्तरम्—वाजसनि:।

104. **प्रश्नः**— चतुर्थादध्यायात् षष्ठाध्यायपर्यन्तस्य कस्य नाम वर्तते?
उत्तरम्— ऐतरेयारण्यकस्य।

105. **प्रश्नः**— ऐतरेयोपनिषदि कति: अध्याया:?
उत्तरम्— त्रय:।

106. **प्रश्नः**— ब्रह्मणा विश्वस्योत्पत्ति: कुत्र वर्णिता?
उत्तरम्—ऐतरेयोपनिषदि।

107. **प्रश्नः**— ऐतरेयोपनिषदि कति खण्डानि सन्ति?
उत्तरम्—पञ्चखण्डानि।

108. **प्रश्नः**— ऐतरेयोपनिषदि प्रतिपादिता विषया कानि सन्ति?
उत्तरम्— आत्मन: श्रेष्ठता-जीवोत्पत्ति-सृष्टितत्त्वानि प्रज्ञानानि च वर्णितानि।

109. **प्रश्नः**— 'सत्यमेव जयते' इति कुत्र वर्णितम्?
उत्तरम्— मुण्डकोपनिषदि।

110. **प्रश्नः**— 'शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दो-ज्योतिषामिति' कस्यामुपनिषदि वेदाङ्गानां वर्णनम्?
उत्तरम्— मुण्डकोपनिषदि।

111. **प्रश्नः**— वेदान्तशब्दस्य प्रयोग: सर्वप्रथम: कुत्र?
उत्तरम्— मुण्डकोपनिषदि।

112. **प्रश्नः**— 'द्वा सुपर्णा सयुजा सखायौ' इति कस्यामुपनिषदि?
उत्तरम्— मुण्डकोपनिषदि।

114. **प्रश्नः**— अथर्वा ब्रह्मविद्यां कस्यामुपनिषदि पठितवान्?
उत्तरम्— मुण्डकोपनिषदि।

115. **प्रश्नः**— 'तमेवं भान्तमनुभाति सर्वं तस्य' कस्यामुपनिषदि पठितवान्?
उत्तरम्— मुण्डकोपनिषदि।

116. **प्रश्नः**— 'भिद्यते हृदयग्रन्थि' कस्यामुपनिषदि पठितवान्?
उत्तरम्— मुण्डकोपनिषदि।

117. **प्रश्नः**— अस्यामुपनिषदि कति वाक्यानि सन्ति?
उत्तरम्— द्वादश वाक्यानि।

118. **प्रश्नः**— कृष्णयजुर्वेदीया उपनिषत् काऽस्ति?
उत्तरम्— श्वेताश्वतरोपनिषद्।

119. **प्रश्नः**— श्वेताश्वतरोपनिषदि कति: अध्याया:?
उत्तरम्— षडध्याया:।

120. **प्रश्नः**— जीवतत्त्वस्य, ब्रह्मतत्त्वस्य, प्रकृतितत्त्वस्य च वर्णनं सविस्तरं कुत्र समुपलभ्यते?
उत्तरम्— श्वेताश्वतरोपनिषदि।

121. **प्रश्नः**— शैवधर्मस्य प्रतिपादनं कस्यामुपनिषदि?
उत्तरम्—श्वेताश्वतरोपनिषदि।

122. **प्रश्नः**—'अजामेकां लोहितशुक्लकृष्णां' इति कस्यामुपनिषदि?
उत्तरम्—श्वेताश्वतरोपनिषदि।

123. **प्रश्नः**— तिलेषु तैलं दधिनीव सर्पिषव: स्रोत: इति कस्यामुपनिषदि?
उत्तरम्—श्वेताश्वतरोपनिषदि।

124. **प्रश्नः**— 'कौषितकी' उपनिषदि कति अध्याया: सन्ति?
उत्तरम्— चत्वार:।

125. **प्रश्नः**— 'कौषितकी' उपनिषदि प्रथमेऽध्याये कस्य वर्णनमस्ति?
उत्तरम्— देवयान-पितृयानयो:।

126. **प्रश्नः**— 'कौषितकी' उपनिषदि द्वितीयेऽध्याये कस्य वर्णनमस्ति?
उत्तरम्— दार्शनिकसिद्धान्तानां व्याख्या वर्तते।

127. **प्रश्नः**— 'कौषितकी' उपनिषदि तृतीयेऽध्याये कस्य वर्णनमस्ति?
उत्तरम्— प्रतर्दनाय इन्द्रो ब्रह्मविद्या ज्ञानं यच्छति पुनः प्राणतत्वस्यापि अत्र विवेचनं वर्तते।

128. **प्रश्नः**— 'कौषितकी' उपनिषदि चतुर्थेऽध्याये कस्य वर्णनमस्ति?
उत्तरम्— बृहदारण्यकस्याख्यानस्य पुनरावृत्तिरस्ति।

129. **प्रश्नः**— कृष्ण-यजुर्वेदीया उपनिषत् काऽस्ति?
उत्तरम्— मैत्रायणीयोपनिषद्।

130. **प्रश्नः**— सांख्य-गादीनां सिद्धान्तानां कुत्र वर्णनमस्ति?
उत्तरम्— मैत्रायणीयोपनिषदि।

131. **प्रश्नः**— मैत्रायणीयोपनिषदि कति अध्यायाः सन्ति?
उत्तरम्— गद्यपद्यात्मका सप्ताध्यायाः।

132. **प्रश्नः**— 'चतुष्पाद आत्मा' विवेचनं कस्यामुपनिषदि?
उत्तरम्— माण्डूक्योपनिषदि।

133. **प्रश्नः**— माण्डूक्योपनिषदि कति खण्डानि?
उत्तरम्— द्वादश।

5
निरुक्तशास्त्रविवेचनम्

(L) (Code-25)

(क) निरुक्तस्य परिचयः–षट्सु वेदाङ्गेषु निरुक्तं चतुर्थं स्थानं भजते। तच्च वेदपुरुषस्य श्रोत्रमुच्यते।' अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्' इति। निःशेषादुक्तमिति निरुक्तम्। निरुक्तं वेदविज्ञानस्य आन्तरिकं स्वरूपं स्पष्टतः उद्घाटयति। निघण्ट्वाख्यस्य वैदिककोशस्य भाष्यरूपमस्ति निरुक्ताख्यं वेदांगम्। निरुक्तस्यारम्भे निघण्टुं समाम्नाय इति कथितो वर्तते। निघण्टौ तु केवलं वैदिकाः शब्दाः परिगणिताः सन्ति, परन्तु निरुक्तकारो यास्कः तेषां वैदिकानां शब्दानां सविस्तरं विवेचनं करोति। "अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्।" अन्यानि वेदांगानि वेदस्य बहिर्भूतानि तत्त्वानि व्याकुर्वन्ति, तर्हि निरुक्तं वेदस्य अन्तर्भूतानि तत्त्वानि व्याकरोति। अस्य शब्दस्य च या व्याख्या दुर्गाचार्यमहाभागेन कृता, तया व्याख्यया तु अस्य प्राचीनत्वमेव सिद्ध्यति। महाभारतस्य मोक्षधर्मपर्वणि उक्तं यथा–

वृषो हि भगवान् धर्मः ख्यातो लोकेषु भारत।
निघण्टुकपदाख्याने विद्धि मां वृषमुत्तमम्॥
कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते।
तस्मात् वृषाकपिं प्राह कश्यपो मां प्रजापतिः॥

(ख) निरुक्तस्य महत्त्वम्–' अर्थाऽवबोधे निरपेक्षतया पदजातं यत्र तद् निरुक्तम्' अर्थात् अर्थज्ञानाय स्वतन्त्ररूपेण यः पदानां संग्रहः स एव निरुक्तमिति कथ्यते। 'यथा शब्दलक्षणपरिज्ञानं सर्वशास्त्रेषु व्याकरणात् जायते तथैव शब्दार्थनिर्वचनपरिज्ञानं निरुक्ताद् भवति' इति। अत्र च अयं निष्कर्षः शब्दस्य लक्षणस्तु व्याकरणानुसारं क्रियते, परञ्च शब्दार्थयोश्च निर्वचनस्य ज्ञानं निरुक्तेनैव भवति। अनेन प्रकारेण निरुक्तं वेदार्थज्ञानाय नितान्तमावश्यकमिति। निरुक्ते वैदिकशब्दानां निरुक्तिर्विद्यते। प्रत्येकं शब्दः येन केनापि धातुना सहावश्यमेव सम्बद्धोऽस्ति। अतः निरुक्तकाराः शब्दानां व्युत्पत्तिं प्रदर्श्य धातुना सह विभिन्नप्रत्ययानां निर्देशं कथयन्ति। यथा–स पितुः सकाशाद् दूरे स्थितायामेव तस्य हितं करोति (दुहिता दूरे दूरदेशस्थितायामेव हिताहितकारिणी)। अस्यैव नाम विद्यते भाषाविज्ञानम् इति।

(ग) निरुक्ते पदचतुष्टयम्–यास्काचार्यस्तु पदानां भेदचतुष्टयं स्वीकरोति। ते च नामाख्यातोपसर्गनिपाताः सन्ति।

1. नामजातिः–'सत्त्वप्रधानानि नामानि', नाम्नः चत्वारोऽर्था भवन्ति, सत्त्व-द्रव्य-संख्या-लिङ्गानि। यथा–घटः, पटः, धनम् इत्यादयः। 2. आख्यातजातिः– 'भावप्रधानमाख्यातम्' इयमेव च साध्यत्वेनाभिधीयमाना 'क्रिया' इत्युच्यते। आख्यायन्ते क्रियागुणभावेन वर्तमानानि स्त्रीपुंनपुंसकानि अनेनेत्याख्यातम्। तदिदमाख्यातं चतुष्प्रकारकं भवति। 1. कर्तरि–तत्र 'पचति देवदत्तः' इति कर्तरि। 2. भावे–'भूयते देवदत्तेन' इति भावे। 3. कर्मणि–'पच्यते ओदनो देवदत्तेन' इति कर्मणि। 4. कर्मकर्तरि–'पच्यते ओदनः स्वयमेव' इति कर्मकर्तरि। यथा–पठति, व्रजति, करोति, भूयते, पच्यते इत्यादि। 3. उपगृह्याख्यातं तस्यैवार्थविशेषं सृजन्तीत्युपसर्गाः प्रादयः। उपसर्गाः नानाविधानर्थान् अभिव्यंजयन्ति इति। 4. उच्चावचेषु निपतन्तीति निपाताः इव, आ, अह, ह, किल, हि, ननु, खलु, नूनम् इत्यादयः।

(घ) निर्वचनस्य सिद्धान्तः–निरुच्यते निःशेषेणोपदिश्यते निर्वचनविधया तत्तदर्थबोधनाय पदजालं यत्र तन्निरुक्तम्। शिक्षाया वर्णोच्चारणप्रकारे व्याकरणेन च पदसाधुत्वज्ञाने सञ्जाते मन्त्रघटकपदानाम् अर्थज्ञानाकांक्षायां मन्त्रघटकार्थज्ञानाय भगवता यास्केन निरुक्तं प्रणीतम्। निरुक्तस्य पञ्चविधयः भर्तृहरिणा कथिताः–

वर्णागमो वर्णविपर्ययश्च
द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते
पञ्चविधं निरुक्तम्॥

मानवस्वभावोऽयं वर्तते, यत् शब्दोच्चारणे सारल्यं सौविध्यं प्रति स्वाभाविकरुचिर्भवति। अस्माद् कारणादेव 1. वर्णागमः, 2. वर्णविपर्ययः, 3. वर्णविकारः, 4 वर्णलोपः, 5. धात्वर्थातिशयः निर्वचनानि क्रियन्ते। पदानां निर्वचनविषये यास्काचार्यस्तु स्वच्छन्दप्रवृत्तिशीलः दृश्यते, तस्य मते येन-केन प्रकारेण निर्वचनमवश्यमेव भवेत्। यथोक्तम्–

न त्वेव न निर्ब्रूयात्। न संस्कारमाद्रियेत्। विषयवत्यो हि वृत्तयो भवन्ति। यथार्थं विभक्ततारः सन्नमयेत॥

(ङ) निम्नलिखितानां शब्दानां व्युत्पत्तयः–1. गौः, 2. आचार्य, 3. वैश्वानरः, 4. वीर, 5. नदी, 6. मेघः, 7. ह्रदः, 8. अश्व, 9. समुद्रः, 10. उषस्, 11. वृत्रः, 12. जातवेदस्, 13. आदित्यः, 14. वाक्, 15. उदक्, 16. निघण्टुः, 17. अग्निः।

1. **गौः**–गौरिति पृथिव्या नामधेयम्। यद् दूरङ्गता भवति। यच्चास्यां भूतानि गच्छन्ति। यस्मात् अस्यां भूतानि गच्छन्ति आधारभूतायाम्। तगातेर्वा 'गाङ्गतौ' इत्यस्य धातोः ओकारो नामकरणः प्रत्ययः। "अथ पशु नामेह भवत्येतस्मादेव।

2. **आचार्यः**–आचार्यः आचारं ग्राहयति, आचिनोत्यर्थान् आचिनोति बुद्धिम् इति वा।

3. **वैश्वानरः**–विश्वान् नरान् नयति। विश्वः एनं नरा नयन्तीति वा अपि वा विश्वानरः एव स्यात्।

4. **वीरः**–वीरयति अमित्रान्। वेतेर्वा स्याद्गतिकर्मणः, वीरयतेर्वा।

5. **नदी**–नदना इमा भवन्ति शब्दवत्यः।

6. **मेघः**–मेहतीति सिंचत्यसौ मेघः।

7. **ह्रदः**–ह्रदो ह्रादते शब्दकर्मणः। ह्रदतेर्वा स्यात्, शीतिभावः, कर्मणः।

8. **अश्वः**–अश्नुतेऽध्वानम्। महाशनो भवतीति वा।

9. **समुद्रः**–समुद्रवन्त्यस्मादापः, समभिद्रवन्त्येनमापः, सम्मोदन्तेऽस्मिन् भूतानि, समुदको भवति, समुनत्तीति वा।

10. **उषस्**–उच्छतीति सत्या रात्रेरपरः कालः 'उच्छी विवासे' विवासयति हीयं नमांसि।

11. **वृत्रः**–वृत्रो वृणोतेर्वा, वर्ततेर्वा वर्धतेर्वा। 'यदवृणोत् तद् वृत्रस्य वृत्रत्वम्।' 'यदवर्तत तद् वृत्रस्य वृत्रत्वम्।' 'यदवर्धत तद् वृत्रस्य वृत्रत्वम्।'

12. **जातवेदस्**–जातानि वेदः। जातानि वैनं विदुः। जाते जाते विद्यते इति वा। जातवित्तो वा। जातधनः। जातविद्यो वा जातप्रज्ञानः। यज्जातः पशूनविन्दत इति तज्जातवेदसो जातवेदस्त्वम्।

13. **आदित्यः**–आदत्ते रसान्, आदत्ते भासं ज्योतिषाम्, आदीप्तो भासेति वा, अदितेः पुत्र इति वा। एवमन्यासामपि देवतानामादित्यप्रवादाः स्तुतयो भवन्ति।

14. **वाक्**–वक्तीति वाक्। वचेः कथ्यतेऽनया इति वाक्।

15. **उदक्**–उनत्तीति उदक्। तद्धि यत्र गच्छति, तत्र उनत्ति क्लेदयति।

16. **निघण्टुः**–ते निगन्तवः एव सन्तो निगमनान्निघण्टवः उच्यन्ते इति औपमन्यवः। अपि वाऽऽहननादेव स्युः, समाहृता भवन्ति। यद्वा समाहृता भवन्ति।

17. **अग्निः**–अग्रणीर्भवति। अग्रं यज्ञेषु प्रणीयते। अङ्गं नयति सन्नममानः। अक्नोपनो भवतीति स्थौलाष्ठीवि। न क्नोपयति न स्नेहयति, विरूक्षीकरोतीत्यर्थः।

(च) षड्भाव-विकाराः–भवतीति भावः, तद्विकाराः एव भावविकाराः। ते च भावविकाराः 1. जायते, 2. अस्ति, 3. विपरिणमते, 4. वर्धते, 5. अपक्षीयते, 6. विनश्यतीति षड्विधाः भवन्ति।

(छ) निरुक्ताध्ययनस्य प्रयोजनम्–वेदगतकठिनशब्दसंग्रहरूपो निघण्टुग्रन्थश्चिरादागच्छति स्म। तत्रैव यास्केन तद् व्याख्याभूतं निरुक्तं विरचितम्। निघण्टवो वेदा एव न वेदाङ्गानि तद् व्याख्याभूतं यास्कप्रणीतं निरुक्तमेव वेदाङ्गमिति सम्प्रदायः। पाणिनेः प्राचीनोऽयं यास्कः। अत्र यास्कनिरुक्ते

चतुर्दशाध्यायाः। बहवस्तु द्वादशाध्यायात्मकमेवेदं शास्त्रम्। अन्तिमौ द्वावध्यायौ तु पश्चाद्योजितावित्याहु। निघण्टौ पञ्चाध्यायाश्च 'दैवतकाण्ड'मिति च कथ्यते। प्रथम-तस्त्रिष्वध्यायेषु तु पृथ्व्यादिबोधकानामनेकानां पदानामेकत्र संग्रहो विद्यते। द्वितीयं काण्डम् 'ऐकपदिक'मित्यपि कथयन्ति। 'नैगम'स्य तात्पर्यमिदमस्ति यत् एषां प्रकृति-प्रत्यययोः यथार्थावगमनं न भवति। यथोक्तमस्ति अनवगतसंस्कारौंश्च निगमान्। दैवतकाण्डे देवानां स्वरूपस्य स्थानस्य च निर्देशो विद्यते।

(ज) निरुक्ते मन्त्राणां प्रकारः–यत्काम ऋषिः यस्यां देवतायाम् आर्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद् दैवतः स मन्त्रो भवति। ते मन्त्राः त्रिविधा भवन्ति, तत्र परोक्षकृताः प्रत्यक्षकृताश्च मन्त्राः अल्पाः एव सन्ति।

1. **परोक्षकृता मन्त्राः**–परोक्षकृताः ऋचः सर्वाभिः नामविभक्तिभिः युज्यन्ते। आख्यातस्य प्रथमपुरुषैश्च युज्यते, यथा–'इन्द्रो दिवः इन्द्र ईशे पृथिव्याः।'

2. **प्रत्यक्षकृता मन्त्राः**–ये मन्त्राः मध्यमपुरुषेण आख्यातस्य संयुक्ताः भवन्ति ते प्रत्यक्षकृताः इत्युच्यन्ते। यथा–'त्वमिन्द्र बलादधि" वि न इन्द्र मृधो जहि" मा चिदन्यत् विशंसत।'

3. **आध्यात्मिकाः मन्त्राः**–आध्यात्मिक्यः ऋचस्ताः भवन्ति, यासु उत्तमपुरुषस्य प्रयोगो भवति। किंच तासु ऋक्षु अहमिति सर्वनाम्नः प्रयोगो भवति। यथा–लवसूक्तस्य 'इन्द्रो वैकुण्ठः' इत्यादिका मन्त्राः।

(झ) निरुक्तस्य सामान्योद्देश्यानि–निरुक्तं विना वेदार्थज्ञानं दुःसम्पाद्यं भवति। अर्थात् निरुक्तेन वेदार्थानामवगमे सौविध्यं भवति।

1. 'समाम्नाय समाम्नातः स व्याख्यातव्यः' निघण्टेर्व्याख्या वर्तते।
2. 'इदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते' इति निरुक्तं वेदमन्त्राणामर्थनिर्णयं करोति।
3. 'तदिदं विद्यास्थानं व्याकरणस्य कात्स्न्यम्' व्याकरणस्य पूर्णता निरुक्तेनैव भवति।
4. 'अथापीदमन्तरेण पदविभागो न विद्यते' निरुक्तं विना पदविभागं कर्तुं न शक्यते।
5. 'ज्ञानप्रशंसा अज्ञाननिन्दा च' अर्थज्ञानस्य प्रशंसा तथा अज्ञानस्य निन्दा च श्रूयते।

(ञ) देवतानां स्वरूपाणि–दैवतस्वरूपनिरूपणे यास्काचार्यः चतुर्णां मतानां विचाराणां वा उल्लेखं करोति, यथा- **1. पौरुषविध्यम्, 2. अपौरुषविध्यम्, 3. नित्यमौभयविध्यम्, 4. कर्मार्थात्मोभयविध्यञ्च।** स्तुतिप्रकरणे देवतानां बाह्वादीनाम् अंगानां वर्णनं कृतमस्ति।

देवानां स्वरूपविषये कतिपय-आचार्याः देवानां पुरुषविधत्वं स्वीकुर्वन्ति। स्तुतीनां चेतनावतामेव अभिधाय-कत्वात्। किञ्च स्तुतिप्रकरणे देवतानां बाह्वादीनाम् अङ्गानां वर्णनं कृतमस्ति। अतः तेषां दृष्टिपथे पुरुषविधत्वमायाति। उदाहरणार्थम्–

"ऋष्वा त इन्द्र स्थविरस्य बाहू" (ऋक्-6/47/8)

अन्यच्च ते पौरुषविधिकैः द्रव्यसंयोगैः संस्तूयते। यथा–

आ द्वाभ्यां हरिभ्यामिन्द्र याहि " (ऋक्-2/18/4)

कल्याणीर्जाया सुरणं गृहे ते" (ऋक्-3/53/6)

अद्धीन्द्र पिव च प्रस्थितस्य" (ऋक्10/116/7) इति।

कतिपय-आचार्याः देवतानाम् अपुरुषविधित्वं मन्यन्ते। ते वदन्ति यद् देवतानाम् अपुरुषाकारत्वं दृश्यते। यथा–अग्निर्वायुरादित्यपृथिवीचन्द्रमसां प्रत्यक्षतः अपुरुषविधत्वं दृश्यते, तत्सामान्याद् इन्द्रादयोऽपि पुरुषविधा देवात्मा विशेषा एव सन्ति। किञ्च येन प्रकारेण चेतनवतां स्तुतयो दृश्यन्ते, तेनैव प्रकारेण अचेतनवतामपि स्तुतयो वेदेषु दृश्यन्ते। यथा–ओषधिपर्यन्तानि अक्षप्रभृतीनि इति। अन्यच्च येन प्रकारेण देवाः पुरुषविधिकैः अङ्गैः संस्तूयन्ते, तेनैव प्रकारेण अचेतनेषु अपि वेदेषु स्तुतयो भवन्ति, उदाहरणार्थम्–

अभिक्रन्दति हरितेभिरासभिः" (ऋक्-10/94/2) ग्रावास्तुतिः।

सुखं रथं युयुजे सिन्धुरश्विन्" (ऋक्-10/75/9) नदीस्तुतिः।

कतिपय-आचार्याः स्वीकुर्वन्ति यत् देवाः पुरुषविधा अपुरुषविधाश्च उभयात्मिकाः भवन्ति। पुरुषविधाः पृथिव्यादीनाम् एवं अपुरुषविधाः क्षितिजलादयः स्वीकुर्वन्ति। यथोक्तं महाभारते–

(क) पृथिवी स्त्रीरूपेण भारावतारणाय ब्रह्माणं ययाचे।

(ख) पुरुषेणाग्निरूपेण च खाण्डवं ददाह।

(ट) देवतानां संख्या–यास्काचार्येण '**तिस्रः एव देवता**

इति नैरुक्ताः। अग्निः पृथिवीस्थानः। वायुर्वा इन्द्रो वा अन्तरिक्ष स्थानः। सूर्यो द्युस्थानः।' इति मन्यते। प्रजापतिः अपि अग्निं वायुं सूर्यम् इति स्वीकरोति। तासामेव तिसृणां महाभाग्यात् एकात्मनामनेकधा विकुर्वन्ति। यथा–जातवेदाः, वैश्वानरः, वरुणः, रुद्रः, अश्विनौ, उषा, होता, अध्वर्युः, उद्गाता, ब्रह्मेति नाना नामानि भवितुम् अर्हन्ति। अत्र कर्मपृथक्त्वात् देवानां भेदः इति अनेकान्तिक एष दृष्टान्तः।

यदेतदुक्तं कर्मपृथक्त्वात् देवानां भेदः इति अनैकान्तिक एष दृष्टान्तः दृश्यते हि अनेके एकस्मिन् कर्मणि कर्मकर्तारो व्यापृता भवन्ति इति। यथा–पृथिव्यां मनुष्याः पशवो, देवाः इति स्थानैकत्वं सम्भोगैकत्वं च दृश्यते। अर्थात् येन प्रकारेण पृथिवी ओषध्युत्पत्तौ स्वकार्यारम्भे पर्जन्यवाय्वादित्य-कृतामुपकारम् अपेक्षते। यथोक्तम्–"त्रयः तपन्ति पृथिवीमनूपाः" इति।

(ठ) निरुक्तकारः निघण्टोः व्याख्याकारश्च–निघण्टोः एक एव व्याख्या साम्प्रतं समुपलब्धा भवति। तस्य व्याख्याकारः देवराजयज्वा वर्तते। निघण्टुनिर्वचनमेतस्य भाष्यस्य नाम विद्यते। भाष्यकारेण देवराजयज्वना स्वप्रतिज्ञानुसारं नैघण्टुककाण्डस्य एव निर्वचनमधिकेन विस्तरेण कृतम्। सैषा व्याख्या महत्त्वपूर्णा प्रामाणिको च उपादेया विद्यते। सुप्रसिद्धेन तान्त्रिकेण भास्कररायेण विरचितः एकः स्वल्पाकारः ग्रन्थः समुपलब्धो भवति। यस्मिन् निघण्टोः शब्दाः अमरकोशस्य शैल्यां श्लोकबद्धाः कृताः सन्ति।

ऐतिहासिकदृष्ट्या निघण्टुकालानन्तरं निरुक्तानां समयस्य शुभारम्भो भवति। अयमेव कालो निरुक्तयुगस्य। अस्मिन्नेव युगे निरुक्तस्य वेदाङ्गत्वं सिध्यति। निरुक्तानां संख्या चतुर्दश आसीत्। यास्कस्य उपलब्धे निरुक्ते द्वादशनिरुक्तकाराणां नामानि मतानि च निर्दिष्टानि सन्ति। अकारादिक्रमेण तेषां नामानि चेमानि सन्ति–

1. अग्रायणः 2. औपमन्यवः, 3. औदुम्बरायणः, 4. और्णनाभः, 5. कात्थक्यः, 6. कौष्टुकिः, 7. गार्ग्यः, 8. गालवः, 9. तैटीकिः, 10. वार्ष्यायणि, 11. शाकपूणिः, 12. स्थौलाष्ठीविः, 13. यास्कः, 14. शाकपूणिपुत्र कौत्सव्यः।

निरुक्ते द्वादशाध्यायाः सन्ति, अवसाने च परिशिष्टरूपौ द्वौ अध्यायौ स्तः। अनेन प्रकारेण समग्रः ग्रन्थः चतुर्दशाध्यायेषु विभक्तोऽस्ति। यास्कस्य कालः वैक्रमात् सप्तम-अष्टम वा शतकात् पूर्वमासीत्। विद्वत्सु ख्यातमस्ति यत् यास्कसदृशो भाषावैज्ञानिको विश्वस्मिन् दुर्लभ एवेति। सर्वे भाषावैज्ञानिकाः यास्कस्य ग्रन्थस्य महत्त्वं स्वीकुर्वन्ति। ग्रन्थस्यारम्भे यास्केन निरुक्तसिद्धान्तस्य वैज्ञानिकं प्रदर्शनं कृतम्। एषां काले वेदार्थस्यानुशीलनाय अनेके पक्षाः आसन्, येषां नामानि अधोलिखितानि सन्ति। तच्च यथा–

1. अधिदैवतम्, 2. अध्यात्मम्, 3. आख्यानसमयः, 4. ऐतिहासिकाः, 5. नैदानाः, 6. परिव्राजकाः, 8. याज्ञिकाः।

अत एव विद्वत्सु ख्यातमस्ति यत् यास्कसदृशो भाषावैज्ञानिको विश्वस्मिन् दुर्लभ एवेति। सर्वे भाषावैज्ञानिकाः यास्कस्य ग्रन्थस्य महत्त्वं स्वीकुर्वन्ति।

(ड) निरुक्तस्य टीकाकाराः–साम्प्रतं निरुक्तस्योपरि सर्वाभ्यो विस्तृता सम्पूर्णा च या टीका उपलब्धा भवति सा विद्यते दुर्गाचार्यवृत्तिः। निरुक्तं भाष्यरूपमस्ति। निरुक्त-वार्तिकस्य अस्तित्वमेकेनान्येन ग्रन्थेनापि प्रमाणिता भवति।

1. **दुर्गाचार्यः**–निरुक्तस्य प्राचीनोपलब्धष्टीकाकारो दुर्गाचार्य एवास्ति। एभिः निरुक्तस्य व्याख्यायां सूक्ष्मानुसन्धानेन कार्यं सम्पादितम्। ऋग्वेदस्य भाष्यकाराः उद्गीथमहाशयाः दुर्गाचार्यस्य वृत्त्या परिचिताः प्रतीयन्ते। आचार्योद्गीथस्य कालः विक्रमस्य सप्तमशतको विद्यते। परिणामतो दुर्गाचार्यस्य कालः सप्तमशतकाद् अर्वाचीनो नैव स्वीकर्तव्यः।

2. **स्कन्दस्वामी**–एतेषां टीका निरुक्तस्यान्यटीकाकारेषु प्रकाशिता विद्यते। सेयं टीका प्राचीना पाण्डित्यविलसिता च विद्यते। एषां पितुर्नाम भर्तृध्रुव आसीत्। समयश्च वैक्रमाब्दस्य सप्तमशतकस्य उत्तरार्धो विद्यते।

3. **वररुचिः**–अस्य महोदयस्य टीकाग्रन्थः 'निरुक्त-निचयः' विद्यते। निरुक्तसिद्धान्तानां प्रतिपादिका शतश्लोकानां स्वतन्त्रा व्याख्या विद्यते। निरुक्तस्यासां टीकानामनुशीलनेन वयं भाषाशास्त्रीयेष्वनेकज्ञातव्यविषयेषु प्राप्नुमः। सायणा-चार्यास्तु यास्कस्य दुर्गाचार्यस्य च अन्य- व्याख्या-काराणाञ्चाधमर्णतां धारयन्ति।

(ढ) निरुक्तस्य शैली–भाषाशास्त्रदृष्ट्या निरुक्तं एकमनुपमं रत्नमस्ति। निरुक्तस्य मान्यः सिद्धान्तोऽस्ति यत् सर्वे शब्दाः नामधातोः उत्पन्नाः भवन्ति। एतत् तथ्यम् आधुनिकतुलनात्मकभाषाशास्त्रस्य मेरुदण्डमस्ति। यास्केण स्ववैज्ञानिकमतस्य प्रस्थापनायै अनेका सबलाः युक्तयः प्रदत्ताः। यथा–'सत्य' शब्दः प्रकारद्वयेण सिद्ध्यति। 1.

तद्धितान्तः- सति+यत्=सत्य, 2. कृदन्तः- सन्तम्+एति+अच्=सत्य। यथार्थस्य भानं करोति तदेव सत्यमस्ति। समस्तानि नामानि धातुजानि सन्ति, वर्तमानस्य भाषाशास्त्रस्य च अयमेव मान्यः सिद्धान्तो विद्यते।

(ण) निरुक्त-व्याकरणयोः सामञ्जस्यम्- यास्काचार्येण कथितं यत्-'तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यम्', अस्मात् कारणात् एव वेदानां सम्यग् ज्ञानायाध्ययनाय च निरुक्त-व्याकरणयोरुभयोरपि साहचर्य-रूपेणावश्यकता भवति। व्याकरणस्य द्विविधं प्रयोजनमुक्तम्। तत्र (क) बाह्यप्रयोजने-'शब्दानां व्युत्पत्ति-लिङ्ग-वचन-कारकादीनां परिष्करणं समायाति। (ख) अन्तरंग-प्रयोजनन्तु 'रक्षोहागमलघ्वसन्देहाः' सन्ति। निरुक्तञ्च पूर्वोक्तानि कार्याणि तु सम्पादयति एव अपि तु व्याकरणापेक्षया 'शब्दार्थविवेचनस्यापि कार्यं विदधाति।' अपि च शब्दस्यार्थस्य च पारस्परिकोऽन्योन्याश्रयसम्बन्धाभावात् द्वयोः ऐक्यं सम्भवति। विशेषवः अर्थज्ञानाय निरुक्तं परमापेक्षितं भवति। धातूनां परिज्ञानाय निरुक्तमपि व्याकरणाधीनं भवति। अस्मिन् विषये यास्कस्य कथनमस्ति-'न संस्कारमाद्रियेत। विशवत्यो हि वृत्तयो भवन्ति'। इतिहासविदां विदुषां कथनमस्ति यत्-यास्काचार्यस्य काले वैयाकरणानां महत्संघटनमासीत्, तेषु शाकटायन-गार्ग्य-गालव-शाकल्यादयः प्रमुखाः सन्ति। महामुनिना पाणिनिनाप्यष्टाध्याय्यां सूत्रेषु तेषां मतानामुद्धरणं कृतम्। तथैव यास्काचार्योऽपि वैयाकरणसम्मतपदभेदं स्वीकृत्य निरुक्ते चतुर्विधान् नामाख्यातोपसर्गनिपाताख्यान् स्वीचकार। अत्र परवर्तिकालिकः पाणिनिः पदानां भेदद्वयमेव 'सुप्तिङन्तं पद'मिति सूत्रेऽङ्गीचकार। एतदतिरिक्तं यास्काचार्यः व्याकरणस्य पारिभाषिकशब्दानां व्युत्पत्तिविषयकं निर्वचनमपि करोति। यथा-सर्वनाम्नः सर्वाणि नामानि यस्य, सर्वेषु भूतेषु नमति गच्छति वा। शेषावतारः पतञ्जलिरपि महाभाष्ये निरुक्तसामग्र्याः स्थाने स्थाने सम्यगुपयोगं कृत्वा सामञ्जस्यभावं स्थापयति। यथा-

1. **दुष्टः शब्दः-**

> **दुष्टः शब्दः स्वरतो वर्णतो वा**
> **मिथ्याप्रयुक्तो न तमर्थमाह।**
> **स वाग्वज्रो यजमानं हिनस्ति**
> **यथेन्द्रशत्रुः स्वरतोऽपराधात्।।" इति।**

2. **चत्वारि-**

> **चत्वारि शृङ्गा त्रयो अस्य पादा**
> **द्वे शीर्षे सप्त हस्तासो अस्य।**
> **त्रिधा बद्धो वृषभो रोरवीति**
> **महो देवो मर्त्यां आविवेश।।" इति।**
> **चत्वारि वाक्परिमिता पदानि**
> **तानि विदुर्ब्राह्मणा ये मनीषिणः।**
> **गुहा त्रीणि निहिता नेङ्गयन्ति**
> **तुरीयं वाचो मनुष्या वदन्ति।।"इति।**

3. **सक्तुमिव-**

> **सक्तुमिव तितउना पुनन्तो**
> **यत्र धीरा मनसा वाचमक्रत।**
> **अत्रा सखायः सख्यानि जानते**
> **भद्रैषा लक्ष्मीर्निहिताऽधिवाचि।।**

उपर्युक्तेन विवेचनेनेदं सुस्पष्टं भवति यन्निरुक्त-व्याकरणयोर्पूरकत्वं सामञ्जस्यकरत्वं च विद्यते।

(प) निरुक्तस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—निरुक्तकारः वेदव्याख्याकारः कः?
उत्तरम्—यास्कः।

2. **प्रश्नः**— के सन्ति चतुर्दशनिरुक्तकाराः?
उत्तरम्—1. औपमन्यवः, 2. औदुम्बरायणः, 3. वाष्यायणि, 4. गार्ग्यः, 5. आग्रायणः, 6. शाकपूणिः, 6. और्णनाभः, 8. तैटिकः, 9. गालव, 10. स्थैलाष्ठीवि, 11. कौष्टुकि, 12. कास्थक्य, 13. यास्क, 14. शाकपूणिपुत्र कौत्सव्यः।

3. **प्रश्नः**— श्रोत्ररूपेण प्रतिष्ठितं वेदांगं किम्?
उत्तरम्— निरुक्तम्।

4. **प्रश्नः**—यास्कविरचिते निरुक्ते कति अध्यायाः वर्तन्ते?
उत्तरम्— (14) चतुर्दशाध्यायाः।

5. **प्रश्नः**—'चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च' कस्याः उक्तिरियम्?
उत्तरम्— यास्कस्य।

6. **प्रश्नः**— निरुक्तस्य प्रतिपाद्यो विषयः कतिविधः?
उत्तरम्— (5) पञ्चविधः। "वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन युक्तस्तदुच्यते पञ्चविधं निरुक्तम्।।

7. **प्रश्नः**— निरुक्तस्य का परिभाषा?
उत्तरम्— अर्थाऽवबोधे निरपेक्षतया पदजातं यत्र तद् निरुक्तम्।

8. **प्रश्नः**— निर्वचनशब्दस्य निष्पत्तिः कथं भवति?
उत्तरम्— निर् + वच् परिभाषणे + ल्युट् प्रत्ययेन निष्पन्नो भवति।

9. **प्रश्नः**— निरुक्तशब्दस्य निष्पत्तिः कथं भवति?
उत्तरम्— निर्+वच् परिभाषणे क्तप्रत्ययेन निष्पन्नो भवति।

10. **प्रश्नः**— व्युत्पत्तिशब्दस्य निष्पत्तिः कथं भवति?
उत्तरम्— (विशिष्ट-उत्पत्तिः) वि +उत् +पद +क्तिन् प्रत्ययेन निष्पन्नो भवति।

11. **प्रश्नः**—सर्वाभिर्नामविभक्तिभिर्युज्यन्ते प्रथमपुरुषैश्चाख्यातस्य के?
उत्तरम्— परोक्षकृताः मन्त्राः।

12. **प्रश्नः**—यास्कमते परोक्षादिभेदात् मन्त्रः कतिविधः?
उत्तरम्— त्रिविधः।

13. **प्रश्नः**— यास्कमते कति पदजातानि सन्ति?
उत्तरम्—चत्वारि।

14. **प्रश्नः**—यास्कमते आख्यातस्य लक्षणं किमस्ति?
उत्तरम्— भावप्रधानम्।

15. **प्रश्नः**—यास्कमते पदानां कति विभागाः विद्यन्ते?
उत्तरम्— (04) चत्वारः।

16. **प्रश्नः**—यास्कमते नामलक्षणं किम्?
उत्तरम्—सत्त्वप्रधानम्।

17. **प्रश्नः**— कति भावविकाराः विद्यन्ते?
उत्तरम्— (06) षट्।

18. **प्रश्नः**— निरुक्ते कः विधिः प्रयुक्तः?
उत्तरम्— वैदिकशब्दानां निर्वचनम्।

19. **प्रश्नः**— निरुक्तस्य उपजीव्यग्रन्थविशेषः कः?
उत्तरम्— निघण्टुः।

20. **प्रश्नः**— वर्णागमः, वर्णविपर्ययः, वर्णविकारः, वर्णविनाशः अनेकार्थधातुप्रयोगश्च कुत्र वरीवर्ति?
उत्तरम्— निरुक्ते।

21. **प्रश्नः**— निघण्टौ कति अध्यायाः सन्ति?
उत्तरम्— (05) पञ्च।

22. **प्रश्नः**— सम्प्रति निरुक्त-साहित्यं केन नाम्ना अभिहितं भवति?
उत्तरम्—भाषा-विज्ञानेन।

23. **प्रश्नः**— निरुक्तं कस्य भाष्यम् अस्ति?
उत्तरम्— निघण्टु इत्यस्य।

24. **प्रश्नः**— निघण्टुः किमस्ति?
उत्तरम्—वैदिक-शब्दानां कोषग्रन्थः।

25. **प्रश्नः**— निघण्टु इत्यस्य प्रथमाध्यायत्रयस्य किं नाम विद्यते?
उत्तरम्— नैघण्टुक-काण्डम्।

26. **प्रश्नः**— सायणचार्यस्य आश्रयदाता कः?
उत्तरम्— हरिहरः।

27. **प्रश्नः**— माधवीयम् कस्य भाष्यं वर्तते?
उत्तरम्— सायणस्य।

28. **प्रश्नः**— अनुस्वारस्य कृते मकारस्य प्रयोगः कुत्र भवति?
उत्तरम्— पद-पाठे।

29. **प्रश्नः**— आयामेन अधोगमनेन गात्राणां यः स्वरो निष्पद्यते सः कः?
उत्तरम्— अनुदात्तः।

30. **प्रश्नः**— आयामेन ऊर्ध्वगमनेन गात्राणां यः स्वरो निष्पद्यते सः कः?
उत्तरम्— उदात्तः।

31. **प्रश्नः**—उदात्तानुदात्तस्वरयोः समाहारः किं भवति?
उत्तरम्— स्वरितः।

32. **प्रश्नः**—दुर्गावृत्तिकारेण दुर्गाचार्येण कति निरुक्तकाराः उल्लिखिताः सन्ति?
उत्तरम्— (12) द्वादश।

33. **प्रश्नः**—यास्कमते 'उषा' पदस्य निर्वचनं किमस्ति?
उत्तरम्— उच्छति।

34. **प्रश्नः**—यास्कमते निशीथादारभ्य सूर्योदयपर्यन्तं कस्य कालः वर्तते?
उत्तरम्—अश्विनः।

35. **प्रश्नः**— 'ऋतावरी' कस्याः विशेषणम् अस्ति?
उत्तरम्— उषसः।

36. **प्रश्नः**— 'यो अस्कभायदुत्तरं सधस्थं' इति मन्त्रांशेन सम्बद्धः दैवतः कः?
उत्तरम्— विष्णुः।

37. **प्रश्नः**— वृद्धं च्यवनं नवयुवकं कः अकरोत्?
उत्तरम्— अश्विन्।

38. **प्रश्नः**— निरुक्ते कस्य विदुष उल्लेखो नास्ति?
उत्तरम्— व्याडेः।

39. **प्रश्नः**—यास्कसम्मतं समुद्र-पदस्य निर्वचनं अस्ति?
उत्तरम्—समुद्यन्ति एनमापः।

40. **प्रश्नः**— 'विश्वान् नरान् नयति' कस्य निर्वचनम् अस्ति?
उत्तरम्— वैश्वानरस्य।

41. **प्रश्नः**— 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" कस्येयमुक्तिः?
उत्तरम्— पतञ्जलेः।

42. **प्रश्नः**—'अर्थावबोधे निरपेक्षतया पदजातं यत्र उक्तं तत् निरुक्तम्' इति कस्येयमुक्तिः?
उत्तरम्—सायणाचार्यस्य।

43. **प्रश्नः**—यास्कमते अग्नेः निवासस्थानमस्ति?
उत्तरम्— पृथ्वीलोकम्।

44. **प्रश्नः**— विष्णोस्त्रीणि पदानि केन पूर्णानि भवन्ति?
उत्तरम्—मधुना।

45. **प्रश्नः**— देवतानां स्थानानि कुत्र वर्णितानि सन्ति?
उत्तरम्— निरुक्ते।

46. **प्रश्नः**— सदसद्भ्यामनिर्वचनीयं किम्?
उत्तरम्—अज्ञानम्।

47. **प्रश्नः**— भूतानां केभ्योंऽशेभ्यः ज्ञानेन्द्रियाणि उत्पद्यन्ते?
उत्तरम्— सात्विकेभ्यः।

48. **प्रश्नः**— निरुक्तस्य अर्थः किं भवति?
उत्तरम्—व्युत्पत्तिकारकः।

49. **प्रश्नः**— दुर्गाचार्यः निरुक्तोपरि कं ग्रन्थं अलिखत्?
उत्तरम्— दुर्गवृत्तिः।

50. **प्रश्नः**— चतुर्थोध्यायः किं कथ्यते?
उत्तरम्—नैगमकाण्डम्, एकपदिक-काण्डम् वा।

51. **प्रश्नः**— दैवतकाण्डस्य नाम्ना निघण्टु इत्यस्य कोऽध्यायः ज्ञायते?
उत्तरम्— पञ्चमोऽध्यायः।

52. **प्रश्नः**— सायणाचार्यस्य निघण्टु-निरुक्तस्य विषये किं मतमस्ति?
उत्तरम्—उभयोर्मिलित्वा निरुक्तवेदाङ्गः अस्ति।

53. **प्रश्नः**— निघण्टु इत्यस्य प्रथमम् अध्यायत्रयं किं कथ्यते?
उत्तरम्— नैघण्टुक-काण्डम्।

54. **प्रश्नः**—निरुक्तकारयास्कः स्थान-विभागस्य दृष्ट्या देवान् त्रिश्रेणीषु कथं विभाजितः?
उत्तरम्—1. पृथ्वीस्थानम्, 2. अन्तरिक्ष-स्थानम्, 3. द्यु-स्थानम्।

55. **प्रश्नः**— निरुक्तस्य सर्वे शब्दाः कुतः उत्पन्नाः भवन्ति?
उत्तरम्— नामधातोः।

56. **प्रश्नः**— नैघण्टुककाण्डं तु कति सन्ति?
उत्तरम्—त्रयोऽध्यायाः।

57. **प्रश्नः**— नैगमकाण्डे कति अध्यायाः?
उत्तरम्— चतुर्थाध्यायाः।

58. **प्रश्नः**— दैवतकाण्डम् इत्यत्र कति अध्यायाः?
उत्तरम्— पञ्चमाध्यायाः।

59. **प्रश्नः**— औदुम्बरायणस्य पितुः नाम किम्?
उत्तरम्—औदुम्बरः।

60. **प्रश्नः**— औदुम्बरायणस्य पितामहः कः?
उत्तरम्—उदुम्बरः।

61. **प्रश्नः**— निरुक्तदर्शनस्य प्रणेता एवं विवेचकः कः?
उत्तरम्— औदुम्बरायणः।

62. **प्रश्नः**— शाकपूणिः निरुक्तकारस्य समयः कः?
उत्तरम्— 800 ई०पू०।

63. **प्रश्नः**— यास्कस्य अपरं नाम किम्?
उत्तरम्—पारस्करः।

64. **प्रश्नः**— निरुक्तस्य विशेषप्रयोजनं किम्?
उत्तरम्— शब्दार्थविवेचनम्।

65. **प्रश्नः**— व्याकरणस्य बाह्यप्रयोजनं किम्?
उत्तरम्— शब्दानां व्युत्पत्ति-लिङ्ग-वचन-कारकादीनां परिष्करणम्।

66. **प्रश्नः**— व्याकरणस्य अन्तरंगप्रयोजनं किम्?
उत्तरम्— रक्षोहागमलघ्वसन्देहाः।

67. **प्रश्नः**— शास्त्रशब्दस्य निष्पत्तिः कथं भवति?
उत्तरम्—शास् अनुशिष्टौ इति धातोः ष्ट्रन् प्रत्ययेन निष्पन्नो भवति। (शिष्यते अनेन इति शास्त्रम्)

68. **प्रश्नः**— भाषाशब्दस्य निष्पत्तिः कथं भवति?
उत्तरम्— भाष् व्यक्तायां वाचि इति धातोः अ एवं टाप् प्रत्ययाभ्यां निष्पन्नो भवति।

69. **प्रश्नः**—यज्ञशब्दस्य निष्पत्तिः कथं भवति?
उत्तरम्—याज् धातोः नङ् प्रत्ययेन निष्पन्नो भवति।

70. **प्रश्नः**— ध्वनिशब्दस्य सिद्धिः कथं भवति?
उत्तरम्— ध्वन् धातोः इ प्रत्ययेन भवति।

71. **प्रश्नः**— दैवतस्वरूपनिरूपणे यास्काचार्यस्य कानि चत्वारि मतानि?
उत्तरम्—1. पौरुषविध्यम्, 2. अपौरुषविध्यम्, 3. नित्यमौभयविध्यम्, 4 कर्मार्थात्मोभयविध्यञ्च।

72. **प्रश्नः**— निरुक्ते त्रिविधा मन्त्राः के सन्ति?
उत्तरम्— 1. परोक्षकृता मन्त्राः, 2. प्रत्यक्षकृता मन्त्राः, 3. आध्यात्मिक्याः मन्त्राः।

73. **प्रश्नः**— निरुक्ते षड्भावविकाराः के सन्ति?
उत्तरम्—1. जायते, 2. अस्ति, 3. विपरिणमते, 4. वर्धते, 5. अपक्षीयते, 6. विनश्यतीति।

74. **प्रश्नः**— स्कन्दस्वामिनः पितुर्नाम किम्?
उत्तरम्— भर्तृध्रुवः।

75. **प्रश्नः**—परोक्षकृता मन्त्राः के भवन्ति?
उत्तरम्—ये मन्त्राः आख्यातस्य प्रथमपुरुषैश्च युज्यते।

76. **प्रश्नः**— प्रत्यक्षकृता मन्त्राः के भवन्ति?
उत्तरम्— ये मन्त्राः मध्यमपुरुषेण आख्यातस्य संयुक्ताः भवन्ति।

77. **प्रश्नः**—आध्यात्मिक्याः मन्त्राः के भवन्ति?
उत्तरम्—ये मन्त्राः उत्तमपुरुषेण आख्यातस्य संयुक्ताः भवन्ति।

78. **प्रश्नः**—नामजातिः का कथ्यते ?
उत्तरम्— 'सत्त्वप्रधानानि नामानि'।

79. **प्रश्नः**—आख्यातजातिः का कथ्यते?
उत्तरम्— 'भावप्रधानमाख्यातम्'।

80. **प्रश्नः**—उपसर्गाः किं कुर्वन्ति?
उत्तरम्— नानाविधानर्थान् अभिव्यंजयन्ति।

81. **प्रश्नः**— निपातः कः कथ्यते?
उत्तरम्— उच्चावचेषु निपतन्तीति निपाताः।

82. **प्रश्नः**— षट्सु वेदाङ्गेषु निरुक्तस्य स्थानं किम्?
उत्तरम्— चतुर्थस्थानम्।

83. **प्रश्नः**— वेदव्याख्याकारः कः?
उत्तरम्—दयानन्दः।

84. **प्रश्नः**— समानाक्षराणि कानि सन्ति?
उत्तरम्—अ आ इ ई उ ऊ ऋ ॠ।

85. **प्रश्नः**— सन्ध्यक्षराणि कानि सन्ति?
उत्तरम्— ए ओ ऐ औ।

86. **प्रश्नः**— अघोषवर्णाः के सन्ति?
उत्तरम्— क ख च छ ट ठ त थ प फ।

87. **प्रश्नः**— उष्मवर्णाः के सन्ति?
उत्तरम्— श ष स।

88. **प्रश्नः**— सोष्मवर्णाः के सन्ति?
उत्तरम्—वर्गे-वर्गे द्वितीय-चतुर्थौ।

89. **प्रश्नः**— रक्तसंज्ञकाः काः भवन्ति?
उत्तरम्— अनुनासिकाः।

90. **प्रश्नः**— व्यंजकसन्निपातः कः?
उत्तरम्— संयोगः।

91. **प्रश्नः**— ओकार आमन्त्रितजः कः?
उत्तरम्— प्रगृह्यः।

92. **प्रश्नः**— मध्यमपुरुषयोगाः के?
उत्तरम्— प्रत्यक्षकृताः मन्त्राः।

93. **प्रश्नः**— उत्तमपुरुषयोगाः के?
उत्तरम्— आध्यात्मिक्याः मन्त्राः।

94. **प्रश्नः**— "चेतनवृद्धि स्तुतयो भवन्ति" अत एव किम्?
उत्तरम्— पुरुषविधाः देवताः।

95. **प्रश्नः**—अग्निर्वायुरादित्यः पृथिवी चन्द्रमा इति दृश्यतेऽपुरुषविधम् अत एव?
उत्तरम्—अपुरुषविधाः देवताः।

96. **प्रश्नः—** पुरुषापुरुषोभयविधाः देवताः इति केन मन्यते?
उत्तरम्— महर्षियास्केण।

97. **प्रश्नः—**यास्कप्रणीते निरुक्ते ' "दैवतकाण्डम्" कस्मिन् अध्याये वर्णितमस्ति?
उत्तरम्—सप्तमे अध्याये।

98. **प्रश्नः—**स्वरितादनुदात्तानाम् परेषां स्वरः कः?
उत्तरम्—प्रचयः।

99. **प्रश्नः—** वेदे कस्य लकारविशेषस्य प्रयोगः?
उत्तरम्—लेट् लकारस्य।

100. **प्रश्नः—** शब्दः अनेकै तुभिः धात्वे निर्मितो भवति अयं मतं कस्य वर्तते?
उत्तरम्— यास्कस्य।

101. **प्रश्नः—**यास्कमतानुसारेण स्थानभेदेन कतिविधाः देवताः?
उत्तरम्—त्रिविधा।

102. **प्रश्नः—**यास्कमते निशीथादारभ्य सूर्योदयपर्यन्तं कस्य कालः विद्यते?
उत्तरम्—अश्विनयोः।

103. **प्रश्नः—** प्रो. युजीन-वरनफ-महोदयस्य शिष्यः कः?
उत्तरम्—मैक्समूलरः।

104. **प्रश्नः—**शर्मण्यदेशीय-भाषायां ऋग्वेदस्य पद्यानुवादकर्ता कः?
उत्तरम्—ग्रासमैनः।

105. **प्रश्नः—** सेन्टपीटर्सवर्ग-संस्कृत-जर्मन-महाकोशस्य सम्पादनकर्ता वेदव्याख्याकारः कः?
उत्तरम्—रडल्फ-राथः।

106. **प्रश्नः—**ऋग्वेदस्य प्रथम आंग्लअनुवादकः कः?
उत्तरम्— विल्सनः।

107. **प्रश्नः—**वैदिकदेवताविज्ञानस्य प्रणेता इति केन मन्यते?
उत्तरम्— मैक्समूलरेण।

6
व्याकरणशास्त्रविवेचनम्

(क) (M) (Code-25/73) (ख) (N) (Code-25) (ग) (O) (Code-25/73)

1. व्याकरणस्य परिभाषा-व्याकरणस्य निर्वचनानि-(निश्चितवचनानि निर्वचनानि)

(1) "व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृति-प्रत्यय-विभाग-द्वारा निष्पाद्यन्ते शब्दाः अनेनेति व्याकरणम्", वि आङ् इत्युपसर्गपूर्वक कृञ् धातोः "करणाधिकरणयोश्च" इति सूत्रेण ल्युटि प्रत्ययेन सिद्ध्यति व्याकरणमितीदं पदं भवति। (2) व्याक्रियन्ते-पृथक्क्रियन्ते साधुशब्दाः, असाधुशब्देभ्यः प्रकृतिप्रत्ययादिज्ञानमहिम्नाऽनेनेति व्याकरणम्। (3) व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः येनेति व्याकरणम्। (4) व्याक्रियन्ते-परिज्ञायन्ते शब्दाः अनेनेति व्याकरणम्। (5) शब्दानुशासनं व्याकरणम्। (6) लक्ष्यलक्षणं व्याकरणम्। (7) प्रकृतिप्रत्ययविभागपूर्वकशब्दव्युत्पत्त्याधायकं शास्त्रं व्याकरणम्। (8) भाषायाः व्यावहारिकविश्लेषणमेव व्याकरणम्। (9) आङ्ग्लभाषायां Grammar इति पदं Grammatike techne इति ग्रीकभाषापदात् निष्पन्नम्। अस्यार्थः भवति-the art of letters. (10) व्याकरणं केवलं संरचनायाः व्याकरणमस्ति। (11) व्याकरणं नाम शब्दसाधुत्वव्यवस्थापकं शास्त्रम्। (12) Grammar is a set of rules and regulations which controls and teaches us the correct use of the language. (13) प्रथमो हि विद्वांसो वैयाकरणाः। (14) शब्दज्ञानजनकं व्याकरणम्। (15) अनुशिष्यन्तेऽपशब्देभ्यः पृथक् कृत्य कथ्यन्ते साधुशब्दानुशासनम्। (16) व्याकरणन्तु वेदानां वेदः। (17) व्याकरणज्ञाने सर्ववेदपारायणजं पुण्यमिति। (18) शब्दसाधुत्वबोधकः सूत्रात्मको लक्ष्यलक्षणात्मको वा ग्रन्थविशेषः व्याकरणम्। (19) एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति। (20) प्रयोगशरणं व्याकरणम्। नावैयाकरणाय निर्ब्रूयात्। (21) शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति।

2. व्याकरणाध्ययनस्य प्रयोजनानि-(व्याकरणस्य स्वरूपं, महत्त्वम्, फलं उपयोगश्च)

1. यो वेद वेदवदनं सदनं हि सम्यग्
ब्राह्मया स वेदमपि वेद किमन्यशास्त्रम्।
यस्मादतः प्रथममेतदधीत्य विद्वान्
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी।।

वस्तुतः व्याकरणज्ञानाभावे वेद-वेदान्त-स्मृति-पुराणेतिहास-काव्यादिशास्त्रान्तरेषु प्रवेशाधिकारिणः न भवन्ति, इति भास्कराचार्येण भणितम्।

2. रक्षोहागमलघ्वसंदेहा प्रयोजनम्–रक्षा इति– व्याकरणाध्ययनावगतवर्णलोपागमवर्णविकारो गृहीतप्रकृति-प्रत्ययविभागो वेदान् पालयिष्यतीत्येतदर्थमध्येयं व्याकरणम्। **ऊह इति–**प्रकृतिवद्विकृतिः कर्त्तव्येति मीमांसकसिद्धान्तात् प्रकृतियागे पठितस्य अग्नये त्वा जुष्टं निर्वपामीति मन्त्रस्थाग्निपदस्य सौर्यं चरूं निर्वपेत् ब्रह्मवर्चसकाम इति सौर्ये चरौ विकृतियागे सूर्यसम्बन्धिनिर्वापप्रकाशनाऽसमर्थत्वात्तदपहाय तत्स्थाने सूर्यायेत्यूहार्थमध्येयं व्याकरणम्। **आगम इति–**ब्राह्मणेन निष्कारण इत्यादिश्रुत्या व्याकरणस्य पदपदार्थावगमद्वारा वाक्यार्थावगमोपयोगित्वात्तदनध्ययन-प्रयुक्तस्य वेदार्थाऽज्ञानप्रयुक्तस्य च प्रत्यवायस्य परिहारार्थमध्येयं व्याकरणम्। **लघ्विति–**शब्दानामानन्त्यात् प्रक्रियारूपलघुभूतोपायज्ञानार्थमध्येयं व्याकरणम्। **असन्देह इति–** स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेत्यत्र कर्मधारयो बहुव्रीहिर्वेति सन्देहप्रागभावपरिपालनार्थमध्येयं व्याकरणम्।

आनुषङ्गिकानि प्रयोजनानि–तेऽसुरा हेलयो हेलय इति

कुर्वन्तः पराबभूवुस्तस्माद् ब्राह्मणेन म्लेच्छितवै, नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः। म्लेच्छा मा भूमेत्यध्येयं व्याकरणम्। अत्र पदद्विर्वचने कर्त्तव्ये वाक्यद्विर्वचनं लत्वञ्च कृतमसुरैः। एवञ्च शास्त्रबोधितविपरीतोच्चारणेन निन्द्या मा भूमेत्यध्येयं व्याकरणम्। एवं च 1. दुष्टः शब्दः, 2. यदधीतम्, 3. यस्तु प्रयुंक्ते, 4. अविद्वांसः 5. विभक्तिं कुर्वन्ति, 6. यो वा इमाम्, चत्वारि इत्यादि महाभाष्योदाहरणानि अपि व्याकरणमध्ययनानां प्रयोजनानि सन्ति।

3. "पाणिनीये महाभाष्ये पदसाधुत्वलक्षणं सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन इति पराशरपुराणे कथितः। 4. यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्, स्वजनः (सम्बन्धि) श्वजनो (कुत्ता) माभूत् सकलः (सम्पूर्णः) शकलः (खण्डः) सकृत् (एकवार) शकृत् (विष्ठा)। 5. 'व्याकरणज्ञाने सर्ववेदपरायणजं पुण्यमिति" अतः व्याकरणं वेदानां वेदः इति नागेशेनोक्तम्। 6. वाक्यपदीयकारभर्तृहरिः ब्रह्मकाण्डे व्याकरणाध्ययनं उत्तमतपः मन्यते-"आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः, प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः"।। व्याकरणं स्मृतिः एवं च परब्रह्मप्राप्तेः साधनं स्वीक्रियते वाक्यपदीयकारः-"यदेकं प्रक्रियाभेदैर्बुधा प्रविभजन्ते, तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते"।

7. सम्यग् शब्दप्रयोगे लाभः

व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
भीतापतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत्।।
एवं वर्णा प्रयोक्तव्या नाव्यक्ता न च पीडिताः।
सम्यग् वर्णप्रयोगेन ब्रह्मलोके महीयते।।

मानवविचाराणाम् अभिव्यक्तिं, शुद्धां, परिष्कृतां, परिमार्जितां च कर्तुं भाषाविश्लेषणाय व्याकरणम् आवश्यकम्। व्याकरणं वेदपुरुषस्य मुखमिति। येन प्रकारेण शरीरे मुखस्य स्थानं प्रधानं भवति तेनैव प्रकारेण वेदाङ्गेषु व्याकरणस्य स्थानं प्रधानं विद्यते। रक्षा-ऊह-आगम-लघु-असंदेहः इति पञ्च प्रयोजनानि व्याकरणस्य वररुचिना वर्णितानि। व्याकरणविद्यायां दर्शनशास्त्रस्योपयोगाः अत्यधिकाः सन्ति। मनोरमायां प्रौढानां मनो रमयतीत्यर्थिकायाम् किं प्रौढत्वम्? "सकलदर्शनार्थ-ज्ञानपूर्वकमहाभाष्यगूढार्थज्ञानवत्त्वम् प्रौढत्वम्"। महाभाष्यविचारसमये सकलदर्शनार्थस्य तत्र तत्र ध्वननात्। अयमाशयः—'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म, ब्रह्मैवेदं सर्वम् 'आत्मैवेदं सर्वम्' इत्यादिभिः श्रुतिभिः जगत्कारणस्य सत्यत्वमेकत्वं ब्रह्मत्वम् आत्मत्वञ्च यथा प्रतिपाद्यते तथा "वागेवार्थं पश्यति वागेवार्थं ब्रवीति वागेवार्थं निहितं सन्तनोति।" ओमित्येतदक्षरमिदं सर्वम्"ओमिति ब्रह्म" इत्यादिभिः शब्द-स्वरूपतापि प्रतिपाद्यत इति शब्दब्रह्मैव जगत्कारणम्। शब्दब्रह्मप्राप्त्युपायत्वं च वाक्यपदीये भणितं भर्तृहरिमहोदयाः-

तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्त्वज्ञो ब्रह्मामृतमश्नुते।।

इति कारिकया शब्दसंस्कारद्वारा व्याकरणस्यावगम्यते। शब्दसंस्कारस्य सिद्धत्वं सिद्ध्युपायत्वात्।

3. साधुशब्दप्रयोगपरिणामः (सम्यग् शब्दप्रयोगे लाभः) मानवविचाराणाम् अभिव्यक्तिं, शुद्धां, परिष्कृतां, परिमार्जितां च कर्तुं भाषाविश्लेषणाय व्याकरणम् आवश्यकम्। व्याकरणं वेदपुरुषस्य मुखमिति। येन प्रकारेण शरीरे मुखस्य स्थानं प्रधानं भवति तेनैव प्रकारेण वेदाङ्गेषु व्याकरणस्य स्थानं प्रधानं विद्यते। रक्षा-ऊह-आगम-लघुः-असंदेहः इति पञ्च प्रयोजनानि व्याकरणस्य वररुचिना वर्णितानि। अयमाशयः— 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म' ब्रह्मैवेदं सर्वम् 'आत्मैवेदं सर्वम्' इत्यादिभिः श्रुतिभिः जगत्कारणस्य सत्यत्वमेकत्वं ब्रह्मत्वम् आत्मत्वञ्च यथा प्रतिपाद्यते तथा "वागेवार्थं पश्यति वागेवार्थं ब्रवीति वागेवार्थं निहितं सन्तनोति। "ओमित्येतदक्षरमिदं सर्वम् ओमिति ब्रह्म" इत्यादिभिः शब्द-स्वरूपतापि प्रतिपाद्यत इति शब्दब्रह्मैव जगत्कारणम्। शब्दब्रह्मप्राप्त्युपायत्वं च वाक्यपदीये भणितं भर्तृहरिमहोदयाः—

तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्त्वज्ञो ब्रह्मामृतमश्नुते।।

इति कारिकया शब्दसंस्कार-द्वारा व्याकरणस्यावगम्यते। शब्दसंस्कारस्य सिद्धत्वं सिद्ध्युपायत्वात्।

अर्थप्रत्यायकत्वस्य समानेऽपि साधुशब्दाः धर्मसाधनत्वेन बोधिताः विद्यन्ते। भाष्ये समानायाम् अर्थावगतौ शब्दैश्चाप-शब्दैश्च शास्त्रेण धर्मनियमः क्रियते, शब्देनैव अर्थो अभिधेयो भवति। "एवम् एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुक् भवति। साधुशब्दप्रयोगस्य लाभम् उपस्थापयन् भगवान् भास्करः उद्धरति। यथा-

यस्तु प्रयुंक्ते कुशलो विशेषे,
शब्दान् यथावद् व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र,
वाग्योगविद् दुष्यति चापशब्दैः।।

यो शब्दान् जानाति अपशब्दानप्यसौ जानाति। यथैव हि शब्दज्ञाने धर्मः, एवमपशब्दज्ञानेऽधर्मः। एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः भवन्ति। शब्दप्रयोगसमये अध्यापनकाले वा पाणिनिमहोदयस्य निर्देशनम्—

व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
भीतापतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत्।।
एवं वर्णा प्रयोक्तव्या नाव्यक्ता न च पीडिताः।
सम्यग् वर्णप्रयोगेन ब्रह्मलोके महीयते।।

समुचितज्ञानाभावे तु—

मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति,
यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

4. व्याकरणस्य पद्धतिश्च-व्याकरणस्य परम्पराक्रमः—ब्रह्मा संस्कृतव्याकरणस्य आदिज्ञाता अस्तीति मन्यते। ब्रह्मा वृहस्पतये प्रोवाच, अयमेव वृहस्पति इन्द्राय प्रतिपदोक्तानां शब्दानाम् उपदेशं चकार। वृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय, भरद्वाजः ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः इति ऋक्तन्त्रे 1/4 उद्धृतः। अक्षरसमाम्नाये शिक्षा वेदांगस्य मौलिकप्रमुखः अंगः वर्त्तते। एतेन स्पष्टं भवति यत् शिक्षा वेदांगस्य आदि-प्रवर्त्तकः सृष्टिकर्ता ब्रह्मा अस्ति। द्वितीयप्रवक्ता अंगिरः पुत्रो बृहस्पतिः देवानां पुरोहितः अस्ति। तृतीयप्रवक्ता देवराजः इन्द्रः, चतुर्थो भरद्वाजः, पंचमः ऋषयः षष्ठ ब्राह्मणः वर्तन्ते। इन्द्रेण व्याकरणं सम्यग् परिमार्जितं च कर्तुं पदानां प्रकृति-प्रत्ययादीनां विभाजनं कृतम्। आधुनिकाः विद्वांसः प्रधानरूपेण व्याकरणशास्त्रप्रवर्तकान् अष्टावेव स्वीकुर्वन्ति, यथोच्यते-

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्राः जयन्त्यष्टौ च शाब्दिकाः।।

इन्द्रस्य माता अदितिः पिता च कश्यपप्रजापतिः। इत्थं अनेके वैयाकरणाः आसन्, तेषु प्रमुखाः सन्ति-

(1) ब्रह्मा	प्रथमः वैयाकरणः	(2) बृहस्पतिः	द्वितीयः वैयाकरणः
(3) इन्द्रः	तृतीयः वैयाकरण (ऐन्द्रम्)	(4) भारद्वाजः	चतुर्थः भारद्वाजव्याकरणम्
(5) भागुरिः	भागुरिव्याकरणम्	(6) काशकृत्स्नः	काशकृत्स्नव्याकरणम्
(7) वैयाघ्रपदः (काशिकायाम्)	वैयाघ्रपदव्याकरणम्	(8) माध्यन्दिनिः (काशिकायाम्)	माध्यन्दिनि व्याकरणम्
(9) शौनकः	शौनकी व्याकरणम्	(10) गौतमः (भाष्यकारेणोल्लिखितः)	गौतमव्याकरणम्
(11) व्याडिः (भाष्य-कारेणोल्लिखितः)	व्याडिव्याकरणम्	(12) कश्यपः पाणिनि अष्टाध्याय्याः	कश्यपव्याकरणम्
(13) वशिष्ठः	वशिष्ठव्याकरणम्	(14) अत्रिः	अत्रेः व्याकरणम्
(15) गालवः (पाणिनि-अष्टाध्याय्याः)	गालवीयव्याकरणम्	(16) आपिशलिः	आपिशलि-व्याकरणम्
(17) चाक्रवर्मणः (कश्यपस्य पुत्रः)	चाक्रवर्मणस्य व्याकरणम्	(18) शाकटायनः	शाकटायनव्याकरणम्
(19) शाकल्यः	शाकल्य-व्याकरणम्	(20) सेनकः	सेनकव्याकरणम्
(21) स्फोटायनः (स्फोट-सिद्धान्तस्य-प्रवर्तकः)	स्फोटायनव्याकरणम्	(22) गार्ग्यः	गार्ग्यस्य व्याकरणम्

(23) पाणिनिः	अष्टाध्यायी	(24) कात्यायनः (वार्तिककारः)	पाणिनिव्याकरणोपरि वार्तिकरचना
(25) पतञ्जलिः	महाभाष्यम्	(26) भट्टोजिदीक्षितः	सिद्धान्तकौमुदी, प्रौढमनोरमा, इत्यादि
(27) आचार्य वरदराजः	लघुसिद्धान्तकौमुदी,	(28) नागेशभट्टः	लघुशब्देन्दुशेखरः, परिभाषेन्दुशेखरः मध्यसिद्धान्तकौमुदी,
(29) कौण्डभट्टः	वैयाकरणभूषणसारः	(30) भर्तृहरिः	वाक्यपदीयम्,

पाणिनि-अष्टाध्यायीग्रन्थस्य साक्षात्सम्बन्धो माहेश्वर-सम्प्रदायमधिकृत्य विद्यते। विद्याकामः पाणिनिः सनकादि-सिद्धैः सह भगवतः शंकरस्याराधनां कृतवान्, याभिः आराधनाभिः लोककल्याणकारी शिवः चतुर्दशसूत्रात्मकं वर्ण-समाम्नायम् अपौरुषेयरूपम् पाणिनये प्रदत्तवान्। नन्दिकेश्वर-कृतकाशिकायाः द्वौ श्लोकौ अस्याः वार्तायाः सम्पादकौ स्तः। **यथा–**

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपंचवारम्।
उद्धर्त्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥

अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम्।
धात्वर्थं समुपदिष्टं पाणिन्यादीष्टसिद्धये।

अथ वर्णसमाम्नायः—1. अइउण् 2. ऋलृक् 3. एओङ् 4. ऐऔच् 5. हयवरट् 6. लण् 7. ञमङणनम् 8. झभञ् 9. घढधष् 10. जबगडदश् 11 खफछठथचटतव् 12. कपय् 13. शषसर् 14. हल् इति माहेश्वराणि सूत्राणि। सः अयम् अक्षर-समाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चक्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः सर्ववेदपुण्यफलप्राप्तिश्चास्य ज्ञाने भवति मातापितरौ चास्य स्वर्गे लोके महीयेते।

5. शब्दार्थसम्बन्धः–शब्दश्रवणानन्तरं कस्यचिद् तदर्थविशेषज्ञानं भवति, कस्यचिन्न भवति। अतः शब्दस्य अर्थविशेषेण सह सम्बन्धोऽवश्यमेवाऽस्ति यस्य ज्ञानेनैव शाब्दबोधो भवतीति प्रतीयते। पातञ्जलमहाभाष्ये कात्यायनेन **'सिद्धे शब्दार्थसम्बन्धे' 'सिद्धं तु नित्यशब्दत्वात्'** इति वार्तिकाभ्यां शब्दार्थसम्बन्धानां नित्यत्वमुक्तम्। यथोच्यते भाष्यकृता शब्दार्थसम्बन्धविषये **"सिद्धे शब्दार्थसम्बन्धे"** इति वार्तिकस्य व्याख्यां प्रतिपादयन्—सिद्धे शब्देऽर्थे सम्बन्धे च नित्यपर्यायवाची सिद्धः शब्दः। महाभाष्ये संग्रहे एतत्प्राधान्येन परीक्षितं नित्यः शब्दः, नित्येषु च शब्देषु कूटस्थैर-विचालिभिर्वर्णैर्भवितव्यम्। तद्यथा–सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशम् इति। शब्दनित्यतावादिनां मीमांसकानां स्फोटवादिनां वैयाकरणानां मते शब्दनित्यत्वं सुपपादम्। एवं शब्दार्थयोः सम्बन्धोऽपि नित्य एव। अत्र आकृतिमेव मत्वा **'सिद्धे शब्देऽर्थे सम्बन्धे च'** इति विग्रहः क्रियते, यतः आकृतिर्हि नित्या, द्रव्यमनित्यम्। अथवा द्रव्य एव पदार्थे एष विग्रहो न्याय्यः 'सिद्धे शब्देऽर्थे सम्बन्धे च'। द्रव्यं हि नित्यम् आकृतिः अनित्या। यथा लोके–सुवर्णं कयाचिदाकृत्या युक्तः पिण्डो भवति, पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते, रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते, कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते। पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाकृत्या युक्तः खदिराङ्गारसुवर्णे कुण्डले भवतः। आकृतिरन्या चान्या च भवति, द्रव्यं पुनस्तदेव। आकृत्युपमर्देन द्रव्यमेव अवशिष्यते। एतदर्थ आकृतौ अपि पदार्थः, एष विग्रहो न्याय्यः, 'सिद्धे शब्देऽर्थेसम्बन्धे च' इति।

नैयायिकाः 'अस्मादच्छब्दादयमर्थो बोद्धव्यः' इति स्वीकुर्वन्ति। प्राचीनवैयाकरणाः शब्दे बोधकत्वमेव शब्दार्थयोः सम्बन्धं स्वीकुर्वन्ति। नव्यवैयाकरणास्तु पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः इति मन्यन्ते। न च शब्दार्थ-योस्तादात्म्यस्वीकारे मधुशब्दोच्चारणे मुखे माधुर्य-रसास्वादापत्तिः वहिशब्दोच्चारणे मुखे दाहापत्तिः इति वाच्यम्, भेदाभेदस्योपपादितत्वात्। सम्बन्धशब्दे प्रतिपाद्ये योग्यतारूपः सम्बन्धः एव। लोकानां व्यवहारात् शब्दार्थयोस्तादात्म्यसम्बन्धः स्पष्टं प्रतीयते।

6. महाभाष्यदृष्ट्या शब्दपरिभाषा–शेषावतार-पतञ्जलिः व्याकरणशास्त्रे महाभाष्यनामकं ग्रन्थं चकार।

पाणिनीयव्याकरणमाश्रित्य शब्दानुशासने सूत्रवार्तिकयोः व्याख्यानं कृतवान्। सम्पूर्णमहाभाष्ये 84 आह्निकानि वर्तन्ते। अह्ना निर्वृत्तम् आह्निकम् इति। एकस्मिन् दिवसे यावत्पर्यन्तम् अंशं छात्रान् उपदिदेश अध्यापकः पतञ्जलिः तावान् अंशो हि आह्निकपदेन व्यवह्रियते। शब्दाः नित्याः अनित्याश्च भवन्ति। गौरित्यत्र कः शब्दः? शब्दार्थयोरभेदेन लोके व्यवहार-दर्शनाच्छब्दस्वरूपनिर्धारणाय पृच्छति, 'गौ' इति विज्ञाने प्रतिभासमानेषु वस्तुषु कः शब्दः इत्यर्थः। अत्र सास्नालांगूलककुदविषाण्यर्थरूपं यत् तत्सर्वं द्रव्यम्, यद् इंगितं चेष्टितं, निमिषितं सा क्रिया, यच्छुक्लो नीलः कपिलः कपोतः इति तद् गुणो नाम, तद्भिन्नेष्वभिन्नं, छिन्नेष्वच्छिन्नं सामान्यभूतं यत् तत्सर्वम् आकृतिर्नाम, तर्हि कः शब्दः? इत्येतस्य प्रश्नस्य उत्तरमाह– **"येनोच्चारितेन सास्नालांगूलककुदखुर-विषाणिनां सम्प्रत्ययो भवति स शब्दः।"** अथवा "प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा–शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवकः, इति ध्वनिं कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः। वैयाकरणानां मते शब्दो द्विविधः, स्फोटरूपो ध्वनिरूपश्च। तत्र स्फोटस्यैव मुख्यशब्दत्वाद् ध्वनेश्च तदभिव्यंजकत्वेन गौणत्वात् प्रथमतोऽस्य स्फोटात्मनः शब्दस्य स्वरूपं भगवता महाभाष्यकृता प्रोक्तम्। तदनन्तरञ्च ध्वनिरूपशब्दस्य। अतः गौः, अश्वः, पुरुषः, हस्ती इत्यादयः शब्दः।

7. शब्दब्रह्म शब्दब्रह्मशक्तयश्च–आचार्यभर्तृहरेः मतानुसारं अयं संसारः शब्दस्वरूपस्य ब्रह्मणो विवर्तः। अतात्त्विकान्यथाभावो विवर्तः। तादृश एव विवर्तोऽयं संसारः शब्दस्येत्याह भर्तृहरिः–

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥
(वाक्य–1)

अर्थात् यद् अनादिनिधनम् उत्पत्तिविनाशरहितम्, अत एव नित्यम्, अक्षरम् व्यापकं शब्दतत्त्वम् तद् ब्रह्म, यतो जगतः संसारस्य प्रक्रिया उत्पत्तिस्थितिलया अर्थभावेन–घटपटाद्यात्मना विवर्तते, अतात्त्विकान्यथाभावापन्नं भवति। अविनश्वरं नित्यं व्यापकं ब्रह्मैव अर्थभावेन नदीपर्वतगोघटपटादिरूपेण विवर्तते, अतात्त्विकान्यथाभावापन्नम्भवतीति भावः।

एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्।
अपृथक्त्वेपि शक्तिभ्यः पृथक्त्वेनेव वर्तते॥
(वाक्य–2)

अर्थात् शब्दब्रह्म 'एकमेवाद्वितीयम्' अद्वैत एक एवाभवत्' 'सलिल एवैको द्रष्टा' इत्यादिश्रुतिभिः एकमेवाम्नातं कथितं तत् शक्तिव्यपाश्रयात्। शक्तिसम्पन्नः ब्रह्म (शब्दः) जगतः कारणं वर्तते। अस्मिन् विषये श्रुत्यादिषु वर्णितं एकमेव-अद्वितीयञ्च अवबोध्यते। स ब्रह्म (शब्दः) शक्त्याश्रयश्च वर्तते। शक्तीनां घटपटादिविचित्रकार्यजननयोग्यतारूपाणां व्यापाराश्रयात् आश्रयात् वा शक्तिगतभेदारोपादिति यावत् पृथक् रूपे **"प्रणव एकैकस्त्रेधा व्यभज्यत"** इति श्रुतेः सलिलशब्देन ब्रह्म (शब्द) इति मन्यते। अत्र प्रणवः अविवृत्तं ब्रह्म त्रेधा त्रेधा प्रकारेण ऋग्वेद-यजुर्वेद-सामवेदरूपेण विभक्तम् अभूत्। अस्मिन् ब्रह्मणि वास्तविकभेदो नास्ति, किन्तु शक्तेः विचित्रकार्यसम्पादनकर्तृत्वमिति अवबोध्यते। यथा–आवर्तबुदबुदतरङ्गाख्या जलविकाराः परस्परं भिन्ना अपि जलमेव वर्तते, एवं घटपटादयो विकाराः परस्परं भिन्ना अपि पृथिव्येव अवबोध्यते। तत्सदृशमेव शब्दब्रह्म शक्तिरूपेण भिन्नत्वेऽपि स्वतोऽभिन्नत्वमिति बोध्यते। अर्थात् शब्दब्रह्मणः एकमेव स्वाभाविकः काल्पनिकश्च भेदो विद्यते।

यस्य शब्दब्रह्मणः काल्पनिकभेदयुक्ता कालशक्तिः एका स्वतन्त्रशक्तिः विद्यते। येन कारणेन ब्रह्म अनन्तशक्तिमान् इति मन्यते, तदनुसारं जन्मादयः जायतेऽस्ति (विपरिणमते, वर्द्धते, ह्रसति, नश्यति) इत्येवं रूपा षड् विकाराः भावभेदस्य योनयः कारणानि भवन्ति। समस्तकारणशक्तिः कालस्य आज्ञानुसारं कार्यं करोति। कालः एकः स्वतन्त्रशक्तिः वर्तते। अतः क्रमेण कार्यं उत्पन्नो भवति। एक–काले सर्वाणि कार्याणि उत्पन्ना न भवन्ति। यथोक्तं भर्तृहरिणा–

अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः।
अनन्तादयो विकाराः षड् भावभेदस्य योनयः॥
(वाक्य.ब्र.–3)

एकमेव ब्रह्म सर्वशक्तीति प्रयोगसिद्धे अविद्याकल्पितस्य भावभेदस्य अपारमार्थिकत्वात् कार्यनानात्वोन्नीयमानः शक्तिभेद एकस्यैव युक्तो न तु स्वरूपभेद इति स्वीकरोति। यथोच्यते भर्तृहरिणा–

एकस्य सर्वबीजस्य यस्य चेयमनेकधा।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः॥
(वाक्य.ब्र.–4)

शब्दब्रह्मशक्तयः–**'शब्दशक्तिमूलो ध्वनिः'** इत्यनेन सिध्यति यत् अस्ति शब्देषु शक्तिः। तया शक्त्यैव शब्दः स्व

अभीष्टम् अर्थं बोधयति। शक्त्यभावे अर्थबोधो न भवति। घण्टावादनसमये प्रधानशब्दश्रवणोत्तरं यथा क्षोदीयान्-परस्तत्सदृशो जायते प्रतिशब्दः तथा यत्र शब्दप्रतीत्यनन्तरमेव भवति व्यङ्ग्यार्थप्रतीतिः, सः शब्दशक्तिमूलो ध्वनिः इति ज्ञायते। शाब्दबोधे पदज्ञानं कारणं भवति। पदज्ञान-जन्यपदार्थस्मरणे शक्तिज्ञानं सहकारिकारणं भवति। अवच्छेदकभेदेन तदसहत्वासहत्वाभ्यां शब्दार्थोभय-शक्तिमूलकता साहित्यकारैः स्वीक्रियते। यथा मम्मटः–

अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः।
शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः।
(काव्यप्रकाशे)

विश्वनाथश्च–

शब्दार्थोभयशक्त्युत्थे व्यङ्ग्येऽनुस्वानसन्निभे।
ध्वनिर्लक्ष्यक्रमव्यङ्ग्यस्त्रिविधः कथितो बुधैः।।
(साहि०दर्प०)

का नाम शक्तिः इति जिज्ञासायां नागेशेनोच्यते–

शब्दार्थयोस्तादात्म्यमेव शक्तिः(उद्योत, महा०आ०1)।

भर्तृहरिणा वाक्यपदीये प्रोच्यते–

विषयत्वमनापन्नैः शब्दैर्नार्थः प्रकाश्यते।
स सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः।।
(वाक्य०1/56)

विषयत्वं प्राप्ता एव शब्दा अर्थबोधनक्षमाः इति महाभाष्ये निर्दिश्यते–

शब्द उपलब्धोऽर्थं प्रत्याययति न सत्तामात्रेण।
(महा०1/1/68)

शब्दशक्तिप्रकाशिकायां जगदीशः कथयति–

वाक्यभावमनाप्तस्य सार्थकस्यावबोधतः।
सम्पद्यते शाब्दबोधो न तन्मात्रस्य बोधतः।।
(शब्द०श्लो०12)

व्युत्पत्तिवादे गदाधरभट्टो तत्त्वचिन्तामणौ गङ्गेशश्च शब्दखण्डे शक्तिं विस्तरेण विवेचयतः। वृत्तेः शक्तेर्वा लक्षणं तत्र क्रियते–'इदं पदमिममर्थं बोधयेत्',' अस्मात् शब्दादयमर्थो बोधव्यः' एवं प्रकारः संकेतः शक्तिः। नागेशः पदपदार्थयोः सम्बन्धविशेषं शक्तिं मनुते। अतः संकेतः शक्तिः मन्यते। शक्तिः एव अर्थबोधनसाधिका। शक्तिग्रहश्च वाक्येन भवति। वाक्यलक्षणं विश्वनाथेन उच्यते–

वाक्यं स्याद् योग्यताकांक्षासत्तियुक्तः पदोच्चयः।
(सा०द०2/1)

1. **आकांक्षा** Desire, उद्देश्यविधेयश्च (कर्ता क्रिया च) समञ्जनम्। श्रोतुर्जिज्ञासारूपा।

2. **योग्यता** Deserts, वाक्येषु शब्दार्थसम्बन्धः समुचितः स्यात्। परस्परक्षमतारूपा।

3. **आसक्तिः**- Connection, कर्ता-क्रिया-मध्ये निकटता एव। बुद्धेरविच्छेदः। एतद् गुणत्रययुक्तः पदसमूहो वाक्यम्। एवं योग्यताकांक्षासत्तियुक्तानां पदानां समूहो वाक्यम्।

विश्वनाथेन पदं च लक्ष्यते–

वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः।
(सा०द०2/2)

शब्दार्थयोः स्वरूपं विवेचयता मम्मटेन प्रतिपाद्यते यत् शब्दः त्रिविधः–

स्याद् वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा।
वाच्यादयस्तदर्थाः स्युः। (काव्य०2/6)

शब्दस्त्रिधा–वाचको लक्षको व्यञ्जकश्चेति। तेषामर्थोऽपि त्रिविधः–वाच्यो लक्ष्यो व्यङ्ग्यश्चेति। शब्दस्य तिस्रः शक्तयः–अभिधा, लक्षणा, व्यञ्जना चेति। काव्यशास्त्रज्ञैः तिस्रः शक्तयो मन्यन्ते।

वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः।।
(सा०द०2/3)

एतद्-विचार्यैव प्रोच्यते–**शब्दशक्तयः।**

8. **धात्वर्थविमर्शः**–फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः। सर्वेषां शब्दानां धातुत एव जायमानत्वम्। कर्तृकर्मसंख्याकाला आख्यातार्थः। तत्र दार्शनिकेषु पर्याप्तं वैमत्यमवलोक्यते धात्वर्थविषये। निरुक्ते–नाम च धातुजमिति कथितः। वैयाकरणानां मतद्वयं वर्तते। अत्र प्राचीनवैयाकरणाः–**फलव्यापारयोर्धातुः** अर्थात् धातोः पृथक् शक्तिः स्वीकुर्वन्ति। यथोच्यते विद्वद्वर्येण कौण्डभट्टेन–

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्।।

फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः। तेन वृक्षात् पर्णं भूमौ पततीत्यादौ विभागाश्रयस्य वृक्षादेः संयोगाश्रयस्य

भूम्यादेश्च न कर्मत्वम्। कर्मप्रत्ययसमभिव्याहारे तु फलस्य विशेषता। नैयायिकानामाख्यातपदोपस्थापितयोः कृतिवर्तमानयोरिव, वैयाकरणानां कर्तृसङ्ख्ययोरिव च व्युत्पत्तिवैचित्र्येण धातुपदोपस्थापितयोः फलव्यापारयोः परस्परान्वयबोधः स्यादेवेति वदन्ति। "**भावप्रधानमाख्यातम् सत्त्वप्रधानानि नामानि**" इति निरुक्तोक्तेर्व्यापार-मुख्यविशेष्यकः शाब्दबोधो भवति।

नागेशभट्टप्रभृतयो नवीना वैयाकरणाः–'**फलविशिष्टे व्यापारे व्यापारविशिष्टे फले च धातूनां शक्तिः**'

स्वीकुर्वन्ति। यत्तु मीमांसकाः–**फलमात्रं धात्वर्थः**, व्यापारश्च प्रत्ययार्थ इति वदन्ति। ततो मण्डनमिश्रः '**फलमेव धात्वर्थः**' एवं च अन्ये मीमांसकास्तु–'**व्यापारमात्रं धात्वर्थः**', फलञ्च द्वितीयार्थ इति मन्यन्ते। अत एव देवदत्तः इच्छतीत्यत्र नागेशमते–यत् किञ्चिन्निष्ठविषयतानिरूपकेच्छानुकूलो देवदत्ताभिन्नैकाश्रयवृत्तिर्वर्तमानकालिको व्यापारः इत्याकारकः शाब्दबोधः इति। तदुक्तम्–

यत्किञ्चिद् वाङ्मयं लोके दृश्यते जगतीतले।
तत्सर्वं धातुभिर्व्याप्तं शरीरमिव धातुभिः।।

नैयायिकमीमांसकवैयाकरणानाम्मतेन धात्वर्थबोधतालिका–

देवदत्तः पचति

- नैयायिकमते → विक्लित्त्यनुकूलकृतिमान् देवदत्तः।
- मीमांसकमते → देवदत्तभिन्नैककर्तृकी विक्लित्त्यनुकूला भावना।
- वैयाकरणमते → वर्तमानकालिकी
  - प्राचीनमते → देवदत्ताभिन्नाश्रयको विक्लित्त्यनुकूलो वर्तमानकालिको व्यापारः।
  - नवीनमते → यत्किञ्चिन्निष्ठविषयतानिरूपकविक्लित्त्यनुकूलो देवदत्ताभिन्नैकाश्रयवृत्तिवर्तमानकालिको व्यापारः।

9. **स्फोटस्वरूपम्**–स्फुटति-प्रकाशते-अवगम्यते अर्थोऽनेनास्माद्वेति व्युत्पत्त्या 'अर्थविषयकोपस्थिति-जनकतावच्छेदकीभूतशक्तिमत्त्वं' स्फोटत्वम्। शब्दतत्त्व-स्यैवाऽन्वर्थं नाम स्फोट इति वैयाकरणाः स्वीकुर्वन्ति। अयं स्फोटवादः वैयाकरणानां मुख्यविषयः। अयं संसारः शब्दस्वरूपस्य ब्रह्मणो विवर्तः परिणामश्च। शब्दादेव जगतः सृष्टिरिति वैयाकरणानां सिद्धान्तः। सर्वस्याऽपि ज्ञानस्य मूलं शब्दा एव। यथोक्तं भर्तृहरिणा–

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।
छन्दोभ्य एव प्रथमेतद् विश्वं व्यवर्तत।।
न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।
(वाक्य.ब्र.120, 123)

परमलघुमञ्जूषाकारेण नागेशेन शब्दादागतः शाब्दः, शाब्दश्चाऽसौ बोधः शाब्दबोधः इति विग्रहानुसारं शब्दज्ञानकरणकशाब्दबोधपदस्य ज्ञानं भवति। तत्र शब्दगताः वर्णाः प्रत्येकं, मिलिताः वा, अर्थस्य वाचकाः इति शङ्कायाम् एतद्द्वयमपि नैव सम्भवति। तत्र कल्पते यद् उच्चारितैर्वर्णैः स्फोटात्मकः नित्यः शब्दः अभिव्यज्यते इति। तदुक्तं शेषकृष्णमहाभागैः स्फोटतत्त्वनिरूपणे–

न प्रत्येकं न मिलिता न चैकस्मृतिगोचराः।
अर्थस्य वाचका वर्णाः किन्तु स्फोटः स च त्रिधा।।

तत्र वर्णपदवाक्यभेदेन स्फोटस्त्रिधा। तत्रापि जातिव्यक्तिभेदेन पुनः षोढा। अखण्डपदस्फोटोऽ-खण्डवाक्यस्फोटश्चेति सङ्कलनयाऽष्टौ स्फोटाः। अर्थात् स्फोटात्मकः शब्दः, अर्थबोधकः ब्रह्मरूपो नित्यश्च। स्फुटति अर्थः अस्मात् इति व्युत्पत्त्या यौगिकार्थसम्भवेऽपि स्फोटशब्दः पङ्कजादिशब्दवद् योगरूढः। वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोटः, वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोटः इत्यष्टौ

स्फोटः सन्ति। पदशब्देनात्र सुबन्त-तिङन्तयोर्ग्रहणम्। वैयाकरणसिद्धान्तेषु वाक्यस्फोटो मुख्यः। वाक्ये पदानि पदे प्रकृतिप्रत्ययभागं च परिकल्प्य कल्पितान्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययार्थाः कल्पिताः सन्ति। अयं स्फोटः ब्रह्मरूपो नित्यः एकश्च, तर्हि अर्थबोधभेदो नैव दृश्येत। तदुक्तं शेषकृष्ण-महाभागैः स्फोटतत्त्वनिरूपणे–

यथा मणिकृपाणादौ मुखमेकमनेकधा।
तथैव ध्वनिषु स्फोट एकमेव विभिद्यते॥

अतः स्फोटस्वीकारं विना मीमांसकमतेनाऽपि अर्थबोधनिर्वाहाऽसम्भवात् स आवश्यकः।

10. ध्वनिविवेचनम्–ध्वनिविचारः–संस्कृतसाहित्ये ध्वनिविचारो महान् विस्तृतः परिलक्ष्यते। व्याकरणशास्त्रे ध्वनेरुत्पत्तिः सम्प्रतिपादिता वर्तते। नित्या वाक् (शब्दो वा)। परा, पश्यन्ती, मध्यमा, वैखरी इति चतुर्विधध्वन्यात्मिका भवति। सिद्धान्तशैवानां मतम्–

परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥ इति

(1) **परा**–तन्त्रशास्त्रञ्चाश्रित्य मूलाधारस्थपवन-संस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या विन्दुरूपिणी परा वागुच्यते।

(2) **पश्यन्ती**–नाभिपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते।

(3) **मध्यमा**–ततो हृदयपर्यन्तमागच्छता तेन वायुनाभि-व्यक्ता तत्तदर्थवाचकशब्दस्फोटरूपा श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा जपादौ बुद्धिनिर्ग्राह्या मध्यमा वागुच्यते; अत्र अर्थविभागो जायते।

(4) **वैखरी**–तत आस्यपर्यन्तमागच्छता तेन वायुनोर्ध्व-माक्रमता च मूर्धानमाहत्य तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्रहणयोग्या व्यवहारोपयुक्ता च वैखरी वागुच्यते।

स च शब्दः ध्वनिः, वर्णश्चेति द्विविधः। ध्वनिः मृदङ्गादिजन्यः, वर्णः कण्ठादिसंयोगात् जायते। वर्णरूपा वैखरी वाक् पदवाक्यरूपेण कथ्यते।

11. स्फोटध्वनयोः सम्बन्धः–सर्वेषां प्राणिनां प्राणापानवाय्वोरन्तरे वाक् रूपा देवी नित्ये तिष्ठति स्म। प्रयोक्तृणां प्राणवृत्तिनिबन्धिनी स्थानेषु कण्ठादिषु वायौ विवृते सति कृतवर्णपरिग्रहा ककारादिवर्णरूपापरश्रवणयोग्या वैखरी। प्राणवायुवृत्तिमनुसृत्य तत्तच्छब्दविशेषतत्तदर्थविशेषोल्लेखिन्या बुद्ध्या विषयीकृता परश्रवणग्रहणयोग्या सूक्ष्मा मध्यमा वाक्। वर्णक्रमरहिता योगिनां समाधौ सविकल्पकज्ञानविषया पश्यन्ती वाक्। मूलाधारे ज्योतिःस्वरूपाऽनपायिनी नित्या परा वाक् इति स्वीकुर्वन्ति।

परा-पश्यन्ती-मध्यमा-वैखरी इति चतुर्विध-ध्वन्यात्मिका वायुः मुखात् बहिः आगच्छति, एवं च श्रोतृणां मानसपटले अर्थस्य स्फुटनं प्रकाशनञ्च करोति, इत्थं स्फोटध्वनयोः सम्बन्धः इति कथ्यन्ते। अत्र स्फोटं अनित्यं स्वीकर्तुं तार्किकाः कथयन्ति यत् कण्ठताल्वादिभिः संयोगविभागाभ्यां यः शब्दः प्रथमम् उपजन्यते स स्फोटबोधकः। उत्तरोत्तरशब्दानां कारणं च ये च शब्दजाः स्फोटाख्यात् शब्दाज्जातास्ते ध्वनयः। यथोच्यते भर्तृहरिणा–

यः संयोगविभागाभ्यां करणैरुपजन्यते।
स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः॥

(वाक्य०-102)

अत्र वैयाकरणाः यं प्राकृतध्वनिरिति व्यवहरन्ति तमेव तार्किकाः वाचकशब्दं मन्यन्ते यं च ते वैकृतध्वनिरिति व्यवहरन्ति तं च तार्किकाः ध्वनिरिति व्यवहरन्तीति। अर्थात् संयोगजो ध्वनिः स्फोटः स्फोटजास्तु ध्वनय इति पूर्वोक्तपक्षे प्रक्रियामाह भर्तृहरिणा–

अल्पे महति वा शब्दे स्फोटकालो न भिद्यते।
परस्तु शब्दसन्तानः प्रचयापचयात्मकः॥

(वाक्य०-103)

ध्वनिस्फोटयोर्विचारः–

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः॥

इति भाष्यात् 'स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते। स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते॥' इति वाक्यपदीयाच्च ध्वनिर्द्विविधो वैकृतः प्राकृतश्च। प्राकृतध्वनिः स्फोटव्यञ्जकः। द्रुतादिवृत्तिभेदे वैकृतः कारणम्। अत एव तपरसूत्रे भाष्ये वृत्त्यांतरे ऐसो न स्यादित्याशङ्क्य, एवं तर्हि स्फोटः शब्दः ध्वनिशब्दगुणः भेर्याघातवदित्युक्तम्। एवञ्च स्फोटे कालभेदाभावात् तिसृषु वृत्तिषु ऐस् सिध्यतीति भावः।

ध्वनयः स्फोटाभिव्यञ्जकाः इत्युक्तम्। तत्र ध्वनिभिः इन्द्रियस्यैव श्रोत्रस्यैव संस्कारः क्रियते। ध्वनिभिः शब्दस्यैव संस्कारः क्रियते। ध्वनिभिः उभयस्य शब्दस्यैव संस्कारः क्रियते। यथोच्यते भर्तृहरिणा–

इन्द्रियस्य संस्कारः शब्दस्यैवोभयस्य वा।
क्रियते ध्वनिभिर्वादास्त्रयोऽभिव्यक्तिवादिनाम्॥

(वाक्य०-78)

तदयं निष्कर्षः–ध्वनिः केवलमगृह्यमाणोऽपि स्फोटो-पश्लिष्टः गृह्यते इत्येके। ध्वनिर्न गृह्यते तद्रूपितं स्फोटमात्रं तु गृह्यते इत्यपरे। अव्यक्तानां ध्वनिरेव व्यक्तानां तूभयं गृह्यते इत्यन्ये।

12. पाणिनीयशिक्षा–शिक्ष् भाव=टाप्=आ शिक्षा। तच्छास्त्रं शिक्षा नाम येन वेदमन्त्राणामुच्चारणं शुद्धं सम्पाद्येत। वेदे स्वरस्य प्राधान्यं सर्वविदितम्। स्वरज्ञानं च शिक्षाऽऽयत्तम्। अत एवेदं शिक्षाशास्त्रं वेदाङ्गम्। येन प्रकारेण पुरुषः सर्वेषामङ्गानां यथाविधि विनिवेशितेऽपि मुखसौन्दर्यादिभिः परिपुष्टेऽपि घ्राणेन विना चमत्कृतिं न दधाति, गर्हणीयतामेव भजते तथैव वेदपुरुषस्य स्वरूपं वेदाङ्गेन शिक्षारूपघ्राणेन विना नितान्तमशोभनं विकृताकारं वा परिलक्ष्यते। सायणाचार्याः कथयन्ति यत्–"स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा" इति। एतदवबोधनमेव शिक्षायाः प्रयोजनम्। "शिक्षयति या सा शिक्षा" "शक्तुं शक्तो भवितुमिच्छा शिक्षा" इति द्वे व्युत्पत्ती शिक्षाशब्दस्य प्रदर्शिते। शब्दोऽयं योगरूढः। शिक्षाशास्त्रस्य प्रयोजनमुक्तमस्ति तैत्तिरीयोपनिषदि यथा–'अथ शिक्षां व्याख्यास्यामः– **वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तान** इत्युक्तः शिक्षाऽध्यायः। तत्र वर्ण इति पदेनाकारादेः ग्रहणम्, 'स्वर' इत्यनेन उदात्तादेः, मात्रया ह्रस्व-दीर्घ-प्लुतानां, बलेन स्थानप्रयत्नौ गृह्येते, साम्ना निषदादिः, सन्तानेन विकर्षणादिः' इति शिक्षा-प्रयोजनम्। अर्थात् 'आदौ गुरुः कस्यापि मन्त्रस्योच्चारणं स्वरविज्ञानसहितं स्वयमेव करोति पश्चाच्च तदुच्चारणं सावधानतया शिष्यः श्रुत्वा अवधारणञ्च कृत्वा तदनुसरणं करोति।' भगवतः पाणिनेः शिक्षायामुक्तः। तथाहि–

गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः॥

उदात्तानुदात्तस्वरितभेदैः त्रयः स्वराः भवन्ति। उच्चस्वरेणोच्चरितत्वात् उदात्तः, मन्दस्वरेणोच्चरितत्वात् अनुदात्तः, द्वयोश्च समाहारेणोच्चरितत्वात् स्वरित इति सूत्राणि निर्दिश्य पाणिनिना प्रोक्तम्। वेदस्य प्रत्येकस्मिन् शब्दे उदात्तस्वरोऽवश्यमेव भविष्यति, शेषाः स्वराश्चानुदात्ता भवन्ति। उदात्तस्वरस्य स्थानेऽनुदात्तस्वरस्योच्चारयितुः शिष्यस्य मुखे चपेटिकां दत्वा शुद्धोच्चारणं कारयति स्म। प्रत्येकस्य वेदस्योच्चारणार्थं स्वीया शिक्षा विद्यते। यस्यां शिक्षायां तत्तद् वेदानुकूलमुच्चारणविधानं विद्यते। अत एव पाणिनीयशिक्षायां स्पष्टमुद्घोषितं पाणिनिना महावैयाकरणेन–

मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात्॥

पाणिनीयशिक्षा–अध्ययनाध्यापनयोः शैक्षणिके जगति पाणिनीयशिक्षा सुप्रसिद्धाऽस्ति। इयं पाणिनीयशिक्षा अतिशयेन प्रसिद्धा लोकप्रिया च अस्ति। पाणिनिशिक्षा शिक्षासंग्रहे-ऽष्टाविंशतितमे क्रमे चर्चिताऽस्ति। सा च लौकिक-वैदिकोभयशास्त्रोपकारकत्वात् अत्यधिका महत्त्वपूर्णा च विद्यते। वर्णानां विधिपूर्वकमुच्चारणविधिः, तेषां समीक्षितानां वर्णानां संख्यानिर्धारणम्, कण्ठ-ताल्वादिस्थानानि, आभ्यन्तरा बाह्याश्च प्रयत्नाः, अनुस्वारस्य यमानां चोच्चारणे विशेषाः, रङ्गस्योच्चारणे विशेषः, हकारनिरूपणम्, जिह्वामूलीयोप-ध्मानीययोर्विमर्शः, वर्णोच्चारणे गुणदोषसमीक्षणम्। वैदिकानां वेदाध्ययनरीतिः।

अथ शिक्षां प्रवक्ष्यामि पाणिनीयमतं यथा।
शास्त्रानुपूर्व्यं तद्विद्याद्यथोक्तं लोकवेदयोः॥

यद्यपि समेषां शिक्षाग्रन्थानां प्रतिपाद्यविषयः उच्चारण-विधिः एव वर्तते, तथापि एषु वर्णानां संख्या-स्थान-करणादिविषये बहुतरं वैषम्यमपि दृश्यते। आसु शिक्षासु पाणिनीयशिक्षा यादृशीं प्रसिद्धिं प्राप्ता तादृशी प्रसिद्धिः अन्यशिक्षाग्रन्थेषु न दृश्यते। अस्यां शिक्षायां षष्टिपरिमिताः श्लोकाः सन्ति। येषु उच्चारणविधिसमन्वितानां विषयाणां सङ्क्षेपेण महदुपकारकं विवरणमुपन्यस्तमस्ति। तत्रोच्चारण-विधिर्द्विविधः सामान्यतो विशेषतश्च। यो विधिर्वर्णसामान्यं विषयीकरोति स सामान्यतः। यथा–

व्याघ्री यथाऽहरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत्॥

यश्च वर्णविशेषं विषयीकरोति स विशेषतः। यथा–**"अलाबु वीणानिर्घोषः"** इति। तदित्थमत्र वर्णसामान्यो-च्चारणविधिः, अनुस्वारोच्चारणविधिः, रङ्गवर्णोच्चारणविधिः,

उच्चारणे प्रातःसवनादि व्यवस्था च। इत्येतत् प्राधान्येन प्रतिपादितम्।

पाणिनीयशिक्षाग्रन्थान्ते पाणिनेरुल्लेखो दाक्षीपुत्र इति नाम्ना कृतोऽस्ति। पाणिनीयशिक्षायाः सम्प्रति पाठद्वयं मिलति, प्रथमः सूत्रात्मको द्वितीयः श्लोकात्मकश्च। सूत्रात्मक-श्लोकात्मकयोः पाठयोरपि लघुवृद्धिसंज्ञकौ द्वौ पाठौ स्तः। सम्प्रति श्लोकात्मकपाठ एव प्रसिद्धोऽस्ति। पाणिनीयशिक्षाया लघुपाठे पञ्चत्रिंशत् (35) श्लोकाः सन्ति। वृद्धपाठे षष्टिपरिमिता श्लोकाः सन्ति। अस्याः शिक्षायाः प्रवक्ता पाणिनेः अनुजः आचार्यः पिङ्गलोऽस्ति। अत एतत्सुनिश्चितं भवति यत् वेदानां स्वाध्याये पाणिनीयशिक्षायाः नितरामुपयोगिता सिद्ध्यति।

(क) (ख) (M,N) व्याकरणस्य परिचयात्मकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—वेदपुरुषस्य मुखात्मकं वेदांगं किम्?
उत्तरम्— व्याकरणम्।

2. **प्रश्नः**—'अष्टाध्यायी' इत्यस्य ग्रन्थस्य कः रचनाकारः?
उत्तरम्— पाणिनिः।

3. **प्रश्नः**—पाणिनि-प्रणीते शब्दानुशासने (अष्टाध्यायी-ग्रन्थे) कति अध्यायाः समुपलभ्यन्ते?
उत्तरम्— (8) अष्टौ अध्यायाः।

4. **प्रश्नः**—पाणिनि-अष्टाध्याय्याः प्रति अध्यायं कति पादाः सन्ति?
उत्तरम्— (04) चत्वारः।

5. **प्रश्नः**—व्याकरणशिक्षणस्य मुख्यो विधिः कः?
उत्तरम्— आगमनविधिः।

6. **प्रश्नः**—'सिद्धान्तकौमुदी' इत्यस्य ग्रन्थस्य कः रचनाकारः?
उत्तरम्— भट्टोजिदीक्षितः।

7. **प्रश्नः**—'प्रक्रियाकौमुदी' इत्यस्य रचनाकारः कः?
उत्तरम्— रामचन्द्रः।

8. **प्रश्नः**—व्याकरणवेदांगस्य कति सम्प्रदायाः श्रूयन्ते?
उत्तरम्— (08) अष्टौ।

9. **प्रश्नः**—सम्प्रति व्याकरणवेदांगस्य प्रतिनिधिग्रन्थः कोऽस्ति?
उत्तरम्— शब्दानुशासनम्।

10. **प्रश्नः**—'लिङ्गानुशासनम्' इति ग्रन्थं कः लिखितवान्?
उत्तरम्— व्याडिः।

11. **प्रश्नः**—'वाक्यपदीयम्' कस्य आचार्यस्य कृतिः?
उत्तरम्— भर्तृहरेः।

12. **प्रश्नः**—पतञ्जलिप्रणीतः ग्रन्थः कः?
उत्तरम्— महाभाष्यम्।

13. **प्रश्नः**—पाणिनिमहोदयस्य जन्मस्थलं वर्तमानकाले केन नाम्ना प्रसिद्धम्?
उत्तरम्— लाहौरनाम्ना।

14. **प्रश्नः**— कति व्याकरणानि वेदाङ्गे परिगणितानि सन्ति?
उत्तरम्—नव, 1. ऐन्द्रं, 2. चान्द्रं, 3. काशकृत्स्नं, 4. कौमारं, 5. शाकटायनं, 6. सारस्वतं, 7. आपिशलं, 8. शाकलं, 9. पाणिनीयम्।

15. **प्रश्नः**—वेदाङ्गरूपेण सर्वाधिक-संग्राह्य-व्याकरणं किमस्ति?
उत्तरम्— पाणिनि-व्याकरणम्।

16. **प्रश्नः**—मुनित्रये केषां समावेशो भवति?
उत्तरम्—1. पाणिनेः, 2. कात्यायनस्य, 3. पतञ्जलेश्च।

17. **प्रश्नः**—कः वार्तिककारः?
उत्तरम्— कात्यायनः।

18. **प्रश्नः**—सिद्धान्तकौमुदी इत्यस्य तत्त्वबोधिनी-व्याख्यायाः लेखकः कः?
उत्तरम्— ज्ञानेन्द्रसरस्वती।

19. **प्रश्नः**— भट्टोजिदीक्षित-कृत-प्रौढमनोरमायाः खण्डनं केन कृतम्?
उत्तरम्— पण्डितराज-जगन्नाथेन।

20. **प्रश्नः**—'मनोरमाकुचमर्दनम्' इत्यस्य लेखकः कः?
उत्तरम्— पण्डितराजो जगन्नाथः।

21. **प्रश्नः**—वरदराजस्य कानि रचनाकार्याणि?
उत्तरम्— 1. लघुसिद्धान्तकौमुदी, 2. मध्यसिद्धान्त-कौमुदी, 3. सारकौमुदी च।

22. **प्रश्नः**—शब्देन्दुशेखरः इत्यस्य कः रचनाकारः?
उत्तरम्— नागेशभट्टः।

23. **प्रश्नः**—कैयटेन महाभाष्योपरि का व्याख्या विहिता?
उत्तरम्— 'प्रदीप' नाम्नी व्याख्या।

24. **प्रश्नः**—जयादित्य एवं वामननामनी वैयाकरणाभ्यां सूत्रानुक्रमाभ्यां अष्टाध्याय्यां किं वृत्तिग्रन्थं अलिखताम्?
उत्तरम्—काशिका-वृत्तिग्रन्थम्।

25. **प्रश्नः**—काशिकायाः प्रथमतः पञ्चमाध्यायान् कः अलिखत्?
उत्तरम्— जयादित्यः।

26. **प्रश्नः**—काशिकायाः अन्तस्य 'अध्यायत्रयस्य' लेखकः कः?
उत्तरम्— वामनः।

27. **प्रश्नः**—काशिकायां कति अध्यायाः सन्ति?
उत्तरम्— (8) 5+3=8 अध्यायाः।

28. **प्रश्नः**—'न्यास' नाम्ना प्रख्यात-काशिकाव्याख्यानग्रन्थस्य मूलं अभिधानं किमस्ति?
उत्तरम्— काशिकाविवरणपञ्जिका।

29. **प्रश्नः**— काशिकाविवरणपञ्जिकायाः लेखकः कः?
उत्तरम्— जिनेन्द्रबुद्धिः।

30. **प्रश्नः**—काशिकोपरि 'पदमञ्जरी' व्याख्यायाः लेखकः कः?
उत्तरम्— हरदत्तः।

31. **प्रश्नः**—वैयाकरणभूषण-वैयाकरणभूषणसारयोश्च प्रणेता कोऽस्ति?
उत्तरम्— कौण्डभट्टः।

32. **प्रश्नः**—परिभाषेन्दुशेखरस्य स्रष्टा कोऽस्ति?
उत्तरम्— नागेशभट्टः।

33. **प्रश्नः**— परिभाषेन्दुशेखरस्य विषयः किमस्ति?
उत्तरम्—पाणिनीयव्याकरणस्य परिभाषायाः विवेचनम्।

34. **प्रश्नः**—नागेशभट्टस्य भट्टोजिदीक्षितकृतप्रौढमनोरमोपरि लिखितव्याख्याग्रन्थस्य किं नाम अस्ति?
उत्तरम्— शब्देन्दुशेखरः।

35. **प्रश्नः**—महाभाष्यप्रत्याख्यानसंग्रहस्य लेखकः कोऽस्ति?
उत्तरम्— नागेशभट्टः।

36. **प्रश्नः**—वैयाकरणसिद्धान्तमञ्जूषा-लघुमञ्जूषा-परम-लघुमञ्जूषाणां रचनाकारः कः?
उत्तरम्— नागेशभट्टः।

37. **प्रश्नः**—कातन्त्र-व्याकरणस्य आचार्यः कः?
उत्तरम्— शिववर्मा।

38. **प्रश्नः**—कातन्त्र-व्याकरणे कति अध्यायाः कति सूत्राणि च वर्तन्ते?
उत्तरम्— चत्वारः अध्यायाः, 1400 सूत्राणि च।

39. **प्रश्नः**—प्रौढमनोरमा इत्यस्य लेखकः कः?
उत्तरम्— भट्टोजिदीक्षितः।

40. **प्रश्नः**—क्षपणक (सिद्धसेनदिवाकरस्य) व्याकरणं किमस्ति?
उत्तरम्— शब्दानुशासनम्।

41. **प्रश्नः**—जैनेन्द्रव्याकरणस्य आचार्यः कः?
उत्तरम्— देवनन्दी।

42. **प्रश्नः**—'विश्रान्तविद्याधर' व्याकरणस्य प्रवर्तकः कः?
उत्तरम्— वामनः।

43. **प्रश्नः**—'सरस्वतीकण्ठाभरणम्' व्याकरणे कति अध्यायाः कति सूत्राणि च सन्ति?
उत्तरम्— अष्टौ अध्यायाः, 6421 सूत्राणि च।

44. **प्रश्नः**—सरस्वतीकण्ठाभरणस्य प्रचोदकः कः अस्ति?
उत्तरम्— भोजदेवः।

45. **प्रश्नः**—जैनशाकटायन-व्याकरणग्रन्थस्य रचनाकारः कः?
उत्तरम्— पाल्यकीर्तिः।

46. **प्रश्नः**—पाल्यकीर्ति इत्यस्य अपरं नाम किमस्ति?
उत्तरम्— शाकटायनः।

47. **प्रश्नः**—जैनशाकटायने कति अध्यायाः सूत्राणि च सन्ति?
उत्तरम्— अष्टौ अध्यायाः, 3200 सूत्राणि च।

48. **प्रश्नः**—शिवस्वामी-प्रवृत्तं व्याकरणं किम्?
उत्तरम्— शिवशब्दानुशासनम्।

49. **प्रश्नः**—सिद्धान्तकौमुदी इत्यस्य बालमनोरमाव्याख्यायाः सर्जनकर्ता आचार्यः कः?
उत्तरम्— वासुदेवदीक्षितः।

50. **प्रश्नः**—कात्यायनस्य अपरं नाम किम्?
उत्तरम्— वररुचिः।

51. **प्रश्नः**—पाणिनिमहोदयस्य महाकाव्यं किम्?
उत्तरम्— जाम्बवती-विजयम्।

52. **प्रश्नः**—कात्यायनस्य महाकाव्यं किम्?
उत्तरम्— स्वर्गारोहणम्।

53. **प्रश्नः**—कात्यायनस्य अन्यानि कानि रचनाकार्याणि?
उत्तरम्—1. कात्यायनस्मृतिः, 2. उभयसारिकाभाणः (रूपकः) 3. भ्राजश्लोकाः।

54. **प्रश्नः**—पाणिनीयव्याकरणस्य प्रक्रिया-परम्परायाः आद्यग्रन्थः कः?
उत्तरम्— रूपावतारः।

55. **प्रश्नः**—रूपावतारस्य रचनाकारः कः?
उत्तरम्— धर्मकीर्तिः।

56. **प्रश्नः**—प्रक्रियाकौमुदी कस्य रचना वर्तते?
उत्तरम्— रामभद्राचार्यस्य।

57. **प्रश्नः**—'मनोरमामण्डनं' व्याकरणग्रन्थस्य लेखकः कः?
उत्तरम्— भानुजिदीक्षितः।

58. **प्रश्नः**—'गोर्नदीय' इति कस्य नाम अस्ति?
उत्तरम्— महाभाष्यकारपतञ्जलेः।

59. **प्रश्नः**—'शब्दरत्न' इत्यस्य लेखकः कः?
उत्तरम्— हरिदीक्षितः।

60. **प्रश्नः**— अष्टाध्यायीवृत्तिः इत्यस्य लेखकः कः?
उत्तरम्— वररुचिः।

61. **प्रश्नः**—अष्टाध्यायीभाष्यवृत्तिः इत्यस्य लेखकः कः?
उत्तरम्— दयानन्दसरस्वती।

62. **प्रश्नः**—'रूपमाला' इत्यस्य लेखकः कः?
उत्तरम्— विमलसरस्वती।

63. **प्रश्नः**—पण्डितप्रवरभट्टोजिदीक्षितस्य पदशास्त्रीयग्रन्थाः के सन्ति?
उत्तरम्—1. सिद्धान्तकौमुदी, 2. प्रौढ़मनोरमा, 3. शब्दकौस्तुभः, 4. वैयाकरणभूषणकारिका।

64. **प्रश्नः**—भट्टोजिदीक्षितस्य धर्मशास्त्रीयग्रन्थाः के सन्ति?
उत्तरम्—1. त्रिस्थलीसेतु, 2. तिथिनिर्णयः, 3. प्रवरनिर्णयः, 4. चतुर्विंशतिमतव्याख्या।

65. **प्रश्नः**—पाणिनिमहोदयस्य गुरुः कः आसीत्?
उत्तरम्— आचार्य उपवर्षः।

66. **प्रश्नः**—प्रक्रियासर्वस्व-ग्रन्थस्य लेखकः कः?
उत्तरम्— नारायणभट्टः।

67. **प्रश्नः**—महाभाष्यदीपिका इत्यस्य लेखकः कः?
उत्तरम्— भर्तृहरिः।

68. **प्रश्नः**—पाणिनिः कस्य क्षेत्रस्य वास्तव्यः?
उत्तरम्— पाकिस्तान-स्थित-लाहौरस्य।

68. **प्रश्नः**—दाक्षीपुत्रः कः?
उत्तरम्— पाणिनिः।

69. **प्रश्नः**—गोणिका-पुत्ररूपेण को ज्ञायते?
उत्तरम्— पतञ्जलिः।

70. **प्रश्नः**—नागेशभट्टस्य पितुर्नाम किम्?
उत्तरम्— शिवभट्टः।

71. **प्रश्नः**—नागेशभट्टस्य मातुर्नाम किम्?
उत्तरम्— सतीदेवी।

72. **प्रश्नः**—नागेशः कस्याश्रितः आसीत्?
उत्तरम्— शृङ्गवेर-पुराधीश-रामसिंहस्य।

73. **प्रश्नः**—नागेशस्य जन्मसमयः कः?
उत्तरम्— 1720 ई० वर्षम्।

74. **प्रश्नः**—कौमुदी-मूलार्थ-विद्योतिन्याः प्रणेता कः?
उत्तरम्— पं० दीनबन्धु झा।

75. **प्रश्नः**—प्रयोगसंग्रहस्य रचयिता कः?
उत्तरम्— वररुचिः।

76. **प्रश्नः**—'प्रयोगमुखम्' केन विरचितम्?
उत्तरम्— धर्मकीर्तिना।

77. **प्रश्नः**—समासशक्ति-दीपिकायां कारिकायाः रचनाकारः कः?
उत्तरम्— दीनबन्धुझा महोदयः।

78. **प्रश्नः**—वैयाकरणभूषणसारस्य को निर्माता?
उत्तरम्— कौण्डभट्टः।

79. **प्रश्नः**—कौमार-रचितं किं व्याकरणम्?
उत्तरम्— कातन्त्र-व्याकरणम्।

80. **प्रश्नः**—वोपदेव-रचितं किं व्याकरणम्?
उत्तरम्— मुग्धबोध-व्याकरणम्।

81. **प्रश्नः**—सारस्वत-व्याकरणस्य को लेखकः?
उत्तरम्— अनुभूति-स्वरूपाचार्यः।

82. **प्रश्नः**—वररुचिकृतं किं व्याकरणम्?
उत्तरम्— प्राकृत-प्रकाशः।

83. **प्रश्नः**—'शब्दानुशासनम्' कस्य व्याकरणम्?
उत्तरम्— हेमचन्द्रस्य।

84. **प्रश्नः**—महाभाष्य-प्रदीपस्य रचयिता कोऽस्ति?
उत्तरम्— कैयटः।

85. **प्रश्नः**—महाभाष्य-प्रदीपे 'उद्योत'टीकायाः रचनाकारः कः?
उत्तरम्— नागेशः।

86. **प्रश्नः**—व्याकरण-वाङ्मयस्य बृहत्तमो ग्रन्थः कः?
उत्तरम्— व्याकरणसिद्धान्तसुधानिधिः।

87. **प्रश्नः**—'व्याकरणसिद्धान्तसुधानिधि' इत्यस्य लेखकः कः?
उत्तरम्— विश्वेश्वरपाण्डेयः।

88. **प्रश्नः**—कौण्डभट्टस्य पितुर्नाम किम्?
उत्तरम्— रङ्गोजिभट्टः।

89. **प्रश्नः**— कौण्डभट्टस्य पितृव्यस्य किं नाम विद्यते?
उत्तरम्— श्रीमद्भट्टोजिदीक्षितः।

(ख) (M,N-1 ls 12) क्रमांकाणां वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—व्याकरणस्य व्युत्पत्तिजन्यः अर्थः किमस्ति?
उत्तरम्—व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम्। (वि+ आङ् + कृ +ल्युट् = व्याकरणम्)।

2. **प्रश्नः**—व्याकरणस्य का परिभाषा?
उत्तरम्—लक्ष्यलक्षणं व्याकरणम्। प्रकृतिप्रत्यय-विभागपूर्वकशब्दव्युत्पत्त्याधायकं शास्त्रं व्याकरणम्।

3. **प्रश्नः**—आङ्ग्लभाषायां व्याकरणस्य का परिभाषा?
उत्तरम्—Grammar is a set of rules and regulations which controls and teaches us the correct use of the language.

4. **प्रश्नः**—व्याकरणस्य स्वरूपं, महत्त्वम्, फलं उपयोगश्च कानि?
उत्तरम्— यो वेद वेदवदनं सदनं हि सम्यग् ब्राह्मयाः स वेदमपि वेद किमन्यशास्त्रम्। यस्मादतः प्रथम- मेतदधीत्य विद्वान् शास्त्रान्तरस्य भवति श्रवणेऽधिकारी।।

5. **प्रश्नः**—व्याकरणस्य किं प्रयोजनम्?
उत्तरम्—रक्षोहागमलघ्वसंदेहाः प्रयोजनम्।

6. **प्रश्नः**—व्याकरणस्य कानि आनुषङ्गिकानि प्रयोजनानि?
उत्तरम्—1. दुष्टः शब्दः, 2. यदधीतम्, 3. यस्तु प्रयुंक्ते, 4. अविद्वांसः 5. विभक्तिं कुर्वन्ति, 6. यो वा इमाम्, चत्वारि इत्यादयः।

7. **प्रश्नः**—सम्यग् शब्दप्रयोगे को लाभः?
उत्तरम्—"व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
भीतापतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत्।।
सम्यग् वर्णप्रयोगेन ब्रह्मलोके महीयते।

8. **प्रश्नः**—व्याकरणं कथमावश्यकम्?
उत्तरम्—मानवविचाराणाम् अभिव्यक्तिं, शुद्धां, परिष्कृतां, परिमार्जितां च कर्तुं भाषाविश्लेषणाय व्याकरणम् आवश्यकम्।

9. **प्रश्नः**—व्याकरणस्य परम्पराक्रमस्य चर्चा ऋक्तन्त्रे का?
उत्तरम्—ब्रह्मा संस्कृतव्याकरणस्य आदिज्ञाता, बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय, भरद्वाजः ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः इति।

10. **प्रश्नः**—लोककल्याणकारी शिवः चतुर्दशसूत्रात्मकं वर्णसमाम्नायम् अपौरुषेयरूपं कस्मै प्रदत्तवान्?
उत्तरम्—पाणिनये।

11. **प्रश्नः**—पाणिनि-अष्टाध्यायीग्रन्थस्य साक्षात्सम्बन्धो कं सम्प्रदायमधिकृत्य वर्तते?
उत्तरम्—माहेश्वर-सम्प्रदायमधिकृत्य।

12. **प्रश्नः**—"नृत्तावसाने नटराजराजो ननाद ढक्कां नवपंचवारम्। उद्धर्तुकामः सनकादिसिद्धानेतद् विमर्शे शिवसूत्रजालम्।"
उक्तश्लोकः कुतः उद्धृतः?
उत्तरम्—नन्दिकेश्वरकृतकाशिकातः।

13. **प्रश्नः**—पतञ्जलिमहाभाष्ये **'सिद्धे शब्दार्थसम्बन्धे' 'सिद्धं तु नित्यशब्दत्वात्'** इति वार्तिकाभ्यां शब्दार्थ-सम्बन्धानां नित्यत्वं केन उक्तम्?
उत्तरम्—कात्यायनेन।

14. **प्रश्नः**—पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः इति केन मन्यते?
उत्तरम्—नव्यवैयाकरणेन।

15. **प्रश्नः**—'अस्माच्छब्दादयमर्थो बोधव्यः' इति के स्वीकुर्वन्ति?
उत्तरम्— नैयायिकाः।

16. **प्रश्नः**—पाणिनीयव्याकरणमाश्रित्य पतञ्जलिः शब्दानुशासने कयोः व्याख्यानं कृतवान्?
उत्तरम्—सूत्रवार्तिकयोः।

17. **प्रश्नः**—'अथ शब्दानुशासनम्' कस्य ग्रन्थस्य प्रारम्भिक-वाक्यम्?
उत्तरम्— महाभाष्यस्य।

18. **प्रश्नः**—पतञ्जलेर्महाभाष्यं कियत्सु आह्निकेषु विभक्तम्?
उत्तरम्— (85) पञ्चाशीत्याह्निकेषु।

19. **प्रश्नः**—महाभाष्यस्य प्रथमाह्निकं केन नाम्ना ज्ञायते?
उत्तरम्— "पस्पशाह्निकम्" इति नाम्ना।

20. **प्रश्नः**— महाभाष्यस्य द्वितीयाह्निकं किम्?
उत्तरम्— प्रत्याहाराह्निकम्।

21. **प्रश्नः**—षड्विधात्मकं व्याख्यानं किम्?
उत्तरम्— पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना।
आक्षेपश्च समाधानं व्याख्यानं षड्विधं मतम्।।

22. **प्रश्नः**— "लक्ष्यं च लक्षणं चैतत्समुदितं———— किं भवति?
उत्तरम्— व्याकरणम्।

23. **प्रश्नः**— 'व्यक्ता वाचि वर्णाः येषां त इमे व्यक्तवाचः' भाषायाः इयं परिभाषा कुतः उद्धृतास्ति?
उत्तरम्— महाभाष्यतः।

24. **प्रश्नः**—किं नाम अर्थवत्त्वम्?
उत्तरम्—एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वम्-अर्थवत्त्वम्।

25. **प्रश्नः**— को वाग्वज्रो यजमानं हिनस्ति?
उत्तरम्—मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

26. **प्रश्नः**—भाष्यस्य किं लक्षणम्?
उत्तरम्— सूत्रार्थो वर्ण्यते यत्र वर्णैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।।

27. **प्रश्नः**—महाभाष्यकारः पाणिनीयव्याकरणस्य कतिसूत्राणां व्याख्यां अकुर्वत्?
उत्तरम्— 1710 सूत्राणाम्।

28. **प्रश्नः**—महाभाष्ये कति अध्यायाः सन्ति?
उत्तरम्— अष्टौ अध्यायाः।

29. **प्रश्नः**—महाभाष्ये अध्यायान् केषु विभाजितोऽस्ति?
उत्तरम्—आह्निकेषु।

30. **प्रश्नः**—आह्निकेन किं तात्पर्यम्, (का परिभाषा) ?
उत्तरम्— एकः अहः (दिवसः) पर्यन्तं पठितुं योग्यः आह्निकः।

31. **प्रश्नः**—महाभाष्ये कति आह्निकानि सन्ति?
उत्तरम्— (85) पञ्चाशीति आह्निकानि।

32. **प्रश्नः**—'पस्पशा' इति शब्दस्य किमर्थः?
उत्तरम्— प्रस्तावना।

33. **प्रश्नः**—महाभाष्ये कति प्रत्याहारसूत्राणां व्याख्यानं अभवन्?
उत्तरम्—अष्टसूत्राणाम्।

34. **प्रश्नः**—कति माहेश्वरानि सूत्राणि?
उत्तरम्— (14) चतुर्दशसूत्राणि।

35. **प्रश्नः**—कानि माहेश्वरानि सूत्राणि?
उत्तरम्—1. अइउण्, 2. ऋलृक्, 3. एओङ्, 4. ऐऔच्, 5. हयवरट्, 6. लण्, 7. ञमङणनम्, 8. झभञ्, 9. घढधष्, 10. जबगडदश्, 11. खफछठथचटतव्, 12. कपय्, 13. शसषर्, 14. हल्।

35. **प्रश्नः**—माहेश्वरसूत्रस्य उत्पत्तिः कस्मात् अभूत्?
उत्तरम्— शिवस्य डमरुतः।

36. **प्रश्नः**—माहेश्वरसूत्रे कति मूलस्वरवर्णाः वर्तन्ते?
उत्तरम्—पञ्च, (अ, इ, उ, ऋ, लृ)।

37. **प्रश्नः**—येनोच्चारितेन सास्ना-लांगूल-ककुद-खुर-विषाणिनां सम्प्रत्ययो भवति सः कः?
उत्तरम्— शब्दः।

38. **प्रश्नः**—'प्रतीतपदार्थको लोके ध्वनिः' इति कः?
उत्तरम्— शब्दः।

39. **प्रश्नः**—अष्टाध्याय्याः परिमाणः कति श्लोकानां विद्यते?
उत्तरम्— सहस्रम्।

40. **प्रश्नः**—अष्टाध्याय्यां कति पादाः सन्ति?
उत्तरम्— (8×4=32) द्वात्रिंशतिः पादाः।

41. **प्रश्नः**—माहेश्वरसूत्रेषु कस्य व्यञ्जनवर्णस्य द्विवारं प्रयोगः भवति?
उत्तरम्— हकारस्य।

42. **प्रश्नः**—कस्मिन् माहेश्वरसूत्रे अकार उच्चारणार्थमात्रं न भूत्वा इत्संज्ञकः अस्ति?
उत्तरम्—'लण्' सूत्रे।

43. **प्रश्नः**—लण् सूत्रे अकारस्य इत्संज्ञक-स्वीकरणस्य प्रयोजनं किम्?
उत्तरम्— 'र' प्रत्याहारस्य निर्माणम्।

44. **प्रश्नः**—'र' प्रत्याहारे के वर्णाः आगच्छन्ति?
उत्तरम्— रकार एवं लकारवर्णाः।

45. **प्रश्नः**—माहेश्वरसूत्रैः कति प्रत्याहाराः रचयन्ति?
उत्तरम्— (42) द्विचत्वारिंशत्।

46. **प्रश्नः**—सर्वेषां स्वर-व्यञ्जनप्रत्याहाराणां बोधक-प्रत्याहारः कोऽस्ति?
उत्तरम्— अल् प्रत्याहारः।

47. **प्रश्नः**—अच् प्रत्याहारेण कस्य अभिधानं भवति?
उत्तरम्— समस्तस्वराणाम्।

48. **प्रश्नः**— समस्तव्यञ्जनवर्णानां कस्मिन् प्रत्याहारे ग्रहणं भवति?
उत्तरम्— हल् प्रत्याहारे।

49. **प्रश्नः**—पञ्चाङ्गं व्याकरणं किमस्ति?
उत्तरम्—1. सूत्रपाठ, 2. गणपाठ, 3. धातुपाठ, 4. उणादिपाठ, 5. लिङ्गानुशासनम्।

50. **प्रश्नः**—सूत्राणि कति प्रकारकाणि भवन्ति? कानि च तानि?
उत्तरम्— षट्- 1. संज्ञा, 2. परिभाषा, 3. विधि, 4. नियम, 5. अतिदेश, 6. अधिकार।

51. **प्रश्नः**—सूत्रस्य किं लक्षणम्?
उत्तरम्—अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।

52. **प्रश्नः**—वार्तिकस्य किं लक्षणम्?
उत्तरम्—उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।
तं ग्रन्थं वार्तिकं प्राहुर्वार्तिकज्ञा विचक्षणाः।।

53. **प्रश्नः**—व्याख्यानस्य कति अङ्गानि भवन्ति?
उत्तरम्— (6 षट्) 1. पदच्छेदः, 2. पदार्थोक्तिः, 3. विग्रहः, 4. वाक्ययोजना, 5. आक्षेपः, 6. समाधानम्।

54. **प्रश्नः**—प्रातिपदिकः कं कथयति?
उत्तरम्—धातुना एवं प्रत्ययेन सह समस्तसार्थकशब्दाः, समासाः एवं तद्धिताश्च प्रतिपदिकसंज्ञकाः भवन्ति।

55. **प्रश्नः**—व्याकरणमते कति प्रमाणानि कानि च तानि?
उत्तरम्— 5 पञ्च, 1. प्रत्यक्षः, 2. अनुमानः, 3. शब्दः, 3. अभ्यासः, 5. अदृष्टः।

56. **प्रश्नः**— व्याकरणमते वाण्यः काः?
उत्तरम्—तिस्रः, 1. पश्यन्ती, 2. मध्यमा, 3. वैखरी।

57. **प्रश्नः**—अष्टाध्याय्याः प्रथमसूत्रं किमस्ति?
उत्तरम्— वृद्धिरादैच्।

58. **प्रश्नः**—भाषाविनिमयस्य साधनं किमस्ति?
उत्तरम्— विचारः।

59. **प्रश्नः**—'सिद्धे शब्दार्थ-सम्बन्धे' इति किमस्ति?
उत्तरम्—वार्तिकम्।

60. **प्रश्नः**—भाषाणां वर्गीकरणस्य क आधारः स्वीकृतः?
उत्तरम्— आकृतिः।

61. **प्रश्नः**—भारतीयार्यभाषासु प्रचीनतमा का?
उत्तरम्—वैदिक-संस्कृतभाषा।

62. **प्रश्नः**—'एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति' कस्येदं कथनम्?
उत्तरम्— महाभाष्यकारस्य पतञ्जलेः।

63. **प्रश्नः**—एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च भवति—
उत्तरम्—कामधुक्।

64. **प्रश्नः**—पतञ्जलिः कस्य अवतारः मन्यते?
उत्तरम्— शेषनागस्य।

65. **प्रश्नः**—पाणिनि-अष्टाध्यायीग्रन्थे कति सूत्राणि सन्ति?
उत्तरम्— 3978 सूत्राणि।

66. **प्रश्नः**—पाणिनिमहोदयस्य अष्टके वा अष्टाध्याय्यां प्रत्येकम् अध्याये कति पादाः (उपविभागाः) वर्तन्ते?
उत्तरम्— चत्वारः पादाः।

67. प्रश्नः—अष्टाध्याय्याः प्रथमाध्यायस्य विषयः किमस्ति?
उत्तरम्— शास्त्रोपयोगी संज्ञा-परिभाषायाः सङ्कलनम्।

68. प्रश्नः—कस्मिन् अध्याये समास-कारकस्य च विवेचना अस्ति?
उत्तरम्— द्वितीयाध्याये।

69. प्रश्नः—तृतीयाध्यायस्य विषयवस्तूनि के स्तः?
उत्तरम्— कृत्यप्रत्ययाः कृत् प्रत्ययाश्च।

70. प्रश्नः—तद्धितानां विमर्शः कस्मिन् अध्याये अस्ति?
उत्तरम्— चतुर्थ-पञ्चमाध्याययोः।

71. प्रश्नः—षष्ठाध्याये कस्य विमर्शः वर्तते?
उत्तरम्— तिङन्त, सन्धि, स्वरनियमानाम्।

72. प्रश्नः—अङ्गाधिकार-नाम्ना कस्य अध्यायस्य प्रसिद्धिः अस्ति?
उत्तरम्— सप्तमाध्यायस्य।

73. प्रश्नः—अङ्गाधिकारस्य विषयः किमस्ति?
उत्तरम्— सुबन्ताः तिङन्ताश्च।

74. प्रश्नः—अष्टमाध्याये विवेच्यविषयाः के सन्ति?
उत्तरम्— द्वित्वविधानं, स्वर-वैदिकी प्रक्रिया, सन्धिः षत्वणत्वविधानं च।

75. प्रश्नः—कियन्ति मुख्यानि व्याकरणानि?
उत्तरम्— (8/9) अष्टौ नव वा।

76. प्रश्नः—भर्तृहरिमहोदयस्य वाक्यपदीये कति काण्डानि सन्ति?
उत्तरम्—त्रीणि, 1. ब्रह्मकाण्डम्, 2. वाक्यकाण्डम्, 3. पदकाण्डम्।

77. प्रश्नः—वाक्यपदीये कियन्ति खण्डानि, कानि च तानि?
उत्तरम्— (3) त्रीणि, 1. ब्रह्मकाण्डम्, 2. पदकाण्डम्, 3. वाक्यकाण्डञ्च।

78. प्रश्नः— भर्तृहरिविरचितानि पुस्तकानि कानि सन्ति?
उत्तरम्— त्रीणि, 1. नीतिशतकम्, 2. , शृंगारशतकम्, 3. वैराग्यशतकम्।

79. प्रश्नः— भर्तृहरि-मतानुसारं 'वाक्' किमस्ति?
उत्तरम्— नादः।

80. प्रश्नः— भर्तृहरि-मते किं नाम स्फोटः?
उत्तरम्— भाषा।

81. प्रश्नः— भाषागत-वाक्यरचना का भवति?
उत्तरम्— परिष्कृता।

82. प्रश्नः— भर्तृहरेः प्रेमिकायाः किं नाम?
उत्तरम्— पिङ्गला।

83. प्रश्नः— साहित्य-संगीत-कला-विहीनः पशुः कः कथितवान्?
उत्तरम्— भर्तृहरिः।

84. प्रश्नः— 'विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं' श्लोकांशः कुतः उद्धृतः?
उत्तरम्— नीतिशतकम् इति ग्रन्थात्।

85. प्रश्नः— 'सत्संगतिः कथय किं न करोति पुंसाम्' इयं सूक्तिः कुतः उद्धृतः?
उत्तरम्— नीतिशतकम् इति ग्रन्थात्।

86. प्रश्नः— 'शतकत्रयम्' कस्य रचना अस्ति?
उत्तरम्— भर्तृहरेः।

87. प्रश्नः—'धिक् तां च तं च मदनं च मां च मां च' पद्यमिदं कस्मिन् शतकग्रन्थे प्राप्यते?
उत्तरम्— नीतिशतके।

88. प्रश्नः— 'कालो न यातो वयमेव यातास्तृष्णा न जीर्णा वयमेव जीर्णा' पद्यमिदं कस्मिन् शतके समुपलभ्यते?
उत्तरम्— वैराग्यशतके।

89. प्रश्नः—'साहित्यसंगीतकलाविहीनः, साक्षात्पशुः पुच्छविषाणहीनः' इत्यनेन पद्यांशेन सम्बद्धः ग्रन्थविशेषः कः?
उत्तरम्— नीतिशतकम्।

90. प्रश्नः— 'मनस्वी कार्यार्थी गणयति न दुःखम् न च सुखम्' पद्यमिदं भर्तृहरेः कस्मिन् शतके समुपलभ्यते?
उत्तरम्— नीतिशतके।

91. प्रश्नः— 'क्षीयन्तेऽखिलभूषणानि सततं-' पद्यमिदं कस्मिन् शतकग्रन्थे प्राप्यते?
उत्तरम्— नीतिशतके।

92. प्रश्नः— "सर्वे गुणाः काञ्चनमाश्रयन्ति' इयं सूक्तिः कस्मात् ग्रन्थात् उद्धृतः?
उत्तरम्— नीतिशतकात्।

93. प्रश्नः— 'मनस्तु साधुध्वनिभिः पदे पदे, हरन्ति सन्तो मणिनूपुरा इव' इयं सूक्तिः कस्मात् ग्रन्थात् उद्धृता?
उत्तरम्— नीतिशतकात्।

94. प्रश्नः— 'न्यायात्पथः प्रविचलन्ति पदं न धीराः' इयं सूक्तिः कस्मात् ग्रन्थात् उद्धृता?
उत्तरम्— नीतिशतकात्।

95. प्रश्नः—'पीत्वा मोहमयीं प्रसादमदिरामुन्मत्तभूतं जगत्' इयं सूक्तिः भर्तृहरेः कस्मात् ग्रन्थात् उद्धृता?
उत्तरम्— वैराग्यशतकात्।

96. प्रश्नः—स्फोटवादः कस्य प्रतिपाद्यः वर्तते?
उत्तरम्—व्याकरणस्य।

97. प्रश्नः—स्फोटस्य कति भेदाः सन्ति?
उत्तरम्— (8) अष्टौ।

98. प्रश्नः—स्फोटशब्दस्य का व्युत्पत्तिः?
उत्तरम्— स्फुटति-विकसति-अभिव्यक्तीभवत्यर्थो यस्मादिति स्फोटः।

99. प्रश्नः—वैयाकरणाऽनुसारेण शक्तिः कीदृशी?
उत्तरम्— पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, वाच्यवाचकभावापरपर्याया।

100. प्रश्नः—वैयाकरणैः पदपदार्थयोः कीदृशः सम्बन्धः स्वीक्रियते?
उत्तरम्— 'तादात्म्यम्।'

101. प्रश्नः—वैयाकरणमते पदं कीदृशम्?
उत्तरम्— स्फोटात्मकम्।

102. प्रश्नः—को नाम धात्वर्थः?
उत्तरम्— फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः।

103. प्रश्नः—किन्नाम साधुत्वम्?
उत्तरम्—व्याकरणाऽन्वाख्येयत्वं पुण्यजनकताऽवच्छेदकधर्मत्वं वा।

104. प्रश्नः—कात्यायन-रचितानां वार्तिकानां कियत्यः संख्याः सन्ति?
उत्तरम्— (1500) पञ्चदशशतानि।

105. प्रश्नः—प्राचीनवैयाकरणाः धात्वर्थं किं मन्यते?
उत्तरम्— फलव्यापारयोर्धातुः।

106. प्रश्नः—फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः इति केन कथितम्?
उत्तरम्— कौण्डभट्टेन।

107. प्रश्नः—नैयायिकमते धात्वर्थः किं वर्तते?
उत्तरम्— आख्यातपदोपस्थापितयोः कृतिवर्तमानयोरिव।

108. प्रश्नः—नागेशभट्टप्रभृतयो नवीना वैयाकरणाः धात्वर्थं किं मन्यते?
उत्तरम्— 'फलविशिष्टे व्यापारे व्यापारविशिष्टे फले च धातूनां शक्तिः' स्वीकुर्वन्ति।

109. प्रश्नः—मीमांसकाः धात्वर्थविषये किं वदन्ति?
उत्तरम्—फलमात्रं धात्वर्थः, व्यापारश्च प्रत्ययार्थ इति वदन्ति।

110. प्रश्नः— अन्ये मीमांसकास्तु धात्वर्थं किं मन्यन्ते?
उत्तरम्— 'व्यापारमात्रं धात्वर्थः' फलञ्च द्वितीयार्थ इति मन्यन्ते।

111. प्रश्नः—"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।" शब्दनिरूपणे कस्य विचारः?
उत्तरम्— वाक्यपदीयकारभर्तृहरिमहोदयस्य।

112. प्रश्नः—परमलघुमञ्जूषायां कियन्ति प्रकरणानि सन्ति?
उत्तरम्— चतुर्दश-प्रकरणानि।

113. प्रश्नः—मञ्जूषाकाराऽनुसारेण वृत्तिः कतिविधा, का च सा?
उत्तरम्— त्रिविधा–1. शक्तिः, 2. लक्षणा, 3. व्यञ्जनारूपा।

114. प्रश्नः—विशेषार्थ-निर्णायकाः संयोगादयः कियन्तः सन्ति?
उत्तरम्— (14) चतुर्दश।

115. प्रश्नः—लक्षणा कतिविधा?
उत्तरम्— द्विविधा।

116. प्रश्नः—नागेशमते शक्तिः कतिविधा?
उत्तरम्— (2) द्विविधा।

117. प्रश्नः—कतिविधा वागस्ति, सा च का?
उत्तरम्— चतुर्विधा, 1. परा, 2. पश्यन्ति, 3. मध्यमा, 4. वैखरीरूपा।

118. **प्रश्नः**—नागेशेन कतिविधो ध्वनिः स्वीक्रियते?
उत्तरम्— द्विविधः।

119. **प्रश्नः**—शाब्दबोधे कियन्ति सहकारि-कारणानि, कानि च तानि?
उत्तरम्— चत्वारि, 1. आकाङ्क्षा, 2. योग्यता, 3. आसत्ति, 4. तात्पर्यम् च।

120. **प्रश्नः**—का नाम आकाङ्क्षा?
उत्तरम्— वाक्यसमयग्राहिका आकाङ्क्षा।

121. **प्रश्नः**—योग्यतायाः किं स्वरूपम्?
उत्तरम्— परस्पराऽन्वयप्रयोजकधर्मवत्त्वरूपम्।

122. **प्रश्नः**—आसत्तेः किं स्वरूपम्?
उत्तरम्— प्रकृतान्वय-बोधाननुकूल-पदाव्यवधानम्।

123. **प्रश्नः**—किं नाम तात्पर्यम्?
उत्तरम्—एतद् वाक्यं पदं वा एतदर्थ-बोधायोच्चारणीयमितीश्वरेच्छा तात्पर्यम्।

124. **प्रश्नः**—नागेशमते का नाम क्रिया?
उत्तरम्—सर्वकारकाऽन्वयितावच्छेदकधर्मवती क्रिया।

125. **प्रश्नः**—"प्रयोगमुखम्" कस्य विवरणं विद्यते?
उत्तरम्— प्रयोगसंग्रहस्य।

126. **प्रश्नः**—प्रयोगमुखं कति पटला विराजन्ते?
उत्तरम्— (5) पञ्च।

127. **प्रश्नः**—समासशक्ति-दीपिकाऽन्तर्गते कियत्यः कारिकाः?
उत्तरम्— (27) सप्तविंशतिः।

128. **प्रश्नः**—न्यायसिद्धान्त-मुक्तावली कस्याः व्याख्या?
उत्तरम्— कारिकावल्याः।

129. **प्रश्नः**—कारिकावल्याः प्रणेता कोऽस्ति?
उत्तरम्— विश्वनाथपञ्चाननभट्टाचार्यः।

130. **प्रश्नः**—का नाम व्युत्पत्तिः?
उत्तरम्— कार्यकारणभावज्ञानम्।

131. **प्रश्नः**—पाणिनेः मातुर्नाम किम्?
उत्तरम्— दाक्षी।

132. **प्रश्नः**—पाणिनिः कस्य स्थानस्य निवासी आसीत्?
उत्तरम्— पाकिस्तान-स्थित-लाहौरस्य।

133. **प्रश्नः**—पतञ्जलेः मातुर्नाम किम्?
उत्तरम्— गोणिका।

134. **प्रश्नः**—को नाम आचार्यः?
उत्तरम्— "आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि। स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते।।

135. **प्रश्नः**—किं नाम अक्षरम्?
उत्तरम्—न क्षीयते न क्षरतीति वाऽक्षरम्। अर्थमश्नुते व्याप्नोतीत्यक्षरं पदं वाक्यं वा।

136. **प्रश्नः**—का नाम संज्ञा, संज्ञिनश्च के?
उत्तरम्— अनाकृतिः संज्ञा, आकृतिमन्तः संज्ञिनः। व्याकरणे पूर्वोच्चारितः संज्ञी, परोच्चारिता च संज्ञा कथ्यते।

137. **प्रश्नः**— को नाम आख्यातः?
उत्तरम्— नियमपूर्वक-अध्यापनं नाम आख्यातः।

138. **प्रश्नः**—साधु-शब्दप्रयोगपरिणामेषु परिगणितम् नास्ति?
उत्तरम्—साधुभावः।

139. **प्रश्नः**—को नाम विप्रतिषेधः?
उत्तरम्— तुल्यबल-विरोधे नियमयोर्बलाबलविचारः।

140. **प्रश्नः**—पाणिनेरनुसारेण गुरुः कतिविधः, कश्च सः?
उत्तरम्— चतुर्विधः, 1. आचार्यः, 2. प्रवक्ता, 3. श्रोत्रियः, 4. अध्यापकश्च।

141. **प्रश्नः**—वेदस्य उपाङ्गानि कानि सन्ति?
उत्तरम्— पुराण-न्याय-मीमांसा-धर्मशास्त्राणि।

142. **प्रश्नः**—ओङ्कारे अकाराद्यास्त्रयो वर्णाः केषां वाचकाः, अन्त्यो ध्वनिश्च किं कथ्यते?
उत्तरम्— अकाराद्यास्त्रयो वर्णाः ब्रह्मविष्णुमहेश्वराः। अन्त्ये प्रतीयमानो यो ध्वनिः ब्रह्मेति कथ्यते।।

143. **प्रश्नः**— को नाम मोक्षः?
उत्तरम्— आत्यन्तिकदुःखध्वंसो मोक्षः।

144. **प्रश्नः**— वैयाकरणभूषणसारे कियन्ति प्रकरणानि?
उत्तरम्— (14) चतुर्दश।

145. **प्रश्नः**—पुंस्त्वं किम्?
उत्तरम्— सत्त्वरजस्तमोगुणानामाधिक्यं पुंस्त्वम्।

146. **प्रश्नः**—किं नाम स्त्रीत्वम्?
उत्तरम्— सत्त्वरजस्तमोगुणानामपचयः स्त्रीत्वम्।

147. **प्रश्नः**—किन्नाम नपुंसकत्वम्?
उत्तरम्— सत्त्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वम्।

148. **प्रश्नः**— संस्कृते कति पुरुषाः भवन्ति, के च ते?
उत्तरम्—त्रयो पुरुषाः, 1. प्रथम-पुरुष, 2. मध्यम-पुरुष, 3. उत्तम-पुरुष।

149. **प्रश्नः**—संस्कृते कति लिङ्गानि?
उत्तरम्— (3) त्रीणि।

150. **प्रश्नः**—अनुनासिक-वर्णानां का संख्या?
उत्तरम्— (5) पञ्च।

151. **प्रश्नः**—पाणिनीयशिक्षाग्रन्थः कस्य वर्तते?
उत्तरम्— पाणिनिमहोदयस्य।

152. **प्रश्नः**—शिक्षाशब्दस्य का व्युत्पत्तिः?
उत्तरम्— शिक्ष् भाव=टाप्=आ शिक्षा। "शिक्षयति या सा शिक्षा" "शक्तुं शक्तो भवितुमिच्छा शिक्षा"

153. **प्रश्नः**—तैत्तिरीयोपनिषदि शिक्षाशास्त्रस्य किं प्रयोजनमुक्तम्?
उत्तरम्— वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तान इत्युक्तः शिक्षाऽध्यायः।

154. **प्रश्नः**—'गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः। अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः'।। इति कुत्र उक्तः?
उत्तरम्— भगवतः पाणिनेः शिक्षायामुक्तः।

155. **प्रश्नः**—पाणिनीयशिक्षानुसारं स्वराः कति भवन्ति?
उत्तरम्— उदात्तानुदात्तस्वरितभेदैः त्रयः।

156. **प्रश्नः**—मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्'।। इति केन भणितम्?
उत्तरम्— पाणिनीयशिक्षायां स्पष्टमुद्घोषितं पाणिनिना महावैयाकरणेन।

157. **प्रश्नः**—पाणिनीयशिक्षा कस्मिन् क्षेत्रे सुप्रसिद्धाऽस्ति?
उत्तरम्— अध्ययनाध्यापनयोः शैक्षणिके जगति।

158. **प्रश्नः**—पाणिनीयशिक्षायां बृद्धपाठे कति परिमिताः श्लोकाः सन्ति?
उत्तरम्— षष्टिपरिमिताः।

(ग) संज्ञा/परिभाषा/आगम/ आदेशादिविषयकानिवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—कति माहेश्वरसूत्राणि सन्ति?
उत्तरम्— चतुर्दश।

2. **प्रश्नः**—माहेश्वराणि इत्यत्र कः प्रत्ययः?
उत्तरम्— अण् प्रत्ययः।

3. **प्रश्नः**—किमर्थानि माहेश्वरसूत्राणि?
उत्तरम्— प्रत्याहारसंज्ञार्थानि।

4. **प्रश्नः**—माहेश्वरसूत्रेषु अन्त्याः भवन्ति?
उत्तरम्— इत्संज्ञकाः।

5. **प्रश्नः**—"आदिरन्त्येन सहेता" अनेन सूत्रेण विधीयते?
उत्तरम्— प्रत्याहारसंज्ञा।

6. **प्रश्नः**—कति प्रत्याहाराः सन्ति ?
उत्तरम्— त्रिचत्वारिंशत्।

7. **प्रश्नः**—केषां वर्णानाम् उदात्त-अनुदात्त-स्वरितसंज्ञाः भवन्ति?
उत्तरम्— स्वरवर्णानाम् (अचाम्)।

8. **प्रश्नः**—अ, इ, उ, ऋ वर्णानां प्रत्येकस्य भेदाः भवन्ति?
उत्तरम्— अष्टादश।

9. **प्रश्नः**—ए, ऐ, ओ, औ वर्णानां प्रत्येकस्य भेदाः भवन्ति?
उत्तरम्— द्वादश।

10. **प्रश्नः**—'तुल्यास्यप्रयत्नं सवर्णम्' अनेन सूत्रेण विधीयते?
उत्तरम्— सवर्णसंज्ञा।

11. **प्रश्नः**—अ-कवर्गः हकार-विसर्गवर्णानाम् उच्चारणस्थानमस्ति?
उत्तरम्— कण्ठः।

12. **प्रश्नः**—इ-चवर्गः य श वर्णानाम् उच्चारणस्थानमस्ति?
उत्तरम्— तालु।

13. **प्रश्नः**—ऋ-टवर्गः र ष वर्णानाम् उच्चारणस्थानमस्ति?
उत्तरम्— मूर्धा।

14. **प्रश्नः**—लृ-तवर्गः ल स वर्णानाम् उच्चारणस्थानमस्ति?
उत्तरम्— दन्तः।

15. **प्रश्नः**—उ-पवर्गः उपध्मानीयः वर्णानाम् उच्चारणस्थानमस्ति?
उत्तरम्— ओष्ठः।

16. **प्रश्नः**—ओ औ वर्णानाम् उच्चारणस्थानमस्ति?
उत्तरम्— कण्ठौष्ठ्य।

17. **प्रश्नः**—एकारः ऐकारः वर्णानाम् उच्चारणस्थानमस्ति?
उत्तरम्— कण्ठतालुः।

18. **प्रश्नः**—ञ म ङ ण न वर्णानां विशेषस्थानम् अस्ति?
उत्तरम्— नासिका।

19. **प्रश्नः**—प्रयत्नः कतिविधः भवति?
उत्तरम्— द्विविधः।

20. **प्रश्नः**—आभ्यन्तरप्रयत्नः कतिविधः के च ते?
उत्तरम्—चतुर्विधः, स्पृष्टः, ईषत्स्पृष्टः, विवृतः, संवृतश्च।

21. **प्रश्नः**—बाह्यप्रयत्नः कतिविधः के च ते?
उत्तरम्—एकादश, विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः, स्वरितश्च।

22. **प्रश्नः**—स्पर्शाः वर्णाः के सन्ति?
उत्तरम्— कवर्गतः पवर्गपर्यन्तम्।

23. **प्रश्नः**—अन्तःस्थाः वर्णाः सन्ति?
उत्तरम्— य, र, ल, व।

24. **प्रश्नः**—ऊष्मवर्णाः सन्ति?
उत्तरम्— श, ष, स, ह।

25. **प्रश्नः**—वर्गस्य प्रथम-तृतीय-पञ्चमवर्णानाम् अन्तःस्थानाञ्च बाह्यप्रयत्नः अस्ति?
उत्तरम्—अल्पप्राणः।

26. **प्रश्नः**—वर्गस्य द्वितीयचतुर्थवर्णानाम् ऊष्मणाञ्च बाह्यप्रयत्नः अस्ति?
उत्तरम्— महाप्राणः।

27. **प्रश्नः**—वृद्धिसंज्ञाविधायकं सूत्रम्?
उत्तरम्— वृद्धिरादैच्।

28. **प्रश्नः**—आ, ऐ, औ एते वर्णाः सन्ति?
उत्तरम्— वृद्धिसंज्ञकाः।

29. **प्रश्नः**—गुणसंज्ञा केन सूत्रेण विधीयते?
उत्तरम्— अदेङ्गुणः।

30. **प्रश्नः**—गुणसंज्ञकाः वर्णाः सन्ति?
उत्तरम्—अ, ए, ओ।

31. **प्रश्नः**—प्रादीनां क्रियायोगे भवति?
उत्तरम्—उपसर्गसंज्ञा।

32. **प्रश्नः**—कति उपसर्गाः?
उत्तरम्—द्वाविंशतिः।

33. **प्रश्नः**—'अवसान'संज्ञा केन सूत्रेण भवति?
उत्तरम्— 'विरामोऽवसानम्'।

34. **प्रश्नः**—'संहिता'संज्ञा केन सूत्रेण भवति?
उत्तरम्—'परः सन्निकर्षः संहिता'।

35. **प्रश्नः**—'पद'संज्ञा केन सूत्रेण भवति?
उत्तरम्— "सुप्तिङन्तं पदम्"।

36. **प्रश्नः**—संयोगसंज्ञाविधायकं सूत्रम्?
उत्तरम्—'हलोऽनन्तरा संयोगः'।

37. **प्रश्नः**—ह्रस्वस्य स्वरवर्णस्य भवति?
उत्तरम्— लघुसंज्ञा।

38. **प्रश्नः**—संयोगे परे ह्रस्वस्वरस्य एवं दीर्घस्वरस्य संज्ञा भवति?
उत्तरम्— गुरुसंज्ञा।

39. **प्रश्नः**—नदीसंज्ञाविधायकं सूत्रं किमस्ति?
उत्तरम्—'ङिति ह्रस्वश्च'।

40. **प्रश्नः**—'मति ङे मत्यै' अत्र 'मति' इत्यस्य नदी-संज्ञा केन सूत्रेण भवति?
उत्तरम्—'ङिति ह्रस्वश्च'।

41. **प्रश्नः**—'यू स्त्र्याख्यौ नदी' इति सूत्रे 'यू' इत्यनेन कयोः वर्णद्वयोः बोधो भवति?
उत्तरम्— ई, ऊ।

42. **प्रश्नः**—'घि'संज्ञा केन सूत्रेण भवति?
उत्तरम्—'शेषो घ्यसखि'।

43. **प्रश्नः**—ङित् विभक्तौ केन सूत्रेण 'घि'संज्ञकं गुणो विधीयते?
उत्तरम्—घेर्ङिति।

44. **प्रश्नः**—'घि'संज्ञकेन विहितं 'ङि' विभक्तिं केन सूत्रेण औकारो भवति?
उत्तरम्— अच्च घेः इति सूत्रेण।

45. **प्रश्नः**—'शेषो घ्यसखि' इति सूत्रे 'शेष'शब्दः कया संज्ञया सम्बद्धः?
उत्तरम्— नदी-संज्ञया।

46. **प्रश्नः**—प्रतिपदिकसंज्ञाविधायकं सूत्रं किम्?
उत्तरम्—अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।

47. **प्रश्नः**—शब्दानुशासने प्रातिपदिकसंज्ञाविधायकानि कति सूत्राणि सन्ति?
उत्तरम्— (02) द्वौ।

48. **प्रश्नः**—'कृत्तद्धितसमासाश्च' इति सूत्रेण का संज्ञा विधीयते?
उत्तरम्— प्रातिपदिकसंज्ञा।

49. **प्रश्नः**—'दाशरथिः' अत्र कस्मिन् अर्थे प्रातिपदिकसंज्ञा भवति?
उत्तरम्— तद्धितान्तार्थे।

50. **प्रश्नः**—'कारकः' अत्र कीदृशेऽर्थे प्रातिपदिकसंज्ञा भवति?
उत्तरम्— कृदन्तार्थे।

51. **प्रश्नः**—'पीताम्बरः' अत्र कस्मिन् अर्थे प्रातिपदिक-संज्ञा भवति?
उत्तरम्— समासान्तार्थे।

52. **प्रश्नः**—'डित्थ' इत्यस्य प्रातिपदिक-संज्ञा केन सूत्रेण भवति?
उत्तरम्—अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।

53. **प्रश्नः**—केन सूत्रेण 'उपधा' विधीयते?
उत्तरम्—अलोऽन्त्यात्पूर्व उपधा।

54. **प्रश्नः**—'अपृक्त'संज्ञाविधायकं सूत्रं किम्?
उत्तरम्— अपृक्त एकाल् प्रत्ययः।

55. **प्रश्नः**—'लता सु लता स् लता' अत्र 'स्' इत्यस्य लोपः कया संज्ञया सम्बद्धोऽस्ति?
उत्तरम्— अपृक्त-संज्ञया।

56. **प्रश्नः**—गतिसंज्ञा केन सूत्रेण भवति?
उत्तरम्— गतिश्च।

57. **प्रश्नः**—'आदर' 'अनादर' अर्थयोः कयोः गति-संज्ञा भवतः?
उत्तरम्— सत्, असत् इत्यनयोः।

58. **प्रश्नः**—'गतिश्च' अस्मिन् सूत्रे विधेय'गति'संज्ञायाः किमुद्देश्यम्?
उत्तरम्— प्रादयः।

59. **प्रश्नः**—'च्वि' प्रत्ययान्तस्य का संज्ञा भवति?
उत्तरम्— गति-संज्ञा।

60. **प्रश्नः**—'आदरानादरयोः सदसती' इति सूत्रेण कस्याः संज्ञायाः विधानं भवति?
उत्तरम्— गति-संज्ञायाः।

61. **प्रश्नः**—'अलम्' इत्यस्य कस्मिन् अर्थे, केन सूत्रेण च 'गति'संज्ञा भवति?
उत्तरम्— भूषणार्थे, 'भूषणेऽलम्' इति सूत्रेण।

62. **प्रश्नः**—'अन्त' इत्यस्य कस्मिन् अर्थे केन सूत्रेण च 'गति'संज्ञा भवति?
उत्तरम्— अपरिग्रह-अर्थे, 'अन्तरपरिग्रहे' इति सूत्रेण।

63. **प्रश्नः**—'अस्तम्' अस्य अव्ययस्य गति-संज्ञा केन सूत्रेण भवति?
उत्तरम्— 'अस्तं च' इति सूत्रेण।

64. **प्रश्नः**—'अच्छगत्यर्थवदेषु' इति सूत्रेण कस्याः संज्ञायाः विधानं भवति?
उत्तरम्— गति-संज्ञायाः।

65. **प्रश्नः**—'विभाषा कृञि' सूत्रः कया संज्ञया सह सम्बद्धः वर्तते?
उत्तरम्— गति-संज्ञया।

66. **प्रश्नः**—'कृञ्' धातुना युक्ते सति कयोः द्वयोः 'गति'संज्ञा भवति?
उत्तरम्— उपाजे, अन्वाजे।

67. **प्रश्नः**—'कृञ्' इत्यनेन युक्तः 'उरसि' 'मनसि' इत्यस्य च कस्मिन् अर्थे गति-संज्ञा भवति?
उत्तरम्— अन्तर्द्धि-इत्यर्थे।

68. **प्रश्नः**—'अनत्याधान उरसिमनसि' अस्य सूत्रस्य किमुदाहरणम्?
उत्तरम्— उरसिकृत्य।

69. **प्रश्नः**—'अग्निचित्' अत्र टि किमस्ति?
उत्तरम्— इत्।

70. **प्रश्नः**—'निष्ठा' संज्ञा केन सूत्रेण भवति?
उत्तरम्—क्तक्तवतू निष्ठा।

71. प्रश्नः—'कृ णिच् क्त कारितम्' अत्र 'णि' इत्यस्य लोपः केन सूत्रेण भवति?
उत्तरम्— निष्ठायां सेटि।

72. प्रश्नः—'प्र-क्षि क्त प्रक्षीण्' अत्र केन सूत्रेण धातोः दीर्घो भवति?
उत्तरम्— निष्ठयामण्यदर्थे।

73. प्रश्नः—'छिद् क्त छिन्तः' अत्र केन सूत्रेण नत्वो भवति?
उत्तरम्— रदाभ्यां निष्ठातो नः पूर्वस्य च दः।

74. प्रश्नः—केन सूत्रेण सम्प्रसारणसंज्ञा विधीयते?
उत्तरम्—इग्यणः सम्प्रसारणम्।

75. प्रश्नः—'विभाषा' संज्ञा केन सूत्रेण भवति?
उत्तरम्—न वेति विभाषा।

76. प्रश्नः—किम् नाम सवर्णसंज्ञा?
उत्तरम्— तुल्यास्य प्रयत्नं सवर्णम्।

77. प्रश्नः—'टि' संज्ञाविधायकं सूत्रं किम्?
उत्तरम्—अचोऽन्त्यादि टि।

78. प्रश्नः—'प्रगृह्य' संज्ञा केन सूत्रेण भवति?
उत्तरम्— ईदूदेद्द्विवचनं प्रगृह्यम्।

79. प्रश्नः—'शिशू' इत्यस्य 'प्रगृह्यसंज्ञा' केन सूत्रेण भवति?
उत्तरम्— ईदूदेद्द्विवचनं प्रगृह्यम्।

80. प्रश्नः—'अमी अत्र' अस्मिन् पदे 'अमी' इत्यस्य 'प्रगृह्यसंज्ञा' केन सूत्रेण भवति?
उत्तरम्— 'अदसो मात्' इति सूत्रेण।

81. प्रश्नः—'शि सर्वनामस्थानम्' इति सूत्रस्य 'शि' इत्यस्य काभ्यां द्वाभ्यां विभक्तिभ्यां सम्बन्धः?
उत्तरम्— जस्, शस्।

82. प्रश्नः—'समासेषु' प्रथमा निर्दिष्टस्य का संज्ञा?
उत्तरम्—उपसर्जनसंज्ञा।

83. प्रश्नः—'विभाषा कृञि' इति सूत्रेण का संज्ञा?
उत्तरम्— गतिः।

84. प्रश्नः—'मुनि' इति पदस्य का संज्ञा?
उत्तरम्— घि।

85. प्रश्नः—'उपधा' संज्ञा केन सूत्रेण भवति?
उत्तरम्— अलोऽन्त्यात् पूर्व उपधा।

86. प्रश्नः—पाणिनीयव्यवस्थायां 'उपधा' का विद्यते?
उत्तरम्— संज्ञा।

87. प्रश्नः—सुबन्त-तिङन्तयोः का संज्ञा?
उत्तरम्— पदसंज्ञा।

88. प्रश्नः—सम्प्रसारणेन 'य्' 'व्' इत्यनयोः के भवतः?
उत्तरम्— इ, उ, भवतः।

89. प्रश्नः—'पतत् ङीप् पतन्ती' अत्र केन सूत्रेण 'नुम्' इत्यस्यागमः भवति?
उत्तरम्— शप्श्यनोर्नित्यम्।

90. प्रश्नः—'द्विगोः' सूत्रे कस्मात् सूत्रात् 'ङीप्' इत्यस्य अनुवर्तनं भवति?
उत्तरम्— ऋन्नेभ्यो ङीप्।

91. प्रश्नः—'नदी' संज्ञा केन सूत्रेण भवति?
उत्तरम्—यू स्त्र्याख्यौ नदी।

92. प्रश्नः—समासशास्त्रे उपसर्जनं नाम किम्?
उत्तरम्—प्रथमानिर्दिष्टम्।

93. प्रश्नः—सप्तर्षयः इत्यत्र समासविधायकं सूत्रं किम्?
उत्तरम्—दिक्संख्ये संज्ञायाम्।

94. प्रश्नः—स्वादिपञ्चवचनानां का संज्ञा?
उत्तरम्—सर्वनामस्थानम्।

95. प्रश्नः—संख्या का कथ्यते?
उत्तरम्— बहुगणवतुडति संख्या।

96. प्रश्नः—तरप् एवं तमप् इत्यस्य का संज्ञा भवति?
उत्तरम्— तरप्तमपौ घः इति घः संज्ञा।

97. प्रश्नः—सम्बुद्धिसंज्ञा कां कथ्यते?
उत्तरम्—सम्बोधने प्रथमा एकवचनं सम्बुद्धिसंज्ञकं भवति।

98. प्रश्नः—द्वित्वस्य द्वितीयरूपं किं कथ्यते?
उत्तरम्— आम्रेडितम्।

99. प्रश्नः—अभ्यासं किं कथ्यते?
उत्तरम्—द्वित्वस्य प्रथमरूपम्।

100. प्रश्नः—'प' एवं 'फ' इत्यस्य पूर्व-अर्द्धविसर्ग-तुल्य-ध्वनिं किं कथ्यते?
उत्तरम्— उपध्मानीयम्।

101. प्रश्नः—अपृक्त इति कं कथ्यते?
उत्तरम्— एकवर्णात्मकं प्रत्ययम्।

102. प्रश्नः—घुसंज्ञा कान् धातून् भवति?
उत्तरम्—षड् धातून्, 1. डुदाञ्, 2. दाण्, 3. दो, 4. देङ्, 5. दुधाञ्, 6. धेट्।

103. प्रश्नः—'घु' संज्ञाविधायकं सूत्रं किमस्ति?
उत्तरम्— दाधाघ्वदाप्।

104. प्रश्नः—भट्टोजिदीक्षितः प्रातिपदिकार्थस्य का व्याख्या करोति?
उत्तरम्—नियतोपस्थितिकः प्रातिपदिकार्थः।

105. प्रश्नः—व्याडिमहोदयः प्रातिपदिकार्थं कस्मिन् स्वीकरोति?
उत्तरम्— व्यक्तौ।

106. प्रश्नः—वाजप्यायनः प्रातिपदिकार्थं कस्मिन् स्वीकरोति?
उत्तरम्— जातौ (जात्याम्)।

107. प्रश्नः—पतञ्जलिः प्रातिपदिकार्थं केषु स्वीकरोति?
उत्तरम्— 1. स्वार्थ, 2. द्रव्य, 3. लिङ्ग, 4. संख्या, 5. कारकः।

108. प्रश्नः—कैयटः प्रातिपदिकार्थं केषु स्वीकरोति?
उत्तरम्—1. स्वार्थ, 2. द्रव्य, 3. लिङ्ग, 4. संख्या।

109. प्रश्नः—लुक्, लुप् एवं श्लु इति किमस्ति?
उत्तरम्—एते अदर्शनं लोपस्य वा कारकसंज्ञा भवति।

110. प्रश्नः—उपसर्गाणां गति-संज्ञा कदा भवति?
उत्तरम्—क्रियायोगे उपसर्गस्य गतिसंज्ञा भवति। (उपसर्गाः क्रियायोगे)।

111. प्रश्नः—अन्वादेशं कं कथ्यते?
उत्तरम्—यस्मिन् कार्ये यस्य ग्रहणं अभूत् तस्य पुनः अन्यकार्येषु उपयोग-करणं अन्वादेशो भवति।

112. प्रश्नः—आबन्तं कं कथ्यते?
उत्तरम्—टाप्, डाप्, चाप् एते त्रयं स्त्रीप्रत्ययं 'आप्' इति कथ्यते, तस्यान्तं पदं आबन्तमिति कथ्यते।

113. प्रश्नः—संस्कृतवर्णमालायां कति मूलस्वराः भवन्ति?
उत्तरम्—पञ्च, अ, इ, उ, ऋ, लृ।

114. प्रश्नः—ध्वनि-परिवर्तनस्य सर्वप्रमुखकारणं किम्?
उत्तरम्— प्रयत्नलाघवम्।

115. प्रश्नः—सूत्रं किमुच्यते?
उत्तरम्— अल्पाक्षरत्वे सति बह्वर्थबोधकत्वं सूत्रत्वम्।

116. प्रश्नः—धातुसंज्ञकाः के भवन्ति?
उत्तरम्— क्रियावाचिनो भ्वादयः।

117. प्रश्नः—सर्वनामसंज्ञकाः के शब्दाः सन्ति?
उत्तरम्— (35) पञ्चत्रिंशत्, सर्वादयः।

118. प्रश्नः—अव्ययसंज्ञकाः के भवन्ति?
उत्तरम्— स्वरादयो निपाताश्च।

119. प्रश्नः—किं नाम अव्ययम्?
उत्तरम्— सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥

120. प्रश्नः—'श्री' शब्दस्य षष्ठी-विभक्ति-बहुवचने का संज्ञा विकल्पेन भवति?
उत्तरम्— नदी-संज्ञा।

121. प्रश्नः—भूपतिशब्दस्य 'घि' संज्ञाविधायकं सूत्रं किम्?
उत्तरम्— पतिः समास एव।

122. प्रश्नः—समासे पतिशब्दस्य का संज्ञा भवति?
उत्तरम्— घिसंज्ञा।

123. प्रश्नः—'भवत्+छन्=भवदीयः अत्र भवत् शब्दस्य केन सूत्रेण पदसंज्ञा भवति?
उत्तरम्— सिति च।

124. प्रश्नः—स्वप्+क्त=सुप्तः अत्र स्वप् धातोः किं कार्यं भवति?
उत्तरम्— सम्प्रसारणम्।

125. प्रश्नः—पाणिनेः मते 'वधू' शब्दस्य का संज्ञा?
उत्तरम्— नदी-संज्ञा।

126. प्रश्नः—उप+भुज्+तुमुन्=उपभोक्तुम् अत्र धातोः कं अंशं गुणः अभूत्?
उत्तरम्— उपधा।

127. प्रश्नः—'रम्+घञ्=रामः' अत्र धातोः अकारस्य का संज्ञा?
उत्तरम्—उपधा-संज्ञा।

128. प्रश्नः—पठ्+घञ्=पाठः अत्र धातोः को विधिः प्रयुक्तः?
उत्तरम्— वृद्धि।

129. प्रश्नः—'राजन्+सु (स्) =राज्ञि 'स्' इत्यस्य लोपः कथं भवति?
उत्तरम्— अयं अपृक्तः अस्ति।

130. प्रश्नः—'कारके' इदं कीदृशं सूत्रम्?
उत्तरम्— अधिकार-सूत्रम्।

131. प्रश्नः—कृदन्तस्य का संज्ञा भवति?
उत्तरम्— प्रातिपदिक-संज्ञा।

132. प्रश्नः—'मुनि' शब्दस्य का संज्ञा?
उत्तरम्— घि-संज्ञा।

133. प्रश्नः—'सर्वनामस्थाने चाऽसम्बुद्धौ' इति सूत्रेण कं दीर्घं भवति?
उत्तरम्— उपधा-दीर्घ।

134. प्रश्नः—'अष्टाध्यायी' इति ग्रन्थे सम्पूर्ण-उपधाकार्यः केन सम्बद्धः?
उत्तरम्— स्वरेण सम्बद्धः।

135. प्रश्नः—'अलम्' अत्र कस्मिन् अर्थे 'गति' संज्ञा भवति?
उत्तरम्— भूषण-अर्थे।

136. प्रश्नः—समासशास्त्रे प्रथमानिर्दिष्टस्य का संज्ञा?
उत्तरम्— उपसर्जनसंज्ञा।

137. प्रश्नः—अपादान-संज्ञाविधायकं सूत्रं किम्?
उत्तरम्— जनिकर्तुः।

138. प्रश्नः—अष्टाध्यायीग्रन्थे 'पद-संज्ञाविधायक'सूत्राणां का संख्या?
उत्तरम्— (4) चतस्रः।

139. प्रश्नः—अष्टाध्यायीग्रन्थे 'प्रातिपदिक-संज्ञाविधायक'-सूत्राणां का संख्या?
उत्तरम्— (2) द्वे।

140. प्रश्नः—'राजभ्याम्' अत्र 'राजन्'शब्दस्य का संज्ञा भवति?
उत्तरम्— पद-संज्ञा।

141. प्रश्नः—अष्टाध्याय्यां 'सर्वनामस्थान-संज्ञा' विधायकानि कति सूत्राणि?
उत्तरम्— (2) द्वे।

142. प्रश्नः—'सर्वनामस्थान' संज्ञाविधायकानि सूत्राणि कानि?
उत्तरम्— 1. सुडनपुंसकस्य, 2. सर्वादीनि सर्वनामानि।

143. प्रश्नः—ईकारान्तस्त्रीलिङ्गवाचक-शब्दस्य का संज्ञा भवति?
उत्तरम्— नदी-संज्ञा।

144. प्रश्नः—धात्वादिस्थले अन्त्यवर्णेन पूर्ववर्णस्य का संज्ञा?
उत्तरम्— उपधा-संज्ञा।

145. प्रश्नः—सुबन्तं तिङन्तं च किंसंज्ञकं भवति?
उत्तरम्— पद-संज्ञकम्।

146. प्रश्नः—निषेध-विकल्पौ किं कथ्यते?
उत्तरम्— विभाषा।

147. प्रश्नः—'अ' एवं 'आ' इति परस्परं किमस्ति?
उत्तरम्— सवर्णः।

148. प्रश्नः—राजन् अत्र अन् इत्यस्य का संज्ञा?
उत्तरम्— टि-संज्ञा।

149. प्रश्नः—पुंल्लिङ्ग-स्त्रीलिङ्गयोः 'सु, औ, जस्, अम्, औट्' एतेषां विभक्तीनां का संज्ञा?
उत्तरम्— सर्वनामस्थान-संज्ञा।

150. प्रश्नः—राजन्+अम् अत्र 'अम्' इत्यस्य का संज्ञा?
उत्तरम्— सर्वनामस्थान-संज्ञा।

152. प्रश्नः—'यण्' इत्यस्य स्थाने 'इक्' विधानं किं कथ्यते?
उत्तरम्— सम्प्रसारणम्।

153. प्रश्नः—ईकारान्त, ऊकारान्त एवं एकारान्तद्विवचनानां का संज्ञा?
उत्तरम्— प्रगृह्य-संज्ञा।

154. प्रश्नः—'हरी एतौ' अत्र हरी इत्यस्य का संज्ञा?
उत्तरम्— प्रगृह्य-संज्ञा।

(x) (O-Code-25/73) (ग) सिद्धान्तकौमुदी- (13) पञ्चसन्धि एवं सन्धिविषयकानि-वस्तुनिष्ठप्रश्नोत्तराणि

सन्धिविचार- (पञ्चसन्धि)

सम् उपसर्गात् धाधातोः किप्रत्ययात् निष्पद्यते सन्धिशब्दः। शब्दोऽयं पुंसि लिङ्गे प्रयुज्यते।

संहितैकपदे नित्या नित्या धातूपसर्गयोः।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते।।

एकस्मिन् पदे सन्धिकार्यं नित्यं भवति। धातूपसर्गयोरपि सन्धिकार्यं नित्यं भवति। समासे सन्धिकार्यं नित्यं भवति। वाक्येऽस्मिन् सन्धिकार्यं विवक्षाधीना भवति।

कति सन्धयः, के च ते? पञ्चसन्धयः भवन्ति-

1. अच्सन्धिः, 2. हल्सन्धिः, 3. विसर्गसन्धिः, 4. स्वादिसन्धिः, 5. प्रकृतिभावसन्धिः।

1. अच्सन्धिः-

(क) यणसन्धिः (यण्=य् व् र् ल्)—

इको यणचि-6.1.74 इकः स्थाने यण् स्यादचि संहितायां विषये। अत्र इकः (षष्ठ्यन्त), यण् (प्रथमान्त), अचि (सप्तम्यन्त) अर्थात् इ, ई, उ, ऊ, ऋ, ॠ, लृ इत्येतेषां वर्णानामनन्तरं यदि असवर्णस्वरा वर्तन्ते तर्हि क्रमशः-'इ-ई' इत्यनयोः स्थाने यकारः, उ-ऊ इत्यनयोः स्थाने वकारः, ऋ-ॠ इत्यनयोः स्थाने रकारः (रेफः), लृकारस्य स्थाने लकारश्च आदेशो भवति।

यथा-इ-य= इति+आदिः=इत्यादिः, प्रति+एकः=प्रत्येकः, यदि+एवं=यद्येवं, इति+आह=इत्याह, इति+अयं=इत्ययं, मति+आ=मत्या, सुधी+उपास्यः=सुध्युपास्यः, प्रति+अगात्=प्रत्यगात् इत्यादयः।

उ-व = सु+आगतम्=स्वागतम्, मधु+अरिः=मध्वरिः, अनु+अयः=अन्वयः, अनु+आदेशः=अन्वादेशः, गुरु+आज्ञा=गुर्वाज्ञा, पठतु+अत्र=पठत्वत्र, इत्यादयः।

ऋ-र= धातृ+अंशः=धात्रंशः, धातृ+ए=धात्रे, मातृ+आ=मात्रा, हर्तृ+ई=हर्त्री, मातृ+ए=मात्रे, क्रोष्टृ+आ=क्रोष्ट्रा, इत्यादयः।

लृ-ल=लृ+आकृतिः=लाकृतिः, लृ+आकारः=लाकारः।

इक् (स्थाने)	असवर्ण अच्	यण् (विकारः)	सन्धिविच्छेदः	सन्धिः (सिद्धरूपम्)
इ+	अ=	य्	यदि+अत्र (यद्+य्+अत्र)	= यद्यत्र
ई+	अ=	यं	नदी+अम्बुः (नद्+य्+अम्बु)	= नद्यम्बुः
ई+	उ=	य्	सुधी+उपास्यः (सुध्+य्+उपास्यः)	=सुध्युपास्यः
उ+	अ=	व्	मधु+अरिः (मध्+व्+अरि)	=मध्वरिः
ऊ+	आ=	व्	वधू+आगमनम् (वध्+व्+आगमनम्	=वध्वागमनम्
ऋ+	इ=	र्	पितृ+इच्छा (पित्+र्+इच्छा)	=पित्रिच्छा
लृ+	आ=	ल्	घस्लृ+आदेशः (घस्+ल्+आदेशः)	=घस्लादेशः

(ख) जश्त्व-"झलां जश् झशि (8.4.53) झलि (झश्) परे झलां जशः स्युः" यथा- दुघ्+धम्=दुग्धम्, एतत्+दर्शनम्=एतद्दर्शनम्, दध्+धः=दाधः, युध्+धः=युद्धः, शुध्+धिः=शुद्धिः, लभ्+धः=लब्धः, क्षुभ्+धः=क्षुब्धः।

(ग) अयादि-सन्धिः— एचोऽयवायावः (6.1.78) एचः क्रमाद् अय् अव् आय् आव् एते स्युरचि। अर्थात् ए ऐ ओ औ इत्येतेभ्यः वर्णेभ्यः स्वरे परे एकारस्य स्थाने अय्, ऐकारस्य स्थाने आय्, ओकारस्य स्थाने अव्, औकारस्य स्थाने आव् च आदेशाः भवन्ति। यथा–

1. ए-अय्; हरे+ए=हरये, जे+अ=जयः, ए+अ=अयः, कवे+ए=कवये, मते+ए =मतये, ने+अनम्=नयनम्, चे+अ=चयः, शे+इतः=शयितः।

2. ओ-अव; विष्णो+ए=विष्णवे, गो+एषणा=गवेषणा, भो+अति=भवति, गुरो+ए=गुरवे, भो+अनम्=भवनम्, पो+अनम्=पवनम्, गुरो+अः=गुरवः, भानो+ए=भानवे।

3. ऐ-आय्; नै+अकः=नायकः, गै+अकः=गायकः, दै+अकः=दायकः।

4. औ-आव्; पौ+अकः=पावकः, भौ+अकः=भावकः।

एच् (स्थाने)	अच् (परे)	आदेश (विकारः)	सन्धिविच्छेदः	सन्धिः (सिद्धरूपम्)
ए +	ए	अय्	हरे+ए (हर्+अय् +ए)	= हरये
ऐ+	आ	आय्	नै+अकः (न्+आय्+अकः	= नायकः
ओ+	अ	अव्	विष्णो+ए (विष्ण्+अव्+ए)	= विष्णवे
औ+	अ	आव्	पौ+अकः (प्+आव्+अकः)	= पावकः

(घ) सवर्णदीर्घ-'अकः सवर्णे दीर्घः' 6.1.10 अकः सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेशः स्यात्। अत्र अकः (पञ्चमी) अ इ उ ऋ ऌ तः सवर्णेऽचि परे (सप्तम्यन्ते) अ आ+अ आ=आ, इ ई+इ ई=ई, उ ऊ+उ ऊ=ऊ, ऋ ॠ+ऋ ॠ=ॠ, पूर्वपरयो मिलनेन दीर्घः (प्रथमान्तः) भवति।

अ आ इत्येतयोः अनन्तरं यदि अ आ इत्येतौ वर्णौ स्तः तर्हि आकारः, इ ई इत्येतयोः अनन्तरं यदि इ ई इत्येतौ वर्णौ स्तः तर्हि ईकारः, उ ऊ इत्येतयोः अनन्तरं यदि उ, ऊ इत्येतौ वर्णौ स्तः तर्हि ऊकारः, ऋ इत्यनन्तरं ऋ ऌ इत्येतौ वर्णौ स्तः तर्हि ॠकारः पूर्वपरयोः स्थाने दीर्घः एकादेशत्वेन भवति। दीर्घरूपाभावे ऌकारस्य प्रयोगः न भवति।

सवर्णसंज्ञा-तुल्यास्य प्रयत्नं सवर्णम्-ताल्वादिस्थान-माभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्।

(1) अआ+अ आ=आ– कार्य+आलयः=कार्यालयः, विद्या+आलयः=विद्यालयः, राम+अयनम्=रामायनम् महा+अनुभावः=महानुभावः, त्रिपुर+अरि=त्रिपुरारिः, शश+अंकः=शशांकः, सुर+अरि=सुरारिः, विद्या+अर्थी=विद्यार्थी।

(2) इ ई+इ ई=ई–अधि+ईश्वरः=अधीश्वरः, नदी+ईशः=नदीशः, श्री+ईशः=श्रीशः, मही+ईशः+महीशः, कवि+इन्द्रः=कवीन्द्रः, इति+इव=इतीव, मुनि+इन्द्रः=मुनीन्द्रः, गिरि+ईशः=गिरीशः, पृथ्वी+ईश्वरः=पृथ्वीश्वरः, श्री+ईशः=श्रीशः, नदी+ईशः=नदीशः।

(3) उ ऊ+उ ऊ=ऊ–भानु+उदयः=भानूदयः, गुरु+उपदेशः=गुरूपदेशः, वधू+उत्साहः=वधूत्साहः, चमू+ऊर्जः=चमूर्जः, साधु+ऊचुः=साधूचुः।

(4) ऋ ॠ+ऋ ॠ=ॠ–पितृ+ऋषिः=पितॄषिः, पितृ+ऋणम्=पितृणम्, होतृ+ऋकारः=होतृकारः, होतृ+ऋकारः=होत्लृकारः।

(ङ) गुण-सन्धिः—

अदेङ्गुणः अत् एङ् च गुणसंज्ञं स्यात्। ए ओ, अर् अल्। आद्गुणः (6.1.84) अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्। आत् (पञ्चम्यन्त), गुणः (प्रथमान्त) 'अ आ' इत्येतयोः वर्णयोः अनन्तरं यदि इ ई इत्येतौ वर्णौ स्तः, तर्हि पूर्वपरयोः स्थाने एकारः, उ ऊ इत्येतौ वर्णौ स्तः तर्हि ओकारः, ऋ ॠ इत्येतौ वर्णौ स्तः, तर्हि अर्, ऌकारः अस्ति तर्हि अल् आदेशत्वेन च भवति।

अ आ-इ ई– देव+इन्द्रः=देवेन्द्रः, उप+इन्द्रः=उपेन्द्रः, गण+ईशः=गणेशः, परम+ईश्वरः=परमेश्वरः, रमा+ईशः=रमेशः, तथा+इति=तथेति।

अ आ-उ ऊ– सूर्य+उदयः=सूर्योदयः, छात्र + उपस्थिति=छात्रोपस्थिति, नव+ऊढा=नवोढा, दया+ऊनः=दयोनः, गंगा+ऊर्मिः=गंगोर्मिः।

अ आ-ऋ ॠ–ब्रह्म+ऋषिः=ब्रह्मर्षिः, महा+ऋषिः=महर्षिः।

अ आ-ऌ–तव+ऌकारः=तवल्कारः।

अ/आ+इ/ई	अ/आ+उ/ऊ	अ/आ+ ऋ/ॠ	अ/आ+ ऌ
ए	ओ	अर्	अल्
उप+ इन्द्रः= उपेन्द्रः, सुर+ ईशः =सुरेशः,	जल+उत्पत्तिः= जलोत्पत्तिः, जल+ऊर्मिः=जलोर्मिः	देव+ऋर्षि=देवर्षि, महा+ऋर्षि=महर्षि	महा+लृकारः+ महल्कारः, मम+ लृकारः=ममल्कारः

(च) वृद्धि-सन्धिः

वृद्धिरादैच् (1.1.1) आदैच्च वृद्धिसंज्ञः स्यात्। एवं च वृद्धिरेचि (6.1.88) आदेचि परे वृद्धिरेकादेशः स्यात्। अ आ इत्येतयोः वर्णयोः अनन्तरं यदि ए, ऐ इत्येतौ वर्णौ स्तः, तर्हि पूर्वपरयोः स्थाने ऐकारः, यदि ओ औ इत्येतौ स्तः तर्हि औकारः च पूर्वपरयोः स्थाने एकादेशत्वेन भवति। अ आ इत्येताभ्यां वर्णाभ्याम् ऋकारे ॠकारे च परे आर्, ऌकारे परे च आल् आदेशो भवति।

अ आ-ए ऐ– अद्य+एव=अद्यैव, मत+ऐक्यम्=मतैक्यम्, सदा+एव=सदैव, यथा-एव=यथैव, एक+एकम्=एकैकम्, तव+ऐश्वर्यम्=तवैश्वर्यम्।

अ आ-ओ औ– तिल+ओदनम्=तिलौदनम्, दिव+ओकसः=दिवौकसः, महा+ओषधिः= महौषधिः, महा+औदार्यम्=महौदार्यम्।

अ/आ+ ए/ऐ	अ/आ+ओ/औ	अ/आ+ ऋ/ॠ	अ/आ+ऌ
ऐ	औ	आर्	आल्
कृष्ण+एकत्वम् =कृष्णैकत्वम्, तथा+एव =तथैव, सदा+एव= सदैव	गंगा+ओघ=गङ्गौघः, दिव्य +औषधम् =दिव्यौषधम्, मम+ औषधम्=ममौषधम्	उप+ऋच्छति= उपार्च्छति,	उप+लृकारीयति= उपाल्कारीयति

(छ) **पूर्वरूपः**-"एङः पदान्तादति (6.1.109) पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्। 'यथा-' यज्ञे+अग्नि=यज्ञेऽग्नि, वृक्षे+अस्मिन्=वृक्षेऽस्मिन्, गो+अग्रम्=गोऽग्रम्, हरे अव हरेऽव, विष्णो अव विष्णोऽव।

(ज) **पररूप** :-"एङि पररूपम् (6.1.94) आदुपसर्गात् एङादौ धातौ परे पररूपमेकादेशः स्यात्।" यथा-प्र+ऐषयति=प्रेषयति, प्र+एजते=प्रेजते, उप+ओषधि=उपोषधि।

(झ) **द्वित्व**-"अचो रहाभ्यां द्वे (8.4.46) अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः'। यथा-हरि+अनुभव=हर्य्यनुभवः, कर्म-कर्म्म, सर्वं-सर्व्वम्।

2. प्रकृतिभावसन्धिः

1. प्लुतप्रगृह्या अचि नित्यम्-प्लुताः प्रगृह्याश्च वक्ष्यन्ते अचि परे नित्यं प्रकृत्याः स्युः। यथा-एहि कृष्ण+अत्र गौश्चरति=एहि कृष्ण इत्यत्र प्लुताकारात् अकारे परे न सवर्णदीर्घः।

2. ऋत्यकः:- ऋति परे अकः प्रकृतिभावः स्यात्। अ, इ, ऋ, ऌ वर्णानां पश्चात् ह्रस्वः ऋकारः अस्ति चेत् तर्हि विकल्पेन ह्रस्वः सन्ध्यभावश्च भवति पदान्ते। यथा-ब्रह्म+ऋषिः= ब्रह्मऋषिः, सप्त+ऋषीणां=सप्त ऋषीणाम्।

3. प्रगृह्य, प्रकृतिभावः:-"ईदूदेद्द्विवचनं प्रगृह्यम् (1.1.11) ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्।" ईकारान्तम् ऊकारान्तञ्च द्विवचनं प्रगृह्यसंज्ञकं भवति। अतः सन्धिकार्यं नैव भवति। प्रकृतिभावो भवति। यथा- हरी+एतौ=हरी एतौ, विष्णू+इमौ=विष्णू इमौ, गङ्गे+अमू=गङ्गे अमू, पचेते+इमौ=पचेते इमौ, मुनी+इमौ=मुनी इमौ, साधू+अत्र=साधू अत्र, बालिके+एते=बालिके एते।

4. अदसो मात्-अदस्शब्दावयवमकारात् परस्य ईकारस्य, ऊकारस्य च प्रगृह्यसंज्ञा स्यात्। यथा-अमी+ईशाः=अमी ईशाः, रामकृष्णावमू+आसाते = रामकृष्णावमू आसाते।

5. ओत्-ओदन्तो निपातः प्रगृह्यः स्यात्। ओकारान्तस्य निपातस्यापि प्रगृह्यसंज्ञा भवति। अतः अत्रापि प्रकृतिभावो भवति। यथा- अहो+ईशाः=अहो ईशाः।

3. हल्सन्धिः

(क) श्चुत्वसन्धिः – श्चुः-श्, च्, छ्, ज्, झ्, ञ्,

'स्तोः श्चुना श्चुः' (8/4/40) सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः। अर्थात् "सकारस्य शकारचवर्गाभ्यां योगे शकारः, तवर्गस्य शकारचवर्गाभ्यां योगे क्रमात् चवर्गः आदेशो भवति। (त् इत्यस्य च, द् इत्यस्य ज्, न् इत्यस्य ञ्, स् इत्यस्य श् भवति।

1. **स-श**–रामस्+शेते=रामश्शेते, रामस्+चिनोति=रामश्चिनोति।

2. **तवर्ग-चवर्ग**–उत्+चारणम्=उच्चारणम्, तत्+छवि=तच्छविः, एतद्+जलम्=एतज्जलम्, उत्+ज्वलः=उज्ज्वलः, सत्+चरित्र=सच्चरित्र।

(ख) ष्टुना ष्टुः–स्तोः ष्टुना योगे ष्टुः स्यात्।

1. **स-श**– रामस्+षष्ठः=रामष्षष्ठः, रामस्+टीकते=रामष्टीकते।

2. **तवर्ग-टवर्ग**–तद्+टीका=तट्टीका, षष्+थः=षष्ठः, उद्+डीन=उड्डीनः दुष्+तः=दुष्टः, विष्+नु=विष्णु, पेष्+ता=पेष्टा।

स-श	शिशुस्+शेते	शिशु+श्+शेते	=शिशुश्शेते
स्-श्	मनस्+चञ्चलम्	मन+श्+चञ्चलम्	=मनश्चञ्चलम्
स्-श्	रामस्+छात्रः	राम+श्+छात्रः	=रामश्छात्रः
त्-च्	भगवत्+शक्ति	भगव+च्+शक्ति	=भगवच्शक्ति
त्-च्	सत्+चित्	स+च्+चित्	=सच्चित्
द् ज्	सुहृद्+जगाम	सुहृ+ज्+जगाम	=सुहृज्जगाम
न्-ञ्	हे गुणिन्+जानातु	हे गुणि+ञ्+जानातु	=हे गुणिञ्जानातु
न्-ञ्	यज्+न	यज्+ञ्+अः	=यज्ञः
न्-ञ्	याच्+ना	याच्+ञ्+आ	=याच्ञा

(ग) जश्त्व

"झलां जशोऽन्ते (8.2.39) पदान्ते झलां जशः स्युः। यथा– वाक्+ईशः=वागीशः, दिक्+अन्तः=दिगन्तः, दिक्+गजः=दिग्गजः, षट्+एव=षडेव, सुप्+अन्तः=सुबन्तः, सत्+आचारः=सदाचारः, दिक्+भ्रमः=दिग्भ्रमः, जगत्+ईशः=जगदीशः, अच्+अन्तः=अजन्तः, षट्+आननः= षडाननः, चित्+आनन्दः=चिदानन्दः।

(घ) अनुनासिक—"यरोऽनुनासिकेऽनुनासिको वा (8.4.45) यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्" यथा-एतद्+मुरारी=एतन्मुरारी, दिक्+नाग=दिङ्नाग, षट्+मुखः=षण्मुखः, तत्+मात्रम्=तन्मात्रम्, उत्+मुखः=उन्मुखः, जगत्+नाथ=जगन्नाथ, जगत्+ मिथ्या=जगन्मिथ्या, वाक्+मयम्=वाङ्मयम्, तत्+न=तन्नः, सद्+मतिः= सन्मतिः।

(ङ) परसवर्णः- "तोर्लि (8.4.60) तवर्गस्य लकारे परे परसवर्णः स्यात्।" यथा- तत्+लीनः=तल्लीनः, उद्+लेखः=उल्लेखः, पद्+लवः=पल्लवः, तत्+लयः=तल्लयः, आदि।

(च) पूर्वसवर्णः- 1. "उदःस्थास्तम्भोः पूर्वस्य (8.4.61) उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात्" यथा-उद्+स्थानम्=उत्थानम्, उद्+स्तम्भनम्=उत्तम्भनम्।

2. 'झयो होऽन्यतरस्याम् (8.4.62) झयः परस्य हस्य पूर्वसवर्णो वा स्यात्।" यथा- वाक्+हरिः=वाग्घरिः, तत्+हितम्=तद्धितम्, उत्+हरणम्=उद्धरणम्, अज्+हीनम्=अज्झीनम्, तद्+हानि=तद्धानिः, त्रिष्टुब्+हसति=त्रिष्टुब् भसति, मधुलिड्+ हसति= मधुलिड्ढसति।

(छ) चर्त्व सन्धि-खरि च (8.4.55) खरि परे झलां चरः स्युः। झल् वर्णानां स्थाने चर् (च, ट, त, क, प, श, स, ष) वर्णाः भवन्ति चेत् झलामनन्तरं खर् प्रत्याहारवर्णाः स्युः।

उदाहरणार्थ-उद+थानम्=उत्थानम्, तद्+परम्=तत्परम्, उद्+थापकः=उत्थापकः, सद्+कारः=सत्कारः, दिक्+पालः=दिग्पालः, तज्+शिवः=तच्छिवः, उद्+पन्नः=उत्पन्नः।

(ज) छत्व—"शश्छोऽटि (8.4.63) पदान्ताज्झयः परस्य शस्य छो वा स्यादटि परे।" यथा-तद्+शिवः=तच्छिवः, सत्+शीलः=सच्छीलः।

(झ) अनुस्वारः-1. "मोऽनुस्वारः (8.3.23) मान्तस्य पदस्यानुस्वारः स्यात् हलि।" यथा- हरिम्+वन्दे=हरिं+वन्दे, कार्यम्+कुरु=कार्यं+कुरु, गृहम्+गच्छति=गृहं+गच्छति, ईश्वरम्+भजति=ईश्वरं+भजति, सम्+सारः=सं+सारः, पाठम्+पठ=पाठं+पठ।

2. नश्चापदान्तस्य झलि (8.3.24) नस्य मस्य चापदान्तस्य झल्यनुस्वारः। यथा-रम्+स्यते=रंस्यते, आक्रम्+स्यते=आक्रंस्यते, दन्+शनम्=दंशनम्, यशान्+सि=यशांसि, नम् स्यति नंस्यति।

(ञ) परसवर्णः-1. अनुस्वारस्य ययि परसवर्णः (8.4.58) अनुस्वारस्य ययि परे परसवर्णः स्यात्। यथा-शम्+तः=शान्तः, शम्+कितः=शंकितः, अं+कितः=अङ्कितः, कुं+ठितः=कुण्ठितः, गुं+फितः=गुम्फितः, अं+चितः=अञ्चितः, कं+टकम्=कण्टकम्।

(2) वा पदान्तस्य (8.4.59)। पदान्तस्य अनुस्वारस्य ययि परे वा परसवर्णः। पदान्तानुस्वारानन्तरं यय् प्रत्याहारः भवति चेत् परसवर्णः भवति। यथा- त्वं+करोषि=त्वङ्करोषि, अहम्+पचामि=अहम्पचामि, यं+लोकम्=यल्लोकम्।

(ट) रुत्व-समः सुटि (8.3.5) समो रुः स्यात्सुटि। यथा-सम्+कारः=संस्कार, सम्+कृत= संस्कृत, सम्+कर्ता=संस्कर्ता, सम्+कृति=संस्कृति।

4. विसर्गसन्धिः

1. **सत्व- (क)** विसर्जनीयस्य सः (8.3.34) खरि विसर्जनीयस्य सः स्यात्। विसर्गस्य स्थाने सकारादेशः स्यात् खरि परे। स्यात्। यथा-

विष्णुः+त्राता=विष्णुस्त्राता, रामः+तिष्ठति=रामस्तिष्ठति, बालः+चलति=बालश्चलति, जनाः+तिष्ठन्ति=जनास्तिष्ठन्ति।

(ख) वा शरि (8.3.36) शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात्। यथा-

झश्—**ष्**-रामः+चलति=रामश्चलति, रामः+टीकते=रामष्टीकते।

:**झस्**-रामः+त्रायते=रामस्त्रायते; बालः+तिष्ठति=बालस्तिष्ठति, हरिः+शेते=हरिश्शेते, हरिः+त्राता=हरिस्त्राता; पूर्णः+चन्द्रः=पूर्णश्चन्द्रः।

:**झश् ष् स्**-मुनिः+शेते=मुनिश्शेते; रामः+षष्ठः=रामष्षष्ठः; निः+सारः=निस्सारः; कृष्णः+सर्पः=कृष्णस्सर्पः, (विकल्प से)।

:**झर्**-मुनिः+आगतः=मुनिरागतः।

2. इदुदुपधस्य चाऽप्रत्ययस्य (8.3.41) इकारोकारोपधस्याऽऽप्रत्ययस्य विसर्गस्य षः स्यात्कुप्वोः। यथा-आविः+कृतम्=आविष्कृतम्, दुः+कृतम्=दुष्कृतम्, निः+प्रत्यूहम्= निष्प्रत्यूहम्, निः+क्रान्तः=निष्क्रान्तः।

3. कानाम्रेडिते (8.3.12) कान्नकारस्य रुः स्यादाम्रेडिते परे। यथा- कान्+कान्=कांस्कान्।

4. उत्व (क) "अतो रोरप्लुतादप्लुते (6.1.111) अप्लुतादतः परस्य रोः उः स्यादप्लुतेऽति"

यथा- शिवस् (र्) +अर्च्यः=शिवोऽर्च्यः, बालस् (र्) +अयम्=बालोऽयम्, सः+अपि=सोऽपि, बालकः+अवदत्=बालकोऽवदत्।

5. (क) "खरवसानयोर्विसर्जनीयः (8.3.15) खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात्पदान्ते।" **(ख)** "शर्परे विसर्जनीयः (8.3.35) शर्परे खरि विसर्जनीयस्य विसर्जनीयः न त्वन्यत्।" उदाहरणार्थ- **(क)** पयस्+सु=पयःसु, निस्-निः, पयस्-पयः, बहुशस्-बहुशः, बाल+सुप=बालः।

(ख) निर्=निः, प्रातर्=प्रातः, अन्तर्=अन्तः, पुनर्=पुनः, पितृ-पितर्=पितः, मातृ-मातर्=मातः।

5. स्वादिसन्धिः

1. **रुत्व**-"ससजुषो रुः" (8.2.66) पदान्तस्य सस्य सजुष् शब्दस्य च रुः स्यात्। यथा-

हरिस्+अवदत्=हरिरवदत्, वधूस्+एषा=वधूरेषा, शिशुस्+आगच्छति= शिशुरागच्छति, पितुस्+इच्छा=पितुरिच्छा, भ्रातुर्+कन्या=भ्रातुःकन्या।

2. उत्व-1. "अतो रोरप्लुतादप्लुते" (6.1.113) अप्लुताद् ह्रस्वात् अकारात् परस्य रेफस्य उकारः स्यात् अप्लुते अकारे परे। यथा-

शिवस् (र्) अर्च्यः शिवोऽर्च्यः, सः अपि सोऽपि, बालस् (र्) अयम् बालोऽयम्, बालकः अवदत् बालकोऽवदत्, रामः अस्ति रामोऽस्ति।

2. "हशि च (6.1.14) अप्लुतादतः परस्य रोः उः स्याद्धशि।" यथा- कः+अयम्=कोऽयम्; रामः+गच्छति=रामो गच्छति; सः+अपि=सोऽपि; शिवस्+वन्द्यः=शिवो वन्द्यः; नूतनः+घटः=नूतनो घटः; मनः+रथः=मनोरथः; रावणः+हतः= रावणो हतः; मनः+भावः=मनोभावः; कः+गच्छति=को गच्छति, देवः+ हसति=देवो हसति, रामः+वदति=रामो वदति।

3. "भोभगोअघोअपूर्वस्य योऽशि" (8.3.17) भोस्, भगोस्, अघोस् अकारपूर्वस्य च रेफस्य स्थाने यकारादेशो भवति अश् परे। एवं 'हलि सर्वेषाम्' भोस्, भगोस्, अघोस्, अकारपूर्वस्य च यकारस्य लोपः स्यात् हल् प्रत्याहारे परे। यथा-

भोस्+देवाः=भो देवाः, भोस्+लक्ष्मि=भो लक्ष्मि, भगोस्+नमस्ते=भगो नमस्ते, देवास्+ हसन्ति=देवा हसन्ति, देवास्+नम्या=देवा नम्याः, अघोस्+याहि=अघो याहि।

4. (क) "रषाभ्यां नो णः समानपदे (8.4.1) एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात्।" (ख) "अट्कुप्वाङ्नुम्व्यवायेऽपि (8.4.2) अट् कवर्ग पवर्ग आङ्नुम् एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे।" (ग) इण् कोः (8.3.57) इत्यधिकृत्य (घ) आदेशप्रत्यययोः (8.3.59) -कीर्+नः= कीर्णः, पूर्+नः=पूर्णः, रामेण, रामाणाम्, रामेषु, भवन्ति।

5. "रो रि" रेफस्य रेफे परे लोपः स्यात्। "ढ्रलोपे पूर्वस्य दीर्घोऽणः" ढकारस्य रेफस्य च लोपे सति ढकारे रेफे च परे पूर्वस्य अणो दीर्घः स्यात्। यथा-पुनर्+रमते=पुना रमते, हरिर्+रम्यः=हरी रम्यः; शम्भुर्+राजते=शम्भू राजते, अन्तर्+राष्ट्रियः= अन्ताराष्ट्रियः, निः+रवः=नीरवः, दुः+राजः= दूराजः, निः+रोगः=नीरोगः, प्रातः+रम्यम्= प्रातारम्यम्।

6. "एततदोः सुलोपोऽकोरनञ्समासे हलि" अककारयोः एततदोः यः सु तस्य लोपः स्यात् हलि परे न तु नञ् समासे। यथा-एषः+विष्णुः=एष विष्णुः, सः+शम्भुः=स शम्भुः, सः+लिखति=स लिखति, एषः+सखा=स सखा।

सन्धिविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—सिद्धान्तकौमुदीग्रन्थे कति प्रकरणानि सन्ति?
   उत्तरम्— (14) चतुर्दशप्रकरणानि।
2. प्रश्नः—सिद्धान्तकौमुदी इत्यस्य प्रथमप्रकरणं किम्?
   उत्तरम्— संज्ञाप्रकरणम्।
3. प्रश्नः— परिभाषाप्रकरणस्य क्रमः किमस्ति?
   उत्तरम्— द्वितीयः।
4. प्रश्नः— सन्धिप्रकरणस्य क्रमः किम्?
   उत्तरम्— तृतीयः।
5. प्रश्नः—सुबन्तं कस्मिन् प्रकरणे अस्ति?
   उत्तरम्— चतुर्थप्रकरणे।
6. प्रश्नः—अव्ययः कस्मिन् प्रकरणे अस्ति?
   उत्तरम्—पञ्चमे।
7. प्रश्नः—षष्ठप्रकरणस्य विषयः किमस्ति?
   उत्तरम्— स्त्रीप्रत्ययः।
8. प्रश्नः—सप्तमप्रकरणे किं वर्णितमस्ति?
   उत्तरम्— कारकम्।
9. प्रश्नः—समासप्रकरणस्य क्रमः किम्?
   उत्तरम्— अष्टमः।
10. प्रश्नः— नवमप्रकरणे किं वर्णितमस्ति?
    उत्तरम्— तद्धितः।
11. प्रश्नः— तिङन्तप्रकरणस्य क्रमः किमस्ति?
    उत्तरम्— दशमः।
12. प्रश्नः—ण्यन्तादिप्रक्रिया कस्मिन् प्रकरणे अस्ति?
    उत्तरम्—एकादशप्रकरणे।
13. प्रश्नः—कृदन्तः कस्मिन् प्रकरणे अस्ति?
    उत्तरम्— द्वादशप्रकरणे।
14. प्रश्नः—त्रयोदश-प्रकरणे किमस्ति?
    उत्तरम्— वैदिकप्रकरणम्।

15. प्रश्नः— सिद्धान्तकौमुदी इत्यस्य अन्तिमं प्रकरणं किम्?
    उत्तरम्— स्वरप्रकरणम्।
16. प्रश्नः—सन्धिः इत्यत्र प्रत्ययः कः?
    उत्तरम्— क्तिन् प्रत्ययः।
17. प्रश्नः—वाक्ये सन्धिकार्यं भवति?
    उत्तरम्— विवक्षाधीनम्।
18. प्रश्नः—कति सन्धयः, के च ते?
    उत्तरम्— पञ्च, -1. अच्सन्धिः, 2. हल्सन्धिः, 3. प्रकृतिभावसन्धिः 4. विसर्गसन्धिः, 5. स्वादिसन्धिः।
19. प्रश्नः—सूत्राणि कतिविधानि, के च ते?
    उत्तरम्— षड्विधम्। संज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकारश्च।
20. प्रश्नः—'इको यणचि' इति सूत्रेण का भवति?
    उत्तरम्— यण्सन्धिः।
21. प्रश्नः— यण्सन्धेः उदाहरणान् दर्शय?
    उत्तरम्— दध्यत्र, इत्यादि, स्वागतम्, दध्योदनः, धात्रंशः, लाकृतिः।
22. प्रश्नः—'नेमे' इत्यत्र कः सन्धिः?
    उत्तरम्— गुणसन्धिः।
23. प्रश्नः—आद्यन्तम्, प्रत्येकम्, अभ्यगिनः-इत्येतेषु कः सन्धिः?
    उत्तरम्— यण्सन्धिः।
24. प्रश्नः—अयादिसन्धेः उदाहरणान् दर्शय?
    उत्तरम्— हरये, विष्णवे, नायकः, पावकः, गव्यम्, नाव्यम्।
25. प्रश्नः— गुणसन्धेः उदाहरणं दर्शय?
    उत्तरम्— रमेशः, कूपोदकम्, जलोर्मि, कृष्णर्द्धिः।
26. प्रश्नः—गुण-विधिः कस्य भवति?
    उत्तरम्— इक्-इत्यस्य।
27. प्रश्नः—'चि+तव्यत्= चेतव्यम्' धातोः को विधिः अस्ति?
    उत्तरम्— गुण-विधिः।
28. प्रश्नः—प्र+एजते सन्धत्त?
    उत्तरम्— प्रेजते।
29. प्रश्नः—गुणसंज्ञकाः के?
    उत्तरम्— अत्+एङ् (ए, ओ)।
30. प्रश्नः—गुणसन्धिविधायकसूत्रं किम्?
    उत्तरम्— आद्गुणः।
31. प्रश्नः—तव+लृकारः सन्धत्त?
    उत्तरम्—तवल्कारः।
32. प्रश्नः—गुणसंज्ञाविधायकं सूत्रं किम्?
    उत्तरम्— अदेङ्गुणः।
33. प्रश्नः—अदेङ्गुणः अत्र 'अत्' इत्यनेन ह्रस्व-अकारस्य बोधः केन सूत्रेण भवति?
    उत्तरम्— अणुदित् सवर्णस्य चाऽप्रत्ययः।
34. प्रश्नः—'इ' 'उ' इत्यनयोः गुणविहिते सति किं परिवर्तनम्?
    उत्तरम्— ए, ओ इत्यनयोः।
35. प्रश्नः—वृद्धिसन्धिं दर्शय?
    उत्तरम्— तस्यैषः, गङ्गौघः, कृष्णौत्कण्ठ्यम्, प्रौहः, प्रार्णम्।
36. प्रश्नः—तवैव-इत्यत्र कः सन्धिः?
    उत्तरम्— वृद्धिसन्धिः।
37. प्रश्नः—'एत्येधत्यूठ्सु' इति सूत्रेण क आदेशः स्यात्?
    उत्तरम्—वृद्धिः।
38. प्रश्नः—वृद्धिसंज्ञकाः के?
    उत्तरम्—आत् +ऐच् (ऐ, औ)।
39. प्रश्नः—वृद्धिसंज्ञाविधायकं सूत्रं किम्?
    उत्तरम्— वृद्धिरेचि।
40. प्रश्नः—वृद्धिसन्धिविधायकं सूत्रं किम्?
    उत्तरम्— वृद्धिरादैच्।
41. प्रश्नः—'वृद्धि' विधिः कस्य भवति?
    उत्तरम्— इक् इत्यस्य।
42. प्रश्नः—'गो+सु=गौः' अत्र 'गो'शब्दे को विधिः?
    उत्तरम्— वृद्धिः।
43. प्रश्नः—'पठ्+घञ्=पाठः' अत्र धातौ को विधिः?
    उत्तरम्— वृद्धिः।

44. **प्रश्नः**—'सखि+औ= सखायौ' अस्य शब्दस्य इकारस्य को विधिः?
उत्तरम्— वृद्धिः।

45. **प्रश्नः**—'दशरथ+इञ्=दाशरथिः' अत्र 'दशरथस्य' आदिस्वरस्य वृद्धिः केन सूत्रेण भवति?
उत्तरम्— तद्धितेष्वचामादेः।

46. **प्रश्नः**—'हृ+घञ्=हारः' अत्र धातौ ऋकारस्य वृद्धिः केन सूत्रेण विधीयते?
उत्तरम्— अचो ञ्णिति।

47. **प्रश्नः**—'वद्+घञ्=वादः' अत्र धातौ आकारस्य वृद्धिः केन सूत्रेण भवति?
उत्तरम्— अत उपधायाः।

48. **प्रश्नः**—'कृ+ण्वुल्=कारकः' अत्र धातौ ऋकारस्य वृद्धिः इत्यनेन किं भवति?
उत्तरम्— आ।

49. **प्रश्नः**—'सुखेन ऋतः' सुख ऋतः सुखार्तः अत्र को विधिः?
उत्तरम्— वृद्धिः।

50. **प्रश्नः**—'इ' 'उ' इत्यनयोः वृद्धिः विहिते सति किं रूपम्?
उत्तरम्— ऐ, औ इत्यनयोः।

51. **प्रश्नः**—'द्वित्व'विधिना सम्बद्ध-सूत्रं किम्?
उत्तरम्— अनचि च।

52. **प्रश्नः**—शिशु+ऐक्यम् इत्यस्य सन्धिपदं किम्?
उत्तरम्— शिश्वैक्यम्।

53. **प्रश्नः**—सु+उक्तिः इत्यस्य सन्धिपदं किम्?
उत्तरम्—सूक्तिः।

54. **प्रश्नः**—'देवैश्वर्यम्' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— देव+ऐश्वर्यम्।

55. **प्रश्नः**—दीर्घसन्धिः केन सूत्रेण भवति?
उत्तरम्— "अकः सवर्णे दीर्घः"

56. **प्रश्नः**—दीर्घसन्धेः उदाहरणं दर्शय-?
उत्तरम्— पुस्तकालयः, वधूपकारः, दैत्यारी, श्रीशः, वाचनालयादि।'

57. **प्रश्नः**—पितृ+ऋणम् इत्यत्र कः सन्धिः?
उत्तरम्— दीर्घः।

58. **प्रश्नः**—'श्चुत्वसन्धिः' केन सूत्रेण भवति?
उत्तरम्— स्तोः श्चुना श्चुः। (स्तोः श्चुना योगे श्चुः स्यात्)

59. **प्रश्नः**—'श्चुत्वसन्धेः' उदाहरणान् दर्शय?
उत्तरम्— स्-श=हरिश्शेते, रामश्चिनोति, त-च= सच्चित्, शार्ङ्गिञ्जयः।

60. **प्रश्नः**—'ष्टुत्वसन्धिः' केन सूत्रेण भवति?
उत्तरम्— ष्टुना ष्टुः। (स्तोः ष्टुना योगे ष्टुः स्यात्)

61. **प्रश्नः**—ष्टुत्वसन्धेः उदाहरणान् दर्शय?
उत्तरम्— रामष्षष्ठः, हरिष्टीकते, पेष्टा, तट्टीका, चक्रिण्ढौकसे, षट्सन्तः।

62. **प्रश्नः**—'यशांसि' अत्र कः सन्धिः?
उत्तरम्— अनुस्वारसन्धिः।

63. **प्रश्नः**—'तवैव' इत्यत्र का सन्धिः?
उत्तरम्— अवधारणार्थे पररूपम्।

64. **प्रश्नः**—'षड्वारम्' अत्र कीदृशो हल्सन्धिः?
उत्तरम्— जश्त्वसन्धिः।

65. **प्रश्नः**—'अभवच्च' इत्यस्मिन् कः सन्धिः?
उत्तरम्— श्चुत्वसन्धिः।

66. **प्रश्नः**—गो+यम् पदस्य सन्धिः शब्दः कः?
उत्तरम्— गव्यम्।

67. **प्रश्नः**—गो+यूतिः पदस्य सन्धियुक्तं पदं किम्?
उत्तरम्— गव्यूतिः।

68. **प्रश्नः**—अक्षौहिणी पदस्य सन्धिविच्छेदः कः?
उत्तरम्— अक्ष+ऊहनी।

69. **प्रश्नः**—ऋण+ऋणम्-सन्धिशब्दः कः?
उत्तरम्— ऋणार्णम्।

70. **प्रश्नः**—'तच्छिवः' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— तत्+शिवः।

71. **प्रश्नः**—षड्वारम्-अत्र कीदृशो हल्सन्धिः?
उत्तरम्— जश्त्वसन्धिः।

72. **प्रश्नः**—सुगण्णीशः -इत्यत्र कः सन्धिः?
उत्तरम्— ङमुडागमसन्धिः।

73. **प्रश्नः**—बहुनेच्छसि इत्यस्य सन्धिविच्छेदः कथम्?
उत्तरम्— बहुना+इच्छसि।

74. **प्रश्नः**—'दर्शयाम्यहम्' इत्यस्य सन्धिविच्छेदं कुरु?
उत्तरम्— दर्शयामि+अहम्।

75. **प्रश्नः**—'ह्यासनम्' इत्यस्य विच्छेदः कथम्?
उत्तरम्— हि+आसनम्।

76. **प्रश्नः**—'खल्वेषः' इत्यस्य सन्धिविच्छेदः कथम्?
उत्तरम्— खलु+एषः।

77. **प्रश्नः**—'मध्वास्वादनम्' इत्यत्र सन्धिविच्छेदं कुरु?
उत्तरम्— मधु+आस्वादनम्।

78. **प्रश्नः**—'शर्वोपमम्' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— शर्व+उपमम्।

79. **प्रश्नः**—'देवर्णम्' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— देव+ऋणम्।

80. **प्रश्नः**—'दिग्गजः' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— दिक्+गजः।

81. **प्रश्नः**—'यावज्जीवम्' इत्यस्य सन्धिः कः?
उत्तरम्— यावत्+जीवम्।

82. **प्रश्नः**—'युष्मन्नामाङ्किताः' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— युष्मत्+नाम+अङ्किताः।

83. **प्रश्नः**—'भूयसोक्तेन' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— भूयसा+उक्तेन।

84. **प्रश्नः**—'महच्चित्रम्' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— महत्+चित्रम्।

85. **प्रश्नः**—'मत्यायाशा' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— मत्यै+आशा।

86. **प्रश्नः**—'विद्वज्जनः' इत्यत्र सन्धिं विघटयत?
उत्तरम्— विद्वत्+जनः।

87. **प्रश्नः**—'दृष्ट्वोवाच' इत्यस्य सन्धिविच्छेदं प्रदर्शयत?
उत्तरम्— दृष्ट्वा+उवाच।

88. **प्रश्नः**—'ममानुमत्या' इत्यस्य सन्धिविच्छेदं प्रदर्शयत?
उत्तरम्— मम+अनुमत्या।

89. **प्रश्नः**—'पुस्तकेऽस्मिन्' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— पुस्तके+अस्मिन्।

90. **प्रश्नः**—सङ्गतौ+आत्मानम्=सन्धिं कुरुत?
उत्तरम्— सङ्गतावात्मानम्।

91. **प्रश्नः**—देवौ+आसाते= इत्यनयोः सन्धिः-कथम्?
उत्तरम्— देवावासाते।

91. **प्रश्नः**—यत्+ लभ्यते सन्ध्यन्तं पदं किम्?
उत्तरम्—यल्लभ्यते।

92. **प्रश्नः**—शिष्यः+नमति सन्धिं योजयत?
उत्तरम्— शिष्यो नमति।

93. **प्रश्नः**—'गुरुः+एति' सन्धियुक्तं पदं किम्?
उत्तरम्— गुरुरेति।

94. **प्रश्नः**—'हरिस्+षष्ठः' सन्धिं कुरुत?
उत्तरम्— हरिष्षष्ठः।

95. **प्रश्नः**—'समिध्+भ्याम्' इत्यस्य सन्धियुक्तं पदं किम्?
उत्तरम्— समिद्भ्याम्।

96. **प्रश्नः**—'रामम्+नमामि' इति सन्धत्त?
उत्तरम्— रामं नमामि।

97. **प्रश्नः**—कृष्णः+गच्छति इत्यत्र सन्धियुक्तं पदं किम्?
उत्तरम्—कृष्णो गच्छति।

98. **प्रश्नः**—'सम्राट्+गच्छति= सन्धत्त?
उत्तरम्— सम्राड्गच्छति।

99. **प्रश्नः**—'ककुभ्+शयनम् सन्धत्त?
उत्तरम्— ककुप्शयनम्।

100. **प्रश्नः**—'गुरु+उपदेशः सन्धत्त?
उत्तरम्—गुरूपदेशः।

101. **प्रश्नः**—महा+ऋषिः इत्यस्य सन्धिपदं किम्?
उत्तरम्— महर्षिः।

102. **प्रश्नः**—'वर्षर्तुः' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— वर्षा+ऋतुः।

103. **प्रश्नः**—'गङ्गोर्मि' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— गङ्गा+ऊर्मिः।

104. **प्रश्नः**—'नमस्ते' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— नमः+ते।

105. **प्रश्नः**—'वागीशः' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— वाक्+ईशः।

106. **प्रश्नः**—'मनीषा' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— मनस्+ईसा।

107. **प्रश्नः**—'अन्वभवत्' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— अनु+अभवत्।

108. **प्रश्नः**—'तच्छ्रुत्वा' सन्धिविच्छेदं कुरुत?
उत्तरम्— तत्+श्रुत्वा।

109. **प्रश्नः**—'संस्करोति' सन्धिविच्छेदं कुरुत?
उत्तरम्—सम्+करोति।

110. **प्रश्नः**—सत्+आचारः इत्यस्य सन्धिपदं किम्?
उत्तरम्— सदाचारः।

111. **प्रश्नः**—'भो+अनम्' इत्यस्य सन्धिपदं किम्?
उत्तरम्— भवनम्।

112. **प्रश्नः**—विद्वान्+लिखति इत्यस्य सन्धिपदं किम्?
उत्तरम्— विद्वाल्लिँखति।

113. **प्रश्नः**—जगत्+जालम् इत्यस्य सन्धिपदं किम्?
उत्तरम्— जगज्जालम्।

114. **प्रश्नः**—आशीः+वादः इत्यस्य सन्धिपदं किम्?
उत्तरम्— आशीर्वादः।

115. **प्रश्नः**—मुनि+आगच्छति इत्यस्य सन्धिपदं किम्?
उत्तरम्— मुनिरागच्छति।

116. **प्रश्नः**—लेखकः+टीकते इत्यस्य सन्धिपदं किम्?
उत्तरम्— लेखकष्टीकते।

117. **प्रश्नः**—महत्+लावण्यम् इत्यस्य सन्धिपदं किम्?
उत्तरम्— महल्लावण्यम्।

118. **प्रश्नः**—गो+यम् इत्यस्य सन्धिपदं किम्?
उत्तरम्—गव्यम्।

119. **प्रश्नः**—चम्+चलः इत्यस्य सन्धिपदं किम्?
उत्तरम्— चञ्चलः।

120. **प्रश्नः**—षड्+सन्तः इत्यस्य सन्धिपदं किम्?
उत्तरम्— षट्सन्तः।

121. **प्रश्नः**—कान्+कान् इत्यस्य सन्धिपदं किम्?
उत्तरम्— कांस्कान्।

122. **प्रश्नः**—आविः+कृतम् इत्यस्य सन्धिपदं किम्?
उत्तरम्—आविष्कृतम्।

123. **प्रश्नः**—अन्तर्+राष्ट्रियः इत्यस्य सन्धिपदं किम्?
उत्तरम्—अन्ताराष्ट्रियः।

124. **प्रश्नः**—'षट्+आननः' इति योजयत?
उत्तरम्—षडाननः।

125. **प्रश्नः**—शोध+छात्रः सन्धत्त?
उत्तरम्— शोधच्छात्रः।

126. **प्रश्नः**—'सच्चित्' इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्— सत्+चित्।

127. **प्रश्नः**—सम्यक्+दर्शनम् सन्धिरूपं किम्?
उत्तरम्— सम्यग्दर्शनम्।

128. **प्रश्नः**—भ्रातः+गच्छ सन्धिं कुरुत?
उत्तरम्—भ्रातर्गच्छ।

129. **प्रश्नः**—मातृच्छेदः अत्र सन्धिःकः?
उत्तरम्— श्चुत्वसन्धिः।

130. **प्रश्नः**—एतयोः+ बलम् सन्धिं कुरुत?
उत्तरम्— एतयोर्बलम्।

131. **प्रश्नः**—मनः+अनुसारेण सन्धिं कुरुत?
उत्तरम्—मनोऽनुसारेण।

132. **प्रश्नः**—'वाताच्चिन्ता' सन्धिविच्छेदं कुरुत?
उत्तरम्— वातात्+चिन्ता।

133. **प्रश्नः**—'सङ्कीर्तयति' कस्य सन्धेरुदाहरणमेतत्?
उत्तरम्— अनुनासिकसन्धेः।

134. **प्रश्नः**—'अस्त्युज्जयिन्याम्' अस्य सन्धिविच्छेदः कथम्?
उत्तरम्— अस्ति+उज्जयिन्याम्।

135. **प्रश्नः**—'चैव' इत्यस्य कथं विच्छेदः?
उत्तरम्— च+एव।

136. **प्रश्नः**—'जगद्वन्द्यः' इत्यस्य कथं विच्छेदः?
उत्तरम्— जगत्+वन्द्यः।

137. **प्रश्नः**—'विद्यतेऽद्यापि' इदं कस्य सन्धेरुदाहरणम्?
उत्तरम्—पूर्वरूपसन्धेः।

138. **प्रश्नः**—आचारात्+लभते अस्य सन्धिः कथम्?
उत्तरम्—आचाराल्लभते।

139. **प्रश्नः**—'भ्रातर्द्धिः' सन्धिं विघटयत?
उत्तरम्— भ्रातृ+ऋद्धिः।

140. **प्रश्नः**—'षण्मुखः' इत्यस्य विकल्परूपं किम्?
उत्तरम्— षट्+मुखः।

141. **प्रश्नः**—'गुरुः+आद्रियते इत्यस्य सन्धिर्भवति?
उत्तरम्— गुरुराद्रियते।

142. **प्रश्नः**—छत्वसन्धेः उदाहरणं दर्शयत?
उत्तरम्— तच्छिवः।

143. **प्रश्नः**—'शिवो+वन्द्यः' इत्यत्र प्रयुक्तं सूत्रम्?
उत्तरम्— हशि च।

144. **प्रश्नः**—दिग्गजः इत्यस्य सन्धिविच्छेदो भवति?
उत्तरम्— दिक्+गजः।

145. **प्रश्नः**—'सङ्कल्प' शब्दस्य सन्धिविच्छेदं किं रूपम्?
उत्तरम्— सम्+कल्प।

146. **प्रश्नः**—'संयमः' इत्यस्य सन्धिविच्छेदो भवति?
उत्तरम्— सम्+यमः।

147. **प्रश्नः**—'उच्चारण' अत्र का सन्धिः?
उत्तरम्— व्यञ्जन-सन्धिः।

148. **प्रश्नः**—'सच्चित्' अत्र का सन्धिः?
उत्तरम्— श्चुत्व सन्धिः।

(O-Code-25x73) (ग) सिद्धान्तकौमुदी-
(14) सुबन्तविवेचनम् एवं सुबन्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

सुबन्तविवेचनम्- "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (1.2.45) धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वाऽर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्। इति पाणिनिसूत्रानुसारं 'प्रातिपदिकं' तद्भवति, यत् अर्थवत्, अधातुः अप्रत्ययः भवेत्। संस्कृतभाषायां केवलं प्रातिपदिकं (सुप् तिङ् सहितं) प्रयोक्तव्यम्। 'अपदं न प्रयुञ्जीत'। तादृशेन प्रातिपदिकेन साकं सुप् प्रत्ययस्य तिङ्प्रत्ययस्य वा योगेन पदत्वं साध्यते। सुप्प्रत्ययानां द्वारा शब्दरूपाणि, तिङ्प्रत्ययानां द्वारा धातुरूपाणि सञ्जायन्ते। 'सुप्तिङन्तं पदम्' इति सूत्रेण सुबन्तं तिङन्तं च पदसंज्ञात्वं प्राप्नोति। सुप् अन्ते यस्य तत् सुबन्तम्। "स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्" इति पाणिनीयसूत्रानुसारं 'सु'तः आरभ्य 'सुप्'पर्यन्तं विद्यमाना 21 प्रत्ययाः सुप्प्रत्ययत्वेन गृह्यन्ते।

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सु (स् =:)	औ	जस् (अस्)
द्वितीया	अम्	औट् (औ)	शस् (अस्)
तृतीया	टा (आ)	भ्याम्	भिस् (भिः)
चतुर्थी	ङे	भ्याम्	भ्यस् (भ्यः)
पञ्चमी	ङसि (अस्)	भ्याम्	भ्यस् (भ्यः)
षष्ठी	ङस् (अस्)	ओस् (ओः)	आम्
सप्तमी	ङि (इ)	ओस् (ओः)	सुप् (सु)

1. अजन्तपुंलिङ्गशब्दाः-अकारान्ताः, इकारान्ताः, उकारान्ताः, ऋकारान्ताः, ऐकारान्ताः, ओकारान्ताः, औकारान्ताः च।
2. अजन्तस्त्रीलिङ्गशब्दाः-आकारान्ताः, इकारान्ताः, ईकारान्ताः, उकारान्ताः, ऊकारान्ताः, ऋकारान्ताः, ऐकारान्ताः, ओकारान्ताः, औकारान्ताः च।
3. अजन्तनपुंसकलिङ्गशब्दाः- अकारान्ताः, इकारान्ताः, उकारान्ताः, ऋकारान्ताः, एकारान्ताः, ऐकारान्ताः, ओकारान्ताः, औकारान्ताः च।
4. हलन्तपुंलिङ्गशब्दाः-चकारान्ताः, जकारान्ताः, तकारान्ताः, दकारान्ताः, नकारान्ताः, शकारान्ताः, षकारान्ताः, सकारान्ताः, हकारान्ताः च।

5. हलन्तस्त्रीलिङ्गशब्दाः–चकारान्ताः, जकारान्ताः, तकारान्ताः, दकारान्ताः, धकारान्ताः, नकारान्ताः, पकारान्ताः, भकारान्ताः, रेफान्ताः, वकारान्ताः, शकारान्ताः, षकारान्ताः, सकारान्ताः, हकारान्ता च भवन्ति।

6. हलन्तनपुंसकलिङ्गशब्दाः– चकारान्ताः, जकारान्ताः, तकारान्ताः, दकारान्ताः, नकारान्ताः, रेफान्ताः, शकारान्ताः, षकारान्ताः, सकारान्ताः, हकारान्ता च भवन्ति।

अजन्तपुंल्लिङ्गशब्दरूपम्

(1) अकारान्त 'राम' शब्दः, विभक्ति-एकवचन, द्विवचन, बहुवचन।	(2) इकारान्त 'हरि' शब्दः, विभक्ति-एकवचन, द्विवचन, बहुवचन।	(3) ऋकारान्त 'पितृ' शब्दः, विभक्ति-एकवचन, द्विवचन, बहुवचन।
प्रथमा- रामः रामौ रामाः	प्रथमा- हरिः हरी हरयः	प्रथमा--पिता पितरौ पितरः
हे राम हे रामौ हे रामाः	हे हरे हे हरी हे हरयः	हे पितः हे पितरौ हे पितरः
द्वितीया- रामम् रामौ रामान्	द्वितीया-हरिम् हरी हरीन्	द्वितीया-पितरम् पितरौ पितॄन्
तृतीया-रामेण रामाभ्याम् रामैः	तृतीया-हरिणा हरिभ्याम् हरिभिः	तृतीया-- पित्रा पितृभ्याम् पितृभिः
चतुर्थी-रामाय रामाभ्याम् रामेभ्यः	चतुर्थी-हरये हरिभ्याम् हरिभ्यः	चतुर्थी- पित्रे पितृभ्याम् पितृभ्यः
पञ्चमी-रामात् रामाभ्याम् रामेभ्यः	पञ्चमी-हरेः हरिभ्याम् हरिभ्यः	पञ्चमी-पितुः पितृभ्याम् पितृभ्यः
षष्ठी-रामस्य रामयोः रामाणाम्	षष्ठी- हरेः हर्योः हरिणाम्	षष्ठी- पितुः पित्रोः पितृणाम्
सप्तमी-रामे रामयोः रामेषु	सप्तमी- हरौ हर्योः हरिषु	सप्तमी- पितरि पित्रोः पितृषु

अजन्तस्त्रीलिङ्गशब्दरूपम्

(4) आकारान्त 'रमा' शब्दः, विभक्ति-एकवचन, द्विवचन, बहुवचन।	(5) इकारान्त 'मति' शब्दः, विभक्ति-एकवचन, द्विवचन, बहुवचन।	(6) ईकारान्त 'नदी' शब्दः विभक्ति-एकवचन, द्विवचन, बहुवचन।
प्रथमा-रमा रमे रमाः	प्रथमा-मतिः मती मतयः	प्रथमा- नदी नद्यौ नद्यः
हे रमे हे रमे हे रमाः	हे मते हे मती हे मतयः	हे नदि हे नद्यौ हे नद्यः
द्वितीया-रमाम् रमे रमाः	द्वितीया-मतिम् मती मतीः	द्वितीया-नदीम् नद्यौ नदीः
तृतीया-रमया रमाभ्याम् रमाभिः	तृतीया-मत्या मतिभ्याम् मतिभिः	तृतीया-नद्या नदीभ्याम् नदीभिः
चतुर्थी-रमायै रमाभ्याम् रमाभ्यः	चतुर्थी-मत्यै, मतये मतिभ्याम् मतिभ्यः	चतुर्थी-नद्यै नदीभ्याम् नदीभ्यः
पञ्चमी-रमायाः रमाभ्याम् रमाभ्यः	पञ्चमी-मत्याः, मतेः मतिभ्याम् मतिभ्यः	पञ्चमी-नद्याः नदीभ्याम् नदीभ्यः
षष्ठी-रमायाः रमयोः रमाणाम्	षष्ठी- मत्याः, मतेः मत्योः मतिनाम्	षष्ठी-नद्याः नद्योः नदीनाम्
सप्तमी-रमायाम् रमयोः रमासु	सप्तमी-मत्याम्, मतौ मत्योः मतिषु	सप्तमी-नद्याम् नद्योः नदीषु

अजन्तनपुंसकलिङ्गशब्दरूपम्- (7) अकारान्त 'ज्ञान' शब्दः, विभक्ति-एकवचन, द्विवचन, बहुवचन।	हलन्तपुंल्लिङ्गशब्दरूपम् (8) हलन्तपुंल्लिङ्ग 'तत्' शब्दः, विभक्ति-एकवचन, द्विवचन, बहुवचन।	(9) हलन्तपुंल्लिङ्ग 'युष्मद्' शब्दः, विभक्ति-एकवचन, द्विवचन, बहुवचन।
प्रथमा-ज्ञानम् ज्ञाने ज्ञानानि	प्रथमा- सः तौ ते	प्रथमा-त्वम् युवाम् यूयम्
हे ज्ञान हे ज्ञाने हे ज्ञानानि		
द्वितीया-ज्ञानम् ज्ञाने ज्ञानानि	द्वितीया-तम् तौ तान्	द्वितीया-त्वाम्, त्वा युवाम् युष्मान्
तृतीया-ज्ञानेन ज्ञानाभ्याम् ज्ञानैः	तृतीया-तेन ताभ्याम् तैः	तृतीया-त्वया युवाभ्याम् युष्माभिः
चतुर्थी-ज्ञानाय ज्ञानाभ्याम् ज्ञानेभ्यः	चतुर्थी-तस्मै ताभ्याम् तेभ्यः	चतुर्थी-तुभ्यम्, ते युवाभ्याम् युष्मभ्यम्
पञ्चमी-ज्ञानात् ज्ञानाभ्याम् ज्ञानेभ्यः	पञ्चमी-तस्मात् ताभ्याम् तेभ्यः	पञ्चमी-त्वत् युवाभ्याम् युष्मत्
षष्ठी-ज्ञानस्य ज्ञानयोः ज्ञानानाम्	षष्ठी- तस्य तयोः तेषाम्	षष्ठी-तव, ते युवयोः युष्माकम्
सप्तमी-ज्ञाने ज्ञानयोः ज्ञानेषु	सप्तमी-तस्मिन् तयोः तेषु	सप्तमी-त्वयि युवयोः युष्मासु

हलन्तपुंल्लिङ्ग-स्त्री-नपुंसकलिङ्गशब्दरूपाणि

(10) हलन्तपुंल्लिङ्ग 'इदम्' शब्दः, विभक्ति-एकवचन, द्विवचन, बहुवचन।	(11) हलन्तस्त्रीलिङ्ग- 'इदम्' शब्दः, विभक्ति-एकवचन, द्विवचन, बहुवचन।	(12) हलन्तनपुंसक 'इदम्' शब्दः विभक्ति-एकवचन, द्विवचन, बहुवचन।
प्रथमा- अयम् इमौ इमे	प्रथमा- इयम् इमे इमाः	प्रथमा- इदम् इमे इमानि
द्वितीया-इमम् इमौ इमान्	द्वितीया-इमाम्, एनाम् इमे, एने इमाः, एनाः	द्वितीया-इदम्, एनत् इमे, एने इमानि, एनानि
तृतीया-अनेन आभ्याम् एभिः	तृतीया-अनया, एनया आभ्याम् आभिः	तृतीया-अनेन, एनेन आभ्याम् एभिः
चतुर्थी-अस्मै आभ्याम् एभ्यः	चतुर्थी-अस्यै आभ्याम् आभ्यः	चतुर्थी- अस्मै आभ्याम् एभ्यः
पञ्चमी-अस्मात् आभ्याम् एभ्यः	पञ्चमी-अस्याः आभ्याम् आभ्यः	पञ्चमी- अस्मात् आभ्याम् एभ्यः
षष्ठी-अस्य अनयोः एषाम्	षष्ठी-अस्याः अनयोः, एनयोः आसाम्	षष्ठी- अस्य अनयोः एषाम्
सप्तमी-अस्मिन् अनयोः एषु	सप्तमी-अस्याम् अनयोः, एनयोः आसु	सप्तमी- अस्मिन् अनयोः एषु

हलन्तपुंल्लिङ्ग-स्त्री-नपुंसकलिङ्गशब्दरूपाणि

(13) हलन्तपुंल्लिङ्ग- 'अस्मद्' शब्दः,	(14) हलन्तस्त्रीलिङ्ग- 'किम्' शब्दः,	(15) हलन्तनपुंसकलिङ्ग- 'किम्' शब्दः
विभक्ति-एकवचन, द्विवचन, बहुवचन	विभक्ति-एकवचन, द्विवचन, बहुवचन	विभक्ति-एकवचन, द्विवचन, बहुवचन
प्रथमा- अहम् आवाम् वयम्	प्रथमा- का के काः	प्रथमा- किम् के कानि
द्वितीया-माम्, मा आवाम्, नौ अस्मान्, नः	द्वितीया-काम् के काः	द्वितीया-किम् के कानि

(13) हलन्तपुंल्लिङ्ग- 'अस्मद्' शब्दः,	(14) हलन्तस्त्रीलिङ्ग- 'किम्'शब्दः,	(15) हलन्तनपुंसकलिङ्ग- 'किम्'शब्दः
तृतीया-मया आवाभ्याम् अस्माभिः	तृतीया- कया काभ्याम् काभिः	तृतीया-केन काभ्याम् कैः
चतुर्थी-मह्यम् आवाभ्याम् अस्मभ्यम्,	चतुर्थी-कस्यै काभ्याम् काभ्यः	चतुर्थी-कस्मै काभ्याम् केभ्यः
पञ्चमी-मत् अवाभ्याम् अस्मत्	पञ्चमी-कस्याः काभ्याम् काभ्यः	पञ्चमी-कस्मात् काभ्याम् केभ्यः
षष्ठी-मम आवयोः अस्माकम्	षष्ठी-कस्याः कयोः कासाम्	षष्ठी-कस्य कयोः केषम्
सप्तमी-मयि आवयोः अस्मासु	सप्तमी-कस्याम् कयोः कासु	सप्तमी-कस्मिन् कयोः केषु

सुबन्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—प्रातिपदिकेन कस्य विधानं भवति?
उत्तरम्— सुप्-पदस्य।

2. **प्रश्नः**—'प्रणाली' शब्दस्य षष्ठ्येकवचने रूपं दर्शय?
उत्तरम्— प्रणाल्याः।

3. **प्रश्नः**—'गो'शब्दस्य द्वितीयाविभक्तौ बहुवचने रूपं किम्?
उत्तरम्— गाः।

4. **प्रश्नः**—'गुरु' शब्दस्य चतुर्थी एकवचनरूपं किम्?
उत्तरम्— गुरवे।

5. **प्रश्नः**—वारिशब्दस्य पञ्चमी एकवचनरूपं किम्?
उत्तरम्— वारिणः।

6. **प्रश्नः**— कानि रूपाणि शुद्धानि?
उत्तरम्—वारि-वारिणी-वारीणि।

7. **प्रश्नः**—सम्राज्-परिव्राज्-विश्वसृज्-एते शब्दाः केषु लिङ्गेषु?
उत्तरम्—पुंलिङ्गेषु।

8. **प्रश्नः**—मनस्-हविस्-वपुस्-तस्थिवस्-इत्येते शब्दाः कस्मिन् लिङ्गे वर्तन्ते?
उत्तरम्—नपुंसकलिङ्गे।

9. **प्रश्नः**—'रवि'शब्दस्य चतुर्थी एकवचने रूपं दर्शय?
उत्तरम्— रवये।

10. **प्रश्नः**—'सखि'शब्दस्य पुंलिङ्गे प्रथमाद्विवचनस्य रूपं किम्?
उत्तरम्— सखायौ।

11. **प्रश्नः**—'नृ'शब्दस्य षष्ठीबहुवचने रूपं दर्शय?
उत्तरम्— नृणाम्/नॄणाम्।

12. **प्रश्नः**—'भू' शब्दस्य ऊकारान्तस्य सप्तमी एकवचने रूपद्वयं किम्?
उत्तरम्— भुवि-भूमौ।

13. **प्रश्नः**—'अक्षि'शब्दस्य इकारान्तनपुंसकलिङ्गस्य तृतीया एकवचनं दर्शयत?
उत्तरम्— अक्ष्णा।

14. **प्रश्नः**—'दधि'शब्दस्य सप्तमीविभक्तौ त्रिषु वचनेषु रूपं किम्?
उत्तरम्— दध्नि-दधनि-दध्नोः-दधिषु।

15. **प्रश्नः**—एनाम्-एने-एनाः इति कस्य सर्वनामशब्दस्य रूपाणि?
उत्तरम्— इदम् शब्दस्य स्त्रीलिङ्गस्य।

16. **प्रश्नः**—'अदस्'शब्दस्य स्त्रीलिङ्गे चतुर्थी एकवचनरूपं किम्?
उत्तरम्— अदः-अमू-अमूनि।

17. **प्रश्नः**—'अस्मद्' शब्दे 'नः' इति रूपं कतिवारं कुत्र च आयाति?
उत्तरम्— त्रिवारम्-द्वितीया, चतुर्थी, षष्ठीविभक्तिषु।

18. **प्रश्नः**—'तस्थिवस्' शब्दस्य प्रथमाद्विवचनरूपं किम्?
उत्तरम्— तस्थिवसौ।

19. **प्रश्नः**—भाः-भासौ-भासः इति कस्य शब्दस्य रूपाणि?
उत्तरम्— 'भास्'।

20. **प्रश्नः**—'विद्वस्'शब्दस्य 'विदुषः' इति कासु विभक्तिषु रूपं भवति?
उत्तरम्— द्वितीया, पञ्चमी, षष्ठी।

21. **प्रश्नः**—'आशिस्' शब्दस्य तृतीयाविभक्ति-एकवचनरूपं किम्?
उत्तरम्— आशिषा।

22. **प्रश्नः**—'प्रधी'शब्दस्य द्वितीयाविभक्ति-एकवचनरूपं किम्?
उत्तरम्— प्रध्यम्।

23. **प्रश्नः**—अकारान्तपुंलिङ्गस्य 'निर्जर'शब्दस्य कोऽर्थः?
उत्तरम्— जरारहितः।

24. **प्रश्नः**—'अहन्' शब्दस्य द्वितीयाविभक्तौ रूपाणि प्रदर्शयत?
उत्तरम्— अहः-अह्नी-अहनी-अहानि।

25. **प्रश्नः**—'पथिन्' शब्दस्य लिङ्गं किम्?
उत्तरम्— पुंलिङ्गम्।

26. **प्रश्नः**—'धनुष्' शब्दस्य पञ्चमीविभक्तौ रूपाणि कानि?
उत्तरम्— धनुषः-धनुर्भ्याम्-धनुर्भ्यः।

27. **प्रश्नः**—'भवत्' शब्दस्य 'भवतः' कतिवारं कुत्र च आयाति?
उत्तरम्— त्रिवारं-1. द्वितीयाबहुवचने, 2. पञ्चमी एकवचने, 3. षष्ठी एकवचने।

28. **प्रश्नः**—इकारान्तस्य 'मति'शब्दस्य द्वितीयाबहुवचनरूपं किम्?
उत्तरम्— मतीः।

29. **प्रश्नः**—'वधू'शब्दस्य चतुर्थी एकवचनं किम्?
उत्तरम्— वध्वै।

30. **प्रश्नः**—'चन्द्रमस्' शब्दस्य लिङ्गं किम्?
उत्तरम्— सकारान्तपुंलिङ्गम्।

31. **प्रश्नः**—'चन्द्रमस्' शब्दस्य तृतीयाचतुर्थीपञ्चमी-विभक्तिषु द्विवचने रूपं किम्?
उत्तरम्— चन्द्रमाभ्यां, चन्द्रमाभ्यां, चन्द्रमाभ्यां।

32. **प्रश्नः**—'आत्मन्' शब्दः कस्मिन् लिङ्गे भवति?
उत्तरम्— नकारान्तपुंलिङ्गे।

33. **प्रश्नः**—दता-दद्भ्याम्-दद्भिः इति कस्य शब्दस्य तृतीयाविभक्तिरूपाणि?
उत्तरम्— दतृशब्दस्य।

34. **प्रश्नः**—'विश्वपा'शब्दस्य प्रथमाएकवचन-बहुवचनरूपे के?
उत्तरम्— विश्वपाः-विश्वपाः।

35. **प्रश्नः**—'कति'शब्दः किंवचनान्तः?
उत्तरम्— नित्यः बहुवचनान्तः।

36. **प्रश्नः**—'मातृ'शब्दस्य द्वितीया-बहुवचने रूपं किम्?
उत्तरम्— मातॄः।

37. **प्रश्नः**—'अग्नि'शब्दस्य चतुर्थी एकवचनं किम्?
उत्तरम्— अग्नये।

38. **प्रश्नः**—'रवि'शब्दस्य सप्तमी एकवचनं किम्?
उत्तरम्— रवौ।

39. **प्रश्नः**—'साधु' शब्दस्य सप्तमी द्विवचनं किम्?
उत्तरम्— साध्वोः।

40. **प्रश्नः**—'शिशु' शब्दस्य तृतीयाबहुवचनं किम्?
उत्तरम्— शिशुभिः।

41. **प्रश्नः**—'नभस्' शब्दस्य द्वितीयाबहुवचनं किम्?
उत्तरम्— नभः।

42. **प्रश्नः**—'स्त्री'शब्दस्य द्वितीयाबहुवचनं किम्?
उत्तरम्— स्त्रीः।

43. **प्रश्नः**—'इदम्' शब्दस्य (स्त्रीलिङ्गे) चतुर्थीबहुवचनं किम्?
उत्तरम्— आभ्यः।

44. **प्रश्नः**—"चतुर्' शब्दस्य स्त्रीलिङ्गे चतुर्थीबहुवचने रूपं प्रदर्शयत?
उत्तरम्— चतसृभ्यः।

45. **प्रश्नः**—'नृपति' शब्दस्य तृतीया-एकवचनं रूपं किम्?
उत्तरम्— नृपतिना।

46. **प्रश्नः**—'जन्मन्' शब्दस्य प्रथमाबहुवचनं किम्?
उत्तरम्— जन्मनि।

47. **प्रश्नः**—'कर्मन्'शब्दस्य पञ्चमी एकवचने रूपं किम्?
उत्तरम्— कर्मणः।

48. **प्रश्नः**—'नारी' शब्दस्य सम्बोधने एकवचने रूपं किम्?
उत्तरम्— हे नारि!

49. **प्रश्नः**—'नृ' शब्दस्य तृतीया-एकवचनं किम्?
उत्तरम्— त्रा।

50. **प्रश्नः**—'आचार्य'शब्दस्य षष्ठीद्विवचनरूपं किम्?
उत्तरम्— आचार्ययोः।

51. **प्रश्नः**—'गौरी'शब्दस्य द्वितीयाबहुवचनं किम्?
उत्तरम्— गौरीः।

52. **प्रश्नः**—'दधि'शब्दस्य प्रथमाद्विवचने किं रूपम्?
उत्तरम्— दधिनी।

53. **प्रश्नः**—'राजन्' शब्दस्य 'राज्ञः' इति कासु विभक्तिषु भवति?
उत्तरम्— द्वितीयाबहु०, पञ्चमी-षष्ठी एकवचनेषु।

54. **प्रश्नः**—'इदं'शब्दस्य स्त्रियां पञ्चमीविभक्ति-एकवचने किं रूपम्?
उत्तरम्— अस्याः।

55. **प्रश्नः**—'सन्धि'शब्दस्य द्वितीयाबहुवचनं रूपं किम्?
उत्तरम्— सन्धीन्।

56. **प्रश्नः**—'नृपति'शब्दस्य तृतीयाबहुवचने किं रूपम्?
उत्तरम्— नृपतिभिः।

57. **प्रश्नः**—'भानु'शब्दस्य तृतीया-एकवचनरूपं किम्?
उत्तरम्— भानुना।

58. **प्रश्नः**—इकारान्तशब्देषु 'भूपति'शब्दस्य सम्बोधनैकवचनं किम्?
उत्तरम्— हे भूपते!

59. **प्रश्नः**—उकारान्त 'शम्भु'शब्दस्य सम्बोधनद्विवचनं रूपं किम्?
उत्तरम्— हे शम्भू!

60. **प्रश्नः**—रोगी-कपटी-कामी- एते शब्दाः किमन्ताः?
उत्तरम्— इनन्ताः।

61. **प्रश्नः**—देही-द्रोही-कुशलीशब्दानां मूलशब्दं सूचयत?
उत्तरम्— देहिन्-द्रोहिन्-कुशलिन्।

62. **प्रश्नः**—'अधिकारिन्' शब्दस्य तृतीया-एकवचनं किम्?
उत्तरम्— अधिकारिणा।

63. **प्रश्नः**—'मर्माणि' इत्यस्य मूलशब्दः कः?
उत्तरम्— मर्मन्।

64. **प्रश्नः**—'यावत्' शब्दस्य पुंलिङ्गे द्वितीयाबहुवचनरूपं किम्?
उत्तरम्— यावतः।

65. **प्रश्नः**—'कियत्' शब्दस्य पुंलिङ्गे द्वितीया एकवचनरूपं किम्?
उत्तरम्— कियन्तम्।

66. **प्रश्नः**—'महत्'शब्दस्य पुंलिङ्गे सम्बोधनैकवचने रूपं किम्?
उत्तरम्— महत्।

67. **प्रश्नः**—'अहन्' शब्दस्य प्रथमान्तरूपाणि प्रदर्शयत?
उत्तरम्— अहः-अह्नि/अहनि-अहानि।

68. **प्रश्नः**—'अमुष्य-अमुयोः-अमीषाम्' इति अदस् शब्दस्य किं लिङ्गान्तरूपाणि स्युः?
उत्तरम्— पुंलिङ्गस्य।

69. **प्रश्नः**—'अणिमन्' शब्दस्य सप्तम्येकवचनं किम्?
उत्तरम्— अणिमनि।

70. **प्रश्नः**—'गो'शब्दस्य द्वितीयाबहुवचने रूपं किम्?
उत्तरम्— गाः।

71. **प्रश्नः**—कस्य शब्दस्य सर्वाणि रूपाणि उपलभ्यन्ते?
उत्तरम्— महत्।

72. **प्रश्नः**—'दिव्' शब्दस्य प्रथमैकवचने रूपं किम्?
उत्तरम्— द्यौः।

73. **प्रश्नः**—'अप'शब्दस्य षष्ठीबहुवचने किं रूपम्?
उत्तरम्— अपाम्।

74. **प्रश्नः**—'चतुर्'शब्दस्य स्त्रीलिङ्गे षष्ठीबहुवचने किं रूपम्?
उत्तरम्— चतसृणाम्।

75. **प्रश्नः**—'मघवन्'शब्दस्य षष्ठी एकवचने रूपं भवति?
उत्तरम्— मघोनः।

76. **प्रश्नः**—युवन् शब्दस्य षष्ठीबहुवचने किं रूपं भवति?
उत्तरम्— यूनाम्।

77. **प्रश्नः**—एतत् शब्दस्य स्त्रियां षष्ठीबहुवचने किं रूपं भवति?
उत्तरम्— एतासाम्।

78. **प्रश्नः**—विद्वस् शब्दस्य षष्ठीबहुवचने किं रूपं भवति?
उत्तरम्— विदुषाम्।

79. **प्रश्नः**—'विधि'शब्दः कस्मिन् लिङ्गे वर्तते?
उत्तरम्— पुंलिङ्गे।

80. **प्रश्नः**—'भवती' शब्दस्य सम्बोधने किं रूपम्?
उत्तरम्— भवति।

81. **प्रश्नः**—'भ्रातृ'शब्दस्य सम्बोधने किं रूपम्?
उत्तरम्— हे भ्रातः।

82. **प्रश्नः**—'शिशु' शब्दस्य सम्बोधनैकवचने किं रूपम्?
उत्तरम्— शिशो।

83. **प्रश्नः**—'सुप्' प्रत्ययाः कति भवन्ति?
उत्तरम्— एकविंशति।

84. **प्रश्नः**—'यकृत्' शब्दस्य लिङ्गं किम्?
उत्तरम्— नपुंसकलिङ्गम्।

85. **प्रश्नः**—'अक्षि'शब्दस्य तृतीयैकवचने किं रूपम्?
उत्तरम्— अक्ष्णा।

86. **प्रश्नः**—'इदं'शब्दस्य (स्त्रीलिङ्गे) तृतीयैकवचने किं रूपम्?
उत्तरम्— अनया।

87. **प्रश्नः**—'विश्' शब्दस्य सप्तम्येकवचने किं रूपम्?
उत्तरम्— विशि।

88. **प्रश्नः**—'अदस्' शब्दस्य पुंलिङ्गे तृतीयाबहुवचनं रूपं किम्?
उत्तरम्— अमीभिः।

89. **प्रश्नः**—'चित्तं स्वास्थ्यं लभताम्' अत्र कर्तृपदस्य लिङ्गं किम्?
उत्तरम्— नपुंसकलिङ्गम्।

90. **प्रश्नः**—'सम्प्रति वार्ताः श्रूयन्ताम्' अत्र कर्तृपदं किम्?
उत्तरम्— ते।

91. **प्रश्नः**—'प्रेक्षस्व पनस्य शोभाम्' अत्र कर्मकारकं किम्?
उत्तरम्— शोभाम्।

92. **प्रश्नः**—उपानह् शब्दस्य पञ्चमीविभक्ति-एकवचने किं रूपं भवति?
उत्तरम्— उपानहः।

93. **प्रश्नः**—जगत् शब्दस्य प्रथमाबहुवचनं किम्?
उत्तरम्— जगत्।

94. **प्रश्नः**—दिश् शब्दस्य सप्तमीबहुवचने किं रूपं भवति?
उत्तरम्— दिक्षु।

95. **प्रश्नः**—स्रज् शब्दस्य प्रथमाबहुवचने किं रूपं भवति?
उत्तरम्— स्रजः।

96. **प्रश्नः**—गिर् शब्दस्य सप्तमीबहुवचने किं रूपं भवति?
उत्तरम्— गीर्षु।

97. **प्रश्नः**—प्राञ्च् शब्दस्य प्रथमा एकवचने किं रूपम्?
उत्तरम्— प्राङ्।

98. **प्रश्नः**—भूशब्दस्य प्रथमाबहुवचने किं रूपम्?
उत्तरम्— भुवः।

99. **प्रश्नः**—दातृशब्दस्य द्वितीयाबहुवचने किं रूपं भवति?
उत्तरम्— दातॄन्।

100 **प्रश्नः**—'पूर्व-उभय-सर्व-द्वार'शब्देषु कस्य शब्दस्य त्रिषु लिङ्गेषु द्विवचनरूपं नास्ति?
उत्तरम्— उभयशब्दस्य।

(O-Code-25x73) (ग) सिद्धान्तकौमुदी-
(15) समासः एवं समासविषयकानि वस्तुनिष्ठ-प्रश्नोत्तराणि

समासविवेचनम्-समसनं समासः। अनेकस्य पदस्य एकपदीभवनं समास इत्यर्थः। सम् उपसर्गात् अस् धातोः घञ् प्रत्ययात् समासः निष्पद्यते। समासः सुबन्तानां भवति, न तु तिङन्तानाम्। समासः युगपत् द्वयोः द्वयोः सुबन्तयोः भवति। द्वन्द्वे तु युगपत् बहूनामपि।

अत्र 'समर्थः' पदः समर्थाश्रिते लाक्षणिकः। सामर्थ्यस्य द्वौ प्रकारौ स्तः।

1. एकार्थीभावः-स्वार्थपर्यवसायिनां पदानां विशिष्टैकार्थोपस्थितिजनकत्वम् एकार्थीभावत्वम्।
2. व्यपेक्षाभावः-स्वार्थपर्यवसायिनां पदानाम् आकाङ्क्षादिवशाद्यः परस्परसम्बन्धः सा व्यपेक्षा।
3. समासविग्रहः-वृत्त्यर्थावबोधकं वाक्यं विग्रहः; विग्रहस्य द्वौ प्रकारौ स्तः।

1. लौकिकविग्रहः–यः विग्रहः लोके व्यवहारयोग्यो भवति, यथा–राज्ञः पुरुषः–राजपुरुषः।
2. अलौकिकविग्रहः–लोके अव्यवहृतः, साधनिकायै उपयोगी इति अलौकिकः विग्रहः। यथा–राजन् ङस् पुरुष सु इति अलौकिक-विग्रहः।

समासः पञ्चधा

केवलश्चाव्ययीभावो द्वन्द्वस्तत्पुरुषस्तथा।
बहुव्रीहिश्च विज्ञेयः समासः पञ्चधा बुधैः।।

1. **केवलसमासः (Only Compound)**
2. **अव्ययीभावसमासः (Adverbial Compound)**
3. **तत्पुरुषसमासः(Determinative Compound)**

3.1. कर्मधारयसमासः
(Appositional Compound)
3.2. द्विगुसमासः (Numeral Compound)

4. **बहुव्रीहिसमासः (Attributive Compound)**
5. **द्वन्द्वसमासः (Copulative Compound)**

समासस्य कथा—राज्ञा भोजेन एकः कविः संक्षेपे समासस्य प्रकारेण सह स्वजीवन-व्यथां अपि श्रावयत्। यथा–

द्वन्द्वो द्विगुरपि चाहं, मद्गेहे नित्य अव्ययीभावः।
तत्पुरुषकर्मधारय, येनाहं स्यां बहुव्रीहिः।
चकारबहुलो द्वन्द्वः, स चासौ कर्मधारयः।
यस्य तेषां बहुव्रीहिः, शेषस्तत्पुरुषो मतः।

समासः

1. केवल–समासः, (विशेषसंज्ञा-विनिर्मुक्तः केवलसमासः (कृष्णं श्रितः कृष्णश्रितः, राज्ञः पुरुषः राजपुरुषः)
2. अव्ययीभाव-समासः, (पूर्वपदार्थप्रधानोऽव्ययीभावः) (यथाशक्तिः, प्रतिदिनम्)
3. तत्पुरुष-समासः, (उत्तरपदार्थप्रधानः तत्पुरुषः)
4. बहुव्रीहि-समासः, (अन्यपदार्थप्रधानो बहुव्रीहिः) (पीतम् अम्बरं यस्य सः पीताम्बरः)
5. द्वन्द्व-समासः (उभयपदार्थ-प्रधानो द्वन्द्वः (हरिहरौ-हरिश्च हरश्च) (पूर्वं भूतः इति भूतपूर्वः)

↓

तत्पुरुषभेदः कर्मधारयः।
(तत्पुरुषः समानाधिकरणः कर्मधारयः)
(कृष्णः सर्पः कृष्णसर्पः)

↓

कर्मधारयभेदो द्विगुः।
(कर्मधारयसमासे यदा पूर्वपदं संख्यावाचकं स्यात् तर्हि द्विगुसमासः कथ्यते।)
(पञ्चानां तन्त्राणां समाहारः इति पञ्चतन्त्रम्, पञ्चभिः गोभिः क्रीतः इति पञ्चगुः।)

1. केवल-समासः–विशेषसंज्ञा-विनिर्मुक्तः केवल-समासः। यत्र समासस्तु भवति किन्तु शास्त्रे तस्य काऽपि संज्ञा नास्ति, स केवलसमासः भवति। अस्य प्रचीननाम सुप्सुपा समासः; यथा–पूर्वं भूतः इति भूतपूर्वः, पूर्वम् उक्तः इति पूर्वोक्तः।

2. अव्ययीभाव-समासः–प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावः। समासेऽस्मिन् पूर्वपदं प्रायः अव्ययं भवति उत्तरपदञ्चानव्ययम्। किन्तु समासे कृते समस्तपदं अव्ययं भवति। अनव्ययं अव्ययं भवति इति अव्ययीभावः। अस्मिन् समासे प्रायः पूर्वपदार्थस्य प्रधानता भवति। यथा–हरौ इति अधिहरि। अत्र अधिपूर्वपदमस्ति तद् अधिकरणस्य द्योतकमस्ति। एवमेव **"अव्ययं विभक्तिसमीप-समृद्धिव्यृद्ध्यर्थाभावात्ययाऽसम्प्रतिशब्दप्रादुर्भाव-पश्चाद्यथाऽनुपूर्व्य यौगपद्यसादृश्यसम्पत्तिसाकल्यान्त-वचनेषु"** ।। 2.1.6 ।।' इति सूत्रेण- यथाशक्तिः, उपगंगम्, सुमद्रम्, दुर्भिक्षम्, निर्मक्षिकम्, अतिकष्टम्, इतिहरि, अनुग्रह, अनुदात्रम्, प्रतिदिनम्, सचक्रम्, सशिवम्, समक्षम्, सतृणम्, साग्नि, उपराजम्, पञ्चगङ्गम् इत्यादयः।

3. तत्पुरुष-समासः–प्रायेण उत्तरपदार्थप्रधानः तत्पुरुषः। तत्पुरुषभेदः कर्मधारयः। "तत्पुरुषः समानाधिकरणः कर्मधारयः।" यदा तत्पुरुषसमासे समस्यमानेषु पदेषु समानविभक्तिः स्यात्तर्हि तस्य नाम कर्मधारयः भवति। यथा–महाराजः, कृष्णसर्पः। **कर्मधारयभेदो द्विगुः।** कर्मधारयसमासे यदा पूर्वपदं संख्यावाचकं स्यात् तर्हि द्विगुसमासः कथ्यते। यथा–त्रिफला, त्रिलोकी, पञ्चगवम्। द्वितीयान्तात् सप्तम्यन्तपर्यन्तं यस्य-यस्य विभक्त्यन्तस्य उत्तरपदेन समासः क्रियते, स तत्पुरुषः, तया एव विभक्त्या व्यवह्रियते।

द्वितीया–कृष्णं श्रितः=कृष्णश्रितः, तृतीया–नखैः भिन्नः=नखभिन्नः, चतुर्थी–भूताय बलिः= भूतबलिः, पञ्चमी-चोरात् भयम्=चोरभयम्, षष्ठी–राज्ञः पुरुषः=राजपुरुषः, सप्तमी–दाने वीरः दानवीरः।

कर्मधारयः–कृष्णः सर्पः कृष्णसर्पः, नवम् अन्नम् नवान्नम्। **द्विगुः**–पञ्चानां तन्त्राणां समाहारः इति पञ्चतन्त्रम्, पञ्चभिः गोभिः क्रीतः इति पञ्चगुः।

4. बहुव्रीहिसमासः–प्रायेण अन्यपदार्थप्रधानो बहुव्रीहिः। यत्र समस्यमानेभ्यः पदेभ्यः भिन्नमेव पदार्थस्य प्राधान्यं स्यात् तत्र बहुव्रीहिः भवति। यथा पीतम् अम्बरं यस्य सः पीताम्बरः, दशाननः, चक्रपाणिः, चित्रगुः, श्वेतम् अम्बरं यस्या सा श्वेताम्बरा।

5. द्वन्द्वसमासः–प्रायेण उभयपदार्थप्रधानो द्वन्द्वः। 'च' इत्यस्यार्थे "चार्थे द्वन्द्व" इति सूत्रेण द्वन्द्वसमासः विधीयते। यथा–हरिहरौ-हरिश्च हरश्च, पाणी च पादौ च पाणिपादौ इति। अत्र उभयोः प्राधान्यमस्ति।

सामासिकपदम्	लौकिकविग्रहः	अलौकिकविग्रहः	समासनिर्देशः
भूतपूर्वः	पूर्वं भूतः	पूर्व अम् भूत सु	केवलसमासः
वागर्थाविव	वागर्थौ इव	वागर्थ औ इव	केवलसमासः
पूर्वोक्तः	पूर्वम् उक्तः	पूर्व अम् उक्त सु	केवलसमासः
अधिहरि	हरौ अधि	हरि ङि अधि	अव्ययीभावसमासः
उपराजम्	राज्ञः समीपम्	राजन् ङस् उप	अव्ययीभावसमासः
सुमद्रम्	मद्राणां समृद्धिः	मद्र आम् सु	अव्ययीभावसमासः
दुर्यवनम्	यवनानां व्यद्धिः	यवन आम् दुर्	अव्ययीभावसमासः
निर्मक्षिकम्	मक्षिकाणामभावः	मक्षिका आम् निर्	अव्ययीभावसमासः
अतिहिमम्	हिमस्यात्ययः	हिम ङसि अति	अव्ययीभावसमासः
अतिनिद्रम्	निद्रा सम्प्रति न युज्यते	निद्रा सु अति	अव्ययीभावसमासः
इतिहरि	हरिशब्दस्य प्रकाशः	हरि ङस् इति	अव्ययीभावसमासः
अनुविष्णु	विष्णोः पश्चात्	विष्णु ङसि अनु	अव्ययीभावसमासः
अनुरूपम्	रूपस्य योग्यम्	रूप ङस् अनु	अव्ययीभावसमासः
प्रत्यर्थम्	अर्थं अर्थं प्रति	अर्थ अम् प्रति	अव्ययीभावसमासः
यथाशक्तिः	शक्तिमनतिक्रम्य	शक्ति अम् यथा	अव्ययीभावसमासः
सहरिः	हरेः सादृश्यम्	हरि ङस् सह (स)	अव्ययीभावसमासः
पञ्चगङ्गम्	पञ्चानां गङ्गानां समाहारः	पञ्चन् आम् गङ्गा आम्	अव्ययीभावसमासः
कृष्णश्रितः	कृष्णं श्रितः	कृष्ण अम् श्रित सु	द्वितीयातत्पुरुषसमासः
नखभिन्नः	नखैर्भिन्नः	नख भिस् भिन्न सु	तृतीयातत्पुरुषसमासः
भूतबलिः	भूतेभ्यो बलिः	भूत भ्यस् बलि सु	चतुर्थीतत्पुरुषसमासः

समासिकपदम्	लौकिकविग्रहः	अलौकिकविग्रहः	समासनिर्देशः
चोरभयम्	चोराद् भयम्	चोर ङसि भय सु	पञ्चमीतत्पुरुषसमासः
राजपुरुषः	राज्ञः पुरुषः	राजन् ङस् पुरुष सु	षष्ठीतत्पुरुषसमासः
अक्षशौण्डः	अक्षेषु शौण्डः	अक्ष सुप् शौण्ड सु	सप्तमीतत्पुरुषसमासः
घनश्यामः	घन इव श्यामः	घन सु श्याम सु	कर्मधारयसमासः
त्रिलोकी	त्रयाणां लोकानां समाहारः	त्रि ङस् लोक ङस्	द्विगुसमासः
उरीकृत्य	उरी कृत्वा	उरी कृ क्त्वा	गतितत्पुरुषसमासः
प्राचार्यः	प्रगतः आचार्यः	प्रगत सु आचार्य सु	प्रादितत्पुरुषसमासः
कुम्भकारः	कुम्भं करोति	कुम्भ अम् कार सु	उपपदतत्पुरुषसमासः
पीताम्बरः	पीतम् अम्बरम् यस्य सः	पीत सु अम्बर सु	बहुव्रीहिसमासः
पाणिपादम्	पाणी च पादौ च	पाणि औ पाद औ	द्वन्द्वसमासः

समासविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— समासः कतिविधः, के च ते?
उत्तरम्— पञ्चधा; 1. केवलः, 2. अव्ययीभावः, 3. तत्पुरुषः, 4. बहुव्रीहिः, 5. द्वन्द्वः।

2. **प्रश्नः**—विशेषसंज्ञाविनिर्मुक्तो समासः कः?
उत्तरम्— केवलसमासः।

3. **प्रश्नः**—पूर्वपदार्थप्रधानः समासः कः?
उत्तरम्— अव्ययीभावसमासः।

4. **प्रश्नः**—उत्तरपदार्थप्रधानः समासः कः?
उत्तरम्— तत्पुरुषसमासः।

5. **प्रश्नः**—अन्यपदार्थप्रधानः समासः कः?
उत्तरम्— बहुव्रीहिसमासः।

6. **प्रश्नः**—उभयपदार्थप्रधानः समासः कः?
उत्तरम्— द्वन्द्वसमासः।

7. **प्रश्नः**—तत्पुरुषभेदः कः?
उत्तरम्— कर्मधारयसमासः।

8. **प्रश्नः**—कर्मधारयभेदः कः?
उत्तरम्— द्विगुसमासः।

9. **प्रश्नः**—व्यधिकरणतत्पुरुषसमासः कतिविधः?
उत्तरम्— एकादशविधः।

10. **प्रश्नः**—किं परार्थाभिधानम्?
उत्तरम्— वृत्तिः।

11. **प्रश्नः**—कति वृत्तयः?
उत्तरम्— पञ्च।

12. **प्रश्नः**—पूर्वं भूतो भूतपूर्वः (पूर्व अम् भूत सु) अत्र कः समासः?
उत्तरम्— केवलसमासः।

13. **प्रश्नः**—'अधिहरि' 'आयतीगवम्' अत्र कः समासः?
उत्तरम्— अव्ययीभावसमासः।

14. **प्रश्नः**—वृत्त्यर्थावबोधकं वाक्यं भवति-?
उत्तरम्— विग्रहः।

15. **प्रश्नः**—कृष्णस्य समीपम् उपकृष्णम्, अत्र कः समासः?
उत्तरम्— अव्ययीभावः।

16. **प्रश्नः**—'यथा' इत्यस्य कति अर्थाः?
उत्तरम्— चत्वारः।

17. **प्रश्नः**—सहरि अत्र कः विग्रहः?
उत्तरम्— हरेः सादृश्यम्।

18. **प्रश्नः**—पञ्चानां गङ्गानां समाहारः-इति?
उत्तरम्— पञ्चगङ्गम्।

19. **प्रश्नः**—'श्यामोज्ज्वलवपुः' इति कस्योदाहरणम्?
उत्तरम्— बहुपदबहुव्रीहिसमासस्य।

20. **प्रश्नः**—'मुखचन्द्रः' इत्यत्र कीदृशः कर्मधारयः?
उत्तरम्— अवधारणपूर्वपदकर्मधारयः।

21. **प्रश्नः**—उपशरदम् अत्र कः समासान्तः प्रत्ययः?
उत्तरम्— टच्।

22. **प्रश्नः**—'कृष्णं श्रितः कृष्णश्रितः' अत्र कः समासः?
उत्तरम्— द्वितीयातत्पुरुषः।

23. **प्रश्नः**—'ग्रामं प्राप्तः ग्रामप्राप्तः, ग्रामं गमी ग्रामगमी' अत्र कः समासः?
उत्तरम्— द्वितीयातत्पुरुषः।

24. **प्रश्नः**—'आचारेण निपुणः-आचारनिपुणः' अत्र कः समासः?
उत्तरम्— तृतीयातत्पुरुषः।

25. **प्रश्नः**—मासेन पूर्वः= मासपूर्वः, गुडेन मिश्रः=गुडमिश्रः' अत्र कः समासः?
उत्तरम्— तृतीयातत्पुरुषः।

26. **प्रश्नः**—यूपाय दारुः= यूपदारुः, भूताय वलिः=भूतवलिः अत्र कः समासः?
उत्तरम्— चतुर्थीतत्पुरुषः।

27. **प्रश्नः**—गवे हितम्= गोहितम्, गवे सुखम्= गोसुखम् अत्र कः समासः?
उत्तरम्— चतुर्थीतत्पुरुषः।

28. **प्रश्नः**—चोरात् भयम्=चोरभयम्, पदात् च्युतः= पदच्युतः' अत्र कः समासः?
उत्तरम्— पञ्चमीतत्पुरुषः।

29. **प्रश्नः**—बन्धनात् मुक्तः=बन्धनमुक्तः, गृहात् निर्गतः=गृहनिर्गतश्च'अत्र कः समासः?
उत्तरम्— पञ्चमीतत्पुरुषः।

30. **प्रश्नः**—'राज्ञः पुरुषः=राजपुरुषः, विप्रस्य पुत्रः=विप्रपुत्रः' चेत्यत्र कः समासः?
उत्तरम्— षष्ठीतत्पुरुषः।

31. **प्रश्नः**—शास्त्रे प्रवीणः=शास्त्रप्रवीणः, अक्षेषु शौण्डः=अक्षशौण्डः कः समासः?
उत्तरम्— सप्तमीतत्पुरुषः।

32. **प्रश्नः**—दाने वीरः=दानवीरः, चक्रे बन्धः=चक्रबन्धः अत्र कः समासः?
उत्तरम्— सप्तमीतत्पुरुषः।

33. **प्रश्नः**—'पौर्वशालः, द्वैमातुरः, पञ्चगवधनः' इत्यादि कस्य उदाहरणं भवति?
उत्तरम्— द्विगुसमासस्य।

34. **प्रश्नः**—पूर्वकायः, मध्याह्नः, आसन्नार्भम्, पूर्वरात्रः, मध्यरात्रः इत्यत्र कः समासः?
उत्तरम्—एकदेशीसमासः।

35. **प्रश्नः**—'शिवौ' इत्यत्र कः समासः?
उत्तरम्— एकशेषसमासः।

36. **प्रश्नः**—तत्पुरुषसमानाधिकरणः भवति?
उत्तरम्— कर्मधारयः।

37. **प्रश्नः**—'नृसिंहः' कस्योदाहरणं स्यात्?
उत्तरम्— उपमानोत्तरपदकर्मधारयस्य।

38. **प्रश्नः**—'अनुदरम्' इति नञ् तत्पुरुषः कमर्थं द्योतयति?
उत्तरम्— अल्पार्थम्।

39. **प्रश्नः**—'सुपुरुषः' इति कस्य उदाहरणम्?
उत्तरम्— प्रादिसमासस्य।

40. **प्रश्नः**—'चतुर्युगम्' इति कस्योदाहरणं?
उत्तरम्— समाहारद्विगुसमासस्य।

41. **प्रश्नः**—संख्यापूर्वः समासः कः?
उत्तरम्— द्विगुः।

42. **प्रश्नः**—'निश्शङ्कम्' इति कस्य उदाहरणम्?
उत्तरम्— क्रियाविशेषणबहुव्रीहेः।

43. **प्रश्नः**—'त्रिदशाः' इति कस्योदाहरणम्?
उत्तरम्— अभ्यासबहुव्रीहेः।

44. **प्रश्नः**—'अक्षतशरीरः' इत्यस्य विग्रहवाक्यं किं स्यात्?
उत्तरम्— अक्षतं शरीरं यस्य सः इति (बहुव्रीहिः)।

45. **प्रश्नः**—'विक्रमादित्यः' इत्यस्य विग्रहवाक्यं दर्शय?
उत्तरम्— विक्रमे आदित्य इव (सप्तमीतत्पुरुषः)।

46. **प्रश्नः**—'जीवनसञ्जीवनी'पदस्य विग्रहवाक्यं दर्शय?
उत्तरम्— जीवनाय सञ्जीवनी (चतुर्थीतत्पुरुषः)।

47. **प्रश्नः**—घनश्यामः इत्यस्य कः विग्रहः?
उत्तरम्—घन इव श्यामः (कर्मधारय)।

48. **प्रश्नः**—'न अश्वः=अनश्वः, न एकः=अनेकः, न आर्यः=अनार्यः' अत्र कः समासः?
उत्तरम्— नञ् तत्पुरुषः।

49. **प्रश्नः**—'पुण्यपुरुष' इदं विग्रहवाक्यं कस्यास्ति?
उत्तरम्— पुण्यश्चासौ पुरुषः (कर्मधारय)।

50. **प्रश्नः**—'जितेन्द्रियः' इति पदस्य विग्रहवाक्यं दर्शय?
उत्तरम्— जितानि इन्द्रियाणि यस्य सः (बहुव्रीहिः)।

51. **प्रश्नः**—देवपूजकः ब्राह्मणः=देवब्राह्मणः अत्र कः समासः?
उत्तरम्— मध्यमपदलोपीसमासः।

52. **प्रश्नः**—प्रगतः आचार्यः प्राचार्यः, शोभनः राजा सुराजा, दुष्टः जनः दुर्जनः अत्र कः समासः?
उत्तरम्— गति (कर्मधारय)।

53. **प्रश्नः**—कुम्भं करोतीति कुम्भकारः, गां ददातीति गोदः अत्र कः समासः?
उत्तरम्— उपपदसमासः।

54. **प्रश्नः**—रामश्च कृष्णश्च रामकृष्णौ गावश्च अश्वश्च गवाश्वम् अत्र कः समासः?
उत्तरम्— समाहारद्वन्द्वः।

55. **प्रश्नः**—मुष्टिभ्यां मुष्टिभ्यां इदं युद्धं प्रवृत्तम् इति मुष्यामुष्टि अत्र कः समासः?
उत्तरम्— कर्मव्यतिहारबहुव्रीहिः।

56. **प्रश्नः**—पीतम् अम्बरम् यस्य स पीताम्बरः, शोभनो गन्धो यस्य सः सुगन्धिः, अत्र कः समासः?
उत्तरम्— बहुव्रीहिः।

57. **प्रश्नः**—त्रयाणाम् भुवनानां समाहारः इति त्रिभुवनम् अत्र कः समासः?
उत्तरम्— समाहारद्विगुः।

58. **प्रश्नः**—'दक्षिणपूर्वा' अत्र विग्रहवाक्यं दर्शय?
उत्तरम्— दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा।

59. **प्रश्नः**—'गजसिंहम्' अस्य विग्रहवाक्यं दर्शय?
उत्तरम्— गजाश्च सिंहाश्च एषां समाहारः।

60. **प्रश्नः**—'कापुरुषः-किंराजा-कदन्नम्' इति कस्य समासस्य उदाहरणानि?
उत्तरम्— प्रादिसमासस्य।

61. **प्रश्नः**—'मृदः पिण्ड इव मतिः यस्य सः' इति विग्रहवाक्यस्य समस्तपदं किम्?
उत्तरम्— मृत्पिण्डमतिः।

62. **प्रश्नः**—'कुपुरुषः' अत्र कः समासः?
उत्तरम्— गतिसमासः।

63. **प्रश्नः**—कुम्भकारः कः समासः?
उत्तरम्— उपपदसमासः।

64. **प्रश्नः**—अहश्च रात्रिश्च इति विग्रहवाक्यस्य समस्तपदं किम्?
उत्तरम्— अहोरात्रः।

65. **प्रश्नः**—'न अलङ्कृतं शरीरं यस्य सः' अत्र समस्तपदं किं स्यात्?
उत्तरम्— अनलङ्कृतशरीरम्।

66. **प्रश्नः**—'कुलस्यापत्यं पुमान्' अस्य समस्तपदं किं स्यात्?
उत्तरम्— कुलीनः।

67. **प्रश्नः**—गर्गस्य युवापत्यं पुमान् अस्य समस्तपदं किं स्यात्?
उत्तरम्— गार्ग्यायणः।

68. **प्रश्नः**—'मातापितरौ' इत्यस्य विग्रहवाक्यं किम्?
उत्तरम्— माता च पिता च मातापितरौ।

69. **प्रश्नः**—द्वौ च दश च इति समस्तपदं किं स्यात्?
उत्तरम्— द्वादश।

70. **प्रश्नः**—त्रयोदश अत्र कः समासः?
उत्तरम्— द्वन्द्वः।

71. **प्रश्नः**—द्वन्द्वतत्पुरुषयोः किं भवति?
उत्तरम्— परवल्लिङ्गम्।

72. **प्रश्नः**—पञ्चसु कपालेषु संस्कृतः इत्यत्र समस्तपदं किम्?
उत्तरम्— पञ्चकपालः।

73. **प्रश्नः**—'पुत्रेण सह आगतः पिता' इत्यत्र समस्तपदं किम्?
उत्तरम्— सपुत्रः।

74 **प्रश्नः**—'शेषाद् विभाषा' अनेन किं विधीयते?
उत्तरम्— कप्।

75. **प्रश्नः**—संज्ञा च परिभाषा च तयोः समाहारः इति समस्तपदं किम्?
उत्तरम्— संज्ञापरिभाषम्।

76. **प्रश्नः**—ईश्वरं गुरुं च भजस्व अत्र चकारस्य कोऽर्थः?
उत्तरम्— समुच्चयः।

77. **प्रश्नः**—भिक्षामट गां चानय अत्र चकारस्य कोऽर्थः?
उत्तरम्— अन्वाचयः।

78. **प्रश्नः**—शिवकेशवौ अत्र शिवशब्दस्य पूर्वनिपातं केन सूत्रेण भवति?
उत्तरम्— अल्पाच्तरम्।

79. **प्रश्नः**—पाणी च पादौ च तेषां समाहारः अत्र समस्तपदं किम्?
उत्तरम्— पाणिपादम्।

80. **प्रश्नः**—श्वश्रूश्च श्वसुरश्च इति समस्तपदं किम्?
उत्तरम्— श्वसुरौ।

81. **प्रश्नः**—भ्रातरौ अत्र कः समासः?
उत्तरम्— एकशेषः।

82. **प्रश्नः**—विशेषसंज्ञाविनिर्मुक्तः कः समासः?
उत्तरम्— केवलसमासः।

83. **प्रश्नः**—समानाधिकरणतत्पुरुषः किमस्ति?
उत्तरम्— द्विगुः।

84. **प्रश्नः**—'सप्तर्षयः' इत्यत्र कः समासः?
उत्तरम्— समानाधिकरणतत्पुरुषः।

85. **प्रश्नः**—एकशेषेतरसमाहारात्मकः समासः कः?
उत्तरम्— द्वन्द्वः।

86. **प्रश्नः**—'नीलोत्पलम्' इति पदस्यालौकिकविग्रहः कः?
उत्तरम्— नील सु उत्पल सु।

87. **प्रश्नः**—'अनुरूपम्' इत्यस्य पदस्य विग्रहः कः?
उत्तरम्— रूपस्य योग्यम्।

88. **प्रश्नः**—'जीविकापन्नः' इत्यस्य कः विग्रहः?
उत्तरम्— जीविकाम् आपन्नः।

89. **प्रश्नः**—'छायावृक्षः' 'शाकपार्थिवः' अत्र कः समासः स्यात्?
उत्तरम्— मध्यमपदलोपीकर्मधारयः।

90. **प्रश्नः**—सर्वदः, धनदः, दुर्जनः, एतेषां समासः कः?
उत्तरम्— उपपदसमासः।

91. **प्रश्नः**—राजपुरुषः, जटाबद्धः, शोकापन्नः, शैलराजः एतेषु कः समासः?
उत्तरम्— तत्पुरुषः।

92. **प्रश्नः**—महाराजः, राजर्षिः, परमानन्दः–इत्येतानि कस्य समासस्य पदानि?
उत्तरम्— कर्मधारयस्य।

93. **प्रश्नः**—अक्षमः, अनृणः, अब्राह्मणः, अघोषितः– एतेषां कः समासः?
उत्तरम्— नञ् तत्पुरुषः।

94. **प्रश्नः**— खलसज्जनानां, कुन्देन्दुतुषाराः अनयोः समासः कः?
उत्तरम्— इतरेतरद्वन्द्वः।

95. **प्रश्नः**—अनुरूपं, यथाशक्ति, सचक्रं, उपागमम्, उपनदि, अधिकूलम्–अत्र कः समासः?
उत्तरम्— अव्ययीभावः।

96. **प्रश्नः**—पीताम्बरः, चित्रगुः, हस्तिपादः, यशोधनः, लम्बोदरः, दुर्बुद्धिः, सुशीला, चन्द्रमुखी, दशाननः, महात्मा, प्राप्तधनः एतेषां समासनाम किम्?
उत्तरम्— बहुव्रीहिः।

97. **प्रश्नः**—'देवानां प्रियः' दास्याः पुत्रः अग्रेसरः कस्य समासस्योदाहरणानि?
उत्तरम्— अलुक्समासस्य।

98. **प्रश्नः**—पञ्चपात्रं, त्रिलोकी, त्रिभुवनम्, त्रिनेत्रम्, त्रिरात्रम्,– एतेषां कः समासः?
उत्तरम्— द्विगुः।

99. **प्रश्नः**— विद्याधनम्, वचनामृतम्, मुखचन्द्रः– एतेषु कः समासः?
उत्तरम्— उपमानपूर्वपदकर्मधारयः।

100. **प्रश्नः**—कापुरुषः, किंराजा, कदन्नम् इत्यादिषु कः समासः?
उत्तरम्— प्रादिसमासः।

101. **प्रश्नः**—'युधिष्ठिरः' इत्यत्र कः समासः?
उत्तरम्— अलुक्समासः।

102. **प्रश्नः**—'शोकानलः' अत्र कः समासः?
उत्तरम्— उपमानोत्तरपदः।

103. **प्रश्नः**—विशेषसंज्ञाविनिर्मुक्तः समासः कः?
उत्तरम्— केवलः।

104. प्रश्नः—'तस्य रूपेण मोहितः' एकपदीकरणं कथम्?
उत्तरम्— तद्रूपमोहितः।

105. प्रश्नः—'चौरकर्म, चौराद्भीतिः इत्यनयोः समासौ कौ?
उत्तरम्— षष्ठीतत्पुरुषः, पञ्चमीतत्पुरुषः।

106. प्रश्नः—'सालवृक्षः' अत्र कः समासः?
उत्तरम्— विशेषणपूर्वपदः।

107. प्रश्नः—'खड्गपाणिः' अत्र कः समासः?
उत्तरम्— व्यधिकरणबहुव्रीहिः।

108. प्रश्नः—'वागर्थाविव' इति कस्य उदाहरणमस्ति?
उत्तरम्— द्वन्द्वस्य।

109. प्रश्नः—'तत्पुरुषः' इत्यस्य पदस्य विग्रहवाक्यं किम्?
उत्तरम्— सः पुरुषः तत्पुरुषः।

110. प्रश्नः—'पीतवस्त्रम्' इत्यत्र कः समासः?
उत्तरम्— कर्मधारयः।

111. प्रश्नः—व्यतिहारलक्षणबहुव्रीहिः कः?
उत्तरम्— केशाकेशि।

112. प्रश्नः—'पितरौ' इत्यस्य विग्रहवाक्यं किम्?
उत्तरम्— माता च पिता च।

113. प्रश्नः—कर्मधारयसमासः कतिविधः?
उत्तरम्— नवविधः।

114. प्रश्नः—व्यधिकरणतत्पुरुषसमासः कतिविधः?
उत्तरम्— सप्तविधः।

115. प्रश्नः—'श्यामोज्ज्वलवपुः' इति कस्योदाहरणमस्ति?
उत्तरम्— बहुपदबहुव्रीहेः।

116. प्रश्नः—'मुखचन्द्रः' इत्यत्र कीदृशः कर्मधारयः?
उत्तरम्— अवधारणपूर्वपदकर्मधारयः।

117. प्रश्नः—'शिवौ' इत्यत्र कः समासः?
उत्तरम्— एकशेषः।

118. प्रश्नः—'नृसिंहः' इति कस्योदाहरणं स्यात्?
उत्तरम्— उपमानोत्तरपदकर्मधारयस्य।

119. प्रश्नः—'निश्शङ्कम्' इत्यत्र कः समासः?
उत्तरम्— क्रियाविशेषणबहुव्रीहिः।

120. प्रश्नः—'फलवृक्षाः, छायावृक्षाः, पुष्पलताः—एषां समासं निर्दिशत?
उत्तरम्— मध्यमपदलोपितत्पुरुषः।

121. प्रश्नः—अतटः, अपुत्रः, अपापः, एषां समासस्य नामास्ति?
उत्तरम्— नञ्बहुव्रीहिः।

122. प्रश्नः—'शताब्दी' इति शब्दे कः समासः?
उत्तरम्— द्विगुः।

123. प्रश्नः—'प्राचार्यः' इत्यस्मिन् शब्दे कः समासः?
उत्तरम्— प्रादिसमासः।

124. प्रश्नः—'मधुपः' इत्यत्र कः विग्रहः?
उत्तरम्— मधुनि पिबतीति।

125. प्रश्नः—'खड्गहस्ता' (देवी) इत्यत्र विग्रहः?
उत्तरम्— खड्गः हस्ते यस्याः सा।

126. प्रश्नः—'मृगलोचना' इत्यस्य विग्रहः कः?
उत्तरम्— मृगस्य लोचने इव लोचने यस्याः सा।

127. प्रश्नः—'आत्मनेपदम्' इत्यत्र कः समासः?
उत्तरम्— अलुक्समासः।

128. प्रश्नः—नवानां रात्रीणां समाहारः?
उत्तरम्— नवरात्रम्।

129. प्रश्नः—'आत्मनि इति' इत्यस्य समस्तपदं किम्?
उत्तरम्— अध्यात्मम्।

130. प्रश्नः—'हरिहरौ' इत्यत्र कः समासः?
उत्तरम्— द्वन्द्वः।

131. प्रश्नः—सुबन्तस्य केन सह समासो भवति?
उत्तरम्— सुबन्तेन सह।

132. प्रश्नः—पदानां मेलनस्य प्रक्रिया किं कथ्यते?
उत्तरम्— समसनम्।

133. प्रश्नः— कुपुरुषः अत्र कः समासः?
उत्तरम्— कर्मधारय-समासः।

134. प्रश्नः—'चतुर्युगम्' अत्र कः समासः?
उत्तरम्— द्विगु-समासः।

(O-Code-25x73) (ग) सिद्धान्तकौमुदी-(16) कारकः एवं कारकस्य (विभक्तेः) विषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

कारक-विवेचनम्

कर्ता कर्म च करणं च सम्प्रदानं तथैव च।
अपादानाधिकरणं चेत्याहुः कारकाणि षट्॥

1. कर्ता-"स्वतन्त्रः कर्ता" क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्।
2. कर्म-"कर्तुरीप्सिततमं कर्म" कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्।
3. करणम्-"साधकतमं करणम्" क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्।
4. सम्प्रदानम्-"कर्मणा यमभिप्रैति स सम्प्रदानम्" दानस्य कर्मणा यमभिप्रति स सम्प्रदानसंज्ञं स्यात्।
5. अपादान्-"ध्रुवमपायेऽपादानम्" अपायो विश्लेषः, तस्मिन्साध्ये यद् ध्रुवमवधिभूतं कारकं तदपादानं स्यात्।
6. अधिकरणम्- "आधारोऽधिकरणम्" कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणम्।

1. प्रथमाविभक्तिः कर्ताकारकः (Nominative case)

अवबोधन-सारणी

1. **प्रथमाविभक्तिः**- "प्रातिपदिकार्थ-लिङ्ग-परिमाण-वचनमात्रे प्रथमा"। नियतोपस्थितिकः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे (उच्चैः, नीचैः, कृष्णः, श्रीः, ज्ञानम्) लिङ्गमात्रे (तटः, तटी, तटम्) परिमाणमात्रे (द्रोणो व्रीहिः) संख्यामात्रे (एकः, द्वौ, बहवः) च प्रथमा स्यात्।

सु (स् =:)	औ	जस् (अस्)

सूत्राणि- उदाहरणानि

1. प्रातिपदिकार्थ-लिङ्ग-परिमाण-वचनमात्रे प्रथमा (2.3.46)	उच्चैः, नीचैः, कृष्णः, श्रीः, ज्ञानम्, तटः, तटी, तटम्, एकः, द्वौ, बहवः।
2. कर्तरि प्रथमा	विभेषः गृहं गच्छति, रीता पुस्तकं पठति।
3. सम्बोधने च (2.3.47)	हे राम, हे रामौ, हे रामाः, हे लते, हे लते, हे लता, हे ज्ञान, हे ज्ञाने, हे ज्ञानानि, हे लिट्, हे लिहौ, हे लिहः
4. उक्ते कर्मणि प्रथमा	मया घनश्यामः दृश्यते। तेन हरिः सेव्यते।
5. अव्यययोगे प्रथमा	शूद्रकः इति राजा आसीत्। कृष्णः इति सखा अस्ति।
6. प्रयोजके कर्तरि प्रथमा	पिता पुत्रं मेघं दर्शयति। हरिः भक्तं स्वर्गं गमयति।

2. द्वितीयाविभक्तिः कर्मकारकः- (Accusative case)

2. **द्वितीयाविभक्तिः**- (क) "कर्मणि द्वितीया" अनुक्ते कर्मणि द्वितीया स्यात्। यथा-हरिः सेव्यते। (ख) "अकथितं च" अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्। यथा-गां दोग्धि पयः इत्यादि। (ग) "उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते॥" इति वार्तिकेन उभयतः, सर्वतः, धिक्, उपर्युपरि, अधोऽधः, अध्यधि, त्रयः आम्रेडितान्ताः इति पदानां योगेऽपि द्वितीया भवति। (घ) "अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि" इति वार्तिकेन अभितः, परितः, समया, निकषा, हा इति पदानां योगेऽपि द्वितीया स्यात्। (ङ) "अन्तराऽन्तरेण युक्ते" इति सूत्रेण अन्तरा, अन्तरेण योगे द्वितीया विभक्तिः स्यात्।

अम्	औट् (औ)	शस् (अस्

सूत्राणि-	उदाहरणाणि
1. कर्तुरीप्सिततमं कर्म (1.4.49)	1. मापेष्वश्वं बध्नाति। 2. पयसा ओदनं भुङ्क्ते। 3. अर्चना ग्रामं गच्छति।
2. कर्मणि द्वितीया (2.3.2)	1. हरिं भजति। 2. ओदनं भुञ्जानो विषं भुङ्क्ते। 3. लक्ष्म्या सेवित:।
3. तथायुक्तं चानीप्सितम् (1.4.50)	1. ग्रामं गच्छन् तृणं स्पृशति।
4. अकथितं च (1.4.51) अपादानादि विशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।	
3. दुह्, याच्, पच्, दण्ड्, रुध्, प्रच्छ्, चि, ब्रू, शास्, जि, मथ्, मुष्, नी, ह, कृष्, वह्, इति योगे।	**गां** दोग्धि पय:, **बलिं** याचते वसुधाम्, **तण्डुलान्** ओदनं पचति, **गर्गान्** शतं दण्डयति, **व्रजम्** अवरुणद्धि गाम्, **माणवकं** पन्थानं पृच्छति, **वृक्षम्** अवचिनोति फलानि, **माणवकं** धर्मं ब्रूते शास्ति वा, **शतं** जयति देवदत्तम्, **सुधां** क्षीरनिधिं मथ्नाति, **देवदत्तं** शतं मुष्णाति, ग्राममजां नयति/हरति/कर्षति/वहति वा।
5. गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ (1.4.52) गत्याद्यर्थानां शब्दकर्मणामकर्मकाणां चाणौ य: कर्ता स णौ कर्म स्यात्। गति: किम्–पाचयति ओदनं देवदत्तेन। अण्यन्तानां किम्–गमयति देवदत्तो यज्ञदत्तम्।	**अण्यन्त अवस्था एवं ण्यन्त अवस्था–** 1. शत्रव: स्वर्गमगच्छन्–शत्रून् स्वर्गमगमयत्। 2. स्वे वेदार्थम् अविदु: हरि: वेदार्थं स्वान् अवेदयत्। 3. देवा: अमृतम् आश्नन् देवान् आशयत् हरि: अमृतं 4. विधि: वेदम् अध्यैत–हरि: वेदं विधिम् अध्यापयत् 5. पृथ्वी सलिले आस्त–हरि: पृथ्वीं सलिले आसयत्।
6. हृक्रोरन्यतरस्याम् ( )	शब्दाययति देवदत्तेन। हारयति कारयति वा भृत्यं भृत्येन वा कटम्।
7. 'अधिशीङ्स्थाऽऽसां कर्म' (1.4.46) अधिपूर्वाणामेषामाधार: कर्म स्यात्।	1. मोहन: शय्याम् अधिशेते। 2. सा गृहम् अधितिष्ठति। 3. नृप: प्रासादम् अध्यास्ते। अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरि:।
8. अभिनिविशश्च (1.4.47)	सन्मार्गम् अभिनिविशते।
9. अभित:परित:समयानिकषाहा-प्रतियोगेऽपि (वा०1442-1443)	1. ग्रामम् अभित: पर्वता: सन्ति। 2. ग्रामं परित: नदी अस्ति। 3. ग्रामं सर्वत: वृक्षा: सन्ति। 4. निकषा लङ्काम्। 5. हा कृष्णाभक्तम्। 6. ग्रामम् उभयत: पर्वता: सन्ति।
10. 'प्रत्यनुधिङ्निकषान्तरान्तरेण यावद्भि:	1. शिशुं प्रति गच्छ। 2. रामम् अनुगत: लक्ष्मण:। 3. धिक् अभक्तम्। 4. गृहं निकषा नदी अस्ति। 5. रामलक्ष्मणं न अन्तरा सीता अस्ति। 6. कृष्णम् अन्तरेण राधा खिन्ना। 7. नगरं यावत् वृक्षा: सन्ति।
11. उपान्वध्याङ्वस: (1.4.48)	स: वनम् उपवसति। हरि: वैकुण्ठम् अनुवसति या आवसति।
12. क्रुधद्रुहोरुपसृष्टयो: कर्म (1.4.38)	प्रभु: भृत्यम् अभिक्रुध्यति वा अभिद्रुह्यति।
13. कर्मप्रवचनीययोगे द्वितीया (2.3.8)	मेघम् अनुप्रावर्षत्, अनुहरिं सुरा:, अति देवान् कृष्ण:।
14. कालाध्वनोरत्यन्तसंयोगे (2.3.5)	क्रोशं कुटिला नदी, मासं व्याकरणम् अपठत्।

3. **तृतीयाविभक्ति:**– (क) "कर्तृकरणयोस्तृतीया" इति सूत्रेण अनभिहिते कर्तरि करणे च तृतीयाविभक्ति: स्यात्। यथा–रामेण बाणेन हतो बाली। (ख) "सहयुक्तेऽप्रधाने" इति सूत्रेण सह, साकं, समं, सार्धम् इत्यादि सहार्थकपदानां

योगे तृतीयाविभक्ति: स्यात्। यथा–पुत्रेण सहागत: पिता। (ग) "येनाङ्गविकार:" इति सूत्रेण येन विकृतेन अंगेन अंगिन: विकार: लक्ष्यते, तेन अंगवाचकशब्देन सह तृतीयाविभक्ति: स्यात्। यथा–अक्ष्णा काण:।

टा (आ)	भ्याम्	भिस् (भि:)

शब्दयोगार्थे, धात्वर्थे, सूत्रम्-प्रयोगा:—

1. विना, सह, अलं, साकं योगे तृतीया भवति।	सहयुक्तेऽप्रधाने (2.3.19) सहार्थेन युक्तेऽप्रधाने तृतीया स्यात्।	रामं, रामेण, रामात् वा विना अयोध्या शून्या। रामेण सह सीता गच्छति, सीतया साकं लक्ष्मण: तिष्ठति। पुत्रेण सहागत: पिता।
2. अङ्गविकारे तृतीया,	येनाङ्गविकार: (2.3.20) येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते तत: तृतीया स्यात्।	अक्ष्णा काण:, पादेन खञ्ज:, कर्णेन बधिर:, पृष्ठेन कुब्ज:, नेत्राभ्याम् अन्ध:।
3. इत्थंभूतलक्षणे उपलक्षणे तृतीया भवन्ति।	इत्थंभूतलक्षणे (2.3.21) कंञ्चित्प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात्।	जटाभिस्तापस:। वस्त्रेण सज्जन:। पुस्तकेन छात्र:। हलेन कृषक: प्रतीयते।
4. करणे तृतीया,	करणे तृतीया	स: मुखेन खादति।
5. 'सम्'उपसर्गपूर्वक ज्ञाधातो: कर्मणि	सञ्ज्ञोऽन्यतरस्यां कर्मणि (2.3.22)	पित्रा पितरं वा सञ्जानीते।
6. अपवर्गे तृतीया	अपवर्गे तृतीया (2.3.6) अपवर्ग: फलप्राप्ति:, तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात्।	मासेन व्याकरणम् अधीतम्। अह्ना क्रोशेन वा अनुवाकोऽधीत:।
7. प्रकृति कृति स्वभावार्थे तृतीया,	प्रकृत्यादिभ्य: उपसङ्ख्यानम् (वा 1466) प्रकृति-आदि गणपठित-शब्दात् तृतीया स्यात्।	प्रकृत्या चारु, प्रायेण याज्ञिक:, गोत्रेण गार्ग्य:, समेनैति, विषमेणैति, द्विद्रोणेन धान्यं क्रोणाति, सुखेन दु:खेन वा यातीत्यादि।
8. हेतु (कारणार्थे) तृतीया। द्रव्यादिसाधारणं निर्व्यापार-साधारणं च हेतुत्वम्।	हेतौ (2.3.23) हेत्वर्थे तृतीया स्यात्।	हर्षेण हसति। दण्डेन घट:। पुण्येण दृष्टो हरि:। अध्ययनेन वसति।
9. अनुक्तकर्ता एवं करणे च	कर्तृकरणयोस्तृतीया (2.3.18)	रामेण बाणेन हतो वाली।
10. दिव् धातो: साधकतमकारके	दिव: कर्म च (1.4.43) कर्म-करणसंज्ञम्।	अक्षैरक्षान्वा दीव्यति।
11. साधकतमं (प्रकृष्टोपकारक) अर्थे।	साधकतमं करणम् (1.4.42) करणसंज्ञं स्यात्।	राम: जलेन मुखं प्रक्षालयति। नेत्रेण पश्यति। कर्णेन शृणोति।
12. कर्मवाच्ये-भाववाच्ये कर्तरि तृतीया	अनुक्ते कर्त्तरि तृतीया	रामेण गम्यते। रमया हस्यते।
13. पृथक्, विना, नाना, शब्दानां योगे	पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्	सीता रामेण पृथक् न पश्यति।
14.1. ऊनार्थक, 2. वारणार्थक, 3. प्रयोजनार्थक	'ऊन-वारण प्रयोजनार्थकश्च तृतीया'	1. स धनेन हीन:। मोहन: गर्वेण शून्य: अस्ति। राम: क्रोधेन रहित:। 2. विवादेन अलम्, कलहेन किम्, 3. धनेन किं प्रयोजनम्।

4. **चतुर्थीविभक्तिः**– (क) "चतुर्थी सम्प्रदाने" इति सूत्रेण सम्प्रदानसंज्ञकेषु पदेषु चतुर्थीविभक्तेः प्रयोगः भवति। यथा–विप्राय गां ददाति। (ख) "रुच्यर्थानां प्रीयमाणः" इति सूत्रेण रुच्यर्थकधातुभिर्योगे प्रीयमाणस्य सम्प्रदानसंज्ञा भवति। (ग) "नमः स्वस्ति-स्वाहास्वधाऽलंवषड्योगाच्च" इति वार्तिकेण नमः, स्वस्ति, स्वाहा, स्वधा, अलं, वषट् इत्यादिभिर्योगे चतुर्थीविभक्तिः स्यात्। यथा–हरये नमः, प्रजाभ्यः स्वस्ति, अग्नये स्वाहा इत्यादि।

ङे	भ्याम्	भ्यस् (भ्यः)

शब्दयोगार्थे, धात्वर्थे,	सूत्रम्	प्रयोगाः
1. सम्प्रदानकारके चतुर्थीविभक्तिः	'चतुर्थी सम्प्रदाने' (2.3.13)	सः ब्राह्मणाय भोजनं पचति।
2. दानार्थे चतुर्थी	कर्मणा यमभिप्रैति स सम्प्रदानम् (1.4.32) दानस्य कर्मणा यम-भिप्रैति स सम्प्रदानसञ्ज्ञं स्यात्।	सः ब्राह्मणेभ्यः वस्त्रं ददाति। विप्राय गां ददाति। ब्राह्मणाय गां ददाति।
3. रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणेऽर्थे।	रुच्यर्थानां प्रीयमाणः (1.4.33)	हरये रोचते भक्तिः। बालकाय मोदकः रोचते।
4. श्लाघ्, ह्नु, स्था, शप्, धातूनां प्रयोगे अभीष्टे	श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः (1.4.34)	गोपी स्मरणात् कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा।
5. धारि धातोः उत्तमर्णस्य सम्प्रदानम्।	धारेरुत्तमर्णः (1.4.35)	भक्ताय धारयति मोक्षं हरिः। देवदत्तः मह्यं शतं धारयति।
6. स्पृह् धातोः योगे ईप्सितं सम्प्रदानं स्यात्।	स्पृहेरीप्सितः (1.4.36) स्पृहयतेः प्रयोगे इष्टः सम्प्रदानं स्यात्।	पुष्पेभ्यः स्पृहयति। पदाय स्पृहयन्ति नेतारः ज्ञानाय स्पृहयति ज्ञानी।
7. क्रुध् आदि एवं तत्समानार्थक धातूनां प्रयोगे यं प्रति कोपः तस्य सम्प्रदानं स्यात्।	क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः (1.4.37) क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः स उक्तसञ्ज्ञः स्यात्।	हरये क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति वा। प्रभुः भृत्याय क्रुध्यति। दुर्जनः सज्जनाय असूयति, द्रुह्यति, ईर्ष्यति वा।
8. राध् एवं ईक्ष् धातूनां योगे	राधीक्ष्योर्यस्य विप्रश्नः (1.4.39)	कृष्णाय राध्यति, ईक्षते वा।
9. प्रति या आङ् उपसर्गपूर्वक श्रु धातोः योगे।	प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता (1.4.40) आभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्तनारूपस्य व्यापारस्य कर्ता सम्प्रदानं स्यात्।	विप्राय गां प्रति शृणोति, आ शृणोति वा। सः मह्यं गां प्रति शृणोति।
10. अनु एवं प्रति उपसर्गपूर्वक गृ धातोः योगे पूर्वव्यापारस्य (क्रिया) कर्तृभूतं सम्प्रदानं स्यात्।	अनुप्रतिगृणश्च (1.4.41) आभ्यां गृणातेः कारकं पूर्वव्यापारस्य कर्तृभूतमुक्तसंज्ञं स्यात्।	होत्रे अनुगृणाति, प्रतिगृणाति वा।
11. परिक्रयणार्थे	परिक्रयणे सम्प्रदानमन्यतरस्याम् (1.4.44)	शतेन शताय वा परिक्रीतः।
12. तादर्थ्ये चतुर्थी	तादर्थ्ये चतुर्थी वाच्या (वा 1459)	मुक्तये हरिं भजति। अध्ययनाय पुस्तकम्।
13. क्लृपि, जन्, भू; सम्पूर्वक-धातोः पदस्य योगे।	क्लृपि सम्पद्यमाने च (वा–1459)	भक्तिः ज्ञानाय कल्पते, धनं सुखाय भवति, ज्ञानं कल्याणाय जायते। जनं मुक्तये सम्पद्यते।

शब्दयोगार्थे, धात्वर्थे,	सूत्रम्	प्रयोगाः
14. क्रियार्थाक्रिया एवं भाव-वचनयोः तदन्तशब्दात् चतुर्थी स्यात्।	क्रियार्थोपपदस्य च कर्मणि स्थानिनः (2.3.14) तुमर्थाच्च भाववचनात् (2.3.15)	फलेभ्यः उद्यानं गच्छति बालकः। नमस्कुर्मः नृसिंहाय। भोजनाय गच्छति। यज्ञाय याति।
15. नमः, स्वस्ति, स्वाहा, स्वधा, अलम्, वषट्, शब्दानां योगे।	नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च (2.3.16) एभिर्योगे चतुर्थी स्यात्।	श्रीगणेशाय नमः, अग्नये स्वाहा, पितृभ्यः स्वधा, इन्द्राय वषट्, अलं मल्लः मल्लाय।
16. नमः आदि शब्दैः सह कृ आदि योगे चतुर्थी स्थाने द्वितीया स्यात्	उपपदविभक्तेः कारकविभक्ति-र्बलीयसी (वा 103)	नमस्करोति देवान्, मुनित्रयं नमस्कृत्य, गुरुं नमस्करोति।
17. मन् धातोः प्राणिवर्जित अनभिहित कर्मे विकल्पेन–	मन्यकर्मण्यनादरे विभाषाऽप्राणिषु (2.3.17)	न अहं त्वां तृणाय, तृणं वा मन्ये।
18. अमार्गवाचकगत्यर्थकधातोः	गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि (2.3.12)	देवदत्तः ग्रामं ग्रामाय वा गच्छति।
19. बलि, हित, सुख शब्दानां योगे	बलिहितसुखयोगे चतुर्थी	भूताय बलिः, छात्राय हितम्, तुभ्यं सुखम्

5. **पंचमीविभक्तिः**– (क) "अपादाने पंचमी" इति सूत्रेण अपादानसंज्ञकेषु पदेषु पंचमी-विभक्तिः स्यात्। यथा–ग्रामाद् आयाति। (ख) "भीत्रार्थानां भयहेतुः" इति सूत्रेण भी, त्रै इत्यादिभिर्धातुभिर्योगे पंचमी विभक्तिः स्यात्। यथा–चौराद् बिभेति। (ग) "पृथग्विनानानाभि-स्तृतीयाऽन्यतरस्याम्" इति सूत्रेण पृथक्, विना, नाना, इत्यादिभिर्योगे तृतीया, पंचमी, द्वितीया स्यात्। यथा–पृथक् रामेण रामात् रामं वा।

ङसि (अस्)	भ्याम्	भ्यस् (भ्यः)

शब्दयोगार्थे, धात्वर्थे वा,	सूत्रम्	प्रयोगाः
1. द्वयोः संयुक्तयोः अपायार्थे अपादानं स्यात्।	ध्रुवमपायेऽपादानम् (1.4.24)	ग्रामात् आगच्छति। बलाहकात् विद्योतते।
2. अपादानकारके पञ्चमी स्यात्।	अपादाने पञ्चमी (2.3.28)	वृक्षात् पत्राणि पतन्ति, ग्रामादायाति, धावतोऽश्वात्पतति।
3. भी एवं त्रा धातूनां योगे पञ्चमी स्यात्।	भीत्रार्थानां भयहेतुः (1.4.25) भयार्थानां त्राणार्थानां च प्रयोगे हेतुरपादानं स्यात्।	चोराद बिभेति। चोरात्त्रायते। मृगः व्याघ्रात् बिभेति। शिष्यः गुरोः बिभेति। गुरुः शिष्यं पापात् त्रायते।
4. वारणार्थकधातूनां योगे ईप्सितार्थे	वारणार्थानामीप्सितः (1.4.27) वारणार्थानां धातूनां प्रयोगे ईप्सितो-ऽर्थोऽपादानं स्यात्।	शस्यात् वृषभं वारयति। दुग्धात् विडालं वारयति। यवेभ्यो गां वारयति।
5. नियमपूर्वकेति उपदेष्टा-अध्यापयितार्थे-पञ्चमी स्यात्।	आख्यातोपयोगे (1.4.29) नियमपूर्वक विद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात्।	उपाध्यायादधीते। शिक्षकात् शास्त्रम् अधीते। गुरोः वेदम् अधीते।
6. भूधातोः योगे भूकर्तुः प्रभवस्तथा।	भुवः प्रभवः (1.4.31) भवनं भूः।	हिमालयात् गंगा प्रभवति।

शब्दयोगार्थे, धात्वर्थे वा,	सूत्रम्	प्रयोगाः
7. ल्यब्लोपे पञ्चमी	ल्यब्लोपे कर्मण्यधिकरणे च (वा1474–1475)	सः प्रसादात् पश्यति। मुनिः आसनात् पश्यति।
8. अन्य, आरात्, प्रभृति (from) योगे	अन्यारादितरर्ते दिक्शब्दाञ्चूत्तर-पदाजाहियुक्ते (2.3.29)	ब्राह्मणात् अन्यः, आरात् वनात्, शैशवात् प्रभृति। पूर्वा ग्रामात्।
9. बहिर्योगे पञ्चमी	अपपरिबहिरञ्चवः पञ्चम्या (2.1.12)	ग्रामाद् बहिः। ग्रामात् बहिः सरः वर्तते।
10. आङ्मर्यादाभिविध्योः	आङ्मर्यादावचने (1.4.89) आङ्मर्यादायामुक्तसञ्ज्ञः स्यात्।	आग्रामात् गच्छति। आसकलात् ब्रह्म। आबाल्यात् ब्रह्मचारी।
11. प्रति, प्रतिनिधि, प्रतिदाने,	प्रतिः प्रतिनिधिप्रतिदाने (1.4.92) एतयोरर्थयोः प्रातिरुक्तसञ्ज्ञः स्यात्। प्रतिनिधि प्रतिदाने च यस्मात् (2.3.11) अत्र कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्।	प्रद्युम्नः कृष्णात् प्रति, तिलेभ्यः प्रति यच्छति माषान्।
12. दूर एवं अन्तिकार्थयोगे	दूरान्तिकार्थेभ्यो द्वितीया च (2.3.35) एभ्यो द्वितीया स्याच्चात्पञ्चमीतृतीये च।	ग्रामस्य दूरात्, दूरं, दूरेण वा सरः। अन्तिकम् अन्तिकात् अन्तिकेन वा।
13. जुगुप्सा, विराम, प्रमाद, अर्थे	जुगुप्साविरामप्रमादार्थानामुप-सङ्ख्यानम् (वा-1079)	पापात् जुगुप्सते, अध्ययनात् विरमति, धर्मात् प्रमाद्यति,
14. देशवाचककालवाचक-अर्थे	'यतश्चाध्वकालनिर्माणं ततः पञ्चमी' (वा 1477)	पाटलिपुत्रात् काशी पञ्चदशयोजनानि/ योजनेषु। विजयदशमीपर्वात् दीपावली विंशतिदिवसेषु।
15. हेतौ पञ्चमी तृतीया च।	हेतौ (2.3.23)	कष्टात्/ कष्टेन वा क्रन्दति।
16. पृथक् एवं विना योगे	पृथग्विनानानाभ्यां द्वितीया तृतीया पञ्चमी च	रामं/रामेण/रामात् वा विना अयोध्या शून्या।
17. अदर्शनार्थे	'येनादर्शनमिच्छति'	मातुः निलीयते कृष्णः, आचार्यात् निलीयते शिष्यः।
18. ऋते, विना योगे	ऋतेयोगे द्वितीया पञ्चमी च	ऋते ज्ञानात्/ ज्ञानं वा न मुक्तिः, ऋते कृष्णात् न सुखम्।
19. तुलनायां यः श्रेष्ठार्थे	अपेक्षार्थे पञ्चमी	धनात् विद्या गरीयसी, मातुः गुरुतरा भूमिः।
20. दिशा, देश, कालवाचक-शब्दानां योगे।	दिग्देशकालवाचिभिः	ग्रामात् पूर्वं सरः। प्रयागात् पूर्वं काशी। चैत्रात् पूर्वं फाल्गुनः।
21. श्रवणार्थे	श्रुत्यर्थानां श्रावयिता	गुरोः विद्या श्रुतवान्। धात्रात् संवादं श्रुतवान्।
22. जन् धातोः	जनिकर्तुः प्रकृतिः	ब्रह्मणः प्रजाः प्रजायन्ते।

6. षष्ठी-विभक्तिः-सम्बन्ध-कारकः

षष्ठी-विभक्तिः-(क) "षष्ठी शेषे" इति सूत्रेण कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः सम्बन्धः शेषस्तत्र षष्ठी स्यात्। यथा-मातुः स्मरति। (ख) "कर्तृकर्मणोः कृतिः" इति सूत्रेण अनुक्तकर्तायां कर्मणि च षष्ठी स्यात्। यथा-कृष्णस्य कृतिः। (ग) "षष्ठी हेतुप्रयोगे" अनेन सूत्रेणापि हेतु-शब्देन हेतु प्रयोगे षष्ठी स्यात्। यथा-अन्नस्य हेतोः वसति।

6. षष्ठी-विभक्तिः	ङस् (अस्), ओस् (ओः), आम्	मम, रामस्य, रामायणस्य, रजकस्य, धातूनाम्

शब्दयोगार्थे, धात्वर्थे,	सूत्रम्	प्रयोगाः
1. स्वस्वामिभावादिसम्बन्धे षष्ठी स्यात्।	षष्ठी शेषे (2.3.50) कारक-प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः।	राज्ञः पुरुषः, रामस्य गृहम्, मम पुत्रः। कृष्णस्य गौः, प्रस्तरस्य मूर्तिः, तव पुस्तकम्
2. हेतुयोगे-हेतुद्योत्ये षष्ठी स्यात्।	षष्ठी हेतुप्रयोगे (2.3.26)	अन्नस्य हेतोः निवसति।
3. कृत्-प्रत्ययान्त (घञ्, क्तिन्, अन्, तृच् आदि) शब्दानां योगे कर्ताकर्मयोः-	कर्तृकर्मणोः कृति (2.3.65) कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात्।	कृष्णस्य कृतिः, अन्नस्य पाकः, तव गतिः, जगतः कर्ता कृष्णः।
4. कर्तृकर्मणोः प्राप्तौ कर्मण्येव षष्ठी स्यात्।	उभयप्राप्तौ कर्मणि (2.3.66) उभयोः प्राप्तिः यस्मिन्कृति तत्र कर्मण्येव षष्ठी स्यात्।	दुग्धस्य पानं शिशुना। आश्चर्यो गवां दोहोऽगोपेन।
5. कृत् प्रत्ययान्त (तव्य, अनीयर, यत्, ण्यत्, क्यप्) योगे	कृत्यानां कर्तरि वा (2.3.71) षष्ठी वा स्यात्।	मया मम वा गुरुः पूजितव्यः, पूज्यः।
6. अनादर-अर्थे षष्ठी वा स्यात्।	षष्ठी चानादरे (2.3.38) अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः।	रुदतः शिशोः माता जगाम। रुदति रुदतो वा प्राव्राजीत्।
7. वक्तायाः इच्छार्थे	विवक्षया षष्ठी स्यात्	तावद् भयस्य भेतव्यम्।
8. वर्तमानार्थक 'क्त' प्रत्ययस्य योगे	क्तस्य च वर्तमाने (2.3.67) षष्ठी स्यात्।	विद्वान् सतां पूजितः।
9. अधिपूर्वक 'इक्' धातोः दय्, ईश् योगे-	अधीगर्थदयेशां कर्मणि (2.3.52) एषां कर्मणि शेषे षष्ठी स्यात्।	मातुः स्मरति। भिक्षुकस्य दयते रामः। गात्राणाम् अनीशः संवृत्तः।
10. तृप्त्यर्थकधातोः करणकारके षष्ठी स्यात्।	तृप्त्यर्थानां विभाषा अथवा करणे षष्ठी	नाग्निः तृप्यति काष्ठानां व काष्ठैः।

7. सप्तमी-विभक्तिः- अधिकरणकारकः

7. **सप्तमी-विभक्तिः**-(क) "सप्तम्यधिकरणे च" इति सूत्रेण अधिकरणे सप्तमी स्यात्। यथा-कटे आस्ते, स्थाल्यां पचति। (ख) "निमित्तात्कर्मयोगे" इति वार्तिकेण निमित्तेषु क्रियाफलवाचकेषु च शब्देषु सप्तमी स्यात्। यथा-

चर्मणि द्वीपिनं हन्ति, दन्तयोर्हन्ति कुञ्जरम्।
केशेषु चमरीं हन्ति, सीम्नि पुष्कलको हतः।।

सप्तमी-विभक्तिः–	ङि (इ) ओस् (ओः) सुप् (सु)	गृहे, विद्यालये, कविषु, कोशेषु, पुस्तके,

शब्दयोगार्थे, धात्वर्थे,	सूत्रम्	प्रयोगाः
1. अधिकरणे सप्तमीविभक्तिः भवति।	आधारोऽधिकरणम् (1.4.45) कर्तृकर्मद्वारा तन्निष्ठक्रियायाः आधारः कारकमधिकरणसंज्ञः स्यात्।	सः भूमौ शेते। बालकाः विद्यालये पठन्ति। प्रकाशमधुपौ देहल्यां पठतः।
2. 'दूर' एवं समीपार्थकयोगे	सप्तम्यधिकरणे च (2.3.36) अधिकरणे सप्तमी स्यात्। चकाराद् दूरान्तिकार्थेभ्यः।	कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मिन् आत्मास्ति। वनस्य दूरे अन्तिके वा।
3. क्त-प्रत्ययान्ते इन् प्रत्ययस्य योगे	'क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम्' (वा-1475)	अधीते व्याकरणे। (अधीतम् अनेन)
4. साधु-असाधु शब्दयोः योगे	'साध्वसाधुप्रयोगे च' (वा-1486)	साधुः कृष्णो मातरि, असाधुः कृष्णः मातुले
5. चर्म, दन्त, केश, सीमन् शब्देषु सप्तमी स्यात्।	निमित्तात्कर्मयोगे (वा-1490) निमित्त वा प्रयोजनक्रियायाः कर्मे सप्तमी स्यात्।	चर्मणि द्वीपिनं हन्ति, दन्तयोः कुञ्जरं हन्ति, केशेषु चमरीं हन्ति, सीम्नि पुष्कलकः हतः।
6. यस्य क्रियया क्रियान्तरं लक्ष्यते, ततः सप्तमी।	यस्य च भावेन भावलक्षणम् (2.3.37)	गोषु दुह्यमानासु गतः। अस्तं गते सः गतः।
7. कर्ता एवं तद्बोधकक्रियायाम्	'अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च (वा-1487-88)	सत्सु तरत्सु असन्त आसते। असत्सु तिष्ठत्सु सन्तस्तरन्ति। सत्सु तिष्ठत्सु असन्तस्तरन्ति। असत्सु तरत्सु सन्तस्तिष्ठन्ति।
8. निर्धारणे षष्ठीसप्तम्यौ स्तः	यतश्च निर्धारणम् (2.3.41) जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं सतस्ततः षष्ठीसप्तम्यौ स्तः।	कवीनां/ कविषु वा कालिदासः श्रेष्ठः। नृणां/ नृषु वा द्विजः श्रेष्ठः। छात्राणां/छात्रेषु वा मैत्रः पटुः।
9. प्रशंसार्थकसाधु-निपुण-शब्दयोः योगे	साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः (2.3.43) आभ्यां योगे सप्तमी स्यादर्चायां न तु प्रतेः प्रयोगे।	व्याकरणे साधुः निपुणः वा। मातरि साधुर्निपुणो वा।

कारकस्य (विभक्तेः) विषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—कारकत्वं किम्?
उत्तरम्— क्रियाजनकत्वं कारकत्वम्।

2. **प्रश्नः**—कति कारकाणि सन्ति?
उत्तरम्— षट् (6)।

3. **प्रश्नः**—कति कारकाणि कानि च तानि?
उत्तरम्— (6 षट्) कर्ता कर्म च करणं च सम्प्रदानं तथैव च, अपादानाधिकरणं च इत्याहुः कारकानि षट्।

4. **प्रश्नः**—'कारके' इति कीदृशं सूत्रमस्ति?
उत्तरम्— अधिकारसूत्रम्।

5. **प्रश्नः**—प्रथमाविभक्तिप्रतिपादकं सूत्रं किम्?
उत्तरम्—प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा।

6. **प्रश्नः**—प्रातिपदिकार्थमात्रे किं भवति?
उत्तरम्— प्रथमाविभक्तिः।

7. **प्रश्नः**—प्रथमाविभक्तेः कारकं किम्?
उत्तरम्— कर्ताकारकः।

8. **प्रश्नः**—'मधुपः' इत्यस्मिन् पदे प्रथमा-विभक्तेः कारणं किम्?
उत्तरम्—प्रातिपदिकार्थमात्रम्।

9. **प्रश्नः**—परिमाणमात्रस्य उदाहरणम् अस्ति?
उत्तरम्— द्रोणो व्रीहिः।

10. **प्रश्नः**—'तटी' इत्यस्मिन् पदे प्रथमा-विभक्तेः कारणं किम्?
उत्तरम्— लिंगमात्रम्।

11. **प्रश्नः**—'सम्बोधने च' अनेन किं भवति?
उत्तरम्—प्रथमा।

12. **प्रश्नः**—उक्तकर्मणि का विभक्तिः?
उत्तरम्—प्रथमा।

13. **प्रश्नः**—वचनमात्रे का विभक्तिः?
उत्तरम्—प्रथमा।

14. **प्रश्नः**—कर्मपदं कर्मवाच्ये कस्यां विभक्तौ भवति?
उत्तरम्— प्रथमा।

15. **प्रश्नः**—कर्तृवाच्यस्य कर्ताकारके का विभक्तिः?
उत्तरम्—प्रथमाविभक्तिः।

16. **प्रश्नः**—कर्ताकारकविधायकं सूत्रं किम्?
उत्तरम्—स्वतन्त्रः कर्ता।

17. **प्रश्नः**— कर्मवाच्यस्य कर्मकारके का विभक्तिः?
उत्तरम्—प्रथमाविभक्तिः।

18. **प्रश्नः**—"कर्ता" इत्यस्य कियन्तो भेदाः, के च ते?
उत्तरम्— (5) पञ्च, 1. स्वतन्त्रकर्ता, 2. हेतुकर्ता, 3. कर्म-कर्ता, 4. अभिहितकर्ता, 5. अनभिहितकर्ता।

19. **प्रश्नः**—उपपदविभक्तेः का विभक्तिः बलीयसी?
उत्तरम्— कारकविभक्तिः।

20. **प्रश्नः**—विभक्तयोः द्वे प्रकारे के स्तः?
उत्तरम्— 1. कारकविभक्तिः, 2. उपपदविभक्तिः।

21. **प्रश्नः**—कारकविभक्तिः का कथ्यते?
उत्तरम्—क्रियया सह संज्ञा-सर्वनामयोः प्रत्यक्षसम्बन्धः स्थापयति।

22. **प्रश्नः**—अव्ययशब्दस्य योगेन का विभक्तिः भवति?
उत्तरम्— उपपदविभक्तिः।

23. **प्रश्नः**—द्वितीयाविभक्तेः कारकं किम्?
उत्तरम्— कर्मकारकम्।

24. **प्रश्नः**— कर्मकारक-विधायकं सूत्रं किम्?
उत्तरम्— कर्तुरीप्सिततमं कर्म।

25. **प्रश्नः**— कर्तुरीप्सिततमं कारकं किं भवति?
उत्तरम्— कर्मसंज्ञम्।

26. **प्रश्नः**—'हरिं भजति' इत्यस्मिन् 'हरिम्' इति पदस्य का संज्ञा?
उत्तरम्—कर्मसंज्ञा।

27. **प्रश्नः**—अनुक्ते कर्मणि का विभक्तिः?
उत्तरम्—द्वितीया।

28. **प्रश्नः**—कर्मकारके केन सूत्रेण द्वितीयाविभक्तिः युज्यते?
उत्तरम्—कर्मणि द्वितीया।

29. **प्रश्नः**—'अकथितञ्च' सूत्रमिदं किं करोति?
उत्तरम्—कर्मसंज्ञा।

30. **प्रश्नः**—'अकथितञ्च' कीदृशं सूत्रमस्ति?
उत्तरम्— संज्ञासूत्रम्।

31. **प्रश्नः**—'गां दोग्धि पयः' अत्र अकथितं किमस्ति?
उत्तरम्— गाम्।

32. **प्रश्नः**—बलिं याचते वसुधाम्' अत्र बलिपदस्य कर्मसंज्ञा केन सूत्रेण भवति?
उत्तरम्— अकथितञ्च।

33. **प्रश्नः**—'अधिशीङ्स्थाऽऽसां कर्म' सूत्रस्योदाहरणं किमस्ति?
उत्तरम्— हरिः वैकुण्ठम् अधिशेते।

34. **प्रश्नः**—'उपवसति वैकुण्ठं हरिः' अत्र केन सूत्रेण कर्मसंज्ञा?
उत्तरम्— उपान्वध्याङ्वसः।

35. **प्रश्नः**—कस्य योगे द्वितीया न भवति?
उत्तरम्— नमः।

36. **प्रश्नः**—'रमा मातरम् अभिद्रुह्यति स्म' अत्र का विभक्तिः?
उत्तरम्— द्वितीया।

27. **प्रश्नः**—लक्षणे द्योत्ये 'अनु' इत्यस्य का संज्ञा भवति?
उत्तरम्— उपसर्गसंज्ञा।

28. **प्रश्नः**—'कर्मप्रवचनीयाः' इति किं प्रोक्तवन्तः?
उत्तरम्— कर्म।

29. **प्रश्नः**— अनु हरिं सुराः अत्र 'अनु' इति किम्?
उत्तरम्— कर्मप्रवचनीयः।

30. **प्रश्नः**—'वृक्षं प्रति विद्योतते विद्युत्' अत्र कः कर्मप्रवचनीयः?
उत्तरम्— प्रति।

31. **प्रश्नः**—'अधिरीश्वरे' अनेन सूत्रेण किं भवति?
उत्तरम्— कर्मप्रवचनीयसंज्ञा।

32. **प्रश्नः**—अधि भुवि रामः अत्र 'अधि' कः वर्तते?
उत्तरम्— कर्मप्रवचनीयः।

33. **प्रश्नः**— कर्तृवाच्यस्य कर्मकारके का विभक्तिः?
उत्तरम्— द्वितीयाविभक्तिः।

34. **प्रश्नः**—अन्तराऽन्तरेण युक्ते इत्यनेन का विभक्तिः?
उत्तरम्— द्वितीयाविभक्तिः।

35. **प्रश्नः**—'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' तत्र का विभक्तिः?
उत्तरम्— द्वितीया।

36. **प्रश्नः**—'तथायुक्तं चानीप्सितम्' इति सूत्रस्योदाहरणं किम्?
उत्तरम्— ग्रामं गच्छन् तृणं स्पृशति।

37. **प्रश्नः**—'अन्तरा'शब्दस्य योगे का विभक्तिः?
उत्तरम्— द्वितीया।

38. **प्रश्नः**—'उपरि'शब्दस्य योगे का विभक्तिः?
उत्तरम्— द्वितीया।

39. **प्रश्नः**—द्वितीयाविभक्तिः किं द्योतयति?
उत्तरम्— कर्म।

40. **प्रश्नः**—ग्रामं गच्छन् तृणं स्पृशति' इति वाक्ये तृणशब्दे का विभक्तिः वर्तते?
उत्तरम्— द्वितीया।

41. **प्रश्नः**—'प्रति' प्रवचनीययोगे का विभक्तिः?
उत्तरम्— द्वितीया।

42. **प्रश्नः**—कर्म कतिविधम्, किञ्च तत्?
उत्तरम्—(7) सप्तविधम्, 1. ईप्सितं कर्म, 2. अनीप्सितं कर्म, 3. ईप्सिताऽनीप्सितं कर्म, 4. अकथितं कर्म, 5. अनभिहितं कर्म, 6. कर्तृकर्म, 7. अभिहितं कर्म।

43. **प्रश्नः**— 'अभितः'/'सर्वतः' इत्यस्य योगे का विभक्तिः भवति?
उत्तरम्—द्वितीया-विभक्तिः।

44. **प्रश्नः**—'कर्ता' इत्यस्य इष्टतमं कारकः कः भवति?
उत्तरम्— कर्म-कारकः।

45. **प्रश्नः**— 'सर्वतः' इति पदस्य योगे का विभक्तिः?
उत्तरम्— द्वितीयाविभक्तिः।

46. **प्रश्नः**—तृतीयाविभक्तेः कारकं किम्?
उत्तरम्—करणकारकम्।

47. **प्रश्नः**—करणकारक-संज्ञा-विधायकं सूत्रं किम्?
उत्तरम्— साधकतमं करणम्।

48. **प्रश्नः**—करणकारके तृतीयाविभक्ति-विधायकं सूत्रं किम्?
उत्तरम्— कर्तृकरणयोस्तृतीया।

49. **प्रश्नः**—'सहयुक्तेऽप्रधाने' अनेन किम् विधीयते?
उत्तरम्— तृतीयाविभक्तिः।

50. **प्रश्नः**—जटाभिस्तापसः अत्र केन सूत्रेण तृतीया?
उत्तरम्— इत्थंभूतलक्षणे।

51. **प्रश्नः**—'हेतौ' अनेन सूत्रेण भवति?
उत्तरम्— तृतीया।

52. **प्रश्नः**—'रामः सीतालक्ष्मणाभ्यां सह वनमगच्छत्' वाक्येऽस्मिन् 'सीतालक्ष्मणाभ्यां सह' इत्यस्य कारकं किम्?
उत्तरम्— करणकारकम्।

53. **प्रश्नः**—कर्मवाच्यस्य कर्ताकारके का विभक्तिः?
उत्तरम्— तृतीयाविभक्तिः।

54. **प्रश्नः**—भाववाच्यस्य कर्ताकारके का विभक्तिः?
उत्तरम्— तृतीयाविभक्तिः।

55. **प्रश्नः**—कर्ता कर्मवाच्ये कस्यां विभक्तौ भवति?
उत्तरम्— तृतीया।

56. **प्रश्नः**—'रामेण बाणेन हतो बाली' इत्यस्मिन् वाक्ये करणकारकं किमस्ति?
उत्तरम्— रामः।

57. **प्रश्नः**—'विना' इति अव्ययस्य योगे काः विभक्तयः भवन्ति?
उत्तरम्— द्वितीया, तृतीया, पञ्चमी च।

58. **प्रश्नः**—'बहूनि काव्यानि पठितानि हरिणा' अत्र कर्तृपदे का विभक्तिरस्ति?
उत्तरम्— तृतीया।

59. **प्रश्नः**—'नाना' इति शब्दस्य योगे का विभक्तिः भवति?
उत्तरम्— तृतीया।

60. **प्रश्नः**—'पादेन खञ्जः' इति वाक्ये तृतीयाविभक्तेः कारणं किम्?
उत्तरम्— अङ्गविकारः।

61. **प्रश्नः**—करणं कतिविधम्, तच्च किम्?
उत्तरम्— (2) द्विविधम्, 1. बाह्यम्, 2. आभ्यन्तरञ्चेति।

62. **प्रश्नः**—क्रिया-सिद्धेः प्रकृष्ट-उपकारकः कः कारकः?
उत्तरम्— करण-कारकः।

63. **प्रश्नः**—'इत्थंभूतलक्षणे' इत्यनेन सम्बद्धा का विभक्तिः?
उत्तरम्— तृतीया-विभक्तिः।

64. **प्रश्नः**— चतुर्थीविभक्तेः कारकं किम्?
उत्तरम्—सम्प्रदानम्।

65. **प्रश्नः**—'विप्राय गां ददाति' अत्र विप्राय पदस्य का संज्ञा?
उत्तरम्— सम्प्रदानसंज्ञा।

66. **प्रश्नः**—'विप्राय गां ददाति' इत्यस्मिन् वाक्ये कर्मसंज्ञकं किमस्ति?
उत्तरम्— 'गो'।

67. **प्रश्नः**— चतुर्थीविभक्तिविधायकं सूत्रं किमस्ति?
उत्तरम्— चतुर्थी सम्प्रदाने।

68. **प्रश्नः**—'हरये रोचते भक्तिः' अत्र प्रीयमाणः कः?
उत्तरम्— हरिः।

69. **प्रश्नः**—'पुष्पेभ्यः स्पृहयति' अत्र केन सूत्रेण चतुर्थीविभक्तिः?
उत्तरम्— स्पृहेरीप्सितः।

70. **प्रश्नः**—क्रियया यमभिप्रैति तत् किम्?
उत्तरम्— सम्प्रदानम्।

71. **प्रश्नः**—कर्मादीनामपि सम्बन्धमात्रविवक्षायां का विभक्तिः?
उत्तरम्— षष्ठी।

72. **प्रश्नः**—'पयोमुचे' इत्यत्र का विभक्तिः अस्ति?
उत्तरम्— चतुर्थी।

73. **प्रश्नः**—क्रोधद्रोहासूयादीनामर्थयुक्तानां धातूनां योगे विभक्तिः स्यात्?
उत्तरम्— चतुर्थी।

74. **प्रश्नः**— सम्प्रदाने का विभक्तिः?
उत्तरम्— चतुर्थी।

75. **प्रश्नः**—'यूपाय दारू' इत्यत्र चतुर्थ्याः कारणं किम्?
उत्तरम्— तादर्थ्यम्।

76. **प्रश्नः**—द्रुहधातुयोगे यं प्रति द्रोहः तस्मिन् विभक्तिर्भवति?
उत्तरम्— चतुर्थी।

77. **प्रश्नः**—'वषट्' इति शब्दप्रयोगे का विभक्तिः भवति?
उत्तरम्— चतुर्थी।

78. **प्रश्नः**—'पर्याप्त्यर्थक' अलं शब्दस्य योगे का विभक्तिर्भवति?
उत्तरम्— चतुर्थी।

79. **प्रश्नः**—'नमो भगवते वासुदेवाय' इत्यत्र किमर्थं चतुर्थी विभक्तिः?
उत्तरम्— नमस्शब्दयोगेन।

80. **प्रश्नः**—सम्प्रदानं कतिविधम्, किञ्च तत्?
उत्तरम्— (3) त्रिविधम्, 1. प्रेरकम्, 2. आनुमन्त्रिकम्, 3. अनिराकर्तृकञ्चेति।

81. **प्रश्नः**— सम्प्रदानसंज्ञा-विधायकं सूत्रं किमस्ति?
उत्तरम्— कर्मणा यमभिप्रैति स सम्प्रदानम्।

82. **प्रश्नः**— अपादानसंज्ञा-विधायकं सूत्रं किमस्ति?
उत्तरम्— ध्रुवमपायेऽपादानम्।

83. **प्रश्नः**—पञ्चमीविभक्तेः कारकं किम्?
उत्तरम्— अपादानकारकम्।

84. **प्रश्नः**—अपादाने का विभक्तिः भवति?
उत्तरम्— पञ्चमीविभक्तिः।

85. **प्रश्नः**—'भीत्रार्थानां भयहेतुः' अनेन सूत्रेण किम् भवति?
उत्तरम्— अपादानसंज्ञा।

86. **प्रश्नः**—'आख्यातोपयोगे' इति सूत्रेण किं भवति?
उत्तरम्— अपादानसंज्ञा।

87. **प्रश्नः**—'मुच्' धातुयोगे का विभक्तिः भवति?
उत्तरम्— पञ्चमी।

88. **प्रश्नः**—जुगुप्साविरामादीनामर्थे विभक्तिः भवति?
उत्तरम्— पञ्चमी।

89. **प्रश्नः**—अपायर्थे ध्रुवस्य का संज्ञा भवति?
उत्तरम्— अपादानसंज्ञा।

90. **प्रश्नः**—गङ्गा कुत्र निस्सरति?
उत्तरम्— हिमालयात्।

91. **प्रश्नः**—अपादानं कतिविधम्, तच्च किम्?
उत्तरम्— (2) द्विविधम्, 1. चलम्, 2. अचलञ्चेति।

92. **प्रश्नः**—प्रमादार्थकधातोः योगे का विभक्तिर्भवति?
उत्तरम्— पञ्चमी।

93. **प्रश्नः**—'बहिः' इत्यस्य योगे का विभक्तिः प्रयुज्यते?
उत्तरम्— पञ्चमी।

94. **प्रश्नः**—'ग्रामाद्याति' इत्यत्र 'ग्रामात्' इति पदस्य का संज्ञा?
उत्तरम्— अपादानसंज्ञा।

95. **प्रश्नः**—षष्ठीविधायकं सूत्रं किमस्ति?
उत्तरम्— शेषे षष्ठी।

96. **प्रश्नः**—षष्ठीविभक्तेः कारकं किम्?
उत्तरम्— कारकाभावः, सम्बन्धः।

97. **प्रश्नः**—हेतु शब्दस्य प्रयोगे का विभक्तिः?
उत्तरम्— षष्ठीविभक्तिः।

98. **प्रश्नः**—कृद्योगे कर्तरि कर्मणि च प्रयोगे का विभक्तिः?
उत्तरम्— षष्ठीविभक्तिः।

99. **प्रश्नः**—'जगतः कर्ता कृष्णः' इत्यत्र 'जगत्' शब्दे षष्ठीविधायकं सूत्रं किमस्ति?
उत्तरम्— कर्तृकर्मणोः कृतिः।

100. **प्रश्नः**—'क्तस्य च वर्तमाने' अनेन सूत्रेण किं भवति?
उत्तरम्— षष्ठीविभक्तिः।

101. **प्रश्नः**—'आशिषि नाथः' इति सूत्रेण का विभक्तिः भवति?
उत्तरम्— षष्ठी।

102. **प्रश्नः**—अधिकरणसंज्ञाविधायकं सूत्रं किमस्ति?
उत्तरम्—आधारोऽधिकरणम्।

103. **प्रश्नः**—सप्तमीविभक्तेः कारकं किम्?
उत्तरम्— अधिकरणकारकम्।

104. **प्रश्नः**—'गोषु दुह्यमानासु गतः' अत्र का विभक्तिः वर्तते?
उत्तरम्— सतिसप्तमी।

105. **प्रश्नः**—प्रशंसार्थकयोः साधुनिपुणयोः योगे किं भवति?
उत्तरम्— सप्तमी।

106. **प्रश्नः**—'साध्वसाधुप्रयोगे' इत्यनेन का विभक्तिः उक्ता?
उत्तरम्— सप्तमी।

107. **प्रश्नः**—उदिते (सूर्ये) कमलं विकसति सूर्यपदे का विभक्तिः भवेत्?
उत्तरम्— सप्तमी।

108. **प्रश्नः**—'चर्मणि द्वीपिनं हन्ति' इत्यत्र 'चर्मणि' पदे सप्तमीविधायकं सूत्रं किमस्ति?
उत्तरम्— निमित्तात् कर्मयोगे।

109. **प्रश्नः**—'दरिद्रः उपवसति' इति वाक्ये किं पदं प्रयोक्तुं शक्यते?
उत्तरम्—गृहे।

110. **प्रश्नः**—'याने चलति तेन प्रस्थितम्' इत्यत्र चलति इति?
उत्तरम्—सप्तमीविभक्त्यन्तम्।

111. **प्रश्नः**—अधिकरणं कतिविधम्, किञ्च तत्?
उत्तरम्— (4) चतुर्विधम्, 1. अभिव्यापकम्, 2. औपश्लेषिकम्, 3. वैषयिकम्, 4. सामीप्यञ्चेति।

112. **प्रश्नः**—'आधारोऽधिकरणम्' अनेन सूत्रेण किं विधीयते?
उत्तरम्— अधिकरणसंज्ञा।

113. **प्रश्नः**—'रामं विना, रामेण विना, रामाद्विना' इत्यत्र कः प्रयोगः शुद्धः?
उत्तरम्— सर्वे प्रयोगाः शुद्धाः।

114. **प्रश्नः**—आधारः कतिविधः?
उत्तरम्— त्रिविधः।

115. **प्रश्नः**—'कटे आस्ते' अत्र कः आधारः?
उत्तरम्— औपश्लेषिकः।

(O-Code-25x73) (ग) सिद्धान्तकौमुदी-(17) स्त्रीप्रत्ययाः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

स्त्रीप्रत्ययविवेचनम्–स्त्रीत्वविवक्षायां प्रत्ययानां योजनं द्विप्रकारेण मन्यते। 1. मूलस्त्रीलिङ्गशब्दाः, 2. स्त्रीप्रत्ययान्तशब्दाः।

1. मूलस्त्रीलिङ्गशब्दाः यथा–रमा, लता, माला, मति, कृति, धेनु, वधु, नी, मातृ, स्वसृ, आपद्, शरत्, प्रतिपद, उषस्, आशिष्, कुंकुम, वाच, गिर, दिश आदि।

2. स्त्रीप्रत्ययान्तशब्दाः:-यद्यपि स्त्रीप्रत्ययाः:–टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन् इति षड्; मुख्यतः स्त्रीप्रत्ययाः त्रयः सन्ति। यथा– 1. टाप् (आ) 2. ङीप् (ई) 3. ङीष् (ई)।

1. टाप् (आ) चाप् (आ) 'अजाद्यतष्टाप्' इति सूत्रेण अजादिगणपठितानां शब्दानां तथा अकारान्तशब्दानां स्त्रीत्वविवक्षायां टाप् प्रत्ययो भवति।

1. अज्+टाप् (आ) =अजा।	2. एक+टाप् (आ) =एका।
3. श्वेत+टाप् (आ) =श्वेता।	4. वत्स+टाप् (आ) =वत्सा।
5. मूषक+टाप् (आ) =मूसिका।	6. पाचक+टाप् (आ) =पाचिका।
7. निपुण+टाप् (आ) =निपुणा।	8. वैश्य+टाप् (आ) =वैश्या।
9. चटक+टाप् (आ) =चटिका।	10. शूद्र+टाप् (आ) =शूद्रा।
11. चतुर+टाप् (आ) =चतुरा।	12. कोकिल+टाप् (आ)=कोकिला।
13. सूर्य+चाप् (आ) =सूर्या।	

2. (क) ङीप् (ई) "ऋन्नेभ्यो ङीप्" ऋकारान्तात् तथा नकारान्तात् पुंलिङ्गशब्दात् स्त्रीत्वे ङीप् प्रत्ययो भवति।

ऋकारान्ताः शब्दाः	नकारान्ताः शब्दाः
1. गन्तृ+ङीप् (ई) =गन्त्री।	1. मायाविन्+ङीप् (ई)=मायाविनी।
2. कर्तृ+ङीप् (ई) =कर्त्री।	2. मालिन्+ङीप् (ई)=मालिनी।
3. हन्तृ+ङीप् (ई) =हन्त्री।	3. तेजस्विन्+ङीप् (ई)=तेजस्विनी।
4. शिक्षयितृ+ङीप् (ई) =शिक्षयित्री।	4. गुणिन्+ङीप् (ई)=गुणिनी।
5. दातृ+ङीप् (ई) =दात्री।	5. दण्डिन्+ङीप् (ई)=दण्डिनी।
6. जनयितृ+ङीप् (ई) =जनयित्री।	6. मनोहारिन्+ङीप् (ई) =मनोहारिणी।
7. धातृ+ङीप् (ई) =धात्री।	7. यशस्विन्+ङीप् (ई) =यशस्विनी।
8. भोक्तृ+ङीप् (ई) =भोक्त्री।	8. मानिन्+ङीप् (ई) =मानिनी।
9. प्रसवितृ+ङीप् (ई) =प्रसवित्री।	9. मनस्विन्+ङीप् (ई) =मनस्विनी।

(ख) "टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः" इति सूत्रेण टकारान्तात्, ठक्, अण्, अञ्, द्वयसच्, मात्रच्, तयप्, ठक्, ठञ्, कञ् तथा क्वरप् प्रत्ययान्तेभ्यः शब्देभ्यो ङीप् प्रत्ययो भवति।

1. नदट्+ङीप् (ई) =नदी।	2. चोरट्+ङीप् (ई) =चोरी।
3. देवट् +ङीप् (ई) =देवी।	4. सुपर्ण+ङीप् (ई) =सौपर्णेयी।

(ग) "वयसी प्रथमे" अनेन सूत्रेण वयसवाचिशब्देभ्यो स्त्रीत्वे ङीप् प्रत्ययो भवति।

1. कुमार्+ङीप् (ई) =कुमारी।	2. किशोर्+ङीप् (ई) =किशोरी।
3. वधूट्+ङीप् (ई) =वधूटी।	4. नर्+ङीप् (ई) =नारी।

3. ङीष् (ई) (क) 'षिद्गौरादिभ्यश्च' इति सूत्रेण 'ष'कार इत् प्रत्ययानां शब्दानां तथा गौरादिगणे पठितानां शब्दानां स्त्रीत्वे ङीष् प्रत्ययो भवति।

1. नर्तक+ङीष् (ई) =नर्तकी।	2. गौर+ङीष् (ई) =गौरी।
3. रजक+ङीष् (ई) =रजकी।	4. सुन्दर+ङीष् (ई) =सुन्दरी।

(ख) 'पुंयोगादाख्यायाम्' इति सूत्रेण पुंलिङ्गशब्दाः, ये पुरुषद्योतकशब्दाः तेषां स्त्रीत्वे ङीष् प्रत्ययो भवति।

1. गोप+ङीष् (ई) =गोपी।	2. शूद्र+ङीष् (ई) =शूद्री।

(ग) जातिवाचकपुंलिङ्गशब्दानां स्त्रीत्वे ङीष् प्रत्ययो भवति।

1. ब्राह्मण+ङीष् (ई) =ब्राह्मणी।	2. मानुष+ङीष् (ई) =मानुषी।
3. सिंह+ङीष् (ई) =सिंही।	4. व्याघ्रः+ङीष् (ई) =व्याघ्री।

(घ) 'वोतो गुणवचनात्' इति सूत्रेण उकारान्तगुणवाची शब्दानां स्त्रीत्वविवक्षायां ङीष् प्रत्ययो भवति।

1. मृदु+ङीष् (ई) =मृद्वी, मृदुः।	2. पटु+ङीष् (ई) =पट्वी, पटुः।
3. साधु+ङीष् (ई) =साध्वी, साधुः।	4. गुरु+ङीष् (ई) =गुर्वी गुरुः।
5. बहु+ङीष् (ई) =बह्वी बहुः।	6. रात्रि+ङीष् (ई) =रात्री रात्रिः।

स्त्रीप्रत्ययविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—स्त्रीत्वविवक्षायां प्रत्ययानां योजनं केन द्विप्रकारेण मन्यते?
उत्तरम्—1. मूलस्त्रीलिङ्गशब्दाः, 2. स्त्रीप्रत्ययान्त-शब्दाः। .

2. **प्रश्नः**—मूलस्त्रीलिङ्गशब्दाः के भवन्ति?
उत्तरम्—रमा, लता, माला, मति, कृति, धेनु, वधू, नी, मातृ, स्वसृ, आपद्, शरत्, प्रतिपद, उवस्, आशिष्, कुंकुम, वाच, गिर, दिश आदि।

3. **प्रश्नः**—स्त्रीप्रत्ययान्तशब्दाः के भवन्ति?
उत्तरम्—स्त्रीप्रत्ययाः–टाप्, डाप्, चाप्, –ङीप्, ङीष्, ङीन् इति षट्। मुख्यतः स्त्रीप्रत्ययाः त्रयः सन्ति–1. टाप् (आ) 2. ङीप् (ई) 3. ङीष् (ई)।

4. **प्रश्नः**— 'अजा' इति पदे कः प्रत्ययः?
उत्तरम्— टाप्।

5. **प्रश्नः**—'पचन्ती" लावणिकि' इत्यत्र कः प्रत्ययः?
उत्तरम्— ङीप्।

6. **प्रश्नः**—'मातामहस्य+स्त्री=मातामही' अत्र कः स्त्रीप्रत्ययः?
उत्तरम्— ङीष्।

7. **प्रश्नः**—'विद्वस्' इत्यस्य स्त्रीलिङ्गवाचकं रूपं किम्?
उत्तरम्— विदुषी।

8. **प्रश्नः**—'वोतो गुणवचनात्' सूत्रे 'ङीष्' इत्यस्यानुवर्तनं केन सूत्रेण भवति?
उत्तरम्— अन्यतो ङीष्।

9. **प्रश्नः**—'सूर्या' अत्र कः प्रत्ययः?
उत्तरम्— चाप्।

10. **प्रश्नः**—'अजाद्यतष्टाप्–' इदं सूत्रं अष्टाध्यायी इत्यस्य कस्मिन् अध्याये विद्यते?
उत्तरम्— चतुर्थाध्याये।

11. **प्रश्नः**—'अजाद्यतष्टाप्–' कीदृशमिदं सूत्रम्?
उत्तरम्— विधिसूत्रम्।

12. **प्रश्नः**—प्रथमवयोवाचक-अकारान्त-शब्देन स्त्रीत्वे कः प्रत्ययः भवति?
उत्तरम्— ङीप्-प्रत्ययः।

13. **प्रश्नः**—'द्विगोः' सूत्रेण कस्य प्रत्ययस्य विधानं भवति?
उत्तरम्— ङीप्-प्रत्ययस्य।

14. **प्रश्नः**—'अष्टाध्यायी' शब्दे केन सूत्रेण 'ङीप्' भवति?
उत्तरम्— द्विगोः इति सूत्रेण।

15: **प्रश्नः**—'भवती' इति पदे कः स्त्रीप्रत्ययः?
उत्तरम्— ङीप्।

16. **प्रश्नः**—'उरुमात्री' इत्यत्र कः प्रत्ययः?
उत्तरम्— ङीप्।

17. **प्रश्नः**—'कुमारी' इत्यत्र केन सूत्रेण ङीप् प्रत्ययः भवति?
उत्तरम्— वयसि प्रथमे।

18. **प्रश्नः**—'युवन्' शब्दस्य स्त्रीप्रत्ययः 'ति' रूपं किम्?
उत्तरम्— युवतिः।

19. **प्रश्नः**—युवतिः अत्र केन सूत्रेण 'ति' प्रत्ययो भवति?
उत्तरम्— 'यूनस्तिः' इति सूत्रेण।

20. **प्रश्नः**—'भगवती' शब्दस्य प्रकृति-प्रत्ययः कः?
उत्तरम्— भग+मतुप्+ङीप्।

21. **प्रश्नः**—'अनीता' शब्दस्य प्रकृति-प्रत्ययः कः?
उत्तरम्— आ+नय+टाप्।

22. **प्रश्नः**—'प्रमत्तः' इत्यस्य शब्दार्थः कः?
उत्तरम्— सावधानः।

23. **प्रश्नः**—'देवता' शब्दस्य किं लिङ्गम्?
उत्तरम्— स्त्रीलिङ्गम्।

24. **प्रश्नः**—'उगितश्च' सूत्रेण कस्य प्रत्ययस्य विधानं भवति?
उत्तरम्— ङीप्।

25. **प्रश्नः**—'कुरुचरी' अत्र केन सूत्रेण स्त्रीप्रत्ययः ङीप् भवति?
उत्तरम्—टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठ-ञ्कञ्क्वरपः।

26. **प्रश्नः**— 'तयप्' प्रत्ययान्त-प्रातिपदिकेन स्त्रीत्वे कः प्रत्ययः भवति?
उत्तरम्— ङीप्-प्रत्ययः।

27. **प्रश्नः**—'वोतो गुणवचनात्' सूत्रेण कस्य स्त्रीप्रत्ययस्य विधानं भवति?
उत्तरम्— ङीष्-प्रत्ययस्य।

28. **प्रश्नः**—उकारान्त-गुणवाचकशब्देन स्त्रीत्वे कः प्रत्ययः आगच्छति?
उत्तरम्— ङीष्-प्रत्ययः।

29. **प्रश्नः**—'पुंयोगादाख्यायाम्' सूत्रेण कस्य प्रत्ययस्य विधानं भवति?
उत्तरम्— ङीष्-प्रत्ययस्य।

30. **प्रश्नः**—'युवतिः' इत्यत्र स्त्री-प्रत्ययः कोऽस्ति?
उत्तरम्— ति।

31. **प्रश्नः**—'गोपी' अत्र कः स्त्रीप्रत्ययः अस्ति?
उत्तरम्— ङीष्-प्रत्ययः।

32. **प्रश्नः**—'इन्द्राणी' अत्र कस्यागमः भवति?
उत्तरम्— आनुक्।

33. **प्रश्नः**—'हिमानी' इति शब्दस्य कोऽर्थः?
उत्तरम्— महद् हिमम्।

34. **प्रश्नः**—'आचार्यानी' अत्र केन सूत्रेण स्त्रीप्रत्ययः भवति?
उत्तरम्—'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवन-मातुलाचार्याणामानुक्' इति सूत्रेण।

35. **प्रश्नः**—'क्रीतात् करणपूर्वात्' इत्यनेन कस्य स्त्रीप्रत्ययस्य विधानं भवति?
उत्तरम्— ङीष्-प्रत्ययस्य।

36. **प्रश्नः**—'वस्त्रक्रीती' अत्र केन सूत्रेण ङीष् भवति?
उत्तरम्— 'क्रीतात् करणपूर्वात्' सूत्रेण।

37. **प्रश्नः**—'तटी' अत्र केन सूत्रेण स्त्रीप्रत्ययः ङीष् विधीयते?
उत्तरम्— जातिरस्त्रीविषयादयोपधात् इति सूत्रेण।

38. प्रश्नः—'ऊङुतः' सूत्रेण कस्य प्रत्ययस्य विधानं भवति?
उत्तरम्— ऊङ्-प्रत्ययस्य।

39. प्रश्नः—'कुरुः' अत्र कः स्त्रीप्रत्ययः अस्ति?
उत्तरम्— ऊङ्-प्रत्ययः।

40. प्रश्नः—'पङ्ग्वोश्च' सूत्रेण कस्य स्त्रीप्रत्ययस्य विधानं भवति?
उत्तरम्— ऊङ्-प्रत्ययस्य।

41. प्रश्नः—'पङ्गुः' 'वामोरूः' इत्यत्र कः स्त्रीप्रत्ययः भवति?
उत्तरम्— ऊङ्-प्रत्ययः।

42. प्रश्नः—'करभोरुः' अत्र केन सूत्रेण स्त्रीप्रत्ययः ऊङ् विधीयते?
उत्तरम्— 'ऊरूत्तरपदादौपम्ये'।

43. प्रश्नः—देवट्+ङीप्= इति किं रूपम्?
उत्तरम्—देवी।

44. प्रश्नः—सूर्य+ङीष्=इति किं रूपम्?
उत्तरम्— सूरी।

45. प्रश्नः—'शूद्री' इत्यत्र कः स्त्रीप्रत्ययः?
उत्तरम्— ङीष् प्रत्ययः।

46. प्रश्नः—'कारु' इत्यत्र कः प्रत्ययः?
उत्तरम्— उण् प्रत्ययः।

47. प्रश्नः—मूषिका इति शब्दे स्त्रीप्रत्ययः कः?
उत्तरम्— टाप् प्रत्ययः।

48. प्रश्नः—'युवन्+ति=युवतिः' अत्र नकारस्य लोपः केन सूत्रेण भवति?
उत्तरम्— 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रेण।

49. प्रश्नः—'संहितशफलक्षणवामादेश्च' इदं सूत्रं अष्टाध्याय्याः कस्मिन् अध्याये विद्यते?
उत्तरम्— चतुर्थेऽध्याये।

50. प्रश्नः—'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इति सूत्रेण कस्य स्त्रीप्रत्ययस्य विधानं भवति?
उत्तरम्— ङीष्।

51. प्रश्नः—'अतिकेशी, चन्द्रमुखी' अत्र कः स्त्रीप्रत्ययः भवति?
उत्तरम्— ङीष्।

52. प्रश्नः—'बह्वी' अत्र केन सूत्रेण कः स्त्रीप्रत्ययः भवति?
उत्तरम्— 'बह्वादिभ्यश्च' सूत्रेण ङीष् प्रत्ययो भवति।

53. प्रश्नः—'शकटी, रात्री' अत्र कः स्त्रीप्रत्ययः?
उत्तरम्— ङीष्।

54. प्रश्नः—'रात्री' 'पद्धती' अत्र वैकल्पिक-स्त्रीत्वबोधकं रूपं किम्?
उत्तरम्— 'रात्रिः, पद्धतिः' रूपम्।

55. प्रश्नः—'शार्ङ्गरव'अत्र 'शार्ङ्गरवाद्यञो ङीन्' इति सूत्रेण ङीन् स्त्रीप्रत्ययविहिते सति स्त्रीवाचकं रूपं किम्?
उत्तरम्— 'शार्ङ्गरवी'।

56. प्रश्नः— 'गार्ग्यायणी' इत्यत्र स्त्रीप्रत्ययः कः?
उत्तरम्— ङीष्।

57. प्रश्नः—'साध्वी' अत्र केन सूत्रेण 'ङीष्' अभूत्?
उत्तरम्— वोतो गुणवचनात्।

58. प्रश्नः—'वोतो गुणवचनात्' सूत्रे 'वोतः' अत्र का विभक्तिः?
उत्तरम्— पञ्चमी-विभक्तिः।

59. प्रश्नः—नारी इत्यत्र कः प्रत्ययः?
उत्तरम्— ङीप्।

60. प्रश्नः—'युवतिः' इत्यत्र कः प्रत्ययः?
उत्तरम्— ङीन् प्रत्ययः।

61. प्रश्नः—'गौरी' इत्यत्र कः स्त्रीप्रत्ययः?
उत्तरम्— ङीष्।

62. प्रश्नः—'सूकरी' अत्र केन सूत्रेण 'ङीष्' अभूत्?
उत्तरम्— जातेरस्त्रीविषयादयोपधात्।

(ग) (O-Code-25x73) सिद्धान्तकौमुदी-(18) तद्धितप्रत्ययाः (मत्वर्थीय) एवं तद्धितप्रत्ययविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

तद्धितप्रत्ययाः—"तेभ्यः अर्थेभ्यः हिता उपयोगिनः प्रत्ययाः तद्धिताः"। "ये प्रत्ययाः संज्ञा, सर्वनाम, विशेषण, अव्ययादिशब्दानां परे तिष्ठन्ति एवं च भिन्नार्थबोधकाः भवन्ति ते तद्धिताः।

(क) तद्धिते साधारणप्रत्ययाः

1. **संज्ञा**-पृथिवी इति संज्ञाशब्दे 'अण् या अम् (अ)' पार्थिवः, (पृथिव्यां भवः जातः विकारः ईश्वरः अयं पार्थिवः।) शिव+अण्=शैवः।

2. **सर्वनाम**-1. मम अयम्=मदीयः, (अस्मद्+छ+ईय) 2. मम अयम्=मामकः (अस्मद्+अण्) 3. मम अयम् मामकीनः (अस्मद्+खञ्+ईन्) मम सम्बन्धिनः।

3. **विशेषण**-अनयोः अयम् अतिशयेन प्रियः =प्रिय+तरप् (तर) प्रियतरः।2. प्रिय+इयसुन् (ईयस्) प्रेयान्।

4. **अव्ययम्**-1. श्वः भवः श्वस्+त्य (त्यप्) =श्वस्त्यः, 2. श्वस्+तन (ट्यु, तुट्) =श्वस्तनः, 3. श्वस्+तिक् (ठय्, तुट्) =शौवस्तिकः।

(ख) अपत्याधिकारप्रत्ययाः—तस्यापत्यम् (अपत्यार्थे प्रयुक्तप्रत्ययः) (अण्, इञ्, ठक्, ण्य, यञ्, ष्यन्, फक्)

1. अण् (अ) पुत्रस्यापत्यम्=पौत्रः।	रघो अपत्यम्=राघवः।	दुहितुः अपत्यम्=दौहित्रः।
2. इक् (इ) दशरथस्यापत्यम्=दाशरथिः।	दक्षस्यापत्यम्=दाक्षिः।	
3. ठक् (एय) गंगायाः अपत्यम्=गांगेयः।	राधायाः अपत्यम्=राधेयः।	कुन्त्याः अपत्यम्=कौन्तेयः।
4. ण्य, यञ् ष्यन् (य) दितेः अपत्यम्=दैत्यः।	गर्गस्यापत्यम्=गार्ग्यः।	चितेः अपत्यम्=चैत्यः।
5. फक् (आयन्) नडस्यापत्यम्=नाडायनः।	गर्गस्यापत्यम्=गार्ग्यायणः।	

अपत्याधिकारप्रत्ययाः—(1. नञ्, 2. लुकि, 3. इञ्, 4. अञ्, 5. यञ्, 6. फञ्, 7. अण्, 8. एयादेश, 9. ढक्, 10. छ, 11. ण्य,)

(ग) रक्ताद्यर्थकप्रत्ययाः— (1. अण्, अणि, 2. ठकि, 3. अन्, 4. कन्, 5. 'छ', 6. त्यणि, 7. यत्, 8. अनङ्, 9. व्यन्, डुलच्, डामहच्, 11. अञि, 12. वुञ्, 13. णसि, 14. यञि, 15. मुमागमे, 16. इञ्,)

(घ) चातुरर्थिकप्रत्ययाः— (1. अणादि, 2. अञ्, 3. वुञि, 4. मतुपि, 5. ड्वलचि, 6. छ,)

(ङ) शैषिकप्रत्ययाः— (1. अणि, अण्, 2. घ, ख, 3. य, खञ्, 4. ढकञ्, 5. ढक्, 6. त्यक्, 7. यत्, 8. वुक्, 9. त्यप्, 10. अञ्, ञ, 11. छ (इञ्) 12. ठञ्-ञिठौ, 13. वुञ्, वुन्, 14. कन्, 15. तवक, ममक, 16. त्व, म, 17. एण्य, 18. ट्यु, ट्युल्, 19. त्ल', 20. इम 21. ज्य, 22. यञ्, 23. मयट्, 24. ढक्, 25. छण्, 26. ढञ्, 27. यक्, 28. णिनि (इन्),)

(च) प्राग्दीव्यतीयप्रत्ययाः— (1. अण्, 2. अञ्, 3. मयट्, 4. कन्, 5. वुञ्, 6. ढञ्, 7. यत्,)

(छ) प्राग्वहतीय (ठगधिकार) प्रत्ययाः— (1. ठक्, 2. अण्, 3. ठन्, 4. ष्ठल्, 5. ष्ठन्, 6. ठञ्, 7. मप्, 8. इमप् (इम), 9. कक्, कन्, 10. इन्, 11. ष्ठच्, 12. ण्य, 13. ईक्, 14. टिठन्, 15. ष्ठल्)।

(ज) प्राग्घितीयप्रत्ययाः— (1. यत्, 2. ख, 3. अण्, 4. ठक्, 5. ण, 6. य, 7. खञ्, 8. ठञ्, 9. ढञ्,)

(ज) छयदधिकारकारप्रत्ययाः— (1. यत्, 2. छ, 3. थ्यन्, 4. ख, खे, 5. ण, 6. ढञ्, 7. खञ्, 8. ज्य, 9. अञ्,)

(झ) आर्हीयप्रत्ययाः— (ठक्-ठञ्-ठन्-कन्-ड्वुन्-टिठन्-अञ्-अण्-ख-ईकन्-यत्-छ-ष्ठन्-ति-शत्-शतिच्-तडति-डण्-घन्-घ-खञ्)

(ञ) ठञधिकारे कालाधिकारप्रत्ययाः— (1. ठञ्, 2. ष्कन्, 3. ण, 4. यत्, 5. खञ्, 6. यप्, 7. ण्यत्, 8. ठन्, 9. खः, 10. अण्,)

(ट) ठञधिकारप्रत्ययाः— (1. अण्, 2. ण, 3. यत्, 4. ठञ्, 5. उकञ्, 6. छ (ईय), 7. इकट्,)

(ठ) भावकर्मार्थकप्रत्ययाः— (1. वति, 2. त्व, 3. तल्, 4. नञ्, 5. ष्यञ्, 6. इमनिच्, 7. अण्, 8. यत्, 9. य, 10. ठक्, 11. यक्, 12. अञ्, 13. वुञ्, 14. छः,)

(ड) पाञ्चमिकप्रत्ययाः— (1. खञ्, 2. ढक्, 3. यत्, 4. ख, 5. छः, 6. कुणप्, 7. जाहच्, 8. चुञ्चुप्, 9. चणप्, 10. ना/नञ्, 11. शालच्, 12. शङ्कटच्, 13. कटच्, 14. गोष्ठच्, 15. गोष्ठच्, 16. पटच्, 17—षड्गवच्, 18. तैलच्, 19. शकट-शाकिन, 20. कुटीरच्, 21. इनच्, 22. पिटच्, 23. चिल्, 24. चुल्, 25. त्यकन्, 26. अठच्, 27. इतच्, 28. द्वयसच्, 29. दघ्नञ्, 30. मात्रच्, 31. अण्, 32. वतुप्, 33. डति, 34. अयच्, 35. तयप्) (35)

(ढ) मत्वर्थीयप्रत्ययाः— (1. ड, 2. मयट्, 3. डट्, 4. मट्, 5. तिथुक्, 6. इथुक्, 7. तीय, 8. तमट्, 9. छ-ईय, 10. अण्, 11. वुञ् 12. कन्, 13. ठक्-ठञ्, 14. अञ्, 15. इनि-इन्, 16. ठन्, 17. मतुप्, 18 लच्, 19. श, 20. न, 21. इलन्, 22. विनि इनि, 23. इलच्, 24. उरच्, 25. र, 26. व, 27. ईरन्, 28. ईरच्, 29. वलच्, 30. इनच्, 31. रक, 32. मिनि, 33. ईमस, 34. यप्, 35. आरक)

(ण) प्राग्दिशीयप्रत्ययाः— (1. तसिल्, 2. त्रल्, 3. दा, 4. र्हिल्, 5. ह्यस, 6. उत्, 7. आरि, 8. समस्, 9. एद्यवि, 10. द्य, 11. एद्युसुच्, 12. थाल्, 13. थम्,)

(प) प्रागिवीयप्रत्ययाः—(1. अस्, 2. अतसुच्, 3. अस्ताति, 4. रिष्ट, रिष्टातिल्, 5. आत्, 6. एनप्, 7. आच्, 8. आहि, 9. धा-, धमुञ्, 10. कन्, 11. आकिन्, 12. चरट्, 13. तमप्,14. तरप्। 15. ईयस्, 16. इष्ठन्, 17. ईयस्, ईयसुन्, 18. इमन्, 19. इमनिच्, 20. रूपप्, 21. कल्प, 22. देश्य, 23. देशीयर्, 24. जातीयर्, 25. क, 26. अक्, 27. अकच्, 28. ठच्, 29. (घ) इय, 30. इलच्, 31. अडच्, 32. वुच्, 33. घन्, 34. र, 35. तर, 36. डतमच्,)

(फ) स्वार्थिकप्रत्ययाः—(1. कन्, 2. ढञ्, 3. ढ (एय्), 4. य, 5. छ (ईय), 6. अण् (अ), 7. ठक् (इक्), 8. ठच् (इक) 9. ईकक् (ईक), 10. ञ्य (य), 11. ञ्यट् (य), 12. अञ् (अ), 13. अण्, यञ्, 14. ख (ईन), 15. कृत्वसुच् (कृत्वस्), 16. सुच् (स्), 17. धा, 18. मयट्, 19. यत्, 20. त्नप्, 21. ञ्य (य), 22. तल्, 23. तनप्, 24. धेय, 25. क, 26. तिकन्, 27. स, स्न, 28. शस्, 29. तसि (तस्), 30. वि=ई, 31. साति, 32. त्रा, 33. डाच् (आ)।

विशेषः—तद्धितप्रकरणे कुल=315 प्रत्ययाः भवन्ति। एतेषां प्रत्ययानां वृहद्-विवेचनं लेखकस्य 'अधिगमकौमुदी' नामके ग्रन्थे द्रष्टव्यम्।

मत्वर्थीयप्रकरणस्य विवेचनम्

सूत्राणि/ वार्त्तिकानि	उदाहरणानि
1. तदस्मिन्नधिकमिति दशान्ताड्डः (5.2.45) 'शतसहस्त्रयोरंवेष्यते (वा. 3141) इति डः,	एकादश अधिका: अस्मिन् एकादशम् (एकादशन्+ड), एकादश माषाः अधिकाः अस्मिन् सुवर्णशते।
2. शदन्तविंशतेश्च (5.2.46) इति डः	त्रिंशत् अधिकाः यस्मिन् शते इति त्रिंशं शतम्, विंशतिः अधिकाः यस्मिन् शते इति विंशं शतम् (विंशति+ड)।
3. सङ्ख्याया गुणस्य निमाने मयट् (5.2.47) इति मयट्	यवानां द्वौ भागौ निमानम् मूल्यान्नम् अस्य द्विमयम् (द्वि+मयट्)
4. तस्य पूरणे डट् (5.2.48) इति डट्	एकादशानां पूरणः एकादशम् (एकादशन्+डट्)।
5. नान्तादसंख्यादेर्मट् (5.2.49) इति डट् स्थाने मट्	पञ्चानां पूरणः पञ्चमः (पञ्चन्+मट्)।
6. षट्कतिकतिपयचतुरां थुक् (5.2.51) इति थुकागमः	षण्णां पूरणः षष्ठः (षष्+डट्-थुक्), कतीनां पूरणः कतिथः, कतिपयानां पूरणः कतिपयथः, चतुर्णां पूरणः चतुर्थः।

सूत्राणि/ वार्त्तिकानि	उदाहरणानि
7. बहुपूगगणसङ्घस्य तिथुक् (5.2.52) इति तिथुक्	बहूनां पूरणः बहुतिथः (बहु-तिथुक्), पूगानां पूरणः पूगतिथः, गणानां पूरणः गणतिथः, सङ्घानां पूरणः सङ्घतिथः।
8. वतोरिथुक् (5.2.53) इति इथुक्	यावतां पूरणः यावतिथः, तावतां पूरणः तावतिथः (तावत्+इथुक्)।
9. द्वेस्तीयः (5.2.54) इति तीय	द्वयोः पूरणः द्वितीयः (द्वि+तीय)।
10. त्रेः सम्प्रसारणं च (5.2.55) इति तीय	त्रयाणां पूरणः तृतीयः (त्रि+तीय)।
11. विंशत्यादिभ्यस्तमडन्यतरस्याम् (5.2.56) इति तमट्	विंशतेः पूरणः विंशतितमः (विंशति+तमट्) पक्षे-डट् विंशः, एकविंशतेः पूरणः एकविंशतितमः, पक्षे-एकविंशः।
12. नित्यं शतादिमासार्धमाससंवत्सराच्च (5.2.57) इति तमट्	शतस्य पूरणः शततमः, एकशतस्य पूरणः एकशततमः, मासस्य पूरणः मासतमः, अर्धमासस्य पूरणः अर्धमासतमः, संवत्सरस्य पूरणः संवत्सरतमः (संवत्सर+ तमट्)।
13. षष्ट्यादयश्चासङ्ख्यादेः (5.2.58) इति तमट्	षष्टेः पूरणः षष्टितमः (षष्टि+तमट्), एकषष्टेः पूरणः एकषष्टितमः।
14. मतौ छः सूक्तसाम्नोः (5.2.59) इति छः	अच्छावाकशब्दः अस्य अस्ति, अस्मिन् अस्ति इति वा अच्छावाकीयं सूक्तम्, वारवन्तशब्दः अस्य अस्ति, अस्मिन् अस्ति इति वा वारवन्तीयं साम:, (वारवन्त+छ-ईय)।
15. अध्यायानुवाकयोर्लुक् (5.2.60) इति छ लुक्	गर्दभाण्डशब्दः अस्मिन् अस्ति गर्दभाण्डः (छ लुक्), पक्षे-गर्दभाण्डीयः (गर्दभाण्ड+छ)।
16. विमुक्तादिभ्योऽण् (5.2.61) इति अण्	विमुक्तः शब्दः अस्मिन् अध्याये अनुवाके वा अस्ति वैमुक्तः, देवासुरशब्दः अस्मिन् अध्याये अनुवाके वा अस्ति दैवासुरः (विमुक्त+अण्)।
17. गोषदादिभ्यो वुञ् (5.2.62) इति वुञ्	गोषदशब्दः अस्मिन् अस्ति गोषदकः, (गोषद+वुञ्) इषेत्वा शब्दः अस्मिन् अस्ति इषेत्वकः (इषेत्वा+वुञ्)।
18. तत्र कुशलःपथः (5.2.63) इति वुञ्	पथि कुशलः पथकः, (पथिन्+वुञ्)।
19. आकर्षादिभ्यः कन् (5.2.64) इति कन्	आकर्षे कुशलः आकर्षकः (आकर्ष+कन्)।
20. धनहिरण्यात्कामे (5.2.65) इति कन्	धने कामः धनकः (धन+कन्)।
21. स्वाङ्गेभ्यः प्रसिते (5.2.66) इति कन्	केशेषु प्रसितः उत्सुकः केशकः (केश+कन्)।
22. उदराट्ठगाद्यूने (5.2.67) इति ठक्	उदरे प्रसितः औदरिकः (उदर+ठक्-इक्)।
23. सस्येन परिजातः (5.2.68) इति कन्	सस्येन (गुणेन) परिजातः (सम्बद्धः) सस्यकः (साधुः), (सस्य+कन्)
24. अंशं हारी-तन्त्रादचिरापहृते (5.2.69×70) इति कन्	अंशं हारी अंशकः (दयादः) (अंश+कन्), तन्त्रात् अचिरापहृततन्त्रकः, (तन्त्र+कन्)।
25. ब्राह्मणकोष्णिके संज्ञायाम् (5.2.71) इति कन्	शास्त्रजीविनो ब्राह्मणाः यस्मिन् देशे सः ब्राह्मणकः (ब्राह्मण कन्) अल्पमन्नं यस्यां सा उष्णिका यवागूः (अल्पान्न+कन्)।
26. शीतोष्णाभ्यां कारिणि (5.2.72) इति कन्	शीतं करोति शीतकः, उष्णं करोति उष्णकः (उष्ण+कन्)।

सूत्राणि/ वार्त्तिकानि	उदाहरणानि
27. अधिकम् (5.2.73) इति कन्	अध्यारूढम् करोति अधिकम् (अध्यारूढ+कन्)।
28. अनुकाभिकाभीकः कमिता (5.2.74) इति कन्	अनु कामयते अनुकः, अभि कामयते अभिकः, पक्षे दीर्घे–अभीकः।
29. पार्श्वेनान्विच्छति (5.2.75) इति कन्	पार्श्वेन अन्विच्छति पार्थकः (पा र्श्व+कन्)।
30. अयःशूलदण्डाजिनाभ्यां ठक्ठञौ (5.2.76) इति ठक्–ठञ्	अयः शूलेन अन्विच्छति आयःशूलिकः (अयःशूल+ठक्–ठञ्)। दण्डाजिनेन अन्विच्छति दाण्डाजिनकः (दण्डाजिन+ठक्–ठञ्)।
31. स एषां ग्रामणी (5.2.78) इति कन्	देवदत्तो मुख्यः एषां देवदत्तकाः, त्वम् एषां ग्रामणी त्वत्काः, अहम् एषां ग्रामणी मत्काः।
32. शृङ्खलमस्य बन्धनं करभे (5.2.79) इति कन्	शृङ्खलमस्य बन्धनं शृङ्खलकः (शृङ्खल+कन्)।
33. कालप्रयोजनाद्रोगे (5.2.81) इति कन्	द्वितीयेऽह्नि भवः द्वितीयकः, तृतीयेऽह्नि भवः तृतीयकः, चतुर्थेऽह्नि भवः चतुर्थकः, विषपुष्पैः जनितः विषपुष्पकः, काशपुष्पैः जनितः काशपुष्पकः, उष्णं कार्यम् अस्य उष्णकः, शीतं कार्यम् अस्य शीतकः, (द्वितीय+कन्)।
34. तदस्मिन्नन्नं प्राये संज्ञायाम् (5.2.82) इति कन्	गुडापूपाः प्रायेण अन्नम् अस्यां पौर्णमास्यां गुडापूपिका पौर्णमासी (गुडापूप+कन्)।
35. कुल्माषादञ् (4.2.38) इति अञ्	कुल्माषाः प्रायेण अन्नम् अस्यां कौल्माषी पौर्णमासी (कुल्माष+अञ्)।
36. श्राद्धमनेन भुक्तमिनिठनौ (5.2.85) इति इन्, ठन्	श्राद्धं भुक्तम् अनेन श्राद्धी (श्राद्ध+इन्), श्राद्ध+ठन्=श्राद्धिकः।
37. इष्टादिभ्यश्च (5.2.88) इति इनि	इष्टम् अनेन इष्टी (इष्ट+इनि), अधीतम् अनेन अधीती (अधीत+इनि)।
38. साक्षाद्द्रष्टरि संज्ञायाम् (5.2.91) इति इनि	साक्षाद् द्रष्टा साक्षी (साक्षात्+इनि)।
39. तदस्यास्त्यस्मिन्निति मतुप् (5.2.94) इति मतुप्	गावः अस्य अस्मिन् वा सन्ति गोमान् (गो+मतुप्)।
40. रसादिभ्यश्च (5.2.95) इति मतुप्	रसः अस्य अस्मिन् वा रसवान्, सुन्दर-रूपम् अस्य अस्मिन् वा रूपवान्।
41. मादुपधायाश्च मतोर्वोऽयवादिभ्यः (8.2.9) इति म–व	किम् अस्य अस्ति किंवान्, ज्ञानम् अस्य अस्ति ज्ञानवान्, विद्या अस्य अस्मिन् वा अस्ति विद्यावान् (विद्या+मतुप्), लक्ष्मीः अस्य अस्ति लक्ष्मीवान्, यशः अस्य अस्ति यशस्वान्, भाः अस्य अस्ति भास्वान्, विद्युत् अस्य अस्ति विद्युत्वान्, पक्षे–यवाः अस्य अस्ति यवमान्, भूमिः अस्य अस्ति भूमिमान्।
42. आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्-रुमण्वच्चर्मण्वती (8.2.12) इति निपातनम्	आसनम् अस्ति आसनवान्, अस्थीनि अस्य सन्ति अस्थिमान्, चक्रम् अस्य अस्ति चक्रवान्, कक्ष्याः अस्य अस्ति कक्ष्यावान्, लवणम् अस्य अस्ति लवणवान्, चर्म अस्याः अस्ति चर्मवती, चर्मण्वती।
43. वत्सांसाभ्यां कामबले (5.2.98) इति लच् 43 I.फेनादिलच्च (5.2.99) इति इलच्, लच्	वत्सः अस्य अस्ति वत्सलः (वत्स+लच्), अंसौ अस्य स्तः अंसलः (अंस+लच्)। फेनः अस्ति अस्मिन् इति फेनिलः (फेन+इलच्)।

सूत्राणि/ वार्त्तिकानि	उदाहरणानि
44. लोमादिपामादिपिच्छादिभ्यः शनेलचः (5.2.100) इति श'न'इलच् पक्षे-मतुप्	लोमानि अस्य सन्ति लोमवान् (लोम+मतुप्), विकल्पे–लोमन्+श लोमशः, रोमाणि अस्य सन्ति रोमवान् (रोमन्+मतुप्), विकल्पे-रोमशः), पामाऽस्यास्तीति पामवान् (पामन्+मतुप्), विकल्पे-पामन्+न=पामनः, लक्ष्मी अस्य अस्ति लक्ष्मणः (लक्ष्मी+न=पिच्छम्), अस्य अस्ति पिच्छिलः, पक्षे–पिच्छ+मतुप=पिच्छवान्, उरः अस्य अस्ति उरसवान् (उरस्+मतुप्), उरस्+इलच्=उरसिलः।
45. प्रज्ञाश्रद्धार्चाभ्यो णः (5.2.101) इति अण् पक्षे–मतुप्	प्रकृष्टं ज्ञानं-प्रज्ञा अस्मिन् अस्ति प्राज्ञः (प्रज्ञा-ण), पक्षे–मतुप्–प्रज्ञावान्, श्रद्धां अस्य अस्मिन् श्राद्धः (अण्), पक्षे मतुप्–श्रद्धावान्, अर्चा अस्य अस्मिन् वा अस्ति आर्चः, पक्षे मतुप्–अर्चावान्।
46. तपःसहस्राभ्यां विनीनी (5.2.102) इति विनि, इनि	तपः अस्य विद्यते तपस्वी (तपस्+विनि), सहस्रम् अस्य अस्ति सहस्री (सहस्र+इनि)।
47. अण् च (5.2.103) ज्योत्स्नादिभ्यः उपसंख्यानाम् (वा०3117) इति अण्	तपः अस्य विद्यते तापसः, सहस्रम् अस्य अस्ति साहस्रः, ज्योत्स्ना+अण्=ज्यौत्स्नः (शुक्लपक्षः), तमिस्रा+अण्=तामिस्रः (कृष्णपक्षः)।
48. सिकताशर्कराभ्यां च (5.2.104) इति अण्	सिकताः सन्ति अस्मिन् सैकतः घटः, शर्कराः सन्ति अस्मिन् शार्करः।
49. देशे लुबिलचौ च (5.2.105) इति चादण्मतुप् च	(अण् लोपे) सिकताः सन्ति अस्मिन् सिकताः, शर्कराः सन्ति अस्मिन् शर्कराः, (इलच्-) सिकता+इलच्=सिकतिलः, शर्करा+ इलच्= शर्करिलः, (अण्-) सिकता+अण्=सैकतः, शर्करा+अण्=शार्करः, (मतुप्-) सिकता+मतुप्=सिकतावान्, शर्करा+मतुप्=शर्करावान्।
50. दन्त उन्नत उरच् (5.2.106) इति उरच्	दन्ताः उन्नताः अस्य सन्ति दन्तुरः, (दन्त+उरच्)।
51. ऊषसुषिमुष्कमधो रः (5.2.106) एवं रप्रकरणे खमुखकुञ्जेभ्यः उपसंख्यानम् (वा०3118) नगपांसुपाण्डुभ्यश्च (वा०3199) कच्छ्वा ह्रस्वत्वं च (वा०3200) इति रः	ऊषः अस्य अस्ति ऊषरः, सुषिः अस्य अस्ति सुषिरः (विलम्), मुष्कः अस्य अस्ति मुष्करः (अण्डकोषः), माधुर्यम् अस्य अस्ति मधुरः, महत्कण्ठविवरणम् अस्य अस्ति खरः, निन्दितं मुखम् अस्य अस्ति मुखरः, अतिशयितः कुञ्जः (हनुः) अस्य अस्ति कुञ्जरः, नगाः (वृक्षाः) सन्ति अत्र नगरम्, पांसुः अस्य अस्ति पांसुरः, पाण्डुः अस्य अस्ति पाण्डुरः, त्वग्रोगविशेषः अस्य अस्ति कच्छुरः (कच्छू) शूनां+र)।
52. द्युद्रुभ्यां मः (5.2.108) इति म	द्यौः (प्रकाशः) अस्य अस्ति जनकतया **द्युमः** (द्यु+म)। द्रुः (वृक्षाः) शाखा अस्य अस्ति द्रुमः (द्रु+म)।
53. केशाद्वोऽन्यतरस्याम् (5.2.109) अन्येभ्योऽपि दृश्यते (वा०3210) अर्णसो लोपश्च (वा०5053) इति वः वा	केशः अस्य अस्ति **केशवः** (केश+व), केश+इनि=केशी, केश+ठन्=केशिकः, केश+मतुप्=केशवान्, मणिः अस्य अस्ति मणिवः (सर्पः), हिरण्यम् अस्य अस्ति हिरण्यवः, अर्णांसि सन्ति अस्मिन् अर्णवः।
54. गाण्ड्यजगात्संज्ञायाम् (5.2.110) इति वः	ग्रन्थिः अस्य अस्ति **गाण्डिवम्/गाण्डीवम् (गाण्डी+व)**। अजगः विष्णुः अस्ति शरत्वेन अस्मिन् अजगवम् (अजग+व),
55. काण्डाण्डादीरन्नीरचौ (5.2.111) इति ईरन्, ईरच्	काण्डम् अस्य अस्ति काण्डीरः (काण्ड+ईरन्), अण्डम् अस्य अस्ति अण्डीरः (अण्ड+ईरच्)।

सूत्राणि/ वार्त्तिकानि	उदाहरणानि
56. रजःकृष्यासुतिपरिषदो वलच् (5.2.112) अन्येभ्योऽपि दृश्यते (वा०3210) इति वलच्	रजः अस्याः अस्ति रजस्वला स्त्री (रजस्+वलच्), कृषिः अस्य अस्ति कृषीवलः (कृषि+वलच्), आसुतिः अस्य अस्मिन् वा अस्ति आसुतीवलः शौण्डिकः (आसुति+वलच्), परिषदः अस्य सन्ति परिषद्वलः (परिषद्+वलच्), पर्षदः अस्य अस्ति पर्षद्वलः (पर्षद्+वलच्), शत्रवः सन्ति अस्य शत्रुवलः (शत्रु+वलच्), भ्रातरः सन्ति अस्य भ्रातृवलः (भ्रातृ+वलच्), पुत्राः सन्ति अस्य पुत्रवलः (पुत्र+वलच्)।
57. दन्तशिखात्संज्ञायाम् (5.2.113) इति वलच्	दन्ताः सन्ति अस्य **दन्तावलः हस्ती** (दन्त+वलच्), शिखा अस्य अस्ति शिखावलः केकी (शिखा+वलच्)।
58. ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वल-गोमिन्मलिनमलीमसाः (5.2.114) इति न, रक्, इनच्, विनि, वलच्, मिनि, इनच्, ईमस्	ज्योतींषि अस्यां सन्ति ज्योत्स्ना (ज्योतिष्+न), तमः अस्य अस्ति तमिस्रा (तमस्+रक्), शृङ्गम् अस्य अस्ति शृङ्गिणः (शृङ्ग+इनच्), ऊर्जः अस्य अस्ति ऊर्जस्वी (ऊर्जस्+विनि), ऊर्जः अस्य अस्ति ऊर्जस्वलः (ऊजस्+वलच्), गौः अस्य अस्ति गोमी (गो+मिनि), मलम् अस्य अस्ति मलिनः (मल+इनच्), मलम् अस्य अस्ति मलीमसः (मल+ईमस्)।
59. तुन्दादिभ्य इलच्च (5.2.117) इति इलच्, इनि, ठन्, मतुप्	**इलच्**-तुन्दम् अस्य अस्ति तुन्दिलः, विवृद्धौ कर्णौ अस्य कर्णिलः। **इनि**- तुन्दम् अस्य अस्ति तुन्दी, विवृद्धौ कर्णौ अस्य कर्णी। **ठन्**- तुन्दम् अस्य अस्ति तुन्दिकः, विवृद्धौ कर्णौ अस्य कर्णिकः। **मतुप्**- तुन्दम् अस्य अस्ति तुन्दवान्, विवृद्धौ कर्णौ अस्य कर्णवान्।
60. एकगोपूर्वात् ठञ्नित्यम् (5.2.118) इति ठञ्	एकशतम् अस्य अस्ति ऐकशतिकः, एकसहस्रम् अस्य अस्ति ऐकसहस्रिकः, गोशतम् अस्य अस्ति गौशतिकः, गोसहस्रम् अस्य अस्ति गौसहस्रिकः।
61. रूपादाहतप्रशंसयोर्यप् (5.2.120) अन्येभ्योऽपि दृश्यते (वा०3210) इति यप्	आहतं रूपम् अस्य रूप्यः, प्रशस्तं रूपम् अस्य अस्ति रूप्यः, गौ, बहुलं हिमम् एषु अस्ति हिम्याः, पर्वताः, गुणाः एषु एषाम् वा सन्ति गुण्याः ब्राह्मणाः, (गुण+यप्)।
62. अस्मायामेधास्रजो विनिः (5.2.121) आमयस्योपसंख्यानं दीर्घश्च (वा०3213) इति विनि	यशः अस्य अस्ति यशस्वी (यशस्+विन्), माया अस्य अस्ति मायावी, (माया+विनि), मेधा अस्य अस्ति मेधावी (मेधा+विनि)। स्रग् अस्य अस्ति स्रग्वी (माला) (स्रज्+विनि), आमयः अस्य अस्ति आमयावी (आमय+विनि)।
63. शृङ्गवृन्दाभ्यामारकन् (वा०3214) इति आरकन् (आरक)	शृङ्गम् अस्य अस्ति शृङ्गारकः (शृङ्ग+आरक), वृन्दम् अस्य अस्ति वृन्दारकः (वृन्द+आरक)।
64. फलबर्हाभ्यामिनच् (वा०3215) इति इनच्	फलम् अस्य अस्ति फलिनः (फल+इनच्), बर्हम् अस्ति अस्य बर्हिणः (बर्ह+इनच्)।
65. तप्पर्वतमरुद्भ्याम् (वा०3221) इति तप्	पर्वाणि अस्य सन्ति पर्वतः (पर्वन्+तप्), मरुतः अस्य परिवेष्टारः सन्ति मरुतः (मरुत्+तप्)।

सूत्राणि/ वार्त्तिकानि	उदाहरणानि
66. ऊर्णाया युस् (5.2.123) इति युस्	ऊर्णाः सन्ति अस्य ऊर्णायुः (ऊर्णा+युस्)।
67. वाचो ग्मिनि (5.2.124) इति ग्मिनि	वाक् अस्य अस्ति वाग्मी (वाच्+ग्मिनि)।
68. आलजाटचौ बहुभाषिणि (5.2.25) आलच्	कुत्सितं बहु भाषते वाचालः (वाच्+आलच्), वाच्+आटच्=वाचाटः।
69. स्वामिन्नैश्वर्ये (5.2.126) इति आमिनच्	स्वम् ऐश्वर्यम् अस्य अस्ति स्वामिन् (स्व+आमिन्)।
70. अर्शआदिभ्योऽच् (5.2.127) इति अच्	अर्शांसि अस्य विद्यन्ते अर्शसः (अर्श+अच्)।
71. वातातिसाराभ्यां कुक्च (5.2.129) इति इनि	वातः अस्य अस्ति वातकी (वात-इनि), अतिसारः अस्य अस्ति अतिसारकी (अतिसार+इनि)।
72. पिशाचाच्च (वा०3224) इति इनि	पिशाचाः अस्य अस्ति पिशाचकी (इनि एवं कुक्)।
73. सुखादिभ्यश्च (5.2.131) इति इनि	सुखम् अस्य अस्ति सुखी (सुख+इनि), दुःखम् अस्य अस्ति दुःखी (दुःख+इनि)।
74. धर्मशीलवर्णान्ताच्च (5.2.132) इति इनि	ब्राह्मणस्य धर्मः अस्य अस्ति ब्राह्मणधर्मी: (ब्राह्मणधर्मः+इनि), ब्राह्मणशीलम् अस्य अस्ति ब्राह्मणशीली (ब्राह्मणशील+इनि), ब्राह्मणवर्णः अस्य अस्ति ब्राह्मणवर्णी (ब्राह्मणवर्ण++इनि)।
75. वर्णाद् ब्रह्मचारिणी (5.2.133) इति इनि	वर्णः (ब्रह्मचर्यः) अस्य अस्ति **वर्णी** (वर्ण+इनि)।
76. पुष्करादिभ्यो देशे (5.2.135) इनि	पुष्करं पद्मं वा अस्य अस्ति पुष्करिणी (पुष्कर+इनि)।
77. बाहूरुपूर्वपदाद्बलात् (वा०3225) सर्वादेश्च (वा०3226) अर्थाच्चासन्निहिते (वा०3227) तदन्ताच्च (वा०3228) इति इनि	बाहुबलम् अस्य अस्ति बाहुबली, ऊरुबलम् अस्य अस्ति ऊरुबली, सर्वधनम् अस्य अस्ति सर्वधनी, सर्वबीजम् सर्वबीजी, असन्निहितः अर्थः अस्य अस्ति अर्थी, धान्यप्रयोजनम् अस्य अस्ति धान्यार्थी, हिरण्यं प्रयोजनम् अस्य अस्ति हिरण्यार्थी।
78. बलादिभ्यो मतुबन्यतरस्याम् (5.2.136) इति मतुप्, इनि	बलम् अस्य अस्ति बलवान् (बल+मतुप्), बल+इनि=बली, उत्साहः अस्य अस्ति उत्साहवान् (उत्साह+मतुप्), उत्साह+इनि=उत्साही।
79. तुन्दिबलिवटेर्भः (5.2.139) इति भ	तुन्दिः अस्य अस्ति तुन्दिभः (तुन्दि+भ), वलयः अस्य अस्ति वलिभः (वलि+भ), वटिः अस्य अस्ति वटिभः (वटि+भ)।
80. अहंशुभमोर्युस् (5.2.140) इति युस्	अहम् अस्य अस्ति अहंयुः (अहं युस्), शुभम् अस्य अस्ति **शुभंयुः** (शुभम् युस्)।

मत्वर्थीयप्रकरणे विंशः, षष्ठः, चतुर्थः, शुभंयुः, द्युमः, केशवः, दन्तावलः, हस्ती, वर्णी, फेनिलः नव-प्रयोगाः साधयत?

(1) **विंशः**—विंशतेः पूरणः इति विग्रहे 'विंशति 'शब्दात् 'तस्य पूरणे डट्' इत्यनेन डटि, अनुबन्धलोपे, 'ति विंशतेर्डिति' इत्यनेन तिलोपे 'विंश+अ' इत्यवस्थायां पररूपेण 'विंश' इति जाते, ततः प्रातिपदिकत्वेन सौ, रुत्वे विसर्गे च 'विंशः' इति सिद्धम्। नान्तत्वाभावात् मडागमो न भवति।

(2) **षष्ठः**—षण्णां पूरणः इति विग्रहे 'षष्'शब्दात् 'तस्य पूरणे डट्' इत्यनेन डटि, अनुबन्धलोपे 'षट्कतिकतिपयचतुरां थुक्' इत्यनेन थुगागमे, अनुबन्धलोपे 'षष्+थ्+अ'इति जाते, ष्टुत्वेन 'षष्ठ' इति जाते, ततः प्रातिपदिकत्वेन सौ, रुत्वे विसर्गे च 'षष्ठः' इति सिद्धम्।

(3) **चतुर्थः, तुरीयः, तुर्यः**— चतुर्णां पूरणः इति विग्रहे चतुर्शब्दात् 'तस्य पूरणे डट्' इत्यनेन डटि, 'षट्कतिक-तिपयचतुरां थुक्' इत्यनेन थुगागमे, अनुबन्धलोपे चतुर्थ इति

जाते सति प्रातिपदिकत्वेन सौ, रुत्वे विसर्गे च चतुर्थः इति सिद्धम्। पक्षे 'चतुरश्छयतावाद्यक्षरलोपश्च' इति वार्तिकेन 'छ'प्रत्यये 'यत्' प्रत्यये वा कृते सति उभयत्र आद्यक्षरस्य चस्य लोपे च जायमाने क्रमशः तुर् छ, तुर् य इत्यवस्थायां छस्य ईयादेशेन 'तुरीय' इति प्रातिपदिकत्वेन सौ, रुत्वे विसर्गे च तुरीयः इति सिद्धम्। यत् प्रत्यये च 'तुर्य' इति च प्रातिपदिकत्वेन सौ, रुत्वे विसर्गे च तुर्यः इति सिद्धम्।

(4) **शुभंयुः**–शुभमस्यास्तीति विग्रहे 'शुभम्'शब्दात् 'अहं शुभमोर्युस्' इत्यनेन युस् प्रत्यये, अनुबन्ध लोपे, मस्यानुस्वारेण शुभंयु-इत्यस्य प्रातिपदिकत्वेन सौ, रुत्वे विसर्गे च 'शुभंयुः' इति सिद्धम्।

(5) **द्रुमः**– द्रुः (वृक्षाः) शाखा अस्य अस्ति विग्रहे 'द्रु'शब्दात् 'द्युद्रुभ्यां मः (5.2.108) इति सूत्रेण म-प्रत्ययेन (द्रु+म) 'द्रुम' इत्यस्य प्रातिपदिकत्वेन सौ, रुत्वे विसर्गे च द्रुमः इति सिद्धम्।

(6) **केशवः**–केशाः सन्ति अस्य इति विग्रहे 'केश' शब्दात् केशाद्वोऽन्यतरस्याम् (5.2.109) इति सूत्रेण 'व' प्रत्ययेन 'केशव' इति जाते सति विभक्तिकार्येण 'केशवः' इति सिद्धम्।

(7) **दन्तावलः हस्ती**– दन्ताः सन्ति अस्य इति विग्रहे दन्तशब्दात् दन्तशिखात्संज्ञायाम् (5.2.113) इति वलचि प्रत्यये, अनुबन्धलोपेन 'दन्तवल' इत्यवस्थायां 'वले'इत्यनेन अकारस्य दीर्घे 'दन्तावल' इत्यस्य प्रातिपदिकत्वेन सौ, रुत्वे विसर्गे च 'दन्तावलः' इति सिद्धम्।

(8) **वर्णी**– वर्णः (ब्रह्मचर्यम्) अस्य अस्ति इति विग्रहे वर्णाद् ब्रह्मचारिणि (5.2.133) इति सूत्रेण इनि-प्रत्यये, अनुबन्धलोपे (वर्ण+इनि) भत्वादकारलोपेन 'वर्णिन्' इति जाते, ततः विभक्त्युत्पत्तौ सत्यां उपधादीर्घे, हल्ङ्यादिना सुलोपे, नलोपे च वर्णी इति सिद्धम्।

(9) **फेनिलः**– फेनः अस्ति अस्मिन् इति विग्रहे फेनशब्दात् फेनादिलच्च (5.2.99) इति इलच् प्रत्यये, अनुबन्धलोपे, भत्वादकारलोपे सति फेनिलशब्दात् प्रातिपदिकत्वेन सौ, रुत्वे विसर्गे च फेनिलः इति सिद्धम्।

मत्वर्थीयप्रकरणे प्रयुक्तप्रत्ययानां प्रदर्शनम्

1. ड, 2. मयट्, 3. डट्, 4. मट्, 5. तिथुक्, 6. इथुक्, 7. तीय, 8. तमट्, 9. छ-ईय, 10. अण्, 11. वुञ् 12. कन्, 13. ठक्-ठञ्, 14. अञ्, 15. इनि-इन्, 16. ठन्, 17. मतुप्, 18 लच्, 19. श, 20. न, 21. इलन्, 22. विनि इनि, 23. इलच्, 24. उरच्, 25. र, 26. व, 27. ईरन्, 28. ईरच्, 29. वलच्, 30. इनच्, 31. रक, 32. मिनि, 33. ईमस, 34. यप्, 35. आरक्)

(18) तद्धितप्रत्ययविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— ड-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्—एकादश अधिकाः अस्मिन् एकादशम् (एकादशन्+ड)।

2. **प्रश्नः**— मयट्-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— यवानां द्वौ भागौ निमानम् अस्य द्विमयम्।

3. **प्रश्नः**— डट्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— एकादशानां पूरणः एकादशम्, षण्णां पूरणः षष्ठः, कतीनां पूरणः कतिथः।

4. **प्रश्नः**— मट्-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— पञ्चानां पूरणः पञ्चमः।

5. **प्रश्नः**— तिथुक्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— बहूनां पूरणः बहुतिथः, पूगानां पूरणः पूगतिथः, गणानां पूरणः गणतिथः।

6. **प्रश्नः**— इथुक्-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— यावतां पूरणः यावतिथः, तावतां पूरणः तावतिथः।

7. **प्रश्नः**— तीय-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— द्वयोः पूरणः द्वितीयः, त्रयाणां पूरणः तृतीयः, एकषष्टेः पूरणः एकषष्टितमः।

8. **प्रश्नः**— तमट्-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— विंशतेः पूरणः विंशतितमः (विंशति+तमट्)।

9. **प्रश्नः**— छ-ईय-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्—अच्छावाकशब्दः अस्य अस्ति, अस्मिन् अस्ति इति वा अच्छावाकीयं सूक्तम्।

10. **प्रश्नः**— अण्-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— देवासुरशब्दः अस्मिन् अध्याये अनुवाके वा अस्ति दैवासुरः, प्रज्ञा अस्मिन् अस्ति प्राज्ञः।

11. **प्रश्नः**— वुञ्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— गोपदशब्दः अस्मिन् अस्ति गोपदकः, इषेत्वा शब्दः अस्मिन् अस्ति इषेत्वकः।

12. **प्रश्नः**— कन्-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— आकर्षे कुशलः आकर्षकः, धने कामः धनकः, उष्णं करोति उष्णकः।

13. **प्रश्नः**— ठक्-ठञ्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— उदरे प्रसितः औदरिकः, गोशतम् अस्य अस्ति गौशतिकः, गोसहस्रम् अस्य अस्ति गौसहस्रिकः।

14. **प्रश्नः**— अञ्-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— कुल्माषाः प्रायेण अन्नम् अस्यां कौल्माषी पौर्णमासी।

15. **प्रश्नः**— इनि-इन्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— श्राद्धं भुक्तम् अनेन श्राद्धी, इष्टम् अनेन इष्टी, अधीतम् अनेन अधीती, बलम् अस्य अस्ति बली।

16. **प्रश्नः**— ठन्-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— श्राद्धं भुक्तम् अनेन श्राद्धिकः, तुन्दम् अस्य अस्ति तुन्दिकः, विवृद्धौ कर्णौ अस्य कर्णिकः।

17. **प्रश्नः**— मतुप्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— गावः अस्य अस्मिन् वा सन्ति गोमान्, ज्ञानम् अस्य अस्ति ज्ञानवान्, लक्ष्मी अस्य अस्ति लक्ष्मीवान्।

18. **प्रश्नः**— लच्-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— वत्सः अस्य अस्ति वत्सलः (वत्स+लच्), अंसौ अस्य स्तः अंसलः (अंस+लच्)।

19. **प्रश्नः**— श-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— लोमानि अस्य सन्ति लोमशः, रोमाणि अस्य सन्ति रोमशः।

20. **प्रश्नः**— न-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— पामाऽस्यास्तीति पामनः, लक्ष्मी अस्य अस्ति लक्ष्मणः, ज्योतींषि अस्यां सन्ति ज्योत्स्ना।

21. **प्रश्नः**— इलन्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— पिच्छम् अस्य अस्ति पिच्छिलः, उरः अस्य अस्ति उरसिलः,।

22. **प्रश्नः**— विनि इनि-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— तपः अस्य विद्यते तपस्वी (तपस्+विनि), माया अस्य अस्ति मायावी, मेधा अस्य अस्ति मेधावी।

23. **प्रश्नः**— इलच्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— सिकताः सन्ति अस्मिन् सिकतिलः, शर्कराः सन्ति अस्मिन् शर्करिलः, तुन्दम् अस्य अस्ति तुन्दिलः।

24. **प्रश्नः**— उरच्-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— दन्ताः उन्नताः अस्य सन्ति दन्तुरः।

25. **प्रश्नः**— र-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— ऊषः अस्य अस्ति ऊषरः, सुषिः अस्य अस्ति सुषिरः (बिलम्), नगाः (वृक्षाः) सन्ति अत्र नगरम्।

26. **प्रश्नः**— व-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— केशः अस्य अस्ति केशवः, मणिः अस्य अस्ति मणिवः, हिरण्यम् अस्य अस्ति हिरण्यवः।

27. **प्रश्नः**— ईरन्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्—काण्डम् अस्य अस्ति काण्डीरः (काण्ड+ईरन्)।

28. **प्रश्नः**— ईरच्-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्—अण्डम् अस्य अस्ति अण्डीरः (अण्ड+ईरच्)।

29. **प्रश्नः**— वलच्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— रजः अस्याः अस्ति रजस्वला स्त्री, दन्ताः सन्ति अस्य दन्तावलः, शिखा अस्य अस्ति शिखावलः।

30. **प्रश्नः**— इनच्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्—फलम् अस्य अस्ति फलिनः, मलम् अस्य अस्ति मलिनः, शृङ्गम् अस्य अस्ति शृङ्गिणः।

31. **प्रश्नः**— रक्-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— तमः अस्य अस्ति तमिस्रा।

32. **प्रश्नः**— मिनि-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— गौः अस्य अस्ति गोमी।

33. **प्रश्नः**— ईमस-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— मलम् अस्य अस्ति मलीमसः।

34. **प्रश्नः**— यप्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्—गुणाः एषु एषाम् वा सन्ति गुण्याः ब्राह्मणाः, प्रशस्तं रूपम् अस्य अस्ति रूप्यः गौः।

35. **प्रश्नः**— आरक-प्रत्ययस्य उदाहरणं किम्?,
उत्तरम्—शृङ्गम् अस्य अस्ति शृङ्गारकः (शृङ्ग+आरक), वृन्दम् अस्य अस्ति वृन्दारकः (वृन्द+आरक)।

36. **प्रश्नः**— तप्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— पर्वाणि अस्य सन्ति पर्वतः (पर्वन्+तप्), मरुतः अस्य परिवेष्टारः सन्ति मरुतः (मरुत्+तप्)।

37. **प्रश्नः**— युस्-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— ऊर्णाः सन्ति अस्य ऊर्णायुः (ऊर्णा+युस्)

38. **प्रश्नः**— ग्मिनि-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— वाक् अस्य अस्ति वाग्मी (वाच्+ग्मिनि),

39. **प्रश्नः**— आलच्-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्— कुत्सितं बहु भाषते वाचालः (वाच् आलच्)।

40. **प्रश्नः**— आटच्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— कुत्सितं बहु भाषते वाचाटः, (वाच् आटच्)।

41. **प्रश्नः**— आमिनच्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— ऐश्वर्यम् अस्य अस्ति स्वामिन् (स्व+आमिन्)।

42. **प्रश्नः**— अच्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— अर्शांसि अस्य विद्यन्ते अर्शसः (अर्श+अच्)।

43. **प्रश्नः**— भ-प्रत्ययस्य उदाहरणं किम्?
उत्तरम्—तुन्दिः अस्य अस्ति तुन्दिभः (तुन्दि+भ), वलयः अस्य अस्ति वलिभः (वलि+भ)।

44. **प्रश्नः**— युस्-प्रत्ययस्य किमुदाहरणम्?
उत्तरम्— अहम् अस्य अस्ति अहंयु (अहं युस्), शुभम् अस्य अस्ति शुभंयुः (शुभम् युस्)।

45. **प्रश्नः**— मत्वर्थीयप्रकरणे कति प्रत्ययाः सन्ति?
उत्तरम्— 35 पञ्चत्रिंशत्।

46. **प्रश्नः**—दिवाकरः-विभाकरः-निशाकरः-लिपिकरः इत्येतेषु शब्देषु कः प्रत्ययो भवति?
उत्तरम्— अच् प्रत्ययः।

47. **प्रश्नः**—शाकाहारी-आमिषभोजी-मिथ्यावादी-मित्रद्रोही इत्यादि शब्देषु कः प्रत्ययो भविष्यति?
उत्तरम्— णिनिः प्रत्ययः।

48. **प्रश्नः**—ग्रामीणः शब्देऽस्मिन् ग्रामशब्दात् तद्धितप्रत्ययः कोऽस्ति?
उत्तरम्— खञ् प्रत्ययः।

49. **प्रश्नः**—'नैमित्तिक' शब्दे केन प्रातिपदिकेन 'ठक्' प्रत्ययः भवति?
उत्तरम्— निमित्तेन।

50. **प्रश्नः**—'अग्रेसरः' इत्यत्र कः प्रत्ययोऽस्ति?
उत्तरम्— टः प्रत्ययः।

51. **प्रश्नः**—'चूडलः' इत्यत्र कः प्रत्ययः?
उत्तरम्— लच्।

52. **प्रश्नः**—'राजकीय'शब्दे केन प्रातिपदिकेन 'छ'प्रत्ययः भवति?
उत्तरम्— राजन्-शब्देन।

53. **प्रश्नः**—मृतवती इत्यत्र कः प्रत्ययः?
उत्तरम्— मतुप् प्रत्ययः।

54. **प्रश्नः**—'श्रीमत्' इत्यत्र कः प्रत्ययः?
उत्तरम्— मतुप् प्रत्ययः।

55. **प्रश्नः**—गुण वतुप् इति किं रूपम्?
उत्तरम्— गुणवत्।

56. **प्रश्नः**—व्याकरणम् अधीते वेत्ति वा इति?
उत्तरम्—वैयाकरणः।

57. **प्रश्नः**—राष्ट्रे भवः इति?
उत्तरम्— राष्ट्रियः।

58. **प्रश्नः**—शाब्दिकः अत्र कः प्रत्ययः?
उत्तरम्— ठक् प्रत्ययः।

59. **प्रश्नः**—'वासुदेवः' इत्यस्मिन् शब्दे कः प्रत्ययः?
उत्तरम्— अण्।

60. **प्रश्नः**—विनता शब्दात् ढक् प्रत्यये किं रूपं भविष्यति?
उत्तरम्— वैनतेयः।

(ग) (O-Code-25/73) सिद्धान्तकौमुदी-(19) कृदन्त (कृत्यप्रक्रिया) एवं कृदन्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

कृदन्त (कृत्यप्रक्रिया) (Agentives) "प्रतीयते अर्थविशेषो बोध्यते येन सः प्रत्ययः"। प्रत्ययाः सामान्यतः द्विधा भवन्ति। धातोः विधीयमानः प्रत्ययः कृदन्तः इत्युच्यते। कृदन्तरूपाणि कदाचित् क्रियार्थम् असमापिकाक्रियार्थं वा बोधयन्ति। कृदन्तेभ्यः सुप् प्रत्ययाः भवन्ति। क्वचिदव्ययत्वेन च व्यवहारः भवति कृदन्तानाम्। धातुभ्यः तिङ्-कृत् प्रत्ययाः भवन्ति। कृत्प्रत्ययाः ते भवन्ति येषां 'कृदतिङ्' इत्यनेन कृत्संज्ञा भवति, येषु अण्, अच्, ण्वुल्, अनीयर् इत्यादयः भवन्ति। धातोः कृत्प्रत्ययविहिते सति कृदन्तं भवति। तेषां 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञा भवति। संस्कृतसाहित्ये कृदन्तानां प्रयोगः बहुतायतो भवन्ति। कृदन्तं चतुर्भागेषु विभक्ताः सन्ति, 1. कृत्यः, 2. पूर्वकृदन्तः, 3. उणादि, 4. उत्तरकृदन्तः।

1. कृत्यप्रत्ययाः—1. तव्यत्, 2. तव्य, 3. अनीयर्, 4. केलिमर्, 5. यत्, 6. क्यप्, 7. ण्यत्।

2. पूर्वकृदन्त-प्रत्ययानां अवबोधनम्—

1. ण्वुल् (वु),	2. तृच् (तृ),	3. ल्यु,	4. णिनि (इन्),	5. अच् (अ)	6. कः (अ),	7. शः (अ),
8. णः (अ),	9. ष्वुन् (वु),	10. अण्-अ	11. ड (अ)	12. टक् (अ)	13. ट (अ),	14. इन् (इ)
15. खश् (अ)	16. डः (अ)	17. ण्युट् (यु)	18. वुन् (वु)	19. ख्युन् (यु)	20. खिष्णुच् (इष्णु) खुकञ् (उक)	21. क्विप् (0)
22. ण्वि (0)	23. विट् (0)	24. कप् (अ)	25. मनिन्, क्वनिप्,	26. इनि (इन्) वनिप्, विच्	27. ड (अ)	28क्त, क्तवतु
29. ड्वनिप् (वन्)	30. अतृन् (अत्)	31. शतृ (अत्)	32. शानच् (आन)	33. शानन् (आन),	34. चानश् (आन)	35. तृन् (तृ)
36. इष्णुच् (इष्णु)	37. ग्स्नुः (स्नु)	38. क्नुः (नु)	39. घिनुण् (इन्)	40. वुञ् (वु)	41. युच् (यु)	42. उकञ् (उक्)
43. षाकन् (आक)	44. इनि (इन्)	45. आलुच् (आलु)	46. रु	47. क्मरच् (मर)	48. घुरच् (उर)	49. कुरच् (उर)
50. क्वरप्	51. ऊक्	52. र	53. 'उ'	54. कि, किन् (वर)	(इ) 55.नजिङ् (नज्)	
56. आरु	57. क्रु/क्लुकन्/ क्रुकन् (रु/लुक/रुक)	58. वरच् (वर)	59. डु (उ)	60. ष्ट्रन् (ट्र)	61. इत्र	

3. उणादिप्रत्ययानां प्रदर्शनम्

1. उण् (उ),	2. जुण् (उ),	3. उ,	4. कु (उ),	5. उरच् (उर)
6. उरन् (उर)	7. टिषच् (इष)	8. किरच् (इर)	9. इलच् (इल)	10. एरक् (एर)
11. ओतच् (ओत)	12. डवतु (अवत्)	13. ओरन् (ओर)	14. कोलच् (ओल)	15. ऊरन् (ऊर)
16. तुन् (तु)	17. तु	18. तुन् (तु)	19. कतु (अतु)	20. चतु (अतु)
21. आतु	22. आतृकन् (आतृक)	23. ऊ.	24. कूः (ऊ)	25. उति (उत)
26. उलच् (उल)	27. इतिः (इत्)	28. ढ,	29. अठ	30. ख
31. ठ	32. कल (अल)	33. ड	34आलच् (आल)	35. आलञ् (आल)
36. कालन् (आल)	37. अङ्गच् (अङ्ग)	38. गन् (ग)	39. गक्, ग,	40. अण्डन् (अण्ड)
41आदि (अद्)	42. अटि (अट्)	43. अजि (अज्)	44. मदिक् (मद्)	45. मन् (म)
46. मक् (म)	47. षिवन् (इव)	48. क्वन् (व)	49. वन् (व)	50. व,
51. कनिन् (अन्)	52. एणु	53. क्थन् (थ)	54. थन् (थ)	55. ऊथन् (ऊथ)
56. थक् (थ)	57. रक् (र)	58. क्रन् (र)	59. रन् (र)	60. उकन् (उक)
61. णुकन् (उक)	62. क्रुकन् (रुक)	63. क्वुन् (वु)	64. किकन् (इक)	65. इकन् (इक)
66. इनच् (इन)	67. इनन् (इन)	68. क्विप् (0)	69. क (अ)	70. चिक् (च्)
71. डौ (औ)	72. डै (ऐ)	73. डो (ओ)	74. डू (ऊ)	75. डोसि (ओस्)
76. इजि (इज्)	77. उरिन् (उरि)	78. युच् (यु)	79. कयुन् (यु)	80. क्यु (यु)
81. अति (अत्)	82असानच् (असान)	83. आनच् (आन)	84. तृन्, तृच् (तृ)	85. ऋन् (ऋ)
86. ऋ (ऋ)	87. अनि (अनि)	88. इसि (इस्)	89. इसिन् (इस्)	90. उसि (उस्)
91. ष्वरच् (वा)	92. ष्वरच् (वर)	93. नक् (न)	94. न (0)	95. इष्णुच् (इष्णु)
96. क्स्न (स्न)	97. युच् (यु)	98. अयु	99. प,	100. इलुच् (इलु)
101. क्लु (लु)	102. नु	103. णु	104. क	105. कक् (क)
106. कन् (क)	107. उन, उन्त, उन्ति, उनि	108. झिच् (अन्ति)	109कन्युच् (अन्यु)	110. अनुङ् (अनु)
111. उनन् (उन)	112. स	113. सर	114. कसरन् (सर)	115. कालन् (आल)
116. काकु (आकु)	117अन्यु, आगु, अक्नु,	118. आनक	119. आणक	120. उल्मुकादि,
121. तन् (त)	122. क्त (त)	123. इतन् (इत)	124. आय्य	125. एण्य
126. क्लेय्य	127. अन्य	128. अत्रन्	129. कत्र	130. अतच्
131. अथ	132असच् (अस)	133. अभच् (अभ)	134. झच् (अन्त)	135. अर
136. क्रन् (रर)	137. आरन् (आर)	138. अप	139. कपन् (अप)	140तिकन् (तिक)
141. तश/तशस्	142. तनन् (तन्)	143. भ	144. भन् (भ)	145. क्थिन् (थि)
146. क्सि (सि)	147. क्सु (सु)	148. ई	149. कलिच्, यतुच्, अलिच्, इष्टुच्, इष्टच्, इसन्, स्यन्, इथिन्, उलि, अस, आस, आनुच्	
150. करन् (कर)	151. कलन् (कल)	152. इनि (इन्)	153. आक	154. ईकन् (ईक)

155. (ईक) (अङ्कण)	156. किकन्	157. ईपन् (ईष)	158. ईरन् (ईर)	159. आ,
160. एलिमच् (एलिम)	161. धु, ल, वल, वाल	162. ऊक/ऊकण (ऊक)	163. मि	164. नि
165. विन् (वि)	166.क्विन् (वि)	166.क्विन् (वि)	167. डति (अति)	168. ऋतिन् (ऋत्)
169. अति	170. क्रि:/क्रिन् (रि)	171. त्रिप् (त्रि)	172. त्रिनि (त्रिन्)	173. अत्रिन् (अत्रि)
174. ईचि	175. ऊषन् (ऊष)	176. कुषन् (उष)	177. उषच् (उष)	178. अरु
179. अटन् (अट)	180. अम्बच् (अम्ब)	181. अम	182. किन्दच् (इन्द)	183. घथिन् (अथि)
184. ऊर/ऊलच् (ऊर, ऊल)	185. चट् (च)	186. बन् (ब)	187. अम्बच् (अम्ब)/ अबक,	188. दंन/द (द)
189. कयन् (अय)	190. रु	191. क्रुन् (रु)	192इत्व, त्व, त्न, नि, श, स्य, ढ, अट	193. इत्वन् (इत्व)
194. उम्भ, उम, ईद, इत	195. असि, उल, उश, आल, वल, ण्य, य,	196. क्ल (ल)	197. य	198. यक् (य)
199. वनिप् (वन्)	200. क्वनिप् (वन्)	201. इन् (इ)	202. इञ् (इ)	203. इण् (इ)
204. इ	205. मनिन् (मन्)	206. इमनिच् (इमन्)	207. मनि (मन्)	208. मनिन्/मनिण् (मन्)
209. सिकन् (सिक)	210. अरन् (अर)	211. उडच् (उड)	212. कमि (अम्)	213. डिमि (इम्)
214. ष्ट्रन् (ट्र)	215. क्त्र (त्र)	216. ड्रट् (र)	217. त्र	218. त्रन् (त्र)
219. णित्रन् (इत्र)	220. इत्र/उत्र	221. अ	222. कण	223. स्मन् (स्म)
224. डुम्सुन् (उम्स्)	225. किष्यन् (इष्य)	226. ति	227. कोटन् (इंट)	228. कितच् (इत)
229. क्मलन् (मल)	230. असुन् (अस्)	231. आसि/असि (आस्)	232. उनसि (उनस्)	233. कनसि (अनस्)
234. डुतच् (उत)	235. ऊम	236. ऊरन् (ऊर)	237. अति	238. क्न (न)
239. उलच् (उल)	240. ट/टन् (अ)	241. डैसि (ऐस्)	242. क्त (त)	243. यत्
244. क्यु (यु)	245. ईरन्/ईरच् (ईर)	246. अच्/अल् (अ)	247. सन्	248. ख
249. ऊख	250. फक् (फ)	251. श्वण्/शुन् (श्व/शु)	252. डुन् (उ)	253. श्रु
254. टन् (ट)	255. अच् (अ)	256. अन्	257. इतच् (इत)	258. वुन् (वु)
259. अर	260. युन् (यु)	261. तुन् (तु)	262. कन्यन् (अन्य)	263. पास
264. तु	265. ड (अ)	266. सन् (य)	267. क्रिन् (रि)	268 कीकन् (ईक)
269. डठ (अठ)	270. बुन् (बु)	271. यत्, अम, वन्, अ,	272. त, र	273. कन (अ)
274. वरट् (वर)	275. उरन् (उर्)	276. अरन् (अर्)	277. ग	278. क
279. अच् (अ)	280. ड्रि (रि)	281. अनि	282. अमच् (अम)	283. अलच् (अल)

4. उत्तरकृदन्तप्रकरणस्य प्रत्ययानां प्रदर्शनम्

1. अच्-4, 6. घञ् (अ) -9. 11. अप् (अ) -14,	2. मक्-5. 7. अण् (अ) -10, 12. क्त्रि (त्रि) -15,	3. मनिन्-6. 8. णच् (अ) -11, 13. अथुच् (अथु)-16,	4. तुमुन् (तुम7, 9. इनुण् (इन्) -12, 14. नङ् (न) -17,	5. तुमुन् (तुम) -8, 10. अच् (अ) -13, 15. नन् (न) -18,
16. कि (इ) -19,	17. क्तिन् (ति) -20,	18. क्यप् (य) -21,	19. श, यक्	20. अ-23,
21. अङ (य) -22, (अ) -24,	22. युच् (यु) -25,	23. ण्वुल (वु) -26,	24. इञ् (इ) -27,	25. ण्वुच् (वु) -28,
26. अनि-29,	27. ल्युट् (यु) -30,	28. क्त (त) -31,	29. घ-32,	30. ड/डर/इक, इकवक-33
31. खल् (अ) -34,	32. युच् (यु) -35,	33. णिनि (इन्) -36	34. यत्/यत् (य) -37,	35. क्तिन्/क्त (ति/त) -38
36. क्त्वा (त्वा) -39 40. णमुल्-43	37. क्त्वा स्थाने ल्यप्-40		38. णमुल्/क्त्वा-41	39. खमुञ् (अम्) 42

विशेष:-1. कृत्यप्रत्यया:-7 सप्त। 2. पूर्वकृदन्तप्रत्यया:-61 एकषष्टि:। 3. उणादिप्रत्यया:-283 त्र्यशीत्यधिकद्विशतम्।4. उत्तरकृदन्तप्रत्यया:-40 चत्वारिंशत्, =391 प्रत्यया: कृदन्तप्रकरणे सन्ति। एतेषां कृदन्तप्रत्ययानां बृहद्-विवेचनं लेखकस्य "अधिगमकौमुदी"ग्रन्थे द्रष्टव्यम्।

कृदन्ते कृत्यप्रकरणम्-कृत्यप्रत्यया: सप्त भवन्ति। ते यथा-1. तव्यत्, 2. तव्य, 3. अनीयर्, 4. केलिमर्, 5. यत्, 6. क्यप्, 7. ण्यत् इत्येषां कृत्यप्रत्ययत्वेन व्यवहार:। एते कर्मवाच्ये भाववाच्ये च उपयुज्यते, न तु कर्तरि। उक्तञ्च सूत्रम्-"तयोरेव कृत्यक्तखलर्था:" यथा-मया गन्तव्यम्, त्वया कर्तव्यम्, भवता करणीयम् इत्यादि।

(कृत्यप्रत्यया:-1. तव्यत्, 2. तव्य, 3. अनीयर्, 4. केलिमर्, 5. यत्, 6. क्यप्, 7. ण्यत्)

सूत्राणि/ वार्तिकानि	उदाहरणानि
1. धातो: (3.1.91) आतृतीयसमाप्तेरधिकारोऽयम्। 'तत्रोपपदं सप्तमीस्थम्'।'कृदतिङ्' इति।	अनेन सूत्रेण धातुभ्य: विहिततिङ्-भिन्नप्रत्ययानां कृत्संज्ञा भवति।
2. वासरूपोऽस्त्रियाम् (3.1.94) परिभाषेयम्। अस्मिन्धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना।	कृदन्तप्रत्ययविहिते सति प्रातिपदिकसंज्ञोपरान्ते सुब्विभक्ति: विधीयते। अर्थात् शब्दरूपं भवति।
3. कृत्या: (3.1.95) अधिकारोऽयं ण्वुल: पाक्।	तव्यं च तव्यतश्चैवानीयर्केलिमरौ तथा। यतं ण्यतं क्यपं चापि कृत्यान् सप्त प्रचक्षते।
4. कर्तरि कृत् (3.4.67) कृत्प्रत्यय: कर्तरि स्यादिति प्राप्ते।	कृत्प्रत्यय: कर्ता-अर्थे भवति।
5. तयोरेव कृत्यक्तखलर्था: (3.4.70) एते भावकर्मणोरेव स्यु:।	कृत्य, क्त एवं खलर्थप्रत्यया: भावकर्मार्थे एव भवन्ति।

सूत्राणि/ वार्तिकानि	उदाहरणानि
6. तव्यत्तव्यानीयर: (3.1.96) धातोरेते प्रत्यया: स्यु:। 1. तव्यत्प्रत्ययविहिते सति एधितव्यम् इति भवति। 2. अनीयर्प्रत्ययविहिते सति एधिनीयम्, चयनीयम् इतिभवति। 3. तव्यप्रत्ययविहिते सति चेतव्यम् इति भवति।	तेन-एधितव्यम्, ताभ्याम्-एधितव्यम्, तै:-एधितव्यम्, त्वया-एधितव्यम्, युवाभ्याम्- एधितव्यम्, युष्माभि:-एधितव्यम्, मया-एधितव्यम्, आवाभ्याम्-एधितव्यम्, अस्माभि:-एधितव्यम्,
7. कृत्यच: (8.4.29) , णेर्विभाषा (8.4.30), हलश्चेजुपधात् (8.4.31), इजादे: सनुम: (8.4.32), वा निंसनिक्षनिन्दाम् (8.4.33) इति नस्य णत्वं वा स्यात्।	प्रयाणीयम्, निर्विण्ण:, प्रयापणीयम्, प्रकोपणीयम्, प्रेङ्खणीयम्, प्रणिंसितव्यम्, प्रनिंसितव्यम्,
8. कृत्यल्युटो बहुलम् (3.4.113) इति बहुलेन भवति।	स्नान्त्यनेन स्नानीयं चूर्णम्। दीयतेऽस्मै दानीयो विप्र:।
9. अचो यत् (3.1.97) अजन्ताद्धातोर्यत् स्यात्।	चेतुं योग्यं चेयम् (चि+यत्), जेतुं योग्यं जेयम् (जि+यत्)
10. ईद्यति (6.4.65) यति परे आत ईत् स्यात्।	दातुं योग्यं देयम् (दी+यत्), ग्लेयम्, पेयम्, ज्ञेयम्, मेयम्, स्थेयम्, गेयम्, ध्येयम्, घ्रेयम्, श्रेयम्, हेयम् इत्यादय:।
11. तकिशसिचतियतिजनिभ्यो यद्वाच्य: (वा०1922) इति यत् स्यात्।	तक्यम्, शस्यम्, चत्यम्, यत्यम्, जन्यम्,
12. पोरदुपधात् (3.1.98) पवर्गान्तादुदुपधाद्यत् स्यात्।	शप्यम्, लभ्यम्, रम्यम्, आरभ्यम्, गम्यम्, तप्यम्, जप्यम्, नम्यम्
13. शकिसहोश्च (3.1.99) इति यत्।	शक्यम्, सह्यम्,
14. गदमदचरयमश्चानुपसर्गे (3.1.100) इति यत् स्यात्।	गद्यम्, मद्यम्, चर्यम्, आचार्य:, प्रयामयम्, नियम्यम्,
15. वद: सुपि क्यप् च (3.1.106) इति क्यप्, चकारात् यत् स्यात्।	ब्रह्मणो वदनम् ब्रह्मोद्यम्, पक्षे यत् ब्रह्मवद्यम्,
16. भुवो भावे (3.1.107) इति क्यप् स्यात्।	ब्रह्मणो भावो ब्रह्मभूयम्, पक्षे यत्-भव्यम्, प्रभव्यम्।
17. हनस्त च (3.1.108) अनुपसर्गे सुप्युपपदे हन्तेर्भावे क्यप् स्यात् तकारश्चान्तादेश:।	ब्रह्मणो हननं ब्रह्महत्या (स्त्रीत्वं लोकात्)
18. एतिस्तुशास्वृदृजुष: क्यप् (3.1.109) एभ्य: क्यप् स्यात्।	इण् गतौ-इत्य: पक्षे-अय्य:, ष्टुञ् स्तुतौ-स्तुत्य:, शासु अनुशिष्टौ-शिष्य:, वृ वरणे-वृत्य:, आङ् उपसर्गे दृङ्
19. ह्रस्वस्य पिति कृति तुक् (6.1.71) इति तुक्।	आदरे-आदृत्य:, जुष्य:, शस्यम्, शंस्यम्, दुह्यम्, दोह्यम्, गुह्यम्, गोह्यम्,
20. ऋदुपधाच्चाक्लृपिचृते: (3.1.110) इति क्यप् स्यात्।	वृतु वर्तने-वृत्यम्, वृधु वृद्धौ-वृध्यम्।
21. भृञोऽसञ्ज्ञायाम् (3.1.112) असंज्ञायां भृधातो: क्यप् स्यात्।	भृत्या: कर्मकरा:, संभृत्या:, संभार्या,
22. राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्या: (3.1.114) इति क्यबन्ता निपात्यन्ते।	राजसूय:, राजसूयम्, सरत्याकाशे सूर्य:, मृषोद्यम्, कुप्यम्, गोप्यम्, कृष्टपाक्या:, अव्यथ्य:,

सूत्राणि/ वार्तिकानि	उदाहरणानि
23. प्रत्यपिभ्यां ग्रहे (3.1.118) छन्दसीति वक्तव्यम् (वा०1944) इति क्यप् भवति।	प्रतिगृह्यम्, अपिगृह्यम्, लोके तु प्रतिग्राह्यम्, अपिग्राह्यम्,
24. विभाषा कृवृषोः (3.1.120) कृवृषोः धातुभ्यां क्यप् वा स्यात्।	कृ धातोः-कृत्यम्, वृष् धातोः-वृष्यम्।
25. ऋहलोर्ण्यत् (3.1.124) ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत् स्यात्।	कृ धातोः-कार्यम्, वृष् धातोः-वर्ष्यम्,
26. अमावस्यदन्यतरस्याम् (3.1.122) इति ण्यत् स्यात्।	अमा-अमावस्यत्, अमावास्या, अमावस्या, पाक्यम्, पाणिसर्ग्य, समवसर्ग्या,
27. ओरावश्यके (3.1.125) उवर्णान्ताद्धातोर्ण्यत् स्यादवश्यम्भावे द्योत्ये।	लूञ् धातोः-लाव्यम्, पूञ् धातोः-पाव्यम्,
28. आसुयुवपिरपित्रपिचमश्च (3.1.126) इति ण्यत् स्यात्	षुञ् अभिषवे-आसाव्यम्, यु मिश्रणे-याव्यम्, वाप्यम्, राप्यम्, त्राप्यम्, चाम्यम्,
29. आनाय्योऽनित्ये (3.1.127) आङ्पूर्वान्-यतेर्ण्यदायादेशश्च निपात्यते। 30. प्रणाय्योऽ-सम्मतौ (3.1.128) इति ण्यत् आयादेशे।	आङ्पूर्वक नी-आनाय्यः, आनेयः, प्रणाय्यश्चोरः, प्रणाय्योऽन्तेवासी, प्रणेयोऽन्यः
31. क्रतौ कुण्डपाय्यसञ्चाय्यौ (3.1.130)	
32. अग्नौ परिचाय्योपचाय्यसमूह्याः (3.1.131) इति ण्यत् निपातनं भवति।	कुण्डेन पीयतेऽस्मिन् सोमः कुण्डनाय्यः क्रतुः। सञ्चीयतेऽसौ सञ्चाय्यः। परिचाय्यः, उपचाय्यः, समूह्यः,
33. चित्याग्निचित्ये च (3.1.132) इति ण्यत् निपात्यन्ते।	चीयतेऽसौ चित्योऽग्निः, अग्निचित्या, स्तुत्यः,
34. भव्यगेयप्रवचनीयोपस्थानीयजन्या-प्लाव्यापात्या वा (3.4.68) इति यत् वा। (भव्य, गेय, प्रवचनीय, उपस्थानीय, जन्य, आप्लाव्य, आपात्य)	भवतीति भव्यः, गायतीति गेयः, प्रवचनीयो गुरुः, उपस्थानीयः शिष्यः, जायतेऽसौ स जन्यः, अपलवतेऽसौ आप्लाव्यः,

योग्यताबोधकभविष्यत्कालिकविशेषणम् (कृत्य) अवबोधनम्?

प्रत्ययः	धातुः	रूपम् (पुं०स्त्री०नपुं०)	अर्थः
1. तव्यत्,	भू	भवितव्यः, भवितव्या, भवितव्यम्, एधितव्यम्,	भवितुं योग्यं
2. अनीयर्,	दृश्, कृ, पच्, गम्,	दर्शनीयः, करणीयः, पचनीयः, गमनीयः, दर्शनीया, करणीया, पचनीया, गमनीया, दर्शनीयम्, करणीयम्, पचनीयम्, गमनीयम्, एधनीयम्, वहनीयः,	कर्तुं योग्यं
2. तव्य,	गम्, पठ्	गन्तव्यः, गन्तव्या, गन्तव्यम्, पठितव्यः, पठितव्या, पठितव्यम्, चेतव्यम्	गन्तुं योग्यं, पठितुं योग्यं

प्रत्ययः	धातुः	रूपम् (पुं०स्त्री०नपुं०)	अर्थः
4. केलिमर्, (एलिम)	पच्	पचेलिमः, पचेलिमा, पचेलिमम्,	
5. यत्, (य)	गम्	गम्यः, गम्या, गम्यम्,	
6. क्यप्, (य)	शिक्ष्	शिष्यः, शिष्या, शिष्यम्,	
7. ण्यत् (य)	क्रि	कार्यः, कार्या, कार्यम्,	

कृत्यप्रत्ययस्य प्रयोगक्रमज्ञानाय अवबोधनम्?

तृतीयान्तरूपम्	नपुंसके एकवचनस्य रूपाणि-
तेन	एधितव्यम्, चेतव्यम्, कर्तव्यम्, भवितव्यम्, गन्तव्यम्, चेतव्यम्, पठितव्यम्, भक्षितव्यम्, पूजितव्यम्, दातव्यम्, वक्तव्यम्
ताभ्याम्	एधितव्यम्, चेतव्यम्, कर्तव्यम्, भवितव्यम्, गन्तव्यम्, चेतव्यम्, पठितव्यम्, भक्षितव्यम्, पूजितव्यम्, दातव्यम्, वक्तव्यम्
तैः	एधितव्यम्, चेतव्यम्, कर्तव्यम्, भवितव्यम्, गन्तव्यम्, चेतव्यम्, पठितव्यम्, भक्षितव्यम्, पूजितव्यम्, दातव्यम्, वक्तव्यम्
त्वया	एधितव्यम्, चेतव्यम्, कर्तव्यम्, भवितव्यम्, गन्तव्यम्, चेतव्यम्, पठितव्यम्, भक्षितव्यम्, पूजितव्यम्, दातव्यम्, वक्तव्यम्
युवाभ्याम्	एधितव्यम्, चेतव्यम्, कर्तव्यम्, भवितव्यम्, गन्तव्यम्, चेतव्यम्, पठितव्यम्, भक्षितव्यम्, पूजितव्यम्, दातव्यम्, वक्तव्यम्
युष्माभिः	एधितव्यम्, चेतव्यम्, कर्तव्यम्, भवितव्यम्, गन्तव्यम्, चेतव्यम्, पठितव्यम्, भक्षितव्यम्, पूजितव्यम्, दातव्यम्, वक्तव्यम्
मया	एधितव्यम्, चेतव्यम्, कर्तव्यम्, भवितव्यम्, गन्तव्यम्, चेतव्यम्, पठितव्यम्, भक्षितव्यम्, पूजितव्यम्, दातव्यम्, वक्तव्यम्
आवाभ्याम्	एधितव्यम्, चेतव्यम्, कर्तव्यम्, भवितव्यम्, गन्तव्यम्, चेतव्यम्, पठितव्यम्, भक्षितव्यम्, पूजितव्यम्, दातव्यम्, वक्तव्यम्
अस्माभिः	एधितव्यम्, चेतव्यम्, कर्तव्यम्, भवितव्यम्, गन्तव्यम्, चेतव्यम्, पठितव्यम्, भक्षितव्यम्, पूजितव्यम्, दातव्यम्, वक्तव्यम्

कृदन्ते कृत्यप्रकरणस्य निम्नलिखितान् प्रयोगान् ससूत्रम् साध्यन्ताम्?

1. एधितव्यम्–एध् धातोः, 'कर्तरि कृत्' इति सूत्रं प्रबाध्य 'तयोरेव कृत्यक्तखलर्थाः' इति नियमेन 'तव्यत्तव्यानीयरः (3. 1.96)' इति सूत्रेण तव्यप्रत्यये 'आर्धधातुकस्येड्वलादेः' इति इटि 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां सौ 'भावे औत्सर्गिकत्वं क्लीबत्वं च' इति क्लीबत्वात् सोरमि पूर्वरूपे 'एधितव्यम्' इति सिद्धम्।

2. वास्तव्यः–वसतीति वास्तव्यः। वस्धातोः 'वसेस्तव्यत् कर्तरि णिच्च' इति तव्यप्रत्यये णिद्वद्भावे च कृते णित्वादुपधावृद्धौ विभक्तिकार्ये 'वास्तव्यः' इति सिद्धम्।

3. चेयम्–चेतुं योग्यं चेयम्। चीधातो 'अचो यत्' इति यत्प्रत्यये 'आर्धधातुकं शेषः' इति तस्यार्धधातुकत्वे गुणे कृदन्तत्वात् सौ सोरमि पूर्वरूपे 'चेयम्' इति सिद्धम्।

4. देयम्–दातुं योग्यं देयम्। दाधातोः 'अचो यत्' इति

यप्रत्यये 'ईद्यति' इति ईत्वे यतः आर्धधातुकत्वात् गुणे विभक्तिकार्ये 'देयम्' इति सिद्धम्।

5. पण्यम्–'पण् व्यवहारे स्तुतौ च' इति धातोः व्यवहारेर्थे 'अवद्यपण्य' इति सूत्रेण निपातनाद् यति विभक्तिकार्ये 'पण्यम्' इति विक्रेयमित्यर्थः।

6. ब्रह्मोद्यम्–ब्रह्म=वेदः, तं वदतीति ब्रह्मोद्यम्। ब्रह्मोपपदात् वद्धातोः वदः सुपि क्यप् च (3.1.106) इति सूत्रेण क्यपि 'वचिस्वपि-' इति सम्प्रसारणे पूर्वरूपे गुणे विभक्तिकार्ये 'ब्रह्मोद्यम्' इति जातम्।

7. पाव्यम्–पूधातोः 'ओरावश्यके' इति ण्यति 'अचो ञ्णिति' इति वृद्धौ 'वान्तो यि-' इत्यावादेशे विभक्तिकार्ये 'पाव्यम्' इति सिद्धम्।

8. अवश्यलाव्यम्–'लुम्पेदवश्यमः कृत्ये, तुं काममनसोरपि, समो वा हिततयोर्मांसस्य पचि युड्घञोः।।' लुम्पेदिति–कृत्प्रत्यये परे अवश्यम्शब्दस्य मकारो लुप्यते। काममनसोः परयोः तुमो मकारो लुप्यते। हिततयोः परयोः समो मकारो वा लुप्यते, युड्घञ्परके पच्धातौ परे इत्यर्थः। उदाहरणानि यथा–अवश्यलाव्यम्। वक्तुकामः। गन्तुमनाः। सततम्-सन्ततम्। सहितं संहितम्। मांस्पचनी। मांस्पाकः इत्यदि जातम्।

9. भव्यः–भवतीति भव्यः। भूधातोः 'भव्यगेय-प्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा (3.4.68) इति सूत्रेण कर्तरि यत्प्रत्यये गुणे अवादेशे विभक्तिकार्ये 'भव्यः' इति सिद्धम्।

10. प्रतिगृह्यम्–प्रत्युपसर्गात् ग्रहधातोः प्रत्यपिभ्यां ग्रहे (3.1.118) छन्दसीति वक्तव्यम् (वा०1944) इति छन्दसि क्यपि ग्रहिज्येति सम्प्रसारणे विभक्तिकार्ये 'प्रतिगृह्यम्' इति। लोके तु ण्यति वृद्धौ 'प्रतिग्राह्यम्' इति भवति।

11. सान्नाय्यम्–सम्यङ् नीयते होमार्थमग्निम्प्रतीति सान्नाय्यं हविर्विशेषः। अत्र सम्पूर्वान्नीधातोः 'पाय्य-सान्नाय्य-निकाय्य-धाय्यमान-हवि-र्निवास-सामिधेनीषु' इति सूत्रे निपातनात् ण्यत्, आयादेशः, समो दीर्घश्च 'सान्नाय्यम्' इति भवति।

12. अनुद्यम्–नञि उपपदे वद्धातोः 'सुपि क्यप् च' इति क्यपि 'वचिस्वपी' ति सम्प्रसारणे पूर्वरूपे विभक्त्यादिकार्ये 'अनुद्यम्' इति, 'वचसाऽनर्ह गुरुर्नाम' इति शेषः। 'अवद्यपण्यवर्या गर्ह्यपणितव्याऽनिरोधेषु' इति सूत्रस्य गर्हेत्यस्य प्रत्युदाहरणमेतत्।

13. वध्यः–'हन्' धातोः 'हनो वा तद्वधश्च वक्तव्यः' इति वार्तिकेन यत्प्रत्यये हनो वधादेशे च कृते कृदन्तत्वात् सौ रुत्वे विसर्गे 'वध्यः' इति। यदभावपक्षे तु 'ऋहलोर्ण्यत्' इति ण्यत्प्रत्यये 'हनस्तोऽचिण्णलोः' इति नकारस्य तकारे 'हो हन्तेः' इति कुत्वे उपधावृद्धौ कृदन्तत्वात् सौ रुत्वे विसर्गे 'घात्यः' इति भवति। वधादेशस्तु न, यत्सन्नियोगशिष्टत्वेन विहितत्वात्।

14. लाप्यम्–ण्यदपवादभूतं 'पोरदुपधात्' इति यत्प्रत्ययं प्रबाध्य 'ण्यत्प्रकरणे लपिदभिभ्याञ्चेति वक्तव्यम्' इति वार्तिकेन ण्यत्प्रत्यये उपधावृद्धौ विभक्त्यादिकार्ये 'लाप्यम्' इति सिद्धम्।

15. राजसूयेति–अनेन सूत्रेण राजसूय, सूर्य, मृषोद्य, रुच्य, कुप्य, कृष्टपच्य, अव्यथ्य– एते सप्त निपात्यन्ते। तत्र प्रथमनिपातने–राज्ञा सोतव्योऽभिषवद्वारा निष्पादयितव्यः, यद्वा लतात्मकः सोमो राजा, स सूयते=कण्डूयते, अत्रेति विग्रहे 'षुङ् प्राणिप्रसवे' इत्यस्मात् 'धात्वादेः षः' इति सत्वे 'सुञ्' इति। तस्मात् निपातनाद् अधिकरणे क्यपि दीर्घे च कृते विभक्त्यादिकार्ये 'राजसूयः, राजसूयम्' इति सिद्धम्।

16. कथं भार्या वधूः–ननु 'भृञोऽसंज्ञायाम्' इति सूत्रे 'भार्याः क्षत्रिया' इति पुंल्लिङ्गे संज्ञायां 'क्यपोऽभावं कुर्वत्सच्चरितार्थमिति स्त्रीलिङ्गे संज्ञायां न प्रवर्तिष्यते इति भार्या बधूरित्यत्र 'संज्ञायां समजनिषद्' इत्यादिना क्यपा भाव्यमिति चेन्न, 'एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य' इति परिभाषया 'डुभृञ् धारणपोषणयोः' इत्यस्मात् क्र्यादि-पठितदीर्घान्ताद् 'भृ भरणे' इत्यस्मात् वा ण्यत्प्रत्ययस्य सिद्धत्वात् 'संज्ञायां समजनिषत्' इति सूत्रे ह्रस्वान्तभृञ्धातोः पाठेन दीर्घान्तभृधातुविषये तत्सूत्राप्रवृत्तिः। डुभृञ् धातौ अनुबन्धद्वयं वर्तते, भृञ्धातौ चैकानुबन्धो वर्तते, इति डुभृञ् धातुविषयेऽपि तत्सूत्राप्रवृत्तिः।

पूर्णताबोधकभूतकालिकविशेषणम्– (क्त, क्तवतु)

(क) क्त (त) कर्मवाच्ये भाववाच्ये च–कृतः (पुं०), कृता (स्त्री०), कृतम् (नपुं०)।

(ख) क्तवतु (तव) कर्तृवाच्ये गतवान् (पुं०), गतवती (स्त्री०), गतवत् (नपुं०)।

योग्यताबोधकभविष्यत्कालिकविशेषणम् (कृत्य)

प्रत्ययः	धातुः	रूपम् (पुं० स्त्री० नपुं०)	अर्थः
1. तव्यत्,	भू	भवितव्यः, भवितव्या, भवितव्यम्	भवितुं योग्यं
2. तव्य,	गम् पठ्	गन्तव्यः, गन्तव्या, गन्तव्यम् पठितव्यः, पठितव्या, पठितव्यम्	गन्तुं योग्यं पठितुं योग्यं
3. अनीयर्,	दृश्, कृ, पच्, गम्,	दर्शनीयः, करणीयः, पचनीयः, गमनीयः, दर्शनीया, करणीया, पचनीया, गमनीया, दर्शनीयम्, करणीयम्, पचनीयम्, गमनीयम्,	कर्तुं योग्यं
4. केलिमर्, (एलिम)	पच्	पचेलिमः, पचेलिमा, पचेलिमम्,	
5. यत्, (य)	गम्	गम्यः, गम्या, गम्यम्,	
6. क्यप्, (य)	शिक्ष्	शिष्यः, शिष्या, शिष्यम्,	
7. ण्यत् (य)	क्रि	कार्यः, कार्या, कार्यम्,	

कृदन्तप्रत्ययविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—'ण्यन्तः' इत्यस्य कः अर्थः?
   उत्तरम्—णि (णिच्) अन्ते यस्य सः ण्यन्तः।
2. **प्रश्नः**—'सन्नतः' इत्यस्य कः अर्थः?
   उत्तरम्—सन् प्रत्ययः अन्ते यस्य सः सन्नतः।
3. **प्रश्नः**—अत्तुम् इच्छतीति अत्र किं रूपम्?
   उत्तरम्—जिघत्सति।
4. **प्रश्नः**—"कृदतिङ्" इति सूत्रेण का संज्ञा भवति?
   उत्तरम्—कृत्।
5. **प्रश्नः**—कृत्यप्रत्ययाः के सन्ति?
   उत्तरम्— तव्य, तव्यत्, अनीयर्, यत्, क्यप्, य, केलिमर्।
6. **प्रश्नः**—कृत्यप्रत्ययः कस्मिन् भवति?
   उत्तरम्— भावकर्मे।
7. **प्रश्नः**—'कार्यम्' इत्यत्र कः प्रत्ययः?
   उत्तरम्— ण्यत्।
8. **प्रश्नः**—'पचेलिम' इत्यत्र कः प्रत्ययः?
   उत्तरम्— केलिमर्।
9. **प्रश्नः**—'जन+यत् किं रूपम्?
   उत्तरम्— जन्यम्।
10. **प्रश्नः**—लिप्+अनीयर=?
    उत्तरम्— लेपनीयम्।
11. **प्रश्नः**—स्तुधातोः यत् प्रत्ययान्तं रूपं किं भवति?
    उत्तरम्— स्तुत्यः।
12. **प्रश्नः**— निक्षिप्त अत्र प्रकृति-प्रत्ययः कः?
    उत्तरम्—नि+क्षिप्+ल्यप्।
13. **प्रश्नः**—तापः अत्र प्रकृति-प्रत्ययः कः?
    उत्तरम्— तप्+घञ्।
14. **प्रश्नः**—आदिष्टः अस्मिन् पदे कः प्रत्ययः?
    उत्तरम्— क्त।
15. **प्रश्नः**—हस्तयितुम् अस्मिन् पदे कः प्रत्ययः?
    उत्तरम्— तुमुन्।
16. **प्रश्नः**—'भू' धातोः 'क्त' प्रत्ययस्य योगे किं रूपम्?
    उत्तरम्—भूतः।
17. **प्रश्नः**—'कृ' धातोः 'तव्यत्' प्रत्ययस्य योगे किं रूपम्?
    उत्तरम्— कर्तव्यम्।
18. **प्रश्नः**—पठित्वा अत्र कः प्रत्ययः?
    उत्तरम्— पठ्+क्त्वा।
19. **प्रश्नः**—नयमानः अत्र कः प्रत्ययः?
    उत्तरम्— नी+शानच्।

20. प्रश्नः—ज्ञातुम् अत्र कः प्रत्ययः?
उत्तरम्— ज्ञा+तुमुन्।

21. प्रश्नः—भवितुम् अत्र कः प्रत्ययः?
उत्तरम्— तुमुन्।

22. प्रश्नः—हन् धातोः क्तप्रत्ययविहिते सति किं रूपम्?
उत्तरम्— हतः।

23. प्रश्नः—हस्+क्तवतु इत्यस्य योगे किं रूपम्?
उत्तरम्— हसितवान्।

(ग) (O-Code-25x73) सिद्धान्तकौमुदी- (20) तिङन्तप्रक्रिया (भू.एध्) परस्मैपद-आत्मनेपद-विधानम् एवं तिङन्त-विषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

13. (कौमुदी) तिङन्तप्रक्रिया (भू.एध्) -धातुरूपम्-परस्मैपदिनः प्रत्ययाः- (क) 'भू'धातुः

लकार	पुरुष	एकवचन द्विवचन बहुवचन	लकार, पुरुष	एकवचन द्विवचन बहुवचन
लट्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	भवति भवतः भवन्ति भवसि भवथः भवथ भवामि भवावः भवामः	लिट्-प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	बभूव बभूवतुः बभूवुः बभूविथ बभूवथुः बभूव बभूव बभूविव बभूविम
लुट्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	भविता भवितारौ भवितारः भवितासि भवितास्थः भवितास्थ भवितास्मि भवितास्वः भवितास्मः	लृट् प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	भविष्यति भविष्यतः भविष्यन्ति भविष्यसि भविष्यथः भविष्यथ भविष्यामि भविष्यावः भविष्यामः
लोट्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	भवतु भवताम् भवन्तु भव भवतम् भवत भवानि भवावः भवामः	लङ् प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	अभवत् अभवताम् अभवन् अभवः अभवतम् अभवत अभवम् अभवाव अभवाम
विधिलिङ्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	भवेत् भवेताम् भवेयुः भवेः भवेतम् भवेत भवेयम् भवेव भवेम	आ.लि. प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	भूयात् भूयास्ताम् भूयासुः भूयाः भूयास्तम् भूयास्त भूयासम् भूयास्व भूयास्म
लुङ्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	अभूत् अभूताम् अभूवन् अभूः अभूतम् अभूत अभूवम् अभूव अभूम	लृङ् प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	अभविष्यत् अभविष्यताम् अभविष्यन् अभविष्यः अभविष्यतम् अभविष्यत अभविष्यम् अभविष्याव अभविष्याम

(1) भवति-भूधातोः लट् लकारे प्रथमपुरुष-एकवचनस्य परस्मैपदीयं रूपम् 'तिप्तस्झि॰' इत्यादिना लट् स्थाने तिप्, अनुबन्धलोपे सति 'भू+ति' इति जाते, शपि 'सार्वधातुकार्धधातुकयोः' इति गुणे, अवादेशे सति 'भव्+अ+ति' इति स्थिते वर्णसम्मेलनेन 'भवति' इति सिद्धम्।

(2) भवतु-भूधातोः 'लोटि च' इति सूत्रेण लोटि तस्य स्थाने 'तिप्तस्झि॰' इत्यादिना तिपि, अनुबन्धलोपे, 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकत्वे, 'कर्तरि शप्' इति शपि 'सार्वधातुकार्धधातुकयोः' इति गुणे, अवादेशे 'एरुः' इत्यनेन लोटि इकारस्य उकारे 'भवतु' इति सिद्धम्।

(3) भव-भूधातोः 'लोटि च' इति सूत्रेण लोटि तस्य स्थाने 'तिप्तस्झि॰' इत्यादीना सिपि अनुबन्धलोपे, 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकत्वे, 'कर्तरि शप्' इति शपि गुणे अवादेशे 'सेह्यपिच्च' इति सेर्ह्यादेशे पित्त्वे च 'अतो हेः' इति हेर्लुकि 'भव' इति सिद्धम्।

(4) भवेयुः-भूधातोः 'विधिनिमन्त्रणामन्त्रणाधीष्ट-सम्प्रश्नप्रार्थनेषु लिङ्' इति लिङि तत्स्थाने 'तिप्तस्झि॰' इत्यादिना झौ तस्य सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे 'भू-अ-झि' इति स्थिते गुणे अवादेशे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति यासुटि अनुबन्धलोपे 'अतो येयः' इति यासः इत्यादेशे गुणे 'झेर्जुस्' इति झेर्जुसादेशे अनुबन्धलोपे सस्य रुत्वे विसर्गे च 'भवेयुः' इति सिद्धम्।

(ख) एध्-धातुरूपम् (आत्मनेपदिनः प्रत्ययाः)

लकार	पुरुष	एकवचन द्विवचन बहुवचन
1. लट्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	एधते- एधेते- एधन्ते, एधसे- एधेथे- एधध्वे, एधे- एधावहे- एधामहे,
लिट्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	**एध्-धातोः लिट्-लकारे भू-धातोः अनुप्रयोगे-** प्र०पु०-एधाम्बभूव-एधाम्बभूवतुः-एधाम्बभूवुः, म०पु०-एधाम्बभूविथ-एधाम्बभूवथुः-एधाम्बभूव उ०पु०-एधाम्बभूव, एधाम्बभूविव-एधाम्बभूविम,
2. लुट्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	एधिता-एधितारौ-एधितारः, एधितासे-एधितासाथे-एधिताध्वे, एधिताहे-एधितास्वहे-एधितास्महे,
3. लोट्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	एधताम्-एधेताम्- एधन्ताम्, एधस्व-एधेथाम्- एधध्वम्, एधै-एधावहै- एधामहै,
4. विधि लिङ्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	एधेत-एधेयाताम्-एधेरन्, एधेथाः-एधेयाथाम्-एधेध्वम्, एधेय-एधेवहि- एधेमहि,
5. लुङ्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	ऐधिष्ट-ऐधिषाताम्-ऐधिषत, ऐधिष्ठाः-ऐधिषाथाम्-ऐधिढ्वम्, ऐधिषि-ऐधिष्वहि-ऐधिष्महि,
6. लिट्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	एधाञ्चक्रे-एधाञ्चक्राते-एधाञ्चक्रिरे, एधाञ्चकृषे-एधाञ्चक्राथे-एधाञ्चकृढ्वे एधाञ्चक्रे-एधाञ्चकृवहे-एधाञ्चकृमहे,
लिट्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	**एध् धातोः लिट् लकारे अस् धातोः अनुप्रयोगे-** प्रथमपुरुषः-एधामास-एधामासतुः-एधामासुः, मध्यमपुरुषः-एधामासिथ-एधामासथुः-एधामास, उत्तमपुरुषः-एधामास-एधामासिव-एधामासिम,
7. लृट्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	एधिष्यते-एधिष्येते-एधिष्यन्ते, एधिष्यसे-एधिष्येथे-एधिष्यध्वे, एधिष्ये-एधिष्यावहे-एधिष्यामहे,

लकार	पुरुष	एकवचन द्विवचन बहुवचन
8. लङ्	प्रथमपुरुष	ऐधत-ऐधेताम्-ऐधन्त,
	मध्यमपुरुष	ऐधथाः-ऐधेथाम्-ऐधध्वम्,
	उत्तमपुरुष	ऐधे-ऐधावहि-ऐधामहि,
9. आ. लिङ्	प्रथमपुरुष	एधिषीष्ट-एधिषीयास्ताम्-एधिषीरन्,
	मध्यमपुरुष	एधिषीष्ठाः-एधिषीयास्थाम्-एधिषीध्वम्
	उत्तमपुरुष	एधिषीय-एधिषीवहि-एधिषीमहि,
10. लृङ्	प्रथमपुरुष	ऐधिष्यत-ऐधिष्येताम्-ऐधिष्यन्त,
	मध्यमपुरुष	ऐधिष्यथाः-ऐधिष्येथाम्-ऐधिष्यध्वम्,
	उत्तमपुरुष	ऐधिष्ये-ऐधिष्यावहि-ऐधिष्यामहि,

(5) **एधसे**-एध् धातोर्लटि तत्स्थाने शपि 'थासः से' इति थासः से आदेशे 'एधसे' इति सिद्ध्यति।

(6) **एधताम्**-एध् धातोर्लोटि तस्य स्थाने तप्रत्यये शपि 'टित आत्मनेपदानां टेरे' इति टेः एत्वे 'आमेतः' इति लोट् ऐकारस्य आमादेशे 'एधताम्' इति सिद्धयति।

(7) **एधै**-एध् धातोर्लोटि तत्स्थाने 'तस्थस्थ-' इत्यादिना इटि शपि 'टित् आत्मनेपदानां टेरे' इति एत्वे 'एत ऐ' इत्यनेन लोडुत्तमस्य एत ऐकारादेशे वृद्धौ 'एध' इति सिद्धयति।

(8) **ऐधिषत**- एध् धातोर्लुङि तत्स्थाने झप्रत्यये 'आडजादीनाम्' इत्यादि अनुबन्धलोपे 'आटश्च' इति वृद्धौ 'ऐध+झ' इति स्थिते मध्ये च्लौ लस्य सिचि इचि गते सिचः आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति इटि 'आत्मनेपदेष्वनतः' इति झस्य अदित्यादेशे 'ऐधिषत' इति सिद्धम्।

14. परस्मैपद-आत्मनेपदविधानम् 1. परस्मैपदिनः प्रत्ययाः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	सः-तिप् (ति) पठति	तौ-तस् (तः) पठतः	ते-झि (अन्ति) पठन्ति
मध्यमपुरुषः	त्वम् सिप् (सि) पठसि	युवाम् थस् (थः) पठथः	यूयम् थ पठथ
उत्तमपुरुष	अहम्-मिप् (मि) पठामि	आवाम्-वस् (वः) पठवः	वयम्-मस् (मः) पठामः

2. आत्मनेपदिनः प्रत्ययाः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	त (वर्धते)	आताम् (वर्धेते)	झ (वर्धन्ते)
मध्यमपुरुषः	थास् (वर्धसे)	आथाम् (वर्धेथे)	ध्वम् (वर्धध्वे)
उत्तमपुरुष	इट् (वर्धे)	वहि (वर्धावहे)	महिङ् (वर्धामहे)

एतेषाम् आरम्भे 'ल' अस्ति इति कारणात् 'लकाराः' इत्युच्यन्ते। पाणिनि उक्ताः दशलकाराः इत्थं भवन्ति। वर्तमान-भूत-भविष्यद्रूपेण त्रयः कालाः भवन्ति।

क्र सं.	लकारः	अर्थः	सूत्रम्	उदाहरणम्
1.	लट्	वर्तमानम्	वर्तमाने लट्	भवति
2.	लिट्	अनद्यतनपरोक्षभूतम्	परोक्षे लिट्	बभूव
3	लुट्	अनद्यतनभविष्यत्	अनद्यतने लुट्	भविता
4.	लृट्	सामान्यभविष्यत्	लृट् शेषे च	भविष्यति
5.	लोट्	विधि-आशीर्वाद-आदेशादयः	'लोट् च, आशिषि लिङ्लोटौ'	भवतु
6.	लङ्	अनद्यतनभूतम्	अनद्यतने लङ्	अभवत्
7.	लुङ्	अद्यतनभूतार्थे	लुङ्	अभूत्
8.	विधिलिङ्	विधि-निमन्त्रणसत्कारादयः	'विधिनिमन्त्रणा-	भवेत्
9.	आशीर्लिङ्	आशीर्वाद	आशिषि लिङ्लोटौ	भूयात्
10	लृङ्	हेतुहेतुमद्भावभविष्यत्	'लिङ्निमित्ते लृङ् क्रियातिपत्तौ'	अभविष्यत्

आत्मनेपदपरस्मैपदविमर्शः-संस्कृतभाषायाः व्याकरणे धातोर्विधीयमानाः प्रत्यया आत्मनेपदपरस्मैपदसंज्ञकेषु प्रत्ययेषु विभक्ताः। प्रथमपुरुषः-तिप्, तस्, झि, मध्यमपुरुषः-सिप्, थस्, थ, उत्तमपुरुषः-मिप्, वस्, मस् इत्येते नव प्रत्ययाः।

'लः परस्मैपदम् (1.4.99)' इति परस्मैपदसंज्ञाः स्युः। परस्मैपदिनः। प्रथमपुरुषः-त, आताम्, झ, मध्यमपुरुषः-थास्, आथाम्, ध्वम्, उत्तमपुरुषः-इट्, वहि, महिङ्, एते नव प्रत्ययाः 'तङानावात्मनेपदम्' (1.4.100) इति सूत्रेणाऽऽत्मनेपदिनः। उपस्थितेन धातुरूपप्रकृतिसन्निहितेनाऽऽत्मनेपदेन परस्मैपदेनाऽन्येन वा लादेशेन गृह्यते-गम्यते व्यज्यते प्रतीयते वेति व्युत्पत्या उपग्रहः संगच्छते।

तिङन्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—धातवः कतिषु गणेषु विभक्ताः सन्ति?
   उत्तरम्— दशसु गणेषु।
2. **प्रश्नः**—धातु-गणानां नामावली का?
   उत्तरम्—1. भ्वादिः, 2. अदादिः, 3. जुहोत्यादिः, 4. दिवादिः, 5. स्वादिः, 6. तुदादिः, 7. रुधादिः, 8. तनादिः, 9. क्र्यादिः, 10. चुरादिः।
3. **प्रश्नः**—कस्मिन् गणे अल्पधातवः वर्तन्ते?
   उत्तरम्— तनादिगणे।
4. **प्रश्नः**— कति धातवः सन्ति?
   उत्तरम्— (1970)
5. **प्रश्नः**—व्याकरणस्य प्रक्रियां-परम्परायाः पर्यायभूत-आचार्य-भट्टोजिदीक्षितस्य सूत्रानुक्रमाणां पाणिनीयव्याकरणस्य व्याख्यानग्रन्थः कः?
   उत्तरम्— शब्दकौस्तुभः।
6. **प्रश्नः**—व्याकरणस्य दार्शनिकसन्दर्भोपरि भट्टोजिदीक्षितस्य विमर्शात्मकग्रन्थः कः?
   उत्तरम्— व्याकरणमतोन्मज्जनम्।
7. **प्रश्नः**—धातुभिः कस्य विधानं भवति?
   उत्तरम्— तिङ्-पदस्य।
8. **प्रश्नः**—वर्तमानकाले (Present tense) कति लकाराः भवन्ति?
   उत्तरम्— (त्रयः) 1. लट्, 2. लोट्, 3. लिङ्।
9. **प्रश्नः**— भविष्यत्काले (Future tense) कति लकाराः भवन्ति?
   उत्तरम्— (द्वौ) 1. लृट्, 2. लुट्।
10. **प्रश्नः**—भूतकाले (Past tense) कति लकाराः भवन्ति?
    उत्तरम्— 4 चत्वारः, 1. लङ्, 2. लिट्, 3. लृङ्, 4. लुङ्।
11. **प्रश्नः**—धातूनां कौ द्वौ भेदौ?
    उत्तरम्— 1. परस्मैपदी, 2. आत्मनेपदी।
12. **प्रश्नः**— कस्य लकारस्य प्रयोगः वेदे भवति?
    उत्तरम्— लेट् लकारस्य।
13. **प्रश्नः**—लिङ् लकारस्य कति भेदाः?
    उत्तरम्— 1. आशीर्लिङ्, 2. विधिलिङ्।
14. **प्रश्नः**—धातूनां कति गणाः सन्ति, के च ते?
    उत्तरम्— दश, 1. भ्वादि, 2. अदादि, 3. जुहोत्यादि, 4. दिवादि, 5. स्वादि, 6. तुदादि, 7. रुधादि, 8. तनादि, 9. क्रयादि, 10. चुरादि।

15. **प्रश्नः**—कति लकाराः के च ते?
उत्तरम्—(10 दश) 1, लट्, 2, लिट्, 3. लुट्, 4. लृट्, 5. लेट्, 6. लोट्, 7. लङ्, 8. लिङ्, 9. लुङ्, 10. लृङ्।

16. **प्रश्नः**—कस्मिन् गणे सर्वाधिकं धातुसंख्या भवन्ति?
उत्तरम्— भ्वादिगणे 1035 धातवः सन्ति।

17. **प्रश्नः**—अल्पतरा धातवः कस्मिन् गणे सन्ति?
उत्तरम्— तनादिगणे, 10 दश।

18. **प्रश्नः**— धातुपाठे कति धातवः परिगणिताः सन्ति?
उत्तरम्— (1940)।

19. **प्रश्नः**—'भू-सत्तायाम्' इति धातोः लुङि मध्यमपुरुषैकवचने किं रूपम्?
उत्तरम्— अभूः।

20. **प्रश्नः**—व्रज-गतौ इति धातोः आत्मनेपदि लुटि प्रथमपुरुषैकवचने किं रूपम्?
उत्तरम्— व्रजिष्यते।

21. **प्रश्नः**—'जनी प्रदुर्भावे' इति धातोः लिङि प्रथमपुरुषैकवचने किं रूपम्?
उत्तरम्— जायेत।

22. **प्रश्नः**—दृशिर्-प्रेक्षणे धातोः लिटि कर्तरि प्रथमपुरुषरूपाणि दर्शय?
उत्तरम्— ददर्श-ददृशतुः-ददृशुः।

23. **प्रश्नः**—'मन-ज्ञाने' इति धातोः लिङि प्रथमपुरुषैकवचने किं रूपम्?
उत्तरम्— अमनत।

24. **प्रश्नः**—'ब्रूञ् व्यक्तायां वाचि' धातोः लिटि प्र.पु.रूपाणि कानि?
उत्तरम्— उवाच-ऊचतुः-ऊचुः।

25. **प्रश्नः**—वृतु-वर्तते इति धातोः लटि उत्तमपुरुषरूपाणि दर्शयत?
उत्तरम्— वर्ते-वर्तावहे-वर्तामहे।

26. **प्रश्नः**—गम्लृ-गतौ धातोः विधिलिङि मध्यमपुरुषरूपाणि दर्शय?
उत्तरम्— गच्छेः-गच्छेतं-गच्छेत।

27. **प्रश्नः**—'गद-व्यक्तायां वाचि' धातोः लङि प्रथमपुरुषरूपाणि कानि?
उत्तरम्— अगदत्-अगदतां-अगदन्।

28. **प्रश्नः**—'लोक-दर्शने' धातोः लोटि प्रथमपुरुषरूपाणि कानि?
उत्तरम्— लोकतां-लोकेताम्-लोकन्ताम्।

29. **प्रश्नः**—'लिख-अक्षरविन्यासे' धातोः आशीर्लिङि प्र. पु.एकवचने किं रूपम्?
उत्तरम्— लिख्यात्।

30. **प्रश्नः**—'डुदाञ्-दाने धातोः लटि उत्तमपुरुषे परस्मैपदि द्विवचने किं रूपम्?
उत्तरम्— दद्वहे।

31. **प्रश्नः**—वद-व्यक्तायां वाचि इति धातोः लिटि प्र.पु. रूपाणि कानि?
उत्तरम्— उवाद-ऊदतुः-उद्युः।

32. **प्रश्नः**—दाञ्-दाने' धातोः लटि प्रथमपुरुषरूपाणि कानि?
उत्तरम्— यच्छति-यच्छतः-यच्छन्ति।

33. **प्रश्नः**—दा-मा-स्था-पा-एषां कर्मणि लटि रूपाणि निर्दिशत?
उत्तरम्— दीयते-भीयते-स्थीयते-पीयते।

34. **प्रश्नः**—लभ्-रभ्-अधी एषां कर्तरि लटि रूपाणि दर्शय?
उत्तरम्— लभते-रभते-अधीते।

35. **प्रश्नः**—'भी' धातोः लटि प्र.पु.एकवचनं रूपं किम्?
उत्तरम्— बिभेति।

36. **प्रश्नः**—'भिद्'धातोः लटि प्र.पु.एकवचनं रूपं किम्?
उत्तरम्—भिनत्ति।

37. **प्रश्नः**—'स्मि' धातोः लटि प्र.पु.बहुवचने किं रूपम्?
उत्तरम्— स्मयन्ते।

38. **प्रश्नः**—'एधिता' कस्य लकारस्य रूपमस्ति?
उत्तरम्— लुट् लकारस्य।

39. **प्रश्नः**—नश्-रूध्-इष्-शक्-एषां लिटि प्रथमैक-वचनरूपाणि लिखत?
उत्तरम्— ननाश-रुरोध-इयेष-शशाक।

40. **प्रश्नः**—हृ हरणे इति धातोः लट्लकारे प्रथमपुरुषैकवचने किं रूपम्?
उत्तरम्— हरति।

41. **प्रश्नः**—वेत्ति-विन्दति-विद्यते-एषां मूलधातवः के?
उत्तरम्— विद् ज्ञाने-विद् प्राप्तौ-विद् सत्तायाम्।

42. **प्रश्नः**—'निपीय' इत्यस्य मूलधातोः नाम किम्?
उत्तरम्— पा-पाने।

43. **प्रश्नः**—'दृशिर्' प्रेक्षणे इति धातोः लृट् लकार प्र.पु. द्विवचनरूपं किम्?
उत्तरम्— द्रक्ष्यतः।

44. **प्रश्नः**—'भू' धातोः लट्लकारे प्रथमपुरुषैकवचने किं रूपम्?
उत्तरम्— भवति।

45. **प्रश्नः**—'अद्'धातोः लोट् लकारस्य उत्तमैकवचने किं रूपम्?
उत्तरम्— अदानि।

46. **प्रश्नः**—'जुहोमि' हु धातोः कस्य लकारस्य रूपमस्ति इति निर्धारणं करोतु?
उत्तरम्— लट्।

47. **प्रश्नः**—'दिव्' धातोः लङ्लकारस्य रूपं किम्?
उत्तरम्— अदीव्यत्।

48. **प्रश्नः**—'तुद्' धातोः आत्मनेपदस्य लट्लकारस्य प्रथमपुरुषैकवचनस्य रूपं किम्?
उत्तरम्— तुदते।

49. **प्रश्नः**—रुध् धातोः लोट् लकारस्य मध्यमपुरुषस्य बहुवचनस्य रूपं किम्?
उत्तरम्— रुद्ध।

50. **प्रश्नः**—'तन्' धातोः विधिलिङ् लकारस्य म.पु. एकवचने किं रूपम्?
उत्तरम्— तनुथ।

51. **प्रश्नः**—चर् धातोः उत्तमपुरुषस्य लट् लकारस्य रूपं किम्?
उत्तरम्— चोरयामि-चोरयावः-चोरयामः।

52. **प्रश्नः**—'बभूव' इत्यत्र को धातुः?
उत्तरम्— भू।

53. **प्रश्नः**—'जघास' इत्यत्र को धातुः?
उत्तरम्— अद्।

54. **प्रश्नः**—'तोत्स्यति' इत्यत्र लकारः कः?
उत्तरम्— लृट्।

55. **प्रश्नः**—"एधन्ताम्' इति कस्य लकारस्य रूपमस्ति?
उत्तरम्— लोट् लकारस्य।

56. **प्रश्नः**—धातुरूपेषु कति लकाराः भवन्ति?
उत्तरम्— 10 दश।

57. **प्रश्नः**—धातुरूपव्यवस्थायां कति पुरुषाः संयोजिताः सन्ति?
उत्तरम्— 3 त्रयः पुरुषाः।

58. **प्रश्नः**—'नम्'धातोः लृट्लकारे म.पु.द्वि.वचने किं रूपम्?
उत्तरम्— नंस्यथः।

59. **प्रश्नः**—'या'धातोः लोटि मध्यमपुरुषैकवचने किं रूपम्?
उत्तरम्— याहि।

60. **प्रश्नः**—स्थाधातोः विधिलिङ्लकारे उ.पु.एकवचने किं रूपम्?
उत्तरम्— तिष्ठेयम्।

61. **प्रश्नः**—नमयति-नाशयति-पाठयति-एतेषु कः प्रत्ययः?
उत्तरम्— णिच्प्रत्ययः।

62. **प्रश्नः**—ब्रूञ्+णिच्-किं रूपं भवेत्?
उत्तरम्— वाचयति।

63. **प्रश्नः**—रामः पठितुम् इच्छति-किं पदं साधु?
उत्तरम्— पिपठिषति।

64. **प्रश्नः**—वक्तुम् इच्छति इत्यत्र किं रूपं स्यात्?
उत्तरम्— विवक्षति।

65. **प्रश्नः**—'भवति' इत्यत्र केन सूत्रेण 'भवत् उ'= भवतु इति पदं निष्पद्यते?
उत्तरम्— एरुः।

66. **प्रश्नः**—रामः सीताम् आप्तुम् इच्छति- सन्नन्तरूपं दर्शय?
उत्तरम्— ईप्सति।

67. **प्रश्नः**—पिता पुत्रविषये ज्ञातुम् इच्छति-सन्नन्तरूपं किम्?
उत्तरम्— जिज्ञासते।

68. प्रश्नः—सः पुस्तकं दातुम् इच्छति-सन्नन्तरूपं किम्?
उत्तरम्— दित्सति।

69. प्रश्नः—हरिणी इव आचरति इति किम्?
उत्तरम्— हरिणायते।

70. प्रश्नः—ज्ञा+सन्+तिप्= किं रूपम्?
उत्तरम्— जिज्ञासते।

71. प्रश्नः—'सेव्'धातोः लोटि प्रथमपुरुषद्विवचने किं रूपम्?
उत्तरम्— सेवेथाम्।

72. प्रश्नः—'हृ' धातोः विधिलिङ्लकारे उत्तमपुरुषद्विवचने किं रूपम्?
उत्तरम्— हरेवहि।

73. प्रश्नः—"आड् उत्तमस्य पिच्च" इति सूत्रेण किं निष्पद्यते?
उत्तरम्— भवाम।

74. प्रश्नः—"अभ्यासे चर् च" इति सूत्रेण किं निष्पद्यते?
उत्तरम्— बभूव।

75. प्रश्नः—'इज्यात्' इत्यत्र को धातुः?
उत्तरम्— यज्।

76. प्रश्नः—'अचूचुरत्' इत्यत्र कः लकारः?
उत्तरम्— लुङ्।

77. प्रश्नः—परस्मैपदसंज्ञकाः के प्रत्ययाः?
उत्तरम्— (11) एकादशप्रत्ययाः, 1. तिप्, 2. तस्, 3. झि, 4. सिप्, 5. थस्, 6. थ, 7. मिप्, 8. वस्, 9. मस्, 10. शतृ, क्वसुश्चेति।

78. प्रश्नः—आत्मनेपदसंज्ञकाः प्रत्ययाः के सन्ति?
उत्तरम्— (11) एकादशप्रत्ययाः, 1. त, 2. आताम्, 3. झ, 4. थास्, 5. आथाम्, 6. ध्वम्, 7. इट्, 8. वहि, 9. महिङ्, 10. शानच्, 11. कानच्।

79. प्रश्नः—चर-गतिभक्षणयोः इति धातोः लुटि प्रथमपुरुषबहुवचने किं रूपम्?
उत्तरम्— चरितारः।

80 प्रश्नः—'भू' धातु-लोट्लकारस्य-मध्यमपुरुषैकवचनस्य किं रूपम्?
उत्तरम्— भव।

81. प्रश्नः—'एधाञ्चकृद्वे' कस्य लकारस्य रूपमस्ति?
उत्तरम्—लिट् लकारस्य।

(21) (MNO) (क्खग) व्याकरणशास्त्रस्य प्रमुखग्रन्थाः ग्रन्थकाराश्च

क्र.	ग्रन्थनाम	ग्रन्थकारः
1.	अष्टाध्यायी	पाणिनिः
2.	लघुसिद्धान्तकौमुदी	वरदराजः
3.	मध्यसिद्धान्तकौमुदी	वरदराजः
4.	सिद्धान्तकौमुदी	भट्टोजिदीक्षितः
5.	प्रक्रियाकौमुदी	रामचन्द्रः
6.	लिङ्गानुशासनम्	व्याडिः
7.	वाक्यपदीयम्	भर्तृहरिः
8.	महाभाष्यम्	पतञ्जलिः
9.	वार्तिककारः	कात्यायनः
10.	प्रौढमनोरमा	भट्टोजिदीक्षितः
11.	मनोरमाकुचमर्दनम्	पण्डितराजो जगन्नाथः
12.	सारकौमुदी	वरदराजः
13.	लघुशब्देन्दुशेखरः	नागेशभट्टः
14.	परिभाषेन्दुशेखरः	नागेशभट्टः
15.	उद्योतः	नागेशभट्टः
16.	परमलघुमञ्जूषा	नागेशभट्टः
17.	वैयाकरण-सिद्धान्तलघुमञ्जूषा	नागेशभट्टः
18.	काशिका-वृत्तिग्रन्थम्	जयादित्य वामन
19.	प्रदीपटीकाकारः	कैयट
20.	काशिकाविवरणपञ्जिका	जिनेन्द्रबुद्धिः
21.	पदमञ्जरी	हरदत्तः
22.	वैयाकरणभूषणसारः	कौण्डभट्टः
23.	तत्त्वबोधिनी	ज्ञानेन्द्र सरस्वती
24.	बालमनोरमा	वासुदेवदीक्षितः
25.	पदमञ्जरी	हरदत्तः

क्र.	ग्रन्थनाम	ग्रन्थकारः
26.	न्यास	जिनेन्द्रबुद्धि
27.	स्वर्गारोहणम्	कात्यायनः
28.	कात्यायनस्मृतिः,	कात्यायनः
29.	उभयसारिकाभाणः	कात्यायनः
30.	भ्राजश्लोकाः	कात्यायनः
31.	रूपावतारः	धर्मकीर्तिः
32.	प्रक्रियाकौमुदी	रामभद्राचार्यः
33.	मनोरमामण्डन	भानुजिदीक्षितः
34.	व्याकरणसिद्धान्त-सुधानिधि	विश्वेश्वर पाण्डेयः
35.	शब्दकौस्तुभः	भट्टोजिदीक्षित
36.	वैयाकरणभूषणकारिका	भट्टोजिदीक्षित
37.	शब्दरत्न	हरिदीक्षितः
38.	अष्टाध्यायीवृत्तिः	वररुचि
39.	अष्टाध्यायीभाष्यवृत्तिः	दयानन्द सरस्वती
40.	रूपमाला	विमल सरस्वती
41.	प्रक्रियासर्वस्वम्	नारायणभट्टः
42.	महाभाष्यदीपिका	भर्तृहरि
43.	प्रयोगसंग्रहः	वररुचि
44.	प्रयोगमुखम्	धर्मकीर्ति
45.	समासशक्ति-दीपिका	दीनबन्धु झा

7
भाषाविज्ञानम् (Linguistics)

(P) (Code-25)

1. भाषायाः परिभाषा—भाषाविज्ञानं भाषाया अध्ययनस्य विज्ञानम्। "वर्णनात्मक-ऐतिहासिक-तुलनात्मकानामध्ययनानां माध्यमेन भाषायाः प्रकृतेः विकासस्योत्पत्तेः संरचनायाश्चाध्ययनपूर्वकम् एतेषां समेषां विषयाणां सैद्धान्तिकं निर्धारणमेव भाषाविज्ञानम्।" अर्थात् "भाषाविज्ञानं भाषायाः उत्पत्तेः, तस्याः संरचनायाः, तस्याः विकासस्य, तस्याः ह्रासस्य च अध्ययनं क्रियते। भाषाविज्ञाननामके विषये शास्त्रेऽस्मिन् शब्दानामुत्पादितः रूपविकासः, वाक्यानां संरचनाप्रभृतीनां विषयाणां विवेचनं क्रियते। अनेन प्रकारेण भाषाविज्ञानस्य माध्यमेन कस्याश्चन भाषायाः वैज्ञानिकमध्ययनं क्रियते इति निश्चीयते।

भाषाविज्ञाने ध्वनेः—ध्वनि-उच्चारणोपयोगिनां स्वरयन्त्रमुखजिह्वादि-अङ्गानां, प्रकृति-प्रत्ययादीनां, संज्ञा-सर्वनाम-क्रिया-विशेषणादीनां, नामाख्यातोपसर्गनिपातानां, पदपदार्थविषयकानां विकारादीनां, विकारमूलककारकाणाम् अन्येषां विविधविध-विषयाणाञ्च अध्ययनं क्रियते। कथितं यथा कपिलदेवमहोदयेन–

भाषाया यत्तु विज्ञानं, सर्वाङ्गं व्याकृतात्मकम्।
विज्ञानदृष्टिमूलं तद्, भाषाविज्ञानमुच्यते।।

महर्षिणा पतञ्जलिनोक्तमित्यमेव–"**व्यक्ता वाचि वर्णा येषां त इमे व्यक्तवाचः**" (महाभाष्ये)

यथोक्तं भोलानाथतिवारि-महोदयेन- "**ऐतिहासिक-तुलनात्मकाध्ययनमाध्यमेन भाषाणां प्रकृतेः, विकास-परम्परायाः, भाषयिकसंरचनायाश्च विधिपूर्वकं विशिष्टाध्ययनं सिद्धान्तनिर्धारणं च भाषाविज्ञान-मित्युच्यते।**" एवं च आचार्यदेवेन्द्रनाथशर्ममहोदयेन कथितम्-"**भाषायाः विशिष्टं ज्ञानं भाषाविज्ञानम्**"।

2. भाषाणां वर्गीकरणम् (आकृतिमूलकं परिवारमूलकं च)

सम्प्रति अस्मिन् संसारे त्रीणि सहस्राणि भाषाः प्रचलन्ति। एतासां सर्वासां भाषाणां द्विधा वर्गीकरणं कृतमस्ति।

(1) आकृतिमूलकं वर्गीकरणम्—भाषायाः आकृति-मूलकवर्गीकरणस्य अनेकानि अभिधानानि- "रूपात्मकं रचनात्मकं पदात्मकञ्च वर्तन्ते। वर्गीकरणस्यास्याधारः सम्बन्धतत्त्वमस्ति। वर्गीकरणेऽस्मिन् वाक्यानां पदानाञ्च अध्ययनं क्रियते। एतदनुसारेणात्र वर्गद्वयम् उपलभ्येते- (क) अयोगात्मिकाः भाषाः। (ख) योगात्मिकाः भाषाश्च। योगात्मिके भाषासंवर्गे पुनस्त्रिविधाः उपवर्गाः सन्ति–1. अश्लिष्टाः, 2. श्लिष्टाः, 3. प्रश्लिष्टाश्च। यथा–

आकृतिमूलकं वर्गीकरणम्–



(2) पारिवारिकं वर्गीकरणम्–भाषायाः पारिवारिकं वर्गीकरणमतीव वैज्ञानिकमस्ति। वर्गीकरणेऽस्मिन् रचनातत्त्वम्, अर्थतत्त्वञ्च समानरूपेण आलोच्येते। ध्वनिः, पदरचना, वाक्यरचना, अर्थः, शब्दसम्पत्तिः, स्थानसान्निध्यं च एतेषु षट्सु विषयेषु साम्ये सति भाषायाम् एकः परिवारः भवति।

डॉ. देवेन्द्रनाथशर्मा महोदयः वर्गीकरणेऽस्मिन् अष्टादशभाषापरिवाराणां नामानि निर्दिशति–

1. भारोपीय-परिवारः,	2. द्राविड-परिवारः,	3. बुरुशस्की-परिवारः,
4. काकेशी-परिवारः,	5. यूराल-अल्टाई-परिवारः,	6. चीनी-परिवारः,
7. जापानी-कोरियाई-परिवारः,	8. अत्युत्तरी-परिवारः,	9. बास्क-परिवारः,
10. सामी-हामी-परिवारः,	11. सूडानी-परिवारः,	12. बान्तू-परिवारः,
13. होतेन्तोत-बुशमैनी-परिवारः,	14. मलय-पोलिनेशियाई-परिवारः,	15. पापुई-परिवारः,
16. आस्ट्रेलियन-परिवारः,	17. द.पू.एशियाई परिवारः,	18. अमरीकी-परिवारः,

3. मानवीयध्वनियन्त्रस्य अध्ययनम्
(Speech&Mechanism)

ध्वनिवर्गीकरणम्–श्रूयते तदेव ध्वनिः। भाषाध्वनिः वक्त्रा ब्रूयते श्रोत्रा च श्रूयते। भाषायाः प्रारम्भः ध्वनेः एव भवति। ध्वनिनां प्राचीनतमं वर्गीकरणं स्वर-व्यञ्जनम् इति रूपेऽस्ति। स्थान-प्रयत्न-करणैः एव मानव-वाग्यन्त्रस्य निर्मितिः सम्भवति। इमे सर्वे एव सम्मिलितरूपेण ध्वन्युत्पादकाः सन्ति। अत एव एभिः साहाय्येन एव ध्वनेः वर्गीकरणं कर्तुं शक्यते। इमे सर्वे भाषिक-ध्वन्याधारभूताः त्रिवर्गेषु वर्गीकृताः ध्वन्युत्पादकाः अधोलिखिताः। (क) स्थानम्-कण्ठच्छदादारभ्य ओष्ठपर्यन्तं स्थानसंज्ञकाः अवयवाः अधोलिखिताः सन्ति–

(क) मुखगत-स्थान-बोधक-चक्रम्

कण्ठः	तालु	ओष्ठ	मूर्धा	दन्ताः	कण्ठतालु	कण्ठोष्ठम्	दन्तोष्ठम्	जिह्वामूलम्
अ	इ	उ	ऋ	लृ	ए	ओ	व्	⨯क
क्	च्	प्	ट्	त्	ऐ	औ		⨯ख
ख्	छ्	फ्	ठ्	थ्	--	--	--	--
ग्	ज्	ब्	ड्	द्	--	--	--	--
घ्	झ्	भ्	ढ्	ध्	--	--	--	--
ङ्	ञ्	म्	ण्	न्	--	--	--	--
ह्	य्	⨯प	र्	ल्	--	--	--	--
: विसर्ग	श्	⨯फ	ष्	स्	--	--	--	--

आभ्यन्तरबाह्यप्रयत्नज्ञानार्थकं चक्रम्

आभ्यन्तरप्रयत्नाः	स्पृष्टः	ईषत्स्पृष्टः	ईषद्विवृताः	विवृताः संवृताः
संज्ञा	स्पर्शाः	अन्तःस्थाः	ऊष्माणः	स्वराः
वर्णाः	क ख ग घ ङ	य	श	अ इ उ
	च छ ज झ ञ	र	ष	ह्रस्वोऽकार
	ट ठ ड ढ ण	ल	स	ऋ लृ प्रयोगः
	त थ द ध न	व	ह	ए ओ
	प फ ब भ म		ऐ औ	
बाह्यप्रयत्नाः	अल्पमहाप्राणाः		अल्पप्राणाः	महाप्राणाः महा.
	अल्पप्राणाः म.प्रा.		संवारः	विवारः संव
	विवाराः संवारः संवारः		नादाः	श्वासाः नाद.
	श्वासाः नादाः नादाः		घोषाः	अघोषाः घो.
	अघोषाः घोषाः घोषाः		उदात्तानुदात्तस्वरिताः	

(ग) करणम्–करणं नाम तादृशानाम् इन्द्रियाणां संवर्गोऽस्ति, यः ध्वन्युच्चारणे भाषिकध्वनिनिष्पत्तौ वा सहायकः भवति। स्थान-करणयोः केवलं गत्यात्मकमन्तरमस्ति। अनया दृष्ट्या अधरोष्ठं, जिह्वां मृदुतालुं स्वरतन्त्रीं च करणमित्यभिधानेन अभिधीयते ध्वनि-वैज्ञानिकैः।

एतेषां व्यावहारिक-उपयोगिता इयमस्ति यद् अनेन साहाय्येन कस्यापि भाषा-विशेषस्य स्वराणाम् उच्चारण-प्रक्रियायाः सम्यक्-निर्धारणं कर्तुं शक्यते। पूर्णरूपेण कस्यामपि भाषायाम् इमे स्वराः नोपलभ्यन्ते, परन्तु आंशिकरूपेण सर्वासु भाषासु प्राप्यन्ते।

अचामष्टादशभेदविवरणम्-

अ इ उ ऋ लृ ह्रस्वभेदाः	अ इ उ ऋ ए ऐ ओ औ दीर्घभेदाः	अ इ उ ऋ लृ ए ओ ऐ औ प्लुतभेदाः
1. उदात्तानुनासिकः	7. उदात्तानुनासिकः	13. उदात्तानुनासिकः
2. उदात्ताननुनासिकः	8. उदात्ताननुनासिकः	14. उदात्ताननुनासिकः
3. अनुदात्तानुनासिकः	9. अनुदात्तानुनासिकः	15. अनुदात्तानुनासिकः
4. अनुदात्ताननुनासिकः	10. अनुदात्ताननुनासिकः	16. अनुदात्ताननुनासिकः
5. स्वरितानुनासिकः	11. स्वरितानुनासिकः	17. स्वरितानुनासिकः
6. स्वरिताननुनासिकः	12. स्वरिताननुनासिकः	18. स्वरिताननुनासिकः

व्यंजनानि– कवर्ग, चवर्ग टवर्ग तवर्ग पवर्ग रूपाणि येषां वर्णानामुच्चारणार्थं जिह्वा मुखस्य केवलं एकं भागं स्पृशति एवं च वायुः क्षणं विरम्य झटिति बहिर्भवति ते वर्णाः स्पर्शाः। स्पर्शानां संख्याः पंचविंशतिः सन्ति। भाष्यकारः व्यंजनस्य तुलना नटभार्यावत् कृतं स्यात्। तद् यथा नटान्तं स्त्रियो रंगगताः पृच्छति कस्य यूयमिति तं तं तवेत्याहुः। एवं व्यंजनान्यपि यस्य यस्याः च कार्यमुच्यते तं तं भजन्ते। "परेण स्वरेण व्यंज्यते इति व्यंजनम्'। यस्योच्चारणं विना स्वरेण न भवति तद् व्यंजनम्। अर्थात् ह य व र ल ञ म ङ ण न झ भ घ ढ ध ज़ ब ग ड द ख फ छ ठ थ च ट त क प श ष स इति त्रयस्त्रिंशत् वर्णाः व्यंजनानि सन्ति। उच्चारण-वैविध्यात् व्यंजनानां त्रयो हि भागाः सन्ति। 1. स्पर्श 2. अन्तःस्थ 3. ऊष्मः अयोगवाहाः, अनुस्वारः, विसर्गः, यमाः।

अल्पप्राणाः-वर्गाणां प्रथमतृतीयपञ्चमाः, प्रथम-तृतीययमौ, यरलवाश्चाल्पप्राणाः।

महाप्राणाः- वर्गाणां द्वितीयचतुर्थौ द्वितीयचतुर्थयमाः शषसहाश्च महाप्राणाः।

ह्रस्व-दीर्घ-प्लुतविवेचनम्

1. ऊकालोऽज्झस्वदीर्घप्लुतः (1.2.27) उ॒श्च ऊ॒श्च ऊ३॒श्च वः, वां काल इव कालो यस्य सोऽच् क्रमाद् ह्रस्वदीर्घप्लुतसञ्ज्ञः स्यात्। स प्रत्येकमुदात्तादिभेदेन त्रिधा। स नवविधोऽपि प्रत्येकमनुनासिकत्वाननुनासिकत्वाभ्यां द्विधा। 'ऊ' इति त्रयाणामेकमात्रिकद्विमात्रिकत्रिमात्रिकाणां प्रश्लिष्ट-निर्देशः।

एकमात्रो भवेद्ह्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम्।।

चाषस्तु वदने मात्रां द्विमात्रं त्वेव वायसः।
शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम्।।

उदात्त-अनुदात्त-स्वरितभेद-अवबोधनम्

1. **उच्चैरुदात्तः (1.2.29)** ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसञ्ज्ञः स्यात्। अर्थात् यस्य स्वरस्य उच्चारणं स्वनिर्धारितस्थानस्य ऊर्ध्वभागे (उच्चैः) भवति, सः उदात्तः।

2. **नीचैरनुदात्तः (1.2.3)** ताल्वादिषु सभागेषु स्थानेष्वधोभागनिष्पन्नोऽजनुदात्तसञ्ज्ञः स्यात्। अर्थात् यस्य स्वरस्य उच्चारणं स्वनिर्धारितस्थानस्य अधोभागे (नीचैः) भवति सः अनुदात्तः।

3. **समाहारः स्वरितः (1.2.31)** उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यत्र सोऽच् स्वरितसञ्ज्ञः स्यात्। अर्थात् येषु स्वरेषु उदात्त-अनुदात्तयोः गुणानां मेलनं भवति सः स्वरितः। स्वरितस्यादितोऽर्धमुदात्तं बोध्यम्। स्वरिते पूर्वभागस्य उदात्तत्वे सति परः शेषः उत्तरभागः अनुदात्तः। यथा उक्तं प्रातिशाख्ये–

अनुदात्तः परः शेषः स उदात्तश्रुतिर्न चेत्।
उदात्तं वोच्यते किञ्चित्स्वरितं वाक्षरं परम्।।

4. **ध्वनिपरिवर्तनस्य कारणानि**–भाषायाः परिवर्तनस्य प्रारम्भः ध्वनिपरिवर्तनादेव भवति। ध्वनिः, रूपम्, अर्थश्च भाषायाः त्रीणि मुख्यान्यंगानि सन्ति। सर्वे भाषावैज्ञानिकाः मन्यन्ते यत् ध्वनेः सम्बन्धो देशेन कालेन व्यक्त्या च भवति। समेषां कारणानां भागद्वये विभागः कर्तुं शक्यते–1. बाह्यकारणम्, 2. आभ्यन्तरकारणञ्च।

1. **बाह्यकारणम्**– (क) भौगोलिककारणम्, (ख) ऐतिहासिक-कारणम्, (ग) सांस्कृतिक-कारणम्, (घ) साहित्यिक-कारणम्, (ङ) वैज्ञानिक-कारणम्, (च) वैयक्तिक-कारणम्।

(क) भौगोलिककारणम्-भौगोलिककारणानि अपि भाषापरिवर्तनं कुर्वन्ति। जलवायुः क्षेत्रीयभाषा-इत्यादिकानां भौगोलिककारणानां प्रभावः स्वरयन्त्रे परिवर्तनं सञ्जायते। अस्मात् कारणात् एव शब्दोच्चारणे भिन्नता परिलक्षितो भवन्ति।

(ख) ऐतिहासिक-कारणम्-ऐतिहासिकप्रभावादपि शब्दोच्चारणे भिन्नता भवति। कस्यापि प्राचीनभाषायाः अर्वाचीनभाषया समं तुलना यदा क्रियते, तदा अवबोध्यते यत् कालक्रमेण भाषायां कियत् परिवर्तनं सञ्जातम्। यथा संस्कृतादि-प्राचीनभाषासु कालक्रमेण निरंतरं परिवर्तनं भवत्येव।

(ग) सांस्कृतिक-कारणम्–सांस्कृतिक-कारणमपि शब्दोच्चारणे भिन्नतां आनयन्ति। सांस्कृतिक-अभ्युत्थानेन समं राजनैतिक-व्यापारिक-सम्बन्धादिभिः अपि ध्वनिपरिवर्तनं भवति।

(घ) साहित्यिक-कारणम्–साहित्यिक-कारणमपि ध्वनिपरिवर्तनं करोति। सुगमभाषाप्रयोगोऽपि ध्वनिपरिवर्तने साहित्यिककारणं काव्यक्षेत्रे कवयः स्वीकृतवन्तः।

(ङ) वैज्ञानिक-कारणम्–प्राचीनशब्देषु परिवर्तनं कृत्वा तदर्थ-अवबोधनाय नवीनशब्दप्रयोगाः प्रचलन्ति। नवशब्दस्य संरचना वैज्ञानिक-आविष्कारेण भवति। येन ध्वनिपरिवर्तनं दृश्यते।

(च) वैयक्तिक-कारणम्–उच्चारितध्वनेः प्रयोगकः मानवः एव भवति। व्यक्तिगतभिन्नतापि ध्वनिपरिवर्तनस्य महत्त्वपूर्णकारणं वर्तते।

2. **आभ्यन्तरकारणम्**– (क) भावातिरेकः, (ख) बलम्, (ग) अपूर्णानुकरणम्, (घ) प्रयत्नलाघवम्।

(क) भावातिरेकः–दया-करुणा-प्रेम-क्रोधादि-आधिक्येन शब्दोच्चारणेषु ध्वनिषु वा विकृतिः सर्वत्र दृश्यते। यथा-बेटा-बेटवा, बाबू-बबुआ, बहन-बहिनिया इत्यादयः।

(ख) बलम्–बलाघातादपि ध्वनि-विकारः उपजायते। यथा-आभ्यन्तर स्थाने अन्दर/भीतर।

(ग) अपूर्णानुकरणम्–भाषाज्ञानं तु अनुकरणबलादेव आयाति। अपूर्णानुकरणेन भाषायामपि परिवर्तनं दरीदृश्यते। शुद्धवर्णानामुच्चारणमेव अपूर्णानुकरणम्।

(घ) प्रयत्नलाघवम्–ध्वनिविकारोत्पादककारकेषु प्रयत्नलाघवस्य महत्त्वपूर्णं स्थानं वर्तते। प्रयत्नलाघवेन सर्वाधिकध्वनिपरिवर्तनं भवति। प्रयत्नलाघवस्य बहवः भेदाः भवन्ति। यथा- (क) आगमः, (ख) लोपः, (ग) विकारः, (घ) विपर्ययः, (ङ) समीकरणम्, (च) विषमीकरणम्, (छ) स्वरभक्तिः, (ज) समाक्षरलोपः, (झ) महाप्राणीकरणम्, (ञ) अल्पप्राणीकरणम्, (ट) घोषीकरणम्, (ठ) अघोषीकरणम्, (ड) अनुनासिककरणम्।

3. **प्रयत्नलाघवम्-(क) आगमः**-शब्दोच्चारणे आगमबलेन सौविध्यमायाति। यथा–स्नानम्-अस्नानम्।

(ख) लोपः–ध्वनिपरिवर्तनस्य महत्कारणं लोपः अपि वर्तते। उच्चारणे यथा–स्थलं-थलम्।

(ग) विकारः–उच्चारणे विकृतिः इति विकारः। यथा–हस्त इत्यस्य स्थाने हाथ।

(घ) विपर्ययः–उच्चारणे वर्णविपर्ययेनापि ध्वनि-विकारः संजायते। यथा–पिशाचस्थाने पिचास।

(ङ) समीकरणम्-यदा भिन्न-ध्वनयः समीपस्थाः भवन्ति तदा समीकरणबलेन एकस्य भिन्न-ध्वनेः अन्यध्वनौ लोपः भवति। यथा– दुग्ध इत्यस्य स्थाने दूध इत्यादि प्रयोगाः।

(च) विषमीकरणम्-द्वयोः सन्निहितवर्णयोः ध्वनिसाम्ये सति एकस्मिन् वर्णे ध्वनिपरिवर्तनमेव विषमीकरणम्। यथा–काक इत्यस्य स्थाने काग इत्यादयः।

(छ) स्वरभक्तिः–संयुक्तवर्णोच्चारणे या असुविधा प्रादुर्भवति, तस्याः निराकरणार्थे संयुक्तवर्णस्य मध्ये एकस्य स्वरस्य स्थापना एव स्वरभक्तिः। यथा–धर्म इत्यस्य स्थाने धरम इति।

(ज) समाक्षरलोपः–द्वयोः समानध्वन्योः प्रयुक्ते सति एकस्य लोपः समाक्षरलोपः इत्युच्यते। यथा– मानससरोवर इत्यस्य स्थाने मानसरोवर इत्यादयः।

(झ) महाप्राणीकरणम्–अल्पप्राणध्वनेः स्थाने महाप्राणध्वनेः स्थापनमेव महाप्राणीकरणम्। यथा– शुष्क इत्यस्य स्थाने सूखा इत्यादयः।

(ञ) अल्पप्राणीकरणम्–महाप्राणध्वनेः स्थाने अल्पप्राणध्वनेः स्थापनमेव अल्पप्राणीकरणम्। यथा–भभूव इत्यस्य स्थाने बभूव इत्यादयः।

(ट) घोषीकरणम्–अघोष-वर्णानां घोषवर्णेषु परिवर्तनमेव घोषीकरणम्। यथा–कंकण इत्यस्य स्थाने कंगन इत्यादयः।

(ठ) अघोषीकरणम्–घोष-वर्णानां अघोषवर्णेषु परिवर्तनमेव अघोषीकरणम्। यथा–उद्+कट इत्यस्य स्थाने उत्कट इत्यादयः।

(ड) अनुनासिककरणम्–अननुनासिक-ध्वनीनां अनुनासिकध्वनिषु परिवर्तनमेव अनुनासिककरणम्। यथा–अश्रु इत्यस्य स्थाने आँसू इत्यादयः।

5. ध्वनिनियमा (ग्रिम-ग्रासमन-वर्नरविषयकाः)

ध्वनिप्रवृत्तिरेव भाषावैज्ञानिकैः 'ध्वनिनियमः' इत्युच्यते। सत्यं तु इदमस्ति यत् सर्वे ध्वनिनियमाः आदौ तु प्रवृत्तिस्वरूपाः एव भवन्ति, किन्तु यदा ते पूर्णतां यान्ति, तदा ध्वनिनियमाः इत्यभिधीयन्ते लोकैः। ध्वनि-नियमाः कालसापेक्षाः भवन्ति। भाषा-देश-कालेभ्यः सह सम्बद्धत्वात् इमे ध्वनिनियमाः सीमिताः भवन्ति।

अत्र प्रसिद्धाः त्रिविधाः ध्वनिनियमाः संक्षेपेण प्रस्तूयन्ते, ते सन्ति–

1. ग्रिम-नियमः– (Grimm*s Law) ग्रिमनियमस्तु ध्वनिनियमस्य सर्वाधिकं प्रसिद्धम् उदाहरणमस्ति। ग्रिम-महोदयस्यानुसारेण प्रथम-ध्वनिपरिवर्तनं मूलभारोपीयध्वनयः संस्कृत-ग्रीक-लैटिनभाषासु सुरक्षिताः सन्ति, किन्तु व्यंजनानि तु संस्कृतभाषायामेव विशुद्धरूपेण उपलभ्यन्ते। एवमेव घोष-महाप्राणध्वनयः घोषाल्पप्राणा अभूवन्। परिवर्तनेऽस्मिन् घोषाल्पप्राणध्वनयः अघोषाल्पप्राणाः अभूवन्।

2. ग्रासमन-नियमः- (Grassman *s law) द्वौ सन्निकृष्टौ महाप्राणध्वनी (वर्णौ) साकं नहि भवतः, अपितु तयोः द्वयोः वर्णयोः एकः (प्रथमः) अल्पप्राणो भवति। यथा–संस्कृतभाषायां 'धा' धातोः 'धधाति' इति निष्पन्ने पूर्वधकारस्य स्थाने दकारः (अल्पप्राणः) इति जाते 'दधाति' इति निष्पन्नं भवति।

3. वर्नर-नियमः (Verner *s law) ग्रिम-नियमस्य अपवादपरिमार्जकोऽयं वर्नर-नियमः। यदि 'क् त् प्' इत्येषां वर्णानां पूर्ववर्तिस्वरे बलाघातो भवति, तर्हि ग्रिमनियमानुसारेण क् त् प् इत्येतेषु स्थानेषु 'ख् थ् फ्' इति परिवर्तनं भवत्येव।

6. अर्थपरिवर्तनस्य दिशः कारणानि च–मनुष्यः सामाजिकप्राणी वर्तते। विचाराणामादानप्रदानाय शब्दस्यार्थः भावप्रदर्शनस्य महत्वपूर्णमाध्यमः भवति। भाषायाः शब्दार्थयोः शनैः शनैः कालक्रमेण परिवर्तनं भवति। इदमेव अर्थपरिवर्तनमित्युच्यते। अर्थपरिवर्तनस्य अनेकानि प्रमुखानि कारणानि सन्ति। यथा–

(क) जातीय-मनोभावः–जातीय-दुर्भावनावशादपि शब्दानामर्थेषु परिवर्तनं अवलोक्यते। यथा– फारसीभाषायां हिन्दू इत्यस्यार्थः अधमः, काफिर इत्यस्यार्थः अपवित्रः इत्यादयः।

(ख) सादृश्यम्–सादृश्यबलादपि शब्दार्थेषु परिवर्तनं दृश्यते। यथा–प्रेमार्थक-प्रश्रयशब्दस्यार्थः आश्रयः इति प्रयोगः।

(ग) साहचर्यम्–साहचर्येणापि शब्दार्थेषु परिवर्तनं दृश्यते। यथा–सिन्धु इत्यस्य स्थाने सिन्धू (हिन्दू) इत्यस्य प्रयोगः दृश्यते।

(घ) भावात्मकबलम्–भावात्मकबलप्रदर्शनादपि शब्दार्थेषु परिवर्तनं दृश्यते। यथा–पतिकृते राजा पत्नी कृते रानी इत्यादयः प्रयोगाः सञ्जायते।

(ङ) बलापसरणम्–बलापसरणमपि शब्दार्थ-परिवर्तनस्य कारणं भवति। यथा–वज्रबटुः स्थाने बजरबट्टू (मूर्खः) इत्यादयः प्रयोगाः दृश्यन्ते।

(च) प्रयोगाधिक्यम्–प्रयोगाधिक्येनापि शब्दानां मूलार्थाः लुप्ताः भवन्ति। यथा–महाराजः, महात्मा इत्यादयः शब्दार्थपरिवर्तनं दृश्यन्ते।

(छ) व्यंग्यप्रयोगः – व्यंग्यात्मकशब्दप्रयोगेणापि शब्दार्थः परिवर्तितो भवति। यथा–अपकारी कृते उपकारी इति व्यंग्यप्रयोगः अवलोक्यते।

(ज) पुनरावृत्तिः–पुनरावृत्तिरपि शब्दानां अर्थपरिवर्तने कारणं भवति। यथा–दुर्जनः इत्यस्य स्थाने दुर्जनपुरुषः इत्यादयः प्रयोगाः दृश्यन्ते।

(झ) कालभेदः–कालभेदेन अपि शब्दार्थेषु परिवर्तनमवलोक्यते। यथा– गवेषणा-गोः अन्वेषणम्-शोधकार्यम् इत्यादयः प्रयोगाः दृश्यन्ते।

(ञ) सुश्राव्यता–सुश्राव्यतया अपि शब्दार्थेषु परिवर्तनमवलोक्यते। यथा–अन्धः-प्रज्ञाचक्षुः, सूरदास इत्यादयः बहवः प्रयोगाः दृश्यन्ते।

(ट) संक्षिप्तीकरणम्–संक्षिप्तीकरणमपि शब्दार्थ-परिवर्तने कारणं वर्तते। यथा–नेट-शब्दार्थः राष्ट्रीय-पात्रता-परीक्षायाः अर्थबोधो कारयति।

(ठ) भ्रान्तिः–भ्रान्तिवशादपि शब्दस्यार्थे परिवर्तनम-वलोक्यते। यथा– अनुगृहीत इत्यस्य स्थाने अनुग्रहीत इत्यादयः प्रयोगाः दृश्यन्ते।

(ड) परिवेशगत–भिन्नता- सामाजिक-परिवेशगत-वैविध्येन अपि शब्दस्यार्थे परिवर्तनमवलोक्यते।

यथा–आंग्ले मदर-फादर इत्यनयोः शब्दयोः रोमन-कैथोलिकधार्मिकसंगठने भिन्नः अर्थः भवति। Sister-भगिनी-नर्स-परिचायिकादि।

(ढ) विनम्रता– विनम्रताकारणादपि शब्दाः भिन्नेष्वर्थेषु प्रयुज्यन्ते। यथा– राजा-राजाधिराजः, अन्नदाता इत्यादयः।

(ण) ज्ञानवैविध्यम्–ज्ञानवैविध्यमपि शब्दार्थ-परिवर्तनस्य कारणं भवति।

7. वाक्यलक्षणम्–अनेकेषां सार्थकानाम् अन्वितानाञ्च पदानां समूहो वाक्यमित्यभिधीयते। वाक्यस्य स्वरूपं निरूपयता आचार्येण विश्वनाथेनाभिहितम्–**"वाक्यं स्याद् योग्यता-काङ्क्षासत्तियुक्तः पदोच्चयः"** इति। अयमाशयो यत्–**"क्रियाकारकादियुक्तो पदसमूहो वाक्यमित्यभिधीयते"**, वाक्यं परिभाषयता पतञ्जलिना अभिमतं पञ्चलक्षणम्–1. 'एकं क्रियापदमपि वाक्यम्', 2. 'आख्यातं साव्ययकारकविशेषणं वाक्यम्' 3. 'सक्रियाविशेषणं च', 4. 'आख्यातं सविशेषणम्', 5. 'संज्ञापदं च'। परन्तु तस्मिन् पदसमूहे वैशिष्ट्यत्रयमपेक्षितं भवति वाक्यत्वाय–1. योग्यता-योग्यानां पदानां समूहो वाक्यमित्यभिधीयते। यथा–जलेन सिञ्चतीत्येव वाक्यम्। 2. आकांक्षा–साकाङ्क्षाणामेव पदानां समूहो वाक्यमभिधीयते। 3. आसत्तिः–अनेनैव प्रकारेण पदेषु वाक्यत्वाया-सत्तिरप्यावश्यकम्। सा चासत्तिरपि द्विप्रकारवती भवति–कालकृता स्थानकृता च।। अत्र वाक्यानाम् ऐतिहासिकं तुलनात्मकमध्ययनमपि प्रस्तूयते। भाषावैज्ञानिकदृष्ट्या कपिलदेवद्विवेदिमहोदयेनापि कथितम्–**"सार्थ लघिष्टं पूर्णार्थं वाक्यं स्याद् भाषणाङ्कम्"।**

8. वाक्यभेदः–विद्वद्भिः भाषावैज्ञानिकदृष्ट्या विविधासु भाषासु समुपलब्धानां वाक्यानां पञ्चवर्गेषु विभाजनं कृतमस्ति। यथा–1. आकृतिमूलकानि वाक्यानि, 2. रचनामूलकानि वाक्यानि, 3. अर्थमूलकानि वाक्यानि, 4. क्रियामूलकानि वाक्यानि, 5. शैलीमूलकानि वाक्यानि।

1. आकृतिमूलकानि वाक्यानि–प्रकृतिप्रत्ययार्थ-सम्बन्धतत्त्वेषु आधृतानि आकृतिमूलकानि चतुर्विधानि वाक्यानि भवन्ति। 1. अयोगात्मकं वाक्यम्, यथा–चीनीभाषायाम्-नी ता वो = त्वं मां हन्सि। 2. श्लिष्टयोगात्मकं वाक्यम्, संस्कृते-वृक्षात् पत्राणि पतन्ति। 3. अश्लिष्टयोगात्मकं वाक्यम्, यथा– तुर्कीभाषायाम्-एलिमडेकि=मम हस्ते अस्ति। 4. प्रश्लिष्टयोगात्मकं वाक्यम्, यथा– गुजरातीभाषायाम्– कुञ्जे = मया इदं कथितं यत्–।

2. रचनामूलकानि वाक्यानि–रचनानुसारेण वाक्यानि त्रिविधानि भवन्ति। यथा–संस्कृते 1. सामान्यवाक्यम्–त्वं ग्रन्थं पठसि। 2. मिश्रवाक्यम्–यस्यास्ति धनं, स नरः कुलीनः। 3. संयुक्तवाक्यम्–यदाहं गुरुगृहं गतम्, तदा स स्नानाय नदीं गतः आसीत्।

3. अर्थमूलकानि वाक्यानि–अर्थभेदेन वाक्यानि अष्टविधानि भवन्ति। यथा– 1. विधिवाक्यम्–मधुपः अर्थशास्त्रं पठति। 2. निषेधवाक्यम्–प्रकाशः असत्यं न वदति। 3. प्रश्नवाक्यम्–किं ज्योत्स्ना सत्यं वदति। 4. अनुज्ञा-वाक्यम्–अर्चना! त्वं महाविद्यालयं गच्छ। 5. सन्देहवाक्यम्–आशास्ये अपर्णा गच्छन् भविष्यति। 6. इच्छार्थकं वाक्यम्–कल्याणं भवतु। 7. संकेतार्थकं वाक्यम्–यदि अहं पठिष्यामि, तर्हि सफलमपि भविष्यामि। 8. विस्मयार्थकं वाक्यम्–राम !राम ! कीदृशं कृत्यं कृतम्।

4. क्रियामूलकानि वाक्यानि–क्रियामूलकानि वाक्यानि क्रिया-सहितानि-रहितानि च बहुविधानि भवन्ति। क्रियासहितानि वाक्यानि कर्तृ-कर्म-भावभेदेन त्रिविधानि भवन्ति। यथा–कर्तृवाच्ये–मधुपः ग्रन्थं पठति। कर्मवाच्ये–मधुपेन ग्रन्थः पठ्यते। भाववाच्ये–मधुपेन हस्यते। क्रियारहितानि वाक्यानि पञ्चविधानि भवन्ति–1. प्रवचनमूलकम्–इदं मम पुस्तकम्। 2. प्रश्नमूलकम्–कुतः? दरभंगातः। 3. मुहावरामूलकम्–प्रज्ञाहीनः अन्ध एव। 4. समाचारमूलकम्–देशे दुर्भिक्षम्। 5. विस्मयादिमूलकम्–अग्निः !अग्निः ! चौरः !चौरः !

5. शैलीमूलकानि वाक्यानि–शिथिल-समीकृता-आवर्तकभेदेन त्रिविधानि भवन्ति। शिथिलानि वाक्यानि–आसीदेकः राजा कामेश्वरसिंहः, सः संस्कृतविश्वविद्यालयस्य निर्माता। समीकृतानि वाक्यानि–यतो धर्मस्ततो जयः। आवर्तकानि वाक्यानि–यदि वयं

सुखमिच्छामः, तर्हि अस्माभिः भारतीया-संस्कृतिः अवश्यमेव अङ्गीकरणीया।

9. भारोपीय-भाषापरिवारस्य सामान्य-परिचयः– विश्वेऽस्मिन् सर्वेषु भाषा-परिवारेषु भारोपीयभाषापरिवारस्य सर्वातिशायी महत्त्वमस्ति। यतः भौगोलिक-साहित्यिक-सांस्कृतिक-वैज्ञानिक-भाषावैज्ञानिक-राजनैतिक-सामाजिकोत्कर्षेभ्यः विश्वस्य सर्वाः भाषाः भारोपीय-भाषापरिवारस्य ऋणी सन्ति। सम्प्रति भाषापरिवारोऽयं एशियामहाद्वीपादारभ्य यूरोप-महाद्वीपपर्यन्तं विस्तीर्णमस्मि। अध्ययन-सौकर्यदृष्ट्या ते वर्गीकृतानि सन्ति। यथोक्तं कपिलदेवद्विवेदिमहोदयेन–

ईरानी-भारती चैव बाल्टो-सुस्लाविकी।
आर्मीनी अल्बनी चैताः शतं वर्गे समाश्रिताः।
इटालिकी च ग्रीकी च जर्मानिक केल्टिकी तथा।
हित्ती तोखरिकी चैताः केन्टुम् वर्गे प्रकीर्तिताः।।

भारोपीय-भाषापरिवारः

- केन्टुम्वर्गः
  - भारत-इरानी
  - बालटोस्काविकी
  - आर्मीनी
  - अल्बानी (इलीरी)
- शतम्वर्गः
  - ग्रीकभाषा
  - केल्टिक
  - जर्मानिक
  - इटालिक
  - हित्ती
  - तोखारी

10. भारोपीय-भाषापरिवारस्य वैशिष्ट्यानि

आचार्यवरेण कपिलदेव-द्विवेदि-महोदयेन दशधा वर्णितं वैशिष्ट्यं भारोपीय-भाषापरिवारस्य।

भारोपीयपरिवारवैशिष्ट्यं दशकं मतम्।
श्लिष्टयोगात्मकत्वं तु प्रकृतिप्रत्ययात्मता।।
एकाक्षरत्वं धातूनां सुप्-तिङौ कृच्च तद्धिताः।
स्वातन्त्र्यमुपसर्गाणां पदमूला च वाक्यता।।
प्रत्ययार्थानभिव्यक्तिः समासाभिरुचिस्तथा।
अपश्रुतेः प्रयोगश्च प्रत्ययाधिक्यमेव च।।

1. श्लिष्टयोगात्मकत्वम्,	2. प्रकृतिप्रत्ययात्मता,	3 धातूनाम् एकाक्षरत्वम्,
4. सुप्-तिङ-कृत्-तद्धित-प्रत्ययात्मकता,	5. उपसर्गाणां स्वातन्त्र्यम्,	6. पदमूलवाक्यता,
7. प्रत्ययार्थानभिव्यक्तिः,	8. समासाभिरुचिः,	9. अपश्रुतिप्रयोगः,
10. प्रत्ययाधिक्यम्।		

11. वाग्भाषयोः भेदः–अत्र भाषा-वाचोः विभेदकानि प्रधानानि तत्त्वानि निम्नलिखितानि सन्ति। 1. भाषा सूक्ष्मः भावात्मकश्चास्ति, किन्तु वाक् स्थूलः भौतिकश्चास्ति। 2. भाषा स्थायी वाक् तु अस्थायी भवति। 3. भाषया यद् विचार-विनिमयं क्रियते, तस्यैव विचारविनिमयस्यैव वाक् संज्ञाऽस्ति। 4. भाषा अनिर्वचनीया अस्ति, किन्तु वाग् निर्वचनीया भवति। 5. भाषा नित्या सुसूक्ष्मा चास्ति, किन्तु वाक् विनाशशीला स्थूला चास्ति। 6. भाषा स्फोटतत्त्वमस्ति तथा वाक् नादतत्त्वमस्ति। 7. भाषा साध्यम् अस्ति, किन्तु वाक् साधनम् अस्ति। 8. शब्द-वाक्यश्रवणेन यद् ज्ञानं भवति तद् ज्ञानमेव भाषा, किन्तु अनया भाषया कोऽपि यद् वदति तद् सम्भाषणमेव 'वाक्' इत्युच्यते।

12. बोली-भाषयोः भेदः–भाषायाः विकृति एव विभाषा इत्युच्यते तथा विभाषायाः विकृति उपविभाषा बोली

वा भाषावैज्ञानिकैः कथ्यते। विभेदकानि निम्नलिखितानि सन्ति-

1. भाषा दीर्घक्षेत्रेषु उपविभाषा (बोली) अत्यल्पक्षेत्रेषु समुपलभ्यते।
2. भाषायाः साहित्यं विस्तीर्णं भवति, किन्तु बोल्याः साहित्यं अत्यल्पः भवति।
3. भाषायाः बोल्याः प्रजायन्ते, किन्तु बोल्याः भाषा नैव जायते।
4. भाषा तु उपविभाषाणां जननी, किन्तु उपविभाषा भाषायाः पुत्री भवति।
5. भाषया उच्चशिक्षाऽपि अवगम्यते किन्तु बोली तु विचार-विनिमयपर्यन्तमेव प्रसरति।
6. भाषा इत्यस्य सम्बन्धः राष्ट्रेण सह, बोली इत्यस्य सम्बन्धः ग्रामेण सह भवति।
7. भाषा उच्चवर्गस्य, बोली निम्नवर्गस्य माध्यमः भवति।
8. भाषा साधुप्रयोगः, बोली असाधुप्रयोगः भवति।
9. भाषायाः वाक्यं परिष्कृतं, बोल्याः वाक्यं अपरिष्कृतं भवति।

13. भाषाविज्ञानस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— कूटभाषायाः कियन्ति रूपाणि?
   उत्तरम्— चत्वारि।
2. **प्रश्नः**— आकृति-उच्चारणकालयोः मापकः यन्त्रविशेषः कः?
   उत्तरम्— स्पेक्ट्रोग्राफः।
3. **प्रश्नः**— कृत्रिमभाषायाः अवलम्बने कियन्ति कठिनानि?
   उत्तरम्— चत्वारि।
4. **प्रश्नः**— भाषा कस्य साधनं विद्यते?
   उत्तरम्— विचारविनिमयस्य।
5. **प्रश्नः**— विभाषायाः स्वाभाविक-निर्बलताः भवन्ति?
   उत्तरम्— (3) तिस्रः।
6. **प्रश्नः**— भाषायाः विकास-सोपानानि कियन्ति, कानि च तानि?
   उत्तरम्— चत्वारि, 1. आंगिकभाषा, 2. वाचिकभाषा, 3. लिखितभाषा, 4. यान्त्रिकभाषा।
7. **प्रश्नः**— भाषायाः मूलतमः संघटकः कः अस्ति?
   उत्तरम्— ध्वनिः।
8. **प्रश्नः**— आंगिक-भाषायाः सीमा कतिविधा?
   उत्तरम्— त्रिविधा।
9. **प्रश्नः**— भाषायाः लघुतम-सार्थक-इकाई का अस्ति?
   उत्तरम्— स्वनिम।
10. **प्रश्नः**— भाषाविज्ञानं किमस्ति?
    उत्तरम्— भाषाणामध्ययनम्।
11. **प्रश्नः**— अपभाषायाः कियन्तो विशेषताः सन्ति?
    उत्तरम्— चतस्रः।
12. **प्रश्नः**— कस्मिन् वेदांगे ध्वनिविज्ञानस्य विवेचना दरीदृश्यते?
    उत्तरम्— शिक्षावेदांगे।
13. **प्रश्नः**— विभाषाणां भाषा-पदग्रहणे कति साधनानि कारणानि वा?
    उत्तरम्— (9) नव।
14. **प्रश्नः**—मध्य-भारतीय-आर्यभाषायाः समयः कः?
    उत्तरम्— 500 ई० पूर्वतः 1000 ई० वर्षपर्यन्तम्।
15. **प्रश्नः**— भाषोत्पत्तेः सिद्धान्ताः कतिसंख्यकाः?
    उत्तरम्—एकादश।
16. **प्रश्नः**—आधुनिक-भारतीय-आर्यभाषायाः कः कालः?
    उत्तरम्— 1000 ई० वर्षात् वर्त्तमान-कालपर्यन्तम्।
17. **प्रश्नः**— माहेश्वर-सूत्राणामुत्पत्तिः कस्माज्जाता?
    उत्तरम्— शिवस्य डमरुनिनादात्।
18. **प्रश्नः**—आधुनिक-भारतीय-आर्यभाषाणां कियन्तो विशेषताः?
    उत्तरम्— (7) सप्त।
19. **प्रश्नः**— भाषोत्पत्ति-विषये "प्लेटो" महोदयस्य कः सिद्धान्तः?
    उत्तरम्— रणन-सिद्धान्तः।
20. **प्रश्नः**— भाषायाः धातु-सिद्धान्तस्य प्रतिपादकः कः?
    उत्तरम्— मैक्समूलर।
21. **प्रश्नः**— 'प्रकृति-सिद्धान्तः' केनाऽनुमतः?
    उत्तरम्— जर्मनविदुषा "हर्डर" महोदयेन।

22. **प्रश्नः**— आधुनिक-भारतीय-आर्यभाषा योगात्मका-अयोगात्मका वा?
उत्तरम्—योगात्मका।

23. **प्रश्नः**— 'अनुकरण-सिद्धान्तः' केन प्रदत्तः?
उत्तरम्— "मैक्समूलर"महोदयेन।

24. **प्रश्नः**—पश्चिमी-हिन्दी कस्याः भाषायाः विकसिता जाता?
उत्तरम्— शौरसेनीभाषायाः।

25. **प्रश्नः**— संकेत-सिद्धान्ते कियत्योऽसङ्गतयः?
उत्तरम्— चतस्रः।

26. **प्रश्नः**—पश्चिमी-हिन्दीभाषायाः प्रमुखा विभाषाः कियत्यः?
उत्तरम्— (5) पञ्च।

27. **प्रश्नः**— आवेग-सिद्धान्ते कियन्तो दोषाः?
उत्तरम्— अष्टौ।

28. **प्रश्नः**—राजस्थानी-भाषायाः अन्तर्गताः विभाषाः कियत्यः?
उत्तरम्— (4) चतस्रः।

29. **प्रश्नः**— अनुकरण-सिद्धान्ते कियत्यो विप्रतिपत्तयः?
उत्तरम्— (5) पञ्च।

30. **प्रश्नः**—"संस्कृतम्" कस्य परिवारस्य मुख्या भाषाऽस्ति?
उत्तरम्— भारत-यूरोपीय-परिवारस्य।

31. **प्रश्नः**— समन्वय-सिद्धान्ते कियन्तस्तर्काः?
उत्तरम्— (3) त्रयः।

32. **प्रश्नः**—वैदिक-भाषायाः कति विशेषताः?
उत्तरम्— (5) पञ्च।

33. **प्रश्नः**— भाषापरिवर्तने कति बाह्यकारणानि?
उत्तरम्— (6) षट्।

34. **प्रश्नः**— भाषा-परिवर्तने कति आभ्यन्तरकारणानि भवन्ति?
उत्तरम्— (6) षट्।

35. **प्रश्नः**— भाषा-परिवर्तने प्रयत्नलाघवस्य कति प्रक्रियाः भवन्ति?
उत्तरम्— (7) सप्त।

36. **प्रश्नः**—भारत-यूरोपीय-परिवारस्य कियत्यः शाखाः?
उत्तरम्— (10) दश।

37. **प्रश्नः**— स्थानभेदेन आगमाः कतिविधाः, के च ते?
उत्तरम्— (3) त्रयः, 1. आदि, 2. मध्य, 3. अन्त्यः।

38. **प्रश्नः**— "भाषाविज्ञान की भूमिका" इत्यस्य ग्रन्थस्य लेखकः कः?
उत्तरम्— आचार्य देवेन्द्रनाथ शर्मा।

39. **प्रश्नः**— देवेन्द्रनाथशर्म्मणः पितुर्नाम किम्?
उत्तरम्— पं० शिवशरण शर्मा।

40. **प्रश्नः**— देवेन्द्रनाथशर्म्मणः पत्न्याः नाम किम्?
उत्तरम्— श्रीमती कुसुम शर्मा।

41. **प्रश्नः**—भारतयूरोपीयपरिवारस्य भाषाणां विशेषताः कतिसंख्यकाः?
उत्तरम्— (14) चतुर्दश।

42. **प्रश्नः**— समीकरणस्य भेदः कतिविधः, कश्च सः?
उत्तरम्— (2) द्विविधः, 1. पुरोगामी समीकरणम्, 2. पश्चगामीसमीकरणम्।

43. **प्रश्नः**— भाषाणां प्रमुख-वर्गीकरणाधारः कतिविधः, के च ते?
उत्तरम्— (2) द्विविधः, 1. आकृतिमूलकः, 2. पारिवारिकश्च।

44. **प्रश्नः**— प्राचीनतमः भाषावैज्ञानिकः कोऽस्ति?
उत्तरम्— पाणिनि।

45. **प्रश्नः**— "व्यक्ता वाचि वर्णा येषां त इमे व्यक्तवाचः" भाषायाः इयं परिभाषा कुतः उद्धृताऽस्ति?
उत्तरम्— महाभाष्यतः।

46. **प्रश्नः**— आकृतिमूलकस्य प्रमुखो भेदः कतिविधः, कश्च सः?
उत्तरम्—(2) द्विविधः, 1. अयोगात्मकः, 2. योगात्मकश्च।

47. **प्रश्नः**— पारिवारिकं वर्गीकरणं किम्?
उत्तरम्— सम्मिलितरचनातत्त्वमर्थतत्त्वञ्चाऽऽधारी-कृत्य कृतं भाषावर्गीकरणं 'परिवारिकं वर्गीकरणम्'।

48. **प्रश्नः**— मेरियो-पाई-महोदयस्य मते विश्वेऽस्मिन् कति भाषाः सन्ति?
उत्तरम्— 2796 भाषाः।

49. **प्रश्नः**— वर्गीकरणदृष्ट्या सर्वासां भाषाणां न्यूनातिन्यूनः कति विभागः स्वीकृतः?
उत्तरम्— 02 द्वौ विभागौ।

50. **प्रश्नः**— परिवारमूलके वर्गीकरणे डॉ.देवेन्द्रनाथशर्मा कति भाषापरिवारः स्वीकरोति?
उत्तरम्— 18 अष्टादश भाषापरिवाराः।

51. **प्रश्नः**— वैज्ञानिक-सांस्कृतिकदृष्ट्या सर्वप्रमुख-भाषापरिवारः कः?
उत्तरम्— भारोपीयपरिवारः।

52. **प्रश्नः**— सर्वाधिकभाषाः कस्मिन् परिवारे समुपलभ्यन्ते?
उत्तरम्— अमेरीकीपरिवारे।

53. **प्रश्नः**—साहित्यिकदृष्ट्या सर्वाधिक-समृद्धः भाषा-परिवारः कः?
उत्तरम्— भारोपीयपरिवारः।

54. **प्रश्नः**—एकाक्षरी भाषा का अस्ति?
उत्तरम्— चीनी।

55. **प्रश्नः**— प्राचीन नागरी लिपेः कया शैल्या उड़ियालिपेः विकसितः?
उत्तरम्— पूर्वी-शैल्या।

56. **प्रश्नः**— भारोपीय-भाषा अस्ति?
उत्तरम्— लैटिन।

57. **प्रश्नः**— कस्य भाषापरिवारस्य सर्वाधिक-प्रयोक्तारः सन्ति?
उत्तरम्—भारोपीयपरिवारस्य।

58. **प्रश्नः**— कृष्ण-कैस्पियनसागरयोः मध्ये कः भाषापरिवारः विद्यते?
उत्तरम्— काकेसीपरिवारः।

59. **प्रश्नः**— चीन-तिब्बत-वर्मा-स्यामपर्यन्तः व्याप्तः परिवारविशेषः कः?
उत्तरम्—चीनीपरिवारः।

60. **प्रश्नः**— अरब-देशे मुख्यरूपेण का भाषा भाषते?
उत्तरम्— सामी।

61. **प्रश्नः**— लीबिया-सोमालीत्यादिदेशेषु का व्यवह्रियते?
उत्तरम्— हामी।

62. **प्रश्नः**— सूडानी-भाषापरिवारे कति भाषाः सन्ति?
उत्तरम्—425 भाषाः।

63. **प्रश्नः**— बान्टू-परिवारस्य भाषा का?
उत्तरम्— काफिर।

64. **प्रश्नः**— बान्टू-परिवारे कति भाषाः विद्यन्ते?
उत्तरम्— 150 भाषाः।

65. **प्रश्नः**— पापुई-भाषापरिवारे कति भाषाः भाषन्ते?
उत्तरम्—132 भाषाः।

66. **प्रश्नः**— आस्ट्रेलियाई-भाषापरिवारे कति भाषाः सन्ति?
उत्तरम्—100 भाषाः।

67. **प्रश्नः**— सहस्रभाषात्मकः भाषापरिवारः कः?
उत्तरम्— अमरीकीपरिवारः।

68. **प्रश्नः**— केन्टुम्-शतम्वर्गयोः विभक्तः भाषापरिवारः कः?
उत्तरम्— भारोपीयपरिवारः।

69. **प्रश्नः**— कस्मिन् यन्त्रे कृत्रिमतालोः प्रयोगः क्रियते?
उत्तरम्—पैलेटोग्राफ।

70. **प्रश्नः**— मानवस्वरतन्त्री प्रतिसेकेण्डे कतिचक्रं यावत् कम्पनं कर्तुं शक्नोति?
उत्तरम्— 42-2048चक्र/ सेकेण्डे।

71. **प्रश्नः**— मानवस्वरतन्त्री प्रतिसेकेण्डे कतिबारम् अनावृतं संवृतं च (Open & Closed) भवितुं शक्नोति?
उत्तरम्— 800 बारम्।

72. **प्रश्नः**— सामान्यवार्तालापे पुरुषेषु स्वरतन्त्र्याः कम्पनगतिः किमस्ति?
उत्तरम्— 109163 चक्र/सेकण्ड।

73. **प्रश्नः**— सामान्यवार्तालापे स्त्रीषु स्वरतन्त्र्याः कम्पनगतिः किमस्ति?
उत्तरम्— 228-326 चक्र/सेकण्ड।

74. **प्रश्नः**—भाषाविज्ञाने स्वनिम (Phoneme) शब्दस्य प्रथमप्रयोगः केन कदा च कृतः?
उत्तरम्— प्रो. हैवेट-महोदयेन 1876A.D.

75. **प्रश्नः**— मानस्वर-चतुर्भुजस्य कल्पना केन कृता?
उत्तरम्— प्रो.डेनियल-जान्स-महोदयेन।

76. **प्रश्नः**—कस्य कारणस्य प्रभावाद् 'स्कूल' इत्यस्य 'इस्कूल' इति उच्चारणं क्रियते?
उत्तरम्—आगमकारणस्य प्रभावात्।

77. **प्रश्नः**— कस्मात् कारणात् 'स्थल' इति शब्दस्य 'थल' इति उच्चारणं क्रियते?
उत्तरम्— लोपस्य।

78. **प्रश्नः**— विकारकारणाद् 'गम्भीर' इति शब्दस्य किमुच्चारणं क्रियते?
उत्तरम्— गहिर।

79. **प्रश्नः**— 'पिशाच' इति शब्दस्य 'पिसाच' उच्चारणे किं कारणम्?
उत्तरम्— विपर्ययकारणम्।

80. **प्रश्नः**— 'अग्नि' इति शब्दस्य 'आग' इति उच्चारणे किं कारणम्?
उत्तरम्— समीकरणः।

81. **प्रश्नः**— 'धर्म' इति शब्दस्य 'धरम' इति उच्चारणे किं कारणम्?
उत्तरम्— स्वरभक्तिः।

82. **प्रश्नः**— भाषिक-ध्वनीनां वर्गीकरणे मुख्यतया कति आधाराः स्वीक्रियन्ते?
उत्तरम्— 03 आधाराः।

83. **प्रश्नः**— उ, ऊ, ओ, औ, इमे स्वराः कीदृशाः सन्ति?
उत्तरम्— वर्तुलाः।

84. **प्रश्नः**— आकारः कीदृक् स्वरः अस्ति?
उत्तरम्— अर्धवर्तुलः।

85. **प्रश्नः**—डेनियल-जॉन्स-महोदयः कस्मिन् विश्व-विद्यालये प्रोफेसरः आसीत्?
उत्तरम्—लन्दन-विश्वविद्यालये।

86. **प्रश्नः**— बानरः = बन्दरः इत्यत्र ध्वनिपरिवर्तनस्य हेतुः किमस्ति?
उत्तरम्— व्यञ्जनागमः।

87. **प्रश्नः**—ग्रिम-नियमानुसारेण पूर्वजार्मनिक-गकारस्य/Book उच्चजर्मनरूपं किमस्ति?
उत्तरम्— d BUCHA

88. **प्रश्नः**—ग्रिम-नियमानुसारेण निम्नजर्मनस्य 'UP' इत्यस्य उच्चजर्मने किं भवति?
उत्तरम्—AUF.

89. **प्रश्नः**—ग्रासमन-नियमस्य प्रतिष्ठापकः 'हेर्मान-ग्रासमन' कस्य देशस्य निवासी आसीत्?
उत्तरम्— जर्मनदेशस्य।

90. **प्रश्नः**— ग्रासमन-मते 'दधामि' इत्यस्य मूलरूपं किम् आसीत्?
उत्तरम्— धधामि।

91. **प्रश्नः**— ग्रासमन-मते 'बभार' इत्यस्य मूलरूपं किम् आसीत्?
उत्तरम्— भभार।

92. **प्रश्नः**—फेर्नर-नियमस्य प्रतिष्ठापकः 'कार्ल-फेर्नर' कस्य देशस्य निवासी आसीत्?
उत्तरम्— जर्मनदेशस्य।

94. **प्रश्नः**—फेर्नर-मते संस्कृतभाषायाः 'सप्तम्' गाथिकभाषायां किं भवति?
उत्तरम्— सिबुन्।

95. **प्रश्नः**—फेर्नर-मते 'शतम्' इत्यस्य गाथिकरूपं किमस्ति?
उत्तरम्— हुन्द।

96. **प्रश्नः**— खरोष्ठी-लिपेः प्राचीनतमः लेखः कुत्र मिलति?
उत्तरम्— मनसेरा।

97. **प्रश्नः**— अन्तर्राष्ट्रीयलिपौ अलिजिह्वीय-नासिक्य-ध्वनिः किमस्ति?
उत्तरम्— N.

98. **प्रश्नः**— रोमनलिपिः कीदृग् लिपिरस्ति?
उत्तरम्— ध्वनिलिपिः।

99. **प्रश्नः**— अरबी-लिपेः उपजीव्यलिपिः का अस्ति?
उत्तरम्— सामी-लिपि।

100. **प्रश्नः**—यूरोपीय-लिपयः कस्याः रूपान्तराणि सन्ति?
उत्तरम्— ग्रीकलिपेः।

101. **प्रश्नः**— प्राचीन-नागरीलिपिः ब्राह्मीलिपेः कस्याः शाखायाः विकृतिरस्ति?
उत्तरम्— उत्तरीशाखायाः।

102. **प्रश्नः**—अन्तर्राष्ट्रीय-ध्वन्यात्मक-लिपिचिह्ननिर्माणे सर्वाधिकयोगदानं कस्यास्ति?
उत्तरम्—डेनियल-जॉन्स-महोदयस्य।

103. **प्रश्नः**— 'भरसि' इत्यस्य संस्कृत-शब्दस्य अवेस्तारूपं किमस्ति?
उत्तरम्— बरहि।

104. **प्रश्नः**— 'अहुर' बवइति' इत्यस्य अवेस्ता-रूपस्य संस्कृतरूपं किमस्ति?
उत्तरम्— असुर, भवति।

105. **प्रश्नः**— संस्कृत-भकारस्य अवेस्तायां किं भवति?
उत्तरम्— ब।

106. **प्रश्नः**— अवेस्तायाः 'बवइति' इत्यस्य संस्कृतरूपं किं भवति?
उत्तरम्— भवति।

107. **प्रश्नः**— संस्कृतस्य 'भरन्ति' इत्यस्य अवेस्तारूपं किमस्ति?
उत्तरम्— बरइन्ति।

108. **प्रश्नः**—संस्कृतस्य 'क्रतु' इत्यस्य अवेस्तारूपं किमस्ति?
उत्तरम्— खतुम्।

109. **प्रश्नः**—अवेस्तायाः 'हथ्य' इत्यस्य संस्कृतरूपं किम्?
उत्तरम्— हत्य।

110. **प्रश्नः**—अवेस्तायाः 'फ' इत्यस्य संस्कृतरूपं किम्?
उत्तरम्— प।

111. **प्रश्नः**—अवेस्तायाः 'ए इति' इत्यस्य संस्कृतरूपं किम्?
उत्तरम्— एति।

112. **प्रश्नः**—संस्कृतस्य 'प्रोक्तः' इत्यस्य अवेस्तारूपं किमस्ति?
उत्तरम्— फओख्तो।

113. **प्रश्नः**— प्राचीन-लिपीषु वर्णमाला-रहित-लिपिः किमस्ति?
उत्तरम्— सिन्धुघाटीलिपिः, हिट्टइटलिपिः, चीनीलिपिः, रोमनलिपिः।

114. **प्रश्नः**— वर्णमालायुक्त-लिपिः का अस्ति?
उत्तरम्— ब्राह्मीलिपिः, अरबीलिपिः।

115. **प्रश्नः**— अरबी-लिपेः अभिधानं किमस्ति?
उत्तरम्— नस्खी।

116. **प्रश्नः**— अरबी-लिपौ कति अक्षराः विद्यन्ते?
उत्तरम्— 28 अक्षराः।

117. **प्रश्नः**— उर्दू-लिपेः किं नाम अस्ति?
उत्तरम्— अरबी।

118. **प्रश्नः**— ग्रीक-लिपौ कति अक्षराः सन्ति?
उत्तरम्— 24 अक्षराः।

119. **प्रश्नः**— ग्रिम-नियमानुसारेण भारतीय-गकारस्य परिवर्तितं जर्मनरूपं किमस्ति?
उत्तरम्— क्।

120. **प्रश्नः**—ग्रिम-नियमानुसारेण मूलभारोपीय-वकारस्य परिवर्तितं जर्मनरूपं किमस्ति?
उत्तरम्— प्।

121. **प्रश्नः**—माध्यन्दिनशाखायां टवर्गीयध्वनिभिन्नषकारस्य उच्चारणं किमस्ति?
उत्तरम्— ख्।

122. **प्रश्नः**— गुरुमुखी-लिपेः उपजीव्यलिपिः का अस्ति?
उत्तरम्— शारदालिपिः।

123. **प्रश्नः**— प्रो.ब्लूलर-मतानुसारेण ब्राह्मीलिपौ कति वर्णाः आसन्?
उत्तरम्— 41 वर्णाः।

124. **प्रश्नः**— बौद्धग्रन्थे ललितविस्तरे कतिलिपीनामुल्लेखः प्राप्यते?
उत्तरम्— 64 लिपीनाम्।

125. **प्रश्नः**— जैनग्रन्थे समवांगसूत्रे कतिलिपीनां नामोल्लेखः प्राप्यते?
उत्तरम्— 16 लिपीनाम्।

126. **प्रश्नः**— संस्कृत-वाङ्मये भाषाविज्ञानस्य प्राचीन-नाम किमस्ति?
उत्तरम्— शिक्षा।

127. **प्रश्नः**— स्वरयन्त्राणां तेषां कार्याणां च प्रदर्शकः यन्त्रविशेषः कः?
उत्तरम्— लैरिंगोस्कोप।

128. **प्रश्नः**— प्राचीन-भारतीय-आर्यभाषाकालः कोऽस्ति?
उत्तरम्— 1500 B.C.500 B.C.

129. **प्रश्नः**— मध्यकालीन-आर्यभाषाकालः कोऽस्ति?
उत्तरम्— 500 B.C.-100।

130. **प्रश्नः**—आधुनिक-भारतीय-आर्यभाषाकालः कोऽस्ति?
उत्तरम्— 1000। अद्यावधिपर्यन्तम्।

131. **प्रश्नः**— वैदिकसंस्कृतवत् ईरानीभाषा का अस्ति?
उत्तरम्— अवेस्ता।

132. **प्रश्नः**— वैदिकसंस्कृते एव मिलति नान्यत्र लकारोऽयम्?
उत्तरम्— लेट् लकारः।

133. **प्रश्नः**— पालिभाषायां सन्धिरियं नास्त्येव?
उत्तरम्— विसर्गसन्धिः।

134. **प्रश्नः**— अयोगात्मक-भाषा का अस्ति?
उत्तरम्— तिब्बती।

135. **प्रश्नः**—योगात्मकभाषा काऽस्ति?
उत्तरम्— तुर्की।

136. **प्रश्नः**— आकृतिमूलकवर्गीकरणे अश्लिष्टयोगात्मक-भाषा काऽस्ति?
उत्तरम्— तेलुगू।

137. **प्रश्नः**— भाषायाः आकृतिमूलकवर्गीकरणविषयकं कः विकल्पः समीचीनः?
उत्तरम्— अयोगात्मकः, अश्लिष्टः, श्लिष्टः, प्रश्लिष्टः।

138. **प्रश्नः**— 'अवेस्ता' कस्य देशस्य भाषा अस्ति?
उत्तरम्— ईरानी।

139. **प्रश्नः**— पालिभाषायां कतिविधा विशेषताऽवलोक्यते?
उत्तरम्— (9) नवविधा।

140. **प्रश्नः**— प्राकृतानां कियत्यः संख्याः, काश्च ताः?
उत्तरम्— (5) पञ्च, 1. महाराष्ट्री, 2. शौरसेनी, , 3. मागधी, 4. अर्द्धमागधी, 5. पैशाची च।

141. **प्रश्नः**— महाराष्ट्रीयभाषायाः कियत्यो विशेषताः सन्ति?
उत्तरम्— (4) चतस्रः।

142. **प्रश्नः**— मागधी भाषायाः कियत्यो विशेषताः सन्ति?
उत्तरम्— (3) तिस्रः।

143. **प्रश्नः**— अर्द्धमागधी भाषायाः कियत्यो विशेषताः सन्ति?
उत्तरम्— (3) तिस्रः।

144. **प्रश्नः**— पैशाची भाषायाः कियत्यो विशेषताः सन्ति?
उत्तरम्— (3) तिस्रः।

145. **प्रश्नः**— शौरसेनी भाषायाः कियत्यो विशेषताः सन्ति?
उत्तरम्— (3) तिस्रः।

146. **प्रश्नः**—अपभ्रंशस्य कियत्यो विशेषताः सन्ति?
उत्तरम्— (12) द्वादश।

147. **प्रश्नः**—"मैथिलीभाषा" कस्या अपभ्रंशभाषायाः अन्तर्गता?
उत्तरम्— मागधीभाषायाः अन्तर्गता।

148. **प्रश्नः**—भोजपुरीभाषा कस्या अन्तर्गता?
उत्तरम्— मागधीभाषायाः अन्तर्गता।

149. **प्रश्नः**—संस्कृत-भाषया साम्यं कस्याः भाषायाः विद्यते?
उत्तरम्— अवेस्ता-भाषायाः।

150. **प्रश्नः**—"तोषारी"भाषा कस्य परिवारस्य कस्य वर्गस्य च विद्यते?
उत्तरम्— भारत-यूरोपीय-परिवारस्य, 'केतुम्' वर्गस्य च।

151. **प्रश्नः**—काकेशी-परिवारस्य कियत्यो विशेषताः सन्ति?
उत्तरम्— (5) पञ्च।

152. **प्रश्नः**— अमेरिकी-परिवारे प्रायः भाषाणां सङ्ख्या कियत्यः?
उत्तरम्— (1000) सहस्रम्।

153. **प्रश्नः**—रूक्षतायाः दूरीकरणं किं कथ्यते?
उत्तरम्— परिमार्जनम्।

154. **प्रश्नः**—अद्यत्वे ज्ञानक्षेत्रं कतिधा विभक्तम्, तच्च किम्?
उत्तरम्—(3) त्रिधा, 1. भौतिकविज्ञानम्, 2. समाजविज्ञानम्, 3. मानविकी च।

155. **प्रश्नः**—व्याकरणस्य भाषाविज्ञानयोः कः सम्बन्धः?
उत्तरम्— उपकार्योपकारकभावसम्बन्धः।

156. **प्रश्नः**—शास्त्ररूपे भाषाविज्ञानस्य विशेषताः कतिसङ्ख्यकाः?
उत्तरम्— (5) पञ्च।

157. **प्रश्नः**—भाषाविज्ञानस्य प्रयोजनानि कियन्ति?
उत्तरम्— (7) सप्त।

158. **प्रश्नः**—भाषाविज्ञानस्य अङ्गानि कियन्ति?
उत्तरम्— (6) षड्।

159. **प्रश्नः**—भाषाविज्ञानस्य शाखाः कियत्यः सन्ति, काश्च ताः?
उत्तरम्— (3) तिस्रः, 1. वर्णनात्मक, 2. ऐतिहासिक, 3. तुलनात्मकाः।

160. **प्रश्नः**—कतिविधा वाक्, का च सा?
उत्तरम्— (4) चतुर्विधा, 1. परा, 2. पश्यन्ती, 3. मध्यमा, 4. वैखरी च।

161. **प्रश्नः**—भाषाविज्ञानस्य ज्ञानस्य काभिः शाखाभिः साकं सम्बन्धोऽस्ति?
उत्तरम्— (क) मनोविज्ञानेन, (ख) शरीर-विज्ञानेन, (ग) भौतिक-विज्ञानेन, (घ) व्याकरणेन, (ङ) साहित्येन, (च) इतिहासेन, (छ) भूगोलेन, (ज) मानवविज्ञानेन, (झ) समाज-विज्ञानेन, (ञ) दर्शनेन च साकं सम्बन्धो विद्यते।

162. **प्रश्नः**—ध्वनेः प्रसिद्धो भेदः कतिविधः, कश्च सः?
उत्तरम्— (2) द्विविधः, 1. स्वरः, 2. व्यञ्जनञ्च।

163. **प्रश्नः**—को नाम स्वरः?
उत्तरम्— (क) यासामुच्चारणे निःश्वासे यत्र न कुत्राप्यवरोधो भवति तत्र ताः ध्वनयः'स्वरः' नाम्ना व्यवह्रियन्ते। (ख) स्वयं राजन्ते स्वरा वा।

164. **प्रश्नः**—किं नाम व्यञ्जनम्?
उत्तरम्—यासां ध्वनीनामुच्चारणे निःश्वासे कुत्राऽप्यवरोधो जायते ता ध्वनयो 'व्यञ्जन'नाम्ना व्यवह्रियन्ते।

165. **प्रश्नः**—मुखविवरस्याऽनुसारेण स्वराणां कियन्तो भेदाः, के च ते?
उत्तरम्— (4) चत्वारो भेदाः, 1. विवृतम्, 2. अर्धविवृतम्, 3. अर्धसंवृतम्, 4. संवृतञ्च।

166. **प्रश्नः**—स्वरप्रधाना का भाषा?
उत्तरम्— वैदिकभाषा।

167. **प्रश्नः**—कर्ण-नेत्रयोर्भाषायां कियन्ति अन्तराणि?
उत्तरम्— (5) पञ्च।

168. **प्रश्नः**—ध्वनिविज्ञानस्य कतिविधः प्रमुखः पक्षः, कश्च सः?
उत्तरम्— (2) द्विविधः, 1. औच्चारणिकः, 2. ध्वानिकश्च।

169. **प्रश्नः**—स्वनिमस्य कियत्यो विशेषता विद्यते?
उत्तरम्— उच्चरित-भाषायाः।

170. **प्रश्नः**—"संस्कृतम्" कीदृशी भाषा विद्यते?
उत्तरम्— श्लिष्ट-योगात्मका भाषा।

171. **प्रश्नः**—भाषाविज्ञानदृष्ट्या भाषायाः अङ्गं किम्?
उत्तरम्— वाक्यम्।

172. **प्रश्नः**—भाषाविज्ञानदृष्ट्या संस्कृते कियन्ति कारकाणि?
उत्तरम्— (7) सप्त।

173. **प्रश्नः**—वाच्यं कतिविधम्, किञ्च तत्?
उत्तरम्— (3) त्रिविधम्, 1. कर्तृवाच्यम्, 2. कर्मवाच्यम्, 3. भाववाच्यञ्च।

174. **प्रश्नः**—कालः कतिविधः, कश्च सः?
उत्तरम्— (3) त्रिविधः, 1. भूतकालः, 2. वर्तमानकालः, 3. भविष्यत्कालश्च।

175. **प्रश्नः**—भूतकालस्य कियन्तो भेदाः, के च ते?
उत्तरम्— (3) त्रयो भेदाः, 1. अद्यतनम्, 2. अनद्यतनम्, 3. परोक्षश्च।

176. **प्रश्नः**—अथाऽनुसारेण वाक्यस्य कियन्तो भेदाः, के च ते?
उत्तरम्— (8) अष्टौ भेदाः, 1. विधिवाक्यम्, 2. निषेधवाक्यम्, 3. प्रश्न वाक्यम्, 4. अनुज्ञा वाक्यम्, 5. इच्छार्थक वाक्यम्, 6. सन्देहार्थक वाक्यम्, 7. संकेतार्थक वाक्यम्, 8. विस्मयादिबोधकवाक्यञ्च।

177. **प्रश्नः**—शब्दः कतिविधः, कश्च सः?
उत्तरम्— (3) त्रिविधः, 1. वाचकः, 2. लक्षकः, 3. व्यञ्जकश्च।

178. **प्रश्नः**—अर्थः कतिविधः, कश्च सः?
उत्तरम्— (3) त्रिविधः, 1. वाच्यः, 2. लक्ष्यः, 3. व्यङ्ग्यश्च।

179. **प्रश्नः**—शब्दस्य कति वृत्तयः, काश्च ताः?
उत्तरम्— (3) तिस्रः, 1. अभिधा, 2. लक्षणा, 3. व्यञ्जना।

180. **प्रश्नः**—पाठकस्य कियन्तो गुणाः?
उत्तरम्— (6) षट्।

181. **प्रश्नः**— पाठकस्य कियन्तो दोषाः?
उत्तरम्— (6) षट्।

182. **प्रश्नः**—तुलनात्मक-भाषाविज्ञानस्य जनकः कः?
उत्तरम्— पाणिनिः।

183. **प्रश्नः**—समास-कारकप्रकरणयोः मूलाधारौ कौ स्तः?
उत्तरम्—(2) द्वौ, 1. वाक्यविज्ञानम्, 2. अर्थविज्ञानञ्च।

184. **प्रश्नः**— भाषाविज्ञानस्य निर्माणयुगः कः उच्यते?
उत्तरम्— अष्टदश-शताब्दी।

185. **प्रश्नः**—आधुनिक-भाषाविज्ञानस्य जनकः कः आसीत्?
उत्तरम्— 'फर्दिनान्द द सोसूर' महोदयः।

186. **प्रश्नः**—लिपेः सम्बन्धः केन विद्यते?
उत्तरम्— सभ्यतायाः विकासेन।

187. **प्रश्नः**—मुख्यतो लिपेः विकास-सोपानानि कियन्ति, कानि च तानि?
उत्तरम्— (3) त्रीणि, 1. चित्रलिपिः, 2. भावलिपिः, 3. ध्वनिलिपिः।

188. **प्रश्नः**—लिपेः प्राचीनतमं रूपं किम्?
उत्तरम्— चित्रात्मकम्।

189. **प्रश्नः**—भारतस्य सर्वाः लिपयः कुतो निःसृताः?
उत्तरम्— ब्राह्मीलिपितः।

190. **प्रश्नः**—उत्तरी-शैलीतो विकसिताः कियत्यो लिपयः, काश्च ताः?
उत्तरम्— (5) पञ्च, 1. गुप्तलिपिः, 2. कुटिललिपिः, 3. प्राचीन-नागरी, 4. शारदा, 5. बँगलालिपि च।

191. **प्रश्नः**—भाषा-भूगोलस्य उपयोगितायाः कियन्ति कारणानि?
उत्तरम्— (6) षट्।

192. **प्रश्नः**—प्रत्येक-विज्ञानस्य कियन्तः पक्षाः, के च ते?
उत्तरम्— (3) त्रयः, 1. सिद्धान्तपक्षः, 2. अनुप्रयोगपक्षः, 3. व्यावहारिकोपयोगश्च।

193. **प्रश्नः**—भाषा-विश्लेषणस्य कियन्तः स्तराः, के च ते?
उत्तरम्— (4) चत्वारः, 1. पदम्, 2. स्वनम्, 3. वाक्यम्, 4. अर्थश्च।

194. **प्रश्नः**—कस्यापि संगणकस्य कौ मुख्यावयवौ?
उत्तरम्— 1. हार्डवेयर, 2. सॉफ्टवेयर।

195. **प्रश्नः**—'हार्डवेयर' इत्यस्य कार्यं किम्?
उत्तरम्— संगणके अभियान्त्रिकपक्षस्य ज्ञानम्।

196. **प्रश्नः**—संगणके विभिन्न-कार्यनिष्पादन-क्षमता केन आगच्छति?
उत्तरम्— 'सॉफ्टवेयर' इत्यनेन।

197. **प्रश्नः**—आधुनिक-व्यक्तिगतसंगणके कियन्तोऽवयवाः, के च ते?
उत्तरम्— (3) त्रयोऽवयवाः, 1. केन्द्रप्रसारविभागः. [C.P.U.] 2. जवनिका [Monitor] 3. कुञ्जिकामण्डलम् [Keyboard]

198. **प्रश्नः**—भाषायाः आकृतिमूलक-वर्गीकरण-विषयः कः?
उत्तरम्—अयोगात्मकः, अश्लिष्टः, प्रश्लिष्टः, विश्लिष्टः।

199. **प्रश्नः**—'उष्ट्र' इत्यस्य 'ऊँट' इति ध्वनिः परिवर्तनस्य कः प्रकारः?
उत्तरम्— अनुनासिकता।

200. **प्रश्नः**—अनुनासिक-वर्णानां का संख्या?
उत्तरम्— (5) पञ्च।

201. **प्रश्नः**— कस्मिन् यन्त्रे कृत्रिम-तालुः इत्यस्य प्रयोगो भवति?
उत्तरम्— पैलेटोग्राफस्य।

202. **प्रश्नः**—आवृत्ति एवं उच्चारण-समयस्य बोधक-यन्त्रं किम्?
उत्तरम्— स्पैक्ट्रोग्राफः।

203. **प्रश्नः**—ध्वनिपरिवर्तनस्य आन्तरिक-कारणं किम्?
उत्तरम्— ध्वनेः परिवेशः।

204. **प्रश्नः**—'शाक'-'साग' अस्य ध्वनि-परिवर्तनस्य कारणं किम्?
उत्तरम्— घोषीकरणम्।

205. **प्रश्नः**—'स्वरतन्त्रिनां मध्ये प्रस्फुटित-अंशस्य किं नाम?
उत्तरम्— काकलः।

206. **प्रश्नः**—पाणिनीय-शिक्षायां ध्वनिः कति वर्गेषु विभक्तः?
उत्तरम्— (5) पञ्च।

207. **प्रश्नः**—'अ' इति कीदृशः स्वरः?
उत्तरम्— केन्द्रीय-स्वरः।

208. **प्रश्नः**—'ऊ' अत्र कीदृशः स्वरः?
उत्तरम्— पश्च-स्वरः।

209. **प्रश्नः**—'ऐ' अत्र कीदृशः स्वरः?
उत्तरम्— अर्धविवृत-स्वरः।

210. **प्रश्नः**—वैदिक-संस्कृते प्रयुक्त-लकारः कः?
उत्तरम्— लेट् लकारः।

211. **प्रश्नः**—लौकिक-संस्कृते कति ध्वनयः सन्ति?
उत्तरम्— (48) अष्टचत्वारिंशत्।

212. **प्रश्नः**—आंग्लभाषा भारोपीय-परिवारस्य कया भाषया सम्बद्धः?
उत्तरम्— इटालिक।

213. **प्रश्नः**—'रोमन-लिपि' इत्यस्मिन् ग्रीकात् कौ द्वौ अक्षरौ गृहीतः?
उत्तरम्— Y,Z

214. **प्रश्नः**—विसर्गस्य (:) उच्चारण-स्थानं किम्?
उत्तरम्— कण्ठः।

215. **प्रश्नः**—वैदिक-ध्वनि-समूहेषु स्वराणां काः संख्याः?
उत्तरम्— (13) त्रयोदशन्।

216. **प्रश्नः**—ब्राह्मी-लिपिः कीदृशः अस्ति?
उत्तरम्— वैज्ञानिक-लिपिः।

217. **प्रश्नः**—भरतमुनेः अनुसारं प्राकृत-भाषा कति सन्ति?
उत्तरम्— (7) सप्त।

218. **प्रश्नः**—'भ्रातृजाय=भावज' अत्र ध्वनिपरिवर्तनस्य नियमः कः?
उत्तरम्— स्वर-व्यञ्जनलोपः।

219. **प्रश्नः**—'भाण्डागार= भण्डार' अत्र ध्वनिपरिवर्तनस्य नियमः कः?
उत्तरम्— स्वर-व्यञ्जनलोपः।

220. **प्रश्नः**—'समुद्र =समुन्दर' अत्र ध्वनिपरिवर्तनस्य नियमः कः?
उत्तरम्— स्वर-व्यञ्जनलोपः।

221. **प्रश्नः**—प्राचीन-नागरीलिपेः कया शाखया बाँगला-लिपेः विकासः अभूत्?
उत्तरम्— पूर्वी।

222. **प्रश्नः**—अन्तर्राष्ट्रीय स्पर्श-ओष्ठ्य लिपिः कः?
उत्तरम्— Pb

223. **प्रश्नः**—अन्तर्राष्ट्रीय लिपेः स्पर्श-अलिजिह्वीय-लिपिः कः?
उत्तरम्— G

224. **प्रश्नः**— अन्तर्राष्ट्रीय लिपेः ओष्ठ्य-नासिक्य लिपिः कः?
उत्तरम्— M

225. **प्रश्नः**—प्राचीन-नागरी-लिपिः 'ब्राह्मीलिपेः' कया शैल्या विकसिता अभूत्?
उत्तरम्— उत्तरी-शैल्या।

226. **प्रश्नः**— अन्तर्राष्ट्रीय कण्ठ्य-नासिक्य-लिपिः कः?
उत्तरम्— N

227. **प्रश्नः**— अन्तर्राष्ट्रीय-लिपेः पार्श्विक-संहर्षहीन-मूर्धन्यः कः?
उत्तरम्— I

228. **प्रश्नः**— अन्तर्राष्ट्रीय उत्क्षिप्तमूर्धन्य-लिपिः कः?
उत्तरम्— R

229. **प्रश्नः**—ट इयं का अन्तर्राष्ट्रीय-लिपिः अस्ति?
उत्तरम्— दन्तोष्ठ्य-संहर्षहीन अर्धस्वरः।

230. **प्रश्नः**—Ce Ze इयं का अन्तर्राष्ट्रीय-लिपि: अस्ति?
उत्तरम्— संहर्षी वर्त्स्य तालव्य:।

231. **प्रश्नः**— अन्तर्राष्ट्रीय संवृत-स्वर-लिपि: का?
उत्तरम्— Iu

232. **प्रश्नः**—आरोही-अवरोही-भेदयो: केषां स्वराणां द्विधा विभक्तुं शक्यते?
उत्तरम्— संयुक्तस्वर:।

233. **प्रश्नः**— अन्तर्राष्ट्रीय-लिपौ स्पर्शतालव्यलिपिरस्ति?
उत्तरम्— C J

234. **प्रश्नः**— अन्तर्राष्ट्रीय-लिपौ दन्त्य-वर्त्स्य-स्पर्श-लिपि: किमस्ति?
उत्तरम्— T D.

235. **प्रश्नः**— अन्तर्राष्ट्रीय-लिपौ 'ज्ञं' इत्यस्य ध्वनिसंवर्ग: क:?
उत्तरम्— स्पर्शकण्ठ्य:।

236. **प्रश्नः**— नेपाली-भाषाया: लिपि: का अस्तिं?
उत्तरम्— नेवारीलिपि:।

स्थान-प्रयत्न-विवेचनम्

237. **प्रश्नः**— भाषिक-ध्वनि-वर्गीकरणस्य आधारा: का: सन्ति?
उत्तरम्— स्थान-प्रयत्न-करणानि।

238. **प्रश्नः**—कियन्ति-उच्चारण-स्थानानि?
उत्तरम्— (7) सप्त।

239. **प्रश्नः**— अनुनासिकवर्णोच्चारणे सहायकौ स्त:?
उत्तरम्— मुख-नासिके।

240. **प्रश्नः**— दन्त्यवर्णा: के सन्ति?
उत्तरम्— लृ त थ द ध न ल स।

241. **प्रश्नः**— अकारस्य उच्चारणस्थानं किमस्ति?
उत्तरम्— कण्ठ:।

242. **प्रश्नः**— हक्वो: (ह+कु) उच्चारणस्थानं किमस्ति?
उत्तरम्— कण्ठ:।

243. **प्रश्नः**— इकारस्य उच्चारणस्थानं किमस्ति?
उत्तरम्— तालु:।

244. **प्रश्नः**—यच्वो: (य+चु) उच्चारणस्थानं किमस्ति?
उत्तरम्— तालु:।

245. **प्रश्नः**— ऋकारस्य उच्चारणस्थानं किम्?
उत्तरम्— मूर्द्धा।

246. **प्रश्नः**— टवर्गस्य रकारस्य उच्चारणस्थानं किमस्ति?
उत्तरम्— मूर्द्धा।

247. **प्रश्नः**— लृकारस्य उच्चारणस्थानं किम्?
उत्तरम्— दन्ता:।

248. **प्रश्नः**— तवर्ग-लकारयो: उच्चारणस्थानं किम्?
उत्तरम्— दन्ता:।

249. **प्रश्नः**— उकार-पवर्गयो: उच्चारणस्थानं किम्?
उत्तरम्— ओष्ठौ।

250. **प्रश्नः**— ञमङणनानाम् उच्चारणस्थानं किम्?
उत्तरम्— नासिका।

251. **प्रश्नः**— एकारस्य उच्चारणस्थानं किम्?
उत्तरम्— कण्ठतालु:।

252. **प्रश्नः**— औकारस्य उच्चारणस्थानं किम्?
उत्तरम्— कण्ठोष्ठ्यम्।

253. **प्रश्नः**— वकारस्य उच्चारणस्थानं किम्?
उत्तरम्— दन्तोष्ठ्यम्।

254. **प्रश्नः**— 'स्'कारस्य उच्चारणस्थानं किम्?
उत्तरम्— दन्त्य:।

255. **प्रश्नः**— 'ष्'कारस्य उच्चारणस्थानं किम्?
उत्तरम्— मूर्धन्य:।

256. **प्रश्नः**— 'र"ल"य' इति वर्णानां का संज्ञा?
उत्तरम्— अन्त:स्थ:।

257. **प्रश्नः**— आभ्यन्तरप्रयत्न-ईषत्स्पृष्टं कं कथ्यते?
उत्तरम्— अन्त:स्थ।

258. **प्रश्नः**— श् ष् स् ह' एतेषां वर्णानां का संज्ञा?
उत्तरम्— ऊष्माण:।

259. **प्रश्नः**—आभ्यन्तर-प्रयत्नमाधारीकृत्य व्यञ्जनस्य कति भेदा: जायन्ते?
उत्तरम्— (8) अष्टौ।

260. **प्रश्नः**—'श' इत्यस्य ध्वनि-वर्ग क:?
उत्तरम्— संघर्षी।

261. **प्रश्नः**—अन्त:स्थस्य अपरं नाम किम्?
उत्तरम्— अर्द्धस्वर:।

262. **प्रश्नः**— महाप्राणीकरणस्य उदाहरणं किमस्ति?
उत्तरम्— बाष्प-भाप।

263. **प्रश्नः**—घोष-अघोषध्वन्यो: सुस्पष्टमापक: यन्त्रविशेष: क:?
उत्तरम्— काइमोग्राफ।

264. **प्रश्नः**— श्वासग्रहणकाले स्वरतन्त्रीणां कीदृग् स्थिति: भवति?
उत्तरम्— पूर्णविवृत:।

265. **प्रश्नः**—ध्वन्युच्चारणे सर्वाधिकोपयोगी इन्द्रियं किमस्ति?
उत्तरम्— जिह्वा।

266. **प्रश्नः**— कस्योच्चारणे वायु: निर्बाधगत्या बहि: नि:सरति?
उत्तरम्— स्वरस्य।

267. **प्रश्नः**— वर्गाणां तृतीयवर्णस्य बाह्यप्रयत्नं किमस्ति?
उत्तरम्— अल्पप्राण:।

268. **प्रश्नः**— खकारस्य बाह्यप्रयत्नं किमस्ति?
उत्तरम्— विवार:।

269. **प्रश्नः**— स्वराणाम् आभ्यन्तरप्रयत्नं किमस्ति?
उत्तरम्— विवृतम्।

270. **प्रश्नः**— शकारस्य ध्वनिसंवर्ग: कोऽस्ति?
उत्तरम्— संघर्षी।

271. **प्रश्नः**— संघर्षी-ध्वनिसंवर्गे क: परिगणित: अस्ति?
उत्तरम्— य्।

272. **प्रश्नः**— संस्कृतभाषायां 'स'कारस्य ध्वनिसंवर्ग: कोऽस्ति?
उत्तरम्— अन्तस्थ:।

273. **प्रश्नः**— संस्कृतभाषायाम् अन्तस्थवर्णा: कति सन्ति?
उत्तरम्— 04 चत्वार:।

274. **प्रश्नः**—रकार: कस्मिन् ध्वनिसंवर्गे परिगणित: वैयाकरणै:?
उत्तरम्— अन्तस्थसंवर्गे।

275. **प्रश्नः**— अर्धस्वरा: के सन्ति?
उत्तरम्— अन्तस्था:।

276. **प्रश्नः**— ककारस्य घोषरूपं किमस्ति?
उत्तरम्— ग।

277. **प्रश्नः**— तकारस्य घोषरूपं किमस्ति?
उत्तरम्— द।

278. **प्रश्नः**— चकारस्य महाप्राणभृत: क:?
उत्तरम्— छ।

279. **प्रश्नः**— फकारस्य अल्पप्राणभृत: क:?
उत्तरम्— प।

280. **प्रश्नः**— 'प'महाप्राणभृत: क:?
उत्तरम्— फ।

281. **प्रश्नः**— 'प'कारस्य घोष-रूपं किम्?
उत्तरम्— ब।

282. **प्रश्नः**— 'त'कारस्य महाप्राणरूपं किम्?
उत्तरम्— थ।

283. **प्रश्नः**— 'ट'कारस्य ध्वनिवर्ग: क:?
उत्तरम्— अघोष-महाप्राण-मूर्धन्य-स्पर्शा:।

284. **प्रश्नः**— अल्पप्राणसंज्ञका: के सन्ति?
उत्तरम्— प् त् च्।

285. **प्रश्नः**— महाप्राणसंज्ञका: के सन्ति?
उत्तरम्— घ् झ् ध्।

286. **प्रश्नः**— तालव्यवर्ण: कोऽस्ति?
उत्तरम्— श।

287. **प्रश्नः**— मानस्वरेषु पश्चस्वरा: के सन्ति?
उत्तरम्— उ, ऊ, ओ, औ, आ।

288. **प्रश्नः**— डेनियल-जॉन्स-महोदयस्य मानस्वरे अग्रस्वरा: के सन्ति?
उत्तरम्— इ, ई, ए, ऐ।

289. **प्रश्नः**—डेनियल-जॉन्स-महोदयस्य स्वरचतुर्भुजं मानस्वरं वा अभिलक्ष्य अर्धसंवृतस्वरान् निर्दिशतु?
उत्तरम्— ए, ओ।

290. **प्रश्नः**— अर्धविवृतस्वरा: के सन्ति?
उत्तरम्— ऐ, औ।

291. **प्रश्नः**— संवृतस्वरा: कस्मिन् विकल्पे प्रदर्शिता: सन्ति?
उत्तरम्— इ, ओ।

292. प्रश्नः— विवृतस्वराः के सन्ति?
उत्तरम्— अ, आ।

293. प्रश्नः— खर्-वर्णाः किं भवन्ति?
उत्तरम्— श्वासाः अघोषाश्च।

294. प्रश्नः— हश्-वर्णाः किं भवन्ति?
उत्तरम्— नादाः घोषाश्च।

295. प्रश्नः— वर्गाणां प्रथम-तृतीय-पञ्चमाः यणश्च किं भवन्ति?
उत्तरम्— अल्पप्राणाः।

296. प्रश्नः— वर्गाणां द्वितीय-चतुर्थौ शलश्च किं भवन्ति?
उत्तरम्— महाप्राणाः।

297. प्रश्नः— आभ्यन्तरप्रयत्नाः कति प्रकारकाः भवन्ति?
उत्तरम्— 05 पञ्चप्रकारकाः।

298. प्रश्नः— स्पृष्टं प्रयत्नं किं भवति?
उत्तरम्— स्पर्शानाम्।

299. प्रश्नः— ईषत्स्पृष्टं प्रयत्नं किं भवति?
उत्तरम्— अन्तःस्थानाम्।

300. प्रश्नः— ईषद्विवृतं प्रयत्नं किं भवति?
उत्तरम्— ऊष्माणाम्।

301. प्रश्नः— वकाराणां प्रयत्नं किं भवति?
उत्तरम्— विवृतम्।

302. प्रश्नः— ह्रस्वस्य अवर्णस्य प्रयोगे किं भवति?
उत्तरम्— संवृतम्।

303. प्रश्नः— बाह्यप्रयत्नाः कतिविधाः भवन्ति?
उत्तरम्— 11 एकादशधाः।

304. प्रश्नः— अल्पवायु यत्र प्रयोगः स्यु तत्र बाह्यप्रयत्नः कः?
उत्तरम्— संवारः।

305. प्रश्नः— अधिकवायु यंत्र प्रयोगः स्यु तत्र बाह्यप्रयत्नः कः?
उत्तरम्— महाप्राणः।

306. प्रश्नः— 'श्वास'बाह्यप्रयत्नस्य अपर नाम किमस्ति?
उत्तरम्— अघोषः।

307. प्रश्नः— संस्कृते 'स'वर्ण का ध्वनिः कथ्यते?
उत्तरम्— ऊष्मः।

308. प्रश्नः— संस्कृते अनुस्वारस्य ध्वनिवर्गः कः?
उत्तरम्— नासिक्यम्।

309. प्रश्नः— विसर्गः कस्य पश्चात् प्रयुक्तो भवति?
उत्तरम्— सामान्यस्वरस्य।

310. प्रश्नः— कस्याः ध्वनेः निःश्वासः मुखविवरेण सह नासिकाविवरणात् निस्सरति?
उत्तरम्— अनुनासिकध्वनेः।

311. प्रश्नः— 'ओ' इति कः स्वरः?
उत्तरम्— अर्धसंवृतः।

312. प्रश्नः— 'उ' इति कः स्वरः?
उत्तरम्— संवृतः।

313. प्रश्नः— 'ल' इति कस्य वर्गस्य अस्ति?
उत्तरम्— पार्श्विकस्य।

314. प्रश्नः—ब्राह्मीलिप्यै विकसिता शारदालिपेः प्रचारः भारतस्य कस्मिन् प्रान्ते अभूत्?
उत्तरम्— पंजाब, कश्मीर।

315. प्रश्नः—'ग्रिम'महोदयस्यानुसारं मूलभारोपीयघोष-महाप्राणस्य जर्मनिके किं परिवर्तनम्?
उत्तरम्— घोष-अल्पप्राणः।

316. प्रश्नः—'ग्रिम'महोदयस्यानुसारं मूलभारोपीयघोष-अल्पप्राणस्य जर्मनिके किं परिवर्तनम्?
उत्तरम्— अघोष अल्पप्राण।

317. प्रश्नः—माध्यन्दिनशाखानुसारं ट-वर्गीयध्वनेः भिन्नः 'ष'इत्यस्य उच्चारणं कीदृशः?
उत्तरम्—ख्।

318. प्रश्नः—'ग्रिम'महोदयस्यानुसारं निम्न जर्मन ष्ट्रल्ल्म्ह इत्यस्य उच्चजर्मने किं रूपम्?
उत्तरम्— DREI

319. प्रश्नः— 'ग्रिम'महोदयस्यानुसारं निम्नजर्मन 'क' उच्च जर्मने किं रूपम्?
उत्तरम्— ख्।

320. प्रश्नः— ग्रिमनियमस्य प्रतिष्ठाता 'याकोबग्रिम' कस्य देशस्य निवासी आसीत्?
उत्तरम्— जर्मन।

321. प्रश्नः— मानरस्वरेषु पश्चस्वराः के सन्ति?
उत्तरम्— उ, ऊ, ओ, औ, आ।

322. प्रश्नः— डेनियन-जॉन्स-महोदयः कस्मिन् विश्व-विद्यालये प्राध्यापकः?
उत्तरम्— लन्दन-विश्वविद्यालये।

323. प्रश्नः— बानरः= बन्दरः इत्यत्र ध्वनिपरिवर्तनस्य को हेतुः?
उत्तरम्— व्यञ्जनागमः।

324. प्रश्नः— कस्योच्चारणे वायुः निर्बाधगत्या बहिः निःसरति?
उत्तरम्— स्वरस्य।

325. प्रश्नः— वैयाकरणैः कस्मिन् ध्वनिसंवर्गे परिगणितः?
उत्तरम्— अन्तःस्थसंवर्गे।

326. प्रश्नः— भावातिरेकस्य उदाहरणं किमस्ति?
उत्तरम्—बेटी-बिटिया।

327. प्रश्नः— "वाक्यं स्याद्योग्यताऽऽकांक्षाऽऽसत्तियुक्तः पदोच्चयः" इति वाक्यपरिभाषा कुतः उद्धृता?
उत्तरम्—साहित्यदर्पणात्।

8

साहित्यशास्त्रविवेचनम्

(Q) (Code-25/73) काव्यप्रकाश (द्वितीय पञ्चमउल्लासश्च)

(क) काव्यलक्षणम्

कवृ वर्णने इत्यस्माद्धातोः कवयति वर्णयति वा इति व्युत्पत्त्या लोकोत्तरवर्णनानिपुणः कवि इत्यर्थोऽवगम्यते। अत्र केचित् कवयः शब्द एव काव्यमिति कथयन्ति, अन्ये शब्दार्थौ काव्यमिति स्वीकुर्वन्ति अपरे च पदावली काव्यम् इति आमनन्ति।

1. दण्डी–शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली। (काव्यादर्शे:)
2. क्रान्तिचन्द्र:–इष्टार्थव्यवच्छिन्ना पदावलीति काव्यम्। (काव्य दीपिकायां)
3. अग्निपुराणे–इष्टार्थव्यवच्छिन्ना पदावली। काव्यं स्फुरदलङ्कारं गुणदोषवर्जितम्।
4. जयदेव:-

   निर्दोषा लक्षणवती सरीतिर्गुणभूषिता।
   सालंकाररसानेकवृत्तिर्वाक् काव्यनामभाक्।।
   (चन्द्रालोके)
5. विश्वनाथ:–वाक्यं रसात्मकं काव्यम्। (साहित्यदर्पणे)
6. भामह:–शब्दार्थौ सहितौ काव्यम्। (काव्यालंकारे)
7. वामन:–काव्यशब्दोऽयं गुणालंकारसंस्कृतयोः शब्दार्थयोर्वर्तते। भक्त्या तु शब्दार्थवचनमात्रोऽत्र गृह्यते।। (काव्यलंकारसूत्रवृत्तौ)
8. रुद्रट:–शब्दार्थौ काव्यम् (काव्यालंकारे)।
9. कुन्तक:–शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि। बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।। (वक्रोक्तिजीवितम्)
10. आनन्दवर्धन:–सहृदयहृदयाह्लादि शब्दार्थमयत्वमेव काव्यलक्षणम्। (ध्वन्यालोके)
11. हेमचन्द्र:–अदोषौ सगुणौ सालंकारौ च शब्दार्थौ काव्यम्। (काव्यानुशासने)
12. मम्मट:–तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि। (काव्यप्रकाशे)
13. जगन्नाथ:–रमणीयार्थप्रतिपादकः शब्दः काव्यम्। (रसगंगाधरे)
14. राजशेखर:–शब्दार्थौ ते शरीरः (काव्यमीमांसा)।
15. प्रथमवाग्भट्ट:–गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ इति।
16. द्वितीयवाग्भट्ट:–शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालंकारौ काव्यमिति।

एवं प्रकारेण प्रचलितेषु विभिन्नमतेषु–'शब्दार्थौ काव्यम्' इति विषयकानि मतानि एव श्रेष्ठानि भवन्ति। उच्यते यथा–

अर्थस्य व्यञ्जकत्वे तु शब्दस्य सहकारिता।
अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः।।

(1) मम्मटस्य काव्यलक्षणं विवृणुत?

काव्यस्य किं लक्षणमिति जिज्ञासायामाह मम्मटचार्य:–"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।" तत् शब्दस्य पूर्वपरामर्शकत्वात् काव्यमित्यर्थः, अनलंकृती पुनः क्वापि पदमिति सालङ्कारौ इत्यस्य ग्राहकम्। तेन दोषाभावगुणालंकारादिविशिष्टौ शब्दार्थौ काव्यमिति। दोषत्वं नाम उद्देश्यप्रतीतिबन्धकत्वम्। काव्यसौष्ठवप्रतिपादने च्युतसंस्कारप्रभृतयः नित्याः दोषाः काव्यहानिकारकाः। अपरं

तु माधुर्यौजप्रसादगुणत्रयसमन्वितं शब्दार्थयुगं काव्यम्। आस्वादव्यञ्जकस्य शब्देऽर्थे च सत्वात् शब्दार्थ युगलस्य काव्यत्वं सुघटम्। अनलङ्कृतीत्यत्र नञः इषदर्थकतया सर्वत्रा सालंकारौ क्वचित्तु स्फुटालंकार विरहेऽपि न काव्यत्वहानिरिति मम्मटमतं काव्यलक्षणम्। यथा–यः कौमारहरः....इत्यादि रसयुक्तस्थलेषु स्फुटालंकारविरहेऽपि न काव्यत्वापत्तिः। अतः दोषरहितौ गुणसहितौ अलंकारमण्डितौ शब्दार्थौ क्वचितु अलंकाररहितौ शब्दार्थौ वा काव्यमिति काव्यलक्षणम्।

(2) विश्वनाथसम्मतं काव्यलक्षणं प्रतिपादयत?

मम्मटादीनां प्राचीनाचार्याणां शब्दार्थयुगलस्य काव्यलक्षणं आक्षिपता आचार्यविश्वनाथेन प्रशस्तं काव्यलक्षणं प्रतिपादितमित्थं यत्–'वाक्यं रसात्मकं काव्यम्'। आचार्येण रस एव काव्यस्य आत्मा इति प्रतिपाद्य तद्विना काव्यस्य काव्यत्वं नाङ्गीकृतम्। रसाभावे शब्दार्थमयं वाक्यं वाक्यमेव। लक्षणेऽस्मिन् विशेषणद्वयं वर्तते। तत्र किं वाक्यमिति जिज्ञासामाह–वाक्यं स्यात् "योग्यता-आकांक्षा-आसत्तियुक्तः"। रसात्मक इत्युच्यते रस एव आत्मा साररूपतया जीवनाधायको यस्येत्यर्थः। शृङ्गारादिनवरसेषु कोऽपि रसः अङ्गीत्वेन जीवनाधायकत्वेन वा तिष्ठति, तदा तद्वाक्यं काव्यतामुपैति। रसाभासादिस्थले अव्याप्तिवारणाय रस्यते इति रस इति व्युत्पत्त्या भावतदाभासादयोऽपि गृह्यन्ते। अतः नहि रसादृते कश्चिदर्थः प्रवर्तते इति नयेन नवीनमुत्कृष्टं च लक्षणं आचार्यसम्मतं दिगिति।

(3) जगन्नाथदिशा काव्यलक्षणं विवृणुत?

मम्मटादीनां प्राचीनाचार्याणां शब्दार्थयुगलस्य काव्यलक्षणमाक्षिपता पण्डितराजजगन्नाथेन काव्यशब्दस्यैव काव्यत्वं स्वीकृत्य प्रोक्तम्– "रमणीयार्थप्रतिपादकः शब्दः काव्यम्।" लक्षणेऽस्मिन् अनुरागादिरूपरमणीयार्थप्रतिपादके कामिनीकटाक्षादावतिव्याप्तिवारणाय शब्द इति विशेषणपदम्। घटानयनाद्यर्थप्रतिपादके "घटमानय" इत्यादिवाक्येऽति-व्याप्तिवारणाय रमणीयेति। रमणीयशब्दप्रतिपादके "पुत्रस्ते जातः" इत्यादावतिव्याप्तिवारणाय अर्थेति। रमणीयतायाः लोकवैचित्र्या व्यवस्थितिमाधातुं आह रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरतेति। अतः यदर्थविषयक-ज्ञानेनालौकिको आनन्दः जायते, तस्य ज्ञानस्य विषयभूतोऽर्थे रमणीय इति रमणीयतायाः व्यवस्थितेः। अतः चमत्कारजनक भावनाविषयार्थप्रतिपादकशब्दत्वं काव्यत्वमिति जगन्नाथमतम्। इत्थं रमणीयार्थप्रतिपादकत्वे सति काव्यत्वमिति फलितम्।

(4) आचार्यकुन्तकमतानुसारं काव्यलक्षणं विशदयत?

"वक्रोक्तिरेव वैदग्ध्यभंगीभणितिरुच्यते।" "विभावैर्लल-नोद्यानादिभिः आलम्बनान्दीपनकारणै रत्यादिको भावो जनितः"

1. विभावैस्सह स्थायिभावानामुत्पाद्य-उत्पादकभावः।
2. अनुभावैस्सह गम्यगमकसम्बन्धः।
3. व्यभिचारैः सह पोष्यपोषकभावः।

शंकुत-अनुमिति-चित्रतुरगन्यायेन सामाजिकेषु विद्यमानया वासनया अनुमितिसाहाय्येन रसानुभूतिः। अत्र सम्यक् मिथ्या संशयप्रतीतिभ्यो विलक्षणया चित्रतुरगन्यायेन रामोऽयमिति प्रतिपत्त्या रसानुभूतिः।

अत्र हि दोषः–नानुभूतिमूला स्वानुमितिमूला अनुमाने बुद्धेर्विषयः नानुभूतेः। "अत्र संयोगाद् गम्यगमकभावः" रामे वाऽयमवयवे रामः। सेयं ममाङ्गेषु सुधारसघय लोचनगोचरं गताः।

(ख) काव्यप्रयोजनानि–'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते' इति न्यायेन काव्यप्रयोजनमपि साहित्याचार्यैः प्रतिपादितम्। मम्मटेन तु प्रोक्तम्–

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।

अत्र षट्प्रयोजनानि प्रोक्तानि, तत्र कालिदासादीनामिव यशःप्राप्तये, हर्षादिधविकादीनामिव अर्थप्राप्तये (धनलाभाय) राजादिगतोचितपरिज्ञानाय, मयूरादीनामिव अनिष्टपरिहाराय, आनन्दप्राप्तये (रसादीनामास्वादकत्वेन) रामादिवत् वर्तितव्यं न रावणादिवदिति उपदेशहेतवे कविः काव्यं करोतीति दिक्। भामहेन तु–धर्मार्थकाममोक्षेषु–इत्यादिना पुरुषार्थचतुष्टयप्राप्तिः काव्यप्रयोजनम्। विश्वनाथेनापि चतुर्वर्गप्राप्तिरिति काव्यप्रयोजनं निगदितम्।

विविधमतानि–विश्वनाथ:–

चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निगद्यते।

भरत: धर्मयशबुद्धिविवर्धनाय प्रोक्तम्–

धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्जनम्।
लोकोपदेशजननं नाट्यमेतद् भविष्यति।।

वामन:– **काव्यं सद् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात्।**

भामह:– **धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।**
करोति कीर्त्तिं प्रीतिं च साधुकाव्यनिबन्धनम्।।

कुन्तकः–

चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।
काव्यामृतरसेनान्तश्चमत्कारो वितन्यते।।

(ग) काव्यहेतुः काव्यभेदाश्च–कवेर्यदलौकिकं कर्म तत्काव्यमिति प्रोच्यते। कारणं विना कार्योत्पत्त्यभावात् काव्योत्पत्तौ त्रयो मुख्यः हेतवः प्रतिपादिताः मम्मटेन; ते च–

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे।।

शक्तिः कवित्वबीजरूपा संस्कारविशिष्य, यथा वृक्षोत्पत्तौ हेतुबीजः तथैव काव्योत्पत्तौ कवित्वशक्तिरूपबीजहेतुः, तं विना काव्यं न प्रसरति प्रसृतं वोपहसनीयमेव।

निपुणता नाम व्युत्पत्तिः, सा च लोकशास्त्रकाव्यकोष–व्याकरणादीनामन्वेक्षणादुत्पद्यते, आदिग्रहणात् इतिहासादीनां विमर्शनादुत्पन्नं विशिष्टज्ञानमिति गृह्यते इति द्वितीयो हेतुः।

अभ्यासस्तु गुरुसान्निध्यवशाद् तेषामुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिः। एते त्रयो हेतवः न तु पृथग्रूपेण अपितु समष्ट्यैव काव्योद्भवे निर्माणे उल्लासे च।

काव्यभेदाः– "उत्तमकाव्यम्"

उत्तमकाव्यस्य लक्षणं प्रतिपादितमित्थं मम्मटाचार्येण यत्–"इदमुत्तममतिशयेन व्यंग्ये वाच्याद् ध्वनिर्बुधैः कथितः।" काव्यस्य भेदाः ध्वनिगुणीभूतव्यंग्यचित्रत्वेन च कृताः। तत्र लक्षणेऽस्मिन् इदं पदं काव्यबोधकम्। यत्र काव्ये वाच्यार्थापेक्षया व्यंग्यार्थेन चमत्कृतिरुत्पद्यते, अतः ध्वन्यते व्यंग्यार्थः शब्दं बिना यस्मिन् काव्ये इति ध्वनिकाव्यम्। साहित्यदर्पणकारोऽपि–

वाच्यातिशयिनि व्यंग्ये ध्वनिस्तत्काव्यमुत्तमम्।

अर्थात् वाच्यादतिशयिनि सति ध्वन्यते अर्थः यस्मिन्निति ध्वनिर्नामोत्तमं काव्यम्। वैयाकरणैस्तु प्रधानभूतस्फोट–रूपव्यंग्यव्यंजकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः, तन्मतानुसारेणैव साहित्याचार्यैरपि व्यंग्यार्थाभिव्यक्तौ ध्वनिरिति व्यवह्रियते। एषा ध्वनिः लक्षणाभिधामूलात् द्विविधा। उत्तमकाव्योदाहरणं यथा–

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापी स्नातुमितो गतासि न पुनस्तस्याध-
मस्यान्तिकम्।।

अत्र तदन्तिकमेव रन्तुं गतासीति प्राधान्येनाधमपदेन व्यज्यते।

जगन्नाथेन उत्तमोत्तमरूपेण लक्षणं कृतम्–

शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थमभिव्यक्तः
तदाद्यम्। उत्तमं तु यत्र व्यंग्यप्रधानमेव
सच्चमत्कारकारणं तद्द्वितीयम्।

मध्यमकाव्यलक्षणम्–मध्यमकाव्यस्य लक्षणं हि मम्मटेन यथा–

अतादृशि गुणीभूतमव्यङ्ग्यं तु मध्यमम्।

अर्थाद्यत्र काव्ये वाच्यापेक्षया व्यंग्यार्थः अतिशयेन चमत्कृतो न भवति, तदेव मध्यमकाव्यं गुणीभूतव्यंग्यकाव्यमपि कथ्यते। साहित्यदर्पणेऽपि–

अपरं तु गुणीभूतव्यंग्यं वाच्यादनुत्तमे व्यंग्ये।

अतः व्यञ्जनया प्रतिपाद्येऽर्थे अभिधाप्रतिपाद्यात् अनुत्कृष्टे सति गुणीभूतव्यंग्यं काव्यं भवति। मध्यमकाव्योदाहरणं यथा–

ग्रामतरुणं तरुण्या नवमञ्जुलमञ्जरीसनाथकम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया।।

अत्र वञ्जुललतागृहे दत्तसंकेता नागतेति व्यंग्यार्थापेक्षया वाच्यस्यैव चमत्कृतित्वम् गुणीभूतव्यंग्यं नाम मध्यमकाव्यम्।

जगन्नाथेन– "यत्र व्यंग्यचमत्कारासमानाधिकरणो वाच्यचमत्कारस्तृतीयम्।

अयं स रसनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरूजघनस्पर्शी नीवीविस्रंसनः करः।
(का.प्र.52116)

अधमकाव्यलक्षणम्–अधमकाव्यलक्षणं हि मम्मटेन–

शब्दचित्रं वाच्यचित्रमव्यंग्यं त्ववरं स्मृतम्।

अर्थात् व्यंग्यरहितकाव्यमधमम्। अव्यंग्यमिति स्फुटप्रतीयमानार्थरहितम्। काव्यमिदं चित्रकाव्यमप्युच्यते। तच्चित्रं द्विविधम्–शब्दचित्रं वाच्यचित्रं चेति। चित्रपदस्यार्थः गुणालंकारयुक्तम्। शब्दचित्रोदाहरणं यथा–

स्वच्छन्दोच्छलदच्छकच्छकुहरमन्दाकिनी मन्दताम्।

उदाहरणे व्यंग्यार्थाभावादनुप्रासजन्य एव चमत्कृतिवशात् शब्दचित्रम्।

काव्यभेदः–ध्वनिगुणीभूतकाव्यस्य भेदद्वयं प्रतिपाद्य

काव्यस्य द्वैविध्यम्–दृश्यश्रव्यभेदेन। दृश्यकाव्यमभिनेयम्। अभिनेतुं योग्यमभिनेयम् स्वरूपारोपवद्रूपकमपि कथ्यते, अभिनयश्च अवस्थानुकरणम्। स च अभिनयः आङ्गिकवाचि–काहार्यसात्त्विकभेदैः चतुर्विधः। दृश्यकाव्यस्य रूपकस्य दश भेदाः–

नाटकमथ प्रकरणं भाणव्यायोग-
समवकारडिमाः।
ईहामृगांकवीथ्यः प्रहसनमिति रूपकाणि दश।।

श्रव्यकाव्यं तु श्रोतृरूपं द्विविधं गद्यपद्यमयञ्च। यथोक्तम्–

श्रव्यश्रोतव्यमात्रं तत्पद्यगद्यमयं द्विधा।

छन्दोबद्धं पद्यम्। तेन मुक्तं मुक्तकम्। गद्यपद्यमयं चम्पूकाव्यम्। द्वाभ्यां तु युग्मकं सदान्तिकं त्रिभिरिष्यते।

(घ) काव्यस्यात्मा ध्वनिः–काव्यस्यात्मा कः? काव्यालङ्कारशास्त्रे विभिन्नसम्प्रदायोत्पत्तिकारणमस्ति काव्यात्मान्वेषणमेव। कोऽस्ति काव्यस्यात्मा इति जिज्ञासामवलम्ब्य स्वस्वबुद्ध्यनुसारेणोत्तरं प्रदीयन्ते। उक्तजिज्ञासानिवृत्तये एव केचिदलङ्कारं, केचिद् रीतिं, केचिद् ध्वनिं च काव्यत्वेन प्रमाणयन्ति। **'काव्यस्यात्मा ध्वनिः'** इति स्वीकृते सति ध्वनिसिद्धान्तस्य अवबोधनमावश्यकं वर्तते। व्यङ्ग्यप्राधान्ये ध्वनिरिति।

ध्वन्यतेऽस्मिन्निति ध्वनिः, इति विग्रहेन व्यङ्ग्यार्थप्रधानं काव्यम् संगृह्यते। अनेन विग्रहवाक्येन सिध्यति यत् ध्वनिशब्देन व्यञ्जकशब्दार्थयोः, व्यङ्ग्यार्थस्य, व्यञ्जनाव्यापारस्य, व्यङ्ग्यप्रधानकाव्यस्य च ग्रहणं संजायते।

ध्वनेः लक्षणम्–ध्वनिसम्प्रदायस्य प्रतिष्ठापकः आनन्दवर्धनः वर्तते; तदनुसारं ध्वनिलक्षणं–**"यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थो व्यक्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।**

प्रतीयमानं पुनरन्यदेव
वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं
विभाति लावण्यमिवाङ्गनासु।।
(ध्वन्यालोक1/4)

वाच्यार्थापेक्षया व्यङ्ग्येऽर्थे मुख्ये सति ध्वनिः इति कथ्यते। तत्र मम्मटेन ध्वनिं लक्षयता स्वकीये काव्यप्रकाशे ग्रन्थेऽभिहितम्–

इदमुत्तममतिशयिनि व्यङ्ग्ये
वाच्याद् ध्वनिर्बुधैः कथितः।
वाच्यातिशायिनि व्यङ्ग्ये
ध्वनिस्तत्काव्यमुत्तमम् ।
साहित्यदर्पणे (4/1)

तत्र यथोक्तम्–

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः
कथितः।।
(ध्वन्यालोक (1/13)

विश्वनाथः साहित्यदर्पणे यथोक्तम्–

शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता।।
(साहित्यदर्पणे (2/28)

ध्वनिरात्मा काव्यस्य–काव्यशास्त्रे अभिधा लक्षणा व्यञ्जना चेति तिस्रो वृत्तयः मन्यन्ते। अभिधा वाच्यार्थप्रधाना, लक्षणा लक्ष्यार्थप्रधाना, व्यञ्जना व्यङ्ग्यार्थप्रधाना च भवन्ति। व्यञ्जनाशक्तिः स्वीकरणे सति द्विविधा व्यञ्जना 1. शाब्दी 2. आर्थी च मन्यन्ते। तत्र शाब्दी द्वेधा–अभिधामूला लक्षणामूला च। आर्थी व्यञ्जना च वस्तुबोधव्यादीनां वैशिष्ट्याद् अन्यदर्थं बोधयति। व्यञ्जनाशक्तिः काव्ये प्रभविष्णुतां रमणीयतां रागात्मकतां च सन्निवेशयति। तदैव काव्ये रमणीयत्वं जायते। कथितं च–

क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः।
(शिशु०4/17)

ध्वनेर्भेदाः–ध्वनेर्मुखतया द्वौ भेदौ स्तः; 1. लक्षणामूलो ध्वनिः (अविवक्षितवाच्यध्वनिर्वा) अस्यापि द्वौ भेदौ–अर्थान्तरसंक्रमितवाच्यध्वनिः, अत्यन्ततिरस्कृतवाच्यध्वनिश्च। लक्षणामूलश्चैष ध्वनिः।

2. अभिधामूलो ध्वनिः (विवक्षितान्यपरवाच्यध्वनिर्वा)। अस्यापि द्वौ भेदौ–संलक्ष्यक्रमव्यङ्ग्यध्वनिः, असंलक्ष्यक्रम–व्यङ्ग्यध्वनिश्च। द्वयोरपि एतयोः भेदयोरनेके भेदाः काव्यशास्त्रे वर्ण्यन्ते। पदगतध्वनेः उदाहरणमिदम्–

निःश्वासान्धः इवादर्शश्चन्द्रमा न प्रकाशते।

मुख्यरूपेण ध्वनिशब्दस्य प्रयोगः वैयाकरणैः कृतः। साहित्यशास्त्रे आनन्दवर्धनादिभिः ध्वनिसम्प्रदायाचार्यैः

व्याकरणशास्त्रस्य ध्वनिशब्दः स्वीकृतः। व्याकरणशास्त्रे प्रधानभूतस्य स्फोटस्य अभिव्यक्तिः ध्वनिशब्देन भवति, अत एव 'ध्वनति स्फोटं व्यनक्ति इति ध्वनिः' इति व्युत्पत्त्यनुसारं स्फोटाभिव्यञ्जकशब्दानां कृते ध्वनिपदस्य प्रयोगः कृतः। तदेव आधृत्य ध्वनिसमर्थकाचार्यैः वाच्यार्थसमर्थकानां व्यङ्ग्यार्थानां अभिव्यक्तकारकाः शब्दाः तदर्थश्च ध्वनिशब्देन अभिहिताः। काव्यशास्त्रे ध्वनिवादस्य महत्त्वस्य प्रमुखकारणमस्ति यदत्र सर्वेषामपि काव्यमूलतत्त्वानां रस-अलङ्कार-वक्रोक्ति-इत्यादीनां समावेशो भवति। ध्वनिवादस्य रमणीयता शब्द-अर्थ-शब्दार्थोभयमूलकाश्च भवन्ति। अयं काव्यसिद्धान्तः खण्डन-मण्डनादिभिः पुष्टः सर्वमान्यः अस्ति। ध्वनेः इत्येतस्य असंख्यभेदयुक्तपूर्वप्रतिपादितकाव्यस्य सूक्ष्मातिसूक्ष्माः सर्वा अपि विशेषता आत्मसात् करोति। एवं सिध्यति यद्-**काव्यस्यात्मा ध्वनिः।**

(ङ) **'काव्यमीमांसा' (आदितः पंचमाध्याय-पर्यन्तम्)**—राजशेखरः स्वनाटकप्रस्तावनासु स्वजीवनसम्बन्धे यदुक्तवांस्तदाधारेण यायावरवंशेऽस्य जन्माऽऽसीत्, राजशेखरस्य कालः ख्रीष्टनवमशतकस्य अवसानभागो दशमशतकस्य पूर्वभागश्च सिद्धयति। राजशेखरः महाराष्ट्रदेशीयः आसीत्। सः अकालजलदस्य पौत्रः दर्दुकस्य शीलवत्याश्च पुत्र आसीत्। अयं क्षत्रियचौहानवंशोद्भवाम् अवन्तिसुन्दरीं नाम ललनामुपयेमे। अयं कान्यकुब्जराजस्य उपाध्यायपदमलंकृतः। एतदाश्रयदातुर्नाम महेन्द्रपाल इत्यासीद्यः प्रतीहारवंश्यनृपेषु गौरवशाली समाख्यातः। एतद्देशेनैव बालरामायणं प्रथममभिनीयते स्म। राजशेखरः यदि नाटकस्थाने महाकाव्यं निरमास्यत्तदा साफल्यमधिकमध्यगमिष्यदिति कथनं सत्यपि कटुत्वे सत्यसमीपगतम्। यथा स्वविषये राजशेखरेण—

> **बभूव वल्मीकभवः पुरा कविस्ततः**
> **प्रपेदे भुवि भर्तृमेण्ठताम्।**
> **स्थितः पुनर्यो भवभूतिरेखया**
> **स राजते सम्प्रति राजशेखरः॥**

राजशेखरः संस्कृतप्राकृतपैशाच्यपभ्रंशाभिधासु चतसृष्वपि भाषासु निपुणो विद्वानत एव तस्मिन् कविराज इति संज्ञाऽन्वर्था। बालरामायणगतं 'विद्धि नः षट् प्रबन्धान्' इति वचनमाधारीकृत्य राजशेखरेण षट् ग्रन्था रचिता इति वक्तुं शक्यते। यथा–विवेचिताः आचार्यश्रीरामचन्द्रमिश्रमहोदयाः स्वसंस्कृतसाहित्येतिहासे **काव्यमीमांसा** कविकर्त्तव्य-त्वस्वरूपादिप्रतिपादनाय रचितः साहित्यविद्याविषयको ह्यो ग्रन्थः। अत्र कविताविषयकं बहु ज्ञातव्यं निर्दिष्टम्। कविशिक्षा-सम्प्रदाय-संचालने महाकवेः राजशेखरस्य सर्वातिशायी वैशिष्ट्यं वर्तते। ध्वनि-रस-अलंकार-रीति-वक्रोक्ति-भिन्नं कविप्रशिक्षणनिरतं कार्यमिदं काव्यमीमांसा सर्वथा प्रशंसनीयमेव विशिष्टकार्यसाधकत्वात्। अस्य लक्ष्यं केवलं कविशिक्षणमेव।

काव्यमीमांसा (आदितः पंचमाध्यायपर्यन्तम्) इत्यस्य सारांशः— (1) **प्रथमोऽध्यायः**—अस्मिन् अध्याये शास्त्र-अवतरणस्य इतिहासः, लोकहिताय काव्यशास्त्रोपदेशः काव्यविद्याप्रचाराय काव्यपुरुषनियुक्तिश्च वर्णिता।

(2) **द्वितीयोऽध्यायः**—अस्मिन् अध्याये शास्त्रनिर्देश-पूर्वकं वाङ्मयं काव्यञ्च शास्त्रञ्च द्विविधं कल्पितम्। शास्त्रं द्विविधं पौरुषेयम् अपौरुषेयं च। शास्त्राध्ययनोत्तरमेवोचितः काव्यप्रवेशः। आन्वीक्षिकी त्रयी-वार्ता-दण्डनीतिसंज्ञक-विद्याचतुष्टये पञ्चमी साहित्यविद्या इति काव्यमीमांसाकारस्य भावः। अत्र सूत्रवृत्तिभाष्यटीका-पञ्जिका-कारिका-वार्तिकानां लक्षणानि वर्णितानि।

(3) **तृतीयोऽध्यायः**—अस्मिन् अध्याये काव्यपुरुषा-ख्यायिका उपनिबद्धाऽस्ति। पुत्रार्थं हिमालये तपस्यन्ती सरस्वती ब्रह्मवरात् पुत्रमवाप्य, कदाचित् सुतं शिलातले निधाय स्नानार्थमगमत्। एकाकिनं तं शिशुम् उशना कवि स्वाश्रममनयत्। येन सोऽपि कविरित्युच्यते। देवर्षिनारदः शास्त्रार्थनिर्णयाय ब्रह्मलोकं गच्छन्तीं मातरमनुगच्छन् काव्यपुरुषः ब्रह्मणा वारितः सन् पलायितुम् आरेभे। तद्दृष्ट्वा तन्मित्रं कार्तिकेयं रुदन्तं शान्तं कर्तुं पार्वती साहित्यविद्यावधूं सृष्ट्वा समादिदेश एषस्तव पतिर्गच्छति। अनुगमनं कृत्वाऽनुनय। पूर्वामुत्तरां च दिशं क्रममाणः सः वत्सगुल्मनगरे गान्धर्वविधिना तां स्वीकृत्यागत्य हिमालयं पार्वतीं ननाम। तत्रैव वसन्तौ तौ कविमानसनिवासाय वरं प्राप्तवन्तौ। तदर्थमेव कविलोकसृष्टिः जाता।

(4) **चतुर्थोऽध्यायः**—अस्मिन् अध्याये शिष्यौ द्विविधौ कल्पितौ बुद्धिमान् आहार्यबुद्धिश्च विवेचितः। अत्र प्रतिभा द्विविधा कल्पिता कारयित्री भावयित्री च प्रतिपादिता।

(5) **पञ्चमोऽध्यायः**—अत्र प्रतिभाव्युत्पत्तिविवेचनेन सह कारयित्री भावयित्री उभयोरीवश्यकता प्रतिपादिता। अत्र कविभेदान् उक्त्वा नवविधा काव्यपाकचर्चाऽपि कृता।

(च) **रीतिरात्मा काव्यस्य**—पदानां विशिष्य रचना एव रीतिः। पदेषु वैशिष्ट्यं तु गुणादेव जायते। अर्थात् विशिष्या भणितिभङ्गी पदसंघटना वा, कविप्रतिभाजन्या, व्युत्पत्तिलभ्या, अभ्याससिद्धा, वाच्य-वाचक-सौन्दर्येण लावण्य-अभिवर्धकेन औचित्येन च अनुप्राणिता, गुणाश्रया, रसं भावं वा रीतिः अभिव्यञ्जयन्ति। रीतिः मार्गः पन्था वा। अर्थात् **गुणवत्पदरचना रीतिः।** गुणाः श्लेषादयः। रीयन्ते परम्परया गच्छन्त्यनयेति करणसाधनोऽयं रीतिशब्दो मार्गपर्यायः इत्यर्थः। **विशिष्टा पदरचना रीति विशेषो गुणात्मा** (काव्यालंकारसूत्र 2.7/7) इति रीतिमार्गप्रवर्तकेन वामनेन कथितम्। अत्र रीति-शब्दस्य मार्गः, पन्था, विधिः, पद्धति, ढमजीवक, शैली (Style) इत्यादयः शब्दाः पर्यायवाचिनः सन्ति। का नाम रीतिः? इत्यनेन रीतिशब्देन सर्वे पर्यायवाचिनः शब्दाः बोधगम्याः भवन्ति।

अस्मिन् विषये बहवो वादाः प्रवर्तन्ते। पदरचनायां वैशिष्ट्यं रीतिरित्यभिप्रेतम्। **"रसोचितशब्दार्थनिबन्धं रीतिः"** इति आचार्य-विद्याधरः परिभाषते। आचार्य विश्वनाथः शब्दार्थशरीरस्य काव्यस्य आत्मभूतानां रसादीनाम् उपकर्त्री पदसंघटनां रीतिरिति लक्षयति। यथा–**'पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत्। उपकर्त्री रसादीनाम्॥'** इति साहित्यदर्पणे (9/1) भणितम्। शिङ्गभूपालः **"पदविन्यासभङ्गी रीतिः"** इति रीतिं लक्षयति।

रीतेः भेदाः—रीतिस्तु पन्थाः मार्गो वा। स च द्विविधः—1. वैदर्भमार्गः 2. गौडीयमार्गश्च। वामनेन काव्येऽलङ्कारापेक्षया गुणानां महत्त्वं प्रतिपादितम्। तन्मते काव्यशोभायाः कर्तारो धर्मा गुणाः। अलङ्काराश्च तदतिशयवृद्धिहेतवः। गुणाश्च नित्याः। काव्ये तेषां स्थानमावश्यकम्। वामनः कान्तिनामके गुणेऽन्तर्भावयति रसम्। तन्मते रस आभ्यन्तरधर्मोऽस्ति काव्यस्य। कुन्तकस्य रीतिव्यवस्था परम्परातो भिन्ना। कुन्तको गुणानाश्रित्य त्रेधा रीतिं विभजते। अविवक्षितवाच्यध्वनिश्च वक्रोक्तौ। ध्वनिसमर्थकैरपि स्वीकृतो रीतिमार्गः। तन्मते—1. सुकुमारमार्गः (वैदर्भी रीतिः), 2. विचित्रमार्गः (गौडी रीतिः), 3. मध्यममार्गः (पाञ्चाली रीतिः)। यथा उक्तम्—

> **सम्प्रति तत्र ये मार्गाः कविप्रस्थानहेतवः।**
> **सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः॥**
> (वक्रोक्ति०)

वर्तमानरीतिनामकरणं भौगोलिकाधारेषु कृतम्। साहित्यदर्पणकारः आचार्यविश्वनाथः रीतिं चतुर्धा विभजति- "सा पुनः स्याच्चतुर्विधा" (सा०दर्प०9/1, 2) 1. वैदर्भी, 2. गौडी, 3. पाञ्चाली, 4. लाटिका। अन्ये त्वाहुः—

> **गौडी डम्बरबद्धा स्याद् वैदर्भी ललितक्रमा।**
> **पाञ्चाली मिश्रभावेन, लाटी तु मृदुभिः पदैः॥**
> (साहित्यदर्पणे)

चमत्कृतिवैशिष्ट्यं रम्यत्वं च आसादयितुं रीतिः अनिवार्या। **रमणीयार्थप्रतिपादकः अत्र रमणीयाऽभि-व्यक्तिः काव्यम्। रमणीयत्वं च काव्ये चमत्कृतिम् आदधाति। रमणीयत्वस्य मूलं तु रीतिः। रीतेः उद्देश्यम् अस्ति—सौन्दर्यस्य सृष्टिः, रसानुगुणं पदसंयोजनम्। "रीतिरात्मा काव्यस्य"** (काव्यालंकारसूत्र 2/6)। वामनमते काव्यस्यात्माऽस्ति रीतिरेव।

उपसंहारः—एवं विज्ञायते यत् काव्यशास्त्रे रीतेरस्ति महन्महत्त्वम्। रीतिरहितं काव्यं काणत्वादिदोषयुक्तं शरीरमिव प्रतिभाति। वामनमते काव्यस्यात्माऽस्ति रीतिरेव। यथोक्तम्–'रीतिरात्मा काव्यस्य' (1/2/6)। पदानां विशिष्य रचना एव रीतिः। यथोक्तम्– 'विशिष्टा पदरचना रीतिः।' इयमेव रीतिः शैलीत्यप्युच्यते। पदेषु वैशिष्ट्यं तु गुणादेव जायते। अत एव रीतिर्गुणाश्रिता। गुणालङ्कारयोः सीमाङ्कनं सर्वप्रथमं वामन एव प्रस्तौति।

(छ) **रसो वै सः**—रस्यते आस्वाद्यते इति रसः। आनन्दो हि काव्यस्य चरमं प्रयोजनम्। आनन्दानुभूतिश्च रसास्वादमूला। रसास्वादनादेव आनन्दावाप्तिः। अत्र आनन्दस्य साधनं भवति रसः। तथा चाह मम्मटः—'**सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्**' (काव्य०1/2)। अयं रसशब्दः वैदिकसाहित्येऽपि मिलति। यथा–"दधानः कलशे रसम्" (ऋक्०9/63/13)। तैत्तिरीयोपनिषदि–'**रसो वै सः**' '**रसं ह्येवायं लब्ध्वानन्दी भवति।**' (तै०2/7) वाल्मीकिरामायणेऽपि रसनामुल्लेखोऽस्ति–"रसैः शृङ्गारकरुणरौद्रवीरभयानकैरिति" (2/9)। साहित्यदर्पणे विश्वनाथः रसस्वरूपं प्रतिपादयति यद् रसो ब्रह्मास्वादसहोदरः—

> **वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः।**
> **स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥**
> (सा०दर्प० 3/2/3)

कोऽयं रस इति जिज्ञासायामुच्यते–काव्यस्य पठनेन, श्रवणेन, नाटकस्य च दर्शनेन सहृदयानां हृदये विगलितवेद्यान्तरशून्यो य आनन्दोऽनुभूयते स एव रसपदवाच्य इति सार्वजनीनानुभवः। नाट्यशास्त्रकारेण भरतमुनिना प्रतिपादितमस्ति यत् 'आस्वाद्यमानत्वात्' इति।

विभावेनानुभावेन व्यक्तः संचारिणा तथा।
रसतामेति रत्यादिः स्थायीभावः सचेतसाम्।।
(विश्वनाथः)

कथं रसनिष्पत्तिरिति जिज्ञासायां तेनोच्यते– "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः"। अत्र विभावाः कारणानि, अनुभावाः कार्याणि, व्यभिचारिणश्च सहकारिणः, इत्येतेषां संयोगाद् रसस्य निष्पत्तिः। यथा च उक्तं मम्मटाचार्येण काव्यप्रकाशे –

कारणान्यथ कार्याणि सहकारीणि यानि च।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।।
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः।
व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः।।
(काव्यप्रकाशे (4/27 28)

रसस्य महत्त्वम्– "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" सूत्रस्य व्याख्या तट्टीकाकारैः कृता। रसनिष्पत्तिविषयकं सर्वप्रथममुल्लेखं भरतमुनिना नाट्यशास्त्रे कृतम्। "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" भरतस्य रससूत्रस्य व्याख्यायामुत्तराचार्यैः स्वशक्त्या प्रयोजनं कृतम्। परिणामतः उत्पत्तिवादस्य अनुमितिवादस्य भुक्तिवादस्य अभिव्यक्तिवादस्य सिद्धान्तचतुष्टयस्य विकासः जायते। भट्टलोल्लटस्य मतानुसारं विभाव–अनुभाव–व्यभिचारिभावानां च संयोगेन रसस्य उत्पत्तिर्भवति। शंकुकेन सामाजिकस्य रसास्वादनं अनुमितिवादेन मुख्यतो विवेचितम्। भट्टनायको रसं अनुमेयं न मन्यते, अपि तु भोज्यं मन्यते। भट्टलोल्लटेन उत्तरमीमांसायाः शङ्कुकेन न्यायस्य भट्टनायकेन सांख्यस्याधारेण स्वस्वमतानां स्थापना कृता तथैव अभिनवगुप्तेनापि स्वपूर्ववर्तिनः अलङ्कारशास्त्रस्य प्रमुखध्वनिवाद्याचार्यस्य आनन्दवर्धनस्याधारेण अभिव्यक्तिवादस्य प्रतिपादनं कृतम्। अभिनवगुप्तस्य इदं मतं दर्शनमूलत्वात् मनोवैज्ञानिक-चिन्तनपरत्वाद् यथार्थभावेन रसविश्लेषणाच्च अद्यत्वेऽपि सर्वैरेव काव्यतत्त्वज्ञैः गृह्यते स्वीक्रियते प्रशस्यते च।

(ज) वक्रोक्तिः काव्यजीवितम् (प्रथम उन्मेषः) –'वक्रोक्तिः काव्यजीवितमित्यवदन् कुन्तकादयः। वक्रोक्तिः प्रसिद्धाभिधानव्यतिरिक्ता विचित्रैवाभिधा। सैव वैदग्ध्यभङ्गीभणितिशब्देन स्फुटीकृता वक्रोक्तिजीविते। अत्र 'वक्रोक्तिः' शब्दे पदद्वयम् वर्तते, वक्रा + उक्तिश्च। वक्रस्य शाब्दिकोऽर्थः कुटिलः वक्रभावापन्नः विलक्षणो + वाऽस्ति। उक्तिस्तु कविकथनपर्यायः। इत्थं वक्रोक्तेः सामान्योऽर्थः वक्रभावेन सुशोभितोऽर्थभावापन्नकनिप्रकारः। अत एव ग्रन्थकारेण कुन्तकेन एतस्य व्याख्यायां 'वैदग्ध्यभंगीभणिति' इति पदस्य प्रयोगः कृतः।

भामहेन अतिशयोक्तिरेव वक्रोक्तिनाम्ना उक्ता, सैव च अलङ्काराणां बीजं यथार्थम् तेनैव–

सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना।।
(वक्रोक्तिजी०)

काव्यप्रकाशस्य नवमोल्लासे आचार्यमम्मटः शब्दालङ्काराणां विवेचनक्रमे सर्वप्रथमं वक्रोक्तिमुपस्थापयति–

यदुक्तमन्यथावाक्यमन्यथाऽन्येन योज्यते।
श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा।।
(का.प्र.)

वक्त्रा अन्येन अभिप्रायेण उक्तं वाक्यं श्रोता तदेव वाक्यार्थं श्लेषेण काक्वा वा अन्यस्मिन्नर्थे समायोजयेत् चेत् तदा वक्रोक्तिः।

वक्रोक्तिः (वक्र + उक्तिः)
- (1) श्लेषवक्रोक्तिः
  - सभङ्गः
  - अभङ्गः
- काकुवक्रोक्तिः (ध्वनिविकारः)

(1) सभङ्गश्लेषमूलकवक्रोक्तिः-

नारीणामनुकूलमाचरसि चेत्.....नैवाबलानां भवान्।।

अत्र नारीणाम्–न + अरीणाम्, अबलानाम्–न बलं येषां ते अबलाः, तेषाम् इत्थं सभङ्गश्लेषः भवति।

(2) अभङ्गश्लेषमूलकवक्रोक्तिः–

अहो केनेदृशी बुद्धिर्दारुणा———दारुमयी क्वचित्।।

अत्र 'दारुणा' इति पदं 'कठोर' इत्यर्थे प्रयुक्तः किन्तु श्रोता एतस्य पदस्यार्थः 'काष्ठेन' स्वीक्रियते।

(3) काकुवक्रोक्तिः-

गुरुजनपरतन्त्रतया———नैष्यति सखि! सुरभिसमयोऽसौ।।

अत्र 'नैष्यति' (न आगमिष्यति) इति पदस्य अर्थः काक्वा 'त्तर्हि' आगमिष्यति अर्थात् निश्चयेन आगमिष्यति इति स्वीक्रियते।

शब्दार्थौ काव्यं वाचको वाच्यश्चेति द्वौ सम्मिलितौ काव्यम्। द्वावेकमिति विचित्रैवोक्तिः। यथोच्यते–

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यम् तद्विदाह्लादकारिणि।।

सम्प्रति रमणीयताविशिष्टे शब्दे एव काव्यत्वं भवति, किन्तु परिशिष्टे अर्थेऽपीत्यत्रोदाहरणमुखेन प्रस्तूयते।

(क-झ) काव्यादिसम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— मम्मटस्य किमलङ्कार-शास्त्रम्?
   उत्तरम्— काव्यप्रकाशः।
2. **प्रश्नः**— काव्यप्रकाशे कति अंशाः, के च ते?
   उत्तरम्—त्रयः-1. कारिका, 2. वृत्तिः, 3. उदाहरणञ्च।
3. **प्रश्नः**—काव्यप्रकाशमनुसृत्य काव्यप्रयोजनं किं निर्दिशतु?
   उत्तरम्— (06) षट्।
4. **प्रश्नः**— मम्मटस्य उपाधिः अस्ति?
   उत्तरम्— राजानकः।
5. **प्रश्नः**—काव्यप्रकाशस्य प्रथम-उल्लासे किं वर्णितमस्ति?
   उत्तरम्—काव्यप्रयोजनम्, काव्यकारणम्, काव्यस्वरूपादि भूमिकाभागः।
6. **प्रश्नः**—काव्यप्रकाशस्य द्वितीय-उल्लासे किं वर्णितमस्ति?
   उत्तरम्—काव्यलक्षणम्।
7. **प्रश्नः**— अर्थव्यंजकतायाः विमर्शः कस्मिन् उल्लासे वर्तते?
   उत्तरम्— तृतीये उल्लासे।
8. **प्रश्नः**— मम्मटः कस्मिन् उल्लासे ध्वनि-विचारणां प्रस्तौति?
   उत्तरम्— चतुर्थे उल्लासे।
9. **प्रश्नः**— रसस्य विवेचनं कस्मिन् उल्लासे वर्तते?
   उत्तरम्— पञ्चमे उल्लासे।
10. **प्रश्नः**— चित्रकाव्यं कुत्र निरूपितमस्ति?
    उत्तरम्— षष्ठे उल्लासे।
11. **प्रश्नः**— काव्यदोषस्य विवेचनं कस्मिन् उल्लासे वर्तते?
    उत्तरम्— सप्तमे उल्लासे।
12. **प्रश्नः**— गुणालंकार-विभागानां विमर्शः कस्मिन् उल्लासे वर्तते?
    उत्तरम्— अष्टमे उल्लासे।
13. **प्रश्नः**— शब्दालंकारस्य विवेचनं कस्मिन् उल्लासे वर्तते?
    उत्तरम्— नवमोल्लासे।
14. **प्रश्नः**— दशमोल्लासे कस्य वर्णनम् अस्ति?
    उत्तरम्— अर्थालङ्कारस्य।
15. **प्रश्नः**— मम्मटेन काव्यस्य कति प्रयोजनानि परिगणितानि?
    उत्तरम्—षट्, काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यःपरनिर्वृतये कान्तासम्मित-तयोपदेशयुजे।।
16. **प्रश्नः**— मम्मटस्य कानि प्रयोजनानि कविनिष्ठानि सन्ति?
    उत्तरम्—1. यशः, 2. अर्थः, 3. शिवेतरस्य (अशिवस्य) क्षयः।
17. **प्रश्नः**— सहृदय-निष्ठ-प्रयोजनानि कानि सन्ति?
    उत्तरम्—त्रीणि-1. व्यवहारज्ञानम्, 2. आनन्दानुभूतिः 3. कान्तासम्मितया उपदेशः।

18. प्रश्नः— मम्मटः काव्यविभेदस्य आधारं कं स्वीकरोति?
उत्तरम्—व्यंग्यार्थम्।

19. प्रश्नः— मम्मटः काव्यस्य कति भेदान् स्वीकरोति?
उत्तरम्— त्रयो भेदाः, 1. उत्तमः, 2. मध्यमः, 3. अधमः।

20. प्रश्नः— शब्दाः कतिप्रकारकाः भवन्ति?
उत्तरम्— त्रयः, 1. वाचकशब्दः, 2. लाक्षणिकशब्दः, 3. व्यंजकशब्दः।

21. प्रश्नः— मम्मटः अर्थस्य कति प्रकारान् स्वीकरोति?
उत्तरम्— त्रीन्, 1. वाच्य-अर्थः, 2. लक्ष्य-अर्थः, 3. व्यंग्य-अर्थः।

22. प्रश्नः— मम्मटेन दोषस्य का परिभाषा प्रदत्ता?
उत्तरम्— मुख्यार्थहतिर्दोषः।

23. प्रश्नः— मम्मटः रसं कं स्वीकरोति?
उत्तरम्— विभावादि द्वारा व्यज्यमानं स्थायीभावम्।

24. प्रश्नः— मम्मटेन रसस्य अंगीधर्मः कः स्वीक्रियते?
उत्तरम्— गुणः।

25. प्रश्नः— काव्यप्रकाशे कति रसदोषाः सन्ति?
उत्तरम्— (13 त्रयोदशः)।

26. प्रश्नः— मम्मटेन कति गुणाः मन्यते?
उत्तरम्— त्रयः, 1. माधुर्यम्, 2. ओजः, 3. प्रसादः।

27. प्रश्नः— काव्यप्रकाशस्य प्रथमोल्लासस्य किं नाम?
उत्तरम्— काव्यस्वरूपनिरूपणम्।

28. प्रश्नः— मम्मटाचार्यः स्वकीये काव्यप्रकाशे मंगलाचरणे कं स्तौति?
उत्तरम्— सरस्वतीम्।

29. प्रश्नः— काव्यप्रकाशे रसस्य का परिभाषा?
उत्तरम्—"व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः"।

30. प्रश्नः— काव्यप्रकाशे कति अर्थालङ्काराः प्रतिपादिताः सन्ति?
उत्तरम्— 61 एकषष्टिः।

31. प्रश्नः—काव्यप्रकाशे कति परिच्छेदाः/उल्लासाः विद्यन्ते?
उत्तरम्— (10) दश।

32. प्रश्नः— मम्मटः, शब्दस्य कति व्यापारान्/प्रक्रियाः/शक्तीः स्वीकरोति?
उत्तरम्— तिस्रः, 1. अभिधा, 2. लक्षणा, 3. व्यंजना चेति।

33. प्रश्नः— 'लोकोत्तरवर्णनानिपुणकविकर्मकाव्यम्'-इति को वदति?
उत्तरम्— मम्मटाचार्यः।

34. प्रश्नः— रसनिष्पत्तिसूत्रं केन प्रतिपादितम्?
उत्तरम्— भरतमुनिना।

35. प्रश्नः— कवित्वबीजरूपः संस्कारविशेषः कः?
उत्तरम्— शक्तिः।

36. प्रश्नः— मम्मटः लक्षणां कां क्रियां स्वीकरोति?
उत्तरम्— आरोपिताम्।

37. प्रश्नः— 'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि' कस्येयं काव्य-परिभाषा?
उत्तरम्— मम्मटस्य।

38. प्रश्नः— मम्मटः कस्य भूभागस्य निवासी आसीत्?
उत्तरम्— कश्मीरस्य।

39. प्रश्नः— मम्मटः कस्य मार्गस्य आचार्यः?
उत्तरम्— ध्वनिमार्गस्य।

40. प्रश्नः— मम्मटः केनोपाधिना विभूषितः?
उत्तरम्—"ध्वनि-प्रस्थापन-परमाचार्य" इत्युपाधिना।

41. प्रश्नः— कान्तासम्मिततयोपदेशः इति किम्?
उत्तरम्— काव्यप्रयोजनम्।

42. प्रश्नः— 'अन्विताभिधानवादः' इति कस्योक्तिः?
उत्तरम्— मम्मटस्य।

43. प्रश्नः— 'संकल्पविकल्पात्मिकान्तःकरणवृत्तिः' केन सम्बद्धा?
उत्तरम्— मनसा।

44. प्रश्नः— "ध्वनिरात्मा काव्यस्य" इति कः स्वीकरोति?
उत्तरम्— आनन्दवर्धनः।

45. प्रश्नः— महाकाव्ये न्यूनातिन्यूनाः कति सर्गाः भवन्ति?
उत्तरम्— 08 अष्टसर्गाः।

46. प्रश्नः— काव्यस्य किं तात्पर्यम्?
उत्तरम्—कवेः कर्म काव्यम्।

47. प्रश्नः— काव्यप्रकाशे वाक्यदोषाणां का संख्या?
उत्तरम्— 21 एकविंशतिः।

48. प्रश्नः— काव्यस्य कौ द्वौ भेदौ स्तः?
उत्तरम्— 1. दृश्यकाव्यम्, 2. श्रव्यकाव्यम्।

49. प्रश्नः— पद्यकाव्ये कानि काव्यानि आगच्छन्ति?
उत्तरम्— 1. खण्डकाव्यम्, 2. महाकाव्यम्, 3. मुक्तककाव्यम्।

50. प्रश्नः— वामनाचार्यः कति गुणान् स्वीकरोति?
उत्तरम्— 10 दश।

51. प्रश्नः—क्रौञ्चवधस्य कारुणिक-दृश्येन वाल्मीकि-हृदये कः श्लोकः प्रवाहितोऽभूत्?
उत्तरम्— मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः। यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।

52. प्रश्नः— 'वाग्देवतावतारः' इति कस्योपाधिः?
उत्तरम्— मम्मटस्य।

53. प्रश्नः— काव्यप्रकाशे 'निपुणता' इति किम्?
उत्तरम्— काव्यकारकम्।

54. प्रश्नः— 'शब्दार्थौ सहितौ काव्यम्' इति कस्य काव्यपरिभाषा?
उत्तरम्— भामहस्य (काव्यालंकारे)।

55. प्रश्नः—'रीतिरात्मा काव्यस्य' इति कस्य काव्यपरिभाषा?
उत्तरम्— वामनस्य।

56. प्रश्नः— "शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली" इति कस्य काव्यलक्षणम्?
उत्तरम्— दण्डिन- (काव्यादर्शः)।

57. प्रश्नः— मम्मटानुसारं उत्तमकाव्यस्य लक्षणम् किम्?
उत्तरम्— "इदमुत्तममतिशयिनि व्यंग्ये वाच्याद् ध्वनिर्बुधैः कथितः।"

58. प्रश्नः— मम्मटानुसारं मध्यमकाव्यस्य लक्षणम् किम्?
उत्तरम्— "अतादृशि गुणीभूतमव्यङ्ग्यं तु मध्यमम्"।

59. प्रश्नः— मम्मटानुसारं अधमकाव्यस्य लक्षणम् किम्?
उत्तरम्— "शब्दचित्रं वाच्यचित्रमव्यंग्यं त्ववरं स्मृतम्।"

60. प्रश्नः— मम्मट-सम्मतः कुत्र पददोषः नास्ति?
उत्तरम्— लुप्तविसर्गः।

61. प्रश्नः—काव्यप्रकाशसम्मतः समासगतपददोषः कुत्र नास्ति?
उत्तरम्— असमर्थः।

62. प्रश्नः— मम्मटमते कति पददोषाः सन्ति?
उत्तरम्— 16 षोडश।

63. प्रश्नः— काव्यप्रकाशोक्तपददोषेषु केवलसमासगत-पददोषाः कति सन्ति?
उत्तरम्— 03 त्रयः।

64. प्रश्नः— काव्यप्रकाशे अर्थदोषाणां का संख्या?
उत्तरम्— 23 त्रयोविंशतिः।

65. प्रश्नः— काव्यप्रकाशकारः कति गुणान् स्वीकरोति?
उत्तरम्— 03 त्रयः।

66. प्रश्नः— आचार्यमम्मटस्य पिता नाम किम्?
उत्तरम्— जैयटः।

67. प्रश्नः— ध्वनिरात्मा काव्यस्य इति कः स्वीकरोति?
उत्तरम्— आनन्दवर्धनः।

68. प्रश्नः— काव्यशास्त्रे कति वृत्तयः मन्यन्ते?
उत्तरम्— अभिधा लक्षणा व्यञ्जना चेति तिस्रो वृत्तयः मन्यन्ते।

69. प्रश्नः— अभिधा इति कां कथ्यते?
उत्तरम्— वाच्यार्थप्रधाना अभिधा।

70. प्रश्नः— लक्षणा इति कां कथ्यते?
उत्तरम्— लक्ष्यार्थप्रधाना लक्षणा।

71. प्रश्नः— व्यञ्जना इति कां कथ्यते?
उत्तरम्— व्यङ्ग्यार्थप्रधाना व्यञ्जना।

72. प्रश्नः— काव्यमीमांसा कस्य रचना वर्तते?
उत्तरम्— राजशेखरस्य।

73. प्रश्नः— शास्त्रं कतिविधं के च ते?
उत्तरम्— द्विविधं पौरुषेयम् अपौरुषेयं च।

74. प्रश्नः— रसशब्दस्य का व्युत्पत्तिः?
उत्तरम्— रस्यते आस्वाद्यते इति रसः।

75. प्रश्नः— 'रसो वै सः' इति कस्य ग्रन्थस्य उद्धरणम्
उत्तरम्— तैत्तिरीयोपनिषदः।

76. प्रश्नः— रसनिष्पत्तिः कथं जायते?
उत्तरम्— "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः"।

77. प्रश्नः— 'रीतिरात्मा काव्यस्य' अत्र का रीतिः?
उत्तरम्— पदानां विशिष्य रचना एव रीतिः।

78. प्रश्नः— साहित्यदर्पणकारः आचार्यविश्वनाथः रीतिं कतिधा केच ते च स्वीकरोति?
उत्तरम्— चतुर्धा, 1. वैदर्भी, 2. गौडी, 3. पाञ्चाली, 4. लाटिका।

79. प्रश्नः— 'वक्रोक्तिः काव्यजीवितम्' इति कैः मन्यन्ते?
उत्तरम्— कुन्तकादयः।

80. प्रश्नः— विश्वनाथसम्मतं काव्यलक्षणं किम्?
उत्तरम्— 'वाक्यं रसात्मकं काव्यम्'।

81. प्रश्नः— विश्वनाथसम्मतं वाक्यं किम्?
उत्तरम्— "योग्यता-आकांक्षा-आसत्तियुक्तः"।

82. प्रश्नः— जगन्नाथदिशा काव्यलक्षणं किम्?
उत्तरम्— "रमणीयार्थप्रतिपादकः शब्दः काव्यम्।"

83. प्रश्नः— आचार्यकुन्तकमतानुसारं काव्यलक्षणं किम्?
उत्तरम्— शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।

84. प्रश्नः— पुरुषार्थचतुष्टयः के सन्ति?
उत्तरम्— धर्मार्थकाममोक्षाः।

85. प्रश्नः— काव्यस्य कति भेदाः के च ते?
उत्तरम्— त्रयः, उत्तम-मध्यम-अधम भेदाः।

86. प्रश्नः— नलचम्पूग्रन्थस्य मंगलाचरणे कस्याः देवतायाः स्तुतिः विद्यते?
उत्तरम्— शिव-पार्वत्योः।

87. प्रश्नः— प्रथमचम्पूग्रन्थः कः?
उत्तरम्— नलचम्पूः।

88. प्रश्नः— नलचम्पू इत्यस्य अपरं नाम किम्?
उत्तरम्— दमयन्ती कथा।

89. प्रश्नः—नलस्य पितुर्नाम किम्?
उत्तरम्—वीरसेनः।

90. प्रश्नः—नलस्य चारित्रिकः गुणः कः?
उत्तरम्—नीतिज्ञः।

91. प्रश्नः—नलस्य मन्त्री नाम किम्?
उत्तरम्—श्रुतशीलः।

92. प्रश्नः—नलस्य वन-विहार-समये कः आगतः?
उत्तरम्—सूकरः।

93. प्रश्नः—नलचम्पू केषु विभक्तः?
उत्तरम्—उच्छ्वासेषु।

94. प्रश्नः—नलचम्पूकाव्ये कयोः प्रणयवर्णनमस्ति?
उत्तरम्—नलदमयन्त्योः।

95. प्रश्नः—नलचम्पूकाव्ये कति उच्छ्वासाः सन्ति?
उत्तरम्— (7) सप्त।

96. प्रश्नः—राजानलस्य राजधानी कुत्र आसीत्?
उत्तरम्— निषधा-नगरी।

97. प्रश्नः—गद्यपद्यमिलितं काव्यं भवति?
उत्तरम्— चम्पूकाव्यम्।

98. प्रश्नः—"गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते" इदं लक्षणं कः कृतवान्?
उत्तरम्— दण्डी।

99. प्रश्नः—वक्रोक्तिसम्प्रदायस्य प्रवर्तकः कः?
उत्तरम्— कुन्तकः।

100. प्रश्नः—रीतिसम्प्रदायस्य प्रवर्तकः आचार्यः कः?
उत्तरम्— वामनः।

101 प्रश्नः—वक्रोक्तेः समस्तालङ्कारमूलम् केन प्रतिपादितम्?
उत्तरम्—भामहेन।

102. प्रश्नः—वामनस्य 'रीतिरात्मा काव्यस्य' इति वचने रीतिः इत्यस्य कोऽर्थः?
उत्तरम्— विशिष्य पदरचना रीतिः।

(R) (Code-25) (ञ) ध्वन्यालोकः (प्रथमउद्योतः) विवेचनमेवं ध्वनिसम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

ध्वन्यालोकः (प्रथम उद्योत ध्वनिप्रतिष्ठापना) —आनन्दवर्धनो हि काव्यशास्त्राकाशे सर्वसमुज्ज्वलं नक्षत्रम्। काव्यपरम्परायाः ध्वनिसम्प्रदायस्य प्रवर्तकः आनन्दवर्धनः वर्तते। आनन्दवर्धनः नोणोपाध्यायस्य पुत्रः आसीत्। काव्यजगति तस्य ध्वन्यालोकस्य प्रवेशः सुमहत् सौभाग्यमाधत्ते। आनन्दवर्धनः काश्मीरक्षितिपालस्य अवन्तिवर्मणः सभापण्डित आसीत्। तस्य स्थितिकालो राजतरङ्गिण्याम्—

मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः।
प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्मणः॥ (5×4)

काश्मीराधिपतेः अवन्तिवर्मणः समयः 855 ईसवीतः 883 ईसवीयं यावत् स्वीक्रियते। आनन्दवर्धनोऽपि तत्कालिकः। केचित्तु आवन्तिवर्मा हि 910-941 मितवैक्रमाब्दानभितः सिंहासनासीन आसीत्। तेन आनन्दवर्धनोऽपि-880-950 मितवैक्रमादानभितः स्थितिकालः अनुमीयते। अत एवानन्दवर्धनाचार्यस्य कालो नवमः शताब्दः स्वीक्रियते। आनन्दवर्धनाचार्यस्य पञ्च ग्रन्थाः प्रख्याताः सन्ति। तेषु पञ्चसु ख्यातग्रन्थेषु ध्वन्यालोकेनैवानन्दवर्धनस्य प्रख्यातिरास्ते। अस्मिन् ध्वन्यालोकग्रन्थे आनन्दवर्धनाचार्यः प्रत्यपीपदत् यत् ध्वनिरेव काव्यस्यात्मा वर्तते। अयं ध्वनिवादः सर्वाधिकव्यवस्थितरूपेण प्रचरितः।

ध्वन्यालोके त्रयोंऽशाः-कारिकाः, वृत्तयः, उदाहरणानि च। अत्र ग्रन्थे 129 कारिकाः। तत्रहि चत्वार उद्योताः, प्रथमे हि उद्योते ध्वनिप्रतिष्ठापना, द्वितीये व्यङ्ग्यमुखेन ध्वनिस्वरूपविवेकः, तृतीये तु व्यञ्जकमुखेन तत्स्वरूपविवेकः, चतुर्थे तु ध्वनिव्युत्पादनप्रयोजनं चेति निरूपितविषयाः। अस्याचार्यस्य कवित्वशक्तिरपि विलक्षणा वर्तते। एतस्य महाकवेर्नाम काव्यशास्त्रेतिहासे सुवर्णाक्षरेणाङ्कितुं योग्यं रसगङ्गाधरकृतास्तु सत्यमेवेदं कथ्यते यदयमानन्दवर्धनः साहित्यशास्त्रस्य मार्गं परिष्कृतवानिति। तथाहि—'ध्वनिकृतामालङ्कारिकसरणिव्यवस्थापकत्वादिति'।

अनुबन्धचतुष्टयम्—ध्वन्यालोकस्य प्रथमे हि उद्योते ध्वनिप्रतिष्ठापना सह ग्रन्थरचनाया अनुबन्धचतुष्टयमध्ये प्रयोजनं कथ्यते। ध्वनेः स्वरूपं, सहृदयमनःप्रीतये इत्यस्य प्रयोजनम्। यशोऽर्थेत्यादयस्तु गौणप्रयोजनानि प्रतिपादितम्। यथा अनुबन्धचतुष्टयं-1. अधिकारी-काव्यात्मतत्त्वजिज्ञासुः। 2. विषयः-ध्वनिनिरूपणम्। 3. सम्बन्धः-ग्रन्थस्य प्रतिपाद्य-प्रतिपादकभावः। 4. प्रयोजनम्-ध्वनिस्थापना। यशः अर्थप्राप्तिः व्यवहारज्ञानं मुख्यप्रयोजनानि स्वीक्रियन्ते। ध्वनिविरोधिनां त्रयः पक्षाः ध्वनिकारेण प्रदर्शिताः।

ध्वन्यालोकस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः— ध्वन्यालोके कति उद्योताः सन्ति?
उत्तरम्—4 चत्वारः।

2. प्रश्नः—ध्वन्यालोके प्रथमोद्योतस्य प्रतिपाद्यविषयः कः?
उत्तरम्— ध्वनेः काव्यात्मारूपेण प्रतिष्ठापनम्।

3. प्रश्नः—कस्मिन् उद्योते काव्य-स्वरूपस्य विचारणा वर्तते?
उत्तरम्—चतुर्थोद्योते।

4. प्रश्नः— ध्वन्यालोकस्य आधार-सिद्धान्तः कोऽस्ति?
उत्तरम्— ध्वनि-सिद्धान्तः।

5. प्रश्नः—ध्वनि-सिद्धान्तस्य मूलप्रेरणा केन शास्त्रेण प्राप्यते?
उत्तरम्—व्याकरणशास्त्रेण।

6. प्रश्नः— ध्वनि-सिद्धान्तः व्याकरणस्य केन सिद्धान्तेन प्रेरितो भवति?
उत्तरम्— स्फोट-सिद्धान्तेन।

7. प्रश्नः— ध्वनेः आश्रयीभूतशब्द-शक्तिः का अस्ति?
उत्तरम्— व्यंजना-शक्तिः।

8. प्रश्नः— व्यंजना कस्मिन् शास्त्रे मन्यते?
उत्तरम्— काव्यशास्त्रे।

9. प्रश्नः— ध्वन्यालोकस्य मंगलश्लोकः कः?
उत्तरम्—'स्वेच्छाकेसरिणः स्वच्छस्वच्छायासितेन्दवः।
त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः॥

10. प्रश्नः— अभिनवे अस्मिन् मंगल-श्लोके कति ध्वनयः स्वीकृताः?
उत्तरम्—त्रिविधं, 1. वस्तुध्वनिः, 2. अलङ्कार-ध्वनिः, 3. रस-ध्वनिः।

11. **प्रश्नः—** ध्वनेः द्वौ मुख्यभेदौ कौ स्तः?
उत्तरम्—1. अविवक्षित-वाच्य-ध्वनिः, 2. विवक्षितान्यपरवाच्यध्वनिः।

12. **प्रश्नः—** अविवक्षितवाच्यध्वनेः अपरं नाम किमस्ति?
उत्तरम्— लक्षणामूलध्वनिः।

13. **प्रश्नः—** अविवक्षितवाच्य/लक्षणामूलध्वनेः कति भेदाः सन्ति?
उत्तरम्— द्वे, 1. अर्थान्तरसंक्रमितवाच्यध्वनिः, 2. अत्यन्ततिरस्कृतवाच्यध्वनिः।

14. **प्रश्नः—** असंलक्ष्यक्रमध्वनिं पदेन कथ्यन्ते?
उत्तरम्— 1. रसः, 2. रसाभासः, 3. भावाभासः, 4. भावोदयः, 5. भावसन्धिः, 6. भावशबलता, 7. भावशान्तिः।

15. **प्रश्नः—**आनन्दवर्धनः ध्वन्यालोकस्य तृतीयोद्योते कस्य काव्यस्वरूपस्य उल्लेखं अकरोत्?
उत्तरम्—1. मुक्तकः, 2. सन्दान्तिकः, 3. विशेषकः, 4. पर्यायबन्धः, 5. परिकथा, 6. खण्डकथा, 7. सकलकथा, 8. सर्गबन्धः, 9. अभिनेयार्थः, 10. आख्यायिका, 11. कथा।

16. **प्रश्नः—**'काव्यस्यात्मा ध्वनिः' कस्येयं काव्यपरिभाषा?
उत्तरम्— आनन्दवर्धनस्य।

17. **प्रश्नः—**काव्यालोकः (ध्वन्यालोकः) कस्मिन् विभाजितः अस्ति ?
उत्तरम्— उद्योते।

18. **प्रश्नः—** ध्वन्यालोके अध्यायः कथ्यते?
उत्तरम्—उद्योतः।

19. **प्रश्नः—** ध्वनिसिद्धान्तस्य प्रवर्तकः कः?
उत्तरम्— आनन्दवर्धनः।

20. **प्रश्नः—** भेदोपभेदपूर्विका ध्वनिः कतिविधा?
उत्तरम्— 36षट्त्रिंशत्।

21. **प्रश्नः—** आनन्दवर्धनस्य पितुः नाम किमासीत्?
उत्तरम्—नोणः।

22. **प्रश्नः—**स्वकीये ग्रन्थे ध्वन्यालोके मंगलाचरणे आनन्दवर्धनः कं स्तौति?
उत्तरम्— विष्णुम्।

23. **प्रश्नः—** बुधैः काव्यस्यात्मा समाम्नातः कः?
उत्तरम्—ध्वनिः।

24. **प्रश्नः—** ध्वनिसम्प्रदायस्य प्रवर्तकः आचार्यः कः?
उत्तरम्—आनन्दवर्धनः।

25. **प्रश्नः—** आचार्यवरस्य आनन्दवर्धनस्य उपाधिः किम्?
उत्तरम्— राजानकः।

26. **प्रश्नः—** त्रयोंऽशाः-कारिकाः, वृत्तयः, उदाहरणानि च कुत्र प्राप्यन्ते?
उत्तरम्— ध्वन्यालोके।

27. **प्रश्नः—** ध्वन्यालोकग्रन्थे कति कारिकाः सन्ति?
उत्तरम्— 129 कारिकाः।

28. **प्रश्नः—**के सन्ति अनुबन्धचतुष्टयम्?
उत्तरम्—1. अधिकारी-काव्यात्मतत्त्वजिज्ञासुः। 2. विषयः-ध्वनिनिरूपणम्। 3. सम्बन्धः-ग्रन्थस्य प्रतिपाद्यप्रतिपादकभावः। 4. प्रयोजनम्-ध्वनिस्थापना।

(S) (Code-73) (ट) शब्दशक्तयः (अभिधाल०) -लक्षणाशक्तिः-व्यञ्जनाशक्तिः- एवं शक्तिसम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

शब्दशक्तिः—निर्विकारस्य सच्चिदानन्दस्वरूपिणः ब्रह्मणः मायाशक्तिरिव शब्दब्रह्मणः शक्तित्रयमङ्गीक्रियते। अत्र शक्तिर्नाम पदपदार्थयोर्मध्ये सम्बन्धः। तदोच्यते– "अस्माच्छब्दादयमर्थः बोधव्यः इति ईश्वरसंकेतः शक्तिः" इति। शक्तिग्रहस्य उपायाः यथा–

शक्तिग्रहं व्याकरणोपमान-
कोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः।।

शक्तित्रयाणां नामानि यथा-1. अभिधाशक्तिः, 2. लक्षणाशक्तिः, 3. व्यञ्जनाशक्तिश्च।

(1) अभिधाशक्तिः—शब्दः यदा साक्षात्संकेतितमर्थमभिधत्ते तदा तस्य साक्षात्संकेतितार्थस्य प्रतीतिः यया शक्त्या भवति सा शक्ति अभिधा इत्युच्यते। स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते इति मम्मटवचनात् यया शक्त्या संकेतितार्थस्य अर्थात् वाच्यार्थस्य प्रतीतिर्भवति सा शक्तिरभिधानाम्नी। विश्वनाथोऽपि-संकेतितार्थस्य बोधनादग्रिमाऽभिधा संकेतिताः भवन्ति जाति-द्रव्य-गुण-क्रिया, तच्चोक्तम् "संकेतो गृह्यते जातौ गुणद्रव्यक्रियासु च"। जातिस्तु गोपिण्डादिषु गोत्वादिका। गुणो विशेषाधानहेतुः वस्तुधर्मः। द्रव्यशब्दाः एकव्यक्तिवाचिनः हरिहरडित्थडवित्थादयः। क्रियाः साध्यरूपाः वस्तुधर्माः। एषु चतुर्षु विद्यमानानां संकेतितार्थानामेव बोधः अभिधया जायते। बोध्यः अर्थश्च अभिधेयार्थः भवति यथा गौ कमलमित्यादयः। मम्मटेन संकेतितार्थः जातिगुणक्रियायादृच्छिकेषु जातौ वा गृह्यते, तद्यथा- संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा"। वैयाकरणैरपि चतुर्षु संकेतो गृह्यते" चतुष्टयी शब्दानां प्रवृत्तिरिति" भाष्यवचनात्। मीमांसकैः जातावेव संकेतितार्थः।

एवं प्रकारेण मुख्यसंकेतितवाच्यार्थस्य अवगमः यया शक्त्या भवति सा शक्तिः अभिधा इति उच्यते। अभिधाशक्त्या बोध्यः अर्थश्च अभिधेयार्थः भवति। यथा-सुलभनेत्रम्, कमलम्, लता इत्यादयः।

(2) लक्षणाशक्तिः—मुख्यार्थबाधे तद्योगे च रूढ़िवशात् प्रयोजनवशाद्वा यया वृत्त्या शब्दः लक्ष्यार्थं प्रतिपादयति सा शक्तिर्लक्षणानाम्नी। शब्दस्य शक्तिषु लक्षणाशक्तेः महद् महत्त्वमस्ति। तद्यथोक्तं मम्मटेन–

मुख्यार्थबाधे तद्योगे रूढ़ितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया।।
(मम्मटः)

अत्र शब्दः लक्षकः। मुख्यार्थबाधः लक्षणायां बीजम्, मुख्यार्थसम्बन्धः कारणम् प्रयोजनञ्च फलम्। यथा कर्मणि कुशलः इत्यत्र कुशान् लातीति व्युत्पत्तिलभ्योऽर्थः प्रकृते बाधितः सन् विवेचकत्वसम्बन्धेन रूढ्यर्थः दक्षः इति लक्षयति। एवमेव गङ्गायां घोषेत्यादौ मुख्यार्थबाधे सामीप्यसम्बन्धेन शीतत्वपावनात्वादीनां धर्माणां प्रतिपादनप्रयोजनात् मुख्येन अमुख्यः अर्थः गङ्गातटे घोषः इति प्रयोजनवत्या लक्षणया गृह्यते। एषा लक्षणा प्राथम्येन शुद्धा गौणीति द्विविधा। तत्र शुद्धालक्षणा नाम सादृश्येतरसम्बन्धेन लक्षणा, एषा चतुर्विधा। यथा कुन्ताः प्रविशन्ति इति शुद्धोपादानलक्षणा प्रथमा। गङ्गायां घोषः इति शुद्धा लक्षणलक्षणा द्वितीया। आयुर्घृतमिति सारोपा शुद्धा। आयुर्वेदमित्यत्र शुद्धा साध्यवसाना। गौणी लक्षणा सादृश्यसम्बन्धेन, द्विविधैषा गौर्वाहीकेति सारोपा गौणी गौरयमिति साध्यवसाना गौणीति, लक्षणा तेन षड्विधेति दिक्।

क्रमशः लक्षणायाः भेदविवेचनम्; शुद्धा– उपचाररहिता शुद्धा अर्थात् सादृश्येतरसम्बन्धेन यदा लक्षणा भवति तदा शुद्धा लक्षणा। एषा चतुर्विधा उपादानलक्षणा लक्षणलक्षणा सारोपा-साध्यवसानाभेदात्।

1. **उपादानलक्षणा**—स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् उपादानलक्षणं चेत्युक्ता शुद्धा सा द्विधा। अतः उपादानलक्षणायां स्वसिद्धये पराक्षेपः अर्थात् स्वस्य मुख्यार्थस्य समभिव्याहृतपदार्थेऽन्वयबोधसिद्धये परस्यामुख्यार्थस्य आक्षेपः उपादानम्। "कुन्ताः प्रविशन्ति" इत्यत्र कुन्तादिभिरात्मनः प्रवेशसिद्ध्यर्थं स्वसंयोगिनः पुरुषाः आक्षिप्यन्ते।

2. **लक्षणलक्षणा**—परार्थं स्वसमर्पणं नाम लक्षणलक्षणा, अर्थात् परस्य अमुख्यार्थस्य वाक्यार्थेऽन्वयबोधसिद्धये स्वस्या-मुख्यार्थस्य समर्पणं त्यागः अन्यार्थोपलक्षणतया लक्षणलक्षणा। यथा-गङ्गायां घोष इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गङ्गाशब्दः स्वार्थं समर्पयति। इयं लक्षणलक्षणा। उपचारेणामिश्रितत्वात् शुद्धेयं उभयरूपा।

3. **सारोपा**— यत्र आरोप्यमाणः आरोपविषयश्च स्वस्वधर्मप्रकारेण सामानाधिकरण्येण शब्दतो निर्दिश्यते सा सारोपा। अत्र विषयविषयिणोः पृथङ्निर्देशः आरोपः। आरोपेण सहिता सारोपा। उक्तञ्च काव्यप्रकाशे **"सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा"**। यथा-आयुरेवेदम्।

4. **साध्यवसाना**—विषयिणा निगीर्णे विषये साध्यवसाना भवति। विषयिणा विषयस्य निगीर्णमध्यवसानं तेन सह वर्तते साध्यवसाना। अतएवोक्तम्-विषय्यन्तः कृतेऽन्यऽस्मिन् सा स्यात् साध्यवसानिका। इमौ सारोपासाध्यवसानारूपौ भेदौ सादृश्यसम्बन्धेन सादृश्येतरसम्बन्धेन च गौणौ शुद्धौ च विज्ञेयौ। अर्थात् शुद्धालक्षणायाः (अवान्तरभेदात्) अर्थात् उपादान-लक्षणायाः लक्षणलक्षणायाः द्वौ-द्वौ भेदौ आहत्य शुद्धायाः चत्वारो भेदाः। गौणीलक्षणायाश्च सारोपा साध्यवसाना चेति द्वौ भेदौ, आहत्य लक्षणा षड्विधा भवतीत्युक्तं काव्यप्रकाशे– "लक्षणा तेन षड्विधा।" "भेदाविमौ च सादृश्यात् सम्बन्धान्तरतस्तथा। गौणौ शुद्धौ च विज्ञेयौ।"

गौणी—उपचारसहिता गौणी, अर्थात् यदा सादृश्य-सम्बन्धेन लक्षणा भवति तदा गौणी लक्षणा। इयं गौणी लक्षणा द्विविधा सारोपा-साध्यवसानाभेदात्।

गौणी-सारोपा–गौर्वाहीकः, गौणी-साध्यवसाना–गौरयम्, अत्र हि स्वार्थसहचारिणो गुणाः जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्व-मुपयन्ति गौरयमित्यत्र यदा इदंशब्देन विषयी एव निर्दिष्टस्तदैव इदमुदाहरणम्; अन्यथा गाः पाठय।

शुद्धा सारोपा-साध्यवसाना च–सारोपा-आयुर्घृतम्, साध्यवसाना–आयुरेवेदम्। आयुर्घृतमित्यादौ आयुरेवेदमित्यादौ च सादृश्यादन्यत् कार्यकारणभावादिसम्बन्धान्तरम्। आयुरेवेद-मित्यत्र च यदा इदंशब्देन विषयी एव निर्दिष्टस्तदैवेदमुदाहरणम्; अन्यथा आयुः पीयते इत्युदाहरणं ज्ञेयम्। व्यंग्यदृष्ट्या गूढव्यंग्या अगूढव्यंग्या अव्यंग्येति त्रिविधा। "**व्यंग्येन रहिता रूढौ सहिता तु प्रयोजने**" "तच्च गूढमगूढं वा।"

लक्षणा
- **शुद्धा**
  - उपादानलक्षणा (कुन्ताः प्रविशन्ति)
  - सारोपा (आयुर्घृतम्)
  - साध्यवसाना (आयुरेवेदम्)
  - लक्षणलक्षणा (गंगायां घोषः)
- **गौणी**
  - सारोपा (गौर्वाहीकः)
  - साध्यवसाना (गौरयम्)

(3) व्यञ्जनाशक्तिः

व्यञ्जना
- 1. शाब्दीव्यञ्जना
  - A अभिधामूला
  - B लक्षणामूला
- 2. आर्थीव्यञ्जना
  - A वाच्यार्थकी
  - B लक्ष्यार्थकी
  - C व्यङ्ग्यार्थकी

व्यंग्यप्रकाशनानुकूलशब्दव्यापारो व्यञ्जना नाम। "**शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः**". इति नयेन अभिधालक्षणां तात्पर्याख्यवृत्तीनां स्वार्थं बोधयित्वा उपक्षीणत्वे यया वृत्त्याऽन्योऽर्थो बुध्यते सा वृत्तिर्व्यञ्जना नाम्नी। सा शक्तिरेव शब्दस्य अर्थस्य प्रकृतिप्रत्ययादेश्च व्यञ्जन-ध्वनन-गमनप्रत्यायनादिव्यपदेशविषया व्यञ्जना इत्युच्यते। उक्तञ्च साहित्यदर्पणे–

विरतास्वभिधाद्यासु ययाऽर्थो बोध्यतेऽपरः।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च॥

व्यञ्जनायां विशिष्टः शब्दः व्यंजकः, बोध्यार्थस्य व्यंग्यः। अस्या व्यञ्जनाशक्तेः व्यवहारः नर्ममर्मज्ञाः कवयः कुर्वन्ति। इयमेव ध्वन्यार्थप्रतिपादिका शक्तिः उच्यते। यथोक्तं ध्वनेर्लक्षणम्–

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सुरभिः कथितः॥

व्यंजना द्विविधा–1. शाब्दी, 2. आर्थी च। शाब्दीव्यञ्जनेयं अभिधामूला लक्षणामूला च। यथा सुरभिर्मांसं भक्षयतीत्यत्र संयोगाद्यैः अभिधया सुरभिशब्दस्य एकस्मिन्नर्थे नियंत्रिते सति अपरस्य अप्रकृतस्यार्थस्य यया वृत्त्या प्रतीतिर्जायते सा व्यंजनानाम। अत्र सुरभिशब्दः अभिधया एव व्यज्यते; अतः अभिधामूला व्यंजना। गङ्गायां घोषः इत्यत्र च गंगाशब्दे शैत्यपावनत्वाद् अतिशयानां व्यञ्जनया एव प्रतिपादनं भवतीति लक्षणामूला व्यंजना। आर्थी व्यञ्जना तु वक्तृबोद्धव्यकाकुवैशिष्ट्यैः सम्भवति। यथा– कालो मधुः कुपित इत्यादि श्लोके।

1. शाब्दी व्यञ्जना–शब्दात् यत्र अर्थस्य प्रतीतिः भवति सा शाब्दीव्यञ्जना इत्युच्यते। सा शाब्दीव्यञ्जना द्विविधा–1. अभिधामूला, 2. लक्षणामूला च।

A. अभिधामूला व्यञ्जना–बह्वर्थस्य शब्दस्य एकस्मिन्नर्थे संयोगविप्रयोगादिभिः नियन्त्रिते सति अपरार्थ-बोधकारणं अभिधामूला शाब्दीव्यञ्जना। अर्थात् यत्र अनेकार्थस्य

शब्दस्य वाच्यार्थः असङ्गतिकारणेन नियन्त्रितः सन् भिन्नार्थस्य प्रतीतिं कारयति तत्र अभिधामूला शाब्दीव्यञ्जना व्यापारः स्वीक्रियते। तद्यथोक्तम्–

अनेकार्थस्य शब्दस्य संयोगाद्यैः नियन्त्रिते।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया॥

आदिशब्दाद्विप्रयोगादयः। अत्र संयोगाद्यभिधा-नियामकतत्त्वानि सन्ति। तदुक्तम्–

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिति देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥

अस्योदाहरणं यथा–1. **संयोगः**–"सशंखचक्रो हरिः" इत्यत्र शङ्खचक्रयोगेन हरिः विष्णुरेवाभिधीयते। 2. **वियोगः**–अशंखचक्रो हरिः, वियोगेऽपि हरिमेव। 3. **साहचर्यम्**–भीमार्जुनौ इति अर्जुनः पार्थः। 4. **विरोधः**–कर्णार्जुनौ इति सूतपुत्रः कर्णः विरोधेन। 5. **अर्थः**–स्थाणुं वन्दे इत्यत्र अर्थेन स्थाणुः शिवः क्रियापदयोगात्। 6. **प्रकरणम्**–सर्वं जानाति देवः इति युष्मदर्थे। 7. **लिङ्गम्**–लिङ्गवशात्तु कुपितो मकरध्वजः इति कामदेवः। 8. **सन्निधिः**–देवः पुरारिः इति 'सन्निधिवशात् शिवः'। 9. **सामर्थ्यम्**–मधुना मत्तः पिकः सामर्थ्यं मधुशब्दः वसन्तसूचकः। 10. **औचित्य**–पातु नो दयितामुखम् इति मुखं औचित्यात्। 11. **देशः**–विभाति गगने चन्द्रः गगनदेशात् चन्द्रः शशी। 12. **कालः**–निशिचित्रभानुः इति चित्रभानुर्वह्निः कालवशात्। 13. **भाति रथाङ्गम्**–क्लीबलिङ्गेन रथाङ्गं चक्रमिति।

B. लक्षणामूला व्यञ्जना–यस्य कृते लक्षणा उपास्यते तत् प्रयोजनं यया प्राप्यते सा लक्षणामूला शाब्दीव्यञ्जना भवति, यथा गङ्गायां घोषेत्यादौ गंगाशब्दे शैत्यपावनत्वाद्यतिशयानां व्यञ्जनया एव प्रतिपादनं भवतीति लक्षणामूला शाब्दीव्यञ्जना। यथोच्यते साहित्यदर्पणे–

लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्।
यया प्रत्याय्यते सा स्यात् व्यञ्जना लक्षणाश्रया॥

2. आर्थीव्यञ्जना–यत्र वक्तृबोद्धव्यादिवैशिष्ट्येन यया शक्त्या अन्योऽर्थः बुध्यते सा शक्तिः वृत्तिर्वा आर्थी व्यञ्जना नाम। तद्यथोक्तं काव्यप्रकाशे–

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः।
प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम्॥
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा।
(का.प्र.)

यथा वा साहित्यदर्पणे–

वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः।
प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च॥
(सा.दर्पण)

वक्तृवाक्यप्रस्तावदेशकालवैशिष्ट्येपूदाहरणं यथा विश्वनाथेन–

कालो मधुः कुपित एष च पुष्पधन्वा,
धीरा वहन्ति रतिखेदहराः समीराः।
केलीवनीयमपि वञ्जुलकुञ्जमञ्जु-
दूरे पतिः कथय किं करणीयमद्य॥

अत्रेदं देशं प्रति शीघ्रं प्रच्छन्नकामुकस्त्वया प्रकृष्यतामिति कयाचिद् व्यज्यते।

(S) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— शक्तित्रयाणां कानि नामानि सन्ति?
उत्तरम्—1. अभिधाशक्तिः, 2. लक्षणाशक्तिः, 3. व्यञ्जनाशक्तिश्च।

2. **प्रश्नः**—साक्षात्संकेतिततमर्थमभिधत्ते तदा तस्य साक्षात्संकेतितार्थस्य प्रतीतिः यया शक्त्या भवति सा शक्ति का?
उत्तरम्— अभिधाशक्तिः।

3. **प्रश्नः**—मुख्यार्थबाधे तद्योगे च रूढिवशात् प्रयोजनवशाद्वा यया वृत्त्या शब्दः लक्ष्यार्थं प्रतिपादयति सा शक्तिः का?
उत्तरम्— लक्षणाशक्तिः।

4. **प्रश्नः**—का व्यञ्जनाशक्तिः?
उत्तरम्—व्यंग्यप्रकाशनानुकूलशब्दव्यापारो व्यञ्जना-शक्तिः।

4. **प्रश्नः**— "अस्मात् शब्दात् अयमर्थो बोद्धव्यः" इति का?
उत्तरम्— अभिधा।

5. **प्रश्नः**— शक्तिग्रहोपायाः कति सन्ति?
उत्तरम्— 08 अष्ट।

6. **प्रश्नः**— "मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्" इति का?
उत्तरम्— लक्षणा।

7. **प्रश्नः**—मुख्यार्थबाधे तद्युक्तो यथाऽन्योऽर्थः प्रतीयते। रूढे प्रयोजनात् वाऽसौ लक्षणशक्तिरर्पिता। इति लक्षणाया स्वरूपं केन् कथितम्?
उत्तरम्— साहित्यदर्पणकारविश्वनाथेन।

8. **प्रश्नः**— लक्षणा कतिविधा?
उत्तरम्—06 षट्।

9. **प्रश्नः**—मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्। अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया।। इति कस्य लक्षणाया स्वरूपम्?
उत्तरम्— मम्मटस्य।

10. **प्रश्नः**—लक्षणा प्राथम्येन कतिविधा?
उत्तरम्— शुद्धा गौणीति द्विविधा।

11. **प्रश्नः**—शुद्धालक्षणायाः किं स्वरूपम्?
उत्तरम्— उपचाररहिता शुद्धा अर्थात् सादृश्येतरसम्बन्धेन यदा लक्षणा भवति।

12. **प्रश्नः**—शुद्धा-लक्षणा कतिधा काः च ताः?
उत्तरम्—चतुर्विधा उपादानलक्षणा लक्षणलक्षणा सारोपा-साध्यवसानाभेदात्।

13. **प्रश्नः**—काव्यप्रकाशानुसारेण लक्षणा कतिविधा?
उत्तरम्— षड्विधा।

14. **प्रश्नः**—विश्वनाथानुसारेण कतिविधा लक्षणा?
उत्तरम्— षोडशविधा।

15. **प्रश्नः**— "स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्" इति का?
उत्तरम्—उपादानलक्षणा।

16. **प्रश्नः**—गौर्वाहीकः कस्याः लक्षणायाः उदाहरणम्?
उत्तरम्— गौणीसारोपायाः।

17. **प्रश्नः**—'कुन्ताः प्रविशन्ति' इति कस्या उदाहरणम्?
उत्तरम्— उपादानलक्षणायाः।

18. **प्रश्नः**—"परार्थं स्वसमर्पणम्" इति का?
उत्तरम्— लक्षणलक्षणा।

19. **प्रश्नः**— "गंगायां घोषः" इति कस्याः उदाहरणम्?
उत्तरम्— लक्षणलक्षणायाः।

20. **प्रश्नः**— 'आयुर्घृतम्' कस्याः लक्षणाया उदाहरणम्?
उत्तरम्— लक्षणसारोपायाः।

21. **प्रश्नः**— गौरयमिति कस्याः लक्षणाया उदाहरणम्?
उत्तरम्— गौणसाध्यवसानायाः।

22. **प्रश्नः**— किं नाम आर्थीव्यञ्जना?
उत्तरम्—वक्तृबोद्धव्यादिवैशिष्ट्येन यया शक्त्या अन्योऽर्थः बुध्यते सा शक्तिः वृत्तिर्वा।

23. **प्रश्नः**— किं नाम अभिधामूला शाब्दीव्यञ्जना?
उत्तरम्—"बह्वर्थस्य शब्दस्य एकस्मिन्नर्थे संयोगविप्रयोगादिभिः नियन्त्रिते सति अपरार्थबोधकारणम्"।

24. **प्रश्नः**— संयोगाद्यभिधानियामकतत्त्वानि कति सन्ति?
उत्तरम्— 13 त्रयोदश।

25. **प्रश्नः**—मम्मटस्य व्यञ्जनास्वरूपं किम्?
उत्तरम्—यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते। फले शब्दैकगम्येऽत्र व्यञ्जनापराक्रिया।

26. **प्रश्नः**— विश्वनाथस्य व्यञ्जनास्वरूपं किम्?
उत्तरम्— विरतास्वभिधाद्यासु यथाऽर्थो बोध्यते परः। सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च।

27. **प्रश्नः**—शब्दस्य प्राधान्यं कुत्र भवति?
उत्तरम्— शाब्दी-व्यञ्जनायाम्।

28. **प्रश्नः**—अर्थस्य प्राधान्यं कुत्र भवति?
उत्तरम्— आर्थी-व्यञ्जनायाम्।

29. **प्रश्नः**— व्यंजना कतिविधा के च ते?
उत्तरम्— द्विविधा-1. शाब्दी, 2. आर्थी च।

30. **प्रश्नः**— शाब्दीव्यञ्जना कतिधा के च ते?
उत्तरम्— द्विविधा-1.अभिधामूला, 2.लक्षणामूला च।

31. **प्रश्नः**— शब्दशक्तिः कति भवति?
उत्तरम्— (3) तिस्रः।

32. **प्रश्नः**— वाच्यार्थप्रतिपादिका शक्तिः का भवति?
उत्तरम्—अभिधा।

33. **प्रश्नः**— अभिधावृत्त्या बोध्योऽर्थो किं भवति?
उत्तरम्— वाच्यः।

34. **प्रश्नः**—लक्षणावृत्त्या बोध्योऽर्थो किं भवति?
उत्तरम्— लक्ष्यः।

35. **प्रश्नः**—व्यंजनावृत्त्या बोध्योऽर्थो किं भवति?
उत्तरम्— व्यङ्ग्यः।

(T) (Code-25/73) — (ठ) रसनिरूपणम्, रसगंगाधरः (प्रथमानने रसनिरूपणपर्यन्तम्) एवं रससम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

पण्डितराज-जगन्नाथस्य अभ्युदयः काव्यशास्त्रे नव्यपरम्परोद्द्योतकः। पण्डितराजस्य स्थितिकालस्तु शाहजहानस्य सभापण्डितरूपेण स्वीक्रियते। पण्डितराजो हि 1720 मितवैक्रमाब्दपर्यन्तं जीवित एवाऽऽसीदिति तस्य आसफविलासतो ज्ञायते। शाहजहांनृपतेः पुत्रो दारासिकोहो जगन्नाथस्य पोषक आसीत्। पण्डितराज अप्पयदीक्षितस्य समकालीनः आसीत्। पण्डितराजो हि तैलङ्गो ब्राह्मणः, पिताऽस्य पेरुभट्टो माता च लक्ष्मीदेवी। जगन्नाथः वेदान्त-न्याय-वैशेषिक-पूर्वमीमांसा-व्याकरणादिविषयाणामध्ययनं स्वपितुः सविधे स्वपितुर्गुरोः वीरेश्वरस्य च सविधे अकार्षीत्।

पण्डितराजजगन्नाथस्य अनेके ग्रन्थाज्ञाताः सन्ति। अत्र रसगङ्गाधरः काव्यशास्त्रसम्बद्धो ग्रन्थः। ग्रन्थेऽस्मिन् द्वे एव आनने दृश्यते। ग्रन्थश्चायमपूर्ण एव। अत्र हि काव्यस्वरूपं, काव्यभेदाः, रसविवेकः, शब्दगुणानां लक्षणं, अर्थगुणानां लक्षणं, भावलक्षणं, ध्वनिविवेकः, शक्तिविवेकः, अलङ्कारनिरूपणं च प्रतिपादितविषयाः। अस्य पण्डितराजस्य संस्कृतभाषायामुपरि प्रतिभापूर्णमाधिपत्यमासीत्।

रसप्रकरणम्— **"रमणीयार्थप्रतिपादकः शब्दः काव्यम्"** इति पण्डितराजेन मनोहर-अर्थस्य वाच्य-लक्ष्य-व्यंग्यान्यतरस्य प्रतिपादकः शब्दः काव्यपदेन व्यवह्रियते। अयं रसशब्दः सर्वप्रथमं वेदेषु उल्लिखितः। यथा-**"दधानः कलशे रसम्" "रसो वै सः"** इति। काव्यपरम्परायां कविताकामिन्याः निखिलेभ्यः वाच्यार्थ-लक्ष्यार्थ-गुण-रीति-वक्रोक्ति-औचित्यादिभ्यः भिन्नः आत्मस्थानीयः रसः। अनेन विना काव्यं रसिकानां कृते निरसमनादृतं च भवति। यथोच्यते-

साधुपाके विनास्वाद्यं भोजनं निर्लवणं यथा।
तथैव नीरसं काव्यं स्यान्नो रसिकतुष्टये।।

अतः अलौकिकविलक्षणस्य अस्य रसस्य काव्यात्मत्वं सर्वैरङ्गीकृतम्।

विभावेनानुभावेन व्यक्तः संचारिणा तथा।
रसतामेति रत्यादिः स्थायीभावः सचेतसाम्।।
(विश्वनाथः)

नाट्यशास्त्रकारेण भरतमुनिना प्रतिपादितमस्ति-
"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः"। अत्र "निष्पत्तिः"शब्दस्य व्याख्या चतुर्भिः विद्वद्भिः चतुर्धा प्रतिपादिता- (क) भट्टलोल्लटस्य उत्पत्तिवादः। (ख) श्रीशंकुकस्य अनुमितिवादः। (ग) भट्टनायकस्य भुक्तिवादः। (घ) अभिनवगुप्ताचार्यस्य अभिव्यक्तिवादः। रसस्योदाहरणमेकम्-

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः,
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं,
लज्जा नम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता।।

नवरसाः-

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः।।
(का.प्र.)

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ शान्तस्तथा मतः।।

रसस्य स्थायिभावाः-

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः।
आस्वादांकुरकन्दोऽसौ भावः स्थायीति संमतः।।
(सा.दर्पण)

अर्थात् यः भावः विरुद्धैः अविरुद्धैश्च भावैः न विच्छिद्यते एवंभूतः आस्वादांकुरकन्दः स्थायिभावशब्देन उच्यते। अयं स्थायिभावः सर्वभावेषु प्रधानम्। यथा-नराणां नृपतिः। इमे स्थायिभावाः अधोलिखिताः सन्ति-

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ता शमोऽपि च।।
(सा.दर्पण)

1. रतिः-"रतिर्मनोऽनुकूलेऽथ मनसः प्रवणायितम्"।

2. हासः–"वागादिवैकृतैश्चेतोविकासो हास इष्यते"।
3. शोकः–इष्टनाशादिभिश्चेतो वैक्लव्यं शोकशब्दभाक्"।
4. क्रोधः–प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते"।
5. उत्साहः–"कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते"।
6. भयम्–"रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम्"।
7. जुगुप्सा–"दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा"।
8. विस्मयः–विविधेषु पदार्थेषु लोकसीमातिवर्तिषु।
विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः"।।
9. शमः–"शमो निरीहावस्थायां स्वात्मविश्रामजं सुखम्"।

रसभेदाः–

शृंगार-हास्य-करुण-रौद्र-वीर-भयानकाः।
बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः।।

1. शृंगाररसः–

शृंगं हि मन्मथो भेदस्तदागमनहेतुकः।
उत्तमप्रकृतिप्रायो रसः शृंगार इष्यते।।

अत्रालम्बनविभावः नायकः नायिका वा; अनुभावस्तु भ्रूविक्षेपकटाक्षादयः त्यक्तौग्र्यमरणमालस्यञ्च व्यभिचारिणः। श्यामवर्णोऽयं विष्णुदैवतः। यथा

चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम्।
भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्तितः।।
त्यक्तौग्र्यमरणमालस्यजुगुप्साव्यभिचारिणः।
स्थायिभावो रतिः श्यामवर्णोऽयं विष्णुदैवतः।।

शृंगारभेदः–शृंगारः द्विविधः–संभोगः विप्रलम्भश्च। "विप्रलम्भोऽथ संयोग इत्येष द्विविधो मतः।" यथा– 1. सम्भोगशृङ्गारः–

दर्शनस्पर्शनादीनि निषेवेते विलासिनौ।
यत्रानुरक्तावन्योऽन्यं संभोगोऽयमुदाहृतः।

एवं च–

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः,
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं,
लज्जा नम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता।।

अत्र बाला आलम्बनविभावौ। शून्यं वासगृहमुद्दीपनभावः। चुम्बनं अनुभावः, लज्जाहासौ व्यभिचारिणौ, एतैः अभिव्यक्तः सहृदयविषयः रतिभावशृङ्गारः रसरूपतामुपैति। अयं संभोग शृंगारः।

("स च पूर्वरागमानप्रवासकरुणात्मकश्चतुर्धा स्यात्")

2. विप्रलम्भशृङ्गारः–"यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ"। यथा शाकुन्तले–

तव न जाने हृदयं मम
पुनर्मदनो दिवाऽपि रात्रिमपि।
निष्कृप तापयति बलीयस्तव
हस्तमनोरथानि अङ्गानि।।

2. हास्यरसः–यत्र अभिनेतुः आकारविकृतिः वाग्विकृतिः वेषविकृतीत्यादिभिः अभिनयनं भवति तत्र हास्यरसः अभिव्यज्यते। अस्य स्थायिभावः हासः, वर्णः श्वेतः, प्रमथदैवतश्च। यथोक्तं साहित्यदर्पणे–

विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत्।
हास्यो हासस्थायिभावः श्वेतः प्रमथदैवतः।।

यथात्रोदाहरणे–

गुरोर्गिरः पञ्चदिनान्यधीत्य,
वेदान्तशास्त्राणि दिनत्रयं च।
अमी समाघ्राय च तर्कवादान्,
समागताः कुक्कुटमिश्रपादाः।।

हास्यरसस्य षड्भेदाः–

ज्येष्ठानां स्मितहसिते, मध्यानां
विहसितावहसिते च।
नीचानामपहसितं तथाति–
हसितं तदेष षड्भेदः।।

3. **करुणरसः**–इष्टनाशादनिष्टप्राप्त्या करुणरसः अभिव्यज्यते। अस्य स्थायिभावः शोकः, कपोतवर्णः यमदेवता। आलम्बनं विनष्टव्यक्तिः दाहादि–अवस्था उद्दीपनादिः, दैवनिन्दाक्रन्दनादयः अस्य अनुभावः, निर्वेदमोहग्लानयः व्यभिचारिणः। उक्तञ्च–

इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत्।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः।।

यथोदाहरणम्–

विपिने क्व जटानिबन्धनं
तव चेदं क्व मनोहरं वपुः।
अनयोर्घटना विधेः स्फुटं
ननु खड्गेन शिरीषकर्तनम्।।

अत्रालम्बनं शमः, उद्दीपनं वनवासः, अनुभावः दैवनिन्दनम्, विषादचिन्तादयः व्यभिचारिभावाः, एतेषां संयोगेन शोकरूपः स्थायिभावः करुणरसरूपेण अभिव्यज्यते।

4. **रौद्ररसः**–प्रतिकूलपरिस्थितौ प्रतीकारेच्छया क्रोधस्थायिभावरूपः रौद्ररसरूपेण अभिव्यज्यते। अस्य स्थायिभावः क्रोधः, वर्णः रक्तः, देवता रुद्रः, आलम्बनं शत्रुः, उद्दीपनं शत्रोः चेष्टा, भ्रूभङ्गः ओष्ठनिदर्शनादयः अनुभावः, मोहामर्षादयोऽत्र व्यभिचारिभावाः। तद्यथोक्तम्–

रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः।
आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम्।।

यथा–

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं,
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिनाम्,
अयमसृङ्मेदोमांसैः करोमि दिशां बलिम्।।

यथाभिज्ञानशाकुन्तले–

विचिन्तयन्ती यमनन्यमानसा
तपोनिधिं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव।।

5. **वीररसः**–उत्साहस्थायिभावः यदा जेतव्यो अभिव्यज्यते तदा वीररसः ध्वन्यते। अत्रालम्बनं शत्रुः, उद्दीपनञ्च तस्य चेष्टादयः, अनुभावाः तु अन्यान्यसाधनानामन्वेषणम्। धृति-स्मृति-रोमाञ्चादयः अस्य व्यभिचारिणः–

उत्तमप्रकृतिर्वीरः उत्साहस्थायिभावकः।
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः।।

यथा–

भो लंकेश्वर ! दीयतां जनकजा, रामः स्वयं याचते,
कोऽयं ते मतिविभ्रमः, स्मर नयं, नाद्यापि किंचिद्गतम्।
नैवं चेत्खरदूषणत्रिशिरसां कण्ठासृजा पङ्किलः
पत्री नैष सहिष्यते मम धनुर्ज्याबन्धबन्धूकृतः।।

यथाभिज्ञानशाकुन्तले–

का कथा बाणसन्धाने ज्याशब्देनैव दूरतः।
हुंकारेणैव धनुषः स हि विघ्नान् व्यपोहति।।

6. **भयानकरसः**–रौद्रशक्त्या चित्तवैक्लव्यजं भयं भवति। तद्भयमेव यदा अभिव्यज्यते तदा भयानको रसः भवति। अस्य देवता यमराजः, कृष्णवर्णः, स्त्रीनीच-प्रकृतिरस्याश्रयः। अस्यालम्बनं भयोत्पादकपदार्थाः तस्य चेष्टाः उद्दीपनानि विवर्णता, प्रलय-स्वेद-कम्पनादयः अस्यानुभावाः। जुगुप्सा आवेगादयः अस्य व्यभिचारिणः–

भयानको भयस्थायिभावः कालाधिदैवतः।
स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः।।

यथोदाहरणम्–

नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपाम्,
अन्तःकंचुकिकंचुकस्य विशति त्रासादयं वामनः।
पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतम्,
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशंकिनः।।

यथोदाहरणम्–

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम्।
शष्पैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति।

7. **बीभत्सरसः**– यदा जुगुप्सारूपः स्थायिभावः अभिव्यज्यते तदा बीभत्सो रसः आस्वाद्यते। अस्य वर्णः नीलम्, देवः महाकालः। दुर्गन्धिमांसरुधिरादयः आलम्बनविभावाः। मांसरुधिरादिषु कृमिपातनम् उद्दीपनम्। मुखसंवरणम्, नेत्रसंकोचनम् निष्ठीवनञ्चेत्यादयः अनुभावाः। मोह–आवेग–व्याधयः व्यभिचारिणः। यथोक्तम्–

जुगुप्सा स्थायिभावस्तु बीभत्सः कथ्यते रसः।
नीलवर्णो महाकालदैवतोऽयमुदाहृतः।

यथोदाहरणम्–

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ–
पृथूच्छोथभूयांसि मांसा–
न्यंसस्फिक्पृष्ठपिण्डाद्यवयव–
सुलभान्युग्रपूतीनि जग्ध्वा।
आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरंकः करङ्का–
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति।।

अत्र शवः प्रेतरङ्को वा आलम्बनविभावः तत्कर्तनं मांसादनं उद्दीपनभावः, दृष्टुः नासाकुञ्चनादयः अनुभावाः उद्वेगग्लान्यादयः व्यभिचारिभावाः एतैः संवलितास्वाद्यमानः जुगुप्सास्थायिभावः बीभत्सरसत्वेनास्वाद्यते।

8. अद्भुतो रसः–यदा विभावानुभावव्यभिचारिभिः विस्मयस्थायिभावः अभिव्यज्यते तदा अद्भुतो रसः। अस्य देवता गन्धर्वः वर्णः पीतः। उक्तञ्च–

अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः।
पीतवर्णो वस्तुलोकातिगमालम्बनं मतम्॥

यथोच्यते–

दोर्दण्डांचित-चन्द्रशेखर-धनुर्दण्डावभंगोद्यत-
ष्टंकार-ध्वनिरार्यबालचरित-प्रस्तावना-डिण्डिमः।
द्राक्पर्यस्त-कपाल-संपुटमिलद्ब्रह्माण्ड-भाण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति॥

अत्र लोकाद्भिन्नं इन्द्रजालादिकं वस्तु आलम्बनम्। वस्तुना गुणमहिमा उद्दीपनं भवति। स्तम्भः स्वेदः रोमाञ्चादयः अनुभावाः, वितर्पाः–आवेग-हर्षादयः व्यभिचारिणः; यथा–

चित्रं महानेष बतावतारः
क्वाकान्तिरेषाऽभिनवैव भङ्गिः।
लोकोत्तरं धैर्यमहो प्रभावः
काऽप्याकृतिनूतन एष सर्गः।

9. शान्तरसः–"निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः" यस्य स्थायिभावः शमः स शान्तरसः, अयमुत्तम-प्रकृतिकः, चन्द्र-छाया इव धवलः, नारायणं चास्य देवः। उक्तं हि–

शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः॥

सांसारिकविषयेभ्यो: विरतिरस्य आलम्बनम्। पवित्राश्रमः, रम्यकाननादयः अस्योद्दीपकाः, रोमाञ्चादयः अस्य अनुभावः निर्वेदः हर्षः, धृतिः व्यभिचारिणः। यथोदाहरणम्–

भोगे रोगभयं कुले च्युतिभयं वृत्ते नृपालाद्भयं
माने दैन्यभयं बले रिपुभयं रूपे जलेशाद् भयम्।
शास्त्रे वादिभयं गुणे खलभयं काले कृतान्ताद् भयम्।
सर्वं वस्तु भयान्वितं भुवि नृणां शम्भोः पदं निर्भयम्॥

यथोक्तम्–

रथ्यान्तश्चरतस्तथा धृतजरत्कन्थालवस्याध्वगैः,
सत्रासं च सकौतुकं च सदयं दृष्टस्य तैर्नागरैः।
निर्व्याजीकृतचित्सुधारसमुदा निद्रायमाणस्य मे,
निःशंकः करटः कदा करपुटीभिक्षां विलुण्ठिष्यति॥

अत एवोक्तम्–

न तत्र दुःखं न सुखं न चिन्ता
न द्वेषरागौ न च काचिदिच्छा।
रसः स शान्तः कथितो मुनीन्द्रैः
सर्वेषु भावेषु समप्रमाणः॥

रसभेदनिरूपणचक्रम्–

क्रमांकः	रसः	स्थायिभावः	वर्णः	देवता
1.	शृंगारः	रतिः	श्यामः	विष्णुः
2.	हास्यः	हासः	शुक्लः	प्रमथः
3.	करुणः	शोकः	कपोतवर्णः	यमः
4.	रौद्रः	क्रोधः	रक्तः	रुद्रः
5.	वीरः	उत्साहः	सुवर्णवत्	महेन्द्रः
6.	भयानकः	भयम्	कृष्णः	यमः (कालः)
7.	बीभत्सः	जुगुप्सा	नीलः	महाकालः
8.	अद्भुतः	विस्मयः	पीतः	गन्धर्वः
9.	शान्तः	शमः	कुन्दपुष्पवत्	श्रीनारायणः

(T) (B) रसस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— रसाः कति सन्ति, के च ते?
उत्तरम्—नव, 1. शृंगारः, 2. हास्यः, 3. करुणः, 4. रौद्रः, 5. वीर, 6. भयानकः, 7. बीभत्सः, 8. अद्भुतः, 9. शान्तः।

2. **प्रश्नः**— रसोत्पत्तिः इत्यस्य सूत्रं किमस्ति?
उत्तरम्—'विभावानुभावव्यभिचारिसंयोगाद् रस-निष्पत्तिः'।

3. **प्रश्नः**—'विभानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः' इति कस्य रस-सूत्रम्?
उत्तरम्— मम्मटस्य।

4. **प्रश्नः**—'विभावेनानुभावेन व्यक्तः संचारिणा तथा' इति कस्य रससूत्रम्?
उत्तरम्— विश्वनाथस्य।

5. **प्रश्नः**—भरतः स्व-रससूत्रे कति वादाः स्वीकुर्वन्ति?
उत्तरम्— चत्वारो वादाः।

6. **प्रश्नः**—'रसो वै सः' इति कस्य कथनं वर्तते?
उत्तरम्— वेदस्य।

7. **प्रश्नः**— शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः॥ इति कस्य अष्टौ भेदाः सन्ति?
उत्तरम्— रसस्य।

8. **प्रश्नः**—शृंगारः कतिविधः, कौ च तौ?
उत्तरम्— द्विविधः–संभोगः विप्रलम्भश्च।

9. **प्रश्नः**—शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः, निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्। विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं, लज्जा नम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता। इति कस्य रसस्य उदाहरणम्?
उत्तरम्— शृंगार-रसस्य।

10. **प्रश्नः**—'रतिर्मनोनुकूलेऽर्थे मनसः प्रवणायितम्' इति कस्य लक्षणं वर्तते?
उत्तरम्— शृंगार-रसस्य।

11. **प्रश्नः**—गुरोर्गिरः पञ्चदिनान्यधीत्य, वेदान्तशास्त्राणि दिनत्रयं च। अमी समाघ्राय च तर्कवादान्, समागताः कुक्कुटमिश्रपादाः। इति कस्य रसस्य उदाहरणम्?
उत्तरम्— हास्य-रसस्य।

12. **प्रश्नः**—करुण-रसस्य किं लक्षणम्?
उत्तरम्— "इष्टनाशादिभिश्चेतोवैक्लव्यं शोकशब्द-भाक्"।

13. **प्रश्नः**—करुण-रसस्य किमुदाहरणम्?
उत्तरम्— विपिने क्व जटानिबन्धनं तव चेदं क्व मनोहरं वपुः। अनयोर्घटना विधेः स्फुटं ननु खड्गेन शिरीषकर्तनम्॥

14. **प्रश्नः**—रौद्ररसस्य किं लक्षणम्?
उत्तरम्—'प्रतिकूलपरिस्थितौ प्रतीकारेच्छया क्रोधस्थायिभावरूपः'।

15. **प्रश्नः**—रौद्ररसस्य किमुदाहरणम्?
उत्तरम्— 'कार्यं वा साधयेयं देहं वा पातयेयम्।'

16. **प्रश्नः**—वीररसस्य किं लक्षणम्?
उत्तरम्— 'उत्साह स्थायिभावः यदा जेतव्यो अभिव्यज्यते'।

17. **प्रश्नः**—वीररसस्य अभिज्ञानशाकुन्तले किमुदाहरणम्?
उत्तरम्— "का कथा बाणसन्धाने ज्याशब्देनैव दूरतः। हुंकारेणैव धनुषः स हि विघ्नान् व्यपोहति॥"

18. **प्रश्नः**—भयानकरसस्य किं लक्षणम्?
उत्तरम्— 'रौद्रशक्त्या चित्तवैक्लव्यजं भयं भवति। तद्भयमेव यदा अभिव्यज्यते'।

19. **प्रश्नः**—भयानकरसस्य किमुदाहरणम्?
उत्तरम्—"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्। शष्पैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वात् वियति बहुतरं स्तोकमुर्व्यां प्रयाति।"

20. **प्रश्नः**—बीभत्सरसस्य किं लक्षणम्?
उत्तरम्—यदा जुगुप्सारूपः स्थायिभावः अभिव्यज्यते तदा बीभत्सो रसः आस्वाद्यते।

21. **प्रश्नः**—बीभत्सरसस्य किमुदाहरणम्?
उत्तरम्— उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसान्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा। आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरंकः करङ्कादङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति॥

22. प्रश्नः—अद्भुतरसस्य किं लक्षणम्?
उत्तरम्—यदा विभावानुभावव्यभिचारिभिः विस्मयस्थायिभावः अभिव्यज्यते तदा अद्भुतो रसः।

23. प्रश्नः—शान्तरसस्य किं लक्षणम्?
उत्तरम्— "निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः"

24. प्रश्नः—शान्तरसस्य किमुदाहरणम्?
उत्तरम्— भोगे रोगभयं कुले च्युतिभयं वृत्ते नृपालाद्भयं। माने दैन्यभयं बले रिपुभयं रूपे जलेशाद् भयम्। शास्त्रे वादिभयं गुणे खलभयं काले कृतान्ताद् भयम्। सर्वं वस्तु भयान्वितं भुवि नृणां शम्भोः पदं निर्भयम्।।

25. प्रश्नः— भावोदयः कोऽस्ति?
उत्तरम्— कश्चित् भावस्य उद्रेकः 'भावोदयः'।

26. प्रश्नः— काव्ये मुख्यार्थः कः?
उत्तरम्— रसः (रसश्च मुख्यः)।

27. प्रश्नः— 'कौशिकी वृत्तिः' कस्मिन् रसे भवति?
उत्तरम्— शृंगाररसे।

28. प्रश्नः— भट्टलोल्लटस्य रससिद्धान्तं किम्?
उत्तरम्— उत्पत्तिवादः।

29. प्रश्नः— शंकुकसम्मतं रससिद्धान्तं किम्?
उत्तरम्— अनुमितिवादः।

30. प्रश्नः— चित्रतुरगन्यायेन रससिद्धान्तं कः उपस्थापयति?
उत्तरम्— शंकुकः।

31. प्रश्नः— भुक्तिवादं कः स्वीकरोति?
उत्तरम्— भट्टनायकः।

32. प्रश्नः— अभिनवगुप्तसम्मतं रससिद्धान्तं किम्?
उत्तरम्— अभिव्यक्तिवादः।

33. प्रश्नः— "आह्लादकत्वम् शृंगारे द्रुतिकारणम्———" किम्?
उत्तरम्— माधुर्यम्।

34. प्रश्नः— दीप्त्यात्मविस्तृतेर्हेतुः.....।" इति कः?
उत्तरम्— ओजः।

35. प्रश्नः— "पुष्पेन्धनाग्निवत् स्वच्छजलवत् सहसैव यः व्याप्नोति, सः कः?
उत्तरम्— प्रसादः।

36. प्रश्नः— वीररसस्य स्थायिभावः कः?
उत्तरम्— उत्साहः।

37. प्रश्नः— करुणरसस्य वर्णः कः?
उत्तरम्— कपोतः।

38. प्रश्नः— हास्यरसस्य स्थायिभावः कः?
उत्तरम्— हासः।

39. प्रश्नः— बीभत्सस्य स्थायिभावः किम्?
उत्तरम्— जुगुप्सा।

40. प्रश्नः—साहित्यदर्पणकारेण अष्टौ स्थायिभावस्य रसानुसारे समुचितक्रमः किमुच्यते?
उत्तरम्— रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ता शमोऽपि च।।

41. प्रश्नः— रसगङ्गाधरे अध्यायस्य किं नाम?
उत्तरम्— आननम्।

42. प्रश्नः— पण्डितराजजगन्नाथः कुत्रत्यः आसीत्?
उत्तरम्— काश्याः निवासी।

43. प्रश्नः— पण्डितराजजगन्नाथस्य पितुर्नाम किमासीत्?
उत्तरम्— पेरुभट्टः।

44. प्रश्नः— "पण्डितराज" इत्युपाधिना केन राज्ञा जगन्नाथो विभूषितः?
उत्तरम्— दिल्याः बादसाहेन शाहजहाँमहोदयेन।

45. प्रश्नः— पण्डितराजस्य द्वेषिणौ कौ पण्डितौ?
उत्तरम्— भट्टोजिदीक्षित-अप्पयदीक्षितौ।

46. प्रश्नः— जगन्नाथस्य गुरोर्नाम किमस्ति?
उत्तरम्— वीरेश्वरः।

47. प्रश्नः— जगन्नाथेन मनोरमायाः खण्डनं केन नाम्ना कृतम्?
उत्तरम्— "मनोरमाकुचमर्दनी" इति नाम्ना।

48. प्रश्नः— जगन्नाथस्य अलङ्कारशास्त्रपरको ग्रन्थ कः?
उत्तरम्— "रसगङ्गाधरः"।

49. प्रश्नः— कस्य सम्प्रदायस्य आचार्यः पण्डितराजः?
उत्तरम्— रस-सम्प्रदायस्य।

50. प्रश्नः— पण्डितराज-जगन्नाथस्य कियन्तो ग्रन्थाः?
उत्तरम्— (12) द्वादश।

51. प्रश्नः— जगन्नाथमतेन किन्नाम काव्यम्?
उत्तरम्— "रमणीयार्थप्रतिपादकः शब्दः काव्यम्"।

52. प्रश्नः— पण्डितराजजगन्नाथस्य मातुर्नाम किमासीत्?
उत्तरम्— लक्ष्मीदेवी।

53. प्रश्नः— पण्डितराजजगन्नाथस्य समयः कः?
उत्तरम्— सप्तदशशताब्द्याः मध्यमभागः।

(T) (Code-25/73) (ड) अलंकारविवेचनमेवमलंकारसम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(B) अलंकारविवेचनम्–

(उपमा, रूपकम्, दीपकम्, अपह्नुति, यमकं, शब्दालंकारः, अर्थालंकारश्चेति।)

(क) अलङ्कार-विवेचनम्–'अलं करोतीति अलङ्कारः' 'आभूषितं करोतीति अलंकारः' अलं + कृ धातोः घञः योगेन अलंकार-शब्दः सिद्ध्यति। लेटिनभाषायां अलंकारशब्दस्यार्थः AURUM 'स्वर्ण' विद्यते। आभूषित-करणमेव अलंकारः। अलंकारः काव्यस्य महत्त्वपूर्णमङ्गं वर्तते। अलंकृतिरलंकारः। "काव्य-सौन्दर्यस्य विधायकानां सम्पूर्णतत्त्वानां विवेचनशास्त्रमेव अलंकारशास्त्रम्।" अलंकारस्य त्रयो भेदाः (1) शब्दालंकारः, (2) अर्थालंकारः, (3) उभयालंकारश्चेति मन्यन्ते। "शब्दार्थौ सहितौ काव्यम्" इति भामह-कथनेन स्पष्टं भवति यत् 'सत्यं शिवं सुन्दरम्' इत्यत्र चरमतत्त्वं सुन्दरमेव वर्तते। शिव-सुन्दरयोश्च यदा सत्येन सह संयोगो भवति, तदा संसारे मंगलोदयः भवति। ते आचार्या गुण-रस-रीति-भावादिविषयाः अलंकारस्य अन्तर्गते मन्यन्ते। भगवान् शंकरः अलंकारशास्त्रस्य शिक्षणं सर्वप्रथमं ब्रह्मणे दत्तवान्, ब्रह्मा च देवेभ्यः कतिभ्यश्च ऋषिभ्यश्च तच्छिक्षां ददौ। तदनुसृत्याष्टादश ब्रह्मशिष्या अष्टादशस्वधिकरणेषु शास्त्रमिदं निबद्धवन्तः। नन्दिकेश्वरो रसम्, धिषणो दोषान्, उपमन्युर्गुणान्, भरतश्च रूपकाणि निरूपितवान्।

अलङ्कारो नाम सौन्दर्यम्, यथा-कटक-कुण्डल-हारादिभिः आभूषणैः कामिन्याः सौन्दर्यवृद्धिः भवति, तथैव अनुप्रास-उपमादिभिः अलङ्कारैः कविताकामिन्याः शोभावर्द्धनं क्रियते। येन कविताकामिनी कुरूपा सत्यपि सौन्दर्यं प्राप्नोति।

(ख) अलङ्कारस्य लक्षणम्–

1. आचार्यमम्मटेनापि उच्यते–

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ।। इति।

अर्थात् यः धर्मः काव्यस्य शब्दार्थरूपेण शरीरेण तम् अङ्गिनं रसं यदा कदा उपकुर्वन्ति ते अलंकाराः इत्युच्यन्ते। यथा नायिका स्वहस्तपादादौ कटकनुपूरादिकं परिदधाति तथैव काव्यनायिकाऽपि स्वशब्दार्थशरीरे अनुप्रासोपमादीन् अलंकारान् परिदधाति।

2. कविराजविश्वनाथेनापि उक्तम्–

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ।।
(सा०द०)

ये शब्दार्थयोरनित्यधर्मत्वेन अतिशयशोभाकारिणः रसादीन् उपकुर्वन्ति, ते काले अलङ्काराः। शरीरे यथा कटककुण्डलादीनां बाह्यशोभाऽऽधायकानाम् आत्मनः परोक्षधर्मत्वम्, तथैव काले अनुप्रासोपमादीनाम् अलङ्काराणाम्।

(ग) रूपकम्—निषेधरहिते उपमेये यत्र उपमानस्य अभेदारोपः तत्र रूपकम्। उपमानेन उपमेयस्य उपरञ्जनमेव अस्य अलङ्कारस्य प्रामुख्यम्। इदं रूपकं मूलतः त्रिधा–1. परम्परितम्, 2. साङ्गम्, 3. निरङ्गञ्चेति। यथा–

आहवे जगदुद्दण्डराजमण्डलराहवे।
श्रीनृसिंहमहीपाल! स्वस्त्यस्तु तव बाहवे।।

अत्र उपमेयभूते बाहौ उपमानभूतस्य राहोः अभेदारोपाद् किञ्च राजमण्डलरूपे उपमेये चन्द्रविम्बस्य उपमानभूतस्य अभेदारोपात् रूपकम्। साहित्यदर्पणे–

रूपकं रूपितारोपो विषये निरपह्नवे।
तत्परम्परितं साङ्गं निरङ्गमिति च त्रिधा।।

चन्द्रालोके–

यत्रोपमानचित्रेण सर्वं वाप्युपरज्यते।
उपमेयमयी भित्तिस्तत्र रूपकमिष्यते।।

(घ) यमकम्–

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।।
(सा०द०10/8)

आवृत्तवर्णस्तवकन्दाङ्कुरं कवेः।
यमकं प्रथमाधुर्यमाधुर्यवचसो विदुः।।
(चन्द्रालोके 5/8)

अर्थवन्तः भिन्नार्थकस्य स्वरव्यञ्जनसमुदायस्य तेनैव क्रमेण पुनरावृतिः नाम यमकम्। अत्र द्वयोरपि पादयोः क्वचित् सार्थकत्वं क्वचिन्निरर्थकत्वम्। क्वचिदेकस्य सार्थकत्वम् अपरस्य निरर्थकत्वम्। उदाहरणम्–

नवपलाशपलाशवनं पुरः
स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत्
स सुरभिं सुरभिं सुमनाहरैः।।

पलाश-पलाश इति सुरभिं-सुरभिं इत्यत्र च द्वयोः सार्थकत्वम्। लतान्त-लतान्त इत्यत्र प्रथमस्य निरर्थकत्वम्, पराग-पराग इत्यत्र द्वितीयस्य। एतेषां क्रमेण आवृत्तेः यमकम्। चन्द्रालोकस्थं लक्षणपद्यमेव उदाहरणम्। स्तबक-स्तबक इत्यत्र द्वितीयस्य निरर्थकत्वम्। माधुर्य-माधुर्य इत्यत्र प्रथमस्य। परन्तु तेनैव क्रमेण आवृत्तेः यमकम्।

(ङ) अलङ्कारः द्विविधः–

1. शब्दालङ्कारः, 2. अर्थालङ्कारश्च।

1. शब्दालंकारः– (अलङ्कारा: त्रिधा विभज्यन्ते।)

शब्दाऽलङ्कारा:–अनुप्रास-यमक-श्लेषादयः; यत्र अलङ्कारे शब्दः न परिवर्तनं सहते, तत्र शब्दालंकारः।

1. अनुप्रासः–शब्दाऽलंकारेषु विशिष्टोऽयमलंकारः। तत्लक्षणं हि काव्यप्रकाशे **"वर्णसाम्यमनुप्रासः"**। अर्थात् स्वरवैसादृश्येऽपि व्यञ्जनसदृशत्वं वर्णसाम्यम्। रसाद्यनुगतत्वेन प्रकर्षेण न्यासः अनुप्रासः। साहित्यदर्पणेऽपि–अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्। यथा–

लताकुञ्जं गुञ्जन्मदवदलिपुञ्जन् चपलयन्।
समालिङ्गन् भङ्गं द्रुततरमनङ्गं प्रबलयन्।।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्।
रजोवृन्दं विन्दन्किरति मकरन्दं दिशि दिशि।।

अनुप्रासस्य पञ्चभेदाः– 1. छेकानुप्रासः, 2. वृत्त्यनुप्रासः, 3. श्रुत्यनुप्रासः, 4. अन्त्यानुप्रासः, 5. लाटानुप्रासश्च।

(2) यमकम्–भिन्नार्थयुक्तयोः (अर्थरहितयोर्वा) पदानामेकत्रावस्थानेन यमकालंकारः भवति। तत्लक्षणं हि **"अर्थे सत्यर्थभिन्नानां वर्णानां सा पुन श्रुतिः"**। अर्थात् अर्थे विद्यमाने अविद्यमाने वा भिन्नार्थयुक्तवर्णानां तेनैव क्रमेणावृत्तिर्जायते तत्र यमकालंकारः। तद्यथोक्तं विश्वनाथेन–

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।।
(सा०द०10/8)

अर्थवन्तः भिन्नार्थकस्य स्वरव्यञ्जनसमुदायस्य तेनैव क्रमेण पुनरावृत्तिः नाम यमकम्। अत्र द्वयोरपि पादयोः क्वचित् सार्थकत्वं क्वचिन्निरर्थकत्वम्। क्वचिदेकस्य सार्थकत्वम् अपरस्य निरर्थकत्वम्। उदाहरणम्–

नवपलाशपलाशवनं पुरः
स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत्
स सुरभिं सुरभिं सुमनोभरैः।।

अत्र पलाश-पराग-लतान्त-सुरभि आदि पदसमूहानां प्रयोगः क्रमेण तेनैव क्रमेण भवति। अतोऽत्र यमकालंकारः। लतान्त-लतान्त, इत्यत्र प्रथमलतान्तशब्दः निरर्थकः। पराग-पराग इत्यत्र च द्वितीयः परागशब्दः निरर्थकः। यमकालंकारोऽपि पदावृत्तिरपदावृत्तिरर्द्धावृत्तीत्यादिभेदैः अनेकविधः।

3. वक्रोक्तिः–यत्र श्लेषकारणेनाकाकुकारणेन उच्चारितस्य शब्दस्य भिन्नार्थः गृह्यते तत्र वक्रोक्त्यलंकारः। अतः वक्रोक्त्यलंकारः द्विविधः (1) श्लेषवक्रोक्तिः, (2) काकुवक्रोक्तिश्च। तत्लक्षणं हि काव्यप्रकाशे–

यदुक्तमन्यथा वाक्यमन्यथाऽन्येन योज्यते।
श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा।।

श्लेषवक्रोक्तिर्यथा–के यूयं? स्थल एव सम्प्रति वयम् इत्यत्र कश्चिज्जनः कंचिज्जनं पृच्छति यूयं भवन्तः के किन्नामकाः? श्रोता च श्लेषेण वक्तुर्वाक्यं अन्यथाकरोति वयं सम्प्रति स्थले एव न तु के अर्थाज्जले। तथैव–

अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता।
त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्।।

इत्यत्रापि श्लेषेण श्लिष्टदारूशब्दस्य काष्ठरूपेण ग्रहणम्।

(4) श्लेषालंकारः–यत्र एकोच्चारणेनैव युगपदनेकार्थाववोधकैः पदैः अनेके अर्थाः अभिधया अभिधीयन्ते तत्र श्लेषालंकारः भवति। यथोक्तं साहित्यदर्पणे–

श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते।

श्लेषोऽयं अष्टविधो भवति; उक्तञ्च "श्लेषोऽसावक्षरादिभिरष्टधा"। काव्यप्रकाशेऽपि–वाच्यभेदेन भिन्ना यद् युगपद्भाषणस्पृशः। श्लिष्यन्ति शब्दाः श्लेषो; यथोदाहरणम्–

प्रतिकूलतामुपगते हि विधौ
विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्तुः
भून्न पतिष्यतः करसहस्रमपि।।

अत्र विधौ इति सप्तम्यन्तैकवचनस्य प्रयोगः, विधु-विधि-शब्दयोः उकारेकारौ औकारेण परिणतौ वर्णश्लेषः जायते।

(5) पुनरुक्तवदाभासः–अयमलंकारः शब्दगतोऽपि अर्थगतश्च। अस्य लक्षणं हि काव्यप्रकाशे–

पुनरुक्तवदाभासो विभिन्नाकारशब्दगा एकार्थतेव।

अर्थात् विभिन्नस्वरूपेषु शब्देषु समानार्थतया एव यत् प्रतीयते सैव पुनरुक्तवदाभासालंकारः। यथोदाहरणम्–

भुजंगकुण्डली व्यक्तशशिशुभ्रांशुशीतगुः।
जगन्त्यपि सदापायादव्याच्चेतोहरः शिवः।।

इत्थं–

वक्रोक्तिरप्यनुप्रासो यमकं श्लेषचित्रके।
पुनरुक्तवदाभासो शब्दालंकृतयस्तु षट्।।

(2) अर्थालंकारः—अर्थालंकाराः उपमोत्प्रेक्षासन्देह-रूपकसमासोक्त्यादयः। यत्र तु शब्दपरिवर्तनेऽपि अलङ्कारत्वे न काऽपि क्षतिः, तत्र अर्थाऽलङ्कारः।

(क) उपमा–काव्यप्रकाशे तत्लक्षणं हि–साधर्म्यमुपमाभेदे। यत्र उपमेयोपमानयोः भेदे विद्यमानत्वेऽपि समानधर्मः वर्ण्यते तदोपमालंकारः। अत एव विश्वनाथोऽपि–

साम्यं वाच्यमवैधर्म्यवाक्यैक्य उपमाद्वयोः।
(सा०द०–10/14)

अत्र एकस्मिन्नेव वाक्ये द्वयोः पदार्थयोः (उपमा-उपमेययोः) साधर्म्येण वाच्यं सादृश्यं भवति। तत्र उपमा नाम अर्थाऽलङ्कारविशेषः। उपमायाः चत्वारः पदार्थाः भवन्ति। यथा–1. साधारणधर्मः, 2. इव, 3. उपमानम्, 4. उपमेयः। पूर्णा लुप्ता इति उपमा मूलतः द्विधा।

सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले।
(सा०द०)

अस्मिन् उदाहरणे वाक्यत्रितयमेव वर्तते। वाक्यत्रये उपमात्रयी अपि अम्भोरुहमुपमानम्, सौरभम् इति प्रथमवाक्ये मुखमुपमेयम्, सुरभित्वं धर्मः–'वत्' इति 'उपमावाचकम्', अत्र उपमानोपमेययोः साधर्म्येण वाच्यसादृश्यात् उपमा। एवमन्यत्र चन्द्रालोके लक्षणपद्यमेव उदाहरणम्।

यथा– किरातार्जुनीये महाकाव्ये भारविना–

न तेन सज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरूह्यते
नराधिपैर्माल्यमिवास्य शासनम्।।

(ख) उत्प्रेक्षा–तत्लक्षणं हि–**"सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्"**। सादृश्यमूलकोऽयमलंकारः। यदा उपमानेन सह उपमेयस्य सम्भावनं प्रदर्श्यते तदोत्प्रेक्षा अलंकारः। यथा शाकुन्तले कालिदासः:–

यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतोऽरुणपुरःसर एकतोऽर्कः।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्याम्
लोको नियम्यत इवैष दशान्तरेषु।।

अत्र आत्मदशाप्रदर्शनेन ईश्वरीयनियमं ज्ञाप्यते, अत्र शकुन्तलायाः पितुर्गृहात् भर्तृगृहगमनकालः समागतोऽस्तीति प्रसङ्गे वर्णितोऽयं श्लोकः।

(ग) अर्थान्तरन्यासः–यत्र सामान्यं विशेषेण विशेषः सामान्येन वा समर्थ्यते तत्रार्थान्तरन्यासालंकारः। अयं साधर्म्यवैधर्म्यभावेन द्विविधः, ततः चतुःप्रकारको भवति। यथोदाहरणं किरातार्जुनीये भारविना–

क्रियासु युक्तैर्नृपचारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः।।

अर्थलक्षणम् काव्यप्रकाशे–

सामान्यं वा विशेषो वा तदन्येनं समर्थ्यते।
यत्तु सोऽर्थान्तरन्यासो साधर्म्येणेतरेण वा।।

(घ) दीपकम्—साहित्यदर्पणे लक्षणं हि–

अप्रस्तुतप्रस्तुतयोर्दीपकं तु निगद्यते।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत्।।
(सा०द०)

प्रस्तुताप्रस्तुतानां च तुल्यत्वे दीपकं मतम्।
मेधां बुधः सुधामिन्दुर्विभर्ति वसुधां भवान्।।

(चन्द्रालोके)

यत्र प्रस्तुताप्रस्तुतानां पदार्थानाम् एकेनैव धर्मेण सह सम्बन्धः तत्र दीपकम्। किञ्च, यत्र अनेकानां क्रियाणामेकेनैव कारकेण सह सम्बन्धः तत्रापि दीपकस्य लक्षणान्तरम्। उदाहरणम्–

बलावलेपादधुनापि पूर्ववत्
प्रबाध्यते तेन जगज्जिगीषुणा।
सती च योषित्प्रकृतिश्च निश्चला
पुमांसमभ्येति भवान्तरेष्वपि।।

(सा०द०)

अत्र प्रस्तुतभूतायाः निश्चलायाः योषित्प्रकृतेः अप्रस्तुतभूतस्य पतिव्रतायाः स्त्रियः एकेनैव अनुगमनरूपेण क्रियाधर्मेण सह सम्बन्धः वर्णित इति दीपकम्। 'दूरं समनुकर्तां' इति उदाहरणान्तरपदे एकस्य एव कारकभूतस्य नायिकायाः उत्कण्ठादिभिः बहुक्रियाभिः सह सम्बन्धात् दीपकमिति। चन्द्रालोकोदाहरणे प्रस्तुतस्य राज्ञः अप्रस्तुतयोः इन्दुबुधयोः एकेन उपकारधर्मेण सह सम्बन्धः। यथा अभिज्ञानशाकुन्तले कालिदासेन–

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य नः।
समुद्ररसना चोर्वी सखी च युवयोरियम्।।

अत्र पृथिवीशकुन्तलयोरेकधर्माभिसम्बन्धात् तुल्यप्रतिष्ठितत्वम्। अत्र च सखी (शकुन्तला) प्रकृता उर्वी चाप्रस्तुता, अतः दीपकालंकारः।

(ङ) रूपकालंकारः– काव्यप्रकाशे उक्तं हि–

तद्रूपकमभेदो य उपमानोपमेययोः।

अर्थात् यत्र उपमेयोपमानयोः अभेदबुद्धिर्जायते तत्र रूपकालंकारः भवति। साहित्यदर्पणेऽपि–

रूपकं रूपितारोपाद्विषये निरपह्नवे।

(च) दृष्टान्तः–यत्र उपमेयवाक्यं उपमानोपमेयसाधारणधर्माणां बिम्बप्रतिबिम्बभावेन स्थितिर्जायते तत्र दृष्टान्तालंकारः। अत एवोक्तं काव्यप्रकाशे–

दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम्।

साहित्यदर्पणेऽपि–दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्।

यथोदाहरणम् शाकुन्तले–

तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः।।

अत्र उपमेयगतदहनतपनसाधारणधर्मयोः उपमानगतग्लपनसाधारणधर्मेण सह प्रतिबिम्बभावः। तथैव उपमानोपमेययोरपि।

(छ) निदर्शना–काव्यप्रकाशे लक्षणं हि–'अभवन् वस्तुसम्बन्धः उपमापरिकल्पकः।' अर्थात् उपमां परिकल्प्य पदार्थेष्वनुपपद्यमानः सम्बन्धः परिकल्प्यते तत्र निदर्शनालंकारः। साहित्यदर्पणे हि–

सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित्।
यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना।।

यथोदाहरणं शाकुन्तले–

इदं किल व्याजमनोहरं वपुः
तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
समिल्लतां छेत्तुमृषिर्व्यवस्यति।।

अत्र शकुन्तलायाः कुमारवपुषा तपःक्षमसाधनावाञ्छा नीलोत्पलपत्रधारया शमीलताच्छेदनवाञ्छवदिति असम्भववस्तुसम्बन्धरूपो निदर्शनालंकारः।

(ज) विभावना–

क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना।

(का.प्र.)

अत्र क्रियाशब्दः कारकवाचकः। अतः यत्र कारकस्य प्रतिषेधेऽपि फलाभिव्यक्तिर्जायते तत्र विभावनालंकारः भवति। तद्यथोक्तं साहित्यदर्पणेऽपि–**"विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते।"** यथोदाहरणं शाकुन्तले–

यतो यतः षट्चरणोऽभिवर्तते
ततस्ततः प्रेरितवामलोचना।
विवर्तितं भूरियमद्य शिक्षते
भयादकामापि हि दृष्टिविभ्रमम्।।

सामान्यतः दृष्टिविभ्रमरूपं कार्यं प्रति सकामत्वस्य कारणत्वम्। अत्र तु दृष्टिविभ्रमस्य अकामेत्यादिना प्रतिषेधाद्-हेतुककार्योत्पत्त्या विभावनालंकारः परिलक्षितो भवति।

(झ) परिकरः–यत्र अभिप्रायमूलकैर्विशेषणैः काचिदुक्तिः पुष्टा भवति तत्र परिकरालंकारः। अत एवोक्तं काव्यप्रकाशे–

विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः।

यथोदाहरणे किरातार्जुनीये महाकाव्ये भारविना–

महौजसो मानधना धनार्जिता
धनुर्भृताः संयति लब्धकीर्तयः।
न संहतास्तस्य न भिन्नवृत्तयः
प्रियाणि वाञ्छन्त्यसुभिः समीहितुम्।।

अत्र दुर्योधनं प्रति महाबलाः योद्धारः पक्षपातित्वेन वर्तन्ते। तेषां पुष्ट्यर्थं "महौजसः" इति विशेषणं दत्तम्। अतः परिकरालंकारः परिलक्षितो भवति।

(ञ) व्यतिरेकः–साहित्यदर्पणे हि –

आधिक्यमुपमेयस्योपमानान्यूनताऽथवा।

अर्थात् यत्रोपमानादुपमेयस्याधिक्यं वर्ण्यते तत्र व्यतिरेकालंकारः। यथा–

क्षीणः क्षीणोऽपि शशी
भूयो भूयोऽभिवर्द्धते नूनम्।
विरम प्रसीद सुन्दरि, यौवन-
मनिवर्त्ति यातं तु।।

अत्रोपमानात् चन्द्रक्षयात् उपमेयभूतस्य यौवनक्षयस्य आधिक्यं भवति। यतः चन्द्रः क्षयतामुपगत्य पुनः वृद्धिं लभते परन्तु यौवनक्षयतां सत् गतं न पुनः आगच्छतीति, क्षयांशे उपमानादुपमेयस्याधिक्याद् व्यतिरेकालंकारः। व्यतिरेकस्य 24 चतुर्विंशति भेदाः भवन्ति।

(ट) अतिशयोक्तिः–अध्यवसायस्य सिद्धत्वे सति अतिशयोक्तिरलंकारो भवति। अतः साध्यवसाना लक्षणा अस्य बीजरूपा। अध्यवसानो नाम विषयस्य निगरणेन अर्थात् स्वस्वरूपगोपनेन उपमानस्य अभेदप्रतीतिः। तद्यथोक्तं साहित्यदर्पणे–

सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते।

यथा काव्यप्रकाशे–

अन्यत् सौकुमार्यमन्यदेव च कापि वर्तनच्छाया।
श्यामा सामान्यप्रजापतेः रेखैव च न भवति।।

(का.प्र.)

कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम्। सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम्, अतिशयोक्तिरलंकारः भेदेऽपि भेद–इत्यादिना पञ्चधा भवति।

(B) अपह्नुति–यत्रोपमेयमसत्यं कृत्वा उपमानस्य स्थापनं भवति, तत्रापह्नुत्यलंकारः भवति। उक्तञ्च काव्यप्रकाशे–

प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपह्नुतिः।

(का.प्र.)

प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः।

(सा०द०10/38)

गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन।
यदि श्लेषेण काक्वा वान्यथयेत्साऽप्यपह्नुतिः।

(सा०द०10/38)

यत्र प्रकृतं (उपमेयम्) प्रतिषिध्य तदुपरि उपमानस्य आरोपः क्रियते तत्र अपह्नुतिः। अस्याः लक्षणान्तरम्—यत्र किमपि गोपनीयं वस्तु कथमपि सूचयित्वा श्लेषेण अश्लेषेण वा गोपाय्यते तत्रापि अपह्नुतिः भवति। अपह्नुतिः द्विधा भवति। क्वचिदपह्नवपूर्वकमारोपः, क्वचिदारोपपूर्वकोऽपह्नव इति। प्रथमस्य अपह्नुत्यलङ्कारस्य उदाहरणं यथा–

नेदं नभोमण्डलमम्बुराशिः
नैताश्च ताराः नवफेनभङ्गाः।
नायं शशीकुण्डलितः फणीन्द्रो,
नासौ कलङ्कः शयितो मुरारिः।।

अत्र नभोमण्डल-तारा-शशि-कलङ्कानां प्रतिषेधात् परं तेषामुपरि अम्बुराशि-नवफेन-भङ्गफणीन्द्र-मुरारि-प्रभृतीनामुपमानानाम् आरोपात् अपह्नुतिः। काले वारिधाराणाम्-' इत्याद्युदाहरणं द्वितीयलक्षणस्य। चन्द्रालोके अपह्नुत्यलङ्कारस्य लक्षणम्-'अतथ्यमारोपयितुं तथ्यापास्तिरपह्नुतिः।' तः अपह्नुतिभेदानामपि लक्षणोदाहरणानि प्रदर्शितानि सन्ति। 'ना सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम्' इति।

(ड) सन्देहः–प्रकृते अर्थात् उपमेये यत्र प्रतिभयोत्थि संशयः तत्र सन्देहालंकारो भवति। अत एव विश्वनाथेन–

सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः।

अतः यत्रोपमानेन सहोपमेयस्य सादृश्ययोगात् सं जायते तत्र संदेहः। अत एव काव्यप्रकाशेऽपि–

ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः।

यथोदाहरणम्–

अयं मार्तण्डः किम्? स खलु तुरगैः सप्तिभिरिति,
कृशानुः किम्? सर्वाः प्रसरति दिशो नैष नियतम्।
कृतान्तः किम्? साक्षान्महिशवहिनोऽसाविति चिरम्,
समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः।।

अत्र अयं किमु मार्तण्डः वह्निः, यमः, राजा? अत्रोपमेयः मार्तण्डः वह्निः यमश्च उपमानानि। उभयोर्मध्ये सादृश्यात् सन्देहः जायते, अतः सन्देहालंकारः।

(ढ) प्रतिवस्तूपमा अलंकारः– यत्र एकस्य साधारणधर्मस्य उभयोः उपमानोपमेययोः वारद्वयं प्रयोगो भवति, तत्र प्रतिवस्तूपमालंकारः। अत एवोक्तं काव्यप्रकाशे–

"प्रतिवस्तूपमा तु सा ....।
सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः।"

यथोदाहरणे शाकुन्तले–

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।

अत्र उपमेया शकुन्तला, उपमानद्वयं जलनीली, मलिनहिमांशुश्च, अत्रोपमानोपमेयोरेकस्यापि सौन्दर्यरूप-समानधर्मस्य पृथङ्निर्देशात्प्रतिवस्तूपमालंकारः।

(ण) अप्रस्तुतप्रशंसालंकारः–यत्र अप्राक्साहित्यः वस्तुनः वर्णनं प्रकृतार्थमूलकं भवति तत्राप्रस्तुतप्रशंसा अलंकारः भवति। अतः अप्राकरणिकस्याभिधानेन प्राकरणि-कस्याक्षेपोऽप्रस्तुताश्रया। उक्तञ्च काव्यप्रकाशे–

अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया।

यथोदाहरणे शाकुन्तले–

गान्धर्वेण विवाहेन बह्व्योऽथ मुनिकन्यकाः।
श्रूयन्ते परिणीतास्ताः पितृभिश्चानुमोदिताः।।

अत्र राजा (दुष्यन्तः) शकुन्तलया सह गन्धर्वेण विवाहेच्छुकः, तत्समर्थनञ्च अप्रस्तुतप्रशंसया विदधत दोषरहितो प्रशस्तोऽयं विवाहः इति स्थापयति। अतः अप्रस्तुत-प्रशंसाऽलंकारश्च। अलंकारोऽयं पञ्चविधः।

कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति।
तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा।

(त) भ्रान्तिमान्–प्रकृतवस्तु दृष्ट्वा तत्तुल्यस्य अप्रकृतस्य ज्ञानं अर्थात् प्राकरणिके अप्राकरणिकस्य ज्ञानं यत्र भवति तत्र भ्रान्तिमान् अलंकारः। अत एवोक्तं काव्यप्रकाशे–

भ्रान्तिमान् अन्यसंवित्तुल्यदर्शने।

यथोदाहरणम् काव्यप्रकाशे–

कपाले मार्जारः पय इति करान् लेढि शशिन-
स्तरुच्छिद्रप्रोतान् विसमिति करी संकलयति।
रतान्ते तल्पस्थान् हरति वनिताप्यंशुकमिति
प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति।।

अत्र प्राकरणिकस्य चन्द्रकरस्य दर्शनेन तत्तुल्या-प्राकरणिकस्य मार्जारपक्षे क्षीरस्य करिपक्षे विसस्य, वनितापक्षे वस्त्रस्य भ्रान्तज्ञानयोगेन भ्रान्तिमानलंकारः।

(थ) अनन्वयालंकारः–न विद्यते अन्वयः उपमा-नान्तरेण यत्र स अनन्वयः। अतः यत्र एकस्मिन् वाक्ये उपमानमुपमेयत्वेन परिकल्प्यते तदा "अनन्वयालंकारः"। अत एव साहित्यदर्पणे–

उपमानोपमेयत्वमेकस्यैव त्वनन्वयः।

यथोदाहरणम्–

राजीवमिव राजीवं जलं जलमिवाजनि।
चन्द्रश्चन्द्र इवातन्द्रः शरत्समुदयोद्यमे।।

अत्र राजीवं राजीवमिव तथा च जलं जलमिव इति कथनात् राजीवपदं जलपदञ्च उपमानोपमेयत्वेन परिकल्पनात् अनन्वयालंकारः। तथैव–

रामरावणयोर्युद्धं रामरावणयोरिव।

अतः सादृश्यमूलकोऽयमलंकारः।

(द) उपमेयोपमालंकारः– यत्र वाक्यद्वये प्रागेव उपमानत्वेन परिगृहीतं पदं उपमानत्वेन परिवर्तते तत्रोपमेयोप-मालंकारः भवति। अत एवोक्तं काव्यप्रकाशे मम्मटेन–

विपर्यास उपमेयोपमा तयोः।

यथोदाहरणम्–

कमलेव मतिर्मतिरिव कमला,
तनुरिव विभा विभेव तनुः।
धरणीव धृतिर्धृतिरिव धरणी,
सततं बिभाति बत यस्य।।

अत्र कमलेव मतिरित्यत्र कमला उपमानम्, मतिश्चोपमेया पुनः मतिरिव कमला इति कथनेन मतिः उपमानत्वेन कमला

च उपमेयत्वेन प्रतीयते। अतोऽत्र उपमेयोपमालंकारः। सादृश्यमूलकोऽयमलंकारः।

(ध) स्वभावोक्तिः–काव्यप्रकाशे हि **स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्** अर्थाद्यत्र शिशुपशुपक्षीत्यादीनां स्वभाववर्णनं क्रियते तत्र स्वभावोक्तिरलंकारः। तद्यथोदाहरणं शाकुन्तले–

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमूर्व्यां प्रयाति।।

अत्र मृगाणां स्वभाववर्णनात् स्वभावोक्त्यलंकारः वर्तते।

(न) समासोक्तिः–यत्र श्लिष्टैर्विशेषणैः अप्रकृतार्थस्य बोधनं प्रकृतमर्थमवलम्ब्य व्यञ्जनया भवति तत्र समासोक्त्य-लंकारः। यथोक्तं काव्यप्रकाशे–"परोक्तिभेदकैः श्लिष्टैः समासोक्तिः।" अतोऽत्र कार्यलिङ्गविशेषणैः प्रस्तुतेऽर्थेऽ-प्रस्तुतार्थस्य समारोपः समासोक्तिरलंकारो भवति। अत एव विश्वनाथोऽपि–

समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः।
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः।।

यथा शाकुन्तले–

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदुकर्णान्तिकचरः।
करं व्याधुन्वत्या पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती।।

अत्र दृष्टिस्पर्शनमृदुकथनाधरपानरूपतथाभूतकार्येण मधुकरे प्रच्छन्नशृङ्गारिनायकसमारोपात् समासोक्त्यलंकारः।

(प) विशेषोक्तिः–काव्यप्रकाशे हि "विशेषोक्तिर-खण्डेषु कारणेषु फलावचः" अर्थाद्यत्र कारणस्य विद्यमानत्वेऽपि कार्योत्पत्तिर्नैव भवति तत्र विशेषोक्त्यलंकारः। अतः मिलितेष्वपि कारणेषु कार्यस्य अकथनं विशेषोक्तिः। विश्वनाथोऽपि–

सति हेतौ फलाभावे विशेषोक्तिस्तथा द्विधा।

निमित्तस्य उक्तत्वादनुक्तत्वाच्च विशेषोक्तिः द्विधा, काव्यप्रकाशे अचिन्त्यनिमित्ता चेति त्रिविधोऽयमलंकारेति प्रोक्तम्। यथोदाहरणे–

धनिनोऽपि निरुन्मादाः युवानोऽपि न चञ्चलाः।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः।।

उन्मादं चाञ्चल्यं प्रमादञ्च प्रतिक्रमतो धनं यौवनं प्रभुत्वञ्च कारणम्। अथ उदाहरणेऽस्मिन् हेतुसत्स्वपि उन्मादादीनां कार्याणामनुत्पत्तेर्विशेषोक्तिः। उक्तनिमित्तता अत्र।

(फ) काव्यलिङ्गम्– काव्यप्रकाशे हि "काव्यलिङ्गं हेतोर्वाक्यपदार्थता" यत्र वाक्यार्थः पदार्थो वा हेतुर्भवति तत् काव्यलिङ्गमलंकारः। अत एवोक्तं विश्वनाथेनापि– "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गम् निगद्यते" हेतोः वाक्यार्थत्वेन अनेकपदार्थत्वे एकपदार्थत्वेन च अस्य त्रैविध्यम्। यथा किरातार्जुनीये–

विशङ्कमानो भवतः पराभवं
नृपाऽसनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः।।

अत्र दुरोदरच्छद्मजितामिति विशेषणद्वारेण पदार्थस्य चतुर्थपादार्थं प्रति हेतुत्वेनोपन्यासात् काव्यलिङ्गालंकारः।

(ब) संसृष्टिः–"सेष्टा संसृष्टिरेतासां भेदेन यदिह स्थितिः" इति मम्मटवचनात् यत्र सर्वेषां शब्दार्थालंकाराणां भेदेन अर्थात् परस्परनिरपेक्षतया स्थितिः वाक्ये भवति तत्र संसृष्टिरलंकारः। अत एवोक्तं विश्वनाथेन–

मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते।

अतः संसृष्टिः त्रिविधा–1. शब्दालंकाराणाम्, 2. अर्थालंकाराणाम्, 3. शब्दार्थालंकाराणाञ्च। यथोदाहरणं शाकुन्तले–

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदुकर्णान्तिकचरः।
करं व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती।।

अत्र मधुकरे प्रच्छन्ननायकव्यवहारसमारोपात् समासोक्तिः। "वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती" इत्युपामानाधिक्याद् व्यतिरेकः। मधुरकृतित्वे प्रथमत्रिचरण-गतवाक्यार्थानां हेतुत्वेनोपन्यासाद् वाक्यार्थहेतुककाव्य-लिङ्गालङ्कारः। रहस्याख्यायीवेति क्रियोत्प्रेक्षा। इत्येषाम-लंकाराणां परस्परनैरपेक्ष्येण संसृष्टिः।

(भ) सङ्करः–"अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु

संकर:" यत्र शब्दार्थालंकाराणां परस्परं विमिश्रिते सति सापेक्षस्थितिर्भवति तत्र संकर:। विश्वनाथोऽपि अलंकाराणां गुणप्रधानभावे अङ्गाङ्गित्वेन एकस्मिन् आश्रये स्थिति: सन्दिग्धत्वे च सङ्कर: त्रिविध:। यथोक्तं विश्वनाथेन–

अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ।
सन्दिग्धत्वे च भवति सङ्करस्त्रिविध: पुन:।।
व्रजन्ति ते मूढधियं-------------

(म) शब्दार्थोभयाऽलङ्कार:– एक: पुनरुक्तवदाभास:, शब्दस्य परिवर्तनसहत्वे असहत्वे च शब्दार्थोभयालङ्कार:।

(क) रीति:- (वामनाचार्य:) रीतिरात्मा काव्यस्य। पदसंघटना रीति:।

षड् रीतय:-1. वैदर्भी, 2. गौडी, 3. पाञ्चाली, 4. लाटी, 5. मागधी, 6. आवन्ती।

(ख) वक्रोक्ति: (सम्प्रदाय:) -आचार्यकुन्तक:- **वक्रोक्ति: काव्यजीवितम्**–

वक्रोक्ति: पञ्चधा-1. वर्णवक्रता, 2. पदवक्रता, 3. वाक्यवक्रता, 4. अर्थवक्रता, 5. उक्तिवक्रता।

(ग) ध्वनिसम्प्रदाय:-आनन्दवर्धन:-**काव्यस्यात्मा ध्वनि:।**

ध्वने: त्रय: भेदा: सन्ति–1. रसध्वनि:, 2. अलङ्कारध्वनि:, 3. वस्तुध्वनि:।

(T) (ड) अलङ्कारस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्न:**—अलंकार इत्यस्य का व्युत्पत्ति:?
उत्तरम्—'अलं करोतीति अलङ्कार:" आभूषितं करोतीति अलंकार:' अलं + कृ धातो: घञ: योगेन अलंकार-शब्द: सिद्ध्यति।

2. **प्रश्न:**—कविराजविश्वनाथेन अलङ्कारस्य किं लक्षणं कृतम्?
उत्तरम्—'शब्दार्थयोरस्थिरा ये धर्मा: शोभातिशायिन:। रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्।।

3. **प्रश्न:**—अलंकारस्य कौ द्वौ भेदौ स्त:?
उत्तरम्—'1. शब्दालंकार:, 2. अर्थालंकार:।

4. **प्रश्न:**— मम्मट: शब्दालंकारा: कति स्वीकरोति?
उत्तरम्—5 पञ्च अलंकारा:, 1. अनुप्रास:, 2. यमक:, 3. वक्रोक्ति:, 4. श्लेष:, 5. चित्रम्, 6. पुनरुक्तवदाभास:।

5. **प्रश्न:**— मम्मट: उभयालंकारा: कति स्वीकरोति?
उत्तरम्— 1 एकम्।

6. **प्रश्न:**— मम्मट: अर्थालंकारा: कति स्वीकरोति?
उत्तरम्— (67) सप्तषष्टि:।

7. **प्रश्न:**— अनुप्रास-यमक-श्लेषादय: कस्य अलंकारस्य अन्तर्गता वर्तन्ते?
उत्तरम्— शब्दालंकारस्य।

8. **प्रश्न:**—स्वभावोक्ति-उपमा-रूपकादय: कस्य अलंकारस्य अन्तर्गता वर्तन्ते?
उत्तरम्— अर्थालंकारस्य।

9. **प्रश्न:**—यत्र एक-पदे एकाधिकार्थ: बोधयति स: क: अलंकार:?
उत्तरम्— श्लेषालंकार:।

10. **प्रश्न:**—यदा हेतु भविते सति फलाभाव-अभिलक्षित:, तत्र को अलंकार:?
उत्तरम्—विशेषोक्ति:।

11. **प्रश्न:**— 'तद्रूपकमभेदो य उपमानोपमेययो:' कस्य अलंकारस्य लक्षणम्?
उत्तरम्— रूपकस्य।

12. **प्रश्न:**— उपमा-अलंकारस्य किं लक्षणम्?
उत्तरम्— साधर्म्यमुपमा भेदे; यत्र उपमेयोपमानयो: भेदे विद्यमानत्वेऽपि समानधर्म: वर्ण्यते तदोपमालंकार:।

13. **प्रश्न:**— 'प्रस्फुटं सुन्दरं साम्यमुपमेत्यभिधीयते' इति कस्य अलंकारस्य लक्षणम्?
उत्तरम्— उपमा-अलंकारस्य।

14. **प्रश्न:**—उपमाया: के चत्वार: पदार्था: भवन्ति?
उत्तरम्— 1. साधारणधर्म:, 2. इव, 3. उपमान, 4. उपमेय।

15. **प्रश्न:**—वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये। जगत: पितरौ वन्दे पार्वतीपरमेश्वरौ। इति कस्य अलंकारस्य उदाहरणम्?
उत्तरम्— उपमा-अलंकारस्य।

16. **प्रश्न:**— 'सन्देह: प्रकृतेऽन्यस्य संशय: प्रतिभोत्थित:' कस्य अलंकारस्य लक्षणमिदम्?
उत्तरम्— सन्देहस्य।

17. **प्रश्न:**—"वर्णसाम्यम्" इति क:?
उत्तरम्— अनुप्रास:।

18. **प्रश्न:**— "निर्वास्यत: प्रदीपस्य शिखेव जरतो मति:" अत्र क: अलंकार:?
उत्तरम्— उपमालंकार:।

19. **प्रश्न:**—काव्यप्रकाशस्य नवमोल्लासस्य किं नाम?
उत्तरम्—शब्दालङ्कारनिर्णयात्मक:।

20. **प्रश्न:**—"सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते।" इति कस्य अलंकारस्य लक्षणम्?
उत्तरम्—अतिशयोक्ति-अलंकारस्य।

21. **प्रश्न:**—"लिम्पतीव तमोऽङ्गानि, वर्षतीवाञ्जनं नभ:। असत्पुरुषसेवेव, दृष्टिर्विफलतां गता।।"अस्मिन् श्लोके क: अलंकार:?
उत्तरम्— उत्प्रेक्षा-अलंकार:।

22. **प्रश्न:**—"प्रतिकूलतामुपगते हि विधौ, विफलत्वमेति बहुसाधनता" अस्मिन् वाक्ये क: अलंकार:?
उत्तरम्— श्लेषालंकार:।

23. **प्रश्न:**—'क्व सूर्यप्रभवो वंश: क्व चाल्पविषया मति:' इदं उदाहरणं कस्य अलंकारस्य विद्यते?
उत्तरम्— निदर्शना-अलंकारस्य।

24. **प्रश्न:**— "सुरभिं सुरभिं सुमनोहरै:" अत्र क: अलंकार:?
उत्तरम्— 'यमक' अलंकार:।

25. **प्रश्न:**—"अर्थे सत्यर्थभिन्नानां वर्णानां सा पुन: श्रुति:" इति क:?
उत्तरम्— यमक:।

26. **प्रश्न:**—"उपमानोपमेययो: अभेदो——इति किम्?
उत्तरम्—रूपकम्।

27. **प्रश्न:**—"लिम्पतीव तमोऽङ्गानि वर्षतीवांजनं नभ:।।' अत्र कोऽलंकार:?
उत्तरम्—उत्प्रेक्षा।

28. **प्रश्न:**—य: उपमा दातुं योग्यं स्यात्, स: क: भवति?
उत्तरम्— उपमेय:।

29. **प्रश्न:**— "अभवन् वस्तुसम्बन्ध: उपमापरिकल्पक:" इति का?
उत्तरम्— निदर्शना।

30. **प्रश्न:**—"सामान्यं वा विशेषो वा तदन्येन समर्थ्यते, साधर्म्येण परेण वा—।" इति क:?
उत्तरम्—अर्थान्तरन्यास:।

31. **प्रश्न:**— "क्रियाया: प्रतिषेधेऽपि फलव्यक्ति:—।।" इति का?
उत्तरम्— विभावना।

32. **प्रश्न:**—"अखण्डेषु कारणेषु फलावच:" किं नाम अलंकार:?
उत्तरम्— विशेषोक्ति:।

33. **प्रश्न:**— " प्रकृतं यन्निषिध्यान्यत् साध्यते सा का?
उत्तरम्—अपह्नुति:।

34. **प्रश्न:**—"स्वभावोक्तिस्तु डिम्भादे: स्वक्रियारूपवर्णनम्" इति कस्य अलंकारस्य लक्षणम्?
उत्तरम्—स्वभावोक्ते:।

35. **प्रश्न:**—'ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टि:' इति कस्य अलंकारस्य उदाहरणम्?
उत्तरम्— स्वभावोक्ते:।

36. **प्रश्न:**—'त्वन्मुखश्रीकृते नूनं परैवैरायते शशी' अत्रालङ्कार: क:?
उत्तरम्— उत्प्रेक्षा।

37. **प्रश्न:**—यत्र कारणं विना कार्योत्पत्तिर्भवति तत्र कोऽलङ्कार:?
उत्तरम्— विभावना।

38. **प्रश्न:**— "उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्..।" इति के?
उत्तरम्— अलंकारा:।

39. **प्रश्न:**—"पृथुकार्तस्वरपात्रं भूषितनि:शेषपरिजनं दे... विलसत्करेणुगहनं सम्प्रति सममावयो: सदनम्।।" इ... कोऽलंकार:?
उत्तरम्— श्लेष:।

40. **प्रश्न:**—शब्दपरिवृत्ति असहिष्णुत्वं कुत्र प्राप्तो भव...
उत्तरम्— शब्दालंकारे।

41. **प्रश्न:**—'नायं सुधांशु: किं तर्हि? व्योम... सरोरुहम्'-अत्र कोऽलङ्कार:?
उत्तरम्— अपह्नुति:।

42. **प्रश्नः**— उपमानाद्यन्यस्य व्यतिरेकः स एव सः। इति कस्य अलंकारस्य लक्षणम्?
उत्तरम्— व्यतिरेकस्य।

43. **प्रश्नः**—"समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः।।" इति कस्य अलंकारस्य लक्षणम्?
उत्तरम्—समासोक्ति-अलंकारस्य।

44. **प्रश्नः**—प्रकृतं (उपमेयम्) प्रतिषिध्य तदुपरि उपमानस्य आरोपः क्रियते तत्र किं भवति?
उत्तरम्—अपह्नुतिरलङ्कारः।

45. **प्रश्नः**—"उपमानोपमेयत्वमेकस्यैव त्वनन्वयः।" इति कस्य अलंकारस्य लक्षणम्?
उत्तरम्—अनवयालंकारस्य।

46. **प्रश्नः**—अर्थान्तरन्यास-अलंकारस्य किं लक्षणम्?
उत्तरम्—यत्र सामान्यं विशेषेण विशेषः सामान्येन वा समर्थ्यते तत्रार्थान्तरन्यासालंकारः।

47. **प्रश्नः**—अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते। इति कस्य अलंकारस्य लक्षणम्?
उत्तरम्—दीपक-अलंकारस्य।

48. **प्रश्नः**—एकेन, अन्यतात्पर्येण उक्तं यद् वाक्यम् श्रोत्रा यदि श्लेषेण काक्वा वा अन्यतात्पर्यार्थकत्वेन कल्पितं तदा किं भवति?
उत्तरम्— वक्रोक्तिलंकारः।

49. **प्रश्नः**— 'काव्यालंकारसूत्रम्' कस्य कृतिरस्ति?
उत्तरम्— आचार्यवामनस्य।

50. **प्रश्नः**— काव्यालंकारसूत्रवृत्तिकारः कः?
उत्तरम्— वामनः।

51. **प्रश्नः**— 'अलंकारसर्वस्वम्' कस्य कृतिरस्ति?
उत्तरम्— रुय्यकस्य।

52. **प्रश्नः**— 'काव्यालंकारः' कस्य कृतिरस्ति?
उत्तरम्— रुद्रटस्य।

53. **प्रश्नः**— 'वाग्भयलंकारः' कस्य कृतिरस्ति?
उत्तरम्— वाग्भटस्य।

54. **प्रश्नः**— ध्वन्यालोकः किमस्ति?
उत्तरम्— अलंकारशास्त्रम्।

55. **प्रश्नः**— 'उपमा-उत्प्रेक्षा'-अनयोः समानता का?
उत्तरम्— द्वावपि सादृश्यमूलकौ अलङ्कारौ।

56. **प्रश्नः**— कस्मिन्नलङ्कारे 'मिथ्याज्ञानं' भवति?
उत्तरम्— भ्रान्तिमान्।

57. **प्रश्नः**— 'चक्रवालकम्'- इत्यस्य कोऽभिप्रायः?
उत्तरम्— क्षुद्रप्रबन्ध इति।

58. **प्रश्नः**—'पङ्कजं पश्यतस्तस्य मुखं मे गाहते मनः' इति कस्यालङ्कारस्योदाहरणमिदम्?
उत्तरम्— स्मृतिमतः।

59. **प्रश्नः**— अलंकारसम्प्रदायस्य प्रवर्तकः आचार्यः कः?
उत्तरम्— भामहः।

60. **प्रश्नः**— भामहस्य काव्यशास्त्रीयग्रन्थविशेषः कः?
उत्तरम्— काव्यालंकारः।

61. **प्रश्नः**— आचार्य-भामहस्य निवासस्थानं कुत्रास्ति?
उत्तरम्— कश्मीरः।

62. **प्रश्नः**— काव्यालंकारसूत्रे आचार्यभामहेन वर्णिताः अलंकाराः कति सन्ति?
उत्तरम्— (23) त्रयोविंशतिः।

63. **प्रश्नः**— 'भावप्रकाशनम्' किम्?
उत्तरम्— अलङ्कारग्रन्थः।

64. **प्रश्नः**— काव्यादर्शे कति अलंकाराः विवेचिताः सन्ति?
उत्तरम्— (35) पञ्चत्रिंशत्।

65. **प्रश्नः**— अलङ्कारशास्त्रस्य समस्तसिद्धान्तानां सूत्रात्मकः ग्रन्थोऽस्ति?
उत्तरम्— काव्यालङ्कारसूत्रम्।

66. **प्रश्नः**— 'काव्यं ग्राह्यमलंकारात्' कस्येदं वचनम्?
उत्तरम्— आचार्यवामनस्य।

67. **प्रश्नः**— वामनस्य दृष्ट्या अलंकारः कः?
उत्तरम्— सौन्दर्यमलङ्कारः।

68. **प्रश्नः**— भोजराजः स्वं सरस्वतीकण्ठाभरण 'ग्रन्थे कति अलंकाराः वर्णितास्ति?
उत्तरम्— (72) द्विसप्तति अलंकाराः।

69. **प्रश्नः**— मम्मटेन केषां चित्रालंकाराणां वर्णनं क्रियते?
उत्तरम्— (4 चत्वारः) 1. खड्गबन्धः, 2. मुरजबन्धः, 3. पद्मबन्धः, 4. सर्वतोभद्रः।

70. **प्रश्नः**— काव्यालंकारसंग्रह इत्यस्य लेखकः कः?
उत्तरम्— उद्भटः।

71. **प्रश्नः**— आचार्यराधावल्लभत्रिपाठीमहोदयेन काव्यात्मा कां मन्यते?
उत्तरम्— अलंकारम्।

72. **प्रश्नः**— आचार्यराधावल्लभत्रिपाठीमहोदयेन कस्मिन् रूपे अलंकारं मन्यते?
उत्तरम्— 'अलं भूषणवारणपर्याप्तिषु'।

73. **प्रश्नः**— भूषणरूपे अलंकारं केन लोकेन सह सम्बद्धः?
उत्तरम्— आधिभौतिकजगता।

73. **प्रश्नः**— 'सिद्धान्तलेशसंग्रहः' इति वेदान्तग्रन्थं कः आलङ्कारिकः रचितवान्?
उत्तरम्— अप्पयदीक्षितः।

74. **प्रश्नः**— वारणरूपे अलंकारं केन लोकेन सह सम्बद्धः?
उत्तरम्— आधिदैविकलोकेन।

75. **प्रश्नः**— जातकालंकारस्य लेखकः कः?
उत्तरम्— गणेशः।

76. **प्रश्नः**— श्लेषस्य कति भेदाः भवन्ति?
उत्तरम्— (2) द्वौ।

77. **प्रश्नः**— विश्वनाथः वक्रोक्तिं कस्मिन् रूपे मन्यते?
उत्तरम्— अलंकाररूपे।

78. **प्रश्नः**— आचार्य उद्भटद्वारा विवेचितानां अलंकाराणां का संख्या?
उत्तरम्— (41) एकचत्वारिंशत्।

79. **प्रश्नः**— 'अलंकार-सम्प्रदायस्य प्रवर्तकः कः?
उत्तरम्— अग्निपुराणकारः।

80. **प्रश्नः**— कति सूत्राणि सन्ति 'काव्यालंकारसूत्रम्' नामकग्रन्थे?
उत्तरम्— 319 सूत्राणि।

89. **प्रश्नः**— सभंगश्लेषस्य कति भेदाः भवन्ति?
उत्तरम्— 08 अष्ट।

(U) (Code-25) (ढ) रघुवंशम् (1 एवं 4 सर्ग) विवेचनमेवं वस्तुनिष्ठप्रश्नोत्तराणि

(ढ) रघुवंशम्– (Raghuvansham) महाकवेः कालिदासस्य रघुवंशम् 19 एकोनविंशति-सर्गात्मकम् एकं लालित्यपूर्णं महाकाव्यम् अस्ति। अत्र रघोः वंशस्य कथा निबद्धा अस्ति। रघुवंशे येषां राज्ञां वर्णनानि सन्ति, तेषां रामायणवर्णितनृपैः सह भेदः आपतति, परन्तु वायुपुराण-वर्णितरामवंशावल्या सह रामवंशवर्णित-रामवंशावली भूयसा सामञ्जस्यं धारयति। अस्मिन् ग्रन्थे श्लोकसंख्या-1569 अस्ति। रघुवंशस्य कथानकः वाल्मीकि-रामायणात् गृहीतः। सूर्यवंशी राजा दिलीपः स्वपत्न्या सह नन्दिनीं सेवित्वा सन्तानं प्राप्नोति। ग्रन्थेऽस्मिन्–

1. प्रमुखरसाः– शृंगार-वीर-करुण-शान्तरसाः। येषु शृंगारः प्रमुखो रसः।

2. प्रमुखा अलङ्काराः–उपमा, रूपकम्, उत्प्रेक्षा, श्लेषः, अर्थान्तरन्यासः, विरोधाभासः।

3. प्रमुखानि छन्दांसि–उपजाति, अनुष्टुप्, रथोद्धता, वैतालीय, वंशस्थम्, द्रुतविलम्बितम्, वसन्ततिलका, मालिनी।

4. वृत्तिः–वैदर्भी रीतिः। 5. गुणः–माधुर्य-गुणः। 6. कालिदासस्योपाधिः–रघुकारः, दीपशिखा कालिदासः।

7. एकोनविंशतिसर्गेषु वर्णिता रघुवंशीयराज्ञां नामावलिः यथाक्रमम् अत्र उल्लिखिता वर्तते। यथा–

1. दिलीपः, 2. रघुः, 3. अजः, 4. दशरथः, 5. रामः, 6. कुशः, 7. अतिथिः, 8. निषधः, 9. नलः, 10. नभः, 11. पुण्डरीकः, 12. क्षेमधन्वा, 13. देवानीकः, 14. अहीनगुः, 15. पारियात्रः, 16. शिलः, 17. उन्नाभः, 18. वज्रनाभः, 19. शंखणः, 20. व्युषिताश्वः, 21. विश्वसहः, 22. हिरण्यनाभः, कौशल्यः, 24. ब्रह्मिष्ठः, 25. पुत्रः, 26. पुष्यः, 27. ध्रुवसन्धिः, 28. सुदर्शनः, 29. अग्निवर्णः।

8. प्रमुखपात्राणि–दिलीपः, सुदक्षिणा, कुलगुरुवशिष्ठः, नन्दिनी (धेनुः), रघुः, कौत्सः, कुबेरः, अजः, इन्दुमती, दशरथः, नारदः, श्रवणः, रावणः, राम, सीता, वनरक्षकः, विश्वामित्रः, भरतः, लक्ष्मणः, शत्रुघ्नः, लवणासुरः, लव-कुशयोः, वाल्मीकिः, अग्निवर्णः इत्यादयः।

9. (क) प्रथमसर्गः— रघुवंशमहाकाव्यस्य प्रथमसर्गात् उद्धृतं "**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।** इति पद्यं मङ्गलात्मकं वर्तते। शब्दार्थयोः सम्यक् ज्ञानार्थं शब्दार्थौ इव नित्यसम्मिलितौ लोकस्य पितरौ पार्वतीशङ्करौ वन्दे। पद्येऽस्मिन् अलंकारः– पार्वतीपरमेश्वरयोः शब्दार्थाभ्यां समता प्रदर्शितत्वात् उपमालङ्कारः "साधर्म्यमुपमाभेदे" इति लक्षणात्। अत्र समासः–वागर्थाविव वागर्थौ इव (केवलसमासः)। पितरौ– माता च पिता च (एकशेषद्वन्द्वः)। पार्वतीपरमेश्वरौ–पार्वती च परमेश्वरश्च (इतरेतरद्वन्द्वः)। प्रसादगुणयुक्तः, अनुष्टुप् छन्दः।

कालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य प्रथमसर्गे 95 पञ्चनवतिश्लोकाः सन्ति। अस्मिन् सर्गे महाकविः वाल्मीक्यादिपूर्वकविकृतरचना-सामर्थ्येन स्वलेखनयोग्यतां प्रदर्शयति। एवं च रघुवंशीयराज्ञां माहात्म्यवर्णनम्, जीवनवृत्तप्रतिपादनम्, राज्ञो दिलीपस्य जन्मवर्णनम्, महाराज-दिलीपस्य सुशासनवर्णनम्, दिलीपस्य ज्ञानादिगुण-प्रकारवर्णनम्, दिलीपस्य शास्त्रोक्तकर्त्तव्यम्, राज्ञः दिलीपस्य इन्द्रेण सह सख्यभाववर्णनम्, दिलीपस्य सम्मतत्वं त्यागभावं च वर्णनम्, सुदक्षिणाया उपमावर्णनम्, पुत्रप्राप्तिकामनया कुलगुरोः वशिष्ठस्य आश्रमगमनम्, महाकविरत्र सन्तानाभावात् राज्ञः दिलीपस्य कष्टं एवं पिण्डविच्छेददर्शिनां स्वपितृणां स्वधासंग्रहवृत्तिं प्रतिपादनम्, कामधेनोः अनादरमेव राज्ञः दिलीपस्य सन्तानोत्पत्तौ प्रतिबन्धकमिति विषयं प्रतिपादयति महाकविः।'यतः त्वं मां तिरस्कृत्य गतः' अतः यावत् त्वं मे कन्यायाः शुश्रूषां न करिष्यसि तावत् ते पुत्रो न भविष्यति– इति शशाप। गुरुणा वशिष्ठेन राज्ञे दिलीपाय उपदिष्टं गोसेवाशिक्षाप्रकारं सोपमं वर्णयति। यथा–

प्रस्थितायां प्रतिष्ठेयाः स्थितायां स्थितमाचरेः।
निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः।।

(1/89)

हे राजन्! यदा इयं नन्दिनी गच्छेत्, तदा त्वमपि एनाम् अनुगच्छेः। यदा इयं तिष्ठेत्, तदा जिगमिषुरपि त्वम् अनुतिष्ठ। यदा च इयम् उपविशेत्, तदा त्वमपि उपविश। यावत् इयं जलं न पिवेत् तावत् त्वं पिपासुरपि जलं मा पिव। इति प्रथमसर्गस्य भावः।

(ख) चतुर्थसर्गे–रघुं राज्यं दत्वा पत्नीसहितदिलीपस्य वनगमनम्, तत्पश्चात् राजारघोः दिग्विजयस्य वृत्तान्तं महाकवेः कालिदासविरचितमस्ति।

रघुवंशस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—कालिदासविरचिताः कृतयः कति सन्ति?
उत्तरम्— (7) सप्त।
2. **प्रश्नः**—रघुवंशग्रन्थस्य रचयिता कः?
उत्तरम्— कालिदासः।
3. **प्रश्नः**—रघुवंशे कति सर्गाः सन्ति?
उत्तरम्— (19) एकोनविंशतिः।
4. **प्रश्नः**— रघुवंशस्य प्रथमे सर्गे कति श्लोकाः सन्ति?
उत्तरम्— 95 पञ्चनवतिः।
5. **प्रश्नः**—राज्ञो दिलीपस्य जन्मवर्णनं कस्मिन् सर्गे वर्तते?
उत्तरम्— प्रथमसर्गे।
6. **प्रश्नः**—महाराजदिलीपस्य सुशासनवर्णनं कस्मिन् सर्गे वर्तते?
उत्तरम्— प्रथमसर्गे।
7. **प्रश्नः**—दिलीपस्य ज्ञानादिगुणप्रकारवर्णनं कस्मिन् सर्गे वर्तते?
उत्तरम्— प्रथमसर्गे।
8. **प्रश्नः**—दिलीपस्य शास्त्रोक्तकर्त्तव्यं कस्मिन् सर्गे वर्तते?
उत्तरम्— प्रथमसर्गे।
9. **प्रश्नः**—राज्ञः दिलीपस्य इन्द्रेण सह सख्यभाववर्णनं कस्मिन् सर्गे वर्तते?
उत्तरम्— प्रथमसर्गे।
10. **प्रश्नः**—रघुं राज्यं दत्वा पत्नीसहितदिलीपस्य वनगमनं कस्मिन् सर्गे विद्यते?
उत्तरम्— चतुर्थसर्गे।
11. **प्रश्नः**— राजारघोः दिग्विजयस्य वृत्तान्तं कस्मिन् सर्गे विद्यते?
उत्तरम्— चतुर्थसर्गे।
12. **प्रश्नः**— इन्दुमतीस्वयंवरवर्णनं कुत्रास्ति?
उत्तरम्— रघुवंशे।
13. **प्रश्नः**— 'रघुवंशे' कति सूर्यवंशिनृपाणां वर्णनमस्ति?
उत्तरम्— (29) एकोनत्रिंशतिः।

14. **प्रश्नः**— रघुवंशमहाकाव्ये कस्य वंशस्य राज्ञां वर्णनं अस्ति?
उत्तरम्— इक्ष्वाकुवंशप्रभवराज्ञाम्।
15. **प्रश्नः**— 'दिलीपस्य गोसेवा' रघुवंशस्य कस्मिन् सर्गे वर्णिताऽस्ति?
उत्तरम्— द्वितीयसर्गे।
16. **प्रश्नः**—रघुवंशस्य त्रयोदशे सर्गे का कथा वर्णिता अस्ति?
उत्तरम्— रामस्य अयोध्यां प्रत्यागमनम्।
17. **प्रश्नः**— रघुवंशमहाकाव्यस्य उपजीव्यग्रन्थः कः?
उत्तरम्— वाल्मीकिरामायणम्।
18. **प्रश्नः**—रघुवंशस्य मंगलाचरणे कस्य वन्दना समुपलभ्यते?
उत्तरम्— शिवस्य।
19. **प्रश्नः**— कामधेनुशापितः राजा कः अस्ति?
उत्तरम्— दिलीपः।
20. **प्रश्नः**— 'नन्दिनी' कस्याः पुत्री अस्ति?
उत्तरम्— कामधेनोः।
21. **प्रश्नः**— "संचारिणी दीपशिखेव रात्रौ, यं यं व्यतीयाय पतिंवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे, प्रलीनभावं स स भूमिपालः।।
अनेन श्लोकेन सम्बद्धः कविविशेषः कः?
उत्तरम्— कालिदासः।
22. **प्रश्नः**— 'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये' कस्य ग्रन्थस्य इयमुक्तिः?
उत्तरम्— रघुवंशस्य।
23. **प्रश्नः**— 'सञ्चारिणी दीपशिखेव रात्रौ' इति रघुवंश-महाकाव्ये कस्मिन्संदर्भे वर्णितं भवति?
उत्तरम्— इन्दुमतीस्वयंवरे।
24. **प्रश्नः**— दिलीपस्य भार्यायाः किं नाम?
उत्तरम्— सुदक्षिणा।
25. **प्रश्नः**— दिलीपस्य कुलगुरु कः आसीत्?
उत्तरम्— वशिष्ठः।
26. **प्रश्नः**— 'रघुवंशम्' अस्य ग्रन्थस्य समाप्तिः कस्य राज्ञो वर्णनेन भवति?
उत्तरम्— अग्निवर्णस्य।
27. **प्रश्नः**— रघुवंशे समुपवर्णितः प्रथमः राजा कः?
उत्तरम्— दिलीपः।
28. **प्रश्नः**— रघुवंशस्य नायिका का?
उत्तरम्— सीता।
29. **प्रश्नः**— रघुवंशस्य नायकः कः?
उत्तरम्— रामः।
30. **प्रश्नः**— दीपशिखा' कस्योपाधिः?
उत्तरम्— कालिदासस्य।
31. **प्रश्नः**— कनिष्ठकाधिपतिः कः?
उत्तरम्— कालिदासः।
32. **प्रश्नः**—कालिदासस्य जन्मकालः वर्तते?
उत्तरम्— ई.पू.प्रथमशताब्दी।
33. **प्रश्नः**— कालिदासविषये प्रसिद्धोक्तिः का?
उत्तरम्— उपमा कालिदासस्य।
34. **प्रश्नः**—प्रामुख्येन रघुवंश-महाकाव्ये कयोः उदात्त-चरित्राणां वर्णनं प्राप्यते?
उत्तरम्— रघु-रामयोः।
35. **प्रश्नः**— रघुवंशमहाकाव्यस्य मल्लिनाथेन रचिता व्याख्या का?
उत्तरम्— सञ्जीवनी।
36. **प्रश्नः**— लघुत्रय्यां किं नाम कालिदासकाव्यं परिगण्यते?
उत्तरम्— रघुवंशम्।
37. **प्रश्नः**— 'अजविलापः' रघुवंशस्य कस्मिन् सर्गे समुपलभ्यते?
उत्तरम्— अष्टमे सर्गे।
38. **प्रश्नः**— 'शैशवेऽभ्यस्तविद्यानाम्' इदं वाक्यं कस्य ग्रन्थस्य वर्तते?
उत्तरम्— रघुवंशमहाकाव्यस्य।
39. **प्रश्नः**— कालिदासस्य रीतिः/शैली का आसीत्?
उत्तरम्— वैदर्भी।
40. **प्रश्नः**— रघुवंशम् कस्मिन् काव्यविधौ अस्ति?
उत्तरम्—महाकाव्ये।
41. **प्रश्नः**— रघुवंशस्य मुख्य-रसः कः?
उत्तरम्— शृंगार-रसः।

42. **प्रश्नः—** रघुवंशम् इत्यस्य आधार-ग्रन्थः कः?
उत्तरम्— रामायणम्।

43. **प्रश्नः—** रघुवंशम् अस्मिन् ग्रन्थे अज-विलापे कस्य रसस्य वर्णनं विद्यते?
उत्तरम्— करुण-रसस्य।

44. **प्रश्नः—** रघुवंशम् अस्मिन् ग्रन्थे कति श्लोकाः विद्यन्ते?
उत्तरम्— 1569 श्लोकाः।

45. **प्रश्नः—** रघुः कं यज्ञं सम्पादयत्?
उत्तरम्— विश्वजितम्।

46. **प्रश्नः—** विदूषकः राज्ञः कीदृशः सहचरः भवति?
उत्तरम्— विनोदप्रियः।

47. **प्रश्नः—** रघुवंशम् इति ग्रन्थे रघोः वर्णने कस्य रसस्य प्रधानता अस्ति?
उत्तरम्— शान्त-रसस्य।

48. **प्रश्नः—** 'रघुवंशम्' अस्य ग्रन्थस्य प्रारम्भं कस्य राज्ञो वर्णनेन भवति?
उत्तरम्— दिलीपस्य।

49. **प्रश्नः—** "अनावृतकपाटं द्वारं देहि" इति केन कथितः?
उत्तरम्— कालिदासेन।

50. **प्रश्नः—** "क्व: सूर्यप्रभवो वंशः" कालिदासस्य इयमुक्तिः कस्मिन् ग्रन्थे विद्यते?
उत्तरम्— रघुवंश-महाकाव्ये।

51. **प्रश्नः—**"अलं महीपाल तव श्रमेण" इदं कथनं कस्यास्ति?
उत्तरम्— सिंहस्य।

52. **प्रश्नः—**नन्दिनी दिलीपस्य परीक्षां कति दिनानन्तरं करोति?
उत्तरम्— (22) द्वाविंशतिदिनानन्तरम्।

53. **प्रश्नः—** 'कुम्भोदरः' कस्य नाम विद्यते?
उत्तरम्— शिवसेवकस्य।

54. **प्रश्नः—**'न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूर्च्छति मारुतस्य' कस्मात् ग्रन्थात् उद्धृतः?
उत्तरम्— रघुवंशम् ग्रन्थात्।

55. **प्रश्नः—** रघुवंशस्य प्रथमः राजा कः आसीत्?
उत्तरम्— मनुः।

56. **प्रश्नः—** रघुवंश-ग्रन्थे मुख्यरसः कः?
उत्तरम्— वीररसः।

57. **प्रश्नः—** रघुवंशे रामस्य गुप्तचरविशेषः कः?
उत्तरम्— भद्रमुखः।

58. **प्रश्नः—** 'अथवा कृतवाग्वारे वंशेऽस्मिन् पूर्वसूरिभिः" अत्र पूर्वसूरिभिः' इत्यनेन पदेन संकेतितः कः?
उत्तरम्— वाल्मीकिः।

59. **प्रश्नः—** 'सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः' इति सूक्तिः कुतः?
उत्तरम्— रघुवंशात्।

60. **प्रश्नः—** 'रघुवंशम्' किमस्ति काव्यम्?
उत्तरम्— महाकाव्यम्।

(U) (Code-25) (ण) किरातार्जुनीयम् (प्रथमसर्गः) विवेचनमेवं वस्तुनिष्ठप्रश्नोत्तराणि

(ण) किरातार्जुनीयम् (प्रथमसर्गः) —महाकवीनां गणनाप्रसङ्गे महाकविभारवेः नाम द्वितीयस्थाने आयाति। अनेन महाकविना महाभारतकथामाश्रित्य अष्टादशसर्गात्मकं वीररसप्रधानं 'किरातार्जुनीयम्' नाम एकमात्रमहाकाव्यस्य संरचना कृता। केवलमेकेनैव ग्रन्थेन भारविना संस्कृतकवीनां महत्त्वपूर्णं स्थानं प्राप्तम्। संस्कृतमहाकाव्यानां बृहत्त्रय्यां किरातार्जुनीयस्य प्रथमं स्थानं विद्यते। महाकाव्येऽस्मिन् कविना काव्यस्य सर्वेषां गुणानां सन्निवेशं कृतम्। उदात्तं सजीवं च वर्णनं, कमनीयकल्पना, अर्थगौरवं, हृदयग्राही शब्दयोजनं, कोमलकान्तपदावली, हृदयाकर्षकः रोचकश्च संवादः, अलङ्काराणां चमत्कारात्मकप्रयोगः, कलात्मककाव्यशैली, मनोहरं प्रकृतिचित्रणं, रसपेशलत्वं, सजीवचरित्रचित्रणञ्च एते सर्वे महनीयाः गुणाः भारविं कवीनाम् अत्यन्तोच्चस्थाने प्रतिष्ठापितमकुर्वन्। महाकविर्भारविः षष्ठ्यां शताब्द्यां जनिमवापेति 634 ईसवीये लिखितेन 'ऐहोल'- (Aihole) शिलालेखेन निर्विवादं निर्णीयते। कुशिकगोत्रीयाः ब्राह्मणाः आनन्दपुरे निवसन्ति स्म। अस्मिन्नेव वंशे नारायणस्वामी जातः। तस्य पुत्रो दामोदरः (भारवि) आसीत्। भारविः दण्डिनः प्रपितामहः आसीत्। भारविविषये मल्लिनाथस्य विचारः—

नारिकेलफलसम्मितं वचो
भारवेः सपदि तद्विभज्यते।
स्वादयन्तु रसगर्भनिर्भरं
सारमस्य रसिका यथेप्सितम्।।
(मल्लिनाथः)

किरातार्जुनीयग्रन्थस्य वैशिष्ट्यम्—अस्य ग्रन्थस्य वैशिष्ट्यम् एतत् यत् स्वल्पैः शब्दैः एव अर्थबाहुल्यात् भावगाम्भीर्याद् अलंकार-अलंकृतत्वात् रसान्वितत्वात् कल्पनाप्रचुरत्वात् अभिव्यनक्ति। अस्य कवेः प्रतिपदे प्रयुक्ते अर्थगौरवं वस्तुतः श्लाघ्यं वर्तते। केनापि कविना भारवेः वैदुष्यं प्रदर्शयितुं अयं श्लोकः लिखितः—

प्रकाशं सर्वतो दिव्यं विदधाना सतां मुदे।
प्रबोधनपरा हृद्या भारवेरिव भारवेः।।

किरातार्जुनीयमेव एका प्राप्ता रचना भारवेः। सर्वविधलक्षणोपेतं महाकाव्यं शिवार्जुनयुद्धमवलम्ब्य किरातार्जुनीयाभिधं काव्यं प्राप्यते। श्री-समन्वितं काव्यमेतद् इति संसूचनाय 'श्री'शब्देन आरभते, प्रतिसर्गान्ते च 'लक्ष्मी'शब्दं प्रयुङ्क्ते। अष्टादशसर्गनिबद्धेऽत्र महाकाव्ये महाभारताधारकं सुन्दरमुपाख्यानं चित्रितम्। महाकाव्यस्यास्य कथा इतिहासप्रसिद्धा। द्यूते पराजितो युधिष्ठिरः भ्रातृभिः पत्या च सह द्वैतवने वसति स्म। दुर्योधनस्य शासनपद्धतिं ज्ञातुं वनेचरं गुप्तचररूपेण प्रेषितवान्। सर्वं ज्ञात्वा सः युधिष्ठिराय निवेदयामास। पाशुपतास्त्रमासादयितुमर्जुनः शिवेन (किरातेन) युद्धमकरोत्। अर्जुनपराक्रमदर्शनतुष्टः शिवोऽर्जुनाय पाशुपतास्त्रं ददौ। अस्मिन् काव्ये धीरोदात्तः नायकः अर्जुनः। नायिका च द्रौपदी वर्तते। कथ्यते हि भारविः भाषा-भाव-सौन्दर्य-रससिद्धिवर्णनचातुरी-शास्त्रीयपाण्डित्यादिविविध-पक्षाणामेकाश्रय इति। अर्थगौरवं तु तस्य वैशिष्ट्येषु प्रकृष्टमेव। भारविः कर्मणि विश्वसिति न तु भाग्ये। अस्मिन् काव्ये महाकाव्यस्य सर्वाण्यपि काव्यशास्त्रनिर्दिष्टानि लक्षणानि संघटन्ते। समस्तसंस्कृतसाहित्ये किरातार्जुनीयस्य समं अन्यद् एतादृशम् ओजःपूर्णं काव्यं न मिलति। भारविः नीतिशास्त्र-अलंकारशास्त्र-व्याकरणशास्त्राणां वा पण्डितः आसीत्। तस्य महाकाव्ये नीतिविषयकसूक्तीनां तु भण्डारगारः विद्यते। राजनीतेरपि विशिष्टवर्णनम् अस्मिन् काव्ये उपलभ्यते। अत्र वीररसः प्रधानः। कदापि किमपि कार्यं सहसा न करणीयम्, अनेन महती हानिः जायते। यथा स्वकाव्ये उक्तम्—

सहसा विदधीत न क्रियाम-
विवेकः परमापदां पदम्।
वृणुते हि विमृश्य कारिणं
गुणलुब्धाः स्वयमेव सम्पदः।।
(किरा०2/30)

अस्मिन् संसारे यः जनः सम्यग्रूपेण विचार्य कार्याणि करोति, स एव ऐश्वर्यशाली भवति। अत्र अर्थगौरवाभिव्यञ्जने काश्चन सूक्तयः निर्दिश्यन्ते एवं च राजनीतिविषयकाः शतशः सूक्तयोऽत्रोपलभ्यन्ते; यथा—

(क) न वञ्चनीयाः प्रभवोऽनुजीविभिः। (ख) सहसा विदधीत न क्रियामविवेकः। (कि०2/30) (ग) गुणाः गृह्या वचने विपश्चितः (2/5)। (घ) वरं विरोधोऽपि समं महात्मभिः (किरा०1/8)। (ङ) आपातरम्या विषयाः पर्यन्तपरितापिनः। (च) विश्वासयत्याशु सतां हि योगः। (छ) हितं मनोहारि च दुर्लभं वचः (1/4)। (ज) गुरुतां नयन्ति हि गुणा न संहतिः (12/10)। (झ) कामाकृष्य हि साध्याः शत्रवः (11/35)। (ञ) सतां हि वाणी गुणमेव भाषते। (ट) शठे शाठ्यं समाचरेत् (1/30)। (ठ) सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम् (11/11)। (ड) गुणाः प्रियत्वेऽधिकृता न संस्तवः (4/25)। (ढ) विनिपातनिवर्तनक्षमं मतमालम्बनमात्मपौरुषम् (2/13)। (त) प्रकर्षतन्त्रा हि रणे जयश्रीः (3/17)। (थ) परमं लाभमरातिभङ्गमाहुः (किरा०13/22)। (द) प्रार्थनाधिकबले विपत्फला (13/61)। (ध) नृपेष्वमात्येषु च सर्वसम्पदः (1/5)। (न) दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु (1/46), (प) पुरुषस्तावदेवासौ यावन्मानान्न हीयते (11/61), (फ) जन्मिनो मानहीनस्य तृणस्य च समा गतिः (11/59) इत्यादयः।

प्रथमसर्गे 46 पद्येषु महाकविः वर्णयति—युधिष्ठिरेण प्रेषितः किरातः दुर्योधनस्य सर्वं वृत्तान्तं ज्ञात्वा द्वैतवने प्रत्यागमनम्। 'हितकरं मनोहरं च वचनं दुर्लभम्' इत्यस्य निवेदनम्। कुत्सितः सखायाः निर्वचनम्। क्रोधादित्यागपूर्वकं मनुनिर्दिष्टमार्गानुसरणम्। दुर्योधनस्य धर्मार्थकामानां निर्विरोधित्वम्, सामदानयोः प्रयोगे नैपुण्यं दण्डनीतेः न्यायप्रियतायाश्च वनेचरः युधिष्ठिरात् दुर्योधनस्य भयं वर्णयति। द्रौपदी युधिष्ठिरं प्रति-'शठे शाठ्यं समाचरेत्' इति कथयति। द्रौपदी भीम-अर्जुन-नकुलसहदेवानां दुर्दशां प्रति

युधिष्ठिरस्य कोपोद्दीपनं करोति एवं शत्रूणां वधाय शान्तिं त्यक्त्वा तेजधारणाय प्रार्थयति।

(U) किरातार्जुनीयस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— भारविः भारतस्य कस्य भागस्य निवासी?
उत्तरम्— दक्षिणभागस्य।
2. **प्रश्नः**— भारविः कस्य नरेशस्य सभापण्डित आसीत्?
उत्तरम्— चालुक्यवंशीयनरेशस्य।
3. **प्रश्नः**— भारवेः पितुः नाम किम्?
उत्तरम्— श्रीधरः।
4. **प्रश्नः**— भारवेः मातुः नाम किम्?
उत्तरम्— सुशीला।
5. **प्रश्नः**— दुर्योधनस्य अपरं नाम किम्?
उत्तरम्— सुयोधनः।
6. **प्रश्नः**— 'शरद्वर्णनम्' कस्मिन् महाकाव्ये वर्तते?
उत्तरम्— किरातार्जुनीये।
7. **प्रश्नः**— किरातवेषधारी कः आसीत्?
उत्तरम्— शिवः।
8. **प्रश्नः**—किरातार्जुनीये महाकाव्ये कति सर्गाः समुपलभ्यन्ते?
उत्तरम्— (18) अष्टादश।
9. **प्रश्नः**—श्री-शब्देन कित्तावत् महाकाव्यं प्रारभ्यते ?
उत्तरम्— किरातार्जुनीयम्।
10. **प्रश्नः**— पशुपतास्त्रप्राप्त्यर्थं अर्जुनः कुत्र प्रयाति?
उत्तरम्— हिमालये।
11. **प्रश्नः**— शिवार्जुनयोः युद्धः कुत्र वर्णितोऽस्ति?
उत्तरम्— किरातार्जुनीये।
12. **प्रश्नः**— अर्थगौरवं कस्य कवेः प्रसिद्धम्?
उत्तरम्— भारवेः।
13. **प्रश्नः**— 'सहसा विदधीत न क्रियामविवेकः परमापदां पदम्' इति वाक्यस्य कर्ता कः?
उत्तरम्— भारविः।
14. **प्रश्नः**— नारिकेलफलसंमितम् वचः कस्य अस्ति?
उत्तरम्— भारवेः।
15. **प्रश्नः**— किरातार्जुनीयस्य प्रथमसर्गस्य छन्दः कः?
उत्तरम्— वंशस्थम्।
16. **प्रश्नः**— किरातार्जुनीये महाकाव्ये युधिष्ठिरस्य गुप्तचरः कः?
उत्तरम्— वनेचरः।
17. **प्रश्नः**— 'हितं मनोहारि च दुर्लभं वचः' सूक्तिरियं कस्य उक्तिरस्ति?
उत्तरम्— वनेचरस्य।
18. **प्रश्नः**— भारवेः स्थितिकालः कः?
उत्तरम्— सप्तमशतकः।
19. **प्रश्नः**— भारविः कीदृशो भक्त आसीत्?
उत्तरम्— शैवः।
20. **प्रश्नः**— भारवेः अपरं नाम किम्?
उत्तरम्— आतपत्रभारविः।
21. **प्रश्नः**— राजनीतिपरकं किं महाकाव्यम्?
उत्तरम्— किरातार्जुनीयम्।
22. **प्रश्नः**— किरातार्जुनीये कस्य रसस्य प्राधान्यम्?
उत्तरम्— वीररसस्य।
23. **प्रश्नः**— किरातार्जुनीयमहाकाव्यस्य नायिका का?
उत्तरम्— द्रौपदी।
24. **प्रश्नः**— 'न तितिक्षा सममस्ति साधनम्' इदं वाक्यं कस्य ग्रन्थस्य वर्तते?
उत्तरम्— किरातार्जुनीयस्य।
25. **प्रश्नः**— अर्थगौरवाय कः कविः प्रसिद्धः?
उत्तरम्— भारविः।
26. **प्रश्नः**—"न नोननुन्नो नुन्नोनो नाना नानानना ननु" अस्मिन् श्लोके कः कविः असाधारण-कौशलं प्रदर्शितवान्?
उत्तरम्— भारविः।
27. **प्रश्नः**—कस्य महाकाव्यस्य आदितः सर्गत्रयम् "पाषाणत्रयं" कथ्यते?
उत्तरम्— किरातार्जुनीयस्य।
28. **प्रश्नः**— किरातार्जुनीयम् महाभारतस्य कस्मात् पर्वात् गृहीतः?
उत्तरम्— वनपर्वतः।

29. **प्रश्नः**— किरातार्जुनीयम् ग्रन्थे एकाक्षर-अलंकाराणां का संख्या?
उत्तरम्— (7) सप्त।
30. **प्रश्नः**—भारविमहोदयस्य वास्तविकं नाम किमासीत्?
उत्तरम्— दामोदरः।
31. **प्रश्नः**— 'विचित्ररूपाः खलु चित्तवृत्तयः' इयं सूक्तिः कस्मात् ग्रन्थात् उद्धृतः?
उत्तरम्— किरातार्जुनीयम् ग्रन्थात्।
32. **प्रश्नः**— किरातार्जुनीयम् कस्य काव्यकृतिरस्ति?
उत्तरम्— महाकवेः भारवेः।
33. **प्रश्नः**— किरातार्जुनीयस्य प्रथमसर्गे कति श्लोकाः सन्ति?
उत्तरम्—46 षट्चत्वारिंशत्।
34. **प्रश्नः**— किरातार्जुनीये 'चारचक्षुषः' कः?
उत्तरम्— युधिष्ठिरः।
35. **प्रश्नः**—युधिष्ठिरेण अनुष्ठिते कस्मिन् यज्ञे भगवता श्रीकृष्णेन शिशुपालस्य वधः विधीयते?
उत्तरम्— राजसूययज्ञे।
36. **प्रश्नः**— "स्फुटता न पदैरपाकृता, न च न स्वीकृतमर्थगौरवम्" इत्यनेन सम्बद्धः ग्रन्थविशेषः कः?
उत्तरम्— किरातार्जुनीयम्।
37. **प्रश्नः**— किरातार्जुनीयमहाकाव्यस्य नायकः कः?
उत्तरम्— कृष्णः।

(U-Code-25) (त) शिशुपालवधम् (प्रथमसर्गः) विवेचनमेवं वस्तुनिष्ठप्रश्नोत्तराणि

(त) शिशुपालवधम् (प्रथमसर्गः)

पुष्पेषु जाती नगरीषु काञ्ची
नारीषु रम्भा पुरुषेषु विष्णुः।
नदीषु गङ्गा क्षितिपेषु रामः
काव्येषु माघः कविकलिदासः॥

संस्कृतमहाकाव्यप्रणेतृणां मध्ये महाकविमाघस्य स्थानं विशिष्टं वर्तते। संस्कृतसाहित्याकाशे कालिदासात् अनन्तरं गणनाक्रमे माघः समायाति। महाकविमाघः गुर्जरदेशे 'श्रीमाल' नामकस्थाने विशिष्टब्राह्मणपरिवारे जन्म लेभे। तस्य पितुः नाम 'दत्तक' आसीत्। अस्य पितामहः 'श्रीसुप्रभदेवः' आसीत्। माघस्य समयः सप्तम-अष्टमशतकस्य वा ज्ञायते। अस्य महाकवेः शिशुपालवधाभिधानं महाकाव्यं सहृदयानां कृते तेषां शब्दसन्दोहानां ज्ञानानां परीक्षकः वर्तते। यथोक्तं केनचित् आलोचकप्रवरेण-"**नवसर्गगते माघे नवशब्दो न विद्यते**" अर्थात् नवसर्गाणां समाप्तौ शिशुपालवधस्य न नवीनः शब्दोऽवशिष्यते। माघस्य शिशुपालवधनामकम् एकमेव ग्रन्थरत्नं विंशतिः (20) सर्गात्मकमुपलभ्यते। चेदिनृपतेः शिशुपालस्य वधोऽत्र चित्रितः। मुख्यतया श्रीमद्भागवत-माश्रित्य, 1684 श्लोकसंख्या उपलभ्यते। कथानकं तु लघु। अत्र युधिष्ठिरस्य राजसूये यागे श्रीकृष्णेन कृतः शिशुपालस्य वधो मुख्यतया वर्णितः। माघः उच्चकोट्याः कविः विद्यते। माघो हि एकीभूत-कालिदास-अश्वघोष-भारवि-भट्ट इत्येतेषां प्रभावेण प्रभावितः। तस्य काव्ये कालिदासस्य काव्यसौन्दर्यम् उपमानां प्राधान्यञ्च, अश्वघोषस्य स्वाभीष्टदर्शनसिद्धिः, भारवेरर्थगौरवम्, भट्टेश्च व्याकरणपाटवम्, दण्डिनः कृतौ दशकुमारचरिते पदलालित्यम्, सर्वे एव परस्परं समन्विता सन्ति इति दृश्यते। यथा कथ्यते–

उपमा कालिदासस्य भारवेरर्थगौरवम्।
नैषधे पदलालित्यं माघे सन्ति त्रयो गुणाः॥
(सु०र०भ०37/63)

महाकविमाघस्य महाकाव्ये पदलालित्यमपि दृश्यते। पदविन्यासं माघस्य शैल्याः कौशलम्। अनेनैव पदे-पदे अत्र पदलालित्यं दरीदृश्यते। माघस्य उपमायाः उदाहरणं शिशुपालवधे लिखिते श्लोके नारदस्य साम्यं ऐरावतेन सह द्रष्टव्यम्–

निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा
लसद्बिसच्छेदसिताङ्गसङ्गिना।
चकासतं चारुचमूरुचर्मणा
कुथेन नागेन्द्रमिवेन्द्रवाहनम्॥
(शिशु०1/21)

शुभ्रवर्णनारदस्य उपमा अपि दर्शनीया-

रथाङ्गपाणेः पटलेन रोचिषा
मृषत्विषः संवलिता विरेजिरे।
चलत्पलाशान्तरगोचरा-
स्तरोस्तुषारमूर्तेरिव नक्तमंशवः॥
(शिशु०1/21)

उदासितारं निगृहीतमानसै-
र्गृहीतमध्यात्मदृशा कथञ्चन।
बहिर्विकारं प्रकृतेः पृथक् विदुः
पुरातनं त्वां पुरुषं पुराविदः॥
(शिशु०प्र०सर्ग०)

दार्शनिकभावानुविद्धम् अर्थगौरवस्य उदाहरणम्-

बलावलेपादधुनापि पूर्ववत्
प्रबाध्यते तेन जगज्जिगीषुणा।
सतीव योषित् प्रकृतिः सुनिश्चला
पुमांसमभ्येति भवान्तरेष्वपि॥
(शिशु०1/72)

रमणीयकस्य उदाहरणम्-

दृष्टोऽपि शैलः स मुहुर्मुरारे-
रपूर्ववद् विस्मयमाततान।
क्षणेः क्षणेः यन्नवतामुपैति
तदेव रूपं रमणीयतायाः॥
(शिशु०1/33)

माघस्य काव्ये पदलालित्यं माधुर्यं च अवलोक्य केनचित् आलोचकेन कथितम्-**"कविषु माघः"**। अपि च-**"तावद् भा भारवेर्भाति यावन्माघस्य नोदयः।"**

एवं 1. उपमायाः प्रयोगः, 2. अर्थगौरवस्य वैशिष्ट्यम्, 3. पदलालित्यस्य चारुता, इति गुणत्रयेऽपि महनीयं मांघस्य प्रशस्यम्। एतेन इदं सुस्पष्टं सञ्जातं यत् महाकविमाघः स्वस्मिन् काव्ये शिशुपालवधाख्ये सहृदयानां हृदयावर्जनीयाः सर्वे गुणाः एकत्रीकृतवान्। अतः केनापि कविना सम्यक् एव उक्तम्-**"माघे सन्ति त्रयो गुणाः"** शिशुपालवधग्रन्थस्य प्रथमसर्गे 75 श्लोकाः सन्ति। सर्वत्र वंशस्थवृत्तम्।

(U) शिशुपालवधस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— माघविरचितं महाकाव्यं किमस्ति?
उत्तरम्— शिशुपालवधम्।

2. **प्रश्नः**— रैवतकपर्वतवर्णनं कुत्र वर्तते?
उत्तरम्— शिशुपालवधे।

3. **प्रश्नः**— माघः भारतस्य कस्य भूभागस्य निवासी?
उत्तरम्— गुजरातप्रान्तस्य भीमनाल-नगरस्य।

4. **प्रश्नः**— शिशुपालवधे कति सर्गाः सन्ति?
उत्तरम्— (20) विंशतिः।

5. **प्रश्नः**— "माघे सन्ति त्रयो गुणाः" इत्युक्त्वा किं काव्यं प्रसिद्धम्?
उत्तरम्— शिशुपालवधम्।

6. **प्रश्नः**— 'बृहत्त्रयी' पदेन कानि पुस्तकानि गृह्यन्ते?
उत्तरम्— त्रीणि 1. शिशुपालवधम्, 2. किरातार्जुनीयम्, 3. नैषधीयचरितम्।

7. **प्रश्नः**— रैवतकपर्वतस्य वर्णनं कस्मिन् सर्गे विद्यते?
उत्तरम्— चतुर्थे सर्गे।

8. **प्रश्नः**— 'घण्टामाघः' कस्योपाधिः?
उत्तरम्— माघस्य।

9. **प्रश्नः**— शिशुपालवधस्य प्रतिनायकः कः?
उत्तरम्—शिशुपालः।

10. **प्रश्नः**— 'क्षणे-क्षणे यन्नवतामुपैति, तदेव रूपं रमणीयतायाः' इति केन प्रतिपादितम्?
उत्तरम्—माघेन।

11. **प्रश्नः**— शिशुपालवधस्य प्रेरणास्रोतं मुख्यं पुराणं किम्?
उत्तरम्— श्रीमद्भागवतम्।

12. **प्रश्नः**— 'नवसर्गगते माघे नवशब्दो न विद्यते' कस्य कृते इदं वाक्यम्?
उत्तरम्— माघस्य कृते।

13. **प्रश्नः**— शिशुपालवधस्य अङ्गीरसः कः?
उत्तरम्— वीररसः।

14. **प्रश्नः**— माघविरचिताः ग्रन्थ-संख्या कियती अस्ति?
उत्तरम्— एका।

15. **प्रश्नः**— "प्रभातवर्णनम्" शिशुपालवधस्य कस्मिन् सर्गे वर्तते?
उत्तरम्—एकादशे सर्गे।

16. **प्रश्नः**—नवपलाशपलाशवनं पुरः स्फुटपराग-परागतपङ्कजम्।

मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः॥
अस्मिन् श्लोके कस्य वर्णनमस्ति, कश्चालङ्कारः?
उत्तरम्— वसन्तवर्णनम्, यमकः अलङ्कारः।

17. **प्रश्नः**— राजसूययज्ञे कस्य अग्रिमा पूजा भवति?
उत्तरम्— कृष्णस्य।

18. **प्रश्नः**—"शरीरभाजां भवदीयदर्शनं, व्यनक्ति कालत्रितयेऽपि योग्यताम्" इति कस्य ग्रन्थस्य सूक्तिः?
उत्तरम्— शिशुपालवधम् इति ग्रन्थस्य।

19. **प्रश्नः**— उपमा, अर्थगौरवम्, पदलालित्यञ्च एते त्रयः गुणाः कस्मिन् काव्ये सन्ति?
उत्तरम्— माघे।

20. **प्रश्नः**— माघस्य पितुर्नाम किमासीत्?
उत्तरम्— दत्तक-सर्वाश्रमः।

21. **प्रश्नः**— श्रीकृष्णस्य राजप्रासादे कस्य आगमनं भवति?
उत्तरम्— देवर्षिनारदस्य।

22. **प्रश्नः**— द्वारिकाधीशः कः?
उत्तरम्— श्रीकृष्णः।

23. **प्रश्नः**— 'मेघे माघे गतं वयः' इति कस्य महाकाव्यस्य लोकप्रियतां सूचयति?
उत्तरम्— शिशुपालवधस्य।

24. **प्रश्नः**— माधुर्यौजःप्रसादाख्यास्त्रयो गुणाः कस्य कवेर्महाकाव्ये सन्ति?
उत्तरम्— माघस्य काव्ये।

25. **प्रश्नः**— 'बृहत्त्रय्यां किं परिगण्यते?
उत्तरम्— शिशुपालवधम्।

26. **प्रश्नः**— शिशुपालवधस्य प्रथमसर्गे द्वारिकायां कस्यागमनं दृश्यते?
उत्तरम्— नारदस्य।

27. **प्रश्नः**— युधिष्ठिरेण अनुष्ठिते कस्मिन् यज्ञे भगवता श्रीकृष्णेन शिशुपालस्य वधः विधीयते?
उत्तरम्— राजसूययज्ञे।

28. **प्रश्नः**—'क्षणे-क्षणे यन्नवतामुपैति, तदेव रूपं रमणीयतायाः' सूक्तिरियं कस्मिन् ग्रन्थे समुपलभ्यते?
उत्तरम्— शिशुपालवधे।

29. **प्रश्नः**— उपमा, अर्थगौरवं, पदलालित्यञ्च सर्वेषामुपलब्धिः कस्य काव्ये समुपलभ्यते?
उत्तरम्— माघस्य।

30. **प्रश्नः**— रैवतक-पर्वतस्य वर्णनं कुत्र दरीदृश्यते?
उत्तरम्— शिशुपालवधे।

31. **प्रश्नः**— 'शिशुपालवधम्' इत्यस्य प्रमुख-रसः कः?
उत्तरम्— वीररसः।

32. **प्रश्नः**— 'सदाभिमानैकधना हि मानिनः' कस्येयमुक्तिः?
उत्तरम्— नारदस्य।

33. **प्रश्नः**—"शिशुपालवधम्" इति ग्रन्थे प्रथमसर्गस्य प्रधान-छन्दः किम्?
उत्तरम्— वंशस्थः।

34. **प्रश्नः**—"सती च योषित्प्रकृतिः सुनिश्चला पुमांसमभ्येति भवान्तरेष्वपि" इयं सूक्तिः कस्मात् ग्रन्थात् उद्धृताऽस्ति?
उत्तरम्— शिशुपालवधम् ग्रन्थात्।

35. **प्रश्नः**— माघस्य जन्मस्थानं कुत्र विद्यते?
उत्तरम्— भीनमाले।

36. **प्रश्नः**— शिशुपालवधम् केषु निबद्धोऽस्ति?
उत्तरम्— सर्गेषु।

37. **प्रश्नः**— शिशुपालवधम् इति ग्रन्थे कति श्लोकाः सन्ति?
उत्तरम्— ४० श्लोकाः।

38. **प्रश्नः**— महाकवि-माघस्य समयः कः?
उत्तरम्— 675 ख्रीष्टाब्दः।

39. **प्रश्नः**— शिशुपालवधस्य नायकः कः?
उत्तरम्— कृष्णः।

40. **प्रश्नः**— शिशुपालवधस्य मंगलाचरणस्य प्रारम्भः केन शब्देन भवति?
उत्तरम्— 'श्री 'शब्देन।

41. **प्रश्नः**—शिशुपालवधस्य प्रथमसर्गे श्लोक-संख्या कति?
उत्तरम्— (75) पञ्चसप्ततिः।

42. **प्रश्नः**— शिशुपालवधस्य मंगलाचरणे कस्य वर्णनमस्ति?
उत्तरम्— कृष्णस्य।

43. **प्रश्नः**— नारदस्य हस्ते किमस्ति?
उत्तरम्—वीणा।

44. प्रश्नः— 'नवानधोऽधो वृहतः पयोधरान्' इति कुत्र दरीदृश्यते?
उत्तरम्— शिशुपालवधम् ग्रन्थे।

45. प्रश्नः— नारदस्य पितुर्नाम किम्?
उत्तरम्— ब्रह्मा।

46. प्रश्नः— नारदः कस्य संदेशं नीत्वा कृष्णस्य पार्श्वे आगच्छत्?
उत्तरम्— इन्द्रस्य।

47. प्रश्नः— 'शिशुपालवधम्' कुतः उद्धृतोऽस्ति?
उत्तरम्— महाभारतस्य सभापर्वतः।

48. प्रश्नः— शिशुपालवधस्य तेजःपुञ्जः कस्मिन् समाहितो भवति?
उत्तरम्— श्रीकृष्णे।

49. प्रश्नः— शिशुपालस्योपरि आक्रमणस्य चर्चा केन कृता?
उत्तरम्— बलरामेण।

(U-Code-25) (थ) नैषधीयचरितम् (प्रथमसर्गः) विवेचनमेवं वस्तुनिष्ठप्रश्नोत्तराणि

(थ) नैषधीयचरितम् (प्रथमसर्गः)—नैषधीय-महाकाव्ये प्रथमसर्गस्य प्रारम्भे निषधदेशस्य राजानलस्य चरित, विद्याभ्यास, धर्माचरण, प्रतापादिदिनचर्यायाः वर्णनं विद्यमानोऽस्ति। नलस्य सौन्दर्यः त्रैलोक्ये अनुपमः आसीत्। यस्य ख्यातिः सर्वत्र वर्तते स्म। महाकविना श्रीहर्षेण नैषधीयमहाकाव्ये नलदमयन्त्याः प्रेमकथायाः आकर्षकं वर्णनं द्वाविंशतिसर्गेषु प्रतिपादितम्। अस्य ग्रन्थस्य प्रथमसर्गे श्रीहर्षः राज्ञः नलस्य बहुधा प्रशंसां कृतवान्। नलस्य कीर्तिकथां श्रुत्वा विदर्भराजतनया दमयन्ती नलं प्रति समाकृष्टचित्ता भवति। भूपतिनलोऽपि दमयन्तीं प्रति समाकृष्टमनसः सन् मानसविनोदाय अश्वं आरुह्य निजोपवनं प्रति समागच्छत्। तत्र सरोवरस्य तटे हिरण्मयं हंसं दृष्ट्वा राजा नलः तं गृह्णाति। राज्ञा संगृहीतो हंसः प्रथमं नृपतेरात्मानं मोचयितुं बहुप्रयासं विदधाति। किन्तु अन्ततः सः करुणविलापं करोति यं श्रुत्वा राजानलः दयार्द्रः सन् तं हिरण्मयं हंसं मुमोच।

ऐतिहासिकानामनुसारेण कान्यकुब्जेश्वरः जयचन्द्रः गढवालवंश्यो राजाऽऽसीत्। अतः श्रीहर्षस्य स्थितिकालो द्वादशशतकोत्तरार्धभागो मन्यते। अस्य कवेः 'नैषधीयचरितम्' इति महाकाव्यम् अस्ति। अयं स्वकीयविषये स्वकृतिषु काञ्चन परिचयं दत्तवान् अस्ति। श्रीहर्षस्य पिता श्रीहीरः माता च मामल्लदेवी आस्ताम्। श्रीहीरः काशीवासिनो गढवाल-वंशोद्भवस्य विजयचन्द्रस्य सभापण्डित आसीत्।

संस्कृतसाहित्येतिहासे नैषधीयचरितं नाम अन्तिमं महाकाव्यं कन्नौजाधिपतेः महाराजजयचन्द्रस्य परिगृहीतेन श्रीहर्षेण द्वादशशतकोत्तरार्द्धे लिखितम्। अत्र (22) द्वाविंशतिः सर्गाः 2830 श्लोकाश्च सन्ति। निषधशासकस्य नलस्य चरित्रं प्रस्तूयते।

तावद् भा भारवेर्भाति यावन्माघस्य नोदयः।
उदिते नैषधे काव्ये क्व माघः क्व च भारविः॥

महाकविः श्रीहर्षः अलंकाराणां विन्यासे अतीव निपुणः अस्ति। 'नैषधे पदलालित्यम्' बहुशः प्रशंसितं वर्तते।

(U) नैषधीयचरितस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः— नैषधीयचरितम् इत्यस्य रचयिता कविः कः?
उत्तरम्— श्रीहर्षः।

2. प्रश्नः— 'हंससंदेशः' कस्मिन् काव्ये वर्णितोऽस्ति?
उत्तरम्— नैषधीयचरिते।

3. प्रश्नः— श्रीहीरः मामल्लदेवी च कस्य पितरौ आस्ताम्?
उत्तरम्— श्रीहर्षस्य।

4. प्रश्नः— श्रीहर्षेण विरचिताः कियन्तो ग्रन्थाः?
उत्तरम्— (9) नव।

5. प्रश्नः— श्रीहर्षस्य आश्रयदाता कः आसीत्?
उत्तरम्— जयन्तचन्द्रः (जयचन्द्रः)।

6. प्रश्नः— श्रीहर्षस्य मातुलः कः?
उत्तरम्— मम्मटः।

7. प्रश्नः— श्रीहर्षस्य पितुर्नाम किम्?
उत्तरम्— श्रीहीरः।

8. प्रश्नः— श्रीहर्षस्य मातुर्नाम किम्?
उत्तरम्— मामल्लदेवी।

9. प्रश्नः— नैषधीयचरिते कति सर्गाः सन्ति?
उत्तरम्— 22 द्वाविंशतिः।

10. प्रश्नः— नैषधे नायकनायिकौ कौ स्तः?
उत्तरम्— दमयन्ती-नलौ।

11. प्रश्नः— दमयन्त्याः पितुः नाम किम्?
उत्तरम्— भीमसेनः।

12. प्रश्नः— नैषधीयचरितस्य उपजीव्यमस्ति?
उत्तरम्— महाभारतस्य नलोपाख्यानम्।

13. प्रश्नः— नैषधे अङ्गीरसः कः?
उत्तरम्— शृङ्गाररसः।

14. प्रश्नः— विद्वदौषधं किमस्ति?
उत्तरम्— नैषधम्।

15. प्रश्नः— "श्रीहर्षः" कस्याः शताब्द्याः पण्डितः?
उत्तरम्— 1150A. D द्वादश-शताब्द्याः।

16. प्रश्नः—श्रीहर्षः कस्य मतं खण्डितवान्?
उत्तरम्— उदयनाचार्यस्य मतम्।

17. प्रश्नः— उदयनाचार्यः कीदृशो नैयायिकः?
उत्तरम्— द्वैतवादी।

18. प्रश्नः— 'तव वर्त्मनि वर्ततां शिवं पुनरस्तु त्वरितं समागमः'-इतीयं कस्य कवेरुक्तिः?
उत्तरम्— श्रीहर्षस्य।

19. प्रश्नः— कस्य कथारसैः सुधावधीरिणी?
उत्तरम्— नलस्य।

20. प्रश्नः— दमयन्तीमभिलक्ष्य नलस्य गुणगानं कः करोति?
उत्तरम्— हंसः।

21. प्रश्नः—'मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी' नैषधीयचरिते कस्य सूक्तिः?
उत्तरम्— हंसस्य।

22. प्रश्नः— श्रीहर्षः कस्य वादस्य समर्थकः?
उत्तरम्— अद्वैतवादस्य।

23. प्रश्नः— प्रभाकरवर्धनस्य पुत्रः आसीत्?
उत्तरम्— हर्षवर्धनः।

24. प्रश्नः— प्रभाकरवर्धनस्य भार्या का आसीत्?
उत्तरम्— यशोवती।

25. प्रश्नः— दित्याः पुत्रस्य किं नाम अस्ति?
उत्तरम्— हिरण्यकशिपुः।

26. प्रश्नः— 'दयितं जनः खलु गुणीति मन्यते' अयं श्लोकः कुतः उद्धृतः?
उत्तरम्— नैषधीयचरितात्।

27. प्रश्नः— हिरण्यकशिपुं कः अमारयत्?
उत्तरम्— विष्णुः।

28. प्रश्नः—हिरण्यकशिपुः पुनर्जन्मनि कस्य अवतारं गृहीतवान्?
उत्तरम्— रावणस्य।

29. प्रश्नः— नैषधीयचरितम् अस्य ग्रन्थस्य गणना कुत्र क्रियते?
उत्तरम्— बृहत्त्रय्याम्।

30. प्रश्नः— नैषधीयचरितम् किमस्ति?
उत्तरम्— महाकाव्यम्।

31. प्रश्नः— नैषधीयचरितमहाकाव्यस्य प्रथमसर्गे कति श्लोकाः सन्ति?
उत्तरम्— 145 श्लोकाः।

32. प्रश्नः— श्रीहर्षस्य शैली का?
उत्तरम्— वैदर्भी।

33. प्रश्नः— नैषधीयचरितम् अस्मिन् ग्रन्थे प्रयुक्तानि प्रत्येकपदानि कानि?
उत्तरम्— श्लिष्टानि।

34. प्रश्नः— भीमस्य राजधानी कुत्रासीत्?
उत्तरम्— विदर्भः।

35. प्रश्नः— दूत-कार्ये कः कुशलः आसीत्?
उत्तरम्— हंसः।

36. प्रश्नः— नैषधीयचरितम् इत्यस्य नायकः कीदृशो विद्यते?
उत्तरम्— कुलीनः।

37. प्रश्नः— नैषधीयचरितम् इत्यस्य नायिका कीदृशी विद्यते?
उत्तरम्— कुलीना।

38. प्रश्नः— नैषधीयचरिते कविः शिल्पविज्ञानेन सह कस्य विज्ञानस्य वर्णनं कृतवान्?
उत्तरम्— प्राणिविज्ञानस्य।

39. प्रश्नः— नैषधीयचरिते कविः सामुद्रिकशास्त्रेण सह कस्य वर्णनं कृतवान्?
उत्तरम्— तन्त्रशास्त्रस्य।

40. **प्रश्नः**— नैषधीयचरिते प्रयुक्तं छन्दः किम्?
उत्तरम्— उपजातिः।

41. **प्रश्नः**— "श्रीहर्षः" कस्य राज्याश्रित आसीत्?
उत्तरम्— जयचन्द्रस्य।

42. **प्रश्नः**— 'कृतमध्यबिलं विलोक्यते'–इयं कस्याः नायिकायै कथितः?
उत्तरम्— दमयन्त्यै।

43. **प्रश्नः**— श्रीहर्षस्य कानि रचनाकार्याणि सन्ति?
उत्तरम्—'नव', 1. नैषधीयचरितम्, 2. नवसाहसाङ्कचरितचम्पू, 3. खण्डनखण्डखाद्यम्, 4. स्थैर्यविचारणप्रकरणम्, 5. विजयप्रशस्तिः, 6. गौडोर्वीशकुलप्रशस्तिः, 7. अर्णववर्णनम्, 8. छिन्दप्रशस्तिः, 9. शिवशक्तिसिद्धिः।

(U-Code-25) (द) दशकुमारचरितम् (अष्टमोच्छ्वासः) विवेचनमेवं वस्तुनिष्ठप्रश्नोत्तराणि

(द) दशकुमारचरितम् (अष्टमोच्छ्वासः)— संस्कृतसाहित्ये दण्डिनो महती प्रतिष्ठाऽनुमीयते। 'दण्डिनः पदलालित्यम्' इत्युक्तिरपि तस्य प्रसिद्धौ प्रमाणम्। गद्यलेखकेषु दण्डी सर्वं विशिष्टं स्थानं रक्षति। समालोचकाः वदन्ति यत् भारवेः दण्डिनोऽपि पूर्ववर्तित्वम् सिध्यति। दण्डिनः कथनमिदमादाय पण्डिता भारविनं दण्डि-प्रपितामहं मन्यन्ते। दण्डिनोऽपि स्थितिकालः सन्दिग्ध एव सम्प्रत्यपि। अत्र हि समालोचकाः सुबन्धु-बाण-दण्डिनः, बाण-दण्डि-सुबन्धवः, सुबन्धु-दण्डि-बाणाश्चेति त्रिविधक्रमसमर्थका दृश्यन्ते। दण्डी हि संस्कृतसाहित्ये मूर्तिमत्काव्यमेव–

जाते जगति बाल्मीकौ कविरित्यभिधाऽभवत्।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि।।

सर्वे दण्डिनः समयः सप्तमशतकान्तभागः सिद्ध्यति इति चाहुः। दण्डिनो वासदेशस्य निर्णयेऽनुक्रम्यमाणे अवन्तिसुन्दरीकथा प्रमाणम्। दण्डी हि महेन्द्रवर्मणः सुतस्य नरसिंहवर्मणस्तत्सुतरामवर्मणः सभाध्यक्ष आसीत्। तस्य स्थितिकालः-747-782 मितवैक्रमाब्दानभितः। 'दण्डिनः पदलालित्यम्' इति।

त्रयोऽग्नयस्त्रयो देवास्त्रयो वेदास्त्रयो गुणाः।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः।।

'त्रयो दण्डिप्रबन्धाश्च' एतदुक्तिमनुसृत्य 1. काव्यादर्शः, 2. दशकुमारचरितम्, 3. अवन्तिसुन्दरीकथा–इति त्रयो ग्रन्थाः दण्डिनः कथ्यन्ते।

दशकुमारचरितम्–इदमाख्यानप्रधानमेकं कथानकम्। अत्र नानाविधा रोमाञ्चकारिण्यो घटना वर्णिता या विस्मयं जनयन्ति। अत्र द्वे पीठके पूर्वोत्तरनामिके। भूमिकाभागरूपः पञ्चम उच्छ्वासः पूर्वपीठिकानाम्ना ज्ञायते। शिष्टमुत्तरपीठिकारूपम्। वस्तुतः अष्टावेव कुमारा वर्णिता अत्र। पूर्वापरसमायोजनेन दशत्वस्रार्थकता। दशकुमारचरितं कवेः साहित्यिकजीवनस्य प्रभातकालस्य रचना अस्ति। दशकुमाराणां पर्यटनशौर्यानुभवानां वैचित्र्यपूर्णमनोरञ्जकवर्णनमेव अस्य ग्रन्थस्य विशेषता विद्यते। चौरशास्त्रराजनीतिशास्त्रस्य ज्ञानं तु पदे पदे उपलभ्यते। दण्डी सुभगमनोरमवैदर्भीरीत्याः उपासकोऽस्ति। अस्य भाषा तु सर्वत्र व्यावहारिकी परिष्कृता परिमार्जिता चास्ति। चरित्रचित्रणेऽपि विविधता सजीवता चास्ति। दण्डिनः पात्राणि प्रायः सर्वेषां वर्गाणां प्रतिनिधित्वं कुर्वन्ति। निम्नवर्गस्य वर्णनेन व्यावहारिकशिक्षया च दशकुमारचरितं संस्कृतगद्यसाहित्ये विशिष्टं स्थानमाश्रयते। अतः उचितमेव कथितं भारतीयालोचकैः–

कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः।

यादृशी पदललितता वर्ततेऽत्र न तादृशी संस्कृतसाहित्ये निखिले द्रष्टुं शक्यते। अर्थस्य शब्दस्य च मनोहरतां विलोक्यैव सुधीभिरुक्तम्–

उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।

विश्रुतचरितम् दशकुमारचरितम्-अष्टमोच्छ्वासः इत्यस्य कथासारः:-एकः लघुबालेन सह वृद्धस्य साक्षात्कारः विश्रुतं अभूत्। वृद्धेन ज्ञातं यत् अयं बालकः विदर्भस्य राजकुमारः भास्करवर्मा अस्ति, तस्य पितुः हत्या वसन्तभानुः कृत्वा विदर्भदेशोपरि अधिकारः कृतवान्। विदर्भरानी स्व-आत्मज-आत्मजा सह महिष्मतिशासकः मित्रवर्मा पार्श्वे शरणागता वर्तते। तस्मिन्नेव समये ज्ञातं भवति यत् मित्रवर्मा विदर्भराजकुमारी मंजुवादिन्याः विवाहः प्रचण्डवर्मणा सह कर्तुमिच्छति। विश्रुतः कुमारभास्करस्य मिथ्यामृत्युसमाचारं

प्रकाशितवान् एवं च स्वयं प्रचण्डवर्मणं हतवान्। एकः विषयुक्तहारद्वारा मित्रवर्मणमपि अमारयत्। अन्ते विश्रुतः कुमारभास्करसहयोगेन मंदिरस्य मूर्त्या सह युक्तिपूर्वकं मंजुवादिन्या सह विवाहं कारयित्वा वसन्तभानोः वधित्वा विदर्भराज्योपरि पुनः भास्करस्य अधिकारं स्थापितवान्। विश्रुतः स्वयं भास्करवर्मायाः मंत्रीपदस्य भारं गृहीत्वा राज्यकार्यस्य संचालनं प्रारम्भयति स्म।

(U) दशकुमारचरितस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— दशकुमारचरितस्य रचनाकारः कः?
उत्तरम्— कविः दण्डी।

2. **प्रश्नः**— दण्डिः कस्य सभाध्यक्षः आसीत्?
उत्तरम्— रामवर्मणः।

3. **प्रश्नः**— दण्डिनः समयः कः?
उत्तरम्— सप्तमशतकान्तभागः।

4. **प्रश्नः**— दशकुमारचरितस्य पात्रविशेषः कः?
उत्तरम्— राजवाहनः।

5. **प्रश्नः**— 'मित्रगुप्तः' कस्मिन् गद्यकाव्ये मिलति?
उत्तरम्— दशकुमारचरिते।

6. **प्रश्नः**— 'विश्रुतचरितम्' कस्य वैशिष्ट्यमस्ति?
उत्तरम्— दशकुमारचरितस्य।

7. **प्रश्नः**— दशकुमारचरिते कियन्तः पीठिकाः सन्ति?
उत्तरम्— तिस्रः।

8. **प्रश्नः**— दशकुमारचरिते राजवाहनस्य पिता कः?
उत्तरम्— राजहंसः।

9. **प्रश्नः**— दशकुमारचरिते कियतां कुमाराणां चरित्रं वर्णितमस्ति?
उत्तरम्— दशकुमाराणाम्।

10. **प्रश्नः**—अवन्तिसुन्दरी-राजवाहनयोः विवाहः दशकुमारचरितस्य कस्मिन् उच्छ्वासे प्राप्यते?
उत्तरम्— पंचमे उच्छ्वासे।

11. **प्रश्नः**— दशकुमारचरिते कति उच्छ्वासाः सन्ति?
उत्तरम्— (8) अष्ट।

12. **प्रश्नः**— 'विश्रुतचरितम्' दशकुमारचरितस्य कस्मिन् उच्छ्वासे वर्णितम् अस्ति?
उत्तरम्— 8 अष्टमे।

13. **प्रश्नः**— राज्ञः मानसारात् पराजितः राजा कः?
उत्तरम्— राजहंसः।

14. **प्रश्नः**— भोजवंशीयः विदर्भनरेशः कः?
उत्तरम्— पुण्यवर्मा।

15. **प्रश्नः**— राज्ञः अनन्तवर्मणः पिता कः आसीत्?
उत्तरम्— पुण्यवर्मा।

16. **प्रश्नः**— दशकुमारचरिते पुण्यवर्मणः मन्त्री कः?
उत्तरम्— वसुरक्षितः।

17. **प्रश्नः**— 'वसुरक्षितः' कस्य मन्त्री आसीत्?
उत्तरम्— अनन्तवर्मणः।

18. **प्रश्नः**—दशकुमारचरिते अनन्तवर्मणः सकलदुर्नयोपाध्यायः पैशुन्यपण्डितः सेवकः कः?
उत्तरम्— विहारभद्रः।

19. **प्रश्नः**— अश्मकेन्द्रः कः?
उत्तरम्— वसन्तभानुः।

20. **प्रश्नः**— वसन्तभानोः अमात्यः कः?
उत्तरम्— इन्द्रपालितः।

21. **प्रश्नः**— इन्द्रपालितस्य पुत्रः कः आसीत्?
उत्तरम्— चन्द्रपालितः।

22. **प्रश्नः**— अश्मकेन्द्रस्य वसन्तभानोः सहयोगी वनवासी राजा कः?
उत्तरम्— भानुवर्मा।

23. **प्रश्नः**— महासामन्तः कुन्तलपतिः नाम किम्?
उत्तरम्— अवन्तिदेवः।

24. **प्रश्नः**— अनन्तवर्मणः पुत्रः कः?
उत्तरम्— भास्करवर्मा।

25. **प्रश्नः**— अनन्तवर्मणः आत्मजा का?
उत्तरम्— मंजुवादिनी।

26. **प्रश्नः**— विदर्भनरेशस्य राज्ञः अनन्तवर्मणस्य भार्या का?
उत्तरम्— वसुन्धरा।

27. **प्रश्नः**— विश्रुतचरिते कूपपतितः भास्करवर्मणः सहायकः वृद्धः कः?
उत्तरम्— नालीजंघः।

28. **प्रश्नः**— वसुन्धरायाः माता नाम किम्?
उत्तरम्— सागरदत्ता।

29. प्रश्नः— वसुन्धरायाः पितुः नाम किम्?
उत्तरम्— कुसुमधन्वा।

30. प्रश्नः— विश्रुतस्य पितुः नाम किम्?
उत्तरम्— सुश्रुतः।

31. प्रश्नः— विश्रुतस्य पितामहस्य नाम किम्?
उत्तरम्— सिन्धुदत्तः।

32. प्रश्नः— चण्डवर्मणः अनुजः कः?
उत्तरम्— प्रचण्डवर्मा।

33. प्रश्नः— मित्रवर्मणः मन्त्री कः आसीत्?
उत्तरम्— आर्यकेतुः।

34. प्रश्नः— 'अपहारवर्मा' कस्मिन् गद्यकाव्ये दरीदृश्यते?
उत्तरम्— दशकुमारचरिते।

35. प्रश्नः— भारवेः प्रपौत्रः आसीत्?
उत्तरम्— दण्डी।

36. प्रश्नः— दण्डिनः किं प्रसिद्धमस्ति?
उत्तरम्— पदलालित्यम्।

37. प्रश्नः— गद्यसाहित्ये पदलालित्यं कस्य प्रसिद्धं नाम?
उत्तरम्— दण्डिनः।

38. प्रश्नः— दण्डीविरचितानि काव्यानि कानि?
उत्तरम्—काव्यादर्शः, दशकुमारचरितम्, अवन्तिसुन्दरीकथा।

39. प्रश्नः—पुष्पोद्भवविशिष्टं गद्यसाहित्यं किम्?
उत्तरम्— दशकुमारचरितम्।

40. प्रश्नः—उपहारवर्मा एवं मित्रगुप्तः कस्मिन् गद्यकाव्ये मिलतः?
उत्तरम्— दशकुमारचरिते।

(U-Code-25) (घ) हर्षचरितम् (पंचमोच्छ्वासः) विवेचनमेवं वस्तुनिष्ठप्रश्नोत्तराणि

(घ) हर्षचरितम् (Harshacharitam) (पंचमोच्छ्वासः) 'गद्य'शब्दस्य व्युत्पत्तिः गद् व्यक्तायां वाचि इति धातोः 'गदमदचरयमश्चानुपसर्गे' इति सूत्रेण यत् प्रत्यये सति गद्यम् इति शब्दः निष्पन्नो भवति। यस्य च अर्थः भवति 'स्पष्टं कथनम्' इति। 'पादशून्या पदसंरचना एव गद्यमिति'। समग्रे वेदसाहित्ये पद्येन सह गद्यस्यापि स्थानं विद्यते। गद्यमिदं सरलं समासरहितं भूत्वा सुबोधकमस्ति। कुत्रचित् गद्येऽस्मिन् उपमारूपकादीनां अलङ्काराणां च प्रयोगः विहितः। वैदिक-गद्यं सरलं स्पष्टं च विद्यते। ततः वेदाङ्गेषु, आयुर्वेदादिग्रन्थेषु, सूत्रवाङ्मयेषु च गद्यस्य प्राधान्यम् अस्ति।

(1) अपादः पदसन्तानो गद्यम् इति–दण्डिना उक्तम्।

(2) गद्यं कवीनां निकषं वदन्ति इति आलोचकाः।

(3) 'वृत्तबन्धोज्झितं गद्यम्' इति आचार्यविश्वनाथः।

संस्कृतगद्यसाहित्ये बाणभट्टः दण्डिसुबन्ध्वोः अनन्तरं सुविख्यातः रचनाकारः वर्तते। बाणभट्टस्य पिता चित्रभानुः माता च राज्यदेवी आसीत्। सम्राजो हर्षवर्धनस्याऽऽज्ञयैवायं हर्षचरितनामकस्य गद्यकाव्यस्य रचनां कृतवान्। अस्मिन् ग्रन्थेऽष्टौ उच्छ्वासाः; तत्र आद्ये उच्छ्वासत्रये बाणेन स्वीया कथा लिखिता। चतुर्थोच्छ्वासादारभ्य समाप्तिपर्यन्तं हर्षस्य चरितं वर्णितम्।

महाकविः बाणभट्टः गद्यकारेषु मूर्धन्यः सरस्वत्याश्च वरदपुत्रः आसीत्। एतेन बाणभट्टस्य समयः सप्तमशतकं सिद्ध्यति। बाणभट्टः वात्स्यायनवंशे जन्म गृहीतवान्। अयं महाकविः हर्षचरिते स्वजीवनस्य वृत्तान्तं विस्तरेण वर्णितवान्। तत्र शोणनदस्य तटे शाहाबादमण्डले बिहारप्रदेशे प्रीतिकूटनामकनगरे प्रतिवसति स्म इत्यस्ति उल्लेखः। हर्षचरितस्यानुसारम् अस्य वंशस्य परिचयः ब्रह्मणः आरभते। तत्र कुबेरस्य पुत्रः पाशुपतः, पाशुपतस्य पुत्रः अर्थपतिः, अर्थपतेः पुत्रः चित्रभानुः, चित्रभानोः पुत्रः बाणभट्टः इति उपलभ्यते। अस्य माता राज्यदेवी बाल्यैव दिवंगता।

बाणभट्टेन ग्रन्थद्वयमेव गद्यमयं प्रणीतम्–1. हर्षचरितम्, 2. कादम्बरी चेति। बाणस्य कादम्बरी कथाग्रन्थः अस्ति। स्वयमेव कविना उक्तम्–'धिया निबद्धेयमतिद्वयीकथा' इति कादम्बर्याः कथाग्रन्थत्वमुक्तम्। कादम्बर्याः कथा जन्मत्रयवृत्तान्तमङ्गीकरोतीति जटिला। कादम्बर्याः पात्रचित्रणम् अत्युत्तमम्। कादम्बरी पूर्वार्धे उत्तरार्धे च विभक्तम्। तत्र भाषाभावयोः शब्दार्थयोः च समुचितः समावेशः अवलोक्यते, वर्णनं सौन्दर्यं तु अनिर्वचनीयं विद्यते। अतः धर्मदासेन उक्तम्–

रुचिरस्वरवर्णपदा रसभाववती जगन्मनोहरति।
सा किं तरुणी न हि वाणी बाणस्य मधुरशीलस्य।।

अनेन केनचित् उक्तं यत्–'**श्रीहर्षो विततार गद्यकवये बाणाय वाणी फलम्।**"

अथ सर्वविधबाणस्य वैशिष्ट्यं गद्यकाव्ये विलोक्य आलोचकैः उक्तं यत्– **"बाणोच्छिष्टं जगत्सर्वम्" इति** अर्थात् काव्यसम्बन्धिनि सर्वविधानि वर्णनानि बाणैः एव कृतानि। अन्यकवयस्तु बाणम् एव अनुकुर्वाणाः सन्ति। एतत्सकलमपि वैशिष्ट्यं मनसि निधायैव गोवर्द्धनः प्रोक्तवान्–

जाता शिखण्डिनी प्राग्यथा
शिखण्डी तथाऽवगच्छामि।
प्रागल्भ्यमधिकमाप्तुं
वाणी बाणो बभूवेति।। इति।

हर्षचरितम् (पंचमोच्छ्वासः) इत्यस्य कथासारः– हर्षचरितम् इति ग्रन्थस्य पंचमोच्छ्वासः शोक एवं दुःखान्तवर्णनेन परिपूर्णो वर्तते। अस्य उच्छ्वासस्य नाम "महाराजस्य मरणवर्णनं' वर्तते। अस्मिन् उच्छ्वासे राजा प्रभाकरवर्धनः निजमात्मजं राज्यवर्धनं हूणैः सह योद्धुम् उत्तरापथं प्रेषयामास। हर्षवर्धनोऽपि तेन सहैव कियद्दूरं गत्वा हिमालयस्य पादपृष्ठे आखेटक्रीडया क्रीडन् तत्रत्यान् दुष्टपशून् अमारयत्। एकस्मिन् दिवसे कुरङ्गक-नामकः दूतः सूचयति यत् महाराजप्रभाकरवर्धनः अस्वस्थोऽस्ति। एतच्छ्रुत्वा ततः झटित्येव अश्वं समारुह्य प्रस्थितः हर्षवर्धनः परेद्युः राजधानीं समागतः। सम्प्रति "पत्युः जीवनस्य आशा नास्ति" इति विचिन्त्य राज्ञी यशोमती अपि अग्निदाहं कृतवती। किञ्चित्कालानन्तरं राज्ञः प्रभाकरवर्धनस्यापि मृत्युः अभवत्। एवं पंचमोच्छ्वासः साहित्यिक-सांस्कृतिकदृष्ट्या महत्त्वपूर्णो विद्यते।

(U) हर्षचरितस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः— हर्षचरितम् कस्य कृतिरस्ति?
उत्तरम्— बाणभट्टस्य।

2. प्रश्नः— हर्षचरिते कियन्त उच्छ्वासाः?
उत्तरम्— (8) अष्टौ।

3. प्रश्नः—हर्षचरिते 'स्थाणीश्वरम्' कस्य राजधानी अस्ति?
उत्तरम्— हर्षवर्धनस्य।

4. प्रश्नः— हर्षवर्धनस्य पिता कः आसीत्?
उत्तरम्— प्रभाकरवर्धनः।

5. प्रश्नः— हर्षवर्धनस्य अग्रजः कः?
उत्तरम्— राज्यवर्धनः।

6. प्रश्नः— हर्षचरितस्य काव्यविधा का?
उत्तरम्—आख्यायिका।

7. प्रश्नः— हर्षचरिते हर्षस्य भगिनी का अस्ति?
उत्तरम्— राज्यश्रीः।

8. प्रश्नः— राज्यश्री कस्य पत्नी अस्ति?
उत्तरम्— ग्रहवर्मणः।

9. प्रश्नः— हर्षचरितस्य प्रथमोच्छ्वासे समुपवर्णितः 'दधीचः' कस्य पुत्रः?
उत्तरम्— च्यवनस्य।

10. प्रश्नः— शर्यातिपुत्री सुकन्या कस्य माता अस्ति?
उत्तरम्— दधीचस्य।

11. प्रश्नः— हर्षचरिते समुल्लिखितस्य भगवतः च्यवन-ऋषेः आश्रमः कस्याः नद्याः तटे आसीत्?
उत्तरम्— शोणनद्याः तटे।

12. प्रश्नः— हर्षचरिते किं नाम पञ्चमोच्छ्वासः?
उत्तरम्— महाराजप्रभाकरवर्धनस्य मरणवर्णनम्।

13. प्रश्नः— हर्षचरिते दधीचस्य दूती का अस्ति?
उत्तरम्— मालती।

14. प्रश्नः— हर्षचरिते भगवत्याः सरस्वत्याः पतिः कः?
उत्तरम्— दधीचः।

15. प्रश्नः— पुण्यभूतिवंशीयः स्थाणीश्वरः कः?
उत्तरम्—प्रभाकरवर्धनः।

16. प्रश्नः—सरस्वती-दधीचयोः पुत्रः सारस्वतः कया लालितः पालितश्च?
उत्तरम्—अक्षमालया।

17. प्रश्नः— 'अक्षमाला' सारस्वतस्य का आसीत्?
उत्तरम्— पितृव्यजाया।

18. प्रश्नः— किं नाम यशोमत्याः प्रतीहारी?
उत्तरम्—वेला।

19. प्रश्नः— प्रभाकरवर्धनस्य लेखहारकः सेवकविशेषः कः?
उत्तरम्— कुरंगकः।

20. प्रश्नः— अक्षमालायाः पुत्रः कः?
उत्तरम्—वत्सः।

21. प्रश्नः— द्वितीयोच्छ्वासे हर्षचरिते वर्णितः कृष्णः कस्य पितृव्यपुत्रः आसीत्?
उत्तरम्— हर्षस्य।

22. प्रश्नः— राज्ञः प्रभाकरवर्धनस्य वैद्यकुमारः कः?
उत्तरम्— सुषेणः।

24. प्रश्नः— भैरवाचार्यस्य वर्णनं कुत्र मिलति?
उत्तरम्— हर्षचरिते।

25. प्रश्नः— हर्षस्य माता अस्ति?
उत्तरम्— यशोवती।

26. प्रश्नः— हर्षस्य सेनापतिः कः?
उत्तरम्— सिंहनादः।

27. प्रश्नः— प्रभाकरवर्धनेन पुत्रवत्पालितः राजवैद्यः कः?
उत्तरम्— रसायनः।

28. प्रश्नः—ऐतिहासिकैः हर्षस्य जन्मतिथिः कदा स्वीक्रियते?
उत्तरम्— (590 ई.) नवत्यधिकपञ्चशताब्द्याम्।

29. प्रश्नः—राज्ञः प्रभाकरवर्धनस्य मरणात्पूर्वमेव अग्निप्रवेशं कः करोति?
उत्तरम्—रसायनः।

30. प्रश्नः— बाणभट्टस्य समयः कः?
उत्तरम्— (700) सप्त-शताब्दः।

31. प्रश्नः— बाणस्य कानि रचनाकार्याणि सन्ति?
उत्तरम्—1. कादम्बरी, 2. हर्षचरितम्, 3. पार्वतीपरिणयः, 4. चण्डीशतकम्, 5. मुकुटताडितकम्।

33. प्रश्नः— बाणभट्टस्य कौ द्वौ भ्रातरौ आस्ताम्?
उत्तरम्— 1. चित्रसेनः, 2. मित्रसेनः।

34. प्रश्नः— बाणभट्ट-विरचिताः कियन्तो ग्रन्थाः?
उत्तरम्— (3) त्रयः।

35. प्रश्नः— बाणभट्टस्य कौ गद्यग्रन्थौ स्तः?
उत्तरम्— हर्षचरितम् (आख्यायिका) कादम्बरी (कथा) च।

36. प्रश्नः— हर्षचरितस्य नायकः कः?
उत्तरम्— राजा हर्षवर्द्धनः।

37. प्रश्नः— हर्षचरितस्य प्रारम्भिकेषु त्रिषु उच्छ्वासेषु कस्य कथा वर्णिताऽस्ति?
उत्तरम्— बाणभट्टस्य।

(U-Code-25) (न) कादम्बरी (महाश्वेतावृत्तान्तः) विवेचनमेवं वस्तुनिष्ठप्रश्नोत्तराणि

(न) कादम्बरी (Kadambari) (महाश्वेतावृत्तान्तः)

युक्तं कादम्बरीं श्रुत्वा कवयो मौनमाश्रिताः।
बाणध्वनावनध्यायो भवतीति स्मृतिर्यतः।।

बाणभट्टः गद्यकाव्यस्य अप्रतिमः कविः विद्यते। बाणभट्टस्य हर्षचरितम् (आख्यायिका) कादम्बरी (कथा) च सुविख्यातः वर्तते। पदानाम् उचितप्रयोगः, भावानाम् आर्जवम्, उपमा-श्लेष-परिसंख्या-उत्प्रेक्षा-रूपक-विरोधाभास-समासोक्ति-प्रभृतीनाम् अलङ्काराणां स्वाभाविक-समावेशः देशकालपात्रानुसारिभाषायाः मञ्जुलसन्निवेशः, पाञ्चालीरीतिश्च कादम्बरीं विहाय अन्यत्र न अवलोक्यते। अत्र राज्ञः शूद्रकस्य वर्णनं, चाण्डालकन्यावर्णनं, जावालिवर्णनम्, विन्ध्याटवीवर्णनम्, महाश्वेतावर्णनम्, अच्छोदसरोवरवर्णनम्, चन्द्रापीडस्य दिग्विजयवर्णनमित्यादीनि मनोज्ञानि वर्णनानि वीक्ष्य केनचित् उक्तम्–'वाणी बाणो बभूव'। गद्यकाव्येषु कादम्बर्याः सर्वोत्तमं स्थानमास्ते। भावपक्ष-कलापक्ष-लोकचरित्र-शास्त्रीय-तत्त्वसन्निवेश-बाह्यजगत्-प्रभृतीनां वर्णने कवेः सूक्ष्मातिसूक्ष्मदृष्टिः सर्वत्रैव राजते। श्रीराजशेखरेण पाञ्चालीरीतेः निदर्शना बाणस्य शैलीति कथिता–

शब्दार्थयोः समो गुम्फः पाञ्चाली रीतिरिष्यते।
शीलाभट्टारिका वाचि बाणोक्तिषु च सा यदि।।

कादम्बरी महाकवेः बाणभट्टस्य अद्वितीया रचना विद्यते। आधुनिकपरिभाषानुसारम् उपन्यासमेव काल्पनिकताकारणात् कथा इति कथ्यते। महाकविः बाणभट्टः संस्कृत-गद्यसाहित्यस्य श्रेष्ठः कविरस्ति। सप्तमशताब्द्यां रचिता एषा 'कादम्बरी' संस्कृतगद्यकाव्यस्य सर्वश्रेष्ठा रचनाऽस्ति। गुणाढ्य-कृत-'बृहत्कथा' अस्याः उपजीव्य-काव्यमस्ति। प्रस्तुता कथा चन्द्रमसः (चन्द्रमा, चन्द्रपीड-भूद्रक), पुण्डरीकस्य (पुण्डरीक-वैशम्पायन-शुकः) त्रयाणां जन्मानां कथाऽस्ति।

महाश्वेता-वृत्तान्त-कथासारः–किन्नर-मिथुनस्य अनुगच्छेत् चन्द्रापीडः अच्छोदसरोवरे गतवान्। सरोवरे स्नानं जलपानं च कृत्वा शिलोपरि विश्रामः करोति स्म। सरोवरस्य उत्तरातटात् संगीतध्वनिः श्रुत्वा उत्कण्ठवशात् अनुगच्छति एवं च भगवतः शंकरस्य मन्दिरं अपश्यत्। मन्दिरे ब्रह्मासनस्था एका कन्या वीणोपरि शिवस्य स्तुतिः गीयते स्म। परस्परपरिचयप्राप्ता सा कन्या तं आश्रमे आनीत्वा चन्द्रापीडेन वृत्तान्तं पृच्छति स्म। चन्द्रापीडः तां दिग्विजययात्रातः किन्नर-अनुगच्छन् पर्यन्तं कथां श्रावयति स्म। कन्या अपि स्व-आत्मकथायां प्रजापतिदक्षस्य कन्या अरिष्टायाः पुत्रहंसनामकस्य माता-पित्रोः उत्पन्ना महाश्वेतायाः रूपे स्व-अन्वर्थसंज्ञा सुखमयबाल्यकालवयःसन्धिकालश्च कथां श्रावयति स्म। तत्पश्चात् मुनिकुमारः पुण्डरीकेण साक्षात्कारभूते सति कामाभिभूता स्वदशा एवं प्रेमीपुण्डरीकस्य दशायाः कथां अपि श्रावयति स्म। कामातुरपुण्डरीकस्य आकस्मिकनिधनं प्रति शोकातुरविलापस्य, पुण्डरीकस्य शवेन सह सतीभूतस्य, आकाशात् चन्द्रपुरुषद्वारा पुण्डरीकस्य शरीरमपकर्षणस्य चर्चा कृता। एवं च भगवतः शंकरस्य आराधनायां गतवती स्म।

अन्ते चन्द्रापीडेन निवेदयति यत् अहं अत्यन्तपापिनी-अभागिनी-निर्लज्जा-निष्ठुरा-प्रेमरहिता-क्रूरा-निन्दनीयाश्च अस्मि, एवं प्रकारेण सा विलापयति स्म। चन्द्रापीडः तां सहानुभूतिपूर्णमुपदेशेन आश्वस्तयति स्म।

(U) कादम्बर्याः वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः— कादम्बरी इत्यस्य ग्रन्थस्य लेखकः कः?
उत्तरम्— बाणभट्टः।

2. प्रश्नः— बाणस्य पितुः नाम किमासीत्?
उत्तरम्—चित्रभानुः।

3. प्रश्नः— बाणस्य पुत्रः कः आसीत्?
उत्तरम्— भूषणभट्टः।

4. प्रश्नः— कस्मिन् गोत्रे बाणस्य जन्म बभूव?
उत्तरम्— वत्स-गोत्रे।

5. प्रश्नः— बाणविरचितं काव्यमस्ति?
उत्तरम्— कादम्बरी।

6. प्रश्नः—बाणस्य वासः आसीत्?
उत्तरम्—शोणनदीतटे प्रीतिकूटग्रामे।

7. प्रश्नः— राज्यवर्धनः कस्य पुत्रः आसीत्?
उत्तरम्— बाणभट्टस्य।

8. प्रश्नः— कादम्बरी कति भागेषु विभक्ता?
उत्तरम्— चतुर्षु भागेषु।

9. प्रश्नः—शुकनासोक्तदिशा बुद्धिः कदा कालुष्यमुपयाति?
उत्तरम्— यौवनारम्भे।

10. प्रश्नः— 'बाणः' इति कस्य प्रभेदोऽस्ति?
उत्तरम्— गद्यस्य।

11. प्रश्नः— 'लब्धापि दुःखेन परिपाल्यते' इति कस्य कथनम्?
उत्तरम्— शुकनाशस्य।

12. प्रश्नः— कादम्बरीग्रन्थे कस्याः कथा वर्णिताऽस्ति?
उत्तरम्— चन्द्रापीडस्य।

13. प्रश्नः—कादम्बरी इति ग्रन्थे कस्य जन्मत्रयस्य वर्णनमस्ति?
उत्तरम्— चन्द्रापीडस्य।

14. प्रश्नः— 'गन्धर्वनगरलेखेव पश्यत एव नश्यति' कुत्रेदं वाक्यम्?
उत्तरम्— कादम्बर्याम्।

15. प्रश्नः— चन्द्रापीडः पूर्वजन्मनि कः आसीत्?
उत्तरम्— चन्द्रमाः।

16. प्रश्नः— तारापीडस्य पुत्रः कः आसीत्?
उत्तरम्—चन्द्रापीडः।

17. प्रश्नः— वैशम्पायनः कस्य पुत्रः आसीत्?
उत्तरम्— शुकनासस्य।

18. प्रश्नः— पुण्डरीकः कस्यामनुरक्तः आसीत्?
उत्तरम्— महाश्वेतायाम्।

19. प्रश्नः— तारापीडस्य मन्त्री कः आसीत्?
उत्तरम्— शुकनासः।

20. प्रश्नः— चन्द्रापीडस्य अनुरागः कस्यामासीत्?
उत्तरम्—कादम्बर्याम्।

21. प्रश्नः— साम्राज्ञी विलासवती कस्य माता आसीत्?
उत्तरम्—चन्द्रापीडस्य।

22. प्रश्नः— पुण्डरीकस्य पिता कः अस्ति?
उत्तरम्— श्वेतकेतुः।

23. **प्रश्नः**—पुण्डरीकस्य माता का आसीत्?
उत्तरम्—लक्ष्मी।

24. **प्रश्नः**—पुण्डरीकस्य अनन्यमित्रम् आसीत्?
उत्तरम्—कपिञ्जलः।

25. **प्रश्नः**— 'पत्रलेखा' कस्य पुत्री अस्ति?
उत्तरम्—कुलूताधिपतेः।

26. **प्रश्नः**— चन्द्रापीडस्य सेविका दूती वा का अस्ति?
उत्तरम्— पत्रलेखा।

27. **प्रश्नः**— किन्नरयुगलमनुसरन् चन्द्रापीडः कुत्र अगच्छत्?
उत्तरम्— हेमकूटम्।

28. **प्रश्नः**— महाश्वेतायाः आश्रमः कुत्र आसीत्?
उत्तरम्—अच्छोदसरोवरस्य पार्श्वे।

29. **प्रश्नः**— महाश्वेता कस्य पुत्री आसीत्?
उत्तरम्— गन्धर्वराजहंसस्य।

30. **प्रश्नः**— गन्धर्वराजहंसस्य पत्नी का आसीत्?
उत्तरम्— गौरी।

31. **प्रश्नः**— महाश्वेतायाः दासी अस्ति?
उत्तरम्— तरलिका।

32. **प्रश्नः**— 'कादम्बरी' कस्य पुत्री अस्ति?
उत्तरम्— गन्धर्वराजचित्ररथस्य।

33. **प्रश्नः**— कादम्बर्याः माता का अस्ति?
उत्तरम्— मदिरा।

34. **प्रश्नः**— 'कादम्बरी' शब्दस्य कोऽर्थः?
उत्तरम्— मदिरा।

35. **प्रश्नः**— कादम्बर्याः वीणावाहकः कः?
उत्तरम्— केयूरकः।

36. **प्रश्नः**— कथाकादम्बर्याः उत्तरार्द्धभागः केन सम्पूरितः?
उत्तरम्— पुलिन्दभट्टेन।

37. **प्रश्नः**— तारापीडस्य राजधानी कुत्र आसीत्?
उत्तरम्— उज्जयिनी।

38. **प्रश्नः**— 'प्रायेण हि पक्षिणः पशवश्च भयाहारः' इति कस्योक्तिः?
उत्तरम्— शूद्रकस्य।

39. **प्रश्नः**— 'नहि करतलस्पर्शं क्लेशितानाम्' इयं सूक्तिः कस्यै विद्यते?
उत्तरम्—चण्डाल-कन्यकायै।

40. **प्रश्नः**— कादम्बर्याः सहचरी का अस्ति?
उत्तरम्—मदलेखा।

42. **प्रश्नः**— वैशम्पायन-शुकं राजसभायां का आनयति?
उत्तरम्— चाण्डालकन्या।

43. **प्रश्नः**—'लब्धापि दुःखेन परिपाल्यते' कस्य कथनमिदम्?
उत्तरम्—शुकनासस्य।

44. **प्रश्नः**— बाणभट्टः कादम्बरी-ग्रन्थस्य आसख्यानं कस्य मुखात् वाचयति?
उत्तरम्— जाबालिमुखात्।

45. **प्रश्नः**— कादम्बरीग्रन्थस्य मुख्य-रसः कः?
उत्तरम्— शृंगार-रसः।

46. **प्रश्नः**— कादम्बर्याः को प्रधाननायकः?
उत्तरम्— चन्द्रापीड़ः।

47. **प्रश्नः**— "कादम्बरी" ग्रन्थस्य का नायिका?
उत्तरम्—कादम्बरी।

48. **प्रश्नः**—बाणस्य पितुर्नाम किम्?
उत्तरम्—चित्रभानुः।

49. **प्रश्नः**— बाणभट्टस्य मातुः नाम किम्?
उत्तरम्— राजदेवी।

50. **प्रश्नः**—बाणभट्टस्य गद्य-रीति का?
उत्तरम्— पाञ्चाली।

51. **प्रश्नः**— 'मनस्तु साधुध्वनिभिः पदे पदे, हरन्ति सन्तो मणिनूपुरा इव' इयं सूक्तिः कस्य ग्रन्थस्य विद्यते?
उत्तरम्— कादम्बरीग्रन्थस्य।

52. **प्रश्नः**—'कादम्बरी' इति ग्रन्थे कस्याः रीत्याः प्रयोगः अभूत्?
उत्तरम्— पञ्चालीरीत्याः।

53. **प्रश्नः**—'सुखमुपदिश्यते परम्' कादम्बर्यां कस्योक्तिरियम्?
उत्तरम्— पुण्डरीकस्य।

54. **प्रश्नः**— राज्यरूप-विषपानोन्मत्तमनुष्यस्य स्थितिः का भवति?
उत्तरम्— चेतनाशून्यता।

55. **प्रश्नः**—चन्द्रापीडस्य राज्याभिषेकं कर्तुमिच्छा कस्याभूत्?
उत्तरम्— तारापीड़स्य।

56. **प्रश्नः**— अभिषेकस्य सामग्रीं के आनीतवन्तः?
उत्तरम्— द्वारपालाः।

57. **प्रश्नः**— शुकनासः लक्ष्मीं प्रति किं कथितवान्?
उत्तरम्— अनार्यामिति।

58. **प्रश्नः**— गन्धर्वश्रेष्ठस्य हंसस्य माता का आसीत्?
उत्तरम्— अरिष्टा।

59. **प्रश्नः**— 'किं वा प्रलपितेन बहुना' अस्याः सूक्तेः वक्ता कः?
उत्तरम्— शुकः।

60. **प्रश्नः**— 'अपनीताभरणश्च दिवसकर इव' अस्यां सूक्तौ कस्य वर्णनमस्ति?
उत्तरम्—राज्ञः शूद्रकस्य व्यायामशालायाः।

61. **प्रश्नः**— गन्धर्वराजचित्ररथस्य निवासस्थानं किम्?
उत्तरम्— हेमकूटः।

62. **प्रश्नः**— पुण्डरीकस्य कर्णपुटे स्थिता मञ्जरी कस्य?
उत्तरम्— पारिजातस्य।

63. **प्रश्नः**— 'करिणीभिरिव वनकरी प्रवृत्तः' सूक्तौ कस्य वर्णनमस्ति?
उत्तरम्— स्नानशालायाः।

64. **प्रश्नः**— कादम्बरीकथायाः उपजीव्यग्रन्थः कः?
उत्तरम्— बृहत्कथा।

65. **प्रश्नः**— शूद्रकः पूर्वजन्मनि कः आसीत्?
उत्तरम्— चन्द्रापीड़ः।

66. **प्रश्नः**— कादम्बर्याः कथायाः प्रारम्भः केन भवति?
उत्तरम्— शूद्रकेन।

67. **प्रश्नः**— अप्सराणां कति कुलानि सन्ति?
उत्तरम्— 14 चतुर्दश।

68. **प्रश्नः**— चन्द्रापीड़स्य मातुः नाम किम्?
उत्तरम्— विलासवती।

69. **प्रश्नः**— भगवतः शिवस्य कां मूर्तिमाश्रित्य महाश्वेता उपरचितब्रह्मासने आसीना आसीत्?
उत्तरम्— दक्षिणां मूर्तिम्।

70. **प्रश्नः**— महाश्वेतायाः माता का?
उत्तरम्— गौरी।

71. **प्रश्नः**— महाश्वेता का आसीत्?
उत्तरम्— कादम्बर्याः सहचरी।

72. **प्रश्नः**— अच्छोदसरोवरस्य सौन्दर्यं कुत्र समुपस्थापयति?
उत्तरम्— कादम्बरीग्रन्थे।

73. **प्रश्नः**— महाश्वेतायाः प्रेम केन सह अभूत्?
उत्तरम्— पुण्डरीकेण।

74. **प्रश्नः**— शाल्मली-वृक्षस्य वर्णनं कस्मिन् गद्य-काव्ये अस्ति?
उत्तरम्— कादम्बरी-ग्रन्थे।

75. **प्रश्नः**—समस्तमलप्रक्षालने (जलं विना स्नाने) कः समर्थः?
उत्तरम्— गुरूपदेशः।

76. **प्रश्नः**—इन्द्रायुधः पूर्वजन्मनि कः आसीत्?
उत्तरम्—कपिञ्जलः।

77. **प्रश्नः**— पितुः आह्वाने चन्द्रापीड़ः कुत्र गतः?
उत्तरम्— उज्जयिनी-नगरे।

78. **प्रश्नः**— महाश्वेतायाः आराध्यदेवस्य भगवतः शिवस्य प्रतिमा-स्वरूपं किम्?
उत्तरम्—चतुर्मुखो।

79. **प्रश्नः**— कामपीड़ायां कः दिवंगतः?
उत्तरम्— पुण्डरीकः।

80. **प्रश्नः**— अच्छोदसरोवरसमीपवर्तीशिवालयात् कतिपदं यावत् महाश्वेतायाः निवासगुहा आसीत्?
उत्तरम्— 100 पदानि।

81. **प्रश्नः**— कादम्बर्याः कथायाः अन्तः केन भवति?
उत्तरम्— चन्द्रापीड़-कादम्बर्योः मेलनेन।

82. **प्रश्नः**— गन्धर्वराजचित्ररथस्य माता का?
उत्तरम्— मुनिः।

83. **प्रश्नः**— राज्याभिषेकस्य समये कस्याः आवश्यकता भवति?
उत्तरम्— उपदेशस्य।

84. **प्रश्नः**— अच्छोदसरोवरस्य निर्माणं कः अकारयत्?
उत्तरम्—चित्ररथः।

85. **प्रश्नः**— 'अहो विधातुरस्थाने सौन्दर्यनिष्पादन-प्रयत्नः' अस्याः सूक्तेः वक्ता कः?
उत्तरम्—शूद्रकः।

86. **प्रश्नः**— 'तुम्बरुः' कस्य भ्राता आसीत्?
उत्तरम्—हंसस्य।

87. **प्रश्नः**— चन्द्रापीडं दृष्ट्वा कामासक्तः कः अभूत्?
उत्तरम्— कादम्बरी।

88. **प्रश्नः**— प्रियंगु-मंजरी कीदृशी भवति?
उत्तरम्— गौरवर्णा।

89. **प्रश्नः**— धनं कं उन्मत्तं करोति?
उत्तरम्— अज्ञानि-जनम्।

90. **प्रश्नः**— आर्याछन्दोबद्धस्य प्रेमपत्रस्यास्य लेखकः कः?
उत्तरम्— पुण्डरीकः।

91. **प्रश्नः**— 'लब्धापि दुःखेन परिपाल्यते' इति कस्य कथनम्?
उत्तरम्—शुकनाशस्य।

92. **प्रश्नः**— राज्ञः शूद्रकस्य राजधानी कुत्र असीत्?
उत्तरम्— विदिशा।

93. **प्रश्नः**— बाणस्य का गद्यशैली?
उत्तरम्— पाञ्चाली।

(प) गद्यस्य परिचयात्मकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— गद्यः केन मुक्तो भवति?
उत्तरम्— पद्य-बन्धेन।

2. **प्रश्नः**—यत्र अक्षराणां निश्चित-विधानं न भवति तत् किं कथ्यते?
उत्तरम्— गद्यम्।

3. **प्रश्नः**— गेयताशून्यरचना भवति?
उत्तरम्— गद्यम्।

4. **प्रश्नः**—येषु महाकाव्यस्य समस्त-लक्षणं न सङ्घटते तत् किं कथ्यते?
उत्तरम्— गीतिकाव्यम्।

5. **प्रश्नः**— गद्यकाव्यं वेमभूपालचरितम् इत्यस्य लेखकः कः?
उत्तरम्— वामनभट्ट बाणः।

6. **प्रश्नः**— काव्यादर्श इत्यस्य लेखकः कः?
उत्तरम्— दण्डी।

7. **प्रश्नः**— वासवदत्ता अस्य ग्रन्थस्य लेखकः कः?
उत्तरम्— सुबन्धुः।

8. **प्रश्नः**— 'आवन्तिसुन्दरी' अस्य ग्रन्थस्य रचनाकारः कः?
उत्तरम्— दण्डी।

9. **प्रश्नः**— गद्यं कतिविधम्, किञ्च तत्?
उत्तरम्— द्विविधम्, 1. कथा, 2. आख्यायिका।

10. **प्रश्नः**— "गद्यं कवीनां निकषं वदन्ति" इयं सूक्तिः केन काव्येन सम्बद्धा?
उत्तरम्— गद्यकाव्येन।

11. **प्रश्नः**— 'आख्यायिका' इति कस्य प्रभेदोऽस्ति?
उत्तरम्— गद्यस्य।

12. **प्रश्नः**— गद्यकाव्यप्रकारेषु अन्यतमः प्रकारः कः?
उत्तरम्— चूर्णकम्।

13. **प्रश्नः**—गद्यकाव्ये कानि काव्यानि आगच्छन्ति?
उत्तरम्— 1. कथा, 2. आख्यायिका, 3. चम्पू।

14. **प्रश्नः**— गद्यकाव्यम् अवन्तिसुन्दरीकथा कस्य कृतिः अस्ति?
उत्तरम्— दण्डिनः।

15. **प्रश्नः**— छन्दोविचितिकाव्यमिदं कः रचयामास?
उत्तरम्— दण्डी।

16. **प्रश्नः**—आचार्यविश्वनाथस्यानुसारं गद्यकाव्यस्य कति भेदाः?
उत्तरम्— (4) चत्वारो भेदाः।

17. **प्रश्नः**—आचार्यविश्वनाथस्यानुसारं समासरहित-गद्यकाव्यः कः?
उत्तरम्— मुक्तकः।

18. **प्रश्नः**— लघुतर-समासयुक्तं गद्यकाव्यं विश्वनाथः किं कथयति?
उत्तरम्— चूर्णकः।

(U-Code-25) (फ) नाट्यग्रन्थाः-नाटकस्य परिचयात्मकानि वस्तुनिष्ठप्रश्नोत्तराणि

(फ) नाटकस्य परिचयात्मकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— नाटके अंकसंख्या का?
उत्तरम्— 5-10,

2. **प्रश्नः**— पंचसन्धिसमन्वितं ख्यातवृत्तं किं भवति?
उत्तरम्— नाटकम्।

3. **प्रश्नः**— नाटके अश्रवणयोग्यां वार्तां किं कथ्यते?
उत्तरम्— आत्मगतम्।

4. **प्रश्नः**— नाटकेषु भरतवाक्यस्य प्रयोगः कदा भवति?
उत्तरम्— नाटकान्ते।

5. **प्रश्नः**— अभिनेतादि यत्र वेशभूषां धारयति तं स्थानं किं कथयति?
उत्तरम्—नेपथ्यम्।

6. **प्रश्नः**— नाटके सूत्रधारस्य किं कर्त्तव्यं भवति?
उत्तरम्— अभिनयस्य निर्देशनं नियन्त्रणञ्च।

7. **प्रश्नः**— नाट्यशास्त्रे नान्दी इत्यनेन किं अभिप्रेतोऽस्ति?
उत्तरम्— मंगलाचरणम्।

9. **प्रश्नः**— ताण्डवं कः कृतवान्?
उत्तरम्— रुद्रः।

10. **प्रश्नः**—लास्यं का कृतवती?
उत्तरम्— गौरी।

11. **प्रश्नः**— नाटकस्य उत्पत्ति-विषये कति मतानि?
उत्तरम्— (3) त्रीणि।

12. **प्रश्नः**— काव्यं कतिविधम्, किञ्च तत्?
उत्तरम्— द्विविधम्-1. दृश्यं श्रव्यञ्च।

13. **प्रश्नः**— कति उपरूपकाणि कानि च तानि?
उत्तरम्— 18अष्टादश उपरूपकाणि सन्ति। तानि यथा– 1. नाटिका, 2. त्रोटकम्, 3. गोष्ठी, 4. सट्टकम् 5. नाट्यरासकम्, 6. प्रस्थानम्, 7. उल्लाप्यम्, 8. काव्यम्, 9. प्रेङ्खनम्, 10. रासकम्, 11. संलापकम्, 12. श्रीगदितम्, 13. शिल्पकम्, 14. विलासिका, 15. दुर्मल्लिका, 16. प्रकरणी, 17. हल्लीशः 18. भणिका इति।

14. **प्रश्नः**— 'डिमः' नाम इति कस्य प्रभेदः?
उत्तरम्— नाटकप्रभेदः।

15. **प्रश्नः**— नाटके कति अवस्थाः भवन्ति?
उत्तरम्— पञ्च।

16. **प्रश्नः**—रूपकस्य भेदः कः?
उत्तरम्— समवकारः।

17. **प्रश्नः**— दृश्यकाव्यसामान्यस्य नामान्तरं किमस्ति?
उत्तरम्— रूपकम्।

18. **प्रश्नः**— सर्वेषां रूपकाणां स्वरूपसामान्यं कीदृग् भवति?
उत्तरम्— नाटकवत्।

19. **प्रश्नः**— सम्प्रति काव्यशास्त्रे कति सम्प्रदायाः प्राप्यन्ते?
उत्तरम्— (06) षट्।

20. **प्रश्नः**— 'सोनलमानसिंहस्य' सम्बन्धोऽस्ति?
उत्तरम्— नृत्येन सह।

21. **प्रश्नः**— केन नृत्येन सह नाटकमपि अभिनीयते?
उत्तरम्— कथकलीनृत्येन सह।

22. **प्रश्नः**— 'मध्यमव्यायोगः' इत्यस्य कुत्र सम्बन्धः?
उत्तरम्— दृश्यकाव्येषु।

23. **प्रश्नः**— 'त्रोटकम्' इत्येतत् कस्य भेदोऽस्ति?
उत्तरम्— उपरूपकस्य।

24. **प्रश्नः**— 'वीथी' का अस्ति?
उत्तरम्— रूपकम्।

25. **प्रश्नः**— नाट्यसन्धयः कतिसंख्यकाः सन्ति?
उत्तरम्— (05) पञ्च।

26. **प्रश्नः**— नाट्यसन्धिः किमस्ति?
उत्तरम्— मुखः।

27. **प्रश्नः**— प्रकरणे अङ्कानां संख्या काः?
उत्तरम्— (10) दश।

28. **प्रश्नः**— भाणे कति अङ्काः भवन्ति?
उत्तरम्— (1) एकः।

29. **प्रश्नः**— विटः कुत्र भवति?
उत्तरम्— भाणे।

30. प्रश्नः— 'भाणस्य' वृत्तिः किं भवति?
उत्तरम्— भारती।

31. प्रश्नः— भाणस्य कथावस्तु किं भवति?
उत्तरम्— कविकल्पितम्।

32. प्रश्नः— व्यायोगस्य कथावस्तु किं भवति?
उत्तरम्— इतिहास-प्रसिद्धम्।

33. प्रश्नः— समवकारे सन्धेरभावो भवति?
उत्तरम्— विमर्शस्य।

34. प्रश्नः— समवकारे कति अङ्काः भवन्ति?
उत्तरम्— (3) त्रयोऽङ्काः।

35. प्रश्नः— समवकारस्य प्रथमाङ्के कति सन्धयः भवन्ति?
उत्तरम्— (2) द्वे।

36. प्रश्नः— समवकारे नायकानां संख्या: कति भवन्ति?
उत्तरम्— (12) द्वादश।

37. प्रश्नः— समवकारे मुख्य-रसः कः भवति?
उत्तरम्— वीर-रसः।

38. प्रश्नः— डिमस्य कथावस्तुः कीदृशः भवति?
उत्तरम्— इतिहास-प्रसिद्धः।

39. प्रश्नः— डिमस्य प्रधान-रसः कः भवति?
उत्तरम्— रौद्रः।

40. प्रश्नः— डिमे कति अङ्काः भवन्ति?
उत्तरम्— (4) चत्वारः।

41. प्रश्नः— डिमे नायकानां संख्या: कति भवन्ति?
उत्तरम्— (16) षोडशः।

42. प्रश्नः— अङ्कस्य नायकः कीदृशः भवति?
उत्तरम्— साधारण-पुरुषः।

43. प्रश्नः— अङ्कस्य रसः कः भवति?
उत्तरम्— करुण-रसः।

44. प्रश्नः— वीथी इत्यस्या का वृत्तिः भवति?
उत्तरम्— कैशिकी।

45. प्रश्नः— निन्दनीय-पुरुषाणां कविकल्पित-वृत्तान्तं किं कथ्यते?
उत्तरम्— प्रहसनम्।

46. प्रश्नः— प्रहसनस्य मुख्य-रसः कः?
उत्तरम्— हास्य-रसः।

47. प्रश्नः— प्रकरणस्य नायकः कः भवति?
उत्तरम्— धीर-प्रशान्तः।

48. प्रश्नः— नाटकस्य वृत्तिः किं भवेत्?
उत्तरम्— ख्यातः।

49. प्रश्नः— नाटके 'प्रवेशकस्य' प्रयोगः कुत्र भवति?
उत्तरम्—द्वयोः अङ्कयोः मध्ये।

50. प्रश्नः— 'मृगनयना' अत्र त्रिलुप्ता-उपमादर्शनाय उपर्युक्तविग्रहः कः?
उत्तरम्— मृगस्य नयने इव चञ्चले नयने यस्याः सा मृगनयना।

(U) (ब) अभिज्ञानशाकुन्तलमेवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(ब) अभिज्ञानशाकुन्तलम्—संस्कृतसाहित्याकाशे कविकुलगुरुः कालिदासः देदीप्यमाननक्षत्रवत् अस्ति। कविताकामिनीविलासः कालिदासः रससिद्धः कवीश्वरः संस्कृतकाव्यक्षेत्रे सर्वश्रेष्ठः अस्ति।

पुरा कवीनां गणनाप्रसङ्गे
कनिष्ठिकाधिष्ठितकालिदासाः।
अद्यापि तत्तुल्यकवेरभावा-
दनामिका सार्थवती बभूव॥

तस्य स्थितिकालविषये विदुषां मध्ये मतवैभिन्न्यम् अस्ति। कालिदासस्य ई० पूर्वप्रथमद्वितीयशतकसम्भवत्वं स्वीकर्तुं समर्थयन्ते-आचार्यश्रीरामचन्द्रमिश्रः, आचार्यहंसराजः अग्रवालः, पं० वेदव्यासशुक्लः इत्यादयः संस्कृत-साहित्येतिहासकाराः ग्रन्थकाराश्च।

कालिदासस्य को देशः (जन्मस्थानम्) इति विषये महान् मतभेदः। केचित् विद्वांसः अस्य जन्मस्थानं मिथिला मन्यन्ते। केचित् उज्जयिन्यां मन्यन्ते। केचन काश्मीरान्, अपरे वङ्गान् च तद्देशमाहुः। वयन्तु पश्यामः- मालवगणमुख्य-विक्रमादित्यसभास्थस्य कालिदासस्य मालवमुख्यनगरी उज्जयिनी एव स्थानम्। किंवदन्तीभिर्ज्ञायते यत् कालिदासो बाल्ये मूर्खः आसीत्। पण्डितानां छलेन प्रबुद्धया विद्यावत्या

सह अस्य विवाहोऽभूत्। तयाऽपमानितश्च कालिकामाराध्य कविर्बभूव। कालिदेव्याः दासः कालिदासः इति नाम्ना प्रसिद्धो बभूव। पत्नीं द्रष्टुं गृहमागतश्च द्वारं पिहितं दृष्ट्वा 'अनावृतकपाटं द्वारं देही'ति जगाद।' अस्ति कश्चिद् वाग्विशेष' इति तया पृष्टश्च काव्यत्रयं रचयति स्म। कालिदासस्य सप्तग्रन्थाः सन्ति। काव्यचतुष्टयं नाटकत्रयं च कालिदास-रचितमिति।

काव्यचतुष्टये 1. रघुवंशम्- (19) एकोनविंशति-सर्गात्मकं महाकाव्यम्। 2. कुमारसंभवम्- (17) सप्तदश-सर्गात्मकं महाकाव्यम्। 3. गीतिकाव्येषु-1. ऋतुसंहारम्- (6) षट्सर्गात्मकं 144 श्लोकात्मकं गीतिकाव्यम् अस्ति। 4. गीतिकाव्येषु-2. मेघदूतम्-कुबेरकोपभाजनयक्षस्य प्रणयकथा मेघदूतेऽस्ति। 5. नाटकत्रयेषु-1. मालविकाग्निमित्रम्-पञ्चाङ्कात्मकं रूपकमस्ति। 2. विक्रमोर्वशीयम्- पञ्चाङ्कात्मकं रूपकमस्ति। 3. अभिज्ञानशाकुन्तलम्- (7) सप्ताङ्कात्मकं रूपकमस्ति।

2. अभिज्ञानशाकुन्तलम्- (Abhijnanashakuntalam) महाकविकालिदासस्य अभिज्ञानशाकुन्तलम् अस्ति एकं समस्याप्रधानं घटनाप्रधानं वा नाटकम्। नाटकेऽस्मिन् नायिका शकुन्तला नायकेन राज्ञा दुष्यन्तेन गान्धर्वविवाहविधिना परिणीता। स्वनगरं प्रति परावर्तमानेन तेन "एकैकमत्र दिवसे दिवसे मदीयं, नामाक्षरं गणय, गच्छसि यावदन्तम्" इत्युक्त्वा स्वनामाङ्कितमंगुलीयकं स्वयमेव शकुन्तलायाः हस्ते परिधापितम्। इत्यभिज्ञानविषयिणी घटना महाभारतस्यादिपर्वात् गृहीता।

अभिज्ञानप्रधानं शाकुन्तलम् 'अभिज्ञानशाकुन्तलम्' अभिज्ञायते अनेन इति अभिज्ञानं चिह्नमिति, अभि + ज्ञा + ल्युट्। इति व्युत्पत्तिं दर्शं दर्शं सिद्धमेव अभिज्ञानशाकुन्तलस्य समस्याप्रधानत्वम्, नायिकाप्रधानत्वं च। अभिज्ञानञ्च शकुन्तलाञ्च इति अभिज्ञानशाकुन्तलम्। कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्। अभिज्ञानशाकुन्तले चतुर्थेऽङ्के कविः कण्वरूपेण उपस्थितोऽस्ति। अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के लौकिकालौकिकप्रकृतिमानवयोः विलक्षणं समन्वयोऽस्ति। अरण्यवासिन्याः शकुन्तलायाः पतिगृह-हस्तिनापुरगमनम् अरण्यराजप्रासादयोः किंमपि विलक्षणं सम्बन्धं प्रतिपादयति। अभिज्ञानशाकुन्तलस्य चमत्कारो दुर्वाससः शापघटनायामाश्रितोऽस्ति, अत एव अंकोऽयं विशिष्टं स्थानं विभर्ति। "सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्" इत्यनेन शकुन्तलाया पतिगृहगमनाय अनुज्ञा प्रार्थिता। ईदृशः वाग्व्यवहारः महाकवेः गुणगौरवमेव प्रथयति। इत्थं सम्भोग-शृंगारस्य साम्राज्यमस्ति अभिज्ञानशाकुन्तले। **'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला'।**

(U) (क) अभिज्ञानशाकुन्तलम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः— अभिज्ञानशाकुन्तलम् कस्य कृतिरस्ति?
उत्तरम्— कालिदासस्य।

2. प्रश्नः— नाटकेषु कं नाटकं रम्यम्?
उत्तरम्— अभिज्ञानशाकुन्तलम्।

3. प्रश्नः— शकुन्तलायाः माता का अस्ति?
उत्तरम्— मेनका।

4. प्रश्नः— शकुन्तलायाः धर्मपिता कः अस्ति ?
उत्तरम्— महर्षिकण्वः।

5. प्रश्नः—अभिज्ञानशाकुन्तले 'अभिज्ञान'शब्दस्य संकेतग्रहः कस्मिन् अस्ति?
उत्तरम्— अंगुलीयके।

6. प्रश्नः—"उपमा कालिदासस्य" सूक्तिरियं केन सम्बद्धा?
उत्तरम्— कालिदासेन।

7. प्रश्नः— राज्ञः दुष्यन्तस्य पत्नी का अस्ति?
उत्तरम्—हंसपदिका।

8. प्रश्नः— दुष्यन्तस्य प्रेमिका का अस्ति?
उत्तरम्— वसुमती।

9. प्रश्नः— अभिज्ञानशाकुन्तले कति अंकाः सन्ति?
उत्तरम्— 7 सप्त।

10. प्रश्नः—अभिज्ञानशाकुन्तलस्यानुसारं दुष्यन्तस्य तृतीया पत्नी प्रेमिका वा का अस्ति?
उत्तरम्— शकुन्तला।

11. प्रश्नः— अभिज्ञानशाकुन्तलस्य मंगलाचरणे कालिदास कं स्तौति?
उत्तरम्— शिवम्।

12. प्रश्नः— शकुन्तला-दुष्यन्तयोः कथा कुत्र समुपलभ्यते
उत्तरम्— पद्मपुराणे।

15. **प्रश्नः**— शकुन्तलायाः सख्यौ के स्तः?
उत्तरम्— अनसूया प्रियंवदा च।

16. **प्रश्नः**— कण्वशिष्यः कः?
उत्तरम्— शार्ङ्गरवः।

17. **प्रश्नः**— प्रियंवदा कस्य सहचरी अस्ति?
उत्तरम्— शकुन्तलायाः।

18. **प्रश्नः**— अभिज्ञानशाकुन्तलस्य विदूषकस्य नाम?
उत्तरम्— माण्डव्यः।

19. **प्रश्नः**—'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तः-करणप्रवृत्तयः' उक्तिरियं कस्यास्ति?
उत्तरम्— दुष्यन्तस्य।

20. **प्रश्नः**— अभिज्ञानशाकुन्तलस्य सर्वोत्तमः अंकः कः?
उत्तरम्— चतुर्थः।

21. **प्रश्नः**— नाटकेषु रम्यं किमस्ति?
उत्तरम्— अभिज्ञानशाकुन्तलम्।

22. **प्रश्नः**— शाकुन्तलस्य उपजीव्यं किमस्ति?
उत्तरम्— महाभारतम् (आदिपर्व:)।

23. **प्रश्नः**— शाकुन्तलस्य नायकः कः?
उत्तरम्— दुष्यन्तः।

24. **प्रश्नः**— अभिज्ञान-शाकुन्तलस्य का नायिका?
उत्तरम्— शकुन्तला।

25. **प्रश्नः**— शकुन्तला कस्य पुत्री आसीत्?
उत्तरम्— विश्वामित्रस्य।

26. **प्रश्नः**—दुष्यन्तशकुन्तलयोः विवाहः कीदृशः?
उत्तरम्— गन्धर्वविवाहः।

27. **प्रश्नः**— शकुन्तलायै कः शापं ददाति?
उत्तरम्— दुर्वासा।

28. **प्रश्नः**— कस्याः अनुनयेन विनयेन सन्तुष्टः दुर्वासा शकुन्तलायाः शाप-निवृत्तेरुपायः वक्ति?
उत्तरम्— प्रियंवदायाः।

29. **प्रश्नः**— सोमतीर्थं कः गतवान्?
उत्तरम्— कण्वः।

30. **प्रश्नः**— इन्द्रस्य सारथिः कः?
उत्तरम्— मातलिः।

31. **प्रश्नः**— अभिज्ञानशाकुन्तले चतुर्थे अंके अग्निगर्भा शमी इव का अस्ति?
उत्तरम्— शकुन्तला।

32. **प्रश्नः**— शाकुन्तले प्रधानरसः कः?
उत्तरम्— शृङ्गारः।

33. **प्रश्नः**— अभिज्ञानशाकुन्तले कयोः रसयोरपूर्वसम्मेलनं विद्यते?
उत्तरम्— शृङ्गार-करुणयोः।

34. **प्रश्नः**— शकुन्तलया सह हस्तिनापुरं यावत् का गच्छति?
उत्तरम्—गौतमी।

35. **प्रश्नः**—'तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां लोको नियम्यत इवात्मदशान्तरेषु' सूक्तिरियं कुत्र समुपलभ्यते?
उत्तरम्— अभिज्ञानशाकुन्तले।

36. **प्रश्नः**— 'किमिव हि मधुराणां मण्डनं नाऽकृतीनाम्' उक्तिरियं कस्यास्ति?
उत्तरम्— दुष्यन्तस्य।

37. **प्रश्नः**— 'न प्रभातरलं ज्योतिरुदेति वसुधातलात्' सूक्तिरियं अभिज्ञानशाकुन्तलस्य कस्मिन् अंके विद्यते?
उत्तरम्— प्रथमे अंके।

38. **प्रश्नः**—'गण्डयोपरि पिटकः संवृत्तः' अभिज्ञानशाकुन्तले द्वितीयांके कस्येयमुक्तिः?
उत्तरम्— विदूषकस्य।

39. **प्रश्नः**—'अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते' कस्येयमुक्तिः?
उत्तरम्— दुष्यन्तस्य।

40. **प्रश्नः**— 'कामी स्वतां पश्यति' दुष्यन्तस्येयमुक्तिः शाकुन्तलस्य कस्मिन् अंके विद्यते?
उत्तरम्— द्वितीये अंके।

41. **प्रश्नः**— 'गान्धर्वेण विवाहेन बह्व्यो राजर्षिकन्यकाः श्रूयन्ते परिणीतास्ताः पितृभिश्चानुमोदिताः' उक्तिरियं कस्यास्ति अभिज्ञानशाकुन्तले?
उत्तरम्— दुष्यन्तस्य।

42. **प्रश्नः**—ययातेः पत्नी का आसीत्?
उत्तरम्— शर्मिष्ठा।

43. **प्रश्नः**—अभिज्ञानशाकुन्तले पुत्रकृतकः श्यामाकमुष्टि-परिवर्धितकः कः?
उत्तरम्— मृगः।

44. **प्रश्नः**—'ओदकान्तं स्निग्धो जनोऽनुगन्तव्यः' कस्येयमुक्तिः?
उत्तरम्— शार्ङ्गरवस्य।

45. **प्रश्नः**— 'गुर्वपि विरहदुःखम् आशाबन्धः साहयति' अभिज्ञानशाकुन्तले कस्येयमुक्तिः?
उत्तरम्— अनसूयायाः।

46. **प्रश्नः**— 'अर्थो हि कन्या परकीय एव' शाकुन्तले कस्येयमुक्तिः?
उत्तरम्— कण्वस्य।

47. **प्रश्नः**— 'स्त्रीणामशिक्षितपटुत्वममानुषीषु' सूक्तिरियं कुत्र समुपलभ्यते?
उत्तरम्— अभिज्ञानशाकुन्तले।

48. **प्रश्नः**—दुष्यन्तपरित्यक्ता शकुन्तला कस्याश्रमं निवसति?
उत्तरम्— मरीचाश्रमम्।

49. **प्रश्नः**— शकुन्तलापुत्रः कः?
उत्तरम्— (भरतः) सर्वदमनः।

50. **प्रश्नः**— दुष्यन्तप्रदत्तं शकुन्तलायाः अंगुलीयकं कुत्र स्खलितम्?
उत्तरम्— शचीतीर्थे।

51. **प्रश्नः**— दुष्यन्तस्य मनःस्थितिपरिज्ञानाय मेनका काम् अप्रेषयत्?
उत्तरम्— सानुमतीम्।

52. **प्रश्नः**—शाकुन्तलस्य कस्मिन् अंके दुष्यन्तेन शकुन्तलापरित्यागः प्राप्यते?
उत्तरम्— पंचमे अंके।

53. **प्रश्नः**—'भवितव्यानां द्वाराणि भवन्ति सर्वत्र' सूक्तिरियं कुत्र प्राप्यते?
उत्तरम्— अभिज्ञानशाकुन्तलस्य प्रथमे अंके।

54. **प्रश्नः**— स्वर्गात् हस्तिनापुरं आगच्छति सन्देहवाहकः कः?
उत्तरम्— मातलिः।

55. **प्रश्नः**—'अतः परीक्ष्य कर्तव्यं विशेषात् संगतं रहः' अभिज्ञानशाकुन्तले कस्येयमुक्तिः?
उत्तरम्— शार्ङ्गरवस्य।

56. **प्रश्नः**—'आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्' अभिज्ञानशाकुन्तले कस्येयमुक्तिः?
उत्तरम्— सूत्रधारस्य।

57. **प्रश्नः**— अभिज्ञानशाकुन्तलस्य भरतवाक्यं किमस्ति?
उत्तरम्— प्रवर्ततां प्रकृतिहिताय पार्थिवः, सरस्वती श्रुतिमहतां महीयताम्।

58. **प्रश्नः**—'गुर्वपि विरहदुःखमाशाबन्धः साहयति' कस्मादुद्धृतः?
उत्तरम्— अभिज्ञानशाकुन्तलात्।

59. **प्रश्नः**—'अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम्' एषोक्तिः कुत्राऽस्ति?
उत्तरम्— अभिज्ञानशाकुन्तले।

60. **प्रश्नः**— अभिज्ञानशाकुन्तले कति पात्राणि सन्ति?
उत्तरम्— 12 द्वादश पात्राणि।

61. **प्रश्नः**—अभिज्ञानशाकुन्तले कति छन्दसां प्रयोगो भवति?
उत्तरम्— 24 चतुर्विंशतिः।

62. **प्रश्नः**— अभिज्ञान-शाकुन्तलस्य चतुर्थेऽङ्के कियन्तः प्रसिद्धाः श्लोकाः सन्ति?
उत्तरम्— (4) चत्वारः।

63. **प्रश्नः**— "अचेतनं नाम गुणं न लक्षयेत्" इयं उक्तिः कस्य केन प्रति?
उत्तरम्— दुष्यन्तस्य मुद्रिकां प्रति।

64. **प्रश्नः**— अभिज्ञानशाकुन्तले मधुकरिका का?
उत्तरम्— दुष्यन्तस्य परिचायिका।

65. **प्रश्नः**—'अहो रागपरिवाहिणी गीतिः' राजा दुष्यन्तस्य कथनं कस्याः प्रशंसायां विद्यते?
उत्तरम्— हंसपदिकायाः गीतोपरि।

66. **प्रश्नः**— कालिदासस्य नाटके कस्य छन्दस्य प्रमुखता विद्यते?
उत्तरम्— आर्या-छन्दस्य।

67. **प्रश्नः**— कालिदासस्य शैली का?
उत्तरम्— ध्वन्यात्मिका।

68. **प्रश्नः**—'अभिज्ञानशाकुन्तलम्' नाटके के गुणाः विद्यते?
उत्तरम्— प्रसाद-गुणः।

69. **प्रश्नः**— शकुन्तला पत्युः चिन्तने कुत्र उपविशति स्म?
उत्तरम्— कुटिया-पार्श्वे।

70. **प्रश्नः**— शकुन्तलायाः विदाई इत्यस्य वर्णनं कस्मिन् अङ्के अस्ति?
उत्तरम्— चतुर्थे-अङ्के।

71. **प्रश्नः**— शकुन्तला राजा दुष्यन्तोपरि केन कारणेन मोहिता अभूत्?
उत्तरम्— वस्त्र-कारणेन।

72. **प्रश्नः**— दुष्यन्तः शकुन्तलायाः कया रक्षां करोति स्म?
उत्तरम्— भ्रमरेण।

73. **प्रश्नः**— 'अभिज्ञानशाकुन्तलम्' नाटके विदूषकः कः?
उत्तरम्— माण्डव्यः।

74. **प्रश्नः**—शकुन्तलायाः विदा-समये रेशमीवस्त्रं कः प्रदत्तः?
उत्तरम्— वृक्षः।

75. **प्रश्नः**— शकुन्तलायाः मुद्रिका कुत्र अपतत्?
उत्तरम्— तडागे।

76. **प्रश्नः**— दुष्यन्तस्य मनस्थितिं ज्ञातुं मेनका कां सखीं प्रेषिता?
उत्तरम्— सानुमतीम्।

77. **प्रश्नः**— 'स्त्रीणामशिक्षितपटुत्वममानुषीषु' इयं उक्तिः कस्य नाटकस्य विद्यते?
उत्तरम्—अभिज्ञानशाकुन्तलस्य पञ्चमाङ्कस्य।

78. **प्रश्नः**—अभिज्ञानशाकुन्तलस्य कस्मिन् अङ्के 'विष्कम्भक' इत्यस्य समाप्तिः भवति?
उत्तरम्— तृतीयाङ्के।

79. **प्रश्नः**—अभिज्ञानशाकुन्तलस्य सर्वप्रथम-आंग्लभाषायामनुवादः केन कृतः?
उत्तरम्— शेक्सपीयरमहोदयेन।

80. **प्रश्नः**— 'सर्वः कान्तमात्मीयं पश्यति' कस्या इयमुक्तिः?
उत्तरम्— दुष्यन्तस्य।

81. **प्रश्नः**— कालिदासस्य नाटकानां प्रतिपाद्य-विषयः कः?
उत्तरम्— शृंगारपरकः।

82. **प्रश्नः**— कालिदासस्य सर्वे नाटकस्यान्तः किं भवति?
उत्तरम्— सुखान्तः।

83. **प्रश्नः**— कालिदासस्य कथाविन्यासः कीदृशः?
उत्तरम्— श्रेष्ठः।

85. **प्रश्नः**— महर्षिकण्वस्य आश्रमः कुत्रासीत्?
उत्तरम्— मालिनीनद्याः तटे।

86. **प्रश्नः**— दुष्यन्तः यदा आश्रमे प्रविशत् तदा महर्षिः कण्वः कुत्र अगच्छत्।
उत्तरम्— सोमतीर्थे।

87. **प्रश्नः**— मारीचिऋषिः कुत्र निवसति स्म?
उत्तरम्— हेमकूटे।

88. **प्रश्नः**— 'तत्राऽपि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्' कस्य ग्रन्थस्योक्तिः?
उत्तरम्— अभिज्ञानशाकुन्तलस्य।

89. **प्रश्नः**— 'कोऽन्यो हुतवहाद्दग्धुं प्रभवति' इयं सूक्तिः कुत्रात् उद्धृतः?
उत्तरम्— अभिज्ञानशाकुन्तलम् ग्रन्थात्।

90. **प्रश्नः**— अभिज्ञानशाकुन्तले चतुर्थ-अङ्कस्य रसः कः?
उत्तरम्— विप्रलम्भ-रसः।

91. **प्रश्नः**— अभिज्ञानशाकुन्तलम् केषु विभक्तः?
उत्तरम्— अङ्केषु।

92. **प्रश्नः**— 'स्नेहपापशङ्की' एषोक्तिः कुत्राऽस्ति?
उत्तरम्— अभिज्ञानशाकुन्तले।

93. **प्रश्नः**—'यास्यत्यद्य शकुन्तलेति हृदयम्' कस्येयमुक्तिः?
उत्तरम्— कण्वस्य।

94. **प्रश्नः**— 'अचेतनं नाम गुणं न लक्षयेत्' इयं पंक्तिः कः केन कथितः?
उत्तरम्— दुष्यन्तः धीवरेण कथितः।

95. **प्रश्नः**— 'हृदये गृह्यते नारी' इयं सूक्तिः कस्य ग्रन्थस्य विद्यते?
उत्तरम्— अभिज्ञानशाकुन्तलस्य।

96. **प्रश्नः**— 'स्मरिष्यसि त्वां न स बोधितोऽपि सन्' कस्येयमुक्तिः?
उत्तरम्— दुर्वासायाः।

97. **प्रश्नः**—'अभिज्ञानशाकुन्तलम्' इत्यस्य सर्वप्रथम-अंग्रेजी-अनुवादः केन कृतः?
उत्तरम्— विलियमजोन्समहोदयेन।

98. **प्रश्नः**— 'तत्र रम्या शकुन्तला' इति श्लोकवाक्ये 'तत्र' इत्यस्य कोऽभिप्रायः?
उत्तरम्— नाटकेषु।

99. **प्रश्नः**— मेनकायाः सहचरी का आसीत्?
उत्तरम्— सानुमती।

(U) (भ) उत्तररामचरितमेवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(भ) उत्तररामचरितम्– (Uttararma-charitam) भवभूतिना विरचितं उत्तररामचरितं संस्कृत-साहित्ये नाट्यप्रतिभायाः सर्वोत्तमनिदर्शनमस्ति। भवभूतेः पितुर्नाम नीलकण्ठः, मातुर्नाम जतुकर्णी आसीत्। भट्टगोपालः तस्य पितामहः ज्ञाननिधिः गुरुश्चासीत्। सः काश्यपगोत्रीयः ब्राह्मणः आसीत्। विदर्भदेशस्थपद्मपुरनगरं तस्य जन्मस्थानं वर्तते। 'श्रीकण्ठः' तस्य उपाधिरासीत्। भवभूतिः कान्यकुब्जनृपतेः यशोवर्मणः आश्रितः आसीत्। तस्य स्थितिकालः 650 ईसवीतः 750 ईसवीयसमीपे भवेत्। महाकवेः भवभूतेः तिस्रः रचना 1. मालतीमाधवम्, 2. महावीरचरितम्, 3. उत्तररामचरितञ्च प्राप्यन्ते।

सप्ताङ्कात्मके अस्मिन् नाटके रामायणस्य उत्तरार्द्धं प्रदर्शितमस्ति। उत्तररामचरिते प्रथमाऽङ्कस्य नाम 'चित्रदर्शनम्' वर्तते। उत्तररामचरितस्य 'छाया' नामकस्य तृतीयाङ्कं विद्यते। अत्र रामस्य वनात् प्रत्यागमनानन्तरं राज्याभिषेकादारभ्य सीतामिलनपर्यन्ता सम्पूर्णकथा प्रदर्शिता अस्ति। उत्तररामचरितम् भवभूतेः नाट्यप्रतिभायाः सर्वोत्तम-निदर्शनमस्ति। रामायणमाश्रित्य सप्तांक-कथावृत्ते श्रीरामस्य राज्याभिषेकात् लोकापवादेन सीतानिर्वासनं ततश्च सीतारामसम्मेलनं यावत् कथा वर्णिताऽस्ति। उत्तररामचरिते प्रधानरसः करुणो वर्तते। मानवीयमनोभावानां विश्लेषणे मार्मिकचित्रणे च भवभूतिः अद्वितीयो वर्तते।

भवभूतेः प्रत्येकमपि पात्रं सांस्कृतिकादर्शम् उपस्थापयति। यथा–रामे कर्तव्यनिष्ठ, सीतायाम् आदर्शस्त्रीत्वं, लवकुशादिषु क्षत्रियोचितवीरत्वं, वाल्मीकौ शान्तिसद्भावना च प्रस्फुटीभवति। विदूषकस्याभावात् नाटके गाम्भीर्यं परिलक्ष्यते। इत्थं भवभूतेः नाट्यपात्रेषु गम्भीरता, आदर्शवादिता, आत्मसंयमः, कर्तव्यनिष्ठभावना सर्वत्र दृश्यते।

(U) (भ) उत्तररामचरितम्-इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— महाकवेः भवभूतेः कति रूपकाः समुपस्थिताः, के च ते?
उत्तरम्— (03) त्रयः, 1. उत्तररामचरितम्, 2. मालतीमाधवम्, 3. महावीरचरितम्।

2. **प्रश्नः**— भवभूतेः पितुर्नाम किम्?
उत्तरम्—नीलकण्ठः।

3. **प्रश्नः**— भवभूतेः मातुर्नाम किम्?
उत्तरम्— जतुकर्णी।

4. **प्रश्नः**— भवभूतेः पितामहस्य नाम किम्?
उत्तरम्— गोपालभट्टः।

5. **प्रश्नः**— उत्तररामचरितम् इत्यत्र सर्वाधिक-प्रयुक्त-छन्दः कः?
उत्तरम्— अनुष्टुप्-छन्दः।

6. **प्रश्नः**— भवभूतिः कस्य शिष्यः?
उत्तरम्— कुमारिलभट्टस्य।

7. **प्रश्नः**— भवभूतिः कस्य राज्याश्रितः?
उत्तरम्— यमोवर्मणः।

8. **प्रश्नः**— उत्तररामचरिते अङ्गीरसः कः?
उत्तरम्— करुणरसः।

9. **प्रश्नः**— उत्तररामचरिते कति अंकाः सन्ति?
उत्तरम्— (7) सप्त।

10. **प्रश्नः**— रामायणस्योत्तरकाण्डकथाधारितं नाटकं किमस्ति?
उत्तरम्— उत्तररामचरितम्।

11. प्रश्नः— चन्द्रकेतुः कस्य पुत्रः आसीत्?
उत्तरम्— लक्ष्मणस्य।

12. प्रश्नः— जृम्भकास्त्रं केन प्रयुक्तम्?
उत्तरम्— लवेण।

13. प्रश्नः— रामेण कः यागः विहितः?
उत्तरम्— अश्वमेधः।

14. प्रश्नः— उत्तररामचरितं दुःखान्तं सुखान्तं वा?
उत्तरम्— सुखान्तम्।

15. प्रश्नः— उत्तररामचरितस्य कं अङ्कं छायांकं कथ्यते?
उत्तरम्— तृतीयः।

16. प्रश्नः— चन्द्रकेतोः सारथिः कः आसीत्?
उत्तरम्— सुमन्त्रः।

17. प्रश्नः— उत्तररामचरितस्य नायिका का अस्ति?
उत्तरम्— सीता।

18. प्रश्नः— उत्तररामचरितस्य नायकः कः अस्ति?
उत्तरम्— श्रीरामः।

19. प्रश्नः— सीता गर्भावस्थायां कुत्राऽऽसीत्?
उत्तरम्—वाल्मीकेराश्रमे।

20. प्रश्नः— कस्य नाटके विदूषकस्य सर्वथा अभावः दरीदृश्यते?
उत्तरम्— भवभूतेः।

21. प्रश्नः— उत्तररामचरिते 'पंचवटीप्रवेशः' कस्यांकस्य अभियानमस्ति?
उत्तरम्— द्वितीयस्य।

22. प्रश्नः— उत्तररामचरिते किं नाम तृतीयोऽङ्कः?
उत्तरम्— छायाङ्कः।

23. प्रश्नः— भवभूतेः उत्तररामचरितस्य चतुर्थांकस्य का संज्ञा?
उत्तरम्— कौशल्याजनकयोगः।

24. प्रश्नः— उत्तररामचरितस्य कस्मिन् अंके 'कुमारविक्रमः' प्रदर्शितः?
उत्तरम्— पंचमे।

25. प्रश्नः— उत्तररामचरिते षष्ठांकस्य प्रतिपाद्यविषयः कः?
उत्तरम्— कुमारप्रत्यभिज्ञानम्।

26. प्रश्नः— उत्तररामचरिते किं नाम सप्तमः अंकः?
उत्तरम्— (गर्भाङ्कः) सम्मेलनम्।

27. प्रश्नः— उत्तररामचरितानुसारं राज्ञः दशरथस्य पुत्री का अस्ति?
उत्तरम्— शान्ता।

28. प्रश्नः—उत्तररामचरितानुसारं राजा दशरथः अपत्यकृतिकां शान्तां कस्मै ददौ?
उत्तरम्— लोमपादाय।

29. प्रश्नः— राजा लोमपादः अपत्यकृतिका-शान्तायाः विवाहः केन सह कृतवान्?
उत्तरम्— ऋष्यशृंगेण सह।

30. प्रश्नः— 'अष्टावक्रः' कस्य पात्रविशेषः?
उत्तरम्— उत्तररामचरितस्य।

31. प्रश्नः— 'ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति' उत्तररामचरिते कस्येयमुक्तिः?
उत्तरम्— रामस्य।

32. प्रश्नः— सीताविषयकः लोकापवादः रामाय कः निवेदयति?
उत्तरम्— दुर्मुखः।

33. प्रश्नः— रामस्य कौ पुत्रौ आस्ताम्?
उत्तरम्— लवकुशौ।

34. प्रश्नः— शम्बूकवधः कस्मिन् नाटके प्राप्यते?
उत्तरम्— उत्तररामचरिते।

35. प्रश्नः— 'पुटपाकप्रतीकाशो रामस्य करुणो रसः' उत्तररामचरिते तृतीये अंके कस्येयमुक्तिः?
उत्तरम्— मुरलायाः।

36. प्रश्नः— 'पुरन्ध्रीणां चित्तं कुसुमसुकुमारं हि भवति' उत्तररामचरिते चतुर्थे अंके कस्येयमुक्तिः?
उत्तरम्— अरुन्धत्याः।

37. प्रश्नः— उत्तररामचरिते गर्भांकाभिधानः अंकविशेषः कः?
उत्तरम्— सप्तमः अंकः।

38. प्रश्नः—'एको रसः करुण एव' इति सूक्तिसम्बद्ध-ग्रन्थविशेषः कः?
उत्तरम्— उत्तररामचरितम्।

39. प्रश्नः—उत्तररामचरितस्य तृतीयांके श्रीरामः स्वमनोव्यथां कस्यै निवेदयति?
उत्तरम्— वासन्त्यै।

40. प्रश्नः— 'गुणाः पूजास्थानं गुणिषु न च लिंगं न च वयः' सूक्तिरियं कस्मिन् नाटके विद्यते?
उत्तरम्— उत्तररामचरिते।

41. प्रश्नः— 'अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्' उत्तररामचरिते प्रथमांके कस्येयमुक्तिः?
उत्तरम्— लक्ष्मणस्य।

42. प्रश्नः— 'हृदयं त्वेव जानाति प्रीतियोगं परस्परम्' उत्तररामचरितस्य षष्ठांके कस्येयमुक्तिः?
उत्तरम्— कुशस्य।

43. प्रश्नः— 'शोकक्षोभे च हृदयं प्रलापैरेव धार्यते' कुत्र शोभितोक्तिः?
उत्तरम्— उत्तररामचरिते।

44. प्रश्नः—संस्कृतनाटकजगति करुणरसप्रधानं नाटकं किम्?
उत्तरम्— उत्तररामचरितम्।

45. प्रश्नः— गर्भांकः कस्मिन् नाटके विद्यते?
उत्तरम्— उत्तररामचरिते।

46. प्रश्नः— भवभूतेः उत्तररामचरिते नाटके प्रमुखः छन्दः कः?
उत्तरम्— अनुष्टुप्-शिखरिणी च।

47. प्रश्नः— 'त्वं जीवितं त्वमसि मे हृदयं द्वितीयं' इयं सूक्तिः कुतः उद्धृतः?
उत्तरम्— उत्तररामचरितं ग्रन्थात्।

48. प्रश्नः— भवभूतेः उत्तररामचरिते किं नाम प्रथमोऽङ्कस्य?
उत्तरम्— चित्रदर्शनम्।

49. प्रश्नः— 'कालो ह्ययं निरवधिर्विपुला च पृथ्वी' उत्तररामचरिते कस्येयमुक्तिः?
उत्तरम्— भवभूतेः।

50. प्रश्नः—'अविदितगतयामा रात्रिरेवं व्यरंसीत्' उत्तररामचरिते कस्येयमुक्तिः?
उत्तरम्— रामस्य।

51. प्रश्नः— 'वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे' इयमुक्तिः केन नाटकेन सम्बद्धः?
उत्तरम्— उत्तररामचरितेन।

52. प्रश्नः— महाकवेः भवभूतेः स्थितिकालः किम्?
उत्तरम्— 650 ईसवीतः 750 ईसवीयसमीपे।

(U) (म) मुद्राराक्षसम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(म) मुद्राराक्षसम् (Mudrarakshasam)

विशाखदत्तनामा नाट्यकारः, यः कूटनीतिं, राजनीतिञ्चाश्रित्य मुद्राराक्षसं नाटकं निर्मितवान्। विशाखदत्तस्य पितामहः श्रीवटेश्वरदत्तः, पिता चास्य भास्करदत्तः आसीत्। विशाखदत्तः कौटिल्यार्थशास्त्रस्य शुक्रनीतिशास्त्रस्य च प्रकाण्डविद्वान् आसीत्। ज्योतिःदर्शनन्यायशास्त्रेषु चास्य नैपुण्यं दृश्यते। विशाखदत्तस्य एतानि नाटकानि प्राप्यन्ते-1. मुद्राराक्षसम्, 2. देवीचन्द्रगुप्तम्, 3. अभिसारितवञ्चितकम्।

वराहमिहिरात् पूर्वं पञ्चमशताब्द्यां विशाखदत्तस्य समयः स्वीकरणीयम् इति न्यायसङ्गतं प्रतिभाति। मुद्राराक्षसे चाणक्यराक्षसौ निजकूटनीत्या विलक्षणं राजनीतिकयुद्धं सन्दर्श्य दर्शकान् मोहयतः। अतः मुद्राराक्षसं संस्कृतनाटकेषु निःसन्देहमद्वितीयनाटकमिति निश्चप्रचम्। मुद्राराक्षसे विशाखदत्तस्य शैली पुरुषार्थपूर्णास्ति। मुख्यो रसः वीरः।

(U) (म) मुद्राराक्षसस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः— विशाखदत्तस्य मुद्राराक्षसे कति अंकाः सन्ति?
उत्तरम्— (7) सप्त।

2. प्रश्नः— विशाखदत्तस्य पितामहः कः आसीत्?
उत्तरम्— वटेश्वरदत्तः।

3. प्रश्नः— विशाखदत्तस्य पिता कः आसीत्?
उत्तरम्— भास्करदत्तः।

4. प्रश्नः— केषां शास्त्राणां पण्डितो विशाखदत्तः आसीत्?
उत्तरम्—अर्थशास्त्र-शुक्रनीति-दर्शनशास्त्र- ज्यौतिषाम्।

5. प्रश्नः— मुद्राराक्षसं किंविषयकमस्ति?
उत्तरम्— राजनीतिविषयकम्।

6. प्रश्नः— मुद्रिकया कः गृहीतः?
उत्तरम्— राक्षसः।

7. **प्रश्नः**— राक्षसस्य मित्रं कः अस्ति?
उत्तरम्— चन्दनदासः।

8. **प्रश्नः**— चन्द्रगुप्तस्य मंत्री कः आसीत्?
उत्तरम्— चाणक्यः।

9. **प्रश्नः**— नन्दस्य अमात्यः कः?
उत्तरम्— राक्षसः।

10. **प्रश्नः**— नन्दस्य पराजयानन्तरं को राजा बभूव?
उत्तरम्— चन्द्रगुप्तमौर्यः।

11. **प्रश्नः**— मुद्रया को गृहीतः?
उत्तरम्— राक्षसः।

12. **प्रश्नः**— चन्द्रगुप्तः कीदृशो नायकः?
उत्तरम्— धीरोदात्तः।

13. **प्रश्नः**— मलयकेतोः पिता कः आसीत्?
उत्तरम्— पर्वतकः।

14. **प्रश्नः**— मुद्राराक्षसस्य अङ्गीरसः कः?
उत्तरम्— वीरः।

15. **प्रश्नः**— मुद्राराक्षसे मंगलाचरणे पूर्वरङ्गे कस्य स्तुतिः प्राप्यते?
उत्तरम्— शिवस्य।

16. **प्रश्नः**— राज्ञश्चन्द्रगुप्तस्य राज्यशासनकाले महामात्यः कः?
उत्तरम्— चाणक्यः।

17. **प्रश्नः**— 'मुद्रालाभाख्यः' अंकविशेषः मुद्राराक्षसे कः?
उत्तरम्— प्रथमः।

18. **प्रश्नः**— मुद्राराक्षसस्य द्वितीयांकस्य का संज्ञा?
उत्तरम्— राक्षसविचारः।

19. **प्रश्नः**— मुद्राराक्षसे किं नाम तृतीयोऽङ्कः?
उत्तरम्— कृतकलहः।

20. **प्रश्नः**— मुद्राराक्षसे 'राक्षसोद्योगनामकः' अंकः कः?
उत्तरम्— चतुर्थः।

21. **प्रश्नः**— मुद्राराक्षसे राक्षसनिकारो नाम अंकः कः?
उत्तरम्— पंचमः।

22. **प्रश्नः**— मुद्राराक्षसस्य षष्ठांकस्य का संज्ञा?
उत्तरम्— राक्षसनिर्वेदः।

23. **प्रश्नः**— मुद्राराक्षसस्य सप्तमः अंकः केन अभिधानेन अभिहितः?
उत्तरम्— राक्षसनिग्रहः।

24. **प्रश्नः**— चाणक्यस्य पितृप्रदत्तनाम किम् अस्ति?
उत्तरम्— विष्णुगुप्तः।

25. **प्रश्नः**— नन्दसाम्राज्ये कुसुमपुरे नन्दस्य महामात्यः कः आसीत्?
उत्तरम्— राक्षसः।

26. **प्रश्नः**— मुद्राराक्षसे 'शार्ङ्गरवः' कः?
उत्तरम्— चाणक्यशिष्यः।

27. **प्रश्नः**— मुद्राराक्षसे यमपटचरः निपुणकः कः?
उत्तरम्— चाणक्यचरः।

28. **प्रश्नः**— मुद्राराक्षसे सिद्धार्थकः कः?
उत्तरम्— चाणक्यस्य गुप्तचरः।

29. **प्रश्नः**— मुद्राराक्षसे किं नाम मणिकारश्रेष्ठी राक्षसस्य मित्रम्?
उत्तरम्— चन्दनदासः।

30. **प्रश्नः**— मुद्राराक्षसे 'पर्वतकः' कः?
उत्तरम्— मलयकेतोः पिता।

31. **प्रश्नः**—कौटिल्यप्रयुक्तेन विषकन्याप्रयोगेण मृत्युलाभमकरोत्?
उत्तरम्— पर्वतकः।

32. **प्रश्नः**— कौटिल्यस्य कूटनीतिप्रयोगेण पञ्चत्वं गतः पर्वतकस्य भ्राता कः?
उत्तरम्— वैरोधकः।

33. **प्रश्नः**— वराकस्य सर्वार्थसिद्धेः वधमकारयत्?
उत्तरम्— चाणक्यः।

34. **प्रश्नः**— चाणक्यचरः मलयकेतोः छद्ममित्रं च कः अस्ति मुद्राराक्षसे?
उत्तरम्— भागुरायणः।

35. **प्रश्नः**—राक्षसस्य परिवारः कस्य गृहे न्यासरूपेण संरक्षितः मुद्राराक्षसे?
उत्तरम्— चन्दनदासस्य।

36. **प्रश्नः**—चाणक्ययोजनानुसारं सिद्धार्थकप्रयासेन कपटलेखः केन लिखितः स्वहस्तेन?
उत्तरम्— शटकदासेन।

37. **प्रश्नः**— राक्षसस्य मुद्रा कुतः प्राप्यते?
उत्तरम्— चन्दनदासगृहतः।

38. **प्रश्नः**— किं नाम आहितुण्डिकः राक्षसचरः?
उत्तरम्— विराधगुप्तः।

39. **प्रश्नः**— किं नाम मलयकेतोः कञ्चुकी?
उत्तरम्— जाजलिः।

40. **प्रश्नः**— मुद्राराक्षसे किं नाम शटकदासः?
उत्तरम्— राक्षसस्य मित्रम्।

41. **प्रश्नः**— मुद्राराक्षसे क्षपणकजीवसिद्धिः कः?
उत्तरम्— चाणक्यमित्रम् इन्दुशर्मा।

42. **प्रश्नः**— किं नाम चन्द्रगुप्तस्य कञ्चुकी?
उत्तरम्— वैहीनरः।

43. **प्रश्नः**— चन्द्रगुप्तमौर्यभ्रान्त्या वैरोधकस्य हन्ता कः?
उत्तरम्— दारुवर्मा।

44. **प्रश्नः**— विषप्रदानेन चन्द्रगुप्तमौर्यवधाय राक्षसेण नियुक्तः कः आसीत्?
उत्तरम्— वैद्यः अभयदत्तः।

45. **प्रश्नः**— प्राणदण्डेन दण्डितस्य शकटदासस्य प्राणरक्षकः कः?
उत्तरम्— सिद्धार्थकः।

46. **प्रश्नः**— स्वर्गगतस्य पर्वतकस्य आभूषणान् कस्मै प्रददाति चन्द्रगुप्तमौर्यः?
उत्तरम्— विश्वावसवे।

47. **प्रश्नः**— मुद्राराक्षसे किं नाम वृषलः?
उत्तरम्— मुरापुत्रचन्द्रगुप्तमौर्यः।

48. **प्रश्नः**— मुद्राराक्षसे भेदनीतिनिपुणः स्तनकलशः कः?
उत्तरम्— चन्द्रगुप्तचरः।

49. **प्रश्नः**—कौमुदीमहोत्सवस्य निषेधः केन कृतः कुसुमपुरे?
उत्तरम्— चाणक्येन।

50. **प्रश्नः**— मुद्राराक्षसे का नाम 'कुटुम्बिनी'?
उत्तरम्— चन्दनदासस्य पत्नी।

51. **प्रश्नः**— मुद्राराक्षसे विदूषकः अस्ति वा न वा?
उत्तरम्— नास्ति।

52. **प्रश्नः**— मुद्राराक्षसस्य नायिका का?
उत्तरम्— न कापि।

53. **प्रश्नः**— मुद्राराक्षसे विश्वावसोः पर्वतकाभूषणान् कः क्रीणाति?
उत्तरम्— राक्षसः।

54. **प्रश्नः**— 'नहि सर्वः सर्वं जानाति' सूक्तिरियं कुत्र समुपलभ्यते?
उत्तरम्— मुद्राराक्षसे।

55. **प्रश्नः**— 'उपरि धनं धनरहितं दूरे दयिता' कस्मादुद्धृतः?
उत्तरम्— मुद्राराक्षसात्।

56. **प्रश्नः**—एकमेव 'स्त्रीपात्रं' कस्मिन् नाटके वर्तते?
उत्तरम्— मुद्राराक्षसे।

57. **प्रश्नः**— मुद्राराक्षसस्य नायकः कः?
उत्तरम्— चन्द्रगुप्तः।

58. **प्रश्नः**— चाणक्यस्य चन्द्रगुप्तः कः आसीत्?
उत्तरम्— शिष्यः।

59. **प्रश्नः**— विशाखदत्तस्य द्वितीया नाट्यकृतिः काऽस्ति?
उत्तरम्— देवीचन्द्रगुप्तम्।

60. **प्रश्नः**— विशाखदत्तस्य तृतीया नाट्यकृतिः काऽस्ति?
उत्तरम्— अभिसारिका-वञ्चितकम्।

61. **प्रश्नः**— 'ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते' इति केन नाटकेन सम्बद्धः?
उत्तरम्— मुद्राराक्षसेन।

62. **प्रश्नः**— 'पुरन्ध्रीणां प्रज्ञा पुरुषगुणविज्ञानविमुखी' मुद्राराक्षसे कस्योक्तिः?
उत्तरम्— राक्षसस्य।

63. **प्रश्नः**— 'नन्दोन्मूलनदृष्टिवीर्यमहिमा बुद्धिस्तु म गान्मम' इति केन नाटकेन सम्बद्धः?
उत्तरम्— मुद्राराक्षसेन।

64. **प्रश्नः**— मुद्राराक्षसनाटकस्य उपजीव्यं किम्?
उत्तरम्— विष्णुपुराणम्।

65. **प्रश्नः**— विशाखदत्तस्य कालः कः?
उत्तरम्— 300A.D-400A.D

(U) (य) रत्नावली एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(य) रत्नावली (Ratnavali) रत्नावली अस्य ग्रन्थस्य लेखकः श्रीहर्षदेवः आसीत्। श्रीहर्षदेवस्य जन्म कुरुक्षेत्रसमीपे थाणेश्वरे 590 ईस्व्यां बभूव। श्रीहर्षदेवस्य पिता महाराजः प्रभाकरवर्द्धनः, माता च यशोमती आसीत्। सम्राट् श्रीहर्षः उदारहृदयः, विद्वान्, कविश्चासीत्। श्रीहर्षदेवस्य प्रमुखतया तिस्रः रचनाः आसन्–1. रत्नावलीनाटिका, 2. प्रियदर्शिकानाटिका, 3. नागानन्दनाटकञ्च। चतुर्णामङ्कानां निबद्धायाः रत्नावलीनाटिकायाः प्रधानो रसः शृङ्गारः, नायकः उदयनः, नायिका रत्नावली (सागरिका) चास्ति। अस्याः अमात्यः यौगन्धरायणः, राज्ञी वासवदत्ता, वसन्तक विदूषकः, बाभ्रव्यः, वसूभूतिः, कञ्चनमाला, सुसंगता, ऐन्द्रजालिकाश्च सन्ति। सागरिकायाः रूपलावण्येन शङ्किता राज्ञी वासवदत्ता एतां सर्वदा उदयनात् दूरं गोपयति, किन्तु राजा उदयनः चित्रफलकदर्शनेन सागरिकायाम् आसक्तो भवति। राज्ञी सागरिकां कारागारे निगडबद्धां करोति। किन्तु यदा वासवदत्ता जानाति यत् सागरिका (रत्नावली) तस्याः मातुलस्य पुत्री वर्तते, रत्नावल्याः पतिः चक्रवर्ती सम्राट् भविष्यति इति सिद्धपुरुषेण उक्तम्, तदा सा राजानम् उदयनं तया सह विवाहं कर्तुं अनुमतिं प्रददाति। इयं नाटिका संस्कृतसाहित्ये महत्त्वपूर्णस्थानं प्राप्नोति।

(U) (य) रत्नावल्ल्याः वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— श्रीहर्षविरचितानि नाटकानि कति?
   उत्तरम्—त्रीणि, 1. प्रियदर्शिका, 2. रत्नावली, 3. नागानन्दम्।
2. **प्रश्नः**—प्रख्यातस्य 'उदयनस्य' प्रणयसम्बद्धा शृङ्गार-रसप्रधाना नाटिका का?
   उत्तरम्— रत्नावली।
3. **प्रश्नः**— रत्नावल्यां कियन्तोऽङ्काः सन्ति?
   उत्तरम्— (4) चत्वारः।
4. **प्रश्नः**— 'दुरवगाह्य गतिर्दैवस्य' रत्नावल्यां चतुर्थे अंके कस्येयमुक्तिः?
   उत्तरम्— राज्ञः उदयनस्य।
5. **प्रश्नः**—'आनीय झटिति घटयति विधिरभिमतम-भिमुखीभूतः' रत्नावल्यां नाटिकायां प्रथमांके कस्येयमुक्तिः?
   उत्तरम्— सूत्रधारस्य।
6. **प्रश्नः**—'अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः' इति सूक्तिविशिष्टग्रन्थविशेषः कः?
   उत्तरम्— रत्नावली।
7. **प्रश्नः**— रत्नावल्याः नायकः उदयनः नाट्यशास्त्रदृष्ट्या कीदृग् नायकः?
   उत्तरम्— धीरललितः।
8. **प्रश्नः**— रत्नावल्याः मंगलाचरणे पूर्वरंगे कस्य स्तुतिः प्राप्यते?
   उत्तरम्— शिवस्य।
9. **प्रश्नः**—रत्नावल्यां नाटिकायां रत्नावल्याः सहचरी का अस्ति?
   उत्तरम्— सुसंगता।
10. **प्रश्नः**— रत्नावली-नाटिकायाः विदूषकः कः?
    उत्तरम्— वसन्तकः।
11. **प्रश्नः**— रत्नावली' नाटिकायां कयोः प्रणयवर्णनमस्ति?
    उत्तरम्— उदयनसागरिकयोः।
12. **प्रश्नः**— रत्नावल्याः पिता कः?
    उत्तरम्— विक्रमबाहु।
13. **प्रश्नः**— रत्नावली-नाटिकायाः नायकः कः?
    उत्तरम्— कौशाम्बीनरेशः उदयनः।
14. **प्रश्नः**— रत्नावल्यां नाटिकायां रत्नावली केनाभिधानेन छद्मवेषेण स्वभूमिकां उपचरति?
    उत्तरम्— सागरिका।
15. **प्रश्नः**— रत्नावली कस्य रचना अस्ति?
    उत्तरम्— हर्षस्य।
16. **प्रश्नः**— रत्नावल्याः उपरूपकविधा का अस्ति?
    उत्तरम्— नाटिका।
17. **प्रश्नः**— 'रत्नावली' कस्य देशस्य राजकन्या अस्ति?
    उत्तरम्— सिंहलदेशस्य।
18. **प्रश्नः**— 'रत्नावली' इति ग्रन्थे उदयनस्य रानी का आसीत्?
    उत्तरम्— वासवदत्ता।

19. **प्रश्नः**— प्रकृष्टस्य प्रेम्णः स्खलितमविषयस्य हि भवति' इयमुक्तिः रत्नावल्या केन अङ्केन सम्बद्धः?
    उत्तरम्— तृतीयाङ्केन।
20. **प्रश्नः**— रत्नावली-नाटिकायाः नायिका का?
    उत्तरम्— सागरिका।
21. **प्रश्नः**— रत्नावली-नाटिकायाः उपजीव्यग्रन्थः कः?
    उत्तरम्— बृहत्कथा।
22. **प्रश्नः**— कौशाम्बीनरेशस्य उदयनस्य मन्त्री कः?
    उत्तरम्— यौगन्धरायणः।
23. **प्रश्नः**— सिंहलेश्वरस्य विक्रमबाहोः मन्त्री कः?
    उत्तरम्— वसुभूतिः।
24. **प्रश्नः**— उदयनस्य प्रथम-पत्नी का?
    उत्तरम्— वासवदत्ता।
25. **प्रश्नः**— विक्रमबाहोः सिंहलेश्वरस्य कञ्चुकी का?
    उत्तरम्— बाभ्रव्यः।

(U) (र) कर्णभारम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(र) कर्णभारम्–

यस्याश्चौरश्चिकुरनिकरः कर्णपूरो मयूरः।
भासो हासः कविकुलगुरुः कालिदासो विलासः॥

संस्कृतनाट्यसाहित्ये महाकविः भासः अन्यतमं स्थानं धत्ते। भासस्य स्थितिकालविषये पण्डिताः सम्प्रत्यपि नैकमत्यं भजन्ते। कालिदासात्पूर्वं भासस्य नाट्यग्रन्था एवाद्य लभ्यन्ते। सा च प्राचीनतायां कालिदासादपि प्राचीनमिमं साधयन्ती 100 ई० पूर्वमितं कालं भासस्य बोधयति।

महाकवि भासस्य रचना–भासः संस्कृतसाहित्यस्य प्रथमनाटककारः विद्यते। तात्पर्यमिदं यत् सम्प्रति उपलब्धेषु नाटकेषु भासस्य एव नाटकानि प्राचीनतमानि। भासनाटकसंग्रहः नाटकचक्रनाम्ना प्रसिद्धः। त्रयोदशानां नाटकानां संक्षिप्तः परिचयः अधः प्रस्तूयते–

1. प्रतिज्ञायौगन्धरायणम्, 2. स्वप्नवासवदत्तम्, 3. अविमारकम्, 4. प्रतिभानाटकम्, 5. अभिषेकनाटकम्, 6. मध्यमव्यायोगः, 7. पञ्चरात्रम्, 8. दूतवाक्यम्, 9. दूतघटोत्कचम्, 10. कर्णभारम्-एकाङ्कं नाटकमिदम्। अस्मिन् इन्द्राय कर्णेन कवचकुण्डलयोः वर्णनं विद्यते। 11. ऊरुभङ्गम्, 12. बालचरितम्–13. दरिद्रचारुदत्तम्।

भासस्य नाटकानाम् अनेकता विविधता च तस्य मौलिकतायाः नाट्यकुशलतायाः च परिचयं साधु ददाति। भासस्य सर्वाणि नाटकानि रंगमंचाय एव रचितानि विद्यन्ते। संस्कृतभाषायां एकांकीनाटकानां सर्वप्रथमं रचयिता भास एव। चरित्रचित्रणेऽपि कविः कुशलः। भासस्य प्रकृतिचित्रणमपि सुन्दरं स्वाभाविकं चास्ति। अलङ्काराणां चयने नवरसानां चित्रणे च भासः सिद्धहस्तः। रसाभिव्यक्तौ भासस्य नाटकेषु शृङ्गार-वीरकरुणत्रयाणां रसानां सुन्दरपरिपाको दरीदृश्यते। भासस्य कविता मनोवैज्ञानिकाकर्षणेन सहृदयानां मनांसि मोहयति।

भासस्य भाषितभाषाप्रयोगः भाषासौष्ठवं, सरला किन्तु सरसा शैली, रसपरिपाकश्च शब्दाडम्बरशून्यता, कथाप्रवाहश्च सर्वे सम्भूय तं हि पण्डितयुगान्तितान्तपूर्ववर्तिनं सूचयन्ति। भासस्य नाटकेषु कथानकस्य संघटनं चरित्रचित्रणं कथोपकथनं रससंयोजनं भाषा शैली च हृदयग्राहिणी आकर्षका उपयुक्ता समीचीना विद्यते।

कर्णभारम् इत्यस्य संक्षिप्तकथावस्तु–

नाटके नान्दीपाठेपरान्ते सूत्रधारः निर्देशयति यत् दुर्योधनस्य दूतः कर्णपार्श्वे वदति यत् आसन्नो युद्धावसरः। स्वयमेव सांग्रामिकेण वेषेण सज्जितम् आयान्तं कर्णं विलोक्य दूतस्य चिन्ता जागर्ति। सः स्वयमेव शल्यराजेन सह युद्धक्षेत्रदिशि प्रस्थानं करोति स्म। सः महाराजशल्यं प्रति कथयति। कर्णश्च मात्रा कुन्त्या सह वचनबद्ध आसीत् इति प्रबोधयत्। कर्णो महान् योद्धा वर्तते; अतः मुहुर्मुहुः सारथिं शल्यराजं प्रेरयति यत् मदीयं रथं तत्रैव नय यत्र अर्जुनो विद्यते। ततः याचकरूपे विप्रवेषं धृत्वा इन्द्रः समागच्छति। इन्द्रः कर्णात् दानीयवस्तुमध्ये गाम्, अश्वं, गजं, सुवर्णं, भूमिम् इत्यादिकं न किञ्चिदपि इच्छति। अन्ते च कर्णस्य अभेद्यं कवचं कुण्डलं च गृहीत्वा एव तुष्यति। दानं प्रदाय पुनः तद्धरणं न्यायविरुद्धमिति विचार्य महाराजशल्येन दानाऽवरोधे कृतेऽपि कवचकुण्डले इन्द्राय प्रददाति। तत्पश्चाच्च इन्द्रेण दैवीशक्तिं कर्णाय प्रेषितः। अस्मिन् नाटके महाकविः भासः कर्णस्य व्यथा वर्णितः। स्व-व्यथां कर्णः महाराजशल्येन कथितः।

अस्त्रवृत्तान्तश्रावणप्रसङ्गे परशुरामः कर्णं 'कालविफलान्यस्त्राणि ते' इति शशाप, एतत् श्रुत्वा शल्यराजः खेदं प्रकटयति, तदा कर्णेन कथ्यते- अलमलं विषादेन; संग्रामे हतोऽपि स्वर्गलोकं लभते। रणं विजित्य तु कीर्तिं प्राप्यते। अतः कदाचिदपि रणे निष्फलता न वर्तते। अर्थात् युद्धक्षेत्रे मरणमपि गौरवपूर्णं वीरत्वसूचकञ्च, तेन वीराः स्वर्गगामिनः भवन्ति। कर्णस्य दानवीरतया प्रसन्नो इन्द्रः 'सूर्य इव चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः इत्येवं आशीर्वचनमेव युक्तम्' इति। अत्र शल्यराजेन वारितोऽपि दानस्य एव माहात्म्यं प्रतिपादयति कर्णः।

(U) (र) कर्णभारम् इत्यस्यवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— 'कर्णभारम्' नाटकस्य लेखकः कः?
   उत्तरम्—महाकविः भासः।
2. **प्रश्नः**—'कर्णभारम्' नाटकस्य नायकः कः?
   उत्तरम्—कर्णः।
3. **प्रश्नः**—ज्येष्ठकौन्तेयः कः आसीत्?
   उत्तरम्—कर्णः।
4. **प्रश्नः**—कर्णभारस्य उपजीव्यम् किम्?
   उत्तरम्—महाभारतम्।
5. **प्रश्नः**— राधेयः कः आसीत्?
   उत्तरम्—कर्णः।
6. **प्रश्नः**— गुरुपरशुराम-शापितः महारथी कः?
   उत्तरम्—कर्णः।
7. **प्रश्नः**— कर्णभारस्य नाट्यविधा कास्ति?
   उत्तरम्—एकांकी।
8. **प्रश्नः**— कर्णस्य सारथी कः आसीत्?
   उत्तरम्—शल्यराजः।
9. **प्रश्नः**— कर्णस्य कवचकुण्डलौ केन याचितः?
   उत्तरम्—विप्रवेषं धृत्वा इन्द्रः।
10. **प्रश्नः**— महाकवि भास कृतनाटकानां काः संख्या?
    उत्तरम्—13 त्रयोदशम्।
11. **प्रश्नः**— कर्णस्य दानवीरतया प्रसन्नो इन्द्रः तं किं आशीर्वादं प्रदत्तः?
    उत्तरम्—'सूर्य इव चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः इत्येवं आशीर्वचनमेव युक्तम्'।

(U) (ल) नाट्यशास्त्रम् (प्रथम, द्वितीय, षष्ठ, अध्यायः) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(ल) नाट्यशास्त्रम् (प्रथमः, द्वितीयः, षष्ठः अध्यायः) भरतमुनेः कालस्य निर्णयः सर्वथा दुरूहो विषयो वर्तते। समयस्य विषये विद्वत्सु ऐकमत्यं नास्ति। 1. अभिनवगुप्तः 'अभिनवभारती' नाम्नीं नाट्यशास्त्रस्य व्याख्यां ईस्व्याः एकादशशताब्द्यां चकार। कालिदासः विक्रमोर्वशीयनाटकस्य 2/98 श्लोके भरतमुनिना शब्देन भरतस्य नामग्रहमुल्लेखं चकार। तथाहि-

मुनिना भरतेन यः प्रयोगो
भवतीष्वष्टरसाश्रयः प्रयुक्तः।
ललिताभिनयं तमद्य भर्त्ता-
मरुतां द्रष्टुमनाः सलोकपालः।। इति।

भरतमुनिः कालिदासात् पूर्ववर्ती सिद्ध्यति। अन्यबहवो विद्वांसः भरतस्य समयं विक्रमपूर्वस्य 500 वत्सरेभ्य आरभ्य प्रथमशताब्दीं यावत् स्वीकुर्वन्ति। संस्कृतसाहित्ये जगति आचार्यभरतमुनेः विशिष्टं स्थानं वर्तते। भरतमुनिः नाट्यशास्त्रस्य प्रणेता विद्यते। नाट्यशास्त्रस्य आंग्लानुवादको मनमोहनघोषः कथयति यत्- 'भरतमुनिः एकः काल्पनिकपुरुषो वर्तते।'

भरतमुनेः 'नाट्यशास्त्रम्' एक एव ग्रन्थो समुपलभ्यते। सम्पूर्णोऽयं ग्रन्थः (36) षट्त्रिंशत् अध्यायेषु समुपलभ्यते। अस्मिन् ग्रन्थे (6000) षट्सहस्रसंख्याकाः श्लोकाः सन्ति। अत्र बहवस्तु अनुष्टुप् कुत्रचित् आर्याछन्दांसि प्रयुक्ता श्लोकाः सन्ति। नाट्यशास्त्रे सप्तत्रिंशत् अध्यायाः सन्ति। नाट्यशास्त्रे छन्दःशास्त्र-अलंकारशास्त्र-संगीतशास्त्रप्रभृतीनां विषयाणां प्राथमिकं विवरणं समुपलभ्यते।

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।।

प्रथमाध्याये–नाट्यशास्त्रस्य उत्पत्तिवर्णनम्, वृत्तित्रयं वृत्तिचतुष्टयं वा आश्रित्य नाट्यप्रयोगप्रारम्भस्य जिज्ञासा। कैशिकीवृत्तिनिरूपणम्, नाट्यप्रयोगनियोजनम्,

इन्द्रध्वजमहोत्सवस्यावसरे नाट्यप्रयोगप्रणेत्रा विधात्रा ब्रह्मणा नाट्यप्रयोगविधिः।

द्वितीयाध्याये-विकृष्ट, चतुरस्र, अंसत्र्यस्र इति त्रयाणां प्रेक्षागृहानां निर्माणविधिः, नेपथ्यगृहं, रंगपीठं, मत्तवारणी, चित्रकर्म इत्यादीनां रचनाविधिः वर्णितोऽस्ति।

षष्ठेऽध्याये-रसविषयकं मुनीनां पञ्चप्रश्नानां, रसनिष्पत्तिः, अष्टरसभेदादिविस्तृतवर्णनम्।

(U) (ल) नाट्यशास्त्रस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— नाट्यशास्त्रं कस्य कृतिरस्ति?
   उत्तरम्— भरतमुनेः।
2. **प्रश्नः**— नाट्यस्य 'आद्य' प्रवर्तकः कः?
   उत्तरम्— भगवान् नटराजः।
3. **प्रश्नः**— नाट्यशास्त्रे कति श्लोकाः उपलभ्यन्ते?
   उत्तरम्— 6000 श्लोकाः।
4. **प्रश्नः**— 'नाट्यशास्त्रम्' केन विरचितम्?
   उत्तरम्— भरतमुनिना।
5. **प्रश्नः**— रसस्य प्रवर्तकः कः?
   उत्तरम्— भरतः।
6. **प्रश्नः**— न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
   नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।।
   श्लोकोऽयं कस्य महत्त्वं प्रतिपादयति?
   उत्तरम्—नाट्यशास्त्रस्य।
7. **प्रश्नः**— काव्येषु किं रम्यम्भवति?
   उत्तरम्— नाटकम्।
8. **प्रश्नः**— भरतमुनेः नाट्यशास्त्रे कति अध्यायाः सन्ति?
   उत्तरम्— (36) षट्त्रिंशत्।
9. **प्रश्नः**— नाट्यशास्त्रे अलंकारशास्त्रस्य विवेचनं केष्वध्यायेषु मिलति?
   उत्तरम्— (6, 7, 16,) षष्ठे, सप्तमे, षोडशे च।
10. **प्रश्नः**— भरतमुनेः कति पुत्राः आसन्?
    उत्तरम्—100 शतम्।
11. **प्रश्नः**— शाण्डिल्यः कस्य पुत्रः आसीत्?
    उत्तरम्— मुनिभरतस्य।
12. **प्रश्नः**— चतुःषष्टिर्हस्तपरिमितं किं नाम नाट्यगृहम्?
    उत्तरम्— चतुरस्रः।
13. **प्रश्नः**— रससूत्रस्य व्याख्याकर्तारः के आचार्याः?
    उत्तरम्—चत्वारः, 1. भट्टलोल्लटः, 2. श्रीशङ्कुकः, 3. भट्टनायकः, 4. अभिनवगुप्तश्चेति।
14. **प्रश्नः**— पितामह-महेश्वरौ प्रणमति स्वकीये मंगलाचरणे कः कथितः?
    उत्तरम्— भरतमुनिः।
15. **प्रश्नः**—काव्यशास्त्रे रससम्प्रदायस्य प्रवर्तकः आचार्यः कः?
    उत्तरम्— भरतमुनिः।
16. **प्रश्नः**— नेपथ्यस्य समानार्थी-शब्दः कः?
    उत्तरम्— रंगमंचः।
17. **प्रश्नः**— नाट्ये 'ओंकारः' कं रक्षति?
    उत्तरम्— विदूषकम्।
18. **प्रश्नः**—नाट्ये कति वृत्तयः भवन्ति?
    उत्तरम्— 04 चत्वारः।
19. **प्रश्नः**— षट्साहस्री' इति कस्याभिधानम्?
    उत्तरम्— नाट्यशास्त्रस्य।
20. **प्रश्नः**— नाट्यवेदः केन सृष्टः?
    उत्तरम्— ब्रह्मणा।
21. **प्रश्नः**— शतं चाष्ट-हस्तपरिमितं नाट्यगृहस्य किं नाम?
    उत्तरम्— विकृष्टः।
22. **प्रश्नः**— नाट्यवेद-निर्मितौ ब्रह्मा पाठ्यं कुतः जग्राह?
    उत्तरम्— ऋग्वेदात्।
23. **प्रश्नः**—नाट्यवेद-निर्मितौ ब्रह्मा अभिनयान् कुतः जग्राह?
    उत्तरम्— यजुर्वेदात्।
24. **प्रश्नः**— नाट्यवेद-निर्मितौ ब्रह्मा रसान् कुतः जग्राह?
    उत्तरम्— अथर्ववेदात्।
25. **प्रश्नः**— नाट्यवेद-निर्मितौ ब्रह्मा गीतं कुतः जग्राह?
    उत्तरम्— सामवेदात्।
26. **प्रश्नः**—रूपकस्य के दश भेदाः सन्ति ?
    उत्तरम्—1. नाटकम्, 2. प्रकरणम्, 3. भाणः, 4. प्रहसनम्, 5. डिमः, 6. वीथी, 7. अङ्कम्, 8. ईहामृगः, 9. व्यायोगः, 10. समवकारः।

27. **प्रश्नः**— नाट्ये नायकं कः रक्षति?
उत्तरम्— इन्द्रः।

28. **प्रश्नः**— नाट्ये नायिकां का रक्षति?
उत्तरम्— सरस्वती।

29. **प्रश्नः**— नाट्यशास्त्रे कियन्तो रसभेदाः भवन्ति?
उत्तरम्— 8, अष्ट।

30. **प्रश्नः**— नाट्यप्रयोगः कदा अभवत्?
उत्तरम्— इन्द्रध्वजमहोत्सवे।

31. **प्रश्नः**— भरतमुनेः नाट्यशास्त्रे कति रसदोषाः प्रदर्शिताः?
उत्तरम्— 13 त्रयोदश।

32. **प्रश्नः**— नाट्यशास्त्रस्य कस्मिन् अध्याये रसविचारः प्रस्तुतः भरतमुनिना?
उत्तरम्— 06 षष्ठेऽध्याये।

33. **प्रश्नः**— एक-हस्ते कति अंगुलानि भवन्ति?
उत्तरम्— 24 अंगुलानि।

34. **प्रश्नः**— त्र्यस्रः नाट्यगृहं कति हस्तपरिमितं भवति?
उत्तरम्— 32हस्तपरिमितम्।

35. **प्रश्नः**— नाट्यशास्त्रे कियन्तः अंशाः, के च ते?
उत्तरम्—त्रयः-1. सूत्रभाष्यम्, 2. कारिका, 3. अनुवंश्यश्लोकाश्च।

36. **प्रश्नः**— पद्मा सुब्रह्मण्यम् कस्मिन् नृत्ये प्रसिद्धा अस्ति?
उत्तरम्— भरतनाट्यनृत्ये।

37. **प्रश्नः**—यामिनी कृष्णमूर्तिः कस्मिन् नाट्ये प्रसिद्धाः?
उत्तरम्— भरतनाट्ये।

38. **प्रश्नः**— अभिनवगुप्तप्रणीता 'अभिनवभारती' व्याख्या केन ग्रन्थेन सम्बद्धा?
उत्तरम्— नाट्यशास्त्रग्रन्थेन।

(U) (व) दशरूपकम् (प्रथमतृतीयप्रकाशश्च) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(व) दशरूपकम्-

विष्णोः सुतेनापि धनञ्जयेन
विद्वन्मनोरागनिबन्धहेतुः ।
आविष्कृतं मुञ्जमहीशगोष्ठी-
वैदग्ध्यभाजा दशरूपमेतत्॥
(दशरूपके)

अनेन श्लोकेन ज्ञायते यत् अयं दशरूपककारः धनञ्जयः मालवदेशस्य परमारवंशस्य राज्ञो मुञ्जस्य राजकविः आसीत्। इतिहासकारैः धनञ्जयस्य समयः 974 ई.तः 995 ई. निर्धारितोऽस्ति। अस्य पितुर्नाम विष्णुः आसीत्। धनञ्जयस्य रचनात्वेन एक एव ग्रन्थः दशरूपकमिति प्राप्यते। अस्य दशरूपकस्य रचना भरतस्य नाट्यशास्त्रानुसारं कृताऽस्ति। नायिकाभेद, शृङ्गाररसप्रतिपादने किञ्चित् पृथक् विचारः कृतोऽस्ति। दशरूपकस्य प्रमुखं लक्ष्यं वस्तु-नेता-रसप्रतिपादनमेवास्ति। इदं नाट्यशास्त्रस्य महत्त्वपूर्णः ग्रन्थोऽस्ति। धनिको दशरूपककारिकाणां रचयितुः धनञ्जयस्य अनुजः आसीत्। केषुचिद् अलंकारग्रन्थेषु दशरूपकं धनिकस्यैव कृतित्वेन निर्दिष्टमस्ति। अयं धनिको व्यञ्जनाविरोधी अभिधावादी च अस्ति। 'काव्यनिर्णयः' इत्यस्य रचना धनिकेन कृताऽऽसीत्।

दशरूपके प्रतिपाद्यविषयः—दशरूपकं चतुर्षु प्रकाशेषु विभज्यते। प्रथमप्रकाशे रूपकस्य भेद-भेदक-कथावस्तूनां 64 सन्ध्यगानां वर्णनमेवं च अर्थोपक्षेपकस्य वर्णनं क्रियते। द्वितीयप्रकाशे नायक-नायिकाभेदः, तयोः गुण-क्रियादीनां विवेचनं वर्तते। तृतीयप्रकाशे दशरूपकेषु प्रमुख-नाटकस्य विशद् रूपेण वर्णनं कृतं स्यात्। चतुर्थप्रकाशे रससिद्धान्तस्य विवेचनं क्रियते। दशरूपकस्य प्रथमप्रकाशे-68, दशरूपकस्य द्वितीयप्रकाशे-72, दशरूपकस्य तृतीयप्रकाशे-76, दशरूपकस्य चतुर्थप्रकाशे-84 कारिकाः विद्यन्ते। दशरूपकस्य आधारग्रन्थः भरतमुनेः नाट्यशास्त्रं वर्तते। दशरूपकस्य प्रभावस्तु साहित्यदर्पणस्य तृतीय-षष्ठपरिच्छेदयोः स्पष्टं दृश्यते। कतिपयपूर्ववर्ति भामह, उद्भट, आनन्दवर्द्धन, रूद्रटादिविचाराणां प्रभावः दशरूपकोपरि स्पष्टरूपेण परिलक्ष्यते।

दशरूपकस्य प्रमुखविशेषता निम्नाङ्कितः—1. नाट्य-सम्बन्धिसामग्रीणां नवीन-प्रस्तुतिः।2. रूपकाणां उद्देश्यं परमानन्दरूपं रसास्वादनम्।3. नृत्य-नृत्तयोर्मध्ये स्पष्टं अन्तरेण सह नाट्य-लक्षणं प्रस्तुतिकरणम्।4. रूपकस्य विभिन्नतत्त्वानां क्रमिकविवेचनम्। 5. योजना-वर्णनमेवं च नाट्योक्तिः इत्यादयः विविधदृष्ट्या वस्तुविभाजनम्।6. नायक-नायिका

एवं अन्यसहायकानां सरलवर्णनम्। 7. रुद्रटस्य दश-रसस्य स्थानोपरि अष्ट-रसस्य मान्यता। 8. कैशिकी, सात्त्वती, आरभटी इति त्रय एव अर्थवृत्तीनां मान्यता।

(U) (व) दशरूपकस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— दशरूपकस्य लेखकः कः?
उत्तरम्— धनञ्जयः।

2. **प्रश्नः**— दशरूपककारिकाणां रचनाकारः कः ?
उत्तरम्—धनञ्जयस्य अनुजः धनिकः।

3. **प्रश्नः**— धनञ्जयः कस्य राज्यस्य राजकविः आसीत्?
उत्तरम्—मालवदेशस्य परमारवंशस्य राज्ञो मुञ्जस्य।

4. **प्रश्नः**— धनञ्जयस्य समयः कः?
उत्तरम्— दशमशताब्दी।

5. **प्रश्नः**— धनञ्जयस्य पितुः नाम किम्?
उत्तरम्— विष्णुः।

6. **प्रश्नः**— धनिकस्य पितुः नाम किम्?
उत्तरम्— विष्णुः।

7. **प्रश्नः**— दशरूपकं कति प्रकाशेषु विभज्यते?
उत्तरम्— चतुःप्रकाशेषु।

8. **प्रश्नः**—दशरूपकस्य प्रथमप्रकाशे कति कारिकाः वर्तन्ते?
उत्तरम्— 68 अष्टषष्टिः।

9. **प्रश्नः**—दशरूपकस्य द्वितीयप्रकाशे कति कारिकाः वर्तन्ते?
उत्तरम्— 72 द्विसप्ततिः।

10. **प्रश्नः**— दशरूपकस्य तृतीयप्रकाशे कति कारिकाः वर्तन्ते?
उत्तरम्—76 षट्सप्ततिः।

11. **प्रश्नः**— दशरूपकस्य चतुर्थप्रकाशे कति कारिकाः वर्तन्ते?
उत्तरम्— 84 चतुरशीतिः।

12. **प्रश्नः**— दशरूपककारिका कस्य कृतिरस्ति?
उत्तरम्— धनिकस्य।

13. **प्रश्नः**— ईहामृगस्य सन्धीनां का संख्या?
उत्तरम्— (3) तिस्रः।

14. **प्रश्नः**— ईहामृगस्य नायकः कीदृक् भवति?
उत्तरम्— धीरोदात्तः।

15. **प्रश्नः**— ईहामृगस्य अङ्कानां का संख्या भवति ?
उत्तरम्— (4) चत्वारः।

16. **प्रश्नः**— दशरूपके कति अध्यायाः?
उत्तरम्— (4) चत्वारः।

17. **प्रश्नः**—रूपकस्य कति भेदाः सन्ति?
उत्तरम्— (10) दश।

18. **प्रश्नः**—रूपकस्य के दश भेदाः सन्ति ?
उत्तरम्—1. नाटकम्, 2. प्रकरणम्, 3. भाणः, 4. प्रहसनम्, 5. डिमः, 6. वीथी, 7. अङ्कम्, 8. ईहामृगः, 9. व्यायोगः, 10. समवकारः।

(Q-U) (श) साहित्यशास्त्रस्य प्रमुखग्रन्थाः ग्रन्थकाराश्च

क्र.	ग्रन्थनाम	ग्रन्थकारः
1.	साहित्यदर्पणः	आचार्य विश्वनाथः
2.	काव्यप्रकाशः	आचार्य मम्मटः
3.	राजतरङ्गिणी	कल्हणः
4.	काव्यादर्शः	दण्डी
5.	काव्यालंकारः	रुद्रटः
6.	रघुवंशम्	कालिदासः
7.	कुमारसम्भवम्	कालिदासः
8.	मेघदूतम्	कालिदासः
9.	ऋतुसंहारम्	कालिदासः
10.	विक्रमोर्वशीयम्	कालिदासः
11.	अभिज्ञानशाकुन्तलम्	कालिदासः
12.	जानकीहरणम्	कुमारदासः
13.	किरातार्जुनीयम्	भारविः
14.	शिशुपालवधमहाकाव्यम्	माघः

क्र.	ग्रन्थनाम	ग्रन्थकारः
15.	बुद्धचरितम्	अश्वघोषः
16.	सौन्दरानन्दः	अश्वघोषः
17.	शारिपुत्रप्रकरणम्	अश्वघोषः
18.	हरविजयमहाकाव्यम्	रत्नाकरः
19.	कप्फनाभ्युदयम्	शिवस्वामी
20.	दशावतारचरितम्	क्षेमेन्द्रः
21.	श्रीकण्ठचरितम्	मङ्खकः
22.	ध्वन्यालोकः	आनन्दवर्द्धनः
22.	देवीशतकम्	आनन्दवर्द्धनः
23.	कुमारपालचरितम्	हेमचन्द्रः
24.	रसगंगाधरः	पण्डितराज जगन्नाथः
25.	भामिनीविलासः	पण्डितराज जगन्नाथः
26.	गङ्गालहरी	पण्डितराज जगन्नाथः
27.	सुधालहरी	पण्डितराज जगन्नाथः
28.	अमृतलहरी	पण्डितराज जगन्नाथः
29.	करुणालहरी	पण्डितराज जगन्नाथः
30.	लक्ष्मीलहरी	पण्डितराज जगन्नाथः
31.	यमुनार्णवचम्पूः	पण्डितराज जगन्नाथः
32.	आसफविलासः	पण्डितराज जगन्नाथः
33.	प्राणाभरणम्	पण्डितराज जगन्नाथः
34.	जगदाभरणम्	पण्डितराज जगन्नाथः
35.	चित्रमीमांसाखण्डनम्	पण्डितराज जगन्नाथः
36.	मनोरमाकुचमर्दनम्	पण्डितराज जगन्नाथः
37.	श्रीकण्ठचरितम्	मङ्खकः
38.	नैषधचरितम्	श्रीहर्षः
39.	खण्डनखण्डखाद्यम्	श्रीहर्षः
40.	नवसाहसाङ्कचरितम्	पद्मगुप्तः
41.	विक्रमाङ्कदेवचरितम्	बिल्हणः
42.	चौरपञ्चाशिका	बिल्हणः
43.	शास्त्रकाव्यानि	भट्टिः
44.	भिक्षाटनकाव्यम्	गोकुलनाथः
45.	वक्रोक्तिजीवितम्	कुन्तकः

क्र.	ग्रन्थनाम	ग्रन्थकारः
46.	गीतगोविन्दम्	जयदेवः
47.	दशकुमारचरितम्	दण्डी
48.	अवन्तिसुन्दरीकथा	दण्डी
49.	कादम्बरी	बाणभट्टः
50.	हर्षचरितम्	बाणभट्ट
51.	चण्डीशतकम्	बाणभट्टः
52.	उत्तररामचरितम्	भवभूतिः
53.	महावीरचरितम्	भवभूतिः
54.	मालतीमाधवम्	भवभूतिः
55.	प्रतिमानाटकम्	भासः
56.	अभिषेकनाटकम्	भासः
57.	मध्यमव्यायोगः	भासः
58.	दूतघटोत्कचम्	भासः
59.	कर्णभारम्	भासः
60.	उरूभंगम्	भासः
61.	प्रतिज्ञायौगन्धरायणम्	भासः
62.	व्यक्तिविवेकः	महिमभट्टः
63.	सूर्यशतकम्	मयूरभट्टः
64.	बालरामायणम्	राजशेखरः
65.	कर्पूरमञ्जरी	राजशेखरः
66.	काव्यमीमांसा	राजशेखरः
67.	काव्यालंकारसूत्रम्	वामनः
68.	कीर्तिकौमुदीकाव्यम्	सोमेश्वरः
69.	मुद्राराक्षसम्	विशाखदत्तः
70.	पञ्चतन्त्रम्	विष्णु शर्मा
71.	मृच्छकटिकम्	शूद्रकः
72.	रत्नावली	हर्षवर्द्धनः
73.	नागानन्दः	हर्षवर्द्धनः
74.	प्रियदर्शिका	हर्षवर्द्धनः
75.	औचित्यविचारचर्चा	क्षेमेन्द्रः
76.	बृहत्कथामञ्जरी	क्षेमेन्द्रः
77.	कुवलयानन्दः	अप्पयदीक्षितः

क्र.	ग्रन्थनाम	ग्रन्थकारः
78.	हरचरितचिन्तामणिः	जयद्रथः
79.	हरिविलासकाव्यम्	लोलम्बराजः
80.	रुक्मिणीहरणम्	राजचूडामणिदीक्षितः
81.	गोविन्दलीलामृतम्	कृष्णदासकविराजः
82.	बालभारतम्	अमरचन्द्रसूरिः
83.	पाण्डवचरितम्	देवप्रभसूरि
84.	सहृदयानन्दम्	कृष्णानन्द
85.	नलाभ्युदयम्	वामनभट्टबाण
86.	सौन्दर्यलहरी	शङ्कराचार्यः
87.	कीचकवधकाव्यम्	नीतिवर्मा
88.	नलोदयकाव्यम्	वासुदेवः
89.	राघवपाण्डवीयम्	धनञ्जयः
90.	राघवपाण्डवीयम्	कविराजमाध्वभट्टः
91.	राघवनैषधम्	हरदत्तसूरि

क्र.	ग्रन्थनाम	ग्रन्थकारः
92.	पार्वतीरुक्मिणीयम्	विद्यामाधवः
93.	यादवराघवीयम्	वेङ्कटाध्वरीनः
94.	राघवपाण्डवयादवीयम्	चिदम्बरकविः
95.	रामकृष्णविलोमकाव्यम्	दैवज्ञसूरि
96.	अमरुशतकम्	अमरुकः
97.	आर्यासप्तशती	गोविन्दाचार्यः
98.	मधुसूदनशतकम्	मधुसूदनः
99.	शतकत्रयम्	भर्तृहरिः
100.	भल्लटशतकम्	भल्लटः
101.	हरिहरसुभाषितम्	हरिहरोपाध्यायः
102.	महिम्नस्तोत्रम्	पुष्पदन्तः
103.	मुकुन्दमाला	कुलशेखरः
104.	सूर्यशतकम्	मयूरः
105.	शिवस्तोत्रावली	उत्पलदेवः

9

ज्योतिषशास्त्रम्

(V Code-73)

1. नामकरणमुहूर्तः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

1. नामकरणमुहूर्तः– (क) नामकरणमुहूर्तं सप्रमाणं विवेचयत? (ख) नामकरणसंस्कारस्य प्रयोजनम्?

लोके सर्वविधशुभाशुभव्यवहारसम्पादनाय नामकरण-संस्कारः विशिष्टः। परस्पर-संवादाय एका संज्ञायाः आवश्यकता भवति। षोडश-संस्कारेषु नामकरणसंस्कारेण एव जनानां संज्ञा निर्धारिता क्रियते। नामद्वारा एव समस्त-व्यापाराः संपादिताः भवन्ति। तथा च इदं कर्म-भाग्ययोः सफलता-असफलतायां महत्त्वपूर्णं दायित्वं निर्वहति। नाम्नः द्वारा एव मानवाः विख्याताः भवन्ति, अतः नामकरण-संस्कारः करणीयम्। यथा प्रयोजनविषये कथितमस्ति–

नामाखिलस्य व्यवहारेतुः
शुभावहं कर्मसु भाग्यहेतुः।
नाम्नैव कीर्तिं लभते मनुष्यः
ततो प्रशस्तं खलु नामकर्म।।

संस्कारेषु नामकरणसंस्कारः पञ्चमोऽस्ति। अस्मिन् संसारे प्रत्येकवस्तुनः किमपि नाम विद्यत एव। नामकरणं विना जगतः व्यवहारः संज्ञाहीनत्वात् चलितुमसम्भवः। तस्मात् मानवेनास्य संस्कारस्य आयोजनं वैदिकरीत्या साडम्बरं क्रियते।

नामकरणस्य प्राधान्यमित्थमपि पुष्टितो भवति यत्–

देशे ग्रामे गृहे युद्धे सेवायां व्यवहारके।
नामराशेः प्रधानत्वं जन्मराशि न चिन्तयेत्।।
काकीण्यां वर्गशुद्धौ च वादे द्यूते स्वरोदये।
मन्त्रे पुनर्भूवरणे नामराशेः प्रधानता।।

अतः निष्कर्षतया संज्ञावबोधाय एव नामकरणसंस्कारः कर्तव्यः।

प्रयोजनसम्बद्ध-अन्यानि प्रमाणानि- काकिण्या वर्गशुद्धौ च वादे द्यूते स्वरोदये। मन्त्रे पुनर्भूवरणे नामराशिप्रधानत्वं। (नामराशेः प्रधानता)।

(ख) प्रकारः–बालकस्य नामकरणं चतुर्भिः प्रकारैः निर्धारितं कर्तव्यम्।

1. कुलदेवता–गृहस्य कुलदेवतानामोपरि बालक-बालिकायाः नामकरणं विधेयम्।
2. विष्णुमास–मार्गशीर्षमासस्य क्रमैः द्वादशनामकरणमपि विहितमस्ति।
3. नक्षत्रानुसार–जन्मनामकरणं नक्षत्रानुसारेण भवति, 'जन्मनाम गोप्यमिति।'
4. व्यावहारिक–विषमाक्षरं विहाय द्वयोश्चतुरक्षरयोः यश-मानाभ्यां तपसे वा कामनया भवेत्।

(ग) नामकरणसंस्कारमुहूर्तं प्रतिपाद्यताम्?

नामाखिलस्य व्यवहारहेतुरित्यादि प्रयोजनात्–

तज्जातकर्मादि शिशोर्विधेयं
पर्वाख्यरिक्तौ न तिथौ शुभेऽह्नि।
एकादशे द्वादशकेऽपि घस्रे
मृदुध्रुवक्षिप्रचरोडुषु स्यात्।
(मुहूर्तचिन्तामणिः)

इति श्लोकेन मुहूर्तेन (नामकरण) संस्कारोऽयं शुभः भवति। तद्यथा मुहूर्त्तानि–

1. दिवसा विहिताः- **2. विहितनक्षत्राणि**–

जन्मतः एकादशे द्वादशे दिने वा शुभदिवसे मृदुध्रुवक्षिप्रनक्षत्रेषु (मृ.रे.चि.अनु.) (चन्द्रबुधगुरुशुक्रवारेषु) (उत्तरात्रयरोहिणी च) (हस्ताश्विपुष्याभिजित्)।

हरिहरपण्डितेन उच्यते–**"यस्य यावन्ति दिनानि सूतकं तदन्तदिने कार्यम्"** अर्थात् ब्राह्मणस्य 11एकादशदिने, क्षत्रियस्य 13 त्रयोदशदिने, वैश्यस्य 16 षोडशदिने, शूद्रस्य 31 एकत्रिंशत्तमे दिने नामकरणं करणीयम्।

(घ) तिथयः–पर्व- (14, 8, 30, 15) रिक्ता- (4, 9, 14) तिथीन् विहाय नियतकालप्रधानत्वात् नक्षत्रादीना-मभावादपि नियतदिने संस्कारोऽयं कर्तव्यः।

नारदेन तु सूतकान्ते नामकर्म स्वकुलोचितं विधेयमित्यनेन विप्रादिवर्णानां क्रमशः 11, 13, 16, 30 दिवसेषु संस्कारमुहूर्तः प्रतिपादितः। अन्यप्रमाणानि–

मनुः –

नामधेयं दशम्यां तु द्वादश्यां वाऽथ कारयेत्।
पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते।।
(मनुस्मृतौ)

सारसंग्रहे–

एकादशेऽह्नि विप्राणां क्षत्रियाणां त्रयोदशे।
वैश्यानां षोडशे नाम मासान्ते शूद्रजन्मनाम्।।

बृहस्पतिः–

पूर्वाह्नः श्रेष्ठ इत्युक्तो मध्याह्नो मध्यमः स्मृतः।
अपराह्नं च रात्रिं च वर्जयेन्नामकर्मणि।।

(घ) सं.वि.वि.दरभंगा पञ्चाङ्गे नामकरणमुहूर्त्तः

विप्राणां–11, 12, क्षत्रियाणां–13, वैश्यानां–16, शूद्राणां–31तमे दिने नामकरणं शुभम्। अथवा स्वाति, पुनर्वसु, श्रवणा, धनिष्ठा, हस्त, अश्विनी, पुष्य, अभि०, उत्तरा 3, रोहिणी, मृगशिरा, रे., चित्रा, अनु., नक्षत्रेषु, 1/2/3/5/7/10/11/12/13 तिथिषु, चं. बु. वृ. शु. दिनेषु, पूर्वाह्ने शुभम्, मध्याह्ने मध्यमम्। शुभलग्ने, शुभैः 1/4/5/7/9/10 स्थितैः, पापैः 3/6/11 स्थैः, 8/12 गृहे शुद्धे, चन्द्रे 2/3/5/9/10 स्थिते। लग्ने शुभांशे पितृपुत्रयोश्चन्द्रतारानुकूले उत्तरायणे शुभसमये शुभं नामकरणम्।

(V) (ङ) नामकरणविषये वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— विप्राणां नामकरणं कदा कर्त्तव्यम्?
   उत्तरम्— 11एकादशे 12 द्वादशे वा दिवसे।
2. **प्रश्नः**— क्षत्रियाणां नामकरणसंस्कारं कदा कर्त्तव्यम्?
   उत्तरम्— 13 त्रयोदशदिवसे।
3. **प्रश्नः**— वैश्यानां नामकरणसंस्कारं कदा कर्त्तव्यम्?
   उत्तरम्—16 षोडशदिवसे।
4. **प्रश्नः**— शूद्राणां नामकरणसंस्कारं कदा करणीयम्?
   उत्तरम्— 31 एकत्रिंशत्तमे दिवसे।
5. **प्रश्नः**— नामकरणसंस्कारं कस्मिन् नक्षत्रे कर्त्तव्यम्?
   उत्तरम्—मृदुध्रुवक्षिप्रनक्षत्रेषु (मृ.रे.चि.अनु.) (उत्तरात्रयरोहिणी च) (हस्ताश्विपुष्याभिजित्)
6. **प्रश्नः**— नामकरणं केषु दिनेषु करणीयम्?
   उत्तरम्— शुभदिवसाः, (चन्द्रबुधगुरुशुक्रवारेषु)।
7. **प्रश्नः**— नामकरणसंस्कारं कस्यां तिथौ करणीयम्?
   उत्तरम्— शुभतिथौ। (1/2/3/5/7/10/11/12/13)
8. **प्रश्नः**— नामकरणं कस्मिन् योगे कर्त्तव्यम्?
   उत्तरम्— शुभयोगे।
9. **प्रश्नः**— नामकरणं कस्मिन् लग्ने करणीयम्?
   उत्तरम्— गोसिंहालिघटलग्नेषु।
10. **प्रश्नः**— नामकरणे नाम्नो आदिवर्णनिर्धारणं कया रीत्या करणीयम्?
    उत्तरम्—जन्मनक्षत्रस्य चरणानुसारेण।
11. **प्रश्नः**— नामकरणं दिवसे रात्रौ वा करणीयम्?
    उत्तरम्— दिवसे।
12. **प्रश्नः**—दिवसस्य कस्मिन् भागे नामकरणक्रिया प्रशस्ता?
    उत्तरम्—पूर्वभागे (पूर्वाह्ले)।
13. **प्रश्नः**—नामकरणसंस्काराः कतिप्रकारकाः, के च ते?
    उत्तरम्—चतुष्प्रकारकाः, 1. कुलदेवता, 2. विष्णुमास, 3. नक्षत्रानुसार, 4. व्यावहारिक।
14. **प्रश्नः**— मानवानां पञ्चमो संस्कारः कः?
    उत्तरम्—नामकरणसंस्कारः।
15. **प्रश्नः**—केन विना जगतः व्यवहारः संज्ञाहीनत्वात् चलितुमसम्भवः?
    उत्तरम्—नामकरणेन विना।
16. **प्रश्नः**—नामकरणसंस्कारः कया रीत्या आयोजनं साडम्बरं क्रियते?
    उत्तरम्— वैदिकरीत्या।
17. **प्रश्नः**—नामकरणसंस्कारविषये हरिहरपण्डितेन किमुच्यते?
    उत्तरम्—यस्य यावन्ति दिनानि सूतकं तदन्तदिने कार्यम्।

18. प्रश्नः—'तज्जातकर्मादि शिशोर्विधेयं पर्वाख्यरिक्तौ न तिथौ शुभेऽह्निएकादशे द्वादशकेऽपि घस मृदु-ध्रुवक्षिप्रचरोडुषु स्यात्।' उक्त श्लोकः कस्य ग्रन्थस्य वर्तते?
उत्तरम्—मुहूर्त्तचिन्तामणिग्रन्थस्य।

19. प्रश्नः—'सूतकान्ते नामकर्म स्वकुलोचितं विधेयम्' वचनमयं कस्य आचार्यस्य वर्तते?
उत्तरम्—नारदस्य।

20. प्रश्नः—नामकरणसम्बन्धे मनुमहोदयस्य कथनं किमस्ति?
उत्तरम्—नामधेयं दशम्यां तु द्वादश्यां वाऽथ कारयेत्। पुण्ये तिथौ मुहूर्तौ वा नक्षत्रे वा गुणान्विते।

21. प्रश्नः—'देशे ग्रामे गृहे युद्धे सेवायां व्यवहारके। नामराशेः प्रधानत्वं जन्मराशि न चिन्तयेत्। उक्तश्लोकेन किं ज्ञायते?
उत्तरम्—जन्मनाम तु गोपयेत्।

22. प्रश्नः—मुहूर्तचिन्तामणिग्रन्थस्य लेखकः कः?
उत्तरम्—श्रीमद् रामदैवज्ञः।

23. प्रश्नः— चू चे चो ला अश्विनीत्यादि शतपद-चक्रं तदक्षरादिमेन किं कार्यम्?
उत्तरम्—नामकरणं कार्यम्।

24. प्रश्नः— मुहूर्तचिन्तामणि कतिप्रकरणेषु विभाजितोऽस्ति?
उत्तरम्—13 त्रयोदशप्रकरणेषु।

25. प्रश्नः—नामकरण-प्रयोजनविषये किं कथितमस्ति?
उत्तरम्—नामाखिलस्य व्यवहारेतुः शुभावहं कर्मसुभाग्यहेतुः। नाम्नैव कीर्तिं लभते मनुष्यः ततो प्रशस्तं खलु नामकर्म।।

(V-C-73) 2. चूडाकरणमुहूर्तः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

2. चूडाकरणमुहूर्तः-

(क) चूडाकरण-संस्कारस्य प्रयोजनम्?

चौलकर्मकेशवपनादिपर्यायभूतोऽयं चूडाकरणसंस्कारः भारतीय-संस्कृतौ विशिष्टं स्थानं भजते। संस्कारमालायामष्टमः संस्कारोऽस्ति चूडाकरणसंस्कारः। वैदिकं मुण्डनं चौलमित्युच्यते। वस्तुतः मुण्डनं चौलं केशच्छेदनं केशवपनं, क्षौरं चादयः चूडाकरणस्य पर्यायाः सन्ति। चूडाकरणसंस्कारस्य प्रयोजनविषये चरकसंहितायामुक्तं यत्–

पौष्टिकं वृष्यमायुष्यं शुचिरूपविराजनम्।
केशश्मश्रुनखादीनां कर्त्तनं संप्रसाधनम्।।
(चरकसं.सू.4/93)

अत एव मनुना प्रोक्तम्–

चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः।
प्रथमेऽब्दे द्वितीये वा कर्त्तव्यं श्रुतिचोदनात्।।

आयुषः वृद्धये शान्तिपुष्टिशुचिरूपञ्च प्राप्तये संस्कारोऽयं विधीयते। उक्तञ्च वसिष्ठेन–

सर्वेषामेव वर्णानां चूडाकर्मविधिः स्मृतः।
केशमूलं पिता ज्ञेयः केशाग्रं जननी तथा।।
चौलेनैवायुषो वृद्धिश्चौलेनैवायुषो क्षयः।
तस्माच्चौलं प्रयत्नेन कारयेद् बुद्धिमान्नरः।।

(ख) चौले चूडाकरणमुहूर्तः—चौलेनैवायुषो वृद्धिरित्यस्मात् शान्तिपुष्टिशुचिरूपप्राप्तये चूडाकरणसंस्कारः जन्मतः गर्भतो वा तृतीयादिविषमवर्षेषु उत्तरायणे सूर्ये गुरुशुक्रयोः बालत्ववृद्धत्वास्तंगतत्वं न्यूनाधिमासं गुर्वादित्ययोगं जन्ममासतिथीनः विश्वघस्रपक्षं चैत्रमासञ्च विहाय लग्नशुद्धभङ्गादियोगं विचार्य ज्येष्ठयुग् अनुराधारहित-मृदुचरलघुसंज्ञकनक्षत्रेषु शुभवारे चूडाकरणसंस्कारकर्तव्यः इति शास्त्राभिमतम्। यथोक्तं मुहूर्तचिन्तामणौ–

चूडावर्षात्तृतीयात्प्रभवति विषमेऽष्टार्करिक्ताद्यषष्ठी।
पर्वोनाहे विचैत्रोदगयनसमये ज्ञेन्दुशुक्रेज्यकानाम्।।
वारे लग्नांशयोश्चास्वभनिधनतनौ नैधने शुद्धियुक्ते।
शाक्रोपेतैर्विमैत्रैर्मृदु-चर-लघुभैरायषट्त्रिस्थपापैः।।

अर्थात् गर्भाधानकालाज्जन्मकालाद्वा तृतीयपञ्चमसप्तमवर्षेषु विषमवर्षे, 2/3/5/7/10/11/13 तिथिषु, चं. बु. वृ. शु. वारेषु, अश्वि.मृ.पुन.पुष्य.ह.चि.स्वा.ज्ये.अभि.श्र.ध.श.रे. नक्षत्रेषु, लग्नतः तृतीय-एकादशषष्ठस्थानेषु पापग्रहाणां विद्यमानत्वे मुण्डनं करणीयम्।

मनुना तु प्रथमे द्वितीये वर्षे वा चूडाकर्म कर्तव्यम्। गुरुणा तु तृतीयादारभ्य सप्तमवर्षपर्यन्तं संस्कारोऽयं कर्तव्य इति दिक्।

चूडाकरणविषयकाः श्लोकाः–

मनुः–

चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः।
प्रथमेऽब्दे द्वितीये वा कर्मव्यं श्रुतिचोदनात्।

गुरुः–

तृतीयेऽब्दे शिशोर्गर्भात् जन्मतो वा विशेषतः।
पञ्चमे सप्तमे वापि स्त्रियाः पुंसोऽथवा समम्।।

गृह्यपरिशिष्टे–

चूडाकर्म न कर्तव्यं यस्य मातास्ति गर्भिणी।

मुहूर्तचिन्तामणौ–

पञ्चमासाधिके मातुर्गर्भे चौलं शिशोर्न सत्।
पञ्चवर्षाधिकस्येष्टं गर्भिण्यामपि मातरि।।

चौले दुष्टतारापवादः–

तारादौष्ट्येऽब्जे त्रिकोणोच्चगे वा
क्षौरं सत्स्यात्सौम्यमित्रस्ववर्गे।
सौम्ये भेऽब्जे शोभने दुष्टतारा
शस्ता ज्ञेया क्षौरयात्रादिकृत्ये।।
(मु.चि.सं.प्र.श्लो-32)

(ग) सं.वि.वि.दरभंगा पञ्चाङ्गे चूडाकरणमुहूर्तः—

चैत्ररहितमाघादि षण्मासे, ज्येष्ठाग्रहायणयोः ज्येष्ठसन्तानं विना, विषमवर्षे, अश्वि. मृ.पुन.पुष्य.ह.चि.स्वा.ज्ये.अभि.श्र. ध.श.रे. नक्षत्रेषु चं. बु. वृ. शु. वारेषु 2/3/5/7/10/11/13 तिथिषु, शुक्लपक्षे, कृष्णे 5 यावत् 2/3/4/8/9/12 एतद्राशेर्लग्नांशे शुक्रवर्जिताष्टमशुद्धे, पापैः 3/6/11 गतैः, शुभैः 1/4/5/7/9/10 गतैः, जन्मराशिलग्नयोरष्टमेतरलग्ने, 4/6/8/12 रहितचन्द्रे शुभम्।

(अ) (घ)

चूडाकरणमुहूर्त्तविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः— चूडाकरणसंस्कारं कस्मिन् वर्षे प्रशस्तम्?
उत्तरम्— तृतीयपञ्चमसप्तमविषमवर्षेषु।

2. प्रश्नः—चूडाकरणे कियन्ति नक्षत्राणि प्रशस्तानि विद्यन्ते?
उत्तरम्— द्वादश, (अश्वि.मृ.पुन.पुष्य.ह.चि.स्वा.ज्ये. अभि.श्र.ध.श.रे.)

3. प्रश्नः— कस्मिन् वारे चूडाकरणं प्रशस्तम्?
उत्तरम्— शुभवारे (चं. बु. वृ. शु. वारेषु)।

4. प्रश्नः—चूडाकरणं केषु तिथिषु करणीयम्?
उत्तरम्— 2/3/5/7/10/11/13 तिथिषु, शुक्लपक्षे, कृष्णे 5 यावत्।

5. प्रश्नः— चूडाकरणं कस्मिन् मासे प्रशस्तम्?
उत्तरम्—चैत्ररहितमाघादि षण्मासे, (विचैत्रोदगयनमासे)

6. प्रश्नः—ज्येष्ठसन्तानस्य चूडाकरणं कस्मिन् मासे निषिद्धम्?
उत्तरम्— ज्येष्ठाग्रहायणे मासे।

7. प्रश्नः—सर्वेषामेव वर्णानां चूडाकर्मविधिः स्मृतः। केशमूलं पिता ज्ञेयः केशाग्रं जननी तथा।। चौलेनैवायुषो वृद्धिश्चौलेनैवायुषो क्षयः। तस्माच्चौलं प्रयत्नेन कारयेद् बुद्धिमान्नरः।। वसिष्ठेन कस्य मुहूर्तस्य प्रयोजनं कथितम्?
उत्तरम्—चूडाकरणसंस्कारस्य।

8. प्रश्नः—"चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेऽब्दे द्वितीये वा कर्त्तव्यं श्रुतिचोदनात्।।" उक्तश्लोकः कुतः उद्धृतः?
उत्तरम्— मनुस्मृतिग्रन्थात्।

9. प्रश्नः— जन्ममासे नक्षत्रे च कः संस्कारः निषिद्धः?
उत्तरम्— चूडाकरणसंस्कारः।

10. प्रश्नः— गुरुकवीन्दुज्ञेषु वारेषु कः संस्कारः विहितः?
उत्तरम्— चूडाकरणसंस्कारः।

11. प्रश्नः—चूडाकरणसंस्कारविषये वशिष्ठेन किं कथितम्?
उत्तरम्— "तृतीये पञ्चमेऽब्दे वा स्वकुलाचारतो हितम्। चौलं शिशूनां यत्नेन स्वगृह्योक्तविधानतः।।"

12. प्रश्नः—चूडाकरणसंस्कारविषये याज्ञवल्क्येन किं कथितम्?
उत्तरम्— "चूडा कार्या यथाकुलम्"।

13. प्रश्नः—चौलकर्मकेशवपनादिपर्यायभूतोऽयं संस्कारः कः?
उत्तरम्— चूडाकरणसंस्कारः।

14. प्रश्नः—चूडाकरणसंस्कारोऽयं किमर्थं विधीयते?
उत्तरम्— आयुषः वृद्धये शान्तिपुष्टिशुचिरूपञ्च प्राप्तये।

15. **प्रश्नः**—भारतीय-संस्कृतौ विशिष्टं स्थानं कस्य संस्कारस्य वर्तते?
उत्तरम्— चूडाकरणसंस्कारस्य।

16. **प्रश्नः**—चूडाकरणसंस्कारस्य प्रयोजनविषये चरक-संहितायां किमुक्तम्?
उत्तरम्—"पौष्टिकं वृष्यमायुष्यं शुचिरूपविराजनम्। केशश्मश्रुनखादीनां कर्त्तनं संप्रसाधनम्।।

17. **प्रश्नः**—चूडाकरणसंस्कारस्य प्रयोजनविषये मनुना किं प्रोक्तम्?
उत्तरम्— "चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः।"

18. **प्रश्नः**—संस्कारमालायामष्टमः संस्कारः कः?
उत्तरम्— चूडाकरणसंस्कारः।

19. **प्रश्नः**—चूडाकरणस्य पर्यायाः के सन्ति?
उत्तरम्—मुण्डनं चौलं केशच्छेदनं केशवपनं, क्षौरं चादयः।

20. **प्रश्नः**—चूडाकरणं कस्मिन् नक्षत्रे शुभं भवति?
उत्तरम्— जन्म-नक्षत्रे।

21. **प्रश्नः**—कस्मिन् मासे चूडाकरणं न करणीयम्?
उत्तरम्— चैत्रे चूडा न कार्या, जन्म-मासे अपि चूडा न कार्या।

22. **प्रश्नः**— दाक्षिणायने कस्मिन् मासे चूडाकरणं क्रियते?
उत्तरम्— मार्गशीर्षमासे।

23. **प्रश्नः**—शाक्तोपेतैर्बिमैत्रैर्मृदुचरलघुनक्षत्रेषु किं कर्म विहितम्?
उत्तरम्— चूडाकरणम्।

(V-C-73) 3. उपनयनमुहूर्तः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) उपनयनप्रयोजनम्—द्विजत्वप्राप्तये श्रौतस्मार्त-कर्मादीनाञ्च अर्हतायै वेदारंभव्रतबन्धयज्ञोपवीतादिपर्याय-भूतोऽयं संस्कारः भारतीयसंस्कृतौ महत्वपूर्णं स्थानं विभर्ति। अनेनैव संस्कारेण संस्कृताः सन्तः पुरुष एव वेदाधिकारी भवति। सन्ध्यागायत्र्युपासना च विप्रादीनां मूलम्। सा चोपासनार्हता अनेनैव संस्कारेण समायाति, तद्यथा प्रोक्तम्–

अथातः सम्प्रवक्ष्यामि चोपनयनमुत्तमम्।
द्विजत्वकारकं श्रौतस्मार्तकर्मप्रसाधनम्।।
आद्यं सर्वाश्रमाणां देहसंस्कारकारणम्।
अनेन कर्मणा सर्वे संस्कृता सर्वदेहिनः।।

संस्कारविधिषु उपनयनसंस्कारः दशमो भवति। अस्य अपरं नाम यज्ञोपवीतधारणम्। उपनयनं नामोप समीपे नयनमिति। अनेन आचार्यः वैदिकींदीक्षां विधाय शिष्यं परमेश्वरस्य वेदस्य च समीपे नयति। संस्कारेणानेन ब्राह्मणेषु तेजोवृद्धिः, क्षत्रियेषु बलवृद्धिः, वैश्येभ्यः अर्थवृद्धिर्जायते इति।

(ख) उपनयनसंस्कारः—द्विजत्वप्राप्तये श्रौतस्मार्त-कर्मादीनां सम्पादनार्हतायै उपनयनसंस्कारः नित्यकाम्य-गौणश्चेति त्रिविधेषु मुहूर्तेषु विधीयते। नित्यकाम्यगौणकालस्तु–

विप्राणां व्रतबन्धनं निगदितं गर्भाज्जने वाष्टमे,
वर्षे वाप्यथ पञ्चमे क्षितिभुजां षष्ठे तथैकादशे।
वैश्यानां पुनरष्टमेऽप्यथ पुनः स्याद् द्वादशे वत्सरे
कालेऽथ द्विगुणे गते निगदिते गौणं तदाहुर्बुधाः।।

अर्थात् ब्राह्मणानां गर्भदिनमारभ्य उत्पत्तिदिनात् वा सौरवर्षप्रमाणेनाष्टमे वर्षे उपनयनसंस्कारः करणीयः। काम्यकालानुसारं विप्राणां गर्भाज्जनेर्वा पञ्चमे वर्षे, क्षत्रियाणां षष्ठे वर्षे तथा एकादशे वर्षे, वैश्यानामष्टमे तथा द्वादशे वर्षे उपनयनसंस्कारः करणीयः। उपनयनसंस्कारस्य काम्यकालः उक्तं मनुस्मृतौ–

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।
राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे।।

पुनश्च–क्षिप्र (हस्ताश्विपुष्यनेक्षत्रेषु), ध्रुव-(उत्तरात्रयरोहिणीसु) आश्लेषा चर (स्वातीपुनर्व-सुश्रवणधनिष्ठाशतभिषासु) मूल, मृदुसंज्ञक (मृगशिरा, रेवती, चित्रा, अनुराधा) पूर्वात्रय आर्द्रानक्षत्रेषु शुभवासरेषु-(रविसोमबुधगुरूशुक्रवासरेषु) 2, 3, 5, 10, 11, 12, तिथिषु शुक्लपक्षे कृष्णपक्षे पञ्चमीपर्यन्तं अपराह्नं विहाय उपनयनसंस्कारः कर्तव्यः इति शास्त्राभिमतम्; तद्यथा–

क्षिप्रध्रुवाहिचरमूलमृदुत्रिपूर्वा-
रौद्रेऽर्कविद्गुरुसितेन्दुदिने व्रतं सत्।
द्वित्रीषुरुद्ररविदिक्प्रमिते तिथौ च
कृष्णादिमत्रिलवकेऽपि न चापराह्णे।

उपनयनमुहूर्ते गुरुशुक्रास्तोदयबालवृद्धत्वविचारः लग्नशुद्धिविचारः अपि विधीयते। वेदादिचतुर्दशविद्यायाः अध्ययनार्थं उपनयनसंस्कारः आवश्यको भवति। षोडशसंस्कारेषु उपनयनं प्रमुखो वर्तते। उपनयनः त्रि-प्रकारकाः भवन्ति–1. नित्यः, 2. काम्यः, 3. गौणश्च।

नित्यः:–	8 ब्राह्मणानां	11 क्षत्रियाणां	12 वैश्यानां
काम्यः:–	5 ब्राह्मणानां	6 क्षत्रियाणां	8 वैश्यानां
गौणः:–	16 ब्राह्मणानां	22 क्षत्रियाणां	24 वैश्यानां

आपस्तम्बगृह्यसूत्रे उक्तं यत्–"गर्भाष्टमेषु ब्राह्मणमुपनयेद् गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्यमिति" इति दिक्।

(ग) उपनयने ग्रहाणामशुभस्थानानि–

कवीज्यचन्द्रलग्नपा रिपौ मृतौ व्रतेऽधमाः।
व्ययेऽब्ज भार्गवौ तथा तनौ मृतौ सुते खलाः।।

लग्नशुद्धिः–

व्रतबन्धेऽष्टषड्रिष्फवर्जिताः शोभनाः शुभाः।
त्रिषडाये खलाः पूर्णो गोकर्कस्थो विधुस्तनौ।।

उपनयने निषिद्धकालः–

कृष्णे प्रदोषेऽनध्याये शनौ निश्यपराह्णके।
प्राक्सन्ध्यागर्जिते नेष्टो व्रतबन्धो गलग्रहे।।

उपनयने ग्रहाणां नवांशफलम्–

क्रूरो जडो भवेत्पापः पटुः षट्कर्मकृद्वटुः।
यज्ञार्थभाक् तथा मूर्खो रव्याद्यंशे तनौ क्रमात्।।

कश्यपः–

ऋतौ वसन्ते विप्राणां ग्रीष्मे राज्ञां शरद्यथा।
विशां मुख्यं च सर्वेषां द्विजानां चोपनायनम्।।

(घ) का०सिं.द.सं.वि.वि.दरभंगा, पञ्चाङ्गे उपनयन मुहूर्तः–

शुद्धसमये, उत्तरायणे, माघादिषण्मासेषु, सू.चं.बु.वृ.शु. वारेषु (सामवेदिनां मंगलवारेऽपि) जन्ममासनक्षत्रादौ व्रतं शुभम्। 2/3/5/10/11/12 तिथिषु शुक्लपक्षे, पूर्वाह्ने च शुभम्। मकरार्के-पौषे 11/12, मकरार्के माघे 12, चैत्रे वैशाखे च तृतीया, वैशाखभिन्नमासानां द्वितीया, आषाढे 10/11 चोपनयने निषिद्धाः। अश्वि.रो.मृ.आ.पुष्य.आश्ले.पूर्वा 3, उत्तरा 3, ह. चि.स्वा. अनु.मू.श्र.ध.श.रे. नक्षत्रेषु (क्षत्रियवैश्ययोः पुनर्वसावपि) शुभम्। ब्राह्मणानां पुनर्वसुनक्षत्रे उपनयनं निषिद्धम्। मन्वादियुगादिषु, अपराह्ने, सायं, प्रदोषेऽनध्याये, कृष्णपक्षे चोपनयनं निषिद्धम्। त्रिषडस्थाः खलाः सर्वे चन्द्रो द्विदयूनदिक्त्रिगः। सौम्याः केन्द्रत्रिकोणस्थाः लाभे सर्वे व्रते शुभाः। लग्नेशचन्द्रशुक्रगुरवः षडष्टगा न शुभाः। चन्द्रशुक्रौ लग्नात् 12 गतौ न शुभौ। 1/5/8 स्थाः पापा न शुभाः। 6/8/12 गताः शुभा न शुभप्रदा। 3/6/11 गताः पापाः शुभदा, पूर्णचन्द्रो वृषकर्कलग्नतः शुभो नान्यथा। लग्नेऽर्कः शुभः।

गुरुशुद्धिः–जन्मराशितः उपनयनकाले 2/5/7/9/11 स्थानगतः गुरुः शुभः, 4/10/12 स्थानगतः शान्त्या शुभः, 1/3/6/8 स्थानगतो निषिद्धः। रामाचार्यमतेन 1/3/6/10 स्थानगतो गुरुः शान्त्या शुभः, 4/8/12 स्थानगतो निषिद्धः। ब्राह्मणानां पञ्चवर्षतः षोडशवर्षपर्यन्तं, क्षत्रियाणां षड्वर्षादारभ्य द्वाविंशतिवर्षपर्यन्तं, वैश्यानामष्टवर्षादारभ्य चतुर्विंशतिवर्ष-पर्यन्तमुपनयनकालः। तत्रोपनयनारम्भकालात्सर्वेषां यथोत्तरं गौणकालोऽतः समये प्राप्ते सति यथापूर्वमुपनयनं कार्यम्।

(V) (ङ)
उपनयनमुहूर्त्तविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—उपनयनसंस्कारेण ब्राह्मणेषु कस्य अभिवृद्धिः भवति?
उत्तरम्— तेजोवृद्धिः।

2. **प्रश्नः**— उपनयनसंस्कारेण क्षत्रियेषु कस्य अभिवृद्धिः भवति?
उत्तरम्— बलवृद्धिः।

3. **प्रश्नः**—उपनयनसंस्कारेण वैश्येभ्यः कस्य अभिवृद्धिः भवति?
उत्तरम्— अर्थवृद्धिर्जायते।

4. **प्रश्नः**—ब्राह्मणानामुपनयनं गर्भात् जन्मात् वा कस्मिन् वर्षे करणीयम्?
उत्तरम्— पञ्चमे अष्टमे वा वर्षे।

5. **प्रश्नः**—क्षत्रियाणामुपनयनं गर्भात् जन्मात् वा कस्मिन् वर्षे करणीयम्?
उत्तरम्— षष्ठे एकादशे वर्षे वा।

6. **प्रश्नः**—वैश्यानामुपनयनं गर्भात् जन्मात् वा कस्मिन् वर्षे करणीयम्?
उत्तरम्— अष्टमे द्वादशे वा वर्षे।

7. प्रश्नः—उपनयनसंस्कारस्य शुभ-दिनानि कानि?
उत्तरम्— सू.चं.बु.बृ.शु.वारेषु।

8. प्रश्नः—माघादिषण्मासेषु कः संस्कारः विहितो विद्यते?
उत्तरम्— उपनयनसंस्कारः।

9. प्रश्नः—उपनयनसंस्कारस्य शुभ-नक्षत्राणि कानि?
उत्तरम्—अश्वि.रो.मृ.आ.पुष्य.आश्ले.पूर्वा, उत्तरा, ह. चि.स्वा.अनु.मू.श्र.ध.श.रे. नक्षत्रेषु।

10. प्रश्नः—क्षत्रियवैश्ययोरुपनयने किं नक्षत्रं विशेषेण विहितम्?
उत्तरम्—पुनर्वसुः।

11. प्रश्नः—उपनयनसंस्कारस्य के शुभ-तिथयः?
उत्तरम्— 2/3/5/10/11/12 तिथिषु शुक्लपक्षे।

12. प्रश्नः—विप्राणां कृते उपनयनस्य गौणकालः कदा जायते?
उत्तरम्— षोडशवर्षे।

13. प्रश्नः—क्षत्रियाणां उपनयनस्य गौणकालः कदा जायते?
उत्तरम्— द्वाविंशतिवर्षे।

14. प्रश्नः—वैश्याणां उपनयनस्य गौणकालः कदा जायते?
उत्तरम्— चतुर्विंशतिवर्षे।

15. प्रश्नः—विप्रः व्रात्यदोषाधिकारी जायते?
उत्तरम्— षोडशवर्षानन्तरम्।

16. प्रश्नः—क्षत्रियः व्रात्यदोषाधिकारी जायते?
उत्तरम्—द्वाविंशतिवर्षानन्तरम्।

17. प्रश्नः—वैश्यः व्रात्यदोषाधिकारी जायते?
उत्तरम्—चतुर्विंशतिवर्षानन्तरम्।

18. प्रश्नः—उपनयनं कस्मिन् अयने प्रशस्तम्?
उत्तरम्—उत्तरायणे।

19. प्रश्नः—उपनयनं शुद्धेऽशुद्धे वा समये विहितम्?
उत्तरम्— शुद्धसमये।

20. प्रश्नः—उपनयने गुरुशुद्धिरपेक्षिता न वा?
उत्तरम्— अपेक्षिता।

21. प्रश्नः—उपनयनं कस्मिन् पक्षे प्रशस्तम्?
उत्तरम्—शुक्लपक्षे।

22. प्रश्नः—द्वित्रीषुरुद्रदिविदिक् तिथिषु कः संस्कारः करणीयः?
उत्तरम्— उपनयनसंस्कारः।

23. प्रश्नः—विप्रस्याधिपौ ग्रहौ कौ भवतः?
उत्तरम्— भार्गवेज्यौ।

24. प्रश्नः—क्षत्रियाधीशौ ग्रहौ कौ भवतः?
उत्तरम्— कुजसूर्यौ

25. प्रश्नः—वैश्याधिपो ग्रहः अस्ति?
उत्तरम्— बुधः।

26. प्रश्नः—अन्त्यजानामधिपो ग्रहो विद्यते?
उत्तरम्— शनिः।

27. प्रश्नः—ऋग्वेदाधिपो ग्रहो विद्यते?
उत्तरम्— वृहस्पतिः।

28. प्रश्नः—यजुर्वेदाधिपो ग्रहो विद्यते?
उत्तरम्— शुक्रः।

29. प्रश्नः—सामवेदाधिपो ग्रहो वर्त्तते?
उत्तरम्— मङ्गलः।

30. प्रश्नः—अथर्ववेदाधिपो ग्रहो जायते?
उत्तरम्— बुधः।

31. प्रश्नः—जन्मदिनादौ विप्राणां व्रतबन्धः कीदृशो भवति?
उत्तरम्— प्रशस्तः (मंगलप्रदः)।

32. प्रश्नः—व्रतबन्धसंस्कारे केषां ग्रहाणां शुद्धिरपेक्षिता विद्यते?
उत्तरम्— गुरोः।

33. प्रश्नः—जन्मराशेस्त्रिकोणायद्विसप्तगः गुरूः कीदृग् फलदायको भवति?
उत्तरम्— श्रेष्ठः।

34. प्रश्नः—जन्मराशेः खषट्त्र्याद्येस्थे गुरौ कीदृशः फलदो जायते?
उत्तरम्— मध्यमः।

35. प्रश्नः—जन्मराशेश्चतुर्थाष्टद्वादशस्थः गुरुः किदृशो भवति?
उत्तरम्— निन्दितः।

36. प्रश्नः—कृष्णपक्षे व्रतबन्धः प्रशस्तः न वा?
उत्तरम्— न (निषिद्धः)।

37. प्रश्नः—प्रदोषकाले व्रतबन्धः प्रशस्तो निषिद्धो वा?
उत्तरम्— निषिद्धः।

38. प्रश्नः—शनिवासरे उपनयनं प्रशस्तं निषिद्धं वा?
उत्तरम्— निषिद्धम्।

39. प्रश्नः—रात्रौ उपनयनं प्रशस्तं निषिद्धं वा?
उत्तरम्— निषिद्धम्।

40. प्रश्नः—शारवेशे कुजे सति कुजवासरे व्रतबन्धः कर्त्तव्यो न वा?
उत्तरम्— कर्त्तव्यः।

41. प्रश्नः—अपराह्णे उपनयनं करणीयं न वा?
उत्तरम्— न।

42. प्रश्नः—गलग्रहतिथौ (4, 7, 8, 9, 13, 14, 15, 30, 1) उपनयनं निषिद्धं प्रशस्तं वा?
उत्तरम्— निषिद्धम्।

43. प्रश्नः—उपनयनसंस्कारस्य काम्यकालः मनुना किमुक्तम्?
उत्तरम्— "ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे। राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोष्टमे।।"

44. प्रश्नः—उपनयनसंस्कारविषये आपस्तम्बगृह्यसूत्रे किमुक्तम्?
उत्तरम्— "गर्भाष्टमेषु ब्राह्मणमुपनयेद्गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्यमिति" इति।

45. प्रश्नः—संस्कारविधिषु उपनयनसंस्कारस्य स्थानं किं वर्तते?
उत्तरम्—दशमम्।

46. प्रश्नः—उपनयनसंस्कारस्य अपरं नाम किम्?
उत्तरम्—यज्ञोपवीतधारणम्।

47. प्रश्नः—वैदिकीदीक्षां विधाय शिष्यं परमेश्वरस्य वेदस्य च समीपे को नयति।
उत्तरम्—आचार्यः।

48. प्रश्नः—उपनयनशब्दस्य का व्युत्पत्तिः?
उत्तरम्— उपनयनं नामोपसमीपे नयनमिति।

49. प्रश्नः—वेदादि-चतुर्दशविद्यायाः अध्ययनार्थं कः आवश्यको भवति?
उत्तरम्—उपनयनसंस्कारः।

50. प्रश्नः—षोडशसंस्कारेषु प्रमुखो कः?
उत्तरम्—उपनयनसंस्कारः।

51. प्रश्नः—उपनयनसंस्कारः कतिप्रकारकः?
उत्तरम्—त्रि-प्रकारकः, 1. नित्यः, 2. काम्यः, 3. गौणश्च।

52. प्रश्नः—विप्राणां व्रतबन्धनं निगदितं गर्भाज्जने वाष्टमे, वर्षे वाप्यथ पञ्चमे क्षितिभुजां षष्ठे तथैकादशे। वैश्यानां पुनरष्टमेऽप्यथ पुनः स्याद् द्वादशे वत्सरे। कालेऽथ द्विगुणे गते निगदिते गौणं तदाहुर्बुधाः।। उक्त श्लोकः कस्य शुभकार्यकालस्य निर्धारणं क्रियते?
उत्तरम्—उपनयनसंस्कारस्य।

53. प्रश्नः—ऋतौ वसन्ते विप्राणां ग्रीष्मे राज्ञां शरद्यया। विशां मुख्यं च सर्वेषां द्विजानां चोपनायनम्।। उपनयनसम्बन्धे कस्य आचार्यस्य कथनम्?
उत्तरम्—कश्यपस्य।

(V-C-73) 4. विवाहमुहूर्तः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) विवाहसंस्कारस्य प्रयोजनम्—संस्कारेषु विवाहः महत्त्वपूर्णः वर्तते। समावर्तनसंस्कारादनन्तरं ब्राह्मणादिवर्णाः स्ववर्णोचितां सुलक्षणां भार्यां परिगृह्य विवाहसंस्कारेण संस्कृताः सन्तः गृहस्थाश्रमे प्रविशन्ति। अतः गृहस्थाश्रमस्याधारभूतोऽयं संस्कारः। ते च विवाहाः अष्टविधाः भवन्ति। उक्तं च मनुना–

चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान्।
अष्टाविमान्समासेन स्त्रीविवाहान्निबोधत।।
ब्राह्मो दैवस्तथा चाऽऽर्षः प्राजापत्यस्तथाऽऽसुरः।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः।।
(मनुस्मृतिः)

1. ब्राह्म, 2. प्राजापत्यः, 3. आर्षः, 4. दैवः, 5. गान्धर्वः, 6. आसुरः, 7. पैशाचः, 8. राक्षसः।

भार्यात्रिवर्गकरणमित्यादि रामदैवज्ञवचोभिः धर्मादित्रयाणां पुरुषार्थाणां च चतुर्णां पुरुषार्थाणां धर्मार्थकाममोक्षाणां बीजरूपोऽयं संस्कारः। अत एवोक्तं शास्त्रस्मृतौ–"गृहाश्रमात्

परो धर्मो नास्ति नास्ति पुनः पुनः"। स च गृहस्थः विवाहेनैव प्रवर्तते। विवाहसंस्कारादेव कुलवृद्धिः वंशपरम्परा च वर्द्धते, अनयैव समाजे वर्णसंकरता नोत्पद्यते इति धर्मशास्त्राभिमतम्।

(ख) विवाहसंस्कारमुहूर्तः–विवाहे उत्पातान्सह पातदग्धेत्यादि वचनात् क्रान्तिसाम्यादीन् कालान् दिव्यादि उत्पातान्, गुरुशुक्रयोर्बालवृद्धत्वास्तंगतत्वं, धन्वर्कमीनाऽर्कादि-गुर्वादित्ययोगान् पापविद्धलग्ननवांशौ परिहृत्य जन्म-मासादीनाञ्च मिथुनकुम्भमृगालिवृषाजगे मिथुनगेऽपि रवौ त्रिलवे शुचेः रेवत्युत्तररोहिणीमृगमघामूलानुराधाकरस्वातीषु प्रमदा तुलामिथुनके लग्ने विवाहः शुभः, मासाः फाल्गुनमाघ मार्गशुचयो ज्येष्ठस्तथा माधवः शस्ताः सौम्यदिनं तथैव तिथयो रिक्ताकुहूवर्जितः। अलिमृगाजगते करपीडनं भवति कार्ति पौषमधुष्वपि, इत्यनेन मिथुनकुम्भमकरवृश्चिकवृषमेषराशिषु स्थिते रवौ, मेषराशिगते सूर्ये आषाढस्य शुक्लदशमीपर्यन्तं वृश्चिकमकरमेषस्थे सूर्ये क्रमेण कार्तिकपौषचैत्रमासेष्वपि विवाहः शुभो भवति। वेधरहितैः, मृगशीर्षहस्तमूला-नुराधामघारोहिणीरेवतीस्वाती उत्तरात्रयनक्षत्रेषु रिक्तातिथींश्च विहाय शुभेह्नि विवाहः शुभो भवति। तद्यथा–

निर्वेधैः शशिकरमूलमैत्रपित्र्य ब्राह्मात्योत्तरपवनैः
शुभो विवाहः।

(ग) विवाहे ग्रहशुद्धिः–

गुरुशुद्धिवशेन कन्यकानां
समवर्षेषु षडब्दकोपरिष्टात्।
रविशुद्धिवशाच्छुभो वराणामुभयो-
श्चन्द्रविशुद्धितो विवाहः।।

(घ) लग्नभङ्गः–

व्यये शनिः रवे वणिजे तृतीये
भृगुस्तनौ चन्द्रखला न शस्ता।
लग्नेट् कविग्लौश्च रिपौ मृतौ ग्लौ
लग्नेट्शुभाराश्च मदे च सर्वे।।

(ङ) का.सिं.द.सं.वि.वि.दरभंगा, पञ्चाङ्गे विवाहमुहूर्तः–

मार्गमाघफाल्गुनवैशाखज्येष्ठाषाढमासेषु सौरक्रमेण (मार्गे देवोत्थानात्परमाषाढे हरिशयनात्प्रागेव) 1/2/3/5/6/7/8/10/11/12/13/15 तिथिषु, सू.चं.बु.बृ.शु. वारेषु, अश्वि.रो.मृ.म.उत्तरा 3, ह.चि.स्वा.अनु.मू.श्र.ध.रे. नक्षत्रेषु पंचशलाकावेधरहितेषु, वृष-मिथुन-कन्या-तुला-धनु-मीन-लग्नेषु, शुभग्रहेषु 1/4/5/7/9/10 स्थितेषु पापेषु 3/6/11 गतेषु शुभः। विवाहे यदि गुरुर्वा शुक्रो 1/4/5/7/9/10 स्थितिषु, पापेषु 3/6/11 गतेषु शुभः। विवाहे यदि गुरुर्वा शुक्रो 1/4/5/7/9/10 गतो भवेत्तदा सकलदोषं नाशयति। ज्येष्ठा कन्या, ज्येष्ठो वरः ज्येष्ठमासश्च त्रिज्येष्ठसंज्ञकास्तत्र विवाहो न कार्यः। ज्येष्ठकन्यावरयोः ज्येष्ठमासे विवाहो निषिद्धः। ज्येष्ठद्वयं मध्यमः स्यात्। आवश्यके कृत्तिकास्थं सूर्यं त्यक्त्वा ज्येष्ठमासेऽपि ज्येष्ठवरकन्ययोर्विवाहः शुभः।

(V) (ङ)

विवाहमुहूर्तविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— विवाहाः कतिविधाः भवन्ति के च ते?
उत्तरम्—अष्टविधा (1. ब्राह्म, 2. प्राजापत्यः, 3. आर्षः, 4. दैवः, 5. गान्धर्वः, 6. आसुरः, 7. पैशाचः, 8. राक्षसः।)
2. **प्रश्नः**—एकस्मिन् वर्षे द्वयोः सहोदरयोः विवाहः सिद्धः निषिद्धो वा?
उत्तरम्—निषिद्धः।
3. **प्रश्नः**— ज्येष्ठपुत्रस्य ज्येष्ठकन्यायाः वा ज्येष्ठमासे विवाहः सिद्धो निषिद्धो वा?
उत्तरम्—निषिद्धः।
4. **प्रश्नः**— केषु मासेषु विवाहः शुभो भवति?
उत्तरम्— मार्गमाघफाल्गुनवैशाखज्येष्ठाषाढमासेषु।
5. **प्रश्नः**— केषु तिथिषु विवाहः शुभो भवति?
उत्तरम्— 1/2/3/5/6/7/8/10/11/12/13/15 तिथिषु।
6. **प्रश्नः**— केषु नक्षत्रेषु विवाहः शुभो भवति?
उत्तरम्— अश्वि.रो.मृ.म.उत्तरा 3, ह.चि.स्वा.अनु.मू. श्र.ध.रे.नक्षत्रेषु।
7. **प्रश्नः**— केषु वारेषु विवाहः शुभो भवति?
उत्तरम्— सू.चं.बु.बृ.शु. वारेषु।
8. **प्रश्नः**—जन्ममास-जन्मतिथि-जन्मनक्षत्रेषु विवाहः सिद्धो निषिद्धो वा?
उत्तरम्— निषिद्धः।
9. **प्रश्नः**— केषु लग्नेषु, शुभग्रहेषु विवाहः शुभो भवति?
उत्तरम्— वृष, मिथुन, कन्या, तुला, धनु, मीन।

10. **प्रश्नः**— पौषचैत्रं विहाय मार्गाद्याषाढान्तमासेषु प्रशस्तः कः संस्कारो भवति?
उत्तरम्— विवाहः।
11. **प्रश्नः**—कस्मिन् संस्कारे पञ्चशलाकाचक्रस्य शुद्धिर-पेक्षिता भवति?
उत्तरम्— विवाहसंस्कारे।
12. **प्रश्नः**— त्रिज्येष्ठस्य निषिद्धः कुत्र स्वीक्रियते?
उत्तरम्— विवाहे।
13. **प्रश्नः**—गुणविमर्शः कस्मिन् कार्ये (संस्कारे) करणीयः?
उत्तरम्— विवाहे।
14. **प्रश्नः**— उत्तमगुणाः जायन्ते?
उत्तरम्— त्रिंशत्।
15. **प्रश्नः**— उत्तमोत्तमगुणाः जायन्ते?
उत्तरम्— त्रिंशदधिकम्।
16. **प्रश्नः**— मध्यमगुणः बोध्यः?
उत्तरम्— विंशतिः।
17. **प्रश्नः**— अधमगुणो भवति?
उत्तरम्— षोडशः।
18. **प्रश्नः**— अष्टकूटः कुत्र विचार्यते?
उत्तरम्— विवाहे।
19. **प्रश्नः**— वर्णस्य गुणः भवति?
उत्तरम्— एकः।
20. **प्रश्नः**— वश्यस्य गुणौ स्तः?
उत्तरम्— द्वौ।
21. **प्रश्नः**— ताराया: गुणाः जायन्ते?
उत्तरम्— त्रयः।
22. **प्रश्नः**— योनिनां गुणाः भवन्ति?
उत्तरम्—चत्वारः।
23. **प्रश्नः**— ग्रहमैत्रीणां गुणाः भवन्ति?
उत्तरम्—पञ्च।
24. **प्रश्नः**— गण-गुणाः कति भवन्ति?
उत्तरम्— षट्।
25. **प्रश्नः**— भकूटानां गुणाः जायन्ते?
उत्तरम्— सप्त।
26. **प्रश्नः**— नाड़ीणां गुणाः भवन्ति?
उत्तरम्— अष्ट।
27. **प्रश्नः**— ग्रहाणां वेधविचारः क्रियते?
उत्तरम्— विवाहमुहूर्ते।
28. **प्रश्नः**— विवाहे वरकन्ययोः का शुद्धिरपेक्षिता?
उत्तरम्— चन्द्रशुद्धिः।
29. **प्रश्नः**—रेवत्युत्तररोहिणीमृगमघामूलानुराधाकरस्वातीषु प्रमदा तुलामिथुनके लग्ने विवाहः शुभ, मासाः फाल्गुनमाघ मार्गशुचयोः ज्येष्ठस्तथा माधवः शस्ताः सौम्यदिनं तथैव तिथयो रिक्ताकुहूवर्जितः। उक्तश्लोकः कस्य मुहूर्तस्य कृते वर्तते?
उत्तरम्— विवाह-मुहूर्तस्य।
30. **प्रश्नः**—मनुस्मृत्यनुसारं के सन्ति अष्टविध-विवाहाः?
उत्तरम्—चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान्।
अष्टाविमान्समासेन स्त्रीविवाहान्निबोधत।।
ब्राह्मो दैवस्तथा चाऽऽर्षः प्राजापत्यस्तथाऽऽसुरः।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः।।
31. **प्रश्नः**—कियन्त्यः तिथयो भवन्ति?
उत्तरम्—पञ्चदश।
32. **प्रश्नः**—योगा कतिविधाः भवन्ति?
उत्तरम्—द्विविधा।
33. **प्रश्नः**—मासानां कति भेदाः?
उत्तरम्—त्रयो भेदाः।
34. **प्रश्नः**—आनन्दादियोगाः कतिसंख्यकाः?
उत्तरम्—अष्टाविंशतिसंख्यकाः।
35. **प्रश्नः**— विवाहानन्तरं कतिषु दिनेष्वाभ्यन्तरं वधूप्रवेशः कर्तव्यः?
उत्तरम्—षोडश।
36. **प्रश्नः**—षोडशदिनाभ्यन्तरे कियतितमे दिवसि वधूप्रवेशो उचितः?
उत्तरम्—द्वादशे।
37. **प्रश्नः**—षोडशदिनानन्तरं कदा वधूप्रवेशो उचितः?
उत्तरम्—एकमासाभ्यन्तरे।

38. **प्रश्नः—**ज्योतिषशास्त्रप्रवर्तकाः आचार्याः कतिसंख्यकाः?
उत्तरम्—अष्टादशसंख्यकाः।

39. **प्रश्नः—**विवाहमेलापके अष्टवर्गगुणसंख्या काः?
उत्तरम्—36 षट्त्रिंशत्।

(V-C-73) 5. नक्षत्रपरिचयः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

5. **नक्षत्रपरिचयः**—न क्षरतीति नक्षत्रमिति व्युत्पत्त्या आकाशे गतिशून्यस्थितानां ताराणां समूहो नक्षत्रम्। सैद्धान्तिकदृष्ट्या क्रान्तिवृत्तस्य समा सप्तविंशतिभागाः नक्षत्रवाचकाः। समस्ताकाशमण्डलात् सप्तविंशतिभिर्नक्षत्रैर्विभज्यते। वैश्वप्रान्त्यांघ्रिश्रुतितिथिभागतोऽभिजित्स्यादित्यनेन साभिजिदष्टादश- नक्षत्राणि। प्रत्येकनक्षत्रं चतुर्धा विभज्यते तदैकचरणप्रमाणं ज्ञायते। नक्षत्राणां नामानि–

> **अश्विनी भरणी चैव कृत्तिका रोहिणी मृगः।**
> **आर्द्रा पुनर्वसु पुष्यस्तदाश्लेषा मघा ततः॥**
> **पूर्वाफाल्गुनिका चैव उत्तराफाल्गुनी ततः।**
> **हस्तचित्रा तथा स्वाती विशाखा तदनन्तरम्॥**
> **अनुराधा ततो ज्येष्ठा ततो मूलं निगद्यते।**
> **पूर्वाषाढोत्तराषाढा त्वभिजिच्छ्रवणा तथा॥**
> **धनिष्ठा शततारारव्यं पूर्वाभाद्रपदं ततः।**
> **उत्तराभाद्रपदं चैव रेवत्येतानि भानि च॥**

1. अश्विनी, 2. भरणी, 3. कृत्तिका, 4. रोहिणी, 5. मृगशीर्षम्, 6. आर्द्रा, 7. पुनर्वसु, 8. पुष्य, 9. आश्लेषा, 10. मघा, 11. पूर्वाफल्गुनी, 12. उत्तराफल्गुनी, 13. हस्त, 14. चित्रा, 15. स्वाति, 16. विशाखा, 17. अनुराधा, 18. ज्येष्ठा, 19. मूल, 20. पूर्वाषाढ, 21. उत्तराषाढ, 22. श्रवणा, 23. धनिष्ठा, 24. शतभिषा, 25. पूर्वाभाद्रपद, 26. उत्तराभाद्रपद, 27. रेवती च। एतदतिरिक्तमभिजिदपि अष्टविंशतितमं नक्षत्रमस्ति।

त्रित्र्यङ्कपञ्चाग्निकुवेदवह्नयः इत्यादिना नक्षत्राणां तारासंख्या प्रोक्ताः, ताराभिः नक्षत्राकृतिश्च वर्णितमित्थं यत् "अश्व्यादिरूपं तुरगस्य योनिरिति....।

फलिते हि नासत्यान्तकवह्नीत्यादिना नक्षत्राणां स्वामिनां वर्णनं प्राप्यते। फलप्रवृत्तये च नक्षत्राणां ध्रुव-चर-उग्र-मिश्र-क्षिप्र-मृदु-तीक्ष्णादिभेदाः प्राप्यन्ते।

प्रत्येकस्य नक्षत्रस्य चत्वारो पादाः, आहत्य 108 पादाः, नवपादैः अर्थात् सपादद्वयनक्षत्रात्मको एको राशिः।

(क) नक्षत्रस्वामिनः (उक्तं च बृहत्संहितायाम्)

1. अश्विन्याः-अश्विनीकुमारौ, 2. भरण्याः-यमः, 3. कृत्तिकायाः-अग्निः, 4. रोहिण्याः-ब्रह्मा, 5. मृगशिरायाः-चन्द्रमा, 6. आर्द्रायाः-शिवः, 7. पुनर्वसोः-अदितिः, 8. पुष्यस्य-गुरुः, 9. आश्लेषायाः -सर्पः, 10. मघायाः-पितरः, 11. पूर्वाफल्गुन्याः-भगः, 12. उत्तराफल्गुन्याः-अर्यमा, 13. हस्तस्य-सूर्यः, 14. चित्रायाः-त्वष्टा, 15. स्वातेः-वायुः, 16. विशाखायाः-शक्राग्नी (इन्द्राग्नी), 17. अनुराधायाः-मित्रं, 18. ज्येष्ठायाः-इन्द्रः, 19. मूलस्य-राक्षसः, 20. पूर्वाषाढयाः-जलम्, 21. उत्तराषाढयाः-विश्वदेवः, 22. श्रवणायाः-विष्णुः, 23. धनिष्ठयाः-वसुदेवः, 24. शतभिषायाः-वरुणः, 25. पूर्वाभाद्रपदस्य- (अजचरणनामकः सूर्यः, 26. उत्तराभाद्रपदस्य- अहिर्बुध्न्यसूर्यः, 27. रेवत्याश्च-पूषासूर्यः। एवं च यथोच्यते–

> नासत्यान्तकवह्निधातृशशभृद्रुद्रादितीज्योरगा।
> अ. भ. कृ. रो. मृग. आर्द्रा.पु.पुष्य. आश्लेषा
> ऋक्षेशाः पितरो भगोर्यमरवी त्वष्टा समीरः क्रमात्।
> मघा पू-फा. उ.हस्त चित्रा स्वाती
> शक्राग्नी खलु मित्र इन्द्र निर्ऋतिक्षीराणि विश्वे विधिः।
> विशाखा अनुराधा ज्येष्ठा मूल पूर्वा उत्तरा अभिजित्
> गोविन्दा वसुतोयपाजचरणाऽहिर्बुध्न्यपूषाभिधाः॥
> श्रवणा धनिष्ठा शतभिषा पूर्वभाद्र उ.भाद्र रेवती

(ख) नक्षत्राणां प्रकारभेदः—नक्षत्राणि षोडशविधानि भवन्ति। एतेष्वेव सप्तविंशतिनक्षत्राणि भवन्ति। यथा–

1. ध्रुवस्थिरनक्षत्राणि–

> **उत्तरात्रयरोहिण्यो भास्करश्च ध्रुवं स्थिरम्।**
> **तत्र स्थिरं बीजगेहशान्त्यारामादिसिद्धये॥**
> (मुहू०चि०न०प्र०)

(4. रोहिणी, 12. उत्तराफल्गुनी, 21. उत्तराषाढ़, 26. उत्तराभाद्रपद,)

2. चर-चलनक्षत्राणि–

> **स्वात्यादित्ये श्रुतेस्त्रीणि चन्द्रश्चापि चरं चलम्।**
> **तस्मिन् गजादिकारोहो वाटिका गमनादिकम्॥**
> (मुहू०चि०न०प्र०)

(7. पुनर्वसु, 15. स्वातिः, 22. श्रवणा, 23. धनिष्ठा, 24. शतभिषा,)

3. उग्रसंज्ञकनक्षत्राणि–

> **पूर्वात्रयं याम्यमघे उग्रं क्रूरं कुजस्तथा।**
> **तस्मिन् घाताग्निशाठ्यानि विषशस्त्रादि सिद्ध्यति॥**
> (मुहू०चि०न०प्र०)

(2. भरणी, 10. मघाः, 11. पूर्वाफल्गुनी, 20. पूर्वाषाढ़, 25. पूर्वाभाद्रपद,)

4. मिश्रसंज्ञकनक्षत्राणि–

> **विशाखाग्नेयभे सौम्यो मिश्रं साधारणं स्मृतम्।**
> **तत्राग्निकार्यं मिश्रं च वृषोत्सर्गादि सिद्ध्यति॥**
> (मुहू०चि०न०प्र०)

(3. कृत्तिका, 16. विशाखा,)

5. क्षिप्र-लघुनक्षत्राणि–

> **हस्ताश्विपुष्याभिजितः क्षिप्रं लघु गुरुस्तथा।**
> **तस्मिन् पण्यरतिज्ञानं भूषा शिल्पकलादिकम्॥**
> (मुहू०चि०न०प्र०)

(1. अश्विनी, 8. पुष्य, 13. हस्त, 28. अभिजित्)

6. मृदु-मैत्रनक्षत्राणि–

> **मृगान्त्यचित्रामित्रर्क्षं मृदु मैत्रं भृगुस्तथा।**
> **तत्र गीताम्बरक्रीडा मित्रकार्यं विभूषणम्॥**
> (मुहू०चि०न०प्र०)

(5. मृगशिरा, 14. चित्रा, 17. अनुराधा, 27. रेवती)

7. तीक्ष्ण-दारुणनक्षत्राणि–

> **मूलेन्द्रार्द्राहिभं सौरिस्तीक्ष्णं दारुणसंज्ञकम्।**
> **तत्राभिचारघातोग्रभेदाः पशुदमादिकम्॥**
> (मुहू०चि०न०प्र०)

(6. आर्द्रा, 9. आश्लेषा, 18. ज्येष्ठा, 19. मूल,)

8. ऊर्ध्वाधस्तिर्यङ्-नक्षत्राणि–

> **मूलाहिमिश्रोग्रमधोमुखं भवेदूर्ध्वा-**
> **स्यमार्द्रेज्यहरित्रयं ध्रुवम्।**
> **तिर्यङ्मुखं मैत्रकरानिलादितिज्येष्ठा-**
> **श्विभानीदृशकृत्ययेषु सत्।**
> (मुहू०चि०न०प्र०)

(4. रोहिणी, 8. पुष्य.)

9. अधोमुखनक्षत्राणि– (9. आश्लेषा, 2. भरणी, 3. कृत्तिका.) 10. तिर्यङ्मुखनक्षत्राणि– (1. अश्विनी, 7. पुनर्वसु, 13. हस्त, 14. चित्रा, 27. रेवती, 17. अनुराधा,) 11. अन्धनक्षत्राणि– (4. रोहिणी, 16. विशाखा, 23. धनिष्ठा,) 12. मध्यलोचननक्षत्राणि– (2. भरणी, 9. आश्लेषा, 18. ज्येष्ठा,) 13. मन्दलोचननक्षत्राणि– (24. शतभिषा, 9. आश्लेषा, 17. अनुराधा,) 14. सुलोचननक्षत्राणि– (7. पुनर्वसु, 15. स्वाति,) 15. पंचकनक्षत्राणि– (23. धनिष्ठा, 24. शतभिषा, 25. पूर्वाभाद्रपद, 26. उत्तराभाद्रपद, 27. रेवती) 16. मूलनक्षत्राणि– (18. ज्येष्ठा, 9. आश्लेषा, 27. रेवती, 1. अश्विनी, 19. मूल, 10. मघा,)

(ग) नक्षत्राणां चरणाक्षराणि–

1. अश्विनी- (चू चे चो ला), 2. भरणी- (ली लू ले लो) 3. कृतिका- (आ इ उ ए), 4. रोहिणी- (ओ वा वी वू), 5. मृगशीर्षम्- (वे वो का की), 6. आर्द्रा- (कु घ ङ छ), 7. पुनर्वसु- (के को हा ही), 8. पुष्य- (हू हे हो डा), 9. आश्लेषा- (डी, डु, डे, डो)। 10. मघा- (मा मी मू मे)। 11. पूर्वाफल्गुनी- (मो टा टी टू)। 12. उत्तराफल्गुनी- (टे टो पा पी)। 13. हस्त- (पू ष ण ठ)। 14. चित्रा- (पे पो रा री)। 15. स्वाति- (रु रे रो ता)। 16. विशाखा- (ती तू ते तो)। 17. अनुराधा- (ना नी नू ने)। 18. ज्येष्ठा- (नो या यी यू)। 19. मूल- (ये यो भा भी)। 20. पूर्वाषाढ- (भू धा फा ढा)। 21. उत्तराषाढ- (भे भो जा जी)। 22. श्रवणा- (खी खु खे खो)। 23. धनिष्ठा- (गा गी गू गे)। 24. शतभिषा- (गो सा सि सु)। 25. पूर्वाभाद्रपद- (से सो दा दी)। 26. उत्तराभाद्रपद- (दू, थ, झ, ञ) 27. रेवती-दे दो चा ची)। 28. अभिजित् (जू, जे, जो, खा)।

मुहूर्तचिन्तामणिग्रन्थानुसारम् अश्विन्यादीनां नक्षत्राणां रूपमाकृतिवर्णनम्–

1.	अश्विनी	तत्राश्विन्यास्तुरगास्याश्वमुख-सदृशं रूपम्
2.	भरणी,	भरण्या योनिर्भगस्तद्वद्रूपम्

3.	कृत्तिका	**कृतिकाया नापितक्षुराकृतिः।**
4.	रोहिणी	**रोहिण्या अनः शकटरूपम्।**
5.	मृगशीर्षम्	**मृगस्य एणास्यं हरिणमुखसदृशम्।**
6.	आर्द्रा,	**आर्द्रायां मणिसदृशम्।**
7.	पुनर्वसू	**पुनर्वसोर्गृहतुल्यम्।**
8.	पुष्य,	**पुष्यस्य पृषत्को बाणस्तत्सदृशम्।**
9.	आश्लेषा	**आश्लेषायाश्चक्राकारम्।**
10.	मघा,	**मघाया भवनं गृहसदृशम्।**
11.	पूर्वाफल्गुनी,	**पूर्वाफल्गुन्या मञ्चः खट्वा, तदाकारम्।**
12.	उत्तराफल्गुनी,	**उत्तराफल्गुन्याः शय्याकारम्।**
13.	हस्त,	**हस्तस्य हसताकारम्।**
14.	चित्रा	**चित्राया मौक्तिकाकारम्।**
15.	स्वाति,	**स्वात्याः प्रवालौपम्यम्। (मूँगा)**
16.	विशाखा	**विशाखायास्तोरणाकारम्।**
17.	अनुराधा,	**अनुराधाया बलिर्भक्त-पुञ्जस्तद्वदाकारम्।**
18.	ज्येष्ठा,	**ज्येष्ठायाः कुण्डनाकृतिः।**
19.	मूल,	**मूलस्य सिंहपुच्छाकारम्।**
20.	पूर्वाषाढ	**पूर्वाषाढाया गजदन्तसदृशम्।**
21.	उत्तराषाढ,	**उत्तराषाढाया मञ्चकसदृशम्।**
22.	श्रवणा	**श्रवणस्य त्रिविक्रमस्त्रिचरणो वामनस्तत्स्वरूपम्।**
23.	धनिष्ठा	**धनिष्ठाया मर्दलसदृशम् (मृदंग)**
24.	शतभिषा	**शततारकाया वृत्तं वर्तुलम्**
25.	पूर्वाभाद्रपद,	**पूर्वाभाद्रपदाया मञ्चसदृशम्।**
26.	उत्तराभाद्रपद	**उत्तरभाद्रपदाया यमलाभम्।**
27.	रेवती	**रेवत्या मद्गलाकारम्।**
28	अभिजित्	**अभिजितस्त्रिकोणाकारम्।**

(V) (घ) नक्षत्रविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः—** कति नक्षत्राणि भवन्ति?
उत्तरम्— 27 (सप्तविंशति), अभिजित् (28) अष्टविंशतितमम् (मूलनक्षत्ररूपेण)।

2. **प्रश्नः—** नक्षत्रस्य का व्युत्पत्तिः?
उत्तरम्— न क्षरतीति नक्षत्रमिति।

3. **प्रश्नः—** नक्षत्रस्य कति प्रकारकानि भवन्ति?
उत्तरम्— नक्षत्राणि षोडशविधानि भवन्ति।

4. **प्रश्नः—** ध्रुवनक्षत्राणि कानि सन्ति?
उत्तरम्— चत्वारि, (4. रोहिणी, 12. उत्तराफल्गुनी, 21. उत्तराषाढ, 26. उत्तराभाद्रपद)

5. **प्रश्नः—** चरनक्षत्राणि कानि सन्ति?
उत्तरम्—पञ्च, (7. पुनर्वसु, 15. स्वाति, 22. श्रवणा, 23. धनिष्ठा, 24. शतभिषा)

6. **प्रश्नः—** उग्रसंज्ञकनक्षत्राणि कानि सन्ति?
उत्तरम्— पञ्च, (2. भरणी, 10. मघा, 11. पूर्वाफल्गुनी, 20. पूर्वाषाढ, 25. पूर्वाभाद्रपद)

7. **प्रश्नः—** मिश्रसंज्ञकनक्षत्राणि कानि सन्ति?
उत्तरम्—द्वे, (3. कृत्तिका, 16. विशाखा)

8. **प्रश्नः—** क्षिप्रनक्षत्राणि कानि सन्ति?
उत्तरम्—चत्वारि, (1. अश्विनी, 8. पुष्य, 13. हस्त, 28. अभिजित्)

9. **प्रश्नः—** कियन्ति मृदुनक्षत्राणि सन्ति?
उत्तरम्—चत्वारि, (5. मृगशिरा, 14. चित्रा, 17. अनुराधा, 27. रेवती)

10. **प्रश्नः—** तीक्ष्णनक्षत्राणि कानि सन्ति?
उत्तरम्—(6. आर्द्रा, 9. आश्लेषा, 18. ज्येष्ठा, 19. मूल)

11. **प्रश्नः—** ऊर्ध्वाधस्तिर्यङ्-नक्षत्राणि कानि सन्ति?
उत्तरम्— (4. रोहिणी, 8. पुष्य,)

12. **प्रश्नः—** अधोमुखनक्षत्राणि कानि सन्ति?
उत्तरम्— (9. आश्लेषा, 2. भरणी, 3. कृत्तिका,)

13. **प्रश्नः—** तिर्यङ्मुखनक्षत्राणि कानि सन्ति?
उत्तरम्— (1. अश्विनी, 7. पुनर्वसु, 13. हस्त, 14. चित्रा, 27. रेवती, 17. अनुराधा)

14. **प्रश्नः—** अन्धनक्षत्राणि कानि सन्ति?
उत्तरम्— (4. रोहिणी, 16. विशाखा, 23. धनिष्ठा)

15. **प्रश्नः—** मध्यलोचननक्षत्राणि कानि सन्ति?
उत्तरम्— (2. भरणी, 9. आश्लेषा, 18. ज्येष्ठा)

16. **प्रश्नः—** मन्दलोचननक्षत्राणि कानि सन्ति?
उत्तरम्— (24. शतभिषा, 9. आश्लेषा, 17. अनुराधा)

17. **प्रश्नः—** सुलोचननक्षत्राणि कानि सन्ति?
उत्तरम्— (7. पुनर्वसु, 15. स्वाती)

18. **प्रश्नः—** पंचकनक्षत्राणि कानि सन्ति?
उत्तरम्—(23. धनिष्ठा, 24. शतभिषा, 25. पूर्वाभाद्रपद, 26. उत्तराभाद्रपद, 27. रेवती)

19. **प्रश्नः—** मूलनक्षत्राणि कानि सन्ति?
उत्तरम्— (18. ज्येष्ठा, 9. आश्लेषा 27. रेवती, 1. अश्विनी, 19. मूल, 10. मघा)

20. **प्रश्नः—** नाक्षत्रमासानां प्रयोजनं कस्मिन् कार्ये भवति?
उत्तरम्— नक्षत्रव्रते।

21. **प्रश्नः—** नाक्षत्रमासस्य प्रवृत्तिः कदा भवति?
उत्तरम्— इन्दोः भ्रमणात्।

22. **प्रश्नः—** अश्विनीनक्षत्रस्याधिपः कः?
उत्तरम्— अश्विनीकुमारः।

23. **प्रश्नः—** भरणेरधिपः कः?
उत्तरम्— यमः।

24. **प्रश्नः—** कृत्तिकानक्षत्रस्याधिपः कः?
उत्तरम्— अग्निः।

25. **प्रश्नः—** रोहिण्याः अधिपः कः?
उत्तरम्— ब्रह्मा।

26. **प्रश्नः—** मृगशिरानक्षत्रस्याधिपः कः?
उत्तरम्— चन्द्रमा।

27. **प्रश्नः—** आर्द्रायाः अधिपः कः?
उत्तरम्— शिवः।

28. **प्रश्नः—** पुनर्वसोरधिपः कः?
उत्तरम्— अदितिः।

29. **प्रश्नः—** पुष्यस्याधिपः कः?
उत्तरम्— गुरुः।

30. **प्रश्नः—** आश्लेषायाः अधिपः कः?
उत्तरम्— सर्पः।

31. **प्रश्नः—** मघाया अधिपः कः?
उत्तरम्— पितरः।

32. **प्रश्नः—** पूर्वाफल्गुन्याः ईशः कः?
उत्तरम्— भगः।

33. **प्रश्नः—** उत्तराफल्गुनीनक्षत्रस्याधिपः कः?
उत्तरम्— अर्यमा (सूर्यः)।

34. **प्रश्नः—** हस्तनक्षत्रस्याधिपः कः?
उत्तरम्— सूर्यः।

35. **प्रश्नः—** चित्रायाः अधिपः कः?
उत्तरम्— त्वष्ट्र (विश्वकर्मा)।

36. **प्रश्नः—** स्वातीनक्षत्रस्याधिपः कः?
उत्तरम्— वायुः।

37. **प्रश्नः—** विशाखायाः ईशः कः?
उत्तरम्— इन्द्राग्नी।

38. **प्रश्नः—** अनुराधायाः अधिपः कः?
उत्तरम्— मित्रः (सूर्यः)।

39. **प्रश्नः—** ज्येष्ठायाः अधिपः कः?
उत्तरम्— इन्द्रः।

40. **प्रश्नः—** मूलनक्षत्रस्याधिपः कः?
उत्तरम्— निर्ऋति राक्षसः।

41. **प्रश्नः—** पूर्वाषाढानक्षत्रस्याधिपः कोऽस्ति?
उत्तरम्— वारि (जलम्)।

42. **प्रश्नः—** उत्तराषाढस्याधिपः कः?
उत्तरम्— विश्वदेवः।

43. **प्रश्नः—** श्रवणानक्षत्रस्याधिपः कः?
उत्तरम्— विष्णुः।

44. **प्रश्नः—** धनिष्ठानक्षत्रस्याधिपः कः?
उत्तरम्— वसुदेवः।

45. **प्रश्नः—** शतभिषानक्षत्रस्याधिपः कः?
उत्तरम्— वरुणः।

46. **प्रश्नः—** पूर्वभाद्रपदनक्षत्रस्याधिपः कः?
उत्तरम्— ऊजयातब्रह्मा।

47. **प्रश्नः—** उत्तराभाद्रपदनक्षत्रस्याधिपः कः?
उत्तरम्— अहिर्बुध्न्यसूर्यः।

48. **प्रश्नः—** रेवतीनक्षत्रस्याधिपः कः?
उत्तरम्— पूषा।

49. **प्रश्नः**— अभिजित् नक्षत्रस्याधिपः कः?
उत्तरम्— ब्रह्मा।

50. **प्रश्नः**— स्वातीपुनर्वसुश्रुतित्रयनक्षत्राणां का संज्ञा?
उत्तरम्— चर, चल।

51. **प्रश्नः**— पूर्वात्रयभरणीमघानक्षत्रणां का संज्ञा?
उत्तरम्— उग्र, क्रूर।

52. **प्रश्नः**— रोहिणी-उत्तरात्रयनक्षत्राणां का संज्ञा?
उत्तरम्— स्थिर, ध्रुव।

53. **प्रश्नः**— पुष्यहस्त्यश्विन्यभिजित् नक्षत्राणां का संज्ञा?
उत्तरम्— लघु, क्षिप्र।

54. **प्रश्नः**— आश्लेषाज्येष्ठाऽऽर्द्रामूलनक्षत्राणां का संज्ञा?
उत्तरम्— तीक्ष्ण, दारुण।

55. **प्रश्नः**— चित्राऽनुराधारेवतीमृगशिरानक्षत्राणां संज्ञा?
उत्तरम्— मृदु, मैत्रम्।

56. **प्रश्नः**— कृत्तिकाविशाखानक्षत्रयोः संज्ञा?
उत्तरम्— मिश्र, साधारणः।

57. **प्रश्नः**— नक्षत्रे कति चरणाः भवन्ति?
उत्तरम्— चत्वारः।

58. **प्रश्नः**— एकस्यां राशौ कति नक्षत्राणि भवन्ति?
उत्तरम्— 2 1/4 नक्षत्राणि।

59. **प्रश्नः**— तत्राश्विन्याः स्वरूपं किम्?
उत्तरम्— तुरगस्याश्वमुखसदृशं रूपम्।

60. **प्रश्नः**— भरण्या स्वरूपं किम्?
उत्तरम्— योनिर्भगस्तद्वद्रूपम्।

61. **प्रश्नः**— कृतिकायाः स्वरूपं किम्?
उत्तरम्— नापितक्षुराकृतिः।

62. **प्रश्नः**— अनः शकटरूपं कस्य स्वरूपं वर्तते?
उत्तरम्— रोहिण्याः।

63. **प्रश्नः**—एणास्यं हरिणमुखसदृशं कस्य स्वरूपं वर्तते?
उत्तरम्— मृगस्य।

64. **प्रश्नः**— मणिसदृशं कस्य स्वरूपं वर्तते?
उत्तरम्— आर्द्रायाः।

65. **प्रश्नः**— गृहतुल्यं स्वरूपं कस्य?
उत्तरम्— पुनर्वसोः।

66. **प्रश्नः**— पृषत्को बाणस्तत्सदृशं कस्य स्वरूपं वर्तते?
उत्तरम्— पुष्यस्य।

67. **प्रश्नः**— चक्राकारं कस्य स्वरूपमस्ति?
उत्तरम्— आश्लेषायाः।

68. **प्रश्नः**— भवनं गृहसदृशं कस्य स्वरूपमस्ति?
उत्तरम्— मघायाः।

69. **प्रश्नः**— मञ्चः खट्वा, तदाकारं स्वरूपं कस्य वर्तते?
उत्तरम्— पूर्वाफल्गुन्याः।

70. **प्रश्नः**— शय्याकारं कस्य स्वरूपमस्ति?
उत्तरम्— उत्तराफल्गुन्याः।

71. **प्रश्नः**— हस्ताकारं स्वरूपं कस्य वर्तते?
उत्तरम्— हस्तस्य।

72. **प्रश्नः**— चित्रायाः स्वरूपं किम्?
उत्तरम्— मौक्तिकाकारम्।

73. **प्रश्नः**— प्रवालौपम्यम्। (मूँगा) स्वरूपं किम्?
उत्तरम्— स्वात्याः।

74. **प्रश्नः**— तोरणाकारं स्वरूपं कस्य वर्तते?
उत्तरम्— विशाखायाः।

75. **प्रश्नः**— अनुराधायाः स्वरूपं किम्?
उत्तरम्— बलिर्भक्तपुञ्जस्तद्वदाकारम्।

76. **प्रश्नः**— ज्येष्ठायाः स्वरूपं किम्?
उत्तरम्— कुण्डनाकृतिः।

77. **प्रश्नः**— सिंहपुच्छाकारं स्वरूपं कस्य वर्तते?
उत्तरम्— मूलस्य।

78. **प्रश्नः**— पूर्वाषाढायाः स्वरूपं किम्?
उत्तरम्— गजदन्तसदृशम्।

79. **प्रश्नः**— उत्तराषाढायाः स्वरूपं किम्?
उत्तरम्— मञ्चकसदृशम्।

80. **प्रश्नः**—त्रिविक्रमस्त्रिचरणो वामनस्तत्स्वरूपं कस्य वर्तते?
उत्तरम्— श्रवणस्य।

81. **प्रश्नः**— शततारकायाः स्वरूपं किम्?
उत्तरम्— वृत्तं वर्तुलम्।

82. **प्रश्नः**— मर्दलसदृशम् (मृदंग) स्वरूपं कस्य वर्तते?
उत्तरम्— धनिष्ठायाः।

83. **प्रश्नः**— पूर्वाभाद्रपदायाः स्वरूपं किम्?
उत्तरम्— मञ्चसदृशम्।

84. **प्रश्नः**—यमलाभं कस्य स्वरूपं वर्तते?
उत्तरम्— उत्तरभाद्रपदायाः।

85. **प्रश्नः**— मद्रलाकारं कस्य स्वरूपं वर्तते?
उत्तरम्— रेवत्याः।

86. **प्रश्नः**— त्रिकोणाकारं कस्य स्वरूपमस्ति?
उत्तरम्— अभिजितः।

87. **प्रश्नः**—अभिजित् नक्षत्रं कुत्र विधीयते?
उत्तरम्—उत्तराषाढायाः चतुर्थचरणे।

(V-C-73) 6. राशिपरिचयः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

6. **राशिपरिचयः**—सैद्धान्तिदृष्ट्या सूर्यभ्रमणवृत्तस्य क्रान्तिवृत्तस्य त्रिंशदंशात्मकाः समाः द्वादशभागाः मेषादिद्वादशराशिसंज्ञकाः भवन्ति। स्वकीये ब्रह्माण्डे एकं भचक्रं वर्तते। तस्य भचक्रस्य भागाः 360 अंशपरिमिताः वर्तन्ते। ज्योतिषाधारेण भचक्रं कालपुरुषात्मकमस्ति। तस्यैवाङ्गस्वरूपेण द्वादशराशयः सन्ति। यथा–

मेषो वृषश्च मिथुनः कर्कसिंहकुमारिकाः।
तुलालिश्चनुषो नक्रकुम्भो मीनास्ततः परम्॥

1. मेषः, 2. वृषः, 3. मिथुनः, 4. कर्कः, 5. सिंहः, 6. कन्या, 7. तुला, 8. वृश्चिकः, 9. धनुः, 10. मकरः, 11. कुम्भः, 12. मीनश्चैते 12. द्वादशराशयो भवन्ति। राशेः पर्यायवाचिशब्दरूपेण क्षेत्रं, गृहं, ऋक्षं, भं भावश्चादयः व्यवह्रियन्ते। कालपुरुषस्य अङ्गेषु मेषराशिः मस्तकं, वृषराशिः मुखं, मिथुनराशिः भुजद्वयं, कर्कराशिः हृदयप्रदेशः, सिंहराशिः उदरस्थानं, कन्याराशिः कटिस्थलम्, तुलाराशिः बस्तिः नाभिलिङ्गयोर्मध्यभागः वृश्चिकराशिः गुह्याङ्गं लिङ्गादि-गुप्ताङ्गानि, धनुराशिः उरुः, मकरराशिः जानुः, कुम्भराशिः जंघा द्वयं, मीनराशिः पादद्वयं च भवति। कथितं यथा–

कालाङ्गानि वराङ्गमाननमुरो हृत्क्रोडवासोभृतो,
वस्तिर्व्यञ्जनमुरुजानुयुगले जङ्घे ततोऽङ्घ्रिद्वयम्।
मेषाश्विप्रथमा नवर्क्षचरणा चक्रस्थिता राशयो,
राशिक्षेत्रगृहर्क्षभानि भवनं चैकार्थसमप्रत्ययाः॥
(वृ.जा.-1/4)

फलप्रवृत्तये शुभाशुभनिर्णयाय तेषां स्वामीस्वरूपाकृतिवर्णस्वभावाकृतीनां निर्धारणं फलितस्कन्धे विधीयते तद्यथा–

राशि	स्वामिनः	स्वरूपाणि	कालपुरुषविभागः	रुचयो वर्णः
1. मेषः	भौमः	अजस्वरूपः	शीर्षः	अरुणः
2. वृषः	शुक्रः	वृषभसदृशः	मुखम्	सितः
3. मिथुनः	बुधः	युगलम् (सगदं सवीणम्)	बाहू	हरितः
4. कर्कः	चन्द्रः	कर्कसदृशः	हृदयम्	पाटलः
5. सिंहः	सूर्यः	सिंहसदृशः	उदरम्	पाण्डुरः
6. कन्या	बुधः	नौकस्था सस्यदहना	कटिः	विचित्रः
7. तुला	शुक्रः	तुलाविद्यमानतुलः पुरुषः	बस्तिः	कृष्णः
8. वृश्चिकः	भौमः	वृश्चिकसदृशः	गुह्येन्द्रियः	पिशंगः
9. धनुः	गुरुः	धनुर्धारिपुरुषः (अश्वजघनः)	ऊरूः	पिङ्गलः
10. मकरः	शनिः	मृगास्यः	जानुयुगलं	कर्बुरः
11. कुम्भः	शनिः	घटाकारः	जङ्घा	बभ्रुकः
12. मीनः	गुरुः	भत्स्याकारः	पादः	मलिनश्च

एतदनन्तरमपि क्रमशः चरस्थिरद्विस्वभावाधारेण पुंस्त्रीक्रूराक्रूरसमविषमदिवाबलीरात्रिबली पृष्ठोदय-शीर्षोदयादिभेदेन राशीनां विभागः दृश्यते।

(क) राशीनां नामान्तराण्यपि बृहज्जातके प्रतिपादितानि। यथा–

क्रियताबुरिजितुमकुलीरलेयपाथोनजूककौर्प्याख्याः।
तौक्षिकआकोकेरोहृद्रोगश्चान्त्यभञ्चेत्थम् ॥
(वृ.जा.-1/8)

अर्थात् क्रियः-मेषस्य, ताबुरिः-वृषस्य, जितुमः-मिथुनस्य, कुलीरः-कर्कस्य, लेयः-सिंहस्य, पाथोनः-कन्यायाः, जूकः-तुलायाः, कौर्पिः-वृश्चिकस्य, तौक्षिकः-धनोः, आकोकेरः-मकरस्य, हृद्रोगः-कुम्भस्य, अन्त्यभञ्च-मीनस्य नामान्तरं विद्यते।

(ख) मेषादिराशीनां स्वरूपम्–

मत्स्यौ घटी नृमिथुनं सगदं सवीणं
चापीनरोऽश्वजघनो मकरो मृगास्यः।
तौलीससस्यदहना प्लवगा च कन्या
शेषाः स्वनामसदृशाः खचराश्च सर्वे॥
(वृहज्जातक-रा.प्र.-5)

अर्थात् निम्नाकारयुक्ताः मेषादिराशयः भवन्ति। एतेषां राशीनां जाति-संज्ञा-तत्त्व-स्वामि-स्थान-प्रकृति-वर्ण-स्वभावादयः शीर्षोदयोऽथ स्वल्पाङ्गो अधस्तात् प्रस्तूयते। एवं च राश्यनुरोधेन वर्णाक्षरविभागः अपि अधस्तात् प्रस्तूयते। उदाहरणार्थं–

1. **मेषः**–मेषराशेः मेष इव स्वरूपं भवति। पुरुषजातिः, चरसंज्ञकः, पूर्वदिशः स्वामी, क्षत्रियवर्णः, पर्वतीयप्रदेशे विचरणकर्त्ता, रजोगुणयुक्तः, कान्तिहीनः, अल्पसन्ततिः, पृष्ठोदयी, अग्नितत्त्वयुक्तश्च भवति। अस्य स्वामी मंगलग्रहः वर्तते। वर्णाक्षरः–चू चे चो ला ली लू ले लो अ। कथितं च–

पूर्ववासी नृपज्ञातिः शैलचारी रजोगुणी।
पृष्ठोदयी पावकी च मेषराशिः कुजाधिपः॥
(बृ०पा०हो०शा०5/7)

2. **वृषः**–वृषराशेः वृष इव स्वरूपं भवति। स्त्रीजातिः, स्थिरसंज्ञकः, भूमितत्त्वं, शीतलस्वभावः, कान्तिरहितः, दक्षिणदिशः स्वामी, वातप्रकृतिः, रात्रीबली, चतुश्चरणवान्, श्वेतवर्णः, महाशब्दकारी, विषमोदयी, मध्यमसन्ततिः, वैश्यवर्णः, शिथिलशरीरं च अस्ति। अयं राशिः अर्धजलराशि इत्यप्युच्यते। अस्य स्वभावः स्वार्थी, सांसारिककार्येषु दक्षश्च भवति। अस्य स्वामी शुक्रः वर्तते। वर्णाक्षरः–इ उ ए ओ वा वी वू वे वो। कथितं च–

श्वेतः शुक्राधिपो दीर्घः चतुस्पाच्छर्वरिबली।
याम्येट् ग्राम्यो वणिग्भूमी रजः पृष्ठोदयी वृषः॥
(बृ०पा०हो०शा०5/8)

3. **मिथुनः**–स्त्रीपुरुषयोः युगलचित्रं मिथुनराशिः, अत्र पुरुषस्य हस्ते गदा तथा स्त्रियाः हस्ते वीणा वर्तते। पश्चिमदिशः स्वामी, वायुतत्त्वं, शुक्र इव हरिद्वर्णः, पुरुषराशिः, द्विस्वभावः, विषमोदयी, उष्णः, शूद्रवर्णः, महाशब्दकारी, दिनबली, मध्यमसन्ततिः, शिथिलशरीरम्, प्राकृतिकस्वभावः विद्याध्ययनरतः, शिल्पी च। अस्य स्वामी बुधः। वर्णाक्षरः–का की कू घ ङ छ के को हा। कथितं च–

शीर्षोदयी नृमिथुनं सगदं च सवीणकम्।
प्रत्यङ्मरुद् द्विपाद्रात्रिबली ग्रामव्रजोऽनिली॥
(बृ०पा०हो०शा०5/9)

समगात्रो हरिद्वर्णो मिथुनाख्यो बुधाधिपः॥

4. **कर्कः**–कर्कस्य कर्क इव स्वरूपं भवति। चरः, स्त्रीजातिः, सौम्यः, कफप्रकृतिः, जलचरी, समोदयी, रात्रिबली, उत्तरदिशः स्वामी, रक्तधवलमिश्रितवर्णः, बहुचरणस्तथा सन्तानवान्। अस्य प्राकृतिकस्वभावः सांसारिकाभ्युदये प्रयत्नशीलः, लज्जावान्, कार्यस्थैर्यं, समयानुयानुवर्तिता च। अस्य स्वामी चन्द्रमा। वर्णाक्षरः–ही हू हे हो डा डी डू डे डो। उक्तं च–

पाटलो वनचारी च ब्राह्मणो निशि वीर्यवान्॥
बहुपादी स्थूलतनुस्तथा सत्त्वगुणी जली।
पृष्ठोदयी कर्कराशिर्मृगाङ्काऽधिपतिः स्मृतः॥
(बृ०पा०हो०शा०5/10-11)

5. **सिंहः**–सिंहस्य सिंह इव स्वरूपं भवति। पुरुषजातिः, स्थिरसंज्ञकः, अग्नितत्त्वं, दिवाबली, पित्तप्रकृतिः, पीतवर्णः, उष्णस्वभावः, पूर्वदिशः स्वामी, पुष्टशरीरः, क्षत्रियवर्णः, अल्पसन्ततिः, भ्रमणप्रियः, निर्जलं चास्ति। अस्य प्राकृतिक-स्वभावः। अनेन हृदयस्य विचारः क्रियते। अस्य स्वामी सूर्यः विद्यते। वर्णाक्षरः। मा मी मू मे मो टा टी टू टे। तदुक्तं च–

सिंहः सूर्याधिपः सत्त्वी चतुष्पात्क्षत्रियोबली।
शीर्षोदयी बृहद्गात्रः पाण्डुः पूर्वेऽद्युवीर्यवान्॥
(बृ०पा०हो०शा०5/12)

6. **कन्या**–कन्याराशेः स्वरूपं बालिकायाः वर्तते; यस्याः एकस्मिन् हस्तेऽग्निरन्यस्मिन् च अन्नं वर्तते। तथा च सा नावोपरि उपविष्य भवति। अस्य पिंगलवर्णः, स्त्रीजातिः, द्विस्वभावः, दक्षिणदिशः स्वामी, रात्रिबली, वायुस्तथा शीतप्रकृतिः, पृथ्वीतत्त्वम्, अल्पसन्ततिः, प्राकृतिकस्वभावः, स्वाभिमानी, स्वामी बुधस्तथा राहुः भवति। वर्णाक्षरः–टो पा पी पू ष ण ठ पे पो। कथितं च–

पार्वतीयाथ कन्याख्या राशिर्दिनबलान्विता।
शीर्षोदया च मध्याङ्गा द्विपाद्याम्यचरा च सा॥
(बृ०पा०हो०शा०5/13)

सा सस्यदहना वैश्या चित्रवर्णा प्रभञ्जिनी।
कुमारी तमसा युक्ता बालभावा बुधाधिपः॥
(बृ०पा०हो०शा०5/14)

7. **तुला**–तुलाराशेः स्वरूपं तुलाधारिपुरुषस्य वर्तते। चरसंज्ञकः, पुरुषजातिः, वायुतत्त्वं, पश्चिमदिशः स्वामी, अल्पसन्ततिः, श्यामवर्णः, शीर्षोदयी, शूद्रसंज्ञकः, दिनबली, क्रूरस्वभावः, पाद तथा जलराशिः, अस्य प्राकृतिकस्वभावः विचारशीलः, ज्ञानप्रियः, कार्यसम्पादकः राजनीतिज्ञश्च। शरीरजन्यप्रभावे नाभितोऽधः भागस्य विचारः क्रियते। अस्य स्वामी शुक्रः। वर्णाक्षरः–रा री रू रे रो ता ती तू ते। तदुक्तं च–

शीर्षोदयी द्युवीर्याढ्यो घटः कृष्णो रजोगुणी।
पश्चिमो भूचरो घाती शूद्रो मध्यतनुर्द्विपात्॥
(बृ०पा०हो०शा०5/15)

8. **वृश्चिकः**–वृश्चिकस्य वृश्चिक इव स्वरूपं वर्तते। स्थिरसंज्ञकः, शुभ्रवर्णः, स्त्रीजातिः, जलतत्त्वं, उत्तरदिशः स्वामी, रात्रिबली, कफप्रकृतिः, बहुसन्ततिः, ब्राह्मणवर्णः, अर्धजलचरराशिः, प्राकृतिकस्वभावः दम्भी, दृढप्रतिज्ञः, स्पष्टवादी, निर्मलश्च भवति। अस्य स्वामी मंगलः। वर्णाक्षरः–तो ना नी नू ने नो या यी यू। कथितं च–

शीर्षोदयोऽथ स्वल्पाङ्गो बहुपाद्ब्राह्मणो बली।
सौम्यस्थो दिनवीर्याढ्यः पिशङ्गो जलभूवहः॥
(बृ०पा०हो०शा०5/16)

रोमस्वाढ्योऽतितीक्ष्णाङ्गो वृश्चिकश्च कुजाधिपः॥

9. **धनुः**–धनुर्धारिपुरुषस्याकारः धनुरत्र पुरुषस्य कटि-प्रदेशादधः भागः अश्वाकारः ऊर्ध्वभागश्च पुरुषाकारः। पुरुषजातिः, कांचनवर्णः, द्विस्वभावः, क्रूरसंज्ञकः, पित्तप्रकृतिः, दिनबली, पूर्वदिशः स्वामी, दृढशरीरमग्नितत्त्वं, क्षत्रियवर्णः, अल्पसन्ततिः, अर्धजलचरराशिः। अस्य प्राकृतिकस्वभावः अधिकारप्रियः, करुणामयः, मर्यादाया इच्छुकश्च वर्तते। अनेन पादस्य सन्धिस्थलानां तथा च जानोः विचारः क्रियते। अस्य स्वामी बृहस्पतिः। वर्णाक्षरः–ये यो भा भी भू धा फ ढा भे। यथोच्यते–

पृष्ठोदयी त्वथ धनुर्गुरुस्वामी च सात्त्विकः।
(बृ०पा०हो०शा०5/17)

पिंगलो निशि वीर्याढ्यः पावकः क्षत्रियो द्विपाद्॥
आदावन्ते चतुष्पादः समगात्रो धनुर्धरः।
(बृ०पा०हो०शा०5/18)

पूर्वस्थो वसुधाचारी बहुतेजःसमन्वितः।

10. **मकरः**–मकरराशिः मकरसदृशः वर्तते। परन्तु तस्य मुखं हरिणसदृशं वर्तते। स्त्रीजातिः, पृथ्वीतत्त्वं, चरसंज्ञकः, वातप्रकृतिः, पिङ्गलवर्णः, रात्रिबली, वैश्यवर्णः, शिथिलशरीरं, दक्षिणदिशः स्वामी। अस्य प्राकृतिकस्वभावः उच्चदशाभिलाषी वर्तते। अस्य स्वामी शनिः। वर्णाक्षरः–भो जा जी खी खू खे खो गा गी। तथा चोक्तम्–

मन्देशस्तमसो भूमियाम्येट् च निशि वीर्यवान्॥
(बृ०पा०हो०शा०5/19)

पृष्ठोदयी बृहद्गात्रः कर्बुरो वनभूचरः।
आदौ चतुष्पादन्ते तु विपदो जलगो मतः॥
(बृ०पा०हो०शा०5/20)

11. **कुम्भः**–घटधारकपुरुषस्याकारः कुम्भराशिः। स्थिरसंज्ञकः, वायुतत्त्वं, पुरुषजातिः, विचित्रवर्णः, शीर्षोदयः, अर्धजलं, त्रिदोषप्रकृतिः, दिनबली, पश्चिमदिशः स्वामी, उष्णस्वभावः, शूद्रवर्णः, क्रूरस्तथा मध्यमसन्ततिः। अस्य प्राकृतिकस्वभावः विचारशीलः, शान्तचित्तः, धर्मवीरः, प्रतिभासम्पन्नश्च वर्तते। अनेन उदरस्य आभ्यन्तरीयभागस्य विचारः क्रियते। अस्य स्वामी शनिः। वर्णाक्षरः–गू गे गो सा सी सू से सो दा। तदुक्तं च–

कुम्भः कुम्भी नरो बभ्रुवर्णो मध्यतनुर्द्विपात्।
द्युवीर्यो जलमध्यस्थो वातशीर्षोदयी तमः॥
(बृ०पा०हो०शा०5/21)

शूद्रः पश्चिमदेशस्य स्वामी दैवाकरिः स्मृतः।

12. मीनः–मत्स्यद्वयाकारः मीनराशिः। स्त्रीजातिः, द्विस्वभावः, कफप्रकृतिः, जलतत्त्वं, रात्रिबली, विप्रवर्णः, उत्तरदिशः स्वामी, जलचरराशिः, पिङ्गलवर्णश्च भवति। अस्य प्राकृतिकस्वभावः उत्तमः, दयालुः, दानशीलश्च अस्ति। अनेन पादस्य विचारः क्रियते। अस्य स्वामी बृहपतिः। वर्णाक्षरः–दी दू थ झ ञ दे दो चा ची। कथितं च–

मीनौ पुच्छास्यसंलग्नौ मीनराशिर्दिवाबली।
(बृ०पा०हो०शा०5/22)

जली सत्त्वगुणाढ्यश्च स्वस्थो जलचरो द्विजः।
अपदो मध्यदेही च सौम्यस्थो ह्युभयोदयी।।
(बृ०पा०हो०शा०5/23)

सुराचार्याधिपश्चेत्थं राशीनामुदिता गुणाः।
त्रिंशद्भागात्मकानां च स्थूलसूक्ष्मफलाय च।।
(बृ०पा०हो०शा०5/24)

(ख) **कालपुरुषः**–1-शीर्षमुख-ऊरूः-अजाद्याः वर्णः-2. अरुणः-पिङ्गलः-रुचयो यथा।" विभागः- पुंस्त्री क्रूराऽक्रूरौ चरस्थिरद्विस्वभावश्च। स्वामी-कुजशुक्रज्ञेन्द्वर्कज्ञ शुक्रकुजजीवसौरियमगुरवः।

राशीनां दिग्बलकालबलं च–

नृचतुष्पादकीटाप्याबलिनः प्राग्दक्षिणापरोत्तरगाः।
सन्ध्याद्युरात्रिबलिनः कीटाः नृचतुष्पदाश्चैवम्।।

(ग) द्विपदादिसंज्ञा–

मेषवृषधन्विसिंहाश्चतुष्पदा मकरपूर्वभागश्च।
कीटः कर्कटराशिः सरीसृपो वृश्चिकः कथितः।।
मकरस्य पश्चिमार्धं ज्ञेयो मीनश्च जलचरः ख्यातः।
मिथुनतुलाघरकन्या द्विपदाख्या धन्विपूर्वभागश्च।।

(अ) (घ)

राशिपरिचयविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— राशयः कति भवन्ति, के च ते?
उत्तरम्— 12 द्वादश।1. मेषः, 2. वृषः, 3. मिथुन, 4. कर्कः, 5. सिंहः, 6. कन्या, 7. तुला, 8. वृश्चिकः, 9. धनुः, 10. मकरः, 11. कुम्भः, 12. मीनः।

2. **प्रश्नः**—मेषराशेः स्वरूपं भवति?
उत्तरम्— मेष इव।

3. **प्रश्नः**— वृषराशेः स्वरूपं भवति?
उत्तरम्— वृष इव।

4. **प्रश्नः**—मिथुनराशेः स्वरूपं भवति?
उत्तरम्— स्त्रीपुरुषयोः युगलचित्रम्।

5. **प्रश्नः**—कर्कस्य स्वरूपं भवति?
उत्तरम्— कर्क इव।

6. **प्रश्नः**—सिंहस्य स्वरूपं भवति?
उत्तरम्— सिंह इव।

7. **प्रश्नः**—कन्याराशेः स्वरूपं भवति?
उत्तरम्—बालिकायाः इव।

8. **प्रश्नः**—तुलाराशेः स्वरूपं भवति?
उत्तरम्—तुलाधारिपुरुष इव।

9. **प्रश्नः**—वृश्चिकस्य स्वरूपं वर्तते?
उत्तरम्— वृश्चिक इव।

10. **प्रश्नः**—धनुराशेः किं स्वरूपम्?
उत्तरम्—धनुर्धारिपुरुषस्याकारः धनुरत्र पुरुषस्य कटिप्रदेशादधः भागः अश्वाकारः ऊर्ध्वभागश्च पुरुषाकारः।

11. **प्रश्नः**— मकरराशेः किं स्वरूपम्?
उत्तरम्— मकरसदृशः।

12. **प्रश्नः**—कुम्भराशेः किं स्वरूपम्?
उत्तरम्—घटधारकपुरुषस्याकारः।

13. **प्रश्नः**— मीनराशेः किं स्वरूपम्?
उत्तरम्—मत्स्यद्वयाकारः।

14. **प्रश्नः**—धनुमीनस्थे सूर्ये कस्यां तिथौ दग्धयोगः भवति?
उत्तरम्—द्वितीयायाम्।

15. **प्रश्नः**— वृषकुंभस्थे सूर्ये कुत्र दग्धयोगः भवति?
उत्तरम्—चतुर्थ्याम्।

16. **प्रश्नः**—मेषकर्केऽर्के कस्यां तिथौ दग्धयोगः भवति?
उत्तरम्— षष्ठ्याम्।

17. **प्रश्नः**—अष्टमीतिथिः कदा दग्धा भवति?
उत्तरम्—कन्यामिथुनस्थेऽर्के।

18. **प्रश्नः**—वृश्चिकसिंहस्थेऽर्के कस्यां तिथौ दग्धयोगः भवति?
उत्तरम्—दशम्याम्।

19. **प्रश्नः**—मकरतुलास्थेऽर्के कदा दग्धयोगः स्यात्?
उत्तरम्—द्वादश्याम्।

20. **प्रश्नः**—एकस्मिन् राशौ कति चरणाः भवन्ति?
उत्तरम्— 9 नव।

21. **प्रश्नः**— चरराशयः के सन्ति?
उत्तरम्— 1. मेषः, 4. कर्कः, 7. तुला, 10. मकरः।

22. **प्रश्नः**— स्थिरराशयः के सन्ति?
उत्तरम्— 2. वृषः, 5. सिंहः, 8. वृश्चिकः, 11. कुम्भः।

23. **प्रश्नः**— द्विस्वभावराशयः के सन्ति?
उत्तरम्— 3. मिथुन, 6. कन्या, 9. धनुः, 12. मीनः।

24. **प्रश्नः**— के राशयः दक्षिणायणाः भवन्ति?
उत्तरम्— कर्काऽर्कतः धन्वर्कं यावत्।

25. **प्रश्नः**— के राशयः उत्तरायणाः भवन्ति?
उत्तरम्— मकरार्कतः मिथुनार्कं यावत्।

26. **प्रश्नः**— मेषसिंहधनुराशिषु अवस्थिते चन्द्रे तस्य वासः कुत्र विद्यते?
उत्तरम्— पूर्वस्याम्।

27. **प्रश्नः**— कन्यावृषमकरराशिषु अवस्थिते चन्द्रे तस्य वासः कुत्र विद्यते?
उत्तरम्— दक्षिणस्याम्।

28. **प्रश्नः**— कुंभतुलामिथुनराशिष्वन्यतमे अवस्थिते चन्द्रे तस्य स्थितिः कुत्र विद्यते?
उत्तरम्— पश्चिमायाम्।

29. **प्रश्नः**— कर्कवृश्चिकमीनराशिष्वन्यतमे अवस्थिते चन्द्रे तस्य वासः कुत्र विद्यते?
उत्तरम्— उत्तरस्याम्।

30. **प्रश्नः**— सिंहस्याधिपः कः?
उत्तरम्— सूर्यः।

31. **प्रश्नः**— कर्कस्याधिपः कः?
उत्तरम्— चन्द्रः।

32. **प्रश्नः**— मेषवृश्चिकयोरधिपः कः?
उत्तरम्— कुजः।

33. **प्रश्नः**— वृषतुलयोरधिपः कः?
उत्तरम्— शुक्रः।

34. **प्रश्नः**— धनुमीनयोरधिपः कः?
उत्तरम्— गुरुः।

35. **प्रश्नः**— मिथुनकन्ययोरधिपः कः?
उत्तरम्— बुधः।

36. **प्रश्नः**— राशेरर्धं किं कथ्यते?
उत्तरम्—होरा।

37. **प्रश्नः**— मकरकुम्भयोरधिपः कः?
उत्तरम्— शनिः।

38. **प्रश्नः**— चन्द्रः पूर्वस्यां दिशि कासु राशिसु तिष्ठति?
उत्तरम्— मेषः, 5. सिंहः, 9. धनुः।

39. **प्रश्नः**— चन्द्रः पश्चिमायां कासु राशिसु तिष्ठति?
उत्तरम्— 3. मिथुन, 7. तुला, 11. कुम्भः।

40. **प्रश्नः**— चन्द्रः दक्षिणस्यां दिशि कासु राशिसु तिष्ठति?
उत्तरम्— 2. वृषः, 6. कन्या, 10. मकरः।

41. **प्रश्नः**— चन्द्रः उत्तरस्यां दिशि कासु राशिसु तिष्ठति?
उत्तरम्— 4. कर्कः, 8. वृश्चिकः, 12. मीनः।

42. **प्रश्नः**— क्रियः कस्य नामान्तरं वर्तते?
उत्तरम्— मेषस्य।

43. **प्रश्नः**— ताबुरिः कस्य नामान्तरमस्ति?
उत्तरम्— वृषस्य।

44 **प्रश्नः**— जितुमः कस्य नामान्तरं विद्यते?
उत्तरम्— मिथुनस्य।

45. **प्रश्नः**—कुलीरः कस्य नामान्तरं वर्तते?
उत्तरम्— कर्कस्य।

46. **प्रश्नः**—लेयः कस्य नामान्तरमस्ति?
उत्तरम्— सिंहस्य।

47. **प्रश्नः**— पाथोनः कस्य नामान्तरं विद्यते?
उत्तरम्— कन्यायाः।

48. **प्रश्नः**—जूकः कस्य नामान्तरमस्ति?
उत्तरम्— तुलायाः।

49. **प्रश्नः**— कौर्पिः कस्य नामान्तरं वर्तते?
उत्तरम्— वृश्चिकस्य।

50. **प्रश्नः**—तौक्षिकः कस्य नामान्तरं विद्यते?
उत्तरम्— धनोः।

51. प्रश्नः— मकरस्य नामान्तरं किम्?
उत्तरम्— आकोकेरः।

52. प्रश्नः—हृद्रोगः कस्य नामान्तरमस्ति?
उत्तरम्— कुम्भस्य।

53. प्रश्नः—अन्त्यभञ्च कस्य नामान्तरं विद्यते?
उत्तरम्—मीनस्य।

54. प्रश्नः—राशीनां स्वामिनः के भवन्ति?
उत्तरम्— ग्रहाः।

55. प्रश्नः—चू चे चो ला तः दे दो च चि रेवतीपर्यन्तं कति चरणानि भवन्ति?
उत्तरम्—अष्टोत्तरशतानि।

56. प्रश्नः—शनिः द्वादशराशीनां कति वर्षपर्यन्तं भोगं करोति?
उत्तरम्— त्रिंशतिवर्षाणि।

57. प्रश्नः—कस्मिन् राशौ मंगलः नीचस्थः भवति?
उत्तरम्— कर्कराशौ।

58. प्रश्नः—कस्मिन् राशौ बृहस्पतिः उच्चस्थः भवति?
उत्तरम्— कर्कराशौ।

59. प्रश्नः—सूर्यस्य संक्रमणे कस्मिन् राशौ दक्षिणगोलः भवति?
उत्तरम्— तुलाराशौ।

60. प्रश्नः—भौमस्य राशिः को वर्तते?
उत्तरम्— मेषः।

61. प्रश्नः—शुक्रस्य नीचराशिः का वर्तते?
उत्तरम्— कन्या।

62. प्रश्नः—गुरोः उच्चराशिः को भवति?
उत्तरम्— कर्कः।

63. प्रश्नः—सूर्यस्य शत्रुः कः?
उत्तरम्— शुक्रः।

64. प्रश्नः—चन्द्रः नीचस्थो कस्मिन् राशौ भवति?
उत्तरम्— वृश्चिकराशौ।

(V-C-73) 7. ग्रहपरिचयः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) ग्रहाणां परिचयः—

सूर्यसोमो महीपुत्रः सोमपुत्रो बृहस्पतिः।
शुक्रः शनैश्चरो राहुः केतवश्च ग्रहाः स्मृताः।।
(ज्योतिषार्णवः)

ज्योतिषशास्त्रानुसारं सम्पूर्णसौरमण्डले नवग्रहाः सन्ति। ते यथा–1. सूर्यः, 2. चन्द्रमा, 3. मङ्गलः, 4. बुधः, 5. गुरुः, 6. शुक्रः, 7. शनिः, 8. राहुः, 9. केतुश्च। सैद्धान्तिक- दृष्ट्या गृह्यन्ते स्वगत्या द्वादशभानि यै ते ग्रहाः। ज्योतिषशास्त्रानुसारेण नव ग्रहाः, तेषु सूर्यचन्द्रौ प्रमुखौ, भौमादिपञ्च ताराग्रहाः, राहुकेतू च छायाग्रहौ। फलितदृष्ट्या ग्रहाणां स्वरूप-स्वभावलिङ्गादीनां वर्णनं आत्मादिविभागाणां आमात्यादिश्रेणीणाञ्च वर्णनं प्राप्यते यथा–

	सूर्यः	चन्द्रः	भौमः	बुधः	गुरुः	शुक्रः	शनिः
स्वरूपम् (वर्णम्)	रक्तश्यामः	श्वेतः	श्वेतरक्तः	हरितः	गौरः	श्वेतः	कृष्णः
स्वभावः	पापः	शुभः	पापः, क्रूरश्च	शुभः	शुभः	शुभः	क्रूरः
आमात्यादि-विभागः	राजा	राजा	सेनापतिः	कुमारः	मंत्री	मंत्री	भृत्यः
आत्मादि-विभागः	आत्मा	चेतः/मन	बलम्	वाणी	ज्ञानं सुखञ्च	मदनः	दुःखः
उच्चस्थानम्	मेषः	वृषः	मकरः	कन्या	कर्को	झषः	तुला

	सूर्यः	चन्द्रः	भौमः	बुधः	गुरुः	शुक्रः	शनिः
ग्रहाणां देवता	अग्निः	जलम्	कार्तिकेयः	विष्णुः	इन्द्रः/परमेश्वरो वा	इन्द्राणी शक्तिर्वा	ब्रह्मा
ग्रहाणां अधिपतिः	अस्थिः	रुधिर	मज्जा	त्वचा	वसा	वार्य	स्नायुः
ग्रहाणां स्थानम्	मन्दिरम्	जलभागः	अग्निः	विहारभूमिः	कोशागारः	शयनस्थानम्	परिस्कृत
ग्रहाणां वस्त्रम्	स्थूलवस्त्रं	नूतनवस्त्रं	अग्निहतवस्त्रं	आर्द्रवस्त्रं	मध्यश्रेणीय-वस्त्रं	रेशमी	जीर्णवस्त्रं
ग्रहाणां धातुः	ताम्रम्/स्वर्णं	मणि	सुवर्णं	शुक्तिः	रजतं	मुक्ता	लौहं
ग्रहाणां ऋतुः		वर्षा	ग्रीष्म	शरद्	हेमन्त	वसन्त	शिशिर
ग्रहाणां कालनिर्देशः	अयनस्य	क्षणस्य	वासरस्य	ऋतोः	मासस्य	पक्षस्य	वर्षस्य
ग्रहाणां रसादि-विभागः	कटुः	लवणं	तिक्तं	मिश्रितं	मधुरम्	अमलं	कषायं

इत्थमेव ग्रहाणां वर्गीकरणं नानाविधरीत्या क्रियते, एतेषां ग्रहाणां अष्टधा गतयः वक्रादिवक्राविकलादिभेदैः भवन्ति। एषु सूर्यचन्द्रौ सदा मार्गिणौ पञ्चताराग्रहाः उभयात्मकौ छायाग्रहौ च सदा वक्रिणौ भवतः। आधुनिकैस्तु प्लुटो नेप्च्यूनादीनां सत्तापि ग्रहरूपेण स्वीक्रियते। सूर्यक्रान्तिवृत्ते भ्रमति, अन्ये ग्रहाः स्वस्वविमण्डले भवन्ति।

कालपुरुषस्य आत्मा सूर्यः, चन्द्रमा मनः। मङ्गलः सत्वस्य, बुधः वाण्याः, गुरुः ज्ञानसुखयोः, शुक्रः बलस्य प्रतिनिधिः वर्तते। पुनः सूर्यः चन्द्रश्च राजानौ स्तः। मङ्गलः नेता, बुधः राजकुमारः, गुरुशुक्रश्च मन्त्री, शनिश्च दासः भवति।

ग्रहाणां कालनिर्देशः रसश्च–1. सूर्यः-अयनस्य स्वामी, रसः-कटुः। 2. चन्द्रमा-क्षणस्य स्वामी, रसः-लवणम्। 3. मङ्गलः-वासरस्य स्वामी, रसः-तिक्तम्। 4. बुधः-ऋतोः स्वामी, रसः-मिश्रितम्। 5. गुरुः-मासस्य स्वामी, रसः-मधुरम्। 6. शुक्रः-पक्षस्य स्वामी, रसः-अम्लम्। 7. शनिः-वर्षस्य स्वामी, रसः-कषायं च भवति।

(ख) ग्रहाणां प्रकृतिः पञ्चतत्त्वानामुपर्यधिकारश्च–

बुधसूर्यसुतौ नपुंसकाख्यौ
युवती नराश्च शेषाः।
शिखिभूखपयोमरुदगणानां वशिनो
भूमिसुतादयः क्रमेण।।
(बृ.जा.-2/6)

क्लीबौ द्वौ सौम्यसौरी च युवतीन्दुभृगुर्द्विज।
नराः शेषाश्च विज्ञेयाः भानुभौमौ गुरुस्तथा।।
अग्निभूमिनभस्तोयवायवः क्रमतो द्विजः।
भौमादीनां ग्रहाणां च तत्त्वाश्चामी प्रकीर्त्तिताः।।
(बृ०पा०हो०शा०-3/8-9)

इत्थं शनिबुधग्रहौ नपुंसकौ भवतः। चन्द्रमाशुक्रौ स्त्रीग्रहौ। शेषाः सूर्यभौमगुरवः पुरुषग्रहाः सन्ति। अग्नि-पृथ्वी-आकाश-जल-वायूनां पञ्चतत्त्वानामधिपतयः क्रमशः मंगल-बुध-गुरु-शुक्र-शनयः भवन्ति।

(ग) ग्रहाणां ब्राह्मणादिवर्णाः:-ब्राह्मणवर्णस्य अधिपतिः-शुक्रः बृहस्पतिश्च, क्षत्रियवर्णस्य अधिपतिः-मंगलसूर्यौ, वैश्यस्य अधिपतिः-चन्द्रमा, शूद्रस्य अधिपतिः-बुधः, अन्यजातीनामधिपतिः-शनिः, एतेषु ग्रहेषु चन्द्रमा-सूर्य-बृहस्पतयः सत्त्वगुणसम्पन्नाः, बुधशुक्रौ रजोगुणयुक्तौ, मङ्गलशनी च तमोगुणमयौ।

(घ) ग्रहाणां उच्चस्थानानि–

अजवृषमृगांगनाकर्किमीनवणिजांशकेष्विनाद्युच्चा।
दशशिख्यष्टाविंशति तिथीन्द्रियत्रिनवविंशेषु॥

(ङ) ग्रहाणां नीचस्थानानि त्रिकोणानि च–

उच्चान्नीचं सप्तममर्कादीनां त्रिकोणसंज्ञानि।
सिंहवृषाजप्रमदा कार्मुकभृत्तौलिकुम्भधराः।

(च) आत्मादि, अमात्यादि-विभागः–

आत्मा रविः शीतकरस्तु चेतः
सत्त्वं धराजः शशिजोऽथ वाणी।
ज्ञानं सुखं चेन्द्रगुरुर्मदश्च शुक्रः
शनिः कालनरस्य दुःखम्॥
आत्मादयो गगनगैर्बलिभिर्बलवत्तरा।
दुर्बलैर्दुर्बला ज्ञेया विपरीतः शनिः स्मृतः॥

दिशास्वामी–प्राच्यदिशा–"रविसितकुजराहुयमेन्दुसौम्य-वाक्पतयः।"

पुरुषादिसंज्ञा–"क्लीवपतिः बुधसौरि चन्द्रसितौ योषितां नृणां शेषाः।"

ऋगथर्वसामर्ग्यजुषामधिपाः–

(छ) ग्रहाणां मित्रादि विचारः।

चन्द्रेर्ष्यक्षितिजा रवीन्दुतनयौ गुर्विन्दुसूर्याः क्रमात्
शुक्रार्कौ रविचन्द्रभूमितनयाज्ञार्की सितज्ञौ मताः।
अर्कादेः सुहृदः समा अथ बुध सर्वे हि शुक्रार्कजौ
भौमाचार्ययमायमः कुजगुरून्पूज्यः परे वैरिणः।

(ज) ग्रहाणां राजादिविभागविवेचनम्–

राजा रविः शशधरश्च बुधः कुमारः।
सेनापतिः क्षितिसुतः सचिवौ सितेज्यौ।
भृत्यस्तथा तरणिजः सबला ग्रहाश्च।
कुर्वन्ति जन्मसमये निजमेव रूपम्।

ग्रहाः	मित्रः	समाः	शत्रु
रविः	चन्द्र, बृहस्पति, मंगल	बुध	शुक्र, शनि, शुक्रः, राहु
चन्द्रः	रवि, बुध	मंगल, बृहस्पति, शनि, शुक्र	राहु, केतु,
भौमः	बृहस्पति, रवि, चन्द्र	शुक्र, शनि	बुध, राहु
बुधः	शुक्र, रवि, राहुः	मंगल, बृहस्पति, शनि	चन्द्र (राहुबुधौ)
गुरुः	रवि, चन्द्र, मंगल	राहुः, शनि	चन्द्र (बुधशुक्रौ)
शुक्रः	रवि, बुध, चन्द्र, शनि	मंगल, बृहस्पति	रवि, चन्द्र
शनिः	शुक्र, बुध, राहु,	बृहस्पति	रवि, चन्द्र, मंगल,
राहुः	शुक्र, शनि, बुधः,	बुध, बृहस्पति	रवि, चन्द्र, मंगल,
केतुः	शुक्र, शनि, बुधः,	बुध, बृहस्पति	रवि, चन्द्र, मंगल,

(झ) ग्रहाणां एकैकं परिचयः–

1. सूर्यः– चतुरस्रो नास्त्युच्चस्तनुकेशः पैत्तिकोऽस्थि-सारश्च।
शूरो मधुपिङ्गाक्षो रक्तश्यामः पृथुश्चार्कः।

2. चन्द्रः– स्वच्छः प्राज्ञो गौरश्चपलः कफवातिको रुधिरसारः।
मृदुवाग्घृणी प्रियसरवस्तनुवृत्तश्चन्द्रमा प्रांशुः।

3. भौमः– हिंस्रो ह्रस्वस्तरुणः पिङ्गाक्षः पैत्तिको दुराधर्षः।
चपलः सरक्तगौरो मज्जासारश्च माहेयः॥

4. बुधः–मध्यरूपः प्रियवाग् दूर्वाश्याम शिराततो निपुणः।
त्वक्सारस्त्रिस्थूणः सततं हृष्टस्तु चन्द्रसुतः॥

5. बृहस्पतिः–मधुनिभनयनो मतिमानुपचितमांसः कफात्मको गौरः।
ईषत्पिङ्गलकेशो मेदः सारो गुरुर्दीर्घश्च॥

6. शुक्रः– श्यामो विकृष्टपर्वा कुटिलासितमूर्धजः सुखी कान्तः।
कफवातिको मधुरवाग्भृगुपुत्रः शुक्रसारश्च॥

7. शनिः– कृशदीर्घः पिङ्गाक्षः कृष्णः पिशुनोऽलसोऽनिलप्रकृतिः।
स्थूलनखदन्तरोमा: शनैश्चरो स्नायुसारश्च।

(V) (ञ) ग्रहविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— ग्रहाणां कति संख्या के च ते?
उत्तरम्—9 नवग्रहाः भवन्ति। (1. सूर्यः, 2. चन्द्रमा, 3. मङ्गलः, 4. बुधः, 5. गुरुः, 6. शुक्रः, 7. शनिः, 8. राहुः, 9. केतुश्च।)

2. **प्रश्नः**— सर्वे ग्रहाः 10.3 स्थानं केन चरणेन दृश्यन्ते?
उत्तरम्— एकचरणेन।

3. **प्रश्नः**— सर्वे ग्रहाः 5.9 स्थानं केन चरणेन दृश्यन्ते?
उत्तरम्— द्वितीयचरणेन।

4. **प्रश्नः**— सर्वे ग्रहाः 4.8 स्थानं केन चरणेन दृश्यन्ते?
उत्तरम्— त्रिभिः चरणैः।

5. **प्रश्नः**— सर्वे ग्रहाः 7. स्थानं केन चरणेन दृश्यन्ते?
उत्तरम्— चतुर्भिः चरणैः (पूर्णदृष्ट्या)।

6. **प्रश्नः**— सर्वे ग्रहाः स्व-उच्चस्थाने किं फलं दीयन्ते?
उत्तरम्— पूर्णफलम् (100:)।

7. **प्रश्नः**— सर्वे ग्रहाः त्रिकोणे किं फलं ददन्ति?
उत्तरम्— त्रिचरणानि (75:)।

8. **प्रश्नः**— सर्वे ग्रहाः स्वराशौ किं फलं दीयन्ते?
उत्तरम्— द्वौ चरणौ (50:)।

9. **प्रश्नः**— सर्वे ग्रहाः मित्रग्रहेषु किं फलं प्रदीयन्ते?
उत्तरम्— एकचरणम् (25:)।

10. **प्रश्नः**— सर्वे ग्रहाः समग्रहेषु किं फलं प्रदीयन्ते?
उत्तरम्— अर्धचरणम् (12.1/2:)।

11. **प्रश्नः**— सर्वे ग्रहाः कं गृहं दृश्यन्ते?
उत्तरम्— सप्तमगृहम्।

12. **प्रश्नः**— बुधस्य उच्चराशिः भवति?
उत्तरम्— कन्या।

13. **प्रश्नः**— सूर्यः कस्यां राशौ उच्चस्थानं धारयति?
उत्तरम्— मेषराशौ।

14. **प्रश्नः**— ग्रहाणां गतिः किदृक् भवति?
उत्तरम्— पूर्वाभिमुखम्।

15. **प्रश्नः**— तुलाराशेः स्वामी कः?
उत्तरम्— शुक्रः।

16. **प्रश्नः**— भौमः कस्याः राशेः स्वामी?
उत्तरम्— मेषवृश्चिकयोः।

17. **प्रश्नः**— सूर्यस्य मित्राः के सन्ति?
उत्तरम्— गुरुमंगलचन्द्राश्च।

18. **प्रश्नः**— चन्द्रं स्पष्टाय कः संस्कारः विधीयते?
उत्तरम्— उदयान्तरसंस्कारः।

19. **प्रश्नः**— रक्तवर्णस्य ग्रहौ स्तः?
उत्तरम्— सूर्यकुजौ।

20. **प्रश्नः**— सितवर्णस्य ग्रहौ स्तः?
उत्तरम्— चन्द्रशुक्रौ।

21. **प्रश्नः**— कृष्णवर्णस्य ग्रहाः के सन्ति?
उत्तरम्— शनिराहुकेतवश्च।

22. **प्रश्नः**— पीतवर्णस्य ग्रहः कोऽस्ति?
उत्तरम्— गुरुः।

23. **प्रश्नः**—सर्वेषां ग्रहाणां पूर्णदृष्टिः सामान्यतया कुत्र विद्यते?
उत्तरम्— सप्तमस्थाने।

24. **प्रश्नः**— त्रिकोणेशाः ग्रहाः कुत्र प्रचलन्ति?
उत्तरम्— शुभफलानि।

25. **प्रश्नः**—शुभग्रहमहादशायां तत्सम्बन्धियोग-कारकग्रहाणामन्तर्दशादिकाले किं प्रयच्छन्ति?
उत्तरम्— राजयोगम्।

26. **प्रश्नः**—त्रिकोणस्थानावस्थितौ राहुकेतू अन्यग्रहैः सम्बन्धरहितावपि स्वकाले किं यच्छतः?
उत्तरम्— शुभं फलम्।

27. **प्रश्नः**— भावस्थितो ग्रहः कीदृशं फलं यच्छति?
उत्तरम्— पूर्णम्।

28. **प्रश्नः**— सन्धिस्थः ग्रहः कीदृशं फलं प्रयच्छति?
उत्तरम्— शून्यं फलम्।

29. प्रश्नः— सन्धिद्वयान्तस्थः ग्रहः कस्य फलं प्रयच्छति?
उत्तरम्— भावस्य।

30. प्रश्नः— कस्मिन् काले सूर्यकुजौ फलदौ भवतः?
उत्तरम्— राशिप्रवेशकाले।

31. प्रश्नः— कस्मिन् काले गुरुशुक्रौ फलदौ स्तः?
उत्तरम्— राशिप्रवेशमध्ये।

32. प्रश्नः— कस्मिन् काले बुधः फलदः स्यात्?
उत्तरम्— सर्वदा।

33. प्रश्नः— कस्मिन् काले शनिचन्द्रौ फलदौ स्याताम्?
उत्तरम्— राश्यन्ते।

34. प्रश्नः— गुरुः विशेषदृष्ट्या कं दृश्यते?
उत्तरम्— 5, 9, पञ्चनवम्।

35. प्रश्नः— कुजस्य विशेषदृष्टिः कुत्र विद्यते?
उत्तरम्— चतुर्थाष्टमे।

36. प्रश्नः— शनिः विशेषदृष्ट्या कं दृश्यते?
उत्तरम्— त्रि-दशमं।

37. प्रश्नः—त्रिकोणेशो कुजः कर्मेशत्वेनापि किं फलं प्रयच्छति?
उत्तरम्— शुभम्।

38. प्रश्नः— ग्रहाणां शत्रुमित्रभेदेन कति दृष्ट्यः?
उत्तरम्— चतस्रः।

39. प्रश्नः— सूर्यस्य कति दीप्तांशः?
उत्तरम्— 15 पञ्चदश।

40. प्रश्नः— चन्द्रस्य कति दीप्तांशः?
उत्तरम्— 12 द्वादश।

41. प्रश्नः— कुजस्य कति दीप्तांशः?
उत्तरम्— 08 अष्ट।

42. प्रश्नः— बुधस्य कति दीप्तांशः?
उत्तरम्— 07 सप्त।

43. प्रश्नः— गुरोः कति दीप्तांशः?
उत्तरम्— 09 नव।

44. प्रश्नः— शुक्रस्य कति दीप्तांशः?
उत्तरम्— 07 सप्त।

45. प्रश्नः— शनेः कति दीप्तांशः?
उत्तरम्— 09 नव।

46. प्रश्नः—कति योगाः भवन्ति?
उत्तरम्— 16 षोडश।

47. प्रश्नः— हरिद्वर्णस्य ग्रहः कः?
उत्तरम्— बुधः।

48. प्रश्नः— कालपुरुषस्य आत्मा कः?
उत्तरम्—सूर्यः।

49. प्रश्नः—कालपुरुषस्य मनः कः?
उत्तरम्—चन्द्रमा।

50. प्रश्नः— ग्रहाणां राजानौ कौ स्तः?
उत्तरम्— सूर्यः चन्द्रश्च।

51. प्रश्नः— ग्रहाणां नेता कः?
उत्तरम्— मङ्गलः।

52. प्रश्नः— ग्रहाणां राजकुमारः कः?
उत्तरम्— बुधः।

53. प्रश्नः— ग्रहाणां मन्त्री कौ स्तः?
उत्तरम्— गुरुः शुक्रश्च।

54. प्रश्नः— ग्रहाणां दासः को भवति?
उत्तरम्— शनिः।

55. प्रश्नः—ब्राह्मणवर्णस्य अधिपतिः कौ ग्रहौ स्तः?
उत्तरम्—शुक्रः बृहस्पतिश्च।

56. प्रश्नः—क्षत्रियवर्णस्य अधिपतिः कौ ग्रहौ स्तः?
उत्तरम्—मंगलसूर्यौ।

57. प्रश्नः— वैश्यस्य अधिपतिः को ग्रहो वर्तते?
उत्तरम्—चन्द्रमा।

58. प्रश्नः— शूद्रस्य अधिपति को ग्रहो वर्तते?
उत्तरम्—बुधः।

59. प्रश्नः— सत्त्वगुणसम्पन्नाः के ग्रहाः सन्ति?
उत्तरम्—चन्द्रमा-सूर्य-बृहस्पतयः।

60. प्रश्नः— रजोगुणयुक्तौ कौ ग्रहौ स्तः?
उत्तरम्— बुधशुक्रौ।

61. प्रश्नः—तमोगुणमयौ कौ ग्रहौ स्तः?
उत्तरम्—मङ्गलशनी च।

62. प्रश्नः—आत्मा रविः शीतकरस्तु चेतः सत्त्वं धराजः शशिजोऽथ वाणी। ज्ञानं सुखं चेन्द्रगुरुर्मदश्च शुक्रः शनिः कालनरस्य दुःखम्।।

आत्मादयो गगनगैर्बलिभिर्बलवत्तरा। दुर्बलैर्दुर्बला ज्ञेया विपरीतः शनिः स्मृतः।। उक्त श्लोकः ग्रहाणां किमस्ति?
उत्तरम्—आत्मादिविभागः।

63. प्रश्नः—ग्रहाणां राजादिविभागः कैः श्लोकैः ज्ञायते?
उत्तरम्—राजा रविः शशधरश्च बुधः कुमारः। सेनापतिः क्षितिसुतः सचिवौ सितेज्यौ। भृत्यस्तथा तरणिजः सबला ग्रहाश्च। कुर्वन्ति जन्मसमये निजमेव रूपम्।

64. प्रश्नः—शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम्। बहु रूपमेकमेव प्राहुः मुनिर्नारदः केतुम्। एते किमस्ति?
उत्तरम्—नव-ग्रहस्य स्वरूपम्।

65. प्रश्नः—अरिष्ट-विचारे कस्य महत्त्वं वर्तते?
उत्तरम्—चन्द्रस्य।

66. प्रश्नः—राहोः पूर्णदृष्टिः कस्मिन् स्थाने भवति?
उत्तरम्— पञ्चमस्थाने।

67. प्रश्नः—सूर्यस्य केषां राशीनां संक्रमणे ऋतुः भवति?
उत्तरम्— द्वि।

68. प्रश्नः—जातकशास्त्रे पापग्रहो कोऽस्ति?
उत्तरम्— मंगलः।

(V-C-73) 8. नक्षत्रराशिग्रहाणां पारस्परिकः सम्बन्धः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

8. **नक्षत्रराशिग्रहाणां परस्परसम्बन्धः**—सम्पूर्ण-ज्योतिषवाङ्मये समष्टिरूपेण मुख्यतया सप्तविंशतिनक्षत्राणि (1. अश्विनी, 2. भरणी, 3. कृत्तिका, 4. रोहिणी, 5. मृगशिरा, 6. आर्द्रा, 7. पुनर्वसु, 8. पुष्य, 9. आश्लेषा, 10. मघा, 11. पूर्वाफल्गुनी, 12. उत्तराफल्गुनी, 13. हस्त, 14. चित्रा, 15. स्वाती, 16. विशाखा, 17. अनुराधा, 18. ज्येष्ठा, 19. मूल, 20. पूर्वाषाढ, 21. उत्तराषाढ, 22. श्रवणा, 23. धनिष्ठा, 24. शतभिषा, 25. पूर्वाभाद्रपद, 26. उत्तराभाद्रपद, 27. रेवती) तथा च द्वादशराशयः (1. मेषः, 2. वृषः, 3. मिथुन, 4. कर्कः, 5. सिंहः, 6. कन्या, 7. तुला, 8. वृश्चिकः, 9. धनुः, 10. मकरः, 11. कुम्भः, 12. मीनश्चैते) एवं च नवग्रहाः (–"1. सूर्यः, 2. चन्द्रमा, 3. मङ्गलः, 4. बुधः, 5. गुरुः, 6. शुक्रः, 7. शनिः, 8. राहुः, 9. केतुश्च।) सन्ति। एतेषां सृष्टिविषये सूर्यसिद्धान्ते कथितं यथा–

अथ सृष्ट्यां मनश्चक्रे ग्रहाऽहङ्कारमूर्त्तिभृत्।
मनसश्चन्द्रमा जज्ञे सूर्योऽक्ष्णोस्तेजसां निधिः।।
अग्नीषोमौ भानुचन्द्रौ ततस्त्वङ्गारकादयः।
तेजोभूखाम्बुवातेभ्यः क्रमशः पञ्चजज्ञिरे।।
पुनर्द्वादशधाऽऽत्मानं व्यभजद् राशिसंज्ञकम्।
नक्षत्ररूपिणं भूयः सप्तविंशतिकं वशी।।
(सूर्यसिद्धान्ते)

अर्थात् ब्रह्मणः मनसः सकाशात् चन्द्रमा, अक्ष्णोः सूर्यः जातौ। सूर्योऽग्निस्वरूपस्तेजराशिः। चन्द्रः सोमरूपः। पञ्चमहाभूतेभ्यः पञ्चताराग्रहाः उत्पन्नाः। यथा–अग्नितत्त्वाद् भौमः। पृथ्वीतत्त्वाद् बुधः। आकाशतत्त्वाद् वृहस्पतिः। जलतत्त्वात् शुक्रः। वायुतत्त्वात् शनिः। एवं सूर्य-चन्द्र-मंगल-बुध-गुरु-शुक्र-शनि-राहु-केत्वादयः नवग्रहाः सृष्टाः। एते ग्रहाः सौरमण्डलान्तर्गताः विद्यन्ते। तथैव भचक्रे द्वादशराशयः, सप्तविंशतिनक्षत्राणि च विद्यन्ते। एवं सम्पूर्णभचक्रे विद्यमानानां राशिनक्षत्रग्रहाणां प्रभावः परस्परसापेक्षिकः पृथिव्यां पतति। भचक्रस्य द्वादशविभागाः द्वादशराशयः, सप्तविंशतिविभागाः सप्तविंशतिनक्षत्राणि तथा प्रत्येकनक्षत्रस्य चत्वारः विभागाः चत्वारः पादाः प्रत्येकनक्षत्रस्य कृते विद्यन्ते। नवपादेषु एको राशिः भवति।

न क्षरतीति नक्षत्रमिति व्युत्पत्त्या आकाशे गतिशून्यस्थितानां ताराणां समूहो नक्षत्रम्, अथवा क्रान्तिवृत्तस्य समाः सप्तविंशतिभागात्मकानि नक्षत्राणि। अतः नक्षत्रस्यैकमानम्–13/20 प्रत्येकस्य नक्षत्रस्य चत्वारो पादाः, आहत्य–108 पादाः, तेन द्वादशभिर्भक्ते सति नवभिपदैः, एको राशिरिति सुघटम्, तस्मिन् नक्षत्रराशिमापके विभाजिते क्रान्तिवृत्ते ग्रहाः भ्रमन्ति, राशीषु स्वाधिपत्यं च धारयन्तीति तेषां परस्परसम्बन्धः स्पष्ट एव। तद्यथा–

1–नक्षत्रम् = 13 + /20 = 4 पादाः 2 1×4 नक्षत्राणि = 9 पादाः = 30 + (अंशाः) = 1राशिः सिंहस्याधिपतिः सूर्यः कर्कस्याधिपतिः शशी इत्यादिना राशीनामधिपाः ग्रहाः।

द्वादशराशीनां नक्षत्रचक्रम्–

राशि:	नक्षत्राणि	राशि:	नक्षत्राणि
1. मेषः	अश्विनी-4, भरणी-4, कृत्तिका-1	7. तुला	चित्रा-2, स्वाती-4, विशाखा-3
2. वृषः	कृत्तिका-3, रोहिणी-4, मृगशिरा-2	8. वृश्चिकः	विशाखा-1, अनुराधा-4, ज्येष्ठा-4
3. मिथुन	मृगशिरा-2, आर्द्रा-4, पुनर्वसु-3	9. धनुः	मूला-4, पूर्वाषाढा-4, उ०आ०-1,
4. कर्कटः	पुनर्वसु-1, पुष्य-4, आश्लेषा-3	10. मकरः	उ०आ०-3, श्रवणा-4, धनिष्ठा-2,
5. सिंहः	मघा-4, पूफा.-4, उ०फा०-1	11. कुम्भः	धनिष्ठा-2, शतभिषा-4, पूर्वभाद्र-3
6. कन्या	उ०फु०-3, हस्त-4, चित्रा-2	12. मीनः	पूर्वभाद्र-1, उत्तरभाद्र-4, रेवती-4

द्वादशराशीनां स्वामिनो भवन्ति नवग्रहाः। कथितं च ज्योतिषशास्त्रे–

मेषवृश्चिकयोर्भौमस्तुलावृषभयोर्भृगुः ।
बुधः कन्यामिथुनयोः कर्काधीशस्तु चन्द्रमाः ।।
धनुर्मीनाधिपो जीवः शनिः मकरकुम्भयोः ।
सिंहस्याधिपतिः सूर्यो राश्यधीशा इमे स्मृता ।।

अर्थात् मंगलः-मेषवृश्चिकयोः, शुक्रः-तुलावृषयोः, बुधः-कन्यामिथुनयोः, चन्द्रमा-कर्कस्य, सूर्यः-सिंहस्य, शनिः-मकरकुम्भयोः, गुरुः-धनुर्मीनयोश्च अधिपतिः वर्तते। वस्तुतः नक्षत्रराशिग्रहाणां सम्बन्धज्ञानादेव कस्यापि जातकस्य जीवनगतिः, चरित्रं, व्यक्तित्वमित्यादयः ज्ञायन्ते। अयं च सम्बन्धः जातकस्य जन्माक्षरराशिग्रहसम्बन्धानामाधिपत्य-परिकल्पनादनन्तरं हि सम्भाव्यते। मानवीयसम्बन्धः एतेषामित्युच्यते-1. भावविचारः, 2. उच्चनीचविचारः, 3. स्वामित्वविचारः, 4. चरणविचारः, 5. पारस्परिकदृष्टिविचारः, 6. योगविचारः, 7. ग्रहमैत्रीविचारः, 8. बलाबलविचारः, 9. योगिनीविचारश्च प्रभृतयः क्रियन्ते। द्वादशभावाः भवन्ति। यथा-तनु-धन-सहज-सुख-सुत-रिपु-जाया-आयु-भाग्य-कर्म-आय-व्ययाः। प्रत्येकभावस्य एकः कारकग्रहः विद्यते। स च ग्रहः विशिष्टराशियुक्तः सन् बलवान् भवति। यथा-प्रथमभावस्य कारकः सूर्यः। स मिथुन-कन्यातुला-कुम्भराशिषु एकेन सह युक्तो भूत्वा बलवान् भवति। परन्तु यदि अस्मिन् भावे सूर्येण सह सिंहराशिः भवति तर्हि मानवः गर्वी दुराग्रही चापि भवति। अनेन नक्षत्रराशिग्रहाणां परस्परसम्बन्धः स्वतन्त्रप्रभावश्चापि जातकादिषु प्राचीनाचार्यैः पठितः।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— के सन्ति सप्तविंशतिः नक्षत्राणि?
   उत्तरम्—1. अश्विनी, 2. भरणी, 3. कृत्तिका, 4. रोहिणी, 5. मृगशिरा, 6. आर्द्रा, 7. पुनर्वसु, 8. पुष्य, 9. आश्लेषा, 10. मघा, 11. पूर्वाफल्गुनी, 12. उत्तराफल्गुनी, 13. हस्त, 14. चित्रा, 15. स्वाती, 16. विशाखा, 17. अनुराधा, 18. ज्येष्ठा, 19. मूल, 20. पूर्वाषाढ, 21. उत्तराषाढ, 22. श्रवणा, 23. धनिष्ठा, 24. शतभिषा, 25. पूर्वाभाद्रपद, 26. उत्तराभाद्रपद, 27. रेवती।
2. **प्रश्नः**— के सन्ति द्वादशराशयः?
   उत्तरम्—1. मेषः, 2. वृषः, 3. मिथुन, 4. कर्कः, 5. सिंहः, 6. कन्या, 7. तुला, 8. वृश्चिकः, 9. धनुः, 10. मकरः, 11. कुम्भः, 12. मीनः।
3. **प्रश्नः**— के सन्ति नवग्रहाः?
   उत्तरम्—1. सूर्यः, 2. चन्द्रमा, 3. मङ्गलः, 4. बुधः, 5. गुरुः, 6. शुक्रः, 7. शनिः, 8. राहुः, 9. केतुः।
4. **प्रश्नः**— सूर्यः कस्य राशेः स्वामी?
   उत्तरम्— सिंहस्य।
5. **प्रश्नः**— चन्द्रमा कस्य राशेः स्वामी?
   उत्तरम्— कर्कस्य।
6. **प्रश्नः**— मङ्गलः कयोः राश्योः स्वामी?
   उत्तरम्— मेषवृश्चिकयोः।
7. **प्रश्नः**— बुधः कयोः राश्योः स्वामी?
   उत्तरम्— कन्यामिथुनयोः।
8. **प्रश्नः**— गुरुः कयोः राश्योः स्वामी?
   उत्तरम्— धनुर्मीनयोः।

9. **प्रश्नः**— शुक्रः कयोः राश्योः स्वामी?
   उत्तरम्— तुलावृषयोः।
10. **प्रश्नः**— शनिः कयोः राश्योः स्वामी?
   उत्तरम्— मकरकुम्भयोः।
11. **प्रश्नः**—मनसः साकाशात् चन्द्रमा, अक्ष्णोः सूर्यः कस्य जातौ?
   उत्तरम्— ब्रह्मणः।
12. **प्रश्नः**— अग्निस्वरूपस्तेजराशिः कः?
   उत्तरम्— सूर्यः।
13. **प्रश्नः**— सोमरूपः कः?
   उत्तरम्—चन्द्रः।
14. **प्रश्नः**—पञ्चताराग्रहाः केभ्यः उत्पन्नाः?
   उत्तरम्— पञ्चमहाभूतेभ्यः।
15. **प्रश्नः**—पञ्चमहाभूतेभ्यः अग्नितत्वाद् कः उत्पन्नः?
   उत्तरम्— भौमः।
16. **प्रश्नः**—पञ्चमहाभूतेभ्यः पृथ्वीतत्वाद् कः उत्पन्नः?
   उत्तरम्— बुधः।
17. **प्रश्नः**—पञ्चमहाभूतेभ्यः आकाशतत्वाद् कः उत्पन्नः?
   उत्तरम्— बृहस्पतिः।
18. **प्रश्नः**—पञ्चमहाभूतेभ्यः जलतत्वात् कः उत्पन्नः?
   उत्तरम्— शुक्रः।
19. **प्रश्नः**—पञ्चमहाभूतेभ्यः वायुतत्वात् कः उत्पन्नः?
   उत्तरम्— शनिः।
20. **प्रश्नः**—सर्वे ग्रहाः कुत्र अन्तर्गताः विद्यन्ते?
   उत्तरम्— सौरमण्डलान्तर्गताः।
21. **प्रश्नः**—सौरमण्डलान्तर्गत-भचक्रे के विद्यन्ते?
   उत्तरम्— द्वादशराशयः, सप्तविंशतिनक्षत्राणि च।
22. **प्रश्नः**—सम्पूर्णभचक्रे विद्यमानानां राशिनक्षत्रग्रहाणां प्रभावः परस्परसापेक्षिकः कुत्र पतति?
   उत्तरम्— पृथिव्याम्।
23. **प्रश्नः**—द्वादशभावाः के भवन्ति?
   उत्तरम्—तनु-धन-सहज-सुख-सुत-रिपु-जाया-आयु-भाग्य-कर्म-आय-व्ययाः।
24. **प्रश्नः**— एकः कारकग्रहः कुत्र विद्यते?
   उत्तरम्—द्वादशभावेषु प्रत्येकभावे।
25. **प्रश्नः**—नक्षत्रराशिग्रहाणां पारस्परिक सम्बन्धः केन प्रकारोऽस्ति?
   उत्तरम्— अन्योन्याश्रितः।
26. **प्रश्नः**—देवानां दिनार्द्धं दैत्यानाञ्च रात्र्यर्द्धं कदा भवति?
   उत्तरम्— मिथुनान्ते रविस्थिते।

(V-C-73) 9. नवविधकालमानानि एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

9. **"गणितज्योतिषम्"नवविधकालमानानि**—कल् संख्याने इत्यस्माद्धातोः कर्तरि घञ् प्रत्यये कृते सति कालशब्दः निष्पन्नो भवति। ज्योतिषशास्त्रे कालस्यैव गणना ज्योतिःपिण्डनक्षत्रादिबलेन क्रियते। गणयति कलयति इति कालः। उक्तं च पुराणे-"**कालः सृजति भूतानि कालः संहरते प्रजाः**" इत्यनेन कालस्य लक्षणं प्राप्यते-"**जन्यानां जनकः कालः जगतामाश्रयो मतः**"। कालविधानशास्त्रमिदं कालस्य सूक्ष्मावयवादारभ्य कल्पपर्यन्तमहत्कालखण्डस्य गणना एका सारणिबद्धपरम्परया प्रकाशते। प्रोक्तं च सूर्यसिद्धान्ते भास्कराचार्यः:-

लोकानामन्तकृत्कालः कालोऽन्यः कलनात्मकः।
स द्विधा स्थूलसूक्ष्मत्वात् मूर्तश्चामूर्तमुच्यते।।
(सू.सि.मध्यमा.)

कालः द्विविधः-1. लोकानामन्तकृत्कालः, 2. कलनात्मकः कालः। अत्र कलनात्मको कालः द्विधा विभज्यते-1. स्थूलः मूर्तश्चोच्यते, 2. सूक्ष्मः अमूर्तश्च। कालविधायके ज्योतिषशास्त्रे कलनात्मककालस्य नवधा विभाजनं क्रियते, यथोक्तं सूर्यसिद्धान्ते-

ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम्।
सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव।।
(सू०सि०)

एषु चतुर्भिः सौर-चान्द्र-नाक्षत्र-सावनैश्च मुख्यत्वेन जगति मानवव्यवहारः प्रचलति। भारतीयज्योतिषशास्त्रस्य सिद्धान्तग्रन्थेषु 1. ब्राह्मं, 2. दिव्यं, 3. पित्र्यम्, 4. प्राजापत्यम्, 5. गौरवम्, 6. सौरमानम्, 7. सावनम्, 8. चान्द्रम्, 9. आर्क्षमानं

चेति कालस्य नवविधकालमानानि सन्ति। एवं नवविधमानानां प्रमाणं पृथक् पृथक् भवति। सर्वेषां त्रिंशद्दिनानां मास:, मासानां च द्वादशभिर्वर्षं भवति। नवविधकालमानेषु केवलं नाक्षत्रमानमेव स्थिरं समरूपं च भवति, अन्यानि सर्वाणि मानानि विद्वद्भि: चलरूपेण स्वीकृतानि सन्ति। तत्र

(1) ब्राह्मम्–कल्पो ब्राह्ममह: प्रोक्तमिति वचनात् कल्पद्वयात्मकं अर्थात् द्विसहस्रयुगात्मकं ब्रह्मणोऽहोरात्रं ब्राह्ममानम्। (ब्राह्मं कल्प प्रकीर्तितम्)।

(2) दिव्यम्–सौरवर्षात्मकमेकं देवसम्बन्धिनं दिव्यमानं "तत्षष्टि: षड्गुणा" दिव्यमिति वचनात्।

(3) पित्र्यम्–चान्द्र: पित्र्यमह: स्मृतम् इति त्रिंशता चान्द्रतिथिभि: पितृमानम्।

(4) प्राजापत्यम्–मन्वन्तरव्यवस्था प्राजापत्यमानं भवति।

(5) गौरवम्–बृहस्पते: मध्यमराशिभोगात् संवत्सर-व्यवस्था गौरवमानम्।

(6) सौरमानम्–रवेश्चक्रभोगोऽर्कवर्षप्रदिष्टम्।

(7) सावनम्–उदयादुदयं भानो: भूमिसावनवासरा:, इत्थं भूसम्बन्धिमानं सावनमानम्।

(8) चान्द्रम्–त्रिंशता तिथिभि: चान्द्रमास: चान्द्रमानम्।

(9) आर्क्षमानम्–नक्षत्रभचक्रभ्रमणात् नाडीषष्ट्या नाक्षत्रमानम्। नक्षत्रोदयद्वयान्तररूपम्। एषु सौरचान्द्रार्क्ष-सावनानामेव व्यवहार: भवति।

(1) ब्राह्ममानम्–नवविधकालमानेषु ब्रह्मसम्बन्धिमानं ब्राह्ममानम्। युगसहस्रात्मकेन कल्पप्रमाणेन ब्रह्मणो दिनं, तत्प्रमाणिकैव रात्रिरित्याहत्य कल्पद्वयात्मको ब्रह्मणोऽहोरात्रं ब्राह्ममानम्। उक्तञ्च सूर्यसिद्धान्ते–

इत्थं युगसहस्रेण भूतसंहारकारक:।
कल्पो ब्राह्ममह: प्रोक्तं शर्वरी तस्य तावती।।
(सू.सिद्धा.)

एकस्मिन् महायुगे 12,000 (द्वादशसहस्राणि) दिव्यवर्षाणि एवञ्च 43,20,00 सौरवर्षाणि भवन्ति एवं सहस्रयुगमानै: ब्रह्मण: कल्प-संज्ञक: एकं दिनं तावत् प्रमाणमिता रात्रिश्च भवति।

भास्कराचार्योऽपि ब्राह्मपक्षपोषको आह–

स्याद्युगानां सहस्रं दिनं वेधस:।
सोऽपि कल्पद्युरात्रं तु कल्पद्वयम्।

भास्कराचार्यस्य मतं यथा–

खखाभ्रदन्तसागरैर्युगाग्नियुग्मभूगुणै:।
क्रमेण सूर्यवत्सरै: कृतादयो युगाङ्घ्रय:।।
स्वसन्ध्यकात्तदंशकं निजार्कभागसंमितै:।
युताश्च तद्युतो युगं रदाब्धयोऽयुताहता:।।
मनु: क्षमानगैर्युगेन्दुभिश्च तैर्भवेत्।
दिनं सरोजजन्मनो निशा च तत्प्रमाणिका।।

एवं प्रकारेण–1. महायुग: 4 युगा:। 1 कल्प:-1 सहस्रमहायुगम्। 2 'कल्प:-1 ब्राह्म अहोरात्रम्। 2' कल्प:' 30-60 कल्प: वा 1 ब्राह्ममास:। 60 कल्प:'12-720 कल्प: वा 1 ब्राह्मवर्षम्। ब्राह्ममानविषये प्रोच्यते यत् ब्रह्मा पृथिव्या: ईदृग्दूरे निवसति, यत: आप्रलयं सततं रविं पश्यति, अत: प्रलयकालावधियुगसहस्रात्मकं कल्पप्रमाणकं ब्रह्मणो दिनम्, रात्रिश्च। उक्तञ्च सिद्धान्तशिरोमणौ–

यदतिदूरगतो द्रुहिण: क्षिते:
सन्तमाप्रलयं रविमीक्षते।
भवति तावदयं शयितश्च
तद्युगसहस्रयुगं द्युनिशं विधे:।
(सू.सिद्धा.)

ब्रह्ममानेन शतायु: ब्रह्मा "शतायु: शतानन्द एवं प्रदिष्ट:" इति भास्करवचनात्। इति ब्राह्ममानम्।

(2) दिव्यमानम्–नवविधकालमानेषु देवसम्बन्धि-कालमानं दिव्यम्। तच्च एकसौरवर्षात्मकं दिनप्रमाणम्। वस्तुत: उत्तरीध्रुवे देवानां दक्षिणे च दैत्यानामवस्थितिरिति शास्त्राभिमतम्। अर्थात् देवा: सुमेरौ निवसन्ति एवञ्च दैत्या: कुमेरौ निवसन्ति। तस्मात् स्वस्थानानवत्यंशेन विहितं वृत्तं स्वक्षितिजम्, इति गोलरीत्या नाडीवृत्तमेव देवासुराणां क्षितिजम्। क्षितिजोर्ध्वस्थे रवौ दिनं, अधस्थे च रात्रिरिति सिद्धान्तात् सायनमेषादारभ्य कन्यान्तं यावत् षड्राशिषु उत्तरगोले स्थिते रवौ देवानां दिनं, तुलादौ षड्राशिषु दक्षिणगोले च स्थिते रात्रि:, आहत्य द्वादशसौरमासानां दिव्याहोरात्रं दिव्यमानम्। दैत्यानाञ्च दक्षिणे स्थितत्वात् व्यत्यासेन अहोरात्रव्यवस्थेति स्पष्टम्। उक्तञ्च सूर्यसिद्धान्ते–

सुरासुराणामन्योऽन्यमहोरात्रं विपर्ययात्।
तत्षष्टि: षड्गुणा दिव्यं वर्षमासुरमेव च।।
(सू.सिद्धा.)

भास्कराचार्योऽपि–

रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टं द्युरात्रञ्च देवासुराणां तदेव।। इति।

यदा देवानां दिनं तदा दैत्यानां रात्रि:, एवञ्च यदा दैत्यानां दिनं तदा देवानां रात्रिर्भवति। अत एव दिव्यादिनप्रसङ्गे सौरसिद्धान्ते प्राप्यते 'मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यते' अर्थात् द्वादशसौरमासै: एकं दिव्यं दिनं भवति, तत: त्रिंशद्भि: दिवसै: मास एवञ्च द्वादशमासै: दिव्यवर्षं सम्पद्यते।

(3) पित्र्यमानम्–नवविधकालमानेषु पितृसम्बन्धिमानं पित्र्यमानम्। विधूर्ध्वभागे पितरो वसन्त: इति भास्करवचनात् विधो: पृष्ठे पितृस्थानं स्वीक्रियते। अथ च दिनं दिनेशस्य यतोऽत्र दर्शने तमीतमोहन्तुरदर्शने सतीति सिद्धान्तात् अमान्तकाले "दर्श: सूर्येन्दुसङ्गम:" इत्यनेन सूर्येन्दो: सङ्गमवशात् पितृणां खमध्ये सूर्यस्थितत्वात् पितृणां मध्याह्न:, तद्व्यत्यासेन पूर्णान्तकाले च मध्याह्नरात्रि:, इत्थं त्रिंशततिथि: चान्द्रमासेनैकेन पितृणामहोरात्रं पित्र्यमानम्, तद्यथा–

त्रिंशता तिथिभिर्मास: चान्द्र: पित्र्यमह: स्मृतम्।
निशा च मासपक्षान्तौ तयोर्मध्ये विभागत:।
(सू.सि.माना.)

भास्करोऽपि–

"विधोर्मास एतच्च पैत्र्यं द्युरात्रमिति" वक्ति। एतावता कृष्णपक्षसार्द्धसप्तम्यां पितृणां दिनारंभ: शुक्लपक्षसार्द्धसप्तम्यां दिनान्त:, रात्र्यारम्भश्च। यथोक्तम्–

कृष्णे रवि: पक्षदलेऽभ्युदेति शुक्लेऽस्तमेत्यर्थत एव सिद्धम्। (सि.शि.13-14)

इति पितृमानव्यवस्था।

(4) प्राजापत्यमानम्–नवविधकालमानेषु प्रजापति-सम्बन्धिमानं प्राजापत्यम्। वस्तुत: प्रजापतिभ्य: मनूनां समुद्भवात् मनुसम्बन्धिमानमेव प्राजापत्यमानम्। तद्यथोक्तम्– "मन्वन्तरव्यवस्था च प्राजापत्यमुदाहृतम्"। कालस्य खण्डरूपत्वात् प्राजापत्यमाने दिनरात्र्योर्भेद: न दृश्यते; उक्तञ्च "न तत्र द्युनिशोर्भेद:"। वस्तुत: एकस्य मनोराविर्भाव-कालादन्यमनो: तत्र एकसप्ततिमहायुगप्रमाणकं मन्वन्तर-कालमानम्, उक्तञ्च–

युगानां सप्तति: सैका मन्वन्तरमिहोच्यते।

इत्थमेकस्मिन् कल्पे चतुर्दशमनव: पञ्चदशसन्धिसहिता: भवन्ति।

ससन्धयस्ते मनव: कल्पे ज्ञेयाश्चतुर्दश।

चतुर्दशमनवस्तु स्वायम्भुव: स्वारोचिष: उत्तमज: तामस: रैवत: चाक्षुष: वैवस्वत: सावर्णि: दक्षसावर्णि: ब्रह्मसावर्णि: धर्मसावर्णि: रुद्रपुत्र: रुचि: भौत्यसंज्ञका:। सम्प्रति अष्टाविंशतितमे कलियुगे सप्तमो मनु: प्रवर्तितो वर्तते।

स्वायम्भुवो मनुरभूत् प्रथमस्ततोमी
स्वारोचिषोत्तमज-तामस-रैवताख्या:।
षष्ठस्तु चाक्षुष इति प्रथित: पृथिव्यां वैवस्वतस्तदनु सम्प्रति सप्तमोऽयम्।
सावर्णि: दक्षसावर्णिर्ब्रह्मसावर्णिकस्तथा।
धर्मसावर्णिको रुद्रपुत्रो रौच्यश्च भौत्यक:।

अत्र एकस्मिन् कल्पे 14 मनव: सन्ति- (1. स्वायम्भुवो, 2. स्वारोचिष:, 3. उत्तमज, 4. तामस, 5. रैवताख्या:, 6. चाक्षुष, 7. वैवस्वत:, 8. सावर्णि:, 9. दक्षसावर्णि:, 10. ब्रह्मसावर्णिक:, 11. धर्मसावर्णिक:, 12. रुद्रपुत्र:, 13. रौच्य:, 14. भौत्यक:।)

(5) गौरवमानम्–नवविधकालमानेषु गुरुसम्बन्धिमानं गौरवम्। गौरवमानेनैव संवत्सरव्यवस्था सञ्जायते। अत: संवत्सरकाल एव गौरवमानम्। उक्तञ्च भास्कराचार्येण–

बृहस्पतेर्मध्यमराशिभोगात् संवत्सरं सांहितिका: वदन्ति।

यावता कालेन गुरु: मध्यमगत्या राशिभोगं करोति तत्काल एव संवत्सरकाल:, अपि च एकस्मिन् वत्सरे स्फुटगुरो: एकराशिसञ्चारो भवेत्तदाशौ शुद्धवत्सर:, द्विराशिचारं कृत्वा पुन: वक्रितोऽसौ पूर्वराशिं नैति तदा लुप्तसंवत्सरो महातीचारश्च भवति, यदि पुन: पूर्वराशिमेति (द्विराशिचारं कृत्वा) तदा अतिचार: कथ्यते। तद्यथा–

यत्रैकराशिसञ्चारो भार्गगत्या गुरोर्भवेत्,
शुद्ध: संवत्सर: स स्यात् सर्वेषां च शुभप्रद:।
यत्र द्विराशिसञ्चारो ह्यतीचार: स कथ्यते।
लुप्ताब्दश्च यदाऽब्दान्ते पूर्वभं नैति वक्रित:।।

अत एव बार्हस्पत्यवर्षानयनार्थं प्रोक्तम्–

द्वादशघ्ना गुरोर्याता भगणा: वर्तमानकै:।
राशिभि: सहिता: शुद्धा: षष्ट्या
स्युर्विजयादय:।।

इत्थं बार्हस्पत्यवर्षप्रमाणेन षष्टिः विजयादिसंवत्सर-व्यवस्था एव गौरवमानं दिगिति।

"बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः।" तथा च वैशाखादिद्वादशमासेषु कृष्णे पक्षे पञ्चदशे तिथौ कृतिकादिनक्षत्राणां संयोगवशात् गुरोः वर्षाणि भवन्ति। यथा पूर्णान्तेषु कृतिकादिनक्षत्रसंयोगात् कार्तिकादयो द्वादशमासाः तथैव वैशाखादिदर्शान्तेषु कृतिकादिसंयोगाद् कार्तिकादीनि वर्षाणि ज्ञेयानि।

(6) सौरमानम्–नवविधकालमानेषु सूर्यगत्या प्रवर्त्तितमानं अर्थात् सूर्यसम्बन्धिमानं सौरमानम्। सूर्यस्य अंशैकचलनेन सौरदिनम्। त्रिंशत् सौरदिनैः अर्थात् राशि-भोगकालः सौरमासः। द्वादशसौरमासानामथांत् षष्ट्युत्तर-त्रिंशदंशभोगकालः (चक्रभोगकालः) सौरवर्षसंज्ञकः इत्थमेव सौरमासस्य प्रवृत्तिः जायते। इदं सौरवर्षमेव देवासुराणामहोरात्रप्रमाणकं भवति।

संक्रान्त्या सौर उच्यते-मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यते।

भास्करोऽपि–

रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टं द्युरात्रं च देवासुराणां तदेव।

सूर्यस्य राशिसंचार एव संक्रान्तिपदेनोच्यते। मेषादिषड्राशिषु सूर्यः उत्तरगोले भ्रमति तदा देवानां दिनं, दैत्यानाञ्च रात्रिः, तुलादिषड्राशिषु सूर्यः दक्षिणगोले भ्रमति तदा देवानां रात्रिः, दैत्यानाञ्च दिनमिति। मकरादिषड्राशिषु स्थिते सूर्ये उत्तरायणः, कर्कादिषड्राशिषु दक्षिणायनञ्च। सौरमानादेव ऋतूणामपि प्रवृत्तिः भवति। अतः वर्षायनर्तुयुगादीनां व्यवहारः सौरमानादेव भवति। यथा भास्करः–

वर्षायनर्तुयुगपूर्वकमत्र सौरान्।

सूर्यसिद्धान्तेऽपि–

सौरेण द्युनिशोर्मानं षडशीतिमुखानि च।
अयनं विषुवच्चैव संक्रान्तेः पुण्यकालता।।

(सू.सिद्धा.)

(7) सावनमानम्–नवविधकालमानेषु भूसम्बन्धिमानं सावनम्। सूर्योदयद्वयान्तर्वर्ती कालः भूमिसावनवासर इत्युक्तः। एवमत्र एकस्माद् सूर्योदयादारभ्य अपरसूर्योदयं यावत् मध्ये यावन्मितं मानं तदेव सावनम् इति। तद्यथोक्तं सूर्यसिद्धान्ते–

उदयादुदयं भानोर्भूमिसावनवासरः।

भास्करेणापि–

इनोदयद्वयान्तरं तदर्कसावनं दिनम्।
तदेव मेदिनीदिनं भवासरस्तु भभ्रमः।।

रविस्तु क्रान्तिवृत्ते भ्रमति कालश्च नाडीवृत्ते, अतः रविगतिकलातुल्यासु नाक्षत्रषष्टिघटिकाः रविगतिकालोत्पन्नासु नाक्षत्रषष्टिघटिकयोरन्तररूपं उदयान्तरसंस्कारं मध्यमसावने धनं ऋणं वा कृत्वा स्पष्टसावनं समायाति। यथोक्तम्–

समागता सुसंयुता रवेस्तु षष्टिनाडिकाः।
स्फुटं द्युरात्रमुद्गमा द्युभुक्तितश्च तद्भवेत्।।

मुख्यतया व्यवहारे सावनस्यैवोपयोगः; यथोक्तम्–
'अहर्गणसु

सावनानि स्युरेतेनायज्ञकालविधिस्तु तैः।
सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा।
मध्यमाग्रहभुक्तिस्तु सावनेनैव गृह्यते।।

भास्करोपि–

यत्कृच्छ्रसूतकचिकित्सितवासराद्यं
तत्सावनाच्च घटिकादिकमार्क्षमानात्।।

एकस्मिन् सौरवर्षे 365 1/4 सावनदिनानि भवन्ति। एवमत्राचार्येण द्विविधसावनं प्रोक्तम्–मध्यमसावनं स्फुटसावनं च।

(8) चान्द्रमानम्–नवविधकालमानेषु चान्द्रसम्बन्धि-मानं चान्द्रमानम्। चन्द्रगत्या इदं प्रवर्तते। चन्द्रोदयद्वयान्त-र्वर्तिकालः चान्द्रदिनम्। इत्थं तिथेः प्रवृत्तिः चान्द्रमानात् भवति। सूर्यचन्द्रयोः द्वादशांत्यकान्तरेण एकातिथिः त्रिंशता तिथिभिः एक चान्द्रमासः। द्वादशमासैर्भवर्षमित्यादिना द्वादशचान्द्रमासैः एकं चान्द्रवर्षम्। एकस्मिन् सौरवर्षे 354 चान्द्रदिनानि। चान्द्रमास एव पितृणां अहोरात्रम्। उक्तञ्च–

त्रिंशता तिथिभिर्मासः चान्द्रः पित्र्यमहः स्मृतम्।

यस्मिन् चान्द्रतिथौ सूर्योदयः न भवति सा तिथिः अवमसंज्ञिका यत्र च सूर्योदयद्वयं सा तिथिः अधितिथिः, इत्थमेव चान्द्रमासेष्वपि ज्ञेयम्–

तिथ्यन्त सूर्योदययोस्तु मध्ये सदैव तिष्ठत्य-वमावशेषम्।

इति भास्करवचनात्। इत्थं प्रतिपदतः अमान्तपर्यन्तं कृष्णपक्षं चान्द्रद्वादशपूर्णिमान्तपर्यन्तञ्च शुक्लपक्षं, पक्षद्वय-माहत्य चैत्रादिमासाः भवन्ति। भास्करेणाप्युक्तम्–

रवीन्द्वोर्युतिसंयुतिर्यावदन्या विधोर्मासः। एतच्च पैत्र्यं द्युरात्रम्।

अर्कादविनिस्सृतः प्राचीं यद्यात्यहरहः शशी।
तच्चान्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिः।।

(सू.सि., मा.12)

चन्द्रस्यापि व्यवहारः मुख्यतया क्रियते यथोक्तं सूर्यसिद्धान्ते–

तिथिः करणमुद्वाहः क्षारं सर्वक्रियास्तथा।
व्रतोपवासयात्राणां क्रिया चान्द्रेण गृह्यते।

(सू.सि., माना 13)

पर्वान्ते तत्तन्नक्षत्रसंयोगादेव चान्द्रमासानां संज्ञा निर्धार्यते।

नक्षत्रनाम्ना मासास्तु ज्ञेया पर्वान्तयोगतः।

(सूर्यसिद्धान्तः)

(9) नाक्षत्रमानम्–नक्षत्रसम्बन्धिकालमानं नाक्षत्र-मानम्। नक्षत्राणां गत्यभावात् नक्षत्रमानं सर्वदा स्थिरम्। तच्च षष्टिघटीनामेकं नाक्षत्रदिनम्। उक्तञ्च सूर्यसिद्धान्ते–

नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम्।

वस्तुतस्तु प्रतिदिनं प्रवहगत्या भचक्रस्य अर्थात् नक्षत्रमण्डलस्यैकं परिभ्रमणं यावता कालेन भवति तावत्प्रमाणं नाक्षत्रदिनमुच्यते। अतः नक्षत्रद्वयोदयान्तर्वर्तिकालः नाक्षत्र-दिनम्। पर्वान्तेषु नक्षत्रसंयोगादेव मासानां संज्ञा भवति, इति प्रोक्तं यथा–

कार्तिक्यादिषु संयोगे कृतिकादि द्वयन्द्वयम्।
अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम्।।

(सू.सि.मान 16)

व्यवहारे घटीपलादीनां व्यवहारः नक्षत्रमानादेव विधीयते; तद्यथा भास्कराचार्यः–

घटिकादिकमार्क्षमानात्।

कालविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—कालः कतिविधः, के च ते?
उत्तरम्— कालः द्विविधः–1. लोकानामन्तकृत्कालः, 2. कलनात्मकः कालः।

2. **प्रश्नः**—कलनात्मको कालः कतिधा विभज्यते?
उत्तरम्— द्विधा, 1. स्थूलः मूर्तश्चोच्यते, 2. सूक्ष्मः अमूर्तश्च।

3. **प्रश्नः**— ज्योतिषशास्त्रे कालस्यैव गणना केन बलेन क्रियते?
उत्तरम्— ज्योतिःपिण्डनक्षत्रादिबलेन क्रियते।

4. **प्रश्नः**—ज्योतिषशास्त्रे कालशब्दस्य का परिभाषा?
उत्तरम्— गणयति कलयति इति कालः।

5. **प्रश्नः**—कालविधायके ज्योतिषशास्त्रे कलनात्मक-कालस्य कतिधा विभाजनं क्रियते?
उत्तरम्— नवधा।

6. **प्रश्नः**—कानि सन्ति नवविधकालमानानि?
उत्तरम्—1. ब्राह्मं, 2. दिव्यं, 3. पित्र्यम्, 4. प्राजापत्यम्, 5. गौरवम्, 6. सौरमानम्, 7. सावनम्, 8. चान्द्रम्, 9. आर्क्षमानम्।

7. **प्रश्नः**— किमस्ति ब्राह्ममानम्?
उत्तरम्— द्विसहस्रयुगात्मकं ब्रह्मणोऽहोरात्रं ब्राह्ममानम्।

8. **प्रश्नः**— किमस्ति दिव्यमानम्?
उत्तरम्— सौरवर्षात्मकमेकं देवसम्बन्धिनं दिव्यमानम्।

9. **प्रश्नः**— किमस्ति पितृमानम्?
उत्तरम्— चान्द्रः पित्र्यमहः स्मृतम् इति त्रिंशता चान्द्रतिथिभिः पितृमानम्।

10. **प्रश्नः**— किमस्ति प्राजापत्यम्?
उत्तरम्— मन्वन्तरव्यवस्था प्राजापत्यमानं भवति।

11. **प्रश्नः**— किमस्ति गौरवम्?
उत्तरम्— बृहस्पतेः मध्यमराशिभोगात् संवत्सरव्यवस्था गौरवमानम्।

12. **प्रश्नः**— किमस्ति सौरमानम्?
उत्तरम्— रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टम्।

13. **प्रश्नः**— किमस्ति सावनमानम्?
उत्तरम्— उदयादुदयं भानोः भूमिसावनवासराः, इत्थं भूसम्बन्धिमानं सावनमानम्।

14. **प्रश्नः**— किमस्ति चान्द्रमानम्?
उत्तरम्— त्रिंशता तिथिभिः चान्द्रमासः चान्द्रमानम्।

15. **प्रश्नः**— किमस्ति नाक्षत्रमानम्?
उत्तरम्— नक्षत्रभचक्रभ्रमणात् नाडीषष्ट्या नाक्षत्रमानम्।

16. **प्रश्नः**— एकस्मिन् महायुगे कति दिव्यवर्षाणि भवन्ति?
उत्तरम्— 12, 000 (द्वादशसहस्राणि) दिव्यवर्षाणि।

17. **प्रश्नः**—एकस्मिन् महायुगे कति सौरवर्षाणि भवन्ति?
उत्तरम्— 43,20, 00 सौरवर्षाणि भवन्ति।

18. **प्रश्नः**—ब्रह्मणः कल्प-संज्ञकः एकं दिनं तावत् प्रमाणमिता रात्रिश्च कैः भवन्ति?
उत्तरम्— सहस्रयुगमानैः भवन्ति।

19. **प्रश्नः**— दिव्यमाने देवाः कुत्र निवसन्ति?
उत्तरम्— सुमेरौ।

20. **प्रश्नः**— दिव्यमाने दैत्याः कुत्र निवसन्ति?
उत्तरम्— कुमेरौ।

21. **प्रश्नः**— दिव्यमाने एकं दिव्यं दिनं कैः सौरमासैः भवति?
उत्तरम्— द्वादशसौरमासैः।

22. **प्रश्नः**— दिव्यमाने कैः दिवसैः मासं भवति?
उत्तरम्— त्रिंशद्भिः दिवसैः मासं भवति।

23. **प्रश्नः**— दिव्यमाने कैः मासैः दिव्यवर्षं सम्पद्यते?
उत्तरम्— द्वादशमासैः दिव्यवर्षं सम्पद्यते।

24. **प्रश्नः**—एको चान्द्रमासो कैः तिथिभिः पित्र्यमानं भवति?
उत्तरम्— त्रिंशत्तिथिः चान्द्रमासेनैकेन पितृणामहोरात्रं पित्र्यमानं भवति।

25. **प्रश्नः**— पितृणां दिनारम्भः कदा भवति?
उत्तरम्—कृष्णपक्षसार्द्धसप्तम्यां पितृणां दिनारम्भः भवति।

26. **प्रश्नः**— पितृणां निशारम्भः कदा भवति?
उत्तरम्— शुक्लपक्षसार्द्धसप्तम्यां पितृणां निशारम्भः भवति।

27. **प्रश्नः**— भास्कराचार्यः पितृणां निवासो कुत्र मन्यते?
उत्तरम्— चन्द्रस्योर्ध्वभागे मन्यते।

28. **प्रश्नः**— प्राजापत्यमाने मन्वन्तरकालमानं किमस्ति?
उत्तरम्— एकसप्ततिमहायुगप्रमाणकं मन्वन्तरकाल-मानम्।

29. **प्रश्नः**— के सन्ति चतुर्दशमनवः ?
उत्तरम्—1. स्वायम्भुवः, 2. स्वारोचिषः, 3. उत्तमज, 4. तामस, 5. रैवताख्याः, 6. चाक्षुष, 7. वैवस्वतः, 8. सावर्णिः, 9. दक्षसावर्णिः, 10. ब्रह्मसावर्णिकः, 11. धर्मसावर्णिकः, 12. रुद्रपुत्रः, 13. रौच्यः, 14. भौत्यकः।

30. **प्रश्नः**— किमस्ति गौरवमानम्?
उत्तरम्—संवत्सरकाल एव गौरवमानम्।

31. **प्रश्नः**— गुरोरेकराशिभोगमानं सूर्यसिद्धान्ते कति कुदिनानि भवन्ति?
उत्तरम्— 26111136111 कुदिनानि।

32. **प्रश्नः**—गुरोरेकराशिभोगमानं ब्राह्मसिद्धान्ते कति कुदिनानि भवन्ति?
उत्तरम्— 3611111211 कुदिनानि।

33. **प्रश्नः**— गुरोरेकराशिभोगमानं आर्यभटीये कति कुदिनानि भवन्ति?
उत्तरम्— 361111113715 कुदिनानि।

34. **प्रश्नः**— गुरोरेकराशिभोगमानं आधुनिकवेधे कति कुदिनानि भवन्ति?
उत्तरम्— 36112155126 कुदिनानि।

35. **प्रश्नः**— सौरमाने कति सौरदिनैः सौरमासः भवति?
उत्तरम्— त्रिंशत् सौरदिनैः राशिभोगकालः सौरमासः।

36. **प्रश्नः**— सौरमाने कः उत्तरायणः?
उत्तरम्— मकरादिषड्राशिषु स्थिते सूर्ये उत्तरायणः।

37. **प्रश्नः**— सौरमाने किं दक्षिणायनम्?
उत्तरम्— कर्कादिषड्राशिषु स्थिते सूर्ये दक्षिणायणम्।

38. **प्रश्नः**— किमस्ति सावनमानम्?
उत्तरम्—एकस्माद् सूर्योदयादारभ्य अपरसूर्योदयं यावत् मध्ये यावन्मितं मानं तदेव सावनम् इति।

39. **प्रश्नः**— एकस्मिन् सौरवर्षे कति सावनदिनानि भवन्ति?
उत्तरम्— 365 1/4 सावनदिनानि भवन्ति।

40. **प्रश्नः**—अत्राचार्येण कतिविधसावनं प्रोक्तम्, के च ते?
उत्तरम्— द्विविधसावनं प्रोक्तम्-मध्यमसावनं स्फुटसावनं च।

41. **प्रश्नः**— चान्द्रमासस्य कः कालः?
उत्तरम्— अमान्तद्वयान्तर्वर्त्ती कालो चान्द्रमासः।

42. **प्रश्नः**— कति कुदिनात्मको चान्द्रमासो भवति?
उत्तरम्—29131150 कुदिनात्मको चान्द्रमासो भवति।

43. **प्रश्नः**— चान्द्रवर्षे कति सावनानि दिनानि भवन्ति?
उत्तरम्— 354.22 सावनानि दिनानि भवन्ति।

44. **प्रश्नः**—एकस्मिन् नक्षत्रवर्षे कति सावनदिनानि भवन्ति?
उत्तरम्— 361 सावनदिनानि भवन्ति।

45. **प्रश्नः**—अश्विनीनक्षत्रसंयुक्ता पूर्णिमा कः मासः?
उत्तरम्— आश्विनमासः।

46. **प्रश्नः**—पुराणे कालस्य लक्षणं किं प्राप्यते?
उत्तरम्—"कालः सृजति भूतानि कालः संहरते प्रजाः" "जनन्यां जनकः कालः जगत्यामाश्रयो मतः"।

47. **प्रश्नः**—कालांशानयनम् इति किम्?
उत्तरम्— कालवृत्ते कालांशाः <u>360' अं अ = अं अ</u> 21600 60

48. **प्रश्नः**—कस्य प्रश्नस्योत्तरप्रक्रमे प्रसिद्धानि नवविधकालमानानि?
उत्तरम्— मायासुरस्य।

(V-C-73) 10. ग्रहकक्षाः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

10. **ग्रहकक्षा**—ग्रहाणां भ्रमणवृत्तं "ग्रहकक्षा" इत्युच्यते। अस्मिन् लोके ग्रहाणां स्थितिः कुत्र वर्तते? के ते ग्रहाः? ते ग्रहाः भूमेः सकाशात् उपरि उपरि क्रमेण प्रत्येकः कियदन्तरेण सन्ति? उपर्युपरि संस्थया उच्चानामप्यन्योन्यमन्तरं कियत्? ते: ग्रहाः कियत्प्रमाणाः सन्ति? ग्रहर्क्षकक्षाः केन क्रमेण स्थिताः विद्यन्ते? अर्थादुपर्युपरि क्रमेण स्थितासु कक्षासु पूर्वं कस्य तदनन्तरं कस्य ग्रहस्य स्थितिर्भवति? इत्थं ग्रहकक्षाविचारः ज्योतिषशास्त्रविषयान्तर्गतो वर्तते। उक्तं च सूर्यसिद्धान्ते–

भूमेरुपर्युपर्यूर्ध्वाः किमुत्सेधाः किमन्तराः।
ग्रहर्क्षकक्षाः किं मात्राः स्थिताः केन क्रमेण ताः। (सू.सि.)

ग्रहकक्षाविचारप्रसङ्गे वैदिकसाहित्यं प्राचीनतमप्रमाणं वर्तते। प्राच्यमतानुसारेण भूकेन्द्राभिप्रायिकाः वर्तुलाकाराः ग्रहाणां कक्षाक्रमः वर्णितः नक्षत्रकक्षातः अधोऽधः क्रमेण सूर्यसिद्धान्ते यथा–

मन्दामरेज्यभूपुत्रसूर्यशुक्रकुजेन्दवः।

अर्थात् भानां अधः शनिकक्षा, शनेरधो गुरोः, गुरोरधो भौमस्य ततः रवेः रवितः अधः शुक्रस्य शुक्रादधो बुधस्य, ततः चन्द्रमायाः कक्षेति। भास्कराचार्योऽपि ऊर्ध्वाधःक्रमेण भूमेः पिण्डः शशाङ्कज्ञकविरविकुजेज्यार्किनक्षत्रकक्षा। अर्थात् सूर्यः आकाशस्य, चन्द्रमा नक्षत्रमण्डलस्य, वायुरन्तरिक्षस्य परिक्रमां कुर्वन्ति।

पाश्चात्यैस्तु ग्रहभ्रमणवृत्तस्य दीर्घवृत्तत्वं स्वीकृत्य केन्द्रद्वयञ्च विधाय सूर्यकेन्द्रिकाः ग्रहकक्षाः वर्णिता यथा–

"विच्छुकक्षितिभौभजीवशनयोः दीर्घेषु वृत्तेषु तत्, तन्नाभिस्थितसूर्य"—(केतकीग्रहगणिते)। पाश्चात्याः चन्द्रः पृथिव्याः उपग्रहः इत्यामनन्ति। अतः तस्य सूर्यकेन्द्रिका कक्षा न प्रतिपादिता।

ग्रहकक्षास्थितिः-तुलना–

प्राचीनानां मते ग्रहकक्षा (वर्तुलाकारा)	नवीनानां मते ग्रहकक्षा (दीर्घवर्तुलाकारा)
नक्षत्रकक्षा	नक्षत्रकक्षा
शनिः (Saturn)	प्लुटो (Pluto) नेप्च्यून (Neptune)
गुरुः (Jupiter)	यूरेनस (Uranus)
भौमः (Mars)	शनिः (Saturn)
रविः (sun)	गुरुः (Jupiter)
शुक्र (Venus)	भौमः (Mars) भू (Earth)
बुधः (Mercury)	शुक्र (Venus)
चन्द्रः (Moon)	बुधः (Mercury)
भूः (केन्द्रम्) (Earth)	सूर्यः (नाभिः) (Sun)

सम्पूर्णब्रह्माण्डमनन्ताकाशेऽस्ति। ब्रह्माण्डं विभिन्न-गोलीयपिण्डैरावृत्तं भवति। तस्मिन् ब्रह्माण्डान्तराले भूर्भुवादयः सत्यान्तं सकलं विश्वं वर्तते। ब्रह्माण्डमध्ये वर्तुलाकारः परिणाहः व्योमकक्षा, आकाशकक्षा, खकक्षा वा इत्युच्यते। तन्मध्ये भानां (नक्षत्राणां) प्रवाहवशात् भूगोलमभितश्चलनं प्रतीयते। आकाशे अधोऽधः क्रमेण मन्दादयः ग्रहाः भ्रमन्ति। सर्वेषामुपरि नक्षत्राणि नक्षत्राधः शनिः। शनेरधो गुरुः। गुरोरधो मङ्गलः। मङ्गलादधः रविः। रवेरधः शुक्रः। शुक्रादधः बुधः। बुधादधश्चन्द्रमा। भुव उपरिष्टदेषां क्रमेण कक्षाः विद्यन्ते। सर्वेषां ग्रहाणां केन्द्रं भूकेन्द्रमेवेति स्वीकृतम्। यथा-



नव्यास्तु सूर्यं केन्द्रं मत्वा तमभितो भूगोलग्रहाः भ्रमन्तीति स्वीकुर्वन्ति। तेषां मते सर्वेषां ग्रहाणां केन्द्रं रविः। रवेरुपरि बुधः। बुधस्योपरि शुक्रः। शुक्रस्योपरि पृथिवी। तदुपरि भौमः। ततो गुरुः। ततः शनिः। ततो यूरेनसः। ततो नेपच्युनः। ततः प्लुटो। अन्ते नक्षत्राणि। चन्द्रस्तु भुवमभितो भ्रमति भुवा सह चन्द्रस्य सूर्यं परितः भ्रमणं भवति।

ग्रहकक्षाविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—प्राचीनज्योतिर्विदः सर्वेषां ग्रहाणां केन्द्रं किं स्वीकृतम्?
   उत्तरम्— भूकेन्द्रम्।
2. **प्रश्नः**—नव्यज्योतिर्विदः सर्वेषां ग्रहाणां केन्द्रं किं स्वीकृतम्?
   उत्तरम्— सूर्यम्।
3. **प्रश्नः**— ग्रहाणां भ्रमणवृत्तं किमुच्यते?
   उत्तरम्— "ग्रहकक्षा" इत्युच्यते।
4. **प्रश्नः**— अस्मिन् लोके ग्रहाणां स्थितिः कुत्र वर्तते?
   उत्तरम्— ग्रहकक्षायाम्।
5. **प्रश्नः**—प्राचीनमते के ते ग्रहाः?
   उत्तरम्—शनिः (Saturn), गुरुः (Jupiter), भौमः (Mars), रविः (sun), शुक्र (Venus), बुधः (Mercury), चन्द्रः (Moon)।
6. **प्रश्नः**— प्राचीनानां मते ग्रहर्क्षकक्षाः केन क्रमेण स्थिताः विद्यन्ते?
   उत्तरम्— वतुर्लाकाराः।

7. **प्रश्नः**— नवीनानां मते ग्रहकक्षाः केन क्रमेण स्थिताः विद्यन्ते?
   उत्तरम्— दीर्घवर्तुलाकाराः।
8. **प्रश्नः**—नवीनानां मते के ते ग्रहाः?
   उत्तरम्—प्लुटो (Pluto), नेप्च्यून (Neptune), यूरेनस (Uranus), शनिः (Saturn), गुरुः (Jupiter), भौमः (Mars), भू (Earth), शुक्र (Venus), बुधः (Mercury), सूर्यः (नाभिः) (Sun)
9. **प्रश्नः**— नवीनमते नक्षत्राणि पृथक् पृथक् केन रूपेण भवन्ति?
   उत्तरम्— उर्ध्वाधोरूपेण।
10. **प्रश्नः**— आकाशे मन्दोदयग्रहाः केन क्रमेण भ्रमन्ति?
    उत्तरम्—अधोऽधः क्रमेण भ्रमन्ति।
11. **प्रश्नः**— सूर्यः कस्य परिक्रमां करोति?
    उत्तरम्— आकाशस्य।
12. **प्रश्नः**— चन्द्रमा कस्य परिक्रमां करोति?
    उत्तरम्— नक्षत्रमण्डलस्य।
13. **प्रश्नः**— वायुः कस्य परिक्रमा करोति?
    उत्तरम्— अन्तरिक्षस्य।
14. **प्रश्नः**—सर्वेषां ग्रहाणां केन्द्रं कः भवति?
    उत्तरम्— रविः।
15. **प्रश्नः**—रवेरुपरि को ग्रहः वर्तते ?
    उत्तरम्—बुधः।
16. **प्रश्नः**—बुधस्योपरि को ग्रहः विद्यते?
    उत्तरम्— शुक्रः।
17. **प्रश्नः**—शुक्रस्योपरि को ग्रहः अस्ति?
    उत्तरम्— पृथिवी।
18. **प्रश्नः**—पृथिव्याउपरि को ग्रहः विद्यते?
    उत्तरम्— भौमः।
19. **प्रश्नः**—भौमस्योपरि को ग्रहः अस्ति?
    उत्तरम्— गुरुः।
20. **प्रश्नः**—गुरोः उपरि को ग्रहो वर्तते?
    उत्तरम्— शनिः।
21. **प्रश्नः**—भूर्भुवादयः सत्यान्तं सकलं विश्वं कुत्र वर्तते?
    उत्तरम्— ब्रह्माण्डान्तराले।
22. **प्रश्नः**—वर्तुलाकारः परिणाहः व्योमकक्षा, आकाशकक्षा कुत्र विद्यते?
    उत्तरम्— ब्रह्माण्डमध्ये।
23. **प्रश्नः**—सर्वेषामुपरि कानि वर्तन्ते?
    उत्तरम्— नक्षत्राणि।
24. **प्रश्नः**—नक्षत्राधः क्रमशः के ग्रहाः सन्ति?
    उत्तरम्— प्लूटो-नेप्च्यून-यूरेनस-शनि-गुरु-मंगल-रवि-शुक्र-बुध-चन्द्रमा।
25. **प्रश्नः**—भुवमभितो कः भ्रमति?
    उत्तरम्— चन्द्रः।
26. **प्रश्नः**—लब्धितुल्ययोजनमेव सर्वे ग्रहाः स्वस्वकक्षायां कस्य मुखं भवति?
    उत्तरम्— पूर्वाभिमुखम्।
27. **प्रश्नः**—सूर्यस्य कक्षा कस्मिन् वृत्ते वर्तते?
    उत्तरम्— क्रान्तिवृत्ते।
28. **प्रश्नः**—शनिः सूर्यं कियन्ति वर्षाणि परिक्रमते?
    उत्तरम्— त्रिंशत् वर्षाणि।

(V-C-73) 11. वारक्रमः—एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

11. **वारक्रमः**—संसारे जातकादिक्रियाकलापस्य शुभाशुभफलानि कालान्तर्गतानि भवन्ति। ज्योतिषं कालविधानात्मकं शास्त्रम्। होरा-दिन-मास-वर्षादयः कालस्य अवयवाः सन्ति। ग्रहाणामवस्थितिः क्रमेणैवं यत्-1. शनिः, 2. वृहस्पतिः, 3. मंगलः, 4. सूर्यः, शुक्रः, 6. बुधः, चन्द्रमाश्च। ज्योतिषे **"मन्दामरेज्यभूपुत्रसूर्यशुक्रकुजेन्दवः"** इति भू-केन्द्राभिप्रायकां ग्रहकक्षामनुसृत्य **"मन्दादयः क्रमेण स्युश्चतुर्था दिवसाधिपाः"** इति सूर्यसिद्धान्तोक्तनियमेन शनिमारभ्य चतुर्थश्चतुर्थो ग्रहो वारेशः। यथा शनितः चतुर्थः रविः प्रथमः, तस्मादधश्चतुर्थो चन्द्रः एवमेव क्रमेण भौम-बुध-गुरु-शुक्र-शनिवासरादयः भवन्ति।

होरावशादपि वारक्रमः ज्ञायते, यथा एकस्मिन् वारे 24

होराः, ताः सप्तभिर्वारैः भाजिते सति त्रयोऽवशिष्यते, अतः अग्रिमः चतुर्थः होरेशः अग्रिमवारेशश्च भवति। यस्य दिनस्य प्रथमहोरायाः यः स्वामी भवति, तस्य दिनस्य तद्ग्रहस्य नामानुसारं वारनाम भवति। एकस्य ग्रहस्य एकहोरात्मकः कालोऽस्ति। सृष्टेः प्रारम्भकाले सूर्य एव दृष्ट आसीत्। अतः प्रथमहोरायाः स्वामी रविरित्युच्यते। अत एव प्रथमः वारः रविवारः। तदनन्तरं तस्यैव दिनस्य द्वितीयहोरायाः स्वामी शुक्रतः चतुर्विंशतेश्च होरायाः बुधपर्यन्तमस्ति। तस्मात् द्वितीयः वारः सोमवासरः, तृतीयवारः मंगलवासरः, चतुर्थदिवसः बुधवासरः, पञ्चमदिवसः गुरुवासरः, तथैव शुक्रवासरः, शनिवासरः चेत्यादीनां नामग्रहणं क्रमशः भवति। इति वारक्रमः विद्यते। तदुक्तम्—

मन्दादयः क्रमेण स्युश्चतुर्था दिवसाधिपाः।
वर्षाधिपतयस्तद्वत् तृतीयाः परिकीर्तिताः।
ऊर्ध्वक्रमेण शशिनो मासानामधिपाः स्मृताः।
होरेशाः सूर्यतनयादधोऽधः क्रमशस्तथा॥

यथा सूर्यसिद्धान्ते–**"होरेशाः सूर्यतनयादधोधः क्रमशस्तथा"** इत्यादिनापि यदि प्रथमहोरापतिः शनि ततः अग्रिमे दिवसे चतुर्थः रवि एव वारेशः भविष्यतीति वारक्रमः उपपद्यते। अर्थात् वारेशनामानुसारं वाराणां नाम भवति। यथा–रविवारः, सोमवासरः, मंगलवासरः, बुधवासरः, गुरुवासरः, शुक्रवासरः, शनिवासरश्च। एतेषु वारेषु बृहस्पति-चन्द्र-बुध-शुक्राः सौम्यसंज्ञकाः सन्ति। मंगल-रवि-शनिवासराः क्रूरसंज्ञकाः मन्यन्ते। सौम्यसंज्ञकवारेः शुभकार्यसम्पादनं क्रियते। तत्र रविवासरः स्थिरसंज्ञकः, सोमवासरः चरसंज्ञकः, मंगलवासरः उग्रसंज्ञकः, बुधवासरः समसंज्ञकः, गुरुवासरः लघुसंज्ञकः, शुक्रवासरः मृदुसंज्ञकः, शनिवासरः तीक्ष्णसंज्ञको भवति। शल्यक्रियायाः कृते शनिवासर उत्तमः मन्यते। विद्यारम्भस्य कृते गुरुवासर तथा च वाणिज्यारम्भस्य कृते बुधवासरः प्रशस्त इति मन्यतेति वारक्रमः।

वारक्रमविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—जगतां जातकादिक्रियाकलापस्य शुभाशुभ-फलानि कस्यान्तर्गतानि भवन्ति?
उत्तरम्— कालान्तर्गतानि भवन्ति।

2. **प्रश्नः**— कालस्य अवयवाः के सन्ति?
उत्तरम्— होरा-दिन-मास-वर्षादयः सन्ति।

3. **प्रश्नः**— भारतीयमतानुसारं कति वाराः सन्ति?
उत्तरम्— सप्तवाराः सन्ति।

4. **प्रश्नः**— सप्तवाराणां क्रमः के सन्ति?
उत्तरम्—रविः, सोमः, मंगलः, बुधः, बृहस्पतिः, शुक्रः, शनिः।

5. **प्रश्नः**— ग्रहाणामवस्थितिक्रमेण वारक्रमः के भवन्ति?
उत्तरम्—शनिः, बृहस्पतिः, मंगलः, सूर्यः, शुक्रः, बुधः, चन्द्रमाश्च।

6. **प्रश्नः**— एकस्मिन् वारे कति होराः भवन्ति?
उत्तरम्— 24 चतुर्विंशतिमिताः होराः भवन्ति।

7. **प्रश्नः**— किमहोरात्रमुच्यते?
उत्तरम्— दिनं च रात्रिश्चाहोरात्रमित्युच्यते।

8. **प्रश्नः**— एका होरा कति घंटपरिमिता विद्यते?
उत्तरम्— एकघंटपरिमिता।

9. **प्रश्नः**— सौम्यसंज्ञका वाराः के सन्ति?
उत्तरम्— बृहस्पति-चन्द्र-बुध-शुक्राः सौम्यसंज्ञकाः सन्ति।

10. **प्रश्नः**— क्रूरसंज्ञकाः वाराः के सन्ति?
उत्तरम्— मंगल-रवि-शनिवासराः।

11. **प्रश्नः**—शुभकार्यसम्पादनं कस्मिन् वारे क्रियते?
उत्तरम्— सौम्यसंज्ञकवासरे।

12. **प्रश्नः**— स्थिरसंज्ञकः वारः कः?
उत्तरम्— रविवासरः।

13. **प्रश्नः**— चरसंज्ञकः वारः कः?
उत्तरम्— सोमवासरः।

14. **प्रश्नः**— उग्रसंज्ञकः वारः कः?
उत्तरम्— मंगलवासरः।

15. **प्रश्नः**— समसंज्ञकः वारः कः?
उत्तरम्— बुधवासरः।

16. **प्रश्नः**— लघुसंज्ञकः वारः कः?
उत्तरम्— गुरुवासरः।

17. **प्रश्नः**— मृदुसंज्ञकः वारः कः?
उत्तरम्— शुक्रवासरः।

18. **प्रश्नः**— तीक्ष्णसंज्ञको वारः कः?
उत्तरम्— शनिवासरः।

19. **प्रश्नः**— शल्यक्रियायाः कृते कः वार उत्तमः?
उत्तरम्—शनिवासरः उत्तमः मन्यते।

20. **प्रश्नः**— विद्यारम्भस्य कृते कः वारः प्रशस्तः?
उत्तरम्— गुरुवासरः।

21. **प्रश्नः**— वाणिज्यारम्भस्य कृते कः वारः प्रशस्तः?
उत्तरम्— बुधवासरः।

22. **प्रश्नः**—कालात्मकं शास्त्रं किमस्ति?
उत्तरम्— ज्योतिषशास्त्रम्।

23. **प्रश्नः**—उपपन्नं होरेशा: का भवति?
उत्तरम्— सूर्यतनयादिति।

24. **प्रश्नः**—कः वारेशः भवति?
उत्तरम्— वारेशविचारे यः प्रथमहोरेशः।

25. **प्रश्नः**—कः वर्षेशः भवति?
उत्तरम्— वर्षेशविचारे वर्षारम्भदिने यः।

26. **प्रश्नः**—शनैश्चरात् अधोऽधः कक्षाक्रमेण चतुर्था ग्रहाः के भवन्ति?
उत्तरम्— वारेशाः भवन्ति।

27. **प्रश्नः**—कियन्ति दिनानि भवन्ति?
उत्तरम्— सप्त दिनानि।

28. **प्रश्नः**—एकस्मिन् वत्सरे कति मासाः भवन्ति?
उत्तरम्— द्वादशमासाः।

29. **प्रश्नः**— एकस्मिन् मासे कति पक्षाः भवन्ति?
उत्तरम्— द्वौ।

30. **प्रश्नः**—एकस्मिन् वत्सरे कियन्ति दिनानि भवन्ति?
उत्तरम्— पञ्चषष्ट्युत्तरत्रिंशतम्।

31. **प्रश्नः**— कियन्त्यः ऋतवः भवन्ति?
उत्तरम्— षड्ऋतवः।

32. **प्रश्नः**— करणानि कियन्ति भवन्ति?
उत्तरम्—एकादश।

33. **प्रश्नः**— रविवारस्य अधिपतिः को भवति?
उत्तरम्— सूर्यः।

34. **प्रश्नः**— सोमवारस्य अधिपतिः को भवति?
उत्तरम्— चन्द्रः।

35. **प्रश्नः**— मंगलवारस्य अधिपतिः को भवति?
उत्तरम्— गणेशः।

36. **प्रश्नः**— बुधवारस्य स्वामी कोऽस्ति?
उत्तरम्— चन्द्रपुत्रो बुधः।

37. **प्रश्नः**— गुरुवारस्य स्वामी को वर्तते?
उत्तरम्— देवगुरुबृहस्पतिः।

38. **प्रश्नः**— शुक्रवारस्य अधिपतिः को भवति?
उत्तरम्— दैत्यगुरुः शुक्राचार्यः।

39. **प्रश्नः**— शनिवारस्य स्वामी को वर्तते?
उत्तरम्— शनिश्चरः।

(V-C-73) 12. ग्रहणयोः सामान्यपरिचयः– एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

12. ग्रहणयोः सामान्यपरिचयः–गृह्यतेऽनेनेति व्युत्पत्त्या ग्राहकं यदा ग्राह्यं वस्तु गृह्णाति तदा ग्रहणम्। सिद्धान्तज्योतिषे छाद्यछादकयोरन्तराभावत्वं नाम ग्रहणम्। तत्र ग्राह्यग्राहकयोः पूर्वापरयाम्योत्तरान्तराभावे एव ग्रहणं सम्भवति। ग्रहणं पूर्णिमायाममावास्यायां वा भवति। परन्तु सर्वदा पूर्णिमान्ते अमान्ते वा भवति, तदैव भवति यदा ग्राह्यग्राहकयोः पूर्वापरान्तराभावो याम्योत्तरान्तराभावश्च भवति। तदुक्तं सूर्यसिद्धान्ते–

भानोभार्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा।
शशाङ्कपाते ग्रहणं कियद्भागाधिकोनके॥
(सू.सि.)

अर्थात् सूर्यतः राशिषट्कान्तरे पृथिव्याश्छाया (भूभा) तथा च तया ग्रहो च्छाद्यया समे अर्कसमे वा कियद्भागाधिकोनकं शशाङ्कपाते ग्रहणं सम्भवति। अत्र कियद्भागाधिकोनके इत्यस्मिन् वाक्ये कियत् शब्दः किञ्चिदित्यर्थस्य ज्ञापकः। साधारणतः ग्रहणं मुख्यतया सूर्यचन्द्रभेदाद् द्विविधम्। 1.

सूर्यग्रहणम्, 2. चन्द्रग्रहणञ्च। उभयोः ग्रहणयोः पञ्चावयवाः सन्ति। यथा–स्पर्शः, उन्मीलनं, मध्यग्रहणं, सम्मीलनं, मोक्षश्चेति। सूर्यग्रहणे छाद्यः सूर्यः छादकः चन्द्रः, चन्द्रग्रहणे च छाद्यः चन्द्रः छादिका भूभा (राहुसंज्ञिका)। उक्तञ्च– **"छादयत्यर्कमिन्दुं विधुं भूभिभा"**। **"इन्द्वाल्पांशा सम्भवश्चेद्ग्रहस्य"** इत्यादिवचनात् अमान्ते सपादसूर्यस्य भुजांशाः चतुर्दश (14) अंशाल्यूने सति सूर्यग्रहणं पूर्णान्ते च **"किंयद् भागाधिकोनके"** इति आर्षवचनात् एकादशांशादल्पे सति चन्द्रग्रहणम्। चन्द्रग्रहणे स्पर्शः पूर्वस्यां पश्चान्मोक्षः सूर्यग्रहणे च पश्चात् स्पर्शः पूर्वे मोक्षः। ग्रहणे स्पर्शकालान्मोक्षावधिस्थितिसंज्ञकः, सम्मीलनादुन्मीलनं यावत् मर्दसंज्ञकः कालः। छाद्यः यावन्मितं ग्रस्यते तद्ग्रासः। ग्रहणञ्च खण्डपूर्णवलयखग्रासभेदाच्चतुर्विधम्। तिथ्यन्तकाले एव मध्यग्रहणम् भवति। सूर्यग्रहणे लम्बनत्योश्च विशेषसंस्कारः क्रियते। दिगिति ग्रहणसामान्यपरिचयः।

चन्द्रग्रहणम्–चन्द्रग्रहणे ग्राह्यश्चन्द्रः ग्राहकश्च राहुसंज्ञया प्रसिद्धा भूच्छाया (भूभा) कथ्यते। चन्द्रस्य स्वतः प्रकाशः नास्ति। सः सूर्यस्य प्रकाशेन प्रकाशितो भवति। चन्द्रः स्वगत्या स्वकक्षायां पूर्वाभिमुखो गच्छन् भूच्छायायां प्रविशति। तदा सा भूच्छाया चन्द्रस्य आच्छादिका भवति। यदा भूभां चन्द्रः स्पृशति तदा चन्द्रग्रहणस्य स्पर्शकालः प्रारभ्यते। यदा चन्द्रस्य अर्धभागः भूच्छायया आच्छादितो भवति तदा चन्द्रग्रहणस्य सम्मीलनकालः। यदा पुनः चन्द्रः सम्पूर्णतया भूभायां प्रविशति तदा केन्द्रयोगेन चन्द्रग्रहणः मध्यः। यदा च भूच्छायया चन्द्रः अर्धमुक्तः भवति तदोन्मीलनकालः। यदा चन्द्रः सम्पूर्णमुक्तस्तदा मोक्षकालः। तदुक्तम्–**"भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ"** इति।

सूर्यग्रहणम्–सूर्यात् षड्राश्याभ्यन्तरे चन्द्रः यदा भवति तदा पूर्णिमान्तकालः। अस्मिन् ग्रहणे भास्करस्य छादकः चन्द्रो भवति। एतेन यथा मेघाच्छन्नो रविः क्वचिच्छन्नः क्वचिद् दृश्यश्च तथैव भिन्नकक्षास्थेन इन्दुनाऽऽच्छादितः सूर्यः क्वचिदाच्छादितः क्वचिद् दृश्य एव अतस्तदा सूर्यग्रहणम्। सूर्यग्रहणं न सार्वभौममस्ति। सूर्यपृथिव्योर्मध्यभागे यदा चन्द्रः आगच्छति तदा चन्द्रस्य छाया पृथिव्यां पतति। तदुक्तं सूर्यग्रहणविषये सूर्यसिद्धान्ते–**"छादको भास्करस्येन्दुरधःस्थो घनवद् भवेदिति"**।

(1) चित्रं चन्द्रग्रहणम्–



(2) चित्रं सूर्यग्रहणम्- स्पर्शः



ग्रहणविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— ग्रहणशब्दस्य का व्युत्पत्तिः?
   उत्तरम्— गृह्यते स्वाश्रयाभिमुखमाकृष्यतेऽनेनेति।
2. **प्रश्नः**— ज्योतिषशास्त्रे ग्रहणस्य का परिभाषा?
   उत्तरम्—छाद्यछादकयोरन्तराभावत्वं नाम ग्रहणम्।
3. **प्रश्नः**— ग्रहणं कतिविधम्?
   उत्तरम्— द्विविधम्।
4. **प्रश्नः**— कौ ग्रहणौ भवतः?
   उत्तरम्— सूर्यचन्द्रौ।
5. **प्रश्नः**— सूर्यग्रहणं कदा भवति?
   उत्तरम्— अमावास्यायाम्।
6. **प्रश्नः**— चन्द्रग्रहणं कदा भवति?
   उत्तरम्— पूर्णिमायाम्।
7. **प्रश्नः**— ग्रहणयोः कति अवयवाः सन्ति?
   उत्तरम्— पञ्चावयवाः सन्ति।
8. **प्रश्नः**— के सन्ति पञ्च ग्रहणावयवाः?
   उत्तरम्—स्पर्श, उन्मीलनं, मध्यग्रहणं, सम्मीलनं, मोक्षश्चेति।
9. **प्रश्नः**— ग्रहणस्य स्पर्शरूपावयवः कदा भवति?
   उत्तरम्— यदा ग्राहकवस्तु ग्राह्यं स्पृशति।
10. **प्रश्नः**— ग्रहणस्य सम्मीलनकालः कदा भवति?
    उत्तरम्—ग्राह्यवस्तुनः अर्धभागः यदा ग्राहकमध्ये प्रविशति।
11. **प्रश्नः**— ग्रहणस्य मध्यग्रहणं कदा भवति?
    उत्तरम्—ग्राह्यग्राहकयोः केन्द्रयोगः मध्यग्रहणम्।
12. **प्रश्नः**— ग्रहणस्य उन्मीलनं कदा भवति?
    उत्तरम्—ग्राह्यविम्बस्य मोक्षकालारम्भकालः उन्मीलनम्।
13. **प्रश्नः**— ग्रहणस्य मोक्षं कदा भवति?
    उत्तरम्— ग्राहकात् ग्राह्यवस्तुनः सम्पूर्णमुक्तिः मोक्षम्।
14. **प्रश्नः**—चन्द्रग्रहणे स्पर्शः मोक्षश्च कस्मिन् कपाले भवति?
    उत्तरम्— पूर्वकपाले स्पर्शः, पश्चिमे मोक्षः।
15. **प्रश्नः**—सूर्यग्रहणे स्पर्शः मोक्षश्च कस्मिन् कपाले भवति?
    उत्तरम्— पश्चिमे स्पर्शः, पूर्वे मोक्षः।
16. **प्रश्नः**—स्वतः प्रकाशहीनः चन्द्रः कस्य प्रकाशेन प्रकाशितो भवति?
    उत्तरम्— सूर्यस्य।
17. **प्रश्नः**—चन्द्रः स्वगत्या स्वकक्षायां पूर्वभिमुखो गच्छन् कस्यां छायायां प्रविशति?
    उत्तरम्— भूच्छायायाम्।
18. **प्रश्नः**—सूर्यग्रहणे भास्करस्य छादकः कः?
    उत्तरम्— चन्द्रः।
19. **प्रश्नः**—सूर्यात् षड्राश्याभ्यन्तरे चन्द्रः यदा भवति तदा कः कालः?
    उत्तरम्— पूर्णिमान्तकालः।
20. **प्रश्नः**—सूर्यग्रहणे भास्करस्य छादकः कः भवति?
    उत्तरम्— चन्द्रः।
21. **प्रश्नः**—भिन्नकक्षास्थेन इन्दुनाऽऽच्छादितः सूर्यः क्वचिदाच्छादितः क्वचिद् दृश्य एव किं भवति?
    उत्तरम्— सूर्यग्रहणम्।
22. **प्रश्नः**—सूर्यग्रहणविषये सूर्यसिद्धान्ते किं परिभाषितम्?
    उत्तरम्—"छादको भास्करस्येन्दुरधःस्थो घनवद् भवेदिति"।

(V-C-73) 13. अहर्गणोपपत्तिः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

13. अहर्गणोपपत्तिः–

(क) सामान्यपरिचयः–अह्नां दिनानां समूहोऽहर्गणः। स च सौरचान्द्रनाक्षत्रसावनभेदाच्चतुर्विधः, तत्र सौरचान्द्रनाक्षत्रादीनां क्रदादिः कदा च पूर्तिरिति प्रत्यक्षाभावात् सावनदिनस्य च "उदयादुदयं भानोर्भूमिसावनवासरः" इति परिभाषया तस्य प्रत्यक्षतयावलोकनात् सावनाहर्गण एव सिद्धान्तग्रन्थेषु प्रतिपाद्यते।

वर्तमानदिने ग्रहाणां स्थितिमिति ज्ञानार्थमहर्गणसाधनमावश्यकम्। यतो हि कल्पदिनेर्युगदिने वा ग्रहाणामेते कल्पभगणाः युगभगणा वा तदा वर्तमानदिनसंख्यया किमिति

ग्रहाणां स्थितिमिति ज्ञानाय त्रैराशिकानुपातेऽस्मिन् अहर्गणः प्रयुज्यते, तद्यथा–

$$\frac{\text{कल्पग्रहभगण} \times \text{अहर्गण}}{\text{कल्पदिन}} = \text{भगणादिर्मध्यमो ग्रहः।}$$

(ख) अहर्गणसाधनोपपत्तिः विधिश्च–अहर्गण-साधनमपि सिद्धान्तग्रन्थेषु सृष्ट्यादितः तन्त्रेषु युगादितः करणग्रन्थेषु च इष्टशकादितः क्रियते। अहर्गणानयनविधिः सूर्यसिद्धान्ते हि–

अत ऊर्ध्वमयी युक्ता गतकालाब्दसंख्यया।
मासीकृता युता मासैर्मधुशुक्लादिभिर्गतैः।।
पृथक्स्थास्तेऽधिमासघ्नाः सूर्यमासविभाजिताः।
लब्धाधिमासकैर्युक्ता दिनीकृत्य दिनान्विताः।।
द्विष्ठास्तिथिक्षयाभ्यस्ताश्चान्द्रवासरभाजिताः।
लब्धोन रात्रिरहिता लङ्कायामार्धरात्रिकः।।
सावनो द्युगण.................................।।

यस्य दिनस्याहर्गणाभीष्टः ततः पूर्वगतानां सौरवर्षाणां योगः कर्तव्यः, यथा साम्प्रतिकोऽहर्गणोऽभीष्टश्चेत् (खचतुष्क-यमाद्रयग्निशररन्ध्रनिशाकराः) गतसौरवर्षाणां कृतत्रेताद्वापर-युगाणां सम्पूर्णसौरवर्षसंख्या गतकलिवर्षाणि च योजनीयानि तदा गतसौरवर्षाणि भवन्ति। मासैर्द्वादशभिर्वर्षमित्यादिना द्वादशभिर्गुणितानि अभीष्टवर्षादौ मेषसंक्रान्तिदिनावधिका सौरमासाः भवन्ति। तेषु चैत्रादिगतचान्द्रमासतुल्याः सौरमासाः योज्यन्ते तदा तेऽभीष्टसङ्क्रान्त्यवधिकाः सौरमासाः भवन्ति, अत्र दर्शाग्रतः सङ्क्रमकालतः प्राक् सदैव तिष्ठत्यधिमासशेषमिति भास्करवचनात् आगताः सौरमासाः दर्शाग्रसंक्रान्तिकालयोरन्तर्वर्तिनाधिमासशेषेणाधिकाः भवन्ति। अत एव इष्टाधिमासानयने अधिशेषस्य त्यागः क्रियते पूर्वमेव अधिमासरूपकालस्य सौरमासे एव निहितत्वात्। उक्तञ्च भास्करेण शिरोमणौ–

यतोऽधिशेषोत्थदिनाधिकास्ते
त्यक्तं तदस्मादधिमासशेषम्।

सम्प्रति सौरजातीयमासानां चान्द्रीकरणार्थं अधिमासज्ञानाय अनुपातः क्रियते यद्यदि युगीयसौरमासैः युगाधिमासाः तदेष्टसौरमासैः किमिति इष्टाधिमासाः। तद्यथा अनुपातः–

$$\frac{\text{युगाधिमासा} \times \text{इष्टसौरमास}}{\text{युगसौरमास}} = \text{इष्टाधिमास।}$$

असंक्रान्तिमासोऽधिमासः इत्यादिना चान्द्रसौरयोरन्तररूपाः अधिमासाः, अतः सौरादिमासयोर्योगेन अभीष्टसंक्रान्तिकालिकाः गतचान्द्रमासाः भवन्ति। अधिमासानयने वर्षादिरभीष्टमासं यावत् कश्चिदधिमासो पतितः गणितेन न लभ्यते, गणितेन लभ्यते चेत् न पतितस्तदाधिमासैः सैकः निरेको वा कर्तव्यः इति। भास्करः–"स्पष्टोऽधिमासो पतितोऽप्यलब्धो यदा यदा वा पतितोऽप्यलब्धः। सैकैर्निरैकैः क्रमशोऽधिमासैस्तदा दिनौघः सुधिया प्रसाध्य"।। सम्प्रति आगतानां चान्द्रमासानां "त्रिंशता तिथिभिर्मासः" इति सिद्धान्तेन चान्द्रमासाः त्रिंशद्भिर्गुण्यन्ते तदा दर्शान्ते चान्द्रदिवसाः भवेयुः। एषु दर्शान्तादिष्टदिनावधिका गततिथयः योज्यन्ते तदा अभीष्टावधिकागततिथयः भवन्ति। एतेषां चान्द्रजातीयतिथीनां सावनकरणार्थमनुपातः विधीयते यद्यदि युगचान्द्रतिथिभिः पठितावमदिनानि तदा इष्टचान्द्रदिनैकमिति इष्टावमाः लभ्यन्ते; तद्यथानुपातः–

$$\frac{\text{युगीयावमदिन} + \text{इष्टचान्द्रदिन}}{\text{युगीयचान्द्रदिन}} = \frac{\text{इष्टावम+अवमशेष}}{\text{शु.चा.दि.}}$$

अत्रापि सावनचान्द्रयोरन्तररूपः अवमः, एतस्मात् शेषाणां त्यागः नो चेत् शेषाणां चान्द्रदिनाद्विशोधनेन तिथ्यन्त कालिकोऽहर्गणो भवेत्, अभीष्टस्तु सूर्योदयकालिकः सावनः अत एवोक्तं तिथ्यन्तसूर्योदययोस्तु मध्ये सदैव तिष्ठत्यवमावशेषम्"। अतः लब्धितुल्यरवमैरेव रहितोऽभीष्टो सावनाहर्गणः भवति। इत्थं चान्द्रतिथिभ्यः प्राप्तक्षयतिथयः विशोध्यन्ते तदा अभीष्टार्कोदयकाले सावनाहर्गणो जायते इति। अहर्गणोऽयं लङ्कायाः मध्यरात्रकालिकः अर्थात् यमकोटेरुदयकालिको भवति अहर्गणस्य शुद्धाशुद्धत्वे सप्तभिर्तष्टते सति शेषाः क्रमेण सैके निरेके वा रविवासरादयः भवन्तीति विज्ञेयम्। "अभीष्टवारार्थमहर्गणश्चेत् सैको निरेकस्तिथयोऽपि तद्वत्।" भास्कराचार्येण तु उदयान्तरसंस्कारेण मध्यमाहर्गणात् स्पष्टहर्गणः साधितः। इत्थं सिद्धान्तज्योतिषे अहर्गणसाधनं विधीयते इति यथामति विविच्य विरम्यते विस्तरेण।

(ग) भूपरिधिसाधनम्–भूमेः परिधिः भूपरिधिः भूपरिधेः प्रयोगः देशान्तरज्ञानाय भवति, वस्तुतस्तु प्रत्येकस्य भूपृष्ठस्थस्थानस्य भिन्ना-भिन्ना परिधिः भवति, तद्वशादेव तत्स्थानस्य अन्येऽवयवाः साध्यन्ते। ज्योतिषे मध्यमभूपरिधिः विधाय ततः लम्बज्यावशात् त्रैराशिकानुपातेन स्पष्ट भूपरिधिः साध्यते, तत्र मध्यमभूपरिधिर्नामभूमध्यगतं नाडिकावृत्तम्। तद्यथोक्तमस्ति–

भूपृष्ठीय-ध्रुवस्थानात् खाङ्काशैर्वृत्तमुच्यते।
भूपृष्ठे नाडिकावृत्तं मध्यमभूपरिधिस्तथा।।

योजनमानेषु प्राचीनाचार्यैः भूपरिधेः निरूपणं कृतम्। भास्करेण शिरोमणौ 4967 योजनानि भूपरिधिमानं स्वीकृतम्। उक्तञ्च–

प्रोक्तो योजनसंख्यया कुपरिधिः सप्ताङ्गनन्दाब्धयः।

अत्र भास्करेण व्यासमानं 1581 योजनं स्वीकृतम्–

"तद्व्यासः कुभुजङ्गसायकभुवोऽथ प्रोच्यते——"

ज्ञाते व्यासे सति सूक्ष्मपरिधिज्ञानाय सूत्रमिदं भास्करेण प्रोक्तं लीलावत्यां यत्–

"व्यासे भनन्दाग्निहते विभक्ते खबाणसूर्यैः परिधिः स सूक्ष्मः"। द्वाविंशतिघ्ने विहृतेऽथ शैले स्थूलोऽथवा स्याद् व्यवहारयोग्यः।

एतेन मध्यम स्थूलपरिधिः $= \frac{22}{7} \times$ व्यास। सूक्ष्मपरिधिः

$$\frac{3927 \times \text{व्यास}}{1250} = \sqrt{10 \times \text{भूव्यास}^2}$$

सूर्यसिद्धान्ते भूव्यासः 1600 योजनानि स्वीकृतानि तेन पूर्वोक्तरीत्या भूपरिधिः $= \sqrt{1600^2 \times 10} = 5060$ योजनासनो भवति। उक्तञ्च सूर्यसिद्धान्ते–

योजनानि शतान्यष्टौ भूकर्णो द्विगुणानि तु। तद्वर्गतो दशगुणात् पदं भूपरिधिर्भवेत्।।

केतकीग्रहगणिते हि केतकाचार्येण भूपरिधिमानं 2500 योजनतुल्यं भूपरिधिमानं स्वीकृतम्। उक्तञ्च–

"शून्याभ्रतत्वोन्मितयोजनानि विनिश्चितं भूपरिधेः प्रमाणम्"

भूपरिधिसाधनोपपत्तिः–प्राचीनाचार्यैः परिधिपरिधि-सम्बन्धं व्यासव्याससम्बन्धञ्च समं विज्ञाय (प:प:व्या:व्या) यदि द्विघ्नत्रिज्यामिते व्यासे परिधिमानं चक्रकलायोजनानि तदा भूव्यासे किमित्यनुपातेन भूपरिधियोजनानि। तद्यथानुपातः–

$$\frac{21600 \times \text{भूव्यासः}}{6876} = \text{भूपरिधिः} = 3/8/34 \times \text{भूव्यासः।}$$

पक्षौ वर्गितौ सति, $\text{भूप}^2 = (9/52/55) \times \text{भूव्या}^2$

$\text{भूप}^2 = 10 \times \text{भूव्या}^2$. $\therefore$ $\text{भूप} = \sqrt{10 \times \text{व्या}^2}$

इत्युपपन्नं सूर्यसिद्धान्तोक्तं "तद्वर्गतो दशगुणात् पदं भूपरिधिर्भवेदिति।

ननु स्पष्टपरिधिज्ञानार्थं लम्बांशेन (लम्बज्य) अनुपातः क्रियते यतो हि ध्रुवात् खमध्यावधि ध्रुवप्रोते लम्बांशाः, तस्य ज्या लम्बज्या, तेन ध्रुवस्थानात् त्रिज्यया निर्मित वृत्तं लम्बांशमितस्वकीया भूपरिधिः। उक्तञ्च–

ध्रुवाल्लम्बांशकैर्वृत्तं स्फुटो भूपरिधिः स्वकः।

अतोऽत्र अनुपातः क्रियते स्पष्टभूपरिधिज्ञानाय यत् यदि त्रिज्यया मध्यमभूपरिधिः तर्हि इष्टस्थानीयलमवज्यया किमिति स्फुटभूपरिध्यंशाः

$$\frac{\text{मध्यमभूपरिधिः} \times \text{लम्बज्या}}{\text{त्रिज्या}} = \text{स्प० भूपरिधिः।}$$

अत उपपन्नं सूर्यसिद्धान्तोक्तम्–

लम्बज्याघ्नस्त्रिजीवाप्तः स्फुटो भूपरिधिः स्वकः।

भास्कराचार्योपि–

"लम्बज्यागुणितो भवेत्कुपरिधिः स्पष्टस्त्रिभज्या हतो।"

ज्ञानम्–भास्कराचार्येण एकयाम्योत्तररेखास्थ-स्थानद्वयस्यान्तरालेन योजनमानं अक्षांशञ्च विज्ञाय अनुपातः कृतः यदि स्थानद्वयाक्षांशान्तरेण स्थानद्वयान्तरालयोजनानि लभ्यन्ते तदा चक्रांशै 360 अंशैः किमिति, तेन भूपरिधेः ज्ञानं जायते इति। उक्तञ्च–

"पुरान्तरं चेदिदमुत्तरं स्यात्तदक्षविश्लेषलवैस्तदा किम्। चक्रांशकैरित्यनुपातयुक्त्या युक्तं निरुक्तं परिधेः प्रमाणम्।।

दिगिति। यद्वा विषुकः 12:: लंज्याः स्प-परिधिः अतः–

$$\frac{12 \times \text{लम्बज्या}}{\text{विषुक}} = \text{स्पष्टपरिधिः भवति।}$$

भास्करेण हि–"यद्वा द्वादशसगुणः स विषुवत्कर्णेन भक्तः स्फुटः।"

आर्यभट्टेन नृषि योजनमिला इत्यनेन भूव्यासः1050 स्वीकृतम्।

अहर्गणविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— अहर्गणशब्दस्य का व्युत्पत्तिः?
   उत्तरम्— अह्नां दिनानां समूहोऽहर्गणः।

2. **प्रश्नः**— अहर्गणः कतिविधः के च ते?
उत्तरम्— चतुर्विधः, सौर-चान्द्र-नाक्षत्र-सावनभेदाच्च।

3. **प्रश्नः**—प्रत्यक्षतयावबोधनाय सिद्धान्तग्रन्थेषु कः प्रतिपाद्यते?
उत्तरम्— सावनाहर्गणः।

4. **प्रश्नः**—अहर्गणसाधनं कथं आवश्यकम्?
उत्तरम्— वर्तमानदिने ग्रहाणां स्थितिमिति ज्ञानार्थम्।

5. **प्रश्नः**— सौरमासानां व्यवहारः कदा भवति?
उत्तरम्— विवाहादौ।

6. **प्रश्नः**— सावनमासानां व्यवहारः कदा भवति?
उत्तरम्— यज्ञादौ।

7. **प्रश्नः**— चान्द्रमासानां व्यवहारः कस्मिन् कार्ये भवति?
उत्तरम्— पैत्र्यादिकार्ये।

8. **प्रश्नः**— नाक्षत्रमासानां प्रयोजनं कस्मिन् कार्ये भवति?
उत्तरम्— नक्षत्रव्रते।

9. **प्रश्नः**— सौरमासस्य प्रवृत्तिः कदा भवति?
उत्तरम्— रविसंक्रान्तितः।

10. **प्रश्नः**— सावनमासस्य प्रवृत्तिः कदा भवति?
उत्तरम्— उदयावधिः।

11. **प्रश्नः**— नाक्षत्रमासस्य प्रवृत्तिः कदा भवति?
उत्तरम्— इन्दोः भ्रमणात्।

12. **प्रश्नः**— सौरमासे कियन्ति दिनानि जायन्ते?
उत्तरम्— 30

13. **प्रश्नः**— सावनमासे कियन्ति दिनानि जायन्ते?
उत्तरम्— 30. 5

14. **प्रश्नः**— चान्द्रमासे कियन्ति दिनानि जायन्ते?
उत्तरम्— 31

15. **प्रश्नः**— नाक्षत्रमासे कियन्ति दिनानि जायन्ते?
उत्तरम्— 30. 58।

16. **प्रश्नः**—पञ्चसंवत्सरात्मके एकस्मिन् युगे रविवर्षाणि भवन्ति?
उत्तरम्— पञ्च।

17. **प्रश्नः**—पञ्चसंवत्सरात्मके एकस्मिन् युगे सौरमासाः भवन्ति?
उत्तरम्— षष्टिः।

18. **प्रश्नः**—पञ्चसंवत्सरात्मके एकस्मिन् युगे नाक्षत्रमासाः भवन्ति?
उत्तरम्— सप्तषष्टिः।

19. **प्रश्नः**— पञ्चसंवत्सरात्मके एकस्मिन् युगे सौरदिनानि भवन्ति?
उत्तरम्— अष्टादशशत।

20. **प्रश्नः**— पञ्चसंवत्सरात्मके एकस्मिन् युगे चान्द्रमासाः भवन्ति?
उत्तरम्— द्विषष्टिः।

21. **प्रश्नः**— पञ्चसंवत्सरात्मके एकस्मिन् युगे चान्द्रदिनानि भवन्ति?
उत्तरम्— षष्ट्यधिकाष्टादशशत।

22. **प्रश्नः**— पञ्चसंवत्सरात्मके एकस्मिन् युगे सावनमासाः भवन्ति?
उत्तरम्— एकषष्टिः।

23. **प्रश्नः**—पञ्चसम्बत्सरात्मके एकस्मिन् युगे भभ्रमा वा नक्षत्रोदयाः भवन्ति?
उत्तरम्— पञ्चत्रिंशदधिकाष्टादशशत।

24. **प्रश्नः**—पञ्चसंवत्सरात्मके एकस्मिन् युगे चान्द्र-सावनदिनानि भवन्ति?
उत्तरम्— अष्टषष्ट्यधिकाष्टादशशत।

25. **प्रश्नः**— एकस्मिन् सौरवर्षे सावनदिनानि भवन्ति?
उत्तरम्— षट्षष्ट्यधिकत्रिंशत्।

26. **प्रश्नः**— एकस्मिन् सौरवर्षे चान्द्रदिनानि भवन्ति?
उत्तरम्— द्विसप्तत्यधिकत्रिंशत्।

27. **प्रश्नः**— एकस्मिन् सौरवर्षे नक्षत्रोदयाः (नाक्षत्रदिनानि) भवन्ति?
उत्तरम्— सप्तषष्ट्यधिकशतत्रयम्।

28. **प्रश्नः**—एकस्मादयनाद् द्वितीयायनपर्यन्तं सौरदिनानि भवन्ति?
उत्तरम्— 180 अशीत्यधिकशतम्।

29. **प्रश्नः**—आर्यभट्टेन नृषियोजनं निला इत्यनेन भूव्यासः कियत् स्वीकृतम्?
उत्तरम्— 1050।

30. **प्रश्नः**—केतकीग्रहगणिते हि केतकराचार्येण कियत् भूपरिधिमानं स्वीकृतम्?
उत्तरम्— 2500 योजनतुल्यम्।

31. **प्रश्नः**—उदयादुदयं भानोः इति किं दिनमुच्यते?
उत्तरम्— सावनम्।

32. **प्रश्नः**—अह्नानां दिनानां गणः समूहो किं भवति?
उत्तरम्— अहर्गणः।

33. **प्रश्नः**— कतिविधमामाः भवन्ति?
उत्तरम्— चतुर्विधः।

34. **प्रश्नः**—सौरचान्द्रयोरन्तरमधिदिनानि चान्द्रसावनयोरन्तरं किं कथ्यन्ते?
उत्तरम्— क्षयदिनानि।

35. **प्रश्नः**—इनोदयद्वयान्तरं तदर्क-किं मतम्?
उत्तरम्— सावनम्।

(V-C-73) (14) देशान्तरसंस्कारः तत्साधनञ्च एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) देशान्तरपरिचयः स्वरूपञ्च–देशयोः अन्तरं देशान्तरमिति व्युत्पत्त्या अत्र कयोः देशयोः? इत्यत्र रेखादेशस्वदेशयोः पूर्वापरमन्तरं देशान्तरपदेनाभिधीयते। देशान्तरं नाम रेखादेशस्वदेशयोः पूर्वापरं योजनात्मक-मन्तरमर्थाद्रेखादेशात् प्राच्यां प्रतीच्यां वा यावद्भिः योजनैः स्वदेशो भवति, तावदेव योजनात्मकं देशान्तरमिति, तत्सम्बन्धिचालन फलं देशान्तरफलं भवति। लङ्कार्धरात्रिकानां ग्रहाणां स्वदेशीय- अर्धरात्रिकालिककरणार्थं देशान्तर-संस्कारः आवश्यको भवति।

ननु रेखादेशस्वदेशयोरन्तररूपं देशान्तरमतः रेखादेशः कः, कश्च स्वदेशः इति जिज्ञासायामुच्यते यत्सूत्रं लङ्कादितः उज्जयिनीकुरुक्षेत्रादिदेशान् स्पृशन् मेरुद्वयगतं भवति, तत्सूत्रं "मध्यरेखा" इति संज्ञया व्यवह्रीयते तद्गतानां देशानां च संज्ञा रेखादेशाः इति। उक्तञ्च भास्करेण–

यल्लङ्कोज्जयिनी पुरोपरि कुरुक्षेत्रादिदेशान् स्पृशत्।
सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः।।
(सि०शि०गणिता)

एवमेव सौरसिद्धान्तेऽपि–

राक्षसालयदेवौकः शैलयोर्मध्यसूत्रगाः,
रोहीतकमवन्ती च यथा सन्निहितं सरः।
(सू०सि०मध्यमाधि.62)

स्वदेशश्च यो यत्र तिष्ठति तत्तस्य पृष्ठस्थानं स्वदेशं वेत्युच्यते, तद्यथा–भूमौ तिष्ठति यो यत्र पृष्ठस्थानं तदुच्यते। स्वदेशोऽपि स एवास्य—अनयोरन्तरमेव देशान्तरमिति दिक्।

(ख) देशान्तरसाधनम्–ज्योतिषे चन्द्रग्रहणे स्पर्शादि-सकलस्थितिदर्शनं सर्वत्र युगपदेव भवतीत्यस्माद्धेतोः चन्द्रग्रहणाद्देशान्तरज्ञानं विधीयते। तत्र सर्वप्रथमं ग्रहगणितपद्धत्या चन्द्रग्रहणस्य सम्मीलनोन्मीलनकालौ साध्यौ। अथ च प्रत्यक्षदृष्ट्यापि सम्मीलनोन्मीलनकालौ ज्ञातव्यौ। अथात्र यदि दृष्ट्युपलब्ध उन्मीलनकालः गणितागताद् उन्मीलनकालादधिकः अर्थात् गणितकालं अतिक्रम्यः उन्मीलनकालः दृष्टिगतो भवति तदा स्वदेशः रेखादेशात् प्राच्यामेव, यतो हि तत्र रेखादेशात्पूर्वमेवार्कोदयः, तथा च अर्कोदयादेवेष्टकालस्य प्रवृत्तिः, तस्मात् रेखादेशोन्मीलनात् सम्मीलनाद्वा स्वदेशीयसम्मीलनोन्मीलनो वा कालोऽधिक एव।

अथ च यदि गणितागतं सम्मीलनोन्मीलनकालं अनतिक्रम्य अर्थात् साधितकालात्पूर्वमेव दृष्ट्युपलब्धः सम्मीलनोऽन्मीलनौ भवतः तदा स्वदेशः रेखादेशात् प्रतीच्यामवगन्तव्यः, यतो हि तत्र रेखादेशात् पश्चादर्कोदयेन इष्टकालप्रवृत्तिः पश्चाद् भवति, तस्माद् स्वदेशीयः कालः अल्प एवेति गोलविदां स्फुटमेव, अतः–

गणितागतकालः<दृष्टिगतकालः = प्राग्देशान्तरम्।

गणितागतकालः>दृष्टिगतकालः = पश्चाद्देशान्तरम्।

अत्रोभयोः प्रत्यक्षगणितयोर्मध्ये यदन्तरं तदेव देशान्तरमिति। तद्यथा सूर्यसिद्धान्ते–

अतीत्योन्मीलनादिन्दोर्द्वस्सिद्धिर्गणितागतात्।
यदा भवेत्तदा प्राच्यां स्वस्थानं मध्यतो भवेत्।
अप्राप्य च भवेत् पश्चादेवं वापि निमीलनात्।।
(सू.सि.मध्या)

अथ पूर्वापरात्मकदेशान्कालो विज्ञाय देशान्तरनाडी-योजनज्ञानार्थमनुपातः क्रियते यद्यदि षष्टिघटिभिः स्पष्टभूपरिधियोजनानि तदा देशान्तरनाडीभिः किमिति तेन स्पष्टभूपरिधौ रेखादेशीयस्वदेशान्तरयोजनानि। तद्यथा–

$\frac{\text{स्पष्टभूपरिधियोजन} \times \text{देशान्तरनाडी}}{60}$ = देशान्तरयोजन।

इत्थमुपपद्यते–

तयोरन्तरनाडीभिर्हन्याद् भूपरिधिं स्फुटम्।
षष्ट्या विभज्य लब्धेस्तु योजनैः प्रागथापरैः॥

पुनश्च योजनात्मकदेशान्तरं कलात्मकं करणार्थमनुपातः क्रियते यद्यदि स्पष्टभूपरिधियोजनैर्ग्रहगतिकलाः तदेष्ट-देशान्तरयोजनैः केति कलात्मकं देशान्तरमायाति तद्यथा अनुपातः–

$\frac{\text{ग्र.ग.क.} \times \text{दे.अं.यो.}}{\text{स्प.भू.यो.}}$ = कलात्मकदेशान्तरम्। अत उपपद्यते–

लम्बज्यार्घ्नत्रिजीवाप्तः स्फुटो भूपरिधिः स्वकः।
तेन देशान्तराभ्यस्ता ग्रहभुक्तिर्विभाजिता॥
कलादि तत्फलं..............................।

ग्रहलाघवे गणेशदैवज्ञेन तु रेखादेशात् योजनात्मकमन्तरं विधाय षड्भिर्विभक्ते देशान्तरघटिकाः भवन्ति, तद्यथा–

"निजनिजपुररेखान्तस्थिताद्यौजनौघात्,
रसलवमितलिप्ता"

(ग) देशान्तरसंस्कारः–कलादि देशान्तरफलं स्वदेशस्य रेखादेशात् प्राचां स्थितौ ग्रहेभ्यः ऋणं कर्तव्यम् पश्चिमे स्थितौ च धनं वस्तुतः रेखातः प्राचि स्वदेशे पूर्वमेवार्धरात्रिः, प्रतीच्याञ्च रेखार्धरात्रितः पश्चादर्धरात्रिः। अतः क्रमशः प्राच्यां प्रतीच्यां देशान्तरकलात्मकमानं ग्रहेषु ऋणं धनं च कर्तव्यमिति। तद्यथोक्तम्–

कलादितत्फलं प्राच्यां ग्रहेभ्यः परिशोधयेत्,
रेखाप्रतीचीसंस्थाने प्रक्षिपेत्स्युः स्वदेशजाः।

(घ) देशान्तरसंस्कारविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— देशान्तरसंस्कारस्य का परिभाषा?
   उत्तरम्—देशयोः अन्तरं देशान्तरमिति, रेखा-देशस्वदेशयोः पूर्वापरमन्तरं देशान्तरम्।
2. **प्रश्नः**—कः स्वदेशः?
   उत्तरम्— भूमौ यः जनः यत्र तिष्ठति तत्पृष्ठस्थानमेव स्वदेशः। अथवा अभीष्टदेशः स्वदेशः।
3. **प्रश्नः**— कः रेखादेशः ?
   उत्तरम्—"मध्यसूत्रगः" (स्वकीयस्पष्टभूपरिधिर्यत्र लङ्कायाम्योत्तरवृत्ते संलग्नो भवति सः स्वकीयो रेखादेशः)।
4. **प्रश्नः**—सूर्यसिद्धान्तानुसारेण केन देशान्तरज्ञानं करणीयम्?
   उत्तरम्—प्रत्यक्ष-उन्मीलन-सम्मीलनकालयोः वशात् स्वस्थानं पूर्वापरं कुत्र वा अस्ति इति ज्ञात्वा देशान्तरज्ञानं कर्तव्यम्।
5. **प्रश्नः**—देशान्तरघटिका कथं प्राप्यते?
   उत्तरम्— रेखादेशात् योजनात्मकमन्तरं विधाय ततः षड्भिभक्ते सति देशान्तरघटिका प्राप्यते।
6. **प्रश्नः**—गणेशदैवज्ञेन देशान्तरघटिकाः विषये किं कथ्यते?
   उत्तरम्—"निजनिजपुररेखान्तस्थिताद्यौजनौघात्, रसलवमितलिप्ता"

(V-C-73) (15) लग्नानयनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) लग्नपरिचयः–लगतीति लग्नमिति व्युत्पत्याऽ-भीष्टकाले क्रान्तिवृत्तस्य यः प्रदेशः उदयक्षितिजे लगति तदेव राश्यादिकं लग्नम्। तद्यथोक्तं भास्करेण–

"यत्र लग्नमपमण्डलं कुजे तद्गृहाद्यमिह लग्नमुच्यते"।

अतः क्रान्तिक्षितिजयोः पूर्वसम्पातः प्रथमलग्नं, पश्चिमसम्पातः सप्तमलग्नं अस्तलग्नञ्च, ऊर्ध्वयाम्योत्तरे यत्र लग्नं तत्र दशमलग्नं मध्यलग्नसंज्ञकम्, अधः याम्योत्तरे च चतुर्थलग्नमिति। सामान्यतया लग्न इति कथनेन प्रथमलग्न एव गृह्यते। लग्नसाधनोपपत्तिः– लग्नसाधने सर्वप्रथमं ध्यातव्यमिदं यत् सूर्योदयकाले सूर्यस्य क्षितिजे एव स्थितत्वात् सूर्यसममेव लग्नं, ततोऽनन्तरं सूर्याक्रान्तराशेः भोग्यांशाः तदग्रिमराशयः लग्नराशेर्भुक्तांशश्च क्रमेणोद्गताः भवन्ति, अतोऽभीष्टकाले सूर्यलग्नयोरन्तरे भवृत्ते सूर्याक्रान्तराशेः भोग्यांशाः तदग्रिमा राशयोर्लग्नराशेर्भुक्तांशाः भवन्ति। अतः तत्सम्बन्धिनो अहोरात्रे क्षितिजसूर्यान्तरे सूर्यस्य भोग्यासवः तदग्रिमराश्युदयासवः लग्नराशिभुक्तासवश्चेष्टकाले तिष्ठन्ति, इत्यम् रवेर्भोग्यासूँस्तदग्रिमराश्युदयासूँश्च विशेष्य शेषाद्विलोमेन लग्नज्ञानं सुघटम्।

अत्र विशेषतया ध्यातव्यमिदं यत् राश्युदयानां नाक्षत्रत्वात् इष्टकालासुभिरपि नाक्षत्रमेव भवितव्यं परन्तु ते सावनीयाः भवन्ति, इति सावनेष्टो नाक्षत्रेष्टज्ञानार्थं तात्कालिकीकरणं क्रियते; तद्यथोक्तम्–

लग्नार्थमिष्टघटिका यदि सावनास्ता-
स्तात्कालिकार्ककरणेन भवेयुरार्क्ष्यः।

एतदनन्तरं अनेन सूत्रेण लग्नानयनं विधीयते–

गतभोग्यासवः कार्या भास्करादिष्टकालिकात्।
स्वोदयासुहता भुक्त-भोग्या भक्ताः स्ववह्निभिः॥
अभीष्टघटिकासुभ्यो भोग्यासून् प्रविशोधयेत्।
तद्वत्तदेष्य लग्नासूनेवं यातान् तथोत्क्रमात्॥
शेषं चेत् त्रिंशताऽभ्यस्तमशुद्धेन विभाजितम्।
भागैर्युक्तं च हीनं च तल्लग्नं क्षितिजे तदा॥

सर्वप्रथमं अंशादिकः सायनसूर्यः त्रिंशद्भिरंशैः विशोध्य गतभोग्यासवः कार्याः तदनन्तरं रवेर्भुक्तं भोग्यासवज्ञानाय अनुपातः क्रियते यदि 30 अंशैः सायनरविनिष्ठराशेरुदयासवो लभ्यन्ते तदा सायनरवेः भुक्तांशैर्भोग्यांशैर्वा किमिति–

$\frac{\text{स्वोदयासु} \times \text{भुक्तभोग्यांश}}{30}$ = रवेर्भुक्तभोग्यासवः।

अत्र यतोऽभीष्टकालः = र.भो.अ.रा.उ.अ.ल.भु.अ।

अतः अभीष्टकालासुभ्यो रवेर्भोग्यासवः तदग्रिमराश्यु-दयासवश्च विशोध्यन्ते तदा लग्नस्य भुक्तासवोऽवशिष्यन्ते। यावतः राश्युदयासवाः विशोधिताः ते शुद्धसंज्ञकाः, अग्रिमश्चाशुद्धः। अत्र पुनः अनुपातः क्रियते यद्येभिर-शुद्धराश्युदयासुभिस्त्रिंशदंशाः लभ्यन्ते तदा शेषासुभिरेभिः किमिति लब्धा लग्नस्य भुक्तांशाः। तद्यथा अनुपातः–

$\frac{30 \times \text{शेषः}}{\text{अशुद्धराश्युदयासवः}}$ = लग्नस्य भुक्तांशाः

एते भुक्तांशाः शुद्धराशिसंख्यया युक्ताः राश्यादि सायनलग्नो भवति। उत्क्रमलग्नं लग्नादग्रस्थे रवौ रात्रिशेषे सम्भवति, तत्रापि एवमेव प्रकारेण भुक्तांशद्वारा भुक्तासून् ज्ञात्वा इष्टघटिकाभ्यः विशोध्य भुक्तराशीनामुदयासूँश्च विशोधयेत्, तदनन्तरं व्युत्क्रमेण सायनलग्नं भवति। अयनांशहीने सति निरयनलग्नं जायते। एवमेव "तत्कालार्कः सायनः स्वोदयघ्ना" इत्यादिना लग्नसाधनं करणग्रन्थेषु विधीयते।

लग्नानयने विशेषः–यदि भोग्यकालात् इष्टकालः अल्पः तदा इष्टकालं त्रिंशद्भिः संगुण्य सूर्याक्रान्त-राशेरुदयासुभिः भक्ते सति आगता लब्धिः स्पष्टसूर्ये योजनेन लग्नं भवति; तद्यथा ग्रहलाघवे–

भोग्यतोऽल्पेष्टकालात् खरामाहतात्
स्वोदयाप्तांशयुग् भास्करस्यात्तनुः।

अथ च रात्रिकालीनलग्नसाधनमभीष्टश्चेत् तदा षड्राशियुक्तेन सूर्येण लग्नसाधनं विधीयते; तद्यथा–

निशि तु सरसभार्कात् स्यात् तनूरिष्टकाले।

इष्टपलेभ्यो या शुद्धा राशिः शुद्धा सा शुद्धसंज्ञका, या च न शुद्धा सा अशुद्धसंज्ञका। ततो अयनांशेनापि हीनन्तदा राश्यादिकं प्रथमलग्नं भवति। उक्तं च ग्रन्थकारेण–

तत्काले सायनार्कस्य भुक्तभोग्यांशसंगुणात्।
स्वोदयादेवाग्नि लब्धं यद्भुक्तं भोग्यं रवेस्त्यजेत्॥

इष्टनाडीपलेभ्यश्च गतगम्यान्निजोदयात्।
शेषं खत्र्या हतं भक्तमशुद्धेन लवादिकम्।।
अशुद्धशुद्धभे हीनयुक्तनुर्व्ययनांशकम्।।

इदमत्र विशेषतया ध्यातव्यं यत् यदि मध्यरात्र्यानन्तरकालस्य लग्नसाधनमपेक्षितं तदा इष्टघटी 60 घटीभ्यः विशोध्य तं इष्टं रात्रिशेषं प्रकल्प्य भुक्तरीत्या लग्नानयनं विधेयमिति लग्नसाधनम्।

(ख) लग्नानयनविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— लग्नानयनम् इत्यस्य का परिभाषा?
   उत्तरम्—अभीष्टकाले क्रान्तिवृत्तस्य यः प्रदेशः उदयक्षितिजे लगति तदेव राश्यादिकं लग्नम्।
2. **प्रश्नः**— दिवसे जन्मनि सति सूर्योनचन्द्रान्विते लग्ने सहमं किं विद्यते?
   उत्तरम्— पुण्यसहमम्।
3. **प्रश्नः**—रात्रौ लग्ने चन्द्रोनसूर्यान्विते लग्ने सति किं जायते?
   उत्तरम्—पुण्यसहमम्।
4. **प्रश्नः**— शोध्यर्क्षशुद्धाश्रयमन्तराले लग्नं न स्यात्तदा किं कारयेत्?
   उत्तरम्— सैकभम्।
5. **प्रश्नः**—दिवाजन्मे सूर्योनचन्द्रान्विते लग्ने सति किं जायते?
   उत्तरम्— गुरुसहमम्।
6. **प्रश्नः**—निशि जन्मे चन्द्रोनसूर्यान्विते लग्ने सति किं जायते?
   उत्तरम्— गुरुविद्यासहमम्।
7. **प्रश्नः**—दिवालग्ने सति पुण्यसहमोनगुर्वान्विते लग्ने सति किं जायते?
   उत्तरम्—यशसहमम्।
8. **प्रश्नः**—दिवालग्ने सति पुण्योनगुर्वान्विते शुक्रे सति किं भवति?
   उत्तरम्—मित्रसहमम्।
9. **प्रश्नः**—दिने शनितः गुरुमयासमन्विते लग्ने सति किं भवति?
   उत्तरम्— जीवनसहमम्।
10. **प्रश्नः**— अहर्निशं ईज्यात् चन्द्रमपास्यान्विते लग्ने सति किं जायते?
    उत्तरम्—पुत्रसहमम्।
11. **प्रश्नः**— रात्रौ शुक्रतः चन्द्रमपास्यान्विते लग्ने सति किं भवति?
    उत्तरम्—मातासहमम्।
12. **प्रश्नः**— शन्यूनगुर्वान्विते लग्ने सति भवति?
    उत्तरम्—भ्रातासहमम्।
13. **प्रश्नः**— कुजे लग्नेशे सति कुजोनगुर्वान्विते लग्ने सति (दिवारात्रौ) किं भवति?
    उत्तरम्— सामर्थ्यसहमम्।
14. **प्रश्नः**—दिवे गुरोश्चन्द्रमपास्यान्विते सूर्ये सति किं भवति?
    उत्तरम्—गौरवसहमम्।
15. **प्रश्नः**—दिवाजन्मे शुक्रोनशन्यन्विते लग्ने सति किं भवति?
    उत्तरम्—आशासहमम्।
16. **प्रश्नः**— सायनार्कः कथं भवति?
    उत्तरम्—सूर्ये अयनांशे युक्ते सति सायनार्कः भवति।
17. **प्रश्नः**—दिवायां जन्मे सति केन प्रकारेण लग्नानयनं करणीयम्?
    उत्तरम्— भोग्यप्रकारेण।
18. **प्रश्नः**—रात्रौ जन्मे सति केन रीत्या लग्नानयनं करणीयम्?
    उत्तरम्— भुक्तरीत्या।
19. **प्रश्नः**— इष्टपलेभ्यो शुद्धा राशिः का संज्ञका?
    उत्तरम्— सा शुद्धसंज्ञका।
20. **प्रश्नः**— इष्टपलेभ्यो अशुद्धाराशिः का संज्ञका?
    उत्तरम्—सा अशुद्धसंज्ञका।
21. **प्रश्नः**—पश्चिमनतकाले सति केन प्रकारेण दशमलग्नानयनं कर्त्तव्यम्?
    उत्तरम्— भोग्यप्रकारेण।
22. **प्रश्नः**— पूर्वनतकाले सति केन प्रकारेण दशमलग्नानयनं कर्त्तव्यम्?
    उत्तरम्— भुक्तप्रकारेण।
23. **प्रश्नः**—लग्नमित्यस्य का व्युत्पत्तिः?
    उत्तरम्— लगतीति लग्नमिति।

(V-C-73) (16) ग्रहणम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) सामान्यपरिचयः—गृह्यतेऽनेनेति ग्रहणमिति व्युत्पत्त्या ग्राह्यग्राहकयोः अन्तराभावत्वं नाम ग्रहणम्। तत्र ज्योतिषदृष्ट्या छाद्यछादकग्रहयोरन्तराभावत्वं ग्रहणं नाम। तच्चान्तराभावं पूर्वापरं याम्योत्तरञ्च भवति। एतच्च ग्रहणं मुख्यतया सूर्यचन्द्रभेदाद्द्विविधम्।

(ख) चन्द्रग्रहणम्—चन्द्रग्रहणे छाद्यः चन्द्रः छादिका च राहुसंज्ञया प्रसिद्धा भूच्छाया। चन्द्रादिग्रहे स्वगतप्रकाशाभावाद्रविकिरणसंयोगवशादेव प्रकाशत्वं जायते, अतः चन्द्रबिम्बे यावति प्रदेशे रविकिरणाः लगन्ति तावान् भागः समुज्ज्वलस्तदितरो भागः तमोरूपः।

अथ च योऽयं रविप्रकाशकः तस्य प्रशरणशीलाः किरणाः सूर्याल्पप्रमाणेन भूबिम्बेन अवरुद्धा आकाशे तमोमयीं सूचीमुत्पादयन्ति, तस्य एव संज्ञा तमोरूप राहुरिति। सा च सूच्याकारा छाया दीर्घतया चन्द्रकक्षातोऽपि दूरं याति। यथोक्तं भास्करेण–

भानोर्बिम्बपृथुत्वादपृथुपृथिव्याः प्रभा हि सूच्यग्रा।
दीर्घतया शशिकक्षामतीत्य दूरं बहिर्याता।।

रवेः क्रान्तिवृत्ते भ्रमणात् तत्सम्मुखी भूभाक्रान्तिवृत्तधरातलसंलग्ना एव, अतः स्वकक्षास्थ-विमण्डलगतश्चन्द्रः पूर्वाभिमुखो भ्रमन् यदा तस्यां भूच्छायायां प्रविशति तदा चन्द्रबिम्बे रविकिरणसंयोगाभावात् प्रकाशाभावः। क्रान्तिविमण्डलयोरन्तराभावेन याम्योत्तरान्तराभावः, भूभाचन्द्रयोः राश्यादिभिः तुल्यत्वे पूर्वापरान्तराभावश्च, अतः चन्द्रग्रहणं सञ्जायते। उक्तञ्च–

छादयत्यर्कमिन्दुं विधुं भूभिभा।

इदमत्र ध्यातव्यं यत् भूभा चन्द्रं पूर्वतः छादयतीति कृत्वा चन्द्रग्रहणे पूर्वतः स्पर्शः पश्चान्मोक्षः–"**भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ**" इति वचनात्। भूभाबिम्बादुभयतो रविचन्द्रयोः स्थितिरियं तयोराशिषट्कान्तरञ्च पूर्णिमान्ते एव सम्भवतीति, अतः पूर्णिमायामेव चन्द्रग्रहणम्।

(ग) सूर्यग्रहणम्—सूर्यग्रहणे छाद्यः सूर्यः छादकश्चन्द्रः। चन्द्रकक्षायाद्रविकक्षातः अधोगत्वात् चन्द्रः स्वकक्षायां पूर्वाभिमुखो भ्रमन् रविभूबिम्बयोर्मध्यगतो भवति, इत्थं भूस्थजनानां दृष्टिपथि गतः कृष्णचन्द्रः रविदर्शने बाधकः, इत्थं सूर्यग्रहणं सञ्जायते। अनेन इदमपि स्पष्टो जायते यत्सूर्यग्रहणे स्पर्शः पश्चान्मोक्षश्च पूर्वदिशि। उक्तञ्च–

छादको भास्करस्येन्दुः अधस्थो घनवद् भवेत्। इयं स्थितिः रविचन्द्रयोः सर्वांशतुल्यत्वे एव सम्भवात् "**दर्शः सूर्येन्दुसङ्गमः**" इत्युक्तेः दर्शान्ते एव सूर्यग्रहणम्।

सूर्यग्रहणे छाद्यछादकयोः भिन्नकक्षागतत्वात् गर्भीयपृष्ठीयग्रहयोर्पूर्वापरमन्तरं लम्बनरूपं गर्भीयपृष्ठीयशरान्तरं च नतिरूपं उत्पद्यते, तयोः संस्कारेण सूर्यग्रहणं साध्यते। तद्यथोक्तम्–

कक्षाभेदादिह खलु नतिर्लम्बनं चोपपन्नम्।

(घ) ग्रहणसम्भवासम्भवविचारः—ननु प्रतिपूर्णिमान्ते चन्द्रग्रहणं प्रत्यमान्ते च सूर्यग्रहणं कथं न भवतीत्युच्यते भूभातुल्यो यदा चन्द्रपातो तदा चन्द्रग्रहणम्, सूर्यतुल्ये चन्द्रपाते सूर्यग्रहणम्, अथ च कियद्भिरंशैरधिके न्यूनेऽपि यदा चन्द्रपातो तदेव ग्रहणं, तद्यथा सौरसिद्धान्ते कथितम्–

भानोर्भार्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा।
शशाङ्कपाते ग्रहणं कियद् भागाधिकोनके।
(सूर्यसि०च०ग्र०4/6)

प्रायशः भुजांशानां चतुर्दशभिरंशैः न्यूने सति ग्रहणसंभवः जायते दशांशे च निश्चयेन ग्रहणं भवति, एवमेव सर्वग्रहणेऽपि सप्तभिरंशैर्न्यूने सम्भावना त्रिभिरंशैर्न्यूने निश्चयेन सूर्यग्रहणम्। अतः उक्तम्–

'सपातसूर्यस्य भुजांशकाः यदा मनूनकाः स्यात् ग्रहणस्य संभवः' इत्थं प्रतिदर्शान्ते अमान्ते वा पूर्वापरान्तराभावेऽपि याम्योत्तरान्तरविद्यमानत्वान्न ग्रहणं शराभावे एव ग्रहणमिति स्फुटम्।

(ङ) ग्रहणावयवाः भेदाश्च—सर्वग्रहणे स्पर्श-सम्मीलनमध्यग्रहणोन्मीलनमोक्षरूपाः पञ्चावयवाः। छाद्यछादकयोः कपालसंस्पर्शनं स्पर्शसंज्ञकः स्पर्श-कालान्मोक्षकालपर्यन्तं कालः स्थितिसंज्ञकः। स्पर्शान्मध्यग्रहणं यावत् स्पार्शिकस्थित्यर्द्धं मध्यग्रहणान्मोक्षं यावत् मौक्षिकस्थित्यर्द्धं सम्मीलनकालादुन्मीलनं यावत् विमर्दकालः एवमेव सम्मीलनाद् मध्यग्रहणं यावत् स्पार्शिकं उत्तरार्धं च मौक्षिकं विमर्दं भवति।

ग्रहणमपि खण्डपूर्णवलयखग्रासभेदाच्चतुर्विधम्। इत्थं

सिद्धान्तग्रन्थेषु ग्रहणे ग्रासस्थितिमोक्षस्पर्शादीनां काल-निर्धारणमपि विविधरीत्या विधीयते। दिग्गिति सामान्यग्रहणपरिचयः।

(च) सूर्यग्रहणम्–

1. **ग्रहणपरिचयः**–गृह्यतेऽनेनेति ग्रहणमिति व्युत्पत्त्या ग्राह्यग्राहकयोरन्तराभावत्वं नाम ग्रहणम्। ज्योतिषे हि छाद्यछादकग्रहपिण्डयोरन्तराभावत्वं नाम ग्रहणम्। तच्चान्तराभावं पूर्वापरयोर्याम्योत्तरञ्च भवति।

2. **सूर्यग्रहणम्**–सूर्यग्रहणे सूर्यः छाद्यः छादकश्चन्द्रः। सूर्यस्तु क्रान्तिवृत्ते चन्द्रश्च तस्मादधः विमण्डले भ्रमति इति। यदा चन्द्रः स्वकक्षायां पूर्वाभिमुखो भ्रमन् रविभूबिम्बयोर्मध्यगतं भवति तदा भूस्थलोकानां दृष्टिपथगतः कृष्णचन्द्रः रविदर्शने बाधकः, इत्थं चन्द्रबिम्बछादितस्थरविबिम्बस्य अदर्शनमेव 'सूर्यग्रहणम्' इत्यभिधीयते; उक्तञ्च सौरसिद्धान्ते–

छादको भास्करस्येन्दुः अधस्थो घनवद् भवेत्।

इदमपि स्पष्टतया ज्ञायते यत् सूर्यग्रहणे स्पर्शः पश्चान्मोक्षश्च पूर्वतो जायते। '**पश्चात्स्पर्शो हरिदिशि ततो मुक्तिः स्यात् एव।**

सूर्यग्रहणस्थितिः सूर्यचन्द्रयोः सर्वांशतया तुल्यत्वेनैव संभवत्वात् "दर्शः सूर्येन्दुसङ्गमः" इत्यादिना दर्शान्ते (अमान्ते) एव सूर्यग्रहणं संभवतीति स्पष्टमेव। उक्तञ्च सूर्यसिद्धान्ते—

तुल्यौ राश्यादिभि स्यातामामावास्यान्तकालिकौ।

3. **सूर्यग्रहणसंभवासंभवविचारः**–ननु प्रतिदर्शान्ते कदा न ग्रहणमित्याक्षिप्य निर्णीयते यस्मिन् दर्शान्ते चन्द्रशरः रविचन्द्रबिम्बमानयोगादल्पस्तत्रैव ग्रहणसम्भावना नान्यत्र, इयञ्च स्थितिः कदा सम्भवतीत्युच्यते यदा सपातसूर्यस्य भुजांशकाः 14भिः अंशैः न्यूनो तदा। अत एवोक्तं भास्करेण–

सपातसूर्यस्य भुजांशकाः यदा मनूनकाः स्याद् ग्रहणस्य सम्भवः।

ग्रहलाघवकारोऽपि–

इन्द्राल्पांशाः सम्भवश्चेद् ग्रहणस्य।

अथ च यदि सपातभुजांशाः दशाल्पाः भवन्ति तदा निश्चयमेव ग्रहणमिति। इन्द्राल्पे सम्भवो ज्ञेयो दशाल्पे निश्चयो मतः। पूर्णग्रहणसंभावना तु सप्तभिरंशैर्न्यूने भुजांशे संभवति त्रिभिरंशैरल्पे सति निश्चितमेव पूर्णग्रहणम्। तद्यथा–

एवं सर्वग्रहे नागभागाल्पके सम्भवो मतः।
निश्चयस्तु त्रिभागाल्पे विपातार्कभुजांशकैः।।

अतः प्रतिदर्शान्ते पूर्वापरान्तराभावविद्यमानत्वेऽपि याम्योत्तरान्तराविद्यमानत्वान्न ग्रहणम्। एवं सूर्यतुल्ये-कियद्भिरंशैः न्यूनेऽधिके वा सूर्यग्रहणम्।

4. **सूर्यग्रहणे लम्बनत्योर्वैशिष्ट्यम्**–सूर्यग्रहणे विभिन्न-कक्षायां छाद्यछादकौ, अतः भूगर्भाभिप्रायेण समावपि पृष्ठक्षितिजाभिप्रायेण लम्बितो भवतः। तयोरेव गर्भीयपृष्ठीयग्रहयोरन्तरं लम्बनं नाम। उक्तञ्च भास्कराचार्यः–

यत्पूर्वापरभावेन लम्बनं तदनन्तरम्।

एवमेव मध्यमस्पष्टशरयोरन्तररूपा नतिश्चोपपद्यते तद्यथा–

यद्याम्योत्तरभावेन नतिसंज्ञं तदुच्यते।

अतः कक्षाभेदादुत्पन्नयोः नतिलम्बनयोः संस्कारेण क्रमशः स्पष्टवारं पृष्ठीयदर्शान्तकालं च विज्ञाय सूर्यग्रहणं प्रसाध्यमिति शास्त्राभिमतम्। अत एव–**कक्षाभेदादिह खलु नतिर्लम्बनं चोपपन्नम्।**

5. **सूर्यग्रहणस्य अवयवाः वैशिष्ट्यञ्च**– सम्पूर्णग्रहणे स्पर्शसम्मीलनमध्यग्रहणोन्मीलनरूपाः पञ्चावयवाः तत्र—

- द्वयोः पिण्डयोः सम्पर्कः स्पर्शः।
- स्पर्शकालात् मोक्षकालपर्यन्तं स्थितिसंज्ञकः।
- स्पर्शकालात् मध्यग्रहणं यावत् स्पार्शिकस्थित्यर्द्धः।
- मध्यग्रहणात् मोक्षपर्यन्तं मौक्षिकस्थित्यर्द्धः।
- सम्मीलनकालात् उन्मीलनं यावत् विमर्दः।
- सम्मीलनकालात् मध्यग्रहणं यावत् स्पार्शिकविमर्दः।
- मध्यग्रहणात् उन्मीलनं यावत् मौक्षिकविमर्दार्धः।
- छाद्यछादकयोः योगार्धात् शरं विशोध्य यल्लभ्यते तावान् ग्रासः।

"तच्छरोनं भवेच्छन्नमेतद्यदा ग्राह्यहीनावशिष्टं तु खच्छन्न"

- छाद्यमानम्<ग्रासः = खग्रासः।

6. अत ग्रहणं खण्डपूर्णवलयखग्रासभेदाच्चतुर्विधः।

- स्फुटतिथ्यवसाने तु मध्यग्रहणमादिशेदिति प्रमाणात् अमान्ते मध्यग्रहणम्।
- मध्यग्रहणकालः –स्थित्यर्द्धकालः = स्पर्शकालः।
- मध्यग्रहणकालः + स्थित्यर्द्धकालः = मोक्षकालः।

यथोक्तं सूर्यसिद्धान्ते–

स्थित्यर्द्धनाडिकाहीने स्पर्शो मोक्षस्तु संयुते।

- एकस्मिन् वर्षे ग्रहणानामधिकतमा संख्या सप्त निर्णीयते।
- बहुफलं जपदानहुतादिके इत्यादिना धर्मशास्त्रीयमपि महत्त्वं भास्करेण प्रतिपादितम्।

7. चन्द्रग्रहणम्–

1. **ग्रहणस्य सामान्यपरिचयः**–गृह्यतेऽनेनेति व्युत्पत्त्या ग्राह्यग्राहकयोरन्तराभावत्वं ग्रहणं नामं तच्चान्तरायां पूर्वापरं याम्योत्तरञ्च।

2. **चन्द्रग्रहणस्य सामान्यपरिचयः**–चन्द्रग्रहणे छाद्यः चन्द्रः छादिका च राहुसंज्ञया प्रसिद्धा भूच्छाया। चन्द्रादिग्रहे स्वगतप्रकाशाभावाद्विकिरणसंयोगवशादेव प्रकाशत्वं जायते; अतः चन्द्रबिम्बे यावति प्रदेशे रविकिरणाः लगन्ति तावान् भागः उज्ज्वलः तदितरो भागः अनुज्ज्वलः तमोरूपः। अथ योऽयं रविः प्रकाशकः तस्य प्रसरणशीलाः किरणाः सूर्याल्पप्रमाणेन भूबिम्बेन अवरुद्धा आकाशे तमोमयीं सूचीमुत्पादयन्ति तस्य एव संज्ञा तमोरूप राहुरिति। सा च सूच्याकारा छाया दीर्घतया चन्द्रकक्षातो दूरं याति, तद्यथोक्तं शिरोमणौ भास्करेण–

भानोर्बिम्बपृथुत्वादपृथुपृथिव्याः प्रभा हि सूच्यग्रा।
दीर्घतया शशिकक्षामतीत्य दूरं बहिर्याता।

रवेः क्रान्तिवृत्ते भ्रमणात् तत्सम्मुखी भूभाक्रान्तिवृत्तधरातलसंलग्ना एव अतः स्वकक्षास्थ-विमण्डलगतश्चन्द्रः पूर्वाभिमुखो भ्रमन् यदा तस्यां भूच्छायां प्रविशति तदा चन्द्रे रविकिरणसंयोगाभावात् प्रकाशाभावः। इत्थं क्रान्तिविमण्डलयोरन्तराभावेन याम्योत्तरान्तराभावः भूभाचन्द्रयोः तुल्यत्वेन पूर्वापरान्तराभावः, अतः चन्द्रग्रहणं सम्भवति। अत एवोक्तं सूर्यसिद्धान्ते–

भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ।

भास्करेणापि–"राहुः कुभामण्डलगः शशाङ्कः—तमो इदमत्र ध्यातव्यं यत् चन्द्रः भूभायां प्रविशतीतिकृत्वा चन्द्रग्रहणे पूर्वतो स्पर्शः पश्चान्मोक्षः। अथ च भूभाबिम्बादुभयतो रविचन्द्रयो स्थितिरियं तयोः राशिषट्कान्तरञ्च पूर्णिमान्ते एव सम्भवति, अतः पूर्णिमायामेव चन्द्रग्रहणम्।

3. **चन्द्रग्रहणसम्भवासम्भवविचारः**– ननु प्रतिपूर्णिमान्ते कथं न चन्द्रग्रहणमित्याक्षिप्य निर्णीयते यस्मिन् पूर्णिमान्ते भूभाचन्द्रबिम्बयोः मानयोगार्धादल्पः चन्द्रशरः तदा चन्द्रग्रहणम्। कदा चेयं स्थितिः संभवतीत्युच्यते भूमातुल्यो यदा चन्द्रपातो उत कियद्भिरंशैरधिके न्यूने वा चन्द्रपाते स्थिते चन्द्रग्रहणम्। यथोक्तं सूर्यसिद्धान्ते–

भानोर्भार्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा।
शशाङ्कपाते ग्रहणं कियद्भागाधिकोनके।।

अत्र कियदिति पदस्य अंकपद्धत्या-11 इति मानं स्वीकृत्य भूभाचन्द्रपातयो एकादशांशाधिकोनके चन्द्रग्रहणं संभवतीति प्रतिपाद्यते। कैश्चित्तु 14भिरंशैर्भुजांशैरपि चन्द्रग्रहणसंभावना उत्पद्यते इति निर्णीयते, दशभिरंशैः न्यूनैः भुजांशैः निश्चितमेव चन्द्रग्रहणमिति प्रतिपाद्यते; यथा तत्त्वामृतटीकायाम्–

इन्द्राल्पे संभवो ज्ञेयो दशाल्पे निश्चयो मतः।
चन्द्रग्रहे विपाताऽर्कभुजांशैर्गणकोत्तमैः।।

एवं सप्तभिरंशैर्न्यूने हि सर्वग्रहणसंभावना, त्रिभिरंशात्न्यूने सति निश्चितमेव सर्वग्रहणमिति। तद्यथा–

एवं सर्वग्रहे नागभागाल्पे सम्भवो मतः।
निश्चयस्तु त्रिभागाल्पे विपार्कभुजांशकैः।।

अतः प्रतिपूर्णान्ते पूर्वापरान्तराभावस्य सत्त्वेऽपि याम्योत्तरान्तरस्य विद्यमानत्वान्न प्रतिपूर्णिमायां ग्रहणम्, अपि तु शराभावे एव ग्रहणमिति दिक्।

4. **चन्द्रग्रहणस्य अवयवाः**–सूर्यग्रहणवदेव किञ्चिदन्तरेण।

(8) ग्रहणसंभवासंभवविचारः–ग्राह्यः ग्राहकयो-र्मानैक्यार्धाल्पे शरमाने ग्रहणं, अतः तादृशः शरः कदा सम्भवतीति ज्ञानार्थम् चन्द्रस्य मध्यं व्यासार्द्धम्-16' षोडशकलाः भूभायाः मध्यमव्यासार्द्धम्- 40'अनयोर्योगः = 40' + 16' = 56', एतत्तुल्ये शरे भुजांशज्ञानमपेक्षितम् क्रान्तिविमण्डलयो परमान्तरं = 4°30' = 270'कलाः अत्रानुपातः परमशरज्यया त्रिज्या (3438) तुल्या भुजज्या तदा मानार्धैक्यतुल्यशरज्यया केत्यनुपातेन स्पर्शयोग्य-विपातार्कभुजज्या

$$= \frac{\text{त्रि×मानैक्यार्धज्या}}{\text{ज्या.प.श.}} = \frac{3438 \times 56}{270} = 713$$

स्वल्पान्तरात्-12 अंशाः चन्द्रस्य।

परममन्दफलम्-2/30 अतः योजनेन 14 अंशात् सूर्यग्रहणसम्भावनोत्पद्यते, विशोधनेन = 9/30 (10)' अंशे अवश्यमेव ग्रहणम्।

सर्वग्रहणे च सम्मीलने उन्मीलने च भूभाबिम्बकेन्द्रान्तरं तयोर्मानार्धान्तरतुल्यं 24' तस्मादुक्तविधिना =

$\frac{3438 \times 24}{270} = 5^\circ$

मध्यमभुजांशा:, एषु परमन्दफलयोगेन 7/30 वियोगेन 2/30 अत: सर्वग्रहणमवश्यमेव भवतीति दिक्।

ग्रहणविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्न:**— ग्रहणशब्दस्य का व्युत्पत्ति:?
उत्तरम्— गृह्यतेऽनेनेति।

2. **प्रश्न:**— ज्योतिषशास्त्रे ग्रहणस्य का परिभाषा?
उत्तरम्— छाद्यछादकयोरन्तराभावत्वं नाम ग्रहणम्।

3. **प्रश्न:**— ग्रहणं कतिविधम्?
उत्तरम्— द्विविधम्।

4. **प्रश्न:**— कौ ग्रहणौ भवत:?
उत्तरम्— सूर्यचन्द्रौ।

5. **प्रश्न:**— सूर्यग्रहणं कदा भवति?
उत्तरम्— अमावास्यायाम्।

6. **प्रश्न:**— चन्द्रग्रहणं कदा भवति?
उत्तरम्— पूर्णिमायाम्।

7. **प्रश्न:**— ग्रहणयो: कति अवयवा: सन्ति?
उत्तरम्— पञ्चावयवा: सन्ति।

8. **प्रश्न:**— के सन्ति पञ्च ग्रहणावयवा:?
उत्तरम्—स्पर्श, उन्मीलनं, मध्यग्रहणं, सम्मीलनं, मोक्षश्चेति।

9. **प्रश्न:**— ग्रहणस्य स्पर्शरूपावयव: कदा भवति?
उत्तरम्— यदा ग्राहकवस्तु ग्राह्यं स्पृशति।

10. **प्रश्न:**— ग्रहणस्य सम्मीलनकाल: कदा भवति?
उत्तरम्—ग्राह्यवस्तुन: अर्धभाग: यदा ग्राहकमध्ये प्रविशति।

11. **प्रश्न:**— ग्रहणस्य मध्यग्रहणं कदा भवति?
उत्तरम्— ग्राह्यग्राहकयो: केन्द्रयोग: मध्यग्रहणम्।

12. **प्रश्न:**— ग्रहणस्य उन्मीलनं कदा भवति?
उत्तरम्—ग्राह्यबिम्बस्य मोक्षकालारम्भकाल: उन्मीलनम्।

13. **प्रश्न:**— ग्रहणस्य मोक्षं कदा भवति?
उत्तरम्— ग्राहकात् ग्राह्यवस्तुन: सम्पूर्णमुक्ति: मोक्षम्।

14. **प्रश्न:**—चन्द्रग्रहणे स्पर्श: मोक्षश्च कस्मिन् कपाले भवति?
उत्तरम्— पूर्वकपाले स्पर्श:, पश्चिमे मोक्ष:।

15. **प्रश्न:**—सूर्यग्रहणे स्पर्श: मोक्षश्च कस्मिन् कपाले भवति?
उत्तरम्— पश्चिमे स्पर्श:, पूर्वे मोक्ष:।

16. **प्रश्न:**— भूभातुल्यो यदा चन्द्रपातो तदा किं भवति?
उत्तरम्— चन्द्रग्रहणम्।

17. **प्रश्न:**— सूर्यतुल्ये चन्द्रपाते किं भवति?
उत्तरम्— सूर्यग्रहणम्।

18. **प्रश्न:**— सूर्यग्रहणे छाद्य छादकयो: को अभिप्राय:?
उत्तरम्— सूर्य: छाद्य: छादकश्चन्द्र:।

19. **प्रश्न:**— सूर्यग्रहणे रविभूबिम्बयोर्मध्यगतो क: भवति?
उत्तरम्—चन्द्र: स्वकक्षायां पूर्वाभिमुखो भ्रमन् रविभूबिम्बयोर्मध्यगतो भवति।

20. **प्रश्न:**—ग्रहणं कतिविधं के च ते?
उत्तरम्— खण्ड-पूर्ण-वलय-खग्रास-भेदाच्चतुर्विधम्।

21. **प्रश्न:**— चन्द्रबिम्बछादितस्य रविबिम्बस्य अदर्शने किं भवति?
उत्तरम्— सूर्यग्रहणम्।

22. **प्रश्न:**— एकस्मिन् वर्षे ग्रहणानामधिकतमा संख्या का?
उत्तरम्— सप्त निर्णीयते।

23. **प्रश्न:**—भास्करेण धर्मशास्त्रीयमहत्त्वं किं प्रतिपादितम्?
उत्तरम्— बहुफलं जपदानहुतादिकम्।

24. **प्रश्न:**—चन्द्रग्रहणे क: छाद्य: का चन्द्र: छादिका च?
उत्तरम्— छाद्य: चन्द्र: राहुसंज्ञया प्रसिद्धा भूच्छाया।

25. **प्रश्न:**—चन्द्रादिग्रहे स्वगतप्रकाशाभाव: कथं प्रकाशत्वं जायते?
उत्तरम्— रविकिरणसंयोगवशादेव प्रकाशत्वं जायते।

26. **प्रश्न:**—अमावास्यान्ते रविचन्द्रयोरेकस्मिन्नेव दृष्टिसूत्रे ऊर्ध्वाधोरूपेण स्थितित्वात् किं भवति?
उत्तरम्— सूर्यग्रहणम्।

27. **प्रश्न:**—पौर्णमास्यन्ते सूर्याद्भार्धे स्थितश्चन्द्रो भूभातुल्योपरान्ते किं भवति?
उत्तरम्— चन्द्रग्रहणम्।

28. **प्रश्न:**— खण्डग्रहणे कति अवयवा: भवन्ति?
उत्तरम्— त्रय: (स्पर्शमध्यग्रहणमोक्षा:)।

29. **प्रश्न:**— ध्रुवोन्नति: कस्य बोधक:?
उत्तरम्— अक्षांशस्य।

30. **प्रश्न:**— चन्द्रग्रहणे चन्द्रसूर्यान्तरं कियन्त: भवन्ति?
उत्तरम्— 180

(V-C-73) (17) लम्बनं नतिश्च एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) लम्बनपरिचय: तद्वैशिष्ट्यञ्च–गर्भीयपृष्ठीय-ग्रहयो: पूर्वापरमन्तरं लम्बनं नाम। लम्बते इति लम्बनम्। सूर्यग्रहणे विभिन्नकक्षौ रवीन्दू भूगर्भाभिप्रायेण समावपि पृष्ठक्षितिजाभिप्रायेण लम्बितौ भवत:। तयोरेव लम्बितयोश्चन्द्रार्कयोर्गर्भाभिप्रायिकाभ्यां यद् पूर्वापरमन्तरं तल्लम्बनमिति। उक्तञ्च शिरोमणौ–

यत्पूर्वापरभावेन लम्बनाख्यं तदन्तरम्।

अस्माभिर्गणितं तु भूकेन्द्राभिप्रायिकं साध्यते (विधीयते) परन्तु दृष्टा भूपृष्ठे वसति अत: वस्तुदर्शने भेदोपजायते, सूर्यग्रहणे विशिष्टतया छाद्यछादकयो: सूर्यचन्द्रयो: भिन्नकक्षागतत्वात् भूगर्भीय अमान्त: पृष्ठीयामान्तादन्तरितो भवति; अत: लम्बनसंस्कारेण तदन्तरं विज्ञाय तिथ्यन्तघटीषु संस्कारेण स्पष्ट अमान्तकाल आयाति, तस्माद् विशिष्टोऽयं लम्बनसंस्कार:। उक्तञ्च भास्करेण–

दर्शान्तकालेऽपि समौ रवीन्दू
दृष्टा नतौ येन विभिन्नसंस्थौ।

क्वधोछ्रित: पश्यति नैकसूत्रे, तल्लम्बनं (तेन नतिश्च वच्मि)।

अपि च -

"कक्षाभेदादिह खलु नतिर्लम्बनं चोपपन्नम्।
लम्बनस्वरूपम् प्रस्तुतेऽस्मिन् क्षेत्रे–

क ख प = रविकक्षावृत्तम्। क ख घ = चन्द्रकक्षा। भू = भूकेन्द्रम्, पृ-पृष्ठस्थानम्।

र = रविकक्षायां रविबिम्बम्। च = चन्द्रकक्षायां चन्द्रबिम्बम्। ख = खमध्य:। पृ.च भू = दृग्लम्बनं चन्द्रस्य। पृ + र भू = दृग्लम्बनं सूर्यस्य। अनयोरन्तरं रपृच = र र' सूर्यकक्षायां दृग्वृत्ते दृग्लम्बनम्।



क्रान्तिवृत्ते इदमन्तरं स्पष्टमत: लम्बनं द्विविधम्–दृग्लम्बनं स्फुटलम्बनञ्च। उक्तञ्च गोलपरिभाषायाम्–

कुगर्भीयकुपृष्ठीयखेटयोरन्तरं हि यत्
दृङ्मण्डलगतत्वान्तात् दृग्लम्बनमिहोच्यते।

तथैव–

तद्ग्रहद्वयं संलग्नकदम्बप्रोतवृत्तयो:।
क्रान्तिवृत्तेऽन्तरं यत् स्यात् तत्स्फुटं लम्बनं स्मृतम्।

आचार्यकमलाकरेण कक्षाभेदात् आद्यलम्बनं अन्यलम्बनं च प्रतिपादितम्।

लम्बनं सा धनोपपत्ति:-सूर्यसिद्धान्ते एकराशिज्यावर्गे दृग्गतिजीवया भक्ते सति छेद: प्राप्यते। वित्रिभात्सूर्यान्तरं विश्लेषसंज्ञकम्, विश्लेषांशज्या छेदेन भाजिते सति घटिकादिकलम्बनं भवति, तद्यथा सूर्यसिद्धान्ते–

एकज्यावर्गतश्छेदो लब्धं दृग्गतिजीवया
मध्यलग्नार्कविश्लेषज्याछेदेन विभाजिता।
रवीन्द्वोर्लम्बनं ज्ञेयं प्राक्पश्चाद्घटिकादिकम्।

(सू०सि०ग्र०5/78)

(अत्र भास्करोक्त त्रिभोनलग्नार्कविशेषशिञ्जिनी इत्यादिना ह्रतात्फलात् वित्रिभलग्नशंकुना त्रिजीवयाप्तघटिकादिलम्बनम्।

$$\frac{4\ (\text{वित्रिभलग्नार्कान्तरज्या})}{\text{त्रिज्या}} \times \frac{(\text{दृग्गति:})}{\text{त्रिज्या}^2}$$

$$\frac{4\ \text{विज्या} \times \text{दृ०ग०}}{\text{त्रिज्या}^2}$$

चतुर्भि: हरांशौ अपवर्तितौ तदा–

$\frac{\text{विज्या}\times\text{दृ.ग.}}{\text{एकराशिज्या}^2}$ दृग्गत्या अपवर्तितौ = विज्या

$\frac{\text{एकराशिज्या2}}{\text{दृग्गति:}}$ $\frac{\text{एकराशिज्या}^2}{\text{दृग्गति:}}$ =छेद:।

अत: $\frac{\text{विज्या}}{\text{छेद}}$ = इष्टलम्बनमुपपन्नम्।

भास्करेण हि "दृग्लम्बनं तु परमं घटिकाचतुष्कमित्यादिना" परमलम्बनं (दृग्) 4घट्य: स्वीकृतम् (गत्यन्तरस्य तिथ्यंशा: परमलम्बनलिप्तिका:)। तत्रानुपात: यत् यदि गत्यन्तरकलाभि: 60 घटिका: तदा गत्यन्तरस्य 15 अंशे किमिति–

$\frac{60'\ \text{गत्यन्तरकला}}{15}$ = 4 घटिका।

आगता: लम्बनघट्य: मध्यलग्नाद्रवौ प्राक्कपाले सति गणितागतदर्शान्तघटीभ्य: शोधयेत् पश्चिमकपाले रवौ धनं कार्यं तदा स्पष्टतिथिमानं जायते, अनया रीत्या असकृत्कर्म कर्तव्यं, तद्यथोक्तम् सूर्यसिद्धान्ते–

मध्यलग्नाधिके भानौ तिथ्यन्तात् प्रविशोधयेत्।
धनमूनेऽसकृत् कर्म यावत्सर्वं स्थिरीभवेत्।।

(सू०ग्र०5/9)

लम्बनस्य न्यूनत्वं परमत्वञ्च– खमध्ये ग्रहयो: स्थिते सति गर्भीयपृष्ठीयसूत्रयोरेकत्वात् न लम्बनोत्पत्ति:, अत: **'खमध्ये नास्ति लम्बनम्'।** अपि च न **'लम्बनं वित्रिभलग्नतुल्ये'** सिद्धान्ते मध्यलग्नसमे भानौ हरिजस्य न सम्भव:'। एवमेव पृष्ठक्षितिजे ग्रहयो: स्थितत्वात् तयोरन्तरं परं त्रिज्या तुल्यमितमत: पृष्ठीयक्षितिजे लम्बनस्य परमत्वम्। मुनीश्वरेण गर्भीयक्षितिजे परमलम्बनं स्वीकृतं परन्तु तन्न समीचीनम्।

इत्थं शास्त्रसम्मतं लम्बनं साधनमुपपन्नम्। "दृग्गर्भसूत्रयोरैक्यात् खमध्ये नास्ति लम्बनम्'।

(ख) नति:-

(क) नते परिचय: प्रयोजनञ्च–कुगर्भीयकुपृष्ठीयग्रहयोर्यत् शरान्तरं सा नति:। वस्तुत: सूर्यग्रहणे विभिन्नकक्षौ रवीन्दू गर्भाभिप्रायेण समावपि पृष्ठक्षितिजाभिप्रायेणान्तरितौ भवत:, तयो: बिम्बयोरुपरिगतयो: कदम्बप्रोतवृत्तयो: मध्यमस्पष्टशरान्तराख्यं नति: भवति। उक्तञ्च गोलपरिभाषायाम्–

कुगर्भी कुपृष्ठीय खेटयो: यत् शरान्तरम्।
सा नति: कथ्यते प्राज्ञैर्ग्रहणादिप्रसाधने।"

भास्करेणापि–

'यद्याम्योत्तरभावेन नतिसंज्ञं तदुच्यते।'

वस्तुतस्तु सूर्यग्रहणे छाद्यछादकयो: सूर्यचन्द्रयो: भिन्नकक्षागतत्वात् पृष्ठीयशर: गर्भीयशराद् आन्तरितो भवति, तस्यैव अन्तरस्य ज्ञानार्थं स्पष्टशरसाधने च नते: प्रयोजनम्। उक्तञ्च–

'कक्षाभेदादिह खलु नति:'

अपि च **'स्पष्टोऽत्र बाणो नतिसंस्कृत:'।**

(ख) नतिस्वरूपं साधनञ्च–

नते: क्षेत्रम् क्षेत्रेऽस्मिन् चं = गर्भीयरवीन्दू युति
ख = खमध्यम् वि = वित्रिभम्
ख च रवीन्द्वो: गर्भीयनतांशा: (दृग्ज्या)
नतांशज्या तु दृग्ज्यकेत्यादिना।

अथ पृष्ठाभिप्रायेण च लम्बितचन्द्र: च च' (दृग्वृत्ते चन्द्रलम्बनम्) चल = चन्द्रस्य नति: (क्रान्तिवृत्ते)। अत्र नते: साधनार्थ सूत्रमिदं सूर्यसिद्धान्ते प्रतिपादितं यत्–

दृक्क्षेप: शीततिग्मांशोर्मध्यभुक्त्यन्तराहत:।
तिथिघनत्रिज्यया भक्तो लब्धं सावनतिर्भवेत्।।

अथवा, दृक्क्षेपात् सप्ततिहताद् भवेद्वाऽवनति: फलम्। अथवा, तृतीयप्रकारेण अथ वा त्रिज्यया भक्ताद् सप्तसप्तकसंगुणात्। अर्थात् चन्द्रस्य दृक्क्षेप: (वित्रिभस्य नतांशा:) सूर्यचन्द्रयो: मध्यमगत्यन्तरेण संगुण्य पञ्चदशगुणितत्रिज्यया भक्ते सति नतिरायातीति प्रथम प्रकार:। यथा क्षेत्रेऽस्मिन् खविच च च' ल चापत्रिभुजयो: साजात्येन यदि खच (दृग्ज्या) कर्णे खवि (दृक्क्षेप:) भुज: तदा च च' (दृग्लम्बनज्या) कर्णे किमिति– ज्याचल = नति: = $\frac{\text{दृ क्षेप:}\times\text{ज्याद् ल (प.ल.)}}{\text{त्रि}}$

अथ च "गत्यन्तरस्य तिथ्यशा: परलम्बनलिप्तिका:' इत्यादिना परमलम्बनम्

$\frac{\text{सूर्येन्दुगत्यन्तरकाल:}}{15}$

उत्थापनेन नति = $\frac{\text{दृ.क्षे}\times\text{गं अ-}}{15'\text{त्रि}}$ उपपन्न: प्रथमप्रकार:।

अथवा सूर्यचन्द्रयो: मध्या गत्यन्तरं सामान्यतया (790'/35") – (59'/8") = 731'/27"

तेन $\frac{\text{दृ.क्षे}\ /731\times27"}{\text{त्रि}'15}$ = $\frac{\text{दृ.क्षेप:}/49}{\text{त्रि}}$ (स्वल्पान्तरात)

उपपद्यते तृतीय: प्रकार: यत् त्रिज्यया भक्ताद् सप्तसप्तसंगुणात् "इति"। अथवा-त्रिज्या = 3438 स्थापनेन पूर्वप्रकारे नति = $\frac{\text{दृ.क्षेप:}\times49}{3438}$ $\frac{\text{दृ.क्षेप:}}{70}$ = नति:

स्वल्पान्तरत्वात् द्वितीय: प्रकार: उपपन्न:। इत्थं नतिसाधनार्थं सर्वप्रथमं दृक्क्षेपसाधनमावश्यकम्।

नतिसंस्कार:–यदि दृक्क्षेप: (वित्रिभस्य नतांशा:) दक्षिणदिक्क: तदा नतिरपि दक्षिणदिक्का, उत्तरे दृक्क्षेपे उत्तरा नतिरिति, तद्यथोक्तं सूर्यसिद्धान्ते–

मध्यज्या-दिग्वशात् सा च विज्ञेया दक्षिणोत्तरा।

अथ च नतिचन्द्रविक्षेपयोरेक दिक्त्वे योगेन, भिन्नदिक्त्वे च अन्तरेण स्पष्टशर: जायते इति युक्तमेव यतो हि गर्भीयचन्द्रतो पृष्ठीय चन्द्रशर: यावान् दक्षिणोत्तर: सैव नति: स च पृष्ठ्यपेक्षया दिक्साम्येऽधिकमेव दिग्वैषम्ये च अन्तररूपमेव गोलविदां स्फुटैव धनर्णयोरन्तरमेव योग:' इत्यादिनियमाद्। अतोपपन्नं नत्यानयनं तत्संस्कारश्च तद्यथोक्तम्–**सेन्दुविक्षेपदिक्साम्ये युक्ता विश्लेषितान्यथा।** स्थितिविमर्दग्रासवलनादीनां ग्रहणावयवानां साधने नति: प्रयुज्यते उक्तञ्च सू. सि.–**तया स्थितिविमर्दार्धग्रासाद्यं तु यथोदितम्।** भास्करोऽपि– "स्पष्टोऽत्र बाणो नति संस्कृतस्स्यात्"।

(ग) ग्रासस्वरूपविवेचनम् इष्टग्रासानयनं च–

(क) **ग्रासपरिचय:**–छाद्यछादकयोरभावत्वं नाम ग्रहणम्। अथ च छाद्यबिम्बेन छादकबिम्ब: यावान् छाद्यते अर्थात् ग्रस्यते तावान् ग्रास: भवति। यथा क्षेत्रेऽस्मिन् च चन्द्रबिम्बकेन्द्रम् 'भू' भूभाबिम्ब: केन्द्रम्। अत्र भूभया चन्द्रबिम्बस्य–

ग्रास: (1)

ग्रहणं वर्तते तथा च चन्द्रस्य न र तुल्यप्रदेश: भूभया छाद्यते अत: न र = ग्रासमानम्। यदि चेत् खण्डैकस्य छादनं भवति तदा खण्डग्रास: भवति। अन्यथा सम्पूर्णे हि सम्पूर्णग्रहणम्, अधिके सति खग्रास: जायते।

(ख) ग्राससाधनम्–छाद्यछादकबिम्बयो: योगार्द्धात् चन्द्रशरं विशोध्य यल्लभ्यते तावान् ग्रास:। यदि शरमानं योगार्द्धात् अधिकं तदा ग्रास: न संभवति। यथा क्षेत्रेऽस्मिन्–

सून = सूर्यबिम्बार्द्ध:
म च = चन्द्रबिम्बार्द्ध:
सू च = चन्द्रविक्षेप:

अत्र सून मच अनयोर्योगात् सूचमितस्याधिकत्वात् न ग्रहणम्। अथ च यदि ग्राह्यमानादधिको ग्रास: अर्थात् चन्द्रग्रहणे चन्द्रप्रमाणात् सूर्यग्रहणे सूर्यबिम्बप्रमाणात् अधिके ग्रासे सम्पूर्ण ग्रहणं भवतीति प्रस्फुटमेव। तद्यथोक्तम्–

तात्कालिकेन्दुविक्षेपं छाद्यछादकमानयो:
योगार्धात् प्रोज्झ्य यच्छेषं तावच्छन्नं तदुच्यते

ग्राह्यमानाधिके तस्मिन् सकलं न्यूनमन्यथा
योगार्धादधिके न स्याद् विक्षेपे ग्राससम्भवः।
(सू०सि०चन्द्र०4/10-11)

तच्छरोनं भवेच्छन्नमेतद्यदा ग्राह्यहीनावशिष्टं तु खच्छन्नकम्।

(घ) इष्टकालिकग्रासानयनम्- (क) चन्द्रग्रहणे इष्टकालिकग्रासानयनम्—सर्वप्रथमं सूर्यचन्द्रयोः कलात्मकं गत्यन्तरं कार्यम्। स्पर्शादनन्तरं मोक्षात्पूर्वं वा यावतीषु घटीषु ग्रासमानमभीष्टं तावत्य घट्या स्पर्शिका मौक्षिका वा स्थित्यर्द्धेन ऊने कृते सत्यः गत्यन्तरेण गुण्यात् षष्टिभिश्च भाज्यम् तेन या लब्धिः समायाति सा कोटिसंज्ञिका। तात्कालिको शरः भुजः, अतः कोटिभुजयोः वर्गयोगेन मूले च गृहीते सति कर्णः ग्राह्यग्राहकयोः केन्द्रान्तरूपं भवति। मानयोगार्धात् इदं कर्णमानं प्रोज्झ्य यदवशिष्यते तावान् ग्रासः। तद्यथोक्तम् सूर्यसिद्धान्ते–

इष्टनाडीविहीनेन स्थित्यर्द्धेनार्कचन्द्रयोः
भुक्त्यन्तरं समाहन्यात् षष्ट्याप्ताः कोटिलिप्तिकाः।।
क्षेपो भुजः तयोर्वर्गयुतेर्मूलं श्रवस्तु तत्।
मानयोगार्धतः प्रोज्मत्य ग्रासस्तात्कालिको भवेत्।।
(सू०सि०चन्द्रग्र०4/18-20)

ग्रहणे शरादिकं सर्वं सरलरेखारूपं स्वीकृत्य ग्राससाध्यो यथा इष्टकालिकः शरो भुजः शरमूलात् भूभाकेन्द्रान्तं रविकेन्द्रान्तं क्रान्तिवृत्ते इष्टघटी सम्बन्धिकलाः = कोटिः अनयोर्योगः कर्णमिति स्पष्टमेव। अत्र कोटिकलानां ज्ञानार्थमनुपातः यदि षष्टिघटिभिः चन्द्रार्कयोर्गत्यन्तरकलाः तदा इष्टेनस्थित्यर्द्धघटीकाभिः केति –

$$\frac{\text{ग.अ.क×इष्टेनस्थित्यर्द्धघट्यः}}{60} = \text{कोटिकलाः।}$$

चन्द्रग्रहणे ग्राह्यग्राहकयोरेककक्षागतत्वात् लम्बनत्योरभावः तस्मात् आनीता कोटिः उपपन्ना। परन्तु सूर्यग्रहणे छाद्यछादकयोः भिन्नकक्षागतत्वाद् लम्बनत्योः सद्भावात् गर्भीयपृष्ठीय अमान्ते भेदत्वात् स्पष्टकोटिकलानां आनयनार्थमनुपातः विधीयते यत् यदि स्फुटस्थित्यर्द्धेन मध्यस्थितिकोटिकला: तदा चन्द्रकोटिकला भेदान्तरे किमिति त्रैराशिकानुपातेन स्पष्टसूर्यकोटिकला:

$$\frac{\text{साधित (चन्द्रस्य) कोटि लिप्ताः×मध्यस्थित्यर्द्धः}}{\text{स्फुटस्थित्यर्द्ध}} = \text{रवेः स्पष्टकोटिकलाः।}$$

अतोपन्नं सूर्यकोटिकलायाः सूत्रमिदं सूर्यसिद्धान्तोक्तम्–

भानोर्ग्रहे कोटिलिप्ताः मध्यस्थित्यर्द्धसंगुणाः।
स्फुटस्थित्यर्द्धसंभक्तः स्फुटाः कोटिकलाः स्मृताः।।
(सू०सि०च.ग्र०4219)

ननु भुजरूपस्य शरस्य कोटेश्च ज्ञानात् बौद्धायन् प्रमेयेन **भुजकोट्योर्वर्गयोगः कर्णसमः** इत्यस्मात् ग्राह्यग्राहकबिम्बकेन्द्रान्तरं कर्णरूपं ज्ञायते। अतः ग्राह्यग्राहकयोर्भानयोगार्द्धात् हीने सति इष्टकालिकः ग्रासः आयातीति दिक्। अतोपपद्यते सूर्यसिद्धान्तोक्तम्–

क्षेपो भुजस्तयोर्वर्गयुतेर्मूलं श्रवस्तु तत्।
मानयोगार्धतः प्रोज्मत्य ग्रासस्तात्कालिको भवेत्।
(सू०सि०च.ग्र०4/20)

(क्षेत्रस्तु पूर्ववदेव) (1)

परं इष्टकालिकशरस्य अज्ञानात् मध्यग्रहणकालिकस्पष्टशरादेव कोट्यादीनां साधनमत्र विहितमतः ग्रासानयेन स्थूलता समायाति, अतः असकृद् संस्कारेण यदान्तरं शून्यरूपं तावत्पर्यन्तिका कोटिः साध्या, तेन सूक्ष्मः ग्रासः साध्यः। अन्यथा स्थूलत्वमेव। अन्यत् सर्वं स्पष्टमेव।

स्फुटतिथ्यवसाने तु मध्यग्रहणमादिशेत्
स्थित्यर्धनाडिका हीने स्पर्शो मोक्षस्तु।
तद्वदेव विमर्दार्धनाडिका हीनसंयुते
निमीलनोन्मीलनाख्ये भवेतां सकलग्रहसंयुते।
(सू.सि.च.4/16-17)

स्थित्यर्द्धविमर्दार्ध–

ग्राह्यग्राहकसंयोगवियोगौ दलितौ पृथक्
विक्षेपवर्गहीनाभ्यां तद्वर्गाभ्यामुभे पदे।
षष्ट्या संगुण्य सूर्येन्द्वोर्भुक्त्यन्तरविभाजिते,
स्यातां स्थितिविमर्दार्धे नाडिकादिफले तयोः।।
(सू०सि०च-4/12-13)

सकृत्कर्म–

स्थित्यर्द्धनाडिकाभ्यस्ता गतयः षष्टिभाजिताः।
लिप्तादिप्रग्रहे शोध्यं मोक्षे देयं पुनः पुनः।।
(सू०सि०च०4/14)

(ग) लम्बनं नतिश्च वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— किमस्ति लम्बनं नाम?
उत्तरम्— गर्भीयपृष्ठीयग्रहयोः पूर्वापरमन्तरं लम्बनं नाम।
2. **प्रश्नः**— लम्बननत्योः उत्पत्तिः कथं भवति?
उत्तरम्— कक्षाभेदत्वादेव।
3. **प्रश्नः**— लम्बनं कतिविधं कौ च तौ?
उत्तरम्— द्विविधम्, 1. दृग्लम्बनं 2. स्फुटलम्बनञ्च।
4. **प्रश्नः**— लम्बनोत्पत्तौ के हेतवः भवन्ति?
उत्तरम्—1. रविचन्द्रयोः कक्षाभेदः, 2. भूगर्भ- भूपृष्ठयोः भूव्यासार्द्धतुल्यमन्तरम्, 3. रविचन्द्रयोः उपरिगतगर्भीय-पृष्ठीयसूत्रयोः अन्तरम्, 4. गर्भीय-पृष्ठीयनतांशयोः अन्तरम्।
5. **प्रश्नः**— किमस्ति दृग्लम्बनम्?
उत्तरम्—दृङ्मण्डले गर्भीयपृष्ठीयग्रहयोरन्तरं दृग्लम्बनम्।
6. **प्रश्नः**— किमस्ति स्पष्टलम्बनम्?
उत्तरम्—क्रान्तिवृत्ते गर्भीय-पृष्ठीयग्रहयोरन्तरं स्पष्टलम्बनम्।
7. **प्रश्नः**— दृग्लम्बनस्य किं रूपम्?
उत्तरम्— कर्णरूपम्।
8. **प्रश्नः**— स्पष्टलम्बनस्य किं रूपम्?
उत्तरम्— कोटिरूपम्।
9. **प्रश्नः**— नति इत्यस्य का परिभाषा?
उत्तरम्— कुगर्भीयकुपृष्ठीयग्रहयोर्यत् शरान्तरं सा नतिः।
10. **प्रश्नः**— नति इत्यस्या किं प्रयोजनम्?
उत्तरम्— कक्षाभेदादिह खलु नतिः।
11. **प्रश्नः**— नतिसाधनार्थं सर्वप्रथमं किं साधनमावश्यकम्?
उत्तरम्— दृक्क्षेपसाधनमावश्यकम्।
12. **प्रश्नः**— लम्बनाभावः कुत्र जायते?
उत्तरम्— खमध्ये।
13. **प्रश्नः**— परमक्रान्तिज्यामानं किं भवति?
उत्तरम्— 1397' कलापरिमितम्।

(V-C-73) (18) भूभ्रमणम्, भूभासाधनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) **भूभापरिचयः तत्स्वरूपञ्च**–भूमेः भा अर्थाच्छाया नाम भूभा। रविकिरणाभिमुखं गतस्य भूबिम्बस्य विरुद्धदिशि तमोमयी या छाया सैव भूभा। अथ च प्रकाशकसूर्यबिम्बस्य प्रकाश्यभूबिम्बात् महत्वात् भूभा वृत्ताधारसूच्याकारा भवति। अतः तमोमयी भूभा 'सूची' इति पदेनापि व्यवह्रियते। सा च छाया सर्वथा रवितः विपरीतदिशि एव उत्पद्यते इति स्पष्टमेव, तथापि चन्द्रकक्षास्थक्रान्तिवृत्त धरातलमतिक्रम्य दूरं याति, अतः चन्द्रग्रहणे स्वयं चन्द्रं भूभायां समायाति तेन चन्द्रग्रहणे छादिकेयं भूभैव; उक्तञ्च भास्करेण–

भानोर्बिम्बपृथुत्वादपृथुपृथिव्याः प्रभा हि सूच्यग्रा।
दीर्घतया शशिकक्षामतीत्य दूरं बहिर्याता।।

अस्याः एव भूभायाः राहुसंज्ञापि पुराणैः कृता विद्यते, तद्यथा–

राहु कुभा मण्डलगः शशाङ्कः
शशाङ्कगश्छादयतीनबिम्बम्।
तमोमयः शम्भुवरप्रदानात्
सर्वागमानामपि रुद्धमेतत्।।

अतः वक्रदिशिरियं भूच्छाया प्रचलतीति स्पष्टम्।

भूभासाधनम्–सूर्यसिद्धान्तोक्तभूभासाधनविधिस्तु–

स्फुटेन्दुभुक्तिर्भूव्यास गुणिता मध्ययोद्धृता
लब्धं सूची, महीव्यासस्फुटार्कश्रवणान्तरम्।
मध्येन्दुव्यासगुणितं मध्यार्कव्यासभाजितम्।
विशोध्य लब्धं सूच्यां तु तमो लिप्तास्तु पूर्ववत्।।
(सू०सि०चव4/4-5)

अर्थात् चन्द्रस्य स्पष्टा गतिः भूव्यासेन गुणिता, चन्द्रस्य मध्यगत्या भक्ता, तदा लब्धं यत् सा 'सूचीसंज्ञा' भवति। भूभाबिम्बस्य कलामानं ज्ञानार्थं पञ्चदशभिः भक्तं, तदा कलात्मकं भूभाबिम्बं भवति।

क्षेत्रेऽस्मिन् र स्प = रविबिम्बव्यासार्द्धम्
र = रविकेन्द्रम्
भू = भूकेन्द्रम्
भूस्प = भूव्यासार्द्धम्

भूबिन्दोः रविव्यासार्द्धोपरि कृतो लम्बः स्पर्शरेखायाः समानान्तरः अतः भूस्प 1 = स्पलं

अतः भूव्यासार्धोनं रविव्यासार्द्धम् = र स्प-ल स्प = रलं

भूर = रविकर्णः, भूव = चन्द्रकर्णः

पूर्ववदेव स्प/1 ल/1 = वम स्प

अतः भूस्प-भूल' = स्प/1ल'वम

अत्र रभूल, भू-वल'जात्यत्रिभुजयोः रेखा-गणितरीत्यासामात्येनानुपातः यदि भूररवि-कर्णे रल भुजः तदा भूव चन्द्रकर्णे किमिति

तदा-रलं' भूव = भूलं'

भूर भूद्या

मानोत्थापनेन = (र.व्यास:1/2-भूव्यास-1/2)

भूल' = रविकर्णः

अनेन ननु भूस्प1-भूल' = मव अतः

भूव्या1/2-भू (र.व्या.1/2-भूव्या1/2) च.क.

र.क्र = मव द्विभिर्गुणिते सति भूव्यासः (र'व्यासः-भूव्यासः) 'च.क

अस्य परिवर्तन चन्द्रकक्षायां (स्पष्टीकरणाय) "स्फुट स्वभुक्त्या गुणितौ

मध्यभुक्त्यौद्धृतौ स्फुटौ इत्यादिना चन्द्रकक्षायां स्पष्टभूव्यासः भूभाव्यासः

= भूव्या" च ÷ स्प गतिः (सूची)

चं ÷ मं गतिः

स्पष्टरविव्यासः = र.व्या.'स्पं.च.ग. स्वरूपोत्थापनेन पूर्वसाधितसूच्या विशोध्य

च.म.ग

भूभाव्यासः = सूची- (र.व्या-भू.व्या) 'म.च.योव्या

म.र.यो.व्या

इत्थं योजनादिकं भूभामानं चन्द्रकक्षागतं भवति, पञ्चदशभि भक्ते सति कलात्मिका भूभा आयाति, अतः उपपन्नं स्फुटेन्दुः....पूर्ववत् इति सूत्रम्। भास्करोऽपि-

भूव्यासहीनं रविबिम्बमिन्दु-
कर्णाहतं भास्करकर्णभक्तम्।
भूविस्तृतिर्लब्धफलेन हीना
भवेत् कुभा विस्तृतिरिन्दुमार्गे।

एवमेव सर्वेषु सिद्धान्तग्रन्थेषु भूभाबिम्बसाधनं प्राप्यते, तथापि वस्तुतेयं भूभा न चन्द्रकक्षीया यतो हि द्विगुणिता भूभा चन्द्रकक्षातो बहिर्यातीति क्षेत्रावलोकनेन गोलविदां स्फुटमेव, अत एव कमलाकरेण भास्करोक्तभूभासाधनस्य खण्डनं कृतम्। परन्तु सौरसिद्धान्तेऽपि तां विधिमेव दृष्ट्वा मौनं धारितम्। मुनीश्वरोक्तभूभा हि अनयोरपेक्षया किञ्चित्सूक्ष्मा भवति।

अर्थात् स्पष्टचन्द्रस्य गतिः भूव्यासप्रमाणेन "योजनानि शतान्यष्टौ" इत्यादिना गुणिता "चन्द्रस्य मध्यगत्या उद्धृता तदा लब्धिः सूची संज्ञिका, अथ च भूव्यासस्फुटसूर्य-कर्णयोर्योजनात्मकमन्तरं तत् मध्यचन्द्रबिम्बव्यासः अर्थात् 480 योजनैः गुणितं मध्यार्कव्यासेन 6500 योजनेन भक्ते सति या लब्धिः तां लब्धिं पूर्वसाधितायां सूच्यां विशोधनेन योजनात्मकं भूभाव्यासमानं भवति। 15भिर्भक्ते सति "तिथ्याप्तां मानलिप्तिकाः" इत्यस्मात् कलात्मिकां भूभाव्यासलब्धिं आयातीति दिक्।

(ख) भूभ्रमणम्–ज्योतिषवाङ्मयस्य बहुष्वपि ग्रन्थेषु भूमेश्चलेत्यभिधया विषयो सम्प्राप्यते। आर्यभट्टं विहाय सर्वेऽपि ग्रन्थकर्त्तारः भुवः अचलत्वमेव प्रतिपादितवन्तः। यद्यपि पश्चाद्ग्रन्थकर्त्तारः ज्योतिषशास्त्रस्य मर्मज्ञाः विद्वांसः भूस्थिरं प्रकल्प्य सर्वाऽपि गणना प्रतिपादितवन्तः। अस्माकं ज्योतिषशास्त्रस्याद्यः ग्रन्थकारः आचार्य आर्यभट्टः आसीत्। येन सर्वप्रथमं भूभ्रमणविषये प्रोक्तं यत्–

अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमगं यद्वत्।
अचलानि भानि तद्वत् समपश्चिमगानि लङ्कायाम्।।
(आर्यभटीयम्, गो.पा.9)

भूभासाधन-भूभ्रमणविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— किं नाम भूभा?
   उत्तरम्— भूमेः भा अर्थाच्छाया नाम भूभा।
2. **प्रश्नः**— भूभा इत्यस्य का परिभाषा?
   उत्तरम्— रविकिरणाभिमुखं गतस्य भूबिम्बस्य विरुद्धदिशि तमोमयी या छाया सैव भूभा।
3. **प्रश्नः**— भूभायाः का रूपा?
   उत्तरम्— वृत्ताकारसूचीरूपा।

4. **प्रश्नः**— पुराणै: भूभायाः का संज्ञा कृता विद्यते?
   उत्तरम्— पुराणै: भूभायाः राहुसंज्ञापि कृता विद्यते।
5. **प्रश्नः**— भूच्छाया कया दिशि प्रचलति?
   उत्तरम्— वक्रदिशिरियं भूच्छाया प्रचलतीति।
6. **प्रश्नः**—पश्चाद्ग्रन्थकर्त्तारः ज्योतिषशास्त्रस्य मर्मज्ञाः विद्वांसः भुवः चलत्वमचलत्वं वा प्रतिपादितवन्तः?
   उत्तरम्—भूस्थिरं प्रकल्प्य सर्वाऽपि गणना प्रतिपादितवन्तः।
7. **प्रश्नः**— आर्यभटः भुवः चलत्वमचलत्वं वा स्वीकृतम्?
   उत्तरम्— चलत्वं स्वीकृतम्।
8. **प्रश्नः**—ज्योतिषशास्त्रस्य मर्मज्ञाः विद्वांसः भुवः चलत्वमचलत्वं वा स्वीकृतम्?
   उत्तरम्—भूस्थिरं प्रकल्प्य सर्वाऽपि गणना प्रतिपादितवन्तः।
9. **प्रश्नः**—भूभ्रणसिद्धान्तस्य प्रवर्तकः कः विद्यते?
   उत्तरम्— आर्यभटः।
10. **प्रश्नः**—भुवो भूगोलस्य भ्रमणं परिवर्तनं किमुच्यते?
    उत्तरम्— भूभ्रमणमुच्यते।
11. **प्रश्नः**—भूभ्रमणविषये मतं कतिविधम्?
    उत्तरम्— द्विविधम्।
12. **प्रश्नः**—संस्कृतज्योतिषसिद्धान्ते भूचलनस्य प्रत्यक्षानुभवाभावात् कस्य भ्रमणं सर्वैः स्वीकृतम्?
    उत्तरम्— सूर्यस्यैव।
13. **प्रश्नः**—उत्तरगोलः कस्मात् भवति?
    उत्तरम्— मेषात्।

(V-C-73) (19) ग्रहस्पष्टीकरणम्-एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) परिचयः–मध्यमाधिकारोक्ताहर्गणवशात् आनीताः ग्रहाः क्षितिजसन्निधिगाः मध्यमाः फलप्रवृत्त्य-नर्हाः यतो हि भास्करेण-**यात्राविवाहोत्सवजातकादौ खेटस्फुटैरेव फलं स्फुटत्वम्।** तेषामेव मध्यग्रहाणां स्पष्टीकरणार्थं ग्रहस्पष्टीकरणविधिः प्रोक्ता आचार्यैः। तत्र अहर्गणोत्पन्नाः ग्रहाः नाडीवृत्तीय-मध्यमार्कोदयकालिकाः उदयान्तरेण संस्कृताः सन्तः लङ्कोदयकालिका (स्फुट-मध्यमाः) देशान्तरचरान्तरसंस्कारेण च स्वदेशीयमध्यमा एव भवन्ति। सर्वेऽपि ग्रहाः स्वस्वकक्षावृत्ते प्रतिक्षणं समागतियोजनैः भ्रमन्ति। परन्त्वत्र भूवासिभिः यदा प्रत्यक्षतः दृश्यन्ते तदेव गणितस्य उपादेयतां सिद्ध्यति। यथा भास्करैः–**भ्रमन्ग्रहस्वप्रतिमण्डले नृभिः स यत्र कक्षावलये विलोक्यते। स्फुटो हि तत्र।**

(ख) प्रयोजनम्–अथ च शीघ्रमन्दोच्चपाताख्याः **ग्रहाणां गतिहेतवः** इति सूर्यसिद्धान्तवचनेन ग्रहाणां प्रतिक्षणविलक्षणगत्यवलोकनात् मन्दशीघ्रप्रतिवृत्तनिष्पत्त्या मन्दशीघ्रफलद्वयं निष्पद्यते, अतः मध्यग्रहे स्पष्टीकरणार्थं मुख्यतया संस्कारद्वयं विधीयते- (क) मन्दफलम् (ख) शीघ्रफलञ्चेति।

(ग) मन्दशीघ्रफलोपपत्तिः–गणितागतो मध्यगतो मन्दोच्चेन शीघ्रोच्चेन चापकृष्टो यावदन्तरितो भवति तावताख्यं फलम्। वस्तुतः फलोत्पत्ताविदं कारणं यत् ग्रहभ्रमणवृत्तस्य प्रतिवृत्ताख्यस्य केन्द्रं यतो भूगर्भादन्यत्र अन्त्यफलज्या तुल्यान्तरे भवतीति भूस्थो द्रष्टा दृष्ट्युपलब्धं ग्रहं गणितागततुल्यं न पश्यति, अनयोरेव अन्तरं मन्दशीघ्रफलरूपे सिध्यति। उक्तञ्च–

भूभेर्मध्ये खलु भवलयस्यापि मध्यं यतः स्यात्।
यस्मिन् वृत्ते भ्रमति खचरो नास्ति मध्यं कुमध्ये।।
भूस्थो द्रष्टा नहि भवलये मध्यतुल्यं प्रपश्येत्।
तस्मात्तज्ज्ञैः क्रियत इह तद्दोः फलं मध्यखेटे।।
(सि.शि.छेद्यका, 7)

अतः भूगर्भात् मन्दप्रतिवृत्तस्थदृगुपलब्धग्रहोपरिगतं सूत्रं ग्रहकक्षायां यत्र लगति तत्र मन्दस्पष्टग्रहः तथा च प्रतिवृत्तस्थग्रहबिन्दोर्नीचोच्चरेखा समानान्तरा कक्षावृत्तीय-

तिर्यग्रेखोपरि यत्र लगति स मध्यमग्रहः अतः मन्दस्पष्टग्रहयोरन्तरं मन्दफलं भवति। मन्दनीचोच्चवृत्तभङ्ग्या अस्य अवस्थितिः ज्ञातुं शक्यते। अथ कक्षावृत्तीयमध्यमग्रहबिन्दोः अन्त्यफलज्या तुल्यव्यासार्द्धेन कृतं वृत्तं मन्दनीचोच्चसंज्ञं, भूकेन्द्रात् कक्षास्थमध्यखेटगतं सूत्रं यत्र नीचोच्चवृत्तोर्ध्वपाल्यां लगति तत्राप्युच्चं ज्ञेयं यत्राधो लगति तन्नीचम्। अस्मिन् मन्दनीचोच्चशीघ्रनीचोच्चवृत्ते प्रतिवृत्तापेक्षया विलोमदिशि भ्रमति, अत एवात्रानुपातः क्रियते। भुजफलज्ञानाय यदि त्रिज्यया केन्द्रज्या लभ्यते तदाऽन्त्यफलज्या किमिति–

$$\text{भुजफलम्} = \frac{\text{केन्द्रज्या} \times \text{अन्त्यफलज्या}}{\text{त्रिज्या}}$$

त्रिज्ययोर्निष्पत्तिः परिधिनिष्पत्तिसमा अतः मानोत्थापनेन

$$\text{भुजफल} = \frac{\text{केन्द्रज्या} \times \text{मन्दपरिधि}}{360^\circ}$$

इदं भुजफलमेव मन्दफलरूपेण सूर्यसिद्धान्ते स्वीकृतं, तद्यथोक्तं तद्गुणे भुजकोटिज्ये भगणांशविभाजिते तद्भुजज्याफलधनुर्मान्दं लिप्तादिकं फलम्। शीघ्रफलसाधने तु शीघ्रकर्णेन सह अनुपातः विधीयते। भृगर्भात् शीघ्रप्रतिवृत्तस्थग्रहावधि शीघ्रकर्णः भवति।

अत्र यदि शीघ्रकर्णे भुजफलं तदा त्रिज्याग्रे किमिति शीघ्रफलं कलात्मकमायाति, अस्यास्चापं शीघ्रफलं चापात्मकं समायाति। अत एवोक्तं सूर्यसिद्धान्ते–

त्रिज्याभ्यस्तं भुजफलं चलकर्णविभाजितम्।
लब्धस्य चापं लिप्तादि फलं शैघ्र्यमिदं स्मृतम्॥
(सूर्यसि.स्प.2/41-42)

मध्यमग्रहे अनयोः संस्कारः–सूर्यचन्द्रयोः शीघ्रोच्चाभावात् एकं मान्दमेव कर्म मान्दं कर्मैकमर्केन्द्वोरिति वचनात् भवति, पञ्चताराग्रहेषु च मन्दशीघ्रयोः संस्कारः भवति, तत्र प्रथमं मध्यग्रहः शीघ्रफलस्यार्द्धेन संस्क्रियते, तं मध्यं प्रकल्प्य पुनः फलानयनं कृत्वा अर्धमन्दफलेन पुनः तथैव रीत्या मन्दफलसम्पूर्णसंस्कारेण अन्ते च सकलशीघ्रफलसंस्कारेण च मध्यमग्रहा स्पष्टग्रहो भवतीत्यत्रोपलब्धिरेव प्रमाणम्। अत उपपद्यते–

शैघ्र्यं मान्दं पुनर्मान्दं शैघ्र्यं चत्वार्यनुक्रमात्।
मध्ये शीघ्रफलस्यार्द्धं मान्दमर्धफलं तथा।
मध्यग्रहे मन्दफलं सकलं शैघ्र्यमेव च।
(सू.सि.स्प.2/45)

सा मन्दशीघ्रफलयोः धनर्णविषये प्रोच्यते मेषादिकेन्द्रे अर्थात् उच्चात्षड्भ्यन्तरे फलद्वयं धनं तुलादौ च अर्थात् केन्द्रात् षड्भ्यधिके सति फलद्वयं ऋणं कर्तव्यम्। वस्तुतस्तु **ग्रहात्प्राग्भगणार्धस्थः प्राङ्मुखं कर्षति ग्रहम्** इति वचनात् उच्चात् षड्भ्यन्तरे मध्यग्रहस्थिते स्पष्टग्रहोऽधिको, अन्यथा मध्यग्रहापेक्षया स्पष्टग्रहः न्यून एवेति ग्रहोनमुच्चं केन्द्रमिति सिद्धान्ते सर्वमुपपन्नमेव यत्–

अजादिकेन्द्रे सर्वेषां शैघ्र्ये मान्दे च कर्मणि,
धनं ग्रहाणां लिप्तादि तुलादावृणमेव च।
(सूर्यसि०स्प०2/45)

(घ) मन्दफलम्–भूमिकायां पूर्ववदेव तत्र नीच्चोच्चरेखोपरि लम्बरेखा भुजसंज्ञिका तथा प्रतिवृत्तीयग्रहस्थानान्नीच्चवृत्तीयतिर्यग्रेखोपरि लम्बरेखा कोटिफलसंज्ञिका। यथा क्षेत्रेऽस्मिन्– भू = भूकेन्द्रम् (कक्षावृत्तकेन्द्रमपि) के = प्रतिवृत्तकेन्द्रम्, केभू = मन्दान्त्यफलज्या, केभू = उ अ = नीग, कक्षावृत्ते म = मध्यमग्रहः, स = स्पष्टग्रहः, ग्र = प्रतिवृत्ते ग्रहस्थानम् ग्रम = अन्त्यफलज्या, उग्रनी मन्दनीचोच्चवृत्तम् भूग्रः = मन्दकर्णः मज = भूक = मन्दकेन्द्रज्या अतः मक = जभू = केन्द्रकोटिज्या मस = कक्षावृत्ते मन्दस्पष्ट ग्रहान्तरम् उ' = उच्चोच्चवृत्ते उच्चं, नी = नीचम् उग्र = नीचोच्चवृत्ते केन्द्रम् (ग्रहोनमुच्चं केन्द्रमिति सिद्धान्तेन) तज्ज्या ग्रल = मन्दभुजफलम्, ग्रला = नीचोच्चवृत्ते कोटिज्या, भूम त्रिज्या, अथ भूभक ग्रमल त्रिभुजयोः साजात्यात् अनुपातः क्रियते त्रैराशिकेन यदि भूम त्रिज्यायां भूक केन्द्रज्यां तर्हि "ग्रम" तुल्यान्त्यफलज्या तुल्य त्रिज्यया किमिति– $\frac{\text{भूक} \times \text{ग्रम}}{\text{भूमं}} = \text{ग्रल}$

$$\text{तेन भुजफलम्} = \frac{\text{केन्द्रज्या} \times \text{अन्त्यफलज्या}}{\text{त्रिज्या}}$$

अथ च त्रिज्ययोर्निष्पत्तिः परिधिनिष्पत्तिसमा भवति अतः

$$\frac{\text{केन्द्रज्या} \times \text{मन्दपरिधिः}}{360^\circ} = \text{भुजफलम्}$$

$$\text{तथैव कोटिफलम्} = \frac{\text{केन्द्रकोटिज्या} \times \text{अंत्यफलज्या}}{360}$$

$$\frac{\text{कोज्याके} \times \text{म.परिधिः}}{360}$$

अत्र मन्दपरिधिस्थाने रवेर्मन्दपरिध्यंशाः मनवः शीतगो रदाः इत्यादिना मध्यपरिधिवशात् ओजयुग्मान्तरगुणा भुजज्या त्रिज्ययोरद्धृता युग्मवृत्ते धनर्णं स्यादोजादूनेऽधिके स्फुटमिति सिद्धान्तेन स्पष्टमन्दपरिधिं प्रसाध्य स्थाप्यम्।

अनेन त्रैराशिकानुपातेनागतं यद् भुजफलं चापरूपं तदेव स्वल्पान्तरात् मन्दफलं स्वीकृतम्; अत उपपन्नं–

तद्गुणे भुजकोटिज्ये भगणांशविभाजिते।
तद् भुजज्या फलधनुर्मान्दं लिप्तादिकं फलम्॥

इदमत्र विशेषं यत् भास्कराचार्येण ज्याचापयोः अन्तरं प्रदर्श्य अत्र स्थूलत्वं विवेचितम् तेन पुनः

$$\frac{\text{भुजफलम्} \times \text{त्रिज्या. के} \times \text{मं.प} \times \text{त्रि}}{\text{मन्दकर्णः}} = \frac{\text{चापात्मकं}}{360\text{० मक}}$$

मन्दफलं वास्तविकं सूक्ष्मतरं च प्रसाधितम्। अन्यत् सर्वं सौरसिद्धान्तोक्त एव। संस्कारः पूर्ववदेव।

(ङ) शीघ्रफलम्–भूमिका पूर्ववदेव। **शीघ्रफलं नाम मन्दस्पष्टस्पष्टग्रहयोरन्तरं।** अत्र मन्दफलसंस्कृतः मन्दस्पष्टग्रह एव मध्यमं प्रकल्प्य शीघ्रकर्णवशात् फलानयनं क्रियते। अत एवोक्तम् भास्करेण–

मन्दस्फुटो मध्यखगः प्रकल्प्य।

अथ किमर्थं शीघ्रकर्णसाधनं कर्तव्यमिति चेदुच्यते भास्करेण–

नाशङ्कनीयं न चले किमित्थं यतो विचित्रा फलवासनाऽत्र।

शीघ्रकर्णसाधने हि "तद्गुणे भुजकोटिज्ये"त्यादिना साधितं शीघ्रकोटिफलं केन्द्रे मकरादौ स्थिते त्रिज्यायाः अधिकत्वात् कोटिफलं योज्यं कर्कादौ च नीचादुभयत्र राशित्रयान्तरे त्रिज्याकोटिफलयोर्वियोगेन स्पष्टा कोटिरायाति, भुजफलं च ज्ञातमेव, अथ च "भुजकोट्योर्वर्गयोगमूलः कर्णसमः" इत्यादिना शीघ्रकर्णं साधनीयम्। अत एवोक्तम्–

शैघ्र्यं कोटिफलं केन्द्रे मकरादौ धनं स्मृतम्,
संशोध्यं तु त्रिजीवायां कर्कादौ कोटिजं फलम्।
(सू.सि.2/40)

तद्बाहुफलवर्गैक्यान्मूलं कर्णश्चलाभिधः॥

अथात्र शीघ्रफलसाधनार्थं प्रथमं शीघ्रभुजफलसाधनं विधीयते तत्रानुपातः यत् यदि त्रिज्यायां शीघ्रकेन्द्रज्या तदा शीघ्रान्त्यफलज्यायां किमिति, "तद्गुणे भुजकोटिज्यो भगणांशविभाजिते" इत्यनेन–

$$\text{शीघ्रभुजफलम्} = \frac{\text{शीघ्रकेन्द्रज्या} \times \text{शीघ्रान्त्यफलज्या}}{\text{त्रिज्या}}$$

अत्र पुनरनुपातः यत् यदि शीघ्रकर्णे शीघ्रभुजफलमितमन्तरं समायाति तर्हि कक्षावृत्तीयत्रिज्यया किमिति तदा शीघ्रफलमायाति। तद्यथा त्रैराशिकानुपातः–

$$\frac{\text{भुजफलम् (शीघ्रः)} \times \text{त्रिज्या} = \text{शीघ्रफलज्या।}}{\text{शीघ्रकर्णः}}$$

अस्याः ज्यायाः ज्यां प्रोज्झ्य शेषं तत्वाश्विहतमित्यादिना अंशात्मकं मानं शीघ्रफलांशाः भवन्ति। तद्यथोक्तं सूर्यसिद्धान्ते–

त्रिज्याभ्यस्तं भुजफलं चलकर्णविभाजितम्।
लब्धस्य चापं लिप्तादिफलं शैघ्र्यमिदं स्मृतम्॥
(सूर्यसि०2/42)

संस्कारः पूर्ववदेव तत्र "एतदाद्ये कुजादीनां चतुर्थे चैव कर्मणि"।

(च) ग्रहस्पष्टीकरणविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— किमस्ति ग्रहस्पष्टीकरणम्?
   उत्तरम्— मध्यग्रहाणां स्पष्टीकरणार्थं ग्रहस्पष्टीकरणम्।
2. **प्रश्नः**—कः स्पष्टसंस्कारः?
   उत्तरम्— येन संस्कारविशेषेण मध्यमग्रहाः दृश्ययोग्या भवेयुः सः स्पष्टसंस्कारः।
3. **प्रश्नः**— ग्रहस्पष्टीकरणस्य किं प्रयोजनम्?
   उत्तरम्— "शीघ्रमन्दोच्चपाताख्याः ग्रहाणां गतिहेतवः"।
4. **प्रश्नः**—मध्यग्रहे स्पष्टीकरणार्थं मुख्यतया किं संस्कारद्वयं विधीयते?
   उत्तरम्— (क) मन्दफलम् (ख) शीघ्रफलञ्चेति।
5. **प्रश्नः**— मन्दफलं किं भवति ?
   उत्तरम्— मन्दस्पष्टग्रहयोरन्तरं मन्दफलं भवति।
6. **प्रश्नः**— कं वृत्तं मन्दनीचोच्चसंज्ञं भवति?
   उत्तरम्—कक्षावृत्तीयमध्यमग्रहबिन्दोः अन्त्यफलज्या तुल्यव्यासार्द्धेन कृतं वृत्तं मन्दनीचोच्चसंज्ञं भवति।

7. प्रश्नः—पञ्चताराग्रहेषु कः संस्कारो भवति?
उत्तरम्— मन्दशीघ्रयोः संस्कारः भवति।

8. प्रश्नः— मन्दफलं केन प्रसाधितम्?
उत्तरम्— वास्तविकं सूक्ष्मतरं च।

9. प्रश्नः— मन्दफलं किं भवति?
उत्तरम्— मन्दस्पष्टमध्यमग्रहयोरन्तरं मन्दफलं भवति।

10. प्रश्नः— भुजकोट्योः साधनं कस्मात् क्रियते?
उत्तरम्— मन्दकेन्द्रवशात्।

11. प्रश्नः— ग्रहाः शीघ्रफलान्तरितो कथं भवन्ति?
उत्तरम्— शीघ्रोच्चरूपादेव आकृष्यः सन् ग्रहाः शीघ्रफलान्तरितो भवन्ति।

12. प्रश्नः— ग्रहाः मन्दफलान्तरितो कथं भवन्ति?
उत्तरम्—मन्दोच्चेन अपकृष्टे सन् ग्रहाः मन्दफलान्तरितो भवन्ति।

(V-C-73) (20) दिक्साधनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) दिक् परिचयः प्रयोजनञ्च भेदाश्च–प्राच्यादिव्यवहारहेतवे कालविधायके ज्योतिषशास्त्रे सिद्धान्तग्रन्थेषु त्रिप्रश्नाधिकारान्तर्गते दिग्ज्ञानं विधीयते। दिशः द्विविधः 1. स्थूलदिशः, 2. सूक्ष्मदिशः। तत्र स्थूलदिग्ज्ञानं तु **यत्रोदितोऽर्कः किल तत्र पूर्वा तत्रापरा यत्र गतः प्रतिष्ठाम्** इति भास्करवचनादेव जायते, तत्र स्थूलदिशः यात्रादौ गृह्यन्ते। परन्तु श्रौतस्मार्तयज्ञकुण्डानां निर्माणे, क्रान्तिछाया-चरायनादीनाञ्च प्रसङ्गे सूक्ष्मदिशः एव प्रयुज्यते।

(ख) दिग्ज्ञानविधिः–अथैकस्मिन् दिने रविक्रान्ति-चलनं शून्यसमं परमाल्पप्रमाणकं स्वीकृत्य जलेन समीकृतायां भूमौ नतोन्नतादिरहिते शिलातले वा शङ्क्वङ्गुलैरिष्टैरर्थात् यैरंगुलैः शङ्कोः अङ्कनं कृतं तैरेवाङ्गुलप्रमाणैरेकं वृत्तं विधेयम्। तन्मध्ये द्वादशाङ्गुलप्रमाणात्मकं शङ्कुः स्थाप्यः। तच्चोक्तं यथा सूर्यसिद्धान्ते–

शिलातलेऽम्बुसंशुद्धे वज्रलेपेऽपि वा समे
तत्र शङ्क्वङ्गुलैरिष्टैः समं मण्डलमालिखेत्
तन्मध्ये स्थापयेच्छङ्कुं कल्पना द्वादशाङ्गुलम्।
(सूर्यसि०3/1/1-2)

तत्र दिक्साधनोपक्रमे प्रथमम्बुसंशुद्धे जलवत् समीकृते शिलाप्रदेशे। अपि वा अथवा तदभावेऽन्यत्र वज्रलेपे चत्वरादौ घुण्टादिना समस्थाने कृते शङ्क्वङ्गुलैः शङ्कुस्थाङ्गुलविभागमानगृहीतैः अभीष्टसंख्याकाङ्गुलैः व्यासार्द्धरूपैः वृत्तम् अवक्रम् आलिखेत्। सर्वतः केन्द्राद्वृत्तपरिधिरेखा तुल्या स्यात् तथेत्यर्थः। ततस्तन्मध्ये तस्य वृत्तस्य केन्द्ररूपमध्ये कल्पनया द्वादशसंख्याकाङ्गुलानि तुल्यानि यस्मिस्तं द्वादशविभागाङ्किकतमित्यर्थः।

छायाग्रबिन्दू पूर्वापरबन्दू भवतः। तद्यथोक्तम्–

तच्छयाग्रं स्पृशेद्यत्र वृत्ते पूर्वापरार्धयोः।
तत्र बिन्दूर्विधेयोभौ वृत्ते पूर्वापराभिधौ।
(सूर्यसि०3/2ऋ)

सम्प्रति पूर्वापरबिन्दुद्वयकेन्द्रवशात् कल्पितपूर्वापररेखायाः व्यासार्धेन वृत्तद्वयं विधेयम्, तयोर्योगेन मध्यगतं शकलं मत्स्याकारं भवति तन्मत्स्यमुखपुच्छबिन्दुद्वयान्तःपातिरेखा कल्पितपूर्वापररेखो परिलम्बरूपा तदर्धकर्त्रीतद्वृत्तकेन्द्रगामिनी च रेखा गणितयुक्त्या भवत्येवातः सा वास्तवदक्षिणोत्तरा। उक्तञ्च–

तन्मध्ये तिमिना रेखा कर्तव्या दक्षिणोत्तरा
(सूर्यसि०3/3)

एतदनन्तरं दक्षिणोत्तरबिन्दूभ्यां दक्षिणोत्तरबिन्दुद्वयान्तः-पातिरेखातुल्यत्रिज्यया निर्मितयोः वृत्तद्वययोगेन या मत्स्याकृतिः जायते, तन्मुखपुच्छगता रेखा तद्वृत्तकेन्द्रगता वास्तवपूर्वापरा स्यादेवेति नात्र संदेहः। इत्थं पूर्वपश्चिमोत्तरदक्षिण-दिक्चतुष्टयस्य ज्ञाने सति क्रमशः पूर्वोत्तरबिन्दूभ्यां मत्स्येनैशाननैर्ऋत्यविदिशौ पूर्वदक्षिणबिन्दुभ्याञ्च मत्स्याकृत्या आग्नेयवायव्यदिशौ भवेतामिति सर्वं युक्तियुक्तमेव। अत एवोपपद्यते–

याम्योत्तरदिशोर्मध्ये तिमिना पूर्वपश्चिमा।
दिङ्मध्यमत्स्यैः संसाध्या विदिशस्तद्वदेव हि।।
(सूर्यसि०3/4)

भास्करेणापि इत्थमेव दिग्ज्ञानं विहितं यथा–

वृत्तेभ्यः सुसमीकृत क्षितिगते केन्द्रस्थशङ्कोः क्रमाद् भागं यत्र विशत्यपैति च यतस्तत्रापरेन्द्र्यौ दिशौ।

(ग) दिग्ज्ञाने स्थूलत्वनिराकरणम्–रवेः क्रान्तेः प्रतिक्षणवैलक्षण्यात् छायाग्रप्रवेशनिर्गमकालस्य समत्वेऽपि

क्रान्त्यग्रयोश्च न्यूनाधिकत्वात् भुजौ न्यूनाधिकौ भवतः तेन दिग्ज्ञाने स्थूलत्वं जायते, तन्निराकरणार्थं प्रोक्तं भास्करेण यत्–

तत्कालापमजीवयोस्तु विवराद्भाकर्णमित्याहतात्,
लम्बज्याप्तमिताङ्गुलेरयनदिश्यैन्द्री स्फुटा चालिता।

अर्थात् क्रान्त्यन्तरवशात् छायाप्रवेशनिर्गमकालिक-भुजयोरन्तरं विगणय्य स्थूलबिन्दोरयनदिशिचालनेन वास्तवदिशौ भवतः, तस्मादेव पूर्वापरादीनामानयनं विधेयमिति। यतो हि- (लम्बज्या = कोटिः, अक्षज्या = भुजः, अग्रा = कर्णः, क्रान्तिज्या = कोटिः कुज्या = भुजः, त्रिज्या=कर्णः।)

अतः $\frac{\text{त्रि}\times\text{ज्या.क्रा}}{\text{ज्याल}}$ = अग्रा

अत्रापि ज्याचापयोर्भेदत्वात् किञ्चिदन्तरत्वात् भास्करस्यापि दिक् सिद्धिः न समीचीना इति कमलाकरभट्टेनाक्षिप्तः, तद्विचारणीयं विद्वद्भिरिति विरम्यते अलं प्रपञ्चेन।

(घ) दिक्साधनविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—दिग्ज्ञानं कथं विधीयते?
उत्तरम्— त्रिप्रश्नाधिकारान्तर्गते दिग्ज्ञानं विधीयते?

2. प्रश्नः— दिशः कतिविधा, के च ते?
उत्तरम्— दिशः द्विविधः1. स्थूलदिशः, 2. सूक्ष्मदिशः।

3. प्रश्नः— स्थूलदिशः कुत्र गृह्यन्ते?
उत्तरम्— स्थूलदिशः यात्रादौ गृह्यन्ते।

4. प्रश्नः— सूक्ष्मदिशः कुत्र प्रयुज्यते?
उत्तरम्—श्रौतस्मार्तयज्ञकुण्डानां निर्माणे, क्रान्तिछायाचरायनादीनाञ्च प्रसङ्गे सूक्ष्मदिशः एव प्रयुज्यते।

5. प्रश्नः— यत्र सूर्यः उदेति तत् दिक् नाम किम्?
उत्तरम्— पूर्वदिक्।

6. प्रश्नः—सूर्यः यत्रास्तं याति तत् दिक् नाम किम्?
उत्तरम्— पश्चिमदिक्।

7. प्रश्नः— शनिवासरे दिक्शूलं कस्यां दिशायां विद्यते?
उत्तरम्— पूर्वस्याम्।

8. प्रश्नः— चन्द्रवासरे दिक्शूलं कस्यां दिशायां विद्यते?
उत्तरम्— पूर्वस्याम् (अग्निकोणे)।

9. प्रश्नः— रविवासरे दिक्शूलं कस्यां दिशायां विद्यते?
उत्तरम्— प्रतीच्याम्।

10. प्रश्नः—शुक्रवासरे दिक्शूलं कस्यां दिशायां विद्यते?
उत्तरम्— पश्चिमायाम् (वायुकोणे)।

11. प्रश्नः— गुरुवासरे दिक्शूलं कस्यां दिशायां विद्यते?
उत्तरम्— दक्षिणस्याम्।

12. प्रश्नः— बुधवासरे दिक्शूलं कस्यां दिशायां विद्यते?
उत्तरम्— उत्तरस्याम् (ऐशानकोणे)।

13. प्रश्नः— भौमवासरे दिक्शूलं कस्यां दिशायां विद्यते?
उत्तरम्— उत्तरस्याम्।

14. प्रश्नः— हस्ताश्विनीपुष्याभिजिदनुराधानक्षत्रं किदृशं विद्यते?
उत्तरम्— सर्वदिग्गमनम्।

15. प्रश्नः— मेषसिंहधनुराशिषु अवस्थिते चन्द्रे तस्य वासः कस्यां दिशायां विद्यते?
उत्तरम्— पूर्वस्याम्।

16. प्रश्नः— कन्यावृषमकरराशिषु अवस्थिते चन्द्रे तस्य वासः कस्यां दिशायां विद्यते?
उत्तरम्— दक्षिणस्याम्।

17. प्रश्नः—कुंभतुलामिथुनराशिष्वन्यतमे अवस्थिते चन्द्रे तस्य वासः कस्यां दिशायां विद्यते?
उत्तरम्— पश्चिमायाम्।

18. प्रश्नः— कर्कवृश्चिकमीनराशिष्वन्यतमे अवस्थिते चन्द्रे तस्य वासः कस्यां दिशायां विद्यते?
उत्तरम्— उत्तरस्याम्।

19. प्रश्नः— दिशां पूर्वापरयाम्योत्तराणां साधनं किं भवति?
उत्तरम्— दिक्साधनम्।

(V-C-73) (21) अधिमासः, क्षयमासविचार, वलनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) अधिमासपरिचयः—"असंक्रान्तिमासोऽधिमासस्फुटस्स्यात्" इति भास्करवचनात् संक्रान्तिविहीनचान्द्रमासः अधिमाससंज्ञकः। अर्थात् अमान्तद्वयवर्तिनि चान्द्रमासे सूर्यसंक्रान्तेरभावत्वमधिमासत्वम्। मरीचिकारेणापि प्रोक्तम्—"चैत्रादिद्वादशमासेभ्योतिरिक्तत्वात् अधिमासः वक्तव्यः"। अथ च सौरचान्द्रमानयोः विकाररूपत्वात् मलमासः अपि कथ्यते। अत एवोक्तम्—

मलं वदन्ति कालस्य मासं कालविदोऽधिकम्।

वस्तुतः रविसंक्रान्त्युपलक्षिता एव मासाः भवन्ति संक्रान्त्यभावात् द्वादशचान्द्रयोऽतिरिक्तोऽयम् अधिमासः। यथोक्तं ब्रह्मसिद्धान्ते—

मेषादिस्थे सवितरि यो मासः प्रपूर्यते स चान्द्रः।

अत एव मुहूर्तचिन्तामणावपि–स्पष्टार्क-संक्रान्तिविहीन उक्तो मासोऽधिमासः"। सूर्यसिद्धान्तेऽपि–

रविमासोनितास्ते स्युः शेषाः स्युरधिमासकाः।

(ख) अधिमासोपपत्तिः—अधिमासोपपत्तिविषये प्रोच्यते यत् एकस्मिन् सौरमासे अर्थात् संक्रान्तिद्वयान्तर्वर्तिकाले–365/15/30/22/30÷12=30/26/17 सावनदिनानि भवन्ति।

चान्द्रमासे अर्थात् अमान्तद्वयान्तर्वर्तिकाले–354/22/00÷12 = 29/31/50 सावनदिनानि भवन्ति, अनयोः सौरचान्द्रयोरन्तरं = 0/54/27 अधिशेषः सावनदिनात्मकं भवति।

उक्तञ्च भास्करेण–

दर्शाग्रतः संक्रमकालतः प्राक् सदैव तिष्ठत्यधिमासशेषमिति। (सि.शि.गो.)

इत्थं यदैतत् शेषं चान्द्रमासतुल्यं भवति तदाऽधिमासः जायते। अत एवोक्तम्—

सौरान्मांसादै स्याल्लन्दवंधीयान्
यस्मात्स्यात्संख्यायाः तेऽधिकाः स्युः।
चान्द्राः कल्पे सौरचान्द्रान्तरे ये
मासास्तज्ज्ञैः तेऽधिमासाः प्रदिष्टाः।।

अत एवेदं ज्ञानार्थं त्रैराशिकोऽनुपातः कृतः यत् यदि (0/54/27) अन्तरे काले एकः सौरमासः लभ्यते तदा (29/30/50) तुल्यः चान्द्रमासः कदेति–

$$\frac{1 \text{ सौरमासः} \times 29/31/50}{0/54/27} = 32/15/31 \text{ (सौरमासाः)}$$

अतः सावयवैः 32/15/31 सौरमासैः एकोऽधिमासः उत्पद्यते इति सिद्ध्यति, तद्यथोक्तम् वसिष्ठसिद्धान्ते–

द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा।
घटिकानां चतुष्केण पतति ह्यधिमासकः।।

अनेनोपपद्यते भास्करोक्तवचनमपि यत्–

चान्द्रोन सौरेण हृतात्
चान्द्रादवाप्तसौरैर्दशनैर्दलाढ्यैः।
मासैर्भवेच्चान्द्रमसोऽधिमासः कल्पेऽपि
कल्प्या अनुपाततोऽतः।।

एवमेव कल्पेऽपि अनुपाततः अधिमासः साध्यते।

ध्यातव्यमिदं यत् अधिमासोऽयं चान्द्रजातीयो एव भवति। **"मासास्तथा च तिथयस्तुहिनांशुमानादिति"** वचनात्। तद्यथा

अधिमासः

क (अमान्तः) मे.स. (चैत्रः)	ख (अमान्तः) वृ.स. (वैशाख)	ग (अमान्तः) अंसक्रान्तिमासः	घ (अमान्तः) मि.शु.स. (ज्येष्ठमास)

अस्मिन् क्षेत्रे-ग-घ अमान्तद्वयान्तर्वर्तिकालः संक्रान्तिरहितः अधिमासः चान्द्रजातीयः, अथ च यदि चान्द्रेभ्यः त्रैराशिकानुपातः विधीयते तदा सौरजातीयाः अधिमासाः भवन्ति, उक्तञ्च भास्करेण–

सौरेभ्यः साधिताश्चेदधिमासास्तदेन्दवाः।
चेच्चान्द्रेभ्यस्तदा सौराः तच्छेषं तद्वशात्तथा।।

भारतीयज्योतिषे बालकृष्णदीक्षितमहाभागेन स्पष्टमानेन द्वयोः अधिमासयो, लघुतममन्तरं अष्टविंशतिमासात्मकं,

तयोर्मध्ये महत्तमं चान्तरं पञ्चत्रिंशन्मासात्मकं निर्णीतम्। इदमपि ध्यातव्यमिदं यत् अधिमासकाले सूर्यः उच्चासन्नः चन्द्रश्च नीचासन्नः भवति, तस्मादेव सूर्यः मध्यमगत्यपेक्षया न्यूनगत्या गच्छन् चान्द्रमासे संक्रान्तिं नोपैति, इति गोलविदां स्फुटमेव।

(ग) प्रयोजनम्—धर्मशास्त्रव्यवहारसम्पादनाय तिथिव्रतपर्वमुहूर्तादीनाञ्च शुभाशुभविचाराय अधिमासज्ञानमावश्यकम्। अन्यथा **"द्वादशमासः संवत्सरः"** इति वैयर्थ्यापत्तेः सिद्ध्यतीति दिक्। एकस्मिन् महायुगे षड्वह्नित्रिहुताशाक्तिथयश्चाधिमासकाः (1593336) भवन्ति।

(घ) क्षयमासविचारः क्षयमासपरिचयः—"द्विसंक्रान्तिमासः क्षयाख्यः कदाचित्" इति भास्करवचनेन यस्मिन् चान्द्रमासे अर्थात् अमान्तद्वयान्तर्वर्तिनि काले सूर्यस्य संक्रान्तिद्वयं जायते तस्य मासस्य क्षयसंज्ञा विधीयते। अस्यैव संज्ञा लुप्तमासः अपि। अथ च संक्रान्त्युपलक्षिताः मासाः एव ग्राह्याः इत्यादिनियमेन यस्मिन् चान्द्रमासे संक्रान्तिद्वयं भवति तदा मासस्यैकस्य क्षयः जायते यथा स्वरूपेऽस्मिन्–

(अमान्तः) सं (धनुसंक्रान्ति) धनुमासः/मकरश्च (मकरसंक्रान्तिः) सं (अमान्तः)

द — द

30 — 30

कल्प्यते पौषस्य पूर्वमान्तात्परं धनुःसंक्रान्तिः। एवमग्रिम-अमान्तात्पूर्वमेव यदि मकरस्यापि संक्रान्तिर्भवेत्, तदा धनूराशिस्थत्वाद्रवेरयं मासः पौषसंज्ञकः। स एव मकरसंक्रान्तियुक्तत्वान्माघ इति कथ्यते।

अतोऽत्र माघमासस्य क्षयः जातेति स्पष्टम्।

अत्रेदं ध्यातव्यं यदियं स्थितिः तदैव संभवति यदा रविगतिः परमाधिका, तत्रैव स्वल्पकालेन रविः त्रिंशदंशात्मकं राशिं भुङ्क्ते, तदैव एकसौरमासान्तःपातिसावनादिनानामल्पत्वम्। तत्र कस्मिन् कस्मिन् मासे क्षयमासस्य सम्भावनेत्युच्यते? सम्प्रति **सूर्यमन्दोच्चमष्टादशोंशा भवेदिति** प्रमाणेन सूर्योच्चः मिथुनराशेः अष्टादशांशेऽवस्थितत्वात् तन्नीचेऽस्य धनूराशेरष्टादशांशे स्थिते तन्नीचत्वात् "उच्चाद्भषट्कान्तरितं हि नीचं" इति प्रमाणात् धनुषः पूर्वापरराशेः सूर्यगतेरधिकत्वात् यदा कदापि क्षयमासः वृश्चिकादिराशित्रये एव संभवतीति, कृत्वा कार्तिकादित्रये अर्थात् कार्तिकः आदिर्यस्य स कार्तिकादिमार्गशीर्षः तदादित्रये अर्थात् मार्गशीर्ष-पौष-माघेषु एव सम्भवतीति भास्करेणोक्तं यथा–

क्षयः कार्तिकादित्रये नान्यतः स्यात्।

तथा वर्षमध्येऽधिमासद्वयं स्यात्। अत्र ध्यातव्यमिदं यत् उच्चस्थितिं स्थिरं प्रकल्प्यैषा व्यवस्था भास्करेण प्रतिपादिता परन्तु स्वयमेव तेनोक्तं छेद्यकाधिकारे यत् **सोऽपि प्रदेशश्चलतीति तस्मात्,** अथ च सौरसिद्धान्तेऽपि उच्चस्य गतिः स्वीकृता विद्यते अतः कमलाकरेण भास्करमतखण्डनपुरस्सरं प्रतिपादितं यत्–

स्फुटैर्लक्षणैर्यैरयं तानि सर्वेष्वपि
स्युर्मधोश्चान्द्रमासेषु काले।
अतोऽयं क्षयः सर्वचान्द्रेष्वपीत्थं
न जानन्ति सद्वासना ज्ञानशून्याः।।

(सि.तत्त्वविवेक)

पुनश्च–

इदानीन्तनार्थं न शास्त्रं प्रवृत्तम्
न सत् कार्तिकादित्रयोत्थं तदुक्तम्।

अर्थात् कालक्रमेण उच्चगत्यनुरोधेन क्षयमासादीनामप्यवस्थितिः भिन्ना–2 भविष्यतीति सम्यगालोचितम्।

अथ क्षयमाससम्भववर्षे तु अधिमासद्वयोऽपि सम्भवतीति, उच्यते पूर्वामान्तात्पूर्वसंक्रान्तिं यावदेकोऽधिशेषः स्वल्पतरो वर्तते स सूचयति, यदितः पूर्वमेवैकोऽधिमासपूर्णो भूत्वा ततोऽधुना एव एतावानल्पतरोऽधिशेषः जातः। एवमेव पूर्वामान्ताद् संक्रान्तिः अधिशेषस्य मासासन्नत्वेन सूचयति यत् आगामिनि कस्मिंश्चिन्मासेऽधिमासो भविष्यतीति, भास्करोक्तम्–तदा **वर्षमध्येऽधिमासद्वयञ्च** उपपद्यते। इदमपि ध्यातव्यं यत् एकचान्द्रमासान्तःसावनदिनसंख्या एकसौर- मासान्तः पाति सावनदिनसंख्यया कदापि अधिका न भवति, अतः एषा सम्भावना स्पष्टमानेनैव सम्भवति न तु मध्यमेन।

अथ च यत्र कुत्रापि क्षयमासः सिद्धः तद्वर्षान्तकालिकोऽधिशेषः एकविंशतिदिनात्मकमेव, तदा भाद्रपदे स्फुटेऽधिमासः सम्भाव्यते, दर्शान्तरसंक्रान्त्यन्तस्य नित्यमुपचीयमानत्वात्। अथ च वृद्धिमत्या स्फुटगत्या पञ्चमासाभ्यन्तरे एवाधिशेषादीनां पूर्तिः स्यात् तस्मात् चैत्राद् पञ्चमे भाद्रपदमासे अधिमासः तस्मात् पञ्चमानन्तरे माघे द्वितीयोऽधिमासः, तस्मादाचार्यभास्करमतेन कार्तिकादित्रये क्षयमासः सम्भवति। अथ च अनुपातेन यदि कल्पसौरैः कल्पाधिमासास्तदैकसौरवर्षेण अधिमासावयवमानं किमिति

$$\frac{\text{क.अ.मा.}\times 1}{\text{क.सौ.व.}}$$

एतेन एकविंशतिदिनात्मकः अधिशेषः141, 19, वर्षान्तरे वा संभवति।

क.सौव **"कुवेदेन्दुवर्षैः क्वचिद्गोकुभिश्च"** सुधाकरद्विवेदिना हि-भिन्ना संख्यापि प्रोक्ता–

कुवेदेन्दुवर्षैः क्वचिद्गोकुभिश्च
नवेन्द्वाद्यहीनैः कुवेदेन्दुवर्षैः
क्षयाख्यस्तिथिर्भास्कराद्यैर्निरुक्ता
त्रिरामारिनेत्रैः किमर्थं न वेद्मि।

0/28/10

शशाङ्कमासोनितसावनेन
त्रिंशद्धृतां लब्धदिनैस्तु चान्द्रैः।
रुद्रांशकोनाब्धिरसैः 63/54/33 क्षयाहः
स्यात्सावनोतश्च युगेऽनुपातात्।।

(ङ) वलनम् वलनपरिचयः–वलतीति वलनमर्थाच्चलनम्। 'वल् सञ्चलने' धातुत्वात् वलनशब्दस्य उत्पत्तिः भवतीति। तच्च वलनं द्विविधम् आक्षायनभेदात्। अक्षवशाच्चलनं आक्षवलनं, अयनवशाच्चलनं अयनवलनम्।

ग्रहस्थानात् नवत्यंशेन विहितं वृत्तं ग्रहक्षितिजं भवति, यथोक्तं गोलपरिभाषायाम्–

यस्मात्खाङ्कैस्तु यद्वृत्तं तस्य तत् क्षितिजं स्मृतम्।
ग्रहात्खाङ्कांशकैर्यद्वद् ग्रहक्षितिजमुच्यते।।
(गोलपरिभाषा-69)

ग्रहक्षितिजे सममण्डलप्राचीतो नाडीमण्डलप्राची (ग्रहः) यद्दिशि यावच्चलिता तद्दिक् तावदाक्षवलनम्, अर्थात् ग्रहक्षितिजवृत्ते समप्रोतध्रुवप्रोतवृत्तयोरन्तरमाक्षवलनम्। उक्तञ्च–

अक्षजं वलनं तद्वन् नाडिका समवृत्तयोः
अन्तरं तु ग्रहोत्पन्नक्षितिजे वा . ग्रहोपरि।
समप्रोतध्रुवप्रोतवृत्तयोरन्तरं च तत्।
(गोलपरिभाषा-71-72)

एवमेव ग्रहक्षितिजे ध्रुवप्रोतकदम्बप्रोतवृत्तयोरन्तरं आयनवलनसंज्ञकम्। एवं नाडीमण्डलप्राचीतः क्रान्तिमण्डलप्राची यद्दिशि यावच्चलिता तद्दिक्कं तावदायनं वलनम्। अत एवोक्तम्–

आयनं वलनं ज्ञेयं ग्रहक्षितिजेऽन्तरम्
ग्रहोपरि ध्रुवप्रोतकदम्बप्रोतवृत्तयोः
नाडी भवृत्तयोरन्तरं तावदेव हि।
(गोलपरिभाषा-70)

अनयोः आक्षायनवलनयोः संस्कारेण सममण्डलापमण्डलयोः, समप्रोतकदम्बप्रोतवृत्तयोरन्तरं स्पष्टवलनं भवतीति। यथोक्तम्–

स्पष्टं तत्रान्तरं ज्ञेयं पूर्वापरभवृत्तयोः
ग्रहोपरि समप्रोतकदम्बप्रोतवृत्तयोस्तथा।।
(गोलपरिभाषा-73)

एतेन साधितस्य वलनस्य प्रयोगः ग्रहणस्य परिलेखादिनिर्माणे चालनार्थं भवति।

वलनोपपत्तिः–आक्षवलनोपपत्तिः—यदा ग्रहो याम्योत्तरवृत्तस्थो भवति तदा नतज्याभावः, क्षितिजे च ग्रहे सति नतज्या त्रिज्या तुल्या यतो हि ग्रहक्षितिजं तत्र याम्योत्तरवृत्ते भवति। तत्र याम्योत्तर याम्योत्तरवृत्ते सममण्डलनाडीमण्डलयोरन्तरमक्षांशतुल्यमतः नतज्यावशाद्वलस्थभावाभावत्वं विलोक्य इष्टस्थानेत्रैराशिकानुपातेन वलनानयनं क्रियते। तद्यथा यदि त्रिज्यातुल्यनतज्यया अक्षज्यातुल्या वलनज्या तदेष्टनतज्यया किमिति इष्टवलनज्या। तद्यथा–इष्टवलनज्या

$$= \frac{\text{अक्षज्या}\times\text{नतज्या}}{\text{त्रिज्या}}$$

अतोपपद्येत सूर्यसिद्धान्तोक्तसूत्रमिदम्–

नतज्याऽक्षज्ययाऽभ्यस्ता त्रिज्याप्ता तस्य कार्मुकम्।
वलनांशाः सौम्ययाम्याः पूर्वापरकपालयोः।।
(सू.सि.चन्द्रग्रहणाधिकार-24)

पूर्वकपाले ग्रहे सति सममण्डलात् नाडीवृत्तस्योदग्गतत्वात् ग्रहत्रिज्यावृत्तं क्षितिजाधोगतं भवति वलनं च सौम्यदिक्कम्, परकपाले ग्रहे स्थिते ग्रहत्रिज्यावृत्तं क्षितिजादूर्ध्वं, सममण्डलान्नाडीवृत्तस्य दक्षिणगतत्वाच्च वलनं याम्यदिक्मिति स्फुटमेव।

आयनवलनोपपत्तिः–यदि ग्रहः अयनप्रोते भवति तदा ग्रहक्षितिजवृत्तं गोलसन्धिगतं, गोलसन्धौ च ग्रहस्थिते सति अयनप्रोते ग्रहत्रिज्यावृत्ते नाडीक्रान्तिवृत्तयोरन्तरं परमाक्रान्तिरूपं, अतस्तत्र आयनं वलनं परमम्। गोलसन्धौ स्थिते ग्रहे भुजाभावात् कोटिज्या 90 समा। अतोऽत्र कोटिज्यायाः न्यूनाधिकत्वादायनवलनस्य चयापचयविलोकनात् अनुपातः क्रियते यदि त्रिज्यातुल्यग्रहकोटिज्यया सत्रिभग्रहक्रान्तितुल्यायनवलनज्या परमा तदाऽभीष्टग्रहकोटिज्यया किमिति तदा–

$$\text{इष्टायनवलनांशा} = \frac{\text{परमक्रान्तिज्या}\times\text{ग्रहकोज्या}}{\text{त्रिज्या}}$$

अस्या ज्या आयनवलनज्या भवति। उत्तरायणे गतवति सत्रिभग्रहे क्रान्तिः उत्तरा दक्षिणे च दक्षिणा इति स्फुटमेवोपपन्नं यत् **"राशित्रययुताद् ग्राह्यात् क्रान्त्यंशैर्दिक्समैर्युताः"** भास्करेणापि अनेनैव प्रकारेण वलनं साधितम्–

"खाङ्काहतं स्वद्युदलेन.......वलनं पलोद्भवम्।"

अथ च सत्रिभग्रहक्रान्त्यंशानामाक्षवलनांशानाञ्च दिक्साम्ये योगे कृते समवृत्तयोरन्तरं समप्रोतकदम्बप्रोतवृत्तयोर्वान्तरं स्पष्टवलनं जायते। अत एवोक्तं यत् सूर्यसिद्धान्ते–

राशित्रययुताद् ग्राह्यात् क्रान्त्यंशैर्दिक्समैर्युता।
भेदेऽन्तराज्या वलना सप्तत्यङ्गुलभाजिता।।
(सू.सि.4/25)

परिलेखवृत्तस्य त्रिज्या ऊनपंचाशान्मिता अतः

$$\frac{\text{ज्या.स्प.व}\times 49}{3438} = \frac{\text{ज्यास्प}}{70}$$

परिलेखोपयोगिवलनं समायातीति **"सप्तत्यङ्गुल"**भाजितेति प्रोक्तम्। दिगिति वलननिरूपणम्।

अधिमासः-क्षयमासविचार-वलनविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—कः अधिमासः?
   उत्तरम्—अधिको मासः अधिमासः, असंक्रान्तिमासोऽधिमासस्फुटः स्यात्।
2. **प्रश्नः**—भास्करानुसारं कः अधिमाससंज्ञकः?
   उत्तरम्—संक्रान्तिविहीनचान्द्रमासः अधिमाससंज्ञकः। अमान्तद्वयवर्तिनि चान्द्रमासे सूर्यसङ्क्रान्तेरभावत्वमधिमासत्वम्।
3. **प्रश्नः**— मरीचिकारानुसारं कः अधिमासः?
   उत्तरम्—चैत्रादिद्वादशमासेभ्योऽतिरिक्तत्वात् अधिमासः वक्तव्यः।
4. **प्रश्नः**— अधिमासस्य अपरो नाम किम्?
   उत्तरम्— मलमासः।
5. **प्रश्नः**— कः मलमासः ?
   उत्तरम्— सौरचान्द्रमानयोः विकाररूपत्वात् मलमासः।
6. **प्रश्नः**— द्वादशमासेभ्यो अतिरिक्तः मासः को भवति?
   उत्तरम्— अधिमासः।
7. **प्रश्नः**— एको चान्द्रमासः कथमुपपद्यते?
   उत्तरम्— अमान्ताद् अमान्तं यावत् एको चान्द्रमासः।
8. **प्रश्नः**— अधिमासस्य किं प्रयोजनम्?
   उत्तरम्—धर्मशास्त्रव्यवहारसम्पादनाय तिथिव्रतपर्वमुहूर्तादीनाञ्च शुभाशुभविचाराय अधिमासज्ञानमावश्यकम्।
9. **प्रश्नः**— यदि तिथेः पूर्वार्द्धे जातः मृतो वा तदा किं करणीयम्?
   उत्तरम्— पूर्वस्मिन् मासे तत्कार्यं सम्पाद्यमिति।
10. **प्रश्नः**— यदि तिथेः परार्द्धे जातः मृतः वा तदा किं करणीयम्?
    उत्तरम्— द्वितीये मासे तत्कृत्यं तस्मिन् तिथौ कर्तव्यमिति।

11. प्रश्नः— कः क्षयमासः?

उत्तरम्—यस्मिन् चान्द्रमासे अर्थात् अमान्तद्वयान्तर्वर्तिनि काले सूर्यस्य संक्रान्तिद्वयं जायते तस्य मासस्य क्षयसंज्ञा विधीयते।

12. प्रश्नः— क्षयमासस्य किं प्रयोजनम्?

उत्तरम्—धर्मशास्त्रव्यवहारसम्पादनाय तिथिव्रतपर्व-मुहूर्तादीनाञ्च शुभाशुभविचाराय अधिमासज्ञान-मावश्यकम्।

13. प्रश्नः— किमस्ति वलनम्?

उत्तरम्— वलतीति वलनमर्थाच्वलनम्।

14. प्रश्नः— वलनं कतिविधम्?

उत्तरम्— द्विविधम् आक्षायनभेदात्।

15. प्रश्नः— किम् आक्षवलम्?

उत्तरम्— अक्षवशाच्वलनं आक्षवलनम् (ग्रहक्षितिज-वृत्ते समप्रोतध्रुवप्रोतवृत्तयोरन्तरमाक्षवलनम्।)

16. प्रश्नः— किम् अयनवलनम्?

उत्तरम्—अयनवशाच्वलनं अयनवलनम्। (ग्रहक्षितिजे ध्रुवप्रोतकदम्बप्रोतवृत्तयोरन्तरं आयनवलनसंज्ञकम्।)

17. प्रश्नः— आक्षायनवलनयोः संस्कारेण किं स्पष्टवलनं भवति?

उत्तरम्— सममण्डलापममण्डलयोः, समप्रोत-कदम्बप्रोतवृत्तयोरन्तरं स्पष्टवलनं भवति।

18. प्रश्नः— साधितस्य वलनस्य प्रयोगः कथं भवति?

उत्तरम्— ग्रहणस्य परिलेखादिनिर्माणे चालनार्थं भवति।

19. प्रश्नः— परिलेखवृत्तस्य त्रिज्या कतिसंख्यकाः भवन्ति?

उत्तरम्— 49 ऊनपंचाशन्मिता भवन्ति।

20. प्रश्नः— वलनसाधनोपपत्तौ सर्वात्मना सरला च व्याख्या केन प्रतिपादिता?

उत्तरम्— पं.कपिलेश्वरशास्त्रिवर्येण प्रतिपादिता।

(V-C-73) (22) दृक्कर्मसाधनम्, अयनांशः, पञ्चाङ्गसाधनम् एवं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि

(क) दृक्कर्मसाधनस्य परिचयः प्रयोजनञ्च—दृशः कर्म दृक्कर्म। अर्थात् गणितेनागतो ग्रहो क्रान्तिवृत्तीयो राश्यादिको भवति, परन्तु सूर्येतरा ग्रहाः स्वस्वशराग्रे विमण्डले भ्रमन्ति, अतः यदा क्रान्तिवृत्तस्थग्रहाणामुदयास्तौ न तदा शराग्रगतानां ग्रहाणाम्। स्वकीयं क्षितिजवृत्ते न च कदम्बस्थानं भवतीत्यस्मात् क्रान्तिवृत्तीयग्रहदर्शनेऽन्तरं उत्पद्यते अतो ग्रहगतकदम्बसमसूत्रयोः क्रान्तिवृत्ते यदन्तरं तदेव दृक्कर्म नाम। अतः तस्य संस्कारः ग्रहेषु आवश्यकः; उक्तञ्च भास्करेण गोलाध्याये-

क्रान्तिवृत्तग्रहस्थानचिह्नं यदा स्यात्
कुजे नो तदा खेचरोऽयं यतः।
स्वेषुणोत्क्षिप्यते नाम्यते वा कुजात्
तेन दृक्कर्म खेटोदयास्ते कृतम्।।
नैव बाणः कुजेऽसौ कदम्बोन्मुखस्त-
त्समुत्क्षेपणं नामनं च द्विधा।
आयनम् आक्षजं तेन कर्मद्वयं
तत्प्रपञ्चः पुनः संविविच्योच्यते।।
(सि.शि.गोला., उदया.)

अतः नक्षत्रग्रहयोगेषु ग्रहाणामुदयास्तसाधने शृङ्गोन्नतौ च दृक्कर्मसाधनमावश्यकम्। यथोक्तं सूर्यसिद्धान्ते–

नक्षत्रग्रहयोगेषु ग्रहास्तोदयसाधने
शृङ्गोन्नतौ तु चन्द्रस्य दृक्कर्मादाविदं स्मृतम्।
(सूर्यसि०7/11)

दृक्कर्मभेदाः–

तदपि दृक्कर्म आक्षायनभेदेन द्विविधम्।
तत्र ध्रुवप्रोतसमप्रोतवृत्तयोरन्तरमाक्षजं दृक्कर्म।

ध्रुवप्रोतकदम्बप्रोतवृत्तयोरन्तरं आयनदृक्कर्म। उक्तञ्च-

आयनं तु ध्रुवप्रोत-कदम्बप्रोत-मध्यगम्।
समप्रोत-ध्रुवप्रोतान्तरं दृक्कर्म चाक्षजम्।।

यथा क्षेत्रेऽस्मिन्–

स्था क्षितिजम्

स.ध्रु.क ख

ध्रुवप्रोतसमप्रोतवृत्तयोर्क्रान्तिवृत्तेऽन्तरं = ग्र ग्र' = आक्षदृक्कर्मकलाः। बिम्बगतं ध्रुवप्रोतवृत्तं क्रान्तिवृत्ते यत्र लगति तदायनदृक्कर्मसंस्कृतग्रहस्थानम्। अतः ग्र आयनसंस्कृत-ग्रहस्थानम्।

साधनम्-दृक्कर्मसाधने सूत्रमिदं सूर्यसिद्धान्ते–

विषुवच्छाययाऽभ्यस्तात् विक्षेपाद् द्वादशोद्धतात्।
फलं स्वनतनाडीघ्नं स्वदिनार्धविभाजितम्।।
लब्धं प्राच्यामृणं सौम्ये विक्षेपे पश्चिमे धनम्।
दक्षिणे प्राक्कपाले स्वं पश्चिमे तु विपर्ययः।।
(सू.सि.ग्रहयु. 8-9)

दृशः कर्म दृक्कर्म। तेन संस्कारेण गणितागता ग्रहा दृक्प्रत्यय कारका भवन्ति तदेव दृक्कर्म। ग्रहगत कदम्बप्रोत-समप्रोतवृत्तयोरन्तरं क्रान्तिवृत्ते दृक्कर्म नाम। यतो हि गणितागता ग्रहा क्रान्तिवृत्तीयाः राश्यादिका भवन्ति। क्रान्तिवृत्ते रविर्भ्रमति। अन्ये ग्रहा क्रान्तिवृत्ताच्छर तुल्यान्तरे स्व स्व विमण्डले भ्रमन्ति। यदा क्रान्ति वृत्ते ग्रहस्थानं उदय क्षितिजमस्तक्षितिजं वा समायाति तदा शर तुल्यान्तरे स्थितं ग्रहविम्बं उदयास्तक्षितिजयोः साकाशात् ऊर्ध्वमधो वा भवति। यदा कदम्बस्थानं क्षितिजगतं भवति तदा कदम्बप्रोतवृत्तं क्षितिजवृत्तमेव भवति। अन्यत्र कदम्बप्रोतवृत्तं क्षितिजवृत्तादन्तरितं भवति। एवं ग्रहगत कदम्ब प्रांत-समप्रोतयोर्यदन्तरं क्रान्ति वृत्ते तदेव दृक्कर्म नाम। दृक्कर्म द्विविधिम् अयनमाक्षजञ्चेति। ध्रुवप्रोतकदम्बप्रोतयोरन्तरं क्रान्तिवृत्ते आयनं दृक्कर्म। ध्रुवप्रोत-समप्रोतयोरन्तरन्तरं क्रान्तिवृत्ते आक्षजं दृक्कर्म। अनयोः संस्कारेण समप्रोत-कदम्बप्रोतयोरन्तरं क्रान्तिवृत्ते स्फुटं दृक्कर्म, साधनञ्चैवम्–

आक्ष दृक्कर्म साधनार्थ क्षेत्रम्–अत्र स्था = आयनग्रहः

आक्षजं दृक्कर्म नाम विम्बोपरिगतं समध्रुवप्रोतयोरन्तरं क्रान्तिवृत्तीयं कलात्मकं नाड़ी वृत्तेतयोरन्तरमस्वात्मकं आक्षजं दृक्कर्म। अहोरात्रवृत्ते च तथैव बोध्यम्। यथा चात्र प्रकृते अस्वात्मकं आक्षजं दृक्कर्म अहोरात्रवृत्ते नाडीवृत्ते, च च' चापमिति। अथ साधनं क्रियते–

पु.च = स्थानीयक्रान्तिसम्बन्धिचरम्। पु. च = विम्बीयचरम्। अनयोरन्तरम् च च' आक्षदृक्कर्म इति।

परञ्चेत्थं महति शरे, शराल्पत्वे तु स्वल्पान्तरात्। क्षितिजेऽक्षज्या तुल्यमित्यादिवचनात्–

∠ स्था=अक्षांशः, ततः∠वि=समकोणः सरलाङ्गी-कारात्। ∠स्था अ वि=लम्बांशाः।

Δ विस्था त्रिभुजेऽनुपातः–

लम्बज्यायां स्पष्टशरज्या तदा आक्षवलनज्यायां किमिति–

$\frac{\text{स्पष्टशरज्या}\times\text{आक्षवलनज्या}}{\text{लम्बज्या}}$ = द्युज्यावृत्तीय दृक्कर्मासवः।

$\frac{\text{स्पष्टशरज्या}\times\text{अक्षज्या}}{\text{लम्बज्या}} = \frac{\text{स्पष्टशरज्या}\times\text{पलभा}}{12}$

निष्पत्तिसाम्यात्

अतः द्वितीयानुपातः–

$\frac{\text{स्प० शरज्या}\times\text{पलभा}\times\text{त्रि}}{12\times\text{द्युज्या}}$ = नाडी वृत्ते अथ दृक्कर्मासुमानम्।

धर्णनव्यवस्था

समप्रोतचलवृत्तं ग्रहविम्बोपरिगं यत्र क्रान्तिवृत्ते लगति स राश्यादिभोग आक्षदृक्कर्मसंस्कृत इति प्रागुक्तम्। तत्र पूर्वकपाले तस्मात् ग्रहात् आयनग्रह चिह्नं क्रान्तिवृत्त उत्तरशरेऽग्रिमभागे भवति दक्षिणशरे पश्चात् भवतीति क्रमेणर्णधनमुक्तम्। पश्चिम कपाले तु उत्तरशरे पश्चात् दक्षिणशरेऽग्रिमभाग इति क्रमेण आयनग्रहे धनर्णं दृक्कर्मद्वयसंस्कृतो ग्रहः सिद्धो भवति।

आयनदृक्कर्मप्रसङ्गे तु–

सत्रिभग्रहजक्रान्ति-भागघ्नाः क्षेपलिप्तिकाः।
विकलाः स्वमृणं क्रान्तिक्षेपयोर्भिन्नतुल्ययोः।
(ग्रहयुत्यधिकार-7/10)

आयनदृक्कर्म साधनोपपत्ति–

अत्र स्था = स्थानीयायनं वलनम्। अस्था= क्रान्तिवृत्ते आयनदृक्कर्मकला। अ= आयनदृग्ग्रहः।

अत्र Δध्रुविस्था त्रिभुजेऽनुपातः–

$\frac{\text{स्थानीयायनवलनज्या}\times\text{शरज्या}}{\text{द्युज्या}}$ =आयनदृक्कर्मासुज्या।

$\frac{1800\times\text{स्थानीयायनवलनज्या}\times\text{शरज्या}}{\text{राश्युदयासु}\times\text{द्यु}}$ = आयन दृक्कर्मकला।

$=\frac{1800\times\text{स्थानीयायनवलनज्या}\times\text{शरज्या}}{\text{राश्युदयासु}\times\text{द्युज्या}}$ = आयन दृक्कर्मकला।

Δ विस्थाअ त्रिभुजे–

अत्र∠वि= विम्बीयमायनं बलनम्। ∠अ=यष्टिचापः वि स्था = मध्यमशरः

अतोऽनुपातः–

$\frac{\text{शर} \times \text{आयनवलनज्या}}{\text{यष्टिः}}$ = अ स्था

चापीयत्रिभुजत्वात्-

$\frac{\text{मध्यशरज्या} \times \text{आयनवलनज्या}}{\text{यष्टिः}}$ =अ स्था चापज्या।

$\frac{\text{मध्यशर} \times \text{आयनवलनज्या}}{\text{यष्टिः}}$ =आयनदृक्कर्मकला।

Δ वि ल स्था त्रिभुजेऽनुपातः-

$\frac{\text{शरज्या} \times \text{अवज्या}}{\text{त्रिज्या}}$ = वि ल ज्या

(ख) अयनांशपरिचयः–गोलसन्धेः अर्थात् नाडीक्रान्तिवृयोः सम्पातस्य चलनमेव अयनांश- शब्देनोच्यते। प्राचीनकाले नाडीक्रान्तिवृत्तयोः कृतिकानक्षत्रे सम्पातस्य विद्यमानत्वात् तत एव अयनांशगणना क्रियते स्म इति शतपथब्राह्मणे प्रोक्तम्। वैदिकयुगे च शतभिषानक्षत्रस्य योगतारायां सम्पातो आसीदिति निर्णीयते। वेदाङ्गज्योतिषे च लगधाचार्येण धनिष्ठादावुत्तरायणो बिन्दुरिति निर्णीतम्। तद्यथोक्तं केतकरेण **नक्षत्रचक्रे प्रथमं धनिष्ठेति**। तस्मात् 180° अंशैः चित्रा नक्षत्रः, तस्मादेव चित्रापक्षीयोऽयनांशः अद्यतनीयैश्चाचार्यैः साध्यते यथोक्तम्–

अस्माच्च खाष्टेन्दुमितैर्लवैः सा
चित्रा सदा तिष्ठति रोचमाना,
सनातनत्वं सहजं तु तस्माद्
चित्रासकाशादयनांशसिद्धेः।

अयनांशमतानि– सृष्ट्यादौ यत्र सम्पातः आसीत् स निरयणमेषादिः तदानीमयनांशाभावात् अथ च तस्य सम्पातस्यापि अल्पगत्या पूर्वापरं दोलायमानं सप्तविंशति-भागात्मकं भ्रमणं भवतीति सौरमतम्। कैश्चिदाचार्यैः आधुनिकैश्च पातसदृशमेव अस्यापि चक्रभ्रमणं न हि दोलात्मकं इति स्वीक्रियते, अतः अयनांशभ्रमणे वादद्वयं प्रचलति। अत एवोक्तं सूर्यसिद्धान्ते–"**चक्रं प्राक्परिलम्बते**" मुञ्जाल-भास्करादिभिरपि अयनस्य पूर्वं पश्चाद् भ्रमणं स्वीकृतम्। भास्करेण–'**येऽयनचलभागाः प्रसिद्धा त एव विलोभगस्य क्रान्तिपातस्य भागाः**।' इत्यनेन विषुवत्क्रान्तिपातस्य चलनं स्वीकृतम्। पाश्चात्यैः नाडीक्रान्तिसम्पातः नाडीवृत्ते एवायनगतिं स्वीकृत्य अस्य विषुवच्चलनमिति संज्ञा कृता। तैरियं गतिः पृथिव्यां समारोप्य तस्य ध्रुवीयविचलनरूपेण स्वीकृत्य याम्योत्तरलङ्घनकालस्य निर्णयं क्रियते।

विवादप्रपञ्चे विदुषां निर्णयमिदं यत् सम्पातः पूर्वाभिमुखं 27 अंशं गत्वा पुनः परावर्त्य तं स्थानमवाप्य ततोऽपि पश्चिमाभिमुखं सप्तविंशतिभागान् गत्वा पुनः आद्यबिन्दौ समायाति, इत्थं 108° अंशात्मको दोलात्मकोऽयनगतिरिति।

अयनांशसाधनम्– अथ एकस्मिन् महायुगेऽयनांश-भगणाः 600 सौरसिद्धान्ते पठिताः, अतः युगसावनेरयणभगणाः षट्शतानि तर्हि अभीष्टैः किमिति =

$\frac{\text{600×अहर्गणः}}{\text{यु.सावनादिनानि}}$ = अभीष्टाहे भगणाद्ययनगतिः।

एते भुजांशाः भवन्ति, अत्र पुनरनुपातः क्रियते यदि 360 अंशैः अयनस्य 108 अंशप्रमितं भगणं तदेष्ट भुजांशैः किमिति

$\frac{108\times\text{भु}}{360} = \frac{3\times\text{भुजांशाः}}{10}$ = अभीष्टदिनेऽयनांशाः।

अत उपपद्यते सौरोक्तं यत्–

त्रिंशत्कृत्यो युगे भानां चक्रं प्राक्परिलम्बते,
तद्गुणाद् भूदिनैर्भक्ताद्युगणाद्यदवाप्यते।
तद्दोस्त्रिघ्ना दशाप्तांशा विज्ञेयाऽयनाभिधा॥
(सू.सि.त्रिप्रश्न, 9–10)

गणेशदैवज्ञेन च–"वेदाब्धब्ध्यूनः खरसहतः शकोऽयनांशः" इत्यादिना इष्टशकः–

$\frac{444}{60}$ = लब्धिः = अयनांशाः

अर्थात् 444 शके अयनांशाभावः। केतकारेण—अयनभागसंज्ञा इत्यनेन क्षयनांशः 1800 शकात् साधितः। अयनांशस्य वार्षिकी गतिः सूर्यसिद्धान्ते- '0/54" कलाः सिद्ध्यन्ति। अतः मुञ्जालेन **"एकैका लिप्ता'** प्रत्यब्दमित्यादिना कलात्मिका वार्षिकगतिरयनांशस्य स्वीकृता। पाश्चात्यमतेऽपि 50 विकलाः अयनगतिः वार्षिकी सिद्ध्यति। अतः पृथक् पृथक् मतानि अत्रापि सन्ति।

अयनांशपरीक्षणं तत्संस्कारश्च–विषुवद्दिने गणितेन आगतः सूर्यभोगांशः यदि वेधोपलब्धसूर्यात् न्यूनं तदा अयनांशः प्राक्चलितं अधिके सति पश्चादिति ज्ञेयम्, तयोरन्तरांशैः अयनांशज्ञानं जायते। उक्तञ्च–

स्फुटं दृक्तुल्यतां गच्छेदयने विषुवद्द्वये
प्राक् चक्रं चलितं हीने छायार्कात् करणागते
अन्तरांशैरथावृत्य पश्चाच्छेषैस्तथाधिके॥ इति।
(सूर्यसि०त्रिप्रश्नः—11½)

प्रयोजनम्– सर्वेषामाकाशीयपिण्डानां घटनानां च सायनप्रवृत्तिहेतुत्वात् अयनांशः आवश्यकः छायातः रविसाधनं क्रान्तिचरदलादीनां प्रत्यक्षविषयाणां वेधकरणार्थं च अयनांशज्ञानं अत्यावश्यकमिति विरम्यते सूर्यसिद्धान्तवचनेन यत्–'**तत्संस्कृतात् ग्रहात्क्रान्तिच्छायाचरदलादिकम्**' इति दिक्।

(ग) पञ्चाङ्गसाधनम् (तिथि-वार-नक्षत्र-योग-करण) पञ्चाङ्गपरिचयः–पञ्चानामङ्गानां समाहारः पञ्चाङ्गमिति व्युत्पद्यते। तत्र तिथि-वार-नक्षत्र-योग-करणानां समूह एव ज्योतिषे लोके हि पञ्चाङ्गरूपेण प्रसिद्धः तत्साधनमेव प्रदर्श्यते यथा एकैकम्–

1. तिथिपरिचयः

1. तिथि साधनोपपत्तिः-सूर्येन्दु संगमादपरसंयोगं यावदेको चान्द्रो मासः। तत्र त्रिंशत्तिथयो भवन्ति। अतोऽनुपातेन–

त्रिंशतिथिषु चक्रकला तदा एकस्यां तिथौ का इति जातम्

$\frac{21600\times1}{30}$ =720 कला एकतिथेर्मानम्।

भुक्तभोग्यज्ञानायामनुपातः, यदि 720 कलाभिरेका तिथिस्तदा रविचन्द्रान्तरकलाभिः किमिति–

$\frac{\text{1×(स्प.च-स्प.र.कला)}}{720}$ =लब्धि गततिथिः

शेषः वर्तमान तिथेः भुक्तकला। 720 = भुक्तकला।

पुनरनुपातः, यदि रविचन्द्रगत्यन्तरकलाभिः षष्टि-घटिकास्तदा भुक्त/भोग्य कलाभिः किमिति–

$\frac{\text{60 भुक्त/भोग्य कला}}{\text{स्प.च.ग. -स्प.र.ग.}}$ = भुक्तभोग्यमाने।

2. वारसाधनम्–सप्ताहे सूर्यादि सप्तवाराः "मन्दादधः" क्रमेण इत्यनेन भवन्तीति। सप्ताहे सूर्यादि सप्तवाराः "मन्दादधः" क्रमेण वारसाधने तु भवन्तीति इत्यनेन।

3. नक्षत्रसाधनम्–सप्तविंशति नक्षत्राणि एकस्मिन् चक्रे भवन्ति। अतोऽनुपातेनैक नक्षत्रस्य कला मानम् = यदि 27 नक्षत्रेषु चक्रकला 21600 तथा एकस्मिन् नक्षत्रे किमिति जातम्–

$\frac{21600\times1}{27}$ =800 एकनक्षत्रसम्बन्धिकला

एवमेव ग्रहाणां गतगम्यादि ज्ञानार्थमनुपातः–

भभोग 800 कलाभिरेकं नक्षत्रं तदा अभीष्ट ग्रहकलाभिः किमिति जातम्

$\frac{\text{1×अभीष्टग्रहकला}}{800}$ =गतनक्षत्र संख्या

शेषः वर्तमाननक्षत्रस्य गतकला।

800 -गतकला=भोग्यकला गतगम्यादिमानायानुपातः–

ग्रहगतिकलाभिरेकं दिनं तदा नक्षत्रस्य गतकलाभिः गम्यकलाभिर्वा किमिति–

$\frac{\text{1×गतकला गम्यकला वा}}{\text{ग्रहगतिकला}}$ = लब्धिः वर्तमान नक्षत्रस्य भुक्त/भोग्यमानम्।

4. योगसाधनोपपत्तिः–स्प. सूर्यस्य स्प.चन्द्रस्य योगो योगपदवाच्यो भवति। योगाः सप्तविंशतिः विष्कुम्भादयः। अर्थादेषामपि भोगमानं भभोग = 800 कला तुल्यमेव। अतः

$\frac{\text{स्प.रवि+स्प. चन्द्र}}{800}$ = लब्धिः गतयोगः

शेषः वर्तमान योगस्य गतकला। 800–शेषः=भोग्य कला।

पुनरनुपातः यदि रविचन्द्रयोगगतिकलाभिः षष्टिघटिकास्तदा भुक्तकलाभिर्भोग्यकलाभिर्वा किमिति–

$\frac{\text{60 भुक्त/भोग्य कला}}{\text{र.ग. कला + चन्द्रगति कला}}$ = वर्तमान योगस्य भुक्त-भोग्यमाने

5. करणसाधनम्–अतोक्तं सूर्यसिद्धान्ते करणान्याह-(2/67-69)

ध्रुवाणि शकुनिर्नागं तृतीयं तु चतुष्पदम्।
किंस्तुघ्नं तु चतुर्दश्याः कृष्णायाश्चापरार्धतः॥67॥
बवादीनि ततः सप्त चराख्यकरणानि च।
मासेऽष्टकृत्व एकैकं करणानां प्रवर्तते॥68॥
तिथ्यर्धभोगं सर्वेषां करणानां प्रकल्पयेत्।
एषा स्फुटगतिः प्रोक्ता सूर्यादीना खचारिणाम्॥69॥

तिथ्यर्धं करणम् इति नियमेन तिथेरर्धमितमेकं करणं भवति। एकस्मिन् मासे त्रिंशत् तिथयो भवन्ति। अतस्तिथ्यर्धानि 30×2=60 संख्याकानि तिथ्यर्धानि तत्र शकुन्यादि चत्वारि

करणानि कृष्णचतुर्दशीतः आरभ्य प्रतिपद् पूर्वार्धं यावत् चत्वारि स्थिर करणानि भवन्ति। अतः 60-4=56 तिर्थ्यधानि। एषु 7 चरककरणानि अतः-

$\frac{56}{7}$ =8 आवृत्ति चर करणानामित्युपपन्नम्।

(घ) दृक्कर्मसाधनम्, अयनांशः, पञ्चाङ्गसाधनविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— किमस्ति दृक्कर्मसाधनम्?
उत्तरम्—दृशः कर्म दृक्कर्म, गणितेनागतो ग्रहो क्रान्तिवृत्तीयो राश्यादिको भवति।

2. **प्रश्नः**— दृक्कर्म कतिविधम्?
उत्तरम्— आक्षायनभेदेन द्विविधम्।

3. **प्रश्नः**— आक्षजदृक्कर्मस्य का परिभाषा?
उत्तरम्—ध्रुवप्रोतसमप्रोतवृत्तयोरन्तरमाक्षजं दृक्कर्म भवति।

4. **प्रश्नः**— आयनदृक्कर्मस्य का परिभाषा?
उत्तरम्—ध्रुवपोत-कदम्बप्रोतवृत्तयोरन्तरं आयनं दृक्कर्म भवति।

5. **प्रश्नः**— दृक्कर्मस्य का परिभाषा?
उत्तरम्—आक्षायनयोः संस्कारेण सम्प्रोत- कदम्बप्रोत-वृत्तयोरन्तरं स्पष्टं दृक्कर्म।

6. **प्रश्नः**— अक्षांशः वर्द्धते संति कस्य वर्द्धनं भवति?
उत्तरम्—आक्षदृक्कर्मस्य वर्द्धनं भवति।

7. **प्रश्नः**— धनर्णव्यवस्था कस्मिन् शरे ज्ञेयम्?
उत्तरम्— दक्षिणशरे धनर्णव्यवस्था ज्ञेयम्।

8. **प्रश्नः**— कोऽयमयनांशः?
उत्तरम्—नाडीक्रान्तिवलययोः सम्पातस्य चलनमेव अयनांशः।

9. **प्रश्नः**— शतपथब्राह्मणे अयनांशस्य का परिभाषा क्रियते?
उत्तरम्—नाडीक्रान्तिवृत्तयोः कृत्तिकानक्षत्रे सम्पातस्य विद्यमानत्वात् तत एव अयनांशगणना क्रियतेस्म।

10. **प्रश्नः**—अयनांशः इत्यस्य आवश्यकता का?
उत्तरम्—सर्वेषामाकाशीयपिण्डानां घटनानां च सायनप्रवृत्तिहेतुत्वात् अयनांशः आवश्यकः।

11. **प्रश्नः**— अयनांशः इत्यस्य ज्ञानं कथं आवश्यकम्?
उत्तरम्—छायातः रविसाधनं क्रान्तिचरदलादीनां प्रत्यक्षविषयाणां वेधकरणार्थं च अयनांशज्ञानं अत्यावश्यकमिति।

12. **प्रश्नः**— सर्वे भारतीयाचार्या आयनगतिं कस्य वृत्ते स्वीकुर्वन्ति?
उत्तरम्— क्रान्तिवृत्ते एवायनगतिं स्वीकुर्वन्ति।

13. **प्रश्नः**— सम्प्रति पाश्चात्यैः नाडीक्रान्तिसम्पातः कस्य वृत्ते स्वीकुर्वन्ति?
उत्तरम्— नाडीवृत्तेऽयनगतिः मन्यन्ते।

14. **प्रश्नः**— रोमकसिद्धान्ते द्वितीयार्यभट्टः आयनं किदृशं स्वीचकार?
उत्तरम्— ग्रहरूपकमेवायनं स्वीचकार।

15. **प्रश्नः**— द्वितीयार्यभट्टः मते आयनग्रहस्य कल्पीयभगणाः कति वर्तन्ते?
उत्तरम्— 578159 कल्पीयभगणाः।

16. **प्रश्नः**— पराशरमतेन आयनग्रहस्य कल्पीयभगणाः कति वर्तन्ते?
उत्तरम्— 581709 कल्पीयभगणाः।

17. **प्रश्नः**— प्रतिवर्षं विकला अयनगतिः कति स्यात्?
उत्तरम्— 51.27.50 विकला अयनगतिः स्यात्।

18. **प्रश्नः**— सूर्यसिद्धान्तानुसारं वर्षमानं कतिदिनात्मकं भवति?
उत्तरम्— 265115131131124 दिनात्मकं भवति।

19. **प्रश्नः**— पाश्चात्यमते सायनवर्षमानं कतिदिनात्मकं भवति?
उत्तरम्— 365114131153125 दिनात्मकं भवति।

20. **प्रश्नः**— पञ्चाङ्गशब्दस्य का व्युत्पत्तिः?
उत्तरम्—पञ्चानामङ्गानां समाहारः पञ्चाङ्गमिति व्युत्पद्यते।

21. **प्रश्नः**— किमस्ति पञ्चाङ्गसाधनम्?
उत्तरम्— तिथि-वार-नक्षत्र-योग-करणानां (पञ्चानां) साधनमेव पञ्चाङ्गसाधनम्।

22. **प्रश्नः**— पञ्चाङ्गसाधनस्य किं प्रयोजनम्?
उत्तरम्—प्रयोजनद्वयं, 1. दृष्टप्रयोजनम्। 2. अदृष्टप्रयोजनम्।

23. **प्रश्नः**—किमस्ति दृष्टप्रयोजनम्?
उत्तरम्—ग्रहानयनं वेधोपयुक्तविविधक्रियादीनां ग्रहणसदृशदृश्यस्थितीनां संसाधनम्।

24. **प्रश्नः**— किमस्ति अदृष्टप्रयोजनम्?
उत्तरम्— व्रत-पर्व-तिथ्यादीनां निर्धारणं तथा च लौकिककार्ये शुभाशुभनिर्धारणञ्च।

25. **प्रश्नः**— का तिथिः?
उत्तरम्— सूर्यचन्द्रमसोः गत्यन्तरेण एकातिथिः भवति

26. **प्रश्नः**— सप्ताहे कति वाराः भवन्ति?
उत्तरम्— सूर्यादि सप्तवाराः (रवि-सोम-मंगल-बुध-गुरु-शुक्र-शनि)।

27. **प्रश्नः**— किमस्ति नक्षत्रसाधनम्?
उत्तरम्—गत्यभावात् सप्तविंशतिनक्षत्राणां एकैकं साधनम्।

28. **प्रश्नः**— कः योगः?
उत्तरम्—रविचन्द्रयोर्मिलितयोः यन्नक्षत्रं स योग इत्युच्यते।

29. **प्रश्नः**— किं करणं नाम?
उत्तरम्— करणं नाम तिथ्यर्धम्।

30. **प्रश्नः**— एकस्यां तिथौ कति करणं सम्पद्यते?
उत्तरम्— एकस्यां तिथौ करणद्वयं सम्पद्यते।

31. **प्रश्नः**— करणं कतिविधम्?
उत्तरम्— करणं द्विविधम्, स्थिरचरभेदात्।

32. **प्रश्नः**— एकस्मिन् मासे प्रति चलकरणानां कति वारं आवृत्तिः जायते?
उत्तरम्— अष्टवारमावृत्तिः जायते।

33. **प्रश्नः**— प्रतिपत्तिथेः स्वामी कोऽस्ति?
उत्तरम्— अग्निः।

34. **प्रश्नः**— द्वितीयातिथेः कः स्वामी अस्ति?
उत्तरम्— ब्रह्मा।

35. **प्रश्नः**— तृतीयातिथेः स्वामी कः?
उत्तरम्— गौरी।

36. **प्रश्नः**— गणेशः कस्याः तिथेः स्वामी अस्ति?
उत्तरम्— चतुर्थ्याः।

37. **प्रश्नः**— पञ्चम्यास्तिथेः कः स्वामी अस्ति?
उत्तरम्— नागः।

38. **प्रश्नः**— षष्ठ्यास्तिथेरधिपतिः को विद्यते?
उत्तरम्— गौरी।

39. **प्रश्नः**— सप्तम्याः तिथेः कः स्वामी अस्ति?
उत्तरम्— सूर्यः।

40. **प्रश्नः**— अष्टम्याः स्वामी कोऽस्ति?
उत्तरम्— शिवः।

41. **प्रश्नः**— नवम्याः तिथेः स्वामी कोऽस्ति?
उत्तरम्— दुर्गा।

42. **प्रश्नः**— दशम्याः तिथेः स्वामी कोऽस्ति?
उत्तरम्—यमराजः।

43. **प्रश्नः**—एकादश्याः तिथेः स्वामी कोऽस्ति?
उत्तरम्— विश्वेदेवः।

44. **प्रश्नः**— द्वादशीतिथेः स्वामी कोऽस्ति?
उत्तरम्— नारायणः।

45. **प्रश्नः**— त्रयोदश्यां तिथौ कोऽधिष्ठाता भवति देवः?
उत्तरम्— कामदेवः।

46. **प्रश्नः**— चतुर्दश्यान्तिथौ को देवः शास्ति?
उत्तरम्— महादेवः।

47. **प्रश्नः**— पौर्णमास्याः स्वामी कः?
उत्तरम्— चन्द्रमा।

48. **प्रश्नः**— अमावास्यायाः तिथेः को देवताऽस्ति?
उत्तरम्— पितरः।

(V-C-73) (23) उदयान्तरसाधनोपपत्तिः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) उदयान्तरपरिचयः तत्स्वरूपञ्च– उदयोः अन्तरम् उदयान्तरम्। भास्कराचार्याविष्कृतोऽयमुदयान्तरं नाम मध्यमसावनस्फुटसावनयोरन्तरं यद्वा वास्तवावास्तव-मध्यमार्कोदययोरन्तरं, वा विषुवांशभुजांशयोः अथवा रविगतिकलातुल्यासुनाक्षत्रषष्टिघटिकारविगतिकलोत्पन्नासु नाक्षत्रषष्टिघटिकयोरन्तरम्।

(ख) उदयान्तरस्वरूपम्– रविस्तु क्रान्तिवृत्ते भ्रमति, कालश्च नाडीवृत्ते। उभयोः पृष्ठीयकेन्द्रं भिन्नं-भिन्नं अतः क्रान्तिवृत्तीयमध्यमार्कनाडीवृत्तीयकल्पितार्कोदययोरन्तरमुदयान्तरमिति गोलयुक्तियुक्तम्।

वस्तुतः क्रान्तिवृत्तीयरविणा यावद्भागः क्रान्तिवृत्ते गृह्यन्ते न तावद् नाडीवृत्ते यतो हि क्रान्तिवृत्तीया कला न एकेन असुना उदेति। अतः क्रान्तिवृत्ते समानरूपेण मध्यमगत्या भ्रमन्नपि स्वगतिकलोत्पन्नासुभिः कालं नाडीवृत्ते समुत्पादयति अतः भुजांशविषुवांशक्रान्त्यंशावयवीयत्रिभुजे भुजांशविषुवांशयो रन्तरमुदयान्तरम्।

यथा क्षेत्रे-ग्र क्रान्तिवृत्ते मध्यमार्कः– स

ग्र नाडीवृत्ते मध्यमार्कः–

स गोलसन्धिः– ग्र उ ग्र

स.ग्र. भुजांशाः घु

स.ग्र. विषुवांशाः क्र.वृ. वा.वृ

अथ सग्र'-सग्र उग्र' उदयान्तरम्

स क्रान्तिवृत्ते

(ग) उदयान्तरोत्पत्तौ हेतुः– नाडीक्रान्तिवृत्तयोः तिर्यक्त्वात् त्रिंशदशैः भवतु नाम 1800 कला, परन्तु नाडीवृत्ते प्रतिराशीनामुदयासवः भिन्ना-भिन्ना यथा मेषस्थलंकोदयासवः– 1670, वृषस्य–1795, मिथुनस्य–1935 असवः। अतः 1 असु 1 कला तुल्यो न, तेन–

नक्षत्र 60 घटी + रविगतिकलातुल्यासु = मध्यमसावनम्

नक्षत्र 60 घटी + रविगतिकलोत्पन्नासु=स्पष्टसावनम् अतः स्पष्टसावनस्य प्रतिक्षणवैलक्षण्यात् मध्यमसावनादेव अहर्गणः साध्यते, अतः ते ग्रहाः नाडीवृत्तीयकल्पिताकोदयकालिकाः, अपेक्षिताः क्रान्तिवृत्तीयाः, अत एव उदयान्तरसम्बन्धि-गतिचालनेनैव ग्रहाः क्षितिजकालिकाः, अत उक्तं भास्करेण–क्षितिजसन्निधिगे सति मध्यमः। तथा च क्षितिजकालिकरणार्थमुक्तं प्रयोजनमस्योदयान्तरस्य–

अहर्गणो मध्यमसावनेन
कृतश्चलत्वात् स्फुटसावनस्य।
तदुत्थखेटाः उदयान्तराख्याः
कर्मोद्भवेनोनयुताः फलेन।।

उदयान्तरसाधनम्– सूत्रमिदं भास्करेण प्रोक्तम्–

युक्तायनांशस्य तु मध्यमस्य
भुक्तासवोऽर्कस्य निरक्षदेशे।
मेषादिभुक्तोदयसंयुता ये
यच्चायनांशान्वितमध्यभानोः।।
लिप्तागणस्तद् विवरेण निघ्नी
गतिग्रहस्य द्युनिशासुभक्ता।
स्वर्णं ग्रहे चेदसवोऽधिकोना
इदं ग्रहाणामुदयान्तराख्यम्।।

अर्थात् यस्मिन् राशौ रविः तस्य ये भुक्तभागाः तद्वशेन तदुत्पन्नासवः कार्याः, तथा मेषादीनां राशीनामुदयासुभिः सहिताः विषुवांशाः उत्पन्नासवो वा भवति। एवं सायनमध्यार्कस्य कलासमानासवो भुजांशाः विज्ञेयाः। तयोरन्तरेण उदयान्तरकलाः असवो वा भवन्ति।

अथ विषुवांशानामर्थात् असूनां न्यूनत्वं भुजांशानां अधिकत्वं स्यात्तदा मध्यमार्कोदयानन्तरं कल्पितार्कोदयः, अतः उदयान्तरजनितचालनफलेन विहीनाः कल्पितार्कोदयकालिकाः ग्रहा मध्यार्कोदयकालिकाः क्षितिजस्थाः भवन्ति। अथ व्यत्यासेन असूनामधिकत्वे भुजांशाद्धि कल्पितार्कोदयानन्तरं मध्यमार्कोदयः अतः उदयान्तरजनितफलेन युक्ताः मध्यार्कोदयकालिकाः भवन्ति। इति युक्तियुक्तमेव। अतः प्रथमतृतीयपदे ऋणमुदयान्तरं द्वितीयचतुर्थे धनमिति दिक्।

(घ) उदयान्तरस्य न्यूनाधिकत्वम्– गोलसन्धौ नाडीक्रान्तिवृत्तयोरेकत्वात् भुजांशविषुवांशयोरभावात् नोदयान्तरम्, अथ च राशित्रयान्तरे अयनसन्धौ 24° अन्तरे ध्रुवप्रोत एव कदम्बप्रोतः तस्मात्तत्रापि नोदयान्तरम्। इत्थं पदादौ पदान्ते च नोदयान्तरं यतो हि कलासवोरभेदत्वात् 1800' = 1800 असवः। पदमध्ये एव कुत्रचिदुदयान्तरोत्पत्तिः, परमोदयान्तकालमानं भास्करेण 26 पलं स्वीकृतम्; अतः

$$\frac{90+\text{प.उ}}{2} = \frac{45+\text{प.उ}}{2}$$

भुजांशे परमोदयान्तरं न हि पदमध्ये इति विद्वद्भिरवलोकनीयम्। इत्थं स्वोदयासुभिः, उदयान्तरं साध्यते तदा आगताः ग्रहाः भुजान्तरमुदयान्तरं चराख्यं चेति कर्मत्रयमपि संस्कृताः औदयिकाः भवतीति। यथोक्तम्–

चेतस्वोदयैः.............विहितमौदयिके स्यात्।

समीक्षणम्– सूर्यसिद्धान्तेऽपि ग्रहोदयप्राणहता खखाष्टैकोद्धतागतिरित्यादि स्फुटसावनमानीतम्, श्रीपतिनापि सिद्धान्तशेखरे चर्चा कृता तथापि स्पष्टतयोत्पादकः नियामकश्च भास्कराचार्य एवेति दिक्।

(ङ) ग्रहाणाम् उदयान्तरव्यवस्था–

1. प्रथमपदे–1–3 (राशौ) भुजांश विषु. = ऋणम् उदयान्तरम्,

2. द्वितीयपदे–4–6 (राशौ) भुजांश विषु. = धनम्,

3. तृतीयपदे–7–9 (राशौ) भुजांश विषु. = ऋणम्,

4. चतुर्थपदे–10–12 (राशौ) भुजांश विषु. = धनम् उदयान्तरं भवति।

(च) कमलाकरकृतोदयान्तरखण्डनम्– आचार्य-कमलाकरभट्टेन सिद्धान्ततत्त्वविवेके दुराग्रहपूर्वकं उदयान्तरस्य खण्डनं विधाय तस्य निरर्थकत्वं प्रदर्शितम्। तत्र हेतवः प्रदर्शिताः, उक्तञ्च–

इत्थं शिरोमणौ प्रौढ्या यदुक्तमुदयान्तरम्।
तद्वासनां निराकर्तुमुद्यतोऽस्मि विदांवर।।

1. प्रथमो हेतुः यत्–

सत्यासत्यासुमानाभ्यामुद्गमासन्नकालजौ ।
भिन्नप्रमाणसिद्धयाऽतो विजातीयो गणौ तव।।1।।
अस्वन्तरं तु तत्रस्थं नहि मूढगणान्तरम्।
विजातीयग्रहान्तर्नाप्येवमस्वनातेराद्भवम् ।।2।।

अर्थात् क्रान्तिवृत्तीयकलानां नाडीवृत्तीयासूनाञ्च कथं योगान्तरं कर्तुं शक्यते विजातीयत्वात्?

वस्तुतस्तु नाडीवृत्तस्य पृष्ठकेन्द्रत्वात् ध्रुवप्रोतवृत्ते क्रान्तिवृत्तस्य भुजांशकलाः उदयासवतुल्यकलाः एव न्यूनाधिकाः वा भवन्ति, अतः नैतत्खण्डनं समीचीनम्।

2. द्वितीयो हेतुः–

कालो गतेर्गतिसमं चलनं विना नो
गत्यैवमेषवदनाच्चलनादिहान्तः।
मध्यार्कके केवलगतेश्चलनं सदैक-
सद्भूदिनेऽस्ति हि रवेरुदयान्तरान्न।।

मध्यार्ककेवलगतेश्चलनं तु रवेः सद्भूदिनेऽर्थात् वास्तवमध्यमसावने भवति। न हि उदयान्तरवशादितयाक्षेपः। वस्तुतः कमलाकरेण मध्यमार्ककल्पितार्कयोरेकत्वं स्वीकृत्य एतद् विरोधं प्रकटितं, न तथा गोलयुक्त्या सम्भवतीति प्रत्यक्षमेव।

3. तृतीयहेतुः–

यावत्यः गतयः कल्पे तावन्तः सूर्यसावनाः।
उक्तयुक्त्येव तद्योगे भगणात् भभ्रमा अपि।।

एकस्मिन् कल्पे भगणे वा भ्रमणे ग्रहगतावपन्नतरं नोत्पद्यते कथं तर्हि एतदसमीचीनम्। अतः पदादौ पदान्ते सोदयान्तरम्-भवतु नाम क्रान्तिवृत्ते नाडीवृत्ते वा 21600 कलाः–21600 असवः, परन्तु पदमध्ये तिर्यक्त्वात् न तुल्यत्वमतः एतत्खण्डनमपि न साधु।

4. चतुर्थो हेतुः– यदि ग्रहसाधने पूर्ण-पूर्णदिनसंख्या अहर्गणे गृह्यते तदा तदन्तकालिकाः ग्रहाः कथं नोदयकालिकाः? सत्यमेतत् परन्तु अहर्गणेनानीताः त्रिप्रश्नरीत्या ग्रहाः नाडीवृत्तीयमध्यमार्कोदयकालिकाः न तु क्रान्तिवृत्तीय-मध्यमार्कोदयकालिकाः ग्रहाः, अतः अस्योपेक्षितत्वाने-तत्खण्डनमपि समीचीनम्।

5. पञ्चमहेतुः– भास्कराचार्येण सायनाऽर्कस्य गतिकला-तुल्यासूनां केवलार्कस्य गतिकलातुल्यासूनां चान्तरमुदयान्तर-मुक्तमिति कमलाकरेण प्रतिपादितम्, तत्तु दुराग्रहस्तद्धियैव, यतो हि युक्तायनांशस्य तु मध्यमस्येति पद्ये स्पष्टमेव यत् सायनार्कस्यैव गतिकलातुल्यासूनां गतिकलोत्पन्नासूनाञ्च चान्तरमुदयान्तरकालः। परन्तु गोलाध्याये–

मध्यार्कभुक्ता असवो निरक्षे ये
ये च मध्यार्ककलाः समानाः।
तदन्तरं यत् स्फुटमध्ययोस्तद्-
द्युपिण्डयोः स्याद्विवरं गतिघ्नम्।।

अस्मिन् श्लोके "मध्यार्ककलाः समानाः इत्यत्र केवल-मध्यार्ककलातुल्यासवः इत्यर्थं मत्वा, तथा च मध्यार्कभुक्ता असवो निरक्षा" इत्यत्र सायनमध्यार्ककलोत्पन्नासवः इत्यर्थं कृत्वा भास्करमतं खण्डितं तन्न युक्तम्। अथ

सायनार्कगतिकलोत्पन्नासूनां केवलार्कगतिकलातुल्यासूनां ग्रहणेन परमायनांशसमयेऽन्तरे कृते घटीचतुष्टयमन्तरं भवतीति महान् दोषः प्रदत्तं भट्टेन। नायं विवेकपूर्णः। श्रूयते मकरार्कसमये प्रयागे मिलितयोर्मुनीश्वरकमलाकरयोः उदयान्तरविषये शास्त्रार्थोऽभूत् तद्दिनत: मनः क्षोभादेव कमलाकरेण भास्करमतं दुराग्रहेण खण्डितम्। शेषवासनायां प्रोक्तञ्च तेन- 'सिद्धान्तपाण्डित्यमशेषमुक्तोदयान्तरान्नाशितमार्यवर्यैः' कमलाकरस्य दिवाकरदैवज्ञेन पित्रा च नृसिंहदैवज्ञेन उदयान्तरस्य रमणीयोपपत्तिः प्रदर्शिताः। भास्करेण पूर्वाचार्याणां उदयान्तरावहेलनापि साधुतया प्रकटितं यत्-

लंकोदयैर्स्युर्न कृतास्तद्यार्थे——यतोन्तरं तच्चलमल्पकञ्चेति दिक्।

(छ) उदयान्तरसाधनोपपत्तिविषयकवस्तुनिष्ठ-प्रश्नोत्तराणि

1. **प्रश्नः**— उदयान्तरमित्यस्य का व्युत्पत्तिः?
   उत्तरम्—उदयोः अन्तरम् उदयान्तरम्।
2. **प्रश्नः**— उदयान्तरमित्यस्य आविष्कर्ता कः?
   उत्तरम्— भास्कराचार्याविष्कृतोऽयमुदयान्तरम्।
3. **प्रश्नः**— उदयान्तरमित्यस्य किं स्वरूपम्?
   उत्तरम्—मध्यमसावनस्फुटसावनयोरन्तरं यद्वा वास्तव-अवास्तवमध्यमार्कोदययोरन्तरम् उदयान्तरम्।
4. **प्रश्नः**—उदयान्तरस्य का परिभाषा?
   उत्तरम्—विषुवांशभुजांशयोः अथवा रविगति-कलातुल्यासु नाक्षत्रषष्टिघटिकारविगतिकलोत्पन्नासु नाक्षत्रषष्टिघटिकयोरन्तरम्।
5. **प्रश्नः**—भुजांशविषुवांशक्रान्त्यंशावयवीयत्रिभुजे कस्य अन्तरम्?
   उत्तरम्— भुजांशविषुवांशयोरन्तरमुदयान्तरम्।
6. **प्रश्नः**— प्रथमतृतीयपदे किमुदयान्तरम्?
   उत्तरम्— ऋणम्।
7. **प्रश्नः**— द्वितीयचतुर्थपदे किमुदयान्तरम्?
   उत्तरम्— धनम्।
8. **प्रश्नः**— उदयान्तरस्य प्रवृत्तिः कुतः भवति?
   उत्तरम्— गोलसन्धितः भवति।
9. **प्रश्नः**— उदयान्तराभावः कस्मात् सिध्यति?
   उत्तरम्— भुजांश-विषुवांशयोः समत्वात् सिध्यति।
10. **प्रश्नः**— आचार्यभास्करमतानुसारेण परमोदयान्तराणि कति पलानि भवन्ति?
    उत्तरम्— 26 षड्विंशतिपलानि भवन्ति।
11. **प्रश्नः**—आचार्यकमलाकरभट्टेन सिद्धान्ततत्त्वविवेके दुराग्रहपूर्वकं कस्य खण्डनं विधाय निरर्थकत्वं प्रदर्शितम्?
    उत्तरम्— उदयान्तरस्य।
12. **प्रश्नः**— मध्यमार्ककल्पितार्कयोरेकत्वं स्वीकृत्य एतद् विरोधं केन प्रकटितम्?
    उत्तरम्— कमलाकरेण।
13. **प्रश्नः**—श्रूयते मकरार्कसमये प्रयागे मिलितयो- र्मुनीश्वरकमलाकरयोः कस्य विषये शास्त्रार्थोऽभूत्?
    उत्तरम्— उदयान्तरविषये।
14. **प्रश्नः**— तद्दिनतः मनःक्षोभादेव कमलाकरेण दुराग्रहेण कस्य मतं खण्डितम्?
    उत्तरम्— भास्करमतम्।
15. **प्रश्नः**— प्रथमपदे ग्रहसायनराशौ के अधिकाः भवन्ति?
    उत्तरम्— भुजांशाः।
16. **प्रश्नः**— प्रथमपदे ग्रहसायनराशौ के अल्पाः भवन्ति?
    उत्तरम्— विषुवांशाः।
17. **प्रश्नः**— प्रथमपदे ग्रहसायनराशौ अनयोरन्तरं प्राप्य मध्यमग्रहेभ्यः फलं किं क्रियते?
    उत्तरम्— ऋणम्।
18. **प्रश्नः**— कस्य मते उदयान्तरस्य आवश्यकता नास्ति?
    उत्तरम्— कमलाकरस्य।

(V-C-73) (24) सावनदिवसोपपत्तिः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) सावनदिवसपरिचयः—नवविधकालमानेषु भूसम्बन्धिमानं सावनमानं भवति। तत्र एकस्मात् सूर्योदयाद् परं सूर्योदयं यावत् कालः सावनदिनसंज्ञकः, अत एवोक्तं भास्कराचार्येण–"इनोदयद्वयान्तरं तदर्कसावनं दिनम्।" तदेव मेदिनीदिनम् एवमेव सौरेऽपि–

उदयादुदयं भानोर्भूमिसावनवासराः।

अतः सूर्योदयद्वयान्तर्वर्तिकालः सावनदिनमिति। वस्तुतः भोदया भगणैः स्वै-स्वैरिति ऊनाः स्वस्वोदयाः युगेरिति सौरवचनात् सर्वेषामेव ग्रहाणां स्वस्वोदयद्वयान्तर्वर्तिकालः सावनसंज्ञकः।

(ख) सावनमानप्रयोजनम्—सावनदिवसानां कदादिः कदा च पूर्तिरिति प्रत्यक्षावलोकनात्–

(अ) अहर्गणः मध्यमसावनमानेनैव साध्यते।

(ब) वासरादीनां निर्धारणं सावनेनैव भवति।

(स) सूतकादिपरिच्छेदः, दिनमासवर्षाधिपतीनां निर्धारणं सावनेनैव।

(द) ग्रहाणां मध्यमा गतिरपि सावनेनैव गृह्यते।

(न) यज्ञकालव्यवहारः सावनादेव।

अत उक्तं सौरसिद्धान्ते–**सावनानि स्युरेतेन यज्ञकालविधिस्तुतः।**

मानाध्याये–सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा।
मध्यमा ग्रहभुक्तिस्तु सावनेनैव गृह्यते।।

भास्करोऽपीत्थम्–**यत्कृच्छ्रसूतकचिकित्सितवासराद्यं तत्सावनाच्चेति।**

(ग) सावनदिवसभेदौ तयोरुपपत्तिश्च–सावनदिनम् द्विविधम्। **1. मध्यमसावनदिनम्। 2. स्फुटसावनदिनम्।**

1. मध्यमसावनदिनम्–नाक्षत्रषष्टिघटिकायुताः रवि-गतिकलातुल्यासवः मध्यमसावनम्। अतः नाक्षत्र-60 घटी + रवि.गतिकला तुल्यासव = मध्यमसावनम्। अस्योपपत्तिविषये शिरोमणौ हि- (म.ग.व)

"समं भसूर्यावुदितौ किलार्क्ष्या षष्ट्या घटीनामुदितं पुनर्भम् रविस्ततः स्वोदयभुक्तिघातान्खाभ्राष्टभू 800 लब्धसमासुभिश्च" अर्थात् नक्षत्रोदयः 60 घटिकाभिर्भवति "नाडीषष्ट्या तु नाक्षत्रमिति वचनात्"। ग्रहस्तु स्वगत्या पूर्वलम्बितः भवतीति कृत्वा अनुपातः क्रियते यत् यदि रविनिष्ठराशौ 1800 कलायां रविनिष्ठराशेरुदयमानं तदा गतिकलायां किमिति रविगतिकलोत्पन्नः कालः–

$$\frac{\text{उदयमानम्}\times\text{सूर्यस्पष्टगतिः}}{1800} = \text{रविगतिकलोत्पन्नः कालः।}$$

तेन 60घटी नाक्षत्रमाने एतद्योजनेन 60 घटी + लब्धि = मध्यमसावनदिनमुपपद्यते। अत उक्तम्–

समागतासुसंयुता रवेस्तु षष्टिनाडिकाः।
स्फुटं द्युरात्रमुद्गमाद्युभुक्तितश्च तच्चलम्।।

2. स्फुटसावनदिनम्–नाडीक्रान्तिवृत्तयोः भिन्नपृष्ठ-केन्द्रत्वात् क्रान्तिवृत्तीयकलाभ्यः नाडीवृत्तीयासूनामन्तरं उत्पद्यते, अतः स्फुटसावनार्थं उदयान्तरसंस्कारः भास्करेण कृतम्। वस्तुतः मध्यमसावनेनैव अहर्गणः साध्यते स्फुटसावनस्य प्रतिक्षणचलत्वात्। अत उक्तं भास्करेण–

अहर्गणो मध्यमसावनेन कृतश्चलत्वात्स्फुटसावनस्य।
तदुत्खेटाः उदयान्तराख्या कर्मोद्भवेनोनयुताः फलेन।।

अतः मध्यमसावनेन आगताः मध्यमग्रहाः क्षितिजसन्निधिगाः भवन्ति, तेषां क्षितिजोदयकालिक करणार्थं उदयान्तरः अपेक्षते। अतः मध्यमस्फुटसावनयोरन्तरं विषुवांश-भुजांशरूपं रविगतिकलोत्पन्नासु गतितुल्यासवोरन्तर-मुदयान्तरमिति। तत्साधनार्थं च युक्तायनांशस्य तु मध्यमस्येति प्रोक्तम्"। एतेन यदुदयान्तरासुवः लभ्यन्ते तैः संस्कृतोमध्यमसावनः स्फुटो जायते। अतः नक्षत्र 60 घटी + रविगतिकलोत्पन्नासवः = स्पष्टसावनम्।

(घ) वेधेन सावनदिवसोपपत्तिः– अथ एकस्मिन् सौरवर्षे कति सावनदिनानि वेधेनापि उपपाद्यते यथा–कर्कत्रिज्यामिते राश्यंकिते भगणांकिते वृत्ते प्राचीचिह्नात् क्रमशः उत्तरे दक्षिणेऽयने च परमान्तरं विज्ञाय रवेरुदयाः गणणीयाः ते 365 तुल्याः भवन्ति। तत्रान्तिमोदयपूर्वोदय-स्थानासन्नो दक्षिण एव, तयोरन्तरं ग्राह्यम्। अन्यस्मिन् वेधेन उत्तरमन्तरं ग्राह्यम्। तयोर्योगः कर्तव्यः। ततः अनुपातः क्रियते यदि अन्तरद्वितयकलाभिः एकीकृताभिः 60 घटिकाः तदा दक्षिणेनान्तरेण किमिति–

$\frac{60\times \text{दक्षिणोत्तरान्तरेण}}{\text{एकीकृताभिः अन्तरेण}}$ = 15 I30 I22 I30

अतः 365 I15 I30 I22 I30 सावनदिनानि सौरवर्षे भवन्ति। अतः अनुपातेन कल्पेऽपि ज्ञातुं शक्यते, अत उक्तम्- "पञ्चाङ्गरामास्तिथयः खरामाः सार्धद्विदस्राः कुदिनाह्यमब्दे" अस्यार्कमासोऽर्कलवः प्रदिष्टः त्रिंशद्दिनं सावनमास एव।

(ङ) **नक्षत्रोदयवशात् सावनज्ञानम्**– अथ कश्चिदपि ग्रहो केनचिन्नक्षत्रेण सह भ्रमणे प्रवृत्तः पूर्वतो लम्बितः यावदेवं भगणं प्रपूरयति तावत्तन्नक्षत्रस्यैकभ्रमणमधिकं जायते। अतः एकस्मिन् भगणे ग्रहोदयाः नक्षत्रोदयापेक्षया एकोना भवन्तीति गोलयुक्तियुक्त एव, अतः एकस्मिन् भगणे ग्रहसावन-नक्षत्रयोरेकमन्तरं तदा युगीयभभ्रमाणा ग्रहभगणानाञ्चान्तरं ग्रहयुगसावनदिनमुपपद्यन्ते, यथा–

भभ्रमाः–ग्रहभगणाः = ग्रहसावनदिनानि।

अत उक्तं सौरसिद्धान्ते–"भोदया भगणैः स्वैः–स्वैः ऊना स्वस्वोदया युगे। भास्करोऽपि–

षष्ट्या घटीनां भदिनं सदाख्यां
तत्तुल्यभुक्तासुयुतं खरांशोः।
स्यान्मध्यमं सावनमेवमब्दे
तत्संख्यका भ्रमतो निरंका॥

इत्थं एकस्मिन् सौरवर्षे मध्यसावनदिनानि तुल्यानि इत्यपि उपपद्यन्ते।

(च) सावनदिवसोपपत्तिविषयकवस्तुनिष्ठ-प्रश्नोत्तराणि

1. **प्रश्नः**— नवविध्कालमानेषु भूसम्बन्धिमानं किं भवति?
उत्तरम्— सावनमानं भवति।

2. **प्रश्नः**— कः सावनदिनसंज्ञको भवति?
उत्तरम्— एकस्मात् सूर्योदयात् परं सूर्योदयं यावत् कालः सावनदिनसंज्ञकः।

3. **प्रश्नः**— भास्कराचार्येण सावनदिनस्य का परिभाषा?
उत्तरम्— इनोदयद्वयान्तरं तदर्कसावनं दिनम्।

4. **प्रश्नः**— "सावनदिनम्" इति शब्देन के गृह्यन्ते?
उत्तरम्— भूमिसावनवासराः गृह्यन्ते।

5. **प्रश्नः**— अहर्गणः केन मानेन साध्यते?
उत्तरम्— मध्यमसावनमानेनैव साध्यते।

6. **प्रश्नः**— वासरादीनां निर्धारणं केन भवति?
उत्तरम्— सावनेनैव भवति।

7. **प्रश्नः**—सूतकादिपरिच्छेदः, दिनमासवर्षाधिपतीनां निर्धारणं केन भवति?
उत्तरम्— सावनेनैव।

8. **प्रश्नः**— ग्रहाणां मध्यमा गतिरपि केन गृह्यते?
उत्तरम्— सावनेनैव गृह्यते।

9. **प्रश्नः**— यज्ञकालव्यवहारः कस्माद् भवति?
उत्तरम्— सावनादेव।

10. **प्रश्नः**— सावनदिनं कतिविधं, कौ च सावनदिवसभेदौ?
उत्तरम्—द्विविधम्, 1. मध्यमसावनदिनम्। 2. स्फुटसावनदिनम्।

11. **प्रश्नः**— कः मध्यमसावनदिनम्?
उत्तरम्—नाक्षत्रषष्टिघटिकायुताः रविगतिकला-तुल्यासवः मध्यमसावनम्।

12. **प्रश्नः**— स्फुटसावनार्थं उदयान्तरसंस्कारः केन कृतम्?
उत्तरम्— भास्करेण कृतम्।

13. **प्रश्नः**— एकस्मिन् सौरवर्षे कति सावनदिनानि भवन्ति?
उत्तरम्— 365 I15 I30 I22 I30 सावनदिनानि सौरवर्षे भवन्ति।

14. **प्रश्नः**— एकस्मिन् सावनमासे कति दिनानि भवन्ति?
उत्तरम्— त्रिंशद्दिनानि भवन्ति।

15. **प्रश्नः**— भास्करोक्तसावनदिनं कतिवर्षकात्मकं वर्तते?
उत्तरम्— एकवर्षात्मकम्।

16. **प्रश्नः**— अधिमासः को भवति?
उत्तरम्— असङ्क्रान्तिमासः।

17. **प्रश्नः**— चान्द्रमासमानं किम्?
उत्तरम्— रवीन्दोर्युतेः संयुतिर्यावदन्या।

(V-C-73) (25) सभङ्गबालारिष्टयोगाः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) सभङ्गबालारिष्टविचारश्च–प्राचीनकालात् एव भारते विश्वे वा समस्तहिन्दूधर्मावलम्बिनः शिशुजन्मपरं जातकस्य पिता ज्योतिविर्त्पार्श्वे गच्छ स्वपुत्रस्य भूत-वर्तमान-भविष्यज्ञानाय समुत्सुकाः भवन्ति। यदि जातकं बालारिष्टं स्यात् तर्हि तस्य भविष्ये का लाभ-हानिः भविष्यति। सभङ्गबालारिष्टयोगाः एवं तत्सम्बन्धिश्लोकाः–

षष्ठेऽष्टमेऽपि चन्द्रः सद्यो मरणाय पापसंदृष्टः।
अष्टाभिः शुभदृष्टो वर्षैर्मिश्रैस्तदर्धेन॥
सप्ताष्टात्योदयगे शशिनि सपापे शुभे क्षणवियुक्ते।
न च कण्टकेऽस्ति कश्चिच्छुभस्तदा मृत्युरादेश्यः॥
सुतमदननवान्त्यलग्नरन्ध्रेष्व-
शुभयुतो मरणाय शीतरश्मिः।
भृगुसुतशशिपुत्रदेवपूज्यैर्यदि बलिभिर्न
युतोऽवलोकितो वा॥
योगे स्थानं गतवति बलिनश्चन्द्रे
स्वं वा तनुगृहमथवा।
पापैर्दृष्टे बलवति मरणं
वर्षस्यान्तः किल मुनिगदितम्॥

महर्षिपराशरानुसारम्–जन्मलग्नात् बालारिष्ट-अरिष्टभङ्गयोः सर्वप्रथमविचारं करणीयम्। जन्मतः चतुर्विंशतिवर्षाणि यावत् बालारिष्टयोगो भवति। तत्रादौ द्वादशाब्दीयमध्ये आयुषोऽनिश्चिता भवति। जन्मतः प्रथमचतुष्के माताकृत-अशुभकर्मस्य प्रभावेण जातकः नश्यति। तत्पश्चात् अष्टवर्षाणि यावत् पित्राऽर्जित-अशुभकार्यस्य प्रभावेण जातकः नश्यति। तत्परं द्वादशवर्षपर्यन्तं जातकस्य स्वकीयदोषैः नश्यति। जन्मलग्नात् षष्ठ-अष्ट-द्वादशगृहे चन्द्रमा स्यात् एवं पापग्रहाः (मंगल-शनि-राहु-केतु) इत्यतः अवलोक्यते तर्हि जातकस्य सद्यः मृत्युं भविष्यति। किन्तु शुभग्रहात् अवलोकनेन जातकस्य अष्टमे वर्षे मृत्युर्निश्चितः।

1. बृहज्जातके–जातकजन्मसमयचक्रस्य पूर्वार्धे पापग्रहः तथा पश्चिमार्धे शुभग्रहाः एवं कर्कः अथवा वृश्चिकलग्नः स्यात् तर्हि जातकस्य मृत्युः निश्चितो भवति। (वृहज्जातके- (6-2)
2. यदि पापग्रहाः लग्ने एवं सप्तमस्थानस्य उभयतः स्यात्। अर्थात् लग्नस्य उभयतः द्वादशद्वितीयस्थानयोश्च, सप्तमस्य उभयतः षष्ठ-अष्टमस्थानयोश्च पापग्रहाः तिष्ठन्ति तर्हि जातकस्य मृत्युः ध्रुवमेव।
3. जन्मलग्नात् द्वादशस्थाने क्षीणचन्द्रमा स्यात्, पापग्रहाः लग्न-अष्टमस्थानयोः स्यात् एवं केन्द्रे (1, 4, 7, 10) कोऽपि शुभग्रहः न स्यात् तर्हि जातकस्य मृत्युः शीघ्रं भवति। (वृहज्जातके- (6-4)
4. लघुजातकानुसारम्–यदि शुभग्रहाः चन्द्रमाः सदृशजन्मलग्नात् षष्ठे-अष्टमे च भावयोः स्थितः स्यात्, वक्रोपापग्रहैः दृष्टः, शुभग्रहैः अदृष्टः स्युः तर्हि मासाभ्यन्तरेव बालकस्य मृत्युः भवति। (लघु.जा.7/2)
5. राहुणा ग्रस्तः चन्द्रमा पापग्रहेण सह लग्ने स्यात्, अष्टमभावे मंगलः स्यात् तर्हि जातकस्य मृत्युः भवति। (लघु.जा.7/8)
6. पापग्रहेण युक्तः चन्द्रमा पञ्चम-सप्तम-नवम- द्वादश-प्रथम-अष्टमभावेषु कश्चित् एकभावे स्थितं सति वरिष्ठशुक्र-बुध-गुरु-इत्येतैः सह युक्ता दृष्टा वा न स्यात् तर्हि जातकस्य मृत्युः भवति। (वृहज्जातके-(6-11)
7. एकत्रितसूर्यमंगलशनिः यदि मंगलस्य राशौ (1.8) स्युः, एवं चन्द्रमाः तान् दृष्टं स्यात्, वृहस्पतिः अष्टमे स्थाने स्यात् तर्हि जातकं प्रति कष्टकरो भविष्यति। (जातकतत्त्वम्-46)
8. सूर्य-राहु-शनि-बुध-वृहस्पतिः यदि लग्ने, पञ्चमभावे वा स्युः तर्हि अस्मिन् योगे उत्पन्नः जातकः तत्क्षणमेव मृत्युं प्राप्नोति।

लग्नेशकृतोऽरिष्टभंगः–

लग्नेशो बलयुक्तश्चेत् त्रिकोणे वा चतुष्टमे।
अरिष्टयोगजातोऽपि बालो जीवति निश्चयः॥

ग्रहकृतोऽरिष्टभंगः–

यस्य जन्मनि तुंगस्थाः स्वक्षेत्रस्थानमाश्रिताः।
चिरायुषं शिशुः जातं कुर्वन्त्यत्र न संशयः॥

शीघ्रबोधे दैवज्ञः काशीनाथः कथयति–

किं कुर्वन्ति ग्रहाः सर्वे यस्य केन्द्रे बृहस्पतिः।
मतमातंगयूथानां शतं हन्ति च केशरी॥

(ख) सभङ्गबालारिष्टयोगाः–

एकोऽपि ज्ञार्यशुक्राणां लग्नात्केन्द्रगतो यदि।
अरिष्टं निखिलं हन्ति तिमिरं भास्करो यथा।।

1. बुध-वृहस्पति-शुक्राः एषु त्रियुतः कोऽपि एकोऽपि ग्रहः लग्नात् केन्द्रस्थाने तिष्ठति तर्हि यथा सम्पूर्णं अन्धकारं सूर्यः नाशयति, तत्सदृशमेव सम्पूर्णपूर्वोक्तं अरिष्टं नाशयति।
2. वरिष्ठो भूत्वा एको वृहस्पतिः लग्ने तिष्ठे सति अरिष्टसंचयस्य नाशो भवति।
3. शुक्लपक्षस्य दिने जन्म स्यात्, लग्नोपरि शुभग्रहस्य दृष्टिः स्यात्, अथवा कृष्णपक्षस्य रात्रौ जन्म स्यात् एवं लग्नोपरि शुभग्रहस्य दृष्टिः स्यात् तर्हि सम्पूर्णमरिष्टं विनश्यते।
4. यस्य जातकस्य द्वादशे स्थाने सूर्यः स्थितो भूत्वा तुलालग्ने तिष्ठति, तर्हि जातकः शतायुः भवति।
5. वृहस्पतिमंगलौ एकराशौ स्यात्, अथवा मंगलोपरि वृहस्पतेः दृष्टिः स्यात् तर्हि सम्पूर्णमरिष्टं नाशयित्वा मातरं प्रति शुभकारो भवति।
6. लग्नाच्चतुर्थे यदि पापखेटः केन्द्रत्रिकोणे सुरराजमन्त्री भूते सति कुलद्वयानन्दकरो भवति जातकः।
7. पापग्रहाः द्वयोः शुभग्रहयोर्मध्ये केन्द्रत्रिकोणगैः भूते सति शीघ्रं अरिष्टं नाशयति।
8. द्वयोः शुभग्रहयोर्मध्ये उपस्थितः चन्द्रमा यदि शुभग्रहस्य राशौ स्यात् तर्हि अरिष्टान् नाशयति।
9. देदीप्यमानकिरणैः युक्ता स्वच्छविम्बधरावृहस्पतिः यदि केन्द्रे स्यात् तर्हि जातकस्य सम्पूर्णमरिष्टान् नाशयति।

सभङ्गबालारिष्टयोगाः
सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— बालारिष्टज्ञानेन किं भविष्यति?
उत्तरम्— भविष्ये लाभ-हानिविषयकज्ञानम्।
2. **प्रश्नः**—जन्मलग्नात् बालारिष्ट-अरिष्टभङ्गयोः सर्वप्रथमविचारं करणीयमिति कस्य विचारः?
उत्तरम्—महर्षिपराशरस्य।
3. **प्रश्नः**—बालारिष्टयोगो कियत् वर्षाणि यावत् भवति?
उत्तरम्—जन्मतः चतुर्विंशतिवर्षाणि यावत्।
4. **प्रश्नः**—आयुषोऽनिश्चितता कियत् वर्षाणि यावत् भवति?
उत्तरम्— द्वादशाब्दीयमध्ये।
5. **प्रश्नः**—जन्मतः प्रथमचतुष्के कस्य प्रभावेण जातकः नश्यति?
उत्तरम्—माताकृत-अशुभकर्मणः।
6. **प्रश्नः**—अष्टवर्षानि यावत् कस्य प्रभावेण जातकः नश्यति?
उत्तरम्—पित्राऽर्जित-अशुभकार्यस्य।
7. **प्रश्नः**—जातकस्य स्वकीयदोषैः कियद्वर्षपर्यन्तं नश्यति?
उत्तरम्—द्वादशवर्षपर्यन्तम्।
8. **प्रश्नः**—जातकस्य सद्यः मृत्युः कथं भविष्यति?
उत्तरम्—जन्मलग्नात् षष्ठ-अष्ट-द्वादशगृहे चन्द्रमा स्यात् एवं पापग्रहाः (मंगल-शनिः-राहु-केतु) इत्यतः अवलोक्यते तर्हि शुभग्रहात् अवलोकनेन जातकस्य अष्टमे वर्षे मृत्युर्निश्चितः।
9. **प्रश्नः**—जातकजन्मसमयचक्रस्य पूर्वार्धे पापग्रहः तथा पश्चिमार्धे शुभग्रहः एवं कर्कः अथवा वृश्चिकलग्नः स्यात् तर्हि जातकस्य मृत्युः निश्चितो भवति इति कुतः उद्धृतः?
उत्तरम्— बृहज्जातकात्।
10. **प्रश्नः**—यदि शुभग्रहाः चन्द्रमाः सदृशजन्मलग्नात् षष्ठे-अष्टमे च भावयोः स्थितः स्यात्, वक्रीपापग्रहैः दृष्यः, शुभग्रहैः अदृष्यः स्युः तर्हि मासाभ्यन्तरेव बालकस्य मृत्युं भवति इति कुतः उद्धृतः?
उत्तरम्—लघुजातकग्रन्थात्।
11. **प्रश्नः**—एकत्रितसूर्यमंगलशनिः यदि मंगलस्य राशौ (1.8) स्युः, एवं चन्द्रमाः तान् दृष्टं स्यात्, वृहस्पतिः अष्टमे स्थाने स्यात् तर्हि जातकं प्रति कष्टकरो भविष्यति इति कुतः उद्धृतः?
उत्तरम्— जातकतत्त्वात्।
12. **प्रश्नः**—सूर्य-राहु-शनि-बुध-वृहस्पतिः यदि लग्ने, पञ्चमभावे वा स्युः तर्हि अस्मिन् योगे उत्पन्नस्य जातकस्य किं भविष्यति?
उत्तरम्—तत्क्षणमेव मृत्युं प्राप्नोति।

13. **प्रश्नः**— सभङ्गबालारिष्टयोगस्य प्रयोजनं किम्?
उत्तरम्—एकोऽपि ज्ञार्यशुक्राणां लग्नात्केन्द्रगतो यदि। अरिष्टं निखिलं हन्ति तिमिरं भास्करो यथा।।
14. **प्रश्नः**—बुध-वृहस्पति-शुक्राः एषु त्रियुतः कोऽपि एकोऽपि ग्रहः लग्नात् केन्द्रस्थाने तिष्ठति तर्हि किं भविष्यति?
उत्तरम्—यथा सम्पूर्णं अन्धकारं सूर्यः नाशयति, तत्सदृशमेव सम्पूर्णपूर्वोक्तं अरिष्टं नाशयति।
15. **प्रश्नः**—पापग्रहाः द्वयोः शुभग्रहयोर्मध्ये केन्द्रत्रिकोणगैः भूते सति शीघ्रं किं भविष्यति?
उत्तरम्—अरिष्टं नाशयति।
16. **प्रश्नः**—शीघ्रबोधे दैवज्ञः काशीनाथः किं कथयति?
उत्तरम्—किं कुर्वन्ति ग्रहाः सर्वे यस्य केन्द्रे बृहस्पतिः। मतमातंगयूथानां शतं हन्ति च केशरी।।
17. **प्रश्नः**—लग्नेशकृतोरिष्टभंगसम्बन्धे शास्त्रकारस्य कथनं किम्?
उत्तरम्—लग्नेशो बलयुक्तश्चेत् त्रिकोणे वा चतुष्टये। अरिष्टयोगजातोऽपि बालो जीवति निश्चयः।
18. **प्रश्नः**—ग्रहकृतोऽरिष्टभंगसम्बन्धे शास्त्रकारस्य कथनं किम्?
उत्तरम्—यस्य जन्मनि तुंगस्थाः स्वक्षेत्रस्थानमाश्रिताः। चिरायुषं शिशुः जातं कुर्वन्त्यत्र न संशयः।।

(V-C-73) 26. आयुर्दायविचारः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

आयुर्दायविचारः–पूर्वोक्त अरिष्टयोगरहितानामेव जनिमताम् आयुर्दायविचारः कर्तव्यः। समुपस्थिते च आयुर्विचारे पराशराद्यैर्निर्दिष्यन्यायूंष्यत्रोच्यते–

निसर्गपैंड्यांशकरश्मिचक्रनक्षत्रदायाष्टकवर्गजानि।
पराशराद्यैः कथितानि यानि संगृह्य तानि क्रमशः प्रवच्मि।।
(जातकपरिजाते-1)

राश्यंशकला गुणिता द्वादशनवभिर्ग्रहस्य भगणेभ्यः।
द्वादशहृतावशेषेऽब्दमासदिननाडिकाः क्रमशः।।

पराशराद्यैर्मुनिभिः कथितानि यानि-1. निसर्गायुः, 2. पिण्डायुः, 3. लग्नायुः, 4. अंशकायुः, 5. रश्मिजायुः, 6. चक्रायुः, 7. नक्षत्रायुः, 8. अष्टवर्गजायुः इति विवेच्य-विषयाः।

ग्रहाणां निसर्गादि-आयुः वर्षसङ्ख्याः–

आयुर्दाय	सूर्य-वर्षः	चन्द्र-वर्षः	मंगल-वर्षः	बुध-वर्षः	गुरु-वर्षः	शुक्र-वर्षः	शनि-वर्षः	राहुः	केतुः
1. निसर्गायुः	20	1	2	9	18	20	50		
2. पिण्डायुः	19	25	15	12	15	21	20		
3. लग्नायुः									
4. अंशकायुः	24	21	25	22	26	23	28	27	27
5. रश्मिजायुः	10	9	5	5	7	8	5		
6. चक्रायुः	6	10	7	17	16	20	19	18	7
7. नक्षत्रायुः									
8. अष्ट-वर्गजायुः	1रेखा 1 1/2 दिन	2 रेखा 1 दिन	3 रेखा 1/2 7 दिन	4 रेखा 1/2 दिन	5 रेखा 2 वर्ष	6 रेखा 4 वर्ष	7 रेखा 6 वर्ष	8 रेखा =	8 वर्ष

त्रिविधायुर्बोधकचक्रम्-

क्रमांक	दीर्घायुः	मध्यमायुः	अल्पायुः
1.	चरमे लग्नेशः	चरमे लग्नेशः	चरमे लग्नेशः
2.	चरमेऽष्टमेशः	स्थिरभावेऽष्टमेशः	द्विस्वभावेऽष्टमेशः
3.	स्थिरभावे लग्नेशः	स्थिरभावे लग्नेशः	स्थिरभावे लग्नेशः
4.	द्विस्वभावेऽष्टमेशः	चरमेऽष्टमेशः	स्थिरभावेऽष्टमेशः
5.	द्विस्वभावे लग्नेशः	द्विस्वभावे लग्नेशः	द्विस्वभावे लग्नेशः
6.	स्थिरभेऽष्टमेशः	द्विस्वभावेऽष्टमेशः	चरमेऽष्टमेशः

1. निसर्गायुः-

नखाः शशी द्वौ नवकं धृतिश्च
कृतिः खबाणा रविपूर्वकाणाम्।
इमा निरुक्ताः क्रमशो ग्रहाणां
नैसर्गिके ह्यायुषि वर्षसंख्याः।।
(जातकपरिजाते-2)

2. पिण्डायुः-

नवेन्दवो बाणयमाः शरक्ष्माः
दिवाकराः पञ्चभुवः कुपक्षाः।
नखाश्च भास्वत्प्रमुखग्रहाणां
पिण्डायुषोऽब्दा निजतुङ्गगानाम्।।
(जातकपरिजाते-3)

3. लग्नायुः-

आयुस्तथैतेषु बलाढ्यलग्ने
विहाय राशीन् कृतलिप्तिकेऽत्र।
भक्ते द्विशत्या फलमब्दपूर्वं
यत्स्याद्विलग्नायुषि तच्च योज्यम्।।
(जातकपरिजाते-14)

होरादयोऽप्येवं बलयुक्ताऽन्यानि राशितुल्यानि।
वर्षाणि संप्रयच्छत्यनुपाताच्चांशकादिफलम्।।

4. अंशकायुः-

स्वमतेन किलाह जीवशर्मा
ग्रहदायं परमायुषः स्वरांशम्।
ग्रहभुक्तनवांशराशितुल्यं
बहुसाम्यं समुपैति सत्यवाक्यम्।।
(जातकपरिजाते-17)

5. रश्मिजायुः-

दशगोशरबाणाद्रिवसुसायकरश्मयः।
दिननायकमुख्येषु निजतुङ्गगतेषु च।।
(जातकपरिजाते-22)

6. चक्रायुः-

रव्यादिसप्तग्रहतारकांश-
भुक्तावशेषाब्दसमूहमायुः।
सव्यापसव्योपगवायजं वा
वदन्ति चक्रायुरिनादिकानाम्।।
(जातकपरिजाते-26)

7. नक्षत्रायुः-

8. अष्टवर्गजायुः-

वृहत्पाराशरहोराशास्त्रे- पराशर-उवाच-

अथायुरष्टवर्गोत्थं वच्मि ते शृणु तन्मुने।
रेखाभावे दिनं युग्मं सार्धकं रेखया स्मृतम्।।1।।
रेखाभ्यां दिनमेकं तु दिनार्धं तिसृभिर्मतम्।
अह्नां सप्त दिनार्धं च वेदरेखाभिरादिशेत्।।2।।
पञ्चभिर्युग्मवर्षं च षड्भिरब्दचतुष्टयम्।
सप्तमी रसवर्षं चाष्टाभिरष्टाब्दकं स्मृतम्।।3।।
इत्थं समस्तग्रहजं मुने! यच्चायुरागतम्।
तस्यार्धं विदितं स्पष्टमायुरष्टकवर्गजम्।।4।।
(वृ.पा.हो.शा.)

आयुर्दायविचारः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—आयुर्दायविचारः कथं कर्तव्यः?
उत्तरम्—पूर्वोक्त अरिष्टयोगरहितानामेव जनिमताम्।

2. प्रश्नः—आयुर्विचारे पराशराद्यैर्निर्दिष्टान्यायूंषि जातकपरिजाते किमुच्यते?
उत्तरम्—निसर्गपिंड्यांशकरश्मिचक्रनक्षत्रदायाष्टकवर्गजानि। पराशराद्यैः कथितानि यानि संगृह्य तानि क्रमशः प्रवच्मि।।

3. प्रश्नः—पराशराद्यैर्मुनिभिः कथितानि कानि विवेच्यविषयाः सन्ति?
उत्तरम्—1. निसर्गायुः, 2. पिण्डायुः, 3. लग्नायुः, 4. अंशकायुः, 5. रश्मिजायुः, 6. चक्रायुः, 7. नक्षत्रायुः, 8. अष्टवर्गजायुः इति।

4. प्रश्नः—निसर्गायुःविषये जातकपारिजाते किं कथितमस्ति?
उत्तरम्—नखाः शशी द्वौ नवकं धृतिश्च कृतिः खबाणा रविपूर्वकाणाम्। इमा निरुक्ताः क्रमशो ग्रहाणां नैसर्गिके ह्यायुषि वर्षसंख्याः।।

5. प्रश्नः—पिण्डायुःविषये जातकपारिजाते किं कथितमस्ति?
उत्तरम्—नवेन्दवो बाणयमाः शरक्ष्माः दिवाकराः पञ्चभुवः कुपक्षाः। नखाश्च भास्वत्प्रमुखग्रहाणां पिण्डायुषोऽब्दा निजतुङ्गगानाम्।।

6. प्रश्नः—लग्नायुःसम्बन्धे जातकपारिजाते किं कथितमस्ति?
उत्तरम्—आयुस्तथैतेषु बलाढ्यलग्ने विहाय राशीन् कृतलिप्तिकेऽत्र। भक्ते द्विशत्या फलमब्दपूर्वं यत्स्याद्विलग्नायुषि तच्च योज्यम्।।

7. प्रश्नः—अंशकायुःविषये जातकपारिजाते किं कथितमस्ति?
उत्तरम्—स्वमतेन किलाह जीवशर्मा ग्रहदायं परमायुषः स्वरांशम्। ग्रहभुक्तनवांशराशितुल्यं बहुसाम्यं समुपैति सत्यवाक्यम्।।

8. प्रश्नः—रश्मिजायुःसम्बन्धे जातकपारिजातं किं कथितमस्ति?
उत्तरम्—दशगोशरबाणाद्रिवसुसायकरश्मयः। दिननायकमुख्येषु निजतुङ्गगतेषु च।।

9. प्रश्नः—चक्रायुःविषये जातकपारिजाते किं कथितमस्ति?
उत्तरम्—रव्यादिसप्तग्रहतारकांशभुक्तावशेषाब्दसमूहमायुः। सव्यापसव्योपगवायजं वा वदन्ति चक्रायुरिनादिकानाम्।।

10. प्रश्नः—अष्टवर्गजायुःसम्बन्धे वृहत्पाराशरहोराशास्त्रे पराशरस्य वचनं किमस्ति?
उत्तरम्—अथायुरष्टवर्गोत्थं वच्मि ते शृणु तन्मुने। रेखाभावे दिनं युग्मं सार्धकं रेखया स्मृतम्।।1।।
रेखाभ्यां दिनमेकं तु दिनार्धं तिसृभिर्मतम्। अह्नां सप्त दिनार्धं च वेदरेखाभिरादिशेत्।।2।।
पञ्चभिर्युग्मवर्षं च षड्भिरब्द चतुष्टयम्। सप्तमी रसवर्षं चाष्टाभिरष्टाब्दकं स्मृतम्।।3।।
इत्थं समस्तग्रहजं मुने! यच्चायुरागतम्। तस्यार्धं विदितं स्पष्टमायुरष्टकवर्गजम्।।4।।

11. प्रश्नः—अष्टमं च तृतीयस्थं बुधैरायुरुदाहृतम्। इति कस्य सन्दर्भे वर्तते?
उत्तरम्—आयुर्दायविचारसम्बन्धे।

12. प्रश्नः—राश्यंशकला गुणिता द्वादशनवभिर्ग्रहस्य भगणेभ्यः। द्वादशहृतावशेषेऽब्दमासदिनाडिकाः क्रमशः।। उक्त श्लोकः कस्य सन्दर्भे व्यक्तोऽस्ति?
उत्तरम्—आयुर्दायविचारसम्बन्धे।

13. प्रश्नः—लग्नायुर्दायसम्बन्धे शास्त्रकारस्य कथनं किम्?
उत्तरम्—होरादयोऽप्येवं बलयुक्ताऽन्यानि राशितुल्यानि। वर्षाणि संप्रयच्छत्यनुपाताच्चांशकादिफलम्।।

(V-C-73) (27) भावफलविचारः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

भावविचारः- (क) पञ्चमभावविचारः (ख) सप्तमभावविचारः (ग) दशमभावविचारः)

भारतीयज्योतिषशास्त्रस्य फलितविभागे फलादेशार्थम् एका सरणिबद्धा परम्परा विधिश्च वर्तते, यैः न केवलं मानवस्यैवापि तु चराचरस्य जगति कीदृशं कदा च किम् फलं भविष्यतीति सर्वं विचार्यते। अत्र मानवजीवनस्य प्रमुखतात्त्विकविषयाः द्वादशभावेषूपनिबद्धाः सन्ति। अयं भावः स्थिररूपेण शास्त्रेऽस्मिन् परिगण्यते, यस्य गणना लग्नात् भवति अर्थात् यस्मिन् लग्ने कोऽपि जातकः जन्म गृह्णाति तदेव प्रथमो भावनाम्ना ख्यातः।

फलितशास्त्रे ज्योतिषशास्त्रस्य प्रमाणद्वयस्य उपलब्धिः भवतीति, कुत्रचिद् 1. आर्षप्रमाणं, यथा-दशा-वर्षनिर्धारणे, उच्च-नीचकथने, ग्रहस्थितिवशात् फलादेशश्च। कुत्रचिद् 2. युक्तिप्रमाणस्यापि उपलब्धिः प्राप्यते, यत्र-तत्र सम्भवते च।

तद्यथा-भावात् भावस्य निर्धारणे, एवमेव नवांशविचारे, प्रकृतिवशात् उत्पन्नरोगनिर्धारणे, अश्व-हस्ति-स्थाने यानादिवाहनविचारे च।

फलितशास्त्रे फलादेशस्य ये केऽपि कारकाः सन्ति तेषु 1. सर्वप्रथमः भवति ग्रहः, 2. द्वितीयो कारकः भावः एवोपपद्यते। यतो हि ग्रहाः एव अस्य शास्त्रस्य मूलभूतकारकाः सन्ति, यस्याधारेण किमपि फलं काऽपि स्थितिः वा सम्पद्यते। प्राचीनाचार्यैः विशेषेण मानवजीवनस्य समस्तावश्यकविषयाणां सूक्ष्मान्वेषणेन तथ्यरूपेण च द्वादशभावाः विभागीकृताः। एवमत्र मानवजन्मादारभ्य मृत्युपर्यन्तं या काऽपि आवश्यकता, सम्बन्धः, विषयश्च मनुष्यः इच्छति, तेषां समेषां सम्बन्धः द्वादशभावेनैव विद्यते।

एवमत्र भावनिर्धारणे क्रान्तिवृत्तस्य द्वादशात्मकभागस्य सर्वाधिकं महत्त्वं भवति। यथा-



एवमेवोक्तं जातकपारिजाते यदा कोऽपि भावेशः लग्नात् केन्द्रगतः वा स्यात् अथवा शुभैः दृष्टः, स्वतुङ्गे स्यात्तदा तद्भावपुष्टिः भवति। यथा-

यद्भावपे केन्द्रगते विलग्नात्त्रि-
कोणगे वा यदि सौम्यदृष्टे।
तुङ्गादिवर्गोपगते बलाढ्ये
तद्भावपुष्टिं फलमाहुरार्याः॥
(जा.परि-11/5)

वस्तुतः भावजफलानि निम्नलिखिततथ्याधारेण चिन्त्यानि भवन्ति- 1. भावः, 2. भावाधिपतिः, 3. भावकारकः, 4.

भावस्थितग्रहः, 5. भावेक्षितः ग्रहः, 6. भावेशेन सह स्थितो ग्रहः, 7. यैः ग्रहैः भावेशो दृश्यते, 8. भावकारकेण सह स्थितो ग्रहः, 9. यैः ग्रहैः भावकारकाः दृश्यन्ते। उपर्युक्तयुक्त्याधारेणैव भावजनितफलस्य सम्यक्तया निर्धारणं सम्भवति।

एवमेव द्वादशभावानां पृथक्-पृथक् स्थितिकारकाः ग्रहाः अपि वर्णिताः सन्ति। यथा-

द्युमणिरमरमन्त्री भूसुतः सोमसौम्यो
गुरुरिनतनयारो भार्गवो भानुपुत्रः।
दिनकरदितिजेज्यो जीवभानुज्ञमन्दा
सुरगुरुरिनसूनुः कारकाः स्युर्विलग्नात्॥
(जा.परि.)

भावाः	1	2	3	4	5	6	7	8	9	10	11	12
कारकाःग्रहाः	सू.	बृ.	मं.	चं. बु.	बृ	श. मं.	शु.	श.	सू.बु.	सू. बु.गु. श.	गु.	बृ.

(क) पञ्चमभावविचारः-सुत-तनुज-पणफर-त्रिकोण-विद्या-आत्मज-वाजी एवञ्च नामानि विद्यते। अत्र विचारणीयो वर्तते यत् बुद्धि, प्रबन्ध, संतति, विद्या-विनय-नीति-व्यवस्था, देवभक्ति, मन्त्र, शिक्षा, जीविका, धनलाभ, जठराग्नि, गर्भाशय, यश, मूत्रपिण्ड बस्ती तथा कारक गुरुः भवति। कथ्यते यथा-

गर्भापत्यतनयानां मन्त्रसन्धानयोस्तथा।
बुद्धिः प्रधानशास्त्राणां विचारः पंचमालयात्।

पञ्चमस्थानस्य स्वामी बुधशुक्राभ्यां युतः दृष्टो वा स्याताम्। पञ्चमेशः शुभग्रहैः चतुर्दिशो परितः स्युः। बुधः उच्चपञ्चमस्थाने स्यात्। पञ्चमेशः यस्मिन् नवांशे तस्य स्वामी केन्द्रगते एवं शुभग्रहैः दृष्टं स्यात् तर्हि जातकः विद्वान्-बुद्धिमान्-ज्ञानवन्तश्च भवति। पञ्चमेशः यस्मिन् स्थाने स्यात् तस्य स्थानस्य स्वामी उपरि शुभग्रहस्य दृष्टिः, एवं उभयदिशिः शुभग्रहाः भूते सति जातकः सूक्ष्मबुद्धियुक्तो भवति। यदि लग्नेशः निम्न/पापयुक्तो वा स्यात् तर्हि जातकस्य बुद्धिः सुन्दरं न भवति। पञ्चमस्थाने शनिः राहुश्च स्यात्, एवं शुभग्रहाणां दृष्टिः पञ्चमभावे न स्यात्, पञ्चमेशोपरि पापग्रहाणां दृष्टिः स्यात् तथा बुधः द्वादशस्थाने स्यात् तर्हि जातकस्य स्मरणशक्तिः सुन्दरं न भवति। पञ्चमेशः शुभयुतः दृष्टो वा स्यात् अथवा पञ्चमस्थानं शुभयुतः दृष्टो वा स्यात् एवं वृहस्पतिः पञ्चमस्थानस्य स्वामी 1/4/5/7/9/10 स्थानेषु स्युः तर्हि जातकस्य स्मरण-शक्तिः तीक्ष्णं भवति। गुरुः1/4/5/7/9/10 स्थानेषु स्युः, बुधः पञ्चमभावे स्यात्, पञ्चमेशः वरिष्ठो भूत्वा 1/4/5/7/9/10 स्थानेषु स्युः तर्हि जातकः बुद्धिमान् भवति। पञ्चमेशः 1/4/7/10 स्थानेषु स्युः तर्हि जातकस्य स्मरणशक्तिः अत्यन्तप्रबलो भवति।

(ख) सप्तमभावविचारः-केन्द्र, मदन, सौभाग्य, यामित्र, कामश्च इति नामानि। अत्र विचारणीयः-स्त्री- मृत्यु, मदनक्रीडा, स्वास्थ्य, कामचिन्ता, मैथुन, अंगविभागः, जननेन्द्रिय, विवाहः, व्यापारः, कलहः। एवं च ववासीररोगादि भवति। तथा वृश्चिक राशिः बलवान् भवति। अत्र कारकग्रहः शुक्रः वर्तते। उच्यते यथा-

परैः समं विवादं च वाणिज्यं व्यसनं तथा।
गमागमौ कलत्रं च चिन्तयेत्सप्तमालयात्॥
सप्तमभावे प्रधानतः विवाहविचारो विधीयते।

विवाहस्य प्रतिबन्धकयोगाः निम्नलिखिताः सन्ति-

1. सप्तमेशशुभयुक्ताभावे 6/8/12 भावगते स्यात् तर्हि जातकः विधुरो भवति।
2. सप्तमेशः द्वादशभावगते, लग्नेशः एवं जन्मराशीशः स्वामी सप्तमभावगते भूते सति विवाहः न भवति।
3. शुक्रचन्द्रमासंयुक्ताभावगते स्यात् एवं शनिभौमौ तेषां सप्तमभावे स्यात् तर्हि विवाहो न भवति।
4. सप्तमभावे पापग्रहस्थिते सति मानवः स्त्रीसुखेन वञ्चितो भवति।
5. शुक्र-मंगलौ 5/7/9 भावे स्यात् तर्हि विवाहो न भवति।

विवाहयोगाः-1. सप्तमभावशुभयुते दृष्टे वा, सप्तमेशस्य वरिष्ठावस्थायां विवाहो भवति। 2. शुक्रः स्वगृही, कन्याराशेः वा स्यात् तर्हि विवाहो भवति। 3. सप्तमेशः लग्ने

शुभग्रहयुतैः एकादशभावगते सति विवाहः विहितो भवति। 4. द्वितीयेशः सप्तमेशश्च 1/4/5/7/9/10 स्थाने स्यात् तर्हि विवाहः विहितो भवति। 5. लग्नेशः लग्ने सप्तमभावगते वा स्यात्, सप्तमेशः लग्नेशो वा द्वितीयभावे भूते सति विवाहयोग प्रशस्तः। 6. सप्तम एवं द्वितीयस्थानोपरि शुभग्रहाणां दृष्टिः स्यात्, तथा द्वितीयेशसप्तमेशौ शुभराशौ स्यात् तर्हि विवाहो भवति। 7. यदि गुरुः स्वमित्रस्य नवांशे स्यात् तर्हि विवाहो भवति। 8. विवाहे प्रतिबन्धकयोगाभावे विवाहो भवति। 9. धनस्थाने अनेकाः पापग्रहाः स्युः, एवं धनेशः अपि पापग्रहैः दृष्टभूते सति त्रिविवाहो भवति। 10. गोचरे युक्तः गुरुः चन्द्रलग्नात् 2/5/7/9/11 स्थाने भूते सति विवाहयोगः आगच्छति। 11. सप्तमेश-पञ्चमेश- एकादशेशानां दशा-अन्तर्दशायां विवाहयोगाः आगच्छति।

(ग) दशमभावविचारः—दशमभावैः शासनः, मानः, आभूषणं, वस्त्रं, व्यापारः, निद्रा, कृषि, प्रव्रज्या, कर्म, जीवनं, यशः, विज्ञानं, विद्याणां विचारः करणीयः। एवं च दशमेशे सूर्यः, बुधः, गुरुः, शनिभिः अपि दशमभावविशेषे विचारः करणीयः। कथ्यते यथा–

लाभेशेन व्ययेशेन त्रिकस्थो निर्बलो यदि।
दशमेशो भवेद्यस्य अभियोगे धनञ्जयः॥

1. दशमेशः निर्बलं स्यात् तर्हि जातकः चंचलबुद्धिः दुराचारी च भवति।
2. वृहस्पतिः, बुधः, शनिः सूर्यश्च बलरहित 6/8/12 स्थाने स्थिते सति जातकः सत्कर्महीनः भवति।
3. दशमभावे मीनराशिः स्यात् एवं बुध-मंगलौ तत्स्थाने स्थिते सति जातकः तपस्वी भवति।
4. दशमेश, बुध एवं वृहस्पतिः दशमभावे स्थिते सति जातकः पुण्यकार्यशीलो भवति।
5. दशमेशः स्वराशौ स्यात् तथा शुभग्रहाणां दृष्टिः स्यात् तर्हि जातकः व्यवसायी भवति।
6. दशमेशः एकादशे भावे स्यात् एवं एकादशेशः दशमभावे स्यात् अथवा नवमेशः दशमे व दशमेशः नवमभावे स्यात् तर्हि जातकः श्रीमान्, प्रतापी, शासकः लोकमान्यो च भवति।
7. 1/4/7/10 स्थाने रविः स्यात्, चन्द्रमाः 1/4/5/7/9210 स्थाने स्यात्, 1/4 स्थाने गुरुः स्यात् तर्हि राजयोगो भवति।
8. पञ्चमस्थाने गुरुः एवं दशमस्थाने चन्द्रमा स्यात् तर्हि जातकः राजा, बुद्धिमान् तपस्वी वा भवति।
9. दशमभावे शुभग्रहाणां दृष्टिः भूते सति मनुष्यः व्यवसायी भवति।
10. लग्नचन्द्रमा वा इत्यनेन दशमेशगुरोः नवांशे स्यात् तर्हि जातकः अध्यापकः, प्राध्यापकः, पुराणवेत्ता एवं धर्मोपदेशकश्च भवति।
11. चन्द्रमसः दशमभावे बुधः-शुक्रः स्यात् तर्हि विद्या, स्त्री, धनैः युक्तः, शनिः इत्यनेन युक्ते सति पुस्तकलेखकः, बृहस्पति-शुक्राभ्यां युक्ते सति समृद्धः, शनियुक्ते सति दृढसंकल्पी कलाकारश्च भवति।

भावविचारविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— फलादेशार्थम् एका सरणिबद्धा परम्परा विधिश्च कुत्र वर्तते?
   उत्तरम्—भारतीयज्योतिषशास्त्रस्य फलितविभागे।
2. **प्रश्नः**—सप्तमभावे प्रधानतः कस्य विचारो विधीयते?
   उत्तरम्—विवाहस्य।
3. **प्रश्नः**—मानवजीवनस्य प्रमुखतात्त्विकविषयाः केषु भावेषु उपनिबद्धाः सन्ति?
   उत्तरम्— द्वादशभावेषूपनिबद्धाः सन्ति।
4. **प्रश्नः**—फलादेशस्य गणना कुतः भवति?
   उत्तरम्—लग्नात् भवति।
5. **प्रश्नः**—आर्षप्रमाणं किं भवति?
   उत्तरम्—दशा-वर्षनिर्धारणे, उच्च-नीचकथने, ग्रहस्थितिवशात् फलादेशे च।
6. **प्रश्नः**—युक्तिप्रमाणं किं भवति?
   उत्तरम्—भावात् भावस्य निर्धारणे एवमेव नवांशविचारे, प्रकृतिवशात् उत्पन्नरोगनिर्धारणे, अश्व-हस्ति-स्थाने यानादिवाहनविचारे च।
7. **प्रश्नः**—भावजफलानि कानि तथ्याधारेण चिन्त्यानि भवन्ति?
   उत्तरम्—1. भावः, 2. भावाधिपतिः, 3. भावकारकः, 4. भावस्थितग्रहः, 5. भावेक्षितः ग्रहः, 6. भावेशेन सह स्थिता ग्रहः, 7. यैः ग्रहैः भावेशो दृश्यते, 8. भावकारकेण सह स्थितो ग्रहः, 9. यैः ग्रहैः भावकारकः दृश्यते।

उपर्युक्तयुक्त्याधारेणैव भावजनितफलस्य सम्यक्तया निर्धारणं सम्भवति।

8. **प्रश्नः**—द्वादशभावानां पृथक्-पृथक् स्थितिकारकाः ग्रहाः के सन्ति?
   उत्तरम्—सू. बृ. मं. चं.बु. बृ. श. मं.शु.श. सू.बु. सू.बु. गु.श. बृ.श.।
9. **प्रश्नः**—पञ्चमस्थानस्य स्वामी /दृष्यग्रहाः के सन्ति?
   उत्तरम्— बुधः, शुक्रः।
10. **प्रश्नः**—पञ्चमेशः कैः ग्रहैः चतुःपरितो वर्तते?
    उत्तरम्— शुभग्रहैः।
11. **प्रश्नः**—दशमभावस्य स्वामी लग्ने, एकादशभावस्य स्वामी एकादशभावे तर्हि किं भवति?
    उत्तरम्—जातकः कविः भवति।
12. **प्रश्नः**—जातकः संस्कृतज्ञः कथं भवति?
    उत्तरम्—स्वगृही, बलवान्, मित्रगृही वा उच्चराशेः स्थानेषु स्थितः स्यात् पञ्चमेशः दशमे एकादशे भावेः वा स्थिते सति।
13. **प्रश्नः**—कारकांशकुण्डलीये पञ्चमभावे पापग्रहयुक्तो चन्द्रः, गुरुः स्थिते किं भवति?
    उत्तरम्—जातकः नवीनग्रन्थलेखको भवति।
14. **प्रश्नः**—प्रथमो भावनाम्ना ख्यातः कः?
    उत्तरम्—यस्मिन् लग्ने कोऽपि जातकः जन्म गृह्णाति तदेव।
15. **प्रश्नः**—फलितशास्त्रे कस्य प्रमाणद्वयस्य उपलब्धिः भवतीति?
    उत्तरम्—1. आर्षप्रमाणम्, 2. युक्तिप्रमाणम्।
16. **प्रश्नः**—द्युमणिरमरमन्त्री भूसुतः सोमसौम्यौ गुरुरिनतनयारो भार्गवो भानुपुत्रः। दिनकरदितिजेज्यो जीवभानुज्ञमन्दा सुरगुरुरिनसूनुः कारकाः स्युर्विलग्नात्।। उक्तश्लोकः कुतः उद्धृतः?
    उत्तरम्—जातकपारिजातात्।
17. **प्रश्नः**—जातकपारिजाते भावेशः लग्नात् केन्द्रगतभावपुष्टिः केन श्लोकेन भवति?
    उत्तरम्—यद्भावपे केन्द्रगते विलग्नात्त्रिकोणगे वा यदि सौम्यदृष्टे। तुङ्गादिवर्गोपगते बलाढ्ये तद्भावपुष्टिं फलमाहुरार्याः।।
18. **प्रश्नः**—पञ्चमभावकारकः को ग्रहो वर्तते?
    उत्तरम्—गुरुः।
19. **प्रश्नः**—मारकस्थानं को भावो वर्तते?
    उत्तरम्—सप्तमम्।
20. **प्रश्नः**—आजीविकाविचारस्य प्रधानभावः कः?
    उत्तरम्—दशमः।
21. **प्रश्नः**—जन्मकुण्डल्यां गृहविचारः कुतः क्रियते?
    उत्तरम्—चतुर्थभावात्।
22. **प्रश्नः**—चन्द्रः पापफलं कस्मिन् भावे ददाति?
    उत्तरम्—अष्टमे भावे।
23. **प्रश्नः**—भाग्यस्थानं को भावो वर्तते?
    उत्तरम्—नवमभावः।

(V-C-73) (28) नाभसयोगाः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

नाभसयोगाः–

नवदिग्वसवस्त्रिकाग्निवेदैर्गुणिता
द्वित्रिचतुर्विकल्पजा स्युः।
यवनैस्त्रिगुणा हि षट्शती सा
कथिता विस्तरतोऽत्र तत्समासतः।।
(वृहज्जातके-12/1)

नाभसयोगानां चत्वारि विकल्पानि भवन्ति। 1. प्रथमविकल्पे-आकृतियोगाः-20, 2. द्वितीयविकल्पे-संख्यायोगाः-7, 3. तृतीयविकल्पे-आश्रययोगाः-3, 4. चतुर्थविकल्पे-दलयोगाः-2, = 32 द्वात्रिंशतिभेदाः भवन्ति। एतान् योगान् यवनाचार्यमहोदयेन विस्तृतरूपे 1800 अष्टदशशतानि भेदानि कथ्यते। अत्र वाराहमिहिराचार्येण संक्षेपेण 32 द्वात्रिंशतिः योगाः कथ्यते। यथोच्यते जातकपारिजाते–

यूपेषुशक्तियवदण्डगदासमुद्रच्छत्रार्द्ध-
चन्द्रशकटाम्बुजपक्षियोगाः।

नौचक्रवज्रहलकार्मुककूटवापी
शृङ्गाटकाश्च विविधाकृतिविंशतिः स्युः।।
(ज्ञा.परि.-164)

रज्जुर्नलश्च मुसलस्त्वितयाश्रयाख्याः
स्रग्योगिनौ तु दलयोगभवौ भवेताम्।
वीणादयश्च कथिता वरदामपाश-
केदारशूलयुगगोलकसप्तसङ्ख्याः ।।
(ज्ञा.परि.-165)

आश्रययोगत्रयस्य फलम्-

रज्जुयोगे जात ईर्ष्युः परममत्सरी भवति।
मुशले जातो मानी गर्वितो भवति।
अनलाख्ये योगे जातो धनवान् भवति।

दलयोगद्वयस्य फलम्-

सर्पे योगे दुःखितानां जन्म भवति।
मालायोगे सुखिनां जन्म भवति।।

योगपंचकस्य क्रमात्फलोपनयः-

गदायोगे जातो यज्वा भवति।
शकटयोगे शकटाजीवी,
विहंगयोगे दूतः, शृंगाटके चिरसौख्यभारः।
हलाख्ये कृषिकृत्।

सप्तसंख्यायोगाः-

एकादिगृहोपगतैरुडुपम् योगन्विहाय संख्याने।
गोलयुगशूलकेदारपाशदामाख्यवीणाः स्युः।।

1. यूपः, 2. इषुः, 3. शक्तिः, 4. यवः, 5. दण्डम्, 6. गदा, 7. समुद्रः, 8. छत्रम्, 9. अर्द्धचन्द्रम्, 10. शकटम्, 11. अम्बुजम्, 12. पक्षियोगः, 13. नौः, 14. चक्रम्, 15. वज्रम्, 16. हलम्, 17. कार्मुकम्, 18. कूटम्, 19. वापी, 20. शृङ्गाटकः इति विंशति आकृतियोगाः सन्ति। एवं 1. वीणाः, 2. वरदामः, 3. पाशः, 4. केदारः, 5. शूलम्, 6. युगम्, 7. गोलकम् इति सप्त संख्यायोगाः भवन्ति। 1. रज्जुः, 2. नलः, 3. मुसलः, इति त्रयः आश्रययोगाः सन्ति। 1. स्रक्, 2. सर्पः, इति द्वौ दलयोगौ स्तः।

एकस्मिन् चरराशौ, द्वयोस्त्रिषु वा चतुर्षु चरराशिषु यदा सर्वे ग्रहाः भवेयुर्न स्थिरं द्वन्द्वे च कश्चिद् ग्रहः स्यात्तदा रज्जुयोगः। एकस्मिन् द्वयोस्त्रिषु वा चतुर्षु स्थिरराशिषु सर्वे ग्रहाः स्युर्न कश्चिच्चरे द्वन्द्वे च भवेत्तदा मुसलयोगः। एवं द्वित्वभावेऽपि सर्वैः ग्रहैः नलो योगः ज्ञेयः।

नाभसयोगविषयकाणि वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—नवदिग्वसवस्त्रिकाग्निवेदैर्गुणिता द्विशिनत्-विकल्पजा स्युः। यवनैस्त्रिगुणा हि षट्शती सा कथिता विस्तरतोऽत्र तत्समासतः।। नाभसयोगविषयक उक्त-श्लोकः कुत्र कथ्यते?
   उत्तरम्—बृहज्जातके।
2. प्रश्नः—नाभसयोगानां कति विकल्पानि भवन्ति?
   उत्तरम्—चत्वारि।
3. प्रश्नः—नाभसयोगानां कानि सन्ति चत्वारि विकल्पानि?
   उत्तरम्—1. आकृतियोगाः, 2. संख्यायोगाः, 3. आश्रययोगाः, 4. दलयोगाः।
4. प्रश्नः—नाभसयोगे आकृतियोगाः कति भवन्ति?
   उत्तरम्—20 विंशतिः।
5. प्रश्नः—प्रथमविकल्पे 20 विंशतिः आकृतियोगाः के सन्ति?
   उत्तरम्—1. यूपः, 2. इषुः, 3. शक्तिः, 4. यवः, 5. दण्डम्, 6. गदा, 7. समुद्रः, 8. छत्रम्, 9. अर्द्धचन्द्रम्, 10. शकअम्, 11. अम्बुजम्, 12. पक्षियोगः, 13. नौः, 14. चक्रम्, 15. वज्रम्, 16. हलम्, 17. कार्मुकम्, 18. कूटम्, 19. वापी, 20. शृङ्गाटकः। इति विंशति आकृतियोगाः।
6. प्रश्नः—नाभसयोगे संख्यायोगाः कति सन्ति?
   उत्तरम्—7 सप्त।
7. प्रश्नः—द्वितीयविकल्पे 7 सप्त संख्यायोगाः के सन्ति?
   उत्तरम्—1. वीणाः, 2. वरदामः, 3. पाशः, 4. केदारः, 5. शूलम्, 6. युगम्, 7. गोलकम् इति सप्त संख्यायोगाः।
8. प्रश्नः—नाभसयोगे आश्रययोगाः कति संख्यकानि सन्ति?
   उत्तरम्—3 त्रयः।
9. प्रश्नः—तृतीयविकल्पे 3 त्रयः आश्रययोगाः के सन्ति?
   उत्तरम्—1. रज्जुः, 2. अनलाख्यः, 3. मुसलः, इति त्रयः आश्रययोगाः।
10. प्रश्नः—नाभसयोगे दलयोगौ कौ स्तः?
    उत्तरम्—2 द्वौ।
11. प्रश्नः—चतुर्थविकल्पे 2 द्वौ दलयोगौ कौ स्तः?
    उत्तरम्— 1. स्रक्, 2. सर्पः, इति द्वौ दलयोगौ स्तः।

12. प्रश्नः—यवनाचार्यमहोदयेन विस्तृतरूपेण नाभसयोगानां कियन्ति भेदानि कथ्यते?
    उत्तरम्—1800 अष्टादशशतानि।
13. प्रश्नः—वाराहमिहिराचार्येण संक्षेपेण नाभसयोगानां कियन्ति भेदानि कथ्यते?
    उत्तरम्—32 द्वात्रिंशतिः।
14. प्रश्नः—द्वित्वाभावेऽपि सर्वैः ग्रहैः को ज्ञेयः?
    उत्तरम्—नलो योगः।
15. प्रश्नः—आश्रययोगत्रयस्य फलं किम्?
    उत्तरम्—रज्जुयोगे जात ईर्ष्युः परममत्सरी भवति। मुसले जातो मानी गर्वितो भवति। अनलाख्ये योगे जातो धनवान् भवति।

(V-C-73) (29) विवाहमेलापनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

विवाहमेलापनम्—विवाहपूर्वं वरकन्ययोः जन्मकुण्डलीमेलापनं नाम मेलापकम्। दम्पतियुगलयोः स्वभावः, गुणः, प्रेमः, आचार-व्यवहारादिकं ज्ञानमावश्यकं वर्तते। यावत् सम-आचार-व्यवहारयुक्ता वरकन्याः न भवति तावत् सुखमयदाम्पत्यजीवनस्य कामना निरर्थका भविष्यति। ज्योतिषशास्त्रे नक्षत्र-योग-ग्रह-राशि इत्यादीनां तत्त्वानामाधारोपरि मानवानां स्वभावानां गुणानां च ज्ञानं निश्चयो भवति। मुहूर्तचिन्तामणिग्रन्थे विवाहप्रकरणे गुणसंख्या-विचारप्रसङ्गे यथा-

वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकम्।
गणमैत्रं भकूटं च नाडी चैते गुणाधिकाः।।
(मुहू.चि.-21)

गुणैः षोडशभिर्निन्द्यं मध्यमा विंशतिस्तथा।
श्रेष्ठं त्रिंशद्गुणं यावत्परतस्तूत्तमोत्तमम्।।
(ज्यौ०नि०)

वर्णमैत्र्यामेको गुणः, वश्ये द्वौ गुणौ, तारायां त्रयो गुणाः, योनिमैत्र्यां चत्वारः, ग्रहमैत्र्यां पञ्च, गणमैत्र्यां षट्, सद्भकूटे सप्त, नाडीभेदेऽष्यावित्यर्थः।

वर्णकूटविचारः:—1. मीन-वृश्चिक-कर्क इति राशियुक्ताः ब्राह्मणवर्णाः भवन्ति। 2. मेष-धनु-सिंह इति राशियुक्ताः क्षत्रियवर्णाः भवन्ति। 3. वृष-मकर-कन्या राशियुक्ताः वैश्यवर्णाः भवन्ति। 4. मिथुन-कुम्भ-तुला राशियुक्ताः शूद्रवर्णाः भवन्ति। वर-वर्णात् कन्यावर्णाः अधिकं न भवेत्। कन्यावर्णात् वरवर्णाः उत्तमा समाना वा विवाहः मंगलकारी भवति। परिहारस्तु विवाहपटले यथा-

हीनवर्णो यदा राशि राशीशो वर्ण उत्तमः।
तदा राशीश्वरो ग्राह्यस्तद्राशिनैव चिन्तयेत्।।
(विवाहपटले)

वश्यगुणविचारः:-

हित्वा मृगेद्रं नरराशिवश्याः सर्वे
तथैषां जलजास्तु भक्ष्याः।
सर्वेऽपि सिंहस्य वशे विनालिं
ज्ञेयं नराणां व्यवहारतोऽन्यत्।।
(मु.चि.-23)

सिंहं विहाय 1. मेषः, 2. वृषः, 4. कर्कः, 8. वृश्चिकः, 9. धनुः (उत्तरार्धं), 10. मकरः, 11. कुम्भः, 12. मीन राशयः मनुष्यराशिः, 3. मिथुन, 6. कन्या, 7. तुला, 9. धनुः (पूर्वार्धं) राशयः वश्यः, एषु उक्तराशिषु जलचराः 4. कर्कः, 10 मकरः, 11. कुम्भः, 12. मीन राशयः मनुष्यराशीनां भक्ष्याः अपि सन्ति। वृश्चिकं विहाय सर्वाराशयः 1. मेषः, 2. वृषः, 3. मिथुन, 4. कर्कः, 6. कन्या, 7. तुला, 9. धनुः, 10. मकरः, 11. कुम्भः, 12. मीनश्चैते सिंहस्य वशे वर्तन्ते। वराय कन्या वश्यः, भक्ष्यः उचितो भवति।

तारागुणविचारः:-

कन्यर्क्षाद्वरभं यावत् कन्याभं वरभादपि।
गणयेन्नवहच्छेषे त्रीष्वद्रिभमसत्स्मृतम्।।
(मु.चिन्ता.-24)

कन्याजन्मनक्षत्राद्वरनक्षत्रं यावत् गणयेत्। तथा वरनक्षत्रादपि कन्यानक्षत्रं गणयेत्। ततो विशिष्टेऽङ्के नवभिर्भक्ते यदवशिष्टं तच्च त्रिपञ्चसप्तमितं भवेत् तदाऽसत् अशुभदं भवति। शेषे एकद्विचतुःषडष्टनवमितं ताराः शुभदा भवन्ति।

तारादोषपरिहारः:-

एकतो लभ्यते तारा शुभाश्चैवाऽन्यतोऽशुभाः।
तदा सार्धं गुणाश्चैव ताराशुद्ध्या मिथस्त्रयम्।।
(दैवज्ञमनोहरः)

योनिगुणविचार:-

अश्विन्यम्बुपयोर्हयो निगदितः स्वात्यर्कयोः कासरः।
योनिः पादगयोः परस्परमहावैरं भयोन्योस्त्यजेत्।
(मु.चि.25-26)

अश्विनीशतभिषातारकयोर्हयः अश्वो योनिरुक्तः। स्वातीहस्तयोः कासरो महिषः। वस्वजपाद्भयोर्धनिष्ठा-पूर्वाभाद्रपदयोः सिंहः, याम्यान्त्ययोर्भरणीरेवत्योः कुञ्जरो हस्ती, पुष्यकृतिकयोः मेषोऽजः, कर्णाम्बुनोः श्रवणपूर्वाषाढयोर्वानरः स्यात्, उत्तराषाढाभिजितोर्नकुलः, चान्द्रे मृगः, अब्जयोनिब्रह्मा, तद्भं रोहिणी तयोरहिः सर्पो योनिः, ज्येष्ठानुराधयोः कुरङ्गो हरिण उदितः, मूलार्द्रयोः श्वा कुक्कुरः, तथा पुनर्वस्वाश्लेषयोर्मार्जारः। अथ मघापूर्वाफल्गुन्योः उन्दुरुः, विशाखाचित्रयोर्व्याघ्रः, उत्तराफल्गुनी बुध्न्यर्क्षमुत्तराभाद्रपदा तयोर्गौर्योनि। योनिदोषपरिहारार्थमुच्यते-

योनेरभावे चोद्वाह्य स तु कार्ये वियोगहा।
राशिवश्यं च यद्यस्ति कारयेन्न तु दोषभाक्।।
(दैवज्ञमनोहरे)

एवमेव ग्रहमैत्रीगुणविचारः। गणकूटविचारः। भकूटविचारः। नाड़ीगुणविचारः। मेलापनगुणविचारः मुहूर्तचिन्तामणिग्रन्थे विस्तृतरूपेण वर्णिताः विद्यते। मेलापकप्रक्रियायां अष्टकूट एवं मांगलिकतत्त्वानां विशेषमहत्त्वं वर्तते। यथोच्यते ज्योतिषचन्द्रिकायाम्-

लग्ने व्यये च पाताले यामित्रे चाष्टमे कुजे।
कन्या भर्तुर्विनाशाय भर्तापत्नी विनाशकृत्।।
(ज्यो.चन्द्रि.)

मंगलदोषपरिहार:-

जामित्रे च यदा शौरिर्लग्ने वा हिबुकेऽपि वा।
अष्टमे द्वादशे वाऽपि भौमदोषविनाशकृत्।।
(ज्यो.चन्द्रि.)

भकूटविचार:-

मृत्युः षडष्टके ज्ञेयोऽपत्यहानिर्नवात्मजे।
द्विर्द्वादशे निर्द्धनत्वं द्वयोरन्यत्र सौख्यकृत्।।
(ज्यो०च०)

अत्र विशेषमाह ज्योतिषचन्द्रिकायाम्-

आद्यैकनाड़ी कुरुते वियोगं
मध्यैकनाड्यामुभयोर्विनाशः।
अन्ते च वैधव्यमतीव दुःखं
तस्माच्च तिस्रः परिवर्जनीयाः।।
(ज्यो०च०-237)

नाड़ीदोषस्तु विप्राणां वर्णदोषस्तु भूभुजाम्।
गणदोषस्तु वैश्यानां शूद्राणां योनिरिष्यते।।
(ज्यो०च०-238)

न वर्गवर्णो न गणो न योनिः
द्विर्द्वादशे नैव षडष्टके वा।
तारा विरुद्धे नव पंचमे वा
मैत्री यदा स्याच्छुभदो विवाहः।।
(ज्यो०च०-244)

विवाहमेलापनं सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— विवाहमेलापनं किं भवति?
   उत्तरम्—विवाहपूर्वं वरकन्ययोः जन्मकुण्डली-मेलापनम्।
2. **प्रश्नः**—कयोः स्वभावः, गुणः, प्रेमः, आचार-व्यवहारादिकं ज्ञानमावश्यकं वर्तते?
   उत्तरम्—दम्पतियुगलयोः।
3. **प्रश्नः**—मानवानां स्वभावानां गुणानां च ज्ञानं केषामाधारोपरि निश्चयो भवति?
   उत्तरम्—ज्योतिषशास्त्रे नक्षत्र-योग-ग्रह-राशि इत्यादीनां तत्वानामाधारोपरि।
4. **प्रश्नः**—वर्णमैत्र्यां कति गुणो भवति?
   उत्तरम्—1 एको गुणः।
5. **प्रश्नः**—वश्ये कौ गुणौ भवतः?
   उत्तरम्—2 द्वौ गुणौ।
6. **प्रश्नः**—तारायां कति गुणाः भवन्ति?
   उत्तरम्—3 त्रयो गुणाः।
7. **प्रश्नः**—योनिमैत्र्यां कति गुणाः भवन्ति?
   उत्तरम्—4 चत्वारः।
8. **प्रश्नः**— ग्रहमैत्र्यां कति गुणाः सन्ति?
   उत्तरम्—5 पञ्चगुणाः।
9. **प्रश्नः**—गणमैत्र्यां कति गुणाः सन्ति?
   उत्तरम्—6 षट्।

10. **प्रश्नः**— सद्भकूटे कति गुणाः भवन्ति?
    उत्तरम्—7 सप्त।
11. **प्रश्नः**—नाडीभेदे कति गुणाः विधीयन्ते?
    उत्तरम्—8 अष्टौ गुणाः।
12. **प्रश्नः**—वर्णकूटविचारे मीन-वृश्चिक-कर्क इति राशियुक्ताः के वर्णाः भवन्ति?
    उत्तरम्—ब्राह्मणवर्णाः।
13. **प्रश्नः**— वर्णकूटविचारे मेष-धनु-सिंह इति राशियुक्ताः के वर्णाः वर्तन्ते?
    उत्तरम्—क्षत्रियवर्णाः।
14. **प्रश्नः**—वर्णकूटविचारे वृष-मकर-कन्याराशियुक्ताः के वर्णाः आयान्ति?
    उत्तरम्—वैश्यवर्णाः।
15. **प्रश्नः**—वर्णकूटविचारे मिथुन-कुम्भ-तुलाराशियुक्ताः वर्णाः के सन्ति?
    उत्तरम्—शूद्रवर्णाः।
16. **प्रश्नः**—को विवाहः मंगलकारी भवति?
    उत्तरम्—कन्यावर्णात् वरवर्णाः उत्तमा समाना वा।
17. **प्रश्नः**—के राशयः मनुष्यराशयः भवन्ति?
    उत्तरम्—सिंहं विहाय 1. मेषः, 2. वृषः, 4. कर्कः, 8. वृश्चिकः, 9. धनुः (उत्तरार्धः), 10. मकरः, 11. कुम्भः, 12. मीनः।
18. **प्रश्नः**—के राशयः जलचराः भवन्ति?
    उत्तरम्—3. मिथुन, 6. कन्या, 7. तुला, 9. धनु (पूर्वार्धं) राशयः।
19. **प्रश्नः**—मनुष्यराशीनां भक्ष्याः राशयः के सन्ति?
    उत्तरम्—4. कर्कः, 10. मकरः, 11. कुम्भः, 12. मीनराशयः।
20. **प्रश्नः**—के राशयः सिंहस्य वशे वर्तन्ते?
    उत्तरम्—वृश्चिकं विहाय सर्वराशयः 1. मेषः, 2. वृषः, 3. मिथुन, 4. कर्कः, 6. कन्या, 7. तुला, 9. धनुः, 10. मकरः, 11. कुम्भः, 12. मीनश्च।
21. **प्रश्नः**—केषां अङ्कानां शेषे ताराः शुभदा भवन्ति?
    उत्तरम्—एकद्विचतुःषडष्टनवम्।
22. **प्रश्नः**—योनिगुणविचार-प्रसङ्गे मुहूर्तचिन्तामणिग्रन्थे किं कथितम्?
    उत्तरम्—अश्विन्यम्बुपयोर्हयो निगदितः स्वात्यर्कयोः कासरः। योनिः पादगयोः परस्परमहावैरं भयोन्योस्त्यजेत्।
23. **प्रश्नः**—योनिदोषपरिहारार्थं दैवज्ञमनोहरे किमुच्यते?
    उत्तरम्—"योनेरभावे नोद्वाह्य स तु कार्ये वियोगहा। राशिवश्यं च यद्यस्ति कारयेन्न तु दोषभाक्।।
24. **प्रश्नः**— मेलापकप्रक्रियायां केषां विशेषमहत्त्वं वर्तते?
    उत्तरम्—अष्टकूट एवं मांगलिकतत्त्वानाम्।
25. **प्रश्नः**—मंगलदोषपरिहारः ज्योतिषचन्द्रिकायां किमुक्तम्?
    उत्तरम्—"जामित्रे च यदा शौरिर्लग्ने वा हिबुकेऽपि वा। अष्टमे द्वादशे वाऽपि भौमदोषविनाशकृत्"।।
26. **प्रश्नः**—नाड़ीदोषः कुत्र विचार्यते?
    उत्तरम्—विवाहे।

(V-C-73) (30) दशाविचारः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

दशाविचारः—विंशोत्तरी, अष्टोत्तरी, योगिनी, इत्यादि कतिपयप्रकारकाः दशाः भवन्ति। फलज्ञानाय प्रधानरूपेण विंशोत्तरीदशामेव गृह्यते। जातकशास्त्रस्य मर्मज्ञाः ग्रहाणां शुभाशुभत्वस्य समयज्ञानाय विंशोत्तरी इममेव प्रधानं मन्यते। मारकेशस्य निर्णयमपि विंशोत्तरीदशाभिः एव क्रियन्ते। कथ्यते यथा-

पाकस्वामिनि लग्नगे सुहृदि वा
वर्गेऽस्य सौम्येऽपि वा।
प्रारब्धा शुभदा दशा त्रिदशषड्-
लाभेषु वा पाकपे।
मित्रोच्चोपचयत्रिकोणमदने
पाकेश्वरस्य स्थिति-
श्चन्द्रः सत्फलबोधनानि कुरुते
पापानि चातोऽन्यथा।।

विंशोत्तरीदशाविवेचनम्—काः सन्ति विंशोत्तरीदशा? अस्यां विंशोत्तरीदशायां 120 वर्षस्य आयुः स्वीकृत्य ग्रहाणां

विभाजनं क्रियते। यथा सूर्यस्य दशा-6 षड्वर्षात्मकम्, चन्द्रमसः दशा-10 दशवर्षात्मकम्, भौमस्य दशा-7 सप्तवर्षात्मकम्, राहोः दशा-18. अष्टादशवर्षात्मकम्, बृहस्पतेः दशा-16 षोडशवर्षात्मकम्, शनेः दशा-19 ऊनविंशतिवर्षात्मकम्, बुधस्य दशा-17 सप्तदशवर्षात्मकम्, केतोः दशा-7 सप्तवर्षात्मकम्, शुक्रस्य दशा-20 विंशतिवर्षात्मकम्।

जन्म-नक्षत्रानुसारं ग्रहाणां दशानिर्धारणम्-

(क) 3. कृत्तिका-12. उत्तराफाल्गुनी-21. उत्तराषाढायां जन्म भूते सति **सूर्यस्य दशा,**

(ख) 4. रोहिणी-13. हस्तः-22. श्रवणेषु जन्म भूते सति **चन्द्रमसः दशा,**

(ग) 5. मृगशीर्षम्-14. चित्रा-23. धनिष्ठयां जन्म भूते सति **मंगलस्य दशा,**

(घ) 6. आर्द्रा-15. स्वातिः-24. शतभिषजि जन्मभूते सति **राहोः दशा,**

(ङ) 7. पुनर्वसु-16. विशाखा-25. पूर्वाभाद्रपदायां जन्म भूते सति **बृहस्पतेः दशा,**

(च) 8. पुष्य-17. अनुराधाः-26. उत्तराभाद्रपदायां जन्म भूते सति **शनेः दशा,**

(छ) 9. आश्लेषा-18. ज्येष्ठा-27. रेवतीनक्षत्रेषु जन्म भूते सति **बुधस्य दशा।**

(ज) 10. मघा-19. मूल-1. अश्विनी नक्षत्रेषु जन्म भूते सति **केतोः दशा।**

(ञ) 11. पूर्वाफल्गुनी-20. पूर्वाषाढयोः 2 भरणी जन्म भूते सति **शुक्रस्य दशा भवन्ति।**

दशाज्ञानस्य सुगमपद्धतिः-कृत्तिकानक्षत्रतः जन्मनक्षत्रपर्यन्तं अंकित्वा (गणित्वा) 9 नवम इत्यनेन विभजनेन एकादिशेषेषु क्रमशः सूर्य-चन्द्र-भौम-राहु-गुरु-शनि-बुध-केतु-शुक्र इत्येतस्य दशाः भवन्ति। यथा-जन्मनक्षत्रं कृत्तिका वर्तते। जन्मनक्षत्रद्वारा ग्रहदशाबोधकचक्रे कृत्तिकानक्षत्रस्य जन्मदशा सूर्यस्य दशा इति वर्णिता वर्तते। सूर्यस्य दशा 6 षड्वर्षात्मकं विद्यते। पलात्मकभयात्-16 ꠲39×60 = 999 इति निर्धारिता अस्ति। पलात्मकभभोगः-58 ꠲44×60 = 3524 इति निर्धारिता अस्ति।

दशाविचारविषयकवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—कृत्तिका-उत्तराफाल्गुनी-उत्तराषाढायां जन्मभूते सति कस्य दशा भवति?
   उत्तरम्—सूर्यस्य।
2. **प्रश्नः**— रोहिणी-हस्त-श्रवणेषु जन्मभूते सति कस्य दशा भवति?
   उत्तरम्—चन्द्रमसः दशा।
3. **प्रश्नः**—मृगशीर्षम्-चित्रा-धनिष्ठायां जन्मभूते सति कस्य दशा भवति?
   उत्तरम्—मंगलस्य दशा।
4. **प्रश्नः**— आर्द्रा-स्वाति-.शतभिषजि जन्मभूते सति कस्य दशा भवति?
   उत्तरम्— राहोः दशा।
5. **प्रश्नः**— पुनर्वसु-विशाखा-पूर्वाभाद्रपदायां जन्मभूते सति कस्य दशा भवति?
   उत्तरम्—बृहस्पतेः दशा।
6. **प्रश्नः**— पुष्य-अनुराधा-उत्तराभाद्रपदायां जन्मभूते सति कस्य दशा भवति?
   उत्तरम्— शनेः दशा।
7. **प्रश्नः**— आश्लेषा-ज्येष्ठा-रेवतीनक्षत्रेषु जन्मभूते सति कस्य दशा भवति?
   उत्तरम्—बुधस्य दशा।
8. **प्रश्नः**—मघा-मूल-अश्विनीनक्षत्रेषु जन्मभूते सति कस्य दशा भवति?
   उत्तरम्—केतोः दशा।
9. **प्रश्नः**— पूर्वफल्गुनी भरणी-पूर्वाषाढायां जन्मभूते सति कस्य दशा भवति?
   उत्तरम्—शुक्रस्य दशा।
10. **प्रश्नः**— विंशोत्तरीदशामतेन परमायुमानं वर्तते?
    उत्तरम्—120 वर्षाणि।
11. **प्रश्नः**— सूर्यस्य दशा कतिवर्षात्मकं भवति?
    उत्तरम्—6षड्वर्षात्मकम्।
12. **प्रश्नः**—चन्द्रमसः दशा कतिवर्षात्मकं भवति?
    उत्तरम्—10 दशवर्षात्मकम्।

13. **प्रश्नः**— भौमस्य दशा कतिवर्षात्मकं भवति?
    उत्तरम्—7 सप्तवर्षात्मकम्।
14. **प्रश्नः**— राहोः दशा कतिवर्षात्मकं भवति?
    उत्तरम्—18. अष्टादशवर्षात्मकम्।
15. **प्रश्नः**— बृहस्पतेः दशा कतिवर्षात्मकं भवति?
    उत्तरम्—16 षोडशवर्षात्मकम्।
16. **प्रश्नः**—शनेः दशा कतिवर्षात्मकं भवति?
    उत्तरम्— 19 ऊनविंशतिवर्षात्मकम्।
17. **प्रश्नः**— बुधस्य दशा कतिवर्षात्मकं भवति?
    उत्तरम्— 17 सप्तदशवर्षात्मकम्।
18. **प्रश्नः**— केतोः दशा कतिवर्षात्मकं भवति?
    उत्तरम्—7 सप्तवर्षात्मकम्।
19. **प्रश्नः**— शुक्रस्य दशा कतिवर्षात्मकं भवति?
    उत्तरम्—20 विंशतिवर्षात्मकम्।
20. **प्रश्नः**— कतिपयप्रकारकाः दशाः भवन्ति?
    उत्तरम्— विंशोत्तरी, अष्टोत्तरी, योगिनी इत्यादयः।
21. **प्रश्नः**—फलज्ञानाय प्रधानरूपेण का दशा गृह्यते?
    उत्तरम्— विंशोत्तरीदशामेव गृह्यते।
22. **प्रश्नः**— पलात्मकभयात् कति निर्धारिता वर्तते?
    उत्तरम्—16 ꠲39×60 = 999 इति निर्धारिता।
23. **प्रश्नः**— पलात्मकभभोगः कति निर्धारिता वर्तते?
    उत्तरम्—58 ꠲44×60 = 3524 इति निर्धारिता।
24. **प्रश्नः**— फलज्ञानाय प्रधानरूपेण कां दशां गृह्यते?
    उत्तरम्—विंशोत्तरीदशाम्।
25. **प्रश्नः**—कस्य शास्त्रस्य मर्मज्ञाः ग्रहाणां शुभाशुभत्वस्य समयज्ञानाय विंशोत्तरी इममेव प्रधानं मन्यते?
    उत्तरम्—जातकशास्त्रस्य।
26. **प्रश्नः**— मारकेशस्य निर्णयं काभिः दशाभिः क्रियन्ते?
    उत्तरम्— विंशोत्तरीदशाभिः।

(V-C-73) 31. ज्योतिषशास्त्रे (ग्रन्थाः-ग्रन्थकर्तारः) परिचयात्मकानिवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—वराहमिहिरस्य कानि रचनाकार्याणि वर्तन्ते?
   उत्तरम्—1. बृहज्जातकः, 2. लघुजातकम्, 3. पञ्चसिद्धान्तिका, 4. योगयात्रा, बृहत्संहिता, विवाहपटल।
2. **प्रश्नः**—गणेशदैवज्ञस्य कानि प्रमुख-रचनाकार्याणि सन्ति?
   उत्तरम्— 1. ग्रहलाघवम्, 2. लघुतिथिचिन्तामणिः, 3. बृहत्तिथिचिन्तामणिः, 4. श्राद्धादिनिर्णयः, 5. सुधीरंजनी, 6. तर्जनीयन्त्रम्, 7. होलिकानिर्णयः।
3. **प्रश्नः**—केशवदेवस्य प्रमुख-ग्रन्थाः के सन्ति?
   उत्तरम्—1. वर्षग्रहसिद्धिः, 2. तिथिसिद्धिः, 3. जातकपद्धतिः, 4. ताजिकपद्धतिः, 5. मुहूर्त्ततत्त्वः, 6. कुण्डाष्टक-लक्षणः, 7. गणितदीपिका।
4. **प्रश्नः**—श्रीपतिमहोदयस्य प्रमुखफलितगणित-ज्योतिषग्रन्थाः के सन्ति?
   उत्तरम्— 1. पाटीगणित, 2. सिद्धान्तशेखरः, 3. बीजगणित, 4. श्रीपतिपद्धतिः, 5. रत्नावली, 6. रत्नसागरः, 7. रत्नमाला।
5. **प्रश्नः**— सुधाकरद्विवेदी महोदयस्य प्रमुख-ग्रन्थाः एवं टीका-ग्रन्थाः के सन्ति?
   उत्तरम्—ग्रन्थाः-1. चलनकलनः, 2. दीर्घवृत्त, 3. गणकतरंगिणी, 4. प्रतिभाबोधकः। टीका-ग्रन्थाः-1. पंचसिद्धान्तिका, 2. सूर्यसिद्धान्तः, 3. ग्रहलाघव, 4. ब्रह्मस्फुटसिद्धान्तः आदि।
6. **प्रश्नः**—वसिष्ठसिद्धान्तस्य कर्त्ता कोऽस्ति?
   उत्तरम्— विष्णुचन्द्रः।
7. **प्रश्नः**—बृहत्पाराशरहोराशास्त्र इत्यस्य लेखकः कः?
   उत्तरम्— पराशरमुनिः।
8. **प्रश्नः**—वेदांग-ज्योतिषशास्त्रस्य लेखकः कः?
   उत्तरम्— लगधमुनिः।
9. **प्रश्नः**—'निमित्तशास्त्र'इत्यस्य लेखकः कः?
   उत्तरम्— ऋषिपुत्रः।
10. **प्रश्नः**—ऋषिपुत्रः कस्य शास्त्रस्य निर्माणं कृतम्?
    उत्तरम्— शकुनवशास्त्रम्।

11. **प्रश्नः**—कालकसंहिता इत्यस्य लेखकः कः?
उत्तरम्— कालकाचार्यः।

12. **प्रश्नः**—'महा आर्यभट्टीय' सिद्धान्तस्य रचयिता कः?
उत्तरम्— आर्यभट्टद्वितीयः।

13. **प्रश्नः**—'शिष्यधीवृद्धि' ग्रन्थस्य लेखकः कः?
उत्तरम्— लल्लाचार्यः।

14. **प्रश्नः**—लल्लाचार्यः कस्य संहिताशास्त्रस्य रचयिता?
उत्तरम्— रत्नकोषस्य।

15. **प्रश्नः**—'कुवलयमाला' ग्रन्थस्य ग्रन्थकारः कः?
उत्तरम्— उद्योतनसूरि।

16. **प्रश्नः**—सारावली जातकग्रन्थस्य लेखकः कः?
उत्तरम्— कल्याण वर्मा।

17. **प्रश्नः**—'ब्रह्मस्फुटसिद्धान्त' इत्यस्य लेखकः कः?
उत्तरम्— ब्रह्मगुप्तः।

18. **प्रश्नः**—ब्रह्मगुप्तस्य करण-ग्रन्थः कोऽस्ति?
उत्तरम्— खण्डनखण्डखाद्यकः।

19. **प्रश्नः**—लीलावतीगणितम्'–केन रचितम्?
उत्तरम्— भास्कराचार्येण।

20. **प्रश्नः**—'लघुमानस'करणग्रन्थस्य लेखकः कः?
उत्तरम्— मुंजालः।

21. **प्रश्नः**—आर्यभट्टः कं ग्रन्थं रचितवान्?
उत्तरम्— आर्यभटीयम्।

22. **प्रश्नः**— खगोलग्रन्थः 'गर्गसंहितायाः' प्रणेता कोऽस्ति?
उत्तरम्— महर्षिगर्गः।

23. **प्रश्नः**—आर्यसिद्धान्त' इत्यस्य लेखकः कः?
उत्तरम्— आर्यभट (प्रथम)।

24. **प्रश्नः**—'रोमनसिद्धान्त' ग्रन्थस्य व्याख्याता कः?
उत्तरम्— लाटदेवः।

25. **प्रश्नः**—भास्कराचार्यस्य अन्ये ग्रन्थाः के सन्ति?
उत्तरम्— 1. बीजगणितम्, 2. सिद्धान्तशिरोमणिः

26. **प्रश्नः**—ब्रह्मसिद्धान्त इत्यस्य लेखकः कः?
उत्तरम्— ब्रह्मगुप्तः।

27. **प्रश्नः**—सिद्धान्तशिरोमणिः कस्य रचना वर्तते?
उत्तरम्— भास्कराचार्यस्य (1114 ईसवीये)।

28. **प्रश्नः**—महावीराचार्यस्य प्रसिद्ध-ग्रन्थः कोऽस्ति?
उत्तरम्— 1. ज्योतिषपटलः, 2. गणितसारसंग्रहः।

29. **प्रश्नः**—षट्पंचाशिका इत्यस्य लेखकः कः?
उत्तरम्— पृथुयशा।

30. **प्रश्नः**—'प्रश्नज्ञान' इत्यस्य लेखकः कः?
उत्तरम्— भट्टोत्पलः।

31. **प्रश्नः**—आर्यभट्टद्वितीयस्य ग्रन्थाः के?
उत्तरम्— 1. महासिद्धान्तम्, 2. महाभास्करीयः।

32. **प्रश्नः**—गणिताचार्य-श्रीधराचार्यस्य कृतिः किमस्ति?
उत्तरम्—त्रिशती (त्रिशतिका) अथवा गणितसार (नामान्तरम्)।

33. **प्रश्नः**—त्रिशती ग्रन्थमाधारमनुश्रित्य भास्कराचार्यद्वितीयः कं विश्वप्रसिद्धग्रन्थं अलिखत्?
उत्तरम्— लीलावती।

34. **प्रश्नः**—महाराष्ट्रे उत्पन्नः श्रीपतिभट्टस्य रचना का?
उत्तरम्— 1. बीजगणितम्, 2. गणिततिलकम्।

35. **प्रश्नः**—सर्वाधिक-प्रसिद्धः भास्कराचार्यद्वितीयः कति ग्रन्थाः विरचयत्?
उत्तरम्—1. लीलावती, 2. मुहूर्त्तपटलम्, 3. विवाहपटलम्, 4. सिद्धान्तशिरोमणिः, 5. करणकुतूहलम्, 6. बीजगणितम्।

36. **प्रश्नः**—वोपदेवशास्त्री महोदयस्य कानि रचनाकार्याणि?
उत्तरम्—रेखागणितम्, अङ्कगणितम्, मापनवाद-स्तत्त्वविवेकपरीक्षा इत्यादि।

37. **प्रश्नः**—अङ्कगणितविषयकग्रन्थः 'पाटीसार' इत्यस्य लेखकः कोऽस्ति?
उत्तरम्— मुनीश्वर (विश्वरूपः)।

38. **प्रश्नः**—म.म.पं.सुधाकर द्विवेदी महोदयः सूर्यसिद्धान्तोपरि कां टीकां अलिखत्?
उत्तरम्— सुधावर्षिणी।

39. **प्रश्नः**—प्रसिद्ध 'गणकतरङ्गिणी' इत्यस्य रचयिता कोऽस्ति?
उत्तरम्— पं. सुधाकर द्विवेदी।

40. **प्रश्नः**—'आर्चज्योतिष' इत्यस्य ज्योतिषवेदांगस्य प्रणेता कः?
उत्तरम्— लगधाचार्यः।

41. **प्रश्नः**—केरलस्य गोविन्दस्वामी कं ग्रन्थं विरचितः?
उत्तरम्— गोविन्दकृतिग्रन्थः।

42. **प्रश्नः**—सिद्धान्तशिरोमणि इत्यस्य लेखकः कः?
उत्तरम्— भास्कराचार्यः (भास्करद्वितीयः)।

43. **प्रश्नः**—चन्द्रसेनः कस्य ग्रन्थस्य रचयिता?
उत्तरम्— केवलज्ञानहोरा।

44. **प्रश्नः**—गणितसार ग्रन्थस्य लेखकः कः?
उत्तरम्— पण्डितश्रीधरः।

45. **प्रश्नः**—'ज्योतिर्ज्ञानविधिः' ग्रन्थस्य लेखकः कः?
उत्तरम्— पण्डितश्रीधरः।

46. **प्रश्नः**—'आयज्ञानतिलक' कस्याः रचना अस्ति?
उत्तरम्— भट्टवोसरि।

47. **प्रश्नः**—ताजिकग्रन्थस्य ग्रन्थकारः कः?
उत्तरम्— यवनाचार्यः।

48. **प्रश्नः**—'रमलसार' ग्रन्थस्य लेखकः कः?
उत्तरम्— पं.सीतारामः।

49. **प्रश्नः**—'मुहूर्ततत्त्व' ग्रन्थस्य लेखकः क?
उत्तरम्— पं. केशवाचार्यः।

50. **प्रश्नः**—'मुहूर्तमार्तण्ड' इत्यस्य लेखकः कः?
उत्तरम्— पं. नारायणः।

51. **प्रश्नः**—'मुहूर्त-चिन्तामणिः' इत्यस्य लेखकः कः?
उत्तरम्— श्रीरामाचार्यः।

52. **प्रश्नः**—'मुहूर्तकल्पद्रुम' इत्यस्य रचनाकारः कः?
उत्तरम्— विट्ठलदीक्षितः।

53. **प्रश्नः**—नरपतिजयचर्या ग्रन्थस्य लेखकः कः?
उत्तरम्— अहिलपट्टणस्य नरपतिः।

54. **प्रश्नः**—'व्यवहारचर्या' ग्रन्थस्य लेखकः कः?
उत्तरम्— उदयप्रभदेवः।

55. **प्रश्नः**—'आर्यसद्भाव' ग्रन्थस्य लेखकः कः?
उत्तरम्— मल्लिषेणः।

56. **प्रश्नः**—राजादित्यस्य प्रमुख-रचनाः काः सन्ति?
उत्तरम्— 1. व्यवहारगणितम्, 2. क्षेत्रगणितम्, 3. व्यवहाररत्नम्।

57. **प्रश्नः**—ग्रहभावप्रकाशग्रन्थस्य लेखकः कः?
उत्तरम्— पद्मप्रभसूरिः।

58. **प्रश्नः**— पद्मप्रभसूरि महोदयस्य अन्या रचना का?
उत्तरम्— भुवन-दीपकः।

59. **प्रश्नः**—'ज्योतिषप्रकाश'ग्रन्थस्य लेखकः कोऽस्ति?
उत्तरम्— नरचन्द्र उपाध्यायः।

60. **प्रश्नः**—नरचन्द्र उपाध्यायस्य अन्याः रचनाः काः सन्ति?
उत्तरम्— 1. प्रश्नशतकः, 2. बेडाजातकवृत्तिः, 3. ज्ञानदीपिका, 4. प्रश्नचतुर्विंशतिका।

61. **प्रश्नः**—'यंत्रराज' ग्रन्थस्य लेखकः कः?
उत्तरम्— महेन्द्रसूरि।

62. **प्रश्नः**—'ग्रहकौतुक' ग्रन्थस्य लेखकः कः?
उत्तरम्— केशवदेवः।

63. **प्रश्नः**—'जातकाभरणम्' ग्रन्थस्य लेखकः कः?
उत्तरम्— ढुण्ढिराजः।

64. **प्रश्नः**—'ताजिकनीलकण्ठी' इत्यस्य ग्रन्थस्य लेखकः कः?
उत्तरम्— नीलकण्ठः।

65. **प्रश्नः**—सिद्धान्तशिरोमणि इत्यस्य वासनावार्तिकः ग्रन्थस्य लेखकः कः?
उत्तरम्— नृसिंहदैवज्ञः।

66. **प्रश्नः**—'सिद्धान्ततत्त्वविवेकः' अस्य ग्रन्थस्य लेखकः कः?
उत्तरम्— कमलाकरभट्टः।

67. **प्रश्नः**—'केतकी' करणग्रन्थस्य लेखकः कः?
उत्तरम्— वेङ्कटेशकेतकर

68. **प्रश्नः**—'सौरपरिवार' ग्रन्थस्य लेखकः कः?
उत्तरम्— डॉ. गोरखप्रसादः।

69. **प्रश्नः**—ज्योतिविनोद ग्रन्थस्य लेखकः कः?
उत्तरम्— श्रीसम्पूर्णानन्दः।

70. **प्रश्नः**—'विज्ञानभाष्य' ग्रन्थस्य लेखकः कः?
उत्तरम्— श्रीमहावीरप्रसादः।

71. **प्रश्नः**—'सिद्धान्तसार्वभौम' इत्यस्य लेखकः कः?
उत्तरम्— मुनीश्वरः।

72. प्रश्नः—'जातकपद्धति' इत्यस्य लेखकः कः?
उत्तरम्— नृसिंहपुत्र दिवाकरः।

73. प्रश्नः—सिद्धान्तराजग्रन्थस्य लेखकः कः?
उत्तरम्— इन्द्रप्रस्थपुरस्य नित्यानन्दः।

74. प्रश्नः—'ज्योतिषरत्नाकर' एवं 'पंचांगानयनविधिः' ग्रन्थयोः लेखकः कः?
उत्तरम्— महिमोदयः।

75. प्रश्नः—मेघविजयगणिः महोदयस्य कानि रचनाकार्याणि सन्ति?
उत्तरम्—1. वर्षप्रबोधः, 2. उदयदीपिका, 3. हस्तसंजीवनः।

76. प्रश्नः—'चमत्कारचिन्तामणि' एवं 'विवाह-पटलं' कयोः रचना स्तः?
उत्तरम्— उभयकुशलस्य।

77. प्रश्नः—जन्मपत्रीपद्धतिग्रन्थः कदा एवंच कः रचितवान्?
उत्तरम्— विक्रम संवत् 1051 कार्तिकमासे लब्धिचन्द्रगणिः।

78. प्रश्नः—अरबीभाषया: रेखागणितस्य अनुवादः जगन्नाथसम्राट् कदा कृतवान्?
उत्तरम्— शक संवत् 1640 तमे संस्कृतभाषायाम्।

79. प्रश्नः—रेखागणिते कति अध्यायाः सन्ति?
उत्तरम्— 15 पञ्चदशाध्यायाः।

80. प्रश्नः—बापूदेव शास्त्री महोदयस्य प्रसिद्धाः ग्रन्थाः के सन्ति?
उत्तरम्—1. त्रिकोणमिति, 2. बीजगणितम्, 3. अव्यक्तगणितम्।

81. प्रश्नः— 'गोलप्रकाशः' इत्यस्य लेखकः कः?
उत्तरम्— नीलाम्बरझा।

82. प्रश्नः—सिद्धान्त-दर्पणग्रन्थस्य लेखकः कः?
उत्तरम्— सामन्तचन्द्रशेखरः।

83. प्रश्नः—'करणप्रकाशः' ग्रन्थस्य लेखकः कः?
उत्तरम्— ब्रह्मदेवः।

84. प्रश्नः—भास्वतीकरणग्रन्थस्य लेखकः कः?
उत्तरम्— शतानन्दः।

85. प्रश्नः—कामधेनु इति ग्रन्थस्य लेखकः कः?
उत्तरम्— श्रीमहादेवः।

86. प्रश्नः—'चान्द्रमानाभिधान' अस्य ग्रन्थस्य लेखकः कः?
उत्तरम्— गंगाधरः।

87. प्रश्नः—सिद्धान्तसुन्दर इति ग्रन्थस्य लेखकः कः?
उत्तरम्— ज्ञानराजः।

88. प्रश्नः—'सौरपक्षीय' करणग्रन्थस्य लेखकः कः?
उत्तरम्— विष्णुदैवज्ञः।

89. प्रश्नः—मणिप्रदीपनाम्नः करण-ग्रन्थस्य लेखकः कः?
उत्तरम्— रघुनाथशर्मा।

90. प्रश्नः—'मुहूर्त-चूड़ामणि' करणग्रन्थस्य लेखकः कः?
उत्तरम्— शिवदैवज्ञः।

91. प्रश्नः—कल्पलता अस्य ग्रन्थस्य लेखकः कः?
उत्तरम्— सोमदैवज्ञः।

92. प्रश्नः—वैष्णवकरणग्रन्थस्य लेखकः कः?
उत्तरम्— श्रीशंकरः।

93. प्रश्नः—प्रश्नमाणिक्यमाला अस्य ग्रन्थस्य लेखकः कोऽस्ति?
उत्तरम्— परमानन्दपाठकः।

94. प्रश्नः—जैमिनिसूत्रम् अस्य ग्रन्थस्य लेखकः कोऽस्ति?
उत्तरम्— जैमिनि।

95. प्रश्नः—जन्मपत्रदीपकः अस्य ग्रन्थस्य लेखकः कः?
उत्तरम्— विन्ध्येश्वरी प्रसादः।

96. प्रश्नः—शीघ्रबोधस्य लेखकः कोऽस्ति?
उत्तरम्— पं. काशीनाथः।

10
दर्शनशास्त्रविवेचनम्

(Code-25/73)

दर्शन-शब्दोऽयं संस्कृतस्य प्रेक्षणार्थकाद् दृश् धातोः (दृशिर् प्रेक्षणे) ल्युट् प्रत्यये अनादेशे च कृते दर्शनम् इति सिद्धम्। **दृश्यते अनेन इति दर्शनम्।** उपनिषत्सु सत्यस्य दर्शनाय दृश् धातोः प्रयोगोऽभवत्। अर्थात् ज्ञानचक्षुषा यद् आत्मेत्यादि अलौकिकं वस्तु गृह्यते तद् दर्शनम्। अलौकिकं आत्मादितत्त्वं (आत्मा, स्वर्ग, मुक्ति, प्रभृति वस्तु) येन तद् दर्शनम्। येन साधनेन इदं विश्वम्, इदं वस्तुजातम्, ब्रह्म, जीवात्मा, प्रकृतिश्च, याथातथ्येन दृश्यते निरीक्ष्यते परीक्ष्यते समीक्ष्यते विविच्यते च यत्र तद् दर्शनम्।

भारतीय दर्शनशास्त्रम् (नव-दर्शनम्)

(1) आस्तिकदर्शनम् (2) नास्तिकदर्शनम्

1. सांख्य 2. योग 3. न्याय 4. वैशेषिक 5. पूर्वमीमांसा 6. उत्तरमीमांसा

क्रमशः (कपिलः) (पतंजलि) (गौतम) (कणाद) (जैमिनि) (वारदायण/व्यास)

1. चार्वाक (लोकायत) 2. जैन 3. बौद्ध (सौगत)
(वृहस्पति) (ऋषभदेव) (बुद्ध)

1. श्वेताम्बर 2. दिगम्बर सौत्रान्तिक वैभाषिक योगाचार माध्यमिक।

(क) (Code-73) द्रव्यम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि-

गुणवत्त्वं द्रव्यस्य लक्षणम्। न्यायमते हि उत्पन्नं द्रव्यं क्षणं निर्गुणं निष्क्रियञ्च तिष्ठतीति सिद्धान्तेन, उत्पत्तिकालीनद्रव्ये एतल्लक्षणाव्याप्तिः, तद्वारणाय-**गुणसमानाधिकरणसत्ता-भिन्नजातिमत्त्वं द्रव्यस्य लक्षणम्।** तथा च गुणसमानाधिकरणसत्ताभिन्नद्रव्यत्वजातिमत्त्वं द्रव्ये सत्त्वात् लक्षणसमन्वयः। तत्र द्रव्याणि- **पृथिव्यप्तेजोवाय्वा-काशकालदिगात्ममनांसि नवैव।** एवकारः अयोगव्यवच्छेदकार्थकः। नवद्रव्येषु गन्धवती पृथिवी, शीतस्पर्शवत्यापः, उष्णस्पर्शवत्तेजः, रूपरहितस्पर्शवान् वायुः, शब्दगुणकमाकाशम्, अतीतादिव्यवहारहेतुर्कालः, प्राच्यादि-व्यवहारहेतुर्दिक्, ज्ञानाधिकरणमात्मा, सुखाद्युपलब्धि-साधनमिन्द्रियं मनः इति। एषु पृथिव्यादि पञ्चद्रव्याणि महाभूतानि, पृथिव्यादि चत्वारि मनश्च पञ्चद्रव्याणि मूर्तानि, आकाशादि चत्वारि विभुद्रव्याणि च।

नवद्रव्येषु-1. पृथिवी-गन्धवत्त्वं पृथिव्याः लक्षणम्। न्यायमते उत्पन्नं द्रव्यं क्षणं निर्गुणं निष्क्रियञ्च तिष्ठतीति सिद्धान्तेन, उत्पन्नविनष्टघटादावव्याप्तिवारणाय "गन्ध-समानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं पृथिव्याः लक्षणम्"। गन्धस्याधिकरणे वर्तमाना द्रव्यत्वव्याप्यजातिः पृथिवीत्वरूपा, तद्वत्त्वं पृथिव्यामिति लक्षणसमन्वयः। माधवाचार्येण सर्वदर्शनसंग्रहे-" पाकजरूपसमानाधिकरणद्रव्यत्व-व्याप्यजातिः"। पृथिवीयं नित्यानित्यभेदाद्द्विविधा। नित्या परमाणुरूपा, सूक्ष्मा यस्याः अवयवाः न विद्यन्ते। अनित्या पृथिवी घटपटादिरूपेण अवयववती। इयमनित्या पृथिवी शरीरेन्द्रियविषयभेदैः त्रिविधा। शरीरं तु अस्मदादीनां पार्थिवम्। नासाग्रवर्ति गन्धग्राहकं घ्राणं पृथिव्याः इन्द्रियम्। घटपटमृत्पाषाणादयः पृथिव्याः विषयाः।

नवद्रव्येषु-2. आपः (जलनिरूपणम्) –नवद्रव्येषु शीतस्पर्शवत्यापः। न्यायमते उत्पन्नं द्रव्यं क्षणं निर्गुणं निष्क्रियञ्च तिष्ठतीति सिद्धान्तेन उत्पत्तिविनिष्टजलादाव्याप्तिवारणाय **शीतस्पर्शसमानाधिकरणद्रव्यत्वजातिमत्त्वं जलस्य लक्षणम्।** शीतस्पर्शाधिकरणे वर्तमाना द्रव्यत्वव्याप्यजातिः जलत्वरूपा एव, तद्वत्त्वं जले इति लक्षणसमन्वयः।

नित्यानित्यभेदात् आपः द्विविधाः। नित्या परमाणुरूपा सूक्ष्मा अवयवरहिता, अनित्या कार्यरूपा, अवयवयुक्ता। अनित्या आपः त्रिविधा-शरीरेन्द्रियविषयभेदात्। वरुणलोके विद्यमानमयोनिजं जलीयशरीरम्, जलस्य विशेषगुणः रसः, जलेन्द्रियरसना जिह्वाग्रवर्ति रसनम्। नदीसागरादयः विषयरूपं जलम्। **तेजसि वायौ चातिव्याप्तिवारणाय रसग्राहकम्। आकाशेऽतिव्याप्तिवारणाय स्पर्शेति, त्वगादौ वारणाय रसग्राहकमिति।** नैयायिकाः जले शुक्लरूपं मधुररसमामनन्ति। यथा-

वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ।
स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम्।।

नवद्रव्येषु-3. तेजोनिरूपणम्–नवद्रव्येषु उष्णस्पर्शवत्तेजः। उत्पन्नं द्रव्यं क्षणं निर्गुणं निष्क्रियञ्च तिष्ठतीति न्यायात् उत्पत्तिविनष्टजलादावव्याप्तिवारणाय **उष्णस्पर्श-समानाधिकरणद्रव्यत्वव्याप्यजातिः तेजसो लक्षणम्"।** उष्णस्पर्शसमानाधिकरणे वर्तमाना द्रव्यत्वव्याप्यजातिः

तेजस्स्वरूपा, तद्वत्वं तैजसि इति लक्षणसमन्वयः। तेजः द्विविधम् नित्यानित्यभेदात्। नित्यं परमाणुरूपं सूक्ष्मम्, अनित्यं कार्यरूपम्।

अनित्यमपि शरीरेन्द्रियविषयभेदात् त्रिविधम्। तैजसः शरीरमादित्यलोके। रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति इन्द्रियम्। विषयश्चतुर्विधः-भौमादिव्यौदर्याकरजभेदात्। भौमं वह्न्यादिकम्, दिव्यं विद्युदादिः, औदार्यं जठराग्निः, आकरजं सुवर्णादिः। घ्राणादावतिव्याप्तिवारणाय रूपग्राहक-कालादावतिव्याप्तिवारणाय इन्द्रियमिति। तेजस्स्वरूपवर्णनं तु-

उष्णस्पर्शवत्तेजः स्याद्रूपं शुक्लभास्वरम्।
नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत्।।
(इन्द्रियं नयनं वह्निस्वर्णादि विषयो मतः)

नवद्रव्येषु-4. वायुनिरूपणम्-रूपरहितस्पर्शवान् वायुः। अर्थात् रूपरहितत्वे सति स्पर्शवत्वं वायोर्लक्षणम्। वायौ रूपं नास्ति, एवं वायौ स्पर्शस्य विद्यमानत्वात् तत्र स्पर्शवत्त्वमपि वर्तत इति लक्षणसमन्वयः। घटादावतिव्याप्तिवारणाय रूपरहितत्वमिति। आकाशादावतिव्याप्तिवारणाय स्पर्शवानिति। अतः रूपरहितत्वविशिष्टस्पर्शसमानाधिकरण-द्रव्यत्वव्याप्यजातिमत्त्वं वायोर्लक्षणम्।

वायुरपि नित्यानित्यभेदाद्द्विविधः, नित्यवायुः परमाणुरूपः, अनित्यश्च कार्यरूपः। कार्यरूपवायोः त्रैविध्यम्-शरीरेन्द्रियविषयभेदैः। वायवीयं शरीरं वायुलोके भूतप्रेतादीनाम्। वायोर्विशेषगुणस्य स्पर्शस्य ग्राहकेन्द्रियं सर्वशरीरवर्ति त्वक्। वृक्षादीनां कम्पनहेतुः वायोर्विषयः। कालादावतिव्याप्तिवारणाय इन्द्रियेति। स च वायुः आभ्यन्तरबाह्यभेदाद्द्विविधः, शरीरान्तः-सञ्चारीवायुः प्राणः, आभ्यन्तरः। स चैकोप्युपाधिभेदात् प्राणापानसमानोदानव्यानभेदैः पञ्चविधः। उक्तञ्च न्यायसिद्धान्तमुक्तावल्याम्-

अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः।
प्राणादिस्तु महावायुपर्यन्तो विषयो मतः।।

नवद्रव्येषु-5. आकाशनिरूपणम्-शब्दगुण-कमाकाशम्। अर्थात् शब्दाश्रयत्वं आकाशस्य लक्षणम्। "शब्दाश्रयत्वस्य आकाशे विद्यमानत्वाल्लक्षणसमन्वयः।" तच्चैकं विभु नित्यं च। नित्यद्रव्यत्वात् आकाशस्य विशेषगुणः शब्दः, शब्दाश्रयेणैव आकाशस्य सिद्धिर्भवति। उक्तञ्च न्यायसिद्धान्तमुक्तावल्याम्-

आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः।

ननु भेदे प्रमाणाभावत्वात् एकमिति। एकत्वादेव सर्वत्रोपलब्धेः विभुत्वञ्चाङ्गीकृतम्। घटाकाशमठाकाशेत्यादि-नानाविधप्रतीतिबलात् नानात्वं यदि शङ्क्यते तर्ह्युच्यते-

घटाकाशादिव्यवहारस्योपाधिकृतत्वेन असाधकत्वा-देकमाकाशम्। आकाशस्य शरीरविषयोरभावः। अस्येन्द्रियं कर्णछिद्रवर्त्याकाशं श्रोत्ररूपं येन शब्दस्य ग्रहणं जायते। उक्तञ्च-

इन्द्रियं तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः।।

नवद्रव्येषु-6. कालनिरूपणम्-

(अतीतादिव्यवहारासाधारणकारणत्वस्य काले विद्यमात्वात् लक्षणसमन्वयः)

अतीतादिव्यवहारहेतुः कालः। स कालः एकः विभुः नित्यश्च। अतः विभुत्वे सति अतीतादिव्यवहाराऽ-साधारणनिमित्तहेतुत्वं कालस्य लक्षणम्। व्यवहारहेतुभूते घटादावतिव्याप्तिवारणाय अतीतादि विशेषणम्। ईश्वरवारणाय असाधारणेति, दिग्वारणाय अतीतादिव्यवहारेति, आदिना च अनागतवर्तमानयोर्ग्रहणम्। आकाशेति व्याप्तिवारणाय निमित्तेति। कण्ठताल्वाद्यभिघातवारणाय विभुत्वे सतीति। अतः अतीतभविष्यद्वर्तमानव्यवहारहेतुः कालः। व्यवहारोऽयं सूर्योदयास्तक्रियाभ्यां सम्बन्धितोऽस्ति। नित्यत्वं ध्वंसप्रागभाव-योरप्रतियोगित्वम्। विभुत्वं सर्वभूतद्रव्यसंयोगित्वम्। एक एव कालः उपाधिभेदैः क्षणमुहूर्तदिनमासादिरूपेण व्यवह्रियते। उक्तञ्च न्यायसिद्धान्तमुक्तावल्याम्-

जन्यानां जनकः कालः जगतामाश्रयो मतः।
परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः।।

नवद्रव्येषु-7. दिङ्निरूपणम्-

(प्राच्यादिव्यवहाराऽसाधारणकारणत्वस्य दिशि सत्वात् लक्षणसमन्वयः)

प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका नित्या विभ्वी च। विभुत्वे सति प्राच्यादिव्यवहारासाधारणकारणत्वं दिशो लक्षणम्। उक्तञ्च-

दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते।

विभुत्वं नाम सर्वभूतद्रव्यसंयोगित्वम्। नित्यं ध्वंसप्रागभावयोः प्रतियोगित्वम्। कण्ठताल्वाद्यभिघातवारणाय विभुत्वमिति। प्राच्यादिशब्दात्मकव्यवहारस्य आकाशे सत्वात् तद्वारणाय कारणहेतुत्वमिति। ईश्वरवारणाय असाधारणेति।

परिणामादावतिव्याप्तिवारणाय प्राच्यादिव्यवहारहेतुरिति। कालवारणाय प्राच्यादीति।

एका एव दिक् उपाधिभेदात् पूर्वपश्चिमादिव्यवहारेण प्रयुज्यते। तत्रोदयाचलसन्निहिता दिक् प्राची, अस्ताचलसन्निहिता प्रतीचि, मेरोस्सन्निहिता उदीची व्यवहृता च अवाचीति। यथोक्तं न्यायमुक्तावल्याम्-

उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक्।

नवद्रव्येषु-8. आत्मनिरूपणम्-

(ज्ञानाश्रयत्वस्य आत्मनि सत्वात् लक्षणसमन्वयः)

ज्ञानाधिकरणमात्मा। अधिकरणपदं समवायेन ज्ञानाश्रयत्वमिति लाभार्थम्। अतः ज्ञानस्य समवायेनाधि-करणत्वं आत्मनो लक्षणम्। भूतलादावपि वारणाय ज्ञानेति, कालादिवारणाय समवायेनेति। आत्मनः चेतनत्वादेव तच्चक्षुर्भ्यां पश्यति, कर्णाभ्यां शृणोति च। अतः ज्ञानेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम्।

आत्मा नित्यः शुद्धचैतन्यः विभुः अमूर्तश्च।

आत्मा द्विविधा-जीवात्मा परमात्मा च। सुखादिसमवायिकारणत्वं जीवात्मनो लक्षणम्। स च प्रतिशरीरं भिन्नः विभुर्नित्यश्च। (समवायसम्बन्धेन जीवात्मनि सुखादिकमुत्पद्यते)। समवायसम्बन्धेन नित्यज्ञानाश्रयत्वं परमात्मनो लक्षणम्। तत्रेश्वरः सर्वज्ञः परमात्मा एकैव। यथा न्यायमुक्तावल्याम्-

शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः।
तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः।।

नवद्रव्येषु-9. मनसः निरूपणम्- सुखाद्युपलब्धि-साधनमिन्द्रियं मनः। उपलब्धिर्नाम साक्षात्कारः। सुखादीनामुपलब्धेः एतत्साधनं भवति। अतः- **सुखदुःखादि-साक्षात्कारत्वे सति इन्द्रियत्वं मनसो लक्षणम्।** न्यायमुक्तावल्याञ्च-

मनो ग्राह्यं सुखं दुःखादिसाक्षात्करणत्वं विशेषणम्।

विशेष्यानुपादाने आत्मन्यतिव्याप्तिः, आत्मनः सुखदुःखादिकं प्रति समवायिकारणत्वात्, अतः इन्द्रियत्वरूप-विशेष्योपादानम्। आत्मनः संयोगादिवारणाय इन्द्रियमिति, चक्षुरादिवारणाय सुखेति। कस्यापि पदार्थस्य ज्ञानं तदिन्द्रियैस्सह, इन्द्रियाणां मनसा सह, मनसः आत्मना सह संयोगेनैव भवति, अतः प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यञ्च मनः। जीवात्मनो अनेकत्वात् मनोऽपि अनेकविधम्। दीपिकायां तु- **स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणं निरूपितम्।**

(क) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— द्रव्यस्य किं लक्षणम्?
उत्तरम्— गुणाश्रयत्वं क्रियाश्रयत्वं वा द्रव्यत्वम्।
2. **प्रश्नः**— कति पदार्थाः के च ते?
उत्तरम्— सप्तपदार्थाः, द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावाः।
3. **प्रश्नः**—द्रव्याणि कति कानि च तानि?
उत्तरम्— ९ नव पृथिवी-अप्-तेज-वायु-आकाश-काल-दिक्-आत्मा-मन।
4. **प्रश्नः**— नवद्रव्येषु पृथिव्याः किं लक्षणं का च सा?
उत्तरम्—गन्धवत्त्वम्, सा द्विविधा-नित्यानित्या च।
5. **प्रश्नः**— नवद्रव्येषु जलस्य किं लक्षणम्?
उत्तरम्—शीतस्पर्शसमानाधिकरणद्रव्यत्वजातिमत्वम्।
6. **प्रश्नः**— सामान्यतया आपः कतिधा भवन्ति?
उत्तरम्— द्विविधाः, नित्यानित्यभेदात्।
7. **प्रश्नः**— नवद्रव्येषु तेजसः किं लक्षणम्?
उत्तरम्— उष्णस्पर्शसमानाधिकरणद्रव्यत्वव्याप्यजातिः तेजसो लक्षणम्।
8. **प्रश्नः**— सामान्यतया तेजः कतिविधं भवति?
उत्तरम्— द्विविधम्, नित्यानित्यभेदात्।
9. **प्रश्नः**— नवद्रव्येषु वायो किं लक्षणम्?
उत्तरम्— रूपरहितस्पर्शवान् वायुः।
10. **प्रश्नः**— सामान्यतया वायुः कतिविधः?
उत्तरम्— नित्यानित्यभेदाद्द्विविधः।
11. **प्रश्नः**— नवद्रव्येषु आकाशस्य किं लक्षणं कतिविधं च तत्?
उत्तरम्—शब्दगुणकमाकाशम्। तच्चैकं विभुः नित्यं च।
12. **प्रश्नः**— नवद्रव्येषु कालस्य किं लक्षणम्?
उत्तरम्— अतीतादिव्यवहारहेतुः कालः।
13. **प्रश्नः**— 'स चैको विभुर्नित्यश्च' केन सम्बद्धोऽस्ति?
उत्तरम्— कालेन।

14. प्रश्नः—नवद्रव्येषु दिक् इत्यस्य किं लक्षणं तद्भेदश्च कः?
उत्तरम्—दूरान्तिकादिधीकाहेतुरेका नित्या दिगुच्यते। सा चैका नित्या विभ्वी।

15. प्रश्नः— नवद्रव्येषु आत्मनः किं लक्षणं कतिविधश्च सः?
उत्तरम्— ज्ञानाधिकरणमात्मा। स द्विविधः–जीवात्मा परमात्मा चेति।

16. प्रश्नः— नवद्रव्येषु मनसः किं लक्षणम्?
उत्तरम्— सुखाद्युपलब्धिसाधनमिन्द्रियं मनः।

17. प्रश्नः— पृथिवीः कतिविधा, काः च ताः?
उत्तरम्— द्विविधा, नित्यानित्या च।

18. प्रश्नः—क्रियागुणवत् समवायिकारणमिति। अत्र क्रियावत्वं द्रव्यत्वम्, गुणवत्वं द्रव्यत्वम्, समवायिकारणत्वं द्रव्यम् इति द्रव्यलक्षणक्रमेण कस्य कथनम्?
उत्तरम्— कणादस्य।

(ख) प्रमाणविवेचनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

प्रमाकरणं प्रमाणम्। यथार्थानुभवः प्रमा। यथार्थश्च तद्वति तत्प्रकारकोऽनुभवः। यथा अयथार्थानुभवः चतुर्विधः प्रत्यक्षानुमित्युपमितिशाब्दभेदात्, अतः तत्करणं प्रमाणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशाब्दभेदादिति न्यायवैशेषिकैः स्वीक्रियते। प्रत्यक्षप्रमाकरणं प्रत्यक्षम्, तत्र इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्, प्रत्यक्षमपि द्विविधम्–निर्विकल्पकं सविकल्पकं च। अनुमितिकरणमनुमानम्, अनुमितिर्नाम परामर्शजन्यज्ञानम्। परामर्शस्तु व्याप्तिविशिष्टपक्षधर्मताज्ञानम्। अनुमानमपि स्वार्थपरार्थभेदाद्द्विविधम्। उपमितिकरणमुपमानप्रमाणम्। उपमितिर्नाम संज्ञासम्बन्धी ज्ञानम्। शब्दप्रमाकरणं शाब्दप्रमाणम्, तच्च पदज्ञानरूपम्। तत्र प्रमाणविषये प्रत्यक्षप्रमैवेति चार्वाकाः। अनुमितिरपीति–काणादबौद्धाः, उपमितिरपीति नैयायिकैकदेशिनः, शाब्दमपीति नैयायिकाः, अर्थापत्तिरिति प्राभाकराः, अनुपलब्धिकोऽपीति भाट्टवेदान्तिनौ स्वीकुर्वतः। आचार्य उदयनः अनुभवं (ज्ञानं) यथार्थ एवं अयथार्थ 'यथार्थानुभवः प्रमा तत्साधनं च प्रमाणम्' इति स्वीकरोति। यथा–



1. **प्रत्यक्षप्रमाणम्**–प्रत्यक्षप्रमाकरणं प्रत्यक्षम्। प्रत्यक्षं नाम इन्द्रियार्थसन्निकर्षजन्यं ज्ञानम्। न्यायदर्शनेऽपि– 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्।" इत्थं इन्द्रियात्मकप्रत्यक्षप्रमाणे प्रत्यक्षप्रमाकरणत्वस्य विद्यमानत्वात् लक्षणसमन्वयः। यथा–

इन्द्रियं चक्षुरादिकं अर्थो घटपटादिः तयोः सन्निकर्षेण 'अयं घटः' इत्युपपन्नं ज्ञानं प्रत्यक्षप्रमाणविषयकम्। अनुमितौ अतिव्याप्तिवारणाय लक्षणे इन्द्रियार्थसन्निकर्षेति पदम्। तच्च प्रत्यक्षमपि निर्विकल्पकसविकल्पकभेदाद्द्विविधम्। निष्प्रकारकं ज्ञानं निर्विकल्पकं यथा इदं किञ्चिदिति ज्ञानम्। सप्रकारकं ज्ञानं सविकल्पकं यथा ब्राह्मणोऽयं डित्थोऽयमिति ज्ञानम्। प्रत्यक्षज्ञानहेतुरिन्द्रियसन्निकर्षः षड्विधः–संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः विशेषणविशेष्यभावश्च।

2. **अनुमानम्**–अनुमितिकरणमनुमानम्। अनुमितिर्नाम परामर्शजन्यज्ञानम्। परामर्शो नाम व्याप्तिविशिष्ट-

पक्षधर्मताज्ञानम्। यथा–वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः, तज्जन्यं ज्ञानं पर्वतो वह्निमानिति अनुमितिः। तच्चानुमानं स्वार्थपरार्थभेदाद्द्विविधम्।

स्वार्थानुमानं स्वानुमितिहेतुः, यथा स्वयमेव भूयो दर्शनेन महानसादौ यत्र यत्र धूमस्तत्र तत्र वह्निरिति व्याप्तिं स्मरन् पर्वते धूमं पश्यन् वह्निव्याप्यधूमवानयं पर्वतः इति ज्ञानमुत्पद्यते, तस्मात् पर्वतो वह्निमानिति ज्ञानं स्वार्थानुमानम्। (न्यायप्रयोज्यत्वे सति अनुमानत्वं परार्थानुमः।) यत्रानुमाने प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः वाक्याः अपेक्षन्ते तत्परार्थानुमानम्, यथा पर्वतो वह्निमानिति प्रतिज्ञा, धूमवत्वादिति हेतुः, यो यो धूमवान् स स वह्निमान् यथा महानसमित्युदाहरणम्, तथा चायमित्युपनयः, तस्मात्तथेति निगमनम्।

अनुमाने लिङ्गपरामर्श एव करणम्। तस्माल्लिङ्गपरामर्शोऽनुमानमिति। (लिङ्गं त्रिविधम्)।

3. **उपमानप्रमाणम्**–उपमितिकरणमुपमानम्। उपमितिर्नाम संज्ञासंज्ञिसम्बन्धज्ञानम्। अर्थात् पदपदार्थज्ञानमुपमितिः। उपमितौ अतिदेशवाक्यार्थस्मरणं व्यापारः सादृश्यज्ञानञ्च करणम्। यथा गौरेव गवयेति। दृष्टान्तेऽस्मिन् कश्चिद् गवयशब्दवाच्यमजानन् अन्यस्य प्रामाणिकस्य पुरुषस्य "गोसदृशो गवय" इति वचनं श्रुत्वा वने गोसदृशं आकृतिमन्तं पशुं दृष्ट्वा गोसदृशो गवय इति अतिदेशवाक्यार्थस्मरणपूर्वकं अयं गवयशब्दवाच्यः इत्युपमितिः, तत्करणञ्चोपमानम्। अतः प्रज्ञातेन सामान्यात् प्रज्ञापनीयस्य ज्ञानमुपमानम्। अत एव न्यायदर्शनेऽपि–

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्।

तच्चोपमानं त्रिविधम्–सादृश्यविशिष्टपिण्डज्ञानम्, वैधर्म्यविशिष्टपिण्डज्ञानं असाधारणविशिष्टपिण्डज्ञानञ्च। सांख्यवैशेषिकचार्वाकादिभिः उपमानप्रमाणं न स्वीक्रियते।

4. **शाब्दप्रमाणम्**–शब्दप्रमाकरणं शाब्दप्रमाणम्। आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। अतः आप्तोच्चरितत्वे सति वाक्यत्वं शब्दस्य लक्षणम्। शाब्दबोधे पदज्ञानाधीनपदार्थोपस्थितिर्व्यापारः पदज्ञानञ्च करणम्। पदञ्च शक्तम्। अस्माच्छब्दादयमर्थः बोद्धव्यः इति ईश्वरसंकेतः शक्तिः। इत्थं शब्दप्रमाणे शाब्दप्रमाकरणस्य विद्यमानत्वाल्लक्षणसमन्वयः।

तत्र वाक्यार्थज्ञाने आकांक्षायोग्यतासन्निधिश्चेति त्रयो हेतवः। एभिर्रहितं वाक्यमप्रमाणम्। यथा गौरश्वो पुरुषो हस्तीति वाक्यं आकांक्षाविरहात् न प्रमाणम्। वह्निना सिञ्चेदिति वाक्यमपि योग्यताविरहात् न प्रमाणम्। प्रहरे-प्रहरेऽसहोच्चरितानि गामानयेत्यादीनि न प्रमाणवाक्यानि सान्निध्याभावात्।

वाक्यं तु लौकिकवैदिकभेदाद्द्विविधम्। वैदिकमीश्वरोक्तं सर्वमेव प्रमाणम्। लौकिकं त्वाप्तोक्तं प्रमाणम्, अन्यदप्रमाणमिति दिक्।

प्रमाणविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः— प्रमाणम् इत्यस्य कोऽर्थः?
उत्तरम्—प्रमाकरणम् (यथार्थानुभवः)।

2. प्रश्नः—प्रमाणं कतिविधः कं च ते?
उत्तरम्— चतुर्विधः, प्रत्यक्षानुमित्युपमितिशब्दः।

3. प्रश्नः— प्रत्यक्षम् इत्यस्य लक्षणं किम्?
उत्तरम्— इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्।

4. प्रश्नः— प्रत्यक्षं कतिविधम्? कानि च तानि?
उत्तरम्— द्विविधम्, निर्विकल्पकं सविकल्पकं च।

5. प्रश्नः— अनुमानं किम्?
उत्तरम्— अनुमितिकरणमनुमानम्।

6. प्रश्नः— अनुमानं कतिविधं कानि च तानि?
उत्तरम्— स्वार्थपरार्थभेदाद्द्विविधम्।

7. प्रश्नः— किं नाम उपमानप्रमाणम्?
उत्तरम्— उपमितिकरणमुपमानम्।

8. प्रश्नः— उपमानं कतिविधं कानि च तानि?
उत्तरम्—त्रिविधम्-सादृश्यविशिष्टपिण्डज्ञानम्, वैधर्म्यविशिष्टपिण्डज्ञानं, असाधारणविशिष्टपिण्डज्ञानञ्च।

9. प्रश्नः— शाब्दप्रमाणं किम्?
उत्तरम्— शब्दप्रमाकरणम् (आप्तवाक्यम्)।

10. प्रश्नः—योगदर्शने कति प्रमाणं सूत्रितम्?
उत्तरम्— त्रैविध्यम्, प्रत्यक्षम् अनुमानम् आगमश्चेति।

11. प्रश्नः— प्रमाणेषु कस्य प्राथम्यम्?
उत्तरम्— प्रत्यक्षस्य।

12. प्रश्नः—प्रमाणैरर्थपरीक्षणं केन भवति?
उत्तरम्— न्यायेन।

14. **प्रश्नः**—यथार्थानुभवः प्रमाणन्यायाचार्यैः कियत् प्रमाणं स्वीक्रियते?
उत्तरम्— चतुष्टयम् (प्रत्यक्षम्, अनुमानम्, उपमानम्, शाब्दः)

15. **प्रश्नः**—परामर्शजन्यं ज्ञानं किं भवति?
उत्तरम्— अनुमानम्।

16. **प्रश्नः**— सांख्यदर्शने कियत् प्रमाणं मन्यन्ते?
उत्तरम्— त्रयः- (प्रत्यक्षम्, अनुमानम्, शाब्दः)।

17. **प्रश्नः**—चार्वाक-बौद्धानां मते शब्दो प्रमाणमस्ति न वा?
उत्तरम्— नास्ति।

18. **प्रश्नः**—प्रत्यक्षज्ञानहेतुरिन्द्रियसन्निकर्षः कतिविधः?
उत्तरम्—षड्विधः-संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः विशेषणविशेष्यभावश्च।

19. **प्रश्नः**— न्यायदर्शने उपमानस्य किं लक्षणम्?
उत्तरम्— प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्।

20. **प्रश्नः**—सांख्यवैशेषिकचार्वाकादिभिः उपमानप्रमाणं स्वीक्रियते न वा?
उत्तरम्— न स्वीक्रियते।

21. **प्रश्नः**—वाक्यार्थज्ञाने के त्रयो हेतवः?
उत्तरम्— आकाङ्क्षायोग्यतासन्निधिश्चेति।

23. **प्रश्नः**—वाक्यं कतिविधम्?
उत्तरम्— लौकिकवैदिकभेदाद्द्विविधम्।

(ग) हेत्वाभासः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम्। अर्थात् अहेतवः सन्तोऽपि हेतुवदाभासन्ते प्रतीयन्ते इति दुष्टहेतुरूपाः हेत्वाभासाः। (अतः असाधको हेतुः हेतुत्वेनाभिमतो हेत्वाभास इति।)

यथा ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभावविशिष्ट-ह्रदविषयकत्वेन बाधे इत्थं समन्वयः। अत एव न्यायमुक्तावल्याम्- **यद्विषयकत्वेन ज्ञानस्यानुमिति-विरोधित्वं तद्धेत्वाभासत्वम्।** यद्विषयकत्वेन अर्थात् दोषविषयकत्वेन, यथा वह्न्यभावविशिष्टह्रदविषयकत्वेन ज्ञानस्य ह्रदो वह्निमानित्याकारकानुमितेः प्रतिबन्धकत्वमस्ति। तत्त्वस्य वह्न्यभावविशिष्टह्रदे सत्वात् भवति लक्षणसमन्वयः।

1. **सव्यभिचारः**:—अनैकान्तिकः सव्यभिचारः। व्यभिचारस्तु एकत्राव्यवस्थितिः, अर्थात् यो हेतुः साध्याधिकरणत्वेन सह साध्याभावस्यापि अधिकरणत्वेन तिष्ठति स सव्यभिचारः। यथा पर्वतो वह्निमान् प्रमेयत्वादित्यत्र साध्यो वह्निः, साध्याभावः वह्न्यभावः, तद्वद् जलह्रदादिकम्। तन्निरूपितवृत्तितायाः एव प्रमेयत्वे सत्वात् भवति लक्षणसमन्वयः। सव्यभिचारस्त्रिविधः साधारणः, यथा पर्वतो वह्निमान् प्रमेयत्वादिति। अत्र प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् सव्यभिचारः। सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः। यथा शब्दो नित्यः शब्दत्ववदिति। अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी सव्यभिचारः। यथा सर्वमनित्यं प्रमेयत्वादिति। अत्र पक्षः सर्वः, अतः दृष्टान्तो नास्तीति दिक्।

2. **विरुद्धः**:—साध्याभावव्याप्यहेतुः विरुद्धस्य लक्षणम्। अत एव न्यायदर्शने–

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः।

अर्थात् स्वसिद्धान्तविरुद्धाचरणं विरुद्धो हेत्वाभासः, यथा–अयं गौरश्वत्वादित्यत्र साध्यः गोत्वधर्मः, साध्याभावः गोत्वाभावः तद्व्याप्तो हेतुः अश्वत्वरूपः, तादृशहेतुत्वस्य अश्वत्वे सत्वात् भवति लक्षणसमन्वयः। पुनश्च यथा– शब्दो नित्यः कृतकत्वात् पक्षः शब्दः साध्यश्च नित्यता, हेतुश्च कृतकत्वात्। कृतकत्वं हि नित्यत्वस्य अभावेनानित्यत्वेन व्याप्तम्, अतः अयं हेतुनित्यता साध्ये विरुद्धः। अत एवायं विरुद्धहेत्वाभास इति दिक्।

3. **सत्प्रतिपक्षः**:—**यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः।** अत एवायं प्रकरणसमोऽप्युच्यते। न्यायदर्शनेऽपि–

यस्मात्प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः।

अत्र हेतुः समस्यायाः समाधाने अक्षमो, अतः अयं पक्षः साध्यवान् साध्याभाववान् वेति जिज्ञासा जायते। यथा शब्दो नित्यः अनित्यो वेति शङ्कायां **शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत्** इति हेतुना शब्दो नित्यः सिद्ध्यति, तथैव शब्दोऽनित्यः कार्यत्वात् घटवदिति हेतुना शब्दस्यानित्यत्वमपि सिद्ध्यति। अतः शब्दस्य नित्यानित्यत्वे हेतुद्वयमपि सत्प्रतिपक्षहेत्वाभासः इति दिक्।

4. **असिद्धः**:—आश्रयासिद्ध्यन्यतमत्वमसिद्धत्वम्। अयमेव साध्यसमोऽपि। तद्यथा न्यायदर्शने–

साध्याविशिष्टः साध्यत्वात्साध्यसमः। असिद्धः त्रिविधः आश्रयस्वरूपव्याप्यत्वभेदात्।

1. **आश्रयासिद्धः**:—पक्षतावच्छेदकाभाववान् पक्षः आश्रयासिद्धः। यथा—गगनारविन्दं सुरभिररविन्दत्वादित्यत्र पक्षतावच्छेदके गगनीयत्वम्, स पक्षे नास्तीत्यस्मादाश्रयासिद्धः।

2. **स्वरूपासिद्धः**:—हेत्वभाववान् पक्षः स्वरूपासिद्धः। यथा– शब्दोऽनित्यः चाक्षुषत्वादित्यत्र चाक्षुषत्वहेतुः शब्दे नास्ति, शब्दस्य श्रावणत्वात्। अत स्वरूपासिद्धः।

3. **व्याप्यत्वासिद्धः**:—सोपाधिको हेतुर्व्याप्यत्वासिद्धः। अत्र साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः, यथा–पर्वतो धूमवान् वह्नेरित्यत्र आर्द्रेन्धनसंयोगः उपाधिमत्वात् धूमहेतुः व्याप्यत्वासिद्धः।

5. **बाधितः (कालातीतः)**— यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः। अयमेव कालातीतोऽपि। यथा न्यायदर्शने– **कालात्ययापदिष्टः कालातीतः।**

अत्र हेतोरेकदेशः कालात्ययेन युक्तः, ग्रहणकाले च न संभवति। अतः साध्यसिद्धावयं अक्षमः। यथा–वह्निरनुष्णो द्रव्यत्वादिति, अत्र साध्यः उष्णत्वं तु प्रमाणान्तरेण पक्षे वह्नौ सिद्धः, अतः द्रव्यत्वरूपो हेतुः बाधितः। (अत्र प्रमाता तैजसातिरिक्तान्यष्टद्रव्याणि शीतलमनुभूय तैजसोऽपि अनुष्णमिति हेतुः प्रददाति, अतः हेतुरयं बाधितः)।

(ग) हेत्वाभासस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— कः हेत्वाभासः?
उत्तरम्—अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम्।

2. **प्रश्नः**—न्यायमुक्तावल्यां हेत्वाभासविषये किं कथितवान्?
उत्तरम्— यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्धेत्वाभासत्वम्।

3. **प्रश्नः**—हेत्वाभासाः कतिविधाः काः च ताः?
उत्तरम्— पञ्चविधः, 1. सव्यभिचारः, 2. विरुद्धः, 3. सत्प्रतिपक्षः, 4. असिद्धः, 5. कालातीतः।

4. **प्रश्नः**— सव्यभिचारहेत्वाभासः कः?
उत्तरम्— अनैकान्तिकः सव्यभिचारः।

5. **प्रश्नः**— विरुद्धहेत्वाभासस्य किं लक्षणम्?
उत्तरम्— साध्याभावव्याप्यहेतुः विरुद्धस्य लक्षणम्।

6. **प्रश्नः**—न्यायदर्शने विरुद्धस्य लक्षणं किम्?
उत्तरम्— सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः।

7. **प्रश्नः**— सत्प्रतिपक्षहेत्वाभासः कः?
उत्तरम्— साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः।

8. **प्रश्नः**— न्यायदर्शने सत्प्रतिपक्षस्य किं लक्षणम्?
उत्तरम्— यस्मात्प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः।

9. **प्रश्नः**— असिद्धहेत्वाभासस्य किं लक्षणम्?
उत्तरम्— आश्रयासिद्ध्यन्यतमत्वमसिद्धत्वम्।

10. **प्रश्नः**—न्यायदर्शने असिद्धहेत्वाभासस्य लक्षणं किम्?
उत्तरम्— साध्याविशिष्टः साध्यत्वात्साध्यसमः।

11. **प्रश्नः**—असिद्धहेत्वाभासः कतिविधः?
उत्तरम्— त्रिविधः, आश्रयस्वरूपव्याप्यत्वभेदात्।

12. **प्रश्नः**— कालातीतः हेत्वाभासः कः?
उत्तरम्—कालात्ययापदिष्टः कालातीतः।

(घ) सांख्यदर्शनम्–पंचविंशतितत्त्वानि विवेचनम् एवं वस्तुनिष्ठप्रश्नोत्तराणि

सांख्यदर्शने पञ्चविंशतितत्त्वेषु प्रकृतिः पुरुषश्चेति जडचेतनात्मकं मूलतः तत्त्वद्वयं वर्तते। तत्र प्रकृतेर्विकारभूतानि त्रयोविंशतितत्त्वानि। तदित्थं प्रकृतेः महत्, ततोऽहंकारः, तस्मात् शब्दस्पर्शरूपरसगन्धरूपाणि पञ्चतन्मात्राणि मनश्च, श्रोत्रत्वक्चक्षुरसनाघ्राणरूपाणि पञ्चज्ञानेन्द्रियाणि चेत्याह षोडशतत्त्वानि, पुनश्च शब्दादिपञ्चमहाभूतानि निस्सृतानि। एषु पञ्चविंशतितत्त्वेषु सर्वेषां मूलत्वात् प्रकृतिः अविकृतिरूपा महदाद्याः सप्त उभयत्वात् प्रकृतिरविकृतयः अन्ये च षोडशपदार्थाः केवलं विकृतिरूपाः पुरुषश्च न प्रकृतिर्न विकृतिरिति। तेषाञ्चोत्पत्तिक्रमो यथा–

प्रकृतेर्महांस्ततोऽहंकारः तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकाद् पञ्चभ्यः पञ्चभूतानि॥

एषु महदादि त्रयोविंशतितत्त्वानि व्यक्तानि, प्रकृतिरव्यक्ता, पुरुषश्च ज्ञपदवाच्यो भवति।

(वाक्पाणिपादपायूपस्थरूपाणि पञ्च कर्मेन्द्रियाणि)।

तत्त्वविषयकाः श्लोकाः-

1. प्रकृतिविकृतिभेदः-

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।।
(सां.का-3)

2. प्रकृतिप्रत्यक्षविघटको हेतुः-

सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धेः।
महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च।।
(सां.का-8)

3. व्यक्ताव्यक्तधर्माः-

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिंगम्।
सावयवं परतंत्रं व्यक्तं विपरीतमव्यक्तम्।।
(सां.का-10)

4. प्रकृतिपुरुषसंयोगहेतुः-

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।।
(सां.का-21)

5. सृष्टिव्यवस्था-

प्रकृतेर्महांस्ततोऽहंकारः तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि।।
(सां.का-22)

6. बुद्धिस्वरूपम्-

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्।
सात्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम्।।
(सां.का-23)

7. अहंकारस्वरूपः-

अभिमानोऽहङ्कारः तस्माद्द्विविधः प्रवर्तते सर्गः।
एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव।।
(सां.का-24)

8. अहंकाराद्द्विधा सृष्टिः-

सात्विक एकादशकः प्रवर्तते वैकृतादहंकारात्।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्।।
(सां.का-25)

9. ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च-

बुद्धीन्द्रियाणि चक्षुः श्रोत्रघ्राणरसनत्वगाख्यानि।
वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः।।
(सां.का-26)

10. मनस् इन्द्रियः-

उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियं च साधर्म्यात्।
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च।।
(सां.का-27)

11. इन्द्रियाणां वृत्तिः-

स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च।।
(सां.का-29)

12. इन्द्रिय-प्रवृत्तिहेतुः-

स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिम्।
पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम्।।
(सां.का-31)

13. सांख्यसृष्टिचक्रम्

1. पुरुषः 2. प्रकृति 3. महत् (बुद्धिः) 4. अहङ्कारः

सात्त्विकः राजसः तामसः

पंचज्ञानेन्द्रियाणि पंचकर्मेन्द्रियाणि उभयात्मकमिन्द्रियम्

5. नेत्रम् 6. श्रोत्रम् 7. घ्राणं 8. रसनं 9. त्वक् 10. वाक् 11. पाणि 12. पाद 13. पायु 14. उपस्थ 15. मनस् 16. शब्द 17. स्पर्श 18. रूपम् 19. रस 20. गन्ध 21. आकाश 22. वायु 23. अग्नि 24. जलम् 25. पृथिवी।

(घ) पंचविंशतितत्त्वानि सम्बन्धि वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—सांख्यदर्शने कियन्ति तत्त्वानि सन्ति?
उत्तरम्— पञ्चविंशतितत्त्वानि?

2. **प्रश्नः**—सांख्यदर्शनानुसारं कानि सन्ति पञ्चविंशति-तत्त्वानि?
उत्तरम्—1. महत्, 2. अहंकारः, 3. शब्दतन्मात्रम्, 4. स्पर्शतन्मात्रम्, 5. रूपतन्मात्रम्, 6. रसतन्मात्रम्, 7 गन्धतन्मात्रम्, 8. चक्षुर्ज्ञानेन्द्रियम्, 9. श्रोत्रज्ञानेन्द्रियम्, 10. घ्राणज्ञानेन्द्रियम्, 11. रसज्ञानेन्द्रियम्, 12. त्वक्ज्ञानेन्द्रियं, 13. वाक्कर्मेन्द्रियम्, 14. पाणिकर्मेन्द्रियम्, 15. पादकर्मेन्द्रियम्, 16. पायु-कर्मेन्द्रियम्, 17. उपस्थकर्मेन्द्रियम्, 18. आकाश-महाभूतम्, 19. वायुमहाभूतम्, 20. अग्निमहाभूतम्, 21. जलमहाभूतम्, 22. पृथ्वीमहाभूतम्, 23. मनः एकादशेन्द्रियम्, 24. मूलप्रकृतिः, 25. पुरुषः।

3. **प्रश्नः**— श्री ईश्वरकृष्णः सम्पूर्णब्रह्माण्डस्य रचनाकार्ये कियन्ति तत्त्वानि प्रतिपादितवान्?
उत्तरम्— पञ्चविंशतितत्त्वानि।

4. **प्रश्नः**— सांख्यदर्शनस्य कस्मिन् ग्रन्थे पञ्चविंशतितत्त्वानि प्राप्यन्ते?
उत्तरम्— सांख्यकारिकायाम्।

5. **प्रश्नः**— षोडशपदार्थाः केवलं किं कथ्यते?
उत्तरम्— विकृतितत्त्वानि।

6. **प्रश्नः**— सांख्यदर्शनस्य प्रवर्तकः कः?
उत्तरम्— कपिलः।

7. **प्रश्नः**— कपिलस्य द्वौ ग्रन्थौ कौ स्तः?
उत्तरम्— 1. तत्त्वसमासः, 2. सांख्यसूत्रम्।

8. **प्रश्नः**— द्वैतवादी (प्रकृति-पुरुषः) दर्शनं किमस्ति?
उत्तरम्— सांख्यदर्शनम्।

9. **प्रश्नः**— पञ्चविंशतितत्त्वेषु मूल-प्रकृतिः को भवति?
उत्तरम्— अविकृतिः।

4. **प्रश्नः**— अहङ्कारस्य कियन्ति तत्त्वानि? कानि च तानि?
उत्तरम्— त्रीणि तत्त्वानि, 1. सात्त्विकः, 2. राजसः, 3. तामसः।

10. **प्रश्नः**—कानि सात्त्विक-पंचज्ञानेन्द्रियाणि सन्ति?
उत्तरम्—5. नेत्रम् 6. श्रोत्रम् 7. घ्राणं 8. रसनं 9. त्वक्।

11. **प्रश्नः**— कानि सात्त्विक-पंचकर्मेन्द्रियाणि सन्ति?
उत्तरम्— 10. वाक् 11. पाणिः 12. पादः 13. पायुः 14. उपस्थः।

12. **प्रश्नः**—सात्त्विक-उभयात्मकमिन्द्रियं किमस्ति?
उत्तरम्— 15. मनस्।

13. **प्रश्नः**—तामसस्य कियन्ति तत्त्वानि सन्ति?
उत्तरम्— 16. शब्दः, 21. आकाशः, 17. स्पर्शः, 22. वायुः, 18. रूपम्, 23. अग्निः, 19. रसः, 24. जलम्, 20. गन्धः-25. पृथिवी।

(ङ) सत्कार्यवादः एवं वस्तुनिष्ठप्रश्नोत्तराणि

कार्यं सत् कुत्रेति जिज्ञासायामुच्यते स्वकारणे कदा चेति कारणव्यापारात्प्रागेवेति, अतः सतः सज्जायते इति सांख्यानां वाद एव सत्कार्यवादः। किमर्थमिति चेदुच्यते शशशृङ्गादेः असद्वस्तुनः उत्पत्तिर्नैव भवति, किञ्च दध्यर्थी दध्युपादानरूपं दुग्धमेव गृह्णाति न जलादिकं अन्यथा कस्मादपि कारणात् किमपि कार्यमापद्येत, पुनश्च शक्तमेव कारणं कार्यमुत्पादयति यथा मृद एव घटः, तथा च कार्यं कारणात्मकमेव भवति कार्यस्य कारणाभिन्नत्वात्, अतः सत् कारणात् असत्कार्योत्पत्त्यभावात् कार्यं सदेवेति सांख्यानां सत्कार्यवादः। अत एव सांख्यकारिकायां प्रतिपादितमित्थं यत्-

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।।

एकैकं पञ्चहेतवः प्रस्तूयन्ते-

1. **असदकरणादिति हेतुः**—कार्यं सत् कुत्रेति जिज्ञासायामुच्यते स्वकारणे, कदेति चेत् कारण-व्यापारात्प्रागेवेति, अतः सतः सज्जायते इति सांख्यानां सत्कार्यवादपुष्ट्ये अन्यतमोऽयं हेतुर्यत् असदकरणादिति। अर्थात् वस्तुतः असद्वस्तुनः करणं कदापि न संभवति। सत्कार्योत्पन्नत्वात्। यथा नृशृङ्गसदृशस्य पूर्वमविद्यमानस्य वस्तुनः असदकरणात् कार्योत्पत्त्यभावः अतः यदा कारणं सत् तदुत्पन्नं कार्यमपि सदेव, नो चेत् बालुकेभ्यः तैलम्, शशस्य विषाणं, आकाशे पुष्पाणि स्युः, परन्तु न तथा। यतो हि असच्चेत्कार्यं कारणव्यापारात्प्रागेव स्यात्, नास्य सत्वं कर्तुं केनापि शक्यते, नहि नीलं शिल्पिसहस्रेणापि पीतं कर्तुं शक्यते। व्यवहारेऽपि दृश्यते सत्करणादेव कार्यमुत्पद्यते यथा-तिलेष्वेव तैलं धान्येषु च तण्डुलानामुत्पत्तिः। अतः असदकरणात् सिद्धोऽयं पक्षः यत् कारणव्यापारात्प्रागपि कार्यं स्वकारणेऽव्यक्तरूपेण सदिति दिक्।

2. **उपादानग्रहणात्**—कार्यं सत् कुत्रेति जिज्ञासायामुच्यते स्वकारणे, कदेति चेत् कारणव्यापारात् प्रागेव, अतः सतः

सज्जायते इति सांख्यानां सत्कार्यवादपुष्ट्ये अन्यतमोऽयं हेतुर्यत्— उपादानग्रहणादिति। उपादानादि कारणानि, तेषां ग्रहणं कार्येण सम्बन्धः। अतः कार्यमुत्पादने सत् उपादानेन सह सम्बद्धत्वात्, सम्बन्धश्च कार्यस्यासतो न संभवति, यतो हि यद्यस्मिन् उपादाने कार्यं न सत् न तेन सम्बद्धम्। यथा मृत्तिकया घटादिकम्। किञ्च दध्यर्थी दध्युपादानरूपं दुग्धमेव गृह्णाति न जलादिकमन्यथा कस्मादपि कारणात् किमपि कार्यमुत्पद्येत, परन्तु व्यवहारे न तथा। न च तैलार्थी सिकता, घटार्थी तन्तून् गृह्णाति, यतो हि कार्येण सम्बद्धमेवोपादनकारणं कार्यजनकं, अतः उपादानकारणे पूर्वमेव कार्यं विद्यते इति सिद्ध्यति। इत्थं उपादानग्रहणात् पुष्टितोऽयं वादः यत् कारणव्यापारात्प्रागपि कार्यं स्वकारणेऽव्यक्तरूपेण सदिति दिक्।

3. सर्वसम्भवाभावात्–कार्यं सत् कुत्रेति जिज्ञासायां स्वकारणे कदेति चेत् कारणव्यापारात् प्रागेव, अतः सतः सज्जायते इति सांख्यानां सत्कार्यवादपुष्ट्ये अन्यतमोऽयं हेतुर्यत् सर्वसम्भवाभावात्। अत्रोच्यते सर्वेषां कार्याणामुत्पत्तिर्नैव भवति, यतो हि–

असत्वे नास्ति सम्बन्धः करणैः सत्वसङ्गिभिः।
असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः॥

अर्थात् सतः पदार्थस्यैव कारणेन सम्बद्धत्वात् यस्मिन् यत्सम्बन्धं तस्मात्तदेवोत्पद्यते। यथा तिलेष्वेव तैलम्, दध्नैव घृतम्। यदि कार्यमसत्तर्हि तदा सर्वतः सर्वं सम्भवेत्, परन्तु व्यवहारे न तथा। अतः सर्वसम्भवाभावात् इत्यस्माद् हेतोः पुष्टितोयं वादः यत् कारणव्यापारात्प्रागपि कार्यं स्वकारणेऽव्यक्तरूपेण सदिति दिक्।

4. शक्तस्य शक्यकरणात्–कार्यं सत् कुत्रेति स्वकारणे, कदेति कारणव्यापारात्प्राक्, अतः सतः सज्जायते इति सांख्यानां सत्कार्यवादपुष्ट्येऽन्यतमोऽयं हेतुः– शक्तस्य शक्यकरणात्।

यत्रोपादानसामर्थ्यं तच्छक्यम्, यदुत्पन्नयोग्यं तच्छक्यम्। अत्रोच्यते यत्कार्यं यस्मिन्नर्थे शक्यं तस्य कारणस्य तदेव कार्यमिति न्यायात् कार्यकारणयोर्मध्ये शक्तशक्यसम्बन्धो विद्यते। यथा शक्तमृत्तिकायां शक्यघटोत्पादनसामर्थ्यं विद्यते, अन्यथा तन्तुभ्योऽपि घटोत्पत्तिः, परन्तु व्यवहारे न तथा, अतः शक्तिविशेषस्य कार्यसम्बद्धत्वेन सदेव कार्यं, नासत्ता सम्बन्धः इति न्यायात्। अतः अशक्तादपि करणात् अशक्यं कार्योत्पत्त्यभावात् सार्थकोऽयं हेतुः शक्तस्य शक्यकरणादिति। इत्थं पुष्टितोऽयं सत्कार्यवादः।

5. कारणभावात्–कारणव्यापारात्प्रागपि कार्यं स्वकारणे सदिति सांख्यानां सत्कार्यवादः पुष्ट्येऽन्यतमोऽयं हेतुः। अत्रोच्यते कार्यस्य कारणात्मकत्वात्। नहि कारणाद्भिन्नं कार्यम्। कारणं च सत्, अतः कथं तदभिन्नं कार्यमसत् स्यात्? अत्र कार्यकारणाभेदसाधने चत्वारो हेतवः सांख्यतत्त्वकौमुद्याम्–

(क) न पटः तन्तुभ्यो भिद्यते तन्तुधर्मत्वात्।

(ख) उपादेयोपादानाभावाच्च नार्थान्तरत्वं तन्तुपटयोः।

(ग) संयोगाप्राप्त्यभावात् नार्थान्तरत्वं तन्तुपटयोः।

(घ) गुरुत्वान्तरकार्यग्रहणाच्च।

इत्थं सत्कारणात्मकं कार्यं सदेव, नो चेत्तिलेभ्यः यवाः, तन्तुभ्यो घटः उत्पद्यते। परन्तु न तथा दृश्यते। अतः कारणभावादित्यादिनापि सत्कार्यवादस्य सिद्धिः जायते।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—कः सत्कार्यवादः?
   उत्तरम्— सतः सज्जायते इति सांख्यानां वाद एव सत्कार्यवादः।
2. **प्रश्नः**— सत्कार्यवादस्य पक्षे उल्लिखितानि कारणानि?
   उत्तरम्—पञ्च।
3. **प्रश्नः**— सत्कार्यवादस्य कैः सन्ति पञ्च कारणैः?
   उत्तरम्—1. असदकरणात्, 2. उपादानग्रहणात्, 3. सर्वसम्भवाभावात्, 4. शक्तस्य शक्यकरणात्, 5. कारणभावात्।
4. **प्रश्नः**—असदकारणं किम्?
   उत्तरम्— कार्योत्पत्त्यभावः।
5. **प्रश्नः**— उपादानग्रहणात् केन सम्बन्धितः?
   उत्तरम्—सत्कार्यवादेन।
6. **प्रश्नः**—शक्तस्य शक्यकरणात् इति कः?
   उत्तरम्— सत्कार्यवादः।
7. **प्रश्नः**— सत्कार्यवादस्य कारणं नास्ति?
   उत्तरम्— असदकारणम्।
8. **प्रश्नः**—उपादानग्रहणम् इति कस्य कारणमस्ति?
   उत्तरम्—सत्कार्यवादस्य।
9. **प्रश्नः**—असदकरणादुपादानग्रहणात् किं भवति?
   उत्तरम्— सत्कार्यवादः।

10. **प्रश्नः**—बालुकेभ्यः तैलम् इति कस्य उदाहरणम्?
    उत्तरम्— असदकारणस्य।
11. **प्रश्नः**—मृत्तिकया घटादिकम् इति कस्य उदाहरणम्?
    उत्तरम्— उपादानकारणस्य।
12. **प्रश्नः**— सत्कार्यस्य सिद्धान्तः कस्य दर्शनस्य?
    उत्तरम्— सांख्यदर्शनस्य।
13. **प्रश्नः**—'सत्कार्यवाद' इत्यस्य समर्थने कति उल्लिखित-कारणानि?
    उत्तरम्— (5) पञ्च।
14. **प्रश्नः**— उपादान-ग्रहणस्य कारणं किम्?
    उत्तरम्— सत्कार्यवादः।
15. **प्रश्नः**— 'सत्कार्यवाद' इत्यस्य कारणं किम्?
    उत्तरम्— सर्वसम्भवाभावम्।
16. **प्रश्नः**— परिणामवादस्य कः पोषकः?
    उत्तरम्— सांख्याचार्यः कपिलः।
18. **प्रश्नः**— कपिलमुनेः माता का आसीत्?
    उत्तरम्— देवहूतिः।
19. **प्रश्नः**— कपिलमुनेः पिता कः आसीत्?
    उत्तरम्— कर्दम ऋषिः।
20. **प्रश्नः**—सांख्यतत्त्वकौमुद्यां कार्यकारणभेदसाधने कति हेतवः?
    उत्तरम्— चत्वारः।

(च) प्रकृतिपुरुषपरिचयः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

1. पुरुषपरिचयः–सांख्यदर्शने पञ्चविंशतितत्त्वेषु एक एव चेतनः पुरुषः न प्रकृतिः अनुत्पादकत्वात्; न च विकृतिः अनुत्पन्नत्वात्, अतः अनुभयरूपोऽयं पुरुषः **न प्रकृतिर्न विकृतिरिति**। पुरुषोऽयं नित्यः, व्यापकः, अक्रियः, अनाश्रितः, अत्रिगुणः, विवेकवान्, अविषयः, असामान्यः, अप्रसवधर्मी, भोक्ता ज्ञपदवाच्यश्च। चतुर्विंशतितत्त्वानां संघातत्वात्, संघातपरार्थत्वेन त्रैगुण्यादिधर्माणां विपर्ययात्तेन, सुखदुःखादीनामधिष्ठानेन चतुर्विंशतितत्त्वानां भोक्तारूपेण कैवल्यार्थ-प्रवृत्तिहेतुत्वेन च पुरुषस्य सत्ता सिद्ध्यति।

निरवयवः स्वतंत्रश्चायं पुरुषः क्वचिन्न लीयते। जननमरणकरणानां प्रतिनियमात्, अयुगपत्प्रवृत्तेः, त्रैगुण्यविपर्ययाच्च पुरुषस्य बहुत्वं स्वीक्रियते।

2. पुरुषसिद्धिः–पुरुषसिद्धये पञ्चहेतवः सांख्ये प्रस्तूयन्ते, तद्यथा–

1. संघातपरार्थत्वात्– अव्यक्तमहदादयः, प्रकृतिश्चेति चतुर्विंशतितत्त्वानि संघातत्वात् परार्थभूतानि, यथा शयनासनादयो संघाताः शरीरार्थाः, एवमेव चतुर्विंशतितत्त्वानां असंघातरूपः पुरुषः।

2. त्रिगुणादिविपर्ययात्–गुणत्रयं सत्त्वरजस्तमांसि संघातेष्वेव तिष्ठन्ति। त्रिगुणमविवेकिविषयेत्यादि कारिका-प्रमाणात्। अतः गुणत्रयस्य रहितत्वात् पुरुषास्तित्वं साध्यते।

3. अधिष्ठानात्–चतुर्विंशतिजडपदार्थाः चेतनेन अधिष्ठिताः सन्तः कार्यक्षमाः भवन्ति। अतः अधिष्ठातारूपः पुरुषः।

4. भोक्तृभावात्–सुखदुःखमोहात्मकत्वात् प्रकृत्यादि-महाभूतपर्यन्तं भोग्यं, तस्य भोक्ता कश्चन भवेत्, अतः भोक्तैव पुरुषः।

5. कैवल्यार्थं प्रवृत्तेश्च–लोकव्याप्तस्य दुःखत्रयस्य आत्यन्तिकनिवृत्त्या कैवल्यार्थः प्रवृत्तिः चेतने एव सम्भवति, अतः कैवल्यार्थं प्रवृत्तेश्च पुरुषोऽस्ति।

इत्थं सांख्यकारिकायां संकलितमेतत्–

संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च॥

3. पुरुषबहुत्वम्–सांख्यदर्शने चेतनजीवात्मपुरुषस्य बहुत्वप्रतिपादने त्रयो हेतवः प्रदीयन्ते–

1. जननमरणकरणाणां प्रतिनियमात्–पुरुषस्यैकत्वे सति एकस्य म्रियमाणे जन्मनि अन्धे बधिरे सति सर्वे तथावत् स्युः, परन्तु व्यवहारे प्रतिशरीरे भिन्नत्वात् पुरुषबहुत्वमिति प्रथमो हेतुः।

2. अयुगपत्प्रवृत्तेः– धर्माधर्मादिषु पुरुषाणां प्रवृत्तिः अयुगपत् अर्थात् भिन्ना दृश्यते, यदि एक एव पुरुषस्तदा समा प्रवृत्तिः स्यात्, अतः सुखदुःखधर्माधर्म-द्वन्द्वानामयुगपत्प्रवृत्त्या पुरुषबहुत्वमिति द्वितीयो हेतुः।

3. त्रैगुण्यादिविपर्ययात्–सत्त्वरजस्तमसां न्यूनाधिक्येन भिन्न-भिन्नव्यवहाराः स्थितयश्च दृश्यन्ते, अतः त्रैगुण्यादिविपर्ययादपि पुरुषबहुत्वमिति सिद्धम्। अत एव संकलितं सांख्यकारिकायाम्–

जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यादिविपर्ययाच्चैव।।

2. प्रकृतिपरिचयः–सांख्यदर्शने त्रयोविंशतिमहदादितत्त्वानामुत्पादिकेयं विकृतिरूपा मूलप्रकृतिः अव्यक्ता अचेतना पुरुषस्य विषयभोग्यभूता प्रसवधर्मिणी गुणैरभिद्यमाना जडात्मिका प्रकृतिर्नाम सत्त्वरजस्तमसां साम्यावस्था। तद्यथा–**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि व्यक्तं तथा प्रधानम्।**

महादादिकार्यं दृष्ट्वा न हि कारणाद् भिन्नं कार्यमिति सिद्धान्तेन (अतिसूक्ष्मरूपेण) अप्रत्यक्षरूपेण बीजरूपा प्रकृतिरिति अनुमीयते। अतः भेदानां परिमाणात्, समन्वयात्, शक्तितः प्रवृत्तिकारणात् कारणकार्यविभागात्, तिरोभावकाले च अविभागात् प्रकृतिरस्तीति निश्चीयते।

प्रकृतिपुरुषसम्बद्धा कारिका:–व्यक्ताव्यक्तज्ञधर्माः–

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्।।
(सां.का-11)

व्यक्ताव्यक्ते अविवेकित्वधर्मसिद्धिः–

अविवेक्यादेः सिद्धिस्त्रैगुण्यात् तद्विपर्ययाभावात्।
कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम्।।
(सां.का-14)

अव्यक्तसिद्धिः–

भेदानां परिमाणात्, समन्वयात् शक्तितः प्रवृत्तेश्च।
कारणकार्यविभागादविभागाद् वैश्वरूप्यस्य।।
(सां.का-15)

प्रकृतिपरिणामम्–

कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च।
परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात्।।
(सां.का-16)

पुरुषसिद्धिः–

संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च।।
(सां.का-17)

पुरुषबहुत्वम्–

जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव।।
(सां.का-18)

पुरुषधर्माः–

तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च।।
(सां.का-19)

पुरुषस्य गौणत्वम्–

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।
गुणकर्तृत्वेऽपि तथा कर्त्तेव भवत्युदासीनः।।
(सां.का-20)

प्रकृतिपुरुषसंयोगकारणम्–

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।
(सां.का-21)

दुःखोच्छेदोपायजिज्ञासा–

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात्।।
(सां.का-1)

वास्तविकदुःखोच्छेदः–

दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्।।
(सां.का-2)

सांख्ये त्रिविधप्रमाणानि–

दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि।।
(सां.का-3)

प्रमाणलक्षणम्–

प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्।
तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु।।
(सां.का-5)

सामान्यात्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानतः।
तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धम्।।
(सां.का-6)

प्रत्यक्षबाधाः–

अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्।
सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च।।
(सां.का-7)

प्रकृतिप्रत्यक्षविघटकः (तत्कार्यञ्च)–

सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धेः।
महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च।।
(सां.का-8)

व्यक्ताव्यक्तभिन्नधर्माः–

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिंगम्।
सावयवं परतंत्रं व्यक्तं विपरीतमव्यक्तम्।।
(सां.का-10)

गणत्रयस्वरूपम्–

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।
अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः।।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—प्रकृतिः का?
   उत्तरम्— जड़म्।
2. **प्रश्नः**—कैवल्यं कः प्राप्नोति?
   उत्तरम्— पुरुषः।
3. **प्रश्नः**—पुरुषस्य किं लक्षणम्?
   उत्तरम्— विवेकी।
4. **प्रश्नः**—पुरुषः कः?
   उत्तरम्— ज्ञः।
5. **प्रश्नः**—प्रधानं किम्?
   उत्तरम्— प्रकृतिः।
6. **प्रश्नः**—प्रकृतेः विकृतिः किम्?
   उत्तरम्— महान्।
7. **प्रश्नः**—प्रकृतेः लक्षणम्?
   उत्तरम्— त्रिगुणम्।
8. **प्रश्नः**—अविकृतिः किम्?
   उत्तरम्— प्रधानम्।
9. **प्रश्नः**—पुरुषः कः वर्तते?
   उत्तरम्— द्रष्टा।
10. **प्रश्नः**—न प्रकृतिः न विकृतिः कोऽस्ति?
   उत्तरम्— पुरुषः।
11. **प्रश्नः**—प्रकृतिपुरुषयोः संयोगः कीदृशो भवति?
   उत्तरम्— पङ्ग्वन्धवत्।
12. **प्रश्नः**—जननमरणकरणानां प्रतिनियमात् किं भवति?
   उत्तरम्— पुरुषबहुत्वसिद्धिः।
13. **प्रश्नः**—प्रकृतेः प्राप्तौ बाधकतत्त्वं किमस्ति?
   उत्तरम्— सूक्ष्मता।
14. **प्रश्नः**—दुःखं कतिधा भवति?
   उत्तरम्— त्रैविध्यं (आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकञ्च)।
15. **प्रश्नः**—मुक्तिः कतिधा भवति?
   उत्तरम्— द्विविधा (जीवन्मुक्तिः, विदेहमुक्तिः)।
16. **प्रश्नः**—यद्वा ता तदुच्छिनत्ति पुरुषार्थः इति कस्य कथनं वर्तते?
   उत्तरम्— गौतमस्य।

(छ) ईश्वरानीश्वरवादयोस्तुलना, उपयोगितावादास्तित्ववादयोस्तुलना, भौतिकवादमानवतावादयोस्तुलना एवं वस्तुनिष्ठप्रश्नोत्तराणि

(क) ईश्वरानीश्वरवादयोस्तुलना- (अ) ईश्वरवादः–
(ब) अनीश्वरवादः–

ईश्वरसत्तामधिकृत्य प्रचलितो वादः ईश्वरवादः। वैदिकदर्शनेषु ईश्वरसत्तां स्वीकर्त्तारः न्यायवैशेषिकसांख्ययोगवेदान्तदार्शनिकाः ईश्वरवादिनः (पाश्चात्येषु अस्तित्ववादिनः आदर्शवादिनश्च)।

1. न्यायदर्शने–कार्ययोजनधृत्यादेरित्यादिना अनुमानप्रमाणेन जगत्कर्तारूपेण ईश्वरसत्ता स्वीक्रियते।
2. योगदर्शने–पुरुषविशेषः ईश्वर एव अन्तरायरूपान् क्लेशान् परिहृत्य समाधिं सम्बोधयति। योगसूत्रे हि–**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः।**

3. वेदान्तिनोऽपि परब्रह्म एव ईश्वरः। स निर्गुणं निराकारश्च।
4. भगवत्पादशङ्कराचार्येणापि शांकरभाष्ये सांख्यदर्शनेऽपि प्रधानपुरुषेश्वरा इति गदितम्।

प्रायशः सर्वे ईश्वरवादिनः ईश्वरः सर्वगुणब्रह्म सर्वज्ञः स्वतंत्रः सर्वव्यापकः अन्तर्यामी जगत्कर्त्तापालकसंहारकः नित्यः क्लेशरहितः वासनाभ्यः मुक्तः सच्चिदानन्दरूपः इत्यामनन्ति।

(अ) ईश्वरवादः– अस्मिन् विषये उदयनः न्यायकुसुमाञ्जलिग्रन्थे कथयति–

कार्ययोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।
वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः॥
(न्या.कु.)

आचार्यशङ्करेणापि ब्रह्मसूत्रम्/शाङ्करभाष्ये कथितम्–

केचित्तावत् सांख्ययोगव्यपाश्रयाः कल्पयन्ति प्रधान-पुरुषयोरधिष्ठता केवलं निमित्तकारणमीश्वर इतरेतरविलक्षणाः प्रधानपुरुषेश्वराः। (ब्र.शा.भा-2/2/37)

(ब) अनीश्वरवादः–ईश्वरसत्तामनधिकृत्य प्रचलितो वादः अनीश्वरवादः। भारतीयदर्शनेषु ईश्वरसत्तामस्वीकर्तारः चार्वाकबौद्धजैनमीमांसादार्शनिकाः पाश्चात्येषु च अस्तित्ववादशौ विहाय प्रायशः सर्वे अनीश्वरवादिनः।

1. चार्वाकमते हि स्वभावतया भौतिकपदार्थेभ्यो जगदुत्पत्तिः तस्मादनुमानेन ईश्वरसिद्धिः वाग्जालमेव।
2. जैनाः अपि ईश्वरसत्तां अस्वीकृत्य तीर्थङ्कराणां सत्तां स्वीकुर्वन्ति।
3. बौद्धाः अपि कार्यकारणशृंखलाबद्धेऽस्मिन् जगति ईश्वरः भ्रामकः इत्यामनन्ति।
4. मीमांसकाः अपि वेदानामपौरुषेयत्वेनेश्वरसत्तां नाङ्गीकुर्वन्ति। अनीश्वरवादिनां मते इन्द्रियैरज्ञातत्वात् प्रत्यक्षेण, लिङ्गसाध्ययोः सामानाधिकरण्यादिभावात् उपमानेन अन्योन्याश्रयदोषाच्च शब्दप्रमाणेन ईश्वरसाधयितुं न शक्यते। अतः ईश्वरः भ्रामकः कल्पनामूलक एव।

(ख) उपयोगितावादास्तित्त्ववादयोस्तुलना– (क) उपयोगितावादः– (ख) अस्तित्ववादः–

(क) उपयोगितावादः–आनन्दोत्पादकानि कर्माण्येवोचितानि दुःखोत्पादकान्यनुचितानीति उपयोगितायाः पूर्वानन्दस्य च वादः उपयोगितावादः।

जॉन स्टुअर्ट मिल् जरमी वेन्थं हेनरीसिज्विकादिभिः पाश्चात्यदार्शनिकैः प्रतिपादितेऽस्मिन् नैतिके सुखवादे आनन्दप्राप्तिरेव मनुष्यस्य परमलक्ष्यम्। तदानन्दं मनोवैज्ञानिकतया पुरुषैकगतत्वेऽपि नैतिकत्वेन जातिसाध्यम्। अतः सर्वसुखदायकं कर्म एव नैतिकमिति सिद्धान्तः। अस्मिन् वादे सुखस्य संख्यात्मकगुणात्मकञ्चेति। अत्र मिलमहोदयेन भेदद्वयं विहितं, तत्र तीव्रशारीरिकसुखापेक्षया स्वल्प-बौद्धिकसुखमुत्कृष्टत्वम्। निष्कर्षरूपेण फलितमित्थम् **"अधिकाधिकसंख्यया अधिकाधिकसुखप्राप्तिः"** एव परमलक्ष्यमिति।

(Greatest happiness of gretest numbers) A

(ख) अस्तित्ववादः–अस्तित्वं नाम सत्ता विद्यमानता वा। अतः येन वादेन मानवस्य स्वातंत्र्यं अस्तित्वं व्यक्तित्त्वञ्च प्रतिपाद्यते। अस्मिन् वादे मानवमनसः नैराश्याभाव-निवृत्त्यर्थमेवास्य वादस्य प्रवृत्तिः।

कीकेगार्डनीत्सेजासपर्समार्शेलहार्डडेगरसात्रादिभिः पाश्चात्यदार्शनिकैः प्रतिपादितेऽस्मिन् वादे प्रकृति-विश्वादीनामपेक्षया पुरुषस्य मनसा वाचा कर्मणा स्वतंत्रतायाः, ज्ञानापेक्षया प्रयोगात्मकपद्धत्याः च प्राधान्यं स्वीकृतम्। वादानुसारेण संवेदनात्मकनैतिकधार्मिकञ्चेति त्रिभिस्स्तरैः प्रवृत्तः सन् मनुष्यः स्वकीयं स्वतोन्मुखं भौतिकं सामाजिकं धार्मिकञ्च विकासमेष्यति, अतः डॉ.इ.एल.एलेन मतानुसारं अस्तित्ववादः द्रष्टुः स्थाने कर्तुः स्थित्या दार्शनिकचिन्तनस्य प्रयासोऽस्ति। वादानुसारेण सत्यं न वस्तुनिष्ठमपितु आत्मनिष्ठम्, तद्यथा–

(I dont knno truth except ut became Lufe in me) सोरेनकीर्केगार्डः। प्रमुखाः ग्रन्थाः–1. Philosophical Freagimebts.2- The European spuit.A

(ग) भौतिकवाद-मानवतावादयोः तुलना– (क) भौतिकवादः, (ख) मानवतावादः–

(क) भौतिकवादः–भूतानामिदं भौतिकम्। अतः यः वादः भूतानां सत्तामाधारीकृत्य प्रवर्तते स भौतिकवादः। अस्मिन् वादे भौतिकसुखमेव परमलक्ष्यम्। चार्वाकप्रतिपादितोऽयं वादः प्रायशः सर्वेषां पाश्चात्यदर्शनानां धरातलरूपः। भौतिकवादिनां मतमिदं यत्–

1. देह एव आत्मा, परमात्मा-ईश्वरयन्त्राणां कापि सत्ता

नास्ति, सर्वं वाग्जालमेव। 2. प्रत्यक्षवस्तु एव प्रमाणम्। 3. शरीरं नष्टशीलम्, नष्टे सति तस्य पुनरागमनं न संभवत्यतः "यावज्जीवेत् सुखं जीवेदृणं कृत्वा घृतं पिबेत्"। 4. अर्थकामौ द्वावेव पुरुषार्थौ।

इत्थं स्वभोगलिप्सातृप्तिरेवास्य वादस्य ध्येयम्।

(ख) मानवतावादः–यः वादः मानवं केन्द्रीकृत्य प्रवर्तते स वादः मानवतावादः। प्राचीनकालादेव प्रोटेगोर-ससाफिस्टप्लेटोसुकरातप्रभृतिभिः यूनानीयदार्शनिकैः प्रतिपादितस्यास्य वादस्य सिद्धान्ताः–

1. मनुष्य एव सर्वेषां वस्तूनां मापदण्डः। (Man to the measulus rod of all things) अतः तस्य शक्तेः कार्याणां लौकिककांक्षाणां बौद्धिकाध्यात्मिकमूल्याणाञ्च विशिष्टं महत्त्वमस्ति।

2. मानवानां रक्षा प्रगतिश्च महत्त्वपूर्णा। अतः या नीतिः मानवानुपयोगी सा निरर्थिका।

3. देशराष्ट्रजातिलिङ्गधर्मादिभिः मानवाः समानाः, अतः विश्वनागरिकतायाः पोषकोऽयं सिद्धान्तः।

इत्थं मानवतावादः एकः मनोभावः यः भौतिकमानसिकाध्यात्मिकसांस्कृतिकमूल्यानां प्रतिपादकः।

यच्चापि लौकिकं वस्तु संस्थां आचारपद्धतिः।
भावैः संप्रेरितस्यैव मानवस्येह सा कृतिः॥

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—ईश्वरवादस्य किं लक्षणम्?
उत्तरम्—ईश्वरसत्तामधिकृत्य प्रचलितो वादः ईश्वरवादः।
2. **प्रश्नः**—अनीश्वरवादस्य किं लक्षणम्?
उत्तरम्— ईश्वरसत्तामनधिकृत्य प्रचलितो वादः अनीश्वरवादः।
3. **प्रश्नः**—चार्वाकमते जगदुत्पत्तेः कारणं किम्?
उत्तरम्— स्वभावतया भौतिकपदार्थेभ्यो जगदुत्पत्तिः।
4. **प्रश्नः**—जैनाः कस्य सत्तां स्वीकुर्वन्ति?
उत्तरम्— ईश्वरसतां अस्वीकृत्य तीर्थङ्कराणां सत्तां स्वीकुर्वन्ति।
5. **प्रश्नः**—बौद्धाः कस्य सत्तां स्वीकुर्वन्ति?
उत्तरम्— कार्यकारणशृंखलाबद्धेऽस्मिन् जगति ईश्वरः भ्रामकः इत्यामनन्ति।
6. **प्रश्नः**—मीमांसकाः कस्य सत्तां स्वीकुर्वन्ति?
उत्तरम्— वेदानामपौरुषेयत्वेनेश्वरसत्तां नाङ्गीकुर्वन्ति।
7. **प्रश्नः**—कः उपयोगितावादः?
उत्तरम्—आनन्दोत्पादकानि कर्माण्येवोचितानि दुःखोत्पादकान्यनुचितानीति उपयोगितायाः पूर्वानन्दस्य च वादः।
8. **प्रश्नः**—उपयोगितावादस्य प्रवर्तकेषु के प्रमुखाः?
उत्तरम्— जॉन स्टुअर्ट मिल् जरमी वेन्थं हेनरीसिज्विक् प्रमुखाः।
9. **प्रश्नः**—'स्वल्पबौद्धिकसुखमुत्कृष्टत्वम्' इति कः स्वीकरोति?
उत्तरम्— जे.एस.मिल् महोदयः।
10. **प्रश्नः**—उपयोगितावादस्य सिद्धान्तं किम्?
उत्तरम्—(Greatest happiness of gretest numbers)।
अधिकाधिकसंख्यया अधिकाधिकसुखप्राप्तिः।
11. **प्रश्नः**—अस्तित्ववादस्य किं लक्षणम्?
उत्तरम्— अस्तित्वं नाम सत्ता विद्यमानता वा।
12. **प्रश्नः**—"मानवस्य स्वातंत्र्यं अस्तित्वं व्यक्तित्वञ्च" इति केन प्रतिपाद्यते?
उत्तरम्—अस्तित्ववादेन।
13. **प्रश्नः**—"अस्तित्ववादः द्रष्टुः स्थाने कर्तुः स्थित्या दार्शनिकचिन्तनम्।" इति कस्य मतम्?
उत्तरम्— डॉ.इ.एल.एलेन महोदयस्य मतम्।
14. **प्रश्नः**—"सत्यं न वस्तुनिष्ठमपितु आत्मनिष्ठम्" इति कः स्वीकरोति?
उत्तरम्— सोरेन कीर्केगार्डः।
15. **प्रश्नः**—सोरेन महोदयस्य सिद्धान्तः कः?
उत्तरम्— सत्यमेव ईश्वरः।
16. **प्रश्नः**—अस्तित्ववादी फलवादी (Existential Peagmatist) इति कस्य सिद्धान्तः?
उत्तरम्— सोरेनस्य।
17. **प्रश्नः**—सोरेन महोदयस्य अस्तित्ववादोपरि कः सिद्धान्तः?
उत्तरम्—आध्यात्मिक-फलवादः (Spirituai Peagmatist)।

18. **प्रश्नः**—भौतिकवादः कः?
उत्तरम्—भूतानामिदं भौतिकम्।

19. **प्रश्नः**—भौतिकसुखमेव परमलक्ष्यम् इति कस्य वादस्य सिद्धान्तः?
उत्तरम्— भौतिकवादस्य।

20. **प्रश्नः**—चार्वाकप्रतिपादितो वादः कः?
उत्तरम्— भौतिकवादः।

21. **प्रश्नः**—प्रत्यक्षवस्तु एव प्रमाणम् इति केन मन्यते?
उत्तरम्— भौतिकवादेन।

22. **प्रश्नः**—"यावज्जीवेत् सुखं जीवेदृणं कृत्वा घृतं पिवेत्" इति कस्य विचारः?
उत्तरम्— चार्वाकस्य।

23. **प्रश्नः**—अर्थकामौ द्वावेव पुरुषार्थौ इति कस्य ध्येयं वर्तते?
उत्तरम्— भौतिकवादस्य।

24. **प्रश्नः**—मानवमेव केन्द्रस्थानत्वम् इति कः स्वीकरोति?
उत्तरम्— मानवतावादी।

25. **प्रश्नः**—मानवतावादी यूनानीयदार्शनिकैः प्रतिपादित-सिद्धान्तः कः?
उत्तरम्— मनुष्य एव सर्वेषां वस्तूनां मापदण्डः। (Man to the measuring rod of all things)

26. **प्रश्नः**—विश्वनागरिकतायाः पोषक-सिद्धान्तः कः?
उत्तरम्—देशराष्ट्रजातिलिङ्गधर्मादिभिः मानवाः समानाः।

27. **प्रश्नः**—भौतिकमानसिकाध्यात्मिकसांस्कृतिकमूल्यानां प्रतिपादकः कः?
उत्तरम्— मानवतावादः।

(ज) मीमांसा वेदानामपौरुषेयत्वम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

सांख्य-वेदान्त-मीमांसानाञ्च मतेन वेदाः अपौरुषेयाः सन्ति। नित्यत्वञ्च तेषां दर्शनानीमानि स्वीकुर्वन्ति। तेषां मतमिदं यद् ऋषयो वैदिकमन्त्राणां द्रष्टारः सन्ति न च कर्त्तारः। अलौकिकसामर्थ्यशालिन ऋषयो दिव्यया प्रतिभया मन्त्राणां दर्शनं लब्धवन्तस्तेषां प्रकाशस्तद्धियि अयततार। 'ऋषि' इत्येतस्य पदस्य व्युत्पत्तिलभ्यः-**ऋषति-पश्यति इति ऋषिः; तन्त्रद्रष्ट्य** इति। परं न्यायवैशेषिकयोर्मतेन वेदाः पौरुषेया नित्याश्च सन्ति। मनुः वेदान् नित्यान् अपौरुषेयांश्च मन्यते। यथा–

पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्।
अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः॥

मीमांसा नेश्वरे विश्वसिति तद्दृष्ट्या नेश्वरो जगतः कर्ता न च तस्य संहर्ता। जगत्तु नित्यम्। वेदाश्च न सन्ति ईश्वरकर्तृकाः। अर्थात् पौरुषेयवाक्यं यस्य कर्ता कोऽपि पुरुषः भवति। अपौरुषेयवाक्यं यस्य कर्ता कोऽपि पुरुषो न भवति। अस्माकं भवतां वचनं पौरुषेयवाक्यं वर्तते, परं वेदवाक्यं अपौरुषेयं विद्यते। वेदस्य नित्यतायाः प्रमाणं वर्तते शब्दस्य अनित्यता। दार्शनिकदृष्ट्या मीमांसकानां **शब्द- नित्यतावादः** अतिमहत्त्वपूर्णा कल्पना वर्तते।

वेदानामपौरुषेयत्वमधिकृत्य तदभिधानमिदम्–वर्णो नित्यः। श्रूयमाणो ध्वनिः, केवलं तदभिव्यक्तिः। श्रुतो वा उच्चरितो ध्वनिः यदि याथार्थ्येन शब्दः स्यात् तदैकस्यैव शब्दस्य दशकृत्वमुच्चारितत्वात् स एक एव शब्दो दशशब्दानुभूतिजनक इत्येतदङ्गीकरणीयं भवेत्। अर्थेन सममेव शब्दस्य स्वाभाविकः सम्बन्धः। शब्दार्थयोर्मध्ये समवाय-सम्बन्धः। मीमांसासूत्रे प्रोक्तम्–**औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः**। वेदस्य नित्यशब्दसमूहात्मकत्वात् तस्य नित्यत्वं सिद्ध्यति। नित्यत्वाच्च तस्य, तस्यापौरुषेयत्वमपि सिद्धं भवति। न च ऋषयोऽपि वेद-कर्तारस्ते तु वैदिकमन्त्राणां द्रष्टारो व्याख्यातारो भिन्न-भिन्नवैदिकसम्प्रदायप्रवर्तयितारश्च सन्ति। अतः वेदस्य अपौरुषेयत्वमेव प्रमाणीभवति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—सांख्य-वेदान्त-मीमांसकानाञ्च मते वेदाः अपौरुषेयाः पौरुषेयाः वा?
उत्तरम्— अपौरुषेयाः।

2. **प्रश्नः**— न्यायवैशेषिकयोर्मते वेदाः पौरुषेया अपौरुषेयाः वा?
उत्तरम्— पौरुषेयाः।

3. **प्रश्नः**— वेदाः नित्या-अनित्या वा?
उत्तरम्— नित्या।

4. **प्रश्नः**— ऋषयो वैदिकमन्त्राणां द्रष्टारः कर्त्तारो वा सन्ति?
उत्तरम्— द्रष्टारः।

5. **प्रश्नः**— 'ऋषि' इत्येतस्य पदस्य का व्युत्पत्तिः?
उत्तरम्— ऋषति-पश्यति इति ऋषिः।

6. **प्रश्नः**— के दार्शनिकाः ईश्वरस्य सत्तां न मन्यन्ते?
उत्तरम्— मीमांसकादि।

7. **प्रश्नः**— वेदस्य नित्यतायाः किं प्रमाणम्?
उत्तरम्— शब्दस्य अनित्यता।

8. **प्रश्नः**— "शब्दनित्यतावादः" कस्या विशिष्ट-महत्वपूर्णाः कल्पना वर्तते?
उत्तरम्— मीमांसकानाम्।

9. **प्रश्नः**— कर्णौ श्राविता-ध्वनिः अनित्यः इति के मन्यन्ते?
उत्तरम्— मीमांसकाः।

10. **प्रश्नः**— उच्चारणक्रिया शब्दं किं करोति?
उत्तरम्— रूपस्य आविर्भावम्।

11. **प्रश्नः**— नित्यशब्दसमूहात्मकः कः?
उत्तरम्— वेदः।

12. **प्रश्नः**— मीमांसकमते शब्दः नित्यः अनित्यो वा?
उत्तरम्— नित्यः।

13. **प्रश्नः**— मीमांसकः स्फोटवादं मन्यते न वा?
उत्तरम्— न मन्यते।

14. **प्रश्नः**— मनुः वेदान् किं मन्यते।
उत्तरम्— नित्यान् अपौरुषेयांश्च।

15. **प्रश्नः**— धर्मस्य प्रतिपादनं कः करोति?
उत्तरम्— अपौरुषेय-वेदः।

16. **प्रश्नः**— लौकिकज्ञानाय किं प्रमाणम्?
उत्तरम्— आप्तपुरुषस्य कथनम्।

17. **प्रश्नः**— मीमांसायाः कौ द्वौ प्रकारौ?
उत्तरम्— 1. कर्ममीमांसा, 2. ज्ञानमीमांसा।

18. **प्रश्नः**— मीमांसादर्शनं कस्य अस्ति?
उत्तरम्— जैमिनेः।

19. **प्रश्नः**— मीमांसा-दर्शने के सन्ति नव विशेषगुणाः?
उत्तरम्—1. सुखम्, 2. दुःखम्, 3. इच्छा, 4. प्रयत्नः, 5. द्वेषः, 6. धर्मः, 7. अधर्मः, 8. संस्कारः, 9. बुद्धिः।

20. **प्रश्नः**— 'मीमांसा'दर्शनस्य कानि उद्देश्यानि सन्ति?
उत्तरम्— धार्मिक-कर्मस्य प्रवृत्तिः।

21. **प्रश्नः**—वेदस्याऽपौरुषेयत्वम् केन दर्शनेन सिध्यति?
उत्तरम्— मीमांसादर्शनेन।

22. **प्रश्नः**— जैमिनीयमीमांसासूत्रे कति अध्यायाः कति सूत्राणि च सन्ति?
उत्तरम्— 12अध्यायाः, 2, 644 सूत्राणि।

23. **प्रश्नः**—'सर्वाणि ज्ञानानि यथार्थानि' इति कस्य मतम्?
उत्तरम्— प्रभाकरस्य।

24. **प्रश्नः**— शब्दस्य कौ द्वौ भेदौ?
उत्तरम्— 1. पौरुषेयो लौकिकः, 2. अपौरुषेयो वैदिकः।

25. **प्रश्नः**— मीमांसायाः कति सम्प्रदायाः के च ते?
उत्तरम्— द्वौ, 1. भाट्टसम्प्रदायः 'तौतातिक मतं, (कुमारिलभट्ट)' 2. मिश्रसम्प्रदायः गुरुमतं (प्रभाकरमिश्र)।

26. **प्रश्नः**— पूर्वमीमांसायाः प्रवर्तकः कः?
उत्तरम्— महर्षिजैमिनिः।

27. **प्रश्नः**— मीमांसादर्शने कति अध्यायाः?
उत्तरम्— 12 द्वादश।

28. **प्रश्नः**— अपौरुषेयवाक्यस्य के पञ्चभेदाः?
उत्तरम्— 1. विधिः, 2. मन्त्रः, 3. नामधेयः, 4. निषेधः, 5. अर्थवादः।

29. **प्रश्नः**— मीमांसासूत्रस्य लेखकः कः?
उत्तरम्— महर्षिजैमिनिः।

(झ) विधिविमर्शः एवं वस्तुनिष्ठप्रश्नोत्तराणि

अपौरुषेयवाक्यस्य पञ्चभेदेषु विधिविमर्शोऽपि एकः। **"स्वर्गकामो यजेत"** स्वर्गकामनया पुरुषाः यज्ञं कुर्वन्तु, तत्सदृशप्रवर्तनागर्भितवाक्यान् विधिः पदेन गृह्यन्ते। वेदस्य तात्पर्यं तु विधिवाक्येषु एव दृश्यते। अन्यचत्वारो विषयाः तस्य केवल-अंगभूतो विद्यते। विधिविमर्शः मीमांसाहेतुः प्रधानविषयोऽस्ति। विधिः इत्यस्य चत्वारो भेदाः सन्ति। कर्मस्य स्वरूपमात्रबोधनार्थको विधिः **"उत्पत्तिविधिः"**, अंगमेवं प्रधान-अनुष्ठानस्य सम्बन्धबोधकविधिः **"विनियोगविधिः"**, कर्मणा उत्पन्नफलस्य स्वामित्वविधिः **"अधिकारविधिः"**, प्रयोगस्य शीघ्रताबोधको विधिः **"प्रयोगविधिः"** इति कथ्यन्ते। विध्यर्थस्य निर्माणे सहायकाः श्रुतिः, लिङ्गं, वाक्यं, प्रकरणं स्थानं समाख्यानामकानि षट्प्रमाणानि मीमांसा स्वीकरोति। तैः विधिभिः निर्णीतः सिद्धान्तस्य उपयोगः हिन्दूस्मृतीनां व्याख्याने प्रधानरूपेण स्वीक्रियन्ते। मीमांसादर्शनस्य दृढमतो यत् वेदस्य तात्पर्यं विधायकं वा विधिवाक्येषु एव विद्यते, सिद्धार्थकवाक्येषु न। मीमांसकदृष्ट्या-**वेदविहितकर्मस्य अनुष्ठानमेव धर्मः**, वेदप्रतिपादितविषयवस्तूनि कर्मरूपो भवति, ज्ञानरूपो न भवति। ज्ञानस्यापि उपयोगस्तु कर्मप्रेरणम् एव वर्तते।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— अपौरुषेयवाक्यस्य के पञ्चभेदाः?
   उत्तरम्— 1. विधिः, 2. मन्त्रः, 3. नामधेयः, 4. निषेधः, 5. अर्थवादः।
2. **प्रश्नः**— "अथातो धर्मजिज्ञासा" सूत्रमिदं केन दर्शनेन सम्बद्धम्?
   उत्तरम्— जैमिनिदर्शनेन।
3. **प्रश्नः**— मीमांसादर्शने द्वितीयप्रकारकं वाक्यं किम्?
   उत्तरम्— यज्ञ-भाग-विधि-अनुष्ठानो वा।
4. **प्रश्नः**— मीमांसकाः वेदस्य तात्पर्यं केषु दृश्यन्ते?
   उत्तरम्— विधिवाक्येषु।
5. **प्रश्नः**— विधिविमर्शः प्रधानविषयः कस्य हेतोः वर्तते?
   उत्तरम्— मीमांसाहेतोः।
6. **प्रश्नः**—विधिः इत्यस्य कति भेदाः सन्ति?
   उत्तरम्— चत्वारो भेदाः।
7. **प्रश्नः**— कर्मस्य स्वरूपमात्र-बोधनार्थकविधिः कः?
   उत्तरम्— उत्पत्तिविधिः।
8. **प्रश्नः**— अंगमेव प्रधान-अनुष्ठानस्य सम्बन्धबोधको विधिः कः?
   उत्तरम्— विनियोगविधिः।
9. **प्रश्नः**— कर्मणा उत्पन्नफलस्य स्वामित्वविधिः कः?
   उत्तरम्— अधिकारविधिः।
10. **प्रश्नः**— प्रयोगस्य शीघ्रताबोधको विधिः कः?
    उत्तरम्— प्रयोगविधिः।
11. **प्रश्नः**—विध्यर्थस्य निर्माणे सहायकाः नामकानि षट्प्रमाणानि कानि सन्ति?
    उत्तरम्—श्रुतिः, लिङ्गं, वाक्यं, प्रकरणं, स्थानं, समाख्या।
12. **प्रश्नः**— मीमांसादर्शने विधायकवाक्यं किम्?
    उत्तरम्— स्वर्गकामो यजेत।
13. **प्रश्नः**— ब्रह्मस्वरूपपरिचायकसिद्धार्थवाक्यं किम्?
    उत्तरम्— सत्यं ज्ञानमनन्तं ब्रह्म।
14. **प्रश्नः**— मीमांसादर्शनस्य को विषयः?
    उत्तरम्— धर्मः।
15. **प्रश्नः**— मीमांसासम्प्रदायानुसारं मोक्षः केन प्राप्यते?
    उत्तरम्— कर्मणा।
16. **प्रश्नः**—भारतीयदर्शनसम्प्रदायेषु 'कर्म-संन्यासः' इत्यस्य पक्षधरः कः अस्ति?
    उत्तरम्— पूर्वमीमांसकः।
17. **प्रश्नः**— वेदप्रतिपादितविषयवस्तूनि कर्मरूपं ज्ञानरूपं वा?
    उत्तरम्— कर्मरूपम्।
18. **प्रश्नः**— व्यवहारवादिदर्शनं कोऽस्ति?
    उत्तरम्— मीमांसादर्शनम्।
19. **प्रश्नः**— ज्ञानस्य उपयोगः कुत्र भवति?
    उत्तरम्—कर्मप्रेरणे।

(ञ) अर्थवादः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

पदार्थस्य सत्यगुणस्य कथनमेव अर्थवादः। मीमांसा अर्थापत्तिप्रमाणमपि स्वीकरोति। मीमांसका अर्थापत्तेः प्रमाणत्वपक्षे बलीयसीयुक्तीरवतारयन्तो लभ्यन्ते। ते दृष्टार्थापत्तिः श्रुतार्थापत्तिः इत्येतद्भेदद्वयमर्थापत्तेः प्रतिपादयन्ति। यया दृष्टार्थः उपपन्नतां प्रपद्यते सा दृष्टार्थापत्तिः, यया च श्रुतार्थः उपपन्नतां प्रयाति सा श्रुतार्थापत्तिर्भवति। भावोऽयं यद् दृष्टार्थापत्त्या वस्तुन उपपत्त्यै अर्थान्तरं कल्प्यते-यथा पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र रात्रौ भुङ्क्ते इत्यस्यार्थान्तरस्य कल्पना क्रियते। श्रुतार्थापत्त्यां वस्तुन उपपत्त्यै शब्दान्तरं कल्प्यते; यथा 'पिधेहि' इत्येतत्पदं निशम्य 'द्वारमि'ति पदं कल्प्यते। अनुपपद्यमानार्थदर्शनात् तदुपपादकीभूतार्थान्तरकल्पनम् अर्थापत्तिरित्येतदर्थापत्तेर्लक्षणं प्रदर्शयन्तो मीमांसकविद्वांसः तस्याः प्रमाणान्तरेषु अन्तर्भावित्वं साधयन्ति बलवद् युक्तिसमुपस्थानपुरस्सरम्। अतः मीमांसकाः 'अर्थापत्तिम्' स्वतन्त्रप्रमाणं मन्यन्ते।

मानवस्य दैनिकजीवने अर्थापत्तेः उपयोगिता अत्यधिका वर्तते। कस्यचन विषयस्य अभावो येन ज्ञानविषयीक्रियते तदनुपलब्धिप्रमाणमिति कथ्यते। अत्र घटस्याभावोऽस्तीत्येतज्ज्ञानं केन प्रकारेण भवितुं शक्यम्, न तादृशं ज्ञानं प्रत्यक्षज्ञानमिति वक्तुं सुशकम्। अभावस्तु नैवंविधः पदार्थो य इन्द्रियैः प्राप्तव्यः स्यात्। घटस्तु चक्षुरिन्द्रियसन्निकृष्टो भवितुमर्हति परं घटाभावो न। घटाभावस्य ज्ञानमनुपलब्धिहेतोर्भवति। तस्मादनुपलब्धिः स्वतन्त्रं प्रमाणमस्ति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— पदार्थस्य सत्यगुणस्य कथनं किं कथ्यते?
   उत्तरम्— अर्थवादः।
2. **प्रश्नः**— अर्थापत्तिप्रमाणमपि कः स्वीकरोति?
   उत्तरम्— मीमांसकः।
3. **प्रश्नः**— अर्थापत्तेः कति भेदाः के च ते?
   उत्तरम्— दृष्टार्थापत्तिः श्रुतार्थापत्तिः इत्येतद्भेदद्वयम्।
4. **प्रश्नः**— मीमांसादृष्ट्या का दृष्टार्थापत्तिः?
   उत्तरम्— दृष्टार्थ उपपन्नतां प्रपद्यते सा दृष्टार्थापत्तिः।
5. **प्रश्नः**— मीमांसादृष्ट्या का श्रुतार्थापत्तिः?
   उत्तरम्— श्रुतार्थ उपपन्नतां प्रयाति सा श्रुतार्थापत्तिः।
6. **प्रश्नः**— दृष्टार्थापत्त्यां वस्तुन उपपत्त्यै किं कल्प्यते?
   उत्तरम्— अर्थान्तरम्।
7. **प्रश्नः**— श्रुतार्थापत्त्यां वस्तुन उपपत्त्यै किं कल्प्यते?
   उत्तरम्— शब्दान्तरम्।
8. **प्रश्नः**— वाक्यार्थज्ञाने कः सहायको भवति?
   उत्तरम्— अर्थापत्तिः।
9. **प्रश्नः**— मानवस्य दैनिकजीवने कस्या उपयोगिता अत्यधिका?
   उत्तरम्— अर्थापत्तेः।
10. **प्रश्नः**— अनुपलब्धिप्रमाणमिति किं कथ्यते।
    उत्तरम्— विषयस्य अभावो येन ज्ञानविषयीक्रियते।
11. **प्रश्नः**— घटाभावस्य ज्ञानं कस्य हेतोर्भवति?
    उत्तरम्— अनुपलब्धिहेतोः।

(ट) अभिहितान्वयवादः-अन्विताभिधानवादयोः विवेचनमेवं वस्तुनिष्ठप्रश्नोत्तराणि

अभिहितान्वयवादः एवं अन्विताभिधानवादविवेचनम्—

मीमांसा यज्ञादिवैदिक-अनुष्ठानानां तात्त्विक-विवेचनोपपत्त्यर्थं यान् सिद्धान्तानाविश्चकार ते परममहत्त्वशालिनः सन्ति। शब्दविषयकश्च तदीयः सिद्धान्तो भाषाशास्त्रदृष्ट्या कामपि अद्वितीयामेव महत्तां निदधाति। अभिधया एकैकं पदार्थं बोधयित्वा विरमात्, लक्षणायाश्च लक्ष्यार्थं बोधयित्वा विश्रामात् 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति न्यायात् पुनरुत्थानाऽसम्भवात् आकांक्षा-योग्यतासन्निधिवशात् पदार्थानां परस्परसम्बन्धे बुभुत्सिते अपदार्थोऽपि वाच्यादर्थविलक्षणशरीरः वाक्यार्थरूपः तात्पर्यार्थः अनुभवविषयो भवतीति भाट्टानां अभिहिता-न्वयवादिनां मतम्।

अन्विताभिधानवादिनः प्रभाकरमीमांसकस्य मते तु वाच्य एव वाक्यार्थः। तस्य अयमभिप्रायः-"देवदत्त! गामानय"

इत्यादि वृद्धप्रयुक्ते तादृशव्यक्तिसंचारे मध्यमवृद्धप्रवृत्तिं दृष्ट्वा बालोऽपि तस्य वाक्यस्य तदर्थबोधकतामनुमाय गाम् नय अथवा अश्वम् आनय इत्यन्यतरवाक्यप्रयोगाद् गवापसरणे अश्वानयने वा प्रवृत्तिं दृष्ट्वा अन्वयव्यतिरेकाभ्यां कारकपदस्य क्रियापदार्थान्विते कारके, क्रियापदस्य कारकपदार्थान्वितक्रियायां च शक्तिम् अवधारयति। ततश्च प्रयोगकाले तस्य बालस्य अभिमत एव अन्वितबुद्धिर्जायते। तेन अभिधया एव अन्वयबोधोत्पत्तौ किं तात्पर्यारूपवृत्त्यन्तरेण इति प्रभाकरमतानुयायिनां मतम्। इदमेव गुरुमतमिति कथ्यते।

साहित्यिका: अपि भाट्टमतमेव स्वीकुर्वन्ति। काव्यप्रकाशे-**इत्यभिहितान्वयवादिनां मतम्** इति बहुवचनेन, **इत्यन्विताभिधानवादिन:** इति च एकवचनेन ज्ञायते यत् काव्यप्रकाशकाराणां भाट्टमतमेव अभिमतम्।

कुमारिलस्य अभिहितान्वयवाद: प्रभाकरस्य च अन्विताभिधानवाद: शाब्दबोधनिरूपणाय परमोपकारी। बालमनोविज्ञानस्य तु दर्शनमिदं महान् निधिरेव। किन्नाम वाक्यमित्येतत्तु दर्शनमिदमेव बोधयति। वैदिकधर्मज्ञानाय मीमांसाध्येतव्यास्ति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्न:**— अन्विताभिधानवादी आचार्य: क:?
उत्तरम्— प्रभाकर:।

2. **प्रश्न:**— प्रभाकरमीमांसकस्य मते वाक्यार्थ: किम्?
उत्तरम्— वाच्य एव।

3. **प्रश्न:**— अभिहितान्वयवादस्य प्रवर्त्तक: क:?
उत्तरम्— कुमारिल:।

4. **प्रश्न:**— औचित्यसम्प्रदायस्य प्रवर्तक: आचार्य: क:?
उत्तरम्— क्षेमेन्द्र:।

5. **प्रश्न:**— औचित्यविचारचर्चा कस्य कृतिरस्ति?
उत्तरम्— क्षेमेन्द्रस्य।

6. **प्रश्न:**— मीमांसादर्शनानुसारेण शब्दो नित्योऽनित्यो वा?
उत्तरम्— शब्दो नित्य:।

7. **प्रश्न:**— साहित्यिका: कं मतं भाट्टमतमेव स्वीकुर्वन्ति?
उत्तरम्— भाट्टमतम्।

8. **प्रश्न:**— काव्यप्रकाशकार: कं मतं स्वीकरोति?
उत्तरम्— अभिहितान्वयवादिनां मतम्।

9. **प्रश्न:**— प्रभाकर: किं स्वीकरोति?
उत्तरम्— अख्यातिम्।

10. **प्रश्न:**— कुमारिलभट्टस्य कानि रचनाकार्याणि?
उत्तरम्— 1. श्लोकवार्तिकम्, 2. तन्त्रवार्तिकम्, 3. बृहट्टीका, 4. मध्य टीका।

11. **प्रश्न:**—यज्ञस्य क: समर्थनं करोति?
उत्तरम्— पूर्वमीमांसा।

12. **प्रश्न:**— विपरीतख्यातिवादस्य समर्थक: क:?
उत्तरम्— मीमांसा।

13. **प्रश्न:**— कर्ममीमांसाया: मतं कस्य वर्तते?
उत्तरम्— पूर्वमीमांसाया:।

14. **प्रश्न:**— अर्थापत्ति इत्यस्य कौ द्वौ भेदौ?
उत्तरम्— 1. दृष्टार्थापत्ति:, 2. श्रुतार्थापत्ति:।

15. **प्रश्न:**— कुमारिलभट्टस्य एकादश द्रव्याणि कानि?
उत्तरम्— 1. पृथ्वी, 2. जल, 3. अग्नि, 4. वायु, 5. आकाश, 6. दिक्, 7. काल, 8. आत्मा, 9. मन, 10. शब्द, 11. अन्धकार:।

16. **प्रश्न:**— कुमारिलभट्टस्य के पञ्चपदार्था:?
उत्तरम्— 1. द्रव्य, 2. गुण, 3. कर्म, 4. सामान्य, 5. अभाव:।

17. **प्रश्न:**— कुमारिलभट्टस्य सन्निकर्षविषये कौ द्वौ भेदौ?
उत्तरम्— 1. संयोग:, 2. संयुक्तसमवाय:।

18. **प्रश्न:**— प्रभाकरस्य सन्निकर्षविषये के त्रयो भेदा:?
उत्तरम्—1. संयोग:, 2. समवाय:, 3. संयुक्तसमवाय:।

19. **प्रश्न:**— 'साक्षात् प्रतीति: प्रत्यक्षम्' इति कस्य कथनम्?
उत्तरम्— प्रभाकरस्य।

20. **प्रश्न:**— पूर्वमीमांसायां प्रधानस्थानं कस्य अस्ति?
उत्तरम्— कर्मस्य।

21. **प्रश्न:**— विधिविवेकग्रन्थ: कस्य दर्शनस्य वर्तते?
उत्तरम्— मीमांसादर्शनस्य।

22. **प्रश्न:**— इन्द्रियार्थसन्निकर्ष: कतिविध:?
उत्तरम्— षड्विध:।

23. **प्रश्न:**— शरीरस्य चत्वारि प्रकाराणि कानि?
उत्तरम्— 1. जरायुज:, 2. अण्डज:, 3. स्वेदज:, 4. उद्भिज:।

(ठ) अपूर्वविमर्श: एवं वस्तुनिष्ठप्रश्नोत्तराणि

मीमांसादर्शने 'अपूर्व' नामक: सिद्धान्त: प्रतिपादितमस्ति। फलं कर्मण उत्पन्नो भवति। एवंप्रकारेण 'अपूर्व:' (पुण्य-अपुण्य) कर्म-कर्मफलानां बन्धन-शृंखला वर्तते। वेदस्य नित्यतासिद्ध्यर्थं मीमांसका: अनेकयुक्तानि प्रतिपादितानि, तानि अधुनाऽपि नवीनतथ्यानि प्रकटयन्ति। कर्मण केवलं चित्तशुद्धि: भवति, मोक्षस्य प्राप्तिस्तु ज्ञानेन भवति। कर्ममीमांसानुसारं **कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा** अर्थात् मन्त्रानुकूलं मुमुक्षुजनान् अपि कर्म करणीयम्। वेदविहितकर्माणामनुष्ठानेन कर्मबन्धन: स्वत: समाप्तो भविष्यति। अत: कर्मस्य अनुष्ठानम् अभीष्ट:, न हि कर्मस्य परित्याग:। मीमांसाया: इदं परिनिष्ठितमतं वर्तते। फलत: वैदिकदर्शनस्य मुख्यप्राण: मीमांसादर्शनं विद्यते। मीमांसाया: विषय: धर्मविवेचनं विद्यते। यथा—**धर्माख्यं विषयं वक्तुं मीमांसाया: प्रयोजनम्** (श्लो.वार्ति.-11)

फलकाले कर्माभावे स: फलोत्पादक: केन प्रकारेण भवति? अस्मिन् विषये मीमांसका: कथयन्ति यत् 'अपूर्व' इत्यस्य माध्यमेन भवति। प्रत्येककर्मणि अपूर्व: (पुण्यापुण्य) उत्पन्नाशक्ति: विद्यमाना: भवन्ति। कर्मण भवति अपूर्व: (पुण्यापुण्य:), अपूर्वेण भवति फलम्। अत 'अपूर्व:' कर्म एवं कर्मफलयोर्मध्यदशाया: द्योतको भवति। एतेन शंकराचार्य: अपूर्वं कर्मस्य सूक्ष्म-उत्तरावस्था फलस्य पूर्वावस्था वा स्वीकरोति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्न:**— अपूर्व' नामक: सिद्धान्त: केन प्रतिपाद्यते?
उत्तरम्—मीमांसादर्शनेन।

2. **प्रश्न:**— फलं केन उत्पन्नो भवति?
उत्तरम्—कर्मणा।

3. **प्रश्न:**— कर्म-कर्मफलं बन्धन-शृंखला क:?
उत्तरम्— अपूर्व:।

4. **प्रश्न:**— चित्त-शुद्धि: केन भवति?
उत्तरम्— कर्मणा।

5. **प्रश्न:**— मोक्षस्य प्राप्ति: केन भवति?
उत्तरम्— ज्ञानेन।

6. **प्रश्न:**—"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा" इति कस्य मतम्?
उत्तरम्— कर्म-मीमांसकस्य।

7. **प्रश्न:**— वेदविहितकर्माणामनुष्ठानेन किं भवति?
उत्तरम्— कर्मबन्धनस्य स्वत: समाप्ति: भवति।

8. **प्रश्न:**— कर्मण: अनुष्ठानम् अभीष्ट: परित्यागो वा?
उत्तरम्— अभीष्ट:।

9. **प्रश्न:**— वैदिकदर्शनस्य मुख्यप्राण: किम्?
उत्तरम्— मीमांसादर्शनम्।

10. **प्रश्न:**— मीमांसाया: प्रयोजनं किम्?
उत्तरम्— धर्मविवेचनम्।

11. **प्रश्न:**—"धर्माख्यं विषयं वक्तुं मीमांसाया: प्रयोजनम्" इति कुत: उद्धृत:?
उत्तरम्— कुमारिलभट्टस्य श्लोकवार्तिकग्रन्थात्।

12. **प्रश्न:**— कर्म कति प्रकारकानि भवन्ति?
उत्तरम्— त्रीणि, 1. नित्यनैमित्तिक:, 2. निषिद्ध:, 3. काम्यकर्मम्।

13. **प्रश्न:**— प्रभाकरमतानुसारं के अष्टपदार्था:?
उत्तरम्—1. द्रव्य, 2. गुण, 3. कर्म, 4. सामान्य, 5. समवाय, 6. संख्या, 7. शक्ति:, 8. सादृश्य।

14. **प्रश्न:**— प्रभाकरमतानुसारं कानि नवद्रव्यानि?
उत्तरम्—1. पृथ्वी, 2. जल, 3. अग्नि, 4. वायु, 5. आकाश, 6. दिक्, 7. काल, 8. आत्मा, 9. मन,

15. **प्रश्न:**— प्रभाकरमतानुसारं एकविंशतिगुणा: के?
उत्तरम्—1. रूप, 2. रस, 3. गन्ध, 4. स्पर्श, 5. संख्या, 6. परिमाण, 7. संयोग, 8. विभाग, 9. परत्व, 10. अपरत्व, 11. गुरुत्व, 12. द्रवत्व, 13. स्नेह, 14. बुद्धि:, 15. सुख, 16. दु:ख, 17. इच्छा, 18. द्वेष, 19. प्राकट्य, 20. ध्वनि:, 21. संस्कार:।

16. **प्रश्न:**— कर्म एवं कर्मफलयोर्मध्यदशाया: द्योतक: क:?
उत्तरम्— अपूर्व:।

17. **प्रश्न:**— कर्मणा किं भवति?
उत्तरम्— अपूर्व: (पुण्यापुण्य:)।

18. **प्रश्न:**—अपूर्वेण किं भवति?
उत्तरम्— फलम्।

(ङ) श्रौतयागाः, स्मार्त्तयागाः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

श्रौतयागाः-श्रुतौ विहितं (अण्) श्रौतम्, श्रुतिभिः प्रतिपादिता यागाः श्रौतयागाः। वेदविहितकर्माणि भवन्ति श्रौतयागाः। 'मीमांसा' कर्मकाण्डविषयकसिद्धान्तान् विविधाभिः युक्तिभिः प्रतिपादयति। मीमांसाशास्त्रानुसारेन मोक्षः कर्मकाण्डेन सम्भवोऽस्ति। "प्रपञ्चसम्बन्धविलयो मोक्षः"। कर्मकाण्डपरकं दर्शनं 'पूर्वमीमांसा' वर्तते। 'मीमांसाशब्दः' जिज्ञासार्थकमानधातोः "मानेर्जिज्ञासायाम्" इति वार्तिकेण निरूप्यते; "यत्र यज्ञादिकर्मसम्बन्धिनो विचाराः विराजते। परं संस्कृतसाहित्ये कर्मकाण्डपरकं दर्शनं पूर्वमीमांसा, ज्ञानकाण्डपरकं दर्शनं उत्तरमीमांसा दर्शनम्। यज्ञशब्दः सामान्यतया धर्मस्यार्थे विद्यते। यस्मिन्नग्निं प्रज्ज्वाल्य घृतादिद्रव्यैराहुतिः प्रदीयते तदेव यज्ञ इत्युच्यते। महर्षिकात्यायनेन यज्ञस्य लक्षणं लिखितं यद् 'द्रव्यं देवता त्यागो यागः'। अस्माकं शरीरे वैश्वानरोऽग्निः देवताऽस्ति। यथा गीतायाम्–

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्॥

प्रत्यक्षश्रुतिसमुपदिष्टयागाः श्रौतयागाः। यज्ञादि-कर्मसम्पादनार्थं कर्त्तव्यस्य निर्देशकं विधायकं वैदिकं वाक्यं मीमांसाया विचारेण अपौरुषेयं स्वतःप्रामाण्यञ्च वर्तते। आत्मामरत्वादिविषयकानि यान्यपि सिद्धार्थकानि वाक्यानि सन्ति तानि सर्वाण्यपि अवश्यमेव यागादिकर्मविधायकानि वाक्यानि परिष्वजन्ते। मीमांसायां कर्मकाण्डस्यैव प्राधान्यं दृश्यते। यासां देवतानां कृते स कर्मकाण्डः स्वीकृतोऽस्ति ता देवता अपि तत्र तस्य कर्मकाण्डस्य पुरतो नतभाला इव वीक्ष्यन्ते। ये हि वेदा ईश्वरं गायन्तो न तृप्यन्ति तम् ईश्वरमपि सा वेदमहिमगानतरङ्गनिमग्नतया विसस्मार।

श्रौतयज्ञमीमांसा इति शीर्षके ग्रन्थे 'श्रौतयज्ञानां प्रकृतिविकृतिभेद' इति शीर्षके लेखे श्रीमता युधिष्ठिरमीमांसकेन उल्लिखितं यत् उक्ताः सर्वेऽपि श्रौतयज्ञाः प्रक्रिया-दृष्ट्या त्रिधा विभज्यन्ते–1. **प्रकृतियागः**, 2. **विकृतियागः**, 3. **प्रकृतिविकृतिः उभयात्मकश्च।** प्रकृतियागस्य त्रीणि लक्षणानि भवन्ति। 1. यत्र कृत्स्नं क्रियाकलापमुच्यते सा प्रकृतिः। यत्र समग्राङ्गोपदेशः सा प्रकृतिः। 2. यतो विकृतिरङ्गानि गृह्णाति सा प्रकृतिः इति मीमांसान्यायप्रकाशकारः। यथा-दर्शपूर्णमासौ। पं॰मधुसूदन ओझा सरस्वतिना स्वीये यज्ञमधुसूदननामके ग्रन्थे यज्ञविटपाध्याये सर्वानेकप्रकृतियज्ञानन्यथा विभज्य दर्शितम्। तथाहि यज्ञः पञ्चधा–1. शिरोयज्ञः, 2. अतियज्ञः, 3. महायज्ञः, 4. हविर्यज्ञः, 5. पाकयज्ञश्चेति।

3. प्रकृतिवद् विकृतिः कर्तव्या इति चोदकाद् यत्र नाङ्गप्राप्तिः सा प्रकृतिः। एतानि त्रीण्यपि लक्षणानि स्वल्पभेदेन उपलभ्यन्ते। 2. विकृतयागस्य लक्षणम्-येषु यागेषु तत्तत्कर्मोपयोगी समस्तक्रियाकलापो न पठ्यते, कर्मणाम्। पूर्त्यर्थं च य अन्यतः क्रियाकलापान् गृह्णाति ते विकृतियागा उच्यते। यथा- दाक्षायणेष्टिः। 3. प्रकृतिविकृतियागस्य लक्षणम्-यो यागः स्वयं विकृतिरूपः सन्नप्यन्यस्य कस्यचिद् यागस्य प्रकृतिभावं गच्छति, स प्रकृतिविकृतिरूपो यागो निगद्यते। यथा–चातुर्मास्यानां वैश्वदेवं पर्व।

वैदिककर्मकाण्डस्य (श्रौतयागस्य) प्रमुखसिद्धान्ताः

1. आत्मा अस्ति, स न नश्यति, सः स्वर्गे कर्मफलानि भुनक्ति।
2. असत्येका एतादृशी शक्तिर्या कर्मणां फलानि रक्षति।
3. वेदाः, यान् कर्मकाण्डः श्रयति, सन्त्यभ्रान्ताः।
4. जगत् सत्यमस्ति, न च जीवनं कर्म च स्वप्नमात्रम्।

श्रौतयागाः सन्ति उत्तमोत्तमाः, तैः लौकिकी-पारलौकिकी सिद्धयः अपि लभन्ते। वैदिकश्रौतयागान् मत्वा तज्जन्याः सिद्धयोऽपि श्रौतसिद्धयः अनुष्ठातृणां विविधमनोरथपूरिकाः सन्ति। प्राचीना मीमांसका जीवनस्य चरमं लक्ष्यं स्वर्गं मन्यन्ते परं नवीनास्तु बहवो मोक्षमेव जीवनस्य अन्तिमं लक्ष्यं स्वीकुर्वन्ति। मोक्षावस्था सर्वविधदुःखरहितावस्थास्ति।

स्मार्त्तयागाः:– स्मृतिभिः प्रतिपादिता यागाः स्मार्त्तयागाः। स्मृतौ विहितः, स्मृतिं वेत्त्यधीते वा (अण्) स्मृतौ, परम्परागतधर्मशास्त्रविहितकर्माणि भवन्ति स्मार्त्तयागाः। वेदस्य परिशिष्टभागाः स्मार्त्तयागाः। स्मार्त्तयागे ब्रह्मणे हविः प्रदीयते। यज्ञाः कतिविधा भवन्तीति जिज्ञासायां कश्चित्तावदाह-पञ्चविधा हि इमे सर्वे यज्ञाः भवन्ति–1. अग्निहोत्रम्, 2. दर्शपौर्णमासम्, 3. चातुर्मास्यम्, 4. पशुबन्धः, 5. सोम इति भेदात्। चत्वारि कर्माणि शास्त्रकारैः विवेचितानि। यथा–1. नित्यम्, 2. नैमित्तिकम्, 3. काम्यम्, 4. निषिद्धं चेति। वैदिकसाहित्ये व्यक्तिकर्मणां प्राधान्येन श्रौतस्मार्तयागाः पौराणिकभेदभिन्नतया विवेचितानि सन्ति। 'नामधेय' संज्ञा यज्ञस्य वर्तते। देवता मन्त्रात्मको भवति। स्मार्ते यजमानः। स्वयमेव ऋत्विजः। पूर्वमीमांसादर्शनस्य कृते जन्मदातृ-जैमिनिनये कर्मणा एवाऽभ्युदयनिःश्रेयसयोः समवाप्ति-जनकत्वेन तस्यैव कर्मणः प्राधान्येन निरूपणीयत्वात् इति। यथा- विष्णु-राम-चण्डी-सीतायागादि स्मार्त्तयागाः। वेदेषु विवाह-वर्णाश्रम-पुत्रभेद-उत्तराधिकारिनिर्णय-धनविभाग-श्राद्धादिविषयकाः बहवः प्रसङ्गाः उपलभ्यन्ते। ते प्रसङ्गाश्च कालक्रमेण धर्मशास्त्रस्य विषयीभूताः। प्राधान्येन धर्मप्रति-पादकान्येव शास्त्राणि स्मृतिपदेनोच्यन्ते। स्मार्त्तधर्मे विशेषतः स्मृतिप्रतिपादितान् वर्णाश्रमसम्बन्धिशौचाचमननियमानन्त-र्भावयन्ति। बौधायनधर्मसूत्रम्-अनुशासनपर्व-शान्तिपर्वादिषु च धर्मः वेदस्मृतिशिष्टागमप्रतिपाद्यरूपेण त्रिधा वर्णितः। हेमाद्रि-विज्ञानेश्वरादयः धर्मं भविष्यपुराणदृष्ट्या षोढा विभाजयन्ति। यथा–वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्च। वेदस्य पूर्वभागे योऽस्ति विषयो विचारितस्तादृशविषयको विचार एव 'पूर्वमीमांसा' शब्देनाऽभिधीयते। स च विचारः 'कर्मविषयको' विचारः। यथोक्तम्–

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
(ईशोपनिषद्-2)

वा शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्'।
(गीता-421)

एवं वयं प्रतिदिनं भोजनद्रव्येण आहुतिं प्रदाय यज्ञं कुर्मः। पशवः पक्षिणश्चापि भोजनं कुर्वन्ति, अत एव तेऽपि यज्ञं कुर्वन्ति। कृमि-कीट-पतङ्गादयोऽपि भोजनं कुर्वन्ति, अतस्तत्रापि यज्ञो भवति। वृक्ष-वनस्पतयः लतागुल्मादयश्चापि स्वमूलैः रसं प्राप्य भोजनं कुर्वन्ति, अतस्तेऽपि यज्ञमेव कुर्वन्ति। एतेषां यज्ञानां माध्यमेनैव षड्भावविकाराः उत्पन्नाः भवन्ति। बीजगतवृक्षाः यज्ञेभ्यः एवाङ्कुरन्तः उत्पन्नाः सन्तः पुनः यज्ञेभ्यश्चैव विकासं प्राप्यैकस्मिन् महति वृक्षे परिणता भवन्ति। पशुपक्षिवृक्षादयः पदार्थाः सन्ति भौतिकाः, अत एषु भौतिकपदार्थेषु जायमानो यज्ञ आधिभौतिकयज्ञः इत्युच्यते।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—श्रौतयागाः इत्यस्य को अर्थः?
उत्तरम्— श्रुतिभिः प्रतिपादिता यागाः श्रौतयागाः।
2. **प्रश्नः**— श्रौतयागाः इत्यस्य का परिभाषा?
उत्तरम्— प्रत्यक्षश्रुतिसमुपदिष्टयागाः श्रौतयागाः।
3. **प्रश्नः**—कर्मकाण्डविषयकसिद्धान्तानि केन प्रतिपाद्यते?
उत्तरम्—पूर्वमीमांसादर्शनेन।
4. **प्रश्नः**—मीमांसाशास्त्रानुसारेण कर्मकाण्डेन कः सम्भवोऽस्ति?
उत्तरम्— मोक्षः।
5. **प्रश्नः**— मोक्षस्य का परिभाषा?
उत्तरम्— प्रपञ्चसम्बन्धविलयो मोक्षः।
6. **प्रश्नः**—ज्ञानकाण्डपरकं दर्शनं किम्?
उत्तरम्— उत्तरमीमांसादर्शनम्।
7. **प्रश्नः**— यज्ञशब्दः सामान्यतया कस्मिन् अर्थे विद्यते?
उत्तरम्—धर्मस्यार्थे।
8. **प्रश्नः**—यस्मिन्नग्निं प्रज्ज्वाल्य घृतादिद्रव्यैराहुतिः प्रदीयते तत् किमुच्यते?
उत्तरम्— यज्ञः।
9. **प्रश्नः**—महर्षिकात्यायनेन यज्ञस्य लक्षणं किं लिखितम्?
उत्तरम्— द्रव्यं देवतात्यागो यागः।
10. **प्रश्नः**—अस्माकं शरीरे वैश्वानरः कः?
उत्तरम्— अग्निः देवता।
11. **प्रश्नः**—युधिष्ठिरमीमांसकेन प्रक्रिया-दृष्ट्या श्रौतयज्ञाः कतिधा विभज्यन्ते?
उत्तरम्— त्रिधा विभज्यन्ते।
12. **प्रश्नः**—के सन्ति त्रिधा श्रौतयज्ञाः?
उत्तरम्—1. प्रकृतियागः, 2. विकृतियागः, 3. प्रकृतिविकृतिः उभयात्मकश्च।
13. **प्रश्नः**—प्रकृतियागस्य किं लक्षणम्?
उत्तरम्— यत्र समग्राङ्गोपदेशः सा प्रकृतिः।
14. **प्रश्नः**—मीमांसान्यायप्रकाशकारदृष्ट्या का प्रकृतिः?
उत्तरम्—यतो विकृतिरङ्गानि गृह्णाति सा प्रकृतिः।

15. **प्रश्नः**—दर्शपूर्णमासौ इति कस्य यागस्य उदाहरणम्?
उत्तरम्— प्रकृतियागस्य।

16. **प्रश्नः**— पं०मधुसूदन ओझा सरस्वतिना दृष्ट्या के पञ्चधा यज्ञाः?
उत्तरम्—1. शिरोयज्ञः, 2. अतियज्ञः, 3. महायज्ञः, 4. हविर्यज्ञः, 5. पाकयज्ञश्चेति।

17. **प्रश्नः**—किमस्ति विकृतयागस्य लक्षणम्?
उत्तरम्—अन्यतः क्रियाकलापान् गृह्णति।

18. **प्रश्नः**— 'दाक्षायणेष्टिः' इति कस्य यागस्य उदाहरणम्?
उत्तरम्—विकृतियागस्य।

19. **प्रश्नः**—प्रकृतिविकृतियागस्य किं लक्षणम्?
उत्तरम्—यो यागः स्वयं विकृतिरूपः सन्नप्यन्यस्य 'कस्यचिद् यागस्य प्रकृतिभावं गच्छति'।

20. **प्रश्नः**— चातुर्मास्यानां वैश्वदेवं पर्व" इति कस्य यागस्य उदाहरणम्?
उत्तरम्—प्रकृतिविकृतियागस्य।

21. **प्रश्नः**—लौकिकी-पारलौकिकी च सिद्धिः कैः लभन्ते?
उत्तरम्—श्रौतयागैः।

22. **प्रश्नः**—प्राचीनमीमांसकाः जीवनस्य चरमं लक्ष्यं किं मन्यन्ते?
उत्तरम्— स्वर्गं मन्यन्ते।

23. **प्रश्नः**— मोक्षमेव जीवनस्य अन्तिमं लक्ष्यं इति के स्वीकुर्वन्ति?
उत्तरम्— नवीनमीमांसकाः।

24 **प्रश्नः**— सर्वविधदुःखरहितावस्था का?
उत्तरम्—मोक्षावस्था।

25. **प्रश्नः**— स्मार्त्तयागाः इत्यस्य का परिभाषा?
उत्तरम्—स्मृतिभिः प्रतिपादिता यागाः स्मार्त्तयागाः।

26. **प्रश्नः**—परम्परागतधर्मशास्त्रविहितकर्माणि कानि भवन्ति?
उत्तरम्—स्मार्त्तयागाः।

27. **प्रश्नः**— यज्ञाः कतिविधाः के च ते?
उत्तरम्—पञ्चविधाः, 1. अग्निहोत्रम्, 2. दर्शपौर्णमासम्, 3. चातुर्मास्यम्, 4. पशुबन्धः, 5. सोमः।

28 **प्रश्नः**—कानि चत्वारि कर्माणि शास्त्रकारैः विवेचितानि?
उत्तरम्—1. नित्यम्, 2. नैमित्तिकम्, 3. काम्यम्, 4. निषिद्धं चेति।

29. **प्रश्नः**—'नामधेय' इति कस्य संज्ञा?
उत्तरम्—यज्ञस्य।

30. **प्रश्नः**—पशुपक्षिवृक्षादयः के पदार्थाः सन्ति?
उत्तरम्—भौतिकपदार्थाः।

31. **प्रश्नः**—भौतिकपदार्थेषु जायमानो यज्ञः कः?
उत्तरम्—आधिभौतिकयज्ञः।

32. **प्रश्नः**—'राजा राजसूयेन यजेत्'-इति विध्युक्तयागो को भवति?
उत्तरम्—श्रौतयागः।

(ढ) (नव्यन्याय) पदार्थविमर्शः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) न्यायदर्शनस्य परिचयः—नीयते = प्राप्यते, अयनम् = मोक्षो, येनासौ न्यायः। अथवा नीयते = अधिगम्यते विवक्षितार्थसिद्धिरनेनाऽसौ न्यायः। तस्य न्यायस्य यद् दर्शनमनुभवस्तदेव न्यायदर्शनम् = न्यायशास्त्रमित्यर्थः। न्यायशास्त्रस्य महत्त्वन्तु सर्वशास्त्रोपकारकत्वेन सर्वत्रैव प्रसिद्धमस्ति। तथा चोक्तम्—

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता॥
सम्यक् दर्शनसम्पन्नः कर्मभिर्न निबध्यते।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते॥

न्यायशास्त्रं अतिप्राचीनम्। अस्य प्रवर्तकः सूत्रकार गौतमः 500 ई०पू० समयेऽजायत। अयञ्च महर्षिस्त्रेताकालीनः सन् प्रजापतेः श्रीमहर्षेरङ्गिरसः प्रपौत्रो दीर्घतमसः पुत्रो महान् तपस्वी, तेजस्वी चासीन्न्यायशास्त्रप्रणेता मनस्वी मनीषी। अस्य महर्षिगौतमस्य धर्मपत्नी 'अहल्या' चासीत्। अस्य महर्षिगौतमस्य 'शतानन्द' नामा पुत्रः श्रीमिथिलेश्वरस्य पुरोहितोऽप्यासीदिति श्रूयते। अयञ्च महर्षि-गौतमोऽष्टादशपुराणानां ब्रह्मसूत्राणाञ्च रचयितुः श्रीव्यासस्य समकालीन आसीत्। श्रीगौतमस्य अपरं नाम अक्षपादोऽप्यासीत्। गौतमप्रवर्तितं न्यायशास्त्रं पदार्थमीमांसाशास्त्रम्।

षोडशपदार्थाश्चाभ्युपगताः प्रमाणप्रमेयाद्याः। वात्स्यायनस्योदयकाले ब्राह्मणधर्म-बौधधर्मयोः सङ्घर्षस्य समयः आसीत्। वाचस्पतिमिश्रः न्यायवार्तिकतात्पर्ये तदीयमपि मतं विस्तरेण गर्हयामास। उदयनोऽपि 'न्यायवार्तिकतात्पर्यपरिशुद्धि'-नामकेन व्याख्याग्रन्थेन वाचस्पतेर्ग्रन्थं परिष्कृतवान्। तत्र प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति तत्सिद्धान्तः। वैशेषिकस्य समानतन्त्रत्वात् परमाणुकारणतावादोऽस्य विशिष्य ध्यानमाकर्षयति दार्शनिकानाम्। सुखदुःखात्मकमनोवृत्त्योर्नाशे जाते मनःसाम्यावस्थां प्रतिपद्यते। तदा आत्यन्तिकदुःखनिवृत्तिर्भवति, सैव मुक्तिः। ईश्वरोऽनुमानगम्यः। जीवन्मुक्तिरपरनिःश्रेयसशब्देन विदेहमुक्तिश्च परनिःश्रेयसशब्देन प्रतिपाद्यते।

(ख) न्यायशास्त्रस्य महत्त्वम्—'प्रमाणप्रमेयसंशयप्रयोजने'त्यारभ्य 'हेत्वाभासाश्च यथोक्ताः' इत्येतत् पर्यन्तं तदिदं पञ्चाऽध्यायात्मकं न्यायशास्त्रम्। तत्र प्रत्यध्यायमाह्निकद्वयमस्ति। न्यायशास्त्रेतराणि यानि व्याकरण-वेदान्तप्रभृतीनि शास्त्राणि तानि सर्वाण्येव शास्त्राणि सन्ति न्यायशास्त्रं समपेक्षमाणानीति तानि सर्वथोपकारकत्वेन न्यायशास्त्रमपेक्षन्ते इति। यथोक्तम्—

काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्।
(श्रुतमात्रम्)

'मानाधीना मेयसिद्धिः' एवम् 'लक्षणप्रमाणाभ्यां वस्तुविनिर्णयः' इत्यनेनापि प्रमाणभूतेन वाक्यद्वयेन न्यायशास्त्रस्य महदेव महत्त्वं समुद्गीयमानं भवति। अत्र वाक्यद्वयघटकीभूतयोश्च मान-प्रमाण-पदयोरैक्येन अर्थात् एकार्थकत्वेन, समानार्थकत्वेनेत्यर्थः, न्यायशास्त्ररूपत्वम्। अतः न्यायशास्त्रमेव प्रमाणशास्त्रं मन्यते लोकैः।

आर्षं धर्मोपदेशञ्च वेदशास्त्राऽविरोधिना।
यस्तर्केणाऽनुसन्धत्ते स धर्मं वेद नेतरः॥
(श्रुतमात्रमेव)

(ग) पदार्थविमर्शः—न्यायसूत्राणि पञ्चाध्यायेषु विभक्ताः, एवं च प्रति-अध्याये द्वयो आह्निकयोः वर्तते। येषु षोडशपदार्थानां उद्देश्य (नामकथनम्), लक्षण (परिभाषा) एवं परीक्षणं क्रियते स्म। षोडशपदार्थानां नामानि इमानि सन्ति—1. प्रमाण, 2. प्रमेय, 3. संशय, 4. प्रयोजन, 5. दृष्टान्त, 6. सिद्धान्त, 7. अवयव, 8. तर्क, 9. निर्णय, 10. वाद, 11. जल्प, 12. वितण्डा, 13. हेत्वाभास, 14. छल, 15. जाति, 16. निग्रहस्थानम्। एतेषां पदार्थानां उपयोगः वादीप्रतिवादीद्वारा सिद्धान्तनिर्णयाय क्रियते। प्रमाणान्याश्रित्य प्रमेयाणां विचारणं प्रमाणानाञ्च सविस्तरमुपपादनं न्यायदर्शनस्य प्रधानमुद्देश्यमस्ति। अन्यञ्च तदीयं ध्येयं तदेव, यदस्ति दर्शनान्तराणाम्। संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहाः इत्येतानि सन्त्यन्यानि तत्त्वानि। द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावाश्च सप्त प्रमेयेष्वन्तर्भवन्ति।

तत्त्व (पदार्थ) विचार-विवरणम्—

दर्शनम्	तत्त्व-संख्या	तत्त्व-नामानि
न्याय	16	पदार्थः
सांख्य	25	तत्त्वानि
योग	26	तत्त्वानि
वैशेषिक	7	पदार्थः
मीमांसा (प्रभाकर)	5	पदार्थः। (द्रव्य, गुण, कर्म, सामान्य, शक्ति, अभाव)
मीमांसा (भाट्ट)	8	पदार्थः। (द्रव्य, गुण, कर्म, सामान्य, समवाय, शक्ति, संख्या, सादृश्य)
माध्व	10	पदार्थः। (द्रव्य, गुण, कर्म, सामान्य, विशेष, विशिष्ट, अंशि, सादृश्य, शक्ति, अभाव)

दर्शनम्	तत्त्व-संख्या	तत्त्व-नामानि
आगम	36	तत्त्वानि
रामानुजादि (वैष्णव)	3	पदार्थ
पाशुपत	5	पदार्थाः (कार्य, कारण, योग, विधि, दुःखान्त)
शैव	3	पति, पशु, पाश

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— न्यायदर्शनस्य आदिप्रवक्ता कोऽस्ति?
उत्तरं— महामुनिगौतमः।

2. **प्रश्नः**— पदार्थ-मीमांसाशास्त्रेन किमवबोध्यते?
उत्तरम्— गौतमप्रवर्तितं न्यायशास्त्रम्।

3. **प्रश्नः**— 'अहल्या' कस्य धर्मपत्नी आसीत्?
उत्तरम्— महर्षिगौतमस्य।

4. **प्रश्नः**— धर्मसूत्रस्य लेखकः कः?
उत्तरम्— गौतमः।

5. **प्रश्नः**— न्यायदर्शनस्य उपज्ञाता कः?
उत्तरम्— गौतमः।

6. **प्रश्नः**— महर्षेः गौतमस्य अपरं नाम किम्?
उत्तरम्— अक्षपादः।

7. **प्रश्नः**— न्यायदर्शने कति पदार्थाः?
उत्तरम्— (16 षोडश) 1. प्रमाण, 2. प्रमेय, 3. संशय, 4. प्रयोजन, 5. दृष्यन्त, 6. सिद्धान्त, 7. अवयव, 8. तर्क, 9. निर्णय, 10. वाद, 11. जल्प, 12. वितण्डा, 13. हेत्वाभास, 14. छल, 15. जाति, 16. निग्रहस्थानम्।

8. **प्रश्नः**— न्यायदर्शने कति तत्त्वानि मन्यन्ते?
उत्तरम्— 16 षोडश तत्त्वानि।

9. **प्रश्नः**—न्यायदर्शनानुसारं कति प्रमाणानि कानि च तानि?
उत्तरम्—चत्वारि, 1. प्रत्यक्षः, 2. अनुमानम्, 3. शब्दः, 4. उपमानम्।

10. **प्रश्नः**— चत्वारि प्रमाणानि कस्मिन् दर्शने। स्वीकृतानि।
उत्तरम्— न्यायदर्शने।

11. **प्रश्नः**— कानि द्वादश प्रमेयानि?
उत्तरम्—1. आत्मा, 2. शरीर, 3. इन्द्रियाणि, 4. बुद्धिः, 5. अर्थ, 6. मन, 7. प्रवृति, 8. दोष, 9. प्रेत्यभावः, 10. फलम्, 11. दुःखम्, 12. अपवर्गः।

12. **प्रश्नः**— प्रथमतत्त्वं या साध्यतत्त्वं किमस्ति?
उत्तरम्— प्रमेयः।

13. **प्रश्नः**— अवशिष्यनि तत्त्वानि किमस्ति?
उत्तरम्— प्रमेयसिद्धेः साधनम्।

14. **प्रश्नः**— प्रमेयस्य द्वादशविधत्वं किं दर्शितम्?
उत्तरम्—1. आत्मा, 2. शरीरम्, 3. इन्द्रियम्, 4. अर्थः, 5. बुद्धिः, 6. मनः, प्रवृत्तिः, 8. दोषः, 9. पुनर्जन्म, 10. फलम्, 11. दुःखम्, 12. अपवर्गः।

15. **प्रश्नः**— हेत्वाभासस्य के पञ्च भेदाः?
उत्तरम्— 1. सव्यभिचारः, 2. विरुद्धः, 3. सत्प्रतिपक्षः, 4. असिद्धः, 5. बाधितः।

16. **प्रश्नः**— सादृश्यं पदार्थत्वं कः स्वीकरोति?
उत्तरम्— नैयायिकः।

17. **प्रश्नः**— न्यायदर्शनानुसारं कानि पञ्चावयवानि?
उत्तरम्— 1. प्रतिज्ञा, 2. हेतु, 3. दृष्यन्त, 4. उपनय, 5. निगमनम्।

18. **प्रश्नः**— न्यायस्य मूलोद्देश्यं किम्?
उत्तरम्— शास्त्रानुचिन्तनद्वारा मोक्षः।

19. **प्रश्नः**— न्यायदर्शनस्य प्रारम्भिकग्रन्थाः के सन्ति?
उत्तरम्— 1. गौतमन्यायसूत्रम्, 2. वात्स्यायनभाष्यम्।

20. **प्रश्नः**— न्यायदर्शनं कैः नामभिः ज्ञायन्ते?
उत्तरम्—1. प्रमाणशास्त्रम्, 2. आन्वीक्षिकी, 3. हेतुविद्या, 4. तर्कशास्त्रम्, 5. ऊहाः।

21. **प्रश्नः**— नव्य-न्यायानुसारं निर्विकल्पक-ज्ञानस्य विषयः किमस्ति?
उत्तरम्—प्रत्यक्षस्य।

22. **प्रश्नः**— न्यायदर्शने कति अध्यायाः सन्ति?
उत्तरम्— 5 पञ्च।

23. **प्रश्नः**—'ईश्वर-सिद्धिः' कस्य दर्शनस्य प्रतिपाद्यो विषयः?
उत्तरम्— न्याय-दर्शनस्य।

24. **प्रश्नः**— नव्यन्यायस्य प्रमुखव्याख्याता कं मन्यते?
उत्तरम्— तत्त्वचिन्तामणि इत्यस्य प्रणेता गङ्गेशः।

25. **प्रश्नः**— पद-पदार्थयोः कः सम्बन्धः ?
उत्तरम्— समवायः।

26. **प्रश्नः**— समवायः किमस्ति?
उत्तरम्—पदार्थः सम्बन्धश्च।

27. **प्रश्नः**— पीलुपाकवादिनः के सन्ति?
उत्तरम्— नैयायिकाः।

28. **प्रश्नः**— समवायः कतिविधः?
उत्तरम्— (1) एकविधः।

29. **प्रश्नः**— नव्य-न्यायानुसारं समवायः कः?
उत्तरम्— (नाना) नित्यसम्बन्धः समवायः।

30. **प्रश्नः**— पटरूपं प्रति तन्तुरूपं कीदृशं कारणम्?
उत्तरम्— असमवायि-कारणम्।

31. **प्रश्नः**— व्याप्ति इत्यस्य लक्षणं किम्?
उत्तरम्— साहचर्य-नियमः।

32. **प्रश्नः**—नव्यन्यायप्रवर्तकोऽस्ति?
उत्तरम्— गङ्गेशोपाध्यायः।

33. **प्रश्नः**— चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि कानि सन्ति?
उत्तरम्— ज्ञानेन्द्रियाणि।

34. **प्रश्नः**— वाक्पाणिपादपायूपस्थानि कानि सन्ति?
उत्तरम्— कर्मेन्द्रियाणि।

35. **प्रश्नः**— संकल्पमिन्द्रियं किमस्ति?
उत्तरम्— मनः।

36. **प्रश्नः**— आलोचनमात्रं वृत्तिः कुत्रास्ति?
उत्तरम्— ज्ञानेन्द्रियेषु।

37. **प्रश्नः**— प्रत्ययसर्गः मूलतः कतिविधः?
उत्तरम्— (04) चतुर्विधः।

38. **प्रश्नः**— समवायिकारणस्य किं लक्षणम्?
उत्तरम्— यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्।

39. **प्रश्नः**— नव्य-न्याये पदार्थानां का संख्या?
उत्तरम्— सप्तपदार्थाः।

(ण) प्रामाण्यवादः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

यथार्थानुभवः प्रमा तत्साधनं च प्रमाणम्। न्यायस्य तत्त्वविचारो हि प्रमाणविचारमधितिष्ठति। इमानि प्रमाणानि चत्वारि सन्ति–1. प्रत्यक्षम्, 2. अनुमानम्, 3. उपमानम्, 4. शब्दः। यथा दीपस्य प्रकाशः स्वसन्निधौ स्थितं पदार्थं प्रकाशयति तथैव ज्ञानं (बुद्धिः) सर्वान् अपि अर्थान् अभिव्यनक्ति। ज्ञानाधिष्ठानम् आत्मा भवति। अत एव सः प्रकाशः (ज्ञानम्)। आत्माश्रयः इत्युक्तम्। उक्तञ्च– **अज्ञानान्धकारतिरस्कारकारकसकलपदार्थस्यार्थप्रकाशकः प्रदीप इव देदीप्यमानः आत्माश्रयो यः प्रकाशः सा बुद्धिः।** न्यायदर्शने प्रत्यक्षं बहुधा विचारितम्। इन्द्रिय-साहाय्यमन्तरेणापि प्रत्यक्षं भवितुं शक्नोति। तर्कभाषायां प्राह **साक्षात्कारिप्रमाकरणं प्रत्यक्षम्।** अन्यत्र क्वापि **इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्** इत्युक्तम्। प्रत्यक्षं साधारण्येन द्विविधं निर्विकल्पकं सविकल्पकञ्च। येन कस्यापि वस्तुनो ज्ञानमात्रं जायते न च तन्नामजात्यादेर्ज्ञानं भवति तदस्ति निर्विकल्पकं ज्ञानम्। येन च वस्तुनो नामजात्यादेरपि ज्ञानं भवति तदस्ति सविकल्पकं ज्ञानम्। स्मृतिभिन्नं ज्ञानं अनुभवः। ज्ञानं प्रमाऽप्रमाभेदेन द्विविधम्। यथार्थज्ञानं प्रमा, अयथार्थज्ञानम् अप्रमा इत्युच्यते। अप्रमापि चतुर्धा–1. स्मृति-2. संशय-3. विपर्यय-4. तर्कविधया। तथाहि–' ज्ञानविषयं ज्ञानं स्मृतिः" अनिश्चयात्मकत्वं संशयः' "विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" " अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्क" इति कथ्यते। न्यायसूत्रे प्रमेयस्य द्वादशविधत्वं दर्शितम्। तदित्थम्–1. आत्मा, 2. शरीरम्, 3. इन्द्रियम्, 4. अर्थः, 5. बुद्धिः, 6. मनः, प्रवृत्तिः, 8. दोषः, 9. पुनर्जन्म, 10. फलम्, 11. दुःखम्, 12. अपवर्गः।

भारतीयदर्शनस्य प्रमाण-विचारतालिका–

दर्शनम्	प्रमाणसंख्या	प्रमाणनामानि
न्याय	4	1. प्रत्यक्षम्, 2. अनुमानम्, 3. उपमानम्, 4. शब्दः।
सांख्य	3	1. प्रत्यक्षम्, 2. अनुमानम्, 3. शब्दः।
योग	3	1. प्रत्यक्षम्, 2. अनुमानम्, 3. आगमः,
वैशेषिक	2	1. प्रत्यक्षम्, 2. अनुमानम्।
मीमांसा	5	1. प्रत्यक्षम्, 2. अनुमानम्, 3. उपमानम्, 4. शब्दः, 5. अर्थापत्तिः।
अद्वैत वेदान्त	6	1. प्रत्यक्षम्, 2. अनुमानम्, 3. उपमानम्, 4. शब्दः, 5. अर्थापत्तिः, 6. अभावः।
चार्वाक	1	1. प्रत्यक्षम्।
जैन	3	1. प्रत्यक्षम्, 2. अनुमानम्, 3. आगमः।
बौद्ध	3	1. प्रत्यक्षम्, 2. अनुमानम्, 3. आगमः।
भाट्ट	6	1. प्रत्यक्षम्, 2. अनुमानम्, 3. उपमानम्, 4. शब्दः, 5. अर्थापत्तिः, 6. अभावः।
पौराणिक	8	1. प्रत्यक्षम्, 2. अनुमानम्, 3. उपमानम्, 4. शब्दः, 5. अर्थापत्तिः, 6. अभावः, 7. सम्भावना, 8. ऐतिह्यम्।
तन्त्र	9	1. प्रत्यक्षम्, 2. अनुमानम्, 3. उपमानम्, 4. शब्दः, 5. अर्थापत्तिः, 6. अभावः, 7. सम्भावना, 8. ऐतिह्यम्, 9. चेष्टा।
साहित्य	9	1. प्रत्यक्षम्, 2. अनुमानम्, 3. उपमानम्, 4. शब्दः, 5. अर्थापत्तिः, 6. अभावः, 7. सम्भावना, 8. ऐतिह्यम्, 9. चेष्टा।
माध्व	3	1. प्रत्यक्षम्, 2. अनुमानम्, 3. शब्दः।
रामानुजादि (वैष्णव)	3	1. प्रत्यक्षम्, 2. अनुमानम्, 3. शब्दः।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— न्यायनये प्रमाणं किम्?
   उत्तरम्— यथार्थानुभवः प्रमा तत्साधनं च।
2. **प्रश्नः**— कति प्रमाणानि कानि च तानि?
   उत्तरम्— चत्वारि, 1. प्रत्यक्षम्, 2. अनुमानम्, 3. उपमानम्, 4. शब्दः।
3. **प्रश्नः**— ज्ञानं (बुद्धिः) किं अभिव्यनक्ति?
   उत्तरम्— सर्वान् अर्थान्।
4. **प्रश्नः**— स्मृतिभिन्नं ज्ञानं किम्?
   उत्तरम्— अनुभवः।
5. **प्रश्नः**— तर्कभाषायां प्रत्यक्षप्रमाणविषये किं प्राह?
   उत्तरम्— साक्षात्कारिप्रमाकरणं प्रत्यक्षम्।
6. **प्रश्नः**— प्रत्यक्षप्रमाणं कतिविधम्?
   उत्तरम्— (2) द्विविधम्।
7. **प्रश्नः**— प्रत्यक्षप्रमाणस्य द्विविधं किम्?
   उत्तरम्— निर्विकल्पकं सविकल्पकञ्च।
8. **प्रश्नः**— ज्ञानं प्रमाऽप्रमाभेदेन कतिविधम्?
   उत्तरम्— द्विविधम्।
9. **प्रश्नः**— न्यायसूत्रे प्रमेयस्य द्वादशविधत्वं किम्?
   उत्तरम्—1. आत्मा, 2. शरीरम्, 3. इन्द्रियम्, 4. अर्थः, 5. बुद्धिः, 6. मनः, 7. प्रवृत्तिः, 8. दोषः, 9. पुनर्जन्म, 10. फलम्, 11. दुःखम्, 12. अपवर्गः।

10. **प्रश्नः**— अप्रमायाः चतुर्विधत्वं किम्?
    उत्तरम्—1. स्मृति-2. संशय-3. विपर्यय-4. तर्कविधया।
11. **प्रश्नः**— इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं किमस्ति?
    उत्तरम्—प्रत्यक्षम्।
12. **प्रश्नः**— न्यायदर्शनानुसारं ज्ञानं किम्?
    उत्तरम्—अभिव्यक्तं प्रकाशितं वा विषयवस्तु।
13. **प्रश्नः**— अनुमानं कतिविधम्?
    उत्तरम्— (2) द्विविधम्।
14. **प्रश्नः**— परार्थानुमाने प्रतिज्ञावाक्यं किम्?
    उत्तरम्— पर्वतो वह्निमान्।
15. **प्रश्नः**— लिङ्गपरामर्शः किमस्ति?
    उत्तरम्— अनुमानम्।
16. **प्रश्नः**— आप्तवाक्यं किम्?
    उत्तरम्— शब्दः।
17. **प्रश्नः**— वह्निना सिञ्चति अत्र को दोषः?
    उत्तरम्— योग्यताभावः।
18. **प्रश्नः**— परामर्शजन्य-ज्ञानस्य का संज्ञा?
    उत्तरम्— अनुमितिः।
19. **प्रश्नः**— अनुमितेः किं कारणम्?
    उत्तरम्— अनुमानम्।
20. **प्रश्नः**— बुद्धिः इत्यस्य का परिभाषा?
    उत्तरम्—अज्ञानान्धकारतिरस्कारकारकसकलपदार्थ-स्यार्थप्रकाशकः प्रदीप इव देदीप्यमानः आत्माश्रयो यः प्रकाशः सा बुद्धिः।
21. **प्रश्नः**— संशयस्य का परिभाषा?
    उत्तरम्— अनिश्चयात्मकत्वं संशयः।
22. **प्रश्नः**— संज्ञासंज्ञिसम्बन्धज्ञानस्य कारणं किम्?
    उत्तरम्— उपमानप्रमाणम्।
23. **प्रश्नः**— सादृश्यज्ञानकरणं ज्ञानं किम्?
    उत्तरम्— उपमितिः।
24. **प्रश्नः**— अनुमितिः कस्माद् अनन्तरं जायते?
    उत्तरम्— परामर्शात्।

(प) शाब्दबोधप्रक्रिया एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

न्यायदर्शनाभिमतेषु प्रमाणेषु शब्दो ह्यन्त्यं प्रमाणम्। न्यायसूत्रेऽभिहितम्–'आप्तोपदेशः शब्दः'। वस्तुनो यथार्थरूपवेत्ता आप्त इति कथ्यते। लौकिकवैदिकत्वेन शब्दो द्विविधः। लौकिकानामाप्तपुरुषाणां वाक्यं लौकिकशब्दः, किञ्च श्रौतं वाक्यं वैदिकशब्द इति कथ्यते। वाक्यं पदसमूहो भवति। पदं स्वबोधाय शक्त्यपेक्षी। न्यायविदः शक्तिं द्विविधा मन्यन्ते। ते च स्तः अभिधा लक्षणा च। सङ्केतग्रहमधिकृत्य दार्शनिकेषु मतभेदो दृश्यते। प्राञ्चो नैयायिका ईश्वरेच्छाम्–इदं पदमिममर्थं बोधयेत्– सङ्केतत्वेनाभ्युपगच्छन्ति। नव्याः पुरुषस्यापीच्छां सङ्केतत्वेनाङ्गीकुर्वन्ति। वस्तुतस्तु न्यायो जातिव्यक्त्या-कृतीस्तिस्रोऽप्येताः सङ्केतत्वेन स्वीकुर्वाणो वाक्यार्थबोधाय आकाङ्क्षा-योग्यतासत्तीरपेक्षते। पदविशेषोपस्थितेन पदार्थे सद् पदान्तरोपस्थितस्य पदार्थस्य यः सम्बन्धः, तस्य ज्ञानं शाब्दबोधः। शाब्दबोधे पदज्ञानं, पदज्ञानजन्यपदार्थस्मरणम्, पदपदार्थयोः सम्बन्धज्ञानात्मकं वृत्तिज्ञानं, आसत्तिः, योग्यता, आकांक्षा, तात्पर्यम् इत्येतानि कारणानि। तेषां मध्ये पदज्ञानं शाब्दबोधे करणम्। करणं तु व्यापारवत्। व्यापारश्चास्मिन् शाब्दबोधे पदज्ञानजन्यपदार्थस्मरणम्। पदज्ञानजन्य-पदार्थोपस्थितौ च वृत्त्या वृत्तिज्ञानेन वा पदजन्यत्वं बोध्यम्। वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्धः। तत्र अस्मात् पदात् अयम् अर्थो बोद्धव्य इति। अन्वयबोधिका शक्तिः पदे एव वर्तते। नैयायिकमते पदेन पदज्ञानेन वा शुद्धाः पदार्थाः उपस्थाप्यन्ते। तदनन्तरं आकांक्षादिबलात् वाक्यार्थबोधो भविष्यति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— न्यायसूत्रानुसारं शब्दस्य का परिभाषा?
   उत्तरम्— आप्तोपदेशः शब्दः।
2. **प्रश्नः**— यथार्थरूपवेत्ता कः भवति?
   उत्तरम्— आप्त इति कथ्यते।
3. **प्रश्नः**— शब्दो कतिविधः के च ते?
   उत्तरम्— द्विविधः, लौकिकवैदिकत्वेन।
4. **प्रश्नः**— लौकिकशब्दः किं भवति?
   उत्तरम्— लौकिकानामाप्तपुरुषाणां वाक्यम्।

5. **प्रश्नः**— श्रौतवाक्यं किं कथ्यते?
उत्तरम्— वैदिकशब्दः।

6. **प्रश्नः**— पदं स्वबोधाय किं अपेक्षते?
उत्तरम्— शक्तिम्।

7. **प्रश्नः**— न्यायविदः शक्तिं कतिधा स्वीकुर्वन्ति?
उत्तरम्— द्विविधा मन्यन्ते।

8. **प्रश्नः**— ते च शक्ती कौ स्तः?
उत्तरम्— अभिधा लक्षणा च।

10. **प्रश्नः**— न्याये पदः किमस्ति?
उत्तरम्— वर्णसमूहः।

11. **प्रश्नः**— न्यायनये वाक्यं किम्?
उत्तरम्—आकाङ्क्षायोग्यतासन्निधिमतां पदानां समूहः।

12. **प्रश्नः**— शब्दबोध: किमस्ति?
उत्तरम्— शब्दश्चासौ बोधः।

13. **प्रश्नः**— वाक्यार्थ-बोधस्य कानि चत्वारि साधनानि?
उत्तरम्— 1. आकांक्षा, 2. योग्यता, 3. सन्निधिः, 4. तात्पर्यम्।

14. **प्रश्नः**—'अग्निना सिञ्चति' इति वाक्यं कथं न संगच्छते?
उत्तरम्— योग्यताविरहात्।

15. **प्रश्नः**— वृत्ति इत्यस्य कानि त्रिप्रकाराणि?
उत्तरम्— 1. अभिधा, 2. लक्षणा, 3. गौणी।

(फ) ईश्वरः तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

ईश्वरः जगतः सृष्टि-पालन-संहारकर्ता वर्तते। सः विश्वस्य रचना अणुना करोति, यः सूक्ष्मतमरूपे सर्वदा विद्यमानो विद्यते। न्यायदर्शनमीश्वरवादि अस्ति। न्यायसूत्रकर्ता गौतमो ब्रूते यद् ईश्वरो जीवकर्मानुरूपं जगत् सृजति। जीवो यादृशं कर्माचरति स तत्कर्मानुकूलमेव फलमपि प्रददाति। सृष्टिः प्रलयश्च तदिच्छाधीनः। सः शून्येन संसारं न करोत्यपि तु नित्यपरमाणुदिक्-कालाकाशमनआत्मभिस्तं रचयति। स च संसारस्य निमित्तकारणं न चोपादानकारणमपि। तस्य सन्ति षड्गुणाः–1. आधिपत्य, 2. वीर्य, 3. यश, 4. श्री, 5. ज्ञान, 6. वैराग्य। सः सर्वज्ञोऽस्ति। सर्वज्ञ एव परमाणुसदृश-सूक्ष्मतमसत्तानामपरोक्षज्ञानं लब्धुमर्हति।

प्रतीच्याः शंसन्ति केचन ईश्वरो जगत उपादानानां केवलं संयोजक एव न, उपादानानां स्रष्यपि वर्तते। नैयायिका भारतीया वदन्ति न स उपादानस्रष्टा केवलं संयोजकोऽस्ति। न्यायदर्शनस्य तद्विध ईश्वरवादो वस्तुतः शिक्षाप्रदः शान्त्याधायकश्च। तस्य सर्वथैव व्यावहारिकत्वात् मानवजीवनं यथा तदुपकरोति न तथा दर्शनान्तराण्युपकर्तुं प्रभवन्ति। ईश्वरः प्राणिमात्रस्य नैतिकशासकोऽस्ति। ईश्वरः जीवानां कर्मफलदाता अपि वर्तते। अस्माकं सुख-दुःखस्य नियामको विद्यते।

ईश्वरः तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—नैयायिकानां मते ईश्वरस्य कति गुणा वर्तन्ते?
उत्तरम्— अष्टौ गुणाः।

2. **प्रश्नः**—ईश्वरस्य अष्टौ गुणाः के सन्ति?
उत्तरम्— संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, बुद्धिः, इच्छा, प्रयत्नः।

3. **प्रश्नः**—न्यायानुसारं कानि षडैश्वर्याणि?
उत्तरम्— 1. आधिपत्य, 2. वीर्य, 3. यश, 4. श्री, 5. ज्ञान, 6. वैराग्य।

4. **प्रश्नः**—ईश्वर-सिद्धिः कस्य दर्शनस्य प्रतिपाद्यो विषयः?
उत्तरम्— न्याय-दर्शनस्य।

5. **प्रश्नः**—नित्यज्ञानाधिकरणकारणत्वमीश्वरत्वम् इति कुत्र उद्धृतः?
उत्तरम्— तर्कदीपिकायाम्।

6. **प्रश्नः**— न्यायसूत्रकर्ता गौतमो ईश्वरविषये किं ब्रूते?
उत्तरम्— ईश्वरो जीवकर्मानुरूपं जगत् सृजति।

7. **प्रश्नः**—नित्यज्ञानवान् सृष्टिस्थितिप्रलयकर्ता सर्वशक्तिमान् कः?
उत्तरम्— ईश्वरः।

8. **प्रश्नः**— सृष्टिः प्रलयश्च कस्याधीनः?
उत्तरम्— ईश्वराधीनः।

9. **प्रश्नः**— ईश्वरः किं रचयति?
उत्तरम्—नित्यपरमाणु-दिक्-कालाकाशमन-आत्मानम्।

10. **प्रश्नः**— ईश्वरः संसारस्य निमित्तकारणमुपादानकारणं वा?
उत्तरम्— निमित्तकारणम्।

11. **प्रश्नः**— सुख-दुःखस्य नियामकः कः?
उत्तरम्— ईश्वरः।

12. **प्रश्नः**— जीवानां कर्मफलदातार कः?
उत्तरम्— ईश्वरः।

13. **प्रश्नः**— प्रणिमात्रस्य नैतिकशासकः कः?
उत्तरम्— ईश्वरः।

14. **प्रश्नः**—संख्याबुद्धिच्छयाप्रयत्नसुखानीति पंचैव ईश्वरस्य गुणाः इति कस्य आचार्यस्य कथनम्?
उत्तरम्— कपिलस्य।

(ब) आत्मा एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

न्यायः आत्मायाः स्वरूपस्य स्वतन्त्रतां दर्शयित्वा तं शरीरात् एवं इन्द्रियात् पृथक् स्थायी-नित्यपदार्थः प्रमाणयति। नैयायिकस्य मुक्तेः सिद्धान्तः अन्यदार्शनिकानां कौतुकावहकटाक्षस्य विषयो वर्तते। मुक्तावस्थायां समस्त अज्ञानावरणेभ्यः विमुक्तः आत्मायां नित्य-आनन्दं स्वीकर्तारः वेदान्ती श्रीहर्षः नैषधीयचरिते नैयायिकमुक्तिः। नैयायिकानां मते ज्ञानम् आत्मनो न स्वरूपम् अपि तु धर्मविशेषः। एवम् आनन्दम् अपि नात्मनः स्वरूपम् अपितु गुणविषय एव। जीवात्मा परमात्मा च आत्मशब्देन व्यपदिश्यते। आत्मा तु परमात्मा क्षेत्रज्ञश्चेति द्विविधः। परमात्मा ईश्वरः एक एव। सुखदुःखादीनाम् आश्रयो जन्ममरणाधीनश्च जीवात्मा। नित्यज्ञानवान् सृष्टिस्थितिप्रलयकर्ता सर्वज्ञः सर्वशक्तिमान् ईश्वरः।

न्याय-वैशेषिकमतेन आत्मा ईदृशः पदार्थोऽस्ति यत्र बुद्धिः, ज्ञानं, सुखं, दुःखं, राग, द्वेष, इच्छा, कृति, प्रयत्नश्च वर्तन्ते। प्रतिशरीरम् अस्ति भिन्न-भिन्न आत्मा। तद्गतानुभवानां सर्वथैव पार्थक्यात्। आत्मा विभुरविनाशी नित्यश्चास्ति। अस्ति च जीवात्माल्पज्ञः। अत्र दर्शनान्तराणां वैमत्यं दृश्यते। चार्वाकदर्शनं चैतन्यविशिष्टं शरीरमात्मेति मन्यते। बौद्धदर्शनं मानसिकानुभवानां विभिन्नप्रवृत्तीनाञ्च संघाताद् भिन्नो न कश्चिदात्मेति ब्रवीति। अद्वैतवेदान्तस्याभिधानमेतद् यदात्मास्त्येक एव। स नित्यः स्वप्रकाशचैतन्यम्, विशिष्टाद्वैतमतेनात्मा न केवलं चैतन्यमस्ति च स ज्ञाता। अतः सः 'अहम्' इति वक्तुं शक्यः।

आत्मास्त्येकं द्रव्यम्। तस्य च द्रव्यस्य अस्ति गुणश्चैतन्यम्। नास्त्यात्मा ज्ञानम् अपि तु सोऽस्ति ज्ञाता। अस्ति सः अहङ्काराश्रयः किञ्च भोक्ता। यद्यपि ज्ञानं वा चैतन्यमात्मनो गुणत्वेन वर्तते परं न तौ गुणावात्मनः स्वरूपलक्षणत्वेन मतौ स्तः। आत्मनि चैतन्यस्य सञ्चारस्तदैव सञ्जायते यदा तस्य मनसा सह, मनस इन्द्रियैः सह इन्द्रियाणां बाह्यवस्तुभिश्च सह भवति संयोगः। एवंविधसंयोगाभावे नात्मनि चैतन्यस्योदयः सम्भवः।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—ज्ञानस्य अधिकरणं किमस्ति?
उत्तरम्—आत्मा।

2. **प्रश्नः**—नैयायिकः आत्माविषये किं मन्यते?
उत्तरम्—आत्मा प्रतिशरीरे भिन्नं भिन्नं वर्तते।

3. **प्रश्नः**—देहेन्द्रियेभ्यो भिन्नो नित्यो विभुः आत्मा केभिः अङ्गीक्रियन्ते?
उत्तरम्—नैयायिकवैशेषिकैः।

4. **प्रश्नः**—'आत्मा वा अरे द्रष्टव्यः' इति कस्य वचनम्?
उत्तरम्—वेदस्य।

5. **प्रश्नः**—'चैतन्यविशिष्टे देह एव आत्मा' इति कस्य कथनं वर्तते?
उत्तरम्—चार्वाकमहोदयस्य।

6. **प्रश्नः**—'शून्यमेवात्मा' इति कस्य कथनं विद्यते?
उत्तरम्—बौद्धेषु माध्यमिकानां मते।

7. **प्रश्नः**—योगाचारबौद्धानां मते आत्मायाः किं स्वरूपम्?
उत्तरम्—विज्ञानस्वरूप आत्मा।

8. **प्रश्नः**—जैनानां मते आत्मायाः किं स्वरूपम्?
उत्तरम्—देहपरिमाणो देहाद्यतिरिक्तो जीवात्मा।

9. **प्रश्नः**—तर्कसंग्रहकर्ता अन्नम्भट्टः आत्माविषये किं कथितवान्?
उत्तरम्—जीवस्तु प्रतिशरीरं विभुर्नित्यश्च।

10. **प्रश्नः**—आत्मा ज्ञानस्वरूपः सुखस्वरूपश्च केन मन्यते?
उत्तरम्—वेदान्तिकाः।

11. **प्रश्नः**—आत्मशब्देन के व्यपदिश्यन्ते?
उत्तरम्—जीवात्मा परमात्मा च।

(भ) परमाणुकारणवादः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

भारतवर्षस्य नैयायिकाः वैशेषिकाश्च जगति अनेकवादानां समर्थकाः आसन्, एवं ते परमाणुद्वारा सृष्टिं मन्यन्ते। प्रतीच्यानां परमाणुवादिनां परमाणुवादो भारतीयानां परमाणुवादिनां परमाणुवादाद् भिन्नोऽपि समवाप्यते। प्रतीच्यः परमाणुवादः परमाणोर्गतिशीलत्वं जगत्पदार्थनिर्माणकारित्वञ्च स्वीकुरुते। परं भारतीयः परमाणुवादः परमाणुं जडं मन्यते परमेश्वरेच्छया तत्र गतिरुत्पद्यते-इत्येतच्च तन्मतम्। प्रतीच्येषु देशेषु सोफिस्ट इत्येतां संज्ञा भजमाना दार्शनिका मानवजीवनस्य समस्याः समीक्षमाणाः पर्यवलोच्यन्ते। एषामुपदेशेषु सत्यं तत्त्वज्ञानं व्यराजत। प्रोटेगोरस एतेषु श्रेष्ठो विद्वान् सञ्जातः।'मनुष्य एव पदार्थानां मानदण्डः' इत्येषा हि तस्योक्तिः आसीत्। अनेन अनेक-बीजानां स्थाने चत्वारि मूलतत्त्वानि (1. अग्निः, 2. वायुः, 3. जलम्, 4. पृथ्वी) स्वीक्रियते।

परमाणवो नाम क्षित्यप्तेजोवायुरूपाणां चतुर्विधानां भौतिकद्रव्याणाम् अन्त्यावयवरूपा अतीन्द्रिया भावपदार्था इति। निरवयवः क्रियावान् परमाणुः इति सप्तपदार्थाः; एतेभ्यः परमाणुभ्यः एव पार्थिव-जलीय-तेजस-पदार्थानाम् उत्पत्तिः स्वीक्रियते। तत्र अयं क्रमः परमाणुद्वयसंयोगाच्च त्रसरेणुः त्र्यणुकं वा, त्र्यणुकचतुष्टयसंयोगात् चतुरणुकम् इति न्यायवैशेषिकाः स्वीकुर्वन्ति।

विश्वस्य अन्तिम-उपादानं तु परमाणुः भवति। यः स्वयं जडोऽस्ति। इदं जड-उपादानं यदि चेतन-अध्ययनस्य संरक्षताभावे सुव्यवस्थित-नियमतः परिचालितविषयस्य उत्पत्तेः असमर्थोऽभूत्। ईश्वरः सर्वज्ञः सर्वशक्तिमान् व्यापकश्च वर्तते। अयं चेतनपदार्थः अणूनां पूर्णज्ञानं लभते। किंच अणुना तं जगतः रचनात्मकं ज्ञानं भवति। सः कोऽपि उद्देश्यस्य पूर्तिकर्तुमिच्छया (चिकीर्षा) तत्परोऽस्ति। सर्वज्ञः एव परमाणु-सदृशानां अत्यन्तसूक्ष्मतमपदार्थानां ज्ञातुं योग्यो भवति। एवं प्रकारेण विश्वरूपी कार्यैः वयं कर्ता ईश्वरस्य सत्तां मन्यामहे।

परमाणुकारणवादस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— विश्वस्य अन्तिमं उपादानं किम्?
उत्तरम्—परमाणुः।

2. **प्रश्नः**— 'परमाणु' द्वारा सृष्टिं कैः मन्यन्ते?
उत्तरम्—नैयायिक-वैशेषिकैः।

3. **प्रश्नः**— परमाणुवादः परमाणोर्गतिशीलत्वं जगत्पदार्थ-निर्माणकारित्वञ्च केन स्वीकुरुते?
उत्तरम्—प्रतीच्येन (यूनानी)।

4. **प्रश्नः**— भारतीयः परमाणुवादः किं मन्यते?
उत्तरम्—परमाणुं जडम्।

5. **प्रश्नः**—भारतीयः परमाणुवादः गतिरुत्पादकं केन मन्यते?
उत्तरम्—परमेश्वरेच्छया।

6. **प्रश्नः**— 'मनुष्य एव पदार्थानां मानदण्डः' इत्येषा हि कस्योक्तिः?
उत्तरम्—प्रोटेगोरसस्य।

7. **प्रश्नः**— चत्वारि मूलतत्त्वानि कानि?
उत्तरम्— 1. अग्निः, 2. वायुः, 3. जलम्, 4. पृथ्वी।

8. **प्रश्नः**— संकर्षणेन किं भवति?
उत्तरम्—सृष्टिः।

9. **प्रश्नः**— विकर्षणेन किं भवति?
उत्तरम्—प्रलयः।

10. **प्रश्नः**— जगद्रचनात्मकं ज्ञानं केन भवति?
उत्तरम्—अणुना।

11. **प्रश्नः**— अत्यन्तसूक्ष्मतमं किं भवति?
उत्तरम्—परमाणुकणम्।

(म) अभावविमर्शः तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

मीमांसाकानां कथनमेतद्– "सम्बन्धो भवत्येकः, उभयाश्रितः, सम्बन्धिभ्यो भिन्नश्च। नैतद् वैशिष्ट्यं विशेषणविशेष्यभावे संलक्ष्यते; अतो न विशेषणविशेष्यभावः सम्बन्धः। मीमांसकेषु भाट्टा अनुपलब्धिं प्रमाणं स्वीकुर्वन्ति परं प्राभाकरा अभावमधिकरणरूपत्वेन मत्वा न तत्सत्तां स्वतन्त्रां मन्यन्ते। भाट्टमीमांसकानां किञ्च अद्वैतवेदान्तिनां मतमिदम्– कस्यचन विषयस्य अभावो येन ज्ञानविषयीक्रियते तदनुपलब्धिप्रमाणमिति कथ्यते। अत्र घटस्याभावोऽस्तीत्येतज्ज्ञानं केन प्रकारेण भवितुं शक्यम्? न तादृशं ज्ञानं प्रत्यक्षज्ञानमिति वक्तुं सुशकम्। अभावस्तु नैवंविधः पदार्थो य इन्द्रियैः प्राप्तव्यः स्यात्। घटस्तु चक्षुरिन्द्रियसन्निकृष्टो भवितुमर्हति परं घटाभावो न। घटाभावस्य ज्ञानमनुपलब्धिहेतोर्भवति। तस्मादनुपलब्धिः स्वतन्त्रं प्रमाणमस्ति।

अभावः द्वौ प्रकारकौ भवतः– 1. संसर्गाभावः, 2. अन्योन्याभावः। द्वयोः वस्तुनोः संसर्गसम्बन्धस्य वा निषेधः संसर्गाभावः। द्वयोः वस्तुनोः पारस्परिकभेदः अन्योन्याभावः। त्रिभेदात्मकं ससर्गाभावः भवति-1. प्रागभावः, 2. प्रध्वंसाभावः, 3. अत्यन्ताभावः। अन्योन्याभाव एकैव। उत्पत्तेः प्राक् (कारणे कार्यस्य) अभावः प्रागभावः, उत्पत्तेः कारणे कार्यस्य अभावः प्रध्वंसाभावः, द्वयोः वस्तुनोः संसर्गः वर्तमान-भूत-भविष्यत्कालेषु अविद्यमानम् अन्योन्याभावो भवति। यस्याभावः तं न्यायस्य दार्शनिकभाषायां 'प्रतियोगी' इति कथ्यते। अस्मिन् अत्यन्ताभावे प्रतियोगिता संसर्गावच्छिन्ना भवति। कश्चित् संसर्गविशेषस्य अवलम्बनं कृत्वा वस्तुनः अन्यवस्तुना अभावः स्वीकरोति। एकवस्तुद्वितीयवस्तुनो भूते सति अन्योन्याभावो भवति। यथा– 'घटः पटो न, पटः घटो न'। अभावप्रत्यक्षे कः सन्निकर्षः? अभावप्रत्यक्षे विशेषविशेष्यभावः सन्निकर्षः घटाभाववद् भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्। एवं सन्निकर्षघटकजन्यं ज्ञानं प्रत्यक्षं तत्करणमिन्द्रियं तस्मादिन्द्रियं प्रत्यक्षं प्रमाणमिति सिद्धम्।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—सर्वदर्शनकारः अभावस्य का परिभाषा विहिता?
उत्तरम्—असमवायित्वे सत्यसमवायः अभावः।

2. **प्रश्नः**—मुक्तावल्याम् अभावस्य किं स्वरूपं विहितम्?
उत्तरम्—द्रव्यादिषट्कान्योन्याभाववत्त्वम् अभावत्त्वम्।

3. **प्रश्नः**—अभावस्य ज्ञानं कस्य हेतोर्भवति?
उत्तरम्—अनुपलब्धेः।

4. **प्रश्नः**— अभावस्य प्रमाणत्वं कः स्वीकरोति?
उत्तरम्— भाट्टः।

5. **प्रश्नः**— अभावस्य कौ द्वौ प्रकारौ?
उत्तरम्—1. संसर्गाभावः, 2. अन्योन्याभावः।

6. **प्रश्नः**—संसर्गाभावः कः?
उत्तरम्— द्वयोः वस्तुनो संसर्गसम्बन्धस्य वा निषेधः।

7. **प्रश्नः**— अन्योन्याभावः कः?
उत्तरम्—द्वयोः वस्तुनो पारस्परिकभेदः।

8. **प्रश्नः**— त्रिभेदात्मकः ससर्गाभावः के भवन्ति?
उत्तरम्—1. प्रागभावः, 2. प्रध्वंसाभावः, 3. अत्यन्ताभावः।

9. **प्रश्नः**— एकैव भेदात्मकः कः?
उत्तरम्—अन्योन्याभावः।

10. **प्रश्नः**— उत्पत्तेः प्राक् (कारणे कार्यस्य) अभावः कः?
उत्तरम्—प्रागभावः।

11. **प्रश्नः**— उत्पत्तेः कारणे कार्यस्य अभावः कः?
उत्तरम्—प्रध्वंसाभावः।

12. **प्रश्नः**— कः अन्योन्याभावो भवति?
उत्तरम्—द्वयोः वस्तुनोः संसर्गः त्रिकालेषु अविद्यमानत्वम्।

13. **प्रश्नः**—यस्याभावः सः न्यायस्य दार्शनिकभाषायां किं कथ्यते?
उत्तरम्—प्रतियोगी।

14. **प्रश्नः**— अन्योन्याभावस्य किमुदाहरणम्?
उत्तरम्— 'घटः पटो न, पटः घटो न'।

15. **प्रश्नः**—अभावप्रत्यक्षस्य कः सन्निकर्षः?
उत्तरम्— विशेषणविशेष्यभावः।

16. **प्रश्नः**—असमवायत्वम् इत्यनेन समवायस्य किं भवति?
उत्तरम्— व्यावृत्तिः।

(य) मोक्षविचारः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

आध्यात्मिकाधिदैविकाधिभौतिकेभ्यः त्रिविधदुःखेभ्यः निवृत्तिरेव मोक्षः, दुःखस्यात्यन्तिकीं निवृत्तिं मोक्षम् इति नैयायिकाः मन्यन्ते। इयं दुःखनिवृत्तिः विवेकज्ञानाद् एव भवति। अतः प्रकृति-पुरुषयोः विवेकज्ञानादेव सुख-दुःख-मोहान् प्रकृतिप्रदत्तान् भोगान् वा अनुभवन् जीवः बन्धनात् मुच्यते। इत्थं विवेकज्ञानमेव अपवर्गः। अर्थात् ज्ञानेन स्वकीयं सप्तस्वरूपात्मकम् अज्ञानधर्माधर्मवैराग्या-वैराग्यैश्वर्यात्मकं नैश्यात्मकं स्वरूपं दर्शयित्वा आत्मानं मोचयति इति भावः। अतः कुलालचक्रवत् प्रारब्ध-कर्मक्षयपर्यन्तं सः पुरुषः शरीरं धारयत्येव, पुनश्च शरीरविनाशे दुःखत्रयनिराशः ऐकान्तिकात्यन्तिकदुःखनिवृत्तिः वा भवत्येव। अयमेव मोक्षः।

कति दुःखानि ते वदन्ति? एकविंशतिसंख्यकानि, तथाहि-शरीरम्, षडिन्द्रियाणि, षड्विषयाः, षड्बुद्धयः, सुखं दुःखञ्च गौणमुख्यभेदात्। एतेभ्यः पूर्णतया मुक्तिं प्राप्तायां सत्यां मोक्षः (अपवर्गः) लभ्यते। तदा आत्मनो दुःखानामेव न सुखानामपि समाप्तिर्भवति। न ततः कीदृश्यप्यनुभूतिरवशिष्यते। मुक्त आत्मा सुखदुःखेभ्यः परस्ताद् भवन् एकान्ततोऽचेतनः सञ्जायते। एष च मोक्षः श्रवण-मनन-निदिध्या-सनोपायावलम्बनेन प्राप्तो जायते। नैयायिकानामपवर्गो यदि सुखरहितस्तदा वेदान्तिनां स सुखपूर्णः।

उद्योतकारः द्वौ प्रकारकौ निःश्रेयसौ मन्यते, 1. अपरनिःश्रेयस (जीवन्मुक्तिः), 2. परनिःश्रेयस (विदेहमुक्तिः)। मिथ्याज्ञानस्य नाशो तत्त्वज्ञानेन भवति। आत्मस्वरूपविषयकतत्त्वज्ञानेन मोक्षस्य सिद्धिर्भवति। तत्त्वज्ञानेन आत्मसाक्षात्कारस्य सिद्ध्यर्थं ध्यान-धारणादियोगप्रसिद्ध-उपायाणामवलम्बनम्।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—नैयायिकानुसारं मोक्षं किम्?
   उत्तरम्— दुःखस्य आत्यन्तिकी-निवृत्तिः एव मोक्षः।
2. **प्रश्नः**—कति दुःखानि ते वदन्ति?
   उत्तरम्— एकविंशतिसंख्यकानि।
3. **प्रश्नः**—कानि च एकविंशतिसंख्यकानि दुःखानि?
   उत्तरम्— शरीरम्, षडिन्द्रियाणि, षड्विषयाः, षड्बुद्धयः, सुखं दुःखञ्च।
4. **प्रश्नः**— उद्योतकारः कौ द्वौ प्रकारकौ निःश्रेयसौ मन्यते?
   उत्तरम्— 1. अपरनिःश्रेयस (जीवन्मुक्तिः), 2. परनिःश्रेयस (विदेहमुक्तिः)।
5. **प्रश्नः**—मिथ्याज्ञानस्य नाशो केन भवति?
   उत्तरम्— तत्त्वज्ञानेन।
6. **प्रश्नः**—मोक्षस्य सिद्धिः केन भवति?
   उत्तरम्— आत्मस्वरूपविषयकतत्त्वज्ञानेन।
7. **प्रश्नः**—तत्त्वज्ञानेन आत्मसाक्षात्कारस्य **सिद्ध्यर्थं** किं करणीयम्?
   उत्तरम्—ध्यान-धारणादियोगप्रसिद्ध-उपायाणा-मवलम्बनम्।
8. **प्रश्नः**— आगमशास्त्रे मुक्तस्य स्वरूपं किमस्ति?
   उत्तरम्—सर्वतन्त्रस्वतंत्रः।
9. **प्रश्नः**— मोक्षस्य किं लक्षणम्?
   उत्तरम्—आध्यात्मिकाधिदैविकाधिभौतिकेभ्यः त्रिविधदुःखेभ्यः निवृत्तिरेव मोक्षः।

(र) सांख्ययोग प्रमाणानि एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

सांख्यम् अतितरं प्राचीनं दर्शनं वर्तते। अस्य दर्शनस्य रचयितासीत् कपिलो मुनिः। सांख्यदर्शने प्रकृतिपुरुषान्यताख्यातिः इत्येष सिद्धान्तो निरूपितस्तस्मात् **'सांख्यम्'** इत्येतां ख्यातिं भजते दर्शनमिदम्। सांख्यदर्शनं हि द्वैतवादी। तद्दृष्ट्या प्रकृतिः पुरुषश्च नित्यः पदार्थः। उभयमपि तन्मूलतत्त्वत्त्वेन विद्यते। सांख्यशास्त्रं त्रीणि प्रमाणानि मन्यते। तानीमानि–**1. प्रत्यक्षम्**–इन्द्रियैः सह कंश्चित् विषयस्य संयोगे सति यं साक्षाज्ज्ञानं भवति सः प्रत्यक्षः। इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं इति अन्नम्भट्टपादाः। इन्द्रियस्य अर्थे सन्निकर्षाद् यज्जनं तत्प्रत्यक्षम् इत्यर्थः। इन्द्रियं चक्षुः श्रोत्रं घ्राणं रसनकं त्वक् चेति पंचकम्। अर्थो घटादिः इन्द्रियग्रहणयोग्यो विषयः। तयोः इन्द्रियार्थयोः स्वस्वग्राह्यविषयैः सह इन्द्रियाणां सम्बन्धः

सन्निकर्षः। तज्जन्यं ज्ञानं प्रत्यक्षम् इत्यर्थः। प्रत्यक्षः द्विविधः–1. आलोचनम् (निर्विकल्पः), 2. सविकल्पः। **2. अनुमानम्**–व्याप्यव्यापकज्ञानपूर्वकम्। अन्वयमुखेन प्रवृत्तम् अनुमानम्। अनुमीयते अनेन इति अनुमानम् इति व्युत्पत्त्या अनुमितिकरणम् अनुमानम्। लिंगपरामर्श एव अनुमानम्। **3. शब्दः**–आत्मवचनं शब्दः, शब्दस्य द्वौ भेदौ–1. लौकिकशब्दः, 2. वैदिकशब्दः। अन्यानि प्रमाणानि उपमानादीनि तत् तेष्वेव त्रिषु अन्तर्भावयति। सांख्यदर्शनमतेन ज्ञानस्य प्रामाण्यमप्रामाण्यञ्च उभयमपि स्वतः। उक्तञ्च-'प्रमाणाप्रमाणत्वे स्वतः संख्याः समाश्रिताः' सत्कार्यवाददृष्ट्या असत् पदार्थोत्पत्तिरेव न भवति। अतः ज्ञानान्तरं समुदितयोः प्रामाण्याप्रामाण्ययोस्तु ज्ञानं निसर्गतोवसतिं विदधाति। वेदानि ईश्वरकृतानि भूते सति अपौरुषेयो वर्तते।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— सांख्यदर्शनस्य रचयिता कः आसीत्?
   उत्तरम्— कपिलो मुनिः।
2. **प्रश्नः**—सांख्यदर्शनस्य कः सिद्धान्तः?
   उत्तरम्— प्रकृतिपुरुषान्यताख्यातिः।
3. **प्रश्नः**—द्वैतवादिदर्शनं किम्?
   उत्तरम्— सांख्यदर्शनम्।
4. **प्रश्नः**—सांख्यदृष्ट्या प्रकृतिः पुरुषश्च कः पदार्थः?
   उत्तरम्— नित्यः पदार्थः।
5. **प्रश्नः**—सांख्यशास्त्रं कति प्रमाणानि मन्यते?
   उत्तरम्— त्रीणि।
6. **प्रश्नः**— सांख्यमते कानि त्रीणि प्रमाणानि?
   उत्तरम्— 1. प्रत्यक्षम्, 2. अनुमानम्, 3. शब्दः।
7. **प्रश्नः**— सांख्यदर्शनमतेन ज्ञानस्य का संख्या समाश्रिता?
   उत्तरम्—प्रमाणाप्रमाणत्वे स्वतः संख्याः समाश्रिताः।
8. **प्रश्नः**— सांख्यमते प्रत्यक्षम् इत्यस्य का परिभाषा?
   उत्तरम्— इन्द्रियैः सह कश्चित् विषयस्य संयोगे सति यं साक्षाज्ज्ञानं भवति सः प्रत्यक्षः।
9. **प्रश्नः**— सांख्यदर्शनानुसारं प्रत्यक्षः कतिविधः के च ते?
   उत्तरम्— द्विविधः–1. निर्विकल्पः, 2. सविकल्पः।
10. **प्रश्नः**— अनुमानमित्यस्य किं स्वरूपम्?
    उत्तरम्—अनुमीयते अनेन इति अनुमानम् इति व्युत्पत्त्या अनुमितिकरणम् अनुमानम्। लिंगपरामर्श एव अनुमानम्।
11. **प्रश्नः**— सांख्यदर्शनुसारं अनुमानस्य कति भेदाः के च ते?
    उत्तरम्— द्वौ भेदौ, 1. वीतः, 2. अवीतः।
12. **प्रश्नः**— शब्दप्रमाणस्य का परिभाषा?
    उत्तरम्—आत्मवचनं शब्दः।
13. **प्रश्नः**—शब्दस्य कौ द्वौ भेदौ?
    उत्तरम्— 1. लौकिकशब्दः, 2. वैदिकशब्दः।

(ल) सांख्यमते प्रधानकारणवादः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

सांख्यदर्शने **प्रकृतिपुरुषान्यताख्यातिः** इत्येष सिद्धान्तो निरूपितः। संख्यापदस्यार्थोऽस्ति–**'सम्यग् ज्ञानम्'**। उक्तञ्च शाङ्करविष्णुसहस्रनामभाष्ये– **शुद्धात्मतत्त्वविज्ञानं सांख्य-मित्यभिधीयते।** आह च सांख्यकारिका–

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥

एतेषां तत्त्वानां ज्ञानेन मानवः, कामं सः संन्यासी स्याद् वा ब्रह्मचारी वा गृहस्थः, दुःखेभ्यो मुक्तो भवति। उक्तञ्च सांख्यसंग्रहे–

पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे रतः।
मुण्डी जटी शिखी वापि मुच्यते नात्र संशयः॥

एषां तत्त्वानां मध्ये प्रकृतिः सर्वेषामपि कारणमस्ति न सा कस्यापि कार्यमतः सा प्रकृतिः। किंवा अव्यक्तम् यद्वा प्रधानमित्युच्यते। क्वचित् मूलप्रकृतिरेवेत्युक्तम्, क्वचिद् (षड्दर्शनसमुच्चये) आत्मानमात्मानं प्रति प्रकृतिरित्याम्नातम्, क्वचिद् (कठोपनिषदि) बुद्धिर्महच्च पृथक् पृथगिति निगदितम्, क्वचिद् (सांख्यकारिकायां) अभिहितं तन्महत्पदं बुद्धेः पर्यायवाचिपदं, क्वचित् प्रकृतिः स्वतन्त्रसत्ता ख्याता पुरुषात् सा भिन्नैव कथिता, क्वचित् (श्वेताश्वतरोपनिषदि)

सा पुंरूपस्य (ईश्वरस्य) शक्तिरिति कथिता। महाभारते शान्तिपर्वणि क्वचित् चतुर्विंशतिः क्वचित् पञ्चविंशतिः क्वचिच्च षड्विंशतिस्तत्त्वानि वर्णितानि। गीतायां पराऽपरभेदेन प्रकृतेर्द्वैविध्यं दर्शितं, तत्रैव च प्रकृतिर्मायेत्युक्तम्। यदि क्वचित्, तर्हि अन्यत्र सा प्रकृतेर्भिन्नेत्यप्युक्तम्। व्यक्तस्तु महदादयः अव्यक्तं प्रधानं वा प्रकृतिरस्ति।

प्रकृति-स्वरूपम्–हेतुमदनित्यमव्यापि सक्रियम-नेकमाश्रितं लिङ्गं सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्।

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि। व्यक्तं तथा प्रधानम्।

प्रकृतेः स्वरूपम्—अहेतुमती-नित्य-व्यापि-निष्क्रिय-एक-अनाश्रित-अलिंग-निरवयवः-स्वतन्त्र-त्रिगुणात्मक-अविवेकि-विषय-सामान्य-अचेतन-प्रसवधर्मि स्वरूपाऽस्ति। ईदृशी त्रिगुणात्मिका प्रकृतिः पुरुषस्याग्रे स्व-स्वरूपं प्रकटीकरोति पुनः निवर्तते च यथा काऽपि नर्तकी दर्शकस्याग्रे स्व-स्वरूपं दर्शयित्वा पुनः निवर्तते।

रंगस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्।
पुरुषस्य तथाऽत्मानं प्रकाश्य निवर्तते प्रकृतिः॥

सांख्यकारिकाकारः कथयति– **"मूलप्रकृतिः अविकृतिः"** यतः सा कारणमस्ति कार्यं नास्ति। प्रकृतेः सत्ता वर्तते। तस्याः अनुपलब्धिः सौक्ष्म्यादेव अस्ति। **"सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्।"** यथा–

रूपैः स सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण॥

प्रकृतेः सुकुमारतां वर्णयन् ईश्वरकृष्णः कथयति– **'प्रकृतेः सुकुमारतरं न किंचिदस्ति इति मे मतिर्भवति।'** यथा–

या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य॥

सांख्यदर्शनं हि द्वैतवादि। तद्दृष्ट्या प्रकृतिः पुरुषश्च नित्यः पदार्थः। उभयमपि तन्मूलतत्त्वेन विद्यते। तयोः पारस्परिकेण सम्बन्धेन जगत आविर्भावो भवति। तत्र प्रकृतिः अचेतनः पुरुषश्च चेतनः स च प्रतिशरीरं भिन्न-भिन्न एवेति निगद्य तद्द्वैतवादित्वं स्वस्य, समुपस्थापयति।

प्रधानकारणवादस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—सांख्यदर्शनस्य मूलसिद्धान्तः कः?
उत्तरम्— प्रकृतिपुरुषान्यताख्यातिः।

2. **प्रश्नः**—कः संख्यापदस्यार्थोऽस्ति?
उत्तरम्— सम्यग् ज्ञानम्।

3. **प्रश्नः**—सांख्यतत्त्वानां मध्ये प्रधानकारणं किम्?
उत्तरम्— प्रकृतिः।

4. **प्रश्नः**—गीतायां प्रकृतेः द्वैविध्यं केन भेदेन दर्शितम्?
उत्तरम्— पराऽपरभेदेन।

5. **प्रश्नः**—सांख्यदर्शने प्रधानं किं भवति?
उत्तरम्— प्रकृतिः।

6. **प्रश्नः**—प्रकृतेः विकृतिः किम्?
उत्तरम्— महान्।

7. **प्रश्नः**—प्रकृते किं लक्षणम्?
उत्तरम्— त्रिगुणम्।

8. **प्रश्नः**—अविकृतिः किम्?
उत्तरम्— प्रधानम्।

9. **प्रश्नः**—सांख्यकारिका कस्य दर्शनस्य ग्रन्थः?
उत्तरम्— सांख्यदर्शनस्य।

10. **प्रश्नः**—न प्रकृतिः न विकृतिः कोऽस्ति?
उत्तरम्— पुरुषः।

11. **प्रश्नः**— मूलप्रकृतिः अविकृतिः– इति कः कथयति?
उत्तरम्— सांख्यकारिकाकारः।

12. **प्रश्नः**—मूलप्रकृतिः अविकृतिः कारणं कार्यं वा?
उत्तरम्— कारणम्।

13. **प्रश्नः**—कस्य सत्ता वर्तते?
उत्तरम्— प्रकृतेः।

14. **प्रश्नः**—द्वैतवादिदर्शनं किमस्ति?
उत्तरम्— सांख्यदर्शनम्।

15. **प्रश्नः**—सांख्यदृष्ट्या प्रकृतिः पुरुषश्च कः पदार्थः?
उत्तरम्— नित्यः पदार्थः।

16. **प्रश्नः**—प्रकृति-पुरुषयोः पारस्परिकेण सम्बन्धेन कस्य आविर्भावो भवति?
उत्तरम्— जगतः।

17. **प्रश्नः**—प्रकृतिः चेतनः अचेतनो वा?
उत्तरम्— अचेतनः।

18. **प्रश्नः**—पुरुषः अचेतनः चेतनो वा?
उत्तरम्— चेतनः।

(व) गुणाः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

'गुणपर्यायवद् द्रव्यम्' (तत्त्वार्थसूत्र-5/37) सततविद्यमानत्ववस्तुसत्तायै नितान्तावश्यकधर्मं 'गुणः' इति कथ्यते। देशकालजन्यपरिणामशाली धर्मं 'पर्यायः' इति कथ्यते। गुण एवं पर्यायविशिष्टवस्तुनि 'द्रव्यं' इति कथ्यते। गुणाः वस्तुतो द्रव्याण्येव सन्ति। न च ते गुणास्तेषां संयोगविभागवत्वात्, लघुत्वचलत्वगुरुत्वादिधर्मकत्वाच्च। परार्थत्वादेव हि सत्त्वादयो 'गुणाः' इति प्रोच्यन्ते। ते सन्तीन्द्रियातीताः। क्षित्यादिकविकृतिरेव दृग्गोचरीभवति। विकृतिस्त्वस्ति नितान्ततुच्छा।

सांख्यानुसारं सत्त्वरजस्तमोभेदाद् गुणाः सन्ति त्रयः। उक्तञ्च– **सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम्।** 1. **सत्त्वम्**–सत्त्वं सुखरूपम्, सत्त्वस्य प्रकाशकरणं प्रयोजनम्। यस्मिन् सति न कुतश्चिद् भयमुत्पद्यते न कस्यामप्यवस्थायां विषादः समुपजायते तत् सत्त्वम्। मनसि सत्त्वभावनाजागृते सति आनन्द-हर्ष-सुख-संतोषादि उत्पन्नो भवन्ति। 2. **रजः**–रजो दुःखरूपम्, रजसः प्रवृत्तिकरणं प्रयोजनम्। रजो दुःखस्य कारणं रागद्वेषात्मकत्वात्। रजोगुणः स्वयं चञ्चलो भवति, मानवमनांसि क्रियाप्रवर्तको भवति। 3. **तमः**–तमो मोहरूपम्, तमसः नियमनं प्रयोजनमस्ति। तमो मोहस्य हेतुर्मोहात्मकत्वात्। उक्तञ्च सांख्यैः–

सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।
गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः॥

गुणानां साम्यावस्था प्रकृतिः इति नाम्ना गीयते। बौद्धा इव सांख्यशास्त्रिणोऽपि परिणामनित्यतामुररीकुर्वन्ति। प्रकृतिरस्ति नित्यपरिणामशालिनी। परिणतायामप्यवस्थायां गुणानां तत्रानुस्यूतत्वात्। प्रकृतिर्यदा गुणानां साम्यादव्यक्ता-मवस्थां गाहते तदा भवति प्रलयः। प्रलयावस्थायामपि प्रकृतिः परिणामवती भवति। यदा च सा गुणानां वैषम्याद् व्यक्तामवस्थां गृह्णाति तदा सृष्टिर्जायते। सांख्यमते–'यः धर्मकार्ये प्राप्यते स एव कारणेऽपि विद्यमानो वर्तते। अतः जगति मूलकारणप्रकृतेः अपि एतैः गुणाः विद्यमानाः भवन्ति। एषां गुणानां रंगः त्रिप्रकारकाः भवन्ति। सत्त्वः श्वेतो भवति। रजः रक्तो भवति। तमः कृष्णो भवति। त्रयोगुणाः परस्परविरोधिभूते सति सम्मिलितरूपेण कार्यं फलं वा सम्पादयन्ति, यथा-दीपकः। कफ-पित्त-वात-परस्परविरोधिभूते सति सम्मिलितरूपे शरीरं धारयति। एते गुणाः सतत् परिणामशाली वर्तन्ते।

गुणाः इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि–

1. **प्रश्नः**— गुणपर्यायवद् द्रव्यम् इति कस्य सूत्रम्?
उत्तरम्— (तत्त्वार्थसूत्र-5/37)।

2. **प्रश्नः**—सततविद्यमानत्ववस्तुसत्तायै नितान्तावश्यकधर्मं किं कथ्यते?
उत्तरम्— गुणाः।

3. **प्रश्नः**—देशकालजन्यपरिणामशाली धर्मं किं कथ्यते?
उत्तरम्— पर्यायः।

4. **प्रश्नः**—गुण एवं पर्यायविशिष्टवस्तुनि किं कथ्यते?
उत्तरम्— द्रव्यम्।

5. **प्रश्नः**—संयोग-वियोगभूते सति गुरुत्व-लघुत्वादिधर्मयुक्तो कः भवति?
उत्तरम्— गुणः।

6. **प्रश्नः**—स्वार्थसिद्ध्यर्थे कः उपकारको भवति?
उत्तरम्— गुणः।

7. **प्रश्नः**—क्रिया-धर्मयुक्ते सति गुणं किं कथ्यते?
उत्तरम्— वस्तुतः द्रव्यम्।

8. **प्रश्नः**—सांख्यानुसारं गुणानां कति भेदाः?
उत्तरम्— त्रयः।

9. **प्रश्नः**—के सन्ति त्रयो गुणाः ?
उत्तरम्— 1. सत्त्वः, 2. रजः, 3. तमः।

10. **प्रश्नः**—सत्त्वस्य किं रूपं अवबोध्यते?
उत्तरम्— सुखरूपम्।

11. **प्रश्नः**—सत्त्वस्य किं प्रयोजनम्?
उत्तरम्— प्रकाशकरणम्।

12. **प्रश्नः**—मनसि सत्त्वभावनाजागृते सति किं भवति?
उत्तरम्— आनन्द-हर्ष-सुख-संतोषादि उत्पन्नो भवति।

13. **प्रश्नः**—रजसः किं रूपं अवबोध्यते?
उत्तरम्— दुःखरूपम्।

14. **प्रश्नः**—रजसः किं प्रयोजनम्?
उत्तरम्— प्रवृत्तिकरणम्।

15. **प्रश्नः**—रागद्वेषात्मकत्वात् दुःखस्य कारणं किम्?
उत्तरम्— रजः।

16. **प्रश्नः**—तमसः किं रूपं अवबोध्यते?
उत्तरम्— मोहरूपम्।

17. **प्रश्नः**—तमसः प्रयोजनं किमस्ति?
उत्तरम्— नियमनम्।

18. **प्रश्नः**—हेतुर्मोहात्मकत्वात् मोहस्य कारणं किम्?
उत्तरम्— तमः।

19. **प्रश्नः**—गुणानां साम्यावस्था किं नाम्ना गीयते?
उत्तरम्— प्रकृतिः।

20. **प्रश्नः**—प्रकृतिर्यदा गुणानां साम्यादव्यक्तामवस्थां गाहते तदा किं भवति?
उत्तरम्— प्रलयः।

21. **प्रश्नः**—प्रलयावस्थायामपि प्रकृतिः किं भवति?
उत्तरम्— परिणामवती।

22. **प्रश्नः**—प्रकृतिर्यदा गुणानां वैषम्याद् व्यक्तामवस्थां गृह्णाति तदा किं भवति?
उत्तरम्— सृष्टिर्जायते।

23. **प्रश्नः**—गुणानां स्वरूपाणि कतिप्रकारकाणि भवन्ति?
उत्तरम्— त्रिप्रकारकाणि।

24. **प्रश्नः**— सत्त्वस्य स्वरूपं किं भवति?
उत्तरम्— श्वेतः।

25. **प्रश्नः**— रजसः स्वरूपं किं भवति?
उत्तरम्— रक्तो भवति।

26. **प्रश्नः**—तमसः स्वरूपं किं भवति?
उत्तरम्— कृष्णो भवति।

27. **प्रश्नः**—तमसो भेदाः कति सन्ति?
उत्तरम्— अष्टौ।

28. **प्रश्नः**—रजोगुणो किं भवति?
उत्तरम्— अप्रीतिकरः।

29. **प्रश्नः**—तात्पर्यदीपिकानुसारेण गुणस्य किं स्वरूपम्?
उत्तरम्—सत्त्वरजस्तमोनामकं च सुखदुःखमोहस्वरूपकं च गुणत्वम्।

(श) अष्टाङ्गयोगः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

सर्वेऽपि भारतीयदर्शनकारा आत्मोन्नतेः साधकतमं करणं योगविद्येति मुक्तकण्ठतयोरीकुर्वन्ति। वेदोपनिषत्स्मृतिपुराणानि च अखिलानि योगोल्लेखं विदधन्ति दृष्टानि भवन्ति। योगेनैव मानवस्य चित्तं निर्मलं शुद्धं स्थिरञ्च भवितुमर्हति। **नास्ति योगसमं बलम्।** योगः सार्वभौमधर्मोऽस्ति। स सर्वथा वाद-विवाद-विरहितः। स आत्मानं दर्शयति मनः शरीरञ्च संस्करोति। आत्मसाक्षात्काराकाङ्क्षिणः कृते पातञ्जलं योगदर्शनम् अमूल्यनिधिः अस्ति। सांख्याभिमतानि प्रत्यक्षा-नुमानशब्दप्रमाणानि योगदर्शनम् अङ्गीकरोति। प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतय इत्येतानि सन्ति चित्तस्य पञ्च वृत्तयः।

पातञ्जलयोगदर्शने योगस्य अष्टाङ्गसाधनानि निर्विकारत्वादिहेतोः निदधाति। तानीमानि नामानि–

1. यमः, 2. नियमः, 3. आसनम्, 4. प्राणायामः, 5. प्रत्याहारः, 6. धारणा, 7. ध्यानम्, 8. समाधयः। यम-नियम-आसन-प्राणायाम-प्रत्याहाराणि बहिरङ्गाणि साधनानि, एवं च धारणा-ध्यान-समाधयश्चान्तरङ्गाणि साधनानि सन्ति।

1. **यमः**–अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहभेदेन यमः पञ्चविधः। परपीडनमहिंसेति कथ्यते। अहिंसकं प्रति न कोऽपि प्राणी वैरी भवति। सर्वेऽपि प्राणिनः तस्मिन् वैररहिता भवन्ति। कथितं च– **अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः।** कीदृशस्याप्यसत्यस्याभाषणं सत्यमिति निगद्यते। सत्य-भाषणेन भवति वाण्यमोघा। सत्य-भाषी यद्वदति तस्य प्रकाशनमात्रेण फलमुपलब्धं जायते। उक्तञ्च– **सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्।** चौर्यकर्मणस्त्यागोऽस्तेयमित्युदीर्यते। अस्तेयात् सर्वविधसम्पदां लाभो भवति। नास्तेयसाधको भवति कुत्रापि रागो तदभावादसौ तु लक्ष्म्या स्वयमेव मृग्यते। कथितं च– **अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्।** ब्रह्मचर्येण शारीरिकं मानसिकमात्मिकञ्च बलमेधते। तत्साहाय्येन योगेऽन्तरायमन्तरोन्तर्भवति। उक्तञ्च– **ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः।** अपरिग्रहात् भूतभाविजन्मज्ञानमुत्पद्यते। लोभवशात् परवस्तुनोऽपरिग्रहणमपरिग्रह इत्यभिधीयते। कथितं च– **अपरिग्रहस्थैर्यजन्मकथन्तासम्बोधः।**

2. **नियमः**–शौच-सन्तोष-तपः-स्वाध्याय-ईश्वरप्रणिधानभेदेन पञ्चधा। बाह्यशुद्धिराभ्यन्तरशुद्धिः शौच- मिति, समुचितोद्योगेन समवाप्ते वस्तुनि तुष्टिः सन्तोष इति, द्वन्द्वसहिष्णुता तप इति, नियमपूर्वकं धर्मग्रन्थाध्ययनं स्वाध्याय इति, ईश्वर-ध्यानं तस्मै स्वार्पणम् ईश्वरप्रणिधानमिति प्रोच्यते। नियमानां परिपालनेन यानि फलानि लभ्यन्ते तेषां कीर्तनं योगसूत्रमेवं कुरुते–1. शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः, 2. सन्तोषादनुत्तमसुखलाभः, 3. कार्यान्द्रियसिद्धिरशुद्धि-क्षयात्तपसः, स्वाध्यायादिष्टदैवतासम्प्रयोगः, 5. समाधि-सिद्धिरीश्वरप्रणिधानात्।

3. **आसनम्–स्थिरसुखमासनम्।** साधनायै यत् सुखदमनुकूलं तदासनमिति गीतम्। आसनं स्वस्तिकासनसिद्धासनपद्मासनादिभेदैर्बहुविधम्।

4. **प्राणायामः–आसनजयभूते सति श्वास-प्रश्वासयोः गतिविच्छेदम्** अर्थात् श्वास-प्रश्वास-गतिनिरोधः प्राणायाम इति प्रोच्यते। पतञ्जलिः प्राह प्राणायामात् अज्ञानावरणं क्षीयते मनश्च स्थिरं भवति। प्राणायामस्य चत्वारो भेदाः–1. बाह्यः (रेचकप्राणायामः), 2. आभ्यन्तरः (पूरक-प्राणायामः), 3. स्तम्भवृत्तिः (कुम्भकप्राणायामः), 4. केवलकुम्भकप्राणायामः।

5. **प्रत्याहारः– (प्रति-प्रतिकूल, आहार-वृत्ति)** येन इन्द्रियाणि विषयेभ्यो विमुखानि भूत्वान्तर्मुखीनि भवन्ति स प्रत्याहार इति गद्यते। **बहिर्भूतवृत्तिर्नाम अन्तर्मुखीकरणम्।** एतानि पञ्चसाधनानि बहिरङ्गसाधनानि वर्तन्ते। शेषाः त्रयः अन्तरंगसाधनानि मन्यन्ते।

6. **धारणा– देशबन्धश्चित्तस्य धारणा** (यो.सू.3/1)। चित्तस्याभीष्टविषये सन्निवेशनं धारणेति कथ्यते। परं वृत्तिमात्रसहितचित्तस्य नाभि-नासिकाग्रभागचन्द्रादिध्येये निबन्धनमपेक्ष्यतेऽत्र।

7. **ध्यानम्- तत्र प्रत्येकतानता ध्यानम्** (यो.सू.3/2)। ध्येयस्यानारतं चिन्तनं ध्यानमिति आम्नातम्।

8. **समाधयः– तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।** सम्यगाधीयते एकाग्रीक्रियते विक्षेपान् परिहृत्य मनो यत्र सः समाधिः। अर्थात् अस्यामवस्थायां मनो ध्येये एवंविधतया लीयते यत् तद् ध्येयञ्चोभयमपि भवत्येकमेव। उभयोस्तादात्म्यं भवति।

एवं धारणा-ध्यान-समाधय-इत्येतेषां त्रिकं 'संयम' इत्येतया संज्ञया प्रसिद्धम्। योगाभ्यासं विदधानो योगी सत्यवस्थाविषये सिद्धिष्वधिकारमवाप्नुते।

अष्टाङ्गयोगस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—सर्वथा वाद-विवाद-विरहितः कः?
उत्तरम्— योगः।

2. **प्रश्नः**—योगः किं करोति?
उत्तरम्— आत्मानं दर्शयति मनः शरीरञ्च संस्करोति।

3. **प्रश्नः**—चित्तस्य पञ्च वृत्तयः के सन्ति?
उत्तरम्— प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः।

4. **प्रश्नः**—योगस्य कति साधनानि भवन्ति?
उत्तरम्— अष्टाङ्गसाधनानि।

5. **प्रश्नः**—अष्टाङ्गसाधनानि कानि सन्ति?
उत्तरम्—1. यमः, 2. नियमः, 3. आसनम्, 4. प्राणायामः, 5. प्रत्याहारः, 6. धारणा, 7. ध्यानम्, 8. समाधयः।

6. **प्रश्नः**—बहिरङ्गाणि साधनानि कानि सन्ति?
उत्तरम्—यमः-नियमः-आसन-प्राणायाम-प्रत्याहाराः।

7. **प्रश्नः**—अन्तरङ्गाणि साधनानि कानि सन्ति?
उत्तरम्— धारणा-ध्यान-समाधयश्च।

8. **प्रश्नः**—यमाः कतिविधः के च ते?
उत्तरम्— पञ्चविधः, अहिंसा-सत्य-अस्तेय- ब्रह्मचर्य-अपरिग्रहः।

9. **प्रश्नः**—अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः- इति कस्य लक्षणम्?
उत्तरम्—अहिंसायाः।

10. **प्रश्नः**—सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्- इति कस्य लक्षणम्?
उत्तरम्— सत्यस्य।

11. **प्रश्नः**—योगदर्शने अस्तेयस्य किं लक्षणम्?
उत्तरम्— अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्।

12. **प्रश्नः**—योगदर्शने ब्रह्मचर्यस्य किं लक्षणम्?
उत्तरम्— ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः।

13. **प्रश्नः**—योगदर्शने अपरिग्रहस्य किं लक्षणम्?
उत्तरम्— अपरिग्रहस्थैर्यजन्मकथन्तासम्बोधः।

14. **प्रश्नः**—नियमाः कतिधा के च ते?
उत्तरम्—पञ्चधा, शौच-सन्तोष-तपः-स्वाध्याय-ईश्वरप्रणिधानानि।

15. **प्रश्नः**—स्वाध्यायस्य का परिभाषा?
उत्तरम्— नियमपूर्वकं धर्मग्रन्थाध्ययनं स्वाध्यायः।

16. **प्रश्नः**—आसनम् इत्यस्य किं लक्षणम्?
उत्तरम्— स्थिरसुखमासनम्।

17. **प्रश्नः**—आसनस्य भेदाः के सन्ति?
उत्तरम्— स्वस्तिकासनसिद्धासनपद्मासनादि-भेदैर्बहुविधम्।

18. **प्रश्नः**—यमस्य लक्षणं किमस्ति?
उत्तरम्— सत्यास्तेयब्रह्मचर्यापरिग्रहाः।

19. **प्रश्नः**—प्राणायामस्य किं लक्षणम्?
उत्तरम्— श्वास-प्रश्वास-गतिनिरोधः।

20. **प्रश्नः**—प्राणायामस्य चत्वारो भेदाः के सन्ति?
उत्तरम्— 1. रेचकप्राणायामः, 2. पूरकप्राणायामः, 3. कुम्भकप्राणायामः, 4. केवलकुम्भकप्राणायामश्च।

21. **प्रश्नः**— बहिर्भूतवृत्तीनाम् अन्तर्मुखीकरणम् इति कस्य लक्षणम्?
उत्तरम्—प्रत्याहारस्य।

22. **प्रश्नः**—धारणा इत्यस्या का परिभाषा?
उत्तरम्— देशबन्धश्चित्तस्य धारणा।

23. **प्रश्नः**—ध्यानम् इत्यस्य किं लक्षणम्?
उत्तरम्— तत्र प्रत्येकतानता ध्यानम्।

24. **प्रश्नः**—समाधिः इत्यस्या का परिभाषा?
उत्तरम्— तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।

25. **प्रश्नः**—योगः कर्मसु कौशलम्– इति केन कथितम्?
उत्तरम्— गीतायां भगवता श्रीकृष्णेन।

(ब) समाधिः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

योगसूत्राणां रचनाकारः पतञ्जलिः वर्तते। सः योगशास्त्रस्य प्रचारकः संशोधको वा वर्तते। सांख्यस्फोटवादस्य खण्डनं योगस्य मण्डनं करोति। योगदर्शने चत्वारि पादानि सन्ति। येषां सूत्रसंख्या 195 विद्यते। प्रथमपादे समाधिः इत्यस्य वर्णनं वर्तते। योगशब्दः समाध्यर्थक 'युज्'धातोः (युज् समाधौ) इत्यनेन निष्पन्नो भवति। अतः योगस्य व्युत्पत्तिलभ्यार्थः 'समाधि' इति विद्यते। **योगश्चित्तवृत्तिनिरोधः** इति योगस्य लक्षणं पतञ्जलिना प्रोक्तम्। अत्र चित्तस्य अभिप्रायः अन्तःकरणैः (मन-बुद्धि-अहंकार) विद्यते।

श्रेयरूपे चित्तस्य एकाग्रता निश्चलत्वं च समाधिः इति समाधेः निर्वचनम्। स द्विविधः– 1. सविकल्पकः, 2. निर्विकल्पकश्च। योगस्य द्वौ भेदौ स्तः– **1. सम्प्रज्ञात** (सं + प्रज्ञा + त) तस्य फलमस्ति– **प्रज्ञायाः उदयः**। इयं प्रज्ञा सद्भूतार्थं (वास्तव्य, सत्य) प्रश्चोचितं करोति। सम्प्रज्ञातः सबीजः समाधिः वर्तते। अस्यां समाधौ चित्तं ध्येये लीनं भूत्वा तन्मयीभवति। एकाग्रचित्तस्य अविचलिता-अक्षुब्धा अवस्था वर्तते। यदा ध्येयवस्तूनामुपरि चित्तः चिरकालपर्यन्तं विद्यते। अस्य योगस्य नाम सम्प्रज्ञातसबीजसमाधिः इति मन्यते।

2. असम्प्रज्ञातः– असम्प्रज्ञातसमाधौ सर्वासामपि चित्तवृत्तीनां विषयाणाञ्च तिरोभावः सञ्जायते। अर्थात् यदा चित्तं सर्वेभ्योऽपि बाह्येभ्यः आभ्यन्तरेभ्यश्च विषयेभ्यो दूरीभवति तदा सा स्थितिः असम्प्रज्ञातसमाधिर्नाम्ना गीयते। असम्प्रज्ञातसमाधिः एव परमयोगः। एतस्यामवस्थायामेव आत्मा मुक्तावस्थाजनितं प्रकाशमनुभवति।

विचारानन्दास्मितावत्वात् सम्प्रज्ञातसमाधेः, सः चतुर्विधो भवति। **1. सवितर्क-सम्प्रज्ञातसमाधिः**– यदा कस्मिंश्चित् स्थूले भौतिकपदार्थे चित्तमविचलभावेन समवस्थाप्यते तदा स समाधिः सवितर्कः इत्युच्यते। **2. सविचार-सम्प्रज्ञातसमाधिः**– स्थूलात् (मूर्त्यादेः) चित्तमाकृष्य यदा तत् सूक्ष्मे विषये प्रतिष्ठाप्यते तदा स सविचारकसमाधि इत्यभिधीयते। **3. सानन्द-सम्प्रज्ञातसमाधिः**– यदा सूक्ष्मादपि (तन्मात्रात्) चित्तमावर्ज्य कस्मिंश्चित् सूक्ष्मतरे विषये तद् ध्यानार्थमारोप्यते तदा स समाधिः सानन्दसमाधिरिति भण्यते। **4. सास्मिता-सम्प्रज्ञातसमाधिः**– यदा ध्यानमहङ्कारगोचरं क्रियते तदा स समाधिः सास्मिता समाधिरिति कीर्त्यते। एतस्य समाधेः फलमस्ति आत्म-साक्षात्कारः।

योगस्य सन्ति प्रधानमार्गास्त्रयः–**1. ज्ञानयोगमार्गः**– ज्ञाने यो रमते स ज्ञानमार्गः। **2. कर्मयोगमार्गः**– यो जनः कठोरसाधनायां वा मीमांसाविहितेषु कर्मसु योजयितुमात्मनं प्रभवेत् सः कर्मयोगमार्गं गृह्णीयात्। **3. भक्तियोगमार्गः**– भावुकप्रकृतिर्जनो भक्तिमार्गमाश्रयेत्। मनसः शुद्धता सर्वत्रापेक्षितास्ति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—योग शब्दस्य निष्पत्तिः कस्मिन् धातोः भवति?
उत्तरम्— समाध्यर्थक 'युज्' धातोः (युज् समाधौ)।

2. **प्रश्नः**—समाधिः इत्यस्या का परिभाषा?
उत्तरम्— श्रेयरूपे चित्तस्य एकाग्रता निश्चलत्वं च समाधिः।

3. **प्रश्नः**—समाधिः इत्यस्य किं लक्षणम्?
उत्तरम्— ज्ञेयरूपे चित्तस्य एकाग्रता।

4. **प्रश्नः**—योगसूत्राणां रचनाकारः कः?
उत्तरम्— भगवान् पतञ्जलिः।

5. **प्रश्नः**—स्फोटवादस्य मण्डनं कः करोति?
उत्तरम्— योगदर्शनम्।

6. **प्रश्नः**—योगदर्शने कति पादाः सन्ति?
उत्तरम्— चत्वारि।

7. **प्रश्नः**—चित्तस्य के पञ्चवृत्तयः?
उत्तरम्— प्रमाणम्, विपर्ययः, विकल्पः, निद्रा, स्मृतयः।

8. **प्रश्नः**—योगश्चित्तवृत्तिनिरोधः इति योगलक्षणं केन प्रोक्तम्?
उत्तरम्— भगवता पतञ्जलिना।

9. **प्रश्नः**—समाधिः कतिविधम्?
उत्तरम्— द्विविधः।

10. **प्रश्नः**—समाधेः द्वौ विधौ कौ स्तः?
उत्तरम्— सम्प्रज्ञातसमाधिः, असम्प्रज्ञातसमाधिः।

11. **प्रश्नः**—एकाग्रावस्थायाः नामान्तरं किम्?
उत्तरम्— सम्प्रज्ञातसमाधिः।

12. **प्रश्नः**—सम्प्रज्ञात (सं + प्रज्ञा + त) इत्यस्य किं फलमस्ति?
उत्तरम्— प्रज्ञायाः उदयः।

13. **प्रश्नः**—निरुद्धावस्थायाः अपरं नामधेयं किम्?
उत्तरम्— असम्प्रज्ञातसमाधिः।

14. **प्रश्नः**—समाधेः फलं किम्?
उत्तरम्— आत्म-साक्षात्कारः।

15. **प्रश्नः**—परमयोगसमाधिः कः?
उत्तरम्— असम्प्रज्ञातसमाधिः।

16. **प्रश्नः**—योगस्य प्रधानमार्गास्त्रयः के सन्ति?
उत्तरम्— ज्ञान-कर्म-भक्तियोगमार्गाः।

(स) सिद्धयः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

योगाभ्यासं विदधानो योगी सत्यवस्थाविशेषे सिद्धिष्वधिकारमवाप्नुते। अर्थात् योगाभ्यासेन साधकस्य अवस्थायां लक्षितविशेषशक्तिः प्राप्तिकरणम् वर्तते। सिद्धयः अष्टौ सन्ति– 1. अणिमा, 2. लघिमा, 3. महिमा, 4. प्राप्तिः, 5. प्राकाम्यम्, 6. वशित्वम्, 7. ईशित्वम्, 8. यत्र-कामावसायित्वम्। अणिम्ना योगी अणुरिव, लघिम्ना तूलवल्लघुः, महिम्ना पर्वत इव, प्राप्त्या अभिमतवस्तुलाभवान्, प्राकाम्येन निर्बाधेच्छावान्, वशित्वेन सर्वजीववशीकरण-शक्तिशाली, ईशित्वे भौतिकपदार्थाधिकारी, यत्रकामाव-सायित्वेन च सिद्धसकलसङ्कल्पो भवति। योगी न कदाप्यैश्वर्यलोभेन योगसाधनायां प्रवर्तेत। तदीयं लक्ष्यन्तु मुक्तिलाभोऽस्ति। तस्मात् तत्रैवात्मानं प्रवर्तयेत स इति योगसूत्रस्य कठोर आदेशो विद्यते।

योगदर्शनानुसारं एतेः सिद्धयः योगीनां मार्गे स्वतः उपस्थिता भवन्ति। योगदर्शनस्य अन्तिमं लक्ष्यं आत्मदर्शनं वर्तते। योगीनां इत्थं लक्ष्यदिशि सदा जागरूको भवेयम्। सिद्धिं प्रति ध्यानं न दातव्यम्। योगदर्शनस्य इयमेव शिक्षा विद्यते। समाधिर्योगस्यान्तिमः सोपानः, स चेश्वरप्रणिधानात् सिद्ध्यति। तस्मादीश्वरो हि महनीयं स्थानमधितिष्ठति। ईश्वर-प्रणिधानान्वितयोगाङ्गानामनुष्ठानेन निष्प्रत्यूहमाश्वेव समाधेः सिद्धत्वादीश्वरस्य महत्तां नितरामेव स्फुटभावेन योगस्समुद्घोषयति– ततः प्रत्यक्चेतनाऽधिगमोऽ-प्यन्तरायाभावश्चेति योगविद्या परमपदप्रदायिनी। सा मातेव सर्वजीवान् सुखिनोऽवलोकयितुमभिलषते। तदीया सिद्धयोऽपि सन्त्यलौकिकाः।

ईश्वरस्य सिद्धावधोलिखिता युक्तयो दीयन्ते- 1. वेदोपनिषदादीनामीश्वरगुणगायित्वात् सिद्ध्यति यद् ईश्वरोऽस्ति। 2. पदार्थेषु दृश्यमाना लघुता महत्ता च सूचयति यत् कोऽपि पदार्थोऽवश्यमेवैतादृक् योऽणोरप्यणीयान् महतोऽपि महीयान् अस्ति य ईदृशः स एव ईश्वरः। 3. पुरुष-प्रकृत्योः संश्लेषेण संसारस्य सृष्टिर्भवति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—योगदर्शने सिद्धयः कति सन्ति?
उत्तरम्— अष्टौ।

2. **प्रश्नः**—योगदर्शने अष्टौ सिद्धयः कानि सन्ति?
उत्तरम्—1. अणिमा, 2. लघिमा, 3. महिमा, 4. प्राप्तिः, 5. प्राकाम्यम्, 6. वशित्वम्, 7. ईशित्वम्, 8. यत्रकामावसायित्वम्।

3. **प्रश्नः**—अव्यक्तस्य सिद्धिः कस्माद् भवति?
उत्तरम्— सौक्ष्म्यात्।

4. **प्रश्नः**—अणिम्ना योगी अणुरिव इति कस्य लक्षणम्?
उत्तरम्— अणिमायाः।

5. **प्रश्नः**—लघिम्ना तूलवल्लघुः इति कस्य लक्षणम्?
उत्तरम्— लघिमायाः।

6. **प्रश्नः**—महिमा इत्यस्य किमर्थः?
उत्तरम्— महिम्ना पर्वत इव।

7. **प्रश्नः**—प्राप्तिः इत्यस्य किमर्थः?
उत्तरम्— प्राप्त्या अभिमतवस्तुलाभवान्।

8. **प्रश्नः**—प्राकाम्येन निर्बाधेच्छवान् इति कस्यार्थः?
उत्तरम्— प्राकाम्यम्।

9. **प्रश्नः**—वशित्वम् इत्यस्य किमर्थः?
उत्तरम्— वशित्वेन सर्वजीववशीकरणशक्तिशाली।

10. **प्रश्नः**—भौतिकपदार्थाधिकारी कः?
उत्तरम्— ईशित्ववान्।

11. **प्रश्नः**—यत्रकामावसायित्वम् इत्यस्य किं निर्वचनम्?
उत्तरम्— यत्रकामावसायित्वेन च सिद्धसकलसङ्कल्पो भवति।

12. **प्रश्नः**—योगीनां लक्ष्यं किमस्ति?
उत्तरम्— मुक्तिलाभः।

13. **प्रश्नः**—योगदर्शनस्य अन्तिमं लक्ष्यं किं वर्तते?
उत्तरम्— आत्मदर्शनम्।

14. **प्रश्नः**—योगस्यान्तिमो सोपानः किमस्ति?
उत्तरम्— समाधिः।

15. **प्रश्नः**—परमपदप्रदायिनी का विद्या वर्तते?
उत्तरम्— योगविद्या।

16. **प्रश्नः**—वेदोपनिषदादीनामीश्वरगुणगायित्वात् किं सिद्ध्यति?
उत्तरम्— ईश्वरोऽस्ति।

17. **प्रश्नः**—पुरुष-प्रकृत्योः संश्लेषेण संसारस्य किं भवति?
उत्तरम्— सृष्टिर्भवति।

(ह) समापत्तयः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

अथ योगानुशासनम् शब्दानामनुशासनं विदधता पातञ्जले कुर्वता वृत्तिं राजमृगाङ्कसंज्ञकमपि व्यातन्वता वैद्यके अनेन सूत्रेण योगशास्त्रस्य सम्बन्धाभिधेयप्रयोजनान्याख्यायन्ते। पातञ्जलयोगसूत्रवृत्तौ एकचत्वारिंशत् सूत्रे कथितमस्ति- **क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः** (41)। क्षीणवृत्तयो यस्य तत्क्षीणवृत्ति तस्य ग्रहीतृग्रहणग्राह्येषु आत्मेन्द्रियविषयेषु तत्स्थतदञ्जनता समापत्तिः भवति। इतः परं योगयोर्मुख्यफलं पादसमाप्तिपर्यन्तं वक्तव्यम्। संप्रज्ञातस्य फलमुच्यते अस्मिन् सूत्रैः, समापत्तिरिति च साक्षात्कारपरिभाषा। स्थूल-सूक्ष्मग्राह्योपरक्तं चित्तं तत्र समापन्नं भवति। ग्रहणं च गृह्यतेऽनेनेति व्युत्पत्त्या करणसामान्यं त्रयोदशविधम्। ग्राह्यं च स्थूल-सूक्ष्म-सूक्ष्मतररूपेण त्रिविधम्। पञ्चभूत-पञ्चतन्मात्र-प्रकृतरूपम्। अतो ग्रहीत्रादित्रैविध्येन योगस्य विषयः सर्ववस्तु संगृहीतमिति सामान्यतः समापत्तिः उक्ता। स्थूलं कार्यं सूक्ष्मं च तत्कारणम्। प्रकृतिपर्यन्तं चान्यत्सर्वं सूक्ष्मम्।

शब्दार्थज्ञानविकल्पैः सकीर्णा सवितर्का समापत्तिः; तद्यथा गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानमित्यविभागेन विभक्तानामपि ग्रहणं दृष्टम्। विभज्यमानां चान्ये शब्दधर्मा अन्ये ज्ञानधर्मा इत्येषां विभक्तः पन्थाः। तत्र समापन्नयोगिनो

गवाद्यर्थः समाधिप्रज्ञायां समारूढः स चेच्छब्दार्थ-ज्ञानविकल्पानुविद्ध उपावर्तते सा संकीर्णा समापत्तिः सवितर्केत्युच्यते। सामान्यतः समापत्तिरुक्ता। सेयमवान्तर-भेदाच्चतुर्विधा भवति। तद्यथा- 1. सवितर्का, 2. निर्वितर्का, 3. सविचारा, 4. निर्विचारा चेति।

समापत्तेश्चातुर्विध्यमाह- तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः (42)। तासु चतसृषु मध्ये स्थूलसमापत्तेः सवितर्कनिर्वितर्काख्यौ विशेषौ क्रमेण दर्शयति। तत्र गोरिति शब्दो गौरित्यर्थो गौः इति। अत्र स्थूलसमापत्तिः- सवितर्कनिर्वितर्काख्यौ। सूक्ष्मसमापत्तिः-स्थूलविषयत्वं परिशेषाल्लभ्यते। संप्रज्ञाताख्या समापत्तिः अवान्तर-भेदाच्चतुर्धा भवति-1. सवितर्का, 2. निर्वितर्का, 3. सविचारा, 4. निर्विचारा चेति। निर्वितर्कामाह स्मृतिपरिशुद्धौ-स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का (43) अत्र श्रवणमननिदिध्यासनैर्हि समापत्तिर्जायते।

सूक्ष्मसमापत्तिः-"एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता" (44)। सूक्ष्मविषयापि सविचाररूपा समापत्तिद्वयी व्याख्याता इति भावः। तत्र स्थूलरूपं तत्कार्यं तदुपरागेण सूक्ष्मा समापत्तिः सविचारा कार्यकारण-विचारघटितत्वात्। तदुत्तरोत्पद्यमाना च केवलसूक्ष्मविषयिणी निर्विचारेति।

किं पर्यन्तः सूक्ष्मविषयः-"सूक्ष्मविषयत्वं चालिङ्ग-पर्यवसानम्" (45) अत्र विशिष्टलिङ्गं भूतेन्द्रियाणि, अवशिष्टलिङ्गं तन्मात्रेन्द्रियाणि, लिङ्गमात्रं बुद्धिः, अलिङ्गं प्रधानमिति।

एतासां समापत्तीनां प्रकृते प्रयोजनमाह-"ता एव सबीजः समाधिः" (46)। ता एवोक्तलक्षणा समापत्तयः, सह बीजेनाऽऽलम्बनेन वर्तते इति सबीजः संप्रज्ञातः समाधिरित्युच्यते, सर्वासां सालम्बनत्वात्। निर्विचारायाः फलमाह- "निर्विचारवैशारद्येऽध्यात्मप्रसादः" (47)। एतदेव चित्तस्य वैशारद्यं यत्स्थितौ दार्ढ्यम्।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—अथ योगानुशासनम् इति कस्य ग्रन्थस्य मङ्गलाचरणम्?
उत्तरम्— योगशास्त्रस्य।

2. **प्रश्नः**— योगशास्त्रस्य रचनाकारः कः?
उत्तरम्— भगवान् पतञ्जलिः।

3. **प्रश्नः**— पातञ्जलयोगसूत्रवृत्तौ कः समापत्तिः?
उत्तरम्— क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः।

4. **प्रश्नः**— स्थूल-सूक्ष्मग्राह्योपरक्तं चित्तं किं भवति?
उत्तरम्— समापन्नं भवति।

5. **प्रश्नः**— समापत्तिरिति कस्य परिभाषा।
उत्तरम्— साक्षात्कारस्य।

6. **प्रश्नः**— ग्रहणं च गृह्यतेऽनेनेति व्युत्पत्त्या करणसामान्यं कतिविधम्?
उत्तरम्— त्रयोदशविधम्।

7. **प्रश्नः**— ग्राह्यं कतिविधम्?
उत्तरम्— स्थूल-सूक्ष्म-सूक्ष्मतररूपेण त्रिविधम्।

8. **प्रश्नः**— पञ्चभूत-पञ्चतन्मात्र इति कस्य रूपम्?
उत्तरम्— प्रकृतेः।

9. **प्रश्नः**— ग्रहीत्रादित्रैविध्येन योगस्य विषयः सर्ववस्तु संगृहीतमिति सामान्यतः कः?
उत्तरम्— समापत्तिः।

10. **प्रश्नः**— समापत्तिः इत्यस्य कारणं किम्?
उत्तरम्— स्थूलं कार्यं सूक्ष्मं च तत्कारणम्।

11. **प्रश्नः**— प्रकृतिपर्यन्तं चान्यत्सर्वमिति किम्?
उत्तरम्— सूक्ष्मम्।

12. **प्रश्नः**— समापत्तेश्चातुर्विध्यं कः?
उत्तरम्— तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः (42)।

13. **प्रश्नः**— स्थूलसमापत्तिः कः?
उत्तरम्— सवितर्कनिर्वितर्काख्यौ।

14. **प्रश्नः**— सूक्ष्मसमापत्तिः कः?
उत्तरम्— स्थूलविषयत्वं परिशेषाल्लभ्यते।

15. **प्रश्नः**—संप्रज्ञाताख्या समापत्तिः अवान्तरभेदाच्चतुर्धा का:?
उत्तरम्— 1. सवितर्का, 2. निर्वितर्का, 3. सविचारा, 4. निर्विचारा चेति।

16. **प्रश्नः**— का निर्वितर्का भवति?
उत्तरम्— स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का (43)।

17. **प्रश्नः**— निर्वितर्का समापत्तिः कैः जायते?
उत्तरम्— श्रवणमनननिदिध्यासनैः।
18. **प्रश्नः**— सूक्ष्मसमापत्तिः इत्यस्य किं लक्षणम्?
उत्तरम्— एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता।
19. **प्रश्नः**— किं पर्यन्तः सूक्ष्मविषयः?
उत्तरम्— सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम्।
20. **प्रश्नः**— विशिष्टलिङ्गं किम्?
उत्तरम्— भूतेन्द्रियाणि।
21. **प्रश्नः**— अवशिष्टलिङ्गं किम्?
उत्तरम्— तन्मात्रेन्द्रियाणि।
22. **प्रश्नः**— लिङ्गमात्रं किं भवति?
उत्तरम्— बुद्धिः।
23. **प्रश्नः**— अलिङ्गं किं भवति?
उत्तरम्— प्रधानम्।
24. **प्रश्नः**— समापत्तीनां प्रकृते किं प्रयोजनम्?
उत्तरम्— ता एव सबीजः समाधिः।
25. **प्रश्नः**— निर्विचारायाः किं फलम्?
उत्तरम्— निर्विचारवैशारद्येऽध्यात्मप्रसादः।

(तुलनात्मकदर्शनम्)

(कक) भारतीयदर्शनपरम्परायाः प्रमुखसिद्धान्ताः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

अस्मिन् भारतवर्षे विद्यासु सर्वश्रेष्ठः आध्यात्मविद्यायाः महत्त्व-स्वरूपादीनां आविर्भावस्तु मनुस्मृतिः नामकग्रन्थे दृश्यते। निखिलमानवकल्याणार्थं स्मृतिकर्ता महर्षिमनुमहोदयस्य सत्यकथनं प्रमाणितो भवति यत्–

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥
(मनुस्मृतिः2/20)

दर्शनस्यार्थः उपयोगिता च– तत्त्वानां साक्षात्कार एव दर्शनम्। जीवनस्य व्याख्या एव दर्शनम्, येन शास्त्रेण तत्त्वज्ञानं (यथार्थज्ञानमात्मसम्बन्धिज्ञानम्) साध्यते तद्दर्शन-शास्त्रम्। प्रत्येकमानवाः दृश्य-अदृश्यो वा जगद्विषयकः कतिपय श्रद्धाः विचाराः कल्पनायाः एक समुदायमात्रो वर्तन्ते। मानवीयकार्यविधानस्य आधारशिला मानवीयविचारधारा वर्तते। यथा गीतायाम्– **यो यच्छ्रद्धः स एव सः** (गीता-17/3) अर्थात् श्रद्धाया: अनुरूपमेव मनुष्यो भवति, तेषां कार्यप्रणाली निश्चितो भवति, तदनुरूपमेव फलस्य उपलब्धिः भवति। **भारतीय वाङ्मयवृक्षस्य फलमेव दर्शनम्**, जीवनसम्बन्धि सर्वाणि तत्त्वानि दर्शनशास्त्रे वर्णितानि। जगदुत्पत्तिविषये मनुष्यः सदैव जिज्ञासुः अभवत्। अनेके प्रश्नाः जायन्ते तस्य मनसि यत् अस्य सुव्यवस्थितजगतः कोऽधिष्ठता स्रष्टा वाऽस्ति? आत्मा कः? किं ब्रह्म? मृत्यूपरान्तात्मा कुत्र गच्छति? दर्शनशास्त्रं जीवमात्रजगतः स्वरूपस्य मीमांसा करोति। अतः 'दृश्यते अनेन इति दर्शनम्' दर्शनशब्दस्यार्थः चरितार्थो भवति। वस्तूनां सत्यभूत-तात्त्विक-स्वरूपस्य दर्शनम्। भारतीयदर्शनकारः दुःखत्रय-(आध्यात्मिक, आधिभौतिक, आधिदैविक)-त्राणाय व्यावहारिक-लोकोपकारिणी उपयोगिता प्रतिपादयन्ति।

भारतीयदर्शनम्–भारतीयदर्शनस्य द्वे शाखे स्तः। 1. आस्तिकः, 2. नास्तिकः। आस्तिकदर्शनेषु 1. सांख्यः, 2. योगः, 3. न्यायः, 4. वैशेषिकम्, 5. मीमांसा, 6. वेदान्तः षड्दर्शनानि सन्ति। नास्तिकदर्शनेषु 1. चार्वाक, 2. बौद्धम्, 3. जैनम् त्रीणि दर्शनानि सन्ति। वेदानुकूलं दर्शनम् आस्तिकदर्शनम्, वेदविरोधिदर्शनं नास्तिकदर्शनम् इति कथ्यते।

दर्शनस्य प्रमुखाः सिद्धान्ताः– समस्तदर्शनानां सिद्धान्तेषु मतभेदोऽस्ति। परन्तु सर्वेषु दर्शनेषु पुरुषार्थसाधनानि चर्चितानि सन्ति। षड्-आस्तिकदर्शनानां प्रयोजनमपि बन्धनानि विमोच्य मोक्षाय प्रेरितकरणं वर्तते। सर्वे एव जीव-जगत्-बन्धन-दुःख-ज्ञान-अज्ञान-राग-विराग-मोक्षादीनां विवेचनं कुर्वन्ति। 1. वैदिकधर्म एव सर्वोत्तमधर्मः, 2. धर्माचरणं जीवनस्य प्रमुखं कर्त्तव्यम्, 3. कर्मानुसारं जीवः फलं भुङ्क्ते, 4. कर्मानुसारी वर्णव्यवस्था, 5. आत्मतत्त्वसाक्षात्कारस्य सिद्धान्तः, 6. तत्त्वज्ञानस्य सिद्धान्तः, 7. ब्रह्मतत्त्वस्य सिद्धान्तः, 8. पदार्थमीमांसायाः सिद्धान्तः, 9. प्रमाणमीमांसायाः सिद्धान्तः, 10. चित्तवृत्तिनिरोधात्मकं सिद्धान्तः, 11. मोक्षादीनां विवेचनात्मकं सिद्धान्तः।

1. सांख्यदर्शनशास्त्रस्य प्रमुखसिद्धान्तः– सांख्य-दर्शनस्याद्य आचार्यः कपिलः, सिद्धान्तस्तु **सत्कार्यवादः** एवं प्रकृतिः पुरुषश्चेति द्वे मूलतत्त्वे, अनयोरेव सम्बन्धाज्जगदुत्पद्यते। प्रकृतिर्जडा, पुरुषश्चेतनः, पुरुषसम्बन्धात्प्रकृतौ क्रिया। सत्कार्यवादोऽत्र समर्थितः।

2. योगदर्शनशास्त्रस्य प्रमुखसिद्धान्तः–योगदर्शनस्य आदि आचार्यः महर्षि पतञ्जलिः वर्तते। चित्तवृत्ति-निरोधात्मकमष्टाङ्गयोगस्य सिद्धान्तः प्रमाण-विपर्यय-निद्रा-स्मृतय इत्येताः सन्ति चित्तस्य पञ्च वृत्तयः। स चायमीश्वरः– **क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः।**

3. न्यायशास्त्रस्य प्रमुखसिद्धान्तः– आदिप्रवर्तकः गौतमः। कार्यकारणसिद्धान्तः प्रमुखः। प्रमाणप्रमेय-संशयप्रयोजनेत्यारभ्य हेत्वाभासाश्च यथोक्ताः इत्येतत् पर्यन्तं तदिदं पञ्चाऽध्यायात्मकं न्यायशास्त्रम्। 'मानाधीना मेयसिद्धिः' एवम् 'लक्षणप्रमाणाभ्यां वस्तुविनिर्णयः' इत्यनेनापि प्रमाणभूतेन वाक्यद्वयेन न्यायशास्त्रस्य महदेव महत्त्वं समुद्गीयमानं भवति।

4. वैशेषिकदर्शनशास्त्रस्य प्रमुखसिद्धान्तः– वैशेषिकदर्शनस्य आचार्यः कणादः। अध्यारोपः वैशेषिकदर्शनस्य महत्त्वपूर्णसिद्धान्तः। वैशेषिके त्रयो हेत्वाभासाः स्वीकृताः। इदं दर्शनं सर्वशास्त्रोपकारकम्। आदिमं सूत्रं– 'धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसाधिगमः।' अस्मिन् दर्शने परमात्मा तु ईश्वरापरनामा जीवात्मनो भिन्न एव। वैशेषिक-दर्शनस्य पदार्थशास्त्रत्वेन सप्तैव पदार्थाः।

5. मीमांसादर्शनशास्त्रस्य प्रमुखसिद्धान्तः– कर्मकाण्डपरकं दर्शनं पूर्वमीमांसा, ज्ञानकाण्डपरकं दर्शनं उत्तरमीमांसा इति प्रोच्यते। मीमांसादर्शनशास्त्रस्य आचार्यौ महर्षिजैमिनि-आत्रेयौ स्तः। मीमांसायाः चर्चा वेदस्य संहितायामुपनिषदि ब्राह्मणग्रन्थेषु च प्राप्यते। कुमारिलः श्लोकवार्तिके– **धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्** इति। वारदायणेन कर्मफलदातेश्वरो मन्यते। जैमिनिना कर्मण एव फलदातृत्वं प्रदर्शितम्। अतएव मीमांसकाः निरीश्वरवादिनो घुष्यन्ते। वैदिकधर्मज्ञानाय मीमांसाध्येतव्यमस्ति। वेदस्य नित्यशब्दसमूहात्मकत्वात् तस्य नित्यत्वं सिद्ध्यति। मीमांसकः वेदस्यापौरुषेयत्वमेव प्रमाणीकरोति।

6. वेदान्तदर्शनशास्त्रस्य प्रमुखसिद्धान्तः– अध्यारोपः वेदान्तदर्शनस्य महत्त्वपूर्णसिद्धान्तः। यथा वेदान्तसारे– 'असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोऽध्यारोपः।' वेदान्तो वेदस्य अन्तिमो भागः अवसानभागः इति विग्रहेण उपनिषद् उच्यते। उपनिषद एव प्राचीनैर्वेदान्तशब्देनोक्ताः। वेदान्तस्य **विवर्त्तवादः**। सोऽयं विकासो वेदान्तपर्यवसायितां बोधयति दर्शनानाम्। अज्ञाननाशे सति सर्वं जगद् ब्रह्ममयं सदेवाऽनुभवगोचरीभूतं भवति।

(ञ) चार्वाकदर्शनम्– चारुं वाक् इति निर्वचनं चार्वाकशब्दस्य, वृहस्पतिप्रणीतमिदं दर्शनम्। चारुः (सुन्दरम्) वाको (वचनम्) यस्येति यौगिकव्युत्पत्त्या सुन्दरवचन-प्रतिपादनपरं दर्शनमित्यर्थो लभ्यते इति। चार्वाकदर्शने पृथिवी-जल-तेजो-वायवश्चेति सन्ति केवलं चत्वारि द्रव्याणि प्रत्यक्षप्रमाणजन्यज्ञानविषयीभूतानि। प्रत्यक्षमेव केवलं प्रमाणम्, इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं हि तत्। शरीरमेव जीवः, सृष्टिः स्वभावत एव जायते। न तत्रेश्वरापेक्षा। ईश्वरो नास्त्येव। यथा–

यावज्जीवेत्सुखं जीवेदृणं कृत्वा घृतं पिबेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥
त्रयो वेदस्य कर्तारो भाण्डधूर्तनिशाचराः।

(ट) बौद्धदर्शनम्– बौद्धदर्शनं जैनदर्शनादुत्तरकाले प्रचरितमभवत्। बौद्धदर्शनस्य भागद्वयं– (1) धार्मिको भागः, (2) दार्शनिकभागः। बौद्धानां मते जीवो जगच्चेत्युभयमपि अनित्यं प्रतिक्षणपरिणामशालि च। बौद्धदर्शनस्य प्रस्थानं चतुर्धा विभज्यते– (क) वैभाषिकाः– बाह्यार्थप्रत्यक्षमङ्गीकुर्वन्ति। (ख) सौत्रान्तिकाः– बाह्यार्थमनुमेयमाहुः। (ग) योगाचाराः– विज्ञानवादिनः। (घ) माध्यमिकाः–शून्यवादिनः।

(ठ) जैनदर्शनम्– (अर्हतदर्शनम्) अर्हत इमे आर्हताः (जैनाः)। इमे चाऽऽर्हता जैनपदजन्यबोधविषयतावन्तः सन्तः 'अर्हत्' पदसम्बोध्यं तं स्वीयं देवं समुपासते इति। बौद्धदर्शनात् पूर्वतनम्। महावीरेण रागादिरिपवो जिता इत्यसौ जिन् शब्देनोक्तस्तदीयतया दर्शनमिदं जैनदर्शननाम्नाप्यभिहितम्। दिगम्बर- श्वेताम्बराख्यसम्प्रदायद्वयस्येदमेव बीजम्। जैनदर्शने 'मा हिंस्यात् सर्वा भूतानि' इत्यनया श्रुत्या पुष्टीकृतः 'अहिंसा परमो धर्मः'। अयमेवोपनिषत्सु वर्णितः सिद्धान्तः परमसिद्धान्तत्वेन मान्यत्वेन चाऽङ्गीकृतो वर्तते।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—दर्शनस्य का परिभाषा?
उत्तरम्— तत्त्वानां साक्षात्कारः एव दर्शनम्।

2. **प्रश्नः**—भारतीयदर्शनानुसारं दुःखत्रयो के सन्ति?
उत्तरम्— आध्यात्मिकः-आधिभौतिकः-आधिदैविकः।

3. **प्रश्नः**—भारतीयदर्शनस्य द्वे शाखे के स्तः?
उत्तरम्— 1. आस्तिक, 2. नास्तिक।

4. **प्रश्नः**—आस्तिकदर्शनेषु कानि दर्शनानि आगच्छन्ति?
उत्तरम्—1. सांख्यः, 2. योगः, 3. न्यायः, 4. वैशेषिकम्, 5. मीमांसा, 6. वेदान्तः षड्दर्शनानि।

5. **प्रश्नः**—नास्तिकदर्शनेषु कानि दर्शनानि आगच्छन्ति?
उत्तरम्—1. चार्वाक, 2. बौद्धम्, 3. जैनम् त्रीणि दर्शनानि।

6. **प्रश्नः**—वेदानुकूलं दर्शनं किम्?
उत्तरम्— आस्तिकदर्शनम्।

7. **प्रश्नः**—वेदविरोधिदर्शनं किम्?
उत्तरम्— नास्तिकदर्शनम्।

8. **प्रश्नः**— सर्वेषु दर्शनेषु मन्यमानः चर्चितसिद्धान्तः कः?
उत्तरम्— पुरुषार्थसाधनम्।

9. **प्रश्नः**—षड्-आस्तिकदर्शनानां प्रयोजनं किम्?
उत्तरम्— बन्धनानि विमोच्य मोक्षाय प्रेरितकरणम्।

10. **प्रश्नः**—सांख्यदर्शनस्याद्य आचार्यः कः?
उत्तरम्— कपिलः।

11. **प्रश्नः**—सांख्यदर्शनस्य कः प्रमुखसिद्धान्तः?
उत्तरम्— सत्कार्यवादः।

12. **प्रश्नः**—योगदर्शनस्य आदि आचार्यः कः?
उत्तरम्— महर्षि पतञ्जलिः।

13. **प्रश्नः**—योगदर्शनस्य कः प्रमुखसिद्धान्तः?
उत्तरम्—चित्तवृत्तिनिरोधात्मकमष्टाङ्गयोगस्य सिद्धान्तः।

14. **प्रश्नः**—न्यायशास्त्रस्य आदिप्रवर्तकः कः?
उत्तरम्— गौतमः।

15. **प्रश्नः**—न्यायशास्त्रस्य प्रमुखसिद्धान्तः कः?
उत्तरम्— कार्यकारणसिद्धान्तः।

16. **प्रश्नः**—वैशेषिकदर्शनस्य आचार्यः कः?
उत्तरम्— कणादः।

17. **प्रश्नः**— अध्यारोपः कस्य दर्शनस्य महत्त्वपूर्णसिद्धान्तः?
उत्तरम्— वैशेषिकदर्शनस्य।

18. **प्रश्नः**—कर्मकाण्डपरकं दर्शनं किम्?
उत्तरम्— पूर्वमीमांसा।

19. **प्रश्नः**—ज्ञानकाण्डपरकं दर्शनं किम्?
उत्तरम्— उत्तरमीमांसा।

20. **प्रश्नः**—मीमांसादर्शनशास्त्रस्य आचार्यौ कौ?
उत्तरम्— महर्षि जैमिनि-आत्रेयौ स्तः।

21. **प्रश्नः**—धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् इति कस्य वचनम्?
उत्तरम्— श्लोकवार्तिके कुमारिलस्य।

22. **प्रश्नः**—मीमांसायाः कार्यं किमस्ति?
उत्तरम्— वेदस्य प्रामाण्य-स्थापनम्।

23. **प्रश्नः**— वेदस्यापौरुषेयत्वम् इति कस्य सिद्धान्तः?
उत्तरम्— मीमांसकस्य।

24. **प्रश्नः**—मीमांसा किमर्थमध्येतव्यमस्ति?
उत्तरम्— वैदिकधर्मज्ञानाय।

25. **प्रश्नः**—अध्यारोपः इति कस्य दर्शनस्य सिद्धान्तः?
उत्तरम्— वेदान्तदर्शनस्य।

26. **प्रश्नः**— असर्पभूतायां रज्जौ सर्पारोपवद् वस्तुन्य-वस्त्वारोपोऽध्यारोपः। इति कस्य ग्रन्थस्य वचनम्?
उत्तरम्— वेदान्तसारस्य।

27. **प्रश्नः**— वेदस्य अन्तिमो भागः अवसानभागः कः?
उत्तरम्— वेदान्तः।

28. **प्रश्नः**—विवर्त्तवादः कस्य सिद्धान्तः?
उत्तरम्— वेदान्तस्य।

29. **प्रश्नः**—पृथिवी-जल-तेजो-वायुः इति चत्वारि द्रव्याणि केन मन्यते?
उत्तरम्— चार्वाकदर्शनेन।

30. **प्रश्नः**—प्रत्यक्षप्रमाणजन्यज्ञानविषयीभूतानि इति कस्य सिद्धान्तः?
उत्तरम्—चार्वाकदर्शनस्य।

31. **प्रश्नः**—बृहस्पतिप्रणीतं दर्शनं किम्?
उत्तरम्— चार्वाकदर्शनम्।

32. **प्रश्नः**—यावज्जीवेत्सुखं जीवेदृणं कृत्वा घृतं पिबेत् कस्य कथनम्?
उत्तरम्— चार्वाकदर्शनस्य।

33. **प्रश्नः**—जीवो जगच्चेत्युभयमपि अनित्यं प्रतिक्षण-परिणामशालि च इति कस्य मतम्?
उत्तरम्— बौद्धानाम्।

34. **प्रश्नः**—बौद्धदर्शनस्य प्रस्थानं कतिधा विभज्यते?
उत्तरम्— चतुर्धा।

35. **प्रश्नः**—के बाह्यार्थप्रत्यक्षमङ्गीकुर्वन्ति?
उत्तरम्—बौद्धाः।

36. **प्रश्नः**—शून्यवादिनः दर्शनस्य किं नाम?
उत्तरम्— बौद्धदर्शनम्।

37. **प्रश्नः**—जैनदर्शनस्य अपरं नाम किम्?
उत्तरम्— आर्हतदर्शनम्।

38. **प्रश्नः**—दिगम्बर-श्वेताम्बराख्यद्वयसम्प्रदायः कस्य?
उत्तरम्—जैनदर्शनस्य।

39. **प्रश्नः**—'मा हिंस्यात् सर्वा भूतानि' इति कस्य सिद्धान्तः?
उत्तरम्—जैनदर्शनस्य।

(खख) स्याद्वादैकान्तवादयोस्तुलना एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

स्याद्वादस्य विवेचनम्–जैनदर्शनं प्राधान्येन आचार-विचाराणां प्रतिपादकं परिपोषकञ्च दर्शनम्। जैनदर्शनं पुरातनतरं दर्शनमस्ति। एतदीयानां सिद्धान्तानां प्रवर्तकः ऋषभदेव आसीत्। प्रतिपरामर्शस्य परिवेषणार्थं जैनदर्शनं 'स्यात्' इत्येतस्य पदस्य व्यवहारं नितरामुचितं मन्यते। 'कथञ्चित्' इत्येतस्मिन् अर्थे सत् प्रयुज्यते। अस्धातोः विधिलिङि रूपं तत्। परमव्यत्वेन तत् प्रयोगोऽत्रापेक्षितः। कस्मिन्नपि विषये चेत् परामर्शोभिप्रेतस्तदा स 'स्यादस्ति' इत्येतदप्रयोगपूर्वकमेव कर्तव्य इति जैनदर्शनमाकाङ्क्षति। अतः **'घटोऽस्तीति नोक्त्वा 'स्यादस्ति घट'** इत्येतेन प्रकारेण तत्परामर्शः कार्यः। काल-देशविचारेण घटस्य सत्ताऽस्माभिरनुभूयते परं सा सत्ता नास्ति त्रैकालिकी। न तत्सत्ता सर्वत्र, सर्वविधेष्वपि कालेषु सर्वासु अपि अवस्थासु अनुभूतिविषयतां याति। अतः घटादिपदार्थानां विषयेऽस्मदीयपरामर्शः स्यादस्तीतिपूर्वक-मेवोचितः। एवंविधो हि वस्तु-परामर्शव्याहारः 'स्याद्वादः' इति नाम्ना विश्रुतः। वादोऽयं महनीयप्राभृतत्वेन मतो यं हि जैनदर्शनं प्रामाण्यमीमांसेतिहासाय समर्पयति। स्याद्वादस्य नामान्तरम् **'अनेकान्तवाद'** इत्येतदपि वर्तते। जैनः वन्ध्यापुत्रवत् यदस्ति असत्कारकव्यापारेण तस्योत्पत्तिः न भवितुर्महति।

घटादिकस्य कस्यचनापि पदार्थस्य सत्तामधिकृत्य–
1. स्यादस्ति, 2. स्यान्नास्ति, 3. स्यादस्ति नास्ति च, 4. स्याद् अवक्तव्यम्, 5. स्यादस्ति च अवक्तव्यञ्च, 6. स्यान्नास्ति च अवक्तव्यञ्च, 7. स्यादस्ति च नास्ति च अवक्तव्यञ्च इत्येते सप्त विकल्पा एव भवितुमर्हन्ति जैनदर्शनमतेन।

एकान्तवादविवेचनम्–सप्तप्रकारकं ज्ञानमिदं तत्र 'सप्तभङ्गी नयः' इत्येतया संज्ञया प्रथितम्। तत्त्वं भवति अनन्तधर्मात्मकम्। कस्यचन मानवस्य स्वरूपज्ञानाय देश-काल-जाति-जन्म-धर्म-वर्ण-समाजादिकानाम- वबोधनमेव न पर्याप्तं परं तदीयनिषेधात्मकानां धर्माणामपि ज्ञानमपेक्षितं भवति। सप्तानां अस्तित्वादीनां नियमानां भङ्गः सप्तभङ्गः, तेषां समाहारः सप्तभङ्गी, तस्या नयः-न्यायः सप्तभङ्गीन्यायः। सप्तप्रकारकाः एकान्तवादाः इत्थं वर्तन्ते–1. सांख्य, 2. शून्यवादीबौद्धः, 3. नैयायिकः, 4. वेदान्ती, 5. वेदान्तैकदेशीय, 6. मायावेदान्ती, 7. अपर-मायावेदान्ती। उदाहरणं यथा–

1. सांख्यः–घटः अस्ति इति जिज्ञासायां सांख्याचार्यस्य उत्तरं भवति– एवं (आम) यतः सः घटः व्यक्ताव्यक्तरूपेण सर्वदा तिष्ठत्येव। अयमेव सांख्यदर्शनस्य एकान्तवादः।

2. शून्यवादी बौद्धः–घटादिपदार्थः नास्ति यत् तद् रूपेण प्रतिभाति तदेव "सांवृतिकं सत्" वस्तुतः तद् सत् असदेव शून्यवादीमते घटादेः एकान्तस्वरूपम्।

3. नैयायिकः– अयमेव घटस्य स्वभावः, यः उत्पत्तेः पूर्वं न तिष्ठति। कुलाल-व्यापारेण पश्चात् तदुत्पत्तिर्जायते। अतः तद् घटः सत् पश्चात् ध्वंसे सति तदेव घटः असद् जायते। इयं सत्ता असत्ता च। तस्य मते एकान्तवादः।

4. वेदान्तिमते-एकस्मिन्नेव वस्तूनि एकस्मिन्नेव काले अस्तित्व-नास्तित्वयोः अयं न संगतम्। यतः विरुद्धयोः धर्मयोः युगपत् एकस्मिन् स्थाने स्थितिः न संभवा एवं च यद् वस्तु

सद् न तद् असद् भवितुमर्हति। यद् असद् तदपि न सत् भवितुमर्हति। यथा- घटो यदि सद्वस्तु वर्तते, तदा सः तदापि ध्वंसेऽपि असद् भवितुं नार्हति। अतः एकमेव वस्तु सच्चासच्च भवितुं नार्हति। अतः घटादिपदार्थः अनिर्वचनीयः। तदैव घटस्य एकान्तस्वरूपम्।

5.7 वेदान्तैक्षदेशीयः (मायावेदान्ती)–मायावेदान्तीनां मध्ये एकः वेदान्ती घटादिपदार्थस्य सत्ता अनीर्वचनीयता चेति द्वयं एकान्तवादरूपेण प्रतिपादयति। अपरः मायावेदान्ती नास्तित्वमनिर्वचनीयत्वं वस्तुनः एकान्तवचनीयं कथयति। तृतीयः मायावेदान्ती कालभेदेन वस्तुनः आस्तित्वं नास्तित्वं एकान्तस्वरूपेण प्रतिपादयन्ति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—जैनदर्शनानां सिद्धान्तानां प्रवर्तकः कः आसीत्?
   उत्तरम्— ऋषभदेवः।
2. **प्रश्नः**—जैनदर्शने 'स्यात्' इत्येतस्य पदस्य व्यवहारं किमर्थम्?
   उत्तरम्— प्रतिपरामर्शस्य परिवेषणार्थम्।
3. **प्रश्नः**—'घटोऽस्तीति' नोक्त्वा 'स्यादस्ति घट' इति कस्य परामर्शः?
   उत्तरम्—जैनदर्शनस्य।
4. **प्रश्नः**—घटादिपदार्थानां विषयेऽस्मदीयपरामर्शः किम्?
   उत्तरम्—स्यादस्तीतिपूर्वकमेवोचितः।
5. **प्रश्नः**—एवंविधो हि वस्तु-परामर्शव्याहारः इति किं नाम्ना विश्रुतः?
   उत्तरम्— स्याद्वादः।
6. **प्रश्नः**—स्याद्वादस्य नामान्तरं किम्?
   उत्तरम्— अनेकान्तवादः।
7. **प्रश्नः**—जैनदर्शनमतेन कति विकल्पाः भवितुमर्हन्ति?
   उत्तरम्—सप्तविकल्पाः।
8. **प्रश्नः**—सप्तप्रकारकं ज्ञानं किम्?
   उत्तरम्— सप्तभङ्गी नयः।
9. **प्रश्नः**—अनन्तधर्मात्मकं किं भवति?
   उत्तरम्— तत्त्वं भवति।
10. **प्रश्नः**—सप्तभङ्गीन्यांयस्य का व्युत्पत्तिः?
    उत्तरम्—सप्तानां अस्तित्वादीनां नियमानां भङ्गः सप्तभङ्गः, तस्या न्यायः सप्तभङ्गीन्यायः।
11. **प्रश्नः**—सप्तप्रकारकाः एकान्तवादाः के सन्ति?
    उत्तरम्— सांख्य, शून्यवादीबौद्धः, नैयायिकः, वेदान्ती, वेदान्तैक्षदेशीयः, मायावेदान्ती, अपर-मायावेदान्ती।
12. **प्रश्नः**—सांख्यदर्शने एकान्तवादस्य उदाहरणं किम्?
    उत्तरम्— घटः अस्ति, व्यक्ताव्यक्तरूपेण सर्वदा तिष्ठत्येव।
13. **प्रश्नः**—शून्यवादीमते घटादेः एकान्तस्वरूपं किम्?
    उत्तरम्— सांवृत्तिकं सत्।
14. **प्रश्नः**—नैयायिकमते घटस्य स्वभावः किम्?
    उत्तरम्— यः उत्पत्तेः पूर्वं न तिष्ठति।
15. **प्रश्नः**—कुलालव्यापारात् पश्चात् कस्य उत्पत्तिर्जायते?
    उत्तरम्— घटस्य।
16. **प्रश्नः**—वेदान्तीमते घटादिपदार्थः किम्?
    उत्तरम्—अनिर्वचनीयः।
17. **प्रश्नः**—कालभेदेन वस्तुनः अस्तित्वं नास्तित्वं एकान्तस्वरूपेण के प्रतिपादयन्ति?
    उत्तरम्—तृतीयमायावेदान्ती।

(गग) नास्तिकास्तिकवादः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

दर्शनशब्दस्यार्थः—दर्शन-शब्दोऽयं संस्कृतस्य प्रेक्षणार्थकाद् दृश् धातो (दृशिर् प्रेक्षणे) ल्युट् प्रत्यये अनादेशे च कृते सिद्ध्यति। दृश्यते अनेन इति दर्शनम्। उपनिषत्सु सत्यस्य दर्शनाय दृश् धातोः प्रयोगोऽभवत्। अर्थात् ज्ञानचक्षुषा यद् आत्मेत्यादि अलौकिकं वस्तु गृह्यते तद् दर्शनम्। अलौकिकं आत्मादितत्त्वं (आत्मा, स्वर्ग, मुक्ति-प्रभृति वस्तु) येन तद् दर्शनम्। येन साधनेन इदं विश्वम्, इदं वस्तुजातम्, ब्रह्म, जीवात्मा, प्रकृतिश्च, याथातथ्येन दृश्यते निरीक्ष्यते परीक्ष्यते समीक्ष्यते विविच्यते च यत्र तद् दर्शनम्। समग्रमपि आध्यात्मिकम् आधिभौतिकं च विवेचनं दर्शन-शब्दान्तर्गतं भवति।

नास्तिकवादस्य विवेचनम्–नास्तिकवादः प्रत्यक्षमेव केवलं प्रमाणम्, इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं हि तत्। शरीरमेव जीवः, सृष्टिः स्वभावत एव जायते। न तत्रेश्वरापेक्षा। ईश्वरो नास्त्येव। क्षिति-जल-पावक-गगन-समीररूपेषु पञ्चमहाभूतेषु केवलं क्षिति-जल-पावक-समीरणानामेव अस्तित्वमस्ति गगनरूप-पदार्थस्य अस्तित्वं प्रत्यक्षरूपेण अग्राह्यत्वात् असत् अस्ति। नास्तिकवादः शरीरस्यैवात्मत्वं स्वीकुर्वन्ति। ते इन्द्रियसुखसम्पादनमेव स्वजीवनस्य प्रधानलक्ष्यरूपेण अङ्गीकुर्वन्ति। प्रत्यक्षवस्तूनामतिरिक्तत्वेन अन्यत् किमपि वस्तुनः अस्तित्वं न भजते। प्रलये नहि विश्वसन्ति, सृष्टिः स्वयमेव भवति, रूपरसगन्धादिका गुणा अपि पृथिव्यादीनां संस्थानेभ्य एव जायन्ते। ते प्रतिपादयन्ति यत् येन प्रकारेण वर्षाकाले पृथिव्यादिभूतेभ्यः सहसा कीटाः भेकादिकाः जीवविशेषाश्च समुत्पद्यन्ते तेनैव प्रकारेण मनुष्यादिजीवेभ्यः तेषां चैतन्यं निष्कारणमेव उत्पद्यते। इमे आत्मव्यतिरिक्तं परमात्मानं नहि स्वीकुर्वन्ति। मरणोपरान्तं जीवास्तित्वस्याभावात्। एतेषां मतानुसारेण यावच्छरीरमेव जीवनस्य सत्ता भवति। शरीरविनाशस्य समकालमेव जीवस्य विनाशो भवति। सांसारिकं जायमानं सुखम् एव इमे स्वर्गशब्देन, त्रिविधानि दुःखानि च नरकशब्देन अभिदधति। एतेषु कृते सूर्य एव प्रत्यक्षदेवता विद्यते। नास्तिकवादिनः ईश्वरस्य अस्तित्वं नाङ्गीकुर्वन्ति; यतो हि ईश्वरज्ञानं प्रत्यक्षप्रमाणेन न सिद्ध्यति। एतेषां मते परलोकास्तित्वमपि नास्ति, प्रमाणाभावात्। धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टये केवलं कामार्थरूपं पुरुषार्थद्वयमेव स्वीकुर्वन्ति। धर्ममोक्षौ एभिः न स्वीक्रियते। मरणमेव अपवर्गः। सुखप्राप्तिरेव मोक्षप्राप्तिः। मरणानन्तरं किमपि नास्ति इति कृत्वा अस्मिन् जन्मन्येव यावतां सुखानां भोगः भवति तदेव आनन्दात्मको भवति। केवलं 'वेदानङ्गीकारात्' इत्यनेन हेतुना, 'नास्तिको वेदनिन्दकः' इति न्यायेन च 'नास्तिक'-पदजन्यबोधविषयतावत्त्वेन नास्तिकता-'अर्हत्'-निष्ठा सती, आर्हतमतनिष्ठा सती वा 'नास्तिके'ति शब्देन व्यपदिश्यमाना अवश्यमेव खलु भवन्ति जैनाश्चार्वाकबौद्धदार्शनिकवत्। जैनदर्शने 'मा हिंस्यात् सर्वा भूतानि' इत्यनया श्रुत्या पुष्टीकृतः अहिंसा परमो धर्मः। अयमेवोपनिषत्सु वर्णितः सिद्धान्तः परमसिद्धान्तत्वेन मान्यत्वेन चाऽङ्गीकृतो वर्तते। एतानि नास्तिकदर्शनशास्त्राणि–भौतिक-जगतः प्रकृतिवादः **मरणमेव अपवर्गः जीवहिंसा न करणीया** अर्थकामौ पुरुषार्थौ प्रत्यक्षमेव प्रमाणम् इत्यादीन् स्वसिद्धान्तान् प्रतिपादयन्ति।

नास्तिकदर्शनस्य सूत्राणि अधोऽङ्कितानि सन्ति–

1. अर्थकामौ पुरुषार्थौ।	2. प्रत्यक्षमेव प्रमाणम्।	3. धूर्तप्रलापस्त्रयीस्वर्गोत्पादकत्वेन विशेषाभावात्।
4. तेभ्यश्चैतन्यम्।	5. लौकिको मार्गोऽनुसर्तव्यः।	6. किण्वादिभ्यो मदशक्तिवद् विज्ञानम्।
7. मरणमेवापवर्गः।	8. पृथिव्यप्तेजोवायुरिति तत्त्वानि।	9. दण्डनीतिरेव विद्या अत्र वार्ताऽन्तर्भवति।
10. भूतान्येव चेतयन्ते।	11. चैतन्यविशिष्टः कायः पुरुषः।	12. परलोकिनः अभावात् परलोकाभावः।
13. जलबुद्बुदवज्जीवः।	14. तत्समुदाये शरीरेन्द्रियविषयसंज्ञा।	

नास्तिकवादस्य सिद्धान्तः–

1. जीवनस्य पृथक् सत्त्वं नहि स्वीकुर्वन्ति।	2. वेदस्य प्रमाणं नहि स्वीकरणीयम्।
3. अप्-पृथिवी-तेज-वायुः इति चत्वारि तत्त्वानि सन्ति।	4. चार्वाकाणां मते नास्ति परलोकः।
5. अर्थकामयोरेव पुरुषार्थत्वं स्वीकुर्वन्ति।	6. प्रत्यक्षमेव एकं प्रमाणम्।

आस्तिकदर्शनस्य विवेचनम्—वैदिक (आस्तिक) दर्शनानि षट्- (क) न्यायदर्शनम्, (ख) वैशेषिकदर्शनम्, (ग) सांख्य-दर्शनम्, (घ) योग-दर्शनम्, (ङ) पूर्वमीमांसा-दर्शनम्, (च) उत्तरमीमांसा-दर्शनम्। अस्तिकदर्शनस्य प्रवर्तकाः सिद्धान्तानि अधोऽङ्कितानि सन्ति।

1. **न्यायदर्शनस्य** प्रवर्तकः गौतमः, गौतमप्रवर्तितं न्यायशास्त्रं पदार्थ-मीमांसाशास्त्रम्। षोडश-पदार्थाश्चाभ्युपगताः प्रमाणप्रमेयाद्याः। तत्र प्रमाणप्रमेयसंशय-प्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डा-हेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति तत्सिद्धान्तः। 'प्रमाणप्रमेयसंशयप्रयोजने'त्यारभ्य 'हेत्वाभासाश्च यथोक्ताः' इत्येतत् पर्यन्तं तदिदं पञ्चाऽध्यायात्मकं न्यायशास्त्रम्। अत्र वाक्यद्वयषट्कीभूतयोश्च मान-प्रमाण-पदयोरैक्येन अर्थात् एकार्थकत्वेन, समानार्थकत्वेनेत्यर्थः, न्यायशास्त्ररूपत्वम्। अतः न्यायशास्त्रमेव प्रमाणशास्त्रं मन्यते लोके:।

2. **वैशेषिकदर्शनस्य प्रवर्तकः**—कणादः, विशेषपदार्थ-स्वीकार-मूलकमेवास्य दर्शनस्य वैशेषिकमिति नामकरणम्। वैशेषिके त्रयो हेत्वाभासाः स्वीकृताः। दश अध्यायैः 370 सूत्रैश्च निबद्धमिदं दर्शनम्। आदिमं सूत्रं "धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसाधिगमः।" अस्मिन् दर्शने परमात्मा तु ईश्वरापरनामा जीवात्मनो भिन्न एव। तत्त्वज्ञानेन मिथ्यावासनायां निवर्त्तितायां रागाभावात् प्रवृत्त्यभावे कर्माभावात् सुखदुःखापगमः, स एव च मोक्ष इति शास्त्रस्यास्य तत्त्वम्। शास्त्रं द्विविधम् 1. पदशास्त्रम्, 2. पदार्थशास्त्रञ्च। तत्र पदशास्त्रं व्याकरणशास्त्रम्, पदार्थशास्त्रं काणादशास्त्रम् (वैशेषिकशास्त्रम्, न्यायशास्त्रम्)। यद्यपि व्याकरण-वेदान्त-प्रभृतीनामन्येषामपि शास्त्राणां विद्यमानत्वेन शास्त्रत्वकथनं साधु सङ्गच्छते। वैशेषिकदर्शनस्य पदार्थशास्त्रत्वेन सर्वत्र पदार्थाः। इदमेव काणाददर्शनम् (वैशेषिकदर्शनम्) औलूक्यदर्शन-मप्युच्यते। प्रमाणानां विचारचर्चाऽवसरे तत्र प्रमाणद्वयमेव मान्यं भवति।

3. **सांख्य-दर्शनस्याद्य आचार्यः** कपिलः, सिद्धान्तस्तु प्रकृतिः पुरुषश्चेति द्वे मूलतत्त्वे, अनयोरेव सम्बन्धाज्जगदुत्पद्यते। प्रकृतिर्जडा, पुरुषश्चेतनः, पुरुषसम्बन्धात्प्रकृतौ क्रिया। सत्कार्यवादोऽत्र समर्थितः।

नास्ति सांख्यसमं ज्ञानं, नास्ति योगसमं बलम्।
अत्र वः संशयो मा भूत्, ज्ञानं सांख्यं परं स्मृतम्।।
संख्यां प्रकुर्वते चैव, प्रकृतिं च प्रचक्षते।
तत्त्वानि च चतुर्विंशः, तेन सांख्यं प्रकीर्तितः।।

4. **योगदर्शनस्य** प्रवर्त्तकः महर्षि पतञ्जलिः। योगदर्शनम् प्राचीन-दर्शनम्। नानासिद्धीनां जनकमित्यत्रापि च नास्ति विवादः। अयञ्च महर्षिप्रवरः श्रीपतञ्जलिः शेषावतारभूतः विद्वान् व्याकरणमहाभाष्यकारश्चासीत्। इदं योगदर्शनं पादचतुष्ट्यात्मकम्। षड्विंशतिस्तत्त्वानि सांख्यस्य-25 + ईश्वरः = 26। स चायमीश्वरः-क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः।"

5. **मीमांसा-दर्शनस्य** कृते जन्मदातृजैमिनिनये कर्मणा एवाऽभ्युदयनिःश्रेयसयोः समवाप्तिजनकत्वेन तस्यैव कर्मणः प्राधान्येन निरूपणीयत्वात् इति। कुमारिलः श्लोकवार्तिके-"धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्" इति। वारदायणेन कर्मफलदातेश्वरो मन्यते। जैमिनिना कर्मण एव फलदातृत्वं प्रदर्शितम्। अतएव मीमांसका निरीश्वरवादिनो घुष्यन्ते।

6. **वेदान्तदर्शनस्य** अन्तिमो भागः अवसानभागः इति विग्रहेण उपनिषद् उच्यते। उपनिषद एव प्राचीनैर्वेदान्तशब्देनोक्ताः। 1. अनादिरनुवर्तमानोऽयं संसारोऽपास्य एव। 2. ज्ञानापेक्षया कर्मणो गौणत्वम्। 3. ब्रह्मादीन्द्रियातीतवस्तुनिरूपणे वेदाः प्रधानतया प्रमाणानि। 4. उपनिषदो गीता ब्रह्मसूत्राणि चेति प्रस्थानत्रयी मतसाधनायावलम्बनम्। 5. ब्रह्म व्यापकं नित्यञ्चेतनञ्च। 6. ब्रह्मैव जगज्जन्म-स्थितिप्रलयकारणं नान्यदचेतनं प्रकृत्यादि। तदेदं संक्षिप्य वर्णितो वेदान्तसमुदायः। भारतीयं दर्शनं वेदान्तपर्यवसायि, यतोऽत्र सर्वत्र दर्शनेषु क्रमविकास इव प्रतीयते। प्रथमं कणादस्यारम्भवादः तदनन्तरं गौतमस्य परमाणुवादः, तत्परोऽपि सांख्यस्य परिणामवादः, सर्वान्ते वेदान्तस्य विवर्त्तवादः।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— दर्शनस्य का परिभाषा?
उत्तरम्— ज्ञानचक्षुषा यद् आत्मेत्यादि अलौकिकं वस्तु गृह्यते तद् दर्शनम्।

2. **प्रश्नः**—प्रत्यक्षमेव केवलं प्रमाणम्, इन्द्रियार्थ-सन्निकर्षोत्पन्नं ज्ञानं हि केन मन्यते?
उत्तरम्— नास्तिकवादिना।

3. **प्रश्नः**— ईश्वरो नास्त्येव इति कस्य विचारः?
उत्तरम्—नास्तिकस्य।

4. **प्रश्नः**—पञ्चमहाभूतेषु केवलं क्षिति-जल-पावक-समीरणानामेव अस्तित्वमिति केन मन्यते?
उत्तरम्—नास्तिकेन।

5. **प्रश्नः**—शरीरस्यैवात्मत्वं के स्वीकुर्वन्ति?
उत्तरम्—नास्तिकवादिनः।

6. **प्रश्नः**—इन्द्रियसुखसम्पादनमेव स्वजीवनस्य प्रधानलक्ष्यरूपेण के अङ्गीकुर्वन्ति?
उत्तरम्—वेदनिन्दकाः।

7. **प्रश्नः**—यावच्छरीरमेव जीवनस्य सत्ता, शरीरविनाशस्य जीवस्य विनाशो भवति इति कस्य विचारः?
उत्तरम्—नास्तिकस्य।

8. **प्रश्नः**—नास्तिकाः स्वर्गशब्देन किमभिदधति?
उत्तरम्—सांसारिकं जायमानं सुखम् एव।

9. **प्रश्नः**— नरकशब्देन नास्तिकाः किमभिदधति?
उत्तरम्— त्रिविधानि दुःखानि।

10. **प्रश्नः**—सूर्य एव प्रत्यक्षदेवता इति केन मन्यते?
उत्तरम्—नास्तिकेन।

11. **प्रश्नः**—एतेषां मते परलोकास्तित्त्वमपि कथं नास्ति?
उत्तरम्— प्रमाणाभावात्।

12. **प्रश्नः**—पुरुषार्थचतुष्टये केवलं कामार्थरूपं पुरुषार्थद्वयमेव के स्वीकुर्वन्ति?
उत्तरम्—नास्तिकाः।

13. **प्रश्नः**— मरणमेव अपवर्गः सुखप्राप्तिरेव मोक्षप्राप्तिः इति कस्य विचारः?
उत्तरम्—नास्तिकस्य।

14. **प्रश्नः**—'मा हिंस्यात् सर्वा भूतानि' इति कस्य वचनम्?
उत्तरम्—जैन-नास्तिकदर्शनस्य।

15. **प्रश्नः**—वैदिक (आस्तिक) षट्-दर्शनानि कानि सन्ति?
उत्तरम्— न्यायदर्शनम्, वैशेषिक, सांख्य, योग, मीमांसा, वेदान्त।

16. **प्रश्नः**—आस्तिक-न्यायदर्शनस्य प्रवर्तकः कः?
उत्तरम्—गौतमः।

17. **प्रश्नः**— गौतमप्रवर्तितं आस्तिक-न्यायशास्त्रं किम्?
उत्तरम्— पदार्थ-मीमांसाशास्त्रम्।

18. **प्रश्नः**—आस्तिकन्यायशास्त्ररूपत्वं केन भवति?
उत्तरम्—एकार्थकत्वेन, समानार्थकत्वेनेत्यर्थः।

19. **प्रश्नः**— आस्तिक-वैशेषिकदर्शनस्य प्रवर्तकः कः?
उत्तरम्—कणादः।

20. **प्रश्नः**—वैशेषिकमिति नामकरणस्य किं तात्पर्यम्?
उत्तरम्—विशेषपदार्थस्वीकारमूलकमेव।

21. **प्रश्नः**—त्रयो हेत्वाभासाः कैः स्वीकृताः?
उत्तरम्—आस्तिकवैशेषिकदर्शनैः।

22. **प्रश्नः**—आस्तिकवैशेषिकशास्त्रस्य तत्त्वं किम्?
उत्तरम्—मोक्षम्।

23. **प्रश्नः**—आस्तिकवैशेषिकशास्त्रं कतिविधम्?
उत्तरम्—द्विविधम्।

24. **प्रश्नः**—कौ द्विविधौ आस्तिकवैशेषिकशास्त्रे?
उत्तरम्—पदशास्त्रम् (व्याकरणशास्त्रम्), 2. पदार्थशास्त्रं (पदार्थशास्त्रम्)।

25. **प्रश्नः**—आस्तिकवैशेषिक-दर्शनस्य पदार्थशास्त्रत्वेन कति पदार्थाः?
उत्तरम्— सप्तपदार्थाः।

26. **प्रश्नः**— आस्तिकसांख्य-दर्शनस्याद्य आचार्यः कः?
उत्तरम्—कपिलः।

27. **प्रश्नः**—प्रकृतिः पुरुषश्चेति द्वे मूलतत्त्वे इति के मन्यते?
उत्तरम्—सांख्य-आस्तिकदर्शनम्।

28. **प्रश्नः**—आस्तिकदर्शनानुसारं जगदुत्पत्तिः कस्मात् कारणात् भवति?
उत्तरम्—प्रकृति-पुरुषयोः सम्बन्धात्।

29. **प्रश्नः**—प्रकृतिर्जडा, पुरुषश्चेतनः, पुरुषसम्बन्धात्प्रकृतौ क्रिया इति केन मन्यते?
उत्तरम्—सांख्य-आस्तिकदर्शनेन।

30. **प्रश्नः**—सत्कार्यवादस्य समर्थकः कः?
उत्तरम्— सांख्य-आस्तिकदर्शनम्।

31. **प्रश्नः**—चतुर्विंशतितत्त्वानि कस्य दर्शनस्य विवेच्यविषयः?
उत्तरम्— सांख्य-आस्तिकदर्शनस्य।

32. प्रश्नः—योग-आस्तिकदर्शनस्य प्रवर्तकः कः?
उत्तरम्—महर्षि पतञ्जलिः।

33. प्रश्नः— पादचतुष्ट्यात्मकं दर्शनं किम्?
उत्तरम्—योग-आस्तिकदर्शनम्।

34. प्रश्नः—षड्विंशतितत्त्वानि (26) कस्य दर्शनस्य वर्तते?
उत्तरम्—आस्तिक-सांख्यस्य।

35. प्रश्नः—क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः कः?
उत्तरम्— ईश्वरः।

36. प्रश्नः—धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् इति कस्य वचनम्?
उत्तरम्—श्लोकवार्तिके कुमारिलस्य।

37. प्रश्नः— कर्मफलदातेश्वरो केन मन्यते?
उत्तरम्—बादरायणेन।

38. प्रश्नः—कर्मण एव फलदातृत्वं केन प्रदर्शितम्?
उत्तरम्—जैमिनिना।

39. प्रश्नः— आस्तिक-वेदान्तदर्शनस्य अन्तिमो भागः कः?
उत्तरम्—अवसानभागः।

40. प्रश्नः—आस्तिक-दर्शनेषु क्रमविकासक्रमे प्रथमं किमायाति?
उत्तरम्— कणादस्यारम्भवादः।

41. प्रश्नः— आस्तिक-दर्शनेषु क्रमविकासक्रमे द्वितीयं किमायाति?
उत्तरम्—गौतमस्य परमाणुवादः।

42. प्रश्नः—आस्तिक-दर्शनेषु क्रमविकासक्रमे तृतीयं किमायाति?
उत्तरम्—सांख्यस्य परिणामवादः।

43. प्रश्नः— आस्तिक-दर्शनेषु क्रमविकासक्रमे सर्वान्ते किमायाति?
उत्तरम्—वेदान्तस्य विवर्त्तवादः।

(घघ) ब्रह्म सत्यं जगन्मिथ्या (सर्वं खल्विदं ब्रह्म) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

सर्वाणि दर्शनानि दुःखत्रयाभिघाताय शुद्धबुद्धमुक्तस्वभावं सच्चिदानन्दं ब्रह्म अशिश्रियन्। एतेषु वेदान्तदर्शनं तु ब्रह्मैव सत्यं मन्यते, तद्व्यतिरिक्तं यत् किञ्चिदपि विद्यते जगत्यस्मिन् सर्वमसत्स्वरूपम्। तत् जगतः सर्वस्वं ब्रह्मैव स्वीकरोति, तदेव जगतः चराचरस्य उपादानकारणं निमित्तकारणञ्चास्ति। एतदेव परमात्मरूपेण विश्वस्य अखिलस्य मूले तिष्ठति। सम्पूर्णोऽयं लोकः ब्रह्मण एव विवर्तः विद्यते। स एकोऽद्वितीयश्च अस्ति। यतो हि तेन समं सजातीयो विजातीयो चापरो न विद्यते-**एकमेवाद्वितीयं सन्नामरूपविवर्जितम्। सृष्टेः पुराऽधुनाप्यस्य तादृक्त्वं तदितीर्यते**।। सः ज्योतिषां ज्योति एवम् अवाङ्मनसगोचरः। स परमात्मा अद्वितीयः सर्वव्यापकः सर्वान्तर्यामी साक्षी चैतन्यस्वरूपो निर्गुणश्चेति। न तत्समश्चाभ्यधिकश्च कश्चन। ब्रह्म तु सर्वथा ज्ञानात्मकम् अज्ञानरहितं, चित्स्वरूपं सत्यरूपं आनन्दात्मकञ्च। ब्रह्मैव परमात्मा। परमात्मा तु प्रकाशानामपि प्रकाशः तेजसामपि तेजः अस्ति। तस्यैव तेजसा निखिलं जगद् भाति। अग्न्यादीनां का कथा सूर्यचन्द्रतारकादयो न तस्य प्रकाशने प्रभवः। सः एको विश्वरूप एव सर्वदेवमयश्च वर्तते।

ब्रह्म सत्यम्—अत्र सत्यं किञ्चासत्यम्? अस्मिन् विषये शङ्कराचार्यस्तु एवं लिखितवान्—**यद् रूपेण यन्निश्चितं तद् रूपं न व्यभिचरति तत् सत्यम्**। सर्वं खल्विदं जगत् ब्रह्मणो विवर्तरूपम्। वेदान्तदर्शनानुसारं ब्रह्म निर्विकल्पं निरुपाधि निर्विकारं चेति उररीक्रियते। तद् ब्रह्म द्विविधं निर्गुणं सगुणं च। परमार्थदृष्ट्या सच्चिदानन्दस्वरूपं निर्गुणं ब्रह्म इति। श्वेताश्वतरोपनिषदि उक्तं यत् तदेव ब्रह्म अग्नौ, आदित्ये, वायौ, चन्द्रमसि, सर्वपदार्थेषु अन्तर्हितम्। आत्मा ज्ञानं रूपं ज्ञाता चास्ति। 'आत्मा आत्मानं जानाति' अस्मिन् वाक्ये कर्तृरूपात्मा एवं कर्मरूपात्मा एक एवास्ति। आत्मा नित्यः अव्यक्तः कूटस्थः, निष्क्रियो विद्यते। आत्मा एव ब्रह्म अस्ति। 'तत्त्वमसि' इति सिद्धान्तेऽस्य प्रतिपादनं कृतम्। जगतः सर्वे जीवाः तु ब्रह्मैव सन्ति। अज्ञानवशात् ते पृथग्रूपाः दृश्यन्ते। यथा एकमेव जलं विभिन्नेषु जलाशयेषु पात्रेषु च विविधनामरूपेण उपचर्यते। तथैव जीवाः विविधशरीरेषु विनिपत्य विविधनामरूपाणि उररीकुर्वते। प्रलयकालेऽपि यदा सर्वं जगद् विनश्यति ब्रह्म पूर्ववत् तिष्ठति।

जगन्मिथ्या—वेदान्तानुसारं जगत् नितान्तासत्यपदार्थमस्ति। जीवः अज्ञानेन मिथ्याजगत् सत्यं मन्यते। एष ब्रह्म आत्मा वा यदा मलिनसत्वोपाधियुतो भवति तदा ईश्वरः इति संज्ञां लभते, परं यदा मलिनसत्वोपाधियुतो भवति तदा जीवः कथ्यते। यथाह–

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।
कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते।।

एकमेव ब्रह्म मायया अनेकानि रूपाणि धारयति। मायैव अविद्या-अज्ञान-अध्याय-अध्यारोप-विवर्तादिशब्दैः व्यवहियते। वेदान्ते त्रिविधा सत्ता स्वीक्रियते-1. प्रातिभासिकी, 2. व्यावहारिकी, 3. पारमार्थिकी च। 'सर्वं खल्विदं जगत् ब्रह्मणो विवर्त्तरूपम्' अत्र विवर्त्तस्तु न वास्तविकः अपितु प्रातिभासिकः अस्ति। यथा रज्जौ सर्पस्य प्रतीतिः न वास्तविकी अपितु विवर्त्तरूपा अज्ञानजा एवास्ति। एवं ब्रह्मैव केवलं पारमार्थिकी सत्ता। वेदान्तानुसारं तात्त्विकदृष्ट्यैव जगन्मिथ्येति, व्यवहारदृष्ट्या तु तदनुभूतिर्न निर्मूला। अतः वेदान्तदर्शनस्य इदं दृढं मतं यत् मुक्तिः ब्रह्मतत्त्वस्य ज्ञानेनैव समुपपद्यते। एकस्यैव तत्त्वस्य समष्टि-व्यष्टिरूपेण नामान्तरं ब्रह्मजीवात्मानौ इति। ब्रह्मसाक्षात्कारे द्वयोरैक्यस्यानुभूतेः 'तत् त्वमसि' इति संगच्छते।

एवम् इदं कथनं सुष्ठु एवास्ति यत् इदं सम्पूर्णं जगत् ब्रह्मैवास्ति। तद्व्यतिरिक्तं तु असत्यम्। एतत् सुकरम् अभिधातुं यद्-

ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः।

वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—दुःखत्रयाभिघाताय शुद्धबुद्धमुक्तस्वभावं सच्चिदानन्दं ब्रह्म इति के मन्यन्ते?
उत्तरम्— सर्वाणि दर्शनानि।

2. प्रश्नः—'ब्रह्मैव सत्यम्' इति केन मन्यते?
उत्तरम्— वेदान्तदर्शनेन।

3. प्रश्नः—जगतः चराचरस्य उपादानकारणं निमित्तकारणञ्च कः अस्ति?
उत्तरम्— ब्रह्मैव।

4. प्रश्नः—'परमात्मरूपेण विश्वस्य अखिलस्य मूले कः तिष्ठति?
उत्तरम्— ब्रह्म।

5. प्रश्नः— तस्य ब्रह्मणः स्वरूपं किमस्ति?
उत्तरम्—एकोऽद्वितीयश्च।

6. प्रश्नः—ज्योतिषां ज्योतिः एवम् अवाङ्मनसगोचरः कः?
उत्तरम्— अद्वितीय-परमात्मा।

7. प्रश्नः—सर्वव्यापकः सर्वान्तर्यामी साक्षी चैतन्यस्वरूपो निर्गुणश्चेति कः?
उत्तरम्— ईश्वरः।

8. प्रश्नः—प्रकाशानामपि प्रकाशः तेजसामपि तेजः कः?
उत्तरम्—परमात्मा।

9. प्रश्नः—एको विश्वरूपः सर्वदेवमयश्च कः?
उत्तरम्— ब्रह्म।

10. प्रश्नः—"यद् रूपेण यन्निश्चितं तद् रूपं न व्यभिचरति तत् सत्यम्" इति केन मन्यते?
उत्तरम्— शङ्कराचार्येण।

11. प्रश्नः—आत्मायाः स्वरूपं किम्?
उत्तरम्—नित्यः, अव्यक्तः, कूटस्थः, निष्क्रियश्च।

12. प्रश्नः—जगतः सर्वे जीवाः तु के सन्ति?
उत्तरम्— ब्रह्मैव।

13. प्रश्नः—प्रलयकालेऽपि सर्वं जगद् विनश्यति पूर्ववत् कः तिष्ठति?
उत्तरम्— ब्रह्म।

14. प्रश्नः—वेदान्तानुसारं जगत् सत्यमसत्यं वा?
उत्तरम्— नितान्तासत्यपदार्थमस्ति।

15. प्रश्नः—जीवः केन कारणेन मिथ्याजगत् सत्यं मन्यते?
उत्तरम्— अज्ञानेन।

16. प्रश्नः—एकमेव ब्रह्म मायया अनेकानि कानि रूपाणि धारयति?
उत्तरम्—अविद्या-अज्ञान-अध्याय-अध्यारोप-विवर्तादिशब्दैः व्यवहियते।

17. प्रश्नः—वेदान्ते काः त्रिविधा सत्ता स्वीक्रियते?
उत्तरम्— 1. प्रातिभासिकी, 2. व्यावहारिकी, 3. पारमार्थिकी च।

18. प्रश्नः—जगति पारमार्थिकी सत्ता कस्य वर्तते?
उत्तरम्— ब्रह्मणोरेव।

19. प्रश्नः—वेदान्तदर्शनुसारं मुक्तिः केन समुपपद्यते?
उत्तरम्— ब्रह्मतत्त्वस्य ज्ञानेनैव।

20. प्रश्नः—एकस्यैव तत्त्वस्य समष्टि-व्यष्टिरूपेण नामान्तरौ कौ?
उत्तरम्— ब्रह्मजीवात्मानौ।

21. प्रश्नः—'ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः' इति कस्य वचनम्?
उत्तरम्— ब्रह्मवादीवेदान्तस्य।

(ङङ) परिणामवादविवर्तवादयोस्तुलना एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

परिणामवादः–सांख्यस्य कार्य-कारणविषयकः सिद्धान्तोऽद्भुतः। सत्कार्यवादस्य द्वौ भेदौ स्तः। 1. परिणामवादः, 2. विवर्तवादः। सांख्यं वदति उत्पत्तेः प्रागपि कार्यं कारणेऽव्यक्ततत्त्वेन निषीदति। वस्तुतस्तु कार्यकारण-योर्मध्ये न भिन्नता। कार्यस्याव्यक्तावस्थैव कारणमित्युच्यते। किञ्च कारणस्य व्यक्तावस्थैव 'कार्य'मित्येतां संज्ञामश्नुते। न तत्र तात्त्विको भेदो व्यवहारवशादेव 'इदं कार्यम्, इदं कारणम्' इत्यनेन प्रकारेणाभिधीयते। सांख्यस्यैष सिद्धान्तः 'सत्कार्यवादो' वा 'परिणामवाद' इति कथ्यते। यथा सांख्यकारिकायाम्–

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।

सांख्यवृद्धाश्च सत्कार्यवादपक्षे प्राहुः–

सदेव कार्यमुत्पत्तेः पूर्वं कारकरूपकम्।
आविर्भावतिरोभावौ जन्मनाशावुदीरितौ।।

ते हि दुग्धं सदेव दधिरूपेण परिणमते, तद् दधिकार्यान्तरं दुग्धाद् भिन्नं च न भवतीत्यादिदृष्टान्तोपस्थापनपुरस्सरं नैजं मतमिदं सुदृढतया परिपुष्णन्तः 'स्वोत्पत्तेः पूर्वं कार्यं नासीदेव, पश्चात् कारणसामग्रीवशादुत्पद्यत इति कार्यकारणयोरन्यत्वं परमार्थतः 'सत्यम्' इत्येतमसत्कार्यवादं नैयायिकानाम्। असतः कार्यस्य कारणव्यापारसहस्रैरपि कर्तुमशक्यत्वात्। न हि नीलं शिल्पिसहस्रेणापि पीतं कर्तुं पार्यते। कारणेऽसतः कार्यस्य कार्यसत्तया सह सम्बन्धासम्भवाच्च। कापिलसूत्रम्–नासादुत्पादो नृ शृङ्गवत् अर्थात् न हि अविद्यमानं शशशृङ्गं कदापि शशे शृङ्गरूपकार्यसत्तां भजते। कार्यं सदा कारणे व्यक्तरूपेण कार्ये कारणं अव्यक्तरूपेण वा विद्यमानोऽस्ति।

विवर्तवादः–कारणस्य एव एकमात्रसत्ता स्वीक्रियते। **कारणमेव कार्यस्वरूपेण भासते इति कारणस्यैव सत्यत्वं न तु कार्यस्य सत्यत्वम्** इत्येतं वेदान्तीनां विवर्तवादश्च **असति बाधे प्रत्यक्षसिद्धपदार्थस्य मिथ्यात्वासम्भवात् कार्यं नासत्यम्** इत्युच्यते। अर्थात् कार्यः सत्–असत् इत्यनेन विलक्षणं एकं अनिर्वचनीयव्यापारं मन्यते। एषा दृष्टिः शाङ्करादि अद्वैतवेदान्तीनां वर्तन्ते। यथा– **अतत्त्वतोऽन्यथा प्रथा विवर्तः।** इदं जगन्मायायाः परिणामस्त्वस्ति परं ब्रह्मणो विवर्तोऽस्ति। अद्वैतानुसारं ब्रह्मणा एव इदं नामरूपात्मकं जगत् उत्पन्नो भवति। परन्तु जगत् असत्यः कपोलकल्पना वर्तते, ब्रह्म एव एकमात्रसत्ता वर्तते। जगति केवलं प्रतीतिः भवति, सः असत्यः। इदं सिद्धान्तं विवर्तवादस्य विद्यते। यथा-आकारस्य सत्ता द्रव्योपरि वर्तते। आकृतिः अनित्या द्रव्यं नित्यम्। अतः कारणमेव एकमात्रसत्ता मन्यते।

वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः— सत्कार्यवादस्य द्वौ भेदौ कौ स्तः?
उत्तरम्— 1. परिणामवादः, 2. विवर्तवादः।

2. प्रश्नः— परिणामवादी दर्शनं कस्य वर्तते?
उत्तरम्— सांख्यदर्शनस्य।

3. प्रश्नः— विवर्तवादी दर्शनं कस्य वर्तते?
उत्तरम्— अद्वैतवेदान्तस्य।

4. प्रश्नः—परिणामवादस्य का परिभाषा?
उत्तरम्—निमित्तकारणैः पदार्थस्य नवाकृतिरूपे परिवर्तनम्।

5. प्रश्नः— विवर्तवादस्य का परिभाषा?
उत्तरम्— कारणमेव सत्यं आकृतिः मिथ्या।

6. प्रश्नः— 'कारणमेव एकमात्रसत्ता' इति केन मन्यते?
उत्तरम्— अद्वैतवेदान्तेन।

7. प्रश्नः— रज्जोः विवर्तः किम्?
उत्तरम्— सर्पः।

8. प्रश्नः— असत्यं सत्यं कदा भवति?
उत्तरम्— परीक्षणेन।

9. प्रश्नः— अतत्त्वतोऽन्यथा प्रथा विकारः कः?
उत्तरम्— विवर्तः।

10. प्रश्नः— तूरी पटस्य कारणं किम्?
उत्तरम्— निमित्तम्।

11. प्रश्नः— पटरूपं प्रति तन्तुरूपे किं कारणम्?
उत्तरम्— असमवायि।

12. प्रश्नः— आचार्यशंकरानुसारम् अज्ञानं किम्?
उत्तरम्— अध्यासः।

13. प्रश्नः— आकृतिः अनित्या द्रव्यं नित्यम् इति कस्य सिद्धान्तः?
उत्तरम्— विवर्तवादी-वेदान्तस्य।

14. प्रश्नः— आकारस्य सत्ता कस्योपरि वर्तते?
उत्तरम्— द्रव्यस्योपरि।

15. प्रश्नः— विवर्तः कस्य भाषा वर्तते?
उत्तरम्— अद्वैतस्य।

16. प्रश्नः— 'कारणमेव कार्यस्वरूपेण भासते' इति कस्य विचारः?
उत्तरम्— सांख्यदर्शनस्य।

17. प्रश्नः— द्वैतवादीदर्शनस्य किं नाम?
उत्तरम्— सांख्यदर्शनम्।

18. प्रश्नः— 'दुग्धेन दधिः' इति कस्य उदाहरणम्?
उत्तरम्— परिणामवादस्य।

19. प्रश्नः— उपादानग्रहणात् केन सम्बन्धितः?
उत्तरम्— सत्कार्यवादेन।

20. प्रश्नः— कारणं किमित्युच्यते?
उत्तरम्— कार्यस्याव्यक्तावस्थैव।

21. प्रश्नः— परिणामवादस्य अपरं नाम किम्?
उत्तरम्— सत्कार्यवादः।

22. प्रश्नः— 'नासदुत्पादो नृ शृङ्गवत्' इति कस्य सूत्रम्?
उत्तरम्— कापिलसूत्रम्।

(चच) शून्यवाद-क्षणभङ्गवादयोस्तुलना एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

शून्यवादः (माध्यमिकानां) –विज्ञानवादयोरन्तर्भावो महायानसम्प्रदाये किञ्च बाह्यप्रत्यक्षवादवाह्यानुमेयवादयोः समावेशो हीनयानसम्प्रदाये वर्तते। शून्यवादस्य (माध्यमिकवादस्य) प्रवर्तकः आसीत् नागार्जुनः। नागार्जुनः माध्यमिककारिकाभिधे स्वकीये ग्रन्थे प्रसिद्धं शून्यवादं विततान। तत्र सः पाण्डित्यपूर्णं विवेचनं वादस्यास्य कुर्वाणः प्राप्यते। शून्यवादे संस्कृतभाषायां बहवो ग्रन्था लिखिता अभूवन्। परं दुःखमिदं न ते प्राप्यन्ते। शून्यवादिनः मन्यन्ते यन्न मानसिकस्य न च बाह्यस्य वस्तुनोऽस्तित्वमस्ति। सर्वमपि शून्यम्। इदं शून्यमनिर्वचनीयम्। एतत्सदसदभ्यां विलक्षणम्। सत् च असच्च उभयमपि शून्यस्य गर्भे प्राप्तनिर्वाणं सदवतिष्ठते। नेदमभावात्मकं परमलक्षणमस्ति। अविद्यायास्मादेव शून्यात् समस्तमपि जगदभिव्यक्तं भवति। वज्रयानस्य दार्शनिकदृष्टिः शून्यवादस्य वर्तते। माध्यमिकस्य विशेषता 'संसारः असत्यः, निर्माणः असत्यः' इति वर्तते।

बौद्धदर्शनं वस्तुतो निःस्वभावमनिर्वचनीयलक्षणमिदं शून्यमेव परमतत्त्वं मन्यते। इदमेव महानिर्वाणपदमस्ति। इदमेव पदमासाद्य साधकः प्राप्तपरमपदो भवति। नातः परं किमपि गन्तव्यम्। यथोच्यते–

मुख्यो माध्यमिको विवर्त-
मखिलं शून्यस्य मेने जगद्
योगाचारमते तु सन्ति
मतयस्तासां विवर्तोऽखिलः।
अर्थोऽस्ति क्षणिकस्त्वसा-
वनुमितो बुद्ध्येति सौत्रान्तिकः
प्रत्यक्षं क्षणभंगुरं च
सकलं वैभाषिको भाषते।।

भगवान् बुद्ध आत्मानं किञ्च जगदधिकृत्यापि उपदेशं कुर्वाणो दृश्यते। अत्र ते दार्शनिका विचाराः समुपस्थाप्यन्ते यांस्तदीया धर्मोपदेशा अवलम्ब्यन्ते। एवंविधा विचाराः सन्ति चत्वारः–1. प्रतीत्यसमुत्पादः, 2. कर्म, 3. क्षणिकवादः, 4. आत्मनोऽनस्तित्वम्। अत्र तृतीयः विचारः क्षणिकवादः वर्तते।

क्षणिकवादः–सर्वाण्यपि वस्तूनि सन्ति अनित्यानि। यदपि नित्यं स्थास्नु च प्रतिभासते तदपि नश्वरमस्ति। सर्वेऽपि संयोगाः सन्ति विप्रयोगान्ताः। यस्य यस्योदयो दृश्यते तस्य सर्वस्य पतनमपि स्यात्। सर्वमपि परिवर्तनशीलम्। न किमपि एतादृशं यन्न परिवर्तेत इत्येवं यो वदति सोऽस्ति क्षणिकवादः।

क्षणिकवादस्य अंगीकारेण विषमावस्थायाः वर्णनं जयन्तभट्टः 'न्यायमञ्जरी' ग्रन्थे कृतवान्।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः—** बाह्यार्थं विज्ञानञ्च के न मन्यन्ते?
 उत्तरम्— माध्यमिकजनाः।
2. **प्रश्नः—** शून्यमेव परमार्थसत्यं इति कस्य विचारः?
 उत्तरम्— शून्यवादस्य।
3. **प्रश्नः—** अनिर्वचनीयतत्त्वस्य द्योतकः कः?
 उत्तरम्— शून्यः।
4. **प्रश्नः—** शून्यद्वैतवादसिद्धान्तस्य समर्थकः कः?
 उत्तरम्— बौद्धधर्मः।
5. **प्रश्नः—** 'मानवबुद्ध'स्य स्थाने 'लोकोत्तरबुद्ध'स्य सिद्धान्तप्रतिपादकः कः?
 उत्तरम्— शून्यवादः।
6. **प्रश्नः—** शून्यवादः कुतः दृष्टिगोचरो भवति?
 उत्तरम्— प्रज्ञापारमितासूत्रे।
7. **प्रश्नः—** शून्यवाद (माध्यमिक) सिद्धान्तस्य प्रचारकः कः?
 उत्तरम्— नागार्जुनः।
8. **प्रश्नः—** माध्यमिक-आचार्यैः स्वमतं किं कथ्यते?
 उत्तरम्— शून्यवादः।
9. **प्रश्नः—** नागार्जुनः कुत्र शून्यवादं प्रतिपादितवान्?
 उत्तरम्— माध्यमिककारिकायाम्।
10. **प्रश्नः—** मानसिकस्य न च बाह्यस्य वस्तुनोऽस्तित्वमस्ति इति के मन्यन्ते?
 उत्तरम्— शून्यवादिनः।
11. **प्रश्नः—**'शून्यमनिर्वचनीयम्' इति कस्य विचारः?
 उत्तरम्— शून्यवादस्य।
12. **प्रश्नः—** वज्रयानस्य दार्शनिकदृष्टिः कस्य वादस्य वर्तते?
 उत्तरम्— शून्यवादस्य।
13. **प्रश्नः—** माध्यमिकस्य का विशेषता वर्तते?
 उत्तरम्— संसारः असत्यः, निर्माणः असत्यः।
14. **प्रश्नः—**निःस्वभावमनिर्वचनीयलक्षणम् शून्यमेव परमतत्त्वं किं मन्यते?
 उत्तरम्— महानिर्वाणपदम्।
15. **प्रश्नः—** विचाराः कतिविधाः, के सन्ति?
 उत्तरम्— चत्वारः–1. प्रतीत्यसमुत्पादः, 2. कर्म, 3. क्षणिकवादः, 4. आत्मनोऽनस्तित्वम्।
16. **प्रश्नः—** सर्वाण्यपि वस्तूनि सन्ति अनित्यानि इति कस्य विचारः?
 उत्तरम्— क्षणिकवादस्य।
17. **प्रश्नः—** सर्वेऽपि संयोगाः के सन्ति?
 उत्तरम्— विप्रयोगान्ताः।
18. **प्रश्नः—**जयन्तभट्टः क्षणिकवादस्य विषमावस्थायाः वर्णनं कुत्र क्रियते?
 उत्तरम्— न्यायमञ्जरीग्रन्थे।

(X-Code-25) (छछ) तर्कसंग्रहः (दीपिकाव्याख्यासहितः) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

अन्नंभट्टः तर्कसंग्रहस्य रचयिता आसीत्। सः जिज्ञासूनां सुखावबोधाय भारतीय-दर्शनशास्त्रस्य अद्वितीयः तर्कसंग्रह-नामकं लघुग्रन्थं रचितवान्। अन्नंभट्टस्य समयः ख्रीष्टब्दस्य दशमशताब्द्याः मध्यकालः स्वीकृतोऽस्ति। तर्कसंग्रह-शब्दस्य व्युत्पत्तिः–तर्क्याः–द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय-अभावाः सप्तपदार्थास्तेषां प्रतिपाद्यभूत-विषयाणां सम्यक् प्रकारेण ग्रहः–ग्रहणं = निश्चयात्मकं ज्ञानं यस्मादसौ तर्कसंग्रहः। 'तर्कसंग्रहः' इति ग्रन्थः न्यायवैशेषिकयोः समानतन्त्रयुक्ते महोपयोगी वर्तते। न्यायवैशेषिकयोः एक एव उद्देश्यः– दुःखनाशः तत्त्वज्ञानेनैव सम्भवः।

तर्कसंग्रहग्रन्थे प्रतिपादिता मुख्यविषयाः–

(क) पदार्थः–पदस्य अर्थः पदार्थः। अभिधेयत्वं पदार्थस्य सामान्यलक्षणम्। प्रमितिविषयाः पदार्थाः शब्दैः क्रियते तेषां निर्वचनम्। पुनरुक्तमित्थमेव–"पुरुषेण ईश्वरेण वा ज्ञातव्यः पदार्थो भवतीति।" ग्रन्थकारः सप्तपदार्थां उल्लिखति–"द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः"। पदार्थाः द्विविधम्–1. भावपदार्थः (सत्तात्मकाः), 2. अभावपदार्थः (सप्त)।

1. द्रव्यम्–द्रव्यत्वजातित्वम्। तानि नव वर्तन्ते। तत्र नव-द्रव्याणि–1. **पृथिवी**-गन्धवती भवति। नित्यानित्ये द्विविधम्। नित्या परमाणुरूपा अनित्या च कार्यरूपाऽस्ति। शरीर-इन्द्रिय-विषयभेदात् अनित्या पृथिवीयं पुनस्त्रिविधम्। 2. **आपः**–शीतस्पर्शवत्य आपः। 3. **तेजः**–उष्णस्पर्शवत्तेजः। 4. **वायुः**–रूपरहितः स्पर्शवान् वायुः। 5. **आकाशम्**–शब्दगुणकमाकाशम्। 6. **कालः**–अतीतादिव्यवहारहेतुः कालः। 7. **दिक्**–प्राच्यादिव्यवहारहेतुर्दिक्। 8. **आत्मा**–ज्ञानाधिकरणमात्मा। 9. **मनः**–सुखाद्युपलब्धिसाधनमिन्द्रियम्।

2. गुणः–चतुर्विंशतिर्गुणाः। 1. **रूपम्**–चक्षुर्मात्रग्राह्यत्वविशिष्टगुणत्वं रूपस्य लक्षणम्। 2. **रसः**–रसनाग्राह्यो गुणो रसः। 3. **गन्धः**–घ्राणग्राह्यो गुणो गन्धः। 4. **स्पर्शः**–त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। 5. **शब्दः**–श्रोत्रग्राह्यो गुणः शब्दः। 6. **संख्या**–एकत्वादिव्यवहारहेतुः संख्या। 7. **परिमाणम्**–मानव्यवहारासाधारणकारणं परिमाणम्। 8. **पृथक्त्वम्**–पृथग्व्यवहारासाधारणकारणं पृथक्त्वम्। 9. **विभागः**–संयोगनाशको गुणो विभागः। 10-11. **परत्वापरत्वे**–परापरव्यवहारासाधारणकारणे परत्वापरत्वे। 12. **गुरुत्वम्**- आद्यपतनासमवायिकारणं गुरुत्वम्। 13. **द्रवत्वम्**–आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। 14. **स्नेहः**–चूर्णादिपिण्डीभानहेतुर्गुणः स्नेहः। 15. **बुद्धिः**–सर्वव्यवहारहेतुर्गुणो बुद्धिः। 16. **सुखम्**–सर्वेषामनुकूलवेदनीयं सुखम्। 17. **दुःखम्**–प्रतिकूलवेदनीयं दुःखम्। 18. **इच्छा**–इच्छा कामः। 19. **द्वेषः**–क्रोधो द्वेषः। 20. **प्रयत्नः**–कृतिः प्रयत्नः। 21. **धर्मः**–विहितकर्मजन्यो धर्मः। 22. **अधर्मः**–निषिद्धकर्मजन्यस्त्वधर्मः। 23. **संस्कारः**–संस्कारस्त्रिविधः-वेगो भावना स्थितिस्थापकश्चेति। 24. **संयोगः**–पृथक् पदार्थयोः सम्बन्ध एव संयोगः।

3. कर्म–पदार्थस्य गतिशीलो व्यापार एव कर्म। कर्मणः पञ्चभेदाः–उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि। चलनात्मकं कर्म।

4. सामान्यम्–नित्यमेकमनेकानुगतं सामान्यम्। समानधर्मवस्तुषु एकः सामान्यो गुणो विद्यते येन तान्येकमेव नाम भवति। यथा–मनुष्यत्वम्। ब्रह्मदत्तदेवदत्तादि-सर्वेषु जनेषु भवति।

5. विशेषः–सामान्यविपर्ययः विशेषः। नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः। तेऽपि नित्याः। विशेषास्त्वनन्ता एव।

6. समवायः–नित्यसम्बन्धः समवायः। अयुतसिद्धवृतिः। यथा–अवयवावयविनावित्यादयः।

7. अभावः–अभावो वैशेषिकसूत्रस्यानेकस्मिन् स्थाने वर्ण्यते; यथा प्रमेयः। चतुर्विधः एषः अभावः–1. प्रागभावः (अनादिः सान्तः), 2. प्रध्वंसाभावः (सादिरनन्तः), 3. अत्यन्ताभावः (त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकः), 4. अन्योन्याभावः (तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकः)।

कारणस्य विवेचनम्–कार्यनियतपूर्ववृत्ति कारणम्। कारणन्तु कार्यस्य पूर्वं निश्चितरूपेणोपस्थितो भवति। यथा–घटस्य मृत्तिका-चक्र-कुम्भकाराः नियतपूर्ववर्तयः सन्ति। कारणं त्रिविधम्–समवाय्यसमवायिनिमित्तभेदात्। 1. **समवायिकारणम्**–यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम्, यथा–तन्तवः पटस्य। 2. **असमवायिकारणम्**–कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणम् असमवायिकारणम्। यथा–तन्तुरूपं पटरूपस्य। 3. **निमित्तकारणम्**–आभ्यां समवायिकारण-असमवायिकारणाभ्यां परं भिन्नं कारणं निमितकारणम्। यथा–पटस्य तूर्यादयः।

प्रमाणम्–पदार्थानां यथार्थं स्वरूपं प्रमा। प्रमायाः करणमेव भवति प्रमाणम्। यथार्थानुभवश्चतुर्विधः भवति। 1. प्रत्यक्ष, 2. अनुमिति, 3. उपमिति, 4. शाब्दभेदात्। करणमपि प्रत्यक्षानुमानोपमानशब्दभेदाच्चतुर्विधम्।

1. **प्रत्यक्षप्रमाणम्**–इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। तद्द्विविधम्–1. निर्विकल्पकम्- नामजात्यादि-योजनाहीनं वस्तुमात्रावगाहि किञ्चिदिदमिति' ज्ञानं जन्यते। 2. सविकल्पकम्–सविकल्पकं नामजातियोजनात्मकं 'डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयमिति' विशेषणविशेष्यावगाहि-ज्ञानमुत्पद्यते। तस्य कारणं त्रिविधं भवति–1. कदाचिद् इन्द्रियम्, 2. कदाचिद् इन्द्रियार्थसन्निकर्षः। 3. कदाचिद् ज्ञानम्।

प्रत्यक्षप्रमाणे इन्द्रियार्थयोः षड्विधः सन्निकर्षो भवति। 1. **संयोगसन्निकर्षः**–यदा चक्षुषा घटविषयं ज्ञानं जन्यते, तदा चक्षुरिन्द्रियं, घटोऽर्थः अनयोः सन्निकर्षः संयोगो भवति। 2. **संयुक्तसमवायः**–यदा चक्षुरादिना घटगतरूपादिकं गृह्यते,

घटे श्यामं रूपमस्ति, तदा चक्षुरिन्द्रियं घटरूपमर्थः, अनयोः सन्निकर्षः संयुक्तसमवायः एव। 3. **संयुक्तसमवेतसमवायः**–यदा चक्षुषा घटरूपसमवेतं रूपत्वादिसामान्यं गृह्यते, तदा चक्षुरिन्द्रियं, रूपत्वादिसामान्यमर्थः, अनयोः सन्निकर्षः संयुक्तसमवेतसमवायः। 4. **समवायः**–यदा श्रोत्रेन्द्रियेण शब्दो गृह्यते तदा श्रोत्रम्–इन्द्रियं शब्दोऽर्थः अनयोः सन्निकर्षः समवायः। यतः द्वयोरेव सम्बन्धो गुणगुणिनोः सम्बन्धत् कारणात्।5. **समवेतसमवायः**–यदा शब्दसमवेतं शब्दत्वादिकं सामान्यं श्रोत्रेन्द्रियेण गृह्यते, तदा श्रोत्रेन्द्रियं शब्दत्वादिसामान्यमर्थः। अनयोः सन्निकर्षः समवेतसमवायः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्। 6. **विशेषण-विशेष्यभावः**–चक्षुषा संयुक्ते भूतले घटाभावो गृह्यते, इह भूतले घटो नास्ति इति तदा विशेषणविशेष्यभावसम्बन्धः इत्थमेव कथ्यते इति सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम्।

2. **अनुमान-प्रमाणम्**–अनुमितिकरणमनुमानम्। येनानुमीयते तदनुमानम्। परामर्शजन्यं ज्ञानमनुमितिः। यथा यत्र धूमस्तत्र वह्निः। अत्र धूमज्ञानं करणं तेन यद् ज्ञायते सा अनुमितिः। तत्र साहचर्यनियम इति लक्षणम्। तस्माल्लिङ्गपरामर्शोऽनुमानम्। द्विविधमनुमानम्–स्वार्थानुमानं–(स्वज्ञानस्य हेतुः) परार्थानुमानञ्च। पञ्चावयवानुमानवाक्यम्–(प्रतिज्ञा, हेतुः, दृष्टान्तः, उपनयः, निगमनम्) इत्यनेन अन्यं जनं बोधयितुं तैतत् परार्थानुमानम्।

3. **उपमानप्रमाणम्**–उपमितिकरणम् उपमानम्। द्वयोर्वस्तुनोर्मध्ये विद्यमानेन साधारणधर्मेणैव निर्धार्यतेऽनयोपमानम्। यथा–गोसादृश्यविशिष्टपिण्डज्ञानमेव उपमानम्। वस्तुतः संज्ञासंज्ञिसम्बन्धप्रतीतिरूपमिति, इत्येतदेवोपमानम्।

4. **शब्दप्रमाणम्**–आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्य शब्दसमूहः, यथा–ग्रामानयेति। शक्तं पदम्। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः। वाक्येषु आकांक्षा–योग्यता–सन्निधयो भवितव्याः। आकांक्षायोग्यतासन्निधियुक्तं वाक्यमाप्तपुरुषेण प्रयुक्तं तदा शब्दात्मकं प्रमाणं भवति।

तर्कसंग्रहीयवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—तर्कसंग्रहस्य रचयिता कः आसीत्?
   उत्तरम्— अन्नंभट्टः।
2. **प्रश्नः**—अन्नंभट्टस्य समयः कः स्वीकृतोऽस्ति?
   उत्तरम्— दशमशताब्द्याः मध्यकालः।
3. **प्रश्नः**—न्यायवैशेषिकयोः समानतन्त्रयुक्तं ग्रन्थः कः?
   उत्तरम्— तर्कसंग्रहः।
4. **प्रश्नः**—तर्कसंग्रहः कीदृशः ग्रन्थः?
   उत्तरम्— प्रकरणम्।
5. **प्रश्नः**—तर्कसंग्रहे कस्य दर्शनस्य प्रामुख्येण विवेचनम्?
   उत्तरम्— वैशेषिकदर्शनस्य।
6. **प्रश्नः**—वैशेषिकदर्शने कति पदार्थाः स्वीकृताः?
   उत्तरम्— 7 सप्त पदार्थाः।
7. **प्रश्नः**—न्यायवैशेषिकयोः एक एव उद्देश्यः कः?
   उत्तरम्— दुःखनाशः तत्त्वज्ञानेनैव सम्भवः।
8. **प्रश्नः**—पदार्थस्य सामान्यलक्षणं किम्?
   उत्तरम्— अभिधेयत्वम्।
9. **प्रश्नः**—पदार्थाः कति कानि च तेषां नामानि?
   उत्तरम्— सप्त पदार्थाः द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः।
10. **प्रश्नः**—पदार्थः सप्त एव भवति अयं कस्य मतोऽस्ति?
    उत्तरम्— वैशेषिकस्य।
11. **प्रश्नः**—मनसः लक्षणं किमस्ति?
    उत्तरम्— संकल्पः।
12. **प्रश्नः**—विशेषं कः दर्शनं पदार्थं स्वीक्रियते?
    उत्तरम्— वैशेषिकः।
13. **प्रश्नः**—तर्कसंग्रहे कति प्रमाणानि?
    उत्तरम्— 4 चत्वारि।
14. **प्रश्नः**—वैशेषिकमते कति द्रव्याणि भवन्ति?
    उत्तरम्— 9 नव-द्रव्याणि।
15. **प्रश्नः**—विशेषस्य आश्रयः कः?
    उत्तरम्— नित्यद्रव्यः।
16. **प्रश्नः**—पृथिव्या कस्य विकृतिः विद्यते?
    उत्तरम्— गन्धस्य।
17. **प्रश्नः**—तर्कसंग्रहे कति गुणाः प्रदर्शिताः?
    उत्तरम्— 24 चतुर्विंशतिः।
18. **प्रश्नः**—तर्कसंग्रहग्रन्थे कियन्ति कर्माणि कानि च तानि?
    उत्तरम्— 5 पञ्च, उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि।

19. **प्रश्नः**—सामान्यं कतिविधम्?
    उत्तरम्— 2 द्विविधम्।
20. **प्रश्नः**—तर्कसंग्रहे कियन्तो विशेषाः मन्यन्ते?
    उत्तरम्— अनन्ताः।
21. **प्रश्नः**—समवायस्य किं लक्षणम्?
    उत्तरम्— नित्यसम्बन्धः समवायः।
22. **प्रश्नः**—अभावः कतिविधः के च ते?
    उत्तरम्— 4 चतुर्विधः, 1. प्रागभावः, 2. प्रध्वंसाभावः, 3. अत्यन्ताभावः, 4. अन्योन्याभावः।
23. **प्रश्नः**—जलस्य किं लक्षणम्?
    उत्तरम्— शीतस्पर्शवान्।
24. **प्रश्नः**—तेजसः किं लक्षणम्?
    उत्तरम्— उष्णस्पर्शवान्।
25. **प्रश्नः**—वायुः इत्यस्य किं लक्षणम्?
    उत्तरम्— रूपरहितस्पर्शवान् वायुः।
26. **प्रश्नः**—शब्दः कस्य गुणः वर्तते?
    उत्तरम्— आकाशस्य।
27. **प्रश्नः**—कालस्य किं लक्षणम्?
    उत्तरम्— अतीतादिव्यवहारहेतुः कालः।
28. **प्रश्नः**—दिक् इत्यस्य किं लक्षणम्?
    उत्तरम्— प्राच्यादिव्यवहारहेतुर्दिक्।
29. **प्रश्नः**—आत्मा इत्यस्य किं लक्षणम्?
    उत्तरम्— ज्ञानाधिकरणमात्मा।
30. **प्रश्नः**—वैशेषिकमते आत्मा कतिविधः?
    उत्तरम्— 2 द्विविधः।
31. **प्रश्नः**—मनः इत्यस्य किं लक्षणम्?
    उत्तरम्— सुखाद्युपलब्धिसाधनमिन्द्रियम्।
32. **प्रश्नः**—रूपस्य किं लक्षणम्?
    उत्तरम्— चक्षुर्मात्रग्राह्यत्वविशिष्टं गुणत्वम्।
33. **प्रश्नः**—शुक्लादिभेदेन रूपं कतिविधम्?
    उत्तरम्— 07 सप्त।
34. **प्रश्नः**—रसः इत्यस्य किं लक्षणम्?
    उत्तरम्— रसनाग्राह्यो गुणो रसः।
35. **प्रश्नः**—मधुरादिभेदाद् रसः कतिविधः?
    उत्तरम्— 06 षड्विधः।
36. **प्रश्नः**—कुत्र प्राप्यते षड्विधः रसः?
    उत्तरम्— पृथिव्याम्।
37. **प्रश्नः**—गन्धस्य किं लक्षणम्?
    उत्तरम्— घ्राणग्राह्यो गुणो गन्धः।
38. **प्रश्नः**—गन्धः कतिविधः के च ते?
    उत्तरम्— 02 द्विविधः, सुरभिरसुरभिश्च।
39. **प्रश्नः**—द्विविधः गन्धः कुत्र प्राप्यते?
    उत्तरम्— पृथिव्याम्।
40. **प्रश्नः**—त्वगिन्द्रियमात्रग्राह्यो गुणः कः?
    उत्तरम्— स्पर्शः।
41. **प्रश्नः**—शीतादिभेदात् स्पर्शः कतिविधः के च ते?
    उत्तरम्— 03त्रिविधः, शीतोष्णानुष्णाशीतः।
42. **प्रश्नः**—श्रोत्रग्राह्यो गुणः कः?
    उत्तरम्— शब्दः।
43. **प्रश्नः**—आप्तवाक्यं किं भवति?
    उत्तरम्— शब्दः।
44. **प्रश्नः**—वैशेषिकः वाक्यं कतिविधं मन्यते?
    उत्तरम्— 02 द्विविधम्।
45. **प्रश्नः**—एकत्वादिव्यवहारहेतुः का?
    उत्तरम्— संख्या।
46. **प्रश्नः**—संख्यायाः कति द्रव्यवृत्तिः?
    उत्तरम्— नवद्रव्यवृत्तिः।
47. **प्रश्नः**—परिमाणस्य किं लक्षणम्?
    उत्तरम्— मानव्यवहारासाधारण कारणं परिमाणम्।
48. **प्रश्नः**—नवद्रव्यवृत्तिः किम्?
    उत्तरम्— परिमाणम्।
49. **प्रश्नः**—पृथग्व्यवहारासाधारणकारणं किम्?
    उत्तरम्— पृथक्त्वम्।
50. **प्रश्नः**—सर्वद्रव्यवृत्तिः संयुक्तव्यवहारहेतुः कः?
    उत्तरम्— संयोगः।
51. **प्रश्नः**—विभागस्य किं लक्षणम्?
    उत्तरम्— संयोगनाशको गुणो विभागः।

52. **प्रश्नः**—परापरव्यवहारासाधारणकारणत्वं किम्?
उत्तरम्— परत्वापरत्वे।

53. **प्रश्नः**—आद्यपतनासमवायिकारणं किम्?
उत्तरम्— गुरुत्वम्।

54. **प्रश्नः**—आद्यस्यन्दनासमवायिकारणं किं भवति?
उत्तरम्— द्रव्यत्वम्।

55. **प्रश्नः**—स्नेहस्य किं लक्षणम्?
उत्तरम्— चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः।

56. **प्रश्नः**—बुद्धिः इत्यस्य किं लक्षणम्?
उत्तरम्— सर्वव्यवहारहेतुर्गुणो बुद्धिः।

57. **प्रश्नः**—बुद्धिः कतिविधा?
उत्तरम्— द्विविधा।

58. **प्रश्नः**—सर्वेषामनुकूलवेदनीयं किम्?
उत्तरम्— सुखम्।

59. **प्रश्नः**—प्रतिकूलवेदनीयं किम्?
उत्तरम्— दुःखम्।

60. **प्रश्नः**—इच्छा इत्यस्याः पर्यायः कः?
उत्तरम्— कामः।

61. **प्रश्नः**—'द्वेषः' इति कस्य पर्यायविशेषः?
उत्तरम्— क्रोधस्य।

62. **प्रश्नः**—प्रयत्नस्य पर्यायः कः?
उत्तरम्— कृतिः।

63. **प्रश्नः**—धर्मः इत्यस्य किं लक्षणम्?
उत्तरम्— विहितकर्मजन्यो धर्मः।

64. **प्रश्नः**—अधर्मः इत्यस्य किं लक्षणम्?
उत्तरम्— निषिद्धकर्मजन्यस्त्वधर्मः।

65. **प्रश्नः**—संस्कारः कतिविधः?
उत्तरम्— संस्कारस्त्रिविधः।

66. **प्रश्नः**—संयोगः इत्यस्य किं लक्षणम्?
उत्तरम्— पृथक् पदार्थयोः सम्बन्ध एव संयोगः।

67. **प्रश्नः**—किं नाम यथार्थानुभवः?
उत्तरम्— प्रमा।

68. **प्रश्नः**—किं नाम अयथार्थानुभवः?
उत्तरम्— अप्रमा।

69. **प्रश्नः**—यथार्थानुभवस्य कति भेदाः सन्ति?
उत्तरम्— 04 चत्वारो भेदाः।

70. **प्रश्नः**—वैशेषिकमते असाधारणकारणं किम्?
उत्तरम्— करणम्।

71. **प्रश्नः**—कार्यनियतपूर्ववृत्तिः कस्य लक्षणम्?
उत्तरम्— कारणस्य।

72. **प्रश्नः**—प्रागभावप्रतियोगी कस्य लक्षणम्?
उत्तरम्— कार्यस्य।

73. **प्रश्नः**—समवाय्यादिभेदात् कारणं कतिविधं कानि च तानि?
उत्तरम्— 03 त्रिविधम्, समवाय्यसमवायिनिमित्तानि।

74. **प्रश्नः**—यत्समवेतं कार्यमुत्पद्यते तत् किम्?
उत्तरम्— समवायिकारणम्।

75. **प्रश्नः**—तन्तवः पटस्य किं कारणम्?
उत्तरम्— समवायिकारणम्।

76. **प्रश्नः**—कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणं किम्?
उत्तरम्— असमवायिकारणम्।

77. **प्रश्नः**—'तन्तुसंयोगः पटस्य' किं कारणम्?
उत्तरम्— असमवायिकारणम्।

78. **प्रश्नः**—समवाय्यसमवाय्युभयभिन्नं कारणं कस्य लक्षणम्?
उत्तरम्— निमित्तकारणस्य।

79. **प्रश्नः**—तुरीवेमादिकं पटस्य किं कारणम्?
उत्तरम्— निमित्तकारणम्।

80. **प्रश्नः**—पदार्थानां यथार्थं स्वरूपं प्रमा, प्रमायाः करणं किम्?
उत्तरम्— प्रमाणम्।

81. **प्रश्नः**—प्रमाणं कतिविधं कानि च तानि?
उत्तरम्— चतुर्विधः, प्रत्यक्षानुमानोपमानशब्दभेदात्।

82. **प्रश्नः**— प्रत्यक्षप्रमायाः किं लक्षणम्?
उत्तरम्— इन्द्रियार्थसन्निकर्षजन्यं ज्ञानम्।

83. **प्रश्नः**—प्रत्यक्षप्रमा कतिविधं कानि च तानि?
उत्तरम्— द्विविधम्-1. निर्विकल्पकम्, 2. सविकल्पकञ्च।

84. **प्रश्नः**— 'तूरी' इति पटस्य कीदृशं कारणम्?
उत्तरम्— निमित्तकारणम्।

85. **प्रश्नः**—सन्निकर्षः कतिविधः?
उत्तरम्— 06 षड्विधः।

86. **प्रश्नः**—श्रोत्रेण शब्दसाक्षात्कारे कः सन्निकर्षः?
उत्तरम्— समवायः।

87. **प्रश्नः**—अनुमितिकरणं लिंगपरामर्शं वा इति किम्?
उत्तरम्— अनुमानम्।

88. **प्रश्नः**—परामर्शजन्यं ज्ञानं किम्?
उत्तरम्— अनुमितिः।

89. **प्रश्नः**—कः परामर्शः?
उत्तरम्— व्याप्तिविशिष्टपक्षधर्मताज्ञानम्।

90. **प्रश्नः**—अनुमानं कतिविधम्?
उत्तरम्— 02 द्विविधम्।

91. **प्रश्नः**—लिंगं कतिविधम्?
उत्तरम्— त्रिविधम्।

92. **प्रश्नः**—सन्दिग्धसाध्यवान् इति कः?
उत्तरम्— पक्षः।

93. **प्रश्नः**—निश्चितसाध्यवान् इति कः?
उत्तरम्— सपक्षः।

94. **प्रश्नः**—निश्चितसाध्याभाववान् इति कः?
उत्तरम्— विपक्षः।

95. **प्रश्नः**— वह्निना सिञ्चति किमस्ति?
उत्तरम्— हेत्वाभासः।

96. **प्रश्नः**—हेत्वाभासाः कतिविधाः सन्ति?
उत्तरम्— 05 पञ्चविधाः।

97. **प्रश्नः**—अनैकान्तिकः हेत्वाभासः कतिविधः?
उत्तरम्— 03त्रिविधः।

98. **प्रश्नः**—असिद्धः हेत्वाभासः कतिविधः?
उत्तरम्— 03 त्रिविधः।

99. **प्रश्नः**—संज्ञा-संज्ञिसम्बन्धज्ञानम् किम्?
उत्तरम्— उपमानम्।

100. **प्रश्नः**—उपमितिकरणम् किम्?
उत्तरम्— उपमानम्।

101. **प्रश्नः**—किं नाम मिथ्याज्ञानम्?
उत्तरम्— विपर्ययः।

102. **प्रश्नः**—स्मृतिः कतिविधा भवति?
उत्तरम्— 03 द्विविधा।

103. **प्रश्नः**—चलनात्मकं किं नाम?
उत्तरम्— कर्म।

104. **प्रश्नः**—कर्मणः कति भेदाः विद्यन्ते?
उत्तरम्— 05 पञ्चभेदाः।

105. **प्रश्नः**—उत्क्षेपणं किं भवति?
उत्तरम्— ऊर्ध्वदेशसंयोगहेतुः।

106. **प्रश्नः**—अपक्षेपणं किं भवति?
उत्तरम्— अधोदेशसंयोगहेतुः।

107. **प्रश्नः**—नित्यमेकमनेकानुगतम् इति किम्?
उत्तरम्— सामान्यम्।

108. **प्रश्नः**—सामान्यं कतिविधम्?
उत्तरम्— 03 द्विविधम्।

109. **प्रश्नः**—अभावः कतिविधः के च ते?
उत्तरम्— 04 चतुर्विधः, 1. प्रागभावः, 2. प्रध्वंसाभावः, 3. अत्यन्ताभावः, 4. अन्योन्याभावः।

110. **प्रश्नः**—आकांक्षा-योग्यता-सन्निधयो कुत्र भवितव्याः?
उत्तरम्— वाक्येषु।

111. **प्रश्नः**— 'गोसदृशः गवयः' इदं वाक्यं कस्य प्रमाणस्य उदाहरणम्?
उत्तरम्— उपमानस्य।

112. **प्रश्नः**— कारणभावाच्च इत्यनेन कः वादः पुष्यते?
उत्तरम्— सत्कार्यवादः।

113. **प्रश्नः**— कार्योत्पत्तेः पूर्वं कारणाभावः कथ्यते?
उत्तरम्— असत्कार्यवादः।

114. **प्रश्नः**— 'वायुः' पदार्थस्य कस्मिन् विभागे आगच्छति?
उत्तरम्— द्रव्ये।

115. प्रश्नः— कर्मणो भेदाः कति? के च ते?
उत्तरम्—पञ्च, 1. उत्क्षेपण, 2. अपक्षेपण, 3. आकुञ्चन, 4. प्रसारण, 5. गमनानि।

116. प्रश्नः— 'कार्यनियतपूर्ववर्ति' किं भवति?
उत्तरम्—कार्योत्पत्तेः अव्यवहितपूर्वक्षणे यत् तिष्ठति तत् कारणम्।

(जद) तर्कभाषा (प्रमातृ-प्रमेय-प्रमाण-प्रमितीनाम् अध्ययनम्) एवं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि

'तर्कभाषा' इत्यस्य ग्रन्थस्य निर्माता केशवमिश्रः वर्तते। न्यायवैशेषिकसम्प्रदायस्य प्रकरणग्रन्थोऽयं वर्तते। ग्रन्थेऽस्मिन् कस्यचिद् एकस्य शास्त्रस्य प्रतिपाद्यविषयेषु कस्यचिद् एकस्यैव विषयस्य प्रयोजनानुसारं प्रतिपादनं भवति। अस्मिन् ग्रन्थे न्यायदर्शनविषयाणां प्राधान्यम्। न्यायवैशेषिकाभिमतानां पदार्थानां संक्षिप्तमात्रविवेचनं कृतं वर्तते। भारतीयदर्शनानां मूलसिद्धान्तानां यथा मीमांसकानां कारणतावादस्य, प्रामाण्यवादस्य च समीक्षा कृता। बौद्धदर्शनस्य क्षणिकवादस्यापि निराकरणं अस्मिन् ग्रन्थे कृतमस्ति। तर्कभाषाग्रन्थे प्रतिपाद्यं प्रमुखतः प्रमाणप्रमेयादिषोडशपदार्थानां निरूपणमस्ति। ग्रन्थकारः वैशेषिकदर्शनाभिमतान् पदार्थान् अपि प्रतिपादयति। महर्षिगौतमेन प्रमेयस्य 'आत्म-शरीर-इन्द्रिय-अर्थ-बुद्धि-मनः-प्रवृत्ति-दोष-प्रेत्यभाव-फल-दुःख-अपवर्गास्तु प्रमेयम्' इति सूत्रेण प्रमेयस्य द्वादशविधत्वं प्रतिपादितम्। एवं च अन्यान्यपि प्रमेयाणि यथा-द्रव्यं, गुणाः, कर्म, सामान्यं, विशेषः, समवायश्च विशेषतः प्रतिपादितानि। तर्कभाषाकारेण वैशेषिकाभिमतानां द्रव्यादीनां सप्तपदार्थानां निरूपणम् अर्थप्रमेयान्तर्गतत्वेन क्रियते।

प्रमा-विवेचनम्—साक्षात्कारिप्रमाकरणं प्रत्यक्षम्। न्यायदर्शने सत्यज्ञानं स्वीक्रियते। 'वस्तूनां यथार्थरूपस्य अनुभूतिः एव प्रमा' इति कथ्यते, प्रमायाः साधनमेव प्रमाणम्। यथा-उदयनः कथयति—**यथार्थानुभवः प्रमा तत्साधनं च प्रमाणम्।** वस्तूनां यथार्थरूपस्य विषये न्यायभाष्यकारः कथयति यत्—**सतश्च सद्भावोऽसतश्चासद्भावः। सत् सदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति। असच्चासदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति।** साक्षात्कारिणी चासौ प्रमा, साक्षात्कारिप्रमा तस्याः करणम् इति साक्षात्कारिप्रमाकरणमिति लक्षणांशस्य विग्रहः। तर्कभाषानुसारेण साक्षात्कारिणी च प्रमा सा एवोच्यते या इन्द्रियजा। सा च सविकल्पकनिर्विकल्पकभेदात् द्विप्रकारका स्तः। सविकल्पकं नाम जात्यादियोजनात्मकं डित्थोऽयं ब्राह्मणोऽयमिति विशेष्यविशेषणावगाहिज्ञानमुत्पद्यते। यदा निर्विकल्पकप्रमा फलं भवति तदा इन्द्रियकरणं भवति। निर्विकल्पकज्ञानम् अवान्तरव्यापारः। सविकल्पकं ज्ञानं फलम्। तस्याः प्रमाया त्रिप्रकारकं भेदं भवति। 1. कदाचित् इन्द्रियम्, 2. कदाचिदिन्द्रियार्थसन्निकर्षः, 3. कदाचिद् ज्ञानम्।

प्रमेय-विवेचनम्—न्यायसूत्रे (1/1/9) प्रमेयस्य द्वादशभेदाः स्वीकृतवान्। 1. **आत्मा**—आत्मत्वसामान्यवान्। स च देहेन्द्रियादिव्यतिरिक्तः प्रतिशरीरं भिन्नो भिन्नो विभुश्च। आत्मनो मानसप्रत्यक्षो भवति। 2. **शरीरम्**—भोगस्य आधारः। 3. **इन्द्रियः**—भोगाणां साधनम्। 4. **अर्थः**—भोगार्थवस्तूनां समूहः। 5. **बुद्धिः**—भोगज्ञानम्। 6. **मनः**—सुखाद्युपलब्धिसाधनमिन्द्रियम्। 7. **प्रवृत्तिः**—मन-वचन-शरीरस्य व्यापारः। 8. **दोषः**—यस्य कारणेन कामेषु प्रवृत्तिः। 9. **प्रेत्यभावः**—पुनर्जन्म। 10. **फलम्**—सुख-दुःखानां अनुभवः। 11. **दुःखम्**—इच्छाविघातजन्यः क्लेशः। 12. **अपवर्गः**—दुःखेन आत्यन्तिकी निवृत्तिः। एषां पदार्थानां ज्ञानं मुक्तये सहायकः। अतः एतानि वस्तूनि एव **प्रमेयः** इति कथ्यते।

प्रमाण-विचारः—न्यायस्य तत्त्वविचारो हि प्रमाणविचारमधितिष्ठति। येषां साहाय्येन यथार्थज्ञानं लब्धं भवति ते सन्त्युपायाश्चत्वारः। न्यायदर्शनं तानुपायान् 'प्रमाणानि' इति कथयति। न्यायदर्शनः 'परतः प्रामाण्यवादम्' अङ्गीकरोति। तत्त्वचिन्तामणिः इत्यस्य मतानुसारेण अनुमानद्वारा एव ज्ञानस्य प्रमाणिता सिद्धो भवति। प्रमाणस्य चतुर्भेदात् करणमपि प्रत्यक्षानुमानोपमानशब्दभेदात् इति वर्तते। 1. **प्रत्यक्षम्**—तर्कभाषाकारः केशवमिश्रः प्रत्यक्षं लक्षयन् प्राह—"साक्षात्कारिप्रमाकरणं प्रत्यक्षम्। इन्द्रियजा सा च द्विप्रकारकी—सविकल्पकनिर्विकल्पकयोर्भेदात्। साक्षात्कारि-प्रमाहेतुः इन्द्रियार्थयोस्तु यः सन्निकर्षः सः षट्प्रकारको भवति। यथा—1. संयोगः, 2. संयुक्तसमवायः, 3. संयुक्तसमवेतसमवायः, 4. समवायः, 5. समवेतसमवायः, 6. विशेष्यविशेषणभावश्च। 2. **अनुमानम्**—अनुमानं

निरूपयता तर्कभाषाप्रणेत्राऽभिहितम्— 'लिङ्गपरामर्शोऽनुमानमिति'। अनुमीयते अनेन इति हि अनुमानशब्दस्य व्युत्पत्तिः। तर्कभाषाकारः अनुमानस्य भेदद्वयं स्वीकरोति-1. स्वार्थानुमानम्, 2. परार्थानुमानञ्च। तस्माद् 'अत्र पर्वतेऽग्निरस्त्यस्ति' इति स्वयमेव प्रतिपद्यते। तदेतत् स्वार्थानुमानम्। एवं प्रतिज्ञादिमता वाक्येन प्रतिपादितात् पञ्चरूपोपपन्नात् लिङ्गात् परोऽप्यग्निं प्रतिपद्यते तेनैतत् परार्थानुमानम्। 3. **उपमानम्**—उपमितिकरणम्। द्वयोर्वस्तुनोर्मध्ये विद्यमानेन साधारणधर्मेणैव निर्धार्यतेऽ-यमुपमानम्, यथा गौस्तथा गवयः। 4. **शब्द**—आप्तवाक्यं **शब्दः**। आप्तस्तु यथाभूतस्यार्थस्योपदेष्टा पुरुषः। शब्दप्रमाणं निरूपयन् तर्कभाषाकारः कथयति-वाक्यं तु आकांक्षायोग्यतासन्निधिमतां पदानां समूहः। प्रमाणसमुच्चये प्रमाणस्य लक्षणम् इत्थं वर्तते— **अज्ञातार्थज्ञापकं प्रमाणम्** इति। प्रमायाः भेदः, करणं सन्निकर्षादीनां विशदव्याख्या कृतं स्यात्। यथा कारिकायाम्—

> **अक्षजा प्रमितिर्द्वेधा सविकल्पाविकल्पिका।**
> **करणं त्रिविधं तस्याः सन्निकर्षश्च षड्विधः।।**
> **घट-तन्नील-नीलत्वशब्द-शब्दत्वजातयः।**
> **अभावसमवायौ च ग्राह्याः सम्बन्धषट्कतः।।**

इन्द्रियार्थसन्निकर्षस्य षट्-प्रकारकाः इत्थं वर्तते-1. **संयोगसन्निकर्षः**—यदा चक्षुषा घटविषयं ज्ञानं जन्यते, तदा चक्षुरिन्द्रियं, घटोऽर्थः अनयोः सन्निकर्षः संयोगो भवति। 2. **संयुक्तसमवायः**—यदा चक्षुरादिना घटगतरूपादिकं गृह्यते, घटे श्यामं रूपमस्ति, तदा चक्षुरिन्द्रियं घटरूपमर्थः, अनयोः सन्निकर्षः संयुक्तसमवायः एव। 3. **संयुक्तसमवेतसमवायः**—यदा चक्षुषा घटरूपसमवेतं रूपत्वादि-सामान्यं गृह्यते, तदा चक्षुरिन्द्रियं, रूपत्वादिसामान्यमर्थः, अनयोः सन्निकर्षः संयुक्तसमवेतसमवायः। 4. **समवायः**—यदा श्रोत्रेन्द्रियेण शब्दो गृह्यते तदा श्रोत्रम्-इन्द्रियं शब्दोऽर्थः अनयोः सन्निकर्षः समवायः। यतः द्वयोरेव सम्बन्धो गुणगुणिनोः समवायात् कारणात्। 5. **समवेतसमवायः**—यदा शब्दसमवेतं शब्दत्वादिकं सामान्यं श्रोत्रेन्द्रियेण गृह्यते, तदा श्रोत्रेन्द्रियं शब्दत्वादिसामान्यमर्थः। अनयोः सन्निकर्षः समवेतसमवायः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्। 6. **विशेषणविशेष्यभावः**—चक्षुषा संयुक्ते भूतले घटाभावो गृह्यते, इह भूतले घटो नास्ति इति तदा विशेषण-विशेष्यभावसम्बन्धः। इत्थमेव कथ्यते इति सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम्।

तर्कभाषानुसारेण कार्यद्रव्याणाम् अन्यद्रव्याणां विवेचनम्—कार्यद्रव्याणि चत्वारि सन्ति-पृथिवी-अप्-तेजस्-वायूनां भेदात्। 1. **पृथिवी**—पृथिवीत्व-सामान्यवती, गन्धवती वा। नित्याऽनित्याश्च द्विविधा। 2. **जल**—अप्त्वसामान्य-युक्ता आपः। नित्याऽनित्याश्च द्विविधा। 3. **तेज**- तेजस्त्वसामान्यवतः तेजः। नित्योऽनित्यश्च द्विविधः। 4. **वायुः**—वायुत्वाभिसम्बन्धवान् वायुः। नित्योऽनित्यश्च द्विविधः। 5. **आकाशम्**—शब्दगुणकमाकाशमिति। 6. **काल**—दिग्विपरीतपरत्वापरत्वानुमेयः कालः। 7. **दिक्**—कालविपरीतपरत्वापरत्वानुमेया दिग् भवति। 8. **मनसः**—मनस्त्वाभिसम्बन्धवान् मनः।

तर्कभाषानुसारेण गुणानां विवेचनम्—1. **रूपम्**—चक्षुर्मात्रग्राह्यो विशेषगुणो रूपम्। 2. **रसः**—रसनेन्द्रियमात्रग्राह्यो विशेषगुणो रसः। 3. **स्पर्शः**—त्वगिन्द्रियमात्रग्राह्यो विशेषगुणः स्पर्शः। 4. **संख्या**—एकत्वादिव्यवहारहेतुः संख्या। 5. **परिमाणम्**—मानव्यवहारासाधारणं कारणं परिमाणम्। 6. **संयोगः**—संयुक्तव्यवहारहेतुर्गुणः संयोगः।

तर्कभाषानुसारेण-1. **आत्मा**, 2. **सामान्य**, 3. **समवाय**, 4. **अभावाः**, 5. **बुद्धिः**, **विवेचनम्**—

1. **आत्मा**—आत्मत्वसामान्यवान् आत्मा। स च देहेन्द्रियादिव्यतिरिक्तः प्रतिशरीरं भिन्नो भिन्नो नित्यो विभुश्च। 2. **सामान्य**—अनुवृत्तिप्रत्ययहेतुः सामान्यम्, तच्च द्विविधं परमपरञ्च। 3. **समवाय**—अयुतसिद्धयोः सम्बन्धविशेषः समवायः। 4. **अभावः**—निषेधमुखप्रमाणगम्यः अभावः सप्तमपदार्थः। 5. **बुद्धिः**—अर्थानां प्रकाश एव बुद्धिः, सा च द्विविधा-अनुभवः स्मरणं च।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— 'तर्कभाषा' इत्यस्य ग्रन्थस्य निर्माता कः?
उत्तरम्—केशवमिश्रः।

2. **प्रश्नः**— न्यायवैशेषिकसम्प्रदायस्य प्रकरणग्रन्थः कः?
उत्तरम्—तर्कभाषा।

3. **प्रश्नः**—न्यायवैशेषिकोभयदर्शनयोः पदार्थानां संक्षिप्ततया विवेचनं कुत्र कृतं वर्तते?
उत्तरम्— तर्कभाषायाम्।

4. **प्रश्नः**— तर्कभाषाग्रन्थे प्रतिपाद्यं प्रमुखतः किमस्ति?
उत्तरम्— प्रमाणप्रमेयादिगौतमसूत्रोक्तानां षोडशपदार्थानां निरूपणमस्ति।

5. **प्रश्नः**— महर्षिगौतमेन प्रमेयस्य सूत्ररूपेण द्वादशविधत्वं किम्?
उत्तरम्—आत्म-शरीर-इन्द्रिय-अर्थ-बुद्धि-मनः-प्रवृत्ति-दोष-प्रेत्यभाव-फल-दुःख-अपवर्गास्तु प्रमेयम्।

6. **प्रश्नः**—तर्कभाषाकारेण अर्थप्रमेयान्तर्गतत्वेन केषां निरूपणं क्रियते?
उत्तरम्—वैशेषिकाभिमतं द्रव्यादीनां सप्तपदार्थानां निरूपणम्।

7. **प्रश्नः**—प्रमा इत्यस्य किं लक्षणम्?
उत्तरम्—साक्षात्कारिप्रमाकरणं प्रत्यक्षम्।

8. **प्रश्नः**— प्रमाकरणं प्रमाणम् इति केन कथितम्?
उत्तरम्— केशवमिश्रेण।

9. **प्रश्नः**— यथार्थानुभवः प्रमा तत्साधनं च प्रमाणम् इति केन कथितम्?
उत्तरम्—उदयनेन।

10. **प्रश्नः**— सविकल्पकनिर्विकल्पकयोर्भेदात् द्विप्रकारकौ कौ स्तः?
उत्तरम्— (प्रमा) प्रमाणम्।

11. **प्रश्नः**— निर्विकल्पकज्ञानम् किं भवति?
उत्तरम्—अवान्तरव्यापारः।

12. **प्रश्नः**— सविकल्पकं ज्ञानं किं भवति?
उत्तरम्— फलम्।

13. **प्रश्नः**— प्रमाया त्रिप्रकारकं किं भवति?
उत्तरम्—1. कदाचित् इन्द्रियम्, 2. कदाचिदिन्द्रियार्थसन्निकर्षः, 3. कदाचिद् ज्ञानम्।

14. **प्रश्नः**—न्यायसूत्रे (1/1/9) प्रमेयस्य द्वादशभेदाः कानि सन्ति?
उत्तरम्—1. आत्मा, 2. शरीरम्, 3. इन्द्रियः, 4. अर्थः, 5. बुद्धिः, 6. मनः, 7. प्रवृत्तिः, 8. दोषः, 9. प्रेत्यभावः, 10. फलम्, 11. दुःखम्, 12. अपवर्गः।

15. **प्रश्नः**— 'परतः प्रामाण्यवादः' कः अङ्गीकरोति?
उत्तरम्— न्यायदर्शनः।

16. **प्रश्नः**— साक्षात्कारिप्रमाहेतुः कति? कानि च तानि?
उत्तरम्—षट्प्रकारकः, 1. संयोगः, 2. संयुक्तसमवायः, 3. संयुक्तसमवेतसमवायः, 4. समवायः, 5. समवेतसमवायः, 6. विशेष्यविशेषणभावश्च।

17. **प्रश्नः**— लिङ्गपरामर्शोऽनुमानमिति केन कथितम्?
उत्तरम्— तर्कभाषाकारेण।

18. **प्रश्नः**— अनुमानस्य का व्युत्पत्तिः?
उत्तरम्—अनुमीयते अनेन इति हि अनुमानशब्दस्य व्युत्पत्तिः।

19. **प्रश्नः**— तर्कभाषानुसारेण अनुमानस्य द्वौ भेदौ कौ?
उत्तरम्— 1. स्वार्थानुमानम्, 2. परार्थानुमानञ्च।

20. **प्रश्नः**— उपमानम् इत्यस्य किं लक्षणम्?
उत्तरम्— उपमितिकरणम्।

21. **प्रश्नः**— आप्तवाक्यं किं भवति?
उत्तरम्— शब्दः।

22. **प्रश्नः**— तर्कभाषाकारेण वाक्यं किं कथ्यते?
उत्तरम्— वाक्यं तु आकांक्षायोग्यतासन्निधिमतां पदानां समूहः।

23. **प्रश्नः**— तर्कभाषानुसारेण कार्यद्रव्याणि कानि सन्ति?
उत्तरम्— चत्वारि कार्यद्रव्याणि-पृथिवी-अप्-तेजस्-वायुः।

24. **प्रश्नः**— परिमाणस्य किं लक्षणम्?
उत्तरम्— मानवव्यवहारासाधारणकारणं परिमाणम्।

25. **प्रश्नः**— कारणस्य किं लक्षणम्?
उत्तरम्— कार्यनियतपूर्ववृत्तिः कारणम्।

26. **प्रश्नः**— कार्य-कारणसम्बन्धविषये न्यायमते को वादः?
उत्तरम्— आरम्भवादः।

27. **प्रश्नः**— असत्कारणवादविषये न्यायमतं किम् ?
उत्तरम्— कारणस्य नाशे सति कार्योत्पादनं भवति।

28. **प्रश्नः**— 'असत्कार्यवादस्य सिद्धान्तः कस्मिन् दर्शने प्राप्यते?
उत्तरम्— न्यायदर्शने।

29. **प्रश्नः**— न्यायदर्शने कति कारणानि कानि च तानि?
उत्तरम्— (3 त्रीणि) 1. समवायिकारण, 2. असमवायिकारण, 3. निमित्तकारणम्।

30. **प्रश्नः**— अक्षपाददर्शनेन किं दर्शनं गृह्यते?
उत्तरम्— न्यायदर्शनम्।

31. **प्रश्नः**— 'यत्र धूमस्तत्राग्निः' इति साहचर्यनियमः कः?
उत्तरम्— व्याप्तिः।

32. **प्रश्नः**— अवयवानां कति संख्या?
उत्तरम्—त्रीणि, 1. प्रतिज्ञा, 2. हेतुः, 3. निगमनम्।

(झझ) योगसूत्रम् (व्यासभाष्य) 1. चित्तभूमिः, 2. चित्तवृत्तिः, 3. ईश्वरस्वरूपम्, 4. योगाङ्गः, 5. समाधिः, 6. कैवल्यः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

1. **चित्तभूमिविवेचनम्**–योगदर्शनस्य निर्माता भगवान् पतञ्जलिः अस्ति। व्यासस्तत्र भाष्यं यच्चकार तद् योगभाष्यमिति नाम्ना सर्वत्राद्य सुविदितम्। व्यासकृतभाष्यस्य टीकां वाचस्पतिमिश्रः कृतवान् सा टीका तत्त्ववैशारदीतिसंज्ञया प्रसिद्धास्ति। व्यासभाष्ये चित्तभूमिः इत्यस्य चर्चा वर्तते। चित्तस्य भूमिः चित्तभूमिः। चित्तस्य सहजप्रवृत्तिरेव चित्तभूमिः इति उच्यते। 1. क्षिप्तं, 2. मूढं, 3. विक्षिप्तम्, 4. एकाग्रं, 5. निरुद्धाख्यानि सन्ति चित्तभूमेः पञ्चरूपाणि वा अवस्थाः। एतास्ववस्थासु क्षिप्त-मूढ-विक्षिप्तावस्था न योगानुकूला भवन्ति। रजोगुणप्रधानत्वात् क्षिप्तावस्था तमोगुणप्रधानत्वान्मूढावस्था नेमे द्वेऽप्यवस्थे योगाय समुचिते। यथोक्तं क्रमशः–"प्रख्यारूपं हि चित्तसत्त्वं रजस्तमोभ्यां संसृष्टमैश्वर्यविषयप्रियं भवति। एवं च "तदेव तमसानुविद्धमधर्माज्ञानावैराग्यानैश्वर्योपगं भवति।" 'तदेव प्रक्षीणमोहावरणं सर्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्मज्ञानवैराग्यैश्वर्योपगं भवति।" एवं एकाग्रावस्था निरुद्धावस्था च अवश्यमेव योगानुकूले। तयोः सत्त्वगुणप्रधानत्वात्। एकाग्रावस्थायां चित्तं चिरमेकस्मिन् विषये आरूढं भवति। तदस्याम् अवस्थायां कमपि विषयं चिरं ध्यातुं शक्नोति तस्मादेषावस्था योगाय कल्पते। एतस्यामवस्थायां चित्तस्य सर्वा अपि वृत्तयो लुप्ता भवन्ति, तस्मात् चित्तं स्वकीयां स्वाभाविकीं स्थिरां शान्तामवस्थामधिगच्छति। यथोक्तम्–तदेव रजोलेशमपलपितं स्वरूपप्रतिष्ठं सत्त्वपुरुषान्यताख्यातिमात्रं धर्ममेधध्यानोपगं भवति।

2. **चित्तवृत्तिविवेचनम्**–योगसूत्रकारेण यथोक्तम्–"वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः।" चित्तस्य वृत्तिः चित्तवृत्तिः। इमाः चित्तवृत्तयः पञ्चविधाः भवन्ति। यथा–1. प्रमाण-2. विपर्यय-3. विकल्प-4. निद्रा- 5. स्मृतयः। अत्र प्रमाणवृत्तिः–सत्यज्ञानं 'प्रत्यक्षानुमानागमाः प्रमाणानि'। अर्थात् प्रत्यक्षः, अनुमानः, शब्दः इति त्रिप्रकारकाः भवन्ति। 1. **प्रमाणम्**–यथार्थानुभवः प्रमा प्रमाकरणं प्रमाणम्। फलविशिष्टः पौरुषेयश्चित्तवृत्तिबोधः। सामान्य-अवधारणप्रधाना वृत्तिः अनुमानम्। आप्तवाक्यं शब्दः। 2. **विपर्ययः**–अविद्यारूपं मिथ्याज्ञानम् एव विपर्ययः। यथोच्यते–"विपर्ययो मिथ्याज्ञानमतद्रूपमप्रतिष्ठितम्।" यस्यान्तर्गतं तु संशयः अपि मन्यते। विपर्ययवृत्तिः पञ्चपर्वात्मिका भवति। यथा–1. अविद्या, 2. अस्मिता, 3. रागः, 4. द्वेषः, 5. अभिनिवेशाः क्लेशाः।3. **विकल्पवृत्तिः**–"शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः"। यथा–घोटकस्य शृंगः। पुरुषस्य स्वरूपः चैतन्यः। 4. **निद्रावृत्तिः**–"अभावप्रत्ययालम्बना वृत्तिः निद्रा"। तमस्याधिक्ये अवलम्बिता वृत्तिः निद्रा। प्रत्ययविशेषो निद्रा। 5. **स्मृतिवृत्तिः**–"अनुभूतविषयासम्प्रमोषः स्मृतिः।" सर्वाश्चैताः वृत्तयः सुख-दुःख-मोहात्मिकाः। चित्तस्य समस्तव्यापाराः अवस्थायाः वा अन्तर्भावः एषु पञ्चवृत्तिषु क्रियते स्म।

ईश्वरस्वरूपस्य विवेचनम्–योगदर्शने ईश्वरस्य स्थानं अत्यन्तमहत्त्वशालीनो वर्तते। योगसूत्रकारः महर्षि पतञ्जलिः आह–"क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" (योगसूत्र-1/24)। यथा मुक्तस्य पूर्वा बन्धकोटिः प्रज्ञायते नैवमीशवरस्य, यथा वा प्रकृतिलीनस्य उत्तरा बन्धकोटिः सम्भाव्यते नैवमीश्वरस्य, स तु सदैव ईश्वरः (योगसूत्र-1/24)। साम्यातिशयविनिर्मुक्तम् ऐश्वर्यं स ईश्वरः। तस्य परमगुरोः ईश्वरस्य वाचकः प्रणवः एवास्ति–"तस्य वाचकः प्रणवः"। योगदर्शनस्य परमप्रयोजनं तु समाधिलाभ एवास्ति "समाधिसिद्धिरीश्वरप्रणिधानात्"। ईश्वरप्राणिधानस्य निर्देशः योगसूत्रे त्रिवारं आयाति। यथा–ईश्वर-प्राणिधानाद् वा-1/23, तपःस्वाध्यायेश्वरप्राणिधानानि क्रियायोगः-2/1, दमाधिसिद्धिरीश्वरप्रणिधानात्-2/45। अत्र

'प्रणिधान' इत्यस्य अर्थः ईश्वरस्यैव स्व-कर्मफलसमर्पणं वर्तते। अत्रैव ईश्वरस्य महत्त्वपूर्णमुपयोगित्वं वर्तते। अस्मिन् विषये वाचस्पतिमिश्रः कथयति-"ईश्वरस्यापि धर्माधिष्ठानार्थं प्रतिबन्धापनय एव व्यापारः"। योगवार्तिकस्य कथनमपि-"ईश्वरस्तु साम्यपरिणामादिरूपाखिलावरणभंगेन उद्बोधकः" इत्थं विद्यते। स भगवान् ईश्वरः प्रसन्नः सन् अन्तरायरूपान् क्लेशान् परिहृत्य समाधि सम्बोधयति इति भोजवृत्तिः-2/45।

4. योगांगविवेचनम्– पातञ्जलयोगदर्शने योगस्य अष्टाङ्गसाधनानि निर्विकारत्वादिहेतोः निदधाति। तानीमानि नामानि–1. यमः, 2. नियमः, 3. आसनम्, 4. प्राणायामः, 5. प्रत्याहारः, 6. धारणा, 7. ध्यानम्, 8. समाधयः। यम-नियम-आसन-प्राणायाम-प्रत्याहाराः बहिरङ्गानि साधनानि, एवं च धारणा-ध्यान-समाधयश्चान्तरङ्गानि साधनानि सन्ति।

1. यमः–अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहभेदेन यमः पञ्चविधः। परापीडनमहिंसेति कथ्यते। अहिंसकं प्रति न कोऽपि प्राणी वैरी भवति। सर्वेऽपि प्राणिनः तस्मिन् वैररहिता भवन्ति। कथितं च–अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः। कीदृशस्याप्यसत्यस्याभाषणं सत्यमिति निगद्यते। सत्यभाषणेन भवति वाण्यमोघा। सत्यभाषी यद्वदति तस्य प्रकाशनमात्रेण फलमुपलब्धं जायते। उक्तञ्च–सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्। चौर्यकर्मणस्त्यागोऽस्तेयमित्युदीर्यते। अस्तेयात् सर्वविधसम्पदां लाभो भवति। नास्तेयसाधको भवति कुत्रापि रागो तदभावादसौ तु लक्ष्म्या स्वयमेव मृग्यते। कथितं च–अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्। ब्रह्मचर्येण शारीरिकं मानसिकमात्मिकञ्च बलमेधते। तत्साहाय्येन योगेऽन्तरायमन्तरोन्तर्तिर्भवति। उक्तञ्च– ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः। अपरिग्रहात् भूतभाविजन्मज्ञानमुत्पद्यते। लोभवशात् परवस्तुनोऽपरिग्रहणमपरिग्रह इत्यभिधीयते। कथितं च–अपरिग्रहस्थैर्यजन्मकथन्तासम्बोधः।

2. नियमः–शौच-सन्तोष-तपः-स्वाध्याय-ईश्वर-प्रणिधानभेदेन पञ्चधा। बाह्यशुद्धिराभ्यन्तरशुद्धिः 'शौच'मिति, समुचितोद्योगेन समवाप्ते वस्तुनि तुष्टिः 'सन्तोष' इति, द्वन्द्वसहिष्णुता 'तप' इति, नियमपूर्वकं धर्मग्रन्थाध्ययनं 'स्वाध्याय' इति, ईश्वर-ध्यानं तस्मै स्वार्पणम् ईश्वरप्रणिधानमिति प्रोच्यते। नियमानां परिपालनेन यानि फलानि लभ्यन्ते तेषां कीर्तनं योगसूत्रमेवं कुरुते–1. शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः, 2. सन्तोषादनुत्तमसुखलाभः, 3. कार्यादिन्द्रियसिद्धिरशुद्धिक्षयात्तपसः, स्वाध्यायादिष्टदेवतसम्प्रयोगः, 5. समाधिसिद्धिरीश्वरप्रणिधानात्।

3. आसनम्–स्थिरसुखमासनम्। साधनायै यत् सुखदमनुकूलं तदासनमिति गीतम्। आसनं स्वस्तिकासनसिद्धासनपद्मासनादिभेदैर्बहुविधम्।

4. प्राणायामः–आसनजयभूते सति श्वास-प्रश्वासयोः गतिविच्छेदम् अर्थात् श्वास-प्रश्वास-गतिनिरोधः प्राणायाम इति प्रोच्यते। पतञ्जलिः प्राह प्राणायामात् अज्ञानावरणं क्षीयते मनश्च स्थिरं भवति। प्राणायामस्य चत्वारो भेदाः–1. बाह्यः (रेचकप्राणायामः), 2. आभ्यन्तरः (पूरकप्राणायामः), 3. स्तम्भवृत्तिः (कुम्भकप्राणायामः), 4. केवलकुम्भकप्राणायामः।

5. प्रत्याहारः (प्रति-प्रतिकूल, आहार-वृत्ति) –येन इन्द्रियाणि विषयेभ्यो विमुखानि भूत्वान्तर्मुखीनि भवन्ति स 'प्रत्याहार' इति गद्यते। बहिर्भूतवृत्तीनाम् अन्तर्मुखीकरणम् एतानि पञ्चसाधनानि बहिरङ्गसाधनं वर्तन्ते। शेषाणि त्रयः अन्तरंगसाधनानि मन्यन्ते।

6. धारणा–देशबन्धश्चित्तस्य धारणा (यो.सू.3/1)। चित्तस्याभीष्टविषये सन्निवेशनं धारणेति कथ्यते। परं वृत्तिमात्रसहितचित्तस्य नाभि-नासिकाग्रभागचन्द्रादिध्येये निबन्धनमपेक्ष्यतेऽत्र।

7. ध्यानम्–तत्र प्रत्येकतानता ध्यानम् (यो.सू.3/2)। ध्येयस्यानारतं चिन्तनं ध्यानमिति आम्नातम्।

8. समाधिः– तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः। सम्यगाधीयते एकाग्रीक्रियते विक्षेपान् परिहृत्य मनो यत्र सः समाधिः। अर्थात् अस्यामवस्थायां मनो ध्येय एवंविधतया लीयते यत् तद् ध्येयञ्चोभयमपि भवत्येकमेव। उभयोस्तादात्म्यं भवति।

एवं धारणा-ध्यान-समाधय इत्येतेषां त्रिकं 'संयम' इत्येतया संज्ञया प्रसिद्धम्। योगाभ्यासं विदधानो योगी सत्यवस्थाविषये सिद्धिष्वधिकारमवाप्नुते।

5. समाधिः इत्यस्य विवेचनम्–योगसूत्राणां रचनाकारः पतञ्जलिः वर्तते। सः योगशास्त्रस्य प्रचारकः संशोधको वा वर्तते। सांख्यस्फोटवादस्य खण्डनं योगस्य मण्डनं सः करोति। योगदर्शने चत्वारि पादानि सन्ति। येषां सूत्रसंख्या 195 विद्यते।

प्रथमपादे समाधिः इत्यस्य वर्णनं वर्तते। योगशब्दः समाध्यर्थक-'युज्' धातोः (युज् समाधौ) इत्यनेन निष्पन्नो भवति। अतः योगस्य व्युत्पत्तिलभ्यार्थं समाधि इति विद्यते। योगश्चित्तवृत्तिनिरोधः इति योगस्य लक्षणं पतञ्जलिना प्रोक्तम्। अत्र चित्तस्य अभिप्रायः अन्तःकरणैः (मन-बुद्धि-अहंकार) विद्यते।

श्रेयरूपे चित्तस्य एकाग्रता निश्चलत्वं च समाधिः इति समाधेः निर्वचनम्। स द्विविधः–1. सविकल्पकः, 2. निर्विकल्पकश्च। योगस्य द्वौ भेदौ स्तः–1. सम्प्रज्ञात (सं + प्रज्ञा + त) तस्य फलमस्ति-प्रज्ञायाः उदयः इयं प्रज्ञा सद्भूतार्थं (वास्तव्य, सत्य) प्रश्चोचितं करोति। सम्प्रज्ञातः सबीजसमाधिः वर्तते। अस्मिन् समाधौ चित्तं ध्येये लीनं भूत्वा तन्मयीभवति। एकाग्रचित्तस्य अविचलित-अक्षुब्ध अवस्था वर्तते। यदा ध्येयवस्तूनामुपरि चित्तः चिरकालपर्यन्तं विद्यते। अस्य योगस्य नाम सम्प्रज्ञातसबीजसमाधिः इति मन्यते।

2. असम्प्रज्ञात–असम्प्रज्ञातसमाधौ सर्वासामपि चित्तवृत्तीनां विषयाणाञ्च तिरोभावः सञ्जायते। अर्थात् यदा चित्तं सर्वेभ्योऽपि बाह्येभ्यः आभ्यन्तरेभ्यश्च विषयेभ्यो दूरीभवति तदा सा स्थितिः असम्प्रज्ञातसमाधिर्नाम्ना गीयते। असम्प्रज्ञात-समाधिः एव परमयोगः। एतस्यामवस्थायामेव आत्मा मुक्तावस्थाजनितं प्रकाशमनुभवति। विचारानन्दास्मितावत्त्वात् सम्प्रज्ञातसमाधेः, सः चतुर्विधो भवति।

1. सवितर्क-सम्प्रज्ञातसमाधिः–यदा कस्मिंश्चित् स्थूले भौतिकपदार्थे चित्तमविचलभावेन समवस्थाप्यते तदा स समाधिः सवितर्कः इत्युच्यते। 2. सविचार-सम्प्रज्ञातसमाधिः–स्थूलात् (मूर्त्यादेः) चित्तमाकृष्य यदा तत् सूक्ष्मे विषये प्रतिष्ठाप्यते तदा स सविचारसमाधिः इत्यभिधीयते। 3. सानन्द-सम्प्रज्ञातसमाधिः–यदा सूक्ष्मादपि (तन्मात्रात्) चित्तमावर्ज्य कस्मिंश्चित् सूक्ष्मतरे विषये तद् ध्यानार्थमारोप्यते तदा स समाधिः सानन्दसमाधिरिति भण्यते। 4. सास्मिता-सम्प्रज्ञातसमाधिः–यदा ध्यानमहङ्कारगोचरं क्रियते तदा स समाधिः सास्मिता समाधिरिति कीर्त्यते। एतस्य समाधेः फलमस्ति आत्म-साक्षात्कारः।

योगस्य सन्ति प्रधानमार्गास्त्रयः–1. ज्ञानयोगमार्गः– "ज्ञाने यो रमते स ज्ञानमार्गः"। 2. कर्मयोगमार्गः– यो जनः कठोरसाधनायां वा मीमांसाविहितेषु कर्मसु योजयितुमात्मानं प्रभवेत् सः कर्मयोगमार्गं गृह्णीयात्। 3. भक्तियोगमार्गः– भावुकप्रकृतिर्जनो भक्तिमार्गमाश्रयेत्। मनसः शुद्धता सर्वत्रापेक्षितास्ति।

6. कैवल्यः इत्यस्य विवेचनम्–व्यास भाष्यानुसारेण कृतभोगापवर्गाणां पुरुषार्थशून्यानां यः प्रतिप्रसवः कार्यकारणात्मनां गुणानां तत् कैवल्यम्। स्वरूपप्रतिष्ठा-पुनर्बुद्धिसत्त्वाऽनभिसम्बन्धात् पुरुषस्य चितिशक्तिः एव केवला, तस्याः सदा तथैवावस्थानं कैवल्यम्। योगसूत्रकारः महर्षिपतञ्जलिः आह–"योगाङ्गानुष्ठानाद् अशुद्धिक्षये ज्ञानदीप्तिरविवेकख्यातेः।" प्रत्येकसाधकानां क्रियायोगस्य समाधियोगस्य च अभ्यासेन इष्टसिद्धिः भवति। क्रियायोगाभ्यासस्य फलं द्विप्रकारकं 1. क्लेशतनूकरणम्, 2. समाधिभावना च भवति। क्रियायोगेन पञ्चप्रकारकाः क्लेशाः क्षीयन्ते एवं प्रसंख्यानं (ज्ञानं) भवति। मानसपटले समाधिः इत्यस्य भावना अपि उत्पन्ना भवति। यम-नियमादि-अङ्गानामनुष्ठानेन चित्तस्य वृत्तीनां निरोधे सति पुरुषः पूर्ण-चैतन्यरूपस्य लाभं प्राप्नोति। प्रकृति-पुरुषयोः विवेकज्ञानादेव सुख-दुःखमोहान् प्रकृतिप्रदत्तान् भोगान् वा अननुभवन् जीवः बन्धनाद् मुच्यते।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—योगदर्शनस्य निर्माता कः?
   उत्तरम्— भगवान् पतञ्जलिः।
2. **प्रश्नः**— योगशब्दस्य निष्पत्तिः कस्मिन् धातोः भवति?
   उत्तरम्— समाध्यर्थक 'युज्' धातोः (युज् समाधौ)।
3. **प्रश्नः**— योगभाष्यं कस्य वर्तते?
   उत्तरम्— व्यासस्य।
4. **प्रश्नः**—व्यासकृतभाष्यस्य टीकां कः कृतवान्?
   उत्तरम्— वाचस्पतिमिश्रः।
5. **प्रश्नः**—योगदर्शने किं नाम योगः?
   उत्तरम्— चित्तवृत्तिनिरोधः।
6. **प्रश्नः**— चित्तभूमिः इत्यस्य का व्युत्पत्तिः?
   उत्तरम्—चित्तस्य भूमिः चित्तभूमिः।
7. **प्रश्नः**—चित्तस्य सहजप्रवृत्तिरेव चित्तभूमिः इति केन उच्यते?
   उत्तरम्— योगभाष्यकारेण।
8. **प्रश्नः**—कियन्ति चित्तभूमयः?
   उत्तरम्— 5 पञ्च।

9. प्रश्नः—क्लेशहेतुकाः कर्माशयप्रचयक्षेत्रीभूताः काः?
उत्तरम्— क्लिष्टाः।

10. प्रश्नः—ख्यातिविषया गुणाधिकारविरोधिन्यो काः?
उत्तरम्— अक्लिष्टाः।

11. प्रश्नः—चित्तभूमेः पञ्चरूपाणि अवस्थाः वा कानि सन्ति?
उत्तरम्— 1. क्षिप्तं, 2. मूढं, 3. विक्षिप्तम्, 4. एकाग्रं, 5. निरुद्धमिति।

12. प्रश्नः—क्षिप्त-मूढ-विक्षिप्तावस्था योगानुकूला सन्ति न वा?
उत्तरम्— योगानुकूला न सन्ति।

13. प्रश्नः—रजोगुणप्रधानत्वात् का अवस्था?
उत्तरम्— क्षिप्तावस्था।

14. प्रश्नः— तमोगुणप्रधानत्वात् का अवस्था?
उत्तरम्— मूढावस्था।

15. प्रश्नः—एकाग्रावस्था निरुद्धावस्था च योगानुकूला सन्ति न वा?
उत्तरम्— अवश्यमेव योगानुकूला।

16. प्रश्नः—सत्त्वगुणप्रधानत्वात् का अवस्था?
उत्तरम्— एकाग्रावस्था निरुद्धावस्था च।

17. प्रश्नः—चित्तवृत्तिः इत्यस्य का व्युत्पत्तिः?
उत्तरम्— चित्तस्य वृत्तिः चित्तवृत्तिः।

18. प्रश्नः—चित्तवृत्तयः कतिविधाः भवन्ति?
उत्तरम्— चित्तवृत्तयः पञ्चविधाः भवन्ति।

19. प्रश्नः—पञ्चविधाः चित्तवृत्तयः काः सन्ति?
उत्तरम्— 1. प्रमाणम्, 2. विपर्ययः, 3. विकल्पः, 4. निद्रा, 5. स्मृतयः।

20. प्रश्नः—प्रत्यक्षानुमानागमानि कानि?
उत्तरम्— प्रमाणानि।

21. प्रश्नः—प्रमाणवृत्तयः (सत्यज्ञानं) त्रिप्रकारकाः के सन्ति?
उत्तरम्— प्रत्यक्षः, अनुमानः, शब्दः इति।

22. प्रश्नः—प्रमाणम् इत्यस्य का परिभाषा?
उत्तरम्— यथार्थानुभवः प्रमा प्रमाकरणं प्रमाणम्।

23. प्रश्नः—विपर्ययवृत्तिः इत्यस्य किं लक्षणम्?
उत्तरम्— विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठितम्।

24. प्रश्नः—विकल्पवृत्तिः इत्यनेन किं ज्ञायते?
उत्तरम्— शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः।

24. प्रश्नः—अज्ञानमविद्या वा कतिविधा?
उत्तरम्— 05 पञ्चविधा।

25. प्रश्नः—काभ्यां पञ्चतय्यः वृत्तयः निरोधव्याः?
उत्तरम्— अभ्यास-वैराग्याभ्याम्।

26. प्रश्नः—निद्रावृत्तिः इत्यस्य किं लक्षणम्?
उत्तरम्— अभावप्रत्ययालम्बना वृत्तिः निद्रा।

27. प्रश्नः—स्मृतिवृत्तिः इत्यस्य का परिभाषा?
उत्तरम्— अनुभूतविषयासम्प्रमोषः स्मृतिः।

28. प्रश्नः—पूर्वेषामपि गुरुः कालेनानवच्छेदात् कः ?
उत्तरम्— ईश्वरः।

29. प्रश्नः— प्रणवः कस्य वाचकः?
उत्तरम्— ईश्वरस्य।

30. प्रश्नः—महर्षिपतञ्जलिः स्व-योगसूत्रे ईश्वरस्य का परिभाषा कृतवान्?
उत्तरम्— क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः।

31. प्रश्नः— कस्य प्रणिधानात् समाधिसिद्धिः?
उत्तरम्— ईश्वर-प्रणिधानात्।

32. प्रश्नः—सर्वथा वाद-विवाद-विरहितः कः?
उत्तरम्— योगः।

33. प्रश्नः—योगः किं करोति?
उत्तरम्— आत्मानं दर्शयति मनः शरीरञ्च संस्करोति।

34. प्रश्नः—योगस्य कति साधनानि भवन्ति?
उत्तरम्— अष्टाङ्गसाधनानि।

35. प्रश्नः—अष्टाङ्गसाधनानि कानि सन्ति?
उत्तरम्— 1. यमः, 2. नियमः, 3. आसनम्, 4. प्राणायामः, 5. प्रत्याहारः, 6. धारणा, 7. ध्यानम्, 8. समाधयः।

36. प्रश्नः—बहिरङ्गानि साधनानि कानि सन्ति?
उत्तरम्— यम-नियम-आसन-प्राणायामप्रत्याहाराः।

37. प्रश्नः—अन्तरङ्गानि साधनानि कानि सन्ति?
उत्तरम्— धारणा-ध्यान-समाधयश्च।

38. प्रश्नः—यमः कतिविधः के च ते?
उत्तरम्— पञ्चविधः, अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहाः।

39. प्रश्नः—नियमः कतिधा के च ते?
उत्तरम्— पञ्चधा, शौच-सन्तोष-तपः-स्वाध्याय-ईश्वरप्रणिधानानि।

40. प्रश्नः—आसनम् इत्यस्य किं लक्षणम्?
उत्तरम्— स्थिरसुखमासनम्।

41. प्रश्नः—प्राणायामस्य किं लक्षणम्?
उत्तरम्— श्वास-प्रश्वास-गतिनिरोधः।

42. प्रश्नः—प्राणायामस्य चत्वारो भेदाः के सन्ति?
उत्तरम्— 1. रेचकप्राणायामः, 2. पूरकप्राणायामः, 3. कुम्भकप्राणायामः, 4. केवलकुम्भकप्राणायामः।

43. प्रश्नः—बर्हिर्भूतवृत्तीनाम् अन्तर्मुखीकरणम्" इति कस्य लक्षणम्?
उत्तरम्—प्रत्याहारस्य।

44. प्रश्नः—धारणा इत्यस्या का परिभाषा?
उत्तरम्— देशबन्धश्चित्तस्य धारणा।

45. प्रश्नः—ध्यानम् इत्यस्य किं लक्षणम्?
उत्तरम्—तत्र प्रत्येकतानता ध्यानम्।

46. प्रश्नः—समाधिः इत्यस्या का परिभाषा?
उत्तरम्— तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।

47. प्रश्नः—कस्मात् समाधिसिद्धिः?
उत्तरम्— ईश्वरप्रणिधानात्।

48. प्रश्नः—समाधेः द्वौ विधौ कौ स्तः?
उत्तरम्— सम्प्रज्ञातसमाधिः, असम्प्रज्ञातसमाधिः।

49. प्रश्नः—एकाग्रावस्थायाः नामान्तरं किम्?
उत्तरम्— सम्प्रज्ञातसमाधिः।

50. प्रश्नः—सम्प्रज्ञात (सं + प्रज्ञा + त) इत्यस्य किं फलमस्ति?
उत्तरम्— प्रज्ञायाः उदयः।

51. प्रश्नः—निरुद्धावस्थायाः अपरं नामधेयं किम्?
उत्तरम्— असम्प्रज्ञातसमाधिः।

52. प्रश्नः—समाधेः फलं किम्?
उत्तरम्— आत्म-साक्षात्कारः।

53. प्रश्नः—परमयोगः समाधिः कः?
उत्तरम्— असम्प्रज्ञातसमाधिः।

54. प्रश्नः—योगस्य प्रधानमार्गास्त्रयः के सन्ति?
उत्तरम्— ज्ञान-कर्म-भक्तियोगमार्गाः।

55. प्रश्नः—व्यासभाष्यानुसारेण कैवल्यस्य किं लक्षणम्?
उत्तरम्— पुरुषार्थशून्यानां यः प्रतिप्रसवः कार्यकारणात्मनां गुणानाम्।

56. प्रश्नः—योगसूत्रे कैवल्यं कतिविधम्?
उत्तरम्— 02 द्विविधम्।

57. प्रश्नः—पतञ्जलि-योगसूत्रे कति पादाः, सूत्राणि च सन्ति?
उत्तरम्— 04 पादाः, 195 सूत्राणि।

(अ) (ब्रह्मसूत्रशांकरभाष्यम्-1.1) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

ब्रह्मसूत्रस्य निर्माता कृष्णद्वैपायनः वर्तते। **अथातो ब्रह्मजिज्ञासा** इति शंकराचार्यमते अथपदस्यार्थः आनन्तर्यम् वर्तते। इदं सूत्रं ब्रह्मजिज्ञासायाः प्रतिपादकं वर्तते। ब्रह्मैव परमात्मा। परमात्मा तु प्रकाशानामपि प्रकाशः तेजसामपि तेजः अस्ति। तस्यैव तेजसा निखिलं जगद् द्योतते। अग्न्यादीनां का कथा सूर्यचन्द्रतारकादयो न तस्य प्रकाशने प्रभवः। सः एको विश्वरूपः एव सर्वदेवमयश्च वर्तते। वेदान्तदर्शनं तु ब्रह्मैव सत्यं मन्यते, तद्व्यतिरिक्तं यत् किञ्चिदपि विद्यते जगत्यस्मिन् सर्वमसत्स्वरूपम्। तत् जगतः सर्वस्वं ब्रह्मैव स्वीकरोति, तदेव जगतः चराचरस्य उपादानकारणं निमित्तकारणञ्चास्ति। एतदेव 'परमात्म'रूपेण विश्वस्य अखिलस्य मूले तिष्ठति। इदं ब्रह्म स्वशक्त्या मायया सह सृष्टिमिमं विरचति। 'सर्वेषु प्राणिषु यत् चेतनत्वं दृश्यते तद् ब्रह्मण एव। सर्वं खल्विदं जगत् ब्रह्मणो विवर्त्तरूपम्। वेदान्तदर्शनानुसारं ब्रह्म निर्विकल्पं निरुपाधि निर्विकारं चेति उररीक्रियते। तद् ब्रह्म द्विविधं निर्गुणं सगुणं च। जगतः सर्वे जीवाः तु ब्रह्मैव सन्ति। अज्ञानवशात्

ते पृथग्रूपाः दृश्यन्ते यथा एकमेव जलं विभिन्नेषु जलाशयेषु पात्रेषु च विविधनामरूपेण उपचर्यते। तथैव जीवाः विविधशरीरेषु विनिपत्य विविधनामरूपाणि उररीकुर्वते। प्रलयकालेऽपि यदा सर्वं जगद् विनश्यति ब्रह्म पूर्ववत् तिष्ठति। एकमेव ब्रह्म मायया अनेकानि रूपाणि धारयति-एक एव परमेश्वरः कूटस्थनित्यो नामधातुः अविद्यया मायाविव अनेकधा विभाव्यते। (शा०भा०) अतः वेदान्तदर्शनस्य इदं दृढं मतं यत् मुक्तिः ब्रह्मतत्त्वस्य ज्ञानेनैव समुपद्यते। उक्तमपि-

मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा।
स्वप्नबोधं विना नैव स्वस्वप्नो हीयते यथा।।
(वेदान्तदर्शने)

ब्रह्मलक्षणम्—असाधारणधर्मवचनं लक्षणम्। लक्षणं द्विविधं 1. स्वरूपलक्षणम्, सद्व्यावर्तकं स्वरूपलक्षणम्, यथा-'सत्यं ज्ञानमनन्तं ब्रह्म', 'विज्ञानमानन्दं ब्रह्म', सच्चिदानन्दं ब्रह्म' इत्यादयः।2. तटस्थलक्षणम्—कादाचित्कत्वे सति व्यावर्तकं तटस्थलक्षणम्। ब्रह्मसूत्रे ब्रह्मणः तटस्थलक्षणं 'जन्माद्यस्य यतः' वर्तते। 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इति भाष्यवचनम्। अध्यासं केचिद् 'अन्यत्रान्यधर्माध्यासः' इति कथयन्ति। शास्त्रं योनिः प्रमाणं यस्मिन् तस्य भावः शास्त्रयोनित्वम्, तस्मात् शास्त्रयोनित्वात्। शास्त्रादेव प्रमाणात् जगतः जन्मादिकारणं ब्रह्माधिगम्यते। अतः सिद्धं ब्रह्मणः शास्त्रप्रमाणकत्वम्।

मोक्षस्वरूपम्—मानवजीवनस्य उत्कृष्टतमः पुरुषार्थो मोक्षो वर्तते। ब्रह्मसूत्रभाष्यकारः शंकराचार्यः कथयति- "ब्रह्मभावश्च मोक्षः" "ज्ञानं विना न मोक्षः" ज्ञानमेव परब्रह्म। उक्तञ्च-

ज्ञानं नैवात्मनो धर्मो न गुणो वा कथञ्चन।
ज्ञानस्वरूप एवात्मा नित्यः सर्वगतः शिवः।।

वेदान्तस्य सुदृढं मतमिदं यन्मुक्तिर्ब्रह्मतत्त्वस्य ज्ञानादेव भवितुमर्हति। पञ्चदशी वक्ति-

मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा।
स्वप्नबोधं विना नैव स्वस्वप्नो हीयते यथा।।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—ब्रह्मसूत्रस्य निर्माता को वर्तते?
उत्तरम्— कृष्णद्वैपायनः।

2. **प्रश्नः**— ब्रह्मसूत्रस्य शारीरकभाष्यं केन विरचितम्?
उत्तरम्— शंकराचार्येण।

3. **प्रश्नः**— कति अध्यायाः सन्ति बादरायणब्रह्मसूत्रे?
उत्तरम्— 04 चत्वारः।

4. **प्रश्नः**— बादरायणब्रह्मसूत्रे चतुर्षु अध्यायेषु कति पादाः सन्ति?
उत्तरम्— 16 षोडश।

5. **प्रश्नः**—कति अधिकरणानि सन्ति कृष्णद्वैपायनस्य ब्रह्मसूत्रे?
उत्तरम्— 191अधिकरणानि।

6. **प्रश्नः**— कति सूत्राणि सन्ति बारदायणब्रह्मसूत्रे?
उत्तरम्— 555 सूत्राणि।

7. **प्रश्नः**—"अथातो ब्रह्मजिज्ञासा" इति शंकराचार्यमते अथपदस्यार्थः किम्?
उत्तरम्— आनन्तर्यम्।

8. **प्रश्नः**—'साधनचतुष्टयानन्तर्यम्' इति कस्य पदस्यार्थः?
उत्तरम्— शंकरमते अथपदस्य।

9. **प्रश्नः**— 'ब्रह्मणः जिज्ञासा ब्रह्मजिज्ञासा' अत्र 'ब्रह्मणः' पदे षष्ठी केन सूत्रेण?
उत्तरम्— कर्तृकर्मणोः कृतिः।

10. **प्रश्नः**— असाधारणधर्मवचनं किम्?
उत्तरम्— लक्षणम्।

11. **प्रश्नः**— स्वरूपस्य लक्षणं किम्?
उत्तरम्— स्वरूपं सद्व्यावर्तकम्।

12. **प्रश्नः**—तटस्थस्य लक्षणं किम्?
उत्तरम्— कादाचित्कत्वे सति व्यावर्तकम्।

13. **प्रश्नः**— ब्रह्मसूत्रे ब्रह्मणः तटस्थलक्षणं किम्?
उत्तरम्— जन्माद्यस्य यतः।

14. **प्रश्नः**—अतस्मिंस्तद्बुद्धिः किं भवति?
उत्तरम्— अध्यासः।

15. **प्रश्नः**— शंकराचार्यमते मोक्षस्वरूपं किम्?
उत्तरम्— ब्रह्मभावश्च मोक्षः।

16. **प्रश्नः**— मानवजीवनस्य उत्कृष्टतमः पुरुषार्थो किम्?
उत्तरम्—मोक्षः।

17. **प्रश्नः**— ब्रह्मभावश्च मोक्षः इति कस्य कथनम्?
उत्तरम्— शंकराचार्यस्य।

18. **प्रश्नः**— ज्ञानं विना न मोक्षः ज्ञानमेव परब्रह्म इति कस्य विचारः?
उत्तरम्— ब्रह्मसूत्रभाष्यकारशंकराचार्यस्य।

19. **प्रश्नः**—'अन्यथाख्यातिम्' इति कस्य विचारः?
उत्तरम्— नैयायिकस्य।

20. **प्रश्नः**— अख्यातिं कः स्वीकरोति?
उत्तरम्— प्रभाकरमीमांसकः।

21. **प्रश्नः**— असत्ख्यातिं कैः मन्यन्ते?
उत्तरम्— माध्यमिक-बौद्धैः।

22. **प्रश्नः**— आत्मख्यातिं के स्वीकुर्वन्ति?
उत्तरम्— योगाचारबौद्धाः।

23. **प्रश्नः**— अद्वैतविदां मते का ख्यातिः?
उत्तरम्— अनिर्वचनीयताख्यातिः।

24. **प्रश्नः**— ब्रह्मसूत्रं कैः नामभिः ज्ञायते?
उत्तरम्—1. वेदान्तसूत्रम्, 2. शारीरकसूत्रम्, 3. वादरायणसूत्रम्, 4. उत्तरमीमांसासूत्रम्।

25. **प्रश्नः**—ब्रह्मसूत्रोपरि आचार्यशङ्करः किं भाष्यं अलिखत्?
उत्तरम्—शाङ्करभाष्यम्।

26. **प्रश्नः**—शङ्करः सत्यस्य का परिभाषा प्रदत्ता?
उत्तरम्— 'यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति तत् सत्यम्।'

(टट) न्यायसिद्धन्तमुक्तावली (अनुमानखण्डम्) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

न्यायसिद्धान्तमुक्तावलीग्रन्थस्य निर्माता विश्वनाथ-पंचाननभट्टाचार्यः वर्तते। अयं ग्रन्थः कारिकावली न्यायग्रन्थस्य टीका वर्तते। कारिकावली न्यायग्रन्थे 168 कारिकाः सन्ति। न्यायसिद्धान्तमुक्तावली ग्रन्थे 07 पदार्थाः वर्णिताः सन्ति। प्रमाकरणं प्रमाणम्। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि। अक्षस्याऽक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्। वृत्तिस्तु सन्निकर्षः, ज्ञानं वा। इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षम्। 'साक्षात् प्रतीतिः' इत्येतदेव प्रत्यक्षस्य सामान्यं लक्षणं वक्तुं शक्यम्। प्रत्यक्षं साधारण्येन द्विविधं निर्विकल्पकं-सविकल्पकञ्च। येन कस्यापि वस्तुनो ज्ञानमात्रं जायते न च तन्नामजात्यादेरपि ज्ञानं भवति तदस्ति निर्विकल्पकं ज्ञानम्। येन च वस्तुनो नामजात्यादेरपि ज्ञानं भवति तदस्ति सविकल्पकं ज्ञानम्।

अनुमानखण्डम्—प्रत्यक्षपूर्वकं अनुमितिकरणं अनुमानम्। अर्थात् प्रत्यक्षप्रमाणेन ज्ञातीकृतेन केनचन लिङ्गेन अर्थस्यावगमनानन्तरं यद् ज्ञानमश्नुते तदेव 'अनुमानम्' इति कथ्यते। उक्तञ्च वात्स्यायनेन 'मितेन लिङ्गेन अर्थस्य अनुपश्चान्मानमनुमानम्'। अनुमानशब्दस्योपयुक्तया व्युत्पत्त्या वस्तुतोऽनुमानप्रमाणस्य फलम्—अनुमितिः ज्ञायते। परामर्शजन्यं ज्ञानम् अनुमितिः। अनुमानप्रमाणस्य तु लक्षणमेतत्—लिङ्गपरामर्शोऽनुमानम्। लिङ्गं तद् भवति यद् व्याप्तिबलेनार्थं गमयति। उक्तञ्च व्याप्तिबलेन अर्थगमकं लिङ्गम्। यत्र यत्र धूमस्तत्र तत्राग्निरित्येवंविधः साहचर्यनियमो व्याप्तिरित्युच्यते। उक्तञ्च साहचर्यनियमो व्याप्तिः। अस्त्यत्र पर्वते वह्निना व्याप्तो धूम इत्येतदात्मकं तृतीयं लिङ्गस्य ज्ञानं परामर्श इत्युच्यते। किंवा व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्श इत्यभिधीयते। एतेन विवेचनेन निष्पन्नमिदं-"परोक्षं वस्तु येन हि ज्ञानेन लिङ्गेन ज्ञानपथेऽवतार्यते तद् 'अनुमानम्' नाम प्रमाणमिति। यत्र कारणेन कार्यमनुमीयते, यथा-मेघोन्नत्या भविष्यति वृष्टिः' इति। अनुमानं त्रिविधं भवति-1. पूर्ववत्-कारणात् कार्यस्य अनुमानम्। यथा-वृष्टिर्भवेन्मेघस्य सजलत्वात्। 2. शेषवत्-कार्यं दृष्ट्वा कारणस्यानुमानम्। यथा-वृष्टिर्जाता नद्या वर्धितजलवतीत्वात्। 3. सामान्यतोदृष्टम्-येन परोक्षवस्तुनो हि सामान्यतया ज्ञानं भवति। यथा-आम्रवृक्षा मञ्जरीवन्तोऽस्याम्रवृक्षस्योद्गतमञ्जरीत्वात्।

अनुमानः द्वौ प्रकारकौ भवतः—1. स्वार्थानुमानम्, 2. परार्थानुमानम्। प्रयोजनाधारेणानुमानस्य स्वार्थानुमान-परार्थानुमानभेदेन द्विविधत्वमालोक्यते। स्वसंशय-निरासाय क्रियमाणमनुमानं स्वार्थानुमानं, किञ्च परशङ्कासमाधानाय विधीयमानमनुमानं परार्थानुमानमिति कथ्यते। किंवा स्वान्तःप्रतिपत्तये स्वार्थानुमानं परप्रतिपत्तये च परार्थानुमानं प्रयुज्यत इत्यपि वक्तुं शक्यम्। स्वार्थानुमानस्थले हेतुं लिङ्गं च दृष्ट्वा साध्यं निश्चीयते। **स्वार्थं स्वानुमितिहेतुः।** तथा हि-स्वयमेव भूयोदर्शनेन 'यत्र यत्र धूमस्तत्र तत्राग्निः' इति

महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ संदिहान: पर्वते धूमं पश्यन्, व्याप्तिं स्मरन्ति-'यत्र यत्र धूमस्तत्र तत्राग्निः' इति। तदनन्तरं 'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात् पर्वतो वह्निमान् इति ज्ञानमनुमितिरुत्पद्यते। तदेतत्स्वार्थानुमानम्।

2. परार्थानुमानम्–'पर्वतो वह्निमान् परार्थानुमाने तु प्रतिज्ञाहेतूदाहरणोपनयनिगमनाख्यपञ्चावयवानां प्रयोगो विधीयते। अनुमानस्य पञ्चावयवा:-1. प्रतिज्ञा, 2. हेतुः, 3. उदाहरणम्, 4. उपनयम्, 5. निगमनम्। अनुमानस्य एतानि पञ्चपदानि प्राचीनकालीनशिक्षणाधिगमे प्रयोगो भवति स्म। आधुनिकसमये शिक्षणाधिगमे हरवार्ट-पञ्चपदी अनुमानस्य पञ्चपदी इत्यस्य रूपान्तरं वर्तते। तान् **पर्वतो वह्निमान् धूमवत्त्वात्** अस्मिन् वाक्ये दर्शनीयः-

1. प्रतिज्ञा-राम: पश्यतु पर्वतो वह्निमान्।
2. हेतुः-अत्र को हेतुः-धूमवत्त्वात्।
3. उदाहरणम्-यत्र-यत्र धूम: तत्र-तत्र वह्निः, यथा-महानसः।
4. उपनयम्-तथा च अयम्।
5. निगमनम्-तस्मात्तथा (वह्निमान्)।

लिङ्गपरामर्शविवेचनम्–नवीना नैयायिका अनुमानस्य प्रभेदान् एवं मन्यन्ते-लिङ्गं त्रिप्रकारकं भवति। यथा-1. केवलान्वयि, 2. केवलव्यतिरेकि, 3. अन्वयव्यतिरेकि। अत्र अन्वयस्यार्थो भवति- साहचर्यमिति। व्यतिरेकस्य च 'अविनाभाव' इति यत्र धूमस्तत्राग्निरित्यन्वयस्य स्वरूपं किञ्च 'यत्राग्निर्न तत्र धूमोऽपि न' (इदं न तर्हि इदमपि न) इत्येतद् व्यतिरेकस्य स्वरूपं भवति। अनुमानं हेतुभूमिकं भवति। यदि हेतुः शुद्धो भवति तदानुमानमपि भवति शुद्धम्। हेतोः शुद्धत्वं तस्य पक्षावृत्तित्वे सपक्षवृत्तित्वे विपक्षव्यावृत्तित्वेऽबाधितविषयत्वेऽथ च असत्प्रतिपक्षत्वेऽवतिष्ठते। यो हेतुर्नास्ति पक्षवृत्तित्वादिवैशिष्ट्यवान् स एव 'हेत्वाभास' इत्येतेन नाम्ना व्यपदिश्यते। असिद्ध-विरुद्धानैकान्तिक-बाधितविषय-सत्प्रतिपक्षभेदेन हेत्वाभासस्य पञ्चविधत्वं न्यायदर्शनमामनन्ति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—न्यायसिद्धान्तमुक्तावलीग्रन्थस्य निर्माता कः?
उत्तरम्— विश्वनाथपंचाननभट्टाचार्यः।

2. **प्रश्नः**—न्यायसिद्धान्तमुक्तावली कस्य न्यायग्रन्थस्य टीका वर्तते?
उत्तरम्— कारिकावल्याः।

3. **प्रश्नः**— कारिकावल्यां कति कारिका: सन्ति?
उत्तरम्— 168 कारिकाः।

4. **प्रश्नः**—न्यायसिद्धान्तमुक्तावलीग्रन्थे कति पदार्थाः वर्णिता: सन्ति?
उत्तरम्— 07 सप्त।

5. **प्रश्नः**— 'संसारमहीरुहस्य बीजाय' अत्र संसार: कीदृशं कारणमस्ति?
उत्तरम्— निमित्तकारणम्।

6. **प्रश्नः**— प्रमाणस्य किं लक्षणम्?
उत्तरम्— प्रमाकरणं प्रमाणम्।

7. **प्रश्नः**—कति प्रमाणानि, कानि च तानि?
उत्तरम्—4 चत्वारि, प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि।

8. **प्रश्नः**— प्रत्यक्षस्य किं लक्षणम्?
उत्तरम्— अक्षस्याऽक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्।

9. **प्रश्नः**— प्रत्यक्षस्य सामान्यं लक्षणं किम्?
उत्तरम्— साक्षात् प्रतीतिः।

10. **प्रश्नः**—अन्यथासिद्धय: कतिविधा:?
उत्तरम्— 05 पञ्चविधाः।

11. **प्रश्नः**— किं कारणत्वम्?
उत्तरम्— अन्यथासिद्धिशून्यत्वे सति नियतपूर्ववर्तित्वम्।

12. **प्रश्नः**—प्रत्यक्षं साधारण्येन द्विविधं किम्?
उत्तरम्— निर्विकल्पकं-सविकल्पकञ्च।

13. **प्रश्नः**— अनुमानस्य किं लक्षणम्?
उत्तरम्— प्रत्यक्षपूर्वकं अनुमितिकरणं अनुमानम्।

14. **प्रश्नः**— वात्स्यायनमते अनुमानस्य का परिभाषा?
उत्तरम्—मितेन लिङ्गेन अर्थस्य अनु पश्चान्मानमनुमानम्।

15. **प्रश्नः**— पटरूपं प्रति तन्तुरूपं कीदृशं कारणम्?
उत्तरम्— असमवायिकारणम्।

16. **प्रश्नः**— पटादिकं प्रति तन्तुसंयोगादिकं कीदृशं कारणम्?
उत्तरम्— असमवायिकारणम्।

17. **प्रश्नः**— अनुमितिः इत्यस्याः किं लक्षणम्?
उत्तरम्— परामर्शजन्यं ज्ञानम् अनुमितिः।

18. **प्रश्नः**— अनुमानं कतिविधं, कानि च तानि?
उत्तरम्— त्रिविधम्, 1. पूर्ववत्, 2. शेषवत्, 3. सामान्यतोदृष्टम्।

19. **प्रश्नः**— अनुमानस्य द्वौ प्रकारकौ कौ?
उत्तरम्— 1. स्वार्थानुमानम्, 2. परार्थानुमानम्।

20. **प्रश्नः**— परार्थानुमानस्य पञ्चावयवा: के सन्ति?
उत्तरम्—1. प्रतिज्ञा, 2. हेतुः, 3. उदाहरणम्, 4. उपनयः, 5. निगमनम्।

21. **प्रश्नः**— नवीननैयायिकमते लिङ्गानि त्रिप्रकारकानि कानि?
उत्तरम्— 1. केवलान्वयि, 2. केवलव्यतिरेकि, 3. अन्वयव्यतिरेकि।

22. **प्रश्नः**—अत्र अन्वयस्यार्थ: किं भवति?
उत्तरम्— साहचर्यम्।

23. **प्रश्नः**—व्यतिरेकस्य को अर्थः?
उत्तरम्— अविनाभावः।

24. **प्रश्नः**— हेतुभूमिकं किं भवति?
उत्तरम्— अनुमानम्।

25. **प्रश्नः**— व्याप्तिबलेनार्थं किं गमयति।
उत्तरम्— लिङ्गम्।

26. **प्रश्नः**— साहचर्यनियमो किं भवति?
उत्तरम्— व्याप्तिः।

27. **प्रश्नः**—पक्षता इत्यस्य का परिभाषा?
उत्तरम्— सिषाधयिषा-विरह-विशिष्ट-सिद्ध्यभावः।

28. **प्रश्नः**— हेत्वाभासस्य किं लक्षणम्?
उत्तरम्— हेतुवदाभासन्ते।

29. **प्रश्नः**—हेत्वाभासा: कतिविधा:?
उत्तरम्— 5 पञ्चविधाः।

30. **प्रश्नः**— 'धूमवान् वह्नेः' अत्र हेत्वाभास: कः?
उत्तरम्— साधारणानैकान्तिकः।

31. **प्रश्नः**—'शब्दो नित्यः शब्दत्वात्' अत्र कः हेत्वाभासः?
उत्तरम्— असाधारणानैकान्तिकः।

32. **प्रश्नः**— 'सर्वमनित्यं प्रमेयत्वात्' अत्र कः हेत्वाभासः?
उत्तरम्— अनुपसंहार्यनैकान्तिकः।

33. **प्रश्नः**—'शब्दो नित्यः कृतकत्वात्' अत्र कः हेत्वाभासः?
उत्तरम्— विरुद्धः।

34. **प्रश्नः**—आश्रयासिद्धहेत्वाभासस्य किमुदाहरणम्?
उत्तरम्— कांचनमयो पर्वतो वह्निमान् धूमात्।

35. **प्रश्नः**— स्वरूपासिद्धहेत्वाभासस्य किमुदाहरणम्?
उत्तरम्— ह्रदो द्रव्यं धूमात्।

36. **प्रश्नः**— व्याप्यत्वासिद्धहेत्वाभासस्य किमुदाहरणम्?
उत्तरम्— पर्वतो वह्निमान् नीलधूमात्।

37. **प्रश्नः**— सत्प्रतिपक्षहेत्वाभासस्य किमुदाहरणम्?
उत्तरम्— शब्दोऽनित्यः जन्यत्वात् घटवत्।

38. **प्रश्नः**— वह्निरनुष्णः द्रव्यत्वात् अत्र कः हेत्वाभासः?
उत्तरम्— बाधितः।

39. **प्रश्नः**— न्यायदर्शनं कतिविधम्?
उत्तरम्— द्विविधम्।

40. **प्रश्नः**— परार्थानुमाने अवयवा: कति?
उत्तरम्— पञ्च।

41. **प्रश्नः**— न्यायशास्त्रे साहचर्यनियम-शब्देन किमुच्यते?
उत्तरम्— व्याप्तिः।

42. **प्रश्नः**— कारणं कतिविधम्?
उत्तरम्— त्रिविधम्।

43. **प्रश्नः**— कारणं तदुच्यते यत् कार्यात्?
उत्तरम्— नियतपूर्ववर्ति।

(ठठ) सर्वदर्शनसंग्रहः (जैनमतम् बौद्धमतम् च) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

सर्वदर्शनसंग्रहे जैनदर्शनस्य विवेचनम्– सर्वदर्शनसंग्रहस्य निर्माता माधवाचार्यः वर्तते। जैनदर्शनस्य उदयः बौद्धधर्मात् पूर्वं मन्यते। जैनदर्शनस्य आदिप्रवर्तकः ऋषभदेवो वर्तते। ऋषभदेवस्य पितुः नाम नाभिरायः आसीत्। जैनधर्मस्य अन्तिमतीर्थङ्करः वर्धमानमहावीरः आसीत्। जैनदर्शनं प्राधान्येन आचार-विचाराणां प्रतिपादकं परिपोषकञ्च दर्शनम् अस्ति। इदं दर्शनमपि नेश्वरापेक्षि। अस्य दर्शनस्य गणना नास्तिकदर्शनेषु क्रियते। प्रत्यक्षीकरणमिदमपि स्वकीयं प्रमुखमुद्देश्यं मन्यते। जैनाः स्वकीयान् चतुर्विंशतिमहापुरुषान् 'तीर्थङ्कर' इत्येतेन सम्मानेन सम्मानयन्ति। जैनसाधूनां समुदायो भागद्वये विभक्तोऽभवत्। ये भावनानां त्यागमुचितं मन्यन्ते ते 'दिगम्बराः' किञ्च ये न ते 'श्वेताम्बराः' इति संज्ञया प्रथिता जाताः। जैनसम्मत-सिद्धान्तः अनेकान्तवादः अस्ति। जैनमतेन जीवश्चैतन्यमयः। ज्ञानं तदीयं साक्षाल्लक्षणम्। प्रत्यक्ष-परोक्षभेदेन ज्ञानं द्विविधं मतम्। अस्मिन् दर्शने आत्म-सापेक्षज्ञानं प्रत्यक्षम्, एवं आत्मेतर इन्द्रिय-मन-सापेक्ष-ज्ञानं परोक्षम्।

जैनदर्शने मोक्षस्य त्रीणि साधनानि-सम्यक्-दर्शनज्ञानचारित्राणि मोक्षमार्गः (तत्त्वार्थसूत्र1/1)। अर्थात् 1. सम्यक् दर्शनम्, 2. सम्यक् ज्ञानम्, 3. सम्यक् चारित्रम्।

1. सम्यक् दर्शनम्–दर्शनमित्येतत् पदं श्रद्धावाचकम्। तीर्थङ्करप्रतिपादितेषु शास्त्रेषु अगाधानवच्छिन्ना श्रद्धापेक्ष्यते। श्रद्धा साध्यप्राप्तौ साधकं भृशमुपकरोति। रत्नत्रयपदवेदनीयतया प्रसिद्धं सम्यग्दर्शनादित्रितयम् अर्हत्प्रवचनसंग्रहपरे परमागमसारे प्ररूपितम्। कथितं च योगदेवेन–"येन रूपेण जीवाद्यर्थो व्यवस्थितस्तेन रूपेणार्हता प्रातिपादिते तत्त्वार्थे विपरीताभि-निवेशरहितत्वाद्यपरपर्यायं श्रद्धानं सम्यग्दर्शनम्।" तथा च "तत्त्वार्थसूत्रं श्रद्धानं सम्यग्दर्शनम्" (तत्त्वार्थसूत्र-1/2)। अत्र परोपदेशनिरपेक्षमात्मस्वरूपं निसर्गः। सम्यक् दर्शनस्य अष्टाङ्गानि सन्ति।

2. सम्यक् ज्ञानम्–येन स्वभावेन जीवादयः पदार्थाः व्यवस्थिताः, तेन स्वभावेन मोह-संशयरहितत्वेनावगमः सम्यग्ज्ञानम्। व्याख्यानादिरूपपरोपदेशजनितं ज्ञानमधिगमः। सम्यग्ज्ञानं पञ्चविधं भवति। मतिश्रुतावधिमनःपर्यायकेवलानि ज्ञानमिति। यथा–1. मतिः, 2. श्रुतम्, 3. अवधिः, 4. मनःपर्यायः, 5. केवलम् इति।

1. **मतिः**–ज्ञानावरणक्षयोपशमे सति इन्द्रियमनसी पुरस्कृत्य व्यापृतः सन् यथार्थं मनुते सा मतिः।
2. **श्रुतम्**– ज्ञानावरणक्षयोपशमे सति मतिजनितं स्पष्टं ज्ञानं श्रुतम्।
3. **अवधिः**–सम्यग्दर्शनादिगुणजनितक्षयोपशमनिमित्त-मवच्छिन्नविषयं ज्ञानम् अवधिः।
4. **मनःपर्यायः**–ईर्ष्यान्तरायज्ञानावरणक्षमोपशमे सति परमनोगतस्यार्थस्य स्फुटं परिवेदकं ज्ञानं मनःपर्यायः।
5. **केवलम्**–तपःक्रियाविशेषान्यदर्थं सेवन्ते तपस्विनः तज्ज्ञानमन्यज्ञानासंसृष्टं केवलम्।

यथोक्तम्–

यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा।
योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीषिणः॥

3. सम्यक् चारित्रम्–सम्यक्चारित्र्य-सेवनेन सः शुद्धरूपं पुनः प्राप्तुं शक्नोति कैवल्येन सर्वज्ञत्वेन च मण्डितो भवितुमर्हति। सम्यग्दर्शनस्य सम्यग्ज्ञानस्य च चरितार्थता सम्यक् चारित्रेणैव सम्पन्ना भवति, तस्मात् तदपि ग्राह्यम्। संसरणकर्मेच्छुरुद्यतस्य श्रद्धानस्य ज्ञानवतः पापगमनकारण-क्रियानिवृत्तिः सम्यक्चारित्रम्। तदेतत् सप्रपञ्चमुक्तम्–

सर्वथावद्ययोगानां त्यागश्चारित्रमुच्यते।
कीर्तितं तदहिंसादिव्रतभेदेन पञ्चधा॥

सम्यक्चारित्र्य-साधनायै जैनदर्शनं पञ्च महा-व्रतान्युपदिशति–अहिंसासत्यास्तयेब्रह्मचर्यापरिग्रहा इति। एतानि त्रीणि साधनानि जैनदर्शने 'रत्नत्रय'मित्येतेन नाम्ना प्रथितानि सन्ति।

जैनमते जीवस्य स्वरूपम्–जीवश्चैतन्यमयः। ज्ञानं तदीयं साक्षाल्लक्षणम्। चैतन्यलक्षणो जीवः (षड्दर्शन-समुच्चय, कारिका-49)। अत्र जीवाख्ये द्वे तत्त्वे स्तः। तत्र 1. बोधात्मको जीवः। 2. अबोधात्मकस्त्वजीवः। यथोच्यते पद्मनन्दिना ग्रन्थे–

चिदचिद् द्वे तत्त्वे विवेकस्तद्विवेचनम्।
उपादेयमुपादेयं हेयं हेयं च कुर्वतः॥
हेयं हि कर्तृरागादि तत्कायमविवेकिता।
उपादेयं परं ज्योतिरुपयोगैकलक्षणम्॥

जीवः आत्मवाचकोऽस्ति। अजीवा अपि पुद्गलाकाशधर्माधर्मभेदेन चतुर्विधाः कथिताः। सकलबोज-साधारणं चैतन्यम्। उपशमक्षय-क्षयोपशमवशात् औपशमिक-क्षयात्मकक्षायौपशमिकभावेन कर्मोदयवशात् कलुषान्याकारेण च परिणतजीवपर्यायविवक्षायां जीवस्वरूपं भवति। कथितं यथा वाचकाचार्यः–"औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमोदयिकपारिणामिकौ च" (त.सू.221)। अनुदयप्राप्तिरूपे कर्मण उपशमे सति जीवस्य उत्पद्यमानो भावो औपशमिकः। कर्मणः क्षये सति जायमानो भावः क्षायिकः। उभयात्मा भावो मिश्रः। कर्मोदये सति भवन्भावः औदयिकः। कर्मोपशमाद्यनपेक्षः सहजो भावश्चेतनत्वादिपारिणामिकः।

पञ्चास्तिकायानां अवबोधनम्–जैनदर्शने द्रव्यं द्विविधं भवति एकदेशव्यापि बहुदेशव्यापि च। कालाख्यं द्रव्यमस्त्येकदेशव्यापि, अन्ये च सर्वे पदार्थाः बहुदेशव्यापिनः सन्ति। बहुदेशव्यापिनः पदार्था 'आस्तिकाय' इत्येतेन नाम्ना कीर्त्यन्ते। जीवाकाशधर्माधर्मपुद्गलास्तिकायाः, अर्थात् अस्तिकायाख्याः पदार्थाः पञ्च मताः–1. जीवास्तिकायः, 2. पुद्गलास्तिकायः, 3. आकाशास्तिकायः, 4. धर्मास्तिकायः, 5. अधर्मास्तिकायः। एतेषु पञ्चसु तत्त्वेषु कालत्रयसम्बन्धितया अस्तीति स्थितिव्यपदेशः। अनेकप्रदेशत्वेन शरीर-वत्कायव्यपदेशः। सः सामान्यतो द्विविधो बद्धो (संसारिणो) मुक्तश्च। भवाद् भवान्तरप्राप्तिमन्तः संसारिणः। ते च द्विविधाः समनस्काः, अमनस्काश्च। तत्र संज्ञिनः समनस्काः, तद्विधुराः तु अमनस्काः। ते च अमनस्काः द्विविधाः, त्रस-स्थावरभेदात्। जीवाश्च बद्धा भवन्ति बहुविधाः। जंगमास्तत्र त्रसा, अजंगमाः स्थावरा इति कथ्यन्ते। नारक-मनुष्य-तिर्यञ्चदकवभेदेन पुनश्च ते जीवाश्चतुर्विधाः प्रोक्ताः। धर्माधर्माकाशास्तिकायाः ते एकत्वशालिनो निष्क्रियाश्च द्रव्यस्य देशान्तरप्राप्तिहेतवः। धर्मास्तिकायः प्रवृत्त्यनुमेयः। अधर्मास्तिकायः स्थित्यनुमेयः। अन्यवस्तुप्रदेशमध्येऽन्यस्य वस्तुनः प्रवेशोऽपगाहः। तदाकाशकृत्यम्। पूरयन्ति गलन्तीति पुद्गलाः। स्पर्श-रस-गन्ध-वर्णवन्तः पुद्गलाः।

जैनदर्शनस्य सप्ततत्त्वानि (पदार्थानि) –जीवने कर्मणां संयोगो वियोगश्च भवितुमर्हतीत्येतद्दर्शनाय जैनदर्शनं सप्तपदार्थान् वर्णयति। ते इमे सन्ति–1. आस्रवः, 2. बन्धः, 3. संवरः, 4. निर्जरा, 5. मोक्षः, 6. जीवः 7. अजीवाः। कथितं च "जीवाजीवास्रवबन्धसंवरनिर्जरमोक्षास्तत्त्वानि" इति।

1. **आस्रवः**– तत्त्वार्थसूत्रे शरीर-वचन-मनसां क्रियायोग इत्युक्ताः। अयं योग एव आस्रव इत्युक्तः। भावास्रव-द्रव्यास्रवभेदेन सोऽपि द्विविधः। 2. **बन्धः**–जीवो येन व्याप्यते तत् बन्धकर्मेत्युक्तम्। मिथ्यात्व-अविरति-प्रमदकषाय-योगवशाज्जीवो बद्धो भवति। यथोक्तम्– **सकषायत्वाज्जीवः कर्मभावयोग्यान् पुद्गलानादत्ते स बन्धः**। 3. **संवरः**–संवरं कर्म जीवं मोक्षोन्मुखं करोति। तत् कर्माणि निरुणद्धि। यथोक्तम्–**आस्रवो भवहेतुः स्यात्संवरो मोक्षकारकम्।** संवरकर्माऽपि द्विविधम्–भावसंवरं द्रव्यसंवरञ्च। येन कर्ममार्गो विरुध्यते तदस्ति भावसंवरकर्म। नवीनपुद्गल-कर्मसम्बन्धोच्छेदि च द्रव्यसंवरकर्मेति कथ्यते। 4. **निर्जरा**–निर्वीर्याणि क्रियन्ते तन्निर्जराख्यं कर्म भवति। 5. **मोक्षः**–कर्मणां क्षयो हि मोक्ष इति निगद्यते। मोक्षेण जीवो नैसर्गिकं शुद्धं स्वकीयं रूपमवाप्नोति। यथोक्तम्–**बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षणं मोक्षः**।6, 7. **जीवाजीवाः**– जीवाजीवपदार्थौ तु वर्णितावेव।

जैनदर्शनस्य सप्तभंगिनयं स्याद्वादं वा अनेकान्तवादं वा अवबोधनम्–जैनदर्शने नयसिद्धान्तः स्वीयप्रमुखतां निदधाति। नीयते परिच्छिद्यते एकदेशविशिष्टोऽर्थोऽनेनेति नय इत्येषास्य पदस्य व्युत्पत्तिः स्याद्वादमञ्जर्यां कृता। न्यायावतारे प्रोक्तम्–'एकदेशविशिष्टोऽर्थो नयस्य विषयो मतः' इति। नयः सामान्यतो द्विविधो दर्शितः–द्रव्यार्थको नयः, पर्यायार्थको नयः। सङ्कलनेन ते सन्ति सप्त–1. नैगमनयः, 2. संग्रहनयः, 3. व्यवहारनयः, 4. ऋजुनयः, 5. शब्दनयः, 6. समभिरूढनयः, 7. एवम्भूतनयः। स्याद्वादस्य नामान्तरम् **अनेकान्तवाद** इत्येतदपि वर्तते। घटादिकस्य कस्यचनापि पदार्थस्य सत्तामधिकृत्य– 1. स्यादस्ति, 2. स्यान्नास्ति, 3. स्यादस्ति नास्ति च, 4. स्याद् अवक्तव्यम्, 5. स्यादस्ति च अवक्तव्यञ्च, 6. स्यान्नास्ति च अवक्तव्यञ्च, 7. स्यादस्ति च नास्ति च अवक्तव्यञ्च इत्येते सप्त विकल्पा एव भवितुमर्हन्ति जैनदर्शनमतेन। सप्तप्रकारकं ज्ञानमिदं तत्र 'सप्तभङ्गी नय' इत्येतया संज्ञया प्रथितम्। यथोक्तम्–

स्याद्वादः सर्वदैकान्तत्यागात्किंवृत्तचिद्विधेः।
सप्तभंगिनयापेक्षि हेयादेयविशेषकृत्॥

सर्वदर्शनस्य चतुर्विधबौद्धसम्प्रदायानां अवबोधनम्–बौद्ध-धर्मस्य प्रवर्तकः आसीद् गौतमबुद्धः। बाल्येऽयं 'सिद्धार्थ' इत्येतेन नामधेयेन प्रथितो बभूव। बौद्धधर्मो

बहुलशाखाशाली सञ्जातः कालान्तरेण। तत्र प्रमुखाः सन्ति मताश्चतस्रः शाखाः। ता इमाः–1. माध्यमिकः (शून्यवादिनः), 2. योगाचारः (विज्ञानवादिनः), 3. वैभाषिकः (बाह्यप्रत्यक्षवादिनः), 4. सौत्रान्तिकः (बाह्यानुमेयवादिनः)। एतेषां मतानां सिद्धान्तानां विवेचनम् इत्थं श्लोके कृतं वर्तते–

मुख्यो माध्यमिको विवर्तमखिलं
शून्यस्य मेने जगद्
योगाचारमते तु सन्ति मतय-
स्तासां विवर्तोऽखिलः।
अर्थोऽस्ति क्षणिकस्त्वसावनुमितो
बुद्ध्येति सौत्रान्तिकः
प्रत्यक्षं क्षणभंगुरं च सकलं
वैभाषिको भाषते।।

1. माध्यमिकः (शून्यवादिनः) –"संसार-असत्यः, निर्माण-असत्यः" अस्य मतस्य प्रवर्तकः नागार्जुनः आसीत्। नागार्जुनः माध्यमिककारिकाभिधे स्वकीये ग्रन्थे प्रसिद्धे शून्यवादं विततान। विज्ञानवादयोरन्तर्भावो महायानसम्प्रदाये किञ्च बाह्यप्रत्यक्षवाद–बाह्यानुमेयवादयोः समावेशो हीनयान–सम्प्रदाये वर्तते। 'सर्वमपि शून्यम्'। इदं शून्यमनिर्वचनीयम्। महायानसूत्रेषु यद्यपि शून्यवादस्य प्रतिष्ठा अस्त्येव तथापि व्यवस्थितरूपेणास्य सिद्धान्तस्य संस्थापकः महाकविः अश्वघोषः अस्ति। बौद्धदर्शनं वस्तुतो निःस्वभावम-निर्वचनीयमलक्षणमिदं शून्यमेवं परमतत्त्वं मन्यते। इदमेव महानिर्वाणपदमस्ति। बौद्धदर्शने निःस्वभावः, अनिर्वचनीयः, अलक्षणः, इत्यादि शब्दानां द्वारा निरूपितशून्यमेव परमतत्त्वमस्ति।

2. योगाचारः (विज्ञानवादिनः) –"संसार-असत्यः, निर्माण-सत्यः" अस्य वादस्य प्रवर्तकाः आसन् असंग-वसुबन्धुदिङ्नागाः। लङ्कावतारसूत्रमस्य वादस्य प्रमुखो ग्रन्थः। शान्तरक्षितस्य 'तत्त्वसंग्रहः' पाण्डित्यपूर्णोऽस्ति ग्रन्थराजः। विज्ञानवादिनः एव 'योगाचाराः' इत्युच्यन्ते। विज्ञानवादिनां मतमिदं यन्मानसिकं वस्तु वा विज्ञानमेव सत्यम्। न बाह्यपदार्थः सत्तावान्। चित्तमेव परमतत्त्वमस्ति। चित्तस्यैव प्रवृत्तिर्मुक्तिश्च भवति। चित्तमेव ज्ञातृ-ज्ञान-ज्ञेयरूपेणोपतिष्ठति। अविद्यया भिन्नमिव तदाभासते। अत्र विज्ञानस्य भेदद्वयं वर्तते–1. आलयविज्ञानं, 2. प्रवृत्तिविज्ञानञ्च। वस्तुतः चित्तमेव आलयविज्ञानमिति नाम्ना व्यपदिश्यते।

3. वैभाषिकः (बाह्यप्रत्यक्षवादि) –"संसार-सत्यः, निर्माण-सत्यः" वैभाषिकमतस्य निरूपणे यो ह्युत्तमो ग्रन्थोऽस्ति सोऽस्ति वसुबन्धुप्रणीतः 'अभिधर्मकोशः'। वैभाषिका बाह्यप्रत्यक्षवादे रज्यन्ति। इमे चित्तस्य बाह्यवस्तुनश्च सद्भावमुररीकुर्वन्ति। अस्मिन्मते बाह्यं जगदाभ्यन्तरञ्च जगदुभयमपि स्वकीयमस्तित्वं निदधाति। उभेऽपि सत्ते परस्परं निरपेक्षे। अतः वैभाषिकाः 'सर्वास्तित्ववादी' इति कथ्यते। अन्ततो गत्वा च स शून्यतत्त्वमासादयति।

4. सौत्रान्तिकः (बाह्यानुमेयवादिनः)–"संसार-सत्यः, निर्माण-असत्यः"। अस्य वादस्य आदिप्रवर्तकः कुमारलात आचार्यः आसीत्। सर्वसिद्धान्तसंग्रहादिग्रन्थेषु वादस्यास्योल्लेखः प्राप्यते। सौत्रान्तिका अपि वैभाषिका इव चित्तं बाह्यमपि जगत् मन्यन्ते। ते वस्तु किञ्च तद् वस्तुविषयकं ज्ञानं पृथक्-पृथक् इति कथयन्ति। भगवता बुद्धेन कथितम्–"भवन्तश्च सूत्रस्यान्तं पृच्छावन्तः, सौत्रान्तिकाः भवन्तु" बाह्यवस्तूनामनेकाकारवत्वात् ज्ञानस्य भिन्न-भिन्नाकारत्वं सिद्ध्यति। विभिन्नाकारज्ञानैः तत्कारण-रूपविभिन्नबाह्यानि वस्तूनि चानुमातुं शक्यन्ते। सौत्रान्तिक-सिद्धान्तं '**बाह्यानुमेयवाद**' इति कथ्यते। सौत्रान्तिका ज्ञानं चतुर्विधप्रत्ययमिति शंसन्ति। आलम्बनम्, समनन्तरम्, अधिपतिः, सहकारि इत्येतानि सन्ति ज्ञानस्य चत्वारि कारणानि (प्रत्ययाः)।

बौद्धदर्शनानुसारं भावनाचतुष्टयविवेचनम्–बौद्धाः चतुर्विधया भावनया परमपुरुषार्थं कथयन्ति। बौद्धदर्शने भावनाचतुष्टयम् इत्थं उपदिष्टम्–1. सर्वं क्षणिकं क्षणिकम्–तत्र क्षणिकत्वं नीलादिक्षणानां सत्तेन अनुमातव्यम्, यत्सत् तत्क्षणिकं, यथा-जलघटपटलम्। 2. सर्वं दुःखं दुःखम्-संसारस्य दुःखात्मकत्वं सर्वतीर्थङ्कराः सम्मताः। 3. सर्वं स्वलक्षणं स्वलक्षणम्–स्वलक्षणं स्वलक्षणम् इति भावनीयम्। 4. सर्वं शून्यं शून्यम्–तत्त्वं सदसदुभयानुभयात्मक-चतुष्कोटिविनिर्मुक्तं शून्यमेव।

बौद्धदर्शनानुसारं पञ्चविधस्कन्धमवबोधनम्–मनोविज्ञानदृष्ट्या मनुष्यः चित्तचेतात्मकः पञ्चस्कन्धानां संयोगोऽस्ति। पञ्चविधपरिवर्तनशीलतत्वसंघात एव पञ्चस्कन्धनाम्ना प्रथते। यथा–

1. रूपस्कन्धः–"मानवीयशरीरस्याकारवर्णादीना-मन्तर्भावो रूपे भवति"। 2. वेदनास्कन्धः–"सुख-दुःख-

विषादबोधो यतो जायते सास्ति वेदना"। 3. संज्ञास्कन्धः–"संज्ञया वस्तु प्रत्यक्षं भवति।" 4. संस्कारस्कन्धः–गतकर्मवशात् सम्भूता प्रवृत्तयः संस्कारः इति कथ्यते। 5. विज्ञानस्कन्धः–विज्ञानाख्यः स्कन्धश्चेतनतास्ति, इत्येतानि पञ्चस्कन्धाः इत्युच्यन्ते।

प्रतीत्यसमुत्पाद-हेतुप्रत्ययतावाद-सापेक्षतावादस्य वा विवेचनम्–दुःखस्य मूलकारणम् अविद्यास्ति। तदीयाया विचित्रशक्तेः कारणानां परम्परा समुत्पद्यते। इमामेव कारणपरम्परां प्रतीत्यसमुत्पाद इति कथ्यते। प्रतीत्यसमुत्पादस्य हेतुपनिबन्धनो यथा-बीजाद् अंकुरः, अंकुरात्काण्डम्, काण्डान्नालः, नालाद् गर्भः, ततः शूकं, ततः पुष्पं, ततः फलम्। प्रतीत्यसमुत्पादं बुद्धो 'धर्मं' इत्येतेन सम्मानास्पदपदेन आजुहाव। एवमेवोत्तरोत्तरमेकैकं कार्यं कार्यान्तरम्प्रति कारणत्वं गच्छति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—सर्वदर्शनसंग्रहस्य निर्माता कः?
   उत्तरम्— माधवाचार्यः।
2. **प्रश्नः**—जैनदर्शनस्य आदिप्रवर्तकः को वर्तते?
   उत्तरम्— ऋषभदेवः।
3. **प्रश्नः**—ऋषभदेवस्य पितुः नाम किमासीत्?
   उत्तरम्— नाभिरायः।
4. **प्रश्नः**—जैनधर्मस्य अन्तिमतीर्थङ्करः कः आसीत्?
   उत्तरम्— वर्धमानमहावीरः।
5. **प्रश्नः**—जैनदर्शनम् ईश्वरवादी अनीश्वरवादी वा?
   उत्तरम्— अनीश्वरवादी।
6. **प्रश्नः**—जैनदर्शनस्य प्रमुखमुद्देश्यं किम्?
   उत्तरम्— प्रत्यक्षीकरणम्।
7. **प्रश्नः**—जैनैः कति तीर्थंकराः स्वीक्रियन्ते?
   उत्तरम्— 24 चतुर्विंशति।
8. **प्रश्नः**—जैनदर्शने कति सम्प्रदायाः के च ते?
   उत्तरम्— 2 द्वौ, 1. दिगम्बराः, 2. श्वेताम्बराः।
9. **प्रश्नः**—जैनदर्शनः प्रतिपदार्थं उत्पादादि कति लक्षणं स्वकरोति?
   उत्तरम्— 03 लक्षणम्।
10. **प्रश्नः**— जैनसम्मत-सिद्धान्तः किमस्ति?
    उत्तरम्— अनेकान्तवादः।
11. **प्रश्नः**—'जीवश्चैतन्यमयः' इति केन मतेन?
    उत्तरम्— जैनमतेन।
12. **प्रश्नः**—'ज्ञानं साक्षाल्लक्षणम्' इति कस्य विचारः?
    उत्तरम्— जैनदर्शनस्य।
13. **प्रश्नः**—जैनदर्शने जीवाजीवादिभेदात् कति पदार्थाः?
    उत्तरम्— 07 सप्तपदार्थाः।
14. **प्रश्नः**—जैनदर्शने मोक्षस्य त्रीणि साधनानि कानि?
    उत्तरम्—1. सम्यक् दर्शनम्, 2. सम्यक् ज्ञानम्, 3. सम्यक् चारित्रम्।
15. **प्रश्नः**—सम्यग्ज्ञानं कतिविधं के च ते?
    उत्तरम्—1. मतिः, 2. श्रुतम्, 3. अवधिः, 4. मनःपर्यायः, 5. केवलम्।
16. **प्रश्नः**—जैनदर्शने मोक्षस्य साधनं किमस्ति?
    उत्तरम्— रत्नत्रयम्।
17. **प्रश्नः**—जैनमते जीवस्य स्वरूपं किम्?
    उत्तरम्— जीवश्चैतन्यमयः।
18. **प्रश्नः**—जैनदर्शने साक्षाल्लक्षणं किम्?
    उत्तरम्— ज्ञानम्।
19. **प्रश्नः**—जीवाख्ये द्वे तत्त्वे के स्तः?
    उत्तरम्—1. बोधात्मको जीवः। 2. अबोधात्मक-स्त्वजीवः।
20. **प्रश्नः**—सम्यक् दर्शनस्य कति अङ्गानि सन्ति?
    उत्तरम्— 08 अष्टाङ्गानि।
21. **प्रश्नः**—कानि सन्ति नास्तिकदर्शनानि?
    उत्तरम्— चार्वाक-जैन-बौद्धदर्शनानि।
22. **प्रश्नः**—जैनदर्शने द्रव्यं द्विविधं के स्तः?
    उत्तरम्— एकदेशव्यापि बहुदेशव्यापि च।
23. **प्रश्नः**—अस्तिकायाख्याः पदार्थाः पञ्च मताः के सन्ति?
    उत्तरम्— 1. जीवास्तिकायः, 2. पुद्गलास्तिकायः, 3. आकाशास्तिकायः, 4. धर्मास्तिकायः, 5. अधर्मास्तिकायः।

24. **प्रश्नः**—जैनदर्शने सप्त पदार्थाः के सन्ति?
उत्तरम्—1. आस्रवः, 2. बन्धः, 3. संवरः, 4. निर्जरा, 5. मोक्षः, 6. जीवः 7. अजीवः।

25. **प्रश्नः**—जैनदर्शने मोक्षस्य का परिभाषा?
उत्तरम्—बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्म-विप्रमोक्षणम्।

26. **प्रश्नः**—जैनदर्शनस्य सप्तभंगिनयं कानि सन्ति?
उत्तरम्—1. नैगमनयः, 2. संग्रहनयः, 3. व्यवहारनयः, 4. ऋजुनयः, 5. शब्दनयः, 6. समधिरूढनयः, 7. एवम्भूतनयः।

27. **प्रश्नः**—स्याद्वादस्य नामान्तरं किम्?
उत्तरम्— अनेकान्तवादम्।

28. **प्रश्नः**— जैनदर्शने सप्तप्रकारकं ज्ञानं किम्?
उत्तरम्— सप्तभङ्गी नय।

29. **प्रश्नः**—जैनदर्शने पुद्गलानां संख्या का?
उत्तरम्— 06 षट्संख्या।

30. **प्रश्नः**—शरीरपरिमाण-आत्मा चेतनः वा कस्मिन् दर्शने स्वीकृतः?
उत्तरम्— जैनदर्शने।

31. **प्रश्नः**—बौद्ध-धर्मस्य आदिप्रवर्त्तकः कः?
उत्तरम्— गौतमबुद्धः, बाल्येऽयं 'सिद्धार्थ'।

32. **प्रश्नः**—बौद्धदर्शने कति सम्प्रदायाः सन्ति?
उत्तरम्— 04 चतुः सम्प्रदायाः।

33. **प्रश्नः**—बौद्धदर्शने चतुः-सम्प्रदायाः के सन्ति?
उत्तरम्—1. माध्यमिकः (शून्यवादिनः), 2. योगाचारः (विज्ञानवादिनः), 3. वैभाषिकः (बाह्यप्रत्यक्षवादिनः), 4. सौत्रान्तिकः (बाह्यानुमेयवादिनः)।

34. **प्रश्नः**—बौद्धसम्प्रदाय-विशेषः कः?
उत्तरम्—1. माध्यमिकः (शून्यवादिनः)।

35. **प्रश्नः**—बौद्धसम्मतः पदार्थः किमस्ति?
उत्तरम्—विज्ञानम्।

36. **प्रश्नः**—बौद्धसम्मतः विज्ञानपदार्थस्य कति भेदाः?
उत्तरम्— 02 द्वौ।

37. **प्रश्नः**—विज्ञानपदार्थस्य द्वौ भेदौ कौ?
उत्तरम्—1. आलयविज्ञानं, 2. प्रवृत्तिविज्ञानञ्च।

38. **प्रश्नः**—'संसार-असत्यः, निर्माण-असत्यः' इति कस्य विचारः?
उत्तरम्— माध्यमिकस्य (शून्यवादिनः)।

39. **प्रश्नः**—शून्यवादिमतस्य प्रवर्त्तकः कः?
उत्तरम्— नागार्जुनः।

40. **प्रश्नः**—'संसार-असत्यः, निर्माण-सत्यः' इति कस्य विचारः?
उत्तरम्— योगाचारस्य (विज्ञानवादिनः)।

41. **प्रश्नः**—योगाचारवादस्य प्रवर्तकाः के आसन्?
उत्तरम्— असंग-वसुबन्धुदिङ्नागाः।

42. **प्रश्नः**—"संसार-सत्यः, निर्माण-सत्यः" इति कस्य विचारः?
उत्तरम्— वैभाषिकस्य (बाह्यप्रत्यक्षवादिनः)।

43. **प्रश्नः**—"संसार-सत्यः, निर्माण-असत्यः" इति कस्य विचारः?
उत्तरम्— सौत्रान्तिकस्य (बाह्यानुमेयवादिनः)।

44. **प्रश्नः**—सौत्रान्तिकवादस्य आदिप्रवर्तकः कः आसीत्?
उत्तरम्— कुमारलातं आचार्यः।

45. **प्रश्नः**—बौद्धदर्शनानुसारेन परमपुरुषार्थं किम्?
उत्तरम्— भावनाचतुष्टयम्।

46. **प्रश्नः**—के सन्ति भावनाचतुष्टयम्?
उत्तरम्—1. सर्वं क्षणिकं क्षणिकम्, 2. सर्वं दुःखं दुःखम्, 3. सर्वं स्वलक्षणं स्वलक्षणम्, 4. सर्वं शून्यं शून्यम्।

47. **प्रश्नः**—बौद्धदर्शनानुसारेण पञ्चविधस्कन्धाः के सन्ति?
उत्तरम्—1. रूपस्कन्धः, 2. वेदनास्कन्धः, 3. संज्ञास्कन्धः, 4. संस्कारस्कन्धः, 5. विज्ञानस्कन्धः।

48. **प्रश्नः**—दुःखस्य मूलकारणं किमस्ति?
उत्तरम्—अविद्यास्ति।

49. **प्रश्नः**—बौद्धदर्शने कतिविधं प्रमाणम्?
उत्तरम्— 02 द्विविधम्।

50. **प्रश्नः**—'विज्ञानमेवात्मा' इति कस्य सिद्धान्तः?
उत्तरम्— बौद्धस्य।

51. **प्रश्नः**—बौद्धाः ईश्वरस्य सत्तां स्वीकुर्वन्ति न वा?
उत्तरम्— न स्वीकुर्वन्ति।

52. **प्रश्नः**—'असत्कार्यवादः' कस्य दर्शनस्य सिद्धान्तविशेषः?
उत्तरम्— बौद्धस्य।

53. **प्रश्नः**—बुद्धोपदिष्टार्यसत्याणां का संख्या?
उत्तरम्—04 चत्वारः।

54. **प्रश्नः**—बौद्धसम्मत-आर्यसत्यं किम्?
उत्तरम्—दुःखनिरोधमार्गः।

55. **प्रश्नः**—बौद्धदर्शने परमाणवः कति सन्ति?
उत्तरम्—04चत्वारः।

56. **प्रश्नः**—बौद्धसम्मत-परमाणु-विशेषः 'आकाशः' अस्ति न वा?
उत्तरम्— नास्ति।

57. **प्रश्नः**—नास्तिकदर्शनेषु बौद्धदर्शनं परिगणितमस्ति न वा?
उत्तरम्—परिगणितमस्ति।

58. **प्रश्नः**—कियन्ति नास्तिकदर्शनानि कानि च तानि?
उत्तरम्—03 त्रीणि, चार्वाक-जैन-बौद्धदर्शनानि।

59. **प्रश्नः**—कियन्ति आस्तिकदर्शनानि कानि च तानि?
उत्तरम्—06 षड्- न्याय, वैशेषिक, सांख्य, योग, मीमांसा, वेदान्त।

60. **प्रश्नः**—आस्तिक-नास्तिकयोः मध्ये को भेदः?
उत्तरम्—वेदसत्ता।

61. **प्रश्नः**—श्रुतिप्रामाण्यं कः स्वीकरोति?
उत्तरम्— आस्तिकः।

(Y-Code-25) वेदान्तसार (डड) वेदान्ताधिकारिविचारः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

वेदान्तदर्शनं सर्वदर्शनमूर्धन्यम्। वेदस्यान्तिमसिद्धान्तस्य निरूपकत्वादुपनिषदामिव अस्यापि 'वेदान्त' इत्येषा संज्ञान्वर्था। वादरायणव्यासप्रणीतत्वाद् अस्य दर्शनस्य रचना महाभारतात् प्रागेव बभूवेति निश्चीयते। वेदान्तशास्त्र-सारमनुबन्धचतुष्टयं प्रतिपादितमस्ति। अनुवन्धप्रतिपादनार्थं कारणं वाचस्पत्यमित्यस्मिन् ग्रन्थे स्पष्टीकृतं यत्-

ज्ञातार्थज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते।
ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः।।

कुमारिलभट्टेनाप्युक्तम्-

सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित्।
यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते।।

अनुबन्धचतुष्टयम्-

अनुबध्नाति अध्येतारमिति अनुबन्धानि। केन पठितव्यम्? विषयः कः? विषयग्रन्थयोस्सम्बन्धः कः? प्रयोजनञ्च किमिति? अतः अनुबन्धो नामाधिकारिविषयसम्बन्धप्रयोजनानि। वेदान्तशास्त्रस्य अनुबन्धे यथा-

(क) अधिकारी-वेदान्तशास्त्राध्ययनात् यज् ज्ञानं फलं वा लभ्यते तस्योपभोक्ता एव अधिकारी इत्युच्यते। एतादृशस्य ज्ञानस्योपलब्ध्यर्थं अधिकारिसमीपे केचिद्गुणा अपेक्षिता। अतः तस्य लक्षणं तदनुरूपमेव लक्षितम्। यथा-विधिवदधीतवेदवेदाङ्गत्वेनेत्यादिना नित्यानित्यवस्तु-विवेकादिसाधनचतुष्टयसम्पन्नः प्रमातैव अधिकारी।

(ख) विषयः-विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं, तत्रैव वेदान्तानां तात्पर्यात्। ब्रह्मज्ञानं वेदान्तस्य प्रधानः विषयः।

(ग) सम्बन्धः-वेदान्तो नामोपनिषत्प्रमाणमिति वचनात् तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावः।

(घ) प्रयोजनम्-प्रयोजनं तु तद्गताज्ञाननिवृत्ति-पूर्वकस्वरूपानन्दावाप्तिः ब्रह्मभाववान्, मोक्षप्राप्तिर्वा, यतो हि ब्रह्मविद् ब्रह्मैव भवतीति श्रुतिप्रमाणात्। एतदनुबन्धचतुष्टयम्।

नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसम्पन्नः प्रमातैव वेदान्ताधिकारीति संलक्ष्यते। अर्थात् अस्यायं तावदभिप्रायः दद् वेदान्तशास्त्रस्याधिकारी स एव भवितुमर्हति, यः खलु अस्मिन् जन्मनि जन्मान्तरे वा ऋग्यजुःसामाथर्वाख्यानां वेदानां, छन्दः-कल्प-व्याकरण-ज्योतिष-निरुक्त-शिक्षादीनां वेदाङ्गानां विधिपूर्वकमध्ययनं करोति, तेनाध्ययनेन यः कृत्याकृत्यप्रवृत्तिज्ञानं प्राप्नोति, तदाधारेण काम्यकर्मणामनुष्ठानं निषिद्धकर्मणां च वर्जनं येन क्रियते, नित्य-नैमित्तिक-प्रायश्चित्तोपासनादीनां कर्मणामनुष्ठानात् यस्य चित्तशुद्धिर्भवति, तथा च यः साधनचतुष्टयसम्पन्नोऽस्ति, पुनश्च यः

लौकिक-वैदिकव्यवहारस्य पूर्णज्ञाता (प्रमाता) इत्युच्यते। अत्र चत्वारः विन्दवः अधिकारिणः कृते भवितुमर्हन्ति-

(क) वेद-वेदाङ्गानां इह जन्मनि जन्मान्तरे वा विधिपूर्वकमध्ययनं प्रथमः। यथोक्तम्-"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।" (व्या० भाष्य०)

(ख) काम्यनिषिद्धकर्मपरित्यागपूर्वकं नित्यनैमित्तिक-प्रायश्चित्तोपासनानुष्ठानेन विधूतसकलकल्मषस्वान्तः (कर्मानुष्ठनम्) द्वितीयः। कर्म द्विविधं भवति-1. त्याज्यकर्म, 2. अनुष्ठेयकर्म चेति। तत्र त्याजकर्म द्विविधः-1. काम्यकर्म, 2. निषिद्धकर्म च। अनुष्ठेयकर्म चतुर्विधम्-1. नित्यकर्म, 2. नैमित्तिककर्म, 3. प्रायश्चित्तकर्म, 4. उपासनाकर्म च।

(ग) नित्यानित्यवस्तुविवेकः इहामुत्रफलभोगविरागः शमादिषट्कसम्पत्तिः मुमुक्षत्वञ्चैतत्साधनचतुष्टयसम्पन्नता तृतीयः।

(घ) प्रमातृत्वम्-एभिर्गुणैर्युक्त एव प्रमाता वेदान्ता-ध्ययनाधिकारीति निर्णीयते; तद्यथा संकलितमीश्वरकृष्णेन वेदान्तसारे यत्-अधिकारी तु विधिवदधीतवेद-वेदाङ्गत्वेनापाततोऽखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तो-पासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मल-स्वान्तःसाधनचतुष्टयसम्पन्नः प्रमाता।

संग्रहश्लोकः-

प्रशान्तचित्तस्य जितेन्द्रियाय
प्रहीणदोषाय यथोक्तकारिणे।
गुणान्वितायानुगताय सर्वदा
प्रदेयमेतत्सततं मुमुक्षवे।।

नित्यानित्यवस्तुविवेकः इहामुत्रफलभोगविरागः शमादिषट्कसम्पत्तिः मुमुक्षत्वञ्चेति साधनचतुष्टयसम्पन्नैव प्रमाता अधिकारी।

तत्र ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलं चराचरात्मकं जगदिदमनित्यमेवेति ज्ञानं प्रथमसाधनम्।

कर्मजन्यफलस्वरूपत्वात् जन्यं भोगमपि अनित्यमिति लोके लोकान्तरे च विषयभोगेभ्यः नितरां विरतिः द्वितीयं साधनम्।

शमादिषट्कसम्पत्तिः तृतीयं साधनम्। तत्र शमस्तु श्रवणाद्यतिरिक्तविषयेभ्यो मनसो निग्रहः। बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनं दमः। निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्यः उपरमणमुपरतिः (विहितानां कर्मणां विधिना परित्यागः)। शीतोष्णादिद्वन्द्वसहिष्णुता तितिक्षा। निगृहीतस्य मनसः ब्रह्मज्ञानसाधनभूतश्रवणमननादौ योजनं समाधानम्। गुरुवाक्येषु विश्वासः श्रद्धा। मुमुक्षुत्वं मोक्षेच्छा। एतत्साधनचतुष्टयसम्पन्नप्रमातैव वेदान्ताधिकारीति वेदान्तशास्त्राभितमम्।

वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—सर्वदर्शने मूर्धन्यं दर्शनं किम्?
   उत्तरम्— वेदान्तदर्शनम्।
2. प्रश्नः—वेदान्तदर्शनस्य रचनाकारः कः?
   उत्तरम्— वारदायणव्यासः।
3. प्रश्नः— वेदान्तशास्त्रसारमनुबन्धचतुष्टयं प्रतिपादितो ग्रन्थः कः?
   उत्तरम्— वाचस्पत्यम्।
4. प्रश्नः—कानि सन्ति अनुबन्धचतुष्टयम्?
   उत्तरम्— अधिकारि-विषय-सम्बन्ध-प्रयोजनानि।
5. प्रश्नः— वेदान्तस्य अधिकारी कः?
   उत्तरम्—साधनचतुष्टयसम्पन्नप्रमातैव वेदान्ताधिकारीति।
6. प्रश्नः—वेदान्तस्य प्रधानः विषयः कः?
   उत्तरम्—जीवब्रह्मैक्यं ज्ञानम्।
7. प्रश्नः—प्रमाता (पूर्णज्ञाता) कः भवति?
   उत्तरम्—साधनचतुष्टयसम्पन्नः लौकिक-वैदिकव्यवहारस्य ज्ञाता।
8. प्रश्नः— ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति कस्य कथनम्?
   उत्तरम्—व्याकरण-महाभाष्यकारस्य।
9. प्रश्नः— द्विविधं कर्म के स्तः?
   उत्तरम्—1. त्याज्यकर्म, 2. अनुष्ठेयकर्म चेति।
10. प्रश्नः— द्विविधं त्याजकर्म के स्तः?
    उत्तरम्—1. काम्यकर्म, 2. निषिद्धकर्म च।
11. प्रश्नः— चतुर्विधानि अनुष्ठेयकर्माणि कानि सन्ति?
    उत्तरम्— 1. नित्यकर्म, 2. नैमित्तिककर्म, 3. प्रायश्चित्तकर्म, 4. उपासनाकर्म च।

(Y-Code-25) (ढ) अविद्या एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

अविद्यावादः अद्वैतवेदान्तस्य प्रमुखः सिद्धान्तः। इयम् अविद्या माया, अज्ञानम्, अव्यक्तः, प्रकृतिः, तमस्, मिथ्याज्ञानं, मिथ्यात्वं, विपर्ययः, मोहः, अग्रहणम् इत्यादिनामभिः अपि अभिहिताऽस्ति। **'सत्त्वशुद्ध्य-विशुद्धिभ्यां माया-विद्ये च ते मते"** इति विद्यारण्यवाक्येन अविद्या नाम माया।

अज्ञानपर्यायभूतेयमविद्या प्रतीयमानत्वात् ज्ञानान्तरेण निर्वतनत्वाच्च सच्चेन बाध्येत असच्चेन प्रतीयेदिति न्यायात् सदसद्भ्यामनिर्वचनीया, सत्त्वरजस्तमोपेता त्रिगुणात्मिका, आत्मसाक्षात्कारं यावदधिष्ठानात् भावरूपा, इदमित्थं कृत्वा तत्प्रदर्शनसम्भवाभावाच्च यत्किञ्चिदिति प्रतिपाद्यते।

एवंभूताज्ञाने अहमज्ञः मामहं न जानामीति प्रत्यक्षावभास एव गमकम्। अत एव श्वेताश्वतरोपनिषदि देवात्मशक्तिं स्वगुणैर्निगूढामित्येवंरूपेण अज्ञानं प्रतिपादितम्। वेदान्तसारेऽपि-सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधिभावरूपं यत्किञ्चिदिति अविद्यास्वरूपं प्रतिपाद्यते। आवरणविक्षेपशक्तिद्वयोपेतेयमविद्या समष्टिव्यष्टि-भेदाद्द्विविधा। अविद्यया एव अध्यासः भवति।

अविद्या द्विविधा—1. समष्टिरूपमज्ञानम्, 2. व्यष्टिरूपमज्ञानम्।

1. **समष्टिरूपमज्ञानम्**—इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्व-सर्वनियन्तृत्वादिगुणकर्मव्यक्तमन्तर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते सकलज्ञानावभासकत्वात्। तस्मात् विश्वसत्वप्रधानमित्युच्यते। एतदुपाध्युपहितं चैतन्यं जगतः कारणमीश्वर इति व्यपदिश्यते। विशुद्धसत्वप्रधानाभिप्रायं यत् अज्ञाने सत्त्वगुणस्य प्राधान्यम्। उक्तञ्च विशुद्ध रजस्तमोभ्यामनभिभूतं सत्त्वं प्रधानं यस्याः सा तथाविधेयं समष्टिरित्यर्थः। अत एव समष्टिरूपमज्ञानं स्थूलसूक्ष्मप्रपञ्चयोः लयस्थानमपि भवति। यथा वृक्षाणां समष्ट्यभिप्रायेण वनं, जलानाञ्च जलाशय इति एकत्वव्यपदेशः।

2. **व्यष्टिरूपमज्ञानम्**—इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना। एतदुपहितं चैतन्यमल्पज्ञानीश्वर-त्वादिगुणकं प्राज्ञ इत्युच्यते। तत् प्राज्ञः जीव इत्युच्यते। प्राज्ञ इत्युपाधिभूता अज्ञानव्यष्टिः अहंकारादीनां कारणमस्ति, तस्मादिदं कारणशरीरमुच्यते।

समष्टिव्यष्टिरूपाज्ञानयोः भेद-अबोधनम्—

समष्टिरूपाज्ञानम्	व्यष्टिरूपाज्ञानम्	समष्टिरूपाज्ञानम्	व्यष्टिरूपाज्ञानम्
उत्कृष्टोपाधियुक्तम्	निकृष्टोपाधियुक्तम्	विशुद्धसत्वप्रधानम्	गुणहीनम् (मलिनम्)
सर्वज्ञः, सर्वनियन्ता, सर्वेश्वरः	अल्पज्ञः	जगत्कारणम् (कारणशरीरम्)	अहंकारादीनां कारणम् (कारणशरीरम्)
स्थूलसूक्ष्मप्रपञ्च-योर्लयस्थानम्	स्थूलसूक्ष्मशरीरयोर्ल-यस्थानम्	ईश्वरः	जीवः (प्राज्ञः)
आनन्दमयकोशः जलाशयमिव व्यवहारः	आनन्दमयकोशः जलमिव व्यवहारः	उपवनमिव व्यवहारः	वृक्ष इव व्यवहारः

अविद्यासम्बद्धश्लोकाः—

सन्नाप्यसन्नाप्युभयात्मिका नो,
भिन्नाप्यभिन्नाप्युभयात्मिका नो।
सङ्गाप्यनङ्गाप्युभयात्मिका नो
महाद्भुतानिर्वचनीयरूपा।
(विवेकचूडामणि)

सेयं भ्रान्तिर्निरालम्बा सर्वन्यायविरोधिनी।
सहते न विचारं सा तमो यद्वद्दिवाकरम्।।
(नैष्कर्म्यसिद्धिः-3/36)

भावत्वं चात्राभावविलक्षणमात्रविवक्षितम्।
(अद्वैतसिद्धिः)

अनादिभावरूपं यत् विज्ञानेन विलीयते।
तदज्ञानमिति प्राज्ञा लक्षणं सम्प्रचक्षते।।
(चित्सुखी)

मिथ्याज्ञानस्य वस्तुत्वं येनैव स्यात् सदात्मना।
अज्ञानस्यापि तेनैव सत्यत्वं केन वार्यते।
(बृ.आ.भा.वा)

नानारूपकभासमानमज्ञानं समष्ट्यभिप्रायेण एकमेव यथा श्वेताश्वतरोपनिषदि-

अजामेकां लोहितशुक्लकृष्णां,
बह्वीः प्रजाः सृजमानां सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः।।
(श्वेताश्वतरोपनिषदि)

नानारूपेण भासमानं
व्यष्टिरनेनं भवति।
तदुक्तं इन्द्रो मायाभिः
पुरुरूप ईयते।
अव्यक्तनाम्नी परमेशशक्ति-
रनाद्यविद्या त्रिगुणात्मिका या।
कार्यानुमेया सुधियैव माया
यया जगत्सर्वमिदं प्रसूयते।।
अज्ञानं ज्ञातुमिच्छेद्यो मानेनात्यन्तमूढधीः।
स तु नूनं तमः पश्येद्दीपेनोत्तमतेजसा।।
घनच्छन्नदृष्टिर्घनच्छन्नमर्कं
यथा मन्यते निष्प्रभं चातिमूढः।
तथा बद्धवद्भाति यो मूढदृष्टेः
स नित्योपलब्धिः स्वरूपोऽहमात्मा।
शक्तिद्वयं हि मायाया:
विक्षेपावृत्तिकारणम् ।

वेदान्तशास्त्रानुसारेण अज्ञानस्य शक्तिद्वयमङ्गीकृतम्। यथा–1. आवरणशक्तिः–"सच्चिदानन्दस्वरूपमावृणोत्यावरणशक्तिः" 2. विक्षेपशक्तिः–विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृत्तरज्ज्वां स्वशक्त्या सर्पादिकमुद्भावयत्येवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्त्याकाशादिप्रपञ्चमुद्भावयति तादृशं सामर्थ्यम्।

अविद्यायाः वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—वेदान्तदर्शनस्य वर्ण्य-विषयः किमस्ति?
उत्तरम्— उपनिषदि।

2. प्रश्नः— वेदान्त-सूत्राणां का संख्या?
उत्तरम्—555 सूत्राणाम्।

3. प्रश्नः—वेदान्तसूत्रकारः कः?
उत्तरम्— बादरायणः।

4. प्रश्नः— अविद्यावादः प्रमुखः सिद्धान्तः कस्य वर्तते?
उत्तरम्— अद्वैतवेदान्तस्य।

5. प्रश्नः—अविद्या कैः नामभिः अभिहिताऽस्ति?
उत्तरम्—माया, अज्ञानम्, अव्यक्तः, प्रकृतिः, तमस्, मिथ्याज्ञानं, मिथ्यात्वं, विपर्ययः, मोहः, अग्रहणम् इत्यादि।

6. प्रश्नः—द्विविधा अविद्या के स्तः?
उत्तरम्— 1. समष्टिरूपमज्ञानम्, 2. व्यष्टिरूपमज्ञानम्।

7. प्रश्नः—अविद्या अज्ञानं तु कस्य पारिभाषिकशब्दोस्ति?
उत्तरम्— वेदान्तस्य।

8. प्रश्नः—समष्टिरूपमज्ञानं किम्?
उत्तरम्— समष्टि-अभिप्रायेणैकम् (वन)।

9. प्रश्नः— व्यष्टिरूपमज्ञानं किम्?
उत्तरम्— व्यष्टि-अभिप्रायेण-अनेकम् (जलाशयः)।

10. प्रश्नः—वेदान्तशास्त्रानुसारेण अज्ञानस्य कतिधा शक्तिः अङ्गीकृता?
उत्तरम्—शक्तिद्वयम्।

11. प्रश्नः—के स्तः शक्तिद्वयम्?
उत्तरम्— 1. आवरणशक्तिः, 2. विक्षेपशक्तिश्च।

12. प्रश्नः—आवरणशक्तेः किं लक्षणम्?
उत्तरम्— सच्चिदानन्दस्वरूपमावृणोत्यावरणशक्तिः।

13. प्रश्नः— विक्षेपशक्तेः किं लक्षणम्?
उत्तरम्— विक्षेपशक्त्याकाशादिप्रपञ्चमुद्भावयति।

14. प्रश्नः— सदानन्दयोगेन्द्रस्य अध्यारोपः कः?
उत्तरम्—असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्य-वस्त्वारोपोऽध्यारोपः।

15. प्रश्नः— सदानन्दयोगेन्द्रस्य वस्तु-अवस्तु इत्यनयोः का परिभाषा?
उत्तरम्—वस्तु सच्चिदानन्दानन्ताद्वय ब्रह्म। अज्ञानादि-सकलजडसमूहोऽवस्तु।

16. प्रश्नः—वेदान्तदर्शने अज्ञानस्य का परिभाषा?
उत्तरम्—अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकम्।

17. प्रश्नः—वेदान्तदर्शने पञ्चज्ञानेन्द्रियाणि कानि सन्ति?
उत्तरम्— श्रोत्र, त्वक्, चक्षु, जिह्वा, घ्राण।

18. प्रश्नः— वेदान्तदर्शने कानि सन्ति पञ्चकर्मेन्द्रियाणि?
उत्तरम्— वाक्, पाणि, पाद, पायु, उपस्थ।

19. प्रश्नः—वेदान्तदर्शने कानि सन्ति पञ्चवायवः?
उत्तरम्— प्राण, अपान, व्यान, उदान, समान।

20. प्रश्नः—वेदान्तदर्शने लिंगशरीरोत्पत्तिः (सूक्ष्म-शरीरोत्पत्तिः) कथमुत्पद्यते?
उत्तरम्— सप्तदशावयवानि, ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं बुद्धिमनसो वायुपञ्चकञ्चेति।

21. प्रश्नः—विज्ञानमयकोशः को भवति?
उत्तरम्—बुद्धिज्ञनेन्द्रियैः सहितं विज्ञानमयकोशो भवति।

22. प्रश्नः—मनोमयकोशः को भवति?
उत्तरम्— मनस्तु ज्ञानेन्द्रियैः सहितं सन्मनोमयकोशो भवति।

23. प्रश्नः—प्राणमयकोशः को भवति?
उत्तरम्—पञ्चकर्मेन्द्रियाणि, पञ्चवायुः इत्यादयो योगः प्राणमयकोशः।

(Y-Code-25) (णण) अध्यासः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

अधि उपसर्गपूर्वकात् असु क्षेपणे इत्यस्माद् धातोः घञ् प्रत्यये कृते अध्यासशब्दः निष्पन्नो भवति। अतोऽस्य पर्यवसितोऽर्थः विक्षेप इति। अविद्यया एव अध्यासः भवति। विक्षिप्तज्ञानमेवाध्यस्तज्ञानमित्युच्यते। चेतनायाः ज्ञानस्य वा विक्षेपरूपाध्यासः मिथ्याप्रत्ययस्य नाम अस्ति। वस्तुन्यवस्तुनः प्रतीतिरेवाध्यासः। शारीरकभाष्ये कोऽयमध्यासो नामेत्याक्षिप्य ज्ञानस्य विषयस्य च अध्यासः प्रतिपाद्यते। श्रीशङ्कराचार्य-वचोऽपि अध्यासो नाम अतस्मिंस्तद्बुद्धिरिति। अतः मिथ्याप्रतीतिरेवाध्यासः।

अध्यासादेव ब्रह्मरूपवस्तुनि जगद्रूपावस्तुनः भ्रान्तिः उत्पद्यते, एवं ज्ञानानन्तरं सा निवर्तते। यथा शुक्तौ रजतस्य रज्जौ सर्पस्य च आरोपः अध्यारोपः। रज्जुदर्शनप्रत्यक्षात् अज्ञाननिवृत्तौ तन्निवृत्तिः, अत एव भगवत्पादवाक्येन अध्यास एव अविद्येति।

आत्मनात्मनोः तादात्म्याध्यासादेव अहं सुखी, अहं दुःखी, पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः इति व्यवहाराः सिद्ध्यन्ति। अर्थाध्यासस्यानिवृत्तिः दोषनिवृत्त्यनन्तरं भवति ज्ञानाध्यासनिवृत्तिश्च ब्रह्मज्ञानाद् भवति। विद्यारण्यस्वामिना वाक्यमपि–

अविद्यावृत्तकूटस्थे देहद्वययुता चितिः।
शुक्तौ रूप्यवदध्यस्था विक्षेपाध्यास एव हि।।
(पञ्चदशी-6/33)

आवरणशक्तिः–आवरणशक्तिस्तावदल्पोऽपि मेघोऽनेकयोजनायतमादित्यमण्डलमवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव तथाऽज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यम्। सच्चिदानन्दस्वरूपमावृणोत्यावरणशक्तिः। **विक्षेपशक्तिः**–विक्षेपशक्तिस्तु तथा रज्ज्वज्ञानं स्वावृत्तरज्जौ स्वशक्त्या सर्पादिकमुद्भावयत्येवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्त्याकाशादिप्रपञ्चादिमुद्भावयति तादृशं सामर्थ्यम्। तदुक्तम्–

विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेदिति।

वेदान्तदर्शने सत्तायाः त्रिविधत्वं मतं; तदित्थम्–1. प्रातिभासिकी सत्ता, 2. व्यावहारिकी सत्ता, 3. पारमार्थिकी सत्ता। 'ब्रह्म' पारमार्थिकी सत्तास्ति। वेदान्ते 'अध्यासः' किं वा 'अध्यारोप' इत्युच्यते। गौडपादाचार्यः माण्डूक्यकारिकायामुक्तं यद् अध्यासो नाम संवृत्तिः। यथा–

अन्तःस्थानात्तु भेदानां तस्माज्जागरिते स्मृतम्।
यथा तत्र तथा स्वप्ने संवृतत्वेन भिद्यते।।
(मा०का०2/4)

शाङ्करभाष्यानुसारमस्यायमाशयो यत् जाग्रदवस्थायां

दृश्यमानानि सर्वाणि वस्तूनि मिथ्यापरकाणि तथा भवन्ति, यथा स्वप्नावस्थायां दृश्यमानानि द्रव्याणि। तदेव गौडपादेनोक्तम्–

स्वप्नभावे यथा दृष्टे गन्धर्वनगरं यथा।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः।।
(मा०का०2/31)

अध्यासभेदः–माधवाचार्यः सर्वदर्शनसंग्रहे अध्यासस्य द्वौ भेदौ प्रस्तावयामास। 1. अर्थाध्यासः,, 2. ज्ञानाध्यासः। इन्द्रियादिप्रमाणदोषैः अन्यवस्तुनि अन्यरूपतायाः प्रतिभासोऽर्थाध्यास इत्युच्यते। अनादिवासनाया निष्पन्नोऽध्यासः ज्ञानाध्यास इत्युच्यते। अद्वैतवेदान्ते–'जीवस्वरूपमेव अध्यासः'। वल्लभाचार्यमतानुसारम्–'अन्तःकरणादिषु आत्मबुद्धिरेवाध्यासः।"

अध्यासस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—अध्यासः किं भवति?
उत्तरम्— अविद्या।

2. **प्रश्नः**—अध्यासस्य पर्यवसितोऽर्थः किम्?
उत्तरम्— विक्षेपः।

3. **प्रश्नः**—अध्यासस्य किं लक्षणम्?
उत्तरम्— विक्षिप्तज्ञानं, मिथ्याप्रतीतिरेवाध्यासः।

4. **प्रश्नः**—'शुक्तौ रजतस्य रज्जौ सर्पस्य च आरोपः' कस्य उदाहरणम्?
उत्तरम्— अध्यारोपस्य।

5. **प्रश्नः**—अर्थाध्यासस्य निवृत्तिः कथं भवति?
उत्तरम्— दोषनिवृत्त्यनन्तरम्।

6. **प्रश्नः**— ज्ञानाध्यासनिवृत्तिः कस्मात् भवति?
उत्तरम्— ब्रह्मज्ञानात्।

7. **प्रश्नः**—आवरणशक्तेः किं लक्षणम्?
उत्तरम्— सच्चिदानन्दस्वरूपमावृणोत्यावरणशक्तिः।

8. **प्रश्नः**—विक्षेपशक्तेः किं लक्षणम्?
उत्तरम्— विक्षेपशक्त्याकाशादिप्रपञ्चमुद्भावयति।

9. **प्रश्नः**—वेदान्तदर्शने सत्तायाः त्रिविधत्वं किम्?
उत्तरम्— 1. प्रातिभासिकी सत्ता, 2. व्यावहारिकी सत्ता, 3. पारमार्थिकी सत्ता।

10. **प्रश्नः**—पारमार्थिकी सत्ता का अस्ति?
उत्तरम्— ब्रह्म।

11. **प्रश्नः**—गौडपादाचार्यः माण्डूक्यकारिकायां अध्यासो किं नाम अध्यारोपः?
उत्तरम्— संवृत्तिः।

12. **प्रश्नः**—शाङ्करभाष्यानुसारं जाग्रदवस्थायां दृश्यमानानि सर्वाणि वस्तूनि मिथ्यापरकाणि कदा भवन्ति?
उत्तरम्— यथा स्वप्नावस्थायां दृश्यमानानि द्रव्याणि।

13. **प्रश्नः**—माधवाचार्यः सर्वदर्शनसंग्रहे अध्यासस्य कौ द्वौ भेदौ प्रस्तावयामास?
उत्तरम्— 1. अर्थाध्यासः, 2. ज्ञानाध्यासः।

14. **प्रश्नः**—अर्थाध्यासस्य किं लक्षणम्?
उत्तरम्—इन्द्रियादिप्रमाणदोषैः अन्यवस्तूनि अन्यरूपतायाः प्रतिभासः।

15. **प्रश्नः**—ज्ञानाध्यासस्य किं लक्षणम्?
उत्तरम्—अनादिवासनाया निष्पन्नोऽध्यासः ज्ञानाध्यासः।

16. **प्रश्नः**—अद्वैतवेदान्ते जीवस्वरूपं किम्?
उत्तरम्— अध्यासः।

17. **प्रश्नः**—वल्लभाचार्यमतानुसारम् अध्यासः कः?
उत्तरम्— अन्तःकरणादिषु आत्मबुद्धिरेवाध्यासः।

(Y-Code-25) (पप) विवर्तवादः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

विवर्तवादस्तु वेदान्तपक्षः। अद्वैतवेदान्तानुसारं विवर्तवादः स्वीक्रियते। अस्य वादस्य परिकल्पना परब्रह्मणः विकारमयः–अनित्यदुःखरूपस्य जगतः कारणत्वसिद्ध्यर्थं कृताऽस्ति। वस्तुनः स्वस्वरूपापरित्यागेन अर्थात् तत्त्वराहित्येन वस्त्वन्तरमिथ्याप्रतीतिः विवर्तभावः। यथा– शुक्तौ रजतस्य रज्जौ सर्पस्य प्रतीतिर्विवर्तः। अत एव वेदान्तपरिभाषायामुक्तम्–

सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः।
अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदाहृतः।

अर्थात् कस्यापि वस्तुनः तत्त्वसहितपरिवर्तनं विकारः इत्युच्यते। परन्तु तत्त्वराहित्येन मिथ्यारूपेण वा एकस्मिन् वस्तुनि अन्यस्य वस्तुनः आभासः विवर्त इत्युच्यते। यथा–रज्जौ सर्पस्य प्रतीतिः। अत्र रज्जु अधिष्ठानं सर्पश्च आरोपः। पुनः धर्मराजाध्वरीन्द्रेण वेदान्तपरिभाषायाम् कथितमस्ति यत्–

परिणामो नाम उपादानसमसत्ताककार्योत्पत्तिः।
विवर्तो नाम उपादानविषमसत्ताककार्योत्पत्तिः।।
(वेदान्तपरिभाषा-पृ.107)

अतः कारणरूपरज्जोः कार्यरूपसर्पः विवर्तरूपम् अस्ति। एवंप्रकारेण कार्यरूपं जगत् कारणरूपस्य ब्रह्मणः विवर्तरूपमस्ति। एवं स्वीकृते ब्रह्मणोऽविकारित्वं सिद्ध्यति। अत्र मृदः विवर्तरूपं घटः वर्तते। शङ्कराचार्यमतानुसारम्–

केनापि मृद्भिन्नतया स्वरूपं
घटस्य संदर्शयितुं न शक्यते।
अतो घटः कल्पित एव मोहान्
मृदेव सत्यं परमार्थभूतम्।।

वेदान्तसारस्य सुबोधिनीटीकायां विवर्तस्य लक्षणमुक्तमस्ति यत्–"विवर्तभावस्तु वस्तुनः स्वस्वरूपापरित्यागेन स्वरूपान्तरेण मिथ्याप्रतीतिः यथा रज्जुः स्वस्वरूपापरित्यागेन सर्पाकारेण मिथ्या प्रतिभासते" इति। विद्यारण्यः 'पञ्चदशी 'नामकग्रन्थे प्रतिपादयति यत्–

सांख्यानां परिमाणवादस्वीकारे ब्रह्मणि अनित्यत्वादिदोषः समुदेति, तद्वारणाय ब्रह्माद्वैतिनः ब्रह्मणोऽविकारित्वं साधनार्थं कारणरूपनित्यब्रह्मणः कार्यरूपमनित्यं जगदिदं विवर्तरूपं न तु परमार्थतः इत्यामनन्ति। अत एव वेदान्तपरिभाषायामपि प्रोक्तम्–

परिणामो नाम उपादानसमसत्ताककार्योत्पत्तिः।
विवर्तो नाम उपादानविषमसत्ताककार्योत्पत्तिरिति।

इत्थञ्च शुक्त्यवच्छिन्नचैतन्यनिष्ठविद्या रजताकारेण रजतरूपार्थाकारेण च परिणमते इति धर्मराजाध्वरीन्द्रवचसा शुक्तिरूप्यस्य विवर्तत्वं सिद्ध्यति। यथा मृद् विवर्तरूपः घटः मृद्येव विलीयते तथैवान्ते सर्वं जगच्चैतन्यरूपे ब्रह्मणि विलीयते, परमार्थतः ब्रह्म एव सत्यमिति विवर्तमूलम्। तदुक्तम्–

विवर्तवादस्य हि पर्वभूमिः
वेदान्तवादे परिणामवादः।
व्यवस्थितेऽस्मिन् परिणामवादः
स्वयं समायाति विवर्तवादः।।
(साङ्ख्ये-2/69)

विवर्तवादस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—विवर्तवादः कस्य पक्षः?
उत्तरम्— वेदान्तपक्षः।

2. **प्रश्नः**—विवर्तवादः कः स्वीक्रियते?
उत्तरम्— अद्वैतवेदान्तः।

3. **प्रश्नः**—कोऽस्ति विवर्तभावः?
उत्तरम्— तत्त्वराहित्येन वस्त्वन्तरमिथ्याप्रतीतिः, अतत्वतोऽन्यथा प्रथा।

4. **प्रश्नः**—शुक्तौ रजतस्य रज्जौ सर्पस्य प्रतीतिः इति कस्य उदाहरणम्?
उत्तरम्— विवर्तस्य।

5. **प्रश्नः**—विकारभावस्य किं लक्षणम्?
उत्तरम्— वस्तुनः तत्वसहितपरिवर्तनम्, सतत्वतोऽन्यथा प्रथा।

6. **प्रश्नः**—कारणरूपरज्जोः कार्यरूपसर्पस्य किं रूपम्?
उत्तरम्— विवर्तरूपम्।

7. **प्रश्नः**—कार्यरूपं जगत् कारणरूपस्य ब्रह्मणः किं रूपम्?
उत्तरम्— विवर्तरूपम्।

8. **प्रश्नः**—अपवादस्य ज्ञानं कदा भवति?
उत्तरम्— मिथ्याप्रतीतिनिष्टे सति केवलः एक ब्रह्मणः ज्ञानम्।

9. **प्रश्नः**—जीवन्मुक्तिः इत्यस्य किं लक्षणम्?
उत्तरम्—स्व-स्वरूपभूत-अखण्डब्रह्मणो ज्ञानम्।

(Y-Code-25) (फफ) पञ्चविद्या (पञ्चाग्निविद्या) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

'सा विद्या या विमुक्तये' इति वचनात् विद्यायाः विद्यात्वं मुक्तेः उपपद्यते। तेनैव ज्ञानचक्षुषा सदसद्विवेकं प्राप्त्वा स जन्मसंसारबन्धाद्विमुच्यते। तत्र द्वैतवादिना माध्वाचार्येण जननमरणबन्धनान्मुक्तये मोक्षावाप्तये च नित्यभेदपञ्चकज्ञानं अनादिसत्यरूपं पञ्चविद्यारूपेण प्रतिपादितं वर्तते। तत्र प्रथमः ईश्वरजीवयोर्भेदः। द्वितीयः ईश्वरजगतोर्भेदः, तृतीयः जीवयोः परस्परभेदः। जीवजगतोर्भेदश्च चतुर्थः। तद्यथा जडयोर्परस्परभेदः सर्वदर्शनसंग्रहे (माध्ववेदान्ते)–

जीवेश्वरभिदा चैव जडेश्वरभिदा तथा।
जीवभेदो मिथश्चैव जडजीवभिदा तथा॥
मिथश्च जडभेदो यः प्रपञ्चो भेदपञ्चकः।
सोऽयं सत्योऽप्यनादिश्च सादिश्चेन्नाशमाप्नुयात्॥
(माध्ववेदान्ते)

इत्थं अद्वैतवादिनां खण्डपुरस्सरं पञ्चविद्यायाः प्रतिपादनं आचार्येण कृतम्। यदैतस्य भेदपञ्चकस्य ज्ञानं भवति तदैव मुक्तिरिति माध्ववेदान्तिनः। यथा–

वैलक्षण्यं तयोर्ज्ञात्वा मुच्यते बध्यतेऽन्यथा।

एताः पञ्चविद्याः। उपनिषदि च–

यथा पक्षी च सूत्रञ्च नानावृक्षरसा यथा।
यथा नद्यः समुद्राश्च यथा जीवमहीरुहौ॥
यथाणिमा च धाना च शुद्धोदलवणे यथा।
चौरापहार्यौ च यथा यथा पुंविषयावपि॥
यथाज्ञो जीवसङ्घाश्च प्रणादेश्च नियामकः।
वैलक्षण्यं तयोर्ज्ञात्वा मुच्यते बध्यतेऽन्यथा॥

इत्थं विष्णोः सर्वश्रेष्ठत्वं स्वीकृत्य सर्वदा द्वैतभावः वर्तत एव। तस्माद्विष्णोः सर्वोत्कर्ष एव तात्पर्यं सर्वागमानाम्।

न च नाशं प्रयात्येष न चासौ भ्रान्तिकल्पितः।
कल्पितश्चेन्निवर्तेत न चासौ विनिवर्तते॥
द्वैतं न विद्यत इति तस्माद् ज्ञानिनां मतम्।
मते हि ज्ञानिनामेतन्मितं त्रातं हि विष्णुना॥

नारायणस्य सर्वोतमत्वम्–

अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः।
उत्तमस्तु पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
विष्णोः संस्मरणात् क्षीणसमस्तक्लेशसंचयः।
मुक्तिं प्रयाति स्वर्गाप्तिस्तस्य विघ्नोऽनुमीयते॥
पूर्णमदः पूर्णमिदम्।

पञ्चाग्निविद्याविवेचनम्–चतुराश्रमेषु गृहस्थाश्रमगतानां गृहस्थानां विमुक्त्यर्थं छान्दोग्योपनिषदि पञ्चमाध्यायस्य तृतीयखण्डात् दशमखण्डं यावत् परिकल्पिता अस्ति। अत्र गतित्रयं यथा-परलोकगमनम्, मर्त्यलोकं प्रति पुनरावर्त्तनम्, संसारगतिः। एतेषामेव त्रयाणां गतीनामाख्यायिकामाध्यमेन रूपकमाध्यमेन च पञ्चाग्निविद्यायारूपस्थापनं क्रियते। प्रवाहणस्य पञ्चप्रश्नाः–1. अस्माल्लोकादूर्ध्वं प्रजाः कुत्र गच्छन्ति? 2. गताः प्रजाः केनोपायेन पुनः लोकमिममागच्छन्ति? 3. पितृयानदेवायानयोः पथोः व्यावर्तनं कुत्र भवति? 4. पितृलोकः कथं न सम्पूर्यते? 5. कैः पञ्चसंख्यकैराहुतिभिरापः पुरुषसंज्ञको भवति? प्रसङ्गवशेन एतेषाम् उत्तरं प्रवाहणेनैव प्रदत्तमस्ति। पञ्चमप्रश्नस्य समाधानमेव पञ्चाग्निविद्यायाः उपस्थापनं वर्तते। यथा–

1. **द्युलोकरूपाग्निविद्या**–प्रसिद्धद्युलोकः अग्निः भवति। अत्र आदित्यः-समिधा, रश्मयः-धूमाः, दिवसः-ज्वाला, चन्द्रमा-अङ्गारः, नक्षत्राणि-विस्फुलिङ्गाः सन्ति। तस्मिन्नेवाग्नौ देवाः श्रद्धारूपमापः जुह्वति। तस्याः आहुतेः सोमो राजा उत्पद्यते।

2. **पर्जन्यरूपाग्निविद्या**–द्वितीयोऽग्निः अस्ति पर्जन्यः। पर्जन्यो नाम वृष्ट्युपकरणाभिमानो देवताविशेषः। अस्मिन् पर्जन्यरूपेऽग्नौ यदा देवाः सोमं राजानं जुह्वति तदा तस्मात् वृष्टिः सम्भवति।

3. **पृथिवीरूपाग्निविद्या**–तृतीयोऽग्निर्भवति पृथिवी। अस्याः समिधा-संवत्सरः, आकाशः-धूमः, तमोरूपा रात्री ज्वाला, दिशः अङ्गाराः, अवान्तरदिशश्च विस्फुलिङ्गाः सन्ति। अस्मिन्नग्नौ देवाः वर्षं जुह्वति। तदा तस्मात् अन्नं सम्भवति।

4. **पुरुषरूपाग्निविद्या**–पुरुषरूपाग्नेः वाणी समिधा अस्ति। प्राणः-धूमः, जिह्वा-ज्वाला, नेत्रद्वयं-अङ्गाराः, श्रोत्रं-विस्फुलिङ्ग इति कथ्यते। अस्मिन् पुरुषरूपेऽग्नौ देवाः अन्नं जुह्वति। तस्माच्च वीर्यः समुत्पद्यते।

5. **स्त्रीरूपाग्निविद्या**–स्त्रीरूपाग्नेः पुत्रोत्पादनार्थं प्रदीप्तकारणात् उपस्थः समिधा, पुरुषस्योपमन्त्रणं धूमः, योनिः-ज्वाला इत्युच्यते। तस्मिन् स्त्रीरूपाग्नौ देवगणाः वीर्यं जुह्वति। तदा तस्मात् आहुतेः गर्भः सम्भवति।

एवमस्याः पञ्चाग्निविद्यायाः वेत्ता गृहस्थो ऊर्ध्वं गच्छति तथा च पुण्यलोकं प्राप्नोति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—"सा विद्या या विमुक्तये" इति वचनात् किमुपपद्यते?
   उत्तरम्— विद्यायाः विद्यात्वं मुक्तेः।
2. **प्रश्नः**—ज्ञानचक्षुषा सदसद्विवेकं प्राप्त्वा जनाः किं विमुच्यते?
   उत्तरम्—जन्मसंसारबन्धाद्विमुच्यते।
3. **प्रश्नः**—द्वैतवादिना माध्वाचार्येण जननमरण-बन्धनान्मुक्तये मोक्षावाप्तये च किं प्रतिपादितम्?
   उत्तरम्—नित्यभेदपञ्चकज्ञानं अनादिसत्यरूपं पञ्चविद्यारूपेण प्रतिपादितम्।
4. **प्रश्नः**—माध्ववेदान्ते काः सन्ति पञ्चविद्याः?
   उत्तरम्—1. ईश्वरजीवयोर्भेदः, 2. ईश्वरजगतोर्भेदः, 3. जीवयोः परस्परभेदः, 4. जीवजगतोर्भेदः, 5. जडयोर्परस्परभेदः।
5. **प्रश्नः**—अद्वैतवादिनां खण्डपुरस्सरं पञ्चविद्यायाः प्रतिपादनं केन कृतम्?
   उत्तरम्—माध्वाचार्येण कृतम्।
6. **प्रश्नः**—अद्वैतस्य भेदपञ्चकस्य ज्ञानं भवति तदैव मुक्तिरिति कस्य वचनम्?
   उत्तरम्—माध्ववेदान्तिनः।
7. **प्रश्नः**—विष्णोः सर्वश्रेष्ठत्वं स्वीकृत्य सर्वदा को भावः जन्यते?
   उत्तरम्—द्वैतभावः।
8. **प्रश्नः**—चतुराश्रमेषु गृहस्थाश्रमगतानां गृहस्थानां विमुक्त्यर्थं को ग्रन्थः परिकल्पितः?
   उत्तरम्—छान्दोग्योपनिषद्।
9. **प्रश्नः**—पञ्चाग्निविद्यायारूपस्थापनं केन माध्यमेन क्रियते?
   उत्तरम्—त्रयाणां गतीनामाख्यायिकामाध्यमेन रूपक-माध्यमेन च।
10. **प्रश्नः**—के सन्ति गतित्रयः?
    उत्तरम्—1. परलोकगमनम्, 2. मर्त्यलोकं प्रति पुनरावर्त्तनम्, 3. संसारगतिः।
11. **प्रश्नः**—पञ्चाग्निविद्यायाः उपस्थापनं कथं जायते?
    उत्तरम्—पञ्चमप्रश्नस्य समाधानेन।
12. **प्रश्नः**—काः सन्ति पञ्चाग्निविद्या?
    उत्तरम्—1. द्युलोकरूपाग्निविद्या, 2. पर्जन्य-रूपाग्निविद्या, 3. पृथिवीरूपाग्निविद्या, 4. पुरुषरूपाग्निविद्या, 5. स्त्रीरूपाग्निविद्या।
13. **प्रश्नः**—प्रसिद्धद्युलोकः अग्निः आहुतेः किमुत्पद्यते?
    उत्तरम्—सोमो राजा उत्पद्यते।
14. **प्रश्नः**—वृष्टिः कथं सम्भवति?
    उत्तरम्—पर्यन्यरूपाग्निविद्यया।
15. **प्रश्नः**—पृथिवीरूपाग्निविद्यया आहुतेः किं भवति?
    उत्तरम्—अन्नं सम्भवति।
16. **प्रश्नः**—पुरुषरूपाग्निविद्यया आहुतेः किं समुत्पद्यते?
    उत्तरम्—वीर्यः समुत्पद्यते।
17. **प्रश्नः**—स्त्रीरूपाग्निविद्यया आहुतेः किं सम्भवति?
    उत्तरम्—गर्भः सम्भवति।

(Y-Code-25) (बब) अभिनवान्यथाख्यातिवादः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

ख्यातिर्नाम ज्ञानम्। ख्याधातोः क्तिन् प्रत्यये कृते ख्यातिशब्दः निष्पन्नो भवति। अतः अन्यथाज्ञानं अर्थात् मिथ्याज्ञानमेव अन्यथाख्यातिरुच्यते। तत्र अभिनवान्याख्यातिवादः माध्ववेदान्तिनां मतम्।

ख्यातिभेदाः अवबोधनम्–1. नैयायिकवैशेषिकयोः अन्यथाख्यातिः, 2. सांख्य-योग-भट्ट-जैनदर्शन-आधारेण सदसत्ख्यातिः, 3. प्राभाकराणां अख्यातिरभिप्रेता, 4. मध्वमतेऽलीकख्यातिरसत्ख्यातिरेव, 5. अचिन्त्य-भेदाभेदवादिनामपि सत्ख्यातिरेव, 6. बौद्धस्य माध्यमिकस्य असत्ख्यातिस्तु सर्वशून्यवादिनः, 7. अनिर्वचनीयख्यातिस्तु अद्वैतानाम्, 8. अभिनवान्यथाख्यातिवादा माध्वस्य वर्तते।

अभिनवान्यथाख्यातिवादस्य अवबोधनम्–अस्य अभिनवान्यथाख्यातिवादस्य समर्थकः माध्वः वर्तते। तन्मतानुसारं कस्मिन्नपि पुरोदृश्यमाने पदार्थे अपरस्य पदार्थस्य भानम् अभिनवान्यथाख्यातिः इत्युच्यते। भ्रमस्थले अद्वैतिभिः अनिर्वचनीयताख्यातिः स्वीक्रियते, तच्च माध्वानां नेष्टम्, तेषां मते "इदं रजतम्" इति ज्ञाने विषयीभूतं रजतम् असदेव, तत्र प्रमाणं तु "असदेव रजतमभात्" इति प्रत्यक्षमेव। अतः भ्रमभातस्य न भ्रमस्थले सत्वं नान्यदेशसत्त्वं नान्य-निर्वचनीयत्वम्। इयमसत्ख्यातिरपि नास्ति, यतो हि अस्मिन् ज्ञाने इदमिति सत्याधिष्ठानविषयत्वमस्ति, नापि नैयायिकवत् अन्यथाख्यातिरपि अस्ति, तैः असतः विषयत्वास्वीकारात्। अतः शुक्तौ देशान्तरे विद्यमानं रजतं प्रतिभातीति प्रमाणाभावादियम्– **अभिनवान्यथाख्यातिरिति उच्यते।**

पञ्च ख्यातिवादाः–

आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा।
तथाऽनिर्वचनीयता ख्यातिरित्येतत्ख्यातिपंचकम्।।

तत्र आत्मख्यातिवादिनो सांख्याः यौगिकाश्च। (विज्ञानवादिबौद्धाश्च) असत्ख्यातिवादिनः बौद्धाः। अख्यातिवादिनः प्रभाकरादिमीमांसकाः। अन्यथाख्यातिवादिनः नैयायिकाः। अनिर्वचनीयताख्यातिवादिनः वेदान्तिनः।

अत्र लौकिकसन्निकर्षेणेदं ज्ञानं न भवति अपितु अलौकिकसन्निकर्षेण जायते। सन्निकर्षो हि द्विविधः–लौकिको अलौकिकश्चेति। संयुक्तसंयोगसमवायादिसन्निकर्षवशाद् जायमानं ज्ञानं लौकिकसन्निकर्षजन्यं प्रत्यक्षं किन्तु ज्ञानलक्षणप्रत्यासत्त्या जायमानं ज्ञानम् अलौकिकसन्निकर्षजन्यं भवति। अत्र रजतस्य भानं ज्ञानलक्षणप्रत्यासत्त्या सम्भवति। अत्र विचारयोग्यः विषयोऽयं यत्–यस्मिन् पदार्थे अपरस्यादृष्टस्य पदार्थस्य ज्ञानं भवति तद्वस्तु (शुक्तिः) सदसद्वा? पुनः आरोपितं वस्त्वपि (रजतम्) सदसद्वा? नैयायिकानां मते पुरोदृश्यमानं वस्तु आरोपितवस्तु च सद्भवतः। माध्वादिद्वैतानां मतानुसारं भ्रमभातस्य न भ्रमस्थले सत्त्वं, नान्यदेशसत्त्वं, नानिर्वचनीयत्वं वा। अयमेव अभिनवान्यथाख्यातिवादः। एवं रीत्या अत्यन्तासतो भानं सर्वथा अङ्गीकर्त्तव्यम्। असदेव रजतं प्रत्ययाद् इति अबाधितात् सार्वजनीनाद् अनुभवात् भासमानस्य रजतः अत्यन्तासत्त्वम् अङ्गीकरणीयम्।

अभिनवान्यथाख्यातिवादस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—ख्यातिर्नाम किम्?
   उत्तरम्—ज्ञानम्।
2. **प्रश्नः**— अन्यथाख्यातिः इत्यस्य कोऽर्थः?
   उत्तरम्—अन्यथाज्ञानं अर्थात् मिथ्याज्ञानमेव।
3. **प्रश्नः**— अभिनवान्यथाख्यातिवादः कस्य मतम्?
   उत्तरम्—माध्ववेदान्तिनां मतम्।
4. **प्रश्नः**— अन्यथाख्यातिः कस्य दर्शनस्य मतम्?
   उत्तरम्—नैयायिकवैशेषिकयोः।
5. **प्रश्नः**— सदसत्ख्यातिः कस्य दर्शनस्य मतम्?
   उत्तरम्—सांख्य-योग-भट्ट-जैनदर्शनस्य।
6. **प्रश्नः**— अख्यातिः केषां अभिप्रेता?
   उत्तरम्—प्राभाकराणाम्।
7. **प्रश्नः**— अलीकख्यातिरसत्ख्यातिः कस्य मते वर्तते?
   उत्तरम्— मध्वस्य मते।
8. **प्रश्नः**— अचिन्त्यभेदाभेदवादिनामपि किं मतम्?
   उत्तरम्— सत्ख्यातिरेव।
9. **प्रश्नः**— असत्ख्यातिस्तु कस्य मतम्?
   उत्तरम्—बौद्धस्य माध्यमिकस्य सर्वशून्यवादिनः च।
10. **प्रश्नः**— अनिर्वचनीयताख्यातिस्तु कस्य मतम्?
    उत्तरम्—अद्वैतानाम्।
11. **प्रश्नः**— अनिर्वचनीयताख्यातिवादिनः के?
    उत्तरम्—वेदान्तिनः।
12. **प्रश्नः**— अभिनवान्यथाख्यातिः इत्यस्य किं लक्षणम्?
    उत्तरम्—कस्मिन्नपि पुरोदृश्यमाने पदार्थे अपरस्य पदार्थस्य भानम्।
13. **प्रश्नः**—भ्रमस्थले अनिर्वचनीयताख्यातिः कैः स्वीक्रियते?
    उत्तरम्—अद्वैतिभिः।
14. **प्रश्नः**— संयुक्तसंयोगसमवायादिसन्निकर्षवशाद् जायमानं ज्ञानं किम्?
    उत्तरम्— लौकिकसन्निकर्षजन्यं प्रत्यक्षम्।
15. **प्रश्नः**— ज्ञानलक्षणप्रत्यासत्त्या जायमानं ज्ञानं किम्?
    उत्तरम्—अलौकिकसन्निकर्षजन्यं ज्ञानम्।

(मध्ववेदान्तः-Code-73) (भभ) मध्ववेदान्तस्य अवबोधनम्-आगमानामपौरुषेयत्वम्, तत्त्वमसीति महावाक्यार्थविमर्शः, स्वतःप्रामाण्यवादविमर्शः, अनिर्वचनीयताख्यातिविचारः, प्रमाणविमर्शः, अहं ब्रह्मास्मीति अनुभूतिवाक्यविमर्शः, नारायणस्य सर्वोत्तमत्वम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

आगमानामपौरुषेयत्वम्–माध्वमतस्य अपरं नाम ब्रह्मसम्प्रदायः वर्तते। वेदान्तस्य अर्थोऽस्ति-वेदनं वेदो नाम ज्ञानम्। अस्य मतस्य उत्तरोत्तरज्ञानमेवं वर्तते–वायुतः हनुमानं, हनुमतः भीमं, भीमतः आनन्दतीर्थ अलभत्। आनन्दतीर्थस्य एव प्रसिद्ध नाम मध्वः अस्ति। तस्य बाल्यावस्थायां वासुदेवनाम ज्ञायते। माध्वः स्वतःप्रमाणं स्वीक्रियते। यः पूर्णबोधः पूर्णप्रज्ञो वा विद्यते। दक्षिणे 'उडुपी' नामक प्रसिद्धस्थाने 1199 ईस्वीये अस्य जन्म एवं 1303 ईस्वीये अस्य मृत्यु अभूत् इति मन्यते। माध्वः द्वैतमतस्य समर्थको वर्तते। अस्य वेदान्तस्य 39 ग्रन्थाः वर्तन्ते। माध्वमतस्य (द्वैतमतस्य) समर्थकाः विद्वांसः जयतीर्थः, व्यासतीर्थः, रघूत्तमतीर्थः, वनमाली मिश्रः प्रमुखाः वर्तन्ते। मध्वाचार्यः वायुदेवतायाः आचार्यत्वं स्वीक्रियते। माध्ववेदान्तस्य प्रसिद्धः टीकाकारः जयतीर्थो अस्ति। हरदत्तः मिताक्षराकारो विद्यते। अभिनवान्यथाख्यातिवादस्य समर्थकः माध्वो वर्तते। अपौरुषेयं वाक्यं वेदः। स च विधि-मन्त्र-नामधेय-निषेध-अर्थवादभेदात् पञ्चविधः।

महावाक्यार्थविवेचनम्–सदानन्दस्य तत्त्वमसि इत्येतन्महावाक्यं यद्यपि आत्मब्रह्मणोरैक्यं प्रतिपादयति। वेदान्तविदो वदन्ति यत् अभिधयास्य वाक्यस्य यथार्थबोधा-सम्भवाल्लक्षणाङ्गीक्रियते। अत्र जहदजहल्लक्षणया यथार्थोऽवगम्यते। 'तत्-त्वम्' इत्येतयोर्मध्ये विद्यमान-परोक्षत्वापरोक्षत्वविशिष्टांशौ परस्परविरुद्धौ परिहरन्तीयं लक्षणा अखण्डचैतन्यांशञ्च परिगृह्णन्ती तयोरैक्यमुपपादयति।

सामानाधिकरण्यं च विशेषणविशेष्यता।
लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम्।।

अत्र पञ्चदशीकारः ब्रूते– नास्य महावाक्यस्य अर्थः संसर्गो न च विशेषो; अपितु अखण्डैकरसचैतन्यमेवास्ति–

संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्भवः।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः।।

दार्शनिकाः अस्य सम्पूर्णवाक्यस्य व्याख्यामेव महावाक्यार्थस्य संज्ञा दीयते। **'तत्त्वमसि'** इदं वाक्यं साक्षात् अखण्डब्रह्मपदस्य विरुद्धार्थकत्वेन प्रतिपादनाभावो वर्तते। अत्र तत् एवं त्वम् इत्यस्य समानाधिकरणसम्बन्धः मन्यते। भिन्नार्थपदानां एक एव अर्थो बोधार्थसम्बन्धः समानाधिकरणं भवति।

स्वतःप्रामाण्यवादविमर्शः–माध्वः स्वतःप्रमाणं स्वीक्रियते। यः पूर्णबोधः पूर्णप्रज्ञो वा विद्यते।

अनिर्वचनीयताख्यातिविचारः–दर्शने पञ्च ख्यातिवादाः सन्ति। येषां अनिर्वचनीयख्यातिवादिनः वेदान्तिनः वर्तते। रज्जौ सर्पज्ञानं न सत् न असत् वर्तते प्रत्युत द्वाभ्यां विलक्षणं वर्तते, तं ज्ञानं अनिर्वचनीम्। वेदान्ते 'मिथ्या' इत्यस्यार्थः न 'असत्' प्रत्युत 'अनिर्वचनीय'मस्ति। यथोच्यते–

आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा।
तथाऽनिर्वचनीयताख्यातिरित्येतत्ख्यातिपंचकम्।।

तत्र आत्मख्यातिवादिनो सांख्याः यौगिकाश्च। (विज्ञान-वादिबौद्धाश्च) असत्ख्यातिवादिनः बौद्धाः। अख्यातिवादिनः प्राभाकरादिमीमांसकाः। अन्यथाख्यातिवादिनः नैयायिकाः। अनिर्वचनीयताख्यातिवादिनः वेदान्तिनः।

माध्वमते पदार्थ-मीमांसायां प्रमाणविमर्शः, अहं ब्रह्मास्मीति अनुभूतिवाक्यविमर्शः, नारायणस्य सर्वोत्तमत्वमादिविमर्शः–द्रव्य, गुण, कर्म, सामान्य, विशेष, विशिष्ट, अंशी, शक्ति, सादृश्य, अभाव दश पदार्थाः मन्यते। द्रव्याणि विंशतिः मन्यते। गुणाः अनेकाः सन्ति, कर्माणि त्रि-प्रकारकाः–विहित-निषिद्ध-उदासीनः इति मन्यते। माध्वाचार्यः त्रयो प्रमाणं स्वीक्रियते। शक्तिः चतस्रः–अचिन्त्यशक्तिः, आधेयशक्तिः, सहजशक्तिः, पदशक्तिः। परमात्मा साक्षात् विष्णुः वर्तते। परमात्मा अनन्तगुणपरिपूर्णो वर्तते। उत्पत्तिः, स्थितिः, संहारः, नियमनं, ज्ञानं, आवरणं, बन्धः, मोक्षः इति अष्टकस्य कर्ता परमेश्वरो वर्तते। अस्य वेदान्ते परमतत्त्वः विष्णुः अस्ति। गुणस्वरूपमेव अस्य वेदान्ते भेदः। परमात्मायाः शक्तिः लक्ष्मी अस्ति। लक्ष्मी दिव्यविग्रहवती 'अक्षरा' अस्ति। जीवाः अज्ञान-मोह-दुःख-भयादिदोषैः युक्ताः संसारशीलो भवन्ति। जीवाः मुक्तियोग्याः, नित्यसंसारिणः, तमोयोग्याः भवन्ति। **निरंजनः परमं साम्यमुपैति** (मुण्डक–3/1/3) इति प्रकृतविषयकः इदं सिद्धान्तं माध्वमतस्य विशेषता वर्तते।

माध्वमते परमात्मा निमित्तकारणं एवं प्रकृतिः उपादानकारणं वर्तते। अन्य-वैष्णवमतानुरूपं माध्वमतमपि शुद्ध-सत्त्वस्य सत्ता स्वीकरोति। सत्त्वाभिमानी श्रीः, रजोऽभिमानी भूः तथा तमोभिमानी दुर्गा भवति। द्वैतवेदान्तानुसारेण जगत् सत्यं वर्तते। सत्त्वगुणस्य स्वरूपं 1. लघुप्रकाशः, 2. आनन्दकारकः, 3. श्वेतवर्णः इति त्रयो वर्तते।

मध्वमते साधनमार्गः—वेदान्तस्य नित्यानित्य-वस्तुविवेकः, इहामुत्रफलभोगविरागः, शमादिषट्कसम्पत्तिः, मुमुक्षुत्वम् चेति साधन-चतुष्टयम्। अत्र मुमुक्षुत्वं वेदान्त-शास्त्रस्याधिकारार्थे अत्यावश्यकम्। तस्य मोक्षफलकत्वात्। मुमुक्षुत्वं वेदान्तस्य निष्कर्षम्। श्रवणं, मननं, ध्यानं, पञ्चभेदज्ञानमावश्यकं विद्यते। भेदाः पञ्चप्रकारकाः भवन्ति–1. ईश्वर-जीवयोर्भेदः, 2. ईश्वर-जडयोर्भेदः, 3. जीव-जडयोर्भेदः, 4. जीव-अपरजीवयोर्भेदः, 5. जड-अपरजडयोर्भेदः। एषां पञ्चविधभेदानां परिज्ञानं माध्वमते मुक्ति-साधको वर्तते। माध्वाचार्यानुसारेण जीवे बाह्यभेदः मन्यते। तेन मतेन जीव-ब्रह्मणोर्मध्ये भेदसम्बन्धः। उपासनायाः द्वौ भेदौ–1. सन्ततशास्त्राभ्यासरूपा, 2. ध्यानरूपा स्तः। अधिकारिभेदेन उपासनायाः उपयोगो भवति। ध्यानं च इतर-तिरस्कार-पूर्वक-भगवद्विषयकाखण्डस्मृतिः (म०सि०सा०)। जीवः मोक्षाय अपि परमात्माधीनोऽस्ति। मोक्षः चतुष्प्रकारकः भवति–1. कर्मक्षयः, 2. उत्क्रान्तिः, 3. अर्चिरादिमार्गः, 4. भोगः। अत्र भोगः अपि चतुष्प्रकारकः भवति–1. सालोक्यः, 2. सामीप्यः, 3. सारूप्यः, 4. सायुज्यः। समस्तभोगेषु श्रेष्ठः सायुज्यं मन्यते। एषु मुक्तजीवेषु अपि आनन्दस्य तारतम्यताबोधनं मध्वमतस्य विशिष्टकल्पना वर्तते। मध्वाचार्यमतस्य संक्षिप्तः एष पद्यं दीयते–

श्रीमन्मध्वमते हरिः परतमः सत्यं जगत् तत्त्वतो,
भेदो जीवगणा हरेरनुचरा नीचोच्चभावं गताः।
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधन-
मक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः॥

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—वेदान्तशब्दस्यार्थः कः?
उत्तरम्—वेदनं वेदो नाम ज्ञानम्।

2. **प्रश्नः**—द्वैतमतस्य संस्थापकः आचार्यः कः?
उत्तरम्—मध्वाचार्यः।

3. **प्रश्नः**— माध्वमतस्य अपरंनाम किमस्ति?
उत्तरम्—ब्रह्मसम्प्रदायः।

4. **प्रश्नः**— माध्वमतस्य प्रादुर्भावः कस्य देवतातः मन्यते?
उत्तरम्—वायुर्देवतातः।

5. **प्रश्नः**—मध्वस्य प्रसिद्धं नाम किम्?
उत्तरम्—आनन्दतीर्थः।

6. **प्रश्नः**—बाल्यावस्थायां वासुदेवनाम्ना कः ज्ञायते?
उत्तरम्—मध्वाचार्यः।

7. **प्रश्नः**— त्रयो प्रमाणं केन स्वीक्रियते।
उत्तरम्—मध्वाचार्येण।

8. **प्रश्नः**—स्वतःप्रमाणं केन मन्यते?
उत्तरम्— मध्वाचार्येण।

9. **प्रश्नः**—मध्वाचार्यस्य जन्मस्थानं कुत्र वर्तते?
उत्तरम्—दक्षिणे 'उडुपी' नामक प्रसिद्धस्थाने।

10. **प्रश्नः**— मध्वस्य जन्मवर्षः किमस्ति?
उत्तरम्—1199 ईश्वीये।

11. **प्रश्नः**— मध्वस्य मृत्युवर्षः किमस्ति?
उत्तरम्—1303 ईश्वीये।

12. **प्रश्नः**— मध्वः कस्य मतस्य समर्थकः?
उत्तरम्—द्वैतमतस्य।

13. **प्रश्नः**—द्वैतवेदान्तस्य कति ग्रन्थाः प्रसिद्धाः?
उत्तरम्—39 ग्रन्थाः।

14. **प्रश्नः**—तन्त्रसारसंग्रहनामकग्रन्थस्य रचयिता कोऽस्ति?
उत्तरम्—मध्वाचार्यः।

15. **प्रश्नः**—द्वैतमतस्य प्रमुखसमर्थकाः विद्वांसः के सन्ति?
उत्तरम्—जयतीर्थः, व्यासतीर्थः, रघूत्तमतीर्थः, वनमालीमिश्रः।

16. **प्रश्नः**—मध्वाचार्यः कस्य देवतायाः आचार्यत्वं स्वीक्रियते?
उत्तरम्—वायुदेवतायाः।

17. **प्रश्नः**— माध्ववेदान्तस्य प्रसिद्धः टीकाकारः कः?
उत्तरम्—जयतीर्थः।

18. **प्रश्नः**— मिताक्षराकारो कः विद्यते?
उत्तरम्—हरदत्तः।

19. **प्रश्नः**— के सन्ति साधनचतुष्टयः?
उत्तरम्—1. नित्यानित्यवस्तुविवेकः, 2. इहामुत्रफल-भोगविरागः, 3. शमादिषट्कसम्पत्तिः, 4. मुमुक्षुत्वम्।

20. **प्रश्नः**— माध्ववेदान्ते के सन्ति दशपदार्थाः?
उत्तरम्—द्रव्य, गुण, कर्म, सामान्य, विशेष, विशिष्ट, अंशी, शक्ति, सादृश्य, अभावः।

21. **प्रश्नः**— माध्ववेदान्ते कति द्रव्याणि सन्ति?
उत्तरम्—20 विंशति द्रव्याणि।

22. **प्रश्नः**—माध्ववेदान्ते त्रिप्रकारकाणि कर्माणि कानि सन्ति?
उत्तरम्—विहित-निषिद्ध-उदासीनः।

23. **प्रश्नः**— माध्ववेदान्ते चतस्रः शक्तयः काः सन्ति?
उत्तरम्—अचिन्त्यशक्तिः, आधेयशक्तिः, सहजशक्तिः, पदशक्तिः।

24. **प्रश्नः**— माध्ववेदान्ते परमतत्त्वेन केन ज्ञायते?
उत्तरम्—विष्णुना।

25. **प्रश्नः**— उत्पत्तिः, स्थितिः, संहारः, नियमनः, ज्ञानं, आवरणं, बन्धः, मोक्षः इति अष्टकस्य कर्ता कः?
उत्तरम्—परमेश्वरः।

26. **प्रश्नः**—मध्वानुसारेण जीव-ब्रह्मणोर्मध्ये कः सम्बन्धः?
उत्तरम्—भेद-सम्बन्धः।

27. **प्रश्नः**— गुणस्वरूपकं कस्य वेदान्तस्य भेदः?
उत्तरम्—द्वैतवेदान्तस्य।

28. **प्रश्नः**—द्वैतवेदान्ते बाह्यभेदात्मकः कः?
उत्तरम्—जीवः।

29. **प्रश्नः**—वेदनं वेदो नाम ज्ञानं तस्य अन्तः किं वर्तते?
उत्तरम्—उपनिषद्।

30. **प्रश्नः**— अभिनवान्यथाख्यातिवादस्य समर्थकः कः?
उत्तरम्—मध्वाचार्यः।

31. **प्रश्नः**— परमात्मायाः शक्तिः, दिव्यविग्रहवती 'अक्षरा' इति का?
उत्तरम्—लक्ष्मी।

32. **प्रश्नः**—अज्ञान-मोह-दुःख-भयादिदोषैः युक्तः कः?
उत्तरम्—जीवः।

33. **प्रश्नः**—मुक्तियोग्य-नित्यसंसारी-तमोयोग्याः के भवन्ति?
उत्तरम्—जीवाः।

34. **प्रश्नः**—निरंजनः परमं साम्यमुपैति इति प्रकृतविषयकः कस्या विशेषता?
उत्तरम्—माध्वमतस्य।

35. **प्रश्नः**—माध्वमते निमित्तकारणं किम्?
उत्तरम्—परमात्मा।

36. **प्रश्नः**—माध्वमते उपादानकारणं किम्?
उत्तरम्—प्रकृतिः।

37. **प्रश्नः**—वैष्णवमतानुरूपं शुद्ध-सत्त्वस्य सत्ता कः स्वीकरोति?
उत्तरम्—मध्वाचार्यः।

38. **प्रश्नः**—माध्वमते सत्त्वाभिमानी का?
उत्तरम्—श्रीः।

39. **प्रश्नः**—माध्वमते रजोऽभिमानी कः?
उत्तरम्—भूः।

40. **प्रश्नः**—माध्वमते तमोभिमानी का?
उत्तरम्—दुर्गा।

41. **प्रश्नः**— द्वैतवेदान्तानुसारेण जगतः किमस्ति?
उत्तरम्—सत्यम्।

42. **प्रश्नः**— सत्त्वगुणस्य स्वरूपं कति, कानि च तानि?
उत्तरम्— त्रयः, 1. लघुप्रकाशः, 2. आनन्दकारकः, 3. श्वेतवर्णः।

43. **प्रश्नः**—माध्वमते पञ्चप्रकारकाः भेदाः के सन्ति?
उत्तरम्—1. ईश्वर-जीवयोर्भेदः, 2. ईश्वर-जडयोर्भेदः, 3. जीव-जडयोर्भेदः, 4. जीव-अपरजीवयोर्भेदः, 5. जड-अपरजडयोर्भेदः।

44. **प्रश्नः**—जीवब्रह्मणोर्मध्ये बिम्ब-प्रतिबिम्बवादस्य पोषकः कः?
उत्तरम्—मध्वः।

45. **प्रश्नः**—माध्वमते मुक्ति-साधकः कः?
उत्तरम्—पञ्चविधभेदानां परिज्ञानम्।

46. **प्रश्नः**—उपासनायाः कौ द्वौ भेदौ?
उत्तरम्—1. सन्ततशास्त्राभ्यासरूपा, 2. ध्यानरूपाश्च।

47. **प्रश्नः**—चतुष्प्रकारकाः मोक्षाः के सन्ति?
उत्तरम्—1. कर्मक्षयः, 2. उत्क्रान्तिः, 3. अर्चिरादिमार्गः, 4. भोगः।

48. **प्रश्न:**—मुक्त्यवेदान्ते चतुष्प्रकारका: मोक्षा: के सन्ति?

उत्तरम्—1. सालोक्य:, 2. सामीप्य:, 3. सारूप्य:, 4. सायुज्य:।

49. **प्रश्न:**—समस्तप्राणेषु श्रेष्ठ: क:?

उत्तरम्—मनुष्यम्।

50. **प्रश्न:**—अर्थज्ञेयं कस्य किम्?

उत्तरम्—वेद:।

51. **प्रश्न:**—अपौरुषेयवाक्यस्य पञ्चविधय: के सन्ति?

उत्तरम्—विधि-मन्त्र-नामधेय-निषेध-अर्थवादभेदात्।

52. **प्रश्न:**—आम्नायविभक्तिर्द्वे के सन्ति?

उत्तरम्—लौकिक: वैदिकश्च।

53. **प्रश्न:**—असत्ख्यातिवादिन: के सन्ति?

उत्तरम्—बौद्धा:।

54. **प्रश्न:**—अख्यातिवादिन: के सन्ति?

उत्तरम्—प्राभाकरादिमीमांसका:।

55. **प्रश्न:**—अन्यथाख्यातिवादिन: के सन्ति?

उत्तरम्— नैयायिका:।

56. **प्रश्न:**—अनिर्वचनीयताख्यातिवादिन: के सन्ति?

उत्तरम्—वेदान्तिन:।

अद्वैतवेदान्त:-Code-73 (मम) अद्वैतवेदान्तस्य अवबोधनम्-ब्रह्म, जीव:, जगत्, माया, प्रधानकारणवादनिरास:, प्रस्थानत्रयी, महावाक्यार्थ:, मोक्ष: एवं तत्सम्बन्धिवस्तुनिष्ठ प्रश्नोत्तराणि

वेदान्तदर्शनं सर्वदर्शनमूर्धन्यम् अस्ति। वेदस्यान्तिम-सिद्धान्तस्य निरूपकत्वादुपनिषदामिवास्यापि 'वेदान्त' इत्येषा संज्ञा वर्तते। भगवान् बादरायणव्यास: ब्रह्मसूत्राणां निर्माणं कृतवान्। ब्रह्मसूत्रस्य भाष्यकर्तृषु सुविदिता भाष्यकारा: इमे सन्ति-1. शङ्कर:, 2. भास्कर:, 3. रामानुज:, 4. मध्व:, 5. निम्बार्क:, 6. श्रीकण्ठ:, 7. श्रीपति:, 8. वल्लभ:, 9. विज्ञानभिक्षु:, 10. बलदेव:। एतेषु भाष्यकारेषु शङ्करस्य शाङ्करभाष्यं शारीरकभाष्यम् अद्वैतम् प्राचीनतमञ्च भाष्यं वर्तते। आचार्यशंकर: अद्वैतवादी अस्ति। ज्ञानमार्गस्य चरमं लक्ष्यम् अद्वैतमिति मन्यते। तस्यानुयायिन: सुरेश्वराचार्यपद्मपादाचार्यप्रभृतय: चत्वार: प्रसिद्धा: शिष्या: सन्ति। अद्वैतवादपरकमेव साहित्यं स्वयं नितरां विशालं वर्तते। ब्रह्मसूत्राध्ययनेन विदितं भवति यद् बादरायणादपि प्राक् बहव आचार्या वेदान्ततत्त्वं विचारयामासु:। 'अद्वैतवाद:' सर्वेष्वपि वादेषु श्रेष्ठ: गुरुतमश्च अस्ति। अद्वैतवेदान्तदर्शनं ब्रह्मात्मैकमेव सत्तात्मकां सत्यां मन्यमानं सकलमपि जगत्प्रपञ्चं हि असत्यं प्रतिपादयति। तस्मादिदमेव ज्ञातं जायते यत् जगदसत्यमात्मैव सत्य:। आत्मा अस्ति स्वत:सिद्ध: पदार्थ:। स तु सर्वेषामपि प्रमाणानां कारणमस्ति। यथा- य: सूर्य: संसारं प्रकाशयति स सूर्य: कथं प्रकाशित: क्रियेत। आत्मा ज्ञानं ज्ञाता च अस्ति।' आत्मा आत्मानं जानाति' त्वत्र य आत्मा कर्ता स एव कर्माप्यस्ति। आत्मन इदं वैशिष्ट्यं बोधयितुम् आचार्यशङ्कर: आह- दृष्टिर्द्विविधा भवति, नेत्रदृष्टि: आत्मदृष्टिश्च। अनित्या नेत्रदृष्टि:, नित्या आत्मदृष्टि: भवति। "आत्मास्ति ज्ञप्तिस्वरूपो नित्यश्च" इति आचार्यशंकरस्य वचनम्। शंकराचार्यविषये प्रसिद्धश्लोक:-

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित्।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्।

प्रस्थानत्रयी इत्यस्य आद्य उपलब्ध-भाष्यकार: शंकराचार्य: वर्तते। अस्य प्रसिद्धा: ग्रन्था:-

1. उपनिषद्भाष्य, 2. गीताभाष्य, 3. ब्रह्मसूत्रभाष्य, 4. माण्डूक्यकारिकाभाष्य, 5. विष्णुसहस्रनामभाष्य, 6. सनत्सुजातीयभाष्य, 7. सौन्दर्यलहरी, 8. उपदेशसाहस्री इत्यादय:। अस्य परमगुरु 'गौडपादाचार्य:' अद्वैतस्य प्रथमाचार्य: अस्ति। अस्य कीर्तिस्तम्भ: 'माण्डूक्यकारिका' रचना वर्तते। अस्मिन् ग्रन्थे चत्वारि प्रकरणानि-1. आगम-प्रकरणम्, 2. वैतथ्य-प्रकरणम्, 3. अद्वैत-प्रकरणम्, 4. अलातशान्ति-प्रकरणम् एवं च 215 कारिका: वर्तन्ते।

ब्रह्म-विचार:—आचार्य: ब्रह्म-स्वरूपस्य द्विविधं लक्षणं स्वीक्रियते-1. स्वरूपलक्षणम्, 2. तटस्थलक्षणम्। स्वरूपलक्षणं पदार्थस्य सत्यं पारमार्थिकं रूपं बोधयति, तटस्थलक्षणं कतिपयकालावस्थायिन आगन्तुकान् गुणान् एव निर्दिशति। निर्विकल्प-निरुपाधिक-निर्विकारं ब्रह्म

स्वरूपलक्षणेन लक्ष्यते। सविकल्पकं सोपाधिकं सविकारं च तत् तटस्थलक्षणेन विपर्यीक्रियते। अर्थात् ब्रह्मणो यत् पारमार्थिकं रूपमस्ति तत्तस्य स्वरूपलक्षणमस्ति। यच्च ब्रह्मण उत्पत्तिस्थितिलयविधायकं हि अपारमार्थिकं रूपमस्ति तत्तस्य तटस्थलक्षणमस्ति। ब्रह्म निर्गुणसगुणभेदेन द्विविधम्। निर्गुणब्रह्म एव पारमार्थिकं सत्। आचार्यशंकरमतेन उपनिषदां प्रतिपाद्यो विषयो निर्गुणब्रह्म एव। सगुणं ब्रह्म तु जगदिव मायाविशिष्टम्। शंकरमतेन ब्रह्म सजातीय-विजातीय-स्वगतभेदशून्यम्। ब्रह्म जगत: उत्पत्ति-स्थिति-लय इत्येतेषां कारणमस्ति।

जीव-विचार—अन्त:करणावच्छिन्नचैतन्यं जीव: इति कथ्यते। जीवस्य स्वरूपविषये शांकरभाष्ये-"**अस्ति आत्मा जीवाख्य: शरीरेन्द्रियपञ्चकराध्यक्ष: कर्मफलसम्बन्धी**" इत्यनेन स्पष्टं भवति यत् जीवात्मास्ति नित्य: शुद्धबुद्ध-मुक्तस्वभाव:। शरीराद्युपाधीनामेवोत्पत्ति: भवति। स च चैतन्यरूपोऽस्ति। जीवस्य सन्ति त्रीणि शरीराणि-1. स्थूलशरीरम्, 2. सूक्ष्मशरीरम्, 3. कारणशरीरम्। स्थूलशरीरं पञ्चभूतकृतमस्ति। सूक्ष्मशरीरं प्राणमनोबुद्धीन्द्रियात्मकं विद्यते। कारणशरीरं हि अविद्यानिर्मितावरणमस्ति। अर्थात् जाग्रदवस्थायां जीवो बाह्यविषयान् इन्द्रियै: जानाति, स्वप्ने मनसा सूक्ष्मवृत्तिभिश्च जानाति, सुषुप्त्याम् अविद्याया: सूक्ष्मवृत्तिभि: आवृतोऽसौ भवति आनन्दैकरस:। जीवस्य हि वृत्तय उभयमुख्यो भवन्ति बहिर्मुख्यस्तान् विषयान् प्रकाशयन्ति, अन्तर्मुख्यश्च ता 'अहम्' इत्येतद् भावमभिव्यञ्जयन्ति।

जगत्-विचार:—जीवो जगच्चेत्येतौ द्वौ पदार्थौ स्थूलदृष्ट्यैव दृश्येते। जगत्सत्ता तु व्यावहारिकी। व्यवहारार्थं जगत्-सत्ता स्वीक्रियते। जगत् सत्यं असत्यं वा? '**जगन्मिथ्यात्व**' इत्यस्य सिद्धान्त: सर्वसाधारणशिक्षित-पुरुषाणाम् अपि धारणा वर्तते यत् अद्वैतमतानुसारं जगत् नितान्तं असत्यपदार्थो वर्तते। नित्य-परिवर्तनशील: परिणाम-स्वभाव: एव जगत्। परिणाम:, प्रवृत्ति: वा परिवर्तनं एव जगत: स्वभाव: वर्तते। जगत: सर्वा अपि कला: सर्ग-स्थिति-प्रत्यवहारदशासु सततं चैतन्यमवलम्बमाना: राजन्ते। जगत: समस्तपदार्था: स्वप्नवत् मिथ्याभूता: सन्ति। अत: जगति पारमार्थिकी स्थिति न भूते सति व्यावहारिकी सत्ता मन्यते।

माया-विचार:—वेदान्तदर्शने मायासंज्ञकमेकं तत्त्वं वर्णितमस्ति। आचार्यशंकरो ब्रूते यत् माया भगवतो ब्रह्मणोऽव्यक्तशक्तिरस्ति। सा माया त्रिगुणा अविद्यारूपिणी च। न तदीय आदिर्ज्ञायते। सैव जगत् इदम् उत्पादयति-

अव्यक्तनाम्नी परमेशशक्ति-
रनाद्यविद्या त्रिगुणात्मिका या:
कार्यानुमेया सुधियैव माया
यया जगत् सर्वमिदं प्रसूयते।।

तस्या अनिर्वचनीयत्वमपि आचार्य आह-

सन्नाप्यसन्नाप्युभयात्मिका नो
भिन्नाप्यभिन्नाप्युभयात्मिका नो।
साङ्गाप्यनङ्गाप्युभयात्मिका नो
महाद्भुतानिर्वचनीयरूपा।।

मायाया आवरणविक्षेपसंज्ञके द्वे शक्ती स्त:। ते किं कुरुत:? कीदृश्यौ च ते? इत्यस्मिन् विषये दृग्दृश्यविवेके प्रोक्तमिदम्-

शक्तिद्वयं हि मायाया: विक्षेपावृतिरूपकम्।
विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत् सृजेत्।।
अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयो:।
आवृणोत्यपरा शक्ति: सा संसारस्य कारणम्।।

अविद्या (माया) सत्यमावृणोति असत्यञ्च विस्तारयति। यदैव ज्ञानज्योति: प्रादुर्भवति तदैव तद् अज्ञानं (अविद्यामाया) निराकृतं जायते। आचार्यशंकर: अविद्या-अज्ञान-माया-प्रकृति एकस्मिन्नेवार्थे प्रयुङ्क्ते; परं परवर्तिनो वेदान्तिन: तत्र भेदं दर्शयन्त: प्राप्यन्ते। माया शुद्धसत्त्वप्रधानास्ति। अविद्यास्ति मलिनसत्त्वप्रधाना। माया ईश्वरस्योपाधिरस्ति जीवस्य च अविद्या। सानन्दो 'माया' समष्टिगतज्ञानं किन्तु अविद्यां व्यष्टिगतमज्ञानमिति नाम्ना व्यवहरति।

प्रधानकारणवादनिरास:—शंकराचार्य: विज्ञानवादी बौद्धानां सिद्धान्तान् अप्रामाणिकं मत्वा तेषु युक्ती: प्रदर्शयति तेषु प्रधानयुक्ति:-जगत्-असत्यं स्वीकृत्य विज्ञानस्यं सत्यं मत्ये सति प्रतिदिनस्य लोकानुभवस्य निराकरणं भवति (ब्रह्मसू०2/2/8) इति। शंकरभाष्ये-जगत्तु व्यावहारिकी। व्यवहारार्थं जगत्-सत्ता स्वीक्रियते। इत्थं बौद्धानां जगद्विषयककल्पना तर्कशून्य:, अप्रामाणिक:, अविश्वसनीयश्च मन्यते। **अन्यथासिद्धिशून्यत्वे सति नियतपूर्ववर्तित्वं कारणत्वम्।** कारणन्तु कार्यस्य पूर्वं निश्चितरूपेण उपस्थितं भवति। यथा घटस्य मृत्तिका-चक्र-कुम्भकारा: नियतपूर्ववर्तिन: सन्ति। एभिर्विना घट: न निर्मीयते। तत्र यदि संयोगवशाद् गर्दभोऽप्युपस्थितो भवति, परन्तु स: संयोगेनैव तत्र कार्ये तस्य उपस्थिति: न अनिवार्या। अत: स: घटस्य कारणं नास्ति।

कारणं त्रिविधम्-1. समवायि, 2. असमवायि, 3. निमित्तभेदात्।

1. समवायिकारणम्–यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम्। यथा–तन्तवः पटस्य। पटश्च स्वगतरूपादेः। तन्तुषु समवायेन सम्बद्धं सत् पटात्मकं कार्यं जायते। यथा मृत्तिका घटस्य समवायिकारणम्।

2. असमवायिकारणम्–कार्येण कारणेन वा सह एकस्मिन्नर्थे समवेतं सत् कारणम् असमवायिकारणम्। यथा–तन्तुसंयोगः पटस्य। तन्तुरूपं पटरूपस्य। जन्यद्रव्यमात्रेऽवयवसंयोगस्यैव असमवायिकारणम्। यथा तन्तवः पटस्य समवायिकारणं भवति, यदा तेषां संयोगः भवति स एव असमवायिकारणम्।

3. निमित्तकारणम्–समवायि-असमवायिकारणाभ्यां परं भिन्नं कारणं तृतीयं निमित्तकारणम्। यथा पटस्य तुर्यादिः। द्वैतवादी-पाशुपत-शैव-नैयायिकादिदार्शनिकाचार्याणां मतानुसारं तु ईश्वरः जगतः निमित्तकारणम्। वेदान्तस्य परिनिष्ठितमतं यत् ब्रह्म उपादानकारणम् एवं निमित्तकारणमपि, जगतः उत्पत्तिः चेतनपदार्थेन एव भवति।

प्रस्थानत्रयीविवेचनम्–भारतीयदर्शनसाहित्ये त्रयः प्रस्थानग्रन्थाः सन्ति। **1. भारतीयविचारशास्त्रस्य श्रेष्ठोपजीव्यग्रन्थत्वात् उपनिषदः प्रस्थानत्रय्यां प्रथमप्रस्थानत्वेन गृह्यते**। उपनिषदः पराविद्या इति पदेन व्यपदिश्यन्ते। 'ब्रह्मविद्या' इत्येतया अपरपया च संज्ञया सुविदितास्ता विदुषां संसारे। ते वेदान् अवलम्बमाना मानवजीवनस्य चरमं लक्ष्यं तत्प्राप्तिसाधनञ्चोपदिशन्ति। **2. श्रीमद्भगवद् गीता द्वितीयं प्रस्थानमिति कथ्यते**। गीताया द्वितीयप्रस्थानत्वम् अधःश्लोकेन स्पष्टमेव प्रकटीक्रियते–

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥

3. बादरायणव्यासप्रणीतं ब्रह्मसूत्रं तृतीयप्रस्थानमस्ति। भारतीया वैदिकधर्मग्रन्था दर्शनानि च इमामेव प्रस्थानत्रयीमवलम्बन्ते। उपनिषदां गीताब्रह्मसूत्रयोः आश्रयप्रदायिनीत्वात् ताः सन्ति महनीयतमाः।

महावाक्यार्थविवेचनम्–सदानन्दस्य **'तत्त्वमसि'** इत्येतन्महावाक्यं यद्यपि आत्मब्रह्मणोरैक्यं प्रतिपादयति। वेदान्तविदो वदन्ति यत् अभिधयास्य वाक्यस्य यथार्थबोधासम्भवाल्लक्षणाङ्गीक्रियते। अत्र जहदजहल्लक्षणया यथार्थोऽवगम्यते। 'तत्-त्वम्' इत्येतयोर्मध्ये विद्यमान-परोक्षत्वापरोक्षत्वविशिष्टांशौ परस्परविरुद्धौ परिहरन्तीयं लक्षणा अखण्डचैतन्यांशञ्च परिगृह्णन्ती तयोरैक्यमुपपादयति।

सामानाधिकरण्यं च विशेषणविशेष्यता।
लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम्॥

अत्र पञ्चदशीकारः ब्रूते–नास्य महावाक्यस्य अर्थः संसर्गो न च विशेषो अपितु अखण्डैकरसचैतन्यमेवास्ति–

संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः॥

दार्शनिकाः अस्य सम्पूर्णवाक्यस्य व्याख्यामेव महावाक्यार्थस्य संज्ञा दीयते। **'तत्त्वमसि'** इदं वाक्यं साक्षात् अखण्डब्रह्मपदस्य विरुद्धार्थकत्वेन प्रतिपादनाभावो वर्तते। अत्र तत् एवं त्वम् इत्यस्य समानाधिकरणसम्बन्धः मन्यते। भिन्नार्थपदानां एक एव अर्थे बोधार्थसम्बन्धः समानाधिकरणं भवति।

मोक्ष-विवेचनम्–मानवजीवनस्य उत्कृष्टतमः पुरुषार्थो मोक्षो मतः। मनुष्यजीवनमवाप्यापि मोक्षार्थं यो न यतते स आत्महा–

यः स्वात्ममुक्तौ न यतेत मूढधीः।
स ह्यात्महा स्वं विनिहन्त्यसद्ग्रहात्॥

मोक्षो हि ज्ञानेनोपलभ्यते न च कर्मणा। कर्म फलोत्पादकत्वाद्धेयमस्ति। अविद्या कामस्य कारणम्। कामश्चासक्तिद्वेषयोः। फलोत्पादकत्वादेषां सर्वेषां त्याग इष्टः। कर्माणि कामं शुभानि स्युर्वा अशुभानि सर्वाण्यपि फलानि प्रयुक्ते। यदा विद्याग्निना कर्मबीजानि दह्यन्ते तदा मोक्षोऽधिगम्यते। शंकराचार्यो ब्रवीति "ज्ञानं विना न मोक्षः"। ज्ञानमेव परब्रह्म। कथितं च–

ज्ञानं नैवात्मनो धर्मो न गुणो वा कथञ्चन।
ज्ञानस्वरूप एवात्मा नित्यः सर्वगतः शिवः॥

वेदान्तस्य सुदृढं मतमिदं यन्मुक्तिर्ब्रह्मतत्त्वस्य ज्ञानादेव भवितुमर्हति। पञ्चदशी वक्ति–

मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा।
स्वप्नबोधं विना नैव स्वस्वप्नो हीयते यथा॥

अद्वैतवेदान्तस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— सर्वदर्शनमूर्धन्यं दर्शनं किम्?
उत्तरम्— वेदान्तदर्शनम्।

2. **प्रश्नः**—वेदस्यान्तिमसिद्धान्तस्य निरूपकत्वादुपनिषदां का अन्वर्था संज्ञा?
उत्तरम्— वेदान्तः।

3. **प्रश्नः**—ब्रह्मसूत्राणां निर्माणं कः कृतवान्?
उत्तरम्—पराशरपुत्रमहर्षिवादरायणव्यासः।

4. **प्रश्नः**—ब्रह्मसूत्रस्य भाष्यकर्तृषु सुविदिताः भाष्यकाराः के सन्ति?
उत्तरम्—1. शङ्करः, 2. भास्करः, 3. रामानुजः, 4. मध्वः, 5. निम्बार्कः, 6. श्रीकण्ठः, 7. श्रीपतिः, 8. वल्लभः, 9. विज्ञानभिक्षुः, 10. बलदेवः।

5. **प्रश्नः**—अद्वैतवादीदर्शनस्य प्राचीनतम-शारीरकभाष्यं केन रचितः?
उत्तरम्—अद्वैतवादी-शंकरेण।

6. **प्रश्नः**—ज्ञानमार्गस्य चरमं लक्ष्यं किं मन्यते?
उत्तरम्—अद्वैतदर्शनम्।

7. **प्रश्नः**—सर्वेष्वपि वादेषु श्रेष्ठो गुरुतमश्च वादः कः?
उत्तरम्— अद्वैतवादः।

8. **प्रश्नः**—ब्रह्मसंज्ञिकामेव सत्तामेकां सत्यां मन्यमानं सकलमपि जगत्प्रपञ्चं हि असत्यं कः प्रतिपादयति?
उत्तरम्—अद्वैतवेदान्तदर्शनम्।

9. **प्रश्नः**— स्वतःसिद्धः पदार्थः कः?
उत्तरम्—आत्मा।

10. **प्रश्नः**—सर्वेषामपि प्रमाणानां कारणं किमस्ति?
उत्तरम्—आत्मा।

11. **प्रश्नः**—ज्ञानं ज्ञाता च किमस्ति?
उत्तरम्— आत्मा।

12. **प्रश्नः**—आचार्यशङ्करमते द्विविधा दृष्टिः के स्तः?
उत्तरम्—अनित्या-नेत्रदृष्टिः, नित्या-आत्मदृष्टिश्च।

13. **प्रश्नः**—शंकराचार्यविषये प्रसिद्धश्लोकः कः?
उत्तरम्—अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित्। षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्।

14. **प्रश्नः**—भाष्यकारशंकराचार्यस्य प्रसिद्धाः ग्रन्थाः के?
उत्तरम्—1. उपनिषद्भाष्य, 2. गीताभाष्य, 3. ब्रह्मसूत्रभाष्य, 4. माण्डूक्यकारिकाभाष्य, 5. विष्णुसहस्रनामभाष्य, 6. सनत्सुजातीयभाष्य, 7. सौन्दर्यलहरी, 8. उपदेशसाहस्री इत्यादयः।

15. **प्रश्नः**—आचार्यशंकरस्य परमगुरु एवं अद्वैतस्य प्रथमाचार्यः कः?
उत्तरम्—गौडपादाचार्यः।

16. **प्रश्नः**—गौडपादाचार्यस्य कीर्तिस्तम्भः रचना का?
उत्तरम्—माण्डूक्यकारिका।

17. **प्रश्नः**—माण्डूक्यकारिका ग्रन्थे कति प्रकरणानि, कारिकाश्च वर्तते?
उत्तरम्—चत्वारि, 1. आगम. 2. वैतथ्य्, 3. अद्वैत, 4. अलातशान्तिप्रकरणानि, एवं च 215 कारिकाः वर्तन्ते।

18. **प्रश्नः**—ब्रह्म-स्वरूपस्य द्विविधं लक्षणं के?
उत्तरम्—1. स्वरूपलक्षणम्, 2. तटस्थलक्षणम्।

19. **प्रश्नः**—पदार्थस्य सत्यं पारमार्थिकं रूपं किं बोधयति?
उत्तरम्—स्वरूपलक्षणम्।

20. **प्रश्नः**—सविकल्पकं सोपाधिकं सविकारं किम्?
उत्तरम्—तटस्थलक्षणम्।

21. **प्रश्नः**—ब्रह्म कतिविधं कानि च तानि?
उत्तरम्—निर्गुणसगुणभेदेन द्विविधम्।

22. **प्रश्नः**—आचार्यशंकरमतेन उपनिषदां प्रतिपाद्यो विषयो किं भवति?
उत्तरम्— निर्गुणब्रह्म एव।

23. **प्रश्नः**—जगदिव मायाविशिष्टं ब्रह्म किं भवति?
उत्तरम्—सगुण ब्रह्म।

24. **प्रश्नः**—शंकरमतेन जगतः उत्पत्ति, स्थिति, लय इत्येतेषां कारणं किमस्ति?
उत्तरम्—ब्रह्म।

25. **प्रश्नः**—शांकरभाष्ये जीवस्य स्वरूपविषये किं कथितम्?
उत्तरम्—अस्ति आत्मा जीवाख्यः शरीरेन्द्रिय-पञ्जराध्यक्षः कर्मफलसम्बन्धी।

26. **प्रश्नः**—जीवस्य त्रीणि शरीराणि कानि सन्ति?
उत्तरम्—1. स्थूलशरीरम्, 2. सूक्ष्मशरीरम्, 3. कारणशरीरम्।

27. **प्रश्नः**—पञ्चभूतकृतं शरीरं किमस्ति?
उत्तरम्—स्थूलशरीरम्।

28. **प्रश्नः**—प्राणमनोबुद्धीन्द्रियात्मकं शरीरं किमस्ति?
उत्तरम्—सूक्ष्मशरीरम्।

29. **प्रश्नः**—अविद्यानिर्मितावरणं शरीरं किमस्ति?
उत्तरम्—कारणशरीरम्।

30. **प्रश्नः**—स्थूलदृष्ट्यैव कौ द्वौ पदार्थौ दृश्येते?
उत्तरम्—जीवो जगच्चेत्येतौ द्वौ पदार्थौ।

31. **प्रश्नः**—व्यावहारिकी सत्ता का?
उत्तरम्—जगत्सत्ता।

32. **प्रश्नः**—जगत् सत्यो असत्यो वा?
उत्तरम्—अद्वैतमतानुसारं जगत् नितान्त असत्यपदार्थः।

33. **प्रश्नः**—जगतः समस्तपदार्थः किंवत् अस्ति?
उत्तरम्—स्वप्नवत् मिथ्याभूतोऽस्ति।

34. **प्रश्नः**—'माया भगवतो ब्रह्मणोऽव्यक्तशक्तिरस्ति' इति केन कथ्यते?
उत्तरम्—आचार्यशंकरेण।

35. **प्रश्नः**—अद्वैतवेदान्ते त्रिगुणा अविद्यारूपिणी च का?
उत्तरम्— माया।

36. **प्रश्नः**—शुद्धसत्त्वप्रधाना का अस्ति?
उत्तरम्—माया।

37. **प्रश्नः**—मलिनसत्त्वप्रधाना का अस्ति?
उत्तरम्—अविद्या।

38. **प्रश्नः**—समष्टिगतज्ञानमिति नाम्ना का व्यवहरति?
उत्तरम्—सानन्दो माया।

39. **प्रश्नः**—व्यष्टिगतमज्ञानमिति नाम्ना का व्यवहरति?
उत्तरम्—अविद्या।

40. **प्रश्नः**—शंकराचार्यमते प्रधानकारणवादः कः?
उत्तरम्—अन्यथासिद्धिशून्यत्वे सति नियतपूर्ववर्तित्वं कारणत्वम्।

41. **प्रश्नः**—त्रिविधानि कारणानि कानि सन्ति?
उत्तरम्—1. समवायि, 2. असमवायि, 3. निमित्तभेदात्।

42. **प्रश्नः**—यत्समवेतं कार्यमुत्पद्यते तत् किम्?
उत्तरम्—समवायिकारणम्। यथा–तन्तवः पटस्य।

43. **प्रश्नः**—घटस्य समवायिकारणं किम्?
उत्तरम्—मृत्तिका।

44. **प्रश्नः**—कार्येण कारणेन वा सह एकस्मिन्नर्थे समवेतं सत् कारणं किम्?
उत्तरम्—असमवायिकारणम्। यथा–तन्तुसंयोगः पटस्य।

45. **प्रश्नः**—समवायि-असमवायिकारणाभ्यां परं भिन्नं कारणं किम्?
उत्तरम्—निमित्तकारणम्। यथा–पटस्य तूर्यादयः।

46. **प्रश्नः**—द्वैतवादी-पाशुपत-शैव-नैयायिकादि-दार्शनिकाचार्याणां मतानुसारं तु ईश्वरः जगतः किं कारणम्?
उत्तरम्—निमित्तकारणम्।

47. **प्रश्नः**—उपादानकारणम् एवं निमित्तकारणं किं भवति?
उत्तरम्—ब्रह्म।

48. **प्रश्नः**—भारतीयदर्शनसाहित्ये त्रयः प्रस्थानग्रन्थाः के सन्ति?
उत्तरम्—1. उपनिषदः, 2. श्रीमद्भगवद् गीता, 3. बादरायणव्यासप्रणीतं ब्रह्मसूत्रम्।

49. **प्रश्नः**—'तत्त्वमसि' इत्येतन्महावाक्यं कस्य वर्तते?
उत्तरम्—सदानन्दस्य।

50. **प्रश्नः**—आत्मब्रह्मणोरैक्यं किं महावाक्यं प्रतिपादयति?
उत्तरम्—तत्त्वमसि।

51. **प्रश्नः**—दार्शनिकाः 'तत्त्वमसि' अस्य सम्पूर्णवाक्यस्य व्याख्यानं का संज्ञा दीयते?
उत्तरम्—महावाक्यार्थस्य संज्ञा।

52. **प्रश्नः**—तत् एवं त्वम् इत्यस्य कः सम्बन्धः?
उत्तरम्—समानाधिकरणसम्बन्धः।

53. **प्रश्नः**—मानवजीवनस्य उत्कृष्टतमः पुरुषार्थः कः?
उत्तरम्—मोक्षः।

54. **प्रश्नः**—मोक्षः केन उपलभ्यते?
उत्तरम्—ज्ञानेन।

55. **प्रश्नः**—'ज्ञानं विना न मोक्षः, ज्ञानमेव परब्रह्म' इति कस्य वचनम्?
उत्तरम्—शङ्कराचार्यस्य।

Z-(Code-25) व्याख्यात्मक-समीक्षात्मक-प्रश्नाः)
(यय) ईश्वरकृष्णस्य सांख्यकारिका एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

ईश्वरकृष्णस्य सांख्यकारिका सांख्यस्य लोकप्रियः प्रामाणिकश्च ग्रन्थः वर्तते। तत्त्वानां गणनापूर्वकं निर्धारणमेवास्य ग्रन्थस्य नामकरणमस्ति। अत्र चतुर्विंशतिः तत्त्वानि कथ्यन्ते। **'सम्यक् प्रकथनम्'** इत्येतदपि संख्याया अन्योऽर्थोऽपि कथ्यते। **'संख्या चर्चा विचारणा'**। अस्मिन् विशाले ब्रह्माण्डे येषां तत्त्वानां सम्भावना क्रियते, तेषां सत्यासत्यं विवेचनमेव सांख्यशास्त्रस्य विवेच्यो विषयः। तर्कवागीशानुसारेण– "पञ्चविंशतितत्त्वानां संख्याविचारः। तमधिकृत्य कृतो ग्रन्थः सांख्य इति पदव्युत्पत्तिः संगच्छते।" आचार्यः कपिलः सांख्यशास्त्रस्य आद्यप्रवर्तकः। ईश्वरकृष्णेन रचिता सांख्यकारिका सांख्यदर्शनस्य महत्त्वपूर्णो ग्रन्थोऽस्ति। "दुःखत्रयाभि" इति पदात् प्रारभ्य एषो ग्रन्थः दुःखनाशाय **'व्यक्ताव्यक्तज्ञ'** इति तत्त्वानि विवेचयति। सांख्यकारिकाकारः प्रधानस्य सिद्ध्यर्थं **सत्कार्यवादः** इति सिद्धान्तं प्रतिपादयति–

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्॥

सत्कारणादेव सत्कार्योत्पत्तिर्जायते, किंवा कार्यं स्वोत्पत्तेः पूर्वमपि कारणे विद्यते। प्रकृतेः उपलब्धिः कार्येणैव भवति। महदादयस्तस्याः कार्यं प्रकृतेः कारणस्ति। कारणकार्ययोः सम्बन्धः शाश्वतं विना कारणेन कार्यं न जायते। सांख्यकारिकानुसारं सत्कार्यवास्य स्वरूपम्–

असदकरणादुपादानग्रहणात्, सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात्, कारणभावाच्च सत्कार्यम्।

सांख्यदर्शने एतदेव सत्कार्यमस्ति। सांख्यकारिकाकारेण अत्र पञ्च युक्तयः प्रस्तूयन्ते। यथा–

1. **असदकरणात्**–यदि किमपि सद् वर्तते तस्य कारणमपि सदस्ति। यदि असत् तस्य कारणमपि असत् भवति। यथा सत् असत् न भवति तथा असत् सत् न भवति। यथा–आकाशे कुसुमोत्पत्तिः न भवति। अतः सतः कारणादेव महदादयः जायन्ते। तत् कारणमस्त्यव्यक्तम्, अतः सत्कार्यम्। यथा–पीडनेन तिलेषु तैलम्। अवघातेन धान्येषु तण्डुलम् इत्यादयः।

2. **उपादानग्रहणात्**–उपादानैः कारणविशेषैः एव विशिष्टानां कार्याणाम् आविर्भावः। उपादानं कारणं तस्य ग्रहणात्। एतदेव समवायिकारणं भवति। कार्यं सदैवोपादाने कारणे भवति।

3. **सर्वसम्भवाभावात्**–प्रत्यक्षविरोधात् न हि सर्वेभ्यः कारणेभ्यः सर्वं कार्यमुत्पद्यते। यथा–मृत्पिण्डं घटस्यैव कारणं न तु पटस्य। तस्मात्सदेव कारणम्। कारणे कार्यस्य पूर्वमेव सम्बन्धः स्वीकार्यम्।

4. **शक्तस्य शक्यकरणात्**–यत्कारणं यत्कार्यस्योत्पत्तौ समर्थं भवेत्, तत्कारणं तस्यैव जनकः इति स्वीकार्यम्। यथा–शक्तमेव कारणं नाशक्तं कारणमस्ति। शक्तियुक्ताद्बीजादेवाङ्कुरः उत्पद्यते।

5. **कारणभावात्**–कार्यं कारणरूपमेव भवति। अर्थात् कार्यकारणात्मकं भवति। यथा–यवेभ्यो यवा।

पुरुषः–सांख्यकारिकाकारः सर्वप्रथमं दुःखानां वर्णनं करोति। पुनः तेषां निवारणाय "व्यक्ताव्यक्तज्ञानां ज्ञानमनिवार्यम्" इति कथयति। व्यक्तस्तु महदादयः अव्यक्तं प्रधानं वा प्रकृतिरस्ति। तस्यास्तित्वम् वर्णयित्वा अधुना सः पुरुषस्य अस्तित्वप्रतिपादनार्थमेवाह–"व्यक्ताव्यक्तज्ञविज्ञानात् मोक्षः प्राप्यते।" अत्र पुनः प्रश्नो जायते यत् अस्ति पुरुषः कस्मात्? तर्हि कथ्यते–

संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च॥

अर्थात् संघातपरार्थत्वात्, त्रिगुणादिविपर्ययात्, अधिष्ठानात्, भोक्तृभावात्, कैवल्यार्थं प्रवृत्तेः च पुरुषोऽस्ति इति। चतुर्विंशतितत्त्वात्मकम् एतत् संघातः परार्थे एव भवति। यत्र त्रिगुणानामभावो भवति तत्रैव पुरुषः। अर्थात् त्रैगुण्यादिधर्मरहितस्य पुरुषस्य अस्तित्वं सिद्धम्। पुरुषाऽधिष्ठितं प्रधानं वर्तते। चतुर्विंशतितत्त्वानां भोक्ता तु पुरुष एव अस्ति भोग्यत्वात्। 'कैवल्यार्थं प्रवृत्तेश्च' इति कैवल्यं मोक्षः। इत्थमेव अस्य पुरुषस्य बहुत्वमपि सिद्धं कुर्वन् ईश्वरकृष्णेन कथितम् इत्थमेव–

जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव॥

अनेन प्रकारेण पुरुषस्य बहुत्वं सिध्यति।

प्रकृति-स्वरूपम्–अहेतुमती-नित्य-व्यापि-निष्क्रिय-एक-अनाश्रित-अलिंग-निरवयव-स्वतन्त्र-त्रिगुणात्मक-अविवेकि-विषय-सामान्य-अचेतन-प्रसवधर्मि स्वरूपमस्ति। अत्र सांख्यकारिकाकारः कथयति–"मूलप्रकृतिः अविकृतिः" यतः सा कारणमस्ति कार्यं नास्ति। प्रकृतेः सत्ता वर्तते। तस्याः अनुपलब्धिः सौक्ष्म्यादेव अस्ति। "सौक्ष्यात्तदनुपलब्धिर्नाभावात्।" प्रकृतेः सुकुमारतां वर्णयन् ईश्वरकृष्णः कथयति–"प्रकृतेः सुकुमारतरं न किंचिदस्ति इति मे मतिर्भवति।"

सृष्टि-प्रक्रिया–जगतः उपादानकारणं त्रिगुणात्मिका प्रकृतिरस्ति। पुरुषतत्त्वेन सहास्याः संयोगो निमित्तं कारणमस्ति। उक्तमपि सांख्यकारिकाकारेण–

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः॥

अनेन कारिकांशेन सुस्पष्टं यत् प्रकृति-पुरुषयोः संयोगेन एव सृष्टिः सम्भवति। परिणामस्वरूपे त्रिगुणात्मिकेयं प्रकृतिः परिणमति नवीन-नवीनतत्त्वेषु। यथा–

प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि॥

अत्र प्रकृतेः गुणवैषम्यात् प्रथमं महत्–तत्त्वं जायते। तस्मात् महतः अहंकारः, अहंकाराद् एकादशेन्द्रियाणि पंचतन्मात्राणि च समुद्भवन्ति। पञ्चतन्मात्रेभ्यः जायन्ते पञ्चभूतानि। तत्र तन्मात्राणि शब्द-स्पर्श-रूप-रस-गन्धानि क्रमशः पंचमहाभूतानि आकाश-वायु-तेज-जल-पृथिव्यान्युत्पादयन्ति। एकादशेन्द्रियेषु चक्षु-श्रोत्र-घ्राण-रसना-त्वगाख्यानि पंचज्ञानेन्द्रियाणि इति अभिधीयन्ते ज्ञानकरणत्वात्। ते क्रमशः रूप-शब्द-गन्ध-रस-स्पर्शान् गृह्णन्ति। इतराणि कर्मेन्द्रियाणि वाक्-पाणि-पाद-पायु-उपस्थानि, वचनादान-विरहणोत्सर्गानन्दांश्च कुर्वन्ति। संकल्पविकल्पात्मकं ज्ञानकर्मेन्द्रियात्मकम् उभयात्मकं मनः संकल्पविकल्पात्मकं कृत्वा अहंकाराय प्रयच्छति, पुनश्च अहंकारः बुद्धौ प्रयच्छति, तदा बुद्धि-द्वारा पुरुषस्य अर्थप्रकाशनं सम्भवति।

प्रत्ययसर्गः–प्रतीयतेऽनेनेति बुद्धेः सृष्टिः 'प्रत्ययसर्गः' इति। बुद्धेः अष्टौ भावाः सन्ति। यथा धर्मादयः—धर्म-अधर्म-ज्ञान-अज्ञान-विराग-अविराग-ऐश्वर्य-अनैश्वर्याः। ते एव बुद्धेः परिणामाः सन्ति। प्रत्ययसर्गः चतुर्धा वर्तते–"*विपर्ययाऽशक्तितुष्टिसिद्ध्याख्यभेदात्*" अर्थात् विपर्यय-अशक्ति-तुष्टि-सिद्धयः परिणामाः भवन्ति। ईश्वरकृष्णकारिकाकारः 50 पञ्चाशत् 'तेषां भेदाः' इति कथयति–

एष प्रत्ययसर्गो विपर्ययाऽशक्तितुष्टि-सिद्ध्यः।
गुणवैषम्यविमर्दात् तस्य च भेदास्तु पञ्चाशत्॥
(सांख्य०का०46)

विपर्ययः–महर्षिणा पतञ्जलिना उक्तं यत्–"विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" इति। योगशास्त्रे अस्य पञ्चभेदाः कथिताः। यथा–अविद्या-अस्मिता-राग-द्वेष-अभिनिवेशा इति। **तुष्टिः**–'प्रकृतेः पुरुषस्य वैभिन्न्यं ज्ञात्वाऽप्यप्रवृत्तिः 'तुष्टिः'। तुष्टेः नवभेदाः–प्रकृतिः, उपादानं, कालः, भाग्यः, पार, सुपार, अनुत्तमाम्भ, उत्तमाम्भरूपा च। **सिद्धिः**–ज्ञानस्य प्राप्तिरेव सिद्धिः। सिद्धेः अष्टौ भेदाः–अणिमा-महिमा-गरिमा-लघिमा-प्राप्ति-प्राकाम्य-वशित्व-ईशित्वरूपाः। त्रिविधदुःखानामुच्छेदनम् अध्ययनं शब्दः ऊहः सुहृत्प्राप्ति दानश्च। ब्रह्मज्ञानेन मोक्षस्य प्राप्तिर्भवति। **कैवल्यम् अपवर्गः।** सांख्य-दर्शनस्य प्रमुखं प्रयोजनं 'दुःखनाशः' कैवल्यञ्चाप्तुमस्ति। सांख्यदर्शने प्रकृतिपुरुषयोः संयोगेन सृष्टिर्भवति। सांख्यकारिकाकारेण ग्रन्थस्य प्रारम्भ एव 'दुःखत्रयाभिघातात्' अनया कारिकया कृतः। 'व्यक्ताव्यक्तज्ञविज्ञानादेव' दुःखनाशो भवति। कर्मफलभोगानन्तरं यदा संस्काराः नश्यन्ति, तदा विवेकज्ञाननिष्ठात् पुरुषात् पृथग् भवति प्रवृत्तिः। पुरुषः प्राप्नोति कैवल्यम्। प्रकृतिपुरुषयोः परस्परमुदासीनो भावोऽपवर्गः।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—सांख्यस्य लोकप्रियः सांख्यकारिकाकारः कः?
   उत्तरम्— ईश्वरकृष्णः।
2. **प्रश्नः**— तत्त्वानां गणनापूर्वकं निर्धारण-ग्रन्थः कः?
   उत्तरम्—सांख्यकारिका।
3. **प्रश्नः**— चतुर्विंशतिः तत्त्वानि कुत्र कथ्यन्ते?
   उत्तरम्—सांख्यकारिकायाम्।
4. **प्रश्नः**— सांख्यकारिकायां कति कारिकाः सन्ति?
   उत्तरम्—70 सप्ततिः।
5. **प्रश्नः**— सांख्यकारिकायाः नामान्तरं किमस्ति?
   उत्तरम्—हिरण्यसप्ततिः।
6. **प्रश्नः**— सांख्यशास्त्रस्य विवेच्यो विषयः किमस्ति?
   उत्तरम्—सम्यक् प्रकथनं सत्यासत्यं विवेचनं च।

7. **प्रश्नः**— पञ्चविंशतितत्त्वानां सांख्यविचारः" इति कस्य विचारः?
   उत्तरम्—तर्कवागीशस्य।
8. **प्रश्नः**— सांख्यशास्त्रस्य आद्यप्रवर्तकः कः?
   उत्तरम्— आचार्यः कपिलः।
9. **प्रश्नः**— सांख्यकारिकायाः उपजीव्यं किम्?
   उत्तरम्—सांख्यसूत्रम्।
10. **प्रश्नः**— सांख्यदर्शने कति तत्त्वानि स्वीकृतानि सन्ति?
    उत्तरम्—25 पञ्चविंशतिः।
11. **प्रश्नः**— सांख्यदर्शने अन्तःकरणं कतिविधम्?
    उत्तरम्—त्रिविधम्।
12. **प्रश्नः**— "दुःखत्रयाभि" दुःखनाशाय 'व्यक्ताव्यक्तज्ञ' कः?
    उत्तरम्— ईश्वरकृष्णस्य सांख्यकारिका।
13. **प्रश्नः**— सांख्यदर्शने कति दुःखानि?
    उत्तरम्— 03 त्रीणि।
14. **प्रश्नः**— सत्कार्यवादः इति सिद्धान्तं कः प्रतिपादयति?
    उत्तरम्— ईश्वरकृष्णः सांख्यकारिकाकारः।
15. **प्रश्नः**— सत्कार्यवादप्रतिपादिका कारिका का?
    उत्तरम्—शक्तस्य शक्यकरणात्।
16. **प्रश्नः**— उपादानग्रहणम् इति कस्य कारणमस्ति?
    उत्तरम्—सत्कार्यवादस्य।
17. **प्रश्नः**— सांख्यदर्शने कति प्रमाणानि स्वीकृतानि?
    उत्तरम्—03 त्रीणि।
18. **प्रश्नः**— प्रकृतेः विकृतिः काऽस्ति?
    उत्तरम्—बुद्धिः।
19. **प्रश्नः**— नित्यं किमस्ति?
    उत्तरम्—प्रकृतिः।
20. **प्रश्नः**— अनित्यं किमस्ति?
    उत्तरम्—महत्।
21. **प्रश्नः**— प्रीत्यात्मकः किमस्ति?
    उत्तरम्—सत्यम्।
22. **प्रश्नः**— सत्कार्योत्पत्तिः कस्मात् जायते?
    उत्तरम्—सत्कारणात्।
23. **प्रश्नः**— प्रीत्यात्मकः कः?
    उत्तरम्—रजः।
24. **प्रश्नः**— विषादात्मकः कः?
    उत्तरम्—तमः।
25. **प्रश्नः**— लघुःप्रकाशकं च किं भवति?
    उत्तरम्—सत्वम्।
26. **प्रश्नः**— उपष्टम्भकं चलनं च कः भवति?
    उत्तरम्—रजः।
27. **प्रश्नः**— गुरुः आवरणं च कः भवति?
    उत्तरम्—तमः।
28. **प्रश्नः**— सांख्यकारिकायां कति गुणाः?
    उत्तरम्—03 त्रयो गुणाः।
29. **प्रश्नः**—अन्योन्याभिभवाश्रयजननमिथुनवृत्तयः के भवन्ति?
    उत्तरम्—गुणाः।
30. **प्रश्नः**— प्रतिविषयाध्यवसायो कः?
    उत्तरम्—दृष्टः।
31. **प्रश्नः**— लिङ्गलिङ्गिपूर्वकं किम्?
    उत्तरम्—अनुमानम्।
32. **प्रश्नः**— श्रुतिवाक्यं किमस्ति?
    उत्तरम्—शब्दः।
33. **प्रश्नः**— अतीन्द्रियाणां प्रतीतिः कस्मात् भवति?
    उत्तरम्—अनुमानात्।
34. **प्रश्नः**— सत्कार्यवादसाधने कति हेतवः?
    उत्तरम्—05 पञ्च।
35. **प्रश्नः**—सांख्यकारिकानुसारं सत्कार्यवास्य किं स्वरूपम्?
    उत्तरम्—शक्तस्य शक्यकरणात्, कारणभावाच्च सत् कार्यम्।
36. **प्रश्नः**— सत्कार्यवादस्य पक्षे उल्लिखितानि कारणानि?
    उत्तरम्— 5 पञ्च।
37. **प्रश्नः**— सांख्यकारिकाकारेण पञ्च युक्तयः काः?
    उत्तरम्—असदकरणात्, उपादानग्रहणात्, सर्वसम्भवाभावात्, शक्तस्य शक्यकरणात्, कारणभावात्।
38. **प्रश्नः**— असदकरणात् इत्यस्य को अभिप्रायः?
    उत्तरम्—यदि असत् तस्य कारणमपि असत्।

39. **प्रश्नः**— उपादानग्रहणात् इत्यस्य को अभिप्रायः?
उत्तरम्— उपादानैः कारणविशेषैः एव विशिष्टानां कार्याणाम् आविर्भावः।

40. **प्रश्नः**— सर्वसम्भवाभावात् इत्यस्य को अभिप्रायः?
उत्तरम्—प्रत्यक्षविरोधात् न हि सर्वेभ्यः कारणेभ्यः सर्वं कार्यमुत्पद्यते।

41. **प्रश्नः**— शक्तस्य शक्यकरणात् इत्यस्य को अभिप्रायः?
उत्तरम्—सत्कार्यवादः।

42. **प्रश्नः**—'यत्कारणं यत्कार्यस्योत्पत्तौ समर्थं भवेत्, तत्कारणं तस्यैव जनकः'। कारणभावात् इत्यस्य को अभिप्रायः?
उत्तरम्— कार्यं कारणात्मकं भवति।

43. **प्रश्नः**— सांख्यदर्शने करणं कतिविधम्?
उत्तरम्—13 त्रयोदशविधम्।

44. **प्रश्नः**— सांख्यमते ज्ञानेन किं भवति?
उत्तरम्—अपवर्गः।

45. **प्रश्नः**— विपर्ययः कतिविधः?
उत्तरम्—पञ्चविधः।

46. **प्रश्नः**— पुरुषस्य लक्षणं किम्?
उत्तरम्—विवेकी, ज्ञः।

47. **प्रश्नः**— प्रकृतिः का भवति?
उत्तरम्—जड़ा।

48. **प्रश्नः**— सांख्यदर्शने सर्वाधिक-सुकुमारतरा काऽस्ति?
उत्तरम्—प्रकृतिः।

49. **प्रश्नः**— न प्रकृतिः न विकृतिः इति कः?
उत्तरम्—पुरुषः।

50. **प्रश्नः**— प्रकृतिविकृतयः के सन्ति?
उत्तरम्—महदाद्याः।

51. **प्रश्नः**— विकृतयः के सन्ति?
उत्तरम्—इन्द्रियाणि।

52. **प्रश्नः**—पुरुष-संयोगात् अचेतनं चेतनवत् का अवभासते?
उत्तरम्—प्रकृतिः।

53. **प्रश्नः**— संसरति बध्यते मुच्यते च इति का?
उत्तरम्—प्रकृतिः।

54. **प्रश्नः**—पङ्ग्वन्धन्यायेन सृष्टिमिति कः स्वीकरोति?
उत्तरम्—सांख्यदर्शनम्।

55. **प्रश्नः**— पुरुषाः मोक्षः कस्मात् प्राप्यन्ते?
उत्तरम्—व्यक्ताव्यक्तज्ञविज्ञानात्।

56. **प्रश्नः**— अस्ति पुरुषः कस्मात्?
उत्तरम्—संघातपरार्थत्वात्, त्रिगुणादिविपर्ययात्, अधिष्ठानात्, भोक्तृभावात्, कैवल्यार्थं प्रवृत्तेः।

57. **प्रश्नः**— सांख्यानुसारेण कैवल्यस्य कारणं किम्?
उत्तरम्—विवेकख्यातिः।

58. **प्रश्नः**— सांख्यानुसारः कार्यं किम्?
उत्तरम्—सत्।

59. **प्रश्नः**— सत्कार्यवादसाधकहेतुः कः?
उत्तरम्—कारणभावः।

60. **प्रश्नः**— मूलप्रकृतिः अविकृतिः इति कः कथयति?
उत्तरम्—सांख्यकारिकाकारः।

61. **प्रश्नः**— जगतः उपादानं कारणं त्रिगुणात्मिका का?
उत्तरम्—प्रकृतिः।

62. **प्रश्नः**— पुरुष-तत्त्वेन सहास्याः संयोगे किं कारणम्?
उत्तरम्—निमित्त-कारणम्।

63. **प्रश्नः**— प्रकृति-पुरुषयोः संयोगेन किं सम्भवति?
उत्तरम्—सृष्टिः।

64. **प्रश्नः**— प्रकृतेः गुणवैषम्यात् किं जायते?
उत्तरम्—महत्-तत्त्वम्।

65. **प्रश्नः**— महतः किं जायते?
उत्तरम्—अहंकारः।

66. **प्रश्नः**— तन्मात्राया प्रकृतितत्त्वः कोऽस्ति?
उत्तरम्—अहंकारः।

67. **प्रश्नः**— अहंकाराद् किं जायते?
उत्तरम्—एकादशेन्द्रियाणि पंचतन्मात्राणि च।

68. **प्रश्नः**— पञ्चतन्मात्रेभ्यः कानि जायन्ते?
उत्तरम्—पञ्चमहाभूतानि।

69. **प्रश्नः**— प्रकृत्या प्रथमविकृतिः किमस्ति?
उत्तरम्—पञ्चतन्मात्रा।

70. **प्रश्नः**— भूतानि कस्मात् जायन्ते?
उत्तरम्—तन्मात्रेभ्यः।

71. **प्रश्नः**— आकाशः कस्य तन्मात्रया समुद्भूतोऽस्ति?
उत्तरम्—शब्दतन्मात्रया।

72. **प्रश्नः**— सात्त्विक-अहंकारस्य विकृतयः के सन्ति?
उत्तरम्—इन्द्रियाणि।

73. **प्रश्नः**— प्रत्ययसर्गस्य भेदोपभेदाः कति सन्ति?
उत्तरम्—50 पञ्चाशत्।

74. **प्रश्नः**— पंचमहाभूतानि कानि सन्ति?
उत्तरम्—आकाश-वायु-तेज-जल-पृथिवी।

75. **प्रश्नः**— पंचमहाभूतानि केभ्यः जायन्ते?
उत्तरम्—पञ्चतन्मातृभ्यः।

76. **प्रश्नः**— पञ्चतन्मात्राणि कानि सन्ति?
उत्तरम्—शब्द-स्पर्श-रूप-रस-गन्धानि।

77. **प्रश्नः**— सांख्यदर्शने कर्मेन्द्रियाणि कति कानि च सन्ति?
उत्तरम्—पञ्च, वाक्-पाणि-पाद-पायु-उपस्थानि।

78. **प्रश्नः**— सांख्यानुसारेण कर्मेन्द्रियस्य मूलः कः?
उत्तरम्—अहंकारः।

79. **प्रश्नः**— पंचज्ञानेन्द्रियाणि कानि सन्ति?
उत्तरम्—चक्षु-श्रोत्र-घ्राण-रसना-त्वक्।

80. **प्रश्नः**— बुद्धि-द्वारा पुरुषस्य किं प्रकाशनं सम्भवति?
उत्तरम्—अर्थम्।

81. **प्रश्नः**— कोऽस्ति प्रत्ययसर्गः?
उत्तरम्— प्रतीयतेऽनेनेति बुद्धेः सृष्टिः 'प्रत्ययसर्गः' इति।

82. **प्रश्नः**— भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च सिद्ध्यति—
उत्तरम्—पुरुषः।

83. **प्रश्नः**— माध्यस्थ्यं द्रष्टृत्वम् अकर्तृभावश्च—
उत्तरम्—पुरुषस्य।

83. **प्रश्नः**— पुरुषबहुत्वं कः स्वीकरोति?
उत्तरम्—सांख्यदर्शनम्।

84. **प्रश्नः**— मनः कीदृशमिन्द्रियम्?
उत्तरम्—उभयात्मकम्।

85. **प्रश्नः**— बुद्धेः अष्टौ भावाः के सन्ति?
उत्तरम्—धर्म-अधर्म-ज्ञान-अज्ञान-विराग- अविराग-ऐश्वर्य-अनैश्वर्याः।

86. **प्रश्नः**— चतुर्धा प्रत्ययसर्गः के सन्ति?
उत्तरम्—विपर्ययाऽशक्तितुष्टिसिद्ध्याख्यभेदात्।

87. **प्रश्नः**— विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् इति केन कथितः?
उत्तरम्—महर्षिणा पतञ्जलिना।

88. **प्रश्नः**— योगशास्त्रे विपर्ययस्य पञ्चभेदाः के सन्ति?
उत्तरम्—अविद्या-अस्मिता-राग-द्वेष-अभिनिवेशा इति।

89. **प्रश्नः**— तुष्टिः इत्यस्य किं लक्षणम्?
उत्तरम्—प्रकृतेः पुरुषस्य वैभिन्न्यं ज्ञात्वाऽप्य-प्रवृत्तिः।

90. **प्रश्नः**— तुष्टेः नवभेदाः के सन्ति?
उत्तरम्—प्रकृतिः, उपादानं, कालः, भाग्यः, पार, सुपार, अनुत्तमाम्भः, उत्तमाम्भरूपाश्च।

91. **प्रश्नः**— 'सिद्धिः' इत्यस्य का परिभाषा?
उत्तरम्— ज्ञानस्य प्राप्तिरेव सिद्धिः।

92. **प्रश्नः**— सिद्धेः अष्टौ भेदाः के सन्ति?
उत्तरम्—अणिमा-महिमा-गरिमा-लघिमा-प्राप्ति-प्राकाम्य-वशित्व-ईशित्वरूपाः।

93. **प्रश्नः**— मोक्षस्य प्राप्तिः केन भवति?
उत्तरम्—ब्रह्मज्ञानेन।

94. **प्रश्नः**— सांख्य-दर्शनस्य प्रमुखं प्रयोजनं किम्?
उत्तरम्— 'दुःखनाशः' कैवल्यञ्चाप्तुमस्ति।

95. **प्रश्नः**— ज्ञानस्यान्तर्भावः कस्याम्?
उत्तरम्—सिद्धौ।

96. **प्रश्नः**— अज्ञानस्यान्तर्भावः कस्याम्?
उत्तरम्—विपर्यये।

97. **प्रश्नः**— परामर्शः कं कथ्यते?
उत्तरम्—व्याप्तिविशिष्टपक्षधर्मताज्ञानम्।

98. **प्रश्नः**— सांख्यानुसारेण पुरुषस्वीकारस्य आधारः कः?
उत्तरम्—अधिष्ठानः।

(Code-25) (रर) सदानन्दस्य वेदान्तसारः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

वेदस्य अन्तः वेदान्तः। वेदान्तदर्शनं वेदानाम् अन्तिमभागम् उपनिषदम् आधारीकृत्य प्रणीतत्वाद् वेदान्त इति संज्ञा भजते। योगीन्द्रः सदानन्दकृतो 'वेदान्तसारः' अद्वैतवेदान्तस्य महत्त्वपूर्णः प्रकरणग्रन्थोऽस्ति। उपनिषदां विषयाणां विवेचनम् एव अत्र क्रियते। अनुबन्धचतुष्टयं वेदान्तसारस्य प्रमुखा विषयाः सन्ति। वेदान्तसारः वेदान्तस्य महत्त्वपूर्णम् अङ्गं वर्तते। अतः वेदान्तस्य अनुबन्धा एव वेदान्तसारो वर्तन्ते। अनुबन्धाश्चत्वारः सन्ति–अधिकारि- विषयः-सम्बन्धः-प्रयोजनानि।

अनुबन्धचतुष्टयम्–अनुबध्नाति अध्येतारमिति अनुबन्धानि। केन पठितव्यम्? विषयः कः? विषयग्रन्थयोस्सम्बन्धः कः? प्रयोजनञ्च किमिति? अतः अनुबन्धो नामाधिकारिविषयसम्बन्धप्रयोजनानि। वेदान्तशास्त्रस्य अनुबन्धा यथा—

(क) अधिकारी–वेदान्तशास्त्राध्ययनात् यज् ज्ञानं फलं वा लभ्यते तस्योपभोक्ता एव अधिकारी इत्युच्यते। एतादृशस्य ज्ञानस्योपलब्ध्यर्थं अधिकारिसमीपे केचिद्गुणा अपेक्षिता। अतः तस्य लक्षणं तदनुरूपमेव लक्षितम्। यथा– विधिवदधीतवेदवेदाङ्गत्वेनेत्यादिना नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसम्पन्नः प्रमातैव अधिकारी।

(ख) विषयः–विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं, तत्रैव वेदान्तानां तात्पर्यात्। ब्रह्मज्ञानं वेदान्तस्य प्रधानः विषयः।

(ग) सम्बन्धः–वेदान्तो नामोपनिषत्प्रमाणमिति वचनात् तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावः।

(घ) प्रयोजनम्–प्रयोजनं तु तद्गताज्ञाननिवृत्तिपूर्वकस्वरूपानन्दावाप्तिः ब्रह्मभाववान्, मोक्षप्राप्तिर्वा, यतो हि ब्रह्मविद् ब्रह्मैव भवतीति श्रुतिप्रमाणात्। एतदनुबन्धचतुष्टयम्।

अध्यारोपः–अधिकारी शिष्यः गुरुमुपसृत्य ज्ञानाय प्रार्थयते। सः गुरुरपि शिष्याय 'अध्यारोप-अपवादयोः' शिक्षामुपदिशति। कथितं च वेदान्तसारे–"**असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोऽध्यारोपः।**" अज्ञानादिसकलजडसमूहोऽवस्तु। सच्चिदानन्दानन्ताद्वयं ब्रह्मैव वस्तु। यदा सकलभ्रमात्मकसंसारः अज्ञानकारणादात्मन्यवभासते। यथा– तमः कारणाद् सर्पः प्रतीयते रज्जुः। ज्ञानदीपककारणाद् यदा सत्यं ज्ञायते श्रवणमनननिदिध्यासनान्येव अपवादस्य साधनानि। अनेनैव शिष्याय ज्ञानं दीयते। अज्ञानम् अध्यारोपेऽज्ञानकारणाद् प्रतीयत एतत् जगत्। अत्र सदानन्दः इत्थमेव कथयति–**अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधिभावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुभवात्**, '**देवात्मशक्तिः स्वगुणैर्निगूढाम्**' इत्यादि श्रुतेश्च। **सदसद्भ्यामनिर्वचनीयम्**–

> **सन्नाप्यसन्नाप्युभयात्मिका नो**
> **भिन्नाप्यभिन्नाऽप्युभयात्मिका नो।**
> **सांगाप्यनंगाप्युभयात्मिका नो**
> **महाद्भुताऽनिर्वचनीयरूपा ॥**
> (शंकराचार्यः)

त्रिगुणात्मकम्–श्रुत्यनुसारेण अज्ञानस्य त्रिगुणात्मकत्वं सिद्धं, सत्त्व-रजः-तमोगुणात्मकत्वप्रतिपादनात्। **ज्ञानविरोधि**–"ज्ञाननिर्वर्त्यम्" इति अज्ञानस्य लक्षणम्। **भावरूपम्**–साक्षात्कारे सत्यात्मनि अज्ञानं नश्यति। उपाधि-समष्टिश्च अज्ञानस्य द्वौ उपाधी। समष्टिः–संघातो समूहो वा। व्यष्टिः–अनेकत्वस्य व्यवहारः। अज्ञानस्य शक्तिः–आवरणविक्षेपनामकमस्ति शक्तिद्वयम्। अपवादः–प्रधानशक्त्या निर्मितानि शरीराणि यदा पुनः ब्रह्म स्वरूपं धारयति तदा अपवाद एव। अपवादो नाम कारणमात्र अवशेषणं कार्यस्य, यथा रज्जौ सर्पस्य, शुक्तौ रजतस्य वा प्रतीतौ रज्जुविवर्तस्य सर्पस्य, शुक्तिविवर्तस्य रजतस्य वा अपवादः विनाशः अधिष्ठानभूतरज्जुमात्रतया, शुक्तिमात्रतया वा अवस्थानम्, तथैव परमात्मवस्तुनि तद् विवर्तभूताज्ञानादिमिथ्याप्रपंचस्य चैतन्यवस्तुमात्रावशेषतया अवस्थानम् एव अपवादः। अयमेव कार्यस्य कारणमात्रावशेषम् अपवादः।

तत्त्वमसि विवेचनम्–सदानन्दस्य 'तत्त्वमसि' इत्येतन्महावाक्यं यद्यपि आत्मब्रह्मणोरैक्यं प्रतिपादयति। वेदान्तविदो वदन्ति यत् अभिधयास्य वाक्यस्य यथार्थबोधासम्भवाल्लक्षणाङ्गीक्रियते। अध्यारोप-अपवादाभ्यां जगत्स्वरूपं तत्कारणं ब्रह्मस्वरूपं च सम्यग्रूपेण निरूप्य, सम्प्रति आभ्याम् अध्यारोपापवादाभ्यां 'तत्त्वमसि' इति वाक्यान्तर्गतयोः तत् त्वम्-पदयोः परिशुद्धिरपि सञ्जायते। अर्थात् एकमेव अनुपहितं विशुद्धचैतन्यं भिन्न-भिन्नावस्थायाम् उभयोः तत्-त्वम् इति पदयोः वाच्यार्थः लक्ष्यार्थश्च भवति। अत्र

जहदजहल्लक्षणया यथार्थोऽवगम्यते। 'तत्-त्वम्' इत्येतयोर्मध्ये विद्यमान-परोक्षत्वापरोक्षत्वविशिष्टांशौ परस्परविरुद्धौ परिहरन्तीयं लक्षणा अखण्डचैतन्यांशञ्च परिगृह्णन्ती तयोरैक्यमुपपादयति। वाक्यार्थस्य अपरित्यागेन तत्सम्बन्धिनि अर्थान्तरे वृत्तिः अजहल्लक्षणा। 'शोणो धावति' इत्यस्मिन् वाक्ये शोणगुणस्य धावनासम्भवात् मुख्यार्थबाधे सति, तस्य शोणगुणस्य अपरित्यागेन तदाश्रये अश्वादौ लक्षणया मुख्यार्थविरोधो निवार्यते, किन्तु 'तत्त्वमसि' इति महावाक्ये तत् पदस्य त्वम्पदस्य च परस्परं विरोधो यो वाच्यार्थः तमपरित्यज्य परोक्षत्वादिविशिष्टजीवचैतन्यबोधकेन तच्छब्देन, अपरोक्षत्वादिविशिष्टजीवचैतन्यस्य, अपरोक्षत्वादिविशिष्टजीवचैतन्यबोधकेन त्वम्-शब्देन परोक्षत्वादिविशिष्टेश्वरचैतन्यस्य वा लक्षितत्वेऽपि परोक्षत्वाऽपरोक्षत्वादिलक्षणविरोधः सुस्थिर एव। 'तत्त्वमसि' इति महावाक्ये जहदजहल्लक्षणा एव उपयुक्ता। यथा–'सोऽयं देवदत्तः' इति। अत्र भाग-लक्षणया जहदजहल्लक्षणया वा सम्भाव्यमिति।

समाधिविवेचनम्–योगदर्शने चत्वारो पादाः सन्ति। प्रथमपादे-समाधिः इत्यस्य वर्णनं वर्तते। योगशब्दः समाध्यर्थक'युज्'धातोः (युज् समाधौ) इत्यनेन निष्पन्नो भवति। अतः योगस्य व्युत्पत्तिलभ्यार्थं 'समाधि' इति विद्यते। **योगश्चित्तवृत्तिनिरोधः** इति योगस्य लक्षणं पतञ्जलिना प्रोक्तम्। अत्र चित्तस्य अभिप्रायः अन्तःकरणैः (मन-बुद्धि-अहंकार) विद्यते। वेदान्तसारकर्ता सदानन्दानुसारं समाधिस्वरूपम् इत्थं वर्तते– "श्रेयरूपे चित्तस्य एकाग्रता निश्चलत्वं च समाधिः" इति समाधेः निर्वचनम्। स द्विविधः–1. सविकल्पकः, 2. निर्विकल्पकश्च।

1. सविकल्पकः–ज्ञातृ-ज्ञान-ज्ञेयानां भेदज्ञानपूर्वकं अद्वितीयब्रह्मणि 'अहं ब्रह्मास्मीति' तदाकारकारिताया: चित्तवृत्तेः अवस्थानं भवति। एवमेव ब्रह्मजीवात्मकद्वैतभानेऽपि वाचारम्भणमात्रत्वाद् अद्वैतवस्तु (ब्रह्म) भासते। साक्षिस्वरूपम् यद् आकाशवत् सर्वत्र व्याप्तम्, एवं सर्वथा निर्लिप्तम्, यच्च सर्वदा एकरूपेण एव अवभासमानम्।

2. निर्विकल्पकश्च–निर्विकल्पकसमाधौ ज्ञातृ-ज्ञान-ज्ञेयभेदभावभानस्य अभावः, इति अद्वितीये वस्तुनि ब्रह्मणि तदाकारकारितचित्तवृत्तेः अत्यन्तमेकीभावेन अवस्थानं भवति। यतः दीर्घतराभ्यासात् अस्मिन् समाधौ संस्काराः नश्यन्ति एवं अद्वितीयवस्तुमात्रमवभासते।

समाधिसुषुप्त्योः उभयत्र वृत्तभाने समानेऽपि समाधौ जलाकाराकारितलवणमिव अद्वितीयवस्तुनि ब्रह्मणि अत्यन्तमेकीभावेन अनवभासमानवृत्तेः सद्भावो विद्यते, परं सुषुप्तौ वृत्तेः सर्वथैव अभावः इति तयोः भेद-द्वयोः अभिप्रायः। निर्विकल्पक-समाधौ चत्वारो विघ्नाः सम्भवन्ति–1. लयः, 2. विक्षेपः, 3. कापायः, 4. रसास्वादश्च। तत्र नितरां निद्रितो सञ्जायते इति लयः। बाह्यवस्तु-ग्रहणे प्रवर्तते इति विक्षेपः। अवलम्बने असमर्थो भवति इति कषायः। अखण्डवस्तुब्रह्मणः अवलम्बने चित्तवृत्तिः ब्रह्मानन्दभ्रमेण सविकल्पकसमाधिगतानन्दम् अनुभवति रसास्वादः।

लिङ्गशरीरोत्पत्तिः–सूक्ष्मशरीराणि सप्तदश-अवयवानि लिङ्गशरीराणि। लिङ्गशरीरे एव प्रत्यगात्ममनः सत्ता ज्ञायते। सप्तदश-अवयवानि इत्थं वर्तन्ते–पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, बुद्धिर्मनसो, वायुपञ्चकञ्चेति। पंच ज्ञानेन्द्रियाणि सन्ति चक्षु-श्रोत्र-घ्राण-रसना-त्वक्। पञ्चकर्मेन्द्रियाणि सन्ति वाक्-पाणि-पाद-पायु-उपस्थानि, नागकूर्म-कृकल-देवदत्त-धनञ्जयः इति पञ्चान्ये वायवः। बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः। बुद्धि-द्वारा पुरुषस्य अर्थप्रकाशनं सम्भवति। मनो: संकल्पविकल्पात्मिकान्तःकरणवृत्तिः। सदान्दस्य वेदान्तसारे विभिन्नाः कोशा निर्मीयन्ते एतैः अवयवैः। यथा–1. विज्ञानमयः कोशः–बुद्धिर्ज्ञानेन्द्रियसहिता ज्ञानशक्तिमान् कर्तृरूपः, व्यावहारिको जीवः विज्ञानमयकोशो विद्यते। 2. मनोमयकोशः–मनस्तु ज्ञानेन्द्रियैः सहितं मनोमयकोशो भवति। 3. प्राणमयकोशः–प्राणादिपञ्चकं कर्मेन्द्रियैः सहितं सत्प्राणमयकोशो भवति। क्रियाशक्तिमानेष कार्यरूपः। एतेषु कोशेषु सप्तदशावयवानि वर्तन्ते।

पञ्चीकरणम्–सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि च उच्यन्ते। यतः सूक्ष्मदशायाम् आकाशे शब्दः (तन्मात्रा) वायौ स्पर्शः तेजसि रूपं जले रसः पृथिव्याञ्च गन्धतन्मात्रा एव भवति। एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि च उत्पद्यन्ते। सथूलभूतानि पञ्चीकृतानि भवन्ति। सृष्टिविकासार्थाय पञ्चभूतानां परस्परं सम्मिश्रणं पञ्चीकरणम्। वेदान्तसारे वर्णितं पञ्चीकरणस्य सिद्धान्तम् इत्थं वर्तते। पञ्चीकरणं आकाशादिपञ्चस्वेकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान् पञ्चभागान् प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्धभागपरित्यागेन भागान्तरेषु संयोजनम्। तदुक्तम्–

द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः।
स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते॥

जीवनमुक्तिस्वरूपम्—मूलभूतम् अज्ञानं तत्कार्यभूतानि सञ्चितकर्माणि संशय-विपर्ययादयश्च विनश्यन्ति, तथा अखिलबन्धाद् विनिर्मुक्तः ब्रह्ममात्रे स्थितिः ब्रह्मनिष्ठसाधकः जीवनमुक्तः इति कथ्यते। 'अहं ब्रह्मास्मि' इति अनुभूतिम् अनुभूयमानः जीवन्नपि मुक्तः पुरुषः 'जीवन्मुक्तः' इति कथ्यते। जीवन्मुक्तस्य ब्रह्मज्ञानात्पूर्वमेव शान्ति-सन्तोषादिशुभगुणैः अशुभकर्मवासना विनिवार्यते।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— वेदान्तसारस्य रचनाकारः कः?
उत्तरम्—महर्षिसदानन्दः।

2. **प्रश्नः**— सदानन्दस्य गुरुः कोऽस्ति?
उत्तरम्—अद्वयानन्दः।

3. **प्रश्नः**— वेदानाम् अन्तिमभागम् उपनिषदम् आधारीकृत्य प्रणीतः ग्रन्थविशेषः कः?
उत्तरम्—वेदान्तदर्शनम्।

4. **प्रश्नः**—अद्वैतवेदान्तस्य महत्त्वपूर्णः प्रकरण-ग्रन्थः कोऽस्ति?
उत्तरम्—वेदान्तसारः।

5. **प्रश्नः**— केषां वेदान्त-संज्ञा?
उत्तरम्—उपनिषदाम्।

6. **प्रश्नः**— वेदान्तसारस्य प्रमुखाः विषयाः के सन्ति?
उत्तरम्—अनुबन्धचतुष्टयम्।

7. **प्रश्नः**— वेदान्तस्य महत्त्वपूर्णम् अङ्गं किम्?
उत्तरम्—वेदान्तसारः।

8. **प्रश्नः**— कति सन्ति अनुबन्धाः?
उत्तरम्—चत्वारि।

9. **प्रश्नः**— के सन्ति अनुबन्धचतुष्टयम्?
उत्तरम्—अधिकारि-विषयः-सम्बन्धः-प्रयोजनानि।

10. **प्रश्नः**— साधनचतुष्टयसम्पन्नः केन कथ्यते?
उत्तरम्—अधिकारी इत्यनेन।

11. **प्रश्नः**— वेदान्तस्य अधिकारी कः?
उत्तरम्—विधिवदधीतवेदवेदाङ्गत्वेनेत्यादिना नित्या-नित्यवस्तुविवेकादिसाधनचतुष्टयसम्पन्नः प्रमातैव।

12. **प्रश्नः**— प्रमाता कस्य विशेषणम्?
उत्तरम्—अधिकारिणः।

13. **प्रश्नः**— काम्यानि कर्माणि कानि सन्ति?
उत्तरम्—ज्योतिष्टोमादीनि।

14. **प्रश्नः**— साधनचतुष्टय-सम्पन्नः कः?
उत्तरम्—प्रमाता।

15. **प्रश्नः**— ब्रह्मज्ञानं कस्य ग्रन्थस्य प्रधानः विषयः?
उत्तरम्—वेदान्तस्य।

16. **प्रश्नः**— जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयम्?
उत्तरम्—विषयः।

17. **प्रश्नः**— शाण्डिल्यविद्यादीनि कानि सन्ति?
उत्तरम्—उपासनानि।

18. **प्रश्नः**— बोध्य-बोधकभावलक्षणं किम्?
उत्तरम्—सम्बन्धः।

19. **प्रश्नः**— समवायः कः?
उत्तरम्—सम्बन्धः।

20. **प्रश्नः**— नाममात्रेण वस्तुसंकीर्तनं कस्य लक्षणम्?
उत्तरम्—उद्देश्यस्य।

21. **प्रश्नः**— असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्य-वस्त्वारोपोऽध्यारोपः इति कुत्र वर्णितम्?
उत्तरम्—वेदान्तसारे।

22. **प्रश्नः**— असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्य-वस्त्वारोपः कः?
उत्तरम्—अध्यारोपः।

23. **प्रश्नः**— रज्ज्वा विवर्तः सर्पः किमस्ति?
उत्तरम्—रज्जुमात्रः।

24. **प्रश्नः**— अज्ञानादिसकलजडसमूहः कः?
उत्तरम्—अवस्तु।

25. **प्रश्नः**— सच्चिदानन्दानन्ताद्वयं ब्रह्मैव इति कः?
उत्तरम्—वस्तु।

26. **प्रश्नः**— अपवादस्य साधनानि कानि?
उत्तरम्—श्रवणमनननिदिध्यासनान्येव।

27. **प्रश्नः**—सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधिभावरूपं किमस्ति?
उत्तरम्—अज्ञानम्।

28. **प्रश्नः**— अज्ञानस्य त्रिगुणात्मकत्वं किम्?
उत्तरम्—सत्त्व-रजः-तमोगुणात्मकत्वम्।

29. **प्रश्नः**— अज्ञानं कतिविधम्?
उत्तरम्—द्विविधम्।

30. **प्रश्नः**—अज्ञानस्य द्वे उपाधी के?
उत्तरम्—व्यष्टिः-समष्टिश्च।

31. **प्रश्नः**— अज्ञानस्य स्वरूपः कः?
उत्तरम्—अनिर्वचनीयः।

32. **प्रश्नः**— शास्त्र-प्रवृत्तिः कीदृशी?
उत्तरम्—त्रिविधा।

33. **प्रश्नः**— अज्ञानस्य शक्तिद्वयं के स्तः?
उत्तरम्—आवरण-विक्षेपञ्च।

34. **प्रश्नः**— वेदान्तसारानुसारं अपवादः कः?
उत्तरम्—कार्यस्य कारणमात्रावशेषणम्।

35. **प्रश्नः**—आत्मब्रह्मणोरैक्यं कं महावाक्यं प्रतिपादयति?
उत्तरम्—सदानन्दस्य तत्त्वमसि।

36. **प्रश्नः**— 'तत्त्वमसि' इमं किं कथ्यते?
उत्तरम्—उपदेश-वाक्यम्।

37. **प्रश्नः**— 'वाक्यार्थस्य अपरित्यागेन तत्सम्बन्धिनि अर्थान्तरे वृत्तिः' इति का?
उत्तरम्—अजहल्लक्षणा।

38. **प्रश्नः**— 'तत्त्वमसि' इति महावाक्ये का उपयुक्ता?
उत्तरम्—जहदजहल्लक्षणा।

39. **प्रश्नः**—समाधिः इत्यस्या का परिभाषा?
उत्तरम्— ज्ञेयरूपे चित्तस्य एकाग्रता निश्चलत्वं च समाधिः।

40. **प्रश्नः**—समाधिः इत्यस्य किं लक्षणम्?
उत्तरम्— ज्ञेयरूपे चित्तस्य एकाग्रता।

41. **प्रश्नः**—समाधिः कतिविधं कानि च तानि?
उत्तरम्— द्वौ, 1. सविकल्पकः, 2. निर्विकल्पकश्च।

42. **प्रश्नः**—निर्विकल्पक-समाधौ चत्वारो विघ्नाः के सन्ति?
उत्तरम्—1. लयः, 2. विक्षेपः, 3. कषायः, 4. रसास्वादश्च।

43. **प्रश्नः**— सूक्ष्मशरीरेण स्थूलब्रह्मपर्यन्तसमस्तजगत् कस्य शक्त्या उत्पन्नो भवति?
उत्तरम्—विक्षेपस्य।

44. **प्रश्नः**— प्रध्वंसाभावस्य लक्षणं किम्?
उत्तरम्—सादिरनन्तः।

45. **प्रश्नः**— मानवः को विद्यते?
उत्तरम्—जरायुजः।

46. **प्रश्नः**— सूक्ष्मशरीराणि सप्तदश-अवयवानि युक्तानि कानि?
उत्तरम्—लिङ्गशरीराणि।

47. **प्रश्नः**— वेदान्तमते लिङ्गशरीराणि कतिपयानि?
उत्तरम्—17, सप्तदश।

48. **प्रश्नः**— वेदान्तमते सूक्ष्मशरीरं किमस्ति?
उत्तरम्—विज्ञानमय-मनोमय-प्राणमयकोशाः।

49. **प्रश्नः**— कानि सन्ति सप्तदश-अवयवानि?
उत्तरम्—पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, बुद्धिमनसो, वायुपञ्चकञ्चेति।

50. **प्रश्नः**— पंचज्ञानेन्द्रियाणि कानि सन्ति?
उत्तरम्—चक्षु-श्रोत्र-घ्राण-रसना-त्वक्।

51. **प्रश्नः**— पञ्चकर्मेन्द्रियाणि कानि सन्ति?
उत्तरम्—वाक्-पाणि-पाद-पायु-उपस्थानि।

52. **प्रश्नः**— वायुपञ्चकानि कानि सन्ति?
उत्तरम्—नाग-कूर्म-कृकल-देवदत्त-धनञ्जयः।

53. **प्रश्नः**— बुद्धिः इत्यस्य किं लक्षणम्?
उत्तरम्—निश्चयात्मिकान्तःकरणवृत्तिः।

54. **प्रश्नः**— मनः इत्यस्य किं लक्षणम्?
उत्तरम्—संकल्पविकल्पात्मकान्तःकरणवृत्तिः।

55. **प्रश्नः**— मनः कीदृशमस्ति?
उत्तरम्—उभयात्मकम्।

56. **प्रश्नः**— अज्ञानं कीदृशं भवति?
उत्तरम्—अनिवर्चनीयम्।

57. **प्रश्नः**— कति कोशाः भवन्ति?
उत्तरम्—पञ्च।

58. **प्रश्नः— सदानन्दस्य वेदान्तसारे विभिन्नाः कोशाः के सन्ति?**
उत्तरम्—1. विज्ञानमयकोशः, 2. मनोमयकोशः, 3. प्राणमयकोशः।

59. **प्रश्नः—** वेदान्तमते लिङ्ग-शरीरस्य निर्मातृकोशाः के सन्ति?
उत्तरम्—1. विज्ञानमयकोशः, 2. मनोमयकोशः, 3. प्राणमयकोशः।

60. **प्रश्नः—** विज्ञानमय कोशस्य किं लक्षणम्?
उत्तरम्—बुद्धिर्ज्ञानेन्द्रियसहिता ज्ञानशक्तिमान् कर्तृरूपः।

61. **प्रश्नः—** विज्ञानमयकोशः ज्ञानशक्तिमान् इति कः?
उत्तरम्—कर्तृरूपः।

62. **प्रश्नः—** पञ्चज्ञानेन्द्रियैः सह युक्तः बुद्धिः किं भवति?
उत्तरम्—विज्ञानमयकोशः।

63. **प्रश्नः—**प्राणमयकोशस्य किं लक्षणम्?
उत्तरम्—प्राणादिपञ्चकं कर्मेन्द्रियैः सहितं सत्प्राणमयकोशो भवति।

64. **प्रश्नः—** प्राणमयकोशः क्रियाशक्तिमान् इति कः?
उत्तरम्—कर्तृरूपः।

65. **प्रश्नः—** मनोमयकोशस्य किं लक्षणम्?
उत्तरम्—मनस्तु ज्ञानेन्द्रियैः सहितं मनोमयकोशो भवति।

66. **प्रश्नः—** मनोमयकोशः इच्छाशक्तिमान् इति कः?
उत्तरम्—करणरूपः।

67. **प्रश्नः—** वेदान्तानुसारेण मनसः स्वरूपः कोऽस्ति?
उत्तरम्—संकल्प-विकल्पः।

68. **प्रश्नः—** पञ्चीकरणं किमुच्यते?
उत्तरम्—सृष्टिविकासार्थाय पञ्चभूतानां परस्परं सम्मिश्रणम्।

69. **प्रश्नः—** पञ्चीकरणं कतिपयानां पदार्थानां भवति?
उत्तरम्—पञ्च।

70. **प्रश्नः—** पंचीकरणसिद्धान्तः कुत्र वर्तते?
उत्तरम्—वेदान्ते।

71. **प्रश्नः—** द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः अनेन कस्मिन् दिशायां संकेतो भवति?
उत्तरम्—पंचीकरणेन।

72. **प्रश्नः—** जीवन्मुक्तिस्वरूपं किम्?
उत्तरम्—अखिलबन्धाद् विनिर्मुक्तः ब्रह्ममात्रे स्थितिः ब्रह्मनिष्ठसाधकः।

73. **प्रश्नः—**"सुषुप्तवज्जाग्रति यो न पश्यति"अस्य स्वभावेन कः युक्तो भवति?
उत्तरम्—जीवन्मुक्तः।

74. **प्रश्नः—** जीवन्मुक्तेः कस्य फलं प्राप्नोति?
उत्तरम्—प्रारब्धकर्मणः।

75. **प्रश्नः—** आवरणविक्षेप-शक्तिद्वयं कस्य वर्तते?
उत्तरम्—अज्ञानस्य।

76. **प्रश्नः—** वेदान्तमते अग्निः कस्मात् उपजायते?
उत्तरम्—वायोः।

77. **प्रश्नः—** प्राशस्त्यनिन्दान्यतरपरं वाक्यं किं भवति?
उत्तरम्—अर्थवादः।

78. **प्रश्नः—** मीमांसादर्शने विध्यादिभेदाद्भेदः कतिविधः?
उत्तरम्—5 पञ्चविधः।

(Code-25) (लल) लौगाक्षिभास्करस्य अर्थसंग्रहः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

शप्तदश-शताब्दीये लौगाक्षिभास्करः भाट्टपरम्परानुरूपं 'अर्थसंग्रह' प्रकरणग्रन्थस्य रचनां कृतवान्। 'अर्थसंग्रहः' मीमांसायाः कर्मकाण्डपरकः ग्रन्थः वर्तते। अस्मिन् ग्रन्थे कर्मकाण्डपरकविषयोपरि विचारः कृतमस्ति। कर्मकाण्डपरकमीमांसादर्शने 'अर्थसंग्रह' सदृशः लघुकायः बोधगम्यश्च ग्रन्थः नास्ति। मीमांसकानां मतमिदम् यत् कर्त्तव्यस्य पालनं मानवस्य धर्मोऽस्ति। कर्त्तव्यपालनं स्वार्थभावं विहाय करणीयम्। अस्मिन् दर्शने धर्मशब्दस्तु अतीव महत्त्वपूर्णः पारिभाषिकशब्दोऽस्ति। भ्वादिगणीयधृञ् धारणे धातोः निष्पन्नः 'धर्म' शब्दः। अस्य धर्मस्य लक्षणम् उपस्थापयन् अर्थसंग्रहकारः लौगाक्षिभास्करः लिखति— **यागादिरेव धर्मः।** तल्लक्षणं वेदप्रतिपाद्यः प्रयोजनवद् इति। यज्ञादि-वैदिकानुष्ठानानां तात्त्विकविवेचनोपपत्त्यर्थं यान् सिद्धान्तान् अविष्कारितवन्तस्ते परममहत्त्वशालिनः सन्ति। अत्र यज् धातोः

निष्पन्नः 'याग' शब्दः दैवपूजनार्थकः अस्ति। यागादि इत्यस्य आदि-पदेन तु दान-होम-जप-प्रोक्षणादयो क्रिया, तथा कुशा, समिधा, सोम, दधि, द्रव्यगुणादयश्च गृह्यन्ते। यैः याज्ञिककर्मसम्पादनं क्रियन्ते। यथोच्यते चिन्नस्वामी आदिपदेन दानहोमादयो द्रव्यगुणादयश्च गृह्यन्ते। एवं प्रकारेण कृष्णनाथः आदिपदस्यार्थः "आदिपदात् दध्ना जुहोति', 'शुचिना कर्त्तव्यम्' 'नातिरात्रे षोडशिनं गृह्णाति' इत्यादि श्रुतिभिर्ये ये कर्मातिरिक्ता द्रव्यगुणाभावादयः क्रतूपकारकादिकमुद्दिश्य पुरुषं प्रति विधीयते तेषां परिग्रहः। एवं प्रकारेण सर्वे मीमांसकाः यागादयमेव धर्म स्वीकुर्वन्ति। अतः यज्ञस्य उपादानेन यज्ञसम्पादनसामग्रीः अपि धर्मपदवाच्याः भवन्ति। महर्षि-जैमिनि-प्रणीतेन **चोदनालक्षणोऽर्थो धर्मः** इति सूत्रेण अपि तादृशः धर्मस्वरूपः प्रतिपादितः। वेदानां धर्मतात्पर्यवत्त्वेन धर्मप्रतिपादकत्वात्। महाभारते—**धारणाद् धर्म इत्याहुः**। अन्यस्थाने तु **यतोऽभ्युदयनिःश्रेयसिद्धिः स धर्मः।**

अर्थसंग्रहकार-लौगाक्षिभास्करः धर्मस्य लक्षणं कथ्यते— **वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः।** अत्र ग्रन्थकारः विभिन्न-विषयेषु भावि-अतिव्याप्तिनिवारणार्थं 1. वेदप्रतिपाद्यः, 2. प्रयोजनवत्, 3. अर्थः इति शब्दत्रयस्य प्रयोगः स्व-लक्षणे प्रतिपादितम्। "वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः" धर्मणि वेदस्य प्रमाणम्। 'लक्षणम्प्रयोजनवत्' इति धर्मपदवाच्यो वर्तते। अर्थपदस्य तात्पर्यं सर्वथा इष्टफलजनकत्वेन अर्थ्यते प्रार्थ्यते इति अर्थः। परिणामतः सुखस्वरूपः स्यात्। अर्थपदस्य प्रयोगः लक्षणवाक्ये कृते सति श्येन-यागादि-कार्ये अतिव्याप्तिः इत्यस्य निवारणं भवति। इत्थं लौगाक्षिभास्करस्य धर्मलक्षणं दोषत्रयेण मुक्ते सति निर्दुष्टे भवति। वेदः पञ्चभागेषु विभज्यते—1. विधिः, 2. मन्त्रं, 3. नामधेयः, 4. निषेधः, 5. अर्थवादश्च। अत्र अर्थसंग्रहकारः पञ्चभागेषु धर्मस्य प्रतिपादनं मन्यते।

भावना मीमांसाशास्त्रस्य महत्त्वपूर्णं पारिभाषिक-पदं वर्तते। भावनाशब्दस्य व्युत्पत्तिः—**भाव्यते अनया इति भावना।** आर्थी-भावनायाः लक्षणं अर्थसंग्रहकारदृष्ट्या— **भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः** अर्थात् प्रयोजनेच्छाजनितक्रियाविषयव्यापारः आर्थीभावना। सा च आख्यातत्वांशेन उच्यते। यथा—'ओदनं पच'। वैदिकविधिवाक्ये—'यजेत स्वर्गकामः' इत्यस्य अयमर्थः, यागेन तथा व्याप्रियेत यस्मिन् व्यापारे कृते यागात् स्वर्गो भवतीति। भावना व्यापारविशेषः क्रियाविशेषो वा भवति। भावना द्विधा स्तः-1. शाब्दीभावना, 2. आर्थीभावना च। 1. **शाब्दी-भावना**—पुरुष-प्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः शाब्दीभावना। सा च लिङ्गांशेनोच्यते। यथा- 'गामानय' इत्यस्मिन् वाक्ये गोशब्दस्य गोत्वम्। स च प्रवृत्त्यनुकूल-व्यापारविशेषः। लौकिकवाक्ये पुरुषनिष्ठो व्यापारविशेषः। वैदिकवाक्ये तु पुरुषाभावात् लिङ्गादिशब्दनिष्ठ एव। सा च शाब्दीभावना अंशत्रयम् अपेक्षते—1. साध्यं, 2. साधनं, 3. इतिकर्तव्यतां च। साध्यं- 'किं भावयेत्?' अत्र शाब्दीभावनायाः साध्यस्याकांक्षाभूते सति आर्थीभावनायाः अन्वयः साध्यरूपे भवति। साधनं-'केन भावयेत?' शाब्दीभावनायाः साधनं लिङ्गादिज्ञानं वर्तते। इतिकर्तव्यता-'कथं भावयेत्?' व्यापारं कथं करणीयं इत्याकांक्षा। 2. **आर्थीभावना**— प्रयोजनेच्छा-जनितक्रियाविषयव्यापारः आर्थीभावना, सा च आख्यातत्वांशेन कथ्यते। एवं 'यजेत स्वर्गकामः' इत्यस्य अयमर्थः, यागेन तथा व्याप्रियेत यस्मिन् व्यापारे कृते यागात् स्वर्गो भवतीति। आर्थीभावना अपि अंशत्रयम्—1. साध्यं, 2. साधनं, 3. इतिकर्तव्यता च। 'किं भावयेत्?' 'केन भावयेत?" कथं भावयेदिति?'

विधिः—वेदस्य सर्वप्रथमप्रभेदः। अपौरुषेयं वाक्यं वेदः। विधिः इत्यस्य लक्षणं अर्थसंग्रहकारः करोति- 'तत्राज्ञातार्थ-ज्ञापको वेदभागो विधिः'। को वेदः- "इष्टप्राप्त्य-निष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः" अर्थात् अज्ञातार्थज्ञापको वेदभागो विधिः। विधिश्चतुर्विधः—1. उत्पत्तिविधिः, 2. विनियोगविधिः, 3. अधिकारविधिः, 4. प्रयोगविधिश्च। तत्र कर्मस्वरूपमात्रबोधको उत्पत्तिविधिः, यथा—अग्निहोत्रं जुहोति। अत्र च विधौ कर्मणः करणत्वेनान्वयः 'अग्निहोत्रहोमेनेष्टं भावयेत्' इति। अंगप्रधानसम्बन्धबोधको विधिः विनियोगविधिः। यथा—'दध्ना जुहोति'। सहकारिभूतानि विनियोगविधिः षट् प्रमाणानि—1. श्रुतिः, 2. लिङ्गं, 3. वाक्यं, 4. प्रकरणम्, 5. स्थानं, 6. समाख्या। कर्मजन्यफल-स्वाम्यबोधको विधिः अधिकारविधिः। यथा—'यजेत स्वर्गकामः' इत्यादिरूपः। प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। अंगानां क्रमबोधको विधिः प्रयोगविधिः इति लक्षणम्। तत्र षट् प्रमाणानि—1. श्रुति, 2. अर्थः, 3. पाठः, 4. स्थानं, 5. मुख्य, 6. प्रवृत्तिः, इति संक्षेपेण।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— 'अर्थसंग्रह' प्रकरणग्रन्थस्य रचनाकारः कः?
उत्तरम्—लौगाक्षिभास्करः।

2. **प्रश्नः**— 'अर्थसंग्रह' ग्रन्थे कस्मिन् विषयोपरि विचारः?
उत्तरम्—कर्मकाण्डपरकविषयोपरि विचारः।

3. **प्रश्नः**— अर्थसंग्रहकारः धर्मस्य लक्षणं किमुपस्थापयति?
उत्तरम्—यागादिरेव धर्मः।

4. **प्रश्नः**— चिन्नस्वामी मते आदिपदेन किं गृह्यन्ते?
उत्तरम्—आदिपदेन दानहोमादयो द्रव्यगुणादयश्च गृह्यन्ते।

5. **प्रश्नः**—चोदनालक्षणोऽर्थो धर्मः इत्यस्य सूत्रस्य रचनाकारः कः?
उत्तरम्—महर्षि-जैमिनिः।

6. **प्रश्नः**— मीमांसादर्शनस्य प्रणेता कः आसीत्?
उत्तरम्—जैमिनिः।

7. **प्रश्नः**— महाभारते धर्मस्वरूपं किं प्रतिपादितम्?
उत्तरम्—धारणाद् धर्म इत्याहुः।

8. **प्रश्नः**— अर्थसंग्रहकार-लौगाक्षिभास्करानुसारं धर्मस्य किं लक्षणम्?
उत्तरम्—वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः।

9. **प्रश्नः**—अर्थसंग्रहकारस्य पञ्चभागात्मकाः धर्मस्य प्रतिपादकाः के?
उत्तरम्—1. विधिः, 2. मन्त्रं, 3. नामधेयः, 4. निषेधः, 5. अर्थवादश्च।

10. **प्रश्नः**—भावनाशब्दस्य का व्युत्पत्तिः?
उत्तरम्—भाव्यते अनया इति भावना।

11. **प्रश्नः**— अर्थसंग्रकारदृष्ट्या का भावना?
उत्तरम्—भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः।

12. **प्रश्नः**— भावना कतिधा, काश्च ताः?
उत्तरम्—द्विविधा, 1. शाब्दीभावना, 2. आर्थीभावना च।

13. **प्रश्नः**— का शाब्दीभावना?
उत्तरम्—पुरुष-प्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः।

14. **प्रश्नः**— का आर्थीभावना?
उत्तरम्—प्रयोजनेच्छाजनितक्रियाविषयव्यापारः।

15. **प्रश्नः**— शाब्दीभावना, आर्थी-भावना च किं अंशत्रयम् अपेक्षते?
उत्तरम्—1. साध्यं, 2. साधनं, 3. इतिकर्तव्यतां च।

16. **प्रश्नः**— अंगभावना-सम्बन्धिप्रकरणं किम्?
उत्तरम्—अवान्तरप्रकरणम्।

17. **प्रश्नः**— वेदस्य सर्वप्रथमप्रभेदः कः?
उत्तरम्—विधिः।

18. **प्रश्नः**—अर्थसंग्रहकारदृष्ट्या विधिः इत्यस्य लक्षणम्?
उत्तरम्—अज्ञातार्थज्ञापको वेदभागो विधिः।

19. **प्रश्नः**— अर्थसंग्रहकारदृष्ट्या को वेदः?
उत्तरम्—इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः।

20. **प्रश्नः**— विधिः कतिविधः, के च ते?
उत्तरम्—चतुर्विधः, 1. उत्पत्तिविधिः, 2. विनियोग-विधिः, 3. अधिकारविधिः, 4. प्रयोगविधिश्च।

21. **प्रश्नः**— कर्मस्वरूपमात्रबोधको विधिः कः?
उत्तरम्—उत्पत्तिविधिः।

22. **प्रश्नः**— अंगप्रधानसम्बन्धबोधको विधिः कः?
उत्तरम्— विनियोगविधिः।

23. **प्रश्नः**— कर्मजन्यफलस्वाम्यबोधको विधिः कः?
उत्तरम्—अधिकारविधिः।

24. **प्रश्नः**— प्रयोगप्रांशुभावबोधको विधिः कः?
उत्तरम्—प्रयोगविधिः।

25. **प्रश्नः**— विनियोगविधेः सहकारिभूतानि कति प्रमाणानि?
उत्तरम्—षट्, 1. श्रुतिः, 2. लिङ्गं, 3. वाक्यं, 4. प्रकरणम्, 5. स्थानं, 6. समाख्या।

25. **प्रश्नः**—मीमांसादर्शने विनियोग-विधौ निरपेक्षो रवः..।
उत्तरम्—श्रुतिः।

26. **प्रश्नः**— मीमांसायां प्रयोगसमवेतार्थस्मारकाः इति किम्?
उत्तरम्—मन्त्राः।

27. **प्रश्नः**—पक्षे अप्राप्तस्य प्रापको विधिः इति कः?
उत्तरम्—नियमविधिः।

28. **प्रश्नः**— परिसंख्याविधेः किमुदाहरणम्?
उत्तरम्— पञ्च पञ्च नखाः भक्ष्याः।

29. **प्रश्नः**— मीमांसादर्शने "शब्दसामर्थ्यं" इति किम्?
उत्तरम्— लिङ्गम्।

30. **प्रश्नः**— समभिव्याहारो इति किम्?
उत्तरम्— वाक्यम्।

31. **प्रश्नः**— मीमांसायां किं नाम उभयाकांक्षा?
उत्तरम्— प्रकरणम्।

32. **प्रश्नः**— मीमांसायां किं नाम देशसामान्यम्?
उत्तरम्— स्थानम्।

33. **प्रश्नः**— समाख्या कतिविधा?
उत्तरम्— द्विविधा।

34. **प्रश्नः**—अंगानां क्रमबोधकप्रयोगविधेः षट् प्रमाणानि कानि?
उत्तरम्— 1. श्रुति, 2. अर्थः, 3. पाठः, 4. स्थानं, 5. मुख्य, 6. प्रवृत्तिः।

35. **प्रश्नः**— किं नाम धर्मविचारशास्त्रम्?
उत्तरम्— मीमांसा।

36. **प्रश्नः**— मुख्यभावना-सम्बन्धि-प्रकरणं किम्?
उत्तरम्— महाप्रकरणम्।

37. **प्रश्नः**— मीमांसायां यत्र समग्रांगोपदेशः सा का?
उत्तरम्— प्रकृतिः।

38. **प्रश्नः**— मीमांसादर्शने अर्थसंग्रहे यत्र न सर्वांगोपदेशः सा का?
उत्तरम्— विकृतिः।

39. **प्रश्नः**— श्रुतिः कतिविधा?
उत्तरम्— त्रिविधा।

40. **प्रश्नः**— विनियोक्त्री-श्रुतिः कतिविधा?
उत्तरम्— त्रिविधा।

(WXYZ) (वव) दर्शनशास्त्रस्य ग्रन्थाः ग्रन्थकाराश्च

क्र.	ग्रन्थनाम	ग्रन्थकारः
1.	न्यायतात्पर्यमण्डनम्	शंकरमिश्र
2.	ब्रह्मसूत्रम्	वेदव्यासः
3.	न्यायसूत्राणि	महर्षिगौतमः
4.	वात्सायनभाष्यम्	वात्स्यायन
5.	न्यायकुसुमांजलिः	उदयनाचार्यः
6.	तात्पर्यपरिशुद्धिः	उदयनाचार्यः
7.	आत्मतत्वविवेकः	उदयनाचार्यः
8.	न्यायमञ्जरी	जयन्तभट्टः
9.	न्यायवार्तिक (तात्पर्यटीका)	वाचस्पतिमिश्रः
10	न्यायवार्तिकम्	भरद्वाज उद्योतकर
11	न्यायसूत्रविवरणम्	राधामोहनगोस्वामी
12	कारिकावली	विश्वनाथपञ्चानन
13	न्यायसूत्रवृत्ति	विश्वनाथपञ्चानन
14	न्यायसूत्रोद्धारः	वाचस्पतिमिश्र
15	न्यायवासना	देवनाथताताचार्य
16	नागेशी	नागेशभट्ट
17	टिप्पण	बच्चा झा
18	न्यायकणिका	जयन्तभट्ट
19	प्रत्यक्षतत्त्वचिन्तामणि	गङ्गेशोपाध्यायः
20	न्यायसिद्धान्तमुक्तावली	विश्वनाथभट्टाचार्यः
21	न्यायतर्कभाषाय	केशवमिश्रः
22	न्यायसिद्धान्तमाला	जयराम
23	न्यायसारः	भासर्वज्ञः
24	पदमंजरी	अनन्त
25	न्यायसिद्धान्तमञ्जरी	जानकीनाथभट्टाचार्यः
26	न्यायकौमुदी	विनायकभट्ट
27	योगावली	नारायणः
28	न्यायसिद्धान्तदीप	शशधर
29	न्यायरत्नावली	वासुदेवः
30	षोडशपदार्थी	गणेशदास

क्र.	ग्रन्थनाम	ग्रन्थकार:
31	तर्कामृतम्	जगदीश:
32	तत्त्वालोक:	जगदीश:
33	योगावली	नागेशभट्ट
34	दीधिति	रघुनाथशिरोमणि
35	दीधिति व्याख्या	मथुरानाथ
36	दीधितिरहस्यम्	भवानन्द
37	व्युत्पत्तिवाद:	गदाधरभट्टाचार्य
38	विजया	जयदेव मिश्र
39	गूढार्थतत्त्वालोक:	बच्चा झा
40	योगसूत्राणि	पतंजलि:
41	योगभाष्यवार्तिकम्	विज्ञानभिक्षु
42	योगसारसंग्रह:	विज्ञानभिक्षु
43	राजमार्तण्ड (वृत्ति)	भोज
44	अर्थबोधिनी	नारायणतीर्थ
45	बृहत् तथा लघु व्याख्या	नागेशभट्ट
46	योगसूत्रव्यासभाष्य	व्यास
47	तत्त्ववैशारदी	वाचस्पति मिश्र
48	योगवार्तिक (विवरण)	शंकराचार्य
49	पातंजलरहस्यम्	राघवानन्द:
50	योगशास्त्र	हेमचन्द्र
51	योगार्णव:	शंकराचार्य:
52	सांख्यतत्त्वविलास	रघुनाथ:
53	योगसूत्र (भास्वती व्याख्या)	हरिहरानन्द आरण्य
54	मणिप्रभा	रामानन्दयति
55	सिद्धान्तचन्द्रिका	नारायणतीर्थ:
56	सांख्यसूत्राणि	कपिल:
57	सांख्यप्रवचनभाष्यम्	विज्ञानभिक्षु:
58	तत्त्वसमास (सूत्र)	सीमानन्द/क्षेमेन्द्र
59	सांख्यवृत्ति:	नागेशभट्ट
60	सांख्यसार:	विज्ञानभिक्षु:
61	सांख्यतत्त्वप्रदीप:	कविराज यति

क्र.	ग्रन्थनाम	ग्रन्थकार:
62	सांख्यकारिका	ईश्वरकृष्ण:
63	सांख्यसप्तति: (भाष्य)	गौडपाद:
64	सांख्यतत्त्वप्रदीपिका	केशव:
65	तत्त्वमीमांसा	कृष्णमिश्र
66	सांख्यतत्त्वकौमुदी	वाचस्पतिमिश्र
67	सांख्यकिरणावली	श्रीकृष्णवल्लभाचार्य
68	सांख्यतत्त्वालोक:	हरिहरानन्द आरण्य
69	सांख्यतरंग:	देवतीर्थस्वामी
70	सांख्यरहस्यम्	श्रीराम पाण्डेय
71	मीमांसादर्शनम् (सूत्राणि)	महर्षि जैमिनि
72	सुबोधिनी	शंकर भट्ट
73	शाबरभाष्यम्	शबरस्वामी
74	मीमांसा-परिभाषा	कृष्णयज्वा
75	बृहती (शाबरभाष्य)	प्रभाकर मिश्र
76	प्रकरणपञ्चिका	शालिकनाथ:
77	ऋजुविमला	शालिकनाथ:
78	न्यायविन्दु:	बालम्भट्ट:
79	न्यायमालाविस्तर:	सोमेश्वर:
80	कर्ममीमांसादर्शन	भारद्वाज:
81	जैमिनीयसूत्रवृत्ति:	पार्थसारथि मिश्र
82	मीमांसामण्डनम्	गंगानाथ झा
83	श्लोकवार्तिकम्	कुमारिल भट्ट
84	विधिविवेक:	मण्डन मिश्र:
85	न्यायरत्नाकर:	पार्थसारथि मिश्र
86	शास्त्रदीपिका	पार्थसारथि मिश्र
87	तन्त्रवार्तिकम्	कुमारिल भट्ट
88	टुप्टीका	कुमारिल भट्ट
89	तन्त्रवार्तिकव्याख्या	मण्डन मिश्र:
90	तन्त्ररत्नम्	पार्थसारथि मिश्र
91	अद्वैतसिद्धि:	श्रीमधुसूदन सरस्वती
92	सिद्धान्तबिन्दु	श्रीमधुसूदन सरस्वती

क्र.	ग्रन्थनाम	ग्रन्थकार:
93	लघुचन्द्रिका	ब्रह्मानन्द सरस्वती
94	तत्त्वप्रदीपिका (चित्सुखी)	चित्सुखाचार्य
95	सिद्धान्तलेशसंग्रह:	अप्पयदीक्षित:
96	पंचपादिका	पद्मपादाचार्य
97	नैष्कर्म्यसिद्धि:	सुरेश्वराचार्य:
98	विवरणम्	प्रकाशात्मयति
99	न्यायदीपावली	आनन्दबोध:
100	विवरणतात्पर्यदीपिका	चित्सुखाचार्य:
101	वेदान्तपरिभाषा	धर्मराजाध्वरीन्द्र
102	विवरणभावप्रकाशिका	नृसिंहाश्रम:
103	पंचदशी	विद्यारण्य स्वामी
104	ब्रह्मसूत्रम्	वादरायण (वेदव्यास)
105	वेदान्तसार:	सदानन्द यति
106	ब्रह्मसूत्रशांकरभाष्यम्	आदिशंकराचार्य:
107	ब्रह्मसिद्धि:	मण्डनमिश्र
108	भामती टीका	वाचस्पति मिश्र:
109	विवरणप्रमेयसंग्रह:	विद्यारण्य स्वामी
110	कल्पतरु टीका	अमलानन्द स्वामी
111	ब्रह्मसूत्रश्रीभाष्यम्	रामानुजाचार्य:
112	परिमलटीका	अप्पयदीक्षित
113	संक्षेपशारीरकम्	सर्वज्ञात्ममुनि
114	वेदान्ततत्त्वविवेक:	नृसिंहाश्रम:
115	खण्डनखण्डखाद्यम्	श्रीहर्ष:
116	न्यायामृतम्	व्यासराज:
117	विभ्रमविवेक:	मण्डनमिश्र:
118	सर्वदर्शनसंग्रह:	माधवाचार्य:
119	वेदान्तप्रक्रिया प्रत्यभिज्ञा	सच्चिदानन्द सरस्वती
120	न्यायभूषणम्	भासर्वज्ञ:
121	स्फोटसिद्धि:	मण्डनमिश्र:
122	ब्रह्मतत्त्वसमीक्षा	मण्डनमिश्र:
123	अभिप्रायप्रकाशिका	वाचस्पति

क्र.	ग्रन्थनाम	ग्रन्थकार:
124	परपक्षगिरिवज्र	माधवमुकुन्द:
125	पञ्चपादिका	पद्मपादाचार्य:
126	वेदान्तरत्नमञ्जूषा	श्रीपुरुषोत्तमाचार्य
127	भावशुद्धि:	आनन्दपूर्ण
128	वेदान्तकौस्तुभ	श्रीनिवासाचार्य
129	तत्त्वदीपिका	चित्सुखाचार्य:
130	वेदान्तपारिजातसौरभ	निम्बार्क
131	अद्वैतसिद्धि:	मधुसूदन सरस्वती
132	हंसदूत	वेंकटनाथ
133	माण्डूक्यकारिका	गौड़पाद
134	तात्पर्यदीपिका	सुदर्शनसूरि
135	उत्तरगीताभाष्यम्	गौड़पाद
136	गीतार्थसंग्रह	यामुनाचार्य:
137	वेदार्थसंग्रह:	रामानुजाचार्य:
138	गीताभाष्य, श्रीभाष्य	रामानुजाचार्य:
139	श्रीवचनभूषणसार:	श्रीलोकाचार्य:
140	पूर्णप्रज्ञभाष्य, गीताभाष्य	माधवाचार्य:
141	भागवततात्पर्यनिर्णय:	माधवाचार्य:
142	विष्णुतत्त्वनिर्णय	माधवाचार्य:
143	गीतातात्पर्यनिर्णय:	माधवाचार्य:
144	तन्त्रसारसंग्रह	माधवाचार्य:
144	तत्त्वप्रकाशिका, तत्त्वविवेक:	जयतीर्थ:
145	न्यायामृत	व्यासतीर्थ
146	तर्कताण्डवम्	व्यासतीर्थ
147	तात्पर्यचन्द्रिका	व्यासतीर्थ
148	मन्दारमञ्जरी	व्यासतीर्थ
149	भेदोज्जीवन	व्यासतीर्थ
150	मायावादखण्डनम्	व्यासतीर्थ
151	भावबोध	रघूत्तमतीर्थ
152	ब्रह्मप्रकाशिका	रघूत्तमतीर्थ
153	तत्त्वोद्द्योतपञ्जिका	रघूत्तमतीर्थ

क्र.	ग्रन्थनाम	ग्रन्थकारः
154	माध्वमुखालंकार	वनमाली मिश्र
155	अभिनवगदा	सत्यनाथ यति
156	अभिनवतर्कताण्डव	सत्यनाथ यति
157	तत्त्वार्थाधिगमसूत्र	उमास्वामि
158	नियमसार	कुन्दकुन्दाचार्य
159	पंचास्तिकायसार	कुन्दकुन्दाचार्य
160	समयसार	कुन्दकुन्दाचार्य
161	प्रवचनसार	कुन्दकुन्दाचार्य
162	आप्तमीमांसा	सामन्तभद्र
163	सम्मतितर्क	सिद्धसेन दिवाकर
164	षड्दर्शनसमुच्चय	हरिभद्र
165	अनेकान्त-जयपताका	हरिभद्र
166	अष्टसाहस्री	विद्यानन्दः
167	प्रमाणमीमांसा	हेमचन्द्र
168	स्याद्वादमंजरी	मल्लिषेण सूरि
169	अभिधर्मज्ञान-प्रस्थानशास्त्र	कात्यायनीपुत्र
170	अभिधर्मकोश	वसुबन्धु
171	समयप्रदीपिका	संघभद्र
172	प्रमाणसमुच्चय	दिङ्नाग
173	न्यायप्रवेश	दिङ्नाग
174	न्यायमुखप्रमाणवार्तिक	धर्मकीर्ति
175	न्यायमुख	दिङ्नाग

क्र.	ग्रन्थनाम	ग्रन्थकारः
176	सम्बन्धपरीक्षा	धर्मकीर्ति
177	वादन्याय	धर्मकीर्ति
178	माध्यमिककारिका	नागार्जुन
179	तत्त्वसंग्रह	शान्तरक्षित
180	नैष्कर्म्यसिद्धिः	सुरेश्वराचार्यः
181	बृहदारण्यकोप-निषद्भाष्यवार्तिक	सुरेश्वराचार्यः
182	संक्षेपशारीरक	सर्वज्ञात्ममुनि
183	प्रत्यक्तत्त्वप्रदीपिका	चित्सुखाचार्यः
184	विवरणप्रमेयसंग्रह	विद्यारण्य
185	अद्वैतसिद्धिः	मधुसूदन सरस्वती
186	वेदान्तसिद्धान्तमुक्तावली	प्रकाशानन्द
187	वेदान्तसार	सदानन्द
188	वेदान्तपरिभाषा	धर्मराज ध्वरीन्द्र
189	इष्टसिद्धिः	मुकतात्मन
190	भेदधिक्कार	नृसिंहाश्रम
191	कल्पतरुपरिमल	अप्पयदीक्षित
192	सिद्धान्तलेशसंग्रह	अप्पयदीक्षित
193	माण्डूक्यकारिका	गौड़पादाचार्य
194	उपदेशसाहस्री	शंकराचार्यः
195	गीताभाष्य	शंकराचार्यः
196	वेदान्तसिद्धान्तमुक्तावली	प्रकाशानन्द

11

वेदाङ्ग-परिचयः एवं ऋक्प्रातिशाख्यशास्त्रविवेचनम्

(AA-Code-25)

(क) वेदाङ्गानाम् अध्ययनम् सामान्य-संक्षिप्तः परिचयः वस्तुनिष्ठप्रश्नोत्तराणि च

वेदस्य अङ्गानि वेदाङ्गानि। "अङ्ग्यन्ते ज्ञायन्ते अमीभिः इति अङ्गानि" इति व्युत्पत्त्या अङ्गशब्दस्यार्थः उपकारको भवति। यैः ज्ञायते पदार्थस्य स्वरूपं तानि एव अङ्गानि। अर्थात् वेदानां स्वरूपनिर्धारणे ये शास्त्राः उपयोगिनो भवन्ति तान्येव शास्त्राणि वेदाङ्गानि। शिक्षा-कल्प-व्याकरण-निरुक्त-छन्द-ज्योतिषः सन्ति षड् वेदाङ्गानि। यथा-

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु।।

1. **शिक्षा**–उच्चारणकर्मणि उपकारकं वेदाङ्गं शिक्षेति कथ्यते। यथा तैत्तिरीयोपनिषदि स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते, उपदिश्यते सा शिक्षा।' शिक्षायाः षट्भेदाः कथिताः शिक्षां व्याख्यास्यामः। वर्णः, स्वरः, मात्रा, बलं, साम, सन्तानः इत्युक्तः शिक्षाध्यायः।' शिक्ष भाव अ + टाप् = आ शिक्षा। तच्छास्त्रं शिक्षा नाम येन वेदमन्त्राणामुच्चारणं शुद्धं सम्पाद्येत। वेदे स्वरस्य प्राधान्यं सर्वविदितम्। स्वरज्ञानं च शिक्षाऽऽयत्तम्। अतएवेदं शिक्षाशास्त्रं वेदाङ्गम्। येन प्रकारेण पुरुषः सर्वेषामङ्गानां यथाविधि विनिवेशितेऽपि मुख- सौन्दर्यादिभिः परिपुष्टेऽपि घ्राणेन विना चमत्कृतिं न दधाति, गर्हणीयतामेव भजते तथैव वेदपुरुषस्य स्वरूपं वेदाङ्गेन शिक्षारूपघ्राणेन विना नितान्तमशोभनं विकृताकारं वा परिलक्ष्यते। सायणाचार्याः कथयन्ति यत्- "स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा" इति। एतदवबोधनमेव शिक्षायाः प्रयोजनम्। "शिक्षयति या सा शिक्षा" "शक्तुं शक्तो भवितुमिच्छा शिक्षा" इति द्वे व्युत्पत्ती शिक्षाशब्दस्य प्रदर्शिते। शब्दोऽयं योगरूढः। अर्थात् 'आदौ गुरुः कस्यापि मन्त्रस्योच्चारणं स्वरविज्ञानसहितं स्वयमेव करोति पश्चाच्च तदुच्चारणं सावधानतया शिष्यः श्रुत्वा अवधारणञ्च कृत्वा तदनुसरणं करोति।' उदात्तानुदात्तस्वरितभेदैः त्रयः स्वराः भवन्ति। उच्चस्वरेणोच्चरितत्वात् उदात्तः, मन्दस्वरेणोच्चरितत्वात् अनुदात्तः, द्वयोश्च समाहारेणोच्चरितत्वात् स्वरित इति सूत्राणि निर्दिश्य पाणिनिना प्रोक्तम्। वेदस्य प्रत्येकस्मिन् शब्दे उदात्तस्वरोऽवश्यमेव भविष्यति, शेषाः स्वराश्चानुदात्ता भवन्ति। उदात्तस्वरस्य स्थानेऽनुदात्तस्वरस्योच्चारयितुः शिष्यस्य मुखे चपेटिकां दत्वा शुद्धोच्चारणं कारयति स्म। प्रत्येकस्य वेदस्योच्चारणार्थं स्वीया शिक्षा विद्यते। यस्यां शिक्षायां तत्तद् वेदानुकूलमुच्चारणविधानं विद्यते। अत एव पाणिनीयशिक्षायां स्पष्टमुद्घोषितं पाणिनिना महावैयाकरणेन–

मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

2. **कल्पः**–वेदाध्ययनस्य प्रयोजनं तु यज्ञ-याग-कर्मकाण्डस्यार्थे प्रवृत्तस्य वेदाङ्गस्य सूत्रशैल्यां निबद्धः नाम कल्पोऽस्ति। विपुले वेदाङ्गसाहित्ये कल्पस्य द्वितीयं स्थानमस्ति। कल्पस्य वैदिकसाहित्येऽतिशयं महत्त्वपूर्णं स्थानमस्ति। 'कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्' वेदेषु विस्तीर्णकर्मकाण्डं सूत्रबद्धं कर्तुमेव कल्पस्याविर्भावः। अर्थात् वेदविहितानां कर्मणां व्यवस्थापकं शास्त्रं 'कल्पः' इत्यभिधीयते। यथोक्तं विष्णुमित्रेण **'कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्' इति।** येषां यज्ञयागादिविहितानां विवाहोपनयनादिकर्मणाञ्च महत्त्वपूर्णं प्रतिपादनं वैदिकग्रन्थेषु कृतमस्ति तेषां सूत्रग्रन्थानामभिधानमस्ति कल्पः। ब्राह्मणकाले यागस्य तावान् प्रचारो जातो यत्तेषां यथावज्ज्ञानाय पूर्णपरिचयप्रदायकग्रन्थानामावश्यकताऽनुभूयते स्म। तामेवावश्यकतां स्वल्पेन शब्देन पूरयितुं कल्पसूत्राणि विरचितानि। कल्पसूत्राणि चत्वारि- **श्रौतगृह्यधर्म-शुल्वसूत्राणि।**

1. **श्रौतसूत्राणि**–प्रकाशकानि श्रौतसूत्राणि, अर्थात् श्रुत्युक्तदर्शपौर्णमासादियज्ञानां विधानबोधकानि श्रौतसूत्राणि। इत्थं श्रौतसूत्रेषु ब्राह्मणग्रन्थवर्णितानां दर्शपौर्णमासाग्नि-होत्रादिश्रौताग्नि-यज्ञानां क्रमबद्धविवेचनमुपलभ्यते। 2. **धर्मसूत्राणि**–धर्मसूत्रेषु धार्मिकनियमाः, प्रजानां राज्ञां च कर्तव्यानां वर्णनमस्ति। अस्मिन् कल्पप्रकारे चतुर्णां वर्णानां, चतुर्णाम् आश्रमाणां पूर्णतया धार्मिकनिरूपणं वर्तते। गौतमधर्मसूत्रम्, बौधायनधर्मसूत्रम्, वशिष्ठधर्मसूत्रम्, आपस्तम्बधर्मसूत्रम्, मानवधर्मसूत्रम् इति प्रधानानि धर्मसूत्राणि सन्ति। 3. **गृह्यसूत्राणि**–गृह्यसूत्रेषु त्रैवर्णिकैरवश्या-नुष्ठेयानामनुष्ठानानां यागविशेषाणां वर्णनं विद्यते। षोडशसंस्काराणां विशिष्टं वर्णनं च वर्तते। वेदानां कल्पसूत्राणाम् आध्यात्मिकविचारधारायाः वर्णनं वर्तते। 4. **शुल्वसूत्राणि**–शुल्वसूत्राणि केवलं यजुर्वेद एव उपलभ्यन्ते। अर्थात् येषां यज्ञयागादिविहितानां विवाहोपनयनादिकर्मणाञ्च महत्त्वपूर्णं प्रतिपादनं वैदिकग्रन्थेषु कृतमस्ति। शुल्वसूत्रेषु तु वेदीनिर्माणप्रकारस्य एव प्राधान्यमस्ति। मापक्रियायाः सामान्यं नाम शुल्वमस्ति। तेषां सूत्रग्रन्थानामभिधानमस्ति कल्पः। कल्पग्रन्था वेदाङ्गस्य प्राचीनतमा ग्रन्थास्सन्ति।

स्वल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।

उपर्युक्तेन सूत्रलक्षणेन विज्ञायते यत्–धर्मशास्त्रीयविधिविधानानां, कर्मानुष्ठानानां, नीतिनियमानां, व्यवहृत-व्यवहाराणां धर्मस्य प्रवर्तनानाञ्च सङ्क्षेपतमं, सारयुतं, संशीतिरहितं कल्पसूत्रस्य विवेचनमिति।

कल्पसूत्ररचनाया उद्देश्यानि–वैदिकवाङ्मयस्येतिहासे कल्पसूत्राणामाविर्भावो नव्ययुगस्य सूत्रपात इव लक्ष्यते। एतदपि विशिष्टमुद्देश्यमासीद्यत्–प्राक्तने वैदिके युगे तत्साहित्यस्य

विस्तरत्वात्, दुर्गमत्वात् रहस्यमयत्वाच्च यथास्थितिबोधनं दुस्तरं कार्यमासीत्। वशिष्ट्यञ्चैषां न्यूनातिन्यूनशब्देषु अधिकादधिकं भावप्रकटनमस्ति। तथाहि-भावस्य, भाषायाः, विचारस्य, शैल्याः, रचनाविधानस्य च दृष्ट्याऽपि परिवर्तनं दरीदृश्यते।

कल्पसूत्रस्य मुख्यो विषयः, भेदः, विषयविभागश्च–कल्पसूत्रे वैदिककर्मणां प्रतिपादनं संस्काराणां व्याख्यानं यज्ञानाञ्च विधानवर्णनं प्राधान्यरूपेण विवेचितं विद्यते। यज्ञादीनां वैशिष्ट्यस्य प्रतिपादनं वेदेभ्यो ब्राह्मणेभ्यश्चोपलभ्यते। प्राचीनकालादारभ्याधुनापर्यन्तं कल्पसूत्रेष्वेमे ग्रन्थाः कर्मकाण्डजुषां सामाजिकानां सात्त्विक-जीवनस्य परिचायकाः सन्ति। कल्पसूत्राणां मुख्यतस्त्रयो भेदाः भवन्ति। केषाञ्चन मते चतुर्भेदा भवन्ति।

3. **व्याकरणम्**–"प्रधानं च षट्सु अङ्गेषु व्याकरणम्।"[1] "व्याक्रियन्ते शब्दाः अनेनेति व्याकरणम्।" शब्दानां प्रकृतिप्रत्ययादीनां समुचितं ज्ञानं व्याकरणेन भवति। पतञ्जल्यनुसारेण व्याकरणस्य प्रयोजनानि-'रक्षोहागम-लघ्वसदेहाः प्रयोजनम्'। अतः व्याकरणमपि वेदाङ्गमेवास्ति। वेदपुरुषस्य मुखं भवति व्याकरणम्। ऋग्वेदकालतः एव व्याकरणशास्त्रस्य निर्देशः समुपलभ्यते, किन्तु व्याकरणस्य उत्पत्तिकथा तु तैत्तिरीयसंहितायां वर्णिताऽस्ति। महर्षेः यास्कस्य निरुक्तग्रन्थे तु व्याकरणस्य अनेकेषां पारिभाषिकशब्दानां प्रयोगः समुपलभ्यते। व्याकरणस्य लब्धप्रतिष्ठचार्यः पाणिनिः स्वकीयेऽष्टाध्यायीनामके ग्रन्थे स्वपूर्ववर्तीनां अनेकेषां वैयाकरणानां नामनिर्देशं चकार। पाणिनिः शब्दानुशासन-ग्रन्थद्वारा लौकिकसंस्कृतभाषां व्यवस्थापयामास। इत्थं शब्दानुशासनम् अष्टाध्यायी वा व्याकरणवेदांगस्य प्रतिनिधिग्रन्थः अस्ति। अस्य पाणिनिव्याकरणस्य सम्प्रदायद्वयं उपलभ्यते, प्राचीनव्याकरणं नव्यव्याकरणञ्च। पूर्वाचार्याणामयं ज्ञाननिक्षेपः सम्प्रति भारतीयानां किमुत बुद्धिजीविनां मानवमात्राणाममूल्यो निधिः। एतेनैव भारतीया गौरवधुरं सगर्वमुद्वहन्ति। आधुनिकाः विद्वांसः प्रधानरूपेण व्याकरणशास्त्रप्रवर्तकान् अष्टावेव मन्यन्ते।

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्राः जयन्त्यष्टौ च शाब्दिकाः॥

किमिति चेत्-मुखं विना भोजनव्यापारः नास्ति। भोजनं विना शरीरं नास्ति। शरीरं विना प्राणरक्षणं न भवति। ऋग्वेदे व्याकरणस्य प्रशंसा एवमस्ति–

चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्तहस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति
महोदेवो मर्त्यां आविवेश॥

व्याकरणस्य इच्छापूर्तिकारणत्वाद् वृषभेति नाम्ना सम्बोधनमस्ति। अस्य चत्वारि शृङ्गाणि भवन्ति। तानि- (1) नाम, (2) आख्यातः (क्रिया) (3) उपसर्गः, (4) निपातः। त्रयः पादाः-वर्तमान-भूत-भविष्यत्कालाः, एते त्रयः कालाः विद्यन्ते। द्वे शीर्षे-सुप्, तिङ्। अस्य सप्त हस्ताः-प्रथमादयः संप्तविभक्तयः सन्ति। त्रिधा बद्धः-व्याकरणरूप वृषभः उरः, कण्ठः, शिरः इति स्थानेषु बद्ध इति। अयं महान् देवो, यः मनुष्येषु प्रविष्टो विद्यते। भगवान् पतञ्जलिः व्याकरणस्य प्रयोजनानि प्रत्यपादयत्। तेषु (1) रक्षा, (2) ऊहः, (3) आगमः, (4) लघुः, (5) असंदेहः, (6) अपभाषणम्, (7) दुष्टः शब्दः, (8) अविद्वांसः (9) विभक्तिं कुर्वन्ति, (10) नामकरणमिति। (11) यदधीतम्, (12) यस्तु प्रयुंक्ते, (13) यो वा इमाम्, चत्वारि इत्यादि महाभाष्योदाहरणानि अपि व्याकरणाध्ययनानां प्रयोजनानि सन्ति।

4. **निरुक्तम्**–अर्थावबोधे निरपेक्षतया पदजातं यत्र तद् निरुक्तम्। वैदिकशब्दानां निर्वचनं निरुक्ते भवति। षट्सु वेदाङ्गेषु निरुक्तं चतुर्थं स्थानं भजते। तच्च वेदपुरुषस्य श्रोत्रमुच्यते। निःशेषादुक्तमिति निरुक्तम्। निरुक्तं वेदविज्ञानस्य आन्तरिकं स्वरूपं स्पष्टतः उद्घाटयति। निघण्ट्वाख्यस्य वैदिककोशस्य भाष्यरूपमस्ति निरुक्ताख्यं वेदांगम्। निरुक्तस्यारम्भे निघण्टुं समाम्नायं इति कथितो वर्तते। निघण्टौ तु केवलं वैदिकाः शब्दाः परिगणिताः सन्ति, परन्तु निरुक्तकारो यास्कः तेषां वैदिकानां शब्दानां सविस्तरं विवेचनं करोति। अन्यानि वेदांगानि वेदस्य बहिर्भूतानि तत्त्वानि व्याकुर्वन्ति, तर्हि निरुक्तं वेदस्य अन्तर्भूतानि तत्त्वानि व्याकरोति। अस्य शब्दस्य च या व्याख्या दुर्गाचार्यमहाभागेन कृता, तया व्याख्यया तु अस्य प्राचीनत्वमेव सिद्ध्यति। महाभारतस्य मोक्षधर्मपर्वणि उक्तं यथा–

वृषो हि भगवान् धर्मः ख्यातो लोकेषु भारत।
निघण्टुकपदाख्याने विद्धि मां वृषमुत्तमम्॥
कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते।
तस्मात् वृषाकपिं प्राह कश्यपो मां प्रजापतिः॥

निरुच्यते निःशेषेणोपदिश्यते निर्वचनविधया

तत्तदर्थबोधनाय पदजालं यत्र तन्निरुक्तम्। शिक्षाया वर्णोच्चारणप्रकारे व्याकरणेन च पदसाधुत्वज्ञाने सञ्जाते मन्त्र-घटकपदानाम् अर्थज्ञानाकांक्षायां मन्त्रघटकार्थज्ञानाय भगवता यास्केन निरुक्तं प्रणीतम्। निरुक्तस्य पञ्चविधयः भर्तृहरिणा कथिताः–

वर्णागमो वर्णविपर्ययश्च
द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योग-
स्तदुच्यते पञ्चविधं निरुक्तम्॥

मानवस्वभावोऽयं वर्तते, यत् शब्दोच्चारणे सारल्यं सौविध्यं प्रति स्वाभाविकरुचिर्भवति। अस्मात् कारणादेव-1. वर्णागमः, 2. वर्णविपर्ययः, 3. वर्णविकारः, 4 वर्णलोपः, 5. धात्वर्थातिशयः निर्वचनानि क्रियन्ते। पदानां निर्वचनविषये यास्काचार्यस्तु स्वच्छन्दप्रवृत्तिशीलः दृश्यते, तस्य मते येन-केन प्रकारेण निर्वचनमवश्यमेव भवेत्। यथा-**गौः**-गौरिति पृथिव्या नामधेयम्। यद् दूरङ्गता भवति। यच्चास्यां भूतानि गच्छन्ति। गातेर्वा गाङ्गतौ इत्यस्य धातोः ओकारो नामकरणः प्रत्ययः। **आचार्यः**-आचार्यः आचारं ग्राहयति, आचिनोत्यर्थान् आचिनोति बुद्धिम् इति वा। **वैश्वानरः**-विश्वान् नरान् नयति। विश्वः एनं नरा नयन्तीति वा अपि वा विश्वानरः एव स्यात्। इत्यादयः।

5. **छन्द**–वेदाः छन्दोबद्धाः सन्ति। वेदार्थज्ञानाय छन्दसः महत्त्वं वर्तते। अक्षरपरिमाणमेव छन्दः। "छादयति पृणाति रोचते इति छन्दः।" वेदमन्त्राणां लयबद्धं कर्णप्रिय-उच्चारणाय छन्दोज्ञानम् आवश्यकम्। आचार्य-पिङ्गलकृतछन्दःशास्त्रं महत्त्वपूर्णं वेदाङ्गं वर्तते। अक्षरपरिमाणमेव छन्दः। यथोक्तम् आचार्यकात्यायनेन–**"यो ह वा अविदितार्षेयच्छन्दो दैवतब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति वा स्थाणुं वर्च्छति गर्त्ये वा पात्यते प्रमीयते वा पापीयान् भवति"** इति। ऋग्वेदसामवेदयोः सर्वे मन्त्राः छन्दोबद्धाः सन्ति। यजुर्वेदस्य गद्यात्मकाः पद्यात्मकाश्च सर्वे मन्त्राः छन्दोबद्धाः एव सन्ति। छन्दोवेदाङ्गस्य प्रतिनिधिभूतो ग्रन्थस्तु पिंगलाचार्यकृतं 'छन्दःसूत्रम्' वर्तते।

प्रथम-द्वितीय-तृतीयसप्तकानां छन्दसामक्षरविवरणम्–

1.	गायत्री	24	अक्षराणि
2.	उष्णिक्	28	अक्षराणि
3.	अनुष्टुप्	32	अक्षराणि
4.	बृहती	36	अक्षराणि
5.	पंक्तिः	40	अक्षराणि
6.	त्रिष्टुप्	44	अक्षराणि
7.	जगती	48	अक्षराणि
8.	अतिजगती	52	अक्षराणि
9.	शक्वरी	56	अक्षराणि
10.	अतिशक्वरी	60	अक्षराणि
11	अष्टिः	64	अक्षराणि
12.	अत्यष्टिः	68	अक्षराणि
13.	धृतिः	72	अक्षराणि
14	अतिधृतिः	76	अक्षराणि
15.	कृतिः	80	अक्षराणि
16	प्रकृतिः	84	अक्षराणि
17.	आकृतिः	88	अक्षराणि
18	विकृतिः	92	अक्षराणि
19.	संस्कृतिः	96	अक्षराणि
20	अभिकृतिः	100	अक्षराणि
21	उत्कृतिः	104	अक्षराणि

छन्दः द्विविधं भवति–1. वार्णिकछन्दः, 2. मात्रिकछन्दश्च।

1. **वार्णिकछन्दः**–यस्मिन् छन्दे पादस्थानां वर्णानां संख्या गण्यते तत् वर्णछन्दः। अर्थात् स्वराः स्वरव्यञ्जनाश्च छन्दसि वर्णनाम्ना व्यवह्रियते। यथा-उपेन्द्रवज्रा, वसन्ततिलका, वंशस्थादयः।

2. **मात्रिकछन्दः**–यस्मिन् छन्दसि पादस्थवर्णानां मात्राः गण्यन्ते तत् मात्रिकछन्दः। अर्थात् वर्णोच्चारणकाल एव मात्रा सा च लघुगुरुभेदात् द्विधा। यथा-आर्या।

(क) लघुः–ह्रस्वं लघुसंज्ञं स्यात्। अर्थात् ह्रस्वस्वरः लघुः तथा च ह्रस्वस्वरयुक्तः व्यञ्जनोऽपि लघुः। एकमात्रिकं भवति लघुवर्णः। लघुस्वराः-अ, इ, उ, ऋ, लृ।

(ख) गुरुः–दीर्घस्वरस्य गुरुसंज्ञा भवति; ते च- आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ तथा च दीर्घस्वरयुक्तस्य व्यञ्जनस्यापि गुरुसंज्ञा भवति। गुरुवर्णः द्विमात्रिकं भवति। अन्यत् च–

संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसम्मिश्रम्।
विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन॥

(क) गुरुः–संयुक्ताद्यं गुरुसंज्ञं भवति अर्थात्

संयुक्तवर्णात् पूर्ववर्णः गुरुः मन्यते; यथा-यक्षः (क् + ष = क्ष) अत्र यकारः गुरुः।

(ख) दीर्घम्–दीर्घस्वराणाम् तथा च दीर्घस्वरयुक्तानां व्यञ्जनानाम्, यथा– आ, ई, ऊ, ऋ, ए, ऐ, ओ, औ, दा, ता, नी, भू, रे इत्यादयः।

(ग) सानुस्वारः–अनुस्वारयुक्तः वर्णोऽपि गुरुसंज्ञः भवति। यथा-वंशः, सार्यं, प्रियं इत्यादयः।

(घ) विसर्गसम्मिश्रम्–विसर्गयुक्तः (:) वर्णः गुरुसंज्ञः भवति। यथा-पतिः, रामः, लेखकः। अत्र तिः, मः, कः गुरुवर्णाः।

(ङ) पदान्तवर्णस्तु विकल्पेन लघुः गुरुर्वा भवति। छन्दलक्षणे लघुवर्णस्य कृते "ल" प्रयुज्यते चिह्नञ्च, तथा गुरुवर्णस्य कृते 'ग' 'ऽ' प्रयुज्यते। वर्णानामथवा मात्राणां समूहो 'गण' उच्यते। त्रयाणां वर्णानां समूहः गणः कथ्यते। अष्टौ गणाः सन्ति, ते च '**यमाताराजभानसलगाः**'- य = यगण, मा = मगण, ता = तगण, र = रगण, ज = जगण, भा = भगण, न = नगण, स = सगण, ल = लघु, गाः = गुरुः।

वर्णानां मात्राज्ञानम्–'यमाताराजभानसलगाः' 'सूत्रस्थं' गणबोधकम् आदिवर्णं स्वीकृत्य अग्रस्थयोः द्वयोः वर्णयोः मात्रा गण्यते यथा–

गण	वर्णाः	मात्राः	विवेचनम्
य = यगण	यमाता	।ऽऽ	आदिलघुर्य:-अत्र आदिवर्णः लघु शेषौ गुरु स यगणः
म = मगण	मातारा	ऽऽऽ	मस्त्रिगुरुः-यत्र त्रयः गुरुवर्णाः स मगणः
ता = तगण	ताराज	ऽऽ।	अन्तलघुस्तः = यत्र अन्त्यलघुः भवति स तगणः
रा = रगण	राजभा	ऽ।ऽ	रलमध्यः = यत्र मध्यलघुवर्णः स रगणः
ज = जगण	जभान	।ऽ।	जोगुरुमध्यगतो = यत्र मध्यवर्णः गुरुः शेषौ लघू स जगणः
भा = भगण	भानस	ऽ।।	भादिगुरुः = यत्र आदि वर्णः गुरुः शेषौ लघू स भगणः
न = नगण	नसल	।।।	त्रिलघुश्च नकारो = यत्र त्रयः लघुवर्णाः स नगणः
स = सगण	सलगाः	।।ऽ	सोऽन्तगुरुः = यत्र अन्त्यवर्णः गुरुः शेषौ लघू स सगणः

लघुवर्णस्य एकमात्रा दीर्घस्य च द्वे मात्रे।

वर्णः	चिह्नम्	मात्रा	वर्णः	चिह्नम्	मात्रा
लघुः	।	1 (एक)	गुरुः	ऽ	2 द्वौ

छन्दलक्षणे संख्यानां कृते प्रयुक्ताः पारिभाषिकशब्दाः–

1. (एकः) –चन्द्रमा, पृथ्वी। (चन्द्रः एक एव, पृथ्वी च) 2. (द्वौ) –पक्षः, नेत्रम्। (शुक्लपक्षः, कृष्णपक्षः, द्वौ पक्षौ तथैव नेत्रम्) 3. (त्रयः) –गुणः, रामः, अग्निः।4. (चत्वारः) वेदाः, वर्णाः, युगाः, आश्रमाः। 5 (पञ्च) –शर-इन्द्रिय-भूत-तत्त्वानि।6. (षट्) –शास्त्र-रस-ऋतवः। 7. (सप्त) –अश्व-मुनि-लोक-स्वराः। 8. (अष्टौ) वसु, याम-सिद्धि-योगिनः।9. (नव) –अङ्क-ग्रह-द्रव्य-निधयः। 10. (दश) –दिक्-अवताराः। 11. (एकादश) रुद्राः। 12. (द्वादश) –सूर्य-मासाः।

6. **ज्योतिषं**–यज्ञानामनुष्ठाने समुचितकालं निर्दिशति। कालात् प्रसूतमिदं विश्वं काले एव परिवर्द्धितं परिचालितञ्च। नक्षत्र-तिथि-वार-मास-संवत्सरान् सुप्रकारेण ज्ञात्वैव यज्ञकार्यं सम्पादितव्यम्। कालं विहाय कोऽपि जीवः जगति स्थातुं न शक्नोति। तादृशस्य कालस्य ज्ञानं ज्योतिःशास्त्रं विना न भवितुमर्हति, अतः भास्कराचार्येण ज्योतिषशास्त्रस्य व्याख्यानावसरे 'कालतन्त्रं जगुः' इत्थं परिभाषितम्। ज्योतिष-शास्त्रं भारतीय-विद्यायाः महत्त्वपूर्णम् अङ्गमस्ति। 'ज्योतिषां सूर्यादिग्रहाणां बोधकं शास्त्रम्' वर्तते। 'नभोमण्डले स्थित-ज्योतिःपिण्डसंबद्धाः विद्याः ज्योतिर्विद्याः' इति मन्यते। वेदाङ्गज्योतिषे आचार्य-लगधेनापि उक्तं यत्–वेदाः यज्ञार्थमभिप्रयुक्ताः, यज्ञादयः कालमपेक्षन्ते, काली

ज्योतिषशास्त्रस्य विषयः। अतः कालविधानशास्त्रं ज्योतिषम् इति नाम्ना प्रसिद्धम्। यथा अथर्ववेदे–

पूर्णः कुम्भोऽधिकालः अहिस्तत्
पश्यामो बहुधा नो सन्तः।
य इमा विश्वानि भुवनानि प्रत्यङ्-
कालस्तमाहुः परमे व्योमन्।।

कालज्ञापकमिदं शास्त्रं मयूराणां शिखा, नागानां मणिरिव वेदाङ्गेषु मूर्ध्नि स्थितम्, इति सोमाकरभाष्ये प्रतिपादितम्। यथा–

यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्धनि स्थितम्।
(वेदाङ्ग–ज्योतिषम्)

ज्योतिषं ज्ञानं (वेद) शरीरस्य नयनं वर्तते। नेत्राभावे शरीरस्य अपूर्णता व्यर्थता च भवति। इदं ज्योतिष-शास्त्रं कालविज्ञापकं शास्त्रम्। मुहूर्तं शोधयित्वा क्रियमाणाः यज्ञादिक्रिया विशेषाः सत् फलाय कल्पन्ते। अतोऽस्य ज्योतिष-शास्त्रस्य वेदाङ्गत्वं स्वीकृतम्। यथा–

वेदा हि यज्ञार्थमभिप्रवृत्ताः
कालानुपूर्वा विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं
यो ज्योतिषं वेद स वेद यज्ञान्।।
(वेदाङ्गज्योतिषः)

ज्योतिःशास्त्रं तु वेदस्य नेत्रस्थानीयमस्ति, यथोक्तं पाणिनीयशिक्षायां "ज्योतिषामयनं चक्षुः"। ज्योतिषज्ञानं विना अहोरात्र-पक्ष-मास-ऋतु-संवत्सराणां शुभत्वाशुभत्वज्ञानमपि सम्भवं नास्ति। किम्बहुना यज्ञसम्पादनाय यात्रादिकसम्पादनाय चापि ज्योतिषः आवश्यकता भवत्येव। वैदिकसंहितासु कालविभागः सर्वत्र समुपलभ्यते एव।

(ख) ज्योतिषशास्त्रस्य निर्वचनानि–

1. सूर्यादिग्रहचारेणाधारीकृत्य निर्मितं शास्त्रं ज्योतिषम्–नृसिंहदैवज्ञः।
2. ज्योतींषि ग्रहनक्षत्राण्यधिकृत्य कृतो ग्रन्थो ज्योतिषम्–सिद्धान्तशिरोमणिटीकायाम्।
3. ज्योतिष् पिण्डानि प्रतिपाद्यन्ते यस्मिन् तत् ज्योतिषमिति–आचार्यमुरलीधरः।
4. ज्योतींषि ग्रहनक्षत्रादीनधिकृत्य कृतो ग्रन्थो ज्योतिष इति–अमरकोषः।
5. वेद अस्माकं ज्ञानमूलं कर्ममूलञ्च, तत्रोक्तज्ञानादयः यज्ञादयश्च कालाश्रिताः, अतः ज्योतिषशास्त्रं कालविधानशास्त्रम् अस्ति। (आचार्यलगधेन प्रोक्तम्)
6. यो ज्योतिषं वेत्ति नरः स सम्यक् धर्मार्थकामान् लभते यशश्च (भास्करेण प्रोक्तं सि.शिरो.)।

परवर्तीकालस्य ज्योतिर्विदः–वराहमिहिरः पराशरः, गर्गाचार्यः, ब्रह्मगुप्तः, भास्कराचार्यः, आर्यभट्टः इत्यादयः। प्राचीनैः ऋषिभिः अंकगणितरेखागणितबीजगणिताः ज्योतिष-शास्त्रे स्वीक्रियन्ते स्म।

एतेषां षड्वेदाङ्गानां विभाजनं पाणिनीयशिक्षायां निम्नप्रकारेण कृतमस्ति–

छन्दः पादौ तु वेदस्य, हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणन्तु वेदस्य, मुखं व्याकरणं स्मृतम्।
तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयते।।

AA-Code-25 (ख) ऋक्प्रातिशाख्यम्-(परिभाषा) 1. समानाक्षरः, 2. सन्ध्यक्षरः, 3. अघोषः, 4. सोष्मः, 5. स्वरभक्तिः, 6. यमः, 7. रक्तः, 8. संयोगः प्रगृह्यः, 9. रिफितः विवेचनम्

प्रातिशाख्यवेदांगम्–पदप्रकृतानि प्रातिशाख्यानि, एतदतिरिक्तं प्रातिशाख्यग्रन्थेषु, शिक्षा-व्याकरण-छन्दसां नियमाः विवेचिताः सन्ति। कस्याः शाखायाः नियमविशेषः कः, इति प्रदर्शनम् एव प्रातिशाख्यग्रन्थानां प्रयोजनमस्ति। अर्थात् शिक्षा-व्याकरण-छन्दसां समाहारः एव प्रातिशाख्यग्रन्थः। इमे प्रातिशाख्याः संहिताभेदेन शाखाभेदेन वा विभिन्नाः वर्तन्ते। यथा– ऋग्वेदस्य ऋक्प्रातिशाख्यम्, यजुर्वेदस्य वाजसनेयिप्रातिशाख्यम्, तैत्तिरीयप्रातिशाख्यम्, सामवेदस्य ऋक्तन्त्रम्, पुष्पसूत्रप्रातिशाख्यम् तथा अथर्ववेदस्य शौनकीया प्रातिशाख्यम्, अथर्ववेदप्रातिशाख्यञ्चेति सुप्रसिद्धाः प्रातिशाख्यग्रन्थाः सन्ति। प्रातिशाख्यस्य स्थानं वेदाङ्गेषु महत्त्वपूर्णमस्ति। प्रातिशाख्ये शिक्षा, छन्दः, व्याकरणञ्च सामान्यनियमानां वर्णनं करोति। अत एव नियमास्तद्वैदिकी-शाखायां कथं सन्त्येतदेव प्रतिपादनं

प्रातिशाख्यस्य मुख्यं प्रयोजनमस्ति। 'प्रातिशाख्यम्' व्याकरणस्यैको ग्रन्थः, यस्मिन् स्वरसन्धेस्तथान्यवर्णपरिवर्तनानां नियमानामुल्लेखो वर्तते। ये नियमा वेदस्य कस्यामपि शाखायां प्राप्यन्ते, येषु च स्वराघातसहितोच्चारणपद्धतिर्निर्दिष्टा विद्यते।

वेदाभ्यासः पञ्चधा भवति, यथा–1. **अध्ययनम्**, 2. **विचारः**, 3. **अभ्यासः**, 4. **जपः**, 5. **अध्यापनञ्च**। पञ्चानामध्ययनादीनां ऋक्प्रातिशाख्यसूत्रेषु यथाविधिवर्णनमुपलभ्यते। यो हि वैदिको वेदमधीत्य तदर्थं न विजानाति स उपहासास्पदो भारवाही स्थाणुरिव, शुष्कवृक्ष इव, वृषभ इव वा भवति। यो हि पद-पदार्थं विजानाति, स एव समस्तं श्रेयस्त्वं प्राप्नोति। लोके परलोके च यशस्वी भवति। प्राचीने भारते संस्कृतभाषायाः व्याकरणं प्रातिशाख्येभ्यः प्रारभ्यते। प्रातिशाख्यस्य शास्त्रेषु स्वतन्त्रा सत्ता विद्यते। प्रातिशाख्यग्रन्थेषु व्याकरणसमर्थितानामनेकानां विषयाणां प्रतिपादनमस्ति।

1. **समानाक्षराणि–अष्टौ समानाक्षराण्यादितः।** अर्थात् वर्णमालायाः आदितः आरभ्य वर्णसमाम्नायस्य अष्टवक्षराणि समानाक्षरसंज्ञकानि भवन्ति। अर्थात् अ, आ, इ, ई, उ, ऊ, ऋ, ॠ इमानि अष्टाक्षराणि समानाक्षरसंज्ञकानि भवन्ति। अत्र उव्वटेन कथितम्- **समानाक्षरसंस्थाने**। अर्थात् समानस्थानीयौ समानवर्णौ दीर्घतां प्राप्नुवन्ति।

2. **सन्ध्यक्षराणि–ततश्चत्वारि सन्ध्यक्षराण्युत्तराणि।** यथोक्तम् आचार्यवरेण उव्वटेन-सामानाक्षरेभ्यः उत्तराणि चत्वारि अक्षराणि सन्ध्यक्षरसंज्ञकानि भवन्ति। अर्थात् ए, ऐ, ओ, औ एतानि चत्वारि सन्ध्यक्षराण्युच्यन्ते।

3. **अघोषा:–अन्त्याः सन्त तेषामघोषाः।** अर्थात्, श, ष, स, क, प अघोषसंज्ञकाः सन्ति।

4. **सोष्माः**–"युग्मौ सोष्माणौ" वर्गे वर्गे च द्वितीय-चतुर्थौ वर्णौ सोष्माणौ वेदितव्यौ।

5. **स्वरभक्तिः**–स्वरभक्तिस्तु पूर्ववर्ती रेफेण लकारेण वा सम्बद्धा भवति, यथोक्तं- **स्वरभक्तिः पूर्वभागमक्षरांगम्।** सा स्वरभक्तिः पूर्वं रेफं लकारं वा भजते। सा द्विविधा–दीर्घस्वरभक्तिः, हस्वस्वरभक्तिश्च।

6. **यमाः**–'स्पर्शाः यमानुनासिकाः स्वान्परेषुस्पर्शेष्वनुनासिकेषु।' इमे यमाः चतुर्विधाः भवन्ति।

1. अघोषाल्पप्राणाः–कँ, चँ, टँ, तँ, पँ। 2. अघोषमहाप्राणाः–खँ, छँ, ठँ, थँ, फँ।

3. सघोषाल्पप्राणाः–गँ, जँ, डँ, दँ, बँ। 4. सघोषमहाप्राणाः–घँ, झँ, ढँ, धँ, भँ।

7. **रक्ता**–'रक्तसंज्ञोऽनुनासिकः'। अर्थात् अनुनासिकवर्णाः रक्तसंज्ञकाः भवन्ति। यथा- ङ्, ञ्, ण्, न्, म्, आदि अनुनासिकवर्णाः रक्तसंज्ञकाः सन्ति।

8. **संयोगः**–द्वयोः व्यञ्जनवर्णयोः सन्निपात एव 'संयोग' इत्युच्यते।

9. **प्रगृह्यः**–सम्बोधनात्मकपदस्य अन्ते विद्यमानस्य ओकारस्य प्रगृह्यसंज्ञा भवति।

10. **रेफितः**–'ऊष्मारेफी पञ्चमो नामिपूर्वः'।

(ग) वेदाङ्ग एवं ऋक्प्रातिशाख्यसम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—अङ्गशब्दस्य का व्युत्पत्तिः?
उत्तरम्—अङ्ग्यते ज्ञायन्ते अमीभिः इति अङ्गानि।

2. **प्रश्नः**—अङ्गशब्दस्यार्थः कः?
उत्तरम्— उपकारकः।

3. **प्रश्नः**—वैदिकवाङ्मये कति वेदाङ्गानि सन्ति?
उत्तरम्— 6 षट्।

4. **प्रश्नः**—कानि सन्ति षड्-वेदाङ्गानि?
उत्तरम्—शिक्षा-कल्प-व्याकरण-निरुक्त-छन्द-ज्योतिषम्।

5. **प्रश्नः**—स्वरवर्णाद्युच्चारणप्रकारबोधकं वेदाङ्गं किम्?
उत्तरम्— शिक्षा।

6. **प्रश्नः**—घ्राणरूपेण प्रशस्तं वेदाङ्गं किम्?
उत्तरम्— शिक्षा।

7. **प्रश्नः**—शिक्षाग्रन्थः वेदस्य कस्य विधेः निरूपकः विद्यन्ते?
उत्तरम्— उच्चारणविधेः।

8. **प्रश्नः**—तैत्तिरीयोपनिषदि शिक्षायाः षट्भेदाः के सन्ति?
उत्तरम्— वर्णः, स्वरः, मात्रा, बलं, साम, सन्तानः।

9. **प्रश्नः**—शिक्षा इत्यस्य का व्युत्पत्तिः?
उत्तरम्— शिक्षयति या सा शिक्षा।

10. **प्रश्नः**—शिक्षावेदांगे कति स्वराः भवन्ति?
उत्तरम्— त्रयः।

11. **प्रश्नः**—शिक्षावेदांगे के सन्ति त्रयो स्वराः?
उत्तरम्— उदात्तानुदात्तस्वरितश्च।

12. **प्रश्नः**—उच्चस्वरेणोच्चरितस्वरः कः?
उत्तरम्— उदात्तः।

13. **प्रश्नः**— मन्दस्वरेणोच्चरितस्वरः कः?
उत्तरम्— अनुदात्तः।

14. **प्रश्नः**— उदात्त-अनुदात-समाहारेणोच्चरितस्वरः कः?
उत्तरम्— स्वरितः।

15. **प्रश्नः**—कल्पसूत्रं कतिविधम्?
उत्तरम्— चतुर्विधम्।

16. **प्रश्नः**—कल्पशास्त्रस्य प्रयोजनं किम्?
उत्तरम्— यज्ञ-याग-कर्मकाण्डस्यार्थप्रतिपादनम्।

17. **प्रश्नः**—वेदाङ्गसाहित्ये कल्पस्य किं स्थानम्?
उत्तरम्— द्वितीयस्थानम्।

18. **प्रश्नः**—कति कल्पसूत्राणि कानि च तानि?
उत्तरम्— चत्वारि, श्रौतगृह्यधर्मशुल्वसूत्राणि।

19. **प्रश्नः**—श्रुत्युक्तदर्शपौर्णमासादियज्ञानां विधानबोधकानि कानि?
उत्तरम्— श्रौतसूत्राणि।

20. **प्रश्नः**—श्रौतसूत्राणां प्रतिपाद्यविषयः?
उत्तरम्— वैदिक-यज्ञः।

21. **प्रश्नः**—धार्मिकनियमाः, प्रजानां राज्ञां कर्तव्यानि च कुत्र वर्तते?
उत्तरम्— धर्मसूत्रेषु।

22. **प्रश्नः**—प्रधानानि धर्मसूत्राणि कानि सन्ति?
उत्तरम्—गौतमधर्मसूत्रम्, बौधायनधर्मसूत्रम्, वशिष्ठधर्मसूत्रम्, आपस्तम्बधर्मसूत्रम्, मानवधर्मसूत्रम्।

23. **प्रश्नः**—धर्मसूत्रे कः सर्वप्राचीनो मन्यते?
उत्तरम्— गौतमः।

24. **प्रश्नः**—शुल्वसूत्राणां प्रतिपाद्यः विषयः?
उत्तरम्— वेदीनिर्माणम्।

25. **प्रश्नः**—प्रत्येकाश्रमस्य विहित-कर्मणां प्रतिपादको ग्रन्थः?
उत्तरम्— धर्मसूत्रम्।

26. **प्रश्नः**—ऋक्तन्त्रम् कस्य रचना?
उत्तरम्— शाकटायनस्य।

27. **प्रश्नः**—त्रैवर्णिकैरवश्यानुष्ठेयानामनुष्ठानानां याग-विशेषाणां वर्णनं कुत्र विद्यते?
उत्तरम्— गृह्यसूत्रेषु।

28. **प्रश्नः**—षोडशसंस्कारः कस्य विषयोऽस्ति?
उत्तरम्— गृह्यसूत्रस्य।

29. **प्रश्नः**—अथर्ववेदस्य गृह्यसूत्रं कस्य रचना?
उत्तरम्— कौशिकस्य।

30. **प्रश्नः**— शुल्वसूत्राणि कुत्र उपलभ्यन्ते?
उत्तरम्— केवलं यजुर्वेदे।

31. **प्रश्नः**—मापक्रियायाः सामान्य-नाम किम्?
उत्तरम्— शुल्वम्।

32. **प्रश्नः**—हस्तरूपेण प्रशस्तं वेदाङ्गं किम्?
उत्तरम्— कल्पवेदाङ्गम्।

33. **प्रश्नः**—मुखात्मकं वेदाङ्गं किम्?
उत्तरम्— व्याकरणम्।

34. **प्रश्नः**—सम्प्रति व्याकरणवेदांगस्य प्रतिनिधिग्रन्थः कः?
उत्तरम्— शब्दानुशासनम्।

35. **प्रश्नः**—पाणिनिप्रणीते शब्दानुशासने कति अध्यायाः सन्ति?
उत्तरम्— 08 अष्टाध्यायी।

36. **प्रश्नः**—व्याकरणवेदांगस्य कति सम्प्रदायाः श्रूयन्ते?
उत्तरम्— 08 अष्ट।

37. **प्रश्नः**—पाणिनिप्रणीते शब्दानुशासने कति पादाः समुपलभ्यन्ते?
उत्तरम्— 32 द्वात्रिंशतिः।

38. **प्रश्नः**—वेदपुरुषस्य षट्सु अङ्गेषु प्रधानं किम्?
उत्तरम्— व्याकरणम्।

39. **प्रश्नः**—'स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः' कस्य शिक्षाग्रन्थस्य वाक्यम्?
उत्तरम्— पाणिनेः।

40. **प्रश्नः**—'शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्' कस्य शिक्षाग्रन्थस्य वाक्यम्?
उत्तरम्— पाणिनीय-शिक्षा।

41. **प्रश्नः**—व्याकरणशब्दस्य का व्युत्पत्तिः?
उत्तरम्—व्याक्रियन्ते शब्दाः अनेनेति व्याकरणम्।

42. **प्रश्नः**—पतञ्जल्यनुसारेण व्याकरणस्य कानि प्रयोजनानि?
उत्तरम्— रक्षोहागमलघ्वसन्देहाः।

43. **प्रश्नः**—पाणिनिः शब्दानुशासनग्रन्थद्वारा किं व्यवस्थापयामास?
उत्तरम्— लौकिकसंस्कृतभाषाम्।

44. **प्रश्नः**—व्याकरणे शब्दस्य उद्गम-स्रोतानि कति, कानि च तानि?
उत्तरम्— चत्वारि; नाम, आख्यातः (क्रिया), उपसर्गः, निपातः।

45. **प्रश्नः**—व्याकरणे कति विभक्तयः?
उत्तरम्— प्रथमादयः सप्तविभक्तयः।

46. **प्रश्नः**—व्याकरण-ग्रन्थसंग्रहस्य रचयिता कः?
उत्तरम्— व्याडिः।

47. **प्रश्नः**—श्रौतरूपेण प्रशस्तं वेदाङ्गं किम्?
उत्तरम्— निरुक्तम्।

48. **प्रश्नः**—यास्कप्रणीते निरुक्ते कति अध्यायाः सन्ति?
उत्तरम्— 14 चतुर्दश।

49. **प्रश्नः**—निरुक्तस्य लेखकः कोऽस्ति?
उत्तरम्— यास्कः।

50. **प्रश्नः**—दुर्गावृत्तिकारेण दुर्गाचार्येण कति निरुक्तकाराः उल्लिखिताः?
उत्तरम्— 14 चतुर्दश।

51. **प्रश्नः**—निघण्टौ कति अध्यायाः विद्यन्ते?
उत्तरम्— 5 पञ्च।

52. **प्रश्नः**—निरुक्तस्य का परिभाषा?
उत्तरम्—अर्थावबोधे निरपेक्षतया पदजातं यत्र तद् निरुक्तम्।

53. **प्रश्नः**—वेदस्य अन्तर्भूतानि तत्त्वानि कः व्याकरोति?
उत्तरम्— निरुक्तम्।

54. **प्रश्नः**—भर्तृहरिमते निरुक्तस्य पञ्चविधयः के सन्ति?
उत्तरम्—1. वर्णागमः, 2. वर्णविपर्ययः, 3. वर्णविकारः, 4 वर्णलोपः, 5. धात्वर्थातिशयः।

55. **प्रश्नः**—निरुक्तस्य आधारग्रन्थः?
उत्तरम्— निघण्टुः।

56. **प्रश्नः**—निघण्टौ कति अध्यायाः?
उत्तरम्— 5 पञ्च।

57. **प्रश्नः**—चलनात्मकरूपेण प्रशस्तं वेदाङ्गं किम्?
उत्तरम्— छन्दोवेदांगम्।

58. **प्रश्नः**—छन्दःशब्दस्य यास्कसम्मतव्युत्पत्तिः का?
उत्तरम्— छन्दांसि छादनात्।

59. **प्रश्नः**—'छन्दोहीनो न शब्दोऽस्ति, न छन्दः शब्दवर्जितम्' कस्येयमुक्तिः?
उत्तरम्— भरतमुनेः।

60. **प्रश्नः**— छन्दोवेदांगस्य प्रतिनिधिग्रन्थः 'छन्दःसूत्रम्' केन रचितम्?
उत्तरम्— पिंगलेन।

61. **प्रश्नः**—छन्दः किं भवति?
उत्तरम्— अक्षरपरिमाणमेव।

61. **प्रश्नः**—यदक्षरपरिमाणकं तच्छन्दः कस्य उक्तिः?
उत्तरम्— कात्यायनस्य।

62. **प्रश्नः**—सर्वे मन्त्राः छन्दोबद्धाः कुत्र सन्ति?
उत्तरम्— ऋग्वेदसामवेदयोः।

63. **प्रश्नः**—वैदिक-स्वराणां महत्त्वम्?
उत्तरम्— शास्त्रभेदस्य रक्षायाम्।

64. **प्रश्नः**— छन्दः कतिविधः के च ते?
उत्तरम्— द्विविधं, 1. वार्णिकछन्दः, 2. मात्रिकछन्दश्च।

65. **प्रश्नः**—वार्णिकछन्दस्य किं लक्षणम्?
उत्तरम्—यस्मिन् छन्दे पादस्थानां वर्णानां संख्या गण्यते।

66. **प्रश्नः**— के सन्ति वार्णिकछन्दाः?
उत्तरम्— उपेन्द्रवज्रा, वसन्ततिलका, वंशस्थादयः।

67. **प्रश्नः**—मात्रिकछन्दसः किं लक्षणम्?
उत्तरम्— यस्मिन् छन्दसि पादस्थवर्णानां मात्राः गण्यन्ते।

68. **प्रश्नः**—मात्रिकछन्दसः किमुदाहरणम्?
उत्तरम्— आर्या।

69. **प्रश्नः**—ह्रस्व-लघुस्वराः के सन्ति?
उत्तरम्— अ, इ, उ, ऋ, लृ।

70. **प्रश्नः**—गुरुः-दीर्घस्वराः के सन्ति?
उत्तरम्— आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ।

71. **प्रश्नः**—विसर्गसम्मिश्रं गुरुसंज्ञकः गुरुवर्णाश्च के सन्ति?
उत्तरम्—पतिः, रामः, लेखकः, अत्र तिः, मः, कः गुरुवर्णाः।

72. **प्रश्नः**— गणः इति किं कथ्यते?
उत्तरम्— त्रयाणां वर्णानां समूहः।

73. **प्रश्नः**—अष्टौ गणाः के सन्ति?
उत्तरम्— यमाताराजभानसलगाः।

74. **प्रश्नः**—त्रिष्टुप् छन्दसि वर्णानां संख्याः?
उत्तरम्— 11 एकादश।

75. **प्रश्नः**—नेत्ररूपेण प्रशस्तं वेदाङ्गं किम्?
उत्तरम्— ज्योतिषवेदांगम्।

76. **प्रश्नः**—आर्चज्योतिष इत्यस्य ज्योतिषवेदांगस्य प्रणेता कः?
उत्तरम्— लगधाचार्यः।

77. **प्रश्नः**—'आर्चज्योतिष' नामके वेदांगे कति श्लोकाः सन्ति?
उत्तरम्— 36 षट्त्रिंशत्।

78. **प्रश्नः**— सूर्यादिग्रहचारेणाधारीकृत्य निर्मितं शास्त्रं ज्योतिषम्- इति कस्य वचनम्?
उत्तरम्— नृसिंहदैवज्ञस्य।

79. **प्रश्नः**—भास्कराचार्येण ज्योतिःशास्त्रस्य व्याख्यानावसरे किं परिभाषितम्?
उत्तरम्— कालतन्त्रं जगुः।

80. **प्रश्नः**—सूर्यादि ग्रहाणां बोधकं शास्त्रम् किम्?
उत्तरम्— ज्योतिषशास्त्रम्।

81. **प्रश्नः**—ज्योतिषामनयनं चक्षु इति कुत्र उद्धृतम्?
उत्तरम्— पाणिनीयशिक्षायाम्।

82. **प्रश्नः**—परवर्तीकालस्य ज्योतिर्विदः के सन्ति?
उत्तरम्— वराहमिहिरः पराशर, गर्गाचार्यः ब्रह्मगुप्तः भास्कराचार्यः, आर्यभट्टः इत्यादयः।

83. **प्रश्नः**—अंकगणितरेखागणितबीजगणिताः कस्य विषयः?
उत्तरम्— ज्योतिषशास्त्रस्य।

84. **प्रश्नः**—ऋग्वैदिक-शाकलसंहितायां गायत्री-छन्दसु निबद्धानां मन्त्राणां संख्या का?
उत्तरम्— 2467 मन्त्राणाम्।

85. **प्रश्नः**—प्रतिपदं 100 अक्षराणि कुत्र समुपलभ्यन्ते?
उत्तरम्— अभिकृतौ।

86. **प्रश्नः**—'64' अक्षरैः नियमितः वैदिकछन्दविशेषः कः?
उत्तरम्— अष्टिः।

87. **प्रश्नः**—तैत्तिरीयशाखासम्बद्धः वेदविशेषः कः?
उत्तरम्— कृष्णयजुर्वेदः।

88. **प्रश्नः**—ऋग्वैदिकमन्त्रेषु उष्णिङ्मन्त्राणां का संख्या?
उत्तरम्— 341संख्या।

89. **प्रश्नः**—उत्कृति-छन्दसि प्रतिपदं कति वर्णाः प्राप्यन्ते?
उत्तरम्— 104 वर्णाः।

90. **प्रश्नः**—त्रिष्टुप् छन्दसि अक्षरस्य कुल का संख्या?
उत्तरम्— 44 संख्या।

91. **प्रश्नः**—अखिले ऋग्वैदिकवाङ्मये एकपदा ऋचः कति प्राप्यन्ते?
उत्तरम्— 06 षट्।

92. **प्रश्नः**—अनुष्टुप्-छन्दःमयानां ऋग्वैदिकमन्त्राणां संख्या कति विद्यते?
उत्तरम्— 855 संख्या।

93. **प्रश्नः**—यास्कमते वैदिकपदं कतिविधं भवति?
उत्तरम्— चतुर्विधम्।

94. **प्रश्नः**—पदप्रकृतानि ग्रन्थानि कानि सन्ति?
उत्तरम्— प्रातिशाख्यानि।

95. **प्रश्नः**—प्रातिशाख्यग्रन्थेषु विवेचिताः विषयाः के सन्ति?
उत्तरम्— शिक्षा-व्याकरण-छन्दसां नियमाः।

96. **प्रश्नः**—कः शिक्षाग्रन्थः परिषद् इति कथ्यते?
उत्तरम्— ऋक्प्रातिशाख्यः।

97. **प्रश्नः**—सत्त्वप्रधानानि के भवन्ति?
उत्तरम्— नामानि।

98. **प्रश्नः**—भावप्रधानं किं भवति?
उत्तरम्— आख्यातम्।

99. प्रश्नः—ऋक्प्रातिशाख्यस्य पटलानां संख्या?
उत्तरम्— 18 अष्टादश।

100. प्रश्नः—'देवदत्तः किं करोति' अत्र आख्यातपदं किम्?
उत्तरम्— करोति।

101. प्रश्नः—"न निर्बद्धा................अर्थान्निराहुरिति" इत्यनेन किं गृह्यते?
उत्तरम्— उपसर्गाः।

102. प्रश्नः—अन्विति सादृश्यापरभावः कः?
उत्तरम्— उपसर्गः।

103. प्रश्नः— 'उच्चावचेष्वर्थेषु निपतन्ति इति......काः?
उत्तरम्— निपाताः।

104. प्रश्नः— उपमार्थकः निपातः कः?
उत्तरम्— चित्।

105. प्रश्नः— कर्मोपसंग्रहार्थकः निपातः कोऽस्ति?
उत्तरम्— ननु।

106. प्रश्नः—पादपूरणार्थकः निपातः कोऽस्ति?
उत्तरम्— इम।

107. प्रश्नः—कर्मोसंग्रहार्थकः निपातः कोऽस्ति?
उत्तरम्— शश्वत्।

108. प्रश्नः—क्रियायाः भावविकाराः कति भवन्ति?
उत्तरम्— 6 षट्।

109. प्रश्नः—षड्भावविकाराः भवन्ति इति केन स्वीकृतः?
उत्तरम्— वार्ष्यायणिः।

110. प्रश्नः— यास्कमते केन विना पद-विभागो न विद्यते?
उत्तरम्— निरुक्तेन।

111. प्रश्नः—विश्वान् नरान् नयति इति कस्य निर्वचनम्?
उत्तरम्— वैश्वानरस्य।

112. प्रश्नः—बृहती-छन्दसि वर्णानि?
उत्तरम्— 36 षट्त्रिंशत्।

113. प्रश्नः— 'आचार्यः' इति पदस्य निरुक्तिः किमस्ति?
उत्तरम्— आचिनोति बुद्धिम्।

114. प्रश्नः—'मेघः' इति पदस्य व्युत्पत्तिः का?
उत्तरम्— मेहति।

115. प्रश्नः—'अश्वः' इति पदस्य निरुक्तिः का?
उत्तरम्— अश्नुते अध्वानम्।

116. प्रश्नः—'नदी' इति पदस्य व्युत्पत्तिः का?
उत्तरम्— नदना भवन्ति।

117. प्रश्नः—'पुष्पसूत्रं' कस्य प्रातिशाख्यग्रन्थः?
उत्तरम्— सामवेदस्य।

118. प्रश्नः—वेदाभ्यासः कतिधा के च ते?
उत्तरम्— पञ्चधा, 1. अध्ययनम्, 2. विचारः, 3. अभ्यासः, 4. जपः, 5. अध्यापनञ्च।

119. प्रश्नः—अ, आ, इ, ई, उ, ऊ, ऋ, ॠ इमानि अष्टाक्षराणि कानि संज्ञकानि?
उत्तरम्— समानाक्षरसंज्ञकानि।

120. प्रश्नः— ए, ऐ, ओ, औ एतानि चत्वारि कानि संज्ञकानि?
उत्तरम्— सन्ध्यक्षराणि।

121. प्रश्नः— श, ष, स, क, प एतानि कानि संज्ञकानि?
उत्तरम्— अघोषसंज्ञकानि।

122. प्रश्नः—द्विविधा स्वरभक्तिः कौ स्तः?
उत्तरम्— दीर्घस्वरभक्तिः, ह्रस्वस्वरभक्तिश्च।

123. प्रश्नः— ङ्, ञ्, ण्, न्, म् इमे अनुनासिकवर्णाः काः संज्ञकाः?
उत्तरम्— रक्तसंज्ञकाः।

124. प्रश्नः— 'संयोग' इति किमुच्यते?
उत्तरम्— द्वयोः व्यञ्जनवर्णयोः सन्निपातः।

12
आगमशास्त्रविवेचनम्

(BB-Code-73)

(क) शक्तिस्वरूपं तद्भेदाश्च एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

सर्वसम्प्रदायेषु साधना द्वैविध्या-1. बहिरङ्गा (एक्सटरिक) 2. अन्तरङ्गा च (एसाटरिक)। बहिरङ्गे सार्वभौम-विधिविधानस्य प्रामुख्यं वर्तते। तस्य विधिविधानस्य निमित्तः सर्वसाधारण-अधिकारी स्वभावतः उन्मुक्तो भवति। अस्या साधनायाः प्रकाशकग्रन्थः निगमः (वेदः) विद्यते। अन्तरङ्गसाधनायां विधिविधानाय विशिष्याधिकारिणां आवश्यकता वर्तते। अस्याः साधनायाः बोधकग्रन्थः आगमः (तन्त्रः) वर्तते। भारतस्य संस्कृतिः उभयाश्रिता निगमागममूलका अस्ति। कामकलाविलासे शक्तेः स्वरूपम्–

सा जयति शक्तिराद्या
निजसुखमयनित्यनिरुपमाकारा।
भाविचराचरबीजं
शिवरूपं विमर्श-निर्मलादर्शः।।
(कामकलाविलासे)

तन्त्रशब्दस्य व्युत्पत्तिः तन्धातोः 'ष्ट्रन्' प्रत्ययेन भवति। 'तन्' धात्वर्थः विस्तारो वर्तते। 'तन्यते विस्तार्यते ज्ञानमनेन इति तन्त्रम्' तन्त्रस्य निरुक्तिः शैवसिद्धान्तस्य प्रख्यातः तन्त्र-ग्रन्थः 'कामिक आगम' इत्यस्यानुसारम्–

तनोति विपुलानर्थान्, तन्त्रमन्त्र-समन्वितान्।
त्राणं च कुरुते यस्मात्, तन्त्रमित्यभिधीयते।।

तन्त्रस्य व्यापकार्थः-शास्त्र-सिद्धान्त-अनुष्ठान-विज्ञान-विज्ञानविषयकाः ग्रन्थादि वर्तते। महाभारते न्याय-धर्मशास्त्र-योगशास्त्रादिशास्त्रेभ्यः तन्त्रशब्दः प्रयुक्तोऽस्ति। शंकराचार्यः सांख्यदर्शनाय तन्त्रस्य प्रयोगः कृतवान्-**स्मृतिश्च तन्त्राख्या परमर्षिप्रणीता।** तन्त्रशब्दस्य संकुचितार्थः-लोकव्यवहारे अभीष्टः, मन्त्र-कीलक-कवचादयः समन्वितः, एकः विशिष्टसाधनमार्गस्य उपदेशं ददाति। वाचस्पतिमिश्रः योगभाष्ये तन्त्रस्य द्वितीयं नाम आगमस्यार्थः कृतवान्-**आगच्छन्ति बुद्धिमारोहन्ति यस्मात् अभ्युदयनिःश्रेयसोपायाः स आगमः।** शक्तिः इत्यस्यार्थः भवति-परमशिवः, ब्रह्मणि अपृथक् सिद्धात्मक-विशेषणं वर्तते। शक्तिविशिष्टाद्वैतमते या शक्तिः सा सूक्ष्मचिदचिद्विशिष्य शक्तिः एवं स्थूल-चिदचिद्विशिष्य शक्तिः नामिके द्वे भेदे स्तः। शिव-शक्तौ अभिन्न-सम्बन्धो वर्तते। शक्तिः परशिवब्रह्मणि अत्यन्तगुप्तरीत्या निवसति।

सर्वदर्शनसंग्रहस्य शांकरदर्शने शाक्त-सम्प्रदाये माया-शक्तिः विवेचनम्-केचन शाक्ताः शक्तिं मायाशब्दार्थभूतां (Eternal and Mysterious Power) जगत्कारणत्वेनाङ्गीकृतां सत्यामभ्युपेत्य मातुलिङ्गगदाखेट-विधारिणी महालक्ष्मीस्तस्याः प्रथमावतार इति वर्णयन्ति। सा च कालरात्रिः सरस्वतीति द्वे शक्ती उत्पाद्य ब्रह्माणं पुरुषं श्रियं च स्त्रियमुत्पादयामास। स्वयं मिथुनं जनयित्वा स्वसुतं अप्याह-अहमिव युवामपि मिथुनमुत्पादयत इति। ततः कालरात्रिर्महादेवं पुरुषं स्वरां स्त्रियं च जनयामास। सरस्वती च विष्णुं पुरुषं गौरीं च स्त्रियमुदपादयम्। ततश्चादिर्विवाह-मकरोदकारयच्च। एवं ब्रह्मणे स्वरां, विष्णवे श्रियं, शिवाय गौरीं दत्वा शक्तियुक्तानां तेषां सृष्टिस्थितिसंहाराख्यानि कर्माणि प्रत्यपादयदिति।

'परा' प्रकृति-साधनस्य उपक्रमः-ब्रह्मसाधनेन तेज-बुद्धि-बल-ऐश्वर्यादीनां वृद्धिः जायते।

"मम प्रीतिकरं देव लोकानां हितकारकम्" एवं ब्रह्मसायुज्यं प्राप्यते। जगन्नियन्तुः परमात्मनः स्वयंप्रकाशस्य सच्चिदानन्दरूपस्य परब्रह्मणः शक्तिस्वरूपमायाद्वारा जगत्कर्तृत्वेन व्यापारवत्त्वं प्रतीयते। तथैव तस्य कार्यस्वरूपस्याखिलस्य चराचरस्य महतो जगतोऽपि व्यापारवत्त्वं स्वाभाविकमेव। श्रीमतो भगवतो नारायणस्य भगवती शक्तिः **अहं ममेतिवत्** ततोऽभिन्नापि शास्त्रकारैः द्विविधा विभक्ता। एकाऽज्ञानजननी अविद्येत्युच्यते, द्वितीया च ज्ञानजननी विद्येत्यभिधीयते। त्रिगुणमयी ब्रह्मशक्तिः स्वतमोगुणप्रभावाद् अविद्यारूपेण जीवान् बन्धनदशां नयति पुनरियमेव सत्वगुणमयी सती विद्यारूपमादधाना जीवान् मुक्तिपदं प्रतिष्ठापयति। अथासौ कारणशक्तिरूपिणी भूत्वा ब्रह्मविष्णुमहेशात्मकान् त्रिदेवान् प्रतिब्रह्माण्डं सृष्टिस्थिति-लयसम्पादनाय प्रसूते। शक्तेः साधनैव शक्तिमतो लक्षणं विद्यते। हे प्रभो! मम साधनायाः को विधिः? कस्य मार्गस्य अवलम्बनं करणीयं भवेत्? किं साधनं तस्य मन्त्रं किम्? ध्यान-पूजादिकं च किम्? इत्यादयः जनकल्याणाय कथं सार्थकं भविष्यति इति सविस्तरेण कथय? भवान् एव सद्वैद्यः उपदेष्टा च अस्ति।

हे देवि त्वं परमब्रह्मण: साक्षात् परमाप्रकृति शक्ति: स्यात्। इदं सम्पूर्णसंसार: तव उत्पन्नोऽभूत्। हे शिवे त्वं समस्त-जगत: जननी असि। इदं स्थूल-सूक्ष्म-स्थावर-जंगमस्वरूप- सम्पूर्ण-सृष्टि:, सम्पूर्ण-विद्या, अस्माकं सर्वे तव उत्पन्ना: अभूत्। महानिर्वाणतन्त्रे शक्ते: स्वरूपं नामरूपभेदश्च वर्णितमस्ति। यथा–

इति देव्या वच: श्रुत्वा देवदेवो महेश्वर:।
उवाच परया प्रीत्या पार्वतीं पार्वतीपति:।।8।।
शृणु देवि महाभागे तवाराधनकारणम्।
तव साधनतो येन ब्रह्मसायुज्यमश्नुते।।9।।
त्वं परा प्रकृति: साक्षाद्ब्रह्मण: परमात्मन:।
त्वत्तो जातं जगत्सर्वं त्वं जगज्जननी शिवे।।10।।
महदाद्यणुपर्यन्तं यदेतत्सचराचरम्।
त्वयैवोत्पादितं भद्रे त्वदधीनमिदं जगत्।।11।।
त्वमाद्या सर्वविद्यानामस्माकमपि जन्मभू:।
त्वं जानासि जगत्सर्वं न त्वां जानाति कश्चन:।।12।।
त्वं काली तारिणी दुर्गा षोडशी भुवनेश्वरी।
धूमावती त्वं बगला भैरवी छिन्नमस्तका।।13।।
त्वमन्नपूर्णा वाग्देवी त्वं देवि कमलालया।
सर्वशक्तिस्वरूपा त्वं सर्वदेवमयी तनु:।।14।।
त्वमेव सूक्ष्मा स्थूला त्वं व्यक्ताव्यक्त-स्वरूपिणी।
निराकारापि साकारा कस्त्वां वेदितुमर्हति।।15।।
उपासकानां कार्यार्थं श्रेयसे जगतामपि।
दानवानां विनाशाय धत्से नानाविधास्तनू:।।16।।
चतुर्भुजा त्वं द्विभुजा षड्भुजाष्टभुजा तथा।
त्वमेव विश्वरक्षार्थं नाना शस्त्रास्त्रधारिणी।।17।।

संस्कृतवाङ्मये नानाविधप्रमाणेन शक्तिस्वरूपस्य ज्ञानो भवति। विशिष्टाद्वैतवादिन:, नैयायिक: शिवशक्त्यो: शक्तित्वसंज्ञामासादयति। कथ्यते यथा–शक्तिविशिष्टाद्वैतदर्शने शिवशक्त्योरविनाभावसम्बन्धो कथ्यते। नैयायिक: ययोर्द्वयोरेकमपराश्रितमेव तिष्ठति तदुभयो: सम्बन्ध: समवाय: कथ्यते। इत्येवं सर्वत्रैव शक्तिशक्तिमतो: अभेदस्तादात्म्यं समवायो वा वाच्य:। अभेदं चानुपश्यन्ति योगिनस्तत्त्व-चिन्तका:। शिवागमप्रमाणात् सदाशिव: क्रियाशक्त्या सम्बन्धितात्मानं सर्वकर्त्ताहमिति मनुते तदा स शक्तित्व-संज्ञामासादयति। कूर्मपुराणेऽपि भेदाभेदसम्बन्ध: श्रूयते–

एषा शक्ति: शिवा ह्येतच्छक्तिमानुच्यते शिव:।
शक्तिशक्तिमतोर्भेदं वदन्ति परमार्थत:।।

सृष्टेरादौ शक्ति: तमोरूपाया: प्रकृतिरूपाया: च विद्यमाना अस्ति। परब्रह्मण: सिद्धिं कर्तुमिच्छया शक्ति: जगत: सृष्टिं करोति। महत्तत्वत: पृथ्वी-पर्यन्तसर्वमहाभूतया त्वया सृष्टमिदं जगत्। सर्वकारणकारणं ब्रह्मनिमित्तमात्रं सत्स्वरूपं सर्वव्यापी च शक्तिरेव वर्तते। सा सत्यस्वरूपा अस्ति। सा आदि अन्तात् रहित:, सृष्टि: पालनं प्रलयकर्तृत्वमेव अस्ति। संसारस्य संहारक: महाकालो तव रूपम्। महासंग्रामसमये काल: सर्वं ग्रसिष्यति। महाकालस्य कलनात्त्वमाद्या कालिका परा तव रूपमेव विद्यते। यथा–

त्वं साकारापि निराकारा मायया बहुरूपिणी स्यात्।
त्वं सर्वादिरनादिस्त्वं कर्त्री हर्त्री च पालिका च।।

देवीभागवते देवीतत्वसम्बन्धे वर्णित: विद्यते यत्–शक्ति: निर्गुणा दुर्गमा च भवति। कथ्यते यथा–

निर्गुणा दुर्गमा शक्ति: निर्गुणश्च पर: पुमान्।
ज्ञानगम्यौ मुनीनां तु भावनीयौ पुन: पुन:।।
अनादिनिधनौ विद्धि सदा प्रकृति-पुरुषौ।।

शक्ति: परमात्मा एतयोर्द्वयोर्नाम रूपं च भिन्नं वर्तते, परं तत्वत: या शक्ति: स एव परमात्मा, यश्च परमात्मा सैव शक्तिरस्ति, न तयोरस्ति भेद:। कथ्यते यथा–

या शक्ति: परमात्माऽसौ सा परमा मता।
अन्तरं नैतयो: कोऽपि सूक्ष्मं वेद च नारद:।

दुर्गासप्तशतीग्रन्थे ब्रह्मण: शक्ति: संवलितत्वादेव श्रीदुर्गाया उल्लेखो विद्यते–

यच्च किंचित् क्वचिद् वस्तु सदसद्वाऽखिलात्मिके।
तस्य सर्वस्य या शक्ति: सा त्वं किं स्तूयसे सदा।।

शक्तितत्त्वस्य विषये तत्त्वप्रकाशनामकग्रन्थे विवेचितमस्ति यत्–

चिदचिदनुग्रहहेतोरस्य सिसृक्षोर्य आद्य उन्मेष:।
तच्छक्तितत्त्वमभिहितमविभागापन्नमस्यैव ।।

महाकविकालिदास: रघुवंशकाव्ये विशिष्टौ शक्तिशिवौ शब्दार्थोपमानेन स्तौति–

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगत: पितरौ वन्दे पार्वतीपरमेश्वरौ।

श्वेताश्वतरोपनिषद् ग्रन्थे परास्य शक्तिर्विविधैव वर्णितास्ति–

परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च।

सिद्धान्तागमे समभावत: लोके मायेति ब्रह्मनिष्ठात्मका इति प्रोच्यते–

मं शिवं परमं ब्रह्म प्राप्नोति समभावत:।
मायेति प्रोच्यते लोके ब्रह्मनिष्ठा सनातनी।।

यजुर्वेदीयतैत्तिरीयसंहितायां वर्णितोस्ति–

आखुस्ते रुद्र पशुस्तं जुषस्वैष ते रुद्रभाग:।
सह स्वस्त्राम्बिकया तं जुषस्व।

शाक्ततन्त्रे भगवत: शंकरस्य पञ्चमुखात् उत्पन्नकारणात् आगमशास्त्रस्य प्रधानतया पञ्च 'आम्नाया:' भवन्ति। 1. पूर्व-आम्नाय, 2. दक्षिण-आम्नाय, 3. पश्चिम-आम्नाय, 4. उत्तर-आम्नाय, 5. ऊर्ध्व-आम्नाय, 6. निम्नतर तथा गुप्तमुखात् उत्पन्न: अध:आम्नाय इति मन्यते। कुलार्णवतन्त्रस्य तृतीये उल्लासे एतेषां आम्नायानां वर्णनमस्ति। तत्र पूर्वाम्नाय: सृष्टिरूपस्य तन्त्रयोगस्य च वर्तते। दक्षिणाम्नाय: स्थितिरूपस्य भक्तियोगस्य च वर्तते। पश्चिमाम्नाय: संहाररूपस्य कर्मयोगस्य च अस्ति। उत्तराम्नाय: अनुग्रहरूपस्य ज्ञानयोगस्य च वर्तते। ऊर्ध्वाम्नाय: कौलाचारे गृहीतोऽस्ति। शाक्त-पूजाया: त्रीणि प्रधान-केन्द्राणि सन्ति–1. काश्मीर:, 2. काञ्ची, 3. कामाख्या च। येषु 1. काश्मीर:, 2. काञ्ची श्रीविद्याया: केन्द्रो वर्तते। कामाख्या तु अद्यापि कौलमतस्य मुख्यस्थानमस्ति। त्रिकोणस्य मध्यविन्दु काशी वर्तते। अस्य शाक्ततन्त्रस्य सम्बन्ध: अथर्ववेदस्य सौभाग्यकाण्डै: सह मन्यते। श्रीविद्याया: प्रधानत्रयाचार्या: सन्ति–श्रीदत्तात्रेय:, पूर्णानन्द:, गौडपाद:। कथितं यथा शक्तिसंगमतन्त्रस्य कालीखण्डे–

दुग्धेन केरले पूजा काश्मीरे भावना मता।
गौडे प्रत्यक्षदानं स्यात् त्रितयं कीर्तितं मया।।
(श०सं०तन्त्र)

परतत्त्वं क्रमदर्शने 'काली' नाम्ना अभिहितं करोति। कौलदर्शने तं 'कुल'संज्ञा, क्रमदर्शनं शक्त: परमैश्वर्यस्य द्योतक: शाक्तदर्शनमस्ति। फलत: तान् 'कालीमत' कालीदर्शन इत्यनयो: नामभ्यां सम्बोध्यते। कलयति कामधेनु:, गति: ज्ञानं प्राप्तिश्च कालीशब्दार्थ:। कालीशब्दस्य पंचात्मक-स्वरूपस्य व्याख्या व्युत्पत्ति-सम्मत-साधार: तन्त्रालोके इत्थं वर्तते–1. स्वात्मनो भेदनं क्षेप:।2. भेदितस्याविकल्पनम्, ज्ञानं विकल्प:, 3. संख्यानन्द अन्यतो व्यतिभेदनात्।4. गति: स्वरूपारोहित्वं प्रतिबिम्बवदेव यत्, 5. नाद: स्वात्मपरामर्शशेषता तद्विलोपनात्। काली विश्वस्य मूलतत्त्व: त्रिभि: नाम्ना अभिहिता सन्ति। 1. मातृसद्भाव:, 2. व्योमवामेश्वरी, 3. कालकर्षिणी च। कालिकाया: 12 द्वादशविशिष्टस्वरूपस्य वर्णनं शास्त्रे क्रियन्ते। यथा–1. सृष्टि-काली, 2. रक्त-काली, 3. स्थितिनाश-काली, 4. यम-काली, 5. संहार-काली, 6. मृत्यु-काली, 7. रुद्रकाली (भद्रकाली), 8. मार्तण्ड-काली, 9. परमार्क-काली, 10. कालानल-रुद्रकाली, 11. महाकाल-काली, 12. महाभैरवचण्डोग्रघोर-काली।

(क) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्न:**—द्वैविध्या साधना के स्त:?
   उत्तरम्— 1. बहिरङ्ग: (एक्सटरिक), 2. अन्तरङ्गश्च (एसाटरिक)।
2. **प्रश्न:**—बहिरङ्ग-साधनाया: प्रकाशकग्रन्थ: क:?
   उत्तरम्— निगम: (वेद:)।
3. **प्रश्न:**—अन्तरङ्ग-साधनाया: बोधकग्रन्थ: क:?
   उत्तरम्— आगम: (तन्त्र:)।
4. **प्रश्न:**—कामकलाविलासे शक्ते: स्वरूपं किम्?
   उत्तरम्— सा जयति शक्तिराद्या निजसुखमयनित्य-निरुपमाकारा। भाविचराचरबीजं शिवरूपं विमर्श-निर्मलादर्श:।।
5. **प्रश्न:**—तन्त्रशब्दस्य का व्युत्पत्ति:?
   उत्तरम्— तन्यते विस्तार्यते ज्ञानमनेन इति तन्त्रम्।
6. **प्रश्न:**—कामिक आगमानुसारं तन्त्रस्य व्यापकार्थ: क:?
   उत्तरम्— तनोति विपुलानर्थान्, तन्त्रमन्त्र-समन्वितान्। त्राणं च कुरुते यस्मात्, तन्त्रमित्यभिधीयते।।
7. **प्रश्न:**—शंकराचार्य: सांख्यदर्शनाय तन्त्रस्य प्रयोग: कथं कृतवान्?
   उत्तरम्— स्मृतिश्च तन्त्राख्या परमर्षिप्रणीता।
8. **प्रश्न:**—तन्त्रशब्दस्य संकुचितार्थ: क:?
   उत्तरम्— लोकव्यवहारे अभीष्ट:, मन्त्र-कीलक-कवचादय: समन्वित:, एक: विशिष्टसाधनमार्ग:।

9. **प्रश्नः**—वाचस्पतिमिश्रः योगभाष्ये तन्त्रस्य द्वितीयं नाम आगमस्यार्थः किं कृतवान्?
उत्तरम्—आगच्छन्ति बुद्धिमारोहन्ति यस्मात् अभ्युदयनिःश्रेयसोपायाः स आगमः।

10. **प्रश्नः**—शक्तिविशिष्टाद्वैतमते या शक्तिः सा कतिधा, काः च ताः?
उत्तरम्— सूक्ष्मचिदचिद्विशिष्य शक्तिः एवं स्थूल-चिदचिद्विशिष्य शक्तिः नामिके द्वे भेदे स्तः।

11. **प्रश्नः**—शिव-शक्त्योः सम्बन्धः भिन्नो अभिन्नौ वा?
उत्तरम्— अभिन्नः।

12. **प्रश्नः**—सृष्टिस्थितिसंहाराख्यानि कर्माणि कानि प्रदत्तानि?
उत्तरम्—ब्रह्मणे स्वरां, विष्णवे श्रियं, शिवाय गौरीं दत्त्वा।

13. **प्रश्नः**—ब्रह्मसाधनेन केषां वृद्धिः जायते?
उत्तरम्— तेज-बुद्धि-बल-ऐश्वर्यादीनाम्।

14. **प्रश्नः**—शक्तिस्वरूपमायाद्वारा जगत्कर्तृत्वेन किंवत् प्रतीयते?
उत्तरम्—व्यापारवत्त्वम्।

15. **प्रश्नः**—शिव-शक्ति-अभिन्नापि शास्त्रकारैः कतिधा विभक्ताः?
उत्तरम्— द्विविधा, एकाऽज्ञानजननी अविद्येत्युच्यते, द्वितीया च ज्ञानजननी विद्येत्यभिधीयते।

16. **प्रश्नः**—सत्त्वगुणमयी सती किं पदं प्रतिष्ठापयति?
उत्तरम्—विद्यारूपमादधाना जीवान् मुक्तिपदम्।

17. **प्रश्नः**—हे देवि त्वं परमब्रह्मणः साक्षात् परमाप्रकृति शक्तिः, सम्पूर्णसंसारस्य निर्माणकर्तृ, समस्त-जगतः जननी, सम्पूर्णस्थूल-सूक्ष्म-स्थावर-जंगमस्वरूप-सम्पूर्ण-सृष्टिः, सम्पूर्ण-विद्या, अस्माकं सर्वे तव उत्पन्नाः अभूत्-इति कस्य वचनम्?
उत्तरम्— भगवतः शिवस्य।

18. **प्रश्नः**—शक्तेः स्वरूपं नामरूपभेदश्च कुत्र वर्णितमस्ति?
उत्तरम्— महानिर्वाणतन्त्रे।

19. **प्रश्नः**—विशिष्टाद्वैतवादिनः, नैयायिकः शिवशक्त्योः का शक्तित्वसंज्ञा?
उत्तरम्— तदुभयोः सम्बन्धः समवायः।

20. **प्रश्नः**—योगिनस्तत्त्वचिन्तकाः शिव-शक्तयोर्मध्ये किमनुपश्यन्ति?
उत्तरम्— अभेदम्।

21. **प्रश्नः**—शिवागमप्रमाणात् सदाशिवः क्रियाशक्त्या सर्वकर्ताहमिति मनुते कां संज्ञां आसादयति?
उत्तरम्— शक्तित्वसंज्ञाम्।

22. **प्रश्नः**—भेदाभेदसम्बन्धविषये कूर्मपुराणे किं कथितम्?
उत्तरम्—एषा शक्तिः शिवा ह्येतच्छक्तिमानुच्यते शिवः।
शक्तिशक्तिमतोर्भेदं वदन्ति परमार्थतः।।

23. **प्रश्नः**—सृष्टेरादौ शक्तिः कयोः रूपयोः विद्यमाना:?
उत्तरम्— तमोरूपायाः प्रकृतिरूपायाः च।

24. **प्रश्नः**—परब्रह्मणः सिद्धिं कर्तुमिच्छया शक्तिः किं करोति?
उत्तरम्— जगतः सृष्टिः।

25. **प्रश्नः**—सर्वकारणकारणं ब्रह्मनिमित्तमात्रं सत्स्वरूपं सर्वव्यापी च का वर्तते?
उत्तरम्— शक्तिरेव।

26. **प्रश्नः**—आदिरन्तात् रहितः, सृष्टिः पालनं प्रलयकर्तृत्वमेव का?
उत्तरम्— शक्तिः।

27. **प्रश्नः**—संसारस्य संहारकः महाकालो रूपं कस्य विद्यते?
उत्तरम्— शक्तेः।

28. **प्रश्नः**—महाकालस्य कलनात्त्वमाद्या कालिका परा रूपं किम्?
उत्तरम्— त्वं साकारापि निराकारा मायया बहुरूपिणी स्यात्। त्वं सर्वादिरनादिस्त्वं कर्त्री हर्त्री च पालिका च।।

29. **प्रश्नः**—देवीभागवते देवीतत्त्वसम्बन्धे किं वर्णितः?
उत्तरम्— निर्गुणा दुर्गमा शक्तिः निर्गुणश्च परः पुमान्।
ज्ञानगम्यौ मुनीनां तु भावनीयौ पुनः पुनः।।
अनादिनिधनौ विद्धि सदा प्रकृति-पुरुषौ।।

30. **प्रश्नः**— 'या शक्तिः स एव परमात्मा' अस्मिन् विषये किं कथितमस्ति?
उत्तरम्—या शक्तिः परमात्माऽसौ सा परमा मता। अन्तरं नैतयोः कोऽपि सूक्ष्मं वेद च नारदः।

31. **प्रश्नः**—दुर्गासप्तशतीग्रन्थे ब्रह्मणः शक्तिः संवलितत्वाद् किं कथितमस्ति?
उत्तरम्—यच्च किंचित् क्वचिद् वस्तु सदसद्वाऽखिलात्मिके। तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे सदा।।

32. **प्रश्नः**—शक्तितत्त्वस्य विषये तत्त्वप्रकाशनामकग्रन्थे किं विवेचितमस्ति?
उत्तरम्— चिदचिदनुग्रहहेतोरस्य सिसृक्षोर्य आद्य उन्मेषः।
तच्छक्तितत्त्वमभिहितमविभागापन्नमस्यैव।।

33. **प्रश्नः**—महाकविकालिदासः रघुवंशकाव्ये विशिष्टौ शक्तिशिवौ शब्दार्थोपमानेन किं स्तौति?
उत्तरम्— वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।

34. **प्रश्नः**—श्वेताश्वतरोपनिषद् ग्रन्थे परास्य शक्तिर्विविधैव किं वर्णितोस्ति?
उत्तरम्— परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।

35. **प्रश्नः**—सिद्धान्तागमे समभावतः लोके मायेति ब्रह्मनिष्ठात्मका किं प्रोच्यते?
उत्तरम्— मं शिवं परमं ब्रह्म प्राप्नोति समभावतः। मायेति प्रोच्यते लोके ब्रह्मनिष्ठा सनातनी।।

36. **प्रश्नः**—आरवुस्ते रुद्र पशुस्तं जुषस्वैष ते रुद्रभागः। सह स्वस्त्राम्बिकया तं जुषस्व। इति कुत्र वर्णितोस्ति?
उत्तरम्—यजुर्वेदीयतैत्तिरीयसंहितायाम्।

37. **प्रश्नः**—शाक्ततन्त्रे भगवतः शंकरस्य पञ्चमुखात् उत्पन्न-कारणात् आगमशास्त्रस्य प्रधानतया कति आम्नायः?
उत्तरम्— पञ्च आम्नायः।

38. **प्रश्नः**—पञ्च आम्नायाः के सन्ति?
उत्तरम्—1. पूर्व-आम्नायः, 2. दक्षिण-आम्नायः, 3. पश्चिम-आम्नायः, 4. उत्तर-आम्नायः, 5. ऊर्ध्व-आम्नायः।

39. **प्रश्नः**— पञ्च-आम्नायानां वर्णनं कुत्र वर्तते?
उत्तरम्— कुलार्णवतन्त्रस्य तृतीये उल्लासे।

40. **प्रश्नः**— सृष्टिरूपस्य तन्त्रयोगस्य च कः आम्नायः?
उत्तरम्— पूर्वाम्नायः।

41. **प्रश्नः**— स्थितिरूपस्य भक्तियोगस्य च कः आम्नायः?
उत्तरम्— दक्षिणाम्नायः।

42. **प्रश्नः**— संहाररूपस्य कर्मयोगस्य च कः आम्नायः?
उत्तरम्— पश्चिमाम्नायः।

43. **प्रश्नः**— अनुग्रहरूपस्य ज्ञानयोगस्य च कः आम्नायः?
उत्तरम्— उत्तराम्नायः।

44. **प्रश्नः**— कौलाचारे कः आम्नायः?
उत्तरम्— ऊर्ध्वाम्नायः।

45. **प्रश्नः**—शाक्त-पूजायाः त्रीणि प्रधान-केन्द्राणि कानि सन्ति?
उत्तरम्— 1. काश्मीरः, 2. काञ्ची, 3. कामाख्या च।

46. **प्रश्नः**— श्रीविद्यायाः केन्द्रः कुत्र वर्तते?
उत्तरम्— 1. काश्मीरः, 2. काञ्ची।

47. **प्रश्नः**— अद्यापि कौलमतस्य मुख्यस्थानं कुत्र वर्तते?
उत्तरम्— कामाख्या।

48. **प्रश्नः**— त्रिकोणस्य मध्यविन्दु कुत्र वर्तते?
उत्तरम्— काश्याम्।

49. **प्रश्नः**— शाक्ततन्त्रस्य सम्बन्धः कैः सह मन्यते?
उत्तरम्— अथर्ववेदस्य सौभाग्यकाण्डैः सह।

50. **प्रश्नः**— श्रीविद्यायाः प्रधानत्रयाचार्याः के सन्ति?
उत्तरम्— श्रीदत्तात्रेयः, पूर्णानन्दः, गौडपादः।

51. **प्रश्नः**— दुग्धेन केरले पूजा काश्मीरे भावना मता। गौडे प्रत्यक्षदानं स्यात् त्रितयं कीर्तितं मया।। इति कुत्र वर्णितम्?
उत्तरम्— शक्तिसंगमतन्त्रस्य कालीखण्डे।

52. **प्रश्नः**— परतत्त्वं क्रमदर्शनं च किं नाम्ना अभिहितम्?
उत्तरम्— 'काली' नाम्ना।

53. **प्रश्नः**— कौलदर्शने 'कुल' संज्ञा कस्य द्योतकः?
उत्तरम्— क्रमदर्शनशक्तेः परमैश्वर्यस्य द्योतकः।

54. **प्रश्नः**— कालीशब्दार्थः कः?
उत्तरम्— कलयति कामधेनुः, गतिः ज्ञानं प्राप्तिश्च।

55. **प्रश्नः**— कालीशब्दस्य पंचात्मक-स्वरूपस्य व्याख्या व्युत्पत्ति-सम्मत-साधारः कुत्र प्राप्यते?
उत्तरम्— तन्त्रालोके।

56. **प्रश्नः**— पंचात्मक-स्वरूपाणि कानि सन्ति?
उत्तरम्—1. स्वात्मनो भेदनं क्षेपः, 2. भेदित-

स्याविकल्पनम्, ज्ञानं विकल्प:, 3. संख्यानन्द अन्यतो व्यतिभेदनात्। 4. गति: स्वरूपारोहित्वं प्रतिबिम्बवदेव यत्, 5. नाद: स्वात्मपरामर्शशेषता तद्विलोपनात्।

57. **प्रश्न:**—काली विश्वस्य मूलतत्त्व: त्रिभि: नाम्ना अभिहिता के सन्ति?

उत्तरम्— 1. मातृसद्भाव:, 2. व्योमवामेश्वरी, 3. कालकर्षिणी च।

58. **प्रश्न:**—कालिकाया: द्वादश विशिष्ट-स्वरूपाणि कानि सन्ति?

उत्तरम्—1. सृष्टि-काली, 2. रक्त-काली, 3. स्थितिनाश-काली, 4. यम-काली, 5. संहार-काली, 6. मृत्यु-काली, 7. रुद्रकाली (भद्रकाली), 8. मार्तण्ड-काली, 9. परमार्क-काली, 10. कालानल-रुद्रकाली, 11. महाकाल-काली, 12. महाभैरव-चण्डोग्रघोर-काली।

(ख) शिवस्वरूपम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

चराचरात्मक-समस्तविश्व: शिवस्य क्रीडा वर्तते। केवलं लीलामात्रं विद्यते। यथा-**क्रीडात्वेनाखिलं जगत् लीलामात्रं तु केवलम्** इति कथ्यते। सर्वज्ञ: सर्वशक्तिमान् भगवान् परमशिव: स्वयं संसाररूपक्रीडायै स्व-सर्वज्ञतासर्व- कर्तृता शक्तिं संकुचितार्थं मनुष्यदेहस्य आश्रयणं कुर्वन्ति। यथा-**मनुष्यदेहमाश्रित्य छन्नास्ते परमेश्वरा:**। महानिर्वाण-तन्त्रे लोककल्याणस्य कामनया स्वयं शिव: कथयति-अस्य निर्माणतन्त्रं ज्ञात्वा ब्रह्मनिर्माणमाप्नुयात्। अर्थात् मोक्षपुरुषार्थस्य प्राप्ति: भवति। कथ्यते यथा-

यथा नरेषु तन्त्रज्ञा सरितां जाह्नवी यथा।
यथाहं त्रिदिवेशानां आगमानामिदं तथा।
किं वेदै: किं पुराणैश्च किं शास्त्रैर्बहुभि: शिवे।
विज्ञातेऽस्मिन्महातन्त्रे सर्वसिद्धीश्वरो भवेत्।।

शिवतत्त्वस्य स्त्रीत्वनपुंसकत्वयोर्भावेन महेश्वरशब्देन पुँल्लिङ्गेन व्यवहार:। शं सुखं तस्मिन् भवतीति शम्भु: स्वयमानन्दरूप: इत्यर्थ:, अनेन एका मूर्तिस्त्रयो देवा ब्रह्म-विष्णु-महेश्वरा: इति कथ्यते। यथोच्यते व्यासेन-

शिवस्य हृदयं विष्णु: विष्णोश्च हृदयं शिव:।
उभयोरन्तरं नास्ति य: पश्यति स मूढधी।
एका मूर्तिस्त्रयो देवा ब्रह्म-विष्णु-महेश्वरा:।

शिवलोकस्य वर्णनं इत्थं कृतं वर्तते। वैकुण्ठस्य वामभागे मण्डलाकृतौ एककोटियोजनानि यावत् क: लोको विस्तीर्ण: सोऽपि प्रलयकाले शून्य:। सृष्टौ च तत्र शंकर: सानन्दो विश्रमते। माहेश्वरसम्प्रदाय: 1. पाशुपत, 2. शैव:, 3. कालामुखम्, 4. कापालिक: इति चत्वार: वर्तन्ते। एतेषां धार्मिकमतानां मूलग्रन्थं 'शैवागम 'नाम्ना ज्ञायते। महानिर्वाणतन्त्रे शिवस्वरूपम्-

सदाशिवं सदानन्दं करुणामृतसागरम्।
कर्पूरकुन्दधवलं शुद्धसत्त्वमयं विभुम्।।6।।
दिगम्बरं दीननाथं योगेन्द्रं योगिवल्लभम्।
गङ्गाशीकरसंसिक्तजटामण्डलमण्डितम् ।।7।।
विभूतिभूषितं शान्तं व्यालमालं कपालिनम्।
त्रिलोचनं त्रिलोकेशं त्रिशूलवरधारिणम्।।8।।
आशुतोषं ज्ञानमयं कैवल्यफलदायकम्।
निर्विकल्पं निरातङ्कं निर्विशेषं निरञ्जनम्।।9।।
सर्वेषां हितकर्त्तारं देवदेवं निरामयम्।
प्रसन्नवदनं वीक्ष्य लोकानां हितकाम्यया।
विनयावनता देवी पार्वतीशिवमब्रवीत्।।10।।

यामुनाचार्य: माहेश्वर-सम्प्रदायं चतुर्षु भागेषु विभक्तं करोति-1. पाशुपत-सम्प्रदाय:, 2. शैव-सम्प्रदाय:, 3. कालामुख-सम्प्रदाय:, 4. कापालिक-सम्प्रदायश्च। एतानि धार्मिकमतानि यस्मिन् ग्रन्थे संकलितानि सन्ति स: ग्रन्थ: शैवागम: वर्तते। दार्शनिकदृष्ट्या माहेश्वरतन्त्रेषु त्रयो प्रधानभेदा: अवलोक्यन्ते। यथा-1. द्वैतपरक-शिवतन्त्रम्, 2. द्वैताद्वैतपरक-रुद्रतन्त्रम्, 3. अद्वैतपरक-भैरवतन्त्रम् इति। केनचित् विदुषा शिवस्वरूपस्य वर्णनमित्थं कृतवान्। यथा-

अम्भोधि:स्थलतां स्थलं जलधितां धूलीलव: शैलतां।।
शैलो मृत्कणतां तृणं कुलिशतां वज्रं तृण-क्षीणताम्।
अग्नि: शीतलतां हिमो दहनतामायाति यस्येच्छया।
लीलादुर्ललिताद्भुतव्यसनिने तस्मै नम: शम्भवे।।

ब्रह्मवैवर्तपुराणे शिवलोकस्य वर्णनं इत्थं वर्तते-चतुर्भुजै: पार्षदैश्च जरामृत्य्वादिवर्जितम्। सत्ये च शिवलोकं च

कोटियोजनविस्तृतम्। शून्यं च सृष्टौ च सपार्षदशिवान्वितम्। गोलोकाभ्यन्तरे ज्योतिरतीव सुमनोहरम्। परमाह्लादकं शश्वत् परमानन्दकारणम्। ध्यायन्ते योगिन: शश्वद् योगेन ज्ञानचक्षुषा। वीरशैवसिद्धान्ते स्थलशब्दस्य विवेचितमस्ति-स्थीयते लीयते इति स्थलम्। परशिवो ब्रह्म एव स्थलशब्देन अभिधीयते। तच्च स्थलं शिवौ द्विधा अंगस्थलं लिंगस्थलम् इति भेदात्। तत्र चित्तोपाधिभृज्जीव एव अंगस्थलशब्दवाच्य:, शक्तिविशिष्ट: शिव एव लिंगस्थलशब्दवाच्यो भवति। तत्र लिंगस्थलं शिव एव भक्तानुग्रहहेतो: स्थूल-सूक्ष्म-कारण-शरीरभेदात् इष्टलिंगं भावलिंगम् भेदत्रयशाली भवति।

तत्त्वप्रकाशनामकग्रन्थे शिवतत्त्वस्य सम्बन्धे कथितमस्ति यत्-

माया पुरुष: शिव: इत्येतत्त्रितयं महार्थसंहारम्।
अवशिष्टते पुनस्तत्प्रवर्तते पूर्ववत् सृष्टौ।
व्यापकमेकं नित्यं कारणमखिलस्य तत्त्वजातस्य।
ज्ञानक्रियास्वभावं शिवतत्त्वं जगदुरचार्या:।।

शैवतन्त्र-सिद्धान्त:-पाशुपतमतानुसारं पञ्च पदार्था: 1. कार्यम्, 2. कारणम्, 3. योग:, 4. विधि:, 5. दु:खान्ता: सन्ति। **1. कार्यम्**-स्वातन्त्र्य-शक्त्यभाव: विद्या-कला-पशु इति त्रिप्रकारको भवति। येषु कार्येषु जीव-जड-द्वयो: अन्तर्भावो भवति। **2. कारणम्**-महेश्वर: जगत: सृष्टि:, संहार:, अनुग्रह: करणाय कारण-पदवाच्योऽस्ति। अस्य शास्त्रीय-संज्ञा 'पति' वर्तते। यथोक्तम्-**आप्ति पाति च तान् पशूनित्यत: पतिर्भवति** (कौण्डिन्य-भाष्ये-"पश्यनात् पाशनाच्च पशव:। पाशा नाम कार्यकरणाख्या: कला:। ताभि: पाशिता: बद्धा: सन्निरुद्धा: शब्दादिविषयपरवशा भूत्वाऽवतिष्ठन्ते।")। ज्ञानशक्ते: तथा पशुशक्ते: आश्रयणेन सर्वशक्तिमान् महेश्वर: 'पति'पदवाच्योऽस्ति। 3. **योग:**-चित्तेन आत्मा तथा ईश्वर-सम्बन्धं योग: कथ्यते। अयं योग: द्वौ प्रकारकौ स्त:, 1. क्रियात्मक:-येषु जप-ध्यानादि गण्यते। 2. क्रियोपरम:-क्रियाया: निवृत्ति:। 4. **विधि:**-महेश्वरस्य प्राप्ति: कारयितुं साधनव्यापारं विधि: इति कथ्यते। अत्र मुख्यविधौ संज्ञा 'चर्चा' वर्तते। य: व्रत-द्वारभेदाभ्यां द्वौ प्रकारकौ स्त:। 5. **दु:खान्त:**-दु:खस्य आत्यन्तिकनिवृत्ति: मोक्षो वा वर्तते। दु:खान्त: द्वौ प्रकारकौ भवत: अनात्मक: सात्मकश्च। कथ्यते यथा सर्वदर्शनसंग्रहे-

ज्ञानमात्रे यथाशास्त्रं साक्षाद् दृष्टिस्तु दुर्लभा।
पञ्चार्थादयतो नास्ति यथावत् तत्त्वनिश्चय:।।
(सर्व०दर्श०सं०)

आगमशास्त्रं शैवसिद्धान्तनाम्ना आहूयते। भगवान् शंकर: स्व-भक्तानां उद्धाराय स्व-पञ्चमुखात् 28 अष्यविंशतितन्त्राणां आविर्भावं कृतवान्। (क) सद्योजातानामकमुखात् उत्पन्ना: आगमा: सन्ति-1. कामिक:, 2. योगज:, 3. चिन्त्य:, 4. कारणम्, 5. अजित:। (ख) वामदेवमुखात्-6. दीप्त:, 7. सूक्ष्म:, 8. सहस्र:, 9. अंशुमान्, 10. सुप्रभेद:। (ग) अघोरमुखात्-11. विजय:, 12. नि:श्वास:, 13. स्वायम्भुव:, 14. अनल:, 15. वीर:। (घ) तत्पुरुषमुखात्-16. रौरव:, 17. मुकुट:, 18. विमल: 19. चन्द्रज्ञानम्, 20. बिम्ब:। (ङ) ईशानमुखात्-21. प्रोद्गीतम्, 22. ललित:, 23. सिद्ध:, 24. संतान:, 25. सर्वोत्तर:, 26. परमेश्वर:, 27. किरण:, 28. वातुल:। जयरथ: तन्त्रालोकस्य टीकायां एतेषां तन्त्राणां नामानि उल्लिखितानि कृतानि सन्ति। आगमसंहितानां संख्या-208 सन्ति। प्रत्यभिज्ञादर्शनस्याधार: 1. सिद्धातन्त्रं, 2. नामकतन्त्रं, 3. मालिनीतन्त्रं एतानि त्रीणि तन्त्राणि सन्ति। अस्मिन् मते पर, अपर, परापररूपाणि त्रीणि त्रिकाणि मन्यन्ते। अत्र शिव:, शक्ति: तथा तस्य संघट्ट: परत्रिक:, शिव:, शक्ति:, नर अपरत्रिक:, परा, परापरा, अपरा एता: तिस्र: अधिष्ठात्री-देव्या: परापरत्रिकानाम्ना प्रख्याता: सन्ति। शैवदर्शनस्य आधारभूतसाहित्यं त्रिषु भागेषु विभाजिते सति-1. आगमशास्त्रम्, 2. स्पन्दशास्त्रम्, 3. प्रत्यभिज्ञाशास्त्रम् एतेषां शास्त्राणां प्रादुर्भावो भवति। **'सिद्धित्रयी'** इत्यनेन 1. अजडप्रमातृसिद्धि:, 2. ईश्वरसिद्धि:, 3. सम्बन्धसिद्धि: एतेषां गणना क्रियते। श्वेताश्वतरग्रन्थे सर्वगत: शिवस्य विवेचनं कृतं वर्तते। यथा-

सर्वाननशिरोग्रीव: सर्वभूतगुहाशय:।
सर्वव्यापी स भगवांस्तस्मात् सर्वगत: शिव:।।

शिवधर्मोत्तरग्रन्थे शिवागमे सर्वज्ञ: परिपूर्ण: शिव: ज्ञेयो भवति। यथा-

आदिमध्यान्तनिर्मुक्त: स्वभावविमल: प्रभु:।
सर्वज्ञ: परिपूर्णश्च शिवो ज्ञेय: शिवागमे।।

गरुडपुराणे कथितमस्ति यत् शिवलिंगं समुत्सृज्य य: अन्यदेवता यजते, स: रौरवं नरकं व्रजेत्। यथा-

शिवलिंगं समुत्सृज्य यजते योऽन्यदेवताः।
स नृपः सह देहेन रौरवं नरकं व्रजेत्॥

तन्त्रतत्त्वज्ञैः सम्प्रदायः स्वभावनायां शिवं महातन्त्रं जगद्गुरुः इति मन्यते–

त्रिपदार्थं चतुष्पादं महातन्त्रं जगद्गुरुः।
सूत्रेणैकेन संक्षिप्य प्राह विस्तरतः पुनः।

शैवदर्शनग्रन्थे पाशः-पशु-पतिः इति त्रितयं विवेचितमस्ति। अत्र पाशः मल-कर्मादि-अर्थपञ्चकः, पशुः जीवः, पतिः शिवः वर्तते। पाशानां तारतम्यकारणात् पशुः त्रिप्रकारकः भवति-1. विज्ञानाकलः, 2. प्रलयाकलः, 3. सकल इति। पाशोऽपि चतुष्प्रकारकः–1. मलः, 2. कर्म, 3. मायङ्कः, 4. रोधशक्तिः। अणु, परिच्छिन्नरूप तथा सीमित-शक्त्या समन्वितः क्षेत्रज्ञजीवः पशु इति कथ्यते, सः व्यापक-प्रकाशरूपः अनेकः अस्ति। पाशानां तारतम्यताकारणैः पशुः त्रिप्रकारकः भवति- 1. विज्ञानाकलः, 2. प्रलयाकलः, 3. सकलः। मलाः अपि त्रिप्रकारकाः भवन्ति। 1. आणव-मल, 2. कार्म-मल, 3. मायीयमल। पति इत्यस्य अभिप्रायः परमेश्वर-परशिवेन वर्तते। परमेश्वरे स्वातन्त्र्यः तथा सर्वज्ञत्वपति इत्यस्य असाधारणगुणः अस्ति। शिवः नित्यमुक्तः अर्थात् स्वभावसिद्धः, नित्यः, निर्मलः, निरतिशयः, अर्थज्ञान-क्रियाशक्ति-समन्वितः अस्ति। कथ्यते यथा–

पाशः पशुः पतिरिति त्रितयेन सर्वं
व्याप्तं स एव भगवाञ्छिव ईश्वरोऽत्र।
कर्माद्यपेक्षत इतीह विशेषणेन
युक्तं तमेव पतिमीश्वररूपमीडे॥
(शैवदर्शने)

कापालिकमते षण्मुद्राणां धारणैः अपवर्गस्य उपलब्धिः भवति। षण्मुद्राः सन्ति–1. कर्णिका, 2. रुचक, 3. कुण्डल, 4. शिखामणि, 5. भस्म, 6. यज्ञोपवीत। कालामुखसम्प्रदाये कपाल-पात्र-भोजन-शव-भस्मस्नान-तत्प्राशन-लगुडधारण-सुराकुम्भस्थापनादि अनेकविधीनामनुष्ठानं दृष्ट-अदृष्टसिद्धीनां कारणं मन्यते। शिवस्य द्वे अवस्थे भवतः–1. लयावस्था, 2. भोगावस्था च।

जगत् परमशिवस्य रूपम्-'श्रीमत्परमशिवस्य पुनः विश्वोत्तीर्णविश्वात्मकपरमानन्दमयप्रकाशैकघनस्य अखिल-भेदेनैव स्फुरति, न तु वस्तुतः अन्यत् किंचित् ग्राह्यं ग्राहकं वा, अपि तु श्रीपरमशिवभट्टारक एवेत्थं नानावैचित्र्यसहस्रैः स्फुरति। परमेश्वरस्य अनन्त- शक्तिसम्पन्नभूते सति तस्य पञ्चशक्तिः–1. चित्, 2. आनन्दः, 3. इच्छा, 4. ज्ञानं, 5. क्रिया इति विशेषरूपेण विख्याताः सन्ति। अत्र चित् शक्तिः प्रकाशरूपा, आनन्दः स्वातन्त्र्यम्, स्वात्मविश्रान्ति-स्वभावाह्लादप्राधान्यात् इति आनन्दशक्तिः, स्वतन्त्रबोधको अविघात इच्छासम्पन्नमेव इच्छाशक्तिः, ज्ञानशक्तिः आमर्षरूपा, सर्व-आकार-धारणयोग्यता एव क्रियाशक्तिः। वर्णेषु आदिमो वर्णः अकारः परमशिवप्रकाशस्य द्योतको भवति। अन्तिमवर्णः हकारः विमर्शस्य प्रतीको वर्तते। कथ्यते यथा–

अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः।
हकारोऽन्त्यकलारूपो विमर्शः कथितः प्रिये॥

अत्र 'अ' इति प्रकाशात्मकः, 'ह' इति विमर्शात्मकः स्व मध्यवर्ती समग्रवर्णानां द्योतको वर्तते।

(ख) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— चराचरात्मक-समस्तविश्वः कस्य लीलामात्र (क्रीडा) वर्तते?
उत्तरम्—शिवस्य।

2. **प्रश्नः—क्रीडात्वेनाखिलं जगत् लीलामात्रं तु केवलम्** इति कुत्र कथितमस्ति?
उत्तरम्—आगमशास्त्रे।

3. **प्रश्नः**— **मनुष्यदेहमाश्रित्य छन्नास्ते परमेश्वराः।** इत्यनेन को ज्ञायते?
उत्तरम्—भगवान् शिवः।

4. **प्रश्नः**— निर्वाणतन्त्रं ज्ञात्वा ब्रह्मनिर्माणमाप्नुयात्' इति कः कथयति?
उत्तरम्— महानिर्वाणतन्त्रे लोककल्याणकामनया स्वयं शिवः कथयति।

5. **प्रश्नः**— मोक्षपुरुषार्थस्य प्राप्तिः केन भवति?
उत्तरम्—निर्वाणतन्त्रज्ञानेन।

6. **प्रश्नः**— शिवस्य हृदयं विष्णुः विष्णोश्च हृदयं शिवः। उभयोरन्तरं नास्ति यः पश्यति स मूढधी।
एका मूर्तिस्त्रयो देवा ब्रह्म-विष्णु-महेश्वराः। इति केन कथितम्?
उत्तरम्— व्यासेन।

7. **प्रश्नः**—शिवतत्त्वस्य स्त्रीत्वनपुंसकत्वयोर्भावेन महेश्वरशब्देन केन लिङ्गेन व्यवहारः?
उत्तरम्— पुँल्लिङ्गेन।

8. **प्रश्नः**—शं सुखं तस्मिन् भवतीति शम्भुः स्वयमानन्दरूपः इति कस्यार्थः?
उत्तरम्— शम्भुः शब्दस्यार्थः।

9. **प्रश्नः**—वैकुण्ठस्य वामभागे मण्डलाकृतौ एककोटियोजनानि यावत् को लोको विस्तीर्णः?
उत्तरम्— शिवलोकः।

10. **प्रश्नः**— प्रलयकाले शून्यः लोकः कः?
उत्तरम्— शिवलोकः।

11. **प्रश्नः**— माहेश्वरसम्प्रदायाः के सन्ति?
उत्तरम्— 1. पाशुपत, 2. शैवः, 3. कालामुखम्, 4. कपालिकः इति चत्वारः।

12. **प्रश्नः**—धार्मिकमतानां मूलग्रन्थं केन नाम्ना ज्ञायते?
उत्तरम्— शैवागम।

13. **प्रश्नः**— दार्शनिकदृष्ट्या माहेश्वरतन्त्रेषु त्रयो प्रधानभेदाः के सन्ति?
उत्तरम्—1. द्वैतपरक-शिवतन्त्रम्, 2. द्वैताद्वैतपरक-रुद्रतन्त्रम्, 3. अद्वैतपरक-भैरवतन्त्रम् इति।

14. **प्रश्नः**— ब्रह्मवैवर्तपुराणे शिवलोकस्य वर्णनं किमस्ति?
उत्तरम्— चतुर्भुजैः पार्षदैश्च जरामृत्व्यादिवर्जितम्। सत्ये च शिवलोकं च कोटियोजनविस्तृतम्। शून्यं च सृष्टौ च सपार्षदशिवान्वितम्। गोलोकाभ्यन्तरे ज्योतिरतीव सुमनोहरम्। परमाह्लादकं शश्वत् परमानन्दकारणम्। ध्यायन्ते योगिनः शश्वद् योगेन ज्ञानचक्षुषा।

15. **प्रश्नः**—वीरशैवसिद्धान्ते स्थलशब्दस्य विवेचनं किमस्ति?
उत्तरम्— स्थीयते लीयते इति स्थलम्। परशिवो ब्रह्म एव स्थलशब्देन अभिधीयते।

16. **प्रश्नः**— स्थल इत्यनेन शिवो द्विधा इति किम्?
उत्तरम्— अंगारस्थलं लिंगस्थलम् इति भेदात्।

17. **प्रश्नः**— तत्त्वप्रकाशनामकग्रन्थे शिवतत्त्वस्य सम्बन्धे किं कथितमस्ति?
उत्तरम्— माया पुरुषः शिवः इत्येतत्त्रितयं महार्थसंहारं। अवशिष्यते पुनस्तत्प्रवर्तते पूर्ववत् सृष्टौ।
व्यापकमेकं नित्यं कारणमखिलस्य तत्त्वजातस्य।
ज्ञानक्रियास्वभावं शिवतत्त्वं जगद्गुरवायाः॥

18. **प्रश्नः**—शैवतन्त्र-सिद्धान्ते पाशुपतमतानुसारं पञ्चपदार्थाः के सन्ति?
उत्तरम्— 1. कार्यम्, 2. कारणम्, 3. योगः, 4. विधिः, 5. दुःखान्तः।

19. **प्रश्नः**— कार्यम् इत्यनेन किं ज्ञायते?
उत्तरम्—येषु कार्येषु जीव-जडयोर्द्वयोः अन्तर्भावो भवति।

20. **प्रश्नः**— कारणम् इत्यनेन किमवबोध्यते?
उत्तरम्—महेश्वरः जगतः सृष्टिः, संहारः, अनुग्रहः करणाय कारण-पद वाच्योऽस्ति। अस्य शास्त्रीय-संज्ञा 'पति' वर्तते।

21. **प्रश्नः**— "आप्ति पाति च तान् पशूनित्यतः पतिर्भवति" इति कुत्र कथितम्?
उत्तरम्— कौण्डिन्य-भाष्ये।

22. **प्रश्नः**—ज्ञानशक्तेः तथा पशुशक्तेः आश्रयणेन सर्वशक्तिमान् महेश्वरः को पदवाच्योऽस्ति?
उत्तरम्— 'पति'पदवाच्यः।

23. **प्रश्नः**—योगशब्देन किं ज्ञायते?
उत्तरम्— चित्तेन आत्मा तथा ईश्वर-सम्बन्धं योगः कथ्यते।

24. **प्रश्नः**—योगस्य कौ द्वौ प्रकारकौ स्तः?
उत्तरम्— 1. क्रियात्मकः-येषु जप ध्यानादि गण्यते। 2. क्रियोपरमः क्रियायाः निवृत्तिः।

25. **प्रश्नः**— विधिशब्देन किमवबोध्यते?
उत्तरम्— महेश्वरस्य प्राप्तिः कारयितुं साधनव्यापारं विधिः इति कथ्यते।

26. **प्रश्नः**— दुःखान्तः इत्यनेन किं ज्ञायते?
उत्तरम्— दुःखस्य आत्यन्तिकनिवृत्तिः मोक्षो वा।

27. **प्रश्नः**— दुःखान्तः कौ द्वौ प्रकारकौ भवतः?
उत्तरम्— अनात्मकः सात्मकश्च।

28. **प्रश्नः**—ज्ञानमात्रे यथाशास्त्रं साक्षाद् दृष्टिस्तु दुर्लभा। पञ्चार्थादयतो नास्ति यथावत् तत्त्वनिश्चयः। इति कुत्र उद्धृतः?
उत्तरम्— सर्वदर्शनसंग्रहे।

29. प्रश्नः— आगमशास्त्रं केन नाम्ना आहूयते?
उत्तरम्— 'शैवसिद्धान्त'नाम्ना।

30. प्रश्नः—भगवान् शंकरः स्व-भक्तानां उद्धाराय स्व-पञ्चमुखात् कति तन्त्राणां आविर्भावं कृतवान्?
उत्तरम्— 28 अष्टविंशतिः।

31. प्रश्नः— सद्योजातमुखात् उत्पन्नाः आगमाः के सन्ति?
उत्तरम्— 1. कामिकः, 2. योगजः, 3. चिन्त्यः, 4. कारणम्, 5. अजितः।

32. प्रश्नः— वामदेवमुखात् उत्पन्नाः आगमाः के सन्ति?
उत्तरम्— 6. दीप्तः, 7. सूक्ष्मः, 8. सहस्रः, 9. अंशुमान्, 10. सुप्रभेदः।

33. प्रश्नः— अघोरमुखात् उत्पन्नाः आगमाः के सन्ति?
उत्तरम्— 11. विजयः, 12. निःश्वासः, 13. स्वायम्भुवः, 14. अनलः, 15. बीरः।

34. प्रश्नः— तत्पुरुषमुखात् उत्पन्नाः आगमाः के सन्ति?
उत्तरम्— 16. रौरवः, 17. मुकुटः, 18. विमलः 19. चन्द्रज्ञानम्, 20. बिम्बः।

35. प्रश्नः— ईशानमुखात् उत्पन्नाः आगमाः के सन्ति?
उत्तरम्— 21. प्रोद्गीतम्, 22. ललितः, 23. सिद्धः, 24. संतानः, 25. सर्वोत्तरः, 26. परमेश्वरः, 27. किरणः, 28. वातुलः।

36. प्रश्नः— आगमसंहितानां संख्या का?
उत्तरम्— 208 संख्या।

37. प्रश्नः— प्रत्यभिज्ञादर्शनस्याधारः कानि त्रीणि तन्त्राणि?
उत्तरम्—1. सिद्धातन्त्रं, 2. नामकतन्त्रं, 3. मालिनीतन्त्रम्।

38. प्रश्नः— कानि त्रीणि त्रिकाणि रूपाणि?
उत्तरम्— पर, अपर, परापर।

39. प्रश्नः— शिवः, शक्तिः तथा तस्य संघट्टः केन नाम्ना ज्ञायते?
उत्तरम्— परत्रिकः।

40. प्रश्नः— शिव, शक्तिः, नरः केन नाम्ना ज्ञायते?
उत्तरम्— अपरत्रिकः।

41. प्रश्नः—परा, परापरा, अपरा एताः तिस्रः अधिष्ठात्री-देवीः काः?
उत्तरम्— परापरत्रिका।

42. प्रश्नः— शैवदर्शनस्य आधारभूतसाहित्यं केषु त्रिषु भागेषु विभाजितोऽस्ति?
उत्तरम्— 1. आगमशास्त्रम्, 2. स्पन्दशास्त्रम्, 3. प्रत्यभिज्ञाशास्त्रम्।

43. प्रश्नः— 'सिद्धित्रयी' इत्यनेन कानि अवबोध्यन्ते?
उत्तरम्— 1. अजडप्रमातृसिद्धिः, 2. ईश्वरसिद्धिः, 3. सम्बन्धसिद्धिः।

44. प्रश्नः— सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः। सर्वव्यापी स भगवांस्तस्मात् सर्वगतः शिवः। इति कुत्र विवेचितः?
उत्तरम्— श्वेताश्वतरग्रन्थे।

45. प्रश्नः—आदिमध्यान्तनिर्मुक्तः स्वभावविमलः प्रभुः। सर्वज्ञः परिपूर्णश्च शिवो ज्ञेयः शिवागमे।। कस्य ग्रन्थस्य श्लोकोऽयम्?
उत्तरम्— शिवधर्मोत्तरग्रन्थस्य।

46. प्रश्नः— शिवलिंगं समुत्सृज्य यः अन्यदेवता यजते, सः रौरवं नरकं वज्रेत्। इति कस्य पुराणस्य वचनम्?
उत्तरम्— गरुडपुराणस्य।

47. प्रश्नः—त्रिपदार्थं चतुष्पादं महातन्त्रं जगद्गुरुः। सूत्रेणैकेन संक्षिप्य प्राह विस्तरतः पुनः। इति कस्य सम्प्रदायस्य भावना?
उत्तरम्— तन्त्रतत्त्वज्ञ-सम्प्रदायस्य।

48. प्रश्नः—पाशः-पशु-पतिः इति त्रितयविवेचनं कुत्र वर्तते?
उत्तरम्— शैवदर्शनग्रन्थे।

49. प्रश्नः— मल-कर्मादि-अर्थपञ्चकः कः?
उत्तरम्— पाशः।

50. प्रश्नः— पशुपदेन को ज्ञायते?
उत्तरम्— जीवः।

51. प्रश्नः— पतिः इति शब्देन कः अवबोध्यते?
उत्तरम्— शिवः।

52. प्रश्नः—पाशानां तारतम्यकारणात् पशोः त्रिप्रकारकाः के सन्ति?
उत्तरम्— 1. विज्ञानाकलः, 2. प्रलयाकलः, 3. सकल इति।

53. प्रश्नः— चतुष्प्रकारकाः पाशाः के सन्ति?
उत्तरम्—1. मलः, 2. कर्म, 3. मायङ्कः, 4. रोधशक्तिः।

54. प्रश्नः— त्रिप्रकारकाः मलाः के सन्ति?
उत्तरम्—1. आणव-मल, 2. कार्मण-मल, 3. मायीयमल।

55. प्रश्नः— पति इत्यस्य अभिप्रायः केन वर्तते?
उत्तरम्— परमेश्वर-परशिवेन।

56. प्रश्नः— स्वभाव-सिद्धः, नित्यः, निर्मलः, निरतिशयः, अर्थज्ञान-क्रियाशक्ति-समन्वितः कोऽस्ति?
उत्तरम्— शिवः।

57. प्रश्नः— पाशः पशुः पतिरिति त्रितयेन सर्वं व्याप्तं स एव भगवाञ्छिव ईश्वरोऽत्र कर्माद्यपेक्षत इतीह विशेषणेन युक्तं तमेव पतिमीश्वररूपमीडे।। इति कस्मिन् ग्रन्थे विवेचितोऽस्ति?
उत्तरम्—शैवदर्शने।

58. प्रश्नः— कापालिकमते षण्मुद्राणां धारणात् कस्य उपलब्धिः भवति?
उत्तरम्—अपवर्गस्य।

59. प्रश्नः— षण्मुद्राः के सन्ति?
उत्तरम्—1. कर्णिका, 2. रुचक, 3. कुण्डल, 4. शिखामणि, 5. भस्म, 6. यज्ञोपवीत।

60. प्रश्नः—कपाल-पात्र-भोजन-शव-भस्मस्नान-तत्प्राशन-लगुडधारण-सुराकुम्भस्थापनादि अनेक-विधीनामनुष्ठानं दृष्ट-अदृष्टसिद्धीनां कारणं केन मन्यते?
उत्तरम्—कालामुखसम्प्रदायेन।

61. प्रश्नः—शिवस्य द्वे अवस्थे के भवतः?
उत्तरम्—1. लयावस्था, 2. भोगावस्था।

62. प्रश्नः—परमेश्वरस्य अनन्तशक्तिसम्पन्नभूते सति तस्या पञ्चशक्तिः काः विशेषरूपेण विख्याताः सन्ति?
उत्तरम्— 1. चित्, 2. आनन्दः, 3. इच्छा, 4. ज्ञानं, 5. क्रिया इति।

63. प्रश्नः— चित् शक्तिः का रूपा?
उत्तरम्— प्रकाशरूपा।

64. प्रश्नः— स्वात्मविश्रान्तिस्वभावाह्लादप्राधान्या का?
उत्तरम्— आनन्दशक्तिः।

65. प्रश्नः— स्वतन्त्रबोधको अविघात इच्छासम्पन्ना का?
उत्तरम्— इच्छाशक्तिः।

66. प्रश्नः—ज्ञानशक्तिः का रूपा?
उत्तरम्— आमर्षरूपा।

67. प्रश्नः— सर्व-आकार-धारणयोग्या का?
उत्तरम्— क्रियाशक्तिः।

68. प्रश्नः— वर्णेषु आदिमवर्णः परमशिवप्रकाशस्य द्योतको भवति इति कः?
उत्तरम्— अकारः।

69. प्रश्नः—अन्तिमवर्णः विमर्शस्य प्रतीको वर्तते इति कः?
उत्तरम्— हकारः।

(ग) प्रत्ययस्वरूपम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

प्रत्ययशब्दस्यार्थः कोशग्रन्थे-प्रति + इ + अच् = प्रत्ययः। धारणा, निश्चितविश्वासः, श्रद्धा, सम्मति, कारण, आधारः, क्रियायाः साधनम् इत्यादयः क्रियते। इत्यनेन स्पष्टो भवति यत् आगमशास्त्रं प्रति निश्चितविश्वासः क्रियायाः साधनं प्रति, गुरुज्ञानं प्रति दृढधारणा एव प्रत्ययशब्दस्यार्थः भवितुमर्हति।

गुरुज्ञानं प्रति निश्चितविश्वासः– गुरुशिष्य-परम्पराप्राप्तमाध्यात्मिकज्ञानमेवागमम्। साक्षात्कृततत्त्वैः मुनिभिः स्वसाक्षात्कृतं ज्ञानं विविधे समये विविधप्रकारेण सम्यगवबोधार्थम् अधिकारिणे जिज्ञासु-शिष्याय उपदिष्टम्। तदेव ज्ञानं विविधपरम्परागतत्वादाम्नायरूपत्वाच्चागमशास्त्रेण ख्यातम्। तन्त्रस्य अवतारणा शिव-शक्तेः प्रश्नोत्तर-व्याजेन तन्त्रस्य आविर्भावो मन्यते। स्वच्छन्दतन्त्रे स्पष्टनिर्देशो प्राप्यते यत् सदाशिवः स्वयं गुरु एवं शिष्यस्य रूपेण अवस्थितो भूत्वा तन्त्रस्य अवतारणां कृतवान्। यथोच्यते–

गुरुशिष्यपदे स्थित्वा स्वयमेव सदाशिवः।
प्रश्नोत्तरपरैर्वाक्यैस्तन्त्रं समवतारयत्।।
(स्वच्छन्दतन्त्र1/12)

अर्थात् "कर्णात्कर्णोपदेशेन सम्प्राप्तमनीतलम्" विद्वान् समर्थोऽपि पुस्तकवाचनादिना सम्पन्नज्ञानो न कृतार्थो भवितुमर्हति, किन्तु गुरूपदिष्टमार्गेणैवेति (प०क०सू०- 1/2)।

मलापनयनस्य एकमेव साधनमस्ति-परमशिवस्य अनुग्रह-शक्तिं तान्त्रिकभाषायां 'शक्तिपात:' इति कथ्यते। इत्थमनुग्रहशक्तेः नाम 'दीक्षा' वर्तते। कथितं यथा अभिनवगुप्तेन तन्त्रलोके-

दीयते ज्ञानसद्भावः क्षीयते पशुबन्धनात्।
दानक्षपणसंयुक्ता दीक्षा तेनेह कीर्तिता।।

दीक्षोपरान्तेऽपि परशिष्यः, नास्तिकः, गुरुशुश्रूषाणां आलसानां अनर्थप्रदजनान् च उपदेशं न देयम्।

न देयं परशिष्येभ्यो नास्तिकानां न चेश्वरि।
न शुश्रूषालसानां च नैवानर्थप्रदायिनाम्।।

(पा०नि०6/4)

'आगमो ज्ञानमित्युक्तमनन्ता ज्ञानकोटय' इति वचनात् आगमस्य ज्ञानमिति पर्यायः। परमयोगिनः भगवतः शिवस्य ईशान-तत्पुरुष-अघोर-वामदेव-सद्योजात-पञ्चमुखैः निर्गतज्ञानं गुरुशिष्यपरम्परयाऽद्य यावदागच्छतीति प्रत्यय-जन्यागमः। एतेन स्फुटं प्रतीयते यद् गुरुमुखोद्‌गतं ज्ञानमेव तन्त्रागमपदेन सङ्केतितमत्र श्लोके। यथा जयरथेन-

तन्त्रं जज्ञे रुद्-शिव-भैरवाख्यमिदं त्रिधा।
वस्तुतो हि त्रिधैवेयं ज्ञानसत्ता विजृम्भते।।
भेदेन भेदाभेदेन तथैवाभेदभागिना।।

एतेन भेद-भेदाभेद-अभेदप्रतिपादकक्रमेण त्रिप्रकारकमिदं ज्ञानसत्तात्मकं शास्त्रम्। नेत्रतन्त्रेऽपि दृश्यते यद्-**"आगमस्य प्रवक्ष्यामि क्रियते तु यथेच्छया।"**

दीक्षा-तान्त्रिक-दीक्षा चतुष्प्रकारिका भवति-1. क्रियावती, 2. वर्णमयी, 3. वेधमयी, 4. वर्णमयी। पुरुषगुरोर-पेक्षया स्त्रीगुरुप्रदत्ता दीक्षा शुभा भवति। स्त्रिया प्रदत्तो मन्त्रोऽष्टगुणाधिकं फलं ददाति। स्त्रीगुरूणां मध्ये स्वमाता दीक्षा ददाति तदा तु सा दीक्षा श्रेष्ठा। तया मात्रा प्रदत्ता दीक्षा निश्चयेन भुक्तिमुक्तिप्रदायिनी भवति। कथितं यथा रुद्रयामलग्रन्थे-

सिद्धमन्त्रो यदि भवेत् गृह्णीयाद् विधवामुखाद्।
केवलं सुफलं तत्र मातुरष्टगुणं ध्रुवम्।।

(रुद्रया०2/113)

यदि माता स्वकं मन्त्रं ददाति स्वसुताय च।
तदाष्टसिद्धिमाप्नोति शक्तिमार्गे न संशयः।।

(रुद्राया०2/115)

आगमः ज्ञानस्य (प्रत्ययस्य) पर्यायः इति सुनिश्चितमेव। ज्ञानरूपो हि भगवांच्छिवः नित्यं ज्ञानं प्रकाशयति। अत एव उक्तं यद् ज्ञानमिच्छेन्महेश्वरात्। ततः प्रकाशित एव ज्ञानराशिरालोकयति मार्गं विश्वस्य। तदुक्तं शैवागमे-

अथात्ममलमायाख्यकर्मबन्धविमुक्तये ।
अव्यक्ते च शिवत्वस्य शिवाज्ज्ञानं प्रवर्तते।।

पौष्करे च-

अदृष्टविभवाच्छान्ताच्छिवात्परमकारणात् ।
नादरूपं विनिष्क्रान्तं शास्त्रं परमदुर्लभम्।।

अत एव सर्वोऽपि ज्ञानमयो विभवः साम्बशिवस्येच्छा-ज्ञानक्रियादिशक्त्या सम्पन्नतामेति-

अनादिनिधनाच्छान्ताच्छिवात्परमकारणात् ।
इच्छाशक्तिर्विनिष्क्रान्ता ततो ज्ञानं ततः क्रिया।।
तयोत्पन्नानि भूतानि भुवनानि चतुर्दश।
वाङ्मयं चैव यत्किञ्चित् तत्सर्वं मातृकोद्भवम्।।

अद्यत्वे समग्रे भारते व्यवहारे शास्त्रे च तन्त्रसंस्कृतेः प्रभावाः परीक्ष्यन्ताम्। शैवशाक्तगाणपत्यबौद्धजैनादयः सर्वे पन्थानस्तान्त्रिकीं रीतिमनुसरन्ति। गृहे-गृहे तन्त्रोक्तदेवानां देवीनाञ्च उपासनं प्रचलति। अतः भारतीयजीवनपद्धत्या तन्त्रस्य अभेदसम्बन्धः। तन्त्रशास्त्रे सर्ववर्णानां नराणां नारीणाञ्चा-धिकारादस्य शास्त्रस्य लोकोपयोगितया सहैव क्रियालाघवात् युगधर्मिताऽपि सिद्ध्यति। सर्ववर्णानां तन्त्रसंस्कृतिं प्रति धारणा, आगमशास्त्रं प्रति निश्चितविश्वासः, गुरुज्ञानं प्रति श्रद्धा अस्य प्रकरणस्योद्देश्यमस्ति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— कोशग्रन्थे प्रत्ययशब्दस्यार्थः कः?
   उत्तरम्—प्रति + इ + अच् = प्रत्ययः। धारणा, निश्चित-विश्वासः, श्रद्धा, सम्मति, कारण, आधारः, क्रियायाः साधनम्।
2. **प्रश्नः**— प्रत्ययशब्दस्यार्थः कः भवितुमर्हति?
   उत्तरम्—आगमशास्त्रं प्रति निश्चितविश्वासः क्रियायाः साधनं प्रति, गुरुज्ञानं प्रति दृढधारणा एव।
3. **प्रश्नः**— गुरुशिष्यपरम्पराप्राप्तमाध्यात्मिकज्ञानं किम्?
   उत्तरम्—आगमशास्त्रम्।
4. **प्रश्नः**— आगमशास्त्रस्य किं वैशिष्ट्यम्?
   उत्तरम्—साक्षात्कृततत्त्वैः मुनिभिः स्वसाक्षात्कृतं ज्ञानं विविधे समये विविधप्रकारेण सम्यगवबोधार्थम् अधिकारिणे जिज्ञासु-शिष्याय उपदिष्टम्।
5. **प्रश्नः**— तन्त्रस्य अवतारणा कैः अवबोध्यते?
   उत्तरम्—शिव-शक्तेः प्रश्नोत्तर-व्याजेन तन्त्रस्य आविर्भावः।
6. **प्रश्नः**— गुरुशिष्यपदे स्थित्वा स्वयमेव सदाशिवः। प्रश्नोत्तरपरैर्वाक्यैस्तन्त्रं समवतारयत्।। इति कुत्र उद्धृतः?
   उत्तरम्—स्वच्छन्दतन्त्रे।
7. **प्रश्नः**—"कर्णात्कर्णोपदेशेन सम्प्राप्तमवनीतलम्" इत्यनेन किं ध्वनितम्?
   उत्तरम्—बीजमन्त्रग्रहणप्रक्रियाज्ञानम्, गुरूपदिष्ट-मार्गेणैवेति।
8. **प्रश्नः**— मलापनयनस्य साधनं किमस्ति?
   उत्तरम्—परमशिवस्य अनुग्रह-शक्तिः तान्त्रिकभाषायां शक्तिपातः।
9. **प्रश्नः**— अनुग्रहशक्तेः किं नाम वर्तते?
   उत्तरम्—दीक्षा।
10. **प्रश्नः**—दीयते ज्ञानसद्भावः क्षीयते पशुबन्धनात्। दानक्षपणसंयुक्ता दीक्षा तेनेह कीर्तिता।। इति कः कुत्र कथितवान्?
    उत्तरम्—अभिनवगुप्तः तन्त्रालोके।
11. **प्रश्नः**— कमुपदेशं न देयम्?
    उत्तरम्—न देयं परशिष्येभ्यो नास्तिकानां न चेश्वरि। न शुश्रूषालसानां च नैवानर्थप्रदायिनाम्।।
12. **प्रश्नः**— आगमज्ञानपर्यायस्य किं वचनम्?
    उत्तरम्— आगमो ज्ञानमित्युक्तमनन्ता ज्ञानकोटयः।
13. **प्रश्नः**—परमयोगिनः भगवतः शिवस्य ईशान- तत्पुरुष-अघोर-वामदेव-सद्योजात-पञ्चमुखैः निर्गतज्ञानं किम्?
    उत्तरम्—गुरुशिष्यपरम्परयाऽद्य यावदागच्छतीति प्रत्ययजन्यागमः।
14. **प्रश्नः**—तन्त्रं जज्ञे रुद्र-शिव-भैरवाख्यमिदं त्रिधा। वस्तुतो हि त्रिधैवेयं ज्ञानसत्ता विजृम्भते। भेदेन भेदाभेदेन तथैवाभेदभागिना। इति केन कथितम्?
    उत्तरम्—जयरथेन।
15. **प्रश्नः**—भेद-भेदाभेद-अभेदप्रतिपादकक्रमेण त्रिप्रकार-कमिदं ज्ञानसत्तामकं शास्त्रं किम्?
    उत्तरम्—आगमशास्त्रम्।
16. **प्रश्नः**—आगमस्य प्रवक्ष्यामि क्रियते तु यथेच्छया। इति कस्य वचनम्?
    उत्तरम्—नेत्रतन्त्रकारस्य।
17. **प्रश्नः**—तान्त्रिक-दीक्षा कतिप्रकारका काश्च ताः?
    उत्तरम्—चतुष्प्रकारका, 1. क्रियावती, 2. वर्णमयी, 3. वेधमयी, 4. वर्णमयी।
19. **प्रश्नः**—पुरुषगुरोरपेक्षया स्त्रीगुरुप्रदत्ता दीक्षा का भवति?
    उत्तरम्—शुभा।
20. **प्रश्नः**— स्त्रिया प्रदत्तो मन्त्रः कतिगुणाधिकं फलं ददाति?
    उत्तरम्—अष्टगुणाधिकम्।
21. **प्रश्नः**—स्त्रीगुरूणां मध्ये कस्या दीक्षा श्रेष्ठा?
    उत्तरम्—स्वमातुः।
22. **प्रश्नः**— निश्चयेन भुक्तिमुक्तिप्रदायिनी दीक्षा का?
    उत्तरम्—मात्रा प्रदत्ता दीक्षा।
23. **प्रश्नः**—सिद्धमन्त्रो यदि भवेत् गृह्णीयाद् विधवामुखाद्। केवलं सुफलं तत्र मातुरष्टगुणं ध्रुवम्। यदि माता स्वकं मन्त्रं ददाति स्वसुताय च। तदाष्टसिद्धिमाप्नोति शक्तिमार्गे न संशयः।। इति कुत्र उद्धृतः?
    उत्तरम्—रुद्रयामल-ग्रन्थे।
24. **प्रश्नः**—आगमशास्त्रं कस्य पर्यायः?
    उत्तरम्—ज्ञानस्य (प्रत्ययस्य)।
25. **प्रश्नः**— ज्ञानरूपः कः यः नित्यं ज्ञानं प्रकाशयति?
    उत्तरम्—भगवांच्छिवः, ज्ञानमिच्छेन्महेश्वरात्।
26. **प्रश्नः**—अथात्ममलमायाख्यकर्मबन्धविमुक्तये। अव्यक्ते च शिवत्वस्य शिवाज्ज्ञानं प्रवर्तते।। इति कुत्र उद्धृतः?
    उत्तरम्—शैवागमे।
27. **प्रश्नः**—अदृष्टविभवाच्छान्ताच्छिवात्परमकारणात्। नादरूपं विनिष्क्रान्तं शास्त्रं परमदुर्लभम्।। इति केन कथ्यते?
    उत्तरम्—पौष्करेण।
28. **प्रश्नः**—अनादिनिधनाच्छान्ताच्छिवात्परमकारणात्। इच्छाशक्तिर्विनिष्क्रान्ता ततो ज्ञानं ततः क्रिया।। तयोत्पन्नानि भूतानि भुवनानि चतुर्दश। वाङ्मयं चैव यत्किञ्चित् तत्सर्वं मातृकोद्भवम्।। अनेन श्लोकेन किं ज्ञायते?
    उत्तरम्—सर्वोऽपि ज्ञानमयो विभवः साम्ब-शिवस्येच्छाज्ञानक्रियादिशक्त्या सम्पन्नतामेति।

29. **प्रश्नः**—अद्यत्वे समग्रे भारते व्यवहारे शास्त्रे च कस्या संस्कृतेः प्रभावः?

उत्तरम्—तन्त्रसंस्कृतेः।

30. **प्रश्नः**—शैवशाक्तगाणपत्यबौद्धजैनादयः सर्वे पन्थानः कां रीतिमनुसरन्ति?

उत्तरम्—तान्त्रिकीरीतिम्।

31. **प्रश्नः**—गृहे-गृहे केषामुपासनां प्रचलन्ति?

उत्तरम्—तन्त्रोक्तदेवानां देवीनाञ्च।

32. **प्रश्नः**—भारतीयजीवनपद्धत्याः अभेदसम्बन्धः केन सह स्थाप्यते?

उत्तरम्— तन्त्रेण सह।

33. **प्रश्नः**—सर्ववर्णानां नराणां नारीणाञ्चाधिकारादस्य शास्त्रस्य लोकोपयोगितया सहैव क्रियालाघवात् युगधर्मिताऽपि कुत्र सिद्ध्यति?

उत्तरम्—तन्त्रशास्त्रे।

34. **प्रश्नः**—अस्य प्रकरणस्योद्देश्यं किमस्ति?

उत्तरम्—सर्ववर्णानां तन्त्रसंस्कृतिं प्रति धारणा, आगमशास्त्रं प्रति निश्चितविश्वासः, गुरुज्ञानं प्रति श्रद्धा।

(घ) बुद्धितत्त्वम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

आम्नायपरम्परया गुरुशिष्यमाध्यमेन प्राप्तत्वात्, लौकिक-पारलौकिकाभ्युदयप्रदायकत्वात् ज्ञानरूपत्वाच्चैष आगमशब्दः एतादृशार्थरूपं गुरुशिष्यपरम्पराप्राप्तं तन्त्रशास्त्रम्। आगमशास्त्रे बुद्धिस्वरूपं विवेचनावसरे कथितमस्ति यत्–**ज्ञानमेव बुद्धिः।** वेदान्तिकाः बुद्धिसम्बन्धे कथयन्ति– **बुद्धिर्नामनिश्चयान्तःकरणवृत्तिः** तेषामभिप्रायो वर्तते– बुद्धिर्नाम धर्म्म इति, आत्मनो निर्गुणत्वात् निष्क्रियत्वाच्च। पुरुषस्य निष्क्रियत्वात् सांख्यमतेऽपि बुद्धिर्न पुरुषधर्मः। सा हि प्रकृतेः परिणामविशेषः इति। नैयायिकानां वैशेषिकाणां मते बुद्धिः आत्मनो धर्म्मविशेषः नास्ति। न द्रव्यं नापि कर्म। विषयेन्द्रियसम्बन्धे जाते सति स सम्बन्धः इन्द्रिय- स्पृष्टमनःसंयुक्ते आत्मनि कंचन गुणविशेषम् उत्पादयति। अयमेव गुणविशेषो ज्ञानम्। बुद्धिर्निराकारा अनित्या च इति तेषामाशयः। तर्कसंग्रहकार-अन्नम्भट्टपादैः उक्तम्– सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम् इति बुद्धेर्लक्षणम्। सर्वेषां व्यवहाराणां हेतुभूतो गुणो बुद्धिः इत्यर्थः। बुद्धितत्त्वस्य सम्बन्धे कथितमस्ति–

भवति गुणत्रयतो धीर्विषयाध्यवसायरूपिणी चेह।
सापि त्रिविधा गुणतः प्रोक्ता कर्मानुसारेण।।

धर्मज्ञानवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्यात्मनाऽष्टविध-वृत्तिमत्त्वं बुद्धेः सूचितम्। अर्थात् अध्यवसाय-धर्म-ज्ञान-वैराग्य-ऐश्वर्य-सात्विकरूप-तामस-विपर्यय: इति अष्टविधवृत्तिमत्त्वम् उच्यते; यथा–

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विरागमैश्वर्यम्।
सात्विकमेतद्रूपं तामसमस्माद् विपर्यस्तम्।।

आकाशे सूर्योदयभूते सति यथा दिनस्य आभासो भवति, तथैव अहंकारस्य बाधेऽपि बुद्धितत्त्वं व्यवस्थितं भवति। भणितं यथा–

अहंकारस्य बाधेऽपि बुद्धितत्त्वं व्यवस्थितम्।
आदित्योदयसंकाशं बोधयन्तमिवाखिलम्।।

ज्ञानमेव बुद्धिः इत्यत्र सम्यग् ज्ञानं तद् द्विविधं प्रमाणं च स्मृतिः इति। तत्र स्मृतिः अनुभूत-विषयासंप्रमोषः भवति। तद्यथा–स मे पिता, सा मे माता, तद्गृहम् इत्यादयः ज्ञानं पूर्वानुभवजनितसंस्कारमात्रम् उद्भवति। अत्र सम्यगनुभव एव प्रमाणम्। यथा–

अनुभूतिः प्रमाणं सा स्मृतेरन्या तु सा स्मृतिः।
पूर्वानुभवसंस्कारमात्रजं ज्ञानमुच्यते।।
अव्यक्ताद्ये विशेषान्ते विकारेऽस्मिन्नचेतने।
चेतनाचेतनान्यत्वविज्ञानं ज्ञानमुच्यते।।
द्वे विधे वेदितव्येऽत्र परा चैवापरा तथा।
कर्मादिविद्या ह्यपरा परा चोपनिषद्गता।।
अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम्।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुनाम्।।

हेतुभूतो गुणो बुद्धिः अत्र परमेश्वरोपासनस्य साधनभूतानामुपकरणानां हि तन्त्रसंज्ञा प्रतिष्ठते। तन्त्रशास्त्रं सर्वशास्त्रेभ्यो महत्तमं स्थानं बिभर्तीति तत्र-तत्र तन्त्रशास्त्रग्रन्थेषु निगदितम् एव। यथा–

नदीनाञ्च यथा गङ्गा पर्वतानां हिमालयः।
अश्वत्थः सर्ववृक्षाणां राज्ञामिन्द्रो यथा वरः।।

देवीनाञ्च यथा दुर्गा वर्णानां ब्राह्मणो यथा।
तथा समस्तशास्त्राणां तन्त्रशास्त्रमनुत्तमम्।।

परमेश्वरस्य हृदये विश्व-सृष्टेः इच्छा उत्पन्ने सति तयोः द्वयोः रूपयोः 1. शिवरूपम्, 2. शक्ति-रूपं भवतः। शिवः प्रकाशरूपं शक्तिः विमर्शरूपिणी स्तः। विमर्शस्य रूपम्-"विमर्शो नाम विश्वाकारेण विश्वप्रकाशेन विश्वसंहरणेन च अकृतिमाहमिति स्फुरणम्"। अत्र तत्वशब्दस्यार्थः तन्त्रालोके–

स्वस्मिन् कार्येऽथ धर्माथे यद्वापि स्वसदृग्गुणे।
आस्ते सामान्यकल्पेन तननाद् व्याप्तृभावतः।।
तत् तत्त्वं क्रमशः पृथिवी-प्रधानं-पुंशिवादयः।

(तन्त्रालोक-6/4-5)

तन्त्रशास्त्रानुसारं तत्त्वानां संख्या 36 षट्त्रिंशत् वर्तते। ते त्रिभागेषु विभक्ताः सन्ति–शिवतत्त्व, विद्यातत्त्व, आत्मतत्त्व। 1. शिवतत्त्व, 2. शक्तितत्त्व, 3. विद्यातत्त्व, 4. सदाशिव, 5. ईश्वरः, 6. माया, 7. कला, 8. विद्या, 9. रागः, 10. कालः, 11. नियति, 12. पुरुष, 13. प्रकृतिः, 14. बुद्धिः, 15. अहङ्कार, 16. मन, 17. त्वक्, 18. श्रोत्र, 19. चक्षु, 20. जिह्वा, 21. घ्राण, 22. वाक्, 23. पाणि, 24. पाद, 25. पायु, 26. उपस्थ, 27. शब्द, 28. स्पर्श, 29. रूप, 30. रस, 31. गन्ध, 32. आकाश, 33. वायु, 34. वह्नि, 35. सलिल, 36. भूमि। प्रमायाः द्वे रूपे भवतः–1. अहमंशः, 2. इदमंशः। अहमंशग्राहकः शिवः, इदमंशग्राह्यो शक्तिः वर्तते। यथा–दर्पणाभावे मुखरूपस्य प्रत्यर्थो न भवति, तत्सदृशं विमर्शेन विना प्रकाशस्य स्वरूप-सम्पन्नो न भवति। इत्थं शक्त्या विना शिवं स्व-प्रकाशरूपस्य ज्ञानं न भवति। शिवे चेतनतायाः ज्ञानं शक्तेः कारणं भवति, शक्तेः अभावे शिवः शवो (मृतकः) वर्तते। कथ्यते यथा शंकराचार्येण सौन्दर्यलहरीनामकग्रन्थे–

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्।
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि।।

(सौन्दर्यलहरी-1)

शिवशक्त्योः सामञ्जस्यविषये आगमशास्त्रस्य स्पष्टकथनं वर्तते यत्–शिवशक्त्योर्मध्ये अभेदसम्बन्धः चन्द्रमा-चन्द्रिकयोः सदृशं नित्य-योगो वर्तते। द्वयोः अद्वैतरूपे सदा संयुक्तो वर्तते। कथ्यते यथा आचार्यसोमनाथेन–

न शिवेन विना देवी न देव्या च विना शिवः।
नानयोरन्तरं किंचित् चन्द्रचन्द्रिकयोरिव।।

न शिवः शक्तिरहितो न शक्तिर्व्यतिरेकिणी।
शिवः शक्तस्तथा भावान् इच्छया कर्तुमीहते।।
शक्तिशक्तिमतोर्भेदः शैवे जातु न वर्ण्यते।

(सोमानन्द-शिवदृष्टि 3/2/3)

(घ) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—आगमशास्त्रे बुद्धिः इत्यस्यार्थः किम्?

उत्तरम्—ज्ञानम्।

2. **प्रश्नः**— बुद्धिसम्बन्धे वेदान्तिनः किं कथयन्ति?

उत्तरम्—बुद्धिर्नाम निश्चयान्तःकरणवृत्तिः।

3. **प्रश्नः**— बुद्धिसम्बन्धे वेदान्तस्य को अभिप्रायः?

उत्तरम्—बुद्धिर्नाम धर्म्म।

4. **प्रश्नः**— सांख्यमते बुद्धिः इत्यस्यार्थः कः?

उत्तरम्—प्रकृतेः परिणामविशेषः।

5. **प्रश्नः**—नैयायिकाणां वैशेषिकाणां मते बुद्धिः का?

उत्तरम्—गुणविशेषो ज्ञानम्।

6. **प्रश्नः**— बुद्धिर्निराकारा अनित्या च इति केषामाशयः?

उत्तरम्—नैयायिकाणां वैशेषिकाणाञ्च।

7. **प्रश्नः**— बुद्धितत्त्वस्य सम्बन्धे किं कथितमस्ति?

उत्तरम्—भवति गुणत्रयतो धीर्विषयाध्यवसायरूपिणी चेह। सापि त्रिविधा गुणतः प्रोक्ता कर्मानुसारेण।

8. **प्रश्नः**— बुद्धेः कतिविधवृत्तिमत्त्वम्?

उत्तरम्—अष्टविधवृत्तिमत्त्वं बुद्धेः सूचितम्।

9. **प्रश्नः**— के सन्ति अष्टविधवृत्तिमत्त्वम्?

उत्तरम्—अध्यवसायो बुद्धिर्धर्मो ज्ञानं विरागमैश्वर्यम्। सात्विकमेतद्रूपं तामसमस्माद् विपर्यस्तम्।।

10. **प्रश्नः**—अहंकारस्य बाध्येऽपि कः तत्त्वं व्यवस्थितं भवति?

उत्तरम्—बुद्धितत्त्वम्।

11. **प्रश्नः**— तन्त्रशास्त्रानुसारं कति तत्त्वानि सन्ति?

उत्तरम्—36 षट्त्रिंशत्।

12. **प्रश्नः**— तन्त्रशास्त्रानुसारं 36 षट्त्रिंशत् तत्त्वानि कानि सन्ति?

उत्तरम्—1. शिवतत्त्व, 2. शक्तितत्त्व, 3. विद्यातत्त्व, 4. सदाशिव, 5. ईश्वर, 6. माया, 7. कला, 8. विद्या, 9. राग, 10. काल, 11. नियति, 12. पुरुष, 13. प्रकृति,

14. बुद्धि, 15. अहङ्कार, 16. मन, 17. त्वक्, 18. श्रोत्र, 19. चक्षु, 20. जिह्वा, 21. घ्राण, 22. वाक्, 23. पाणि, 24. पाद, 25. पायु, 26. उपस्थ, 27. शब्द, 28. स्पर्श, 29. रूप, 30. रस, 31. गन्ध, 32. आकाश, 33. वायु, 34. वह्नि, 35. सलिल, 36. भूमि।

13. **प्रश्नः**—आम्नायपरम्परया गुरुशिष्यमाध्यमेन प्राप्तत्वात्, लौकिक-पारलौकिकाभ्युदयप्रदायकत्वात् ज्ञान-रूपत्वाच्चैव आगमशब्दः एतादृशार्थरूपं गुरुशिष्य-परम्पराप्राप्तं शास्त्रं किम्?
उत्तरम्—तन्त्रशास्त्रम्।

14. **प्रश्नः**—आगमशास्त्रे बुद्धिस्वरूपविवेचनावसरे किं कथितमस्ति?
उत्तरम्—ज्ञानमेव बुद्धिः।

15. **प्रश्नः**—आत्मनो स्वरूपं किम्?
उत्तरम्—निर्गुणः निष्क्रियश्च।

16. **प्रश्नः**—सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम् इति बुद्धेर्लक्षणं कैः कथ्यते?
उत्तरम्—तर्कसंग्रहकार-अन्नम्भट्टपादैः।

17. **प्रश्नः**—भवति गुणत्रयतो धीर्विषयाध्यवसायरूपिणी चेह। सापि त्रिविधा गुणतः प्रोक्ता कर्मानुसारेण।। उक्त श्लोकः कस्मिन् सम्बन्धे उद्धृतः?
उत्तरम्—बुद्धितत्त्वस्य सम्बन्धे।

18. **प्रश्नः**—धर्मज्ञानवैराग्यैश्वर्याधर्माज्ञानावैराग्या-नैश्वर्यात्मनाऽष्टविधवृत्तिमत्त्वं कस्मिन् सम्बन्धे सूचितम्?
उत्तरम्—बुद्धेः सम्बन्धे।

19. **प्रश्नः**—अष्टविधवृत्तिमत्त्वं किम्?
उत्तरम्—अध्यवसाय-धर्म-ज्ञान-वैराग्य-ऐश्वर्य-सात्विकरूप-तामस-विपर्ययः।

20. **प्रश्नः**—अहंकारस्य बाधेऽपि बुद्धितत्त्वं व्यवस्थितम्। आदित्योदयसंकाशं बोधयन्तमिवाखिलम्।। इत्यनेन किं ज्ञायते?
उत्तरम्—अहंकारस्य बाधेऽपि बुद्धितत्त्वं व्यवस्थितं भवति।

21. **प्रश्नः**—स मे पिता, सा मे माता तद्गृहम् इत्यादयः ज्ञानं पूर्वानुभवजनितसंस्कारमात्रम् इत्यनेन किं उद्भवति?
उत्तरम्—सम्यगनुभव एव प्रमाणम्।

22. **प्रश्नः**—नदीनाञ्च यथा गङ्गा पर्वतानां हिमालयः। अश्वत्थः सर्ववृक्षाणां राज्ञामिन्द्रो यथा वरः।। देवीनाञ्च यथा दुर्गा वर्णानां ब्राह्मणो यथा। तथा समस्तशास्त्राणां तन्त्रशास्त्रमनुत्तमम्।। इति कुत्र निगदितम् ?
उत्तरम्—तन्त्रशास्त्रग्रन्थेषु निगदितम्।

23. **प्रश्नः**—परमेश्वरस्य हृदये विश्व-सृष्टेः इच्छा उत्पन्ने सति तयोः द्वयोः रूपयोः के स्तः?
उत्तरम्—1. शिवरूपम्, 2. शक्तिरूपञ्च।

24. **प्रश्नः**—शिवस्य किं रूपम्?
उत्तरम्—प्रकाशरूपम्।

25. **प्रश्नः**—शक्तेः किं रूपम्?
उत्तरम्—विमर्शरूपम्।

26. **प्रश्नः**—विमर्शस्य रूपं किम्?
उत्तरम्—विमर्शो नाम विश्वाकारेण विश्वप्रकाशेन विश्वसंहरणेन च अकृतिमाहमिति स्फुरणम्।

27. **प्रश्नः**—तन्त्रालोके तत्त्वशब्दस्यार्थः कः?
उत्तरम्—स्वस्मिन् कार्येऽथ धर्मार्थे यद्यपि स्वसदृगुणे। आस्ते सामान्यकल्पेन तननाद् व्याप्तृभावतः।।

28. **प्रश्नः**—प्रमायाः द्वे रूपे के भवतः?
उत्तरम्—1. अहमंशः, 2. इदमंशः।

29. **प्रश्नः**—अहमंशग्राहकः कः?
उत्तरम्—शिवः।

30. **प्रश्नः**—इदमंशग्राह्यो कः?
उत्तरम्—शक्तिः।

31. **प्रश्नः**—दर्पणाभावे मुखरूपस्य प्रत्यक्षो न भवति, तत्सदृशं विमर्शेन विना कस्य स्वरूपसम्पन्नो न भवति?
उत्तरम्—प्रकाशस्य।

32. **प्रश्नः**—शक्त्या विना शिवे कस्य ज्ञानं न भवति?
उत्तरम्—स्वप्रकाशरूपस्य।

33. **प्रश्नः**—शिवे चेतनतायाः ज्ञानं कस्य कारणाद् भवति?
उत्तरम्—शक्तेः।

34. **प्रश्नः**—शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्। न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि।। इति कुत्र केन च कथितमस्ति?
उत्तरम्—शंकराचार्येण सौन्दर्यलहरीनामकग्रन्थे।

35. **प्रश्नः**—शिवशक्त्योर्मध्ये को सम्बन्धः?
उत्तरम्—अभेदसम्बन्धः।

36. **प्रश्नः**— चन्द्रमा-चन्द्रिकयोः सदृशं कयोः द्वयोः नित्य-योगो वर्तते?
उत्तरम्— शिवशक्त्योः।

37. **प्रश्नः**— द्वयोः कस्मिन् रूपे सदा संयुक्तो वर्तते?
उत्तरम्—अद्वैतरूपे।

38. **प्रश्नः**—न शिवेन विना देवी न देव्या च विना शिवः। नान्योरन्तरं किंचित् चन्द्रचन्द्रिकयोरिव।। न शिवः शक्तिरहितो न शक्तिर्व्यतिरेकिणी। शिवः शक्तस्तथा भावान् इच्छया कर्तुमीहते।। शक्तिशक्तिमतोर्भेदः शैवे जातु न वर्ण्यते। इति कुत्र उद्धृतोऽस्ति?
उत्तरम्—सोमानन्दस्य शिवदृष्टिनामकग्रन्थे।

(ङ) अध्यासः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

अधि उपसर्गपूर्वकात् असु क्षेपणे इत्यस्माद् धातोः घञ् प्रत्यये कृते 'अध्यास'शब्दः निष्पन्नो भवति। अतोऽस्य पर्यवसितोऽर्थः विक्षेप इति। अविद्यया एव अध्यासः भवति। विक्षिप्तज्ञानमेवाध्यस्तज्ञानमित्युच्यते। चेतनायाः ज्ञानस्य वा विक्षेपरूपाध्यासः मिथ्याप्रत्ययस्य नाम अस्ति। वस्तुन्यवस्तुनः प्रतीतिरेवाध्यासः। शारीरकभाष्ये कोऽयमध्यासो नामेत्याक्षिप्य ज्ञानस्य विषयस्य च अध्यासः प्रतिपाद्यते। श्रीशङ्कराचार्य-वचोऽपि अध्यासो नाम अतस्मिंस्तद्बुद्धिरिति। अतः मिथ्याप्रतीतिरेवाध्यासः।

अध्यासादेव ब्रह्मरूपवस्तुनि जगदूपावस्तुनः भ्रान्तिः उत्पद्यते, एवं ज्ञानानन्तरं सा निवर्तते। यथा शुक्तौ रजतस्य रज्जौ सर्पस्य च आरोपः अध्यारोपः। रज्जुदर्शनप्रत्यक्षात् अज्ञाननिवृत्तौ तन्निवृत्तिः, अत एव भगवत्पादवाक्येन अध्यास एव अविद्येति।

आत्मानात्मनोः तादात्म्याध्यासादेव अहं सुखी, अहं दुःखी, पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः इति व्यवहाराः सिद्ध्यन्ति। अर्थाध्यासस्यानिवृत्तिः दोषनिवृत्त्यनन्तरं भवति ज्ञानाध्यासनिवृत्तिश्च ब्रह्मज्ञानाद्। विद्यारण्यस्वामिना वाक्यमपि भवति–

अविद्यावृत्तकूटस्थे देहद्वययुता चितिः।
शुक्तौ रूप्यवदध्यस्था विक्षेपाध्यास एव हि।।
(पञ्चदशी-6/33)

आवरणशक्तिः–आवरणशक्तिस्तावदल्पोऽपि मेघोऽनेकयोजनायतमादित्यमण्डलमवलोकयितृनयन-पथविधायकतया यथाच्छादयतीव तथाऽज्ञानं परिच्छिन्न-मप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धि-विधायकतयाच्छादयतीव तादृशं सामर्थ्यम्। सच्चिदानन्दस्वरूपमावृणोत्यावरणशक्तिः।

विक्षेपशक्तिः–विक्षेपशक्तिस्तु तथा रज्ज्वज्ञानं स्वावृत्तरज्जौ स्वशक्त्या सर्पादिकमुद्भावयत्येवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्त्याकाशादिप्रपञ्चादिमुद्भावयति तादृशं सामर्थ्यम्। तदुक्तम्–

विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेदिति।

वेदान्तदर्शने सत्तायाः त्रिविधत्वं मतं; तदित्थम्–1. प्रातिभासिकी सत्ता, 2. व्यावहारिकी सत्ता, 3. पारमार्थिकी सत्ता। 'ब्रह्म' पारमार्थिकी सत्तास्ति। वेदान्ते 'अध्यासः' किं वा 'अध्यारोप' इत्युच्यते। गौडपादाचार्यः माण्डूक्यकारिका-यामुक्तं यद् अध्यासो नाम संवृत्तिः। यथा–

अन्तःस्थानात्तु भेदानां तस्माज्जागरिते स्मृतम्।
यथा तत्र तथा स्वप्ने संवृतत्त्वेन भिद्यते।।
(मा०का०2/4)

शाङ्करभाष्यानुसारमस्यायमाशयो यत् जाग्रदवस्थायां दृश्यमानानि सर्वाणि वस्तूनि मिथ्यापरकाणि तथा भवन्ति, यथा स्वप्नावस्थायां दृश्यमानानि द्रव्याणि। तदेव गौड-पादेनोक्तम्–

स्वप्नभावे यथा दृष्टे गन्धर्वनगरं यथा।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः।।
(मा०का०2/31)

अध्यासभेदः–माधवाचार्यः सर्वदर्शनसंग्रहे अध्यासस्य द्वौ भेदौ प्रस्तावयामास। 1. अर्थाध्यासः, 2. ज्ञानाध्यासः। इन्द्रियादिप्रमाणदोषैः अन्यवस्तूनि अन्यरूपतायाः प्रतिभासो-ऽर्थाध्यास इत्युच्यते। अनादिवासनाया निष्पन्नोऽध्यासः

ज्ञानाध्यास इत्युच्यते। अद्वैतवेदान्ते-'जीवस्वरूपमेव अध्यासः'। वल्लभाचार्यमतानुसारम्-'अन्तःकरणादिषु आत्मबुद्धिरेवाध्यासः।

(ङ) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—अध्यासः केन भवति?
उत्तरम्— अविद्यया।
2. **प्रश्नः**—अध्यासस्य पर्यवसितोऽर्थः किम्?
उत्तरम्— विक्षेपः।
3. **प्रश्नः**—अध्यासस्य किं लक्षणम्?
उत्तरम्— विक्षिप्तज्ञानं, मिथ्याप्रतीतिरेवाध्यासः।
4. **प्रश्नः**—शुक्तौ रजतस्य रज्जौ सर्पस्य च आरोपः कस्य उदाहरणम्?
उत्तरम्— अध्यारोपस्य।
5. **प्रश्नः**—अर्थाध्यासस्य निवृत्तिः कथं भवति?
उत्तरम्— दोषनिवृत्त्यनन्तरम्।
6. **प्रश्नः**— ज्ञानाध्यासनिवृत्तिः कस्मात् भवति?
उत्तरम्— ब्रह्मज्ञानात्।
7. **प्रश्नः**—आवरणशक्तेः किं लक्षणम्?
उत्तरम्— सच्चिदानन्दस्वरूपमावृणोत्यावरणशक्तिः।
8. **प्रश्नः**—विक्षेपशक्तेः किं लक्षणम्?
उत्तरम्— विक्षेपशक्त्याकाशादिप्रपञ्चमुद्भावयति।
9. **प्रश्नः**—वेदान्तदर्शने सत्तायाः त्रिविधत्वं किम्?
उत्तरम्— 1. प्रातिभासिकी सत्ता, 2. व्यावहारिकी सत्ता, 3. पारमार्थिकी सत्ता।
10. **प्रश्नः**—पारमार्थिकी सत्ता का अस्ति?
उत्तरम्— ब्रह्म।
11. **प्रश्नः**—गौडपादाचार्यः माण्डूक्यकारिकायां अध्यासो किं नाम अध्यारोपः?
उत्तरम्— संवृत्तिः।
12. **प्रश्नः**—शाङ्करभाष्यानुसारं जाग्रदवस्थायां दृश्यमानानि सर्वाणि वस्तूनि मिथ्यापरकाणि कदा भवन्ति?
उत्तरम्— यथा स्वप्नावस्थायां दृश्यमानानि द्रव्याणि।
13. **प्रश्नः**—माधवाचार्यः सर्वदर्शनसंग्रहे अध्यासस्य कौ द्वौ भेदौ प्रस्तावयामास?
उत्तरम्— 1. अर्थाध्यासः, 2. ज्ञानाध्यासः।
14. **प्रश्नः**—अर्थाध्यासस्य किं लक्षणम्?
उत्तरम्— इन्द्रियादिप्रमाणदोषैः अन्यवस्तूनि अन्यरूपतायाः प्रतिभासः।
15. **प्रश्नः**—ज्ञानाध्यासस्य किं लक्षणम्?
उत्तरम्—अनादिवासनया निष्पन्नोऽध्यासः ज्ञानाध्यासः।
16. **प्रश्नः**—अद्वैतवेदान्ते जीवस्वरूपं किम्?
उत्तरम्— अध्यासः।
17. **प्रश्नः**—वल्लभाचार्यमतानुसारेण अध्यासः कः?
उत्तरम्— अन्तःकरणादिषु आत्मबुद्धिरेवाध्यासः।

(च) मन्त्ररहस्यम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

आध्यात्मस्य क्षेत्रः अतिविस्तृतः वर्तते। मन्त्रस्य ध्वनिभिः घनिष्ठ-सम्बन्धः वर्तते। कथ्यते यथा मन्त्र-विज्ञान एव ध्वनि-विज्ञानः विद्यते। एवं मन्त्रस्य परिभाषा भवति-**कोऽपि विशिष्ट-ध्वनि-समूहस्य उच्चारणमेव मन्त्रः विभिन्न-ध्वनीनां एक निश्चितसमूहे मन्त्रः** इति। विश्व-साहित्ये मन्त्राणां अनेकरूपाकारः प्राप्यन्ते। तस्य महत्वपूर्णं कारणं वर्तते संस्कृतिषु आध्यात्मिक-शक्तीनामस्तित्वस्य स्वीकृतिकरणम्। स्व-प्रभावजन्य-व्यापकतायाः कारणं 'मन्त्रः' अनेकार्थीरूपे प्रचलितोऽस्ति। धर्म-ग्रन्थेषु 'मन्त्र'शब्दस्य विवेचना इत्थं वर्तते। तन्त्रागमस्य विशालसाहित्यस्य रहस्यमयी साधनाविधि एव मन्त्रयोगः।

मननात् त्रायत इति मन्त्रः, मननत्राणधर्माणो मन्त्राः 1. चित्तस्य एकाग्रता चिन्तन-प्रक्रियायाश्च ध्वन्यात्मकरूपमेव मन्त्रः। 2. देवतायाः सूक्ष्म-शरीरस्य नाम मन्त्रोऽस्ति। 3. इष्टदेवस्य कृपायाः अपररूपमेव मन्त्रः। 4. शिव-शक्ति-आत्मायाः एकीकरणचिन्तनमेव मन्त्रः। 5. ज्ञानस्य बोधः एवं आत्मशक्तेः उद्भवविद्या एव मन्त्रः। 6. ज्ञानस्य बोधः एवं आत्मशक्तेः उद्भव-कारिणी-विद्या मन्त्रमिति कथ्यते। पिङ्गलामते मन्त्रशब्दस्य व्युत्पत्तिः-

मननं विश्वविज्ञानं त्राणं संसारबन्धनात्।
यतः करोति संसिद्धौ मन्त्र इत्युच्यते ततः।।

मन्त्रस्य स्वरूपविषये महार्थमञ्जरीग्रन्थे कथितमस्ति यत्-

मननमयी निजविभवे निजसंकोचभये त्राणमयी।
कवलितविश्वविकल्पा अनुभूतिः कापि मन्त्र-शब्दार्थः।

शारदातिलकतन्त्रे मन्त्रस्य स्वरूपविषये प्रतिपादितमस्ति-

पुंस्त्रीनपुंसकात्मनो मन्त्राः सर्वे समीरिताः।
मन्त्राः पुंदेवता ज्ञेया विद्या स्त्रीदेवता स्मृता।।

वर्णमालायाः 'अ'तः 'क्ष'पर्यन्तं पञ्चाशत् अक्षराणि 'मातृका' इति कथ्यते। परशुरामकल्पसूत्रे ज्ञायते-**मन्त्राणाम्-चिन्त्यशक्तिता अचिन्त्यो हि मणिमन्त्रौषधिप्रभावः।** समस्त-मन्त्रः साक्षात् शिव-शक्ति-स्वरूपोऽस्ति। अयं सिद्धान्तः भगवान् शंकरः पार्वत्या कथयति-

सर्वे वर्णात्मका मन्त्रास्ते च शक्त्यात्मकाः प्रिये।
शक्तिस्तु मातृका ज्ञेया सा च ज्ञेया शिवात्मिका।।

चतुष्प्रकारकाः मन्त्राः नित्यातन्त्रे वर्णितास्ति-

मन्त्राः एकाक्षराः पिण्डाः कर्तर्यो द्व्यक्षरा मताः।
वर्णत्रयं समारभ्य नवार्णावधिबीजकाः।।
ततो दशार्णमारभ्य यावद्विंशतिमन्त्रकाः।
अत ऊर्ध्वं गता मालास्तासु भेदो न विद्यते।।

तन्त्रशास्त्रे परमशिवः स्व-अनुग्रहेण मल-पक्व-जीवान् 'विद्येश्वर' पदं प्रदीयते, विद्येश्वराः अष्ट-संख्यकाः मन्यन्ते। यथा-1. अनन्तः, 2. सूक्ष्मः, 3. शिवोत्तमः, 4. एकनेत्रं, 5. एकरुद्रः, 6. त्रिमूर्तिः, 7. श्रीकण्ठः, 8. शिखण्डी। अपक्वमलयुक्ताविज्ञानाकलजीवान् दयामय-शिवः मन्त्रस्य स्वरूपं ददाति।

शैवदर्शने विवेचितमस्ति यत् शिव-शक्तिसमन्वित-रूपायाः ज्ञानम्, मन्त्रस्य उद्दिष्टदेवतायाः अवबोधनम्, गुरुकृपया एव संसिद्धिः भवति। **गुरोस्तु मौनव्याख्यानं शिष्यास्तु छिन्नसंशयाः।** अत्र गुरुशब्देन अन्तर्गुरु अन्तर्यामी वा इति ज्ञायते। कथ्यते यथा-

न शिवेन विना शक्तिर्न शक्तिरहितः शिवः।
गुरुं न मर्त्यं बुध्येत यदि बुध्येत तस्य तु।
कदापि न भवेत् सिद्धिर्न मन्त्रैर्देवपूजनैरिति।।
यस्य यस्य तु मन्त्रस्य उद्दिष्टा देवता तु या।
तदाकारं भवेत्तस्य देवत्वं देवतोच्यते।।

सर्वसिद्धिसमन्वितेति-गौरीविशेषणम्; तेन सर्वसिद्धि-गौरीति शक्तिनाम। अपेक्षितार्थद्योतनिकाकाग[illegible]: तथैवोक्तं:-

महाकालीसरस्वत्यौ सर्वसिद्धिसमन्विता।
गौरी त्रैलोक्यविद्या च मन्त्रसिद्धिस्ततः परम्।।
(श्रीशारदाति०2/39)

गौरीप्रश्ने शिवस्योत्तरं यथा-

कलौ तन्त्रादिता मन्त्राः सिद्धास्तूर्णफलप्रदाः।
शस्ताः कर्म्मसु सर्वेषु जपयज्ञक्रियादिषु।।
(महानि०14)

मन्त्ररहस्यावबोधनाय सूक्ष्म-प्रकृति-प्रवृत्ति-इत्यादीनां गत्यनुसारं नाममयशब्दस्य भावमयरूपस्य च अवलम्बनेन योगसाधनक्रमे 'मन्त्रयोगः' क्रियते। मन्त्रयोगसाधनायाः षोडश-मुख्य-अङ्गानि निम्नलिखितानि सन्ति-1. भक्तिः, 2. शुद्धिः, 3. आसनं, 4. पञ्चाङ्गसेवनम्, 5. आचारः, 6. धारणा, 7. दिव्यदेशसेवनम्, 8. प्राणक्रिया, 9. मुद्रा, 10. तर्पणं, 11. हवनं, 12. बलिः, 13. यागः, 14. जपं, 15. ध्यानं, 16. समाधिश्च। मन्त्रयोगे इत्थं महाभावसमाधिः इति कथ्यन्ते। परमशिवप्रोक्तं तन्त्र-आगमस्य साधनाविधौ नाम **मन्त्रयोगः** वर्तते। शिवप्रोक्तभूते सति **आगमाः प्रमाणम्** इति कथ्यते।

वैदिकक्रियासु विनियुज्यमानो नियततया अविपर्यस्ततया च उच्चारणीयो पदसमूहो मन्त्रः। निरुक्तकारो यास्कः मननात् इति मन् धातोः मन्त्रशब्दं निरुवाच। पांचरात्रसंहितासु मननेन त्राणकरत्वात् अभिलषितमतस्य लोकरूपदाहकत्वाच्च मन्त्रशब्दो निरूच्येत; तथाहि-मननान्मुनिशार्दूल त्राणं कुर्वन्ति वै यतः। ददते परमात्मीयं तस्मान्मन्त्राः प्रकीर्तिताः। मन्त्रस्य सन्दर्भे ईश्वरसंहितायां कथितमस्ति यत् वाच्यं मन्त्रं प्रतिष्ठितम्। यथा-

वाचि मन्त्राः स्थिताः सर्वे वाच्यं मन्त्रं प्रतिष्ठितम्।
मन्त्ररूपात्मकं विश्वं सवाह्याभ्यन्तरं ततः।।

जैमिनीयन्यायमालायां त्रिविधा मन्त्रप्रकारकाः वर्णिताः विद्यन्ते। त्रिविधाः मन्त्राः इत्थं भवन्ति-

1. कारणमन्त्राः-यं मन्त्रं पूर्वमुच्चार्य मन्त्रान्ते कर्म क्रियते ते करणमन्त्राः।

2. क्रियमाणानुवादिनः-क्रियाविधानसमये एव ये मन्त्राः पठ्यन्ते ते क्रियमाणानुवादिनो मन्त्राः।

3. जपमन्त्राः-अदृष्टार्थे कर्मकाले पठनीया मन्त्राः

जपमन्त्राः। याज्ञिकानां मन्त्रशब्दसमाख्याधिकरणत्वं मीमांसाशास्त्रे मन्त्रसम्बन्धे वर्णनं वर्तते। वास्तुतत्त्वे अपि मन्त्रसम्बन्धे चर्चा प्राप्यते। यथा–

ॐकारादिसमायुक्तं नमस्कारान्तकीर्तितम्।
स्वनाम सर्वसत्त्वानां मन्त्र इत्यभिधीयते।।

ज्ञानसङ्कलिनीतन्त्रे विमलानन्दद्वारा उद्धृत–अ ऊ मन्त्र ॐ प्रणवो भवति। तत्र 'अकारः' सात्विकः, 'ऊकारः' राजसः, 'मकारः' तामसः एवं तर्हि मूलप्रकृतिः प्रणवः अस्ति। यथोच्यते–

अकारः सात्त्विको ज्ञेयः उकारो राजसः स्मृतः।
मकारस्तामसः प्रोक्तस्त्रिभिः प्रकृतिरुच्यते।।
(ज्ञान०सं०त०)

मन्त्रस्य पञ्च-प्रकारकस्य तनु भवति। प्रणववेद-चतुष्कात्मनं पंचात्मकमन्त्रतनुरिति। शिवः पञ्चमन्त्रतनुः वर्तते। ईशानमन्त्रः तस्य मस्तकम्, तत्पुरुषः तस्य मुखम्, घोरः तस्य हृदयम्, वामदेवः तस्य गुह्य-अङ्गम्, सद्योजातः तस्य पादः, एवं पशूनां पाशक्षेपणाय ध्यानयोगाय शिवः शरीर-धारणं करोति। ईशानादि शक्ति-निर्मितं इदं शरीरं 'शाक्त'मिति कथ्यते। तदुक्तं लैंगादौ–

ओंकाररूपमृग्वक्त्रं समा जिह्वासमन्वितम्।
यजुर्वेदमहाग्रीवमथर्वोष्ठमजं विभुम्।।

आगमशास्त्रस्य ग्रन्थे परमेश्वरः मन्त्रसम्बन्धे शरीरेन्द्रिययोगः श्रावयितुमाह–

पंचमन्त्रतनुः श्रीमान् सकलं परिपठ्यते।
योग योगीश्वरः स्वामी स्वतंत्रः पशुपाशहा।।
ईशानमूर्ध वामगुह्योऽयं सद्योमूर्तिमहेश्वरः।
एवं मन्त्रास्तु पञ्चैते यैर्निबद्धा तनुः शिवा।

मन्त्राणां दशसंस्काराः–

मन्त्राणां दश संस्काराः कथ्यते सिद्धिदायिनः।
जननं जीवनं पश्चात्ताडनं बोधनं तथा।।
(श्रीशारदाति०2/112)

तन्त्रान्तरेषु मन्त्रसिद्धौ त्रीणि लक्षणानि प्रतिपादितानि सन्ति–1. उत्तम-मनोरथानामक्लेशः सिद्धेरुत्तमलक्षणम्। 2. मध्यम-ख्यातिर्वाहनभूषादिलाभायुचिरजीवनम्। 3. अधम-ख्यातिर्वाहनभूषादिलाभः एवं धनपुत्रादिलोकैश्वर्यस्य प्राप्तिः इति। मन्त्रस्य अन्यतत्त्वानि–1. ऋषिः, 2. देवता, 3. छन्दः, 4. बीजम्, 5. शक्तिः, 6. विनियोगः, 7. न्यासः, 8. अङ्गन्यासः, 9. पंचाङ्गन्यासः, 10. षडङ्गन्यासः।

(च) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—मन्त्रस्य कतिप्रकारकस्य तनु वर्तते?
उत्तरम्—पञ्चप्रकारकस्य।

2. **प्रश्नः**—आगमशास्त्रे मन्त्रस्य का परिभाषा?
उत्तरम्—कोऽपि विशिष्ट-ध्वनि-समूहस्य उच्चारणमेव मन्त्रः विभिन्न-ध्वनीनां एकः निश्चितसमूहः मन्त्रः।

3. **प्रश्नः**—मन्त्रशब्दस्य का व्युत्पत्तिः?
उत्तरम्—मननात् त्रायत इति मन्त्रः, मननत्राणधर्माणो मन्त्राः।

4. **प्रश्नः**—त्रिविधा मन्त्रप्रकारकाः के सन्ति?
उत्तरम्—1. कारणमन्त्राः, 2. क्रियमाणानुवादिनः, 3. जपमन्त्राः।

5. **प्रश्नः**—कारणमन्त्रस्य का परिभाषा?
उत्तरम्—यं मन्त्रं पूर्वमुच्चार्य मन्त्रान्ते कर्म क्रियते ते करणमन्त्राः।

6. **प्रश्नः**—क्रियमाणानुवादिनः का परिभाषा?
उत्तरम्—क्रियाविधानसमये एव ये मन्त्राः पठ्यन्ते ते क्रियमाणानुवादिनो मन्त्राः।

7. **प्रश्नः**—जपमन्त्रस्य का परिभाषा?
उत्तरम्—अदृष्टार्थे कर्मकाले पठनीया मन्त्राः जपमन्त्रा।

8. **प्रश्नः**— मन्त्राः कतिजातीयाः भवन्ति?
उत्तरम्—तिस्रो जातीयाः, पुंस्त्रीनपुंसकात्मनो मन्त्राः। मन्त्राः पुंदेवता ज्ञेया विद्या स्त्रीदेवता स्मृता।।

9. **प्रश्नः**—एकाक्षरमन्त्रस्य का संज्ञा?
उत्तरम्—पिण्डः।

10. **प्रश्नः**—द्व्यक्षरमन्त्रस्य का संज्ञा?
उत्तरम्— कर्तरी।

11. **प्रश्नः**—वर्णत्रयं समारभ्य नवार्णावधिमन्त्राणां का संज्ञा?
उत्तरम्—बीजः।

12. **प्रश्नः**—दशार्णमारभ्य यावद्विंशतिमन्त्राणां का संज्ञा?
उत्तरम्—मन्त्रकाः।

13. **प्रश्नः**— विंशत्यधिकाक्षरमन्त्राणां का संज्ञा?
उत्तरम्—माला।

14. **प्रश्नः**—मन्त्रस्य केन सह घनिष्ठ-सम्बन्धः वर्तते?
उत्तरम्—ध्वनिभिः।

15. **प्रश्नः**—तन्त्रागमस्य विशालसाहित्यस्य रहस्यमयी साधनाविधिः का?
उत्तरम्—मन्त्रयोगः।

16. **प्रश्नः**—चित्तस्य एकाग्रता चिन्तन-प्रक्रियायाश्च ध्वन्यात्मकं रूपं किम्?
उत्तरम्—मन्त्रः।

17. **प्रश्नः**—देवतायाः सूक्ष्म-शरीरस्य किं नाम?
उत्तरम्—मन्त्रः।

18. **प्रश्नः**—इष्टदेवस्य कृपायाः अपररूपं किम्?
उत्तरम्—मन्त्रः।

19. **प्रश्नः**— शिव-शक्ति-आत्मायाः एकीकरणचिन्तनं किं भवति?
उत्तरम्—मन्त्रः।

20. **प्रश्नः**—ज्ञानस्य बोधः एवं आत्मशक्तेः उद्भवा विद्या केन प्राप्यते?
उत्तरम्—मन्त्रेण।

21. **प्रश्नः**—ज्ञानस्य बोधः एवं आत्मशक्तेः उद्भव-कारिणी-विद्यां किं कथ्यते?
उत्तरम्—मन्त्रम्।

22. **प्रश्नः**—मन्त्रस्य स्वरूपविषये महार्थमञ्जरीग्रन्थे किं कथितमस्ति?
उत्तरम्—मननमयी निजविभवे निजसंकोचभये त्राणमयी। कवलितविश्वविकल्पा अनुभूतिः कापि मन्त्र शब्दार्थः।

23. **प्रश्नः**—शारदातिलकतन्त्रे मन्त्रस्य स्वरूपविषये किं प्रतिपादितमस्ति?
उत्तरम्—पुंस्त्रीनपुंसकात्मनो मन्त्राः सर्वे समीरिताः। मन्त्राः पुंदेवता ज्ञेया विद्या स्त्रीदेवता स्मृता।।

24. **प्रश्नः**—वर्णमालायाः 'अ'तः 'क्ष'पर्यन्तं पञ्चाशत् अक्षराणां किं नाम?
उत्तरम्—मातृका।

25. **प्रश्नः**—"मन्त्राणाम्-चिन्त्यशक्तिता" "अचिन्त्यो हि मणिमन्त्रौषधिप्रभावः।" इति कुत्र ज्ञायते?
उत्तरम्—परशुरामकल्पसूत्रे।

26. **प्रश्नः**—समस्त-मन्त्राः साक्षात् कयोः स्वरूपमस्ति?
उत्तरम्—शिव-शक्त्योः।

27. **प्रश्नः**—सर्वे वर्णात्मका मन्त्रास्ते च शक्त्यात्मकाः प्रिये। शक्तिस्तु मातृका ज्ञेया सा च ज्ञेया शिवात्मिका।। अयं सिद्धान्तः कस्य कस्मै?
उत्तरम्—भगवतः शंकरस्य पार्वत्यै।

28. **प्रश्नः**—नित्यातन्त्रे चतुष्प्रकारकाः मन्त्राः के सन्ति?
उत्तरम्—मन्त्राः एकाक्षराः पिण्डाः कर्तर्यो द्व्यक्षरा मताः। वर्णत्रयं समारभ्य नवार्णावधि बीजकाः।। ततो दशार्णमारभ्य यावद्विंशतिमन्त्रकाः। अत ऊर्ध्वं गता मालास्तासु भेदो न विद्यते।।

29. **प्रश्नः**—तन्त्रशास्त्रे परमशिवः स्व-अनुग्रहेण मल-पक्व-जीवान् किं पदं प्रदीयते?
उत्तरम्—'विद्येश्वर' पदम्।

30. **प्रश्नः**—विद्येश्वराः अष्ट-संख्यकाः के सन्ति?
उत्तरम्—1. अनन्तः, 2. सूक्ष्मः, 3. शिवोत्तमः, 4. एकनेत्रं, 5. एकरुद्रः, 6. त्रिमूर्तिः, 7. श्रीकण्ठः, 8. शिखण्डी।

31. **प्रश्नः**—अपक्वमलयुक्ताविज्ञानाकलजीवानां दयामय-शिवः किं स्वरूपं ददाति?
उत्तरम्—मन्त्रस्य स्वरूपम्।

32. **प्रश्नः**—शिव-शक्तिसमन्वितरूपायाः ज्ञानम्, मन्त्रस्य उद्दिष्टदेवतायाः अवबोधनम्, गुरुकृपया एव संसिद्धिः इति कुत्र विवेचितमस्ति?
उत्तरम्—शैवदर्शने।

33. **प्रश्नः**—गुरोस्तु मौनव्याख्यानं शिष्यास्तु छिन्नसंशयाः। अत्र गुरुशब्देन किं अभिप्रेतम्?
उत्तरम्—अन्तर्गुरु अन्तर्यामी वा।

34. **प्रश्नः**—सर्वसिद्धिसमन्वितेति गौरीविशेषणम् तेन सर्वसिद्धिगौरीति कस्य नाम?
उत्तरम्—शक्तेर्नाम।

35. **प्रश्नः**—महाकालीसरस्वत्यौ सर्वसिद्धिसमन्विता। गौरी त्रैलोक्यविद्या च मन्त्रसिद्धिस्ततः परम्।। इति कुतः उद्धृतः?
उत्तरम्—श्रीशारदातिलकग्रन्थतः।

36. **प्रश्नः**—कलौ तन्त्रादिता मन्त्राः सिद्धास्तूर्णफलप्रदाः। शस्ताः कर्म्मसु सर्वेषु जपयज्ञक्रियादिषु।। गौरीप्रश्ने शिवस्योत्तरं कस्मिन् ग्रन्थात् उद्धृतः?
उत्तरम्—महानिर्वाणतन्त्रग्रन्थात्।

37. **प्रश्नः**—मन्त्ररहस्यावबोधनाय सूक्ष्म-प्रकृति-प्रवृत्ति-इत्यादीनां गत्यनुसारं नाममयशब्दस्य भावमयरूपस्य च अवलम्बनेन योगसाधनक्रमे किं क्रियते?
उत्तरम्—मन्त्रयोगः।

38. **प्रश्नः**—मन्त्रयोगसाधनायाः षोडश-मुख्य-अङ्गानि कानि सन्ति?
उत्तरम्—1. भक्तिः, 2. शुद्धिः, 3. आसनं, 4. पञ्चाङ्गसेवनम्, 5. आचारः, 6. धारणा, 7. दिव्यदेशसेवनम्, 8. प्राणक्रिया, 9. मुद्रा, 10. तर्पणं, 11. हवनं, 12. बलिः, 13. यागः, 14. जपं, 15. ध्यानं, 16. समाधिश्च।

39. **प्रश्नः**—परमशिवप्रोक्तं तन्त्र-आगमस्य साधनविधौ किं नाम?
उत्तरम्—मन्त्रयोगः।

40. **प्रश्नः**—मन्त्रस्य सन्दर्भे ईश्वरसंहितायां किं कथितमस्ति?
उत्तरम्—वाचि मन्त्राः स्थिताः सर्वे वाच्यं मन्त्रं प्रतिष्ठितम्। मन्त्ररूपात्मकं विश्वं सवाह्याभ्यन्तरं ततः।।

41. **प्रश्नः**—जैमिनीन्यायमालायां कतिधा मन्त्रप्रकारकाः सन्ति?
उत्तरम्—त्रिविधा।

42. **प्रश्नः**—वास्तुतत्वे मन्त्रसम्बन्धे का चर्चा विहिता?
उत्तरम्—ॐकारादिसमायुक्तं नमस्कारान्तकीर्तितम्। स्वनाम सर्वसत्त्वानां मन्त्र इत्यभिधीयते।।

43. **प्रश्नः**—ज्ञानसङ्कलिनीतन्त्रे विमलानन्दद्वारा उद्धृतप्रणवस्य किं रूपम्?
उत्तरम्—अ ऊ म = ॐ प्रणवो भवति।

44. **प्रश्नः**—प्रणवे सात्त्विकः वर्णः कः?
उत्तरम्—अकारः।

45. **प्रश्नः**—प्रणवे राजसः वर्णः कः?
उत्तरम्—ऊकारः।

46. **प्रश्नः**—प्रणवे तामसः वर्णः कः?
उत्तरम्—मकारः।

47. **प्रश्नः**—ईशानमन्त्रः कस्य मस्तकम्?
उत्तरम्—शिवस्य।

48. **प्रश्नः**—तत्पुरुषः कस्य मुखम्?
उत्तरम्—शंकरस्य।

49. **प्रश्नः**—शिवस्य हृदयः कः?
उत्तरम्—घोरः।

50. **प्रश्नः**—शिवस्य गुह्य-अङ्गं कोऽस्ति?
उत्तरम्—वामदेवः।

51. **प्रश्नः**—शिवस्य पादः कोऽस्ति?
उत्तरम्—सद्योजातः।

52. **प्रश्नः**—पशूनां पाशक्षेपणाय ध्योनयोगाय शिवः किं धारणं करोति?
उत्तरम्—शरीरम्।

53. **प्रश्नः**—ईशानादि शक्ति-निर्मितं इदं शरीरं किं कथ्यते?
उत्तरम्—शाक्तम्।

54. **प्रश्नः**—पंचमन्त्रतनुः श्रीमान् सकलं परिपठ्यते। योग योगीश्वरः स्वामी स्वतंत्रः पशुपाशहा।। ईशानमूर्धा वामगुह्योऽयं सद्योमूर्तिर्महेश्वरः। एवं मन्त्रास्तु पञ्चैते यैर्निबद्धा तनुः शिवा। अनेन श्लोकेन किं ज्ञायते?
उत्तरम्—आगमशास्त्रस्य ग्रन्थे परमेश्वरेण मन्त्रसम्बन्धे शरीरेन्द्रिययोगः श्रावणम्।

55. **प्रश्नः**—श्रीशारदातिलके मन्त्राणां दशसंस्कारात्मक-श्लोकः कः?
उत्तरम्—मन्त्राणां दश संस्काराः कथ्यते सिद्धिदायिनः। जननं जीवनं पश्चात्ताडनं बोधनं तथा।।

56. **प्रश्नः**—मन्त्रसिद्धौ त्रीणि लक्षणानि कानि प्रतिपादितानि सन्ति?
उत्तरम्—1. उत्तम-मनोरथानामक्लेशः सिद्धेरुत्तम-लक्षणम्। 2. मध्यम-ख्यातिर्वाहनभूषादिलाभः चिरजीवनम्। 3. अधम-ख्यातिर्वाहनभूषादिलाभः एवं धनपुत्रादिलोकैश्वर्यस्य प्राप्तिः इति।

57. **प्रश्नः**—मन्त्रस्य अन्यतत्त्वानि कानि सन्ति?
उत्तरम्—1. ऋषिः, 2. देवता, 3. छन्दः, 4. बीजम्, 5. शक्तिः, 6. विनियोगः, 7. न्यासः, 8. अङ्गन्यासः, 9. पंचाङ्गन्यासः, 10. षडङ्गन्यासः।

(छ) आगमोपयोगिता एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

अभ्युदयसमाजपोषणनियमविशेषज्ञापकत्वे सति आगमतत्त्वस्य ज्ञापकत्वमनुशासकत्वं साक्षात्पारम्पर्येणाविच्छिन्नं वा उपदेशत्वमागमत्वम् इति पर्यवस्यति। अनया व्युत्पत्या गतिशब्दस्योभयोरर्थयोः समाहाररूप एव आगमशब्दः आम्नायपरम्परया गुरुशिष्यमाध्यमेन प्राप्तत्वात्, लौकिक-पारलौकिकाभ्युदयप्रदायकत्वात् ज्ञानरूपत्वाच्च एतादृशार्थरूपगुरुशिष्यपरम्पराप्राप्ततन्त्रशास्त्रेषु एव रूढः दृश्यते। अभ्युदयनिःश्रेयससाधकज्ञानाधिकरणं तादृशज्ञान-साक्षात्कृतधर्माण एव। ततः प्राप्तः साक्षात्पारम्पर्येण वाऽविच्छिन्नोपदेश एव तत्प्रकारकज्ञानोपलब्धिसाधनम्। भर्तृहरिस्तावत् महाभाष्ये विद्यमानं **रक्षोहागमलघ्वसन्देहाः** इति व्याकरणाध्ययनप्रयोजनेष्वन्यतमं प्रयोजनम् आगमम् व्याकुर्वन् 'पारम्पर्येणाविच्छिन्न उपदेश आगमः श्रुतिलक्षणः स्मृतिलक्षणश्च सः' इति कथितवान्। उक्तं यथा वाक्यपदीयग्रन्थे–

चैतन्यमिव यश्चायमविच्छेदेन वर्तते।
आगमस्तमुपासीनो हेतुवादैर्न बाध्यते।।
(वाक्यपदीयम्-4)

आगच्छन्ति बुद्धिमारोहयन्ति यस्मात् अभ्युदयनिःश्रेयसोपायाः स आगमः। सार्ववर्णिकशास्त्ररूपो ह्यागमशास्त्रस्य लोकप्रियतायाः प्रधानहेतुः वर्तते। तन्त्रविज्ञानस्य मार्गः प्रत्येकजनेभ्यः वर्तन्ते। तन्त्रः आध्यात्मिकजगतः व्यावहारिकविज्ञानम्। आगमः पञ्चमो वेदः कौलस्तु पञ्चमाश्रमः (निरुक्त-64)। श्रुतिश्च द्विविधा वैदिकी तान्त्रिकी च (मनुस्मृति-2/1)। तन्त्रशब्दोऽपि आगमार्थस्य वाचकोऽस्ति। अथर्ववेदस्य सौभाग्यकाण्डादेव तन्त्राणां प्रवर्तनम्। एवं हि तन्त्रस्यार्थगतव्यापकता शास्त्रगतबहुलताऽद्य सर्वव्यापिनीति। यस्यार्थः भवति–

तनोति विपुलानर्थांस्तत्त्वमन्त्रसमाश्रितान्।
त्राणं च कुरुते पुंसां तेन तन्त्रमिति स्मृतम्।।

महामाहेश्वरोऽभिनवगुप्तपादाचार्यः आगमप्रामाण्यनिरूपणप्रसङ्गे कथयति–"इहापि दृढविमर्शनरूपं शब्दनम् आ-समन्तात् अर्थं गमयति इति आगमसंज्ञकं प्रमाणं सर्वस्य तावत् भवति। एषा ज्ञानागमनपरम्परास्पष्टीकरणार्थमेव तन्त्रशास्त्रेषु आगमशब्दे 'आगतं गतं मतमिति' अक्षरत्रयसन्निवेशः कृतं स्यात्। आगमसाहित्यः विषयाणां दृष्ट्या चतुर्षु भागेषु विभक्तोऽस्ति-1. ज्ञानपादः, 2. योगपादः, 3. क्रियापादः, 4. चर्यापादः। आगमो हि जगति निजकर्म-पाशबद्धानुपपत्तिमरणप्रवाहपतितान्संसारसिन्धूत्तरीतुमक्षमान् जन्तूनुद्धर्तुं परमकारुणिकः शिवः शिवाया उपवर्णितः (उपदिष्टः) इति तत्पदनिरुक्तिस्मरणादवगम्यते, यथाह–

आगतं शिववक्त्राजाद्गतं तु गिरिजाश्रुतौ।
तदागम इति प्रोक्तं शास्त्रं परमपावनम्।।

यथा च आधुनिका आगमिकाः शिवोक्तं वचनजातं पठन्ति–

आगमोक्तविधानेन कलौ देवान्यजेत्सुधीः।।
(महानि० 22)

कलावागममुल्लङ्घ्य योऽन्यमार्गं प्रवर्त्तते।
न तस्य गतिरस्तीति सत्यं सत्यं न संशयः।।
(महानि०23)

आगमशास्त्रे कर्मोपास्तिज्ञानभेदात् काण्डत्रयमुपनिबद्धं वर्तते। अर्थात् कर्म-पूर्वमीमांसा, उपासना पञ्चरात्रादौ नारदादिभिः, ज्ञानं उत्तरमीमांसा इति काण्डत्रयमवबोधनं वर्तते। वाचस्पतिमिश्रः योगभाष्ये तन्त्रस्य अपर-नाम आगमस्यार्थः कृतवान्–**आगच्छन्ति बुद्धिमारोहन्ति यस्मात् अभ्युदयनिःश्रेयसोपायाः स आगमः।** आगमशास्त्रे व्यवहारपक्षस्य एव प्राबल्यं वर्तते। तन्त्रस्य मुख्यरूपं साधनायाः उपदेशः वर्तते। शास्त्रेषु आगमलक्षणं क्रिया-अनुष्ठानोपरि प्रधानत्वमस्ति। वाराही-तन्त्रानुसारं आगमस्य सप्तलक्षणानि विहितानि सन्ति–1. जगत्सृष्टिः, 2. प्रलयः, 3. देवार्चनम् (सर्वाङ्ग-पूजनविधानम्), 4. सर्वसाधनोपायः, 5. पुरश्चरणम् (मारण-मोहन-उच्चाटनादि क्रिया), 6. षट्कर्मसाधनम् (शान्तिः, वशीकरणम्, स्तम्भनम्, विद्वेषणम्, उच्चाटनम्, मारणम्), 7. ध्यानयोगः (अभीष्टदेवतायाः स्वरूपचिन्तनम्)। आगमशास्त्रस्य सप्तलक्षणानि–

सृष्टिश्च प्रलयश्चैव देवतानां तथार्चनम्।
साधनं चैव सर्वेषां पुरश्चरणमेव च॥
षट्कर्मसाधनं चैव ध्यानयोगश्चतुर्विधः।
सप्तभिर्लक्षणैर्युक्तमागमं तद् विदुर्बुधाः॥

एतानि सप्तलक्षणानि व्यापकरूपेण आगम-विषयस्य संकेतं क्रियन्ते। तन्त्रस्य मुख्यलक्ष्यं-**ज्ञानं भारः क्रियां विना** विद्यते। तन्त्राणां कुलसंख्या-192 वर्तते। क्रान्तिरेखानुसारं त्रिवर्गेषु विभक्ताः, प्रतिवर्गे 64 तन्त्राम्नायाः वर्तते। महानिर्वाणतन्त्रे कथितमस्ति यत्-**विना ह्यागममार्गेण कलौ नास्ति गतिः प्रिये।** कुलार्णवतन्त्रानुसारं देववाण्यां निबद्धाः चतुष्प्रकारकाणां साहित्यानां मान्यता चतुर्युगेषु भवति-

कृते श्रुत्युक्त आचारः त्रेतायां स्मृति-सम्भवः।
द्वापरे तु पुराणोक्तः कलावागमसम्भवः॥

साहित्यस्य मूलः शैवागमे कर्मविषयकं शास्त्रमिति आगमोपयोगिता वर्णितमस्ति यत्-

सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित्।
यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते॥

शैवागमस्य प्रख्यातविद्वान् श्रीकुमारस्यानुसारेण शैवागमस्य संख्या: अष्टविंशकाः, एवं उपागमः असंख्यकाः सन्ति। यथोच्यते-

कामिकं योगजं चिन्त्यं कारणं स्वजितं परम्।
दीप्तं सूक्ष्मं सहस्रं च अंशुमान् सुप्रभेदकम्॥
विजयं चैव निःश्वासं स्वायम्भुवमतः परम्।
वीरं च रौरवं चैव मुकुटं विमलं तथा॥
चन्द्रज्ञानं च बिम्बं च प्रोद्गीतं ललितं तथा।
सिद्धं सन्तानसर्वोक्तं परमेश्वरमेव च॥
किरणं वातुलं चैव त्वष्टाविंशतिसंहिताः।
मूलभेदमिति ख्यातमसंख्यमुपभेदकम्॥

शैवागमे प्रधानतया क्रमात् त्रितयं पति, पशु, पाश इत्यस्य वर्णनं वर्तते। तत्र पतिः शिवः, पशवः ह्यणवः, पाशः अर्थपंचकरूपेण वर्णितोऽस्ति। कथ्यते यथा-

शैवागमेषु मुख्यं पतिपशुपाशा इति क्रमात् त्रितयम्।
तत्र पतिः शिव उक्तः पशवो ह्यणवोऽर्थपंचकं पाशः॥

भोजराजः चक्रारः पाशश्चतुर्विधः स्युः पुंसोमलकर्मसंज्ञकौ प्रथमौ। मायीयनिरोधककशिवशक्ति-समुद्भवौ चान्यौ। इत्यनेन ज्ञायते यत् अयं महानुभावः पंच पाशा मन्यन्ते। आगमशास्त्रे सिद्धान्तसागरानुसारेण विन्दु-शक्ति-शिवाख्याः त्रयः सिद्धान्ताः वर्तन्ते। भणितं यथा-

शम्भुः पुरुषो माया नित्यं विभु कर्तृशक्तियुक्तं च।
सुप्तेऽपि विकृतिजाते त्रितयं जागर्ति तत्त्वानाम्॥

तत्त्वप्रकाशे आगमशास्त्रस्य उपयोगिताविषये कथितमस्ति यत्-

भोगेन कर्मनाशं विधाय दीक्षाख्यया शक्त्या।
मोचयति पशूनखिलान् करुणैकनिधिः सदा शम्भुः॥

वैष्णव-आगमस्य द्वौ भेदौ स्तः-1. वैखानसः, 2. पाञ्चरात्रः (आग्नेयः)। वेदस्य व्यावहारिकपक्ष एव श्रौतकर्मो वर्तते। तन्त्रविद्यायां गुरोः अत्यधिक-आवश्यकता भवति। वैखानस- आगमसंहितायाः रचयिता चत्वारो ऋषयः-1. मरीचिः, 2. भृगुः, 3. अत्रिः, 4. काश्यपः।

पुराकल्पे लिखितमस्ति-मन्त्रदर्शीगणाः आत्मसाक्षात्कार-द्वारा यां सूक्ष्मां विद्याम् अतीन्द्रियां वाचं ऋषयः साक्षात्कृत-धर्माणः मन्त्रदृशः पश्यन्ति तां असाक्षात्कृतधर्मेभ्यः प्रतिवेदयिष्यमाणा बिल्मं समामनन्ति, स्वप्नदृष्टमिव दृष्टश्रुतानुभूतं आचिख्यासन्ते।

(छ) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—आगमशास्त्रे कति काण्डानि कानि च तानि?
उत्तरम्—कर्मोपास्तिज्ञानभेदात् काण्डत्रयमुपनिबद्धम्।

2. **प्रश्नः**—किम् आगमत्वम्?
उत्तरम्—अभ्युदयपसमाजपोषणनियमविशेषज्ञापकत्वे सतिं आत्मतत्त्वस्य ज्ञापकत्वमनुशासकत्वं साक्षात्पारम्पर्येणाविच्छिन्नं वा उपदेशत्वम्।

3. **प्रश्नः**—कर्मपदेन कं शास्त्रं बोध्यते?
उत्तरम्—पूर्वमीमांसाशास्त्रम्।

4. **प्रश्नः**—उपासना इत्यनेन किं बोध्यते?
उत्तरम्—पञ्चरात्रादौ नारदादिभिः।

5. **प्रश्नः**—ज्ञान-शब्देन कं शास्त्रं बोध्यते?
उत्तरम्—उत्तरमीमांसाशास्त्रम्।

6. **प्रश्नः**—वाचस्पतिमिश्रः योगभाष्ये तन्त्रस्य अपरं नाम किं कृतवान्?
उत्तरम्—आगमशास्त्रम्।

7. **प्रश्नः**—आगमस्यार्थः किं भवति?
उत्तरम्—आगच्छन्ति बुद्धिमारोहन्ति यस्मात् अभ्युदयनिःश्रेयसोपायाः स आगमः।

8. **प्रश्नः**—आगमशास्त्रे कस्य पक्षस्य प्राबल्यं वर्तते?
उत्तरम्—व्यवहारपक्षस्य।

9. **प्रश्नः**—तन्त्रस्य मुख्यरूपं किम्?
उत्तरम्—साधनायाः उपदेशः।

10. **प्रश्नः**—शास्त्रेषु आगमलक्षणं किं प्रदर्शितमस्ति?
उत्तरम्—क्रिया-अनुष्ठानोपरि प्रधानत्वम्।

11. **प्रश्नः**—वाराहीतन्त्रानुसारं आगमस्य सप्तलक्षणानि कानि?
उत्तरम्—1. जगत्सृष्टिः, 2. प्रलय, 3. देवार्चनम् 4. सर्वसाधनोपायः, 5. पुरश्चरणम्, 6. षट्कर्मसाधनम्, 7. ध्यानयोगः।

12. **प्रश्नः**—देवार्चनम् इत्यनेन किं गृह्यते?
उत्तरम्—सर्वाङ्गपूजनविधानम्।

13. **प्रश्नः**—पुरश्चरणम् इत्यनेन किं ज्ञायते?
उत्तरम्—मारण-मोहन-उच्चाटनादि क्रिया।

14. **प्रश्नः**—षट्कर्मसाधनम् इत्यनेन किं ज्ञायते?
उत्तरम्—शान्तिः, वशीकरणम्, स्तम्भनम्, विद्वेषणम्, उच्चाटनम्, मारणम्।

15. **प्रश्नः**—ध्यानयोगशब्देन किं गृह्यते?
उत्तरम्—अभीष्टदेवतायाः स्वरूपचिन्तनम्।

16. **प्रश्नः**—ज्ञानं भारः क्रियां विना इति कस्य मुख्यलक्ष्यं वर्तते?
उत्तरम्—तन्त्रस्य।

17. **प्रश्नः**—शैवागमस्य प्रख्यातविद्वान् कोऽस्ति?
उत्तरम्—श्रीकुमारः।

18. **प्रश्नः**—श्रीकुमारस्यानुसारेण शैवागमस्य संख्या कति?
उत्तरम्—अष्टविंशः।

19. **प्रश्नः**—श्रीकुमारस्यानुसारेण उपागमस्य संख्या कति?
उत्तरम्—असंख्यकः।

20. **प्रश्नः**—साहित्यस्य मूलं शास्त्रं किम्?
उत्तरम्—शैवागमः।

21. **प्रश्नः**—शैवागमे प्रधानतया कस्य वर्णनं वर्तते?
उत्तरम्—पति, पशु, पाशस्य।

22. **प्रश्नः**—आगमशास्त्रानुसारं पतिशब्देन कः बोध्यते?
उत्तरम्—शिवः।

23. **प्रश्नः**—आगमशास्त्रानुसारं पाश इत्यनेन कः ज्ञायते?
उत्तरम्—तैर्ये बद्धास्ते पशव इति।

24. **प्रश्नः**—पञ्चपाशाः कैः मन्यन्ते?
उत्तरम्—भोजराजः।

25. **प्रश्नः**—आगमानुसारेण सामान्यतः पाशः कतिधा भवन्ति?
उत्तरम्—चतुर्धा, त्रयः-मलं-कर्म-मायाश्च।

26. **प्रश्नः**—कर्मविषयकं ज्ञानं कस्मिन् शास्त्रे वर्तते?
उत्तरम्—आगमशास्त्रे।

27. **प्रश्नः**—शैवागमे कस्य उपयोगिता वर्णितास्ति?
उत्तरम्—आगमस्य।

28. **प्रश्नः**—तन्त्राणां का संख्याः?
उत्तरम्—192।

29. **प्रश्नः**—क्रान्तिरेखानुसारं त्रिवर्गेषु विभक्ताः, प्रतिवर्गे कति तन्त्रं मन्यते?
उत्तरम्—64।

30. **प्रश्नः**—आगमशास्त्रे सिद्धान्तसागरानुसारेण त्रयः सिद्धान्ताः के सन्ति?
उत्तरम्—विन्दु-शक्ति-शिवाख्याः।

31. **प्रश्नः**—कुलार्णवतन्त्रानुसारं देववाण्यां निबद्धाः चतुष्प्रकारकाः चतुर्युगेषु के सन्ति?
उत्तरम्—कृते श्रुत्युक्त आचारः त्रेतायां स्मृति-सम्भवः। द्वापरे तु पुराणोक्तः कलावागमसम्भवः॥

32. **प्रश्नः**—तत्त्वप्रकाशे आगमशास्त्रस्य उपयोगिताविषये किं कथितमस्ति?
उत्तरम्—भोगेन कर्मनाशं विधाय दीक्षाख्यया शक्त्या। मोचयति पशूनखिलान् करुणैकनिधिः सदा शम्भुः।

33. **प्रश्नः**—आगमशास्त्रस्य मुख्यलक्ष्यः कः?
उत्तरम्—शिवः।

34. **प्रश्नः**—आगमसाहित्यस्य चतुर्षु भागेषु विभक्ताः के विषयाः सन्ति?
उत्तरम्—1. ज्ञान-पादः, 2. योग-पादः, 3. क्रिया-पादः, 4. चर्या-पादः।

35. **प्रश्नः**—आगमशब्दः तन्त्रशास्त्रेषु एव रूढः कथं दृश्यते?
उत्तरम्—आम्नायपरम्परया गुरुशिष्यमाध्यमेन प्राप्तत्वात्, लौकिकपारलौकिकाभ्युदयप्रदायकत्वात् ज्ञानरूपत्वाच्च एतादृशार्थरूपगुरुशिष्यपरम्पराप्राप्तम्।

36. **प्रश्नः**—भर्तृहरिस्तावत् महाभाष्ये विद्यमानं व्याकरणाध्ययनप्रयोजनेष्वन्यतमं प्रयोजनं किम्?
उत्तरम्— आगमम्; रक्षोहागमलघ्वसन्देहाः।

37. **प्रश्नः**—'पारम्पर्येणाविच्छिन्न उपदेशः आगमः श्रुतिलक्षणः स्मृतिलक्षणश्च सः' इति कः कथितवान्?
उत्तरम्—भर्तृहरिमहोदयः।

38. **प्रश्नः**—चैतन्यमिव यश्चायमविच्छेदेन वर्तते। आगमस्तमुपासीनो हेतुवादैर्न बाध्यते।। इति कुत्र कथितः?
उत्तरम्—वाक्यपदीयग्रन्थे।

39. **प्रश्नः**—सार्ववर्णिकशास्त्ररूपेण आगमशास्त्रस्य लोकप्रियतायाः को हेतुः?
उत्तरम्—प्रधानहेतुः।

40. **प्रश्नः**—प्रत्येकजनेभ्यः मार्गः कः?
उत्तरम्—तन्त्रविज्ञानम्।

41. **प्रश्नः**—आध्यात्मिकजगति तन्त्रः किं विज्ञानम्?
उत्तरम्—व्यावहारिकविज्ञानम्।

42. **प्रश्नः**—आगमः पञ्चमो वेदः कौलस्तु पञ्चमाश्रमः इति कुत्र उद्धृतः?
उत्तरम्—निरुक्ते।

43. **प्रश्नः**—श्रुतिश्च द्विविधा वैदिकी तान्त्रिकी च इति कुत्र उद्धृतः?
उत्तरम्—मनुस्मृतिग्रन्थे।

44. **प्रश्नः**—अथर्ववेदस्य सौभाग्यकाण्डतः केषां प्रवर्तनम्?
उत्तरम्—तन्त्राणाम्।

45. **प्रश्नः**—तन्त्रस्यार्थगतव्यापकता शास्त्रगतबहुलताऽपि सर्वव्यापिनीति कथं भवति?
उत्तरम्—तनोति विपुलानर्थान् तत्त्वमन्त्रसमाश्रितान्। त्राणं च कुरुते यस्मात् तेन तन्त्रमिति स्मृतम्।।

46. **प्रश्नः**—'इहापि दृढविमर्शनरूपं शब्दनम् आ समन्तात् अर्थं गमयति इति आगमसंज्ञकं प्रमाणं सर्वस्य तावत् भवति। एषा ज्ञानागमनपरम्परास्पष्टीकरणार्थमेव तन्त्रशास्त्रेषु आगमशब्दे 'आगतं गतं मतमिति' कस्य कथनम्?
उत्तरम्—आगमप्रामाण्यनिरूपणप्रसङ्गे महामाहेश्वराभिनवगुप्तपादाचार्यस्य।

47. **प्रश्नः**—आगतं शिववक्त्राज्जातं तु गिरिजाश्रुतौ। तदागम इति प्रोक्तं शास्त्रं परमपावनम्।। इत्यत्र किमुपदिष्टः?
उत्तरम्—परमकारुणिकः शिवः शिवाया उपदिष्टः (उपदिष्टः) इति तत्पदनिरुक्तिस्मरणादवगम्यते। आगमोक्त विधानेन कलौ देवान्यजेत्सुधीः। कलावागममुल्लङ्घ्य योऽन्यमार्गे प्रवर्तते।

48. **प्रश्नः**—न तस्य गतिरस्तीति सत्यं सत्यं न संशयः।। महानिर्वाणतन्त्रे कस्य वचनजातं पठन्ति?
उत्तरम्—आधुनिका आगमिकाः शिवोक्तं वचनजातं पठन्ति।

49. **प्रश्नः**—'विना ह्यागममार्गेण कलौ नास्ति गतिः प्रिये' इति कुत्र उद्धृतः?
उत्तरम्—महानिर्वाण-तन्त्रे।

50. **प्रश्नः**—साहित्यस्य मूलः शैवागमे कर्मविषयकं शास्त्रमिति आगमोपयोगिता किं वर्णितमस्ति?
उत्तरम्—'सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित्। यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते'।।

51. **प्रश्नः**—भोगेन कर्मनाशं विधाय दीक्षाख्यया शक्त्या मोचयति पशूनखिलान् करुणैकनिधिः सदा शम्भुः।। उक्त- श्लोकः कस्मिन् विषये कथितमस्ति?
उत्तरम्—तत्त्वप्रकाशे आगमशास्त्रस्य उपयोगिताविषये।

52. **प्रश्नः**— वैष्णव-आगमस्य कौ द्वौ भेदौ स्तः?
उत्तरम्—1. वैखानसः, 2. पञ्चरात्रः (आग्नेयः)।

53. **प्रश्नः**—वेदस्य व्यावहारिकपक्षः कः?
उत्तरम्—श्रौतकर्म।

54. **प्रश्नः**— वैखानस-आगमसंहितायाः रचयितारः चत्वारि ऋषयः के सन्ति?
उत्तरम्—1. मरीचिः, 2. भृगुः, 3. अत्रिः, 4. काश्यपः।

55. **प्रश्नः**—मन्त्रदर्शिगणाः आत्मसाक्षात्कारद्वारा यां सूक्ष्मां विद्याम् अतीन्द्रियां वाचं ऋषयः साक्षात्कृतधर्माणः 'मन्त्रदृशः' पश्यन्ति तां असाक्षात्कृतधर्मेभ्यः प्रतिवेदयिष्यमाणा विल्मं समामनन्ति, स्वप्नदृष्टमिव दृष्टश्रुतानुभूतं आविष्कुर्वन्ति इति कुत्र निगदितमस्ति?
उत्तरम्—पुराकल्पे।

(ज) मोक्षः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

कुलार्णव-तन्त्रानुसारं शिवस्य पञ्चमुखेभ्यः पञ्च-आम्नायाः उत्पन्नाः। पूर्व-पश्चिम-उत्तर-दक्षिण-ऊर्ध्वं पञ्च-आम्नायाः मोक्षस्य साधनानि वर्तन्ते। कथितं यथा-

मम पञ्चमुखेभ्यश्च पञ्चाम्नायाः समुद्गताः।
पूर्वश्च पश्चिमश्चैव दक्षिणश्चोत्तरस्तथा।।
ऊर्ध्वाम्नायाश्च पञ्चैते मोक्षमार्गाः प्रकीर्तिताः।।
(कु०त०3/7)

पञ्चमुखानां नामानि सन्ति- 1. सद्योजातः, शुद्धस्फटिक-सदृशः शुक्लवर्णः। 2. कामदेवः, पीतवर्णः सौम्यः मनोहरश्च। 3. अघोरः, कृष्णवर्णः भयङ्करः। 4. तत्पुरुषः, रक्तवर्णः दिव्यः मनोहरः। 5. ईशानः, श्यामलः सर्वदेवशिवात्मकम्। कथ्यते यथा-

विभाव्यं मुखपद्मं हि शिवस्य वरवर्णिनि।
सद्योजातं कामदेवमघोरञ्च ततः परम्।
श्यामलञ्च तथेशानं सर्वदेवं शिवात्मकम्।।
(निर्वाणतन्त्रे)

महानिर्वाणतन्त्रे कथितमस्ति यत् कर्मपाशैः विमुक्त्यर्थं महातन्त्रस्यावश्यकता वर्तते। यथा-

किं तस्य तीर्थभ्रमणैः किं यज्ञैः जपसाधनैः।
ज्ञानमेव महातन्त्रे कर्मपाशैर्विमुच्यते।।

प्रलयाकलसंज्ञोऽपि पक्व-अपक्वमलाभेदाभ्यां जीवः मायाः गर्भे पतन् अस्ति। सृष्टेः आरम्भकाले मायीय-कार्मण-मलयोः नितान्तपक्वजीवान् शिवः मुक्तिः प्रदानं करोति। मुक्तेः तथा मुक्तिसाधनस्य कल्पना तान्त्रिकमते विलक्षणा वर्तते। मलस्यावरणपरिहाराय क्रियायाः अवलम्बनमावश्यकं वर्तते। मलापनयनस्य साधनमस्ति शक्तिपातः, यः भगवतः शिवस्य अनुग्रहेण प्राप्तो भवति। अनुग्रह-शक्तेर्नाम दीक्षा वर्तते। आचार्यमूर्तिभगवान् एव दीक्षा द्वारा शिष्यस्य उद्धारं करोति, एवं भवबन्धनात् उन्मुक्तं कृत्वा शिवरूपापत्तिः क्रियते। कथ्यते यथा आचार्य अभिनवगुप्तः तन्त्रालोके-

दीयते ज्ञानसद्भावः क्षीयते पशुबन्धनात्।
दानक्षपणसंयुक्ता दीक्षा तेनेह कीर्तिता।।
(तन्त्रालोके)

आचार्यमधिष्ठाय देवो दीक्षाणकर्मेव मुञ्चति।
स्वशक्त्यादधृतान् पुंसां मन्त्रसाधनसाध्यया।।
(मोक्षकारिका, का०36)

त्रिकदर्शनस्य साधनमार्गे ज्ञान-भक्तिः उभयोः सामञ्जस्यं विद्यते। शंकराचार्यस्य अद्वैतवादे ज्ञानमार्गस्यैव प्रधानं स्थानं नास्ति, भक्तिः द्वैतवादेऽपि प्रतिष्ठिताऽस्ति, सा भक्तिः साधनरूप-अज्ञानमूला वर्तते। साधारणतया यं मोक्षं कथ्यते सः नित्यसिद्ध-ज्ञान-भक्त्योः एव आत्मस्वरूपस्य-समुन्मेषमात्रमस्ति। त्रिकदर्शने तान 'चिदानन्दलाभ' इति कथ्यते। अतः 'प्रत्यभिज्ञा' चास्य मोक्षस्य प्रधानसाधनं वर्तते। ईश्वरप्रत्यभिज्ञानामकग्रन्थे 'प्रत्यभिज्ञायाः' तात्पर्यमित्थं वर्तते-

तैस्तैरप्युपयाचितैरुपनतस्तन्व्याः स्थितोऽप्यन्तिके
कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा।
लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो
नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता।।
(ईश्वरप्रत्यभिज्ञा 4/2/2)

त्रिकदर्शनानुसारं बन्धनस्य कारणमज्ञानं वर्तते। अज्ञानस्य पारिभाषिकी संज्ञा मलं वर्तते। मलाः त्रिप्रकारकाः भवन्ति-1. आणवमलः, 2. मायीयमलः, 3. कार्ममलः। बन्धनस्य अपहरणात्मिका स्थितिः मुक्तिः इति कथ्यते। यस्य स्वभावो वर्तते सम्यक् ज्ञानं, शिवत्वस्य पूर्णज्ञानम् अथवा शिवस्य स्वातन्त्र्यशक्तेः पूर्णज्ञानम्। कथ्यते यथा अभिनवगुप्तेन-**मोक्षो हि नाम नैवान्यः स्वरूपप्रथनं हि सः** इति। अर्थात् स्वरूप-प्रथनमेव मोक्षः। अज्ञानग्रन्थेः छेदनं तथा स्वशक्तेः प्रकाशनमेव मोक्षः इति कथ्यते। यथा कारिकायाम्-

मोक्षस्य नैव किञ्चिद् धामास्ति न चापि गमनमन्यत्र।
अज्ञान-ग्रन्थि-भिदा स्वशक्त्यभिव्यक्तता मोक्षः।।
(कारिका-60)

मन्त्रस्य जपद्वारा मोक्षस्य सिद्धिः क्रियते। एषा सिद्धिः ध्यानादि-मानसक्रियाद्वारा साध्यो भवति।

(ज) वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—मोक्षपुरुषार्थस्य प्राप्तिः केन भवति?
उत्तरम्—निर्वाणतन्त्रज्ञानेन।

2. प्रश्नः—शिवस्य पञ्चमुखेभ्यः पञ्च-आम्नायाः उत्पन्नाः इति कथं ज्ञायते?
उत्तरम्—कुलार्णव-तन्त्रानुसारेण।

3. प्रश्नः—मोक्षस्य साधनं किम्?
उत्तरम्—पूर्व-पश्चिम-उत्तर-दक्षिण-उर्ध्व एते पञ्च-आम्नायाः।

4. प्रश्नः—मम पञ्चमुखेभ्यश्च पञ्चाम्नायाः समुद्गता। पूर्वश्च पश्चिमश्चैव दक्षिणश्चोत्तरस्तथा। उर्ध्वाम्नायाश्च पञ्चैते मोक्षमार्गाः प्रकीर्तिताः।। इति कस्य ग्रन्थस्य वचनम्?
उत्तरम्—कुलार्णव-तन्त्रस्य।

5. प्रश्नः—पञ्चमुखानां नामानि कानि सन्ति?
उत्तरम्—1. सद्योजातः, शुद्धस्फटिकसदृशः शुक्लवर्णः। 2. कामदेव, पीतवर्णः सौम्यः मनोहरश्च। 3. अघोरः, कृष्णवर्णः भयङ्करः। 4. तत्पुरुषः, रक्तवर्णः दिव्यमनोहरः। 5. ईशानः, श्यामलः सर्वदेवशिवात्मकम्।

6. प्रश्नः—विभाव्यं मुखपद्मं हि शिवस्य वरवर्णिनि!
सद्योजातं कामदेवमघोरञ्च ततः परम्।
यामलञ्च तथेशानं सर्वदेव शिवात्मकम्।।
इति कस्य ग्रन्थस्य वचनम्?
उत्तरम्—निर्वाणतन्त्रस्य।

7. प्रश्नः—महातन्त्रस्यावश्यकता कथं वर्तते?
उत्तरम्—कर्मपाशैः विमुक्त्यर्थम्।

8. प्रश्नः—किं तस्य तीर्थभ्रमणैः किं यज्ञैः जपसाधनैः। जानन्नेव महातन्त्रं कर्मपाशैर्विमुच्यते। इति कस्मिन् ग्रन्थे कथितमस्ति?
उत्तरम्—महानिर्वाणतन्त्रे।

9. प्रश्नः—प्रलयाकलजीवोऽपि पक्व-अपक्वमलाभेदाभ्यां जीवः कस्मिन् गर्भे पतन् अस्ति?
उत्तरम्—मायायाः गर्भे।

10. प्रश्नः—सृष्टेः आरम्भकाले मायीय-कार्मण-मलयोः नितान्तपक्वजीवान् कः मुक्तिः प्रदानं करोति?
उत्तरम्—शिवः।

11. प्रश्नः—मुक्तेः तथा मुक्तिसाधनस्य कल्पना कस्य मते विलक्षणा वर्तते?
उत्तरम्—तान्त्रिकमते।

12. प्रश्नः—मलस्यावरणं परिहाराय कस्या अवलम्बनमावश्यकं वर्तते?
उत्तरम्—क्रियायाः।

13. प्रश्नः—मलापनयनस्य साधनं किम्?
उत्तरम्—शक्तिपातः।

14. प्रश्नः—भगवतः शिवस्य अनुग्रहेण कः प्राप्तो भवति?
उत्तरम्—शक्तिपातः।

15. प्रश्नः—अनुग्रह-शक्तेर्नाम किम्?
उत्तरम्—दीक्षा।

16. प्रश्नः—आचार्यमूर्तिर्भगवान् एव दीक्षा द्वारा कस्य उद्धारं करोति?
उत्तरम्—शिष्यस्य।

17. प्रश्नः—भवबन्धनात् उन्मुक्तं कृत्वा का क्रियते?
उत्तरम्—स्वरूपापत्तिः।

18. प्रश्नः—दीयते ज्ञानसद्भावः क्षीयते पशुबन्धनात्। दानक्षपणसंयुक्ता दीक्षा तेनेह कीर्तिता।। आचार्यसंस्थितो देवो दीक्षाशक्त्यैव मुञ्चति। स्वशक्त्योद्धृतान् पुंसो मन्त्रसाधनसाध्यया।। इति मोक्षविषयं कुत्र कथितमस्ति?
उत्तरम्—आचार्य अभिनवगुप्तः तन्त्रालोके-मोक्षकारिकायाम्।

19. प्रश्नः—त्रिकदर्शनस्य साधनमार्गे कयोः उभयोः सामञ्जस्यं विद्यते?
उत्तरम्—ज्ञानभक्त्योः।

20. प्रश्नः—शंकराचार्यस्य अद्वैतवादे चरमावस्थायां कस्य स्थानं नास्ति?
उत्तरम्—भक्तेः।

21. प्रश्नः—द्वैतवादोपरि कः प्रतिष्ठितोऽस्ति?
उत्तरम्—भक्तिः।

22. प्रश्नः—भक्तिः का?
उत्तरम्—साधनरूप-अज्ञानमूला।

23. प्रश्नः—साधारणतया कं मोक्षं कथ्यते?
उत्तरम्—नित्यसिद्ध-ज्ञान-भक्त्योः एव आवरण-भंगजनित-समुन्मेषमात्रमस्ति।

24. प्रश्नः—त्रिकदर्शने मोक्षः कः?
उत्तरम्—चिदानन्दलाभः।

25. प्रश्नः—वास्तव-मोक्षः शिवत्वलाभे प्रधानसाधनं किम्?
उत्तरम्—प्रत्यभिज्ञा।

26. प्रश्नः—ईश्वरप्रत्यभिज्ञानामकग्रन्थे 'प्रत्यभिज्ञायाः' तात्पर्यं किमुद्धृतम्?
उत्तरम्—तैस्तैरप्युपयाचितैरुपनतस्तन्व्याः स्थितोऽप्यन्तिके, कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा। लोकस्यैव तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो, नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता।।

27. प्रश्नः—त्रिकदर्शनानुसारं बन्धनस्य कारणं किम्?
उत्तरम्—अज्ञानम्।

28. प्रश्नः—अज्ञानस्य पारिभाषिकी संज्ञा का?
उत्तरम्—मलम्।

29. प्रश्नः—मलाः कतिप्रकारकाः भवन्ति?
उत्तरम्—त्रिप्रकारकाः।

30. प्रश्नः—के सन्ति त्रिप्रकारकाः मलाः?
उत्तरम्—1. आणवमलः, 2. मायीयमलः, 3. कार्मणमलः।

31. प्रश्नः—बन्धनस्य अपहरणात्मिकां विद्यां किं नाम?
उत्तरम्—मुक्तिः।

32. प्रश्नः—मुक्तेः स्वभावानां का परिभाषा?
उत्तरम्—सम्यक्ज्ञानं, शिवत्वस्य पूर्णज्ञानम् अथवा शिवस्य स्वातन्त्र्यशक्तेः पूर्णज्ञानम्।

33. प्रश्नः—मुक्तिसम्बन्धे अभिनवगुप्तेन किं भणितम्?
उत्तरम्—मोक्षो हि नाम नैवान्यः स्वरूपप्रथनं हि सः इति।

34. प्रश्नः—स्वरूप-प्रथनं किम्?
उत्तरम्—मोक्षः।

35. प्रश्नः—अज्ञान-ग्रन्थेः भेदनं तथा स्वशक्तेः प्रकाशनमिति कः?
उत्तरम्—मोक्षः।

36. प्रश्नः—मोक्षस्य नैव किञ्चिद् धामास्ति न चापि गमनमन्यत्र। अज्ञान-ग्रन्थि-भिदा स्वशक्त्यभिव्यक्तता मोक्षः।। इति कुत्र भणितमस्ति?
उत्तरम्—कारिकाकारेण, स्वकारिकायाम् (60)।

37. प्रश्नः—मोक्षस्य सिद्धिः कथं जायते?
उत्तरम्—मन्त्रजपद्वारा।

38. प्रश्नः—सिद्धिः कथं साध्यो भवति?
उत्तरम्—ध्यानादि-मानसक्रियाद्वारा।

(झ) आगमशास्त्रस्य ग्रन्था एवं ग्रन्थकाराश्च

क्र.	ग्रन्थनाम	ग्रन्थकारः	क्र.	ग्रन्थनाम	ग्रन्थकारः
1.	तन्त्रसारः	अभिनवगुप्तः	7.	प्रत्यभिज्ञाहृदय	अभिनवगुप्तः
2.	तन्त्रालोक	अभिनवगुप्तः	8.	शिवसूत्रविमर्शिनी	अभिनवगुप्तः
3.	अभिनवभारती	अभिनवगुप्तः	9.	लोचनटीका	अभिनवगुप्तः
4.	शिवस्तोत्रावली	अभिनवगुप्तः	10.	शिवस्तोत्रावलि	अभिनवगुप्तः
5.	परमार्थसार	अभिनवगुप्तः	11.	परात्रिंशिका	अभिनवगुप्तः
6.	मालिनीविजय	अभिनवगुप्तः	12.	ईश्वरप्रत्यभिज्ञाविमर्शिनी	अभिनवगुप्तः

क्र.	ग्रन्थनाम	ग्रन्थकारः
13.	ईश्वरप्रत्यभिज्ञा-विवृतिविमर्शिनी	अभिनवगुप्तः
14.	परात्रिंशिकाविवरण	अभिनवगुप्तः
15.	मालिनीविजयवार्तिक	अभिनवगुप्तः
16.	शिवदृष्ट्यालोचनम्	अभिनवगुप्तः
17.	बोधपञ्चदशिका	अभिनवगुप्तः
18.	तन्त्रवटधानिका	अभिनवगुप्तः
19.	परमार्थचर्चा	अभिनवगुप्तः
20.	क्रमस्तोत्र	अभिनवगुप्तः
21.	परमार्थद्वादशिका	अभिनवगुप्तः
22.	भैरवस्तोत्र	अभिनवगुप्तः
23.	अनुभवनिवेदनस्तोत्र	अभिनवगुप्तः
24.	अनुत्तराष्टिका	अभिनवगुप्तः
25.	देहस्थदेवता	अभिनवगुप्तः
26.	चक्रस्तोत्र	अभिनवगुप्तः
27.	स्पन्दकारिका	उत्पलदेवः
28.	ईश्वरप्रत्यभिज्ञाकारिका	उत्पलदेवः
29.	ईश्वरप्रत्यभिज्ञा	उत्पलदेवः
30.	ईश्वरप्रत्यभिज्ञाविवृत्तिः	उत्पलदेवः
31.	ईश्वरप्रत्यभिज्ञावृत्ति	उत्पलदेवः
32.	अजड़प्रमातृसिद्धिः	उत्पलदेवः
33.	ईश्वरसिद्धिः	उत्पलदेवः
34.	सम्बन्धसिद्धिः	उत्पलदेवः
35.	शिवस्तोत्रावली	उत्पलदेवः
36.	शिवसूत्र	वसुगुप्त
37.	कल्पसूत्र	परशुरामः
38.	शिवदृष्टि	सोमानन्द
39.	तन्त्रवार्तिक	कुमारिलभट्ट
40.	पञ्चरात्र	नारद
41.	शैवदृष्टिः	सोमानन्द
42.	अर्थरत्नावली	विद्यानन्द
43.	अष्टसाहस्री	दत्तात्रेय
44.	ऋजुविमर्शिनी	शिवानन्द
45.	ललितात्रिंशतिभाष्य	शंकराचार्यः
46.	सौन्दर्यलहरी	शंकराचार्यः
47.	पाशुपतसूत्र	माहेश्वरः
48.	वैखानसभाष्यकार	वेंकटेश
49.	विवरण	जयरथ
50.	रसहृदय	गोविन्द भगवत्पा
51.	रसरत्नाकर	नागार्जुन
52.	आगमप्रामाण्य	यमुनाचार्यः
53.	स्पन्दकारिका	भट्टकल्लट
54.	तन्त्रवार्तिकटीका	मण्डन मिश्रः
55.	स्पन्दसर्वस्व	भट्टकल्लट
56.	शिवसूत्रवृत्ति	भट्टकल्लट
57.	परिमल	महेश्वरानन्द
58.	स्तवचिन्तामणि	भट्टनारायण
59.	स्पन्दसन्दोह	क्षेमराजः
60.	स्पन्दनिर्णयः	क्षेमराजः
61.	पराप्रवेशिका	क्षेमराजः
62.	प्रत्यभिज्ञाहृदय	क्षेमराजः
63.	बोधविलासः	क्षेमराजः
64.	शिवसूत्रविमर्शिनी	क्षेमराजः
65.	विज्ञानभैरव	क्षेमराजः
66.	स्वच्छन्दतन्त्र उद्योगः	क्षेमराजः
67.	शिवस्तोत्रावलीटीका	क्षेमराजः
68.	नेत्रतन्त्र उद्योगः	क्षेमराजः
69.	साम्बपञ्चाशिकाटीका	क्षेमराजः
70.	शिवसूत्रवार्तिक	भट्टभास्कर
71.	तत्त्वगर्भस्तोत्र	भट्टप्रद्युम्न
72.	परमार्थसारटीका	योगराज
73.	शिवसूत्रवार्तिक	वरदराजः
74.	पूर्णताप्रत्यभिज्ञा	म.न.रामेश्वर झा
75.	काश्यपज्ञानकाण्ड	महर्षि काश्यप

क्र.	ग्रन्थनाम	ग्रन्थकारः
76.	श्रीक्रमाभिज्ञापना	म.न.रामेश्वर झा
77.	समूर्तार्चनाधिकार	महर्षि अत्रि
78.	सुभगोदय	गौड़पाद
79.	श्रीविद्यारत्नसूत्र	गौड़पाद
80.	यज्ञाधिकार	महर्षि भृगुः
81.	क्रियाधिकार	महर्षि भृगुः
82.	खिलाधिकार	महर्षि भृगुः
83.	विमानार्चनकल्प	महर्षि मरीचि
84.	आनन्दसंहिता	महर्षि मरीचि

13

धर्मशास्त्र विवेचनम्

(CC-Code-73)

(क) धर्मलक्षणम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

धर्मस्य लक्षणं वेदेषु धर्मशास्त्रेषु, पुराणेषु दर्शनेषु च प्रतिपादितम्। धारणाद्धर्म इत्याहुरिति महाभारतवचनात् जीवनं येन धार्यते स धर्मः। धृञ् धारणपोषणयोः इत्यस्माद्धातोः मन् प्रत्यये कृते निष्पन्नोऽयं धर्मशब्दः। कर्त्तव्याकर्त्तव्ययोः अवधारणरूपो शास्त्रं धर्म इति कथ्यते। अवश्यकरणीयं कार्यमेव धर्म, ईश्वरसत्तायां विश्वासमेव धर्म, जगन्मूलत्वेन संसृतिनियामकानि तत्त्वानि धर्माः' इत्यादयः निगदन्ति।

(क) वेदेषु धर्मलक्षणम्–वेदः सर्वासां विद्यानां मूलभूतः। धर्मस्य मूलं वेद एव। धर्मो विश्वस्य जगतः प्रतिष्ठा। 1. ऋग्वेदे–धारणार्थे पालनार्थे च पुंलिङ्गे एव प्रयुक्तः। 2. यजुर्वेदे–धारणार्थे धारकार्थे च प्रयुक्तः। 3. अथर्ववेदे–धार्मिकक्रियाजनितगुणार्थे दृश्यते। यत्र जगद्धारकत्वं तत्र धर्मत्वम्।

(ख) धर्मशास्त्रेषु धर्मलक्षणम्–मनुना तु धृतिक्षमादमोऽस्तेयं शौचमिन्द्रियनिग्रहः धीर्विद्या सत्यमक्रोधो–इति दशगुणात्मकं धर्मलक्षणं स्वीकृतम्। वेदः सर्वासां विद्यानां मूलभूतः। 'वेदोऽखिलो धर्ममूलम्' (मनुस्मृति–2/6)। धर्मो विश्वस्य जगतः प्रतिष्ठा। शुक्लयजुर्वेदे–'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्' इत्यनेन 'धर्मो रक्षति रक्षितः' इति मनुवचनेन च धर्मपालनार्थं धर्मरक्षणार्थं च उपदिश्यते। धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु धर्मः प्रधानः विद्यते। धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रमुच्यते। धर्मशास्त्रं मुख्यतः पुरुषार्थचतुष्टयं प्रतिपादयति। तेषु सर्वेषु पुरुषार्थेषु मनुष्यजीवनस्य मार्गप्रवर्त्तकरूपेण तथा नियंत्रकरूपेण धर्मस्य प्राधान्यं स्वीक्रियते। याज्ञवल्क्यमतानुसारं धर्मो नाम **यज्ञ-सदाचार-दम-अहिंसा-दान-स्वाध्यायादिदेशकाल-सापेक्षः**। मनुस्मृतौ एवं याज्ञवल्क्यस्मृतौ धृतिक्षमादयो दश गुणा एव धर्मशब्दवाच्यत्वेन एवं सदाचारोऽपि धर्म इति निर्दिष्टः सन्ति। यथा–

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।
(मनु०6/92)

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
सम्यक् संकल्पजः कामो धर्ममूलमिदं स्मृतम्।।
(याज्ञ०स्मृ०)

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत।।
(मनु०2/1)

चोदनालक्षणोऽर्थो धर्मः 'स्वर्गसाधनस्य शास्त्रैकसमधिगम्यातिशयस्य धर्मत्वेन सर्वसम्प्रतिपत्तेः, इति धर्मस्य परिभाषा कृता स्मृतिकारैः। मनुयाज्ञवल्क्यादिभिः महर्षिभिः प्रणीतमिदं धर्मशास्त्रं समाजस्योपकारायैव प्रवर्त्तते। सर्वेषां धर्मशास्त्रग्रन्थानां प्रवर्त्तनं धर्ममार्गस्य प्रतिपादनार्थमेव। अतः प्रतिवेदं प्रतिशाखं प्रतिप्रान्तमपि धर्मशास्त्राणि विरचितानि सन्ति। **धर्मो रक्षति रक्षितः**। शुक्लयजुर्वेदे-**यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्** इत्यनेन **धर्मो रक्षति रक्षितः** इति मनुवचनेन च धर्मपालनार्थं धर्मरक्षणार्थं च धर्मलक्षणम् निरूपितम्। यथा–

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षात् धर्मस्य लक्षणम्।।
(मनु०2/12)

चतुर्विधधर्मे वेद-स्मृत्यनन्तरं सदाचारोऽपि उदीर्यते। जीवने सदाचारेणैव सर्वार्थसिद्धिः स्यात्। यथा–

आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः।।
(मनुस्मृ०1/108)

आचाराद् विच्युतो विप्रो न वेदफलमश्नुते।
आचारेण तु संयुक्तः सम्पूर्णफलभाग् भवेत्।।
(मनु०1/109)

सर्वस्य तपसो मूलमाचारं जगृहुः परम्। (मनु०1/110)

(ग) पुराणेषु धर्मलक्षणम्–व्यासेन तु परोपकार एव धर्म इति प्रतिपादितम्। भारतीयसंस्कृतौ आचारः अहिंसा: इत्यादयः परमधर्मरूपाः। अत एव महाभारते आत्मनः प्रतिकूलानि परेषां न समाचरेदिति धर्मसर्वस्वम्। भारद्वाजमतानुसारं **सत्त्वगुणस्य अभिवृद्धिः एव धर्मः** इत्युच्यते। श्रीमद्भागवतपुराणानुसारं **येन भगवति अहेतुकी अप्रतिहता भक्तिः उत्पद्यते स धर्मः**।

(घ) महाभारते धर्मलक्षणम्—**येन वस्तुना प्राणिनः भरणं पोषणं धारणं वा भवति तद्वस्तु धर्मपदवाच्यः**। अयं योगक्षेमविधायकः। मानवत्वस्य सुरक्षासम्पादकः, प्राप्तव्येश्वरस्य प्राप्तिसाधनश्च धर्मः। कथितं च महाभारते–

धारणाद्धर्म इत्याहुर्धर्मो धारयते प्रजाः।
यत् स्याद्धारणसंयुक्तः स धर्म इति निश्चयः।।

धर्मलक्षणे **स्वस्य च प्रियमात्मनः** इत्यनेन मधुरभाषणं परोपकरणम् अहिंसनं च समर्थ्यते। यथा महाभारते प्रोच्यते–

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।
(महाभारतम्)

(ङ) पूर्वमीमांसायां धर्मलक्षणम्–जैमिनिना तु **चोदनालक्षणोऽर्थो धर्म** (मीमांसा०1/1/2) इति अर्थात् विधिरूपवेदप्रतिपाद्यप्रयोजनवदर्थो धर्मः। अर्थसंग्रहे तु यात्रादिरेव धर्मः (अर्थात् वेदप्रतिपाद्यप्रयोजनवदर्थो धर्मः)। आपदेवः–**वेदेन प्रयोजनमनुद्दिश्य विधीयमानोऽर्थो धर्मः**। अर्थात् वेदेन लोककल्याणार्थं या यागरूपक्रियाः प्रतिपादिताः ताः धर्मपदवाच्याः। यथोच्यते कुमारिलभट्टेन–

श्रेयो हि पुरुषप्रीतिः सा द्रव्यगुणकर्मभिः।
चोदनालक्षणैः साध्या तस्मात् तेष्वेव धर्मता।।

कृष्णयज्वना मीमांसापरिभाषायामुक्तं यत्–**वेदबोधितेष्टसाधनताको धर्मः** एवं अन्नम्भट्टः तर्कसंग्रहे कथितम्–**विहितकर्मजन्यो धर्मः इति**। लौगाक्षिभास्करस्य अर्थसंग्रहाधारेण–**यागादिरेव धर्मः**; तल्लक्षणं वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म इति।

(च) योगदर्शनस्य धर्मलक्षणम्–योगदर्शने महर्षिणा पतञ्जलिना यम-शब्देन धर्मः व्याख्यातः। अत्र धर्म इत्युक्ते यम-नियम-आसन-प्राणायाम-प्रत्याहारादयः मन्यन्ते। एते पुरुषख्यातेः कैवल्यस्य च अनुरूपाः सन्ति। शौच-संतोष-तपः स्वाध्यायेश्वरप्रणिधानानि नियमाः धर्माः। अतएव महर्षिणा पतञ्जलिना कर्तव्यत्वेन समादिश्यते यत्–

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः।
(योगदर्शन 2/30)

जातिदेशकाल–समयानवच्छिन्नाः सार्वभौमा महाव्रतम्। (योगदर्शन 2/31)

शौच-संतोष-तपःस्वाध्यायेश्वरप्रणिधानानि नियमाः। (योगदर्शन 2/32)

ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च। (महा०आह्नि०1)

(छ) वैशेषिकदर्शने धर्मलक्षणम्–वैशेषिकास्तु यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः। वैशेषिकदर्शनकृता कणादेन प्रतिपाद्यते यद् येन लौकिकी पारलौकिकी च समुन्नतिः संजायते, स एव धर्म-शब्देन वाच्यः। यथा–

यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः। (वैशेषिक)

भगवद्गीतानुसारं **नामोच्चारण-नामस्मरण-सर्वकर्मार्पण-सर्वत्र भगवद्भावादयः धर्मपदवाच्याः भवन्ति।**

(ज) न्यायदर्शने धर्मलक्षणम्–न्यायदर्शनस्य आधारेण धर्म आत्मनः एकः विशेषगुणः भवति। विहितकर्मणा शुभप्रवृत्त्या च एषः उत्पद्यते।

(झ) सांख्यदर्शने धर्मलक्षणम्–सांख्यमतानुसारं–यैः शारीरिक-मानसिक-बौद्धिककर्मभिः अन्तःकरणे वैराग्यस्य शान्तेश्च जागरणं भवति तथा च विवेकस्य प्रकाशः भवति स धर्मः।

(ञ) वेदान्तदर्शने धर्मलक्षणम्–वेदान्तदर्शनाधारेण **अन्तःकरणशुद्धिसाधकं कर्म धर्मः**। देहातिरिक्तात्मानं प्रति ध्यानं येन गच्छति स धर्मः।

(ट) नास्तिकदर्शनेषु चार्वाकदर्शने धर्मलक्षणम्– चार्वाकदर्शने धर्मः लौकिकजीविकायाः साधनमात्रोऽस्ति। येन कर्मणा व्यक्तित्वस्य लौकिक-उत्कर्षसिद्धिः जायते स धर्मः। चार्वाकमतम्-

धर्मः लौकिकजीविकायाः साधनमात्रः।
येन कर्मणा व्यक्तित्वस्य लौकिकोत्कर्षः स धर्मः।।

(ठ) जैनदर्शने धर्मलक्षणम्– जैनमतानुसारं धर्म पुद्गल इत्युच्यते। सः धर्मः एकः सूक्ष्मः पदार्थोऽस्ति, यस्य परमाणुः अपि वर्तते। पुण्याधिष्ठनात् तस्य परमाणोः निर्माणं भवति। तादृशानां परमाणूनां संयोगात् धर्मात्माशरीरं निर्मीयते। एवं पुण्यविशेषनिर्मितदेहारम्भकपुद्गलं नाम परमाणुः धर्मः। **पुण्याधिष्ठनात् परमाणुः निर्मीयते, तेषां परमाणूनां संयोगात् धर्मात्मशरीरं निर्मीयते। एवं पुण्यविशेषनिर्मितदेहारम्भकपुद्गलनामकः धर्मः।**

(ढ) बौद्धदर्शने धर्मलक्षणम्– बौद्धानां मतेन आर्यसत्यानि चत्वारि भवन्ति। यथा–1. दुःखम्, 2. क्षणिकता, 3. स्वलक्षणम्, 4. शून्यम्। यदा एतेषाम् अनुकूलज्ञानधारा मनुष्यस्य हृदि प्रवहति तदा एषः धर्मः इति उच्यते। यथा–

दुःखं क्षणिकता स्वलक्षणं शून्यञ्चेति चत्वारि आर्यसत्यानि। यदा एतेषामनुकूलधारा मानवहृदि प्रवर्तते तदा एष धर्मः इति।

एवं पूर्वमीमांसासम्मतं धर्मलक्षणम्-अथ को धर्मः किं तस्य लक्षणमित्याक्षिप्य प्रोक्तं अर्थसंग्रहे यागादिरेव धर्मः। तल्लक्षणञ्च **वेदप्रतिपाद्यप्रयोजनवदर्थो धर्मः।** धर्मलक्षणे भोजनेऽतिव्याप्तिवारणाय वेदप्रतिपाद्य इति, प्रयोजनेऽतिव्याप्तिवारणाय प्रयोजनवदिति, अनर्थकफलकत्वादनर्थभूते श्येनादौ अतिव्याप्तिवारणाय अर्थ इति। प्रयोजन इत्युक्ते प्रयोजनविशिष्टः अर्थ इत्युक्ते बलवदनिष्टस्याजनकत्वम्। अतः वेदविहितविधिविषयत्वे सति प्रयोजनवत्त्वे सति बलवदनिष्ठजनकत्वं धर्मलक्षणमुपपद्यते। यथा यजेतस्वर्गकामो इत्यत्र यागः वेदप्रतिपाद्यः, स्वर्गोपलब्धिः प्रयोजनम्, न च बलवदनिष्टः, अतः प्रकृतलक्षणानुसारेण वेदविहितयागः धर्म इत्युच्यते। एवं मीमांसासूत्रकारेण जैमिनिनाऽपि **चोदनालक्षणोऽर्थो धर्मः।** अत्रापि चोदनाशब्दः न च विधिरूपवेदभागप्रतिपाद्यः, अपितु प्रकृतलक्षणसंघटनार्थं वेदमात्रपरत्वात् सम्पूर्णवेदद्योतकः। अतः वेदोऽखिलो धर्ममूलमिति संगच्छते।

धर्मस्य मुख्यपुरुषार्थत्वम्– धर्मार्थकाममोक्षभेदेन चतुर्धा प्रतिपादिताः। अपौरुषेयस्य वेदस्यानुमापकतया स्मृत्यादीनामपि वेदानुकरणेन धर्मे प्रामाण्याद् धर्मशास्त्रं पुरुषार्थचतुष्टयस्य प्रमुखं प्रतिपादकम्। अतः पुरुषार्थचतुष्टयेषु धर्मस्य श्रेष्ठत्वं सर्वैः स्वीक्रियते। एतेषां धर्मार्थकामानां पुरुषार्थत्रयाणां विशुद्धाचरणे मोक्षप्राप्तिर्नाम चतुर्थः पुरुषार्थः सिद्ध्यति। चतुर्वर्गेऽर्थकाममोक्षाणां पुरुषार्थानां मूलं धर्मः। धर्मपालनं ब्रह्मचर्याश्रमे मुख्यतया विहितम्। गृहस्थाश्रमे धर्म्योपायेनार्थकामयोरर्जनं सेवनञ्च विहितम्। धर्मः रक्षितो रक्षकं रक्षति। यः धर्महानिं करोति धर्मोऽपि तं नाशयति। धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु धर्मः प्रधानः विद्यते। धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रमुच्यते। धर्मशास्त्रं मुख्यतः पुरुषार्थचतुष्टयं प्रतिपादयति। तेषु सर्वेषु पुरुषार्थेषु मनुष्यजीवनस्य मार्गप्रवर्त्तकरूपेण तथा नियंत्रकरूपेण धर्मस्य प्राधान्यं स्वीक्रियते। सत्यं धर्मस्य मूलम्। सत्याश्रयैव धर्मवृत्तिः। यत्र सत्यं तत्र धर्मः, तदभावे तदभावः। सर्वे वेदगताः विषयाः धर्मशास्त्रेऽस्मिन् प्रतिपादिताः। कर्त्तव्याकर्त्तव्ययोः अवधारकरूपो शास्त्रम् धर्म इति कथ्यते। संसारे धर्म एव प्रजानां धारकः। धर्मस्य विश्वजनीनत्वं सार्वलौकिकत्वं सार्वभौमिकत्वं च विश्वहितसम्पादनादेव प्रवर्तते। मानवे धर्मशास्त्रे भगवता मनुना 1. **वर्णधर्मः**, 2. **आश्रमधर्मो**, 3. **वर्णाश्रमधर्मो**, 4. **गुणधर्मो**, 5. **निमित्तधर्मः**, 6. **सामान्यधर्मश्चेति** षड्विधो धर्मः प्रतिपादितः। धर्मशास्त्रस्य विषयाः आचार-व्यवहार-प्रायश्चित्तभेदेन त्रिधा विभज्यन्ते। जगति विराजमानस्य धर्मस्य महती प्रतिष्ठा। **धर्मो विश्वस्य जगतः प्रतिष्ठा।** विश्ववासिनां जनानामभ्युदयनिःश्रेयससिद्ध्यर्था स्वावयवार्थप्रतिपादकत्वेऽपि धर्मसूत्रं भारतीयानां प्राणभूतवेदस्य बहुत्र बहुष्वर्थेषु प्रयुक्तम्।

(क) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः—** धर्मस्य लक्षणं कुत्र प्रतिपादितम्?
   उत्तरम्— वेदेषु धर्मशास्त्रेषु, पुराणेषु, दर्शनेषु च।
2. **प्रश्नः—**वेदेषु धर्मस्य लक्षणं किं प्रतिपादितम्?
   उत्तरम्—जगन्मूलत्वेन संसृतिनियामकानि तत्त्वानि धर्मः।
3. **प्रश्नः—**शुक्लयजुर्वेदे धर्मस्य किं लक्षणम्?
   उत्तरम्—यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।

4. **प्रश्नः—**धर्मशास्त्रेषु मनुना धर्मस्य लक्षणं किं प्रतिपादितम्?
   उत्तरम्— दशगुणात्मकं धर्मलक्षणम्।
5. **प्रश्नः—** के सन्ति दशगुणात्मकं धर्मलक्षणम्?
   उत्तरम्— धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः धीर्विद्या सत्यमक्रोधः।
6. **प्रश्नः—**याज्ञवल्क्यमतानुसारं धर्मलक्षणं किम्?
   उत्तरम्—यज्ञ-सदाचार-दम-अहिंसा-दान- स्वाध्यायादिदेशकालसापेक्षः।
7. **प्रश्नः—**धर्मशास्त्रं मुख्यतः किं प्रतिपादयति?
   उत्तरम्— पुरुषार्थचतुष्टयम्।
8. **प्रश्नः—** के सन्ति पुरुषार्थचतुष्टयम्?
   उत्तरम्— धर्मार्थकाममोक्षाः।
9. **प्रश्नः—**धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु प्रधानः कः?
   उत्तरम्— धर्मः।
10. **प्रश्नः—**स्मृतिकारैः धर्मस्य का परिभाषा कृता?
    उत्तरम्— स्वर्गसाधनस्य शास्त्रैकसमधिगम्यातिशयस्य धर्मत्वेन सर्वसम्प्रतिपत्तेः।
11. **प्रश्नः—**परोपकार एव धर्म इति केन प्रतिपादितम्?
    उत्तरम्— भगवता व्यासेन।
12. **प्रश्नः—**भारद्वाजमतानुसारं धर्मस्य लक्षणं किम्?
    उत्तरम्— 'सत्त्वगुणस्य अभिवृद्धिः एव धर्मः।
13. **प्रश्नः—**श्रीमद्भागवतपुराणानुसारं धर्मस्य लक्षणं किम्?
    उत्तरम्— येन भगवति अहेतुकी अप्रतिहता भक्तिः उत्पद्यते स धर्मः।
14. **प्रश्नः—** महाभारते धर्मलक्षणं किम्?
    उत्तरम्— येन वस्तुना प्राणिनः भरणं पोषणं धारणं वा भवति तद्वस्तु धर्मपदवाच्यः।
15. **प्रश्नः—**पूर्वमीमांसायां जैमिनिना धर्मलक्षणं किं प्रतिपादितम्?
    उत्तरम्— 'चोदनालक्षणोऽर्थो धर्मः।
16. **प्रश्नः—**आपदेवस्य धर्मलक्षणं किम्?
    उत्तरम्—वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः।
17. **प्रश्नः—**वेदबोधितेष्टसाधनताको धर्मः इति कस्य वचनम्?
    उत्तरम्— कृष्णयज्वनः।
18. **प्रश्नः—**वेदविहितकर्मजन्यो धर्मः इति कस्य धर्मलक्षणम्?
    उत्तरम्— तर्कसंग्रहकर्ता-अन्नम्भट्टस्य।
19. **प्रश्नः—**अर्थसंग्रहाधारेण लौगाक्षिभास्करस्य किं धर्मलक्षणम्?
    उत्तरम्— यागादिरेव धर्मः।
20. **प्रश्नः—**योगदर्शनस्य धर्मलक्षणं किम्?
    उत्तरम्— शौच-संतोष-तपःस्वाध्यायेश्वरप्रणिधानानि नियमाः धर्माः।
21. **प्रश्नः—**पतञ्जलिना महाभाष्ये धर्मस्य लक्षणं किं प्रतिपादितम्?
    उत्तरम्—ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।
22. **प्रश्नः—**वैशेषिकदर्शने धर्मलक्षणं किम्?
    उत्तरम्— यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।
23. **प्रश्नः—**भगवद्गीतानुसारं धर्मस्य लक्षणं किम्?
    उत्तरम्— नामोच्चारण-नामस्मरण-सर्वकर्मार्पण-सर्वत्र भगवद्भावादयः।
24. **प्रश्नः—**न्यायदर्शने धर्मलक्षणं किम्?
    उत्तरम्—धर्म आत्मनः एकः विशेष गुणः शुभप्रवृत्त्या।
25. **प्रश्नः—**सांख्यदर्शने धर्मलक्षणं किम्?
    उत्तरम्—शारीरिक-मानसिक-बौद्धिककर्मभिः अन्तःकरणे वैराग्यस्य शान्तेश्च जागरणम्।
26. **प्रश्नः—**वेदान्तदर्शने धर्मलक्षणं किम्?
    उत्तरम्— अन्तःकरणशुद्धिसाधकं कर्म धर्मः।
27. **प्रश्नः—**चार्वाकदर्शने धर्मलक्षणं किम्?
    उत्तरम्— धर्मः लौकिकजीविकायाः साधनमात्रः।
28. **प्रश्नः—**जैनमतानुसारं धर्मस्य किं लक्षणम्?
    उत्तरम्—पुण्यविशेषनिर्मितदेहारम्भकपुद्गलं नाम परमाणुः धर्मः।
29. **प्रश्नः—**बौद्धदर्शने धर्मलक्षणं किम्?
    उत्तरम्— चत्वारि आर्यसत्यैः मानवहृदि प्रवर्तते।

30. प्रश्नः—कानि सन्ति चत्वारि आर्यसत्यानि?
उत्तरम्— दुःखं क्षणिकता स्वलक्षणं शून्यञ्चेति।

31. प्रश्नः—भगवता मनुना षड्विधो धर्मः के प्रतिपादिताः?
उत्तरम्— 1. वर्णधर्मः, 2. आश्रमधर्मो, 3. वर्णाश्रमधर्मो, 4. गुणधर्मो, 5. निमित्तधर्मः, 6. सामान्यधर्मश्चेति।

(ख) भावनाविचारः-भावनानिरूपणम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

भवितुः प्रयोजकव्यापारवत्त्वं भावनात्वम्। मीमांसामते भवितुर्भवनानुकूलो भावकव्यापारविशेषः भावना। सा च भावना यजेदित्यत्र आख्यातत्वलिङ्त्वाभ्यां भूयते। एवञ्चान्योत्पादानुकूलो भावुकस्य व्यापारविशेषो धात्वर्थातिरिक्तः सकलधात्वर्थसंयुक्तत्वेन प्रतीयमानो भावनासामान्यम्। अत एव–

अन्योत्पादनानुकूलात्मा भावना साध्यरूपिणी।

वेदविहितयागानुष्ठानेन स्वर्गप्राप्तेः मान्यताया आश्रयः भावनासिद्धान्तः। भावनासिद्धान्तस्य क्षेत्रं दर्शनशास्त्रे, मनोविज्ञाने, व्याकरणे, भाषाविज्ञाने च परिव्याप्तं वर्तते। भावनाविषयमाधारीकृत्य मण्डनमिश्रः– **भावनाविवेकः** इति ग्रन्थस्य रचनां कृतवान्। तत्राऽऽख्यातलिङ्त्वाभ्यां भावनैवोच्यते।

भावनेयं शाब्दी-आर्थी-भेदात् द्विविधा। शाब्दीभावना पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः लिङ्त्वरूपेण लिङंशेन बोध्या वेदस्य प्रवृत्तिः। प्रयोजनेच्छाजनितक्रियाविषयव्यापारः आख्यातत्वांशेन बोध्या आर्थी भावना पुरुषस्य प्रवृत्तिः। द्वेऽपि भावने साध्यसाधनमितिकर्तव्यतारूपमंशत्रयमपेक्षते। यथा–यजेत स्वर्गकामः अत्र 'यजेत' इति पदे द्वौ अंशौ स्तः। 'यज्' धातुः 'त'प्रत्ययश्च। 'त'प्रत्ययेऽपि अंशद्वयं विद्यते–आख्यातत्वं, लिङ्त्वं च। प्रयोज्यप्रयोजकयोः व्यापार एव भावना। भावना नाम चोदना, प्रचोदना प्रेरणा, प्रवर्तना, व्यापारविशेषो वा। भावनायाः लक्षणं आपदेवानुसारं– 'भवितुर्भावनानुकूलीभावकव्यापारविशेषः भावना' इति।

अभिधा भावनामाहुरन्यामेव लिङादयः।
अर्थात्मभावना त्वन्या सर्वाख्यातस्य गोचरा॥

सा भावना द्विविधा भवति– 1. शाब्दीभावना, 2. आर्थीभावना च। शाब्दीभावना वेदस्य प्रवृत्तिरस्ति आर्थी च पुरुषस्य। अस्योदाहरणं यथा–'ओदनं पच' इति यज्ञदत्तः देवदत्तं प्रति कथयति। एतद् वाक्यं श्रुत्वा देवदत्तः पाकक्रियां सम्पादयति। अत्र देवदत्तस्य पाकक्रियायामुन्मुखीकरणाय अनुकूलप्रवर्तक-यज्ञदत्तस्याभिप्रायः शाब्दीभावना इत्युच्यते। पाकात्मकक्रियायाः अनुष्ठानार्थमनुकूला देवदत्तस्य उन्मुखता आर्थी भावना इति कथ्यते।

1. शाब्दीभावना–शाब्दी भावना नाम पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः। वेदस्य प्रवृत्तिरियं भावना यजेदित्यत्र लिङ्त्वरूपेण लिङ्त्वांशेनोच्यते। यच्च यस्मात् प्रतीयते तत्तस्य वाच्यम्, यथा–गोशब्दस्य गोत्वम्। स च व्यापारविशेषो लौकिकवाक्ये पुरुषनिष्ठोऽभिप्रायविशेषः, वैदिकवाक्ये तु पुरुषाभावाल्लिङादिशब्दनिष्ठ एव। अतएव शाब्दीभावनेति व्यवह्रियते। यथा स्वर्गकामो यजेदित्यत्र एतद्वाक्यं श्रुत्वा यागक्रियासम्पादकस्य याज्ञिकस्य यागक्रियामुन्मुखीकरणाय अनुकूलप्रवर्तकवेदवाक्यस्याभिप्रायो शाब्दी भावनेत्युच्यते। भावनेयं साध्यं साधनमितिकर्तव्यतारूपमंशत्रयमपेक्षते–किं भावयेत्, केन भावयेत्, कथं भावयेत् इति।

(क) साध्यम्–अंशत्रयोपेता आर्थी भावना साध्यत्वेन अन्वेति।

(ख) साधनम्–साधनाकांक्षायां लिङादिज्ञानं करणत्वेनान्वेति।

(ग) इतिकर्तव्यता–अर्थवादजन्यप्रशंसाज्ञाननिन्दाज्ञानं वा इति कर्तव्यतात्वेनान्वेति।

2. आर्थी भावना–आर्थी भावना नाम प्रयोजनेच्छाजनितक्रियाविषयव्यापारः। पुरुषप्रवृत्तिरूपेयं भावना आख्यातत्वांशेनोच्यते आख्यातसामान्यस्य व्यापारवाचित्वात्। यथा यजेदिति वाक्यं श्रुत्वा यजमानस्य यागविषयिणी प्रवृत्तिः आर्थी भावना। भावनेयं किं केन कथञ्च भावयेदिति साध्यसाधनमितिकर्तव्यतारूपमंशत्रयमपेक्षते। तत्र–

(क) साध्यम्–अत्र साध्याकांक्षायां स्वर्गादिफलं साध्यत्वेनान्वेति।

(ख) साधनम्-यागादिकरणत्वेनान्वेति।

(ग) इतिकर्तव्यता- प्रयाजाद्यङ्गजातमिति कर्तव्यतात्वेनान्वेति।

(ख) वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—किं भावनात्वम्?
उत्तरम्— भवितुः प्रयोजकव्यापारत्वं भावनात्वम्।

2. प्रश्नः—मीमांसामते का भावना?
उत्तरम्—भवितुर्भवनानुकूलो भावकव्यापारविशेषः भावना।

3. प्रश्नः—आख्यातत्वलिङ्त्वाभ्यां का भूयते?
उत्तरम्— भावना-लक्षणम्।

4. प्रश्नः—साध्यरूपिणी भावना का भवति?
उत्तरम्— अन्योत्पादनानुकूलात्मा भावना साध्यरूपिणी।

5. प्रश्नः—भावनासिद्धान्तः कः?
उत्तरम्— वेदविहितयागानुष्ठानेन स्वर्गप्राप्तेः मान्यताया आश्रयः।

6. प्रश्नः—भावनासिद्धान्तस्य कानि क्षेत्राणि सन्ति?
उत्तरम्— दर्शनशास्त्रे, मनोविज्ञाने, व्याकरणे, भाषाविज्ञाने च।

7. प्रश्नः—भावनाविषयमाधारीकृत्य मण्डनमिश्रः कस्य ग्रन्थस्य रचनां कृतवान्?
उत्तरम्— भावनाविवेकः।

8. प्रश्नः—भावनायाः कति भेदाः का च ताः?
उत्तरम्— शाब्दी-आर्थी-भेदात् द्विविधा।

9. प्रश्नः—का शाब्दीभावना?
उत्तरम्— पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः।

10. प्रश्नः—का आर्थी भावना?
उत्तरम्— प्रयोजनेच्छाजनितक्रियाविषयव्यापारः।

11. प्रश्नः—का भावना नामानि?
उत्तरम्— चोदना, प्रचोदना, प्रेरणा, प्रवर्तना, व्यापारविशेषो वा।

12. प्रश्नः—आपदेवानुसारं भावनायाः लक्षणं किम्?
उत्तरम्—भवितुर्भावनानुकूलीभावकव्यापारविशेषः भावना।

13. प्रश्नः—लौकिकवाक्ये व्यापारविशेषो कः?
उत्तरम्— पुरुषनिष्ठोऽभिप्रायविशेषः।

14. प्रश्नः—वैदिकवाक्ये व्यापारविशेषो कः?
उत्तरम्— पुरुषाभावाल्लिङादिशब्दनिष्ठः।

15. प्रश्नः—भावनेयं रूपमंशत्रयं किं अपेक्षते?
उत्तरम्— साध्यं साधनमितिकर्तव्यता च।

16. प्रश्नः—किं भावयेत् शाब्दी साध्यम्?
उत्तरम्—अंशत्रयोपेता आर्थी भावना साध्यत्वेन अन्वेति।

17. प्रश्नः—केन भावयेत् शाब्दी साधनम्?
उत्तरम्—साधनाकांक्षायां लिङादिज्ञानं करणत्वेनान्वेति।

18. प्रश्नः—कथं भावयेत् शाब्दी इतिकर्तव्यता?
उत्तरम्—अर्थवादजन्यप्रशंसाज्ञाननिन्दाज्ञानं वा इतिकर्तव्यतात्वेनान्वेति।

19. प्रश्नः—किं भावयेत् आर्थीसाध्यम्?
उत्तरम्—अत्र साध्याकांक्षायां स्वर्गादिफलं साध्यत्वेनान्वेति।

20. प्रश्नः—केन भावयेत् आर्थीसाधनम्?
उत्तरम्— यागादिकरणत्वेनान्वेति।

21. प्रश्नः—कथं भावयेत् आर्थी इतिकर्तव्यता?
उत्तरम्— प्रयाजाद्यङ्गजातमितिकर्तव्यतात्वेनान्वेति।

22. प्रश्नः—भावना कतिधा भवति?
उत्तरम्— षड्धा।

23. प्रश्नः—वेगो, भावना, स्थितिस्थापकश्चेति किमस्ति?
उत्तरम्— संस्कारस्त्रिविधः।

24. प्रश्नः—शाब्दी भावना त्रिविधा का?
उत्तरम्—भावनांशत्रयमपेक्षते साध्यं साधनमितिकर्तव्यताश्चेति।

25. प्रश्नः—स्थितिभावनायाः किं लक्षणम्?
उत्तरम्— तत्र पुरुषप्रवृत्त्यनुकूलभावकव्यापारविशेषः।

26. प्रश्नः—कस्य मते तु धात्वर्थो भावना आख्यातार्थे वर्तते?
उत्तरम्— मीमांसामते।

(ग) प्रामाण्यविचारः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

प्रमाकरणं प्रमाणम्। प्रमाणस्य भावः प्रामाण्यम्। प्रामाण्येऽप्रामाण्ये वा किं कारणमिति प्रश्नमाधारीकृत्य प्रचलितो वादः प्रामाण्यवादः। तच्च स्वतः परतः भेदाद्द्विविधः। यथा–1. कारणं प्रामाण्योत्पादकम् (स्वतः प्रामाण्यम्), 2. कारणं प्रामाण्यज्ञापकम् (परतः प्रामाण्यम्)। अत्र केचित् दार्शनिकाः प्रामाण्यस्य कारणं तदाश्रितज्ञानमेव स्वीकुर्वन्ति, अपरे च तस्य कारणं स्मृत्यनुमानादिकं साधनमामनन्ति। एवं यदा ज्ञानग्राहकसामग्र्या एव तस्य प्रामाण्यस्यापि बोधः जायते अर्थात् ज्ञानोत्पन्नज्ञाततधर्मेणैव ज्ञानस्य प्रामाण्यं गृह्यते, तदा स्वतःप्रामाण्यम्, अत एव ज्ञप्तौ स्वतस्त्वं नाम ज्ञानग्राहकसामग्रीमात्रग्राह्यत्वम्। तथा च–

ज्ञप्तौ परतस्त्वं नाम ज्ञानग्राहकसामग्र्येतरमात्रग्राह्यत्वम्। इत्थमेव अप्रामाण्यमपि स्वत उत्पद्यते तदा स्वतोऽप्रामाण्यमन्यथा परतोऽप्रामाण्यम्।

प्रामाण्याप्रामाण्ये विविधानि मतानि–सर्वदर्शनसंग्रहे माधवाचार्यः–

प्रमाणत्वाप्रमाणत्वे स्वतः सांख्याः समाश्रिताः।
नैयायिकास्ते परतः सौगताश्चरमं स्वतः।।
प्रथमं परतः प्राहुः प्रामाण्यं वेदवादिनः।
प्रमाणतां स्वतः प्राहुः परतश्चाप्रमाणताम्।।

(क) सांख्याः–प्रामाण्याप्रामाण्ये स्वतः एव। एतेषां मते सर्वमेव कार्यजातं सदेवोत्पद्यते, नासदिति प्रामाण्यमप्रामाण्यं च द्वयमपि स्वतः सदेवास्ति। तदुक्तं श्लोकवार्तिके–**स्वतोऽसतामसाध्यत्वात् केचिदाहुर्द्वयं स्वत** इति।

(ख) मीमांसकाः–प्रामाण्यं स्वतः अप्रामाण्यं परतः। तेषां मते प्रामाण्यज्ञाने ज्ञानग्राहकशब्दानामपेक्षा यत्र भवति तत्र प्रामाण्यस्य स्वतस्त्वं, यत्र च ज्ञानग्राहकसामग्रीभिन्नपदार्थानामपेक्षा तत्र प्रामाण्यस्य परतस्त्वम्। एतेषां मतानुसारं ज्ञानग्राहकपदार्थैः एव ज्ञानस्य प्रामाण्यस्य चोभयोः ग्रहणं भवति।

(ग) नैयायिकाः–प्रामाण्याप्रामाण्ये परतः एव। तेषां मते प्रमाणस्य उत्पत्तिः तदा भवति यदा ज्ञानोत्पादकानि सर्वाणि साधनानि विद्यन्ते, इन्द्रियाणि च समीचीनानि भवन्ति। एतानि साधनानि बाह्यानि भवन्ति। तस्मात् अनुमानद्वारा प्रामाण्यस्योत्पत्तिर्भवति। एवं प्रामाण्याप्रामाण्यं च परतस्त्वे भवतः।

(घ) बौद्धाः–प्रामाण्यं परतः अप्रामाण्यं स्वतः। तेषां मते विज्ञाने जातेऽपि व्यभिचारदर्शनात् न कश्चिन्निर्विचिकित्सं व्यवहारं कुर्वाणो दृश्यते। ज्ञानकरणानामिन्द्रियादीनां यदा गुणवत्वं दृश्यते तदा प्रामाण्यं निश्चित्य व्यवहारमाणो जनो दृश्यते। अतः स्वतः एवाप्रामाण्यज्ञानम्, पराधीनं तु तस्य प्रामाण्यम्।

(ङ) जैनाः–उत्पत्तिदशायां प्रामाण्याप्रामाण्यं परतः, ज्ञप्तिदशायां स्वतः। प्रामाण्यनिश्चितः क्वचित् स्वतः यथा–अभ्यासदशापन्नेस्वकरतलादिज्ञाने, स्नानपानावगाहनोदनयोपशमादौ अर्थक्रियानिर्भासात्मके प्रत्यक्षज्ञाने वा।

स्वतःप्रामाण्यम्–यदा ज्ञानग्राहकसामग्र्या एव तस्य प्रमाणस्यापि बोधः जायते तदा स्वतःप्रामाण्यम्, वस्तुतः ज्ञानस्य ग्रहणं ज्ञानोत्पन्नज्ञाततधर्मेणैव भवति, अथ च यदि तेनैव धर्मेण तस्य प्रामाण्यमपि गृह्यते तदा स्वतःप्रामाण्यम्। अतएव–'ज्ञप्तौ स्वतस्त्वं नाम ज्ञानग्राहकसामग्रीमात्रग्राह्यत्वम्' अतः स्वतःप्रामाण्ये कारणं प्रामाण्योत्पादकं भवति। स्वतः प्रामाण्यवादिषु मीमांसकाः सांख्याश्च प्रमुखाः। सांख्यास्तु सर्वमेव कार्यजातं स्वतः उत्पद्यते नासदिति स्वतो प्रामाण्यम्। मीमांसकास्तु अनवस्थादोषभयात् प्रत्यक्षज्ञानावसरे स्वत एव प्रामाण्यमपि स्वीकुर्वन्ति। स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम्। स्वतस्त्वं नाम ज्ञानग्राहकातिरिक्तानपेक्षित्वम्।

परतः प्रामाण्यम्–यदा ज्ञानग्राहकसामग्र्येतरसामग्र्या तस्य ज्ञानस्य प्रामाण्यबोधः जायते तदा परतः प्रामाण्यं भवति। अर्थात् परतः प्रामाण्ये ज्ञानस्य ज्ञानोत्पन्नज्ञाततधर्मादितरधर्मेण प्रामाण्यं गृह्यते। अत्र कारणमेव प्रामाण्यज्ञापकं भवति। उक्तञ्च–

'ज्ञप्तौ परतस्त्वं नाम ज्ञानग्राहकसामग्र्येतरमात्रग्राह्यत्वम्'। परतः प्रामाण्यवादिषु नैयायिकाः बौद्धाश्च प्रमुखाः। नैयायिकानां मते प्रथमं अयं घटः इति व्यवसायात्मकं ज्ञानं तदनन्तरं अहं घटं जानामि (मया घटः ज्ञातः) इति अनुव्यवसायः जायते। एतदनन्तरं प्रामाण्याप्रामाण्ययोः स्मृतिर्भवति, तदा प्रत्यक्षज्ञाने सन्देहोत्पद्यते, तदनन्तरं अनुमितिद्वारा प्रामाण्योत्पत्तिः जायते। अतः परतः एव प्रामाण्यमिति।

(ग) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—प्रमाणम् इत्यस्य का परिभाषा?
उत्तरम्—प्रमाकरणं प्रमाणम्, प्रमाणस्य भावः प्रामाण्यम्।
2. **प्रश्नः**—प्रामाण्येऽप्रामाण्ये वा किं कारणमिति प्रश्नमाधारीकृत्य प्रचलितो वादः कः?
उत्तरम्— प्रामाण्यवादः।
3. **प्रश्नः**— प्रामाण्यवादस्य कति भेदाः कानि च तानि?
उत्तरम्— द्विविधः, स्वतःप्रामाण्यम्, परतःप्रामाण्यम्।
4. **प्रश्नः**—स्वतःप्रामाण्यं किम्?
उत्तरम्— ज्ञानग्राहकसामग्र्या एव।
5. **प्रश्नः**—परतःप्रामाण्यं किम्?
उत्तरम्— ज्ञानग्राहकसामग्र्येतरसामग्र्या।
6. **प्रश्नः**—सांख्यमते स्वतस्त्वपरतस्त्वविचारः कः?
उत्तरम्— प्रामाण्याप्रामाण्ये स्वत एव।
7. **प्रश्नः**—मीमांसकमते स्वतस्त्वपरतस्त्वविचारः कः?
उत्तरम्— प्रामाण्यं स्वतः अप्रामाण्यं परतः।
8. **प्रश्नः**—नैयायिकमते स्वतस्त्वपरतस्त्वविचारः कः?
उत्तरम्— प्रामाण्याप्रामाण्ये परतः एव।
9. **प्रश्नः**—बौद्धमते स्वतस्त्वपरतस्त्वविचारः कः?
उत्तरम्— प्रामाण्यं परतः अप्रामाण्यं स्वतः।
10. **प्रश्नः**—जैनमते स्वतस्त्वपरतस्त्वविचारः कः?
उत्तरम्—उत्पत्तिदशायां प्रामाण्याप्रामाण्यं परतः, ज्ञप्तिदशायां स्वतः।

(घ) वर्णाश्रमधर्मः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) चतुर्वर्णधर्माणां वर्णनम्–चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः इत्यादिना स्मृतिग्रन्थेषु ब्राह्मणक्षत्रियविट्शूद्राणां धर्मः वर्णितः। धर्मः मुख्यतः द्विविधः–श्रौतधर्मः स्मार्तधर्मश्चेति। स्मार्तधर्मः षड्विधः–1. वर्णधर्मः, 2. आश्रमधर्मः, 3. वर्णाश्रमधर्मः, 4. गुणधर्मः, 5. निमित्तधर्मः, 6. साधारणधर्मश्चेति। तत्र आश्रमविशेषे वर्णविशेषस्य कृते निर्धारितः धर्मः वर्णाश्रमधर्मः इत्युच्यते। धर्मशास्त्राधारेण सर्वेषां मानवानां जीवनकाले चत्वारः आश्रमाः भवन्ति। यथा–1. ब्रह्मचर्याश्रमः, 2. गृहस्थाश्रमः, 3. वानप्रस्थाश्रमः, 4. संन्यासाश्रमश्चेति। सर्वेषु आश्रमेषु ब्राह्मणानां, क्षत्रियाणां, वैश्यानां, शूद्राणां धर्म एव वर्णाश्रमधर्म इति उच्यते। वर्णाश्रमधर्मविषयं मनुस्मृतौ, याज्ञवल्क्यस्मृतौ, पुराणादिषु सम्यक् प्रतिपादितमस्ति। तदाधारेण गृहस्थाश्रमस्य अधिकारिणः सर्वे वर्णाः, ब्रह्मचर्याश्रमस्य अधिकारिणः ब्राह्मण–क्षत्रिय–वैश्याः भवन्ति। वानप्रस्थाश्रमस्य अधिकारिणः ब्राह्मण–क्षत्रियौ भवतः। संन्यासाश्रमस्य च अधिकारिणः ब्राह्मणा एव भवन्ति। यथा (इत्यस्मात्) ब्राह्मणानां कृते मनुना–

अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत्।।

क्षत्रियाणां कृते क्षात्रधर्मो यथा–

प्रजानां रक्षणं दानमिज्याध्ययनमेव च।
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः।।

वैश्यानां कृते–

पशूनां रक्षणं दानमिज्याध्ययनमेव च।
वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च।।

शूद्राणां कृते–

एकमेव तु शूद्रस्य प्रभुकर्म समादिशत्।
एतेषामेव वर्णानां शुश्रूषामनुसूयया।।

इत्थं स्पष्टतया चतुर्वर्णानां धर्मनिर्देशः निर्दिष्टो वर्तते।

(ख) ब्राह्मणधर्मः–ब्रह्मणोऽपत्यं पुमान् इति ब्राह्मणः। आश्रमचतुष्टयवानयं वर्णः। ब्रह्ममुखदेशजातानां ब्राह्मणानां कृते षट्कर्माणि निर्धारितानि तानि च अध्ययनम् अध्यापनं यजनं याजनं दानं प्रतिग्रहश्च। तद्यथा मनुः–

अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत्।।
(1/88)

एतेषु षट्कर्मसु याजनाध्यापनप्रतिग्रहरूपाणि त्रीणि कर्माणि जीविकार्थं अन्यानि त्रीणि स्वभावजानि। (मुख्यतया) वेदाभ्यासः ब्राह्मणानां विशिष्टं कर्म। भगवद्गीतायां ब्राह्मणानां स्वाभाविककर्मप्रतिपादितं यथा–

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानविज्ञानमास्तिक्यं ब्रह्मकर्मस्वभावजम्।।

ब्राह्मणधर्मसम्बद्धानि पद्यानि–

ब्राह्मणस्य श्रेष्ठत्वे-मनुः–

उत्तमाङ्गोद्भवाज्ज्यैष्ठ्याद्ब्रह्मणश्चैव धारणात्।
सर्वस्यैवास्य सर्गस्य धर्मतः ब्राह्मणो प्रभुः।।

अपि च–

संस्कारस्य विशेषात्तु वर्णानां ब्राह्मणः प्रभुः।
भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः।
बुद्धिमत्सु नराः श्रेष्ठाः नरेषु ब्राह्मणाः स्मृताः।।

संन्यासाश्रमाधिकारः केवलं ब्राह्मणेभ्यो वर्तते–

ब्रह्मविद्भ्यः परं भूतं न किञ्चिदिह विद्यते।

(ग) क्षत्रियवर्णधर्मः–ब्रह्मबाहुदेशजातेषु क्षत्रियेषु क्षात्रधर्मः तिष्ठति। शौर्यं तेजः धृतिः दक्षता युद्धप्रियता दानभावः राजगुणश्च तेषां स्वाभाविकवृत्तयः। यथा गीतायाम्–

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्।।

क्षत्रिय एव राजा भवतीति धर्मशास्त्रानुरोधात् प्रजानां बाह्यान्तरशत्रुभिः रक्षणं दानं इज्याध्ययनं कामादिविषयेषु अनासक्तिः क्षत्रियाणां प्रमुखो धर्मः। अत एव मनुना–

प्रजानां रक्षणं दानमिज्याध्ययनमेव च।
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः।।

(1/89)

राजसूयाश्वमेधादी यज्ञानामनुष्ठानमपि क्षत्रियधर्मवता विधेयम्।

क्षत्रियसम्बद्धानि तथ्यानि–क्षदति रक्षति जनान् इति क्षत्रः।

शब्दकल्पद्रुमः–

क्षत्रजं सेवते कर्म वेदाध्ययनसंयुतः।
दानादानबहिर्यस्तु स वै क्षत्रिय उच्यते।।

(घ) वैश्यवर्णधर्मः–ब्रह्मोरूदेशजाततृतीयवर्णस्य वैश्यस्य लक्षणं हि तस्य धर्मं द्योतयति। यथा–

विशत्याशु पशुभ्यश्च कृष्यादानरुचिः शुचिः।
वेदाध्ययनसम्पन्नः स वैश्य इति संज्ञितः।।

अतः कृषिसम्पादनं पश्वादीनां रक्षणं वाणिज्यसञ्चालनं आस्तिकता, दर्पराहित्यं ब्रह्मसेवनञ्च वैश्यानां धर्मः। अत एव गीतायाम्–

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्मस्वभावजम्।
वाणिज्यं कुसीदञ्च अदम्भो ब्रह्मसेवनम्।।

मनुनाऽपि–

पशूनां रक्षणं दानमिज्याध्ययनमेव च।
वाणिज्यं कुसीदञ्च वैश्यस्य कृषिमेव च।

(1/90)

इत्थं वैश्यधर्मः प्रतिपादितः वर्तते धर्मशास्त्रेषु।

(ङ) शूद्रवर्णधर्मः–ब्रह्मपादाज्जातानां शूद्राणां धर्मस्तु ब्राह्मणादित्रयाणां वर्णानां सेवा। अत एव गीतायां भगवतोक्तम्–

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्।

कारुकर्मपाककर्मादयः शूद्रस्य धर्म इति गरुडपुराणे यथा–

शुश्रूषैव द्विजातीनां शूद्राणां धर्मसाधनम्।
कारुकर्म तथाजीवः पाकयज्ञोऽपि धर्मतः।।

वर्णोऽयं वेदपवित्रेभ्यो यज्ञसामान्यभागग्रहणात् बहिष्कृतः। मद्यपानेन ब्राह्मणीगमनेन वेदाक्षरविचारेण च शूद्राः चाण्डालतां प्राप्नुवन्ति। अशौचमनृतस्तेयादिगुणैर्हीनाः शूद्राणां साहसिकगुणाः इति भागवते प्राप्यते यथा–

अशौचमनृतं स्तेयं नास्ति च शुष्कविग्रहः।
कामः क्रोधश्च तर्षश्च स्वभावोऽन्तेवसायिनाम्।।

अन्यत्प्रमाणमपि, मनुना तु–

एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्।
एतेषामेव वर्णानां शुश्रूषामनुसूयया।।

(1/91)

(च) आश्रमाणां परिचयः– (क) ब्रह्मचर्याश्रमः–जन्मतः पञ्चविंशतिवर्षपर्यन्तं ब्रह्मचर्याश्रमकालः भवतीति धर्मशास्त्राभिमतम्। जातकर्मनामकरणोपनयनसमावर्तनादि-संस्कारैः आश्रमेऽस्मिन् ब्राह्मणादीनां शरीरं सांसारिकाध्यात्मिकधार्मिकदृष्ट्या पवित्रीक्रियते। आश्रमेऽस्मिन् मृगचर्मादीनां वस्त्राणां दण्डमेखलायज्ञोपवीतादीनां धारणं छत्रोपानहधारणञ्च गन्धमाल्यनृत्यगीतालापमैथुनादीनां त्यागः सर्वेभ्यो ब्राह्मणक्षत्रियविड्भ्यो विधीयते। तद्यथा–

अजिनं दण्डकाष्ठञ्च मेखलाञ्चोपवीतकम्।
धारयेदप्रमत्तश्च ब्रह्मचारी समाहितः।।
छत्रञ्चोपानहञ्चैव गन्धमाल्यादिवर्जयेत्।
नृत्यगीतमथालापं मैथुनञ्च विवर्जयेत्।।

(लघुहारीतस्मृतिः)

इन्द्रियनिग्रहपूर्वकं रागद्वेषादिविषयान् परित्यज्य गुरुसान्निध्यपूर्वकं वेदवेदाङ्गानामध्ययनं (षडंगो वेदोऽध्येयो ज्ञेयश्च) सन्ध्योपासनञ्च ब्रह्मचर्याश्रमधर्मः। भोजने मांसादीनां परित्यागपूर्वकं भिक्षाटनं आश्रमेऽस्मिन् विधीयते।

ब्रह्मचर्याश्रममहत्त्वम्–भारतीयसंस्कृतौ आश्रम-व्यवस्थायां सर्वेषां मूलकत्वेन धर्माचाराहिंसासत्यव्रतादीनां पोषकत्वेन ब्रह्मचर्याश्रमः निम्नलिखितकारणैरपि महत्त्वपूर्णं स्थानं बिभर्ति–

1. धर्मशास्त्रप्रतिपादितानां जातकर्मनामकरणोपनयन-समावर्तनादीनां विधायकः।
2. षडंगो वेदोध्येयो ज्ञेयश्चेत्यादिना गुरुसान्निध्यपूर्वकं वेद-वेदाङ्गानां अध्ययने संरक्षकश्च।
3. आचाराहिंसासमभावशिष्टाचारादीनां पालनं इन्द्रियनिग्रहपूर्वकं वीर्यरक्षणञ्च आश्रमेऽस्मिन् विधीयते।
4. विप्रो वृक्षः तस्य मूलं च सन्ध्येत्यादिना सन्ध्या-गायत्र्युपासनया धर्मबोधकत्वेन महत्त्वम्।

अन्यश्लोकाः ब्रह्मचर्यविषयकाः–

वर्जयेन्मधुमांसं च गन्धं माल्यं रसान्स्त्रियः।
शुक्तानि यानि सर्वाणि प्राणिनां चैव हिंसनम्।।

(मनुस्मृते)

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः।

(शब्दकल्पद्रुमे)

आश्रमे ब्राह्मणादीनां वस्त्राणि–

कार्ष्णरौरववास्तानि चर्माणि ब्रह्मचारिणः।
वसीरन्नानुपूर्व्येण शाणक्षामविकानि च।।
मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या शणतान्तवी।
मुञ्जालाभे तु कर्तव्याः कुशाश्मन्तकबल्वजैः।।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा।
कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृत्तं त्रिवृत्।।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्।
क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवी।।
ब्राह्मणः बैल्वपालाशौ क्षत्रयो वाटखादिरौ।
पैलवौदुम्बरो वैश्यो दण्डानर्हन्ति धर्मतः।।

दक्षस्मृतिः–

स्वीकरोति यदा वेदं चरेद्वेदव्रतानि च।
ब्रह्मचारी भवेत्तावदूर्ध्वं स्नातो भवेद् गृही।।

द्विविधाः ब्रह्मचारिणः–

उपकुर्वाणकस्त्वाद्यो द्वितीयो नैष्ठिकः मही।

(ख) गृहस्थाश्रमः–समावर्तनसंस्कारादनन्तरं ब्राह्मणादिवर्णाः स्वकुलोचितां वर्णोचितां च सुलक्षणां भार्यां परिगृह्य विवाहसंस्कारेण संस्कृताः सन्तः गृहस्थाश्रमे प्रविशन्ति। आश्रमेऽस्मिन् स्ववर्णोचितं कर्मपालनं सन्ध्याग्निहोत्रदर्शादीनां यज्ञानां विधानं परिवारपोषणञ्च परमलक्ष्यम्। गृहस्थानां कृते देवभूतपितृब्रह्मनृयज्ञानां (पञ्चमहायज्ञानाम्) विधानं कर्तव्यमिति धर्मशास्त्राभिमतम्। तत्रोच्यते–

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्।।
पञ्चैतान्यो महायज्ञान् यो हापयति शक्तितः।
स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते।।

एवमेव हिरण्यादिदानं वैश्वदेवबलिकर्मशिक्षा-कृषिकर्माण्यपि गृहस्थाश्रमे प्रशस्तानि। पित्रादीन्नरकादुद्धारार्थं पितृपुत्रऋणान्मुक्तये च पुत्ररत्नप्राप्तिः, वंशवृद्धिः गृहस्थाश्रमस्य मूलोद्देश्यमिति दिक्।

गृहस्थाश्रमस्य वैशिष्ट्यम्–

यथा वायुः समाश्रित्य वर्तन्ते सर्वजन्तवः।
तथा गृहस्थमाश्रित्य वर्तन्ते सर्वे आश्रमाः।।

इति मनुवचनात् सर्वे आश्रमाः गार्हस्थ्यमूलका एव। गृहस्थ एव यज्ञः याजनं तपः दानं कृषिकर्म च विदधाति, अतः गृहस्थप्रसादादेव त्रयोऽप्याश्रमाः पुष्टिताः भवन्ति–

गृहस्थ एव यजते गृहस्थस्तप्यते तपः।
दाता चैव गृहस्थः स्यात् तस्माच्छ्रेष्ठो गृहाश्रमी।।

(शंखस्मृतिः)

गृहस्थाश्रमादेव धर्मव्यवस्था परिचलति, कुलवृद्धिः जायते, समाजे वर्णसङ्करता नोत्पद्यते इति महाभारतेऽप्युक्तम्। पित्रादीनामुद्धारार्थं पुत्ररत्नप्राप्तये पितृऋणाद् मुक्तये च आश्रमोऽयं महत्त्वपूर्णः। पञ्चमहायज्ञानां पालनेन अनुष्ठानेन वा सामाजिकव्यवस्थायाः संचालने चतुर्विधपुरुषार्थप्राप्तये गृहस्थाश्रमोऽयं विशिष्टं स्थानं भजते, यथा हि व्यासस्मृतौ–

गृहाश्रमात् परो धर्मो नास्ति नास्ति पुनः पुनः।

गृहस्थाश्रममधिकृत्य श्लोकाः–

हिरण्यदानं गोदानं पृथिवीदानमेव च।
एष धर्मो गृहस्थस्य सारभूत उदाहृतः।।

(लघुहारीतस्मृतिः)

सर्वेषामपि चैतेषां वेदस्मृतिविधानतः।
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् बिभर्ति हि॥
यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम्।
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्॥

(मनुस्मृतिः)

चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः।
[illegible]॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः॥

(मनुस्मृतिः)

[illegible]—

[illegible]।
[illegible]॥
[illegible]।
[illegible] च॥

([illegible])

[illegible]।(वसिष्ठ)

(ग) वानप्रस्थाश्रमः—गृहस्थस्य यदा [illegible] [illegible]। [illegible]—

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः।
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्॥

[illegible]—

[illegible] च।
[illegible] च॥

[illegible]।

[illegible]—

अग्निहोत्रं समादाय गृह्यं चाग्निपरिच्छदम्।
ग्रामादरण्यं निःसृत्य निवसेन्नियतेन्द्रियः॥

स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समाहितः।
दाता नित्यमनादाता सर्वभूतानुकम्पकः॥

(मनुस्मृतिः)

कृतकृत्यस्य वानप्रस्थम्। (बुधस्मृतिः)

[illegible] कृत्वा [illegible] [illegible] वः करोति स वानप्रस्थः। (शब्दकल्पद्रुमः)

भूमौ मूलफलाशित्वं स्वाध्यायस्तप एव च।
संविभागो यथान्यायं धर्मोऽयं वनवासिनः॥

(भागवतम्)

(घ) संन्यासाश्रमः—आयुषः तृतीयभागं वानप्रस्थाश्रमे [illegible] [illegible] विरक्तश्च भवन्ति तेषां कृते आयुषः चतुर्थभागः संन्यासाश्रमं परिव्राजकत्वेन [illegible] [illegible] यथा—

वनेषु च विहृत्यैवं तृतीयं भागमायुषः।
चतुर्थमायुषो भागं त्यक्त्वा सङ्गान् परिव्रजेत्॥

[illegible]। देव-पितृ-ऋषीणां ऋणत्रयं [illegible] चतुर्थे संन्यासाश्रमे [illegible]। [illegible] अग्निं स्वात्मनि संगोप्य मंत्रवित् पुरुषः संन्यासं [illegible], [illegible] यथा—

अग्नीनात्मनि संस्थाप्य द्विजः प्रव्रजितो भवेत्।
योगाभ्यासरतः शान्तो ब्रह्मविद्यापरायणः॥

[illegible] देवपितृमनुष्येभ्यो आत्मने च यज्ञं (श्राद्धं) कुर्यात्। [illegible] विधेयम्। [illegible] दण्डं [illegible] केशनिर्मितरज्जोः [illegible] कर्तव्यम्।

[illegible]:—

विरक्तस्य पारिव्राज्यम्। (बुधस्मृतिः)

[illegible] यस्तु ध्यानपरो भवेत्।
[illegible] स विज्ञेयो वानप्रस्थाश्रमे स्थितः॥

(कल्पद्रुमं)

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः॥

(मनुः-6/35)

प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम्।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्॥

(मनुः-6/38)

अधीत्य विधिवत् वेदान्पुत्रांश्चोत्पाद्य धर्मतः।
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्॥

(मनुः-6/39)

त्रिदण्डं वैष्णवं सम्यक् सन्ततं समपर्वकम्।
वेष्टितं कृष्णगोवालरज्जुमच्चतुरङ्गुलम्॥

(हारीतस्मृतिः)

(च) वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—स्मृतिग्रन्थेषु गुणकर्मविभागशः केषां धर्मो वर्णितः?
उत्तरम्— ब्राह्मणक्षत्रियविट्शूद्राणां धर्मः वर्णितः।

2. प्रश्नः—धर्मः मुख्यतः कतिविधः के च ते?
उत्तरम्— द्विविधः, श्रौतधर्मः स्मार्तधर्मश्चेति।

3. प्रश्नः—स्मार्तधर्मः कतिविधः?
उत्तरम्— षड्विधः।

4. प्रश्नः—के सन्ति षड्विधः स्मार्तधर्मः?
उत्तरम्— 1. वर्णधर्मः, 2. आश्रमधर्मः, 3. वर्णाश्रमधर्मः, 4. गुणधर्मः, 5. निमित्तधर्मः, 6. साधारणधर्मश्चेति।

5. प्रश्नः—आश्रमविशेषं वर्णविशेषस्य कृते निर्धारितः धर्मः कः?
उत्तरम्— वर्णाश्रमधर्मः।

6. प्रश्नः—जीवनकाले कति आश्रमाः भवन्ति?
उत्तरम्— चत्वारः।

7. प्रश्नः—चत्वारो आश्रमाः के सन्ति?
उत्तरम्— 1. ब्रह्मचर्याश्रमः, 2. गृहस्थाश्रमः, 3. वानप्रस्थाश्रमः, 4. संन्यासाश्रमश्चेति।

8. प्रश्नः—सर्वेषु आश्रमेषु ब्राह्मणानां, क्षत्रियाणां, वैश्यानां, शूद्राणां धर्मं किं कथ्यते?
उत्तरम्— वर्णाश्रमधर्मः।

9. प्रश्नः—गृहस्थाश्रमस्य अधिकारिणः के भवन्ति?
उत्तरम्— सर्वे वर्णाः।

10. प्रश्नः—ब्रह्मचर्याश्रमस्य अधिकारिणः के भवन्ति?
उत्तरम्— ब्राह्मण-क्षत्रिय-वैश्याः।

11. प्रश्नः—वानप्रस्थाश्रमस्य अधिकारिणौ कौ भवतः?
उत्तरम्— ब्राह्मण-क्षत्रियौ भवतः।

12. प्रश्नः—संन्यासाश्रमस्य अधिकारी कः?
उत्तरम्— ब्राह्मणा एव।

13. प्रश्नः—वर्णाश्रमधर्मविषयं सम्यक् कुत्र प्रतिपादितमस्ति?
उत्तरम्— मनुस्मृतौ, याज्ञवल्क्यस्मृतौ, पुराणादिषु।

14. प्रश्नः—ब्राह्मणानां कृते निर्धारितानि षट्कर्माणि कानि सन्ति?
उत्तरम्—अध्ययनम् अध्यापनं यजनं याजनं दानं प्रतिग्रहश्च।

15. प्रश्नः—क्षत्रियाणां कृते निर्धारितानि कर्माणि कानि सन्ति?
उत्तरम्— शौर्यं तेजः धृतिः दक्षता युद्धप्रियता दानभावः राजगुणश्च।

16. प्रश्नः—क्षत्रियसम्बद्धानि तथ्यानि कानि?
उत्तरम्— क्षदति रक्षति जनान् इति क्षत्रः।

17. प्रश्नः—वैश्यानां कृते निर्धारितानि कर्माणि कानि सन्ति?
उत्तरम्—कृषिसम्पादनं पश्वादीनां रक्षणं वाणिज्यसञ्चालनं आस्तिकता।

18. प्रश्नः—शूद्राणां कृते निर्धारितानि कर्माणि कानि सन्ति?
उत्तरम्— परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्।

19. प्रश्नः—धर्मशास्त्राभिमतं ब्रह्मचर्याश्रमकालः कः?
उत्तरम्— जन्मतः पञ्चविंशतिवर्षपर्यन्तम्।

20. प्रश्नः—जातकर्मनामकरणोपनयनसमावर्तनादिसंस्काराः कस्मिन् काले निर्धारितः?
उत्तरम्— ब्रह्मचर्याश्रमकाले।

21. प्रश्नः—ब्रह्मचर्याश्रमकाले विहितसंस्कारैः किं फलं भवति?
उत्तरम्— शरीरं सांसारिकाध्यात्मिकधार्मिकदृष्ट्या पवित्रीक्रियते।

22. प्रश्नः—ब्रह्मचर्याश्रमधर्मः किं विधीयते?
उत्तरम्—इन्द्रियनिग्रहपूर्वकं रागद्वेषादिविषयान् परित्यज्य गुरुसान्निध्यपूर्वकं वेदवेदाङ्गानामध्ययनम्।

23. प्रश्नः—सर्वे आश्रमाः गार्हस्थ्यमूलकाः इति कस्य वचनम्?
उत्तरम्— मनु-महोदयस्य।

24. **प्रश्नः**—गृहस्थाश्रमस्य किं परमलक्ष्यम्?
उत्तरम्—स्ववर्णोचितं कर्मपालनं सन्ध्याग्निहोत्र-दर्शादीनां यज्ञानां विधानं परिवारपोषणञ्च।

25. **प्रश्नः**—धर्मशास्त्राभिमतं गृहस्थानां कृते पञ्चमहायज्ञाः के सन्ति?
उत्तरम्— देवभूतपितृब्रह्मनृयज्ञाः।

26. **प्रश्नः**—गृहस्थाश्रमे कानि प्रशस्तानि सन्ति?
उत्तरम्—हिरण्यादिदानं वैश्वदेवबलिकर्मशिक्षा-कृषिकर्माणि।

27. **प्रश्नः**—"यजनं याजनं तपः दानं कृषिकर्म च" कं विदधाति?
उत्तरम्— गृहस्था एव।

28. **प्रश्नः**—पितृऋणाद् मुक्तये को आश्रमः महत्त्वपूर्णः?
उत्तरम्— गृहस्थाश्रमः।

29. **प्रश्नः**—चतुर्विधपुरुषार्थप्राप्तये कस्य आश्रमस्य विशिष्टं स्थानम्?
उत्तरम्— गृहस्थाश्रमस्य।

30. **प्रश्नः**—धर्मशास्त्राभिमतं वानप्रस्थाश्रमस्य किं लक्षणम्?
उत्तरम्— केशपलितं अपत्यस्यापि अपत्यं भवेत्तदा भार्यया सह वनमाश्रयेदिति।

31. **प्रश्नः**—शब्दकल्पद्रुमे वानप्रस्थाश्रमस्य का परिभाषा?
उत्तरम्— पुत्रमुत्पाद्य वनवासं कृत्वा अकृष्टपच्यफलादि भक्षयित्वा ईश्वराराधनम्।

32. **प्रश्नः**—श्रौतकर्मणां सम्पादनं कस्मिन् आश्रमे भवति?
उत्तरम्— वानप्रस्थाश्रमे।

33. **प्रश्नः**—ब्रह्मबोधकः मोक्षसाधनभूतो आश्रमः कः?
उत्तरम्— संन्यासाश्रमः।

34. **प्रश्नः**—देवपितृ-ऋषीणां त्रयाणां ऋणमपाकृत्य कस्मिन् आश्रमे प्रवेष्टव्यः?
उत्तरम्— चतुर्थे संन्यासाश्रमे।

35. **प्रश्नः**—संन्यासाश्रमे परिव्राजकत्वेन यापनीमिति इति कस्य अभिमतम्?
उत्तरम्— धर्मशास्त्राभिमतम्।

36. **प्रश्नः**—देवपितृमानुषेभ्यो आत्मने च यज्ञं (श्राद्धं) कस्मिन् आश्रमे कुर्यात्?
उत्तरम्— संन्यासाश्रमे।

37. **प्रश्नः**—स्नानध्यानजपव्रतोपवासादीनामनुष्ठानं कस्मिन् आश्रमे विधेयम्?
उत्तरम्— संन्यासाश्रमे।

38. **प्रश्नः**—दण्डं श्यामवर्णगो केशनिर्मितरज्जोः धारणं भिक्षाटनञ्च कस्मिन् आश्रमे कर्तव्यम्?
उत्तरम्— संन्यासाश्रमे।

(ङ) अशौच-निर्णयः– (अशौचविचारः) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

शुद्धेरभावं नाम अशौचम्। शुचिर्नाम विपुलं विशुद्धं पवित्रीकृतं वा। शौचं नाम शुद्धत्वम्। अत एव मित्रमिश्रेण–

सन्ध्यापञ्चकमहायज्ञादिकर्मानधिकारसम्पादको अतिशयविशेषमशौचम्।

तच्चाशौचं जननमरणभेदाभ्यां द्विविधम्। जातकस्य जन्मना जन्यः जननाशौचं मृत्युजन्यश्च मरणाशौचम्। अशौचं सपिण्डबान्धवगतं एकपुरुषगतञ्च भवति। अनुलोमविवाह-गर्भस्रावऋतुस्रावादिभिरुत्पन्नं एकपुरुषगतं, जननमरणमशौचञ्च सपिण्डबान्धवगतम्। यथा–

यथेदं शावमाशौचं सपिण्डेषु विधीयते।
जननेऽप्ययमेवं स्यान्निपुणं शुद्धिमिच्छताम्॥
(मनुस्मृतौ)

ब्राह्मणादिवर्णानां क्रमशः दशद्वादशपञ्चदशत्रिंशद्दिनैर्भ्यो अशौचः निर्वर्तते। ब्राह्मणेषु समानोदकानां त्रिरात्रपर्यन्तमशौचम्। शुद्धिमयूखे सर्वेषां वर्णानां दशदिने एव अशौचनिवृत्तिरिति प्रतिपादितं यथा–

सर्वेषामेव वर्णानां सूतके मृतके तथा।
दशाहाच्छुद्धिरेतेषामिति शातातपोऽब्रवीत्॥

भट्टाचार्यमतानुसारं–**शुद्धेरभाव एव अशौचम्।** शुद्धिर्नाम पापक्षयं धर्मयोग्यत्वं च। सपिण्डेषु बान्धवेषु च जन्ममृत्युजन्याशुद्धिनिवारणमेव पापक्षयमिति तेन प्रतिपादितम्। रुद्रधरमतानुसारेण– शुद्धिः मानवस्य काऽपि सहजात-प्रवृत्तिरस्ति या सर्वाणि विहितकर्माणि कर्तुं योग्यतामुत्पादयति। तस्य विपरीतं तु जननमरणादिना उत्पन्नम् अशौचम्।

अशौचनिर्णयक्रमे दत्तककृत्रिमादिपुत्रान् अभिधाय ब्रह्मपुराणे कथितमस्ति–

भिन्नगोत्राः पृथक् पिण्डाः पृथुकरास्तथा।
सूतके मृतके चैव त्र्यहाशौचस्य भागिनि॥
अनौरसेषु पुत्रेषु जातेषु च मृतेषु च।
परपूर्वासु भार्यासु प्रसूतासु मृतासु च॥

अशौचविषयकाः प्रमाणश्लोकाः–

लोपभाजः चतुर्थाद्याः पित्राद्याः पिण्डभागिनः।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम्॥
(मत्स्यपुराणम्)

सपिण्डता तु पुरुषे सप्तमे विनिवर्तते।
समानोदकभावश्च जन्मनाम्नोरवेदने॥
(मनुः5/60)

वैदिककर्मानर्हत्वप्रयोजकसंस्कारविशेषरूपमशौचम्।
(कल्पद्रुमः)

शुद्ध्येद्द्विजो दशाहेन द्वादशाहेन भूमिपः।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति॥
(मनुः)

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च।
प्रेतपिण्डक्रियावर्जमशौचे विनिवर्तते॥
(शङ्खस्मृतिः)

श्रीगदाधरपद्धतौ जन्ममरणाद्यशौचविचारावसरे लिखितमस्ति यत्–"शौचं द्विविधमुक्तं यथा बाह्याशौच-माभ्यन्तरिणमशौचं च"। देवलेनाप्युक्तं "अशौचं द्विविधं बाह्यं चाभ्यन्तरं तथा" अत्र बाह्याशौचं यैः कारणैः भवति तानि कारणानि यथा–जननम्, मरणम्, अनुलोमविवाहः, शिशुमृत्युः, गर्भस्रवः, गर्भपातनम्, ऋतुस्राव इत्यादीनि। अशौचं कदाचित् सपिण्डबान्धवगतम्, कदाचिच्च एकपुरुषगतम्।

(क) जननाशौचम्–जातकस्य जन्मना जन्यमशौचं जननाशौचम्। जननाशौचं मुख्यतया मातापित्रोरेव भवति, तथापि मनुना तु सपिण्डानां कृतेऽपि जननाशौचं जायते इति प्रोक्तं यथा–

यथेदं शावमाशौचं सपिण्डेषु विधीयते।
जननेऽप्ययमेवं स्यान्निपुणं शुद्धिमिच्छताम्॥

शौचेऽपि विशेषतया जनननिमित्तस्पृश्यत्वं मातुरेव दशरात्रम् पिता तु स्नानात्स्पृश्यो भवति। तद्यथा–

सूतकं मातुरेव स्यादपास्पृश्य पिता शुचिः।

अशौचे दशदिनपर्यन्तं पञ्चमहायज्ञेभ्यः प्रतिषेधः, कुलान्नभोजनं दानप्रतिग्रहयज्ञस्वाध्यायादिभिः निवृत्तिर्न भवेत्। तच्च–

उभयत्र दशाहानि कुलस्यान्नं न भुज्यते।
दानं प्रतिग्रहो यज्ञः स्वाध्यायश्च निवर्तते॥

इत्थमशौचात् निवृत्तिः सपिण्डानां दशरात्रं समानोदकानाञ्च त्रिरात्रमिति धर्मशास्त्राभिमतम्।

(ख) मरणाशौचम्–जातकस्य मृत्युना जन्यमशौचं मरणाशौचम्। सामान्यतया अशौचमेतत् सपिण्डेषु विधीयते, यथा हि–

यथेदं शावमाशौचं सपिण्डेषु विधीयते। (मनुस्मृतिः)

मरणाशौचे समानोदकानां त्रिरात्रं सपिण्डानाञ्च दशदिनाच्छुद्धिः। तद्यथा–

त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते।

अथ च ऊनद्विवर्षात् अकृतचूडाकर्मणः मरणे अहोरात्रेणैव शुद्धिः अकृतोपनयनसंस्कारस्य मरणाशौचं त्रिदिनात् भवति। तद्यथा–

अहोरात्रात्तथा शुद्धिर्बाले त्वकृतचूडके।
तथैवानुपनीते तु त्र्यहाच्छुद्ध्यन्ति बान्धवाः॥
(शङ्खस्मृतौ)

गर्भस्रावे गर्भमासप्रमितमशौचमिति, अविवाहितकन्यानां शूद्राणाञ्च मरणाशौचं त्रिदिवसात्मकं भवति। इत्थमेव गुरुगुरुपुत्रसहब्रह्मचारिणामपि मरणाशौचं धर्मशास्त्रे वर्णितमस्ति। अशौचे निवृत्तिः सर्वेषां दशदिनेष्वेवेति शुद्धिमयूखः।

मरणाशौचः–

नृणामकृतचूडानां विशुद्धिर्नैशिकी स्मृता।
निवृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते॥
सब्रह्मचारिण्येकाहमतीते क्षपणं स्मृतम्॥
मातामहे त्रिरात्रं तु एकाहं त्वसपिण्डतः॥
गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन्।
प्रेतहारैः समं तत्र दशरात्रेण शुद्ध्यति॥
स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुद्ध्यन्ति बान्धवाः॥
(मनुस्मृतौ)

त्रिरात्रमहोरात्रमेकरात्रमिति कुर्वीत आचार्योपाध्यायतत्पुत्रेषु

इति बोधायनः आचार्यः गुरूणां भूते सति त्रिरात्रिपर्यन्तम् अशौचनिर्णयं कृतम्। एवं च मातुले मातामहे श्वसुरे मित्रे गुरौ गुर्वङ्गनासु च त्रिरात्रमशौचं कुर्यात्। यथोच्यते–

मातुले श्वसुरे मित्रे गुरौ गुर्वङ्गनासु च।
अशौचम्पक्षिणी रात्रिर्मृतो मातामहो यदि।

गर्भस्रावे तु–

रात्रिभिर्मासतुल्याभिः गर्भस्रावे विशुद्ध्यति।।
(शंखस्मृतिः)

(ग) शौचनिवृत्तिः–(अशौचविषयकानि प्रमाणपद्यानि)

कालवशात् शौचनिवृत्तिरिति पूर्ववदेव। यथा–

शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति।।

शुद्धिमयूखे हि–

सर्वेषामेव वर्णानां सूतके मृतके तथा।
दशाहाच्छुद्धिरेतेषामिति शातातपोऽब्रवीत्।।

पिण्डदानम्–मरणाशौचावसरे शुद्ध्यर्थं पिण्डदानं यथा विज्ञानेश्वरः–

पिण्डपितृयज्ञप्रक्रियया प्रेताय दिनत्रयं पिण्डरूपमन्नं तूष्णीं क्षितौ देयम्।

मरीचिरपि–

प्रेतपिण्डं बहिर्दद्याद्दर्भमन्त्रविवर्जितम्।
प्रागुदीच्यां चरूं कृत्वा स्नातः प्रयतमानसः।।

पिण्डदानं प्रथमदिवसे यः करोति सैव दशाहेऽपि–

असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्।
प्रथमेऽह्नि यो दद्यात् स दशाहं समापयेत्।।
भूमौ माल्यं पिण्डं पानीयमुपले वा दद्युः।
(शंखस्मृतौ च)

पुत्राभावे मातृसपिण्डाः शिष्याः पुत्राधिक्ये च ज्येष्ठपुत्रः पिण्डदानं कुर्यात्। ब्राह्मणस्य दशपिण्डाः, क्षत्रियस्य द्वादश पिण्डाः भवन्ति। यथा–

नवभिर्दिवसैर्दद्यान्नवपिण्डान् समाहितः।
दशमं पिण्डमुत्सृज्य रात्रिशेषे शुचिर्भवेत्।।

उदकदानम्–स्नात्वा अञ्जलीपूर्णजलदानं दीयते। दशाहदिने प्रेतायोदकं दत्वा शुद्धिर्भवति। मनुनाऽपि–

निर्देशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः।।

क्षौरकर्म–अस्थिचयनञ्च–प्रथमादिदिनेषु अस्थिचयनं कार्यमिति संवर्त्तः यथा–

प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा।
अस्थिसञ्चयनं कार्यं दिने तद्गोत्रजैस्सह।।

द्वितीयदिनेऽपि अस्थिचयनं क्रियते। वैष्णवे उक्तं यत्–

चतुर्थे दिवसेऽस्थिसंचयनं कुर्यात् तेषां च गङ्गाम्भसि प्रक्षेप इति।

केशवपनप्रसङ्गे देवालयस्मृतौ उक्तं यत्–

दशमेऽहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत्।
तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च।।

अपि च–

द्वितीयेऽहनि कर्तव्यं क्षौरकर्म प्रयत्नतः।
तृतीये पञ्चमे वाऽपि सप्तमे वाऽऽप्रदानतः।।

अशौचान्ते–

विप्रः शुद्ध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधम्।
वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः।।
(मनुस्मृतौ)

असपिण्डेषु–

असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्।
विशुद्ध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान्।।
(मनुस्मृति–5/101)

राज्ञां कृते विशेषम्–

न राज्ञामघदोषोऽस्ति व्रतिनां न च सत्रिणाम्।
ऐन्द्रं स्थानमुपासीना ब्रह्मभूता हिते सदा।।
(मनुस्मृतौ)

हेतुश्च प्रतिपाद्यते–

राज्ञो माहात्मिके स्थाने सद्यः शौचं विधीयते।
प्रजानां परिरक्षार्थमासनं चात्र कारणम्।।

अपि च–

लोकेशाधिष्ठितो राजा नास्याशौचं विधीयते।
शौचाशौचं हि मर्त्यानां लोकेशप्रभवाप्ययम्।।

अशौचे कर्मनिषेधः–जननमरणाशौचावसरे अनेकानि कर्माणि वर्जनीयानि भवन्ति। यथा–

अध्ययनं, सन्ध्या, स्मार्ताग्निहोमः, पञ्चमहायज्ञाः, दानं, प्रतिग्रहः, पितृकर्म, भगवद्वन्दनमित्यादीनि।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—किं नाम अशौचम्?
   उत्तरम्—शुचिर्नाम विपुलं विशुद्धं पवित्रीकृतं शुद्धेरभावम्।
2. **प्रश्नः**—अशौचविषये मित्रमिश्रेण किं कथितम्?
   उत्तरम्— सन्ध्यापञ्चकमहायज्ञादिकर्मानधिकार-सम्पादको अतिशयविशेषमशौचम्।
3. **प्रश्नः**—अशौचं कतिविधम्?
   उत्तरम्— द्विविधम्।
4. **प्रश्नः**—द्विविधम् अशौचं के स्तः?
   उत्तरम्— जननमरणभेदौ।
5. **प्रश्नः**—जातकस्य जन्मना जन्यः अशौचं किम्?
   उत्तरम्— जननाशौचम्।
6. **प्रश्नः**—जातकस्य मृत्युजन्यः अशौचं किम्?
   उत्तरम्— मरणाशौचम्।
7. **प्रश्नः**—सपिण्डबान्धवगतं एकपुरुषगतञ्च इति किम्?
   उत्तरम्— अशौचम्।
8. **प्रश्नः**— भट्टाचार्यमतानुसारं अशौचं किम्?
   उत्तरम्— शुद्धेरभाव एव अशौचम्।
9. **प्रश्नः**—रुद्रधरमतानुसारेण शुद्धिः किमुत्पादयति?
   उत्तरम्— शुद्धिः मानवस्य काऽपि सहजातप्रवृत्तिरस्ति या सर्वाणि विहितकर्माणि कर्तुं योग्यतामुत्पादयति।
10. **प्रश्नः**—अशौचनिवारणे ब्राह्मणादिवर्णानां निर्धारितानि दिनानि कानि?
    उत्तरम्—क्रमशः दशद्वादशपञ्चदशत्रिंशद्दिनेभ्यो अशौचः निर्वत्तते।
11. **प्रश्नः**—श्रीगदाधरपद्धतौ जन्ममरणाद्यशौचविचारावसरे किं लिखितमस्ति?
    उत्तरम्—शौचं द्विविधमुक्तं यथा बाह्याशौच-माभ्यन्तरिणमशौचं च।
12. **प्रश्नः**—बाह्याशौचं यैः कारणैः भवति तानि कारणानि कानि?
    उत्तरम्— जननम्, मरणम्, अनुलोमविवाहः, शिशुमृत्युः, गर्भास्रवः, गर्भपातनम्, ऋतुस्राव इत्यादीनि।
13. **प्रश्नः**—अशौचे दशदिनपर्यन्तं कस्मै प्रतिषेधः?
    उत्तरम्— पञ्चमहायज्ञेभ्यः।
14. **प्रश्नः**—धर्मशास्त्राभिमतम् अशौचनिवर्तनं कैः भवेत्?
    उत्तरम्— कुलान्नभोजनं दानप्रतिग्रहयज्ञस्वाध्याया-दिभिः।
15. **प्रश्नः**—धर्मशास्त्राभिमतमशौचात् निवृत्तिः कथं भवेत्?
    उत्तरम्—सपिण्डानां दशरात्रं समानोदकानाञ्च त्रिरात्रमिति।
16. **प्रश्नः**—सामान्यतया अशौचमेतत् केषु विधीयते?
    उत्तरम्— सपिण्डेषु।
17. **प्रश्नः**—गर्भमासप्रमितमशौचमिति कथं जायते?
    उत्तरम्— गर्भस्रावसमये।
18. **प्रश्नः**—अविवाहितकन्यानां शूद्राणाञ्च मरणाशौचं कति दिवसात्मकं भवति?
    उत्तरम्— त्रिदिवसात्मकम्।
19. **प्रश्नः**—गुरुगुरुपुत्रसहब्रह्मचारिणामपि मरणाशौचं धर्मशास्त्रे किं वर्णितमस्ति?
    उत्तरम्— अशौचे निवृत्तिः सर्वेषां दशदिनेष्वेवेति।
20. **प्रश्नः**—शंखस्मृत्यनुसारं गर्भस्रावे कथं विशुद्ध्यति?
    उत्तरम्— रात्रिभिर्मासतुल्याभिः।
21. **प्रश्नः**—पिण्डपितृयज्ञप्रक्रियया प्रेताय दिनत्रयं पिण्डरूपमन्नं तूष्णीं क्षितौ देयम्–इति कस्य वचनम्?
    उत्तरम्— विज्ञानेश्वरस्य।
22. **प्रश्नः**—पुत्राधिक्ये केन पुत्रेण पिण्डदानं कर्तव्यम्?
    उत्तरम्— ज्येष्ठपुत्रेण।
23. **प्रश्नः**—ब्राह्मणस्य कति पिण्डाः भवन्ति?
    उत्तरम्— दश पिण्डाः।
24. **प्रश्नः**—क्षत्रियस्य कति पिण्डाः भवन्ति?
    उत्तरम्— द्वादश पिण्डाः।
25. **प्रश्नः**—मनुना उदकदानविषये किं कथितम्?
    उत्तरम्— स्नात्वा अञ्जलीपूर्णजलदानं दशाहदिने प्रेतायोदकं दत्वा शुद्धिर्भवति।
26. **प्रश्नः**—वैष्णवे अस्थिचयनं कस्मिन् दिवसे क्रियते?
    उत्तरम्— चतुर्थे दिवसेऽस्थिसंचयनं कुर्यात् तेषां च गङ्गाम्भसि प्रक्षेप इति।

27. **प्रश्नः—** केशवपनप्रसङ्गे देवालस्मृतौ किमुक्तम्?
उत्तरम्— दशमेऽहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत्। तत्र त्यजेद्वासांसि केशश्मश्रुनखानि च।

28. **प्रश्नः—** अशौचे कानि कर्माणि वर्जनीयानि भवन्ति?
उत्तरम्— अध्ययनं, सन्ध्या, स्मार्ताग्निहोमः, पञ्चमहायज्ञाः, दानं, प्रतिग्रहः, पितृकर्म, भगवद्दर्शनादीनि।

29. **प्रश्नः—** वन्दनीयः मुखदर्शनं कस्य कृते आवश्यकम्?
उत्तरम्— मातृपितॄणाम्।

30. **प्रश्नः—** जन्म-मरणाशौचविषये मनुना किं कथितः?
उत्तरम्— यथेदं शावमाशौचं सपिण्डेषु विधीयते।

31. **प्रश्नः—** अशौचनिर्णयक्रमे दत्तककृत्रिमादिपुत्रान् अभिधाय ब्रह्मपुराणे किं कथितमस्ति?
उत्तरम्— भिन्नगोत्राः पृथक् पिण्डाः पृथुकरास्तथा। सूतके मृतके चैव त्र्यहाशौचस्य भागिनि।।
अनौरसेषु पुत्रेषु जातेषु च मृतेषु च। परपूर्वासु भार्यासु प्रसूतासु मृतासु च।।

32. **प्रश्नः—** आचार्योपाध्यायतत्पुत्रेषु च कतिरात्रिपर्यन्तम् अशौचम्?
उत्तरम्— त्रिरात्रिपर्यन्तम्।

33. **प्रश्नः—** मातुले मातामहे श्वसुरे मित्रे गुरौ गुर्वङ्गनासु च कति रात्रिपर्यन्तम् अशौचम्?
उत्तरम्— त्रिरात्रमशौचम्।

(च) धर्मस्रोतांसि एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

धर्मस्रोतांसि—मनुष्यस्य जीवने धर्मस्य महत् महत्त्वं विद्यते। मनुष्यस्य उत्कर्षः अपकर्षः वा धर्मेण एव भवति। वैदिके लौकिके धर्मज्ञानम्। तत्र विशिष्टेकतानुरूपेण वर्ण्यते। धर्मज्ञानं वैदिककालः। [illegible] सर्वं धर्मोऽभिमन्यते। धर्मसूत्रेण कल्पसूत्रमिति अभवत्। [illegible] कल्पभागोक्तः। कर्तव्याकर्तव्ययोः [illegible] धर्म इति कथ्यते। 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' 'चोदनालक्षणोऽर्थो धर्मः' [illegible] धर्मः' इत्यादयः [illegible]। वेदः सर्वासां विद्यानां मूलभूतः। धर्मस्य मूलं वेद एव। धर्मो विश्वस्य जगतः प्रतिष्ठा। 1. ऋग्वेदे-धर्मपदं पालनार्थे च पुल्लिङ्गे एव प्रयुक्तः। 2. यजुर्वेदे-धर्मपदं धारणार्थे च प्रयुक्तः। 3. अथर्ववेदे-धार्मिकक्रियाजनितगुणार्थे दृश्यते। अतः विश्वस्य धर्मस्य महती प्रतिष्ठा। **धर्मो विश्वस्य जगतः प्रतिष्ठा।** धर्मशब्दस्तु 'धृ' धातोः मन् प्रत्यये कृते निष्पद्यते। यत्र अभ्युदयत्वं तत्र धर्मत्वम्। यथा–

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।
(मनुस्मृतिः)

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षात् धर्मस्य लक्षणम्।।
(मनु०2/12)

(क) वेदवचनैः स्वधर्ममनुतिष्ठेत्—धर्मस्य मूलं वेद एव। स च वेदः सर्वासां विद्यानां मूलभूतः। वेदवृक्षमाश्रित्य सर्वाणि शास्त्राणि प्रभवन्ति। तस्यैव वेदस्य षडङ्गानि सन्ति। एतेषु वेदाङ्गेषु कल्पभागे एव धर्मशास्त्रस्यान्तर्भावः। अतः कल्पभागादेव धर्मशास्त्रस्योत्पत्तिः समभूत्। कल्पसूत्रं चतुर्विधं 1. श्रौतसूत्रं, 2. शुल्वसूत्रं, 3. धर्मसूत्रं, 4. गृह्यसूत्रञ्चेति। महाभारत-रामायणादिषु मनूक्तधर्मशास्त्रस्य बहूनि प्रमाणवचनानि दृश्यन्ते। महर्षिणा पतञ्जलिना यम-शब्देन व्याख्यातः। यथा–

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः।
(योगदर्शन 2/30)

जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम्। (योगदर्शन 2/31)

शौच-संतोष-तपःस्वाध्यायेश्वरप्रणिधानानि नियमाः। (योगदर्शन 2/32)

वैदिकधर्मे तु परवर्तिनि काले यज्ञप्रावल्यं जातम्। यज्ञेषु हिंसापि जाता। परन्तु वैदिक-विद्वद्भिः पुरोहितैश्च 'वैदिकी हिंसा हिंसा न भवति' इति उद्घोषितम्। अहिंसायाः सर्वत्र प्रथमं स्थानमस्ति। **'मा हिंस्यात् सर्वाभूतानि'** इति विशिष्टं श्रुतिवाक्यम्। मानवानां परमोत्कृष्टधर्मसाधनमहिंसा भवति।

धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु धर्मः प्रधानः विद्यते। **धर्मप्रतिपादकं** शास्त्रं धर्मशास्त्रमुच्यते। धर्मशास्त्रं मुख्यतः पुरुषार्थचतुष्टयं प्रतिपादयति। तेषु सर्वेषु पुरुषार्थेषु मनुष्यजीवनस्य मार्गप्रवर्तकरूपेण तथा नियंत्रकरूपेण धर्मस्य प्राधान्यं स्वीक्रियते। जीवनस्य सर्वेषु कालेषु धर्मस्य प्रभावः साक्षात् परम्परया वा विद्यते। धर्मेणोपार्जितोऽर्थः मनुष्यं सर्वविधानन्देन संयोज्य परवर्तिजीवनमपि सुखमयं करोति धर्मशास्त्रम्। धर्मशास्त्राणि पुराणानि अपि शास्त्रकोटावन्तर्भूतानि भवन्ति। धर्मशास्त्राणि एव स्मृतय इति व्यवह्रियते। वेदे विद्यमानाः धर्माः पुनः धर्मशास्त्रेषु स्मृताः। अतस्ताः स्मृतयः इति ख्याताः। मनुस्मृतिः समाजशास्त्रस्य अद्वितीया कृतिरस्ति। मन्वत्रिविष्णुहारीतादिस्मृतयः विंशतिः सन्ति। देवल-चन्द्रायण-कपिलादिभिश्च विरचिताः स्मृतयः पञ्चाशत् सन्ति। आहत्य सप्तति स्मृतयस्सन्ति।

धर्मलक्षणे स्वस्य च प्रियमात्मनः इत्यनेन मधुरभाषणं परोपकरणम् अहिंसनं च समर्थ्यते।

अस्मिन् मानवे धर्मशास्त्रे भगवता मनुना 1. **वर्णधर्मः**, 2. **आश्रमधर्मो**, 3. **वर्णाश्रमधर्मो**, 4. **गुणधर्मो**, 5. **निमित्तधर्मः**, 6. **सामान्यधर्मश्चेति** षड्विधो धर्मः प्रतिपादितः। धर्मशास्त्रस्य विषयाः आचार-व्यवहार-प्रायश्चित्तभेदेन त्रिधा विभज्यन्ते।

(ख) वेदसमाभिः स्मृतिभिः अनुकुर्यात्-धर्मो रक्षति रक्षितः। शुक्लयजुर्वेदे– **यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्** इत्यनेन **धर्मो रक्षति रक्षितः** इति मनुवचनेन च धर्मपालनार्थं धर्मरक्षणार्थं च धर्मलक्षणम् निरूपितम्। यथा–

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम्।।
(मनु०2/12)

चतुर्विधधर्मे वेद-स्मृत्यनन्तरं सदाचारोऽपि उदीर्यते। जीवने सदाचारेणैव सर्वार्थसिद्धिः स्यात्। यथा–

आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः।।
(मनुस्मृ०1/108)

अस्माकं देशस्य प्राचीनैः महर्षिभिः महापुरुषैश्च भूयो भूयः अभिहितम् **अहिंसा परमो धर्मः**। सर्वेषु सम्प्रदायेषु धर्मेषु वा अहिंसायाः महत्त्वं वर्ण्यते। हिंसा त्रिविधा मानसिकी हिंसा, वाचनिकी हिंसा कार्मिकी हिंसा च। आचार्यमनुनापि स्वविरचितौ स्मृतौ दशसु धर्मलक्षणेषु सर्वप्रथमम् अहिंसायाः परिगणनं कृतं विद्यते। एवं चातुर्वर्ण्यार्थम् अहिंसाया महत्त्वम् उपस्थाप्यते। यथा–

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
एवं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः।।
(मनु०10/63)

धर्मस्य मुख्यपुरुषार्थत्वम् धर्मार्थकाममोक्षभेदेन चतुर्धा प्रतिपादितः। अपौरुषेयस्य वेदस्यानुमापकतया स्मृत्यादीनामपि वेदानुकरणेन धर्मे प्रामाण्याद् धर्मशास्त्रं पुरुषार्थचतुष्टयस्य प्रमुखं प्रतिपादकम्। अतः पुरुषार्थचतुष्टयेषु धर्मस्य श्रेष्ठत्वं सर्वैः स्वीक्रियते। एतेषां धर्मार्थकामानां पुरुषार्थत्रयाणां विशुद्धाचरणे मोक्षप्राप्तिर्नाम चतुर्थः पुरुषार्थः सिद्ध्यति। चतुर्वर्गेऽर्थकाम-मोक्षाणां पुरुषार्थानां मूलः धर्मः। धर्मपालनं ब्रह्मचर्याश्रमे मुख्यतया विहितम्। गृहस्थाश्रमे धर्म्योपायेनार्थकामयोरर्जनं सेवनञ्च विहितम्। धर्मः रक्षितो रक्षकं रक्षति। यः धर्महानिं करोति धर्मोऽपि तं नाशयति। धर्मस्य उपयोगिताप्रसंगे धर्मशास्त्रे वर्णितमस्ति। यथा–

धर्मं यो बाधते धर्मो न सधर्मः नु धर्म तत्।
अविरोधी तु यो धर्मः सधर्मः सत्यविक्रमः।।
धर्मेण हन्यते व्याधिः धर्मेण हन्यते ग्रहः।
धर्मेण हन्यते शत्रुर्यतो धर्मस्ततो जयः।।
(धर्मशास्त्रे)

यतो धर्मस्ततो जयः-संसारे मानवानां द्विविधा प्रवृत्तिः जायते। शास्त्रानुकूलव्यवहारो धर्मः, तत्प्रतिकूलस्तु अधर्मः। धर्माश्रयिणां च श्रीवृद्धिः प्रयत्नसापेक्षा चिरसाध्या च। शास्त्रेषु पुराणेषु अपि च धर्मस्य महान् महिमा दरीदृश्यते। यथा हितोपदेशे–

धनानि भूमौ पशवश्च गोष्ठे
नारी गृहद्वारि जनाः श्मशाने।
देहश्चितायां परलोकमार्गे
जीवाऽनुगो गच्छति धर्म एकः।।
(हितोपदेश)

आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः।।
(हितोपदेश)

(ग) श्रेष्ठजनाचारानुकूलैः सदाचारैः धर्मानुष्ठानं करणीयम्—सदाचारी पुरुषः स्वकीयानीन्द्रियाणि वशीकृत्य **सर्वैः** सह शिष्टतापूर्वकमाचरति। सः सत्यं वदति, प्रियं वदति परञ्च अप्रियं सत्यं न वदति। नित्यमेव मातापितरौ उत्थाय अभिवादयति, गुरुजनानां श्रेष्ठजनानां च आदरं करोति। सर्वेषां प्राणिनामुपकारं करोति। सत्यकर्मणि प्रवृत्तो भवति, असत्कर्मभ्यश्च निवृत्तो भवति। परदारेषु मातृवद् व्यवहारं करोति। कन्यां बालिकाञ्च स्वभगिनीवत् पश्यति। परद्रव्याणि लोष्ठवत् पश्यति। तद्वद् आचरणेन मनुष्यः सदाचारी पण्डितः धार्मिकश्च भवति। रक्षितः धर्मः मनुष्यं रक्षति अरक्षितश्च धर्मः मानवं हन्ति; अत एव मनुः कथयति।

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः (मनु०)

द्विविधः खलु धर्मः-प्रवृत्तिलक्षणः निवृत्तिलक्षणश्च। उभयोरपि मूलं सदाचारः अस्ति। अतएव **आचारः प्रभवो धर्मः** इति। सतां सज्जनानाम् आचारः सद्व्यवहारः चरितं वा सदाचारः भवति। अस्यैव पर्यायः आचारः, वृत्तं चरित्रं वा अस्ति। विष्णुपुराणे सदाचारस्य लक्षणमिदं कथितम्–

साधवः क्षीणदोषाश्च सच्छब्दः साधुवाचकः।
तेषामाचरणं यत्तु सदाचारः स उच्यते।।
(विष्णुपु०)

वस्तुतः धर्मस्य व्यावहारिकं लोकप्रियं नितान्तं च सार्थकं स्वरूपं सदाचार एव। य एव सदाचारी स एव परमधार्मिकः। वृत्तं (चरित्रं) यत्नेन संरक्षेत्-सदाचारादेव जीवः दीर्घमायुः, अक्षयं धनं च लभते। सदाचारेण खलु मनुष्यः उन्नतः चरमशिखरं गच्छति, अत एव ऋषिभिः समस्तवर्णेभ्यः सदाचारः अनिवार्यः प्रतिपादितः। **चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः**। मानवजीवने तपसः अपि महत्त्वं विद्यते। चरित्रमेव पुरुषस्य सर्वस्वम्। चरित्ररक्षणेनैव मानवत्वं देवत्वं च। चरित्रं हि जीवनस्य सर्वस्वम्। तदेव सर्वथा संरक्ष्यम्।

(घ) स्वात्मतुष्टये यो धर्मप्रियः स्यात्, तमेव स्मृतिवचनानुसारं समाचरेत्—मनुस्मृत्यादिग्रन्थेषु धर्मविषयकचर्चा, आध्यात्मिक-चर्चाकारणाद् धर्मशास्त्राण्यपि शास्त्ररूपेण गृहीतानि भवन्ति।

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत।।
(मनु०2/1)

मनुस्मृतौ एवं याज्ञवल्क्यस्मृतौ धृतिक्षमादयो दश गुणा एव धर्मशब्दवाच्यत्वेन एवं सदाचारोऽपि धर्म इति निर्दिष्टाः सन्ति। यथा–

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।
(मनु०6/92)

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
सम्यक् संकल्पजः कामो धर्ममूलमिदं स्मृतम्।।
(याज्ञ०स्मृ०)

मीमांसादर्शनकृता जैमिनिमुनिना **चोदनालक्षणोऽर्थो धर्मः** (मीमांसा०1/1/2) **स्वर्गसाधनस्य शास्त्रैकसमधिगम्यातिशयस्य धर्मत्वेन सर्वसम्प्रतिपत्तेः** इति धर्मस्य परिभाषा कृता स्मृतिकारैः। मनुयाज्ञवल्क्यादिभिः महर्षिभिः प्रणीतमिदं धर्मशास्त्रं समाजस्योपकारायैव प्रवर्तते। सर्वेषां धर्मशास्त्रग्रन्थानां प्रवर्तनं धर्ममार्गस्य प्रतिपादनार्थमेव। अतः प्रतिवेदं प्रतिशाखं प्रतिप्रान्तमपि धर्मशास्त्राणि विरचितानि सन्ति। वैशेषिकदर्शनकृता कणादेन प्रतिपाद्यते यद् येन लौकिकी पारलौकिकी च समुन्नतिः संजायते, स एव धर्मशब्देन वाच्यः। यथा–

यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः। (वैशेषिक)

धर्मः स नो यत्र न सत्यमस्ति—सत्यं धर्मस्य मूलम्। सत्याश्रयैव धर्मवृत्तिः। यत्र सत्यं तत्र धर्मः, तदभावे तदभावः। सर्वे वेदगताः विषयाः धर्मशास्त्रेऽस्मिन् प्रतिपादिताः। वेदस्तु 1. कर्मकाण्ड-2. ज्ञानकाण्डभेदेन द्विधा विभज्यते। वेदेषु विवाह-वर्णाश्रम-पुत्रभेद-उत्तराधिकारिनिर्णय-धनविभाग-श्राद्धादिविषयकाः बहवः प्रसङ्गा उपलभ्यन्ते। ते प्रसङ्गाश्च कालक्रमेण धर्मशास्त्रस्य विषयीभूताः। प्राधान्येन धर्मप्रतिपादकान्येव शास्त्राणि स्मृतिपदेनोच्यन्ते। आचारमूलकस्य सत्याहिंसादिरूपस्य धर्मस्य सर्वधर्मेषु समत्वम् अनिवार्यत्वं च व्यपदिश्यते, तत्पालने न कस्यचिदपि विपश्चितो विप्रतिपत्तिः। एवं धर्मो मानवः देवत्वं गमयति।

अतएव सत्यं दया परोपकारादयो धर्मस्य मूलतत्त्वानि गण्यते। परदुःखनिवारणं करुणाद्रवत्वं च धर्मे संगृह्यते। यथोच्यते–**न च धर्मो दयापरः इति।**

(च) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— धर्मशास्त्रे कति श्लोकाः सन्ति?
उत्तरम्—लक्षम् (1,00,000)।

2. **प्रश्नः**— ब्रह्मा कस्मै धर्मशास्त्रम् उपदिष्टवान्?
उत्तरम्— स्वायम्भुवमनवे।

3. **प्रश्नः**— धर्मशास्त्रग्रन्थानां निर्माणकालः कः?
उत्तरम्— ईसवी पूर्व-600-300।

4. **प्रश्नः**— धर्मशास्त्रस्य का परिभाषा?
उत्तरम्—धर्मसूत्राणां स्मृतीनां सम्मिलितं रूपमेव धर्मशास्त्रम्।

5. **प्रश्नः**—धर्मशब्दस्य का व्युत्पत्तिः?
उत्तरम्—धरति लोकान् यद्वा ध्रियते पुण्यात्मभिः यः स धर्मः।

6. **प्रश्नः**— धर्मस्य लक्षकः कोऽस्ति?
उत्तरम्— वेदः-स्मृतिः।

7. **प्रश्नः**—**धर्मो रक्षति रक्षितः** इति कस्य वचनम्?
उत्तरम्— मनुमहोदयस्य।

8. **प्रश्नः**— श्रुतिप्रमाणको धर्मः अत्र श्रुतिः कतिधा? के च ते?
उत्तरम्— द्विविधा, वैदिकी तान्त्रिकी च।

9. **प्रश्नः**— धर्मसूत्रम् इत्यस्य रचनाकारः कः?
उत्तरम्—वशिष्ठः।

10. **प्रश्नः**—श्रुतिर्विभिन्ना स्मृतिर्विभिन्ना नैको मुनिर्यस्य मतिर्न भिन्ना। धर्मस्य तत्वं निहितं गुहायां, महाजनो येन गतः स पन्था। धर्मसम्बन्धे कस्य वचनम्?
उत्तरम्— धर्मराज-युधिष्ठिरस्य।

11. **प्रश्नः**— मनुस्मृत्यनुसारं दशकं धर्मलक्षणं कानि सन्ति?
उत्तरम्—धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।

12. **प्रश्नः**— प्रसिद्धेषु धर्मसूत्रेषु इदमप्येकम्?
उत्तरम्— आपस्तम्बः।

13. **प्रश्नः**—धर्मशास्त्रे साध्य-रूपेण किं ज्ञायते?
उत्तरम्—धर्मः।

14. **प्रश्नः**—धर्मशास्त्रे साधन-रूपेण किं ज्ञायते?
उत्तरम्— कर्मकाण्डयज्ञादि।

15. **प्रश्नः**— **चोदनालक्षणोऽर्थो धर्मः** इति कस्य वचनम्?
उत्तरम्— मीमांसादर्शनकर्तुः जैमिनिमुनेः।

16. **प्रश्नः**—वेदे साक्षात् धर्मस्य किं लक्षणम्?
उत्तरम्—वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षात् धर्मस्य लक्षणम्।।

17. **प्रश्नः**—गोविन्दराजस्य धर्मलक्षणं किम्?
उत्तरम्— वेदविद्भिरनुष्ठितः संशयरहितश्च धर्मः।

18. **प्रश्नः**—धर्मविषये किं प्रमाणम्?
उत्तरम्—मन्वादीनां च वेदविदां स्मृतिर्धर्मे प्रमाणम्।

19. **प्रश्नः**— मनोनुसारेण धर्मविषये किं प्रमाणम्?
उत्तरम्— वैकल्पिकः आत्मतुष्टिः प्रमाणम्।

20. **प्रश्नः**—कः धर्मः अनुष्ठेयः?
उत्तरम्— श्रुति-स्मृत्युदितं धर्ममनुतिष्ठेद्।

21. **प्रश्नः**— रामायण-महाभारत-पुराणादि-ग्रन्थेषु कस्य महत्वपूर्णं योगदानं वर्तते?
उत्तरम्— धर्मशास्त्रस्य।

22. **प्रश्नः**—धर्मस्य उपयोगिताप्रसंगे धर्मशास्त्रे किं वर्णितमस्ति?
उत्तरम्— धर्मं यो बाधते धर्मो न सधर्मः नु धर्मं तत्, अविरोधी तु यो धर्मः सधर्मः सत्यविक्रमः। धर्मेण हन्यते व्याधिः धर्मेण हन्यते ग्रहः, धर्मेण हन्यते शत्रुर्यतो धर्मस्ततो जयः।।

23. **प्रश्नः**— के सन्ति प्रमुखाः धर्मसूत्र रचनाकाराः?
उत्तरम्— 9 नव-1. गौतमः, 2. वशिष्ठः, 3. शंखः, 4. गोभिलः, 5. आपस्तम्बः, 6. बौधायनः, 7. विष्णुः, 8. हारीतः, 9. मनुः।

24. **प्रश्नः**— प्राचीनधर्मसूत्रकारः कः?
उत्तरम्— गौतमः।

25 **प्रश्नः**—धर्मग्रन्थेषु वर्णित-मुख्य-परलोकाः के सन्ति?
उत्तरम्— (5 पञ्च) 1. स्वर्गलोकः, 2. नरकलोकः, 3. पितृलोकः, 4. प्रेतलोकः, 5. पाताललोकः।

26. **प्रश्नः**—आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम्। धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः।। कस्य ग्रन्थस्य श्लोकोऽयम्?
उत्तरम्— हितोपदेशस्य।

27. **प्रश्नः**— धर्मशास्त्रस्य विषयाः के सन्ति?
उत्तरम्—आचार-व्यवहार-प्रायश्चित्तानि।

28. **प्रश्नः**— मनुः कियतः ऋषीन् धर्मशास्त्रं श्रावयामास?
उत्तरम्— (10) दश।

29. **प्रश्नः**—आचारः प्रभवो धर्मः इति कस्य लक्षणम्?
उत्तरम्— सदाचारस्य।

30. **प्रश्नः**—धर्मस्य व्यावहारिकं लोकप्रियं नितान्तं च सार्थकं स्वरूपं किम्?
उत्तरम्— सदाचारः।

31. **प्रश्नः**—स्वर्गसाधनस्य शास्त्रैकसमधिगम्यातिशयस्य धर्मत्वेन सर्वसम्प्रतिपत्तेः' इति धर्मस्य परिभाषा कैः कृता?
उत्तरम्— स्मृतिकारैः।

32. **प्रश्नः**—वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।। इति कस्य प्रमाणानि वर्तन्ते?
उत्तरम्— धर्मनिर्णयस्य।

33. **प्रश्नः**—अवश्यकरणीयं कार्यं किम्?
उत्तरम्— धर्मः।

34. **प्रश्नः**— संसारे मानवानां द्विविधा प्रवृत्तिः के जायते?
उत्तरम्—शास्त्रानुकूलव्यवहारो धर्मः, तत्प्रतिकूलस्तु अधर्मः।

35. **प्रश्नः**—गृहस्थाश्रमे किं विहितमस्ति?
उत्तरम्— धर्म्योपायेनार्थकामयोरर्जनं सेवनञ्च।

36. **प्रश्नः**— धर्मशास्त्रस्य प्रादुर्भावः कुतः जायते?
उत्तरम्— वेदाङ्गेषु कल्पभागात्।

37. **प्रश्नः**— सत्यं दया परोपकारादयो कस्य मूलतत्त्वानि गण्यन्ते?
उत्तरम्— धर्मस्य।

38. **प्रश्नः**— यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः इति कस्य वचनम्?
उत्तरम्— वैशेषिकदर्शनस्य।

39. **प्रश्नः**—धर्मस्य मूलं किमस्ति?
उत्तरम्— सत्यम्।

40. **प्रश्नः**— धर्मः-प्रवृत्तिलक्षणनिवृत्तिलक्षणयोः मूलं किमस्ति?
उत्तरम्— सदाचारः।

41. **प्रश्नः**—चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः इति कस्य वचनम्?
उत्तरम्—स्मृतिकारस्य।

42. **प्रश्नः**— स्मृतिशास्त्रं किमस्ति?
उत्तरम्— धर्मशास्त्रम्।

43. **प्रश्नः**—कानि प्रमुखानि धर्मसूत्राणि?
उत्तरम्—आपस्तम्बः, वसिष्ठः, बौधायनः, गौतमः, विष्णुः, हारीतः, गोभिलः, खादिरः, कौशिकः।

44. **प्रश्नः**—कानि प्रमुखानि श्रौतसूत्राणि?
उत्तरम्—बोधायनश्रौतसूत्रम् + आपस्तम्बश्रौतसूत्रम् + कात्यायनश्रौतसूत्रम् + सत्याषाढश्रौतसूत्रम्।

45. **प्रश्नः**— कानि प्रमुखानि गृह्यादिसूत्राणि?
उत्तरम्—शांखायनगृह्यसूत्रम्, पारस्करगृह्यसूत्रम्, बार्हस्पत्यसूत्रम्, आश्वलायनगृह्यसूत्रम्, वैखानसस्मार्तसूत्रम्, गौतमपितृमेघसूत्रम्, बोधायनपितृमेघसूत्रम्, मानवगृह्यसूत्रम्, काठकगृह्यसूत्रम्, हिरण्यकेशिगृह्यसूत्रम्, भरद्वाजगृह्यसूत्रम् इत्यादयः।

46. **प्रश्नः**—कियन्तः पुरुषार्थाः, के च ते?
उत्तरम्— चत्वारः-1. धर्मः, 2. अर्थः, 3. कामः, 4. मोक्षः।

47. **प्रश्नः**—'यः श्रेयस्करः स एव धर्मः' इति केन कथितः?
उत्तरम्— मीमांसकैः।

48. **प्रश्नः**—भारतीय-संस्कृतेः सिद्धान्तः कः?
उत्तरम्— आत्मदर्शनम्।

49. **प्रश्नः**—धर्मशास्त्रे षड्विधो धर्माः के सन्ति?
उत्तरम्—1. वर्णधर्मः, 2. आश्रमधर्मो, 3. वर्णाश्रमधर्मो, 4. गुणधर्मो, 5. निमित्तधर्मः, 6. सामान्यधर्मश्चेति।

50. **प्रश्नः**—आचार्यमनुना स्वविरचितौ स्मृतौ दशसु धर्मलक्षणेषु सर्वप्रथमं कस्य परिगणनं कृतं विद्यते?
उत्तरम्—अहिंसायाः।

51. **प्रश्नः**— चतुर्वर्गेऽर्थकाममोक्षाणां पुरुषार्थानां मूलः कः?
उत्तरम्—धर्मः।

52. **प्रश्नः**—को नाम आत्मा?
उत्तरम्— ज्ञानाधिकरणमात्मा।

53. **प्रश्नः**— आत्मा कतिविधः?
उत्तरम्— द्विविधः-परमात्मा जीवात्मा च।

54. **प्रश्नः**—वेदे प्रतिपादिता संस्कृतिः का कथ्यते?
उत्तरम्— भारतीया संस्कृतिः।

55. **प्रश्नः**— धर्मशास्त्रे कति आश्रमाः स्वीकृता सन्ति?
उत्तरम्—चत्वारः, 1. ब्रह्मचर्याश्रमः, 2. गृहस्थाश्रमः, 3. वानप्रस्थाश्रमः, 4. संन्यासाश्रमः।

56. **प्रश्नः**— चातुर्वर्ण्ये पञ्चसामान्यधर्माः के?
उत्तरम्—अहिंसा, अस्तेयम्, सत्यम्, शौचं, इन्द्रियनिग्रहः।

57. **प्रश्नः**— वैश्यस्त्रियां क्षत्रियादुत्पन्नमपत्यं किमुच्यते?
उत्तरम्—माहिष्यः।

58. **प्रश्नः**—सामाजिक-व्यवस्थामाधृत्य प्राचीनभारतस्य कानि त्रीणि ऋणानि?
उत्तरम्—1. पितृऋणम्, 2. ऋषिऋणम्, 3. देवऋणम्।

59. **प्रश्नः**—वैश्यस्त्रियां ब्राह्मणादुत्पन्नं सन्तानं किमुच्यते?
उत्तरम्— अम्बष्ठः।

60. **प्रश्नः**— षोडशसंस्कारेषु कः सप्तमः संस्कारः?
उत्तरम्— अन्नप्राशनम्।

61. **प्रश्नः**— गृहस्थैः क्रियमाणेषु पञ्चयज्ञेषु अयमन्यतमः?
उत्तरम्— बलिवैश्वदेवयज्ञः।

62. **प्रश्नः**— धर्मशास्त्रानुसारं कति दुर्गाणि सन्ति?
उत्तरम्— (3) त्रीणि।

(छ) राजधर्माः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

अतिप्राचीनकालात् एव धर्मशास्त्रे राजधर्मस्य चर्चा भवति स्म। राजधर्मं सर्वधर्मस्य सार इति कथ्यते। राजधर्मः विश्वस्य सर्वश्रेष्ठानि उद्देश्यानि वर्तन्ते, यस्यान्तर्गते आचारः, व्यवहारः, प्रायश्चित्तादि सर्वे नियमाः आगच्छन्ति स्म। राजानं युगस्य निर्माता कथ्यते। राजनीति-शास्त्रेषु राज्यस्य सप्त अङ्गानि इति कथ्यन्ते। यथा-1. स्वामी, 2. अमात्यः, 3. जनपदः (राष्ट्रः), 4. दुर्गः, 5. कोशः, 6. दण्डः, 7. मित्र। यथोच्यते मनुना–

स्वाम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ सुहृत्तथा।
सप्त प्रकृतयो होताः सप्ताङ्गं राज्यमुच्यते।।
(मनुस्मृति-9/294)

स्मृतिकारेषु सर्वोत्तमं स्थानं मनुमहोदयस्य 'मनुस्मृतिः' इति ग्रन्थं वर्तते। अस्मिन् ग्रन्थे सम्पूर्णाः धर्माः अभिहिताः। विहित-कर्तव्यानां तथा समग्रकर्मणां वर्णनमत्रास्ति। धर्मेषु राज्ञ-धर्मः एवं राज्ञः कर्त्तव्याणि अपि प्रमुखानि सन्ति। राजृ दीप्तौ धातोः राजा शब्दः निर्मितोऽस्ति। कथितं च महाभारते–

रञ्जिताश्च प्रजाः सर्वास्तेन राजेति शब्द्यते।
एवं च लोक-रञ्जनमेवात्र राज्ञां धर्मः सनातनः।।
(महाभारत)

ऋग्वेदे एवं अथर्ववेदेऽपि राज्ञो निर्वाचनस्य, जनतायाः समर्थनस्य आवश्यकतायाश्च वर्णनम् उपलभ्यते। ययुर्वेदे राष्ट्रपतेः कर्तव्यरूपेण सभा-समिति-नाम्न्योः परिषदोर्वर्णनमपि प्राप्यते। यथा–

विशो न राजानं वृणानाः। (ऋग्वेद-10/124/8), **त्वां विशो वृणतां राज्याय।** (अथर्व०3/4/2)

विशस्त्वा सर्वा वाञ्छन्तु० (अथर्व06/87/1) **सभा च मा समितिश्चावतां प्रजापतेर्दुहितरौ संविदाने०।** (अथर्व०7/12/1) **जनभृतस्थ राष्ट्रदा राष्ट्रं मे दत्त। विश्वभृतस्थ राष्ट्रदा राष्ट्रं मे दत्त। स्वराजस्थ राष्ट्रदा राष्ट्रममुष्मै दत्त।** (यजु०10/4)

मनुस्मृत्यनुसारं राजधर्मम्-अजितं भूमिहिरण्यादि जेतुमिच्छेत्। जितं प्रयत्नतो रक्षेत्। रक्षितं च वाणिज्यादिना वर्धयेत्। वृद्धं च पात्रेभ्यो दद्यात्। यथोच्यते–

अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः।
रक्षितं वर्धयेच्चैव वृद्धं पात्रेषु निःक्षिपेत्।।
(मनुस्मृति-7/99)

पुरुषार्थचतुष्टयसाधनपूर्वकं नित्यमुद्यतदण्डः स्यात्। अर्थात् नित्यं हस्त्यश्वादियुद्धादिशिक्षाभ्यासो करणीयः स्यात्। नित्यं च प्रकाशीकृत्यमस्त्रविद्यादिना पौरुषं प्रदर्शयेत्। एवं च नित्यं संवृतं संवरणीयं मन्त्राचारचेष्टादिकं कृतं स्यात्। तथा च नित्यं शत्रोर्व्यसनादिरूपच्छिद्रानुसंधाने तत्परः स्यात्। यस्मात् नित्योद्यतदण्डस्य जगदुद्विजेदिति तस्मात्सर्वप्राणिनो दण्डेनैवात्मसात्कुर्यात्। कथितं च–

नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः।
नित्यं संवृतसंवार्यो नित्यं छिद्रानुसार्यरेः।
(मनुस्मृतिः-7/102)

नित्यमुद्यतदण्डस्य कृत्स्नमुद्विजते जगत्।
तस्मात्सर्वाणि भूतानि दण्डेनैव प्रसाधयेत्।।
(मनुस्मृतिः-7/103)

सर्वाणि भूतानि दण्डेन एव प्रसाधयेत्। अमात्यैः समं निश्छलव्यवहारं कुर्यात्। मन्त्राः सर्वदा गोपनीया भवेत्। यथा बको जले मोनमतित्वस्थलस्वभावमपि मत्स्यग्रहणादेकतानान्तः-करणश्चिन्तयत्येवं रहसि सुविहितरक्षस्यापि विपक्षस्य देशग्रहणादीन् अर्थान् चिन्तयेत्। एवं च सिंहवत् पराक्रमान् प्रदर्शयेत्। वृकवत् शत्रुनाशं व्यापादयेत्। तथा शशवत् शत्रुव्यूहात् विनिष्क्रमेत्। उक्तं यथा मनुस्मृतेः-

बकवच्चिन्तयेदर्थान्सिंहवच्च पराक्रमेत्।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत्।।
(मनुस्मृतिः-7/106)

मनुस्मृत्यनुसारं राज्ञः कर्तव्यमस्ति यत् स्वयं रथस्थो रथं त्यक्त्वा स्थलारूढं न हन्यात्। तथा च नपुंसकं, बद्धाञ्जलं, मुक्तकेशं, उपविष्टं, त्वदीयोऽहमित्येवंवादिनं न हन्यात्। सुप्तं, कवचरहितं, विवस्त्रं, अनायुधं, युद्धविरतं, प्रेक्षकं, अन्येन सह युध्यमानं च न हन्यात्। कथितं यथा-

न च हन्यात्स्थलारूढं न क्लीबं न कृताञ्जलिम्।
न मुक्तकेशं नासीनं न तवास्मीति वादिनम्।
(मनुस्मृतिः-7/91)

न सुप्तं न विसन्नाहं न नग्नं न निरायुधम्।
नायुध्यमानं पश्यन्तं न परेण समागतम्।।
(मनुस्मृतिः-7/92)

महाकविकालिदासः अपि राज्ञः सम्बन्धे कथितः "राजा प्रकृतिरञ्जनात्" इति। शास्त्रानुसारमुपनयनादिसंस्कारयुक्तो अभिषिक्तः नृपः स्वराज्यस्य प्रजायाः रक्षां करोति। अस्मिन् लोके अराजकताशमनाय, चराचरस्य रक्षणाय प्रभुः राजानं सृजनं कृतवान्। कथितः यथा मनुस्मृतेः-

अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः।।
(मनुस्मृतिः-7/3)

राजधर्मस्य महत्त्वप्रसङ्गे महाभारतस्य शान्तिपर्वणि वेदव्यासः कथितवान् यत्-

यथा हि रश्मयोऽश्वस्य द्विरदस्याङ्कुशो यथा।
नरेन्द्रधर्मो लोकस्य तथा प्रग्रहणं स्मृतम्।
उदयन् हि यथा सूर्यो नाशयत्यशुभं तमः।
राजधर्मास्तथा लोके निक्षिपन्त्यशुभां गतिम्।।
(महाभारते)

युद्धेष्वपराङ्मुखत्वं प्रजानां च रक्षणं ब्राह्मणानां परिचर्या एतद्राज्ञामतिशयितं स्वर्गादिश्रेयःस्थानं बोधयति मनुमहोदयः। यथा-

संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम्।
शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम्।।
(मनुस्मृतेः-7/88)

'सर्वत एवात्मानं गोपायीत' इति श्रुत्या शास्त्रीयमरणव्यतिरेकेणात्मरक्षेत्युपदेशात् आपन्निवारणार्थं धनं रक्षणीयम्। धनपरित्यागेनापि दारान्रक्षेत्। आत्मानं पुनः सर्वदा दारधनपरित्यागेनापि रक्षेत्। उक्तं च नृपस्य कर्तव्यप्रसङ्गे मनुना-

आपदर्थं धनं रक्षेद्दारान् रक्षेद् धनैरपि।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि।।
(मनुस्मृतेः-7/213)

राज्ञः दण्ड-व्यवस्था-विषये मनुना कथितमस्ति यत्-

वाग्दण्डं प्रथमं कुर्यात् धिग्दण्डं तदनन्तरम्।
तृतीयं धनदण्डञ्च वधदण्डमतः परम्।

दण्डः सर्वोपरि राज्यं करोति, सर्वेषां जीवानां रक्षणं करोति, धर्मन्यायस्थापनार्थं दण्डविधानमावश्यकं वर्तते। बुद्धिमन्तो जनाः दण्डविधानं धर्ममिति कथ्यन्ते। दण्डः राजा, दण्डः पुरुषः, दण्डः नेतारः, दण्डः शासकः, दण्डः चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः अस्ति, यथा मनुना-

दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः।।
(मनुस्मृतिः-7/18)

स राजा पुरुषो दण्डः स नेता शासिता च सः।
चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः।।
(मनुस्मृतिः-7/17)

मनुस्मृतिकारः दण्डयस्थानानि इत्थं प्रदर्शितानि-

उपस्थमुदरं जिव्हा हस्तौ पादौ च पंचमम्।
चक्षुर्नासिकाक्षि च धनं देहन्तथैव च।।

इत्थं स्पष्टो भवति यत् राज्यस्य इच्छा एवं दण्डशक्तिः व्यक्तिं राष्ट्रं च धर्मस्य सीमां निर्धारयति। मनुना राजानं सत्यप्रतिज्ञः, बुद्धिमान, कामजन्य-दश क्रोधजन्य-अष्ट-दोषरहितः, दुःखदायी व्यसनशून्यो मन्यते। राजा देवत्वं मन्यते। राजा-प्रजा इत्यनयोर्मध्ये सामञ्जस्यं भवेयुः। राजा राज्यं च अन्योन्याश्रितमङ्गं वर्तते। राजा-शब्दस्यार्थः 'क्षत्रियः' वर्तते। प्रजापालनं क्षत्रियस्य श्रेष्ठधर्मो वर्तते। राजधर्ममनुसरन् राजा प्रजापालनपूर्वकं युद्धेषु अन्योन्यं जिघांसन्तः, परं शक्त्या युद्ध्यमानः स्वर्गं यान्ति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— सर्वधर्मस्य सारः को धर्मः?
उत्तरम्—राजधर्मः।

2. **प्रश्नः**— राजृ दीप्तौ धातोः कः शब्दः निर्मितोऽस्ति?
उत्तरम्—राजा शब्दः।

3. **प्रश्नः**— राज्ञः गुणानां संख्या कति?
उत्तरम्— षट्।

4. **प्रश्नः**— महाभारते राजा शब्दस्य का परिभाषा विहिता?
उत्तरम्—रञ्जिताश्च प्रजाः सर्वास्तेन राजेति शब्द्यते। एवं च लोकरञ्जनमेवात्र राज्ञां धर्मः सनातनः।।

5. **प्रश्नः**— राजधर्मे के सर्वे नियमाः आगच्छन्ति?
उत्तरम्—आचारः, व्यवहारः, प्रायश्चित्तादि।

6. **प्रश्नः**— स्मृत्यनुसारं राज्यानां कियन्ति अङ्गानि?
उत्तरम्— 7 सप्त।

7. **प्रश्नः**— राजा कस्य युगस्य कालस्य कारणं भवति?
उत्तरम्—चतुर्थयुगस्य।

8. **प्रश्नः**— राज्ञः कर्तव्यप्रसङ्गे आपत्तिकाले मनुना किं कथितम्?
उत्तरम्—आपदर्थं धनं रक्षेद्दारान् रक्षेद् धनैरपि। आत्मानं सततं रक्षेद्दारैरपि धनैरपि।।

9. **प्रश्नः**— राजनीति-शास्त्रेषु राज्यस्य सप्त अङ्गानि कानि?
उत्तरम्—1. स्वामी, 2. अमात्यः, 3. जनपदः (राष्ट्रः), 4. दुर्गः, 5. कोशः, 6. दण्डः, 7. मित्रम्।

10. **प्रश्नः**—महाकविकालिदासः राज्ञः सम्बन्धे किं कथितः?
उत्तरम्—राजा प्रकृतिरञ्जनात्।

11. **प्रश्नः**— दण्ड-भयात् सर्वाः प्रजा शुभे कर्मणि प्रवर्त्तन्ते अस्मिन् प्रसंगे मनुना किं कथितम्?
उत्तरम्—दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः।।
स राजा पुरुषो दण्डः स नेता शासिता च सः।
चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः।।

12. **प्रश्नः**— अराजकताशमनाय, चराचरस्य रक्षणाय प्रभुः राजानमसृजत् इति कुतः उद्धृतः?
उत्तरम्—मनुस्मृतिग्रन्थे।

13. **प्रश्नः**— मनुस्मृतिग्रन्थे मानवानां कृते राजानां महत्त्वं सर्वोपरि कीदृशो वर्तते?
उत्तरम्—राजानं प्रथमं विन्देत् ततो भार्यां ततो धनम्।
राजन्यसति लोकस्य कुतो भार्या कुतो धनम्।
संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम्।
शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम्।।

14. **प्रश्नः**— मनुस्मृतिग्रन्थे राज्ञः कर्तव्यविषये किं कथितम्?
उत्तरम्—न च हन्यात्स्थलारूढं न क्लीबं न कृताञ्जलिम्।
न मुक्तकेशं नासीनं न तवास्मीति वादिनम्।
न सुप्तं न विसन्नाहं न नग्नं न निरायुधम्।
नायुध्यमानं पश्यन्तं न परेण समागतम्।।

15. **प्रश्नः**— राजधर्मस्य महत्त्वप्रसङ्गे महाभारतस्य शान्तिपर्वणि किं कथितवान्?
उत्तरम्—यथा हि रश्मयोऽश्वस्य द्विरदस्याङ्कुशो यथा।
नरेन्द्रधर्मो लोकस्य तथा प्रग्रहणं स्मृतम्।
उदयन् हि यथा सूर्यो नाशयत्यशुभं तमः।
राजधर्मास्तथा लोके निक्षिपन्त्यशुभां गतिम्।।

16. **प्रश्नः**— राज्ञः अभावे समाजे किं भविष्यति?
उत्तरम्—अराजकाः प्रजाः पूर्वं विनेशुरिति नः श्रुतम्।

17. **प्रश्नः**—मनुस्मृतिकारः दण्डयस्थानानि कानि प्रदर्शितानि?
उत्तरम्—उपस्थमुदरं जिव्हा हस्तौ पादौ च पंचमम्।
चक्षुर्नासिकाक्षि च धनं देहन्तथैव च।

18. **प्रश्नः**— गुणधर्मः कः भवति?
उत्तरम्—अभिषिक्त-राज्ञः संरक्षणात्मकः।

19. **प्रश्नः**— राज्ञः उपायः कति प्रकारको वर्तते?
उत्तरम्—त्रयः (सामदामदण्डभेदाः)।

20. **प्रश्नः**—राज्ञः दण्ड-व्यवस्थाविषये मनुना किं कथितम्?
उत्तरम्—वाग्दण्डं प्रथमं कुर्यात् धिग्दण्डं तदनन्तरम्।
तृतीयं धनदण्डञ्च वधदण्डमतः परम्।।

21. **प्रश्नः**— नीतयः कतिविधा?
उत्तरम्— (4) चतुर्विधा।

22. **प्रश्नः**— दूतः किं करोति?
उत्तरम्— सन्धिकार्यम्।

23. **प्रश्नः**— पिता कन्यां कस्मिन् समये रक्षति?
उत्तरम्— बाल्ये।

24. **प्रश्नः**— विनयात् ब्राह्मणत्वं कः प्राप्तवान्?
उत्तरम्— पृथुः।

25. **प्रश्नः**— प्रजापालनं कः करोति?
उत्तरम्— राजा।

26. **प्रश्नः**— राजा-शब्दस्यार्थः कोऽस्ति?
उत्तरम्— क्षत्रियः।

(ज) दायभागः (सम्पत्तिविभाजनं) दत्तकपुत्रमीमांसा एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

'दायभाग' नामकः व्यवहारपदे दायविभाजनञ्च द्वौ प्रमुखौ विषयौ स्तः। अस्य द्वौ प्रसिद्धसम्प्रदायौ वर्तेते। मिताक्षरा-दायभागश्च। दायभागस्य मुख्यो त्रयो ग्रन्थाः सन्ति-1. जीमूतवाहनकृतदायभाग, 2. रघुनन्दनप्रणीत- दायतत्त्वम्, 3. श्रीकृष्णतर्कालंकार- विरचित-दायक्रमसंग्रहः। सम्पूर्णभारते "मिताक्षरा' इत्यस्य एव प्रमुखता वर्तते। निबन्धेषु 'दाय" विभागश्च' इति शब्दद्वयोः द्योतिता भवन्ति। नारदः दायभागं परिभाषयति–येषु पुत्राः स्वपितुः धनस्य विभाजनस्य प्रबन्धः क्रियन्ते। निघण्टुः विभाज्यमानपैतृकधनं 'दाय' इति कथ्यते-**विभक्तव्यं पितृद्रव्यं दायमाहुर्मनीषिणः**। अत्र याज्ञवल्क्यः-**दायशब्देन यद्धनं स्वामि-सम्बन्धादेव निमित्तादन्यस्य स्वं भवति तदुच्यते** (याज्ञ०स्मृ०2/114)। दायः द्विविधः–1. अप्रतिबन्धः, 2. सप्रतिबन्धश्च। प्रथमः अप्रतिबन्धदायः पुत्राणां पौत्राणां प्रपौत्राणाञ्च पुत्रत्वेन पौत्रत्वेन प्रपौत्रत्वेन च पितृधनं पितामहधनञ्च स्वपक्षे विभाज्यन्ते। अर्थात् प्रतिबन्धरहितः दायः अप्रतिबन्धदायः। द्वितीयः सप्रतिबन्धदायः–पितृव्यभ्रातादीनां तु पुत्राभावे स्वाम्यभावे च स्वं भवतीति पुत्रसद्भावः स्वातिसद्भावश्च प्रतिबन्धस्तदभावे पितृव्यत्वेन भ्रातृत्वेन च स्वं भवति। अर्थात् प्रतिबन्धसहितः दायः सप्रतिबन्धदायः। अत्र 'विभाग'शब्दः 'विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानां तदेकदेशेषु व्यवस्थापनम्" इति मिताक्षरासम्प्रदाये।

दीयत इति दायः पित्रादिधनं (सम्पत्तिविभाजनं) तस्य विभागव्यवस्थापनम्। मनुस्मृत्यनुसारं एव भार्यापत्योः अन्योन्यानुरागयुक्तो धर्मो युष्माकमुक्तः। संतानाभावे चापत्यप्राप्तिरुक्ता। भ्रातरो मिलित्वा पितृमरणादूर्ध्वं मातृकं धनं समं कृत्वा विभजेरन्। ज्येष्ठगोचरतयोद्धारस्य वक्ष्यमाणत्वात् समभागोऽयं ज्येष्ठभ्रातर्युद्धार्थमनिच्छति बोधव्यः। कथ्यते यथा मनुना–

ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम्।
भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः।
(मनुस्मृतिः-92104)

पितृमरणानन्तरं विभागो जीवतः पितुः इच्छाभावे द्रष्टव्यः। पितुः इच्छया जीवत्यपि तस्मिन् विभागः करणीयः। तदाह याज्ञवल्क्यः–"विभागं चेत् पिता कुर्यादिच्छया विभजेत्सुतान्" (याज्ञ०स्मृ०2/114)। अत्र दायविभागे विज्ञानेश्वर-जीमूतवाहनयोर्मध्ये मतभेदो वर्तते। अत्र दायशब्देन यद्धनं स्वामिसंबन्धादेव निमित्तादन्यस्य एव भवति।

दायभागस्य चत्वारो प्रमुखविषयाः भवन्ति-1. विभाजनकालः, 2. विभाजनसम्पत्तिः, 3. विभाजनविधिः, 4. विभाजन-अधिकारिणः।

1. **विभाजनकालः**–'विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान्' (याज्ञ०स्मृ०-2/114)। 'विभजेरन्सुताः पित्रोरूर्ध्वं रिक्थमृणं समम्' (याज्ञ०स्मृ०-22117)। मिताक्षरा विभाजनस्य त्रयो प्रमुखकालः कथयति–1. पितुः जीवनकाले पितुः इच्छया विभाजनम्। 2. पितुः भौतिकेच्छा समाप्ते सति पितुः इच्छाविरुद्धेऽपि विभाजनम्। 3. पितुः मृत्यूपरान्ते विभाजनकालः निर्धारितः। यथा कथयति शंखः–"अकामे पितरि रिक्थविभागो वृद्धे विपरीतचेतसि रोगिणि च"। तथा याज्ञवल्क्यानुसारं पैतृकसम्पत्तेरुपरि पुत्रस्य जन्मसिद्ध-अधिकारो वर्तते।

2. **विभाजनसम्पत्तिः**–याज्ञवल्क्यानुसारं सम्पत्तेः विभाजनं त्रिप्रकारको भवति। 1. भूमि-गृह-भवनञ्च। 2. निबन्धः अर्थात् अर्थ-अन्नादिकञ्च। 3. द्रव्यम् अर्थात् स्वर्ण रजतं अन्यचल-अचलसम्पत्तिः।"द्रव्ये पितामहो पाते जंगमे स्थावरे तथा" (याज्ञ०स्मृ०-2/121) इत्यनेन स्पष्टो भवति यत्-**संयुक्त-कुलसम्पत्तिः** इत्यस्य विभाजनं करणीयं भवति।

3. **विभाजन-विधिः**–विभाजनस्य स्थितिः उपस्थिते सति भगिन्यः, अविवाहित-अनुजस्य भागम् अवश्यं व्यवस्थितव्यम्। यथा याज्ञवल्क्यस्मृतौ-**भगिन्यश्च निजादंशाद्दत्त्वांशं तु तुरीयकम्** (याज्ञ०स्मृ०2/124)। पैतृक-सम्पत्तितः ऋणस्य भुगतानं, सहभागिन्यस्य जीविकानिर्वाहं, आश्रितकन्यायाः वैवाहिकव्ययादिव्यवस्थापनं, करणीयम्। यथा याज्ञवल्क्यस्मृतौ–

विभजेरन्सुताः पित्रोरूर्ध्वं रिक्थमृणं समम्।
मातुर्दुहितरः शेषमृणात् ताभ्य ऋतेऽन्वयः।।
(याज्ञ०स्मृ०2/117)

असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः।
(याज्ञ०स्मृ०2/117)

न्यूनाधिकविभक्तानां धर्म्मः पितृकृतः स्मृतः।
(याज्ञ०स्मृ०2/117)

4. **विभाजन-अधिकारिणः**–एकः संयुक्त-भारतीय-परिवारे.ते सर्वे पुरुषाः आगच्छन्ति ये एकः पुरुष-पूर्वजस्य उत्तराधिकारिणः भवन्ति। विभाजने सहभागितायाः योग्यता जन्म-अधिकारयुक्तो पुरुषः स्वामीतः चतुर्थ-पीढी-पर्यन्तं मन्यन्ते।

धर्मशास्त्रस्य दायभागे द्वादशपुत्रस्य लक्षणं प्रतिपादितमस्ति–

औरसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च।
कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च।।
पौनर्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा।
स्वयं चोपगतः पुत्रा द्वादशैते प्रकीर्तिताः।।

याज्ञवल्क्यः मनुना स्वीकृतत्रयोदश 'शोद्र' पुत्रस्य अतिरिक्तः द्वादशपुत्रान् स्वीकरोति। तदनुसारं द्वादशपुत्राः सन्ति–1. औरसः, 2. पुत्रिकापुत्रः, 3. क्षेत्रजः, 4. गूढोत्पन्नः, 5. कानीनः, 6. पौनर्भवः, 7. दत्तकः, 8. क्रीतः, 9. कृत्रिमः, 10. स्वयंदत्तः, 11. सहोढः, 12. अपविद्धः। तेषां लक्षणं इत्थं वर्तते–

औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा।।
(याज्ञ०स्मृ०2/117)

अर्थात् स्वीयो धर्मपत्नीपुत्र औरसः, स्वकन्यायाः पुत्र औरससमानः, स पुत्रिकासुतः कथ्यते। स्वस्त्रियाम् अन्येन सगोत्रेणापरगोत्रेण वा किन्तु सवर्णेनोत्पन्नः क्षेत्रजः। स्वगृह एवान्येन केनचिद् गुप्तरूपेणोत्पादितः पुत्रो गूढः। अविवाहितायां कन्यायामुत्पन्नः कानीनोऽथवा मातामहपुत्रः कथ्यते। एकवारं विवाहितायामपि पुनर्द्वितीयवारं विवाहितायां स्त्रियां जातः पुत्रः पौनर्भवः स्मृतः। मात्रा-पित्रा वा स्वेच्छया अन्यस्मै दत्तः पुत्रो दत्तकः कथ्यते। गर्भिणी नारी यदि कस्मैचिद् दत्ता स्यात्तर्हि तद्गर्भोत्पन्नः सुतः सहोढः स्मर्यते। पुत्रेण सह यदि काचिन्नारी प्राप्ता स्यात्तर्हि सहागतः स पुत्रोऽथवा मात्रा विनापि संयोगवशाद् एकाकी प्राप्तः पुत्रो श्रेष्ठतमः। कथ्यते यथा याज्ञवल्क्येन–

चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः।
क्षत्रजास्त्रिद्व्येकभागाः विड्जास्तु द्व्येकभागिनः।।
(याज्ञ०स्मृ०2/117)

(ज) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— व्यवहारपदे कौ द्वौ प्रसिद्धसम्प्रदायौ स्तः?
उत्तरम्—मिताक्षरा-दायभागाश्च।

2. **प्रश्नः**— दायभागस्य मुख्यो त्रयो ग्रन्थाः के सन्ति?
उत्तरम्—1. जीमूतवाहनकृत 'दायभागः', 2. रघुनन्दनप्रणीत–"दायतत्त्वम्", 3. श्रीकृष्णतर्कालंकार-विरचित-'दायक्रमसंग्रहः'।

3. **प्रश्नः**— दायभागस्य चत्वारो प्रमुखविषयाः के भवन्ति?
उत्तरम्—1. विभाजनकालः, 2. विभाजनसम्पत्तिः, 3. विभाजनविधिः, 4. विभाजन-अधिकारिणः।

4. **प्रश्नः**— दायादबान्धवानां संख्या का भवति ?
उत्तरम्—चतस्रः।

5. **प्रश्नः**— नारदः 'दायभागं' किं परिभाषयति?
उत्तरम्—येषु पुत्राः स्वपितुः धनस्य विभाजनस्य प्रबन्धः क्रियन्ते।

6. **प्रश्नः**— विभक्तव्यं पितृद्रव्यं दायमाहुर्मनीषिणः-इति कस्य कथनम्?
उत्तरम्—निघण्टुकारस्य।

7. **प्रश्नः**— दायविभागे कयोः मध्ये मतभेदः?
उत्तरम्—विज्ञानेश्वर-जीमूतवाहनयोर्मध्ये।

8. **प्रश्नः**— दायभागविषये याज्ञवल्क्यः किं कथयति?
उत्तरम्—दायशब्देन . यद्धनं स्वामि-सम्बन्धादेव निमित्तादन्यस्य स्वं भवति तदुच्यते।

9. **प्रश्नः**— दायः कतिविधः के च ते?
उत्तरम्— द्विविधः–1. अप्रतिबन्धः, 2. सप्रतिबन्धश्च।

10. **प्रश्नः**— कः अप्रतिबन्धदायः?
उत्तरम्—पुत्राणां पौत्राणां प्रपौत्राणाञ्च पुत्रत्वेन पौत्रत्वेन प्रपौत्रत्वेन च पितृधनं पितामहधनञ्च स्वपक्षे विभाजनम्।

11. **प्रश्नः**— कः सप्रतिबन्धदायः?
उत्तरम्—पितृव्यभ्रातादीनां तु पुत्राभावे स्वाम्यभावे च स्वं भवतीति पुत्रसद्भावः स्वातिसद्भावश्च प्रतिबन्धस्तदभावे पितृव्यत्वेन भ्रातृत्वे च स्वं भवति।

12. **प्रश्नः**— दायविभागे कति पुत्राः वर्तन्ते?
उत्तरम्— 12 द्वादश।

13. **प्रश्नः**— के सन्ति द्वादशपुत्राः?
उत्तरम्—1. औरसः, 2. पुत्रिकापुत्रः, 3. क्षेत्रजः, 4. गूढोत्पन्नः, 5. कानीनः, 6. पौनर्भवः, 7. दत्तकः, 8. क्रीतः, 9. कृत्रिमः, 10. स्वयंदत्तः, 11. सहोढः, 12. अपविद्धः।

14. **प्रश्नः**— कस्य विभाजनं करणीयम्?
उत्तरम्— संयुक्त-कुलसम्पत्तिः।

15. **प्रश्नः**— विभाजन-विधौ याज्ञवल्क्यस्मृत्यनुसारं किं व्यवस्थितव्यम्?
उत्तरम्—भगिन्यश्च निजादंशाद्दत्त्वांशं तु तुरीयकम्।

16. **प्रश्नः**—याज्ञवल्क्यानुसारं सम्पत्तेः विभाजनं कतिप्रकारकम्?
उत्तरम्—1. भूमि गृह-भवनञ्च।2. निबन्धः, 3. द्रव्यम्।

17. **प्रश्नः**— कः पुंनाम नरकात् पितरं त्रायते?
उत्तरम्— पुत्रः।

(झ) श्राद्धविमर्शः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

श्राद्धशब्दस्यार्थः–श्रद्धायां यद् दीयते, कार्यम् वेति विग्रहे अण् प्रत्यये श्राद्ध इति शब्दो निष्पद्यते। मरीचिमहोदस्य वचनम्–प्रेतान् पितृंश्च निर्दिश्य भोज्यं यत्प्रियमात्मनः। श्रद्धया दीयते यत्र तच्छ्राद्धं परिकीर्तितम्। हेमाद्रिमहोदयस्य वचनम्—होमश्च पिण्डदानञ्च तथा ब्राह्मणभोजनम्। श्राद्धशब्दाभिधेयं स्यादेकस्मिन्नौपचारिके। देवगुरुवृहस्पतिः–संस्कृतं व्यञ्जनं च पयो-मधु-घृतान्वितम्। श्रद्धया दीयते यस्माच्छ्राद्धं तेन निगद्यते।

श्राद्धस्य उपयोगिता–यो जनः स्वविभवोचितं विधानतः श्राद्धं करोति सः आब्रह्मस्तम्बपर्यन्तं जगत्प्रीणाति। ये जनाः श्राद्धं न कुरुते तस्य रक्तं ते पिबन्ति। श्रद्धापूर्वकं ये जनाः श्राद्धं कुर्वन्ति ते आरोग्यः शतायुषः श्रेयांसि च प्राप्नुवन्ति। कथ्यते यथा याज्ञवल्क्येन–

आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च।
प्रयच्छन्ति तथा राज्यं नृणां प्रीताः पितामहाः।

श्राद्धस्य विधानम्–प्रक्रियाभेदेन श्राद्धः द्विविधः–1. एकोद्दिष्टः, 2. पार्वणश्च। श्राद्धस्य द्वादशभेदाः कथिताः सन्ति–1. नित्यं, 2. नैमित्तिकं, 3. काम्यं, 4. वृद्धिश्राद्धं, 5. सपिण्डनं, 6. पार्वणं, 7. गोष्ठ्यां, 8. शुद्ध्यर्थं, 9. कर्माङ्गं, 10. दैविकं, 11. यात्रासु, 12. पुष्ट्यर्थं। यथा कथ्यते आचार्यविश्वमिश्रेण–

नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डनम्।
पार्वणं चेति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्टमम्।।
कर्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतम्।
यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादश स्मृतम्।।

स्मृत्यैव प्रेतश्राद्धसमीक्षायामयमुल्लिखितो यत्–महाप्रयाणकाले गङ्गानिकटे, वाराणस्यां, ग्रामे वा आवालवृद्ध-स्त्री-पुरुषान् गृहाद् बहिः निःसार्य तुलसीनिकटे संस्थापयन्ति मैथिलाः इति। **वृद्धमनुः** कथयति–"क्लीबाद्याः नोदकं (प्रेतश्राद्धं) कुर्युः" इत्थं च सपिण्डीकरणान्ताः सर्वाः प्रेतोदकदानक्रियाः पिप्पलपत्रपुटकैः एव कार्याः, इति तत्त्वविदः। नित्यनैमित्तिकं काम्यं वृद्धिश्राद्धं तथैव च। पार्वणं चेति मनुना श्राद्धं पञ्चविधं स्मृतम्। मितक्षरानुसारेण–मातरि पूर्वं मृतायां तन्निमित्ताशौचमध्ये यदि पितुरुपरमः स्यात् तदा न पूर्वशेषेण शुद्धिः, किन्तु पितुः प्रयाणनिमित्ताशौचकालेनैव

शुद्धिः कार्या। तथा पितुः प्रयाणनिमित्ताशौचमध्ये मातरि स्वर्यातायामपि न पूर्वशेषमात्राच्छुद्धिः, किन्तु पूर्वाशौचं समाप्य उपरि पक्षिणी क्षिपेत्।

श्राद्धदेशाः–प्रजापत्यानुसारं धात्री-बिल्व-वटाऽश्वत्थ-मुनि-चैत्य-गजान्विताः। श्राद्धं छायासु कर्तव्यं प्रसादादौ महावने। यथा ब्रह्मपुराणे–तस्माच्छ्राद्धे पञ्चगव्यैर्लेप्या शोद्ध्या तथोल्मुकैः। गौरमृत्तिकयाच्छन्ना प्रकीर्णा तिलसर्षपैः। तथाहि याज्ञवल्क्यः–"परिचिते शुचौ देशे दक्षिणाप्रवणे तथा" अत एव श्राद्धस्थलायां सपिण्डीकरणश्राद्धं गृहाभ्यन्तरे एव कुर्वन्ति।

श्राद्धकर्तुर्नियमाः–गायत्रीं सम्यगुच्चार्य सूर्यायाऽर्घ्यं निवेदयेत्। श्राद्धकर्ता सोत्तरीयमहतवस्त्रं परिधाय नग्नत्वसूचकं वस्त्रं सर्वथा त्यजेत्। व्यवहारोऽप्ययमेव। जयेष्ठपुत्राऽधिकारविषये मरीचिः कथयति–वहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः। सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव च यत् कृतम्। सपिण्डीकरणान्तानि षोडशश्राद्धकर्माणि ज्येष्ठपुत्रः कार्यं भवति। लोकगर्हाभयात् नारायणबलिः कार्यः। मैथिलास्तु नारायणादिबलिं विनैव शय्यादानादिना प्रेतशुद्धिश्राद्धं समाचरन्ति, उक्तं च एतद् नारायणभट्टेनाऽपि निर्णय-सिन्धुटीकायां–प्रेतशुद्धिश्राद्धमिति मैथिलाः। अत्र वृद्धयाज्ञवल्क्योक्तवचनस्य मिथिलायां पदे पदे जागरूकत्वात्–"धर्मस्य निर्णयः कार्यो मिथिलाव्यवहारतः" इति। श्राद्धे विहितपात्राणि यथा स्कान्दे—

सौवर्णं राजतं वाऽपि कांस्येनाऽथ विनिर्मितम्।
दत्त्वा भोजनपात्रं तु सम्राड् भवति भूतले।।

श्राद्धे विहितपत्रपुटकानि यथा–

श्राद्धे पलाशपत्राणि मधुकौदुम्बराणि च।
पारिका-कुटज-प्लक्ष-क्रकचानि क्रमाज्जगुः।।
पलाश-चूत-पनस-जम्बूपत्रार्क-चम्पकाः।
अलाभे मुख्यपात्राणां ग्राह्याः स्युः पितृकर्मणि।।
(स्मृति सं०)

प्रेतोद्देश्यक-अग्राशन (अरगासन) विचारः–यथोच्यते गारुडे–

तत्र प्रेतोपकृतये दशरात्रमखण्डितम्।
भोज्याद् भोजनकाले तु भक्तमुष्टिं च निर्वपेत्।।

दशगात्रपिण्डदानविचारः–त्र्यहाशौचे: प्रथमदिने त्रयः पिण्डा देयाः, अथवा प्रथमदिने एकः द्वितीयदिने चत्वारः, तृतीयदिने पञ्च पिण्डाः देयाः। सद्यः शौचे तु स्नानान्तरमेकाहेनैव दश पिण्डा देयाः।

सपिण्डीकरणविचारः–श्राद्धसूत्रम्-पितृणामासनं दद्यात् वामपार्श्वे कुशान् सुधीः। दक्षिणे चैव देवानां सर्वदा श्राद्धकर्मणि। अत एव कर्तुः दक्षिणपार्श्वे (पश्चिमप्रदेशे) विश्वेदेवश्राद्धं, कर्तुः वामपार्श्वे (पश्चिम-पूर्वक्रमेण) मासिकादिपितृश्राद्धं समाचरन्ति। यथोच्यते गारुडे–

द्वादशाहे त्रिपक्षे वा षण्मासे वत्सरेऽपि वा।
सपिण्डीकरणं प्रोक्तं मुनिभिस्तत्त्वदर्शिभिः।।

एकोद्दिष्टादिश्राद्धे तु आह मनुः–

द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र वा।
भोजयेत् सुसमृद्धोऽपि न प्रसज्येत विस्तरे।।

भोजनदक्षिणाविचारः–ब्रह्मपुराणे उक्तं यत्–

जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते।
वेदाभ्यासी भवेद् विप्रः श्रोत्रियस्त्रिभिरेव हि।।

द्रव्यदक्षिणाऽभावे भोजनान्ते पूगीफलमवश्यं देयम् (प्रचुरव्यवहारोऽप्ययमेव)।

(झ) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— संस्काराः कति सन्ति, येषु मुख्याः संस्काराः कति सन्ति?
उत्तरम्— 48 संस्काराः, 16 षोडश मुख्याः संस्काराः।

2. **प्रश्नः**— प्रथम-श्राद्धाधिकारो कः भवति?
उत्तरम्—ज्येष्ठपुत्रः।

3. **प्रश्नः**— श्राद्धशब्दस्यार्थः कः?
उत्तरम्— श्रद्धायां यद् दीयते, कार्यम् वेति विग्रहे अण् प्रत्यये इति श्राद्धः।

4. **प्रश्नः**— श्राद्धस्य का परिभाषा कृता मरीचिमहोदयेन?
उत्तरम्— प्रेतान् पितृंश्च निर्दिश्य भोज्यं यत्प्रियमात्मनः। श्रद्धया दीयते यत्र तच्छ्राद्धं परिकीर्तितम्।

5. **प्रश्नः**—गोष्ठ्यां श्राद्धकर्तृसमुदाये संभूय सामग्रीसंपादनस्य किमर्थः भवति?
उत्तरम्— श्राद्धः।

6. **प्रश्नः**— श्राद्धस्य किं लक्षणम्?
उत्तरम्— व्रतं पितृंश्च निर्दिश्य भोज्यं यत् प्रियमात्मनः श्रद्धया दीयते यद्यतच्छ्राद्धं परिकीर्त्तितम्।

7. **प्रश्नः**— नान्दी-श्राद्धः कस्मिन् समये भवति?
उत्तरम्— उपनयनादि-समये।

8. **प्रश्नः**— हेमाद्रि महोदयस्य श्राद्ध-लक्षणं किम्?
उत्तरम्— होमश्च पिण्डदानञ्च तथा ब्राह्मणभोजनम्। श्राद्धशब्दाभिधेयं स्यादेकस्मिन्नौपचारिके।

9. **प्रश्नः**— देवगुरुवृहस्पतिमहोदयस्य श्राद्ध-लक्षणं किम्?
उत्तरम्— संस्कृतं व्यञ्जनं च पयो-मधु-घृतान्वितम्। श्रद्धया दीयते यस्माच्छ्राद्धं तेन निगद्यते।

10. **प्रश्नः**— श्राद्धस्य का उपयोगिता?
उत्तरम्—यो जनः स्वविभवोचितं विधानतः श्राद्धं करोति सः आब्रह्मस्तम्बपर्यन्तं जगत्प्रीणाति। ये जनाः श्राद्धं न कुरुते तस्य रक्तं ते पिबन्ति।

11. **प्रश्नः**—श्रद्धापूर्वकं ये जनाः श्राद्धं कुर्वन्ति ते किं प्राप्नुवन्ति?
उत्तरम्— आरोग्यः शतायुषः श्रेयांसि च।

12. **प्रश्नः**— श्राद्धस्य उपयोगिताविषये याज्ञवल्क्येन किं कथ्यते?
उत्तरम्— आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च। प्रयच्छन्ति तथा राज्यं नच्णां प्रीताः पितामहाः।

13. **प्रश्नः**— प्रक्रियाभेदेन श्राद्धः कतिविधः?
उत्तरम्— द्विविधः-1. एकोद्दिष्टः, 2. पार्वणश्च।

14. **प्रश्नः**— श्राद्धस्य द्वादशभेदाः के सन्ति?
उत्तरम्—1. नित्यं, 2. नैमित्तिकं, 3. काम्यं, 4. वृद्धिश्राद्धं, 5. सपिण्डनं, 6. पार्वणं, 7. गोष्ठ्यां, 8. शुद्ध्यर्थं, 9 कर्माङ्गं, 10. दैविकं, 11. यात्रासु, 12. पुष्ट्यर्थं।

15. **प्रश्नः**—अशौचस्य पूर्णावधिः कियत् काल-पर्यन्तं भवति?
उत्तरम्— एक-मासपर्यन्तम्।

16. **प्रश्नः**— मनुस्मृत्यनुसारं द्वादशपुत्राः के सन्ति?
उत्तरम्— 1. औरसः, 2. पुत्रिकापुत्रः, 3. क्षेत्रजः, 4. गूढोत्पन्नः, 5. कानीनः, 6. पौनर्भवः, 7. दत्तकः, 8. क्रीतः, 9. कृत्रिमः, 10. स्वयंदत्तः, 11. सहोढ़ः, 12. अपविद्धः।

17. **प्रश्नः**— सपिण्डतायाः निवृत्तिः कदा भवति?
उत्तरम्— (8) अष्टमपुरुषे।

18. **प्रश्नः**—भोजनदक्षिणाविचार-विषये ब्रह्मपुराणे किमुक्तम्?
उत्तरम्— जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते। वेदाभ्यासी भवेद् विप्रः श्रोत्रियस्त्रिभिरेव हि।

19. **प्रश्नः**— पिण्डान्वाहार्यकश्राद्धः कस्मिन् तिथौ भवति?
उत्तरम्— अमावास्यायाम्।

20. **प्रश्नः**— पुण्यार्थाय कान् भोजयेत्?
उत्तरम्— मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुम्। दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत्।।

21. **प्रश्नः**— के सर्वे नरकं यान्ति?
उत्तरम्— परिवित्तिः परिवेत्ता यथा च परिविद्यते। सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः।।

22. **प्रश्नः**— ऋषिभ्यः के जाताः?
उत्तरम्— पितरः।

23. **प्रश्नः**— पितृभ्यो के जाताः?
उत्तरम्— देवमानवाः।

24. **प्रश्नः**— देवेभ्यो के जाताः?
उत्तरम्— चराचरसम्पूर्णजगत्।

25. **प्रश्नः**— श्राद्धे कानि श्रावयेत्?
उत्तरम्— स्वाध्यायं श्रावयेत्पित्र्ये धर्मशास्त्राणि चैव हि। आख्यानानीतिहासांश्च पुराणान्यखिलानि च।।

26. **प्रश्नः**— स्मृतौ प्रेतश्राद्धसमीक्षायां किं कथितमस्ति?
उत्तरम्—महाप्रयाणकाले गङ्गानिकटे, वाराणस्यां, ग्रामे वा आवालवृद्ध-स्त्री-पुरुषान् गृहाद् बहिः निःसार्य तुलसीनिकटे संस्थापयन्ति मैथिलाः इति।

27. **प्रश्नः**— बृद्धमनुः महाप्रयाणकाले किं कथयति?
उत्तरम्— क्लीबाद्याः नोदकं (प्रेतश्राद्धं) कुर्युः।

28. **प्रश्नः**— प्राजापत्यानुसारं श्राद्धदेशाः के सन्ति?
उत्तरम्— धात्री-विल्व-वटाऽश्वत्थ-मुनि-चैत्य-गजान्विताः। श्राद्धं छायासु कर्तव्यं प्रसादादौ महावने।

29. **प्रश्नः**—याज्ञवल्क्यमते श्राद्धदेशाः के सन्ति?
उत्तरम्— परिचिते शुचौ देशे दक्षिणाप्रवणे तथा।

30. **प्रश्नः**— जयेष्ठपुत्राऽधिकारविषये मरीचिः किं कथयति?
उत्तरम्— बहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः। सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव च यत् कृतम्।

सपिण्डीकरणान्तानि षोडशश्राद्धकर्माणि ज्येष्ठपुत्रस्य कार्यं भवति।

31. **प्रश्नः**— वृद्धयाज्ञवल्क्योक्तवचनस्य मिथिलायां पदे पदे किं जागरूकत्वात्?
उत्तरम्— धर्मस्य निर्णयः कार्यो मिथिलाव्यवहारतः इति।

32. **प्रश्नः**— श्राद्धाधिकारिणः विषये चन्द्रिकायां सुमन्तुः किं कथयति?
उत्तरम्— मातुः पितुः प्रकुर्वीत संस्थितस्यौरसः सुतः। पैतृमेधिकसंस्कारं मन्त्रपूर्वकमाहतः।

33. **प्रश्नः**— श्राद्धाधिकारिणः विषये हेमाद्रौ शङ्खः किं कथयति?
उत्तरम्— पितुः पुत्रेण पिण्डदानोदकक्रिया। पुत्राभावे तु पत्नी स्यात्तदभावे तु सोदरः।

34. **प्रश्नः**— प्रेतोद्देश्यक-अग्राशन (अरगासन) -विचारे गारुडेपुराणे किमुक्तम्?
उत्तरम्— तत्र प्रेतोपकृतये दशरात्रमखण्डितम्। भोज्याद् भोजनकाले तु भक्तमुष्टिं च निर्वपेत्।।

35. **प्रश्नः**— श्राद्धविषये पद्मपुराणे किं कथितमस्ति?
उत्तरम्— देशे काले च पात्रे च श्रद्धया विधिना च यत्। पितृमुद्दिश्य विप्रेभ्यो दत्तं श्राद्धमुदाहृतम्।

(ञ) प्रायश्चित्त-विचारः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

प्रयतत्वाद्वोपचितमशुभं नाशयतीति प्रायश्चित्तमिति। प्रायश्चित्तशब्दः पापक्षयार्थे नैमित्तिके कर्मविशेषे रूढः। अबुद्धिकृते पापे प्रायश्चित्तं भवति इत्याहुः पण्डिताः। प्रायश्चित्ते कृते अन्तरात्मा शुद्धतया प्रसीदति। कामतः कृते प्रायश्चित्तं भवतीत्याहुः। इन्द्रं प्रजापतिरुपह्वाख्यं कर्म प्रायश्चित्तं दत्तवान्। यथा-**"इन्द्रो यतीन्सालावृकेभ्यः प्रायच्छत्तमश्लीला वागेत्यावदत्स प्रजापतिमुपाधावत्तस्मात्तमुपहव्यं प्रायच्छत्"** इति। अतः कामकारकृतेऽप्यस्ति प्रायश्चित्तम्। एवं अनिच्छतः कृतं पापं वेदाभ्यासेन शुध्यति नश्यति वा। कामतः (इच्छतः) कृतं पापं मोहात्प्रायश्चित्तैः कर्मानुसारं पृथक् विधैः नश्यति। कथितं यथा मनुना-

अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः।
कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात्।।
(मनुस्मृतेः-11/45)

अकामतः कृतं पापं वेदाभ्यासेन शुध्यति।
कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैः।।
(मनुस्मृतेः-11/46)

नित्यं यद्विहितं संध्योपासनादि, नैमित्तिकं च शवस्पर्शादौ स्नानादि, तदकुर्वन् तथा प्रतिषिद्धं हिंसाद्यनुतिष्ठन्-विहितनिषिद्धेष्वत्यन्तासक्तिं कुर्वन्नरो मनुष्यजातिमात्रं प्रायश्चित्तमर्हति। उक्तं च मनुना-

अकुर्वन् विहितं कर्म निन्दितं च समाचरन्।
प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः।।
(मनुस्मृतेः-11/44)

'तोषयित्वा द्विजोत्तमानिति' देवलवचनात् द्वादश-मासाभ्यन्तरे प्रायश्चित्ताकरणे द्विगुणन्तत्कर्तव्यम्- 'संवत्सराभिशप्तस्य दुष्टस्य द्विगुणोदय' इति मनुवचनात्। वर्षाल्पवयसः प्रायश्चित्तन्न कर्तव्यम्। पञ्चवर्षात्परमेकादशवर्षपर्यन्तं पादप्रायश्चित्तम्।

1. **गोवधप्रायश्चित्तम्**—तत्र (क) ब्राह्मणस्वामिक-चतुर्हायनादिकज्ञानकृतसाक्षाद्गोवधे मनूक्तत्रैमासिक-व्रतानुकल्प-सप्तदशप्राजापत्यानुकल्प-सप्तदशधेनुमूल्यं देयम्, अज्ञाने तु अर्द्धम्। (ख) **क्षत्रियस्वामिक**- चतुर्हायनादि-कज्ञानकृतसाक्षाद्गोवधे द्वादशप्राजापत्यव्रतानुकल्प-द्वादशधेनुमूल्यं देयम्, अज्ञाने तु अर्द्धम्।

(ग) **वैश्यस्वामिक**-चतुर्हायनादिकज्ञानकृतसाक्षाद्-गोवधे त्वष्टप्राजापत्यव्रतानुकल्पाष्टधेनुमूल्यं देयम्, अज्ञाने तु अर्द्धम्। (घ) **शूद्रस्वामिक**- चतुर्हायनादिकज्ञानकृत-साक्षाद्गोवधे चत्वारि प्राजापत्यानि, चतस्रो धेनवस्तन्मूल्यानि द्वादशकार्षापणा वा देयाः। अज्ञाने तदर्द्धम्। अत्र 'गोमूत्रेण यवागूकृतमि'ति गौतमसूत्रात्।

गर्भिण्यादिमात्रवधे द्विगुणप्रायश्चित्तम्— गर्भिण्यादिमात्रवधे द्विगुणमिति शूलपाणिः। स्मार्तास्तु सचेतनगर्भयुक्ताया वधे सम्पूर्णप्रायश्चित्तस्य द्विगुणम्। अन्यत्र तूत्पन्नादिभेदेन पादं पादद्वयं पादत्रयं सम्पूर्णं वा प्रायश्चित्तम्। अस्थिभङ्गादिकरणे षण्मासाभ्यन्तरे गोर्मरणे पूर्वोत्तरस्वामिभेदेन एकहायन्यादिक्रमेण प्रायश्चित्तमाचरणीयम्। अपालन-

निमित्तकगोवधप्रायश्चित्ते तत्राविभक्तानां भ्रातृणाम्मध्ये सर्वानुमत्येकेन प्रायश्चित्ताचरणे सर्वेषां पापक्षयार्थं न पृथक् प्रायश्चित्ताचरणम्। यथा- "द्वात्रिंशत्पणिका गावो वृषभः षट्पुराणकः" इति प्रसिद्धवचनानुसारेण व्यवस्था श्रेयसीति।

दक्षिणानिर्णयः-तत्र ज्ञानतो ब्राह्मणसम्बन्धिगोवधे त्रैमासिकव्रतं प्रायश्चित्तमिति। वृषभैकादशा गा दक्षिणा देया। अज्ञानतोऽर्द्धव्रते गौरेकेति। क्षत्रियसम्बन्धिचतुर्हायनिकपुङ्गोवधे वृषभो दक्षिणा, स्त्रीगोवधे मृतवत्या गौर्दक्षिणा देयेत्याह। ज्ञानतो वैश्यस्वामिकगोवधव्रते द्वे धेनु, अज्ञानतोऽर्द्धव्रते धेनुरेका। दक्षिणा च यथाशक्ति देयेति शूलपाणिः। यथोच्यते याज्ञवल्क्येन-

पञ्चगव्यं पिबेद्गोघ्नो मासमासीत संयतः।
गोष्ठे वसेद्गोनुगामी गोप्रदानेन शुद्ध्यति।।

तत्र नक्तव्रतं पुराणैकलीयकाञ्चनदानसमम्। पुराणं कार्षापणम्। कर्षापणत्रयम्-धेनुमूल्यरूपम्। शिशुकृच्छ्रे पुराणत्रयलभ्यं काञ्चनदेयम्। अर्द्धकृच्छ्रे चतुर्विंशतिपण-लभ्यकाञ्चनादिकं देयमिति संक्षेपतो व्रतप्रकरणम्।

अथ महापातकप्रायश्चित्तमाह-प्राणवियोगफल-कव्यापारो हननमिति लोकप्रसिद्धमेव। स च यथा साक्षात्कर्तुर्हन्तृत्वं तथा परम्पराकर्तुरपीति तस्यापि हन्तृत्वम्। मनुस्मृतिग्रन्थे महापातकप्रायश्चित्तविषये भणितं यत्-

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैस्सह।।

(मनुस्मृतेः)

ब्रह्मघातक-विषये कथयति विष्णुः-

रागाद्द्वेषात्प्रमादाद्वा स्वतः परत एव वा।
ब्राह्मणङ्घातयेद्यस्तु स भवेद् ब्रह्मघातकः।।

इत्यत्र परतः शब्दप्रयोगात्साक्षादिव प्रयोजकस्यापि वधभागित्वं प्रतीयते। तथाऽऽक्रोशनताडनादिनिमित्त-कमन्यूत्पादनद्वारेण निमित्तिनोऽपि वधभागित्वमिति षट्त्रिंशन्मतम्। तथा महापातक्रियाजनाध्यापनपरिणयन-प्रयुक्तायपि महापातकित्वेन तथाविधप्रायश्चित्तप्रसङ्गः। एवमसत्प्रतिग्रहादिप्रयुक्तौ धर्माधिकारिणोरपि प्रतिगृहीतृप्रयोज-कत्वेन प्रायश्चित्तप्रसङ्गः।

अथ पञ्चविधवधकर्तृत्वनिर्णयः-साक्षात्प्रयोजका-नुग्राहकानुमन्तानिमित्तरूपकारणभेदात संक्षेपतः पञ्चविधो वधस्तत्कारी वधकारी। तत्र नरान्तरव्यापारा-व्यवहितप्राणवियोगफलजनिका यत्समवेता प्रवृत्तिरुत्पद्यते स साक्षाद्वधी। प्रयोजकश्च द्विविधः-1. अप्रवृत्तप्रवर्त्तकः 2. प्रवृत्तोत्साहजनकश्च। तथा च योऽप्रवृत्तं पुरुषः वधार्थं वेतनादिना प्रवर्त्तयति प्रवृत्तमुत्साहयति च स प्रयोजकः। अनुग्राहकोऽपि द्विविधः-वध्यगत-वैमनस्काद्यापादनेन वा तदीयाग्राहकारव्युदासेन वा। तथा च वध्यस्य पलायनादिरोधकोऽनुग्राहकः। निमित्ती च यत्कृतमन्यूपादनेन प्राणत्यागक्लेशो विधीयते। तेन सप्तविधो हन्ता। 'कामाकामतश्चतुर्दशविध इति' मनुवचनात्कामतो ब्रह्मवधे प्रायश्चित्ताभावः, किन्तु मरणमिति द्रष्टव्यम्। अज्ञानतः साक्षाद्ब्रह्मवधे यथोक्तद्वादशवार्षिकव्रतं प्रायश्चित्तम्। अङ्गिराः कथयति-

प्रायश्चित्तमकामानां कामानाप्नोति मानवः।
विहितं यदकामानां कामात्तद्द्विगुणं स्मृतम्।।

अर्थात् पितृमातृसोदरभ्रात्र्याचार्यश्रोत्रियाहिताग्नीनां षण्णामज्ञानतः प्रत्येकं वधे द्वादशवार्षिकव्रतं कृत्वा न निवर्त्तितव्यम्। किन्तु यावज्जीवं व्रतमाचरणीयम्। तत्र क्षत्रियादीनां साक्षादज्ञानतो ब्रह्मवधे विशेषाश्रवणात्प्राणान्तिकमेव प्रायश्चित्तम्। अज्ञानतो ब्राह्मणवधे यत्प्रायश्चित्तं तत्र क्षत्रियवैश्यशूद्राणां यथाक्रमं द्विगुणं त्रिगुणं चतुर्गुणं बोद्धव्यमिति।

व्यभिचरितस्त्रीवधप्रायश्चित्तम्-ब्राह्मणीवधे पञ्चदश, क्षत्रियावधेऽष्टौ धेनवः, वैश्यावधे चतस्रो धेनवः, शूद्रावधे धेनुद्वयम। पशुपक्षिवधप्रायश्चित्तम्-नानामुनिवचनेषु पशुपक्षिवधे शूद्रहत्याव्रतं श्रूयते। तत्र सकृदभ्या-सात्यन्ताभ्यासभेदेन व्यवस्था मुनिभिरुक्तेति। चाण्डालाद्यन्नभक्षणप्रायश्चित्तम्-अज्ञानाच्चाण्डालाद्यन्नभक्षणे पादोनधेनुचतुष्टयम्। ज्ञानतः सार्द्धसप्तधेनवः। बलात्कारतो भोजने पञ्चधेनवः। शुष्कान्ने सर्वत्रार्द्धम्। आमान्ने तुरीयांशः। अज्ञानतस्तु स्पृष्टान्नभोजने धेनुरेका। अन्त्यजादिस्त्री-सकृद्गमनेऽज्ञानतश्चान्द्रायणम्। अज्ञानात्सकृत शूद्रोच्छिष्टभोजने त्रिरात्री भोजनम्। गोमांसादि-भक्षणप्रायश्चित्तम्-गोमांसभक्षणे प्राजापत्यञ्चरेदिति। इदमानतः सकृद्विषयम्। ज्ञानतो द्वैगुण्यं सकृद्विषयम्। सुरापान-प्रायश्चित्तम्-ब्राह्मणस्य तु गौडीपैष्टीमाध्वीनामन्यतमपाने प्राणान्तिकम्। क्षत्रियवैश्ययोः सकृदज्ञानकृतसुरापाने

प्राणान्तिकम्। पतिताय कन्यादानप्रायश्चित्तम्-तत्र पतिताय कन्यादाने मासोपवासव्रतमज्ञानतः चान्द्रायणमिति हारीत-वचनात्। मणिमुक्ताप्रवालादिस्तेयप्रायश्चित्तम्-कणान्नता-कणभक्षणम्। द्वादशाहं कणान्नभक्षणे षडुपवासाः सम्पद्यन्ते। तदशक्तौ पुराणत्रयन्देयम्। अपहृतद्रव्यदानपूर्वकञ्चैतकरणीयम्। सुवर्णस्तेयप्रायश्चित्तम्-तत्र सुवर्णापहरणं महापातकम्। हारीतस्यानुसारं-पञ्चमहापातकानि सन्ति 1. ब्रह्महत्या, 2. सुरापानं, 3. विप्रस्वर्णापहारणम्, 4. गुरुदाराभिगमनम्, 5. संसर्गः इति। अत्र ब्राह्मणेति विशेषणात् क्षत्रियादिसुवर्णहरणं तूपपातकम्। अत्र क्षत्रियादीनां परिषद्वैगुण्यात्परिषदुक्तं व्रतं कुर्यादित्यनेनाज्ञानतो द्वादशवार्षिकम्। कृतश्राद्धागमन-प्रायश्चित्तम्-विदेशगतस्य द्वादशवर्षानन्तरमप्राप्तस्य श्राद्धं कृते पुनरागतस्य चान्द्रायणव्रतं प्रायश्चित्तम्। यज्ञोपवीतरहित-प्रायश्चित्तम्-जपम्-गायत्रीजपम्। अनिर्दिष्टे शतावृत्ति-वचनाच्च शतावृत्तिगायत्रीं जप्त्वोपवसेदिति। रहस्यप्रायश्चित्तम्-रहःकृतेषु सङ्कीर्णोपपातकानु-पातकमहापातकेषु गायत्र्या शतसहस्रायुतलक्षजपः प्रायश्चित्तं यथा मिताक्षरायाम्। रजस्वलादिगमनप्रायश्चित्तम्-शङ्खलिखितौ-रजस्वलावधूतागमने त्रिरात्रोपवासपूर्वकं घृतप्राशनं कुर्यात्। श्राद्धदिने मैथुनप्रायश्चित्तम्- यथा विष्णुपुराणे-श्राद्धे नियुक्तो भुक्त्वा वा भोजयित्वा नियोज्य च। व्यवायी रेतसो गर्त्ते मज्जयत्यात्मनः पितृन्। दिवामैथुनप्रायश्चित्तम्-यथा शङ्खः-

दिवा तु मैथुनं कृत्वा नग्नः स्नात्वा तथाम्भसि।
नग्नां परस्त्रियन्दृष्ट्वा दिनमेकं व्रती भवेत्।।

(ञ) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—प्रायश्चित्तस्य किं लक्षणम्?
   उत्तरम्— प्रायश्चित्त-शब्दः प्रयतत्वाद्वोपचितमशुभं नाशयतीति पापक्षयार्थे नैमित्तिके कर्मविशेषे रूढः।

2. **प्रश्नः**— नैमित्तिकधर्मः कः भवति?
   उत्तरम्— प्रायश्चित्तविधानम्।

3. **प्रश्नः**—अबुद्धिकृते पापे प्रायश्चित्तं भवति इति के कथ्यन्ते?
   उत्तरम्— पण्डिताः।

4. **प्रश्नः**—प्रायश्चित्ते कृते किं भवति?
   उत्तरम्— अन्तरात्मशुद्धिः।

5. **प्रश्नः**— इन्द्रं प्रजापतिरुपहव्याख्यं कर्म प्रायश्चित्तं दत्तवान् इति केन ज्ञायते?
   उत्तरम्—इन्द्रो यतीन्सालावृकेभ्यः प्रायच्छत्तमश्लीला वागेत्यावदत्स प्रजापतिमुपाधावत्तस्मातमुपहव्यं प्रायच्छत्।

6. **प्रश्नः**—अनिच्छतः कृतं पापं केन शुध्यति नश्यति वा?
   उत्तरम्— वेदाभ्यासेन।

7. **प्रश्नः**— कामतः (इच्छतः) कृतं पापं केन नश्यति?
   उत्तरम्—मोहात्प्रायश्चित्तैः कर्मानुसारं पृथक् विधैः नश्यति।

8. **प्रश्नः**—अकुर्वन् विहितं कर्म निन्दितं च समाचरन्। प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः। उक्तश्लोकः प्रायश्चित्तविषये केन कथितः?
   उत्तरम्— मनुस्मृतिकारेण।

9. **प्रश्नः**—संवत्सराभिशप्तस्य दुष्टस्य द्विगुणोदयः इति कस्य वचनम्?
   उत्तरम्— मनुस्मृतिकारस्य वचनम्।

10. **प्रश्नः**—पादप्रायश्चित्तं कियत् पर्यन्तं भवति?
    उत्तरम्— पञ्चवर्षात्परमेकादशवर्षपर्यन्तम्।

11. **प्रश्नः**— प्रायश्चित्त-अकरणे को दोषः?
    उत्तरम्— प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः। अपश्चात्तापिनः कष्टान्नरकान्यान्ति दारुणान्।

12. **प्रश्नः**— मनुस्मृत्यनुसारं ब्राह्मणानां कृते गोवधप्रायश्चित्तं किम्?
    उत्तरम्—त्रैमासिक-व्रतानुकल्प-सप्तदशप्राजा-पत्यानुकल्प-सप्तदशधेनुमूल्यं देयम्, अज्ञाने तु अर्द्धम्।

13. **प्रश्नः**— मनुस्मृत्यनुसारं क्षत्रियाणां कृते गोवधप्रायश्चित्तं किम्?
    उत्तरम्—चतुर्हायनादिकज्ञानकृतसाक्षाद्गोवधे द्वादश-प्राजापत्यव्रतानुकल्पद्वादशधेनुमूल्यं देयम्, अज्ञाने तु अर्द्धम्।

14. **प्रश्नः**— मनुस्मृत्यनुसारं वैश्यानां कृते गोवधप्रायश्चित्तं किम्?
    उत्तरम्—चतुर्हायनादिकज्ञानकृतसाक्षाद्गोवधे त्वष्ट-प्राजापत्यव्रतानुकल्पाष्टधेनुमूल्यं देयम्, अज्ञाने तु अर्द्धम्।

15. प्रश्नः— मनुस्मृत्यनुसारं शूद्राणां कृते गोवधप्रायश्चित्तं किम्?

उत्तरम्—चतुर्हायनादिकज्ञानकृतसाक्षाद्गोवधे चत्वारि प्राजापत्यानि, चतस्रो धेनुवस्तन्मूल्यानि द्वादशकर्षापणा वा देयाः। अज्ञाने तदर्द्धम्।

16. प्रश्नः—याज्ञवल्क्येन गोवधप्रायश्चित्तविषये किं कथितः?

उत्तरम्— पञ्चगव्यं पिवेद्गोघ्नो मासमासीत संयतः। गोष्ठे वसेद्गोनुगामी गोप्रदानेन शुद्ध्यति।।

17. प्रश्नः— ब्रह्महा-ब्रह्महत्यादीनि कस्य पापक्रमे गण्यते?

उत्तरम्— महापापी पापक्रमे।

18. प्रश्नः—मनुस्मृतिग्रन्थे महापातकप्रायश्चित्तविषये किं भणितम्?

उत्तरम्— ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्याहुः संसर्गश्चापि तैस्सह।।

19. प्रश्नः— मद्यपाय प्रायश्चित्तं किं निर्धारितम्?

उत्तरम्—सुराम्बुघृतगोमूत्रपयसामग्निसंनिभम्। सुरापोऽन्यतमं पीत्वा मरणाच्छुद्धिमृच्छति।

20. प्रश्नः— ब्रह्मघातक-विषये विष्णुः किं कथयति?

उत्तरम्—रागाद्द्वेषात्प्रमादाद्वा स्वतः परत एव वा। ब्राह्मणङ्घातयेद्यस्तु स भवेद् ब्रह्मघातकः।।

21. प्रश्नः—सुवर्णस्तेयसमानि पापानि कानि भवन्ति?

उत्तरम्— अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा। निक्षेपस्य च सर्वं हि सुवर्णस्तेयसंमितम्।

22. प्रश्नः— गुरुभार्यागामी किमस्ति?

उत्तरम्— महापातकिः।

23. प्रश्नः—पितृमातृसोदरभ्रात्र्याचार्यश्रोत्रियाहिताग्नीनां षण्णामज्ञानतः प्रत्येकं वधे किं प्रायश्चित्तम्?

उत्तरम्—यावज्जीवं व्रतमाचरणीयम्।

24. प्रश्नः—अज्ञानतो ब्राह्मणवधे यत्प्रायश्चित्तं तत्र क्षत्रियवैश्यशूद्राणां किं प्रायश्चित्तम्?

उत्तरम्—यथाक्रमं द्विगुणं त्रिगुणं चतुर्गुणं बोद्धव्यमिति।

25. प्रश्नः— पशुपक्षिवधप्रायश्चित्तं नानामुनिवचनेषु किं श्रूयते?

उत्तरम्— पशुपक्षिवधे शूद्रहत्याव्रतं श्रूयते।

26. प्रश्नः— गोमांसादिभक्षणप्रायश्चित्तं किम्?

उत्तरम्— गोमांसभक्षणे प्राजापत्यञ्चरेदिति।

27. प्रश्नः— पतिताय कन्यादानप्रायश्चित्तं किम्?

उत्तरम्—तत्र पतिताय कन्यादाने मासोपवास-व्रतमज्ञानतः चान्द्रायणमिति हारीतवचनात्।

28. प्रश्नः— हारीतस्यानुसारं-पञ्चमहापातकानि कानि सन्ति?

उत्तरम्— 1. ब्रह्महत्या, 2. सुरापानं, 3. विप्रस्वर्णा-पहारणम्, 4. गुरुदाराभिगमनम्, 5. संसर्गः इति।

29. प्रश्नः— यज्ञोपवीतरहितप्रायश्चित्तं किम्?

उत्तरम्— शतावृत्तिगायत्रीजपम्।

30. प्रश्नः—दिवामैथुनप्रायश्चित्तं किम्?

उत्तरम्— दिवा तु मैथुनं कृत्वा नग्नः स्नात्वा तथाम्भसि। नग्नां परस्त्रियन्दृष्ट्वा दिनमेकं व्रती भवेत्।

(ट) दत्तकपुत्रमीमांसा एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

पितृगणाः हृदयेन विचार्य आत्मभ्यः पुत्रमभिकांक्षन्ते, ते आशां कुर्वन्ति यत् पुत्रः लघुऋणात् वा महद्ऋणात् एवं पितृ-ऋणेभ्यः विमुक्तिः (निष्कृतिम्) प्रदास्यति। धर्मशास्त्रस्य दायभागे द्वादशपुत्रस्य लक्षणं प्रतिपादितमस्ति–

औरसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च।
कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च।
पौनर्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा।
स्वयं चोपगतः पुत्रा द्वादशैते प्रकीर्तिताः।।

याज्ञवल्क्यः मनुना स्वीकृतत्रयोदशशोद्रपुत्रस्य अतिरिक्तः द्वादशपुत्रान् स्वीकरोति। तदनुसारं द्वादशपुत्राः सन्ति–1. औरसः, 2. पुत्रिकापुत्रः, 3. क्षेत्रजः, 4. गूढोत्पन्नः, 5. कानीनः, 6. पौनर्भवः, 7. दत्तकः, 8. क्रीतः, 9. कृत्रिमः, 10. स्वयंदत्तः, 11. सहोढः, 12. अपविद्धः।

याज्ञवल्क्यस्मृतौ पुत्राणां सम्बन्धे कल्याणप्रदीपयोगानां चर्चा कृताऽस्ति। पुत्रोत्पत्तेः इच्छायाः तात्पर्यमासीत् कुलस्य अग्रे नयनम् तथा तस्य अविच्छेद्यत्वकरणम्–"वंशस्य अविच्छेदः" एवं धार्मिकाः संस्काराः, तेषां नानाविधयः एवम् अग्निहोत्रानुष्ठानानां तथा अग्निहोत्रादीनां रक्षणम्।

दत्तकपुत्रः–याज्ञवल्क्यस्मृतौ यं माता अथवा पिता संकटकाले एवं स्नेहवशात् स्वजातेः मनुष्याय जलेन संकल्पं कृत्वा प्रयच्छति, स दत्तकः पुत्रः अभिधीयते। मात्रा-पित्रा वा स्वेच्छया अन्यस्मै दत्तः पुत्रो दत्तकः कथ्यते। अर्थात् **दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्।** संकल्पेन सह दीयमानः गृहीतो वा पुत्रः 'दत्तक'पुत्रो भवति। मनुस्मृतौ मनुना कथ्यते यत् यो मृतमातापितृकस्त्यागोचितकारणं विना द्वेषादिना ताभ्यां त्यक्तो वात्मानं यस्मै ददाति स स्वयंदत्ताख्यस्तस्य पुत्रो दत्तकपुत्रः।"शुक्रशोणितसंभवः पुरुषो मातापितृनिमित्तकः तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतः" इति वसिष्ठस्मरणान्माता पिता वा परस्परानुज्ञया तं पुत्रं परिग्रहीतुः समानजातीयं तस्यैव पुत्राभावनिमित्तायामापदि प्रीतियुक्तं न तु भयादिना उदकपूर्वं दद्यात् स दत्रिमाख्यः पुत्रो विज्ञेयः। कथ्यते यथा मनुना–

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः।।
(मनुस्मृतिः9/168)

मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात्।
आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्तु स स्मृतः।।
(मनुस्मृते:9/177)

दत्तकपुत्रपरिग्रहविधिव्यवस्थावसरे कथितमस्ति यद्–अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च। वाससी कुण्डले दत्वा उष्णीषं चाङ्गुलीयकम्। बन्धूनामेव संभोज्य ब्राह्मणांश्च विशेषतः। अन्वाधानादि यत्रान्नं कृत्वाज्योत्पवनानकम्। दातुः समक्षं गत्वा पुत्रं देहीति याचयेत्।

दाने समर्थो दत्तास्मै ये यज्ञेनेति पंचभिः। देवस्यत्वेति मन्त्रेण हस्ताभ्यां परिगृह्य च। अङ्गादङ्गेत्यृचं जप्त्वा आघ्राय शिशुमूर्धनि। गृहमध्ये समादाय चरूं हुत्वा विभागतः। यस्त्वा कृदेत्यृचा चैव तुभ्यमग्र ऋचैकया। सोमादे ददित्येदाभिः प्रत्यृचं पंचभिः तथा। स्विष्टकृदादिहोमं च कृत्वा शेषं समापयेत्। स च ब्राह्मणानां सपिण्डेषु कर्त्तव्यः पुत्रसंग्रहः। यथा–

तदभावेऽसपिण्डो वा अन्यत्र तु न कारयेत्।

मिताक्षरादौ तु व्याहृतिभिर्हुत्वा प्रतिगृह्णीयात्।

दत्तकपुत्र-सम्बन्धे कालिका-पुराणे वर्णितमस्ति यत् पुत्र-विहीनाः जनाः पितुर्गोत्रेण, अन्यगोत्रेण, दाराः पुत्राः वा दत्तकपुत्रं गृहीत्वा स्व-संस्कारेण योजयेत्। कथितं यथा–

पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते।
आचूडान्तं न पुत्रः स पुत्रतां याति चान्यथः।।
चूडाद्यायनसंस्कारा निजगोत्रेण वै कृताः।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते।।
ऊर्ध्वं तु पंचमाद्वर्षान्न दत्ताद्याः सुतान्नृपः।
गृहीत्वा पंचवर्षीयं पुत्रेष्टिं प्रथमं चरेत्।।
पंचमोर्ध्वं तु स्वदानेच्छेरेव दानं नान्यथा।
विक्रयं चैव दानं च न नेयाः स्युरनिच्छवः।।
दाराः पुत्राश्च सर्वस्वमात्मनैव तु योजयेत्।

(ट) वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—पितृ-ऋणेभ्यः विमुक्तिः (निष्कृतिम्) के प्रदास्यन्ति?

उत्तरम्—पुत्राः।

2. प्रश्नः— कल्याणप्रदीपयोगानां चर्चा कुतः कृताऽस्ति?

उत्तरम्—याज्ञवल्क्यस्मृतौ पुत्राणां सम्बन्धे।

3. प्रश्नः— पुत्रोत्पत्तेः इच्छायाः किं तात्पर्यम्?

उत्तरम्—कुलस्य अग्रे नयनम्।

4. प्रश्नः—कुलस्य अविच्छेद्यत्वकरणं किम्?

उत्तरम्— वंशस्य अविच्छेदः।

5. प्रश्नः— धर्मशास्त्रस्य दायभागे द्वादशपुत्राः के सन्ति?

उत्तरम्—1. औरसः, 2. पुत्रिकापुत्रः, 3. क्षेत्रजः, 4. गूढोत्पन्नः, 5. कानीनः, 6. पौनर्भवः, 7. दत्तकः, 8. क्रीतः, 9. कृत्रिमः, 10. स्वयंदत्तः, 11. सहोढः, 12. अपविद्धः।

6. प्रश्नः— धर्मशास्त्रे दत्तकपुत्रस्य का परिभाषा?

उत्तरम्—दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्।

7. प्रश्नः—याज्ञवल्क्यस्मृतौ दत्तकपुत्रस्य सम्बन्धे किं कथितमस्ति?

उत्तरम्—यं माता अथवा पिता संकटकाले एवं स्नेहवशात् स्वजातेः मनुष्याय जलेन संकल्पं कृत्वा प्रयच्छति, स दत्तकः पुत्रः अभिधीयते।

8. प्रश्नः— मात्रा-पित्रा वा स्वेच्छया अन्यस्मै दत्तं पुत्रं किं कथ्यते?

उत्तरम्—दत्तकः।

9. प्रश्नः— पुत्रेषु कः सर्वश्रेष्ठः?

उत्तरम्— गूढोत्पन्नः।

13. प्रश्नः—दत्तकपुत्रस्य प्रतिग्रहविधिः कस्मिन् ग्रन्थे कथितमस्ति?

उत्तरम्—तत्स्मृतौ सपिण्डे च अन्यत्र तु न कारणम्। मिताक्षरादौ तु व्याहृतिभिर्हुत्वा प्रतिगृह्णीयात्।

14. प्रश्नः—दातुः समक्षं मन्त्रः पुत्रं ददाति के वचनम्?

उत्तरम्—अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च। वाससी कुण्डले दत्त्वा उष्णीषं चाङ्गुलीयकम्।

15. प्रश्नः—दत्तकपुत्रसम्बन्धे कालिकापुराणे किं वर्णितमस्ति?

उत्तरम्—पुत्रविहीनाः जनाः पितृगोत्रेण, अन्यगोत्रेण, दत्ताः पुत्राः वा दत्तकपुत्रं गृहीत्वा स्वसंस्कारेण योजयेत्।

10. प्रश्नः—कृत्रिमपुत्रे कः पुत्रः कः?

उत्तरम्—औरसः।

11. प्रश्नः—मनुस्मृतौ मनुना दत्तकपुत्रसम्बन्धे किं कथितम्?

उत्तरम्—यो मृतमातापितृकस्त्यक्तोऽपि कारणं विना द्रव्यादिना तम्यं लब्ध्वा आत्मानं यस्मै ददाति स स्वयं दत्तस्तस्य पुत्रो दत्तकपुत्रः।

12. प्रश्नः—माता पिता वा दद्यातां यमद्भिः पुत्रमापदि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः॥ मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात्। आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्तु स स्मृतः॥ दत्तकस्य सम्बन्धे कस्य मतम्?

उत्तरम्—मनुस्मृतिकारस्य।

(ट) अष्टविधविवाहवर्णनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

अष्टविधविवाहाः धर्मशास्त्रेषु प्रतिपादिताः सन्ति, यथा–

ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः॥

क्रमशः एकैकं विवरणं प्रस्तूयते–

1. **ब्राह्मविवाहः**—सर्वप्रशस्तोऽयं विवाहः। अस्मिन् कन्यायाः पिता स्वयमेव विद्याचारसम्पन्नमयाचमानं वरं आमन्त्र्य वस्त्रालङ्कारादिना च पूजयित्वा वराय कन्यादानं करोति। यथा मनुस्मृतौ–

आच्छाद्य चार्चयित्वा च, श्रुतिशीलवते स्वयम्।
आहूय दानं कन्याया: ब्राह्मो धर्मः प्रकीर्तितः॥
(मनुस्मृती)

याज्ञवल्क्योऽपि–

ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता।
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम्॥
(याज्ञ.स्मृती)

फलम्— ब्राह्मविवाहोत्पन्नः पुत्रः पूर्वापरान् दश दश आत्मानं चैकविंशकं पुरुषं पापेभ्यो मोचयति। अत एव सम्पूर्णेषु विवाहेषु ब्राह्मरूपः। यथा–

दशपूर्वान्परान्वंश्यानात्मानं चैकविंशकम्।
ब्राह्मीपुत्रः सुकृतकृन्मोचयेदेनसः पितॄन्॥

2. **दैवविवाहः**—ब्राह्मादनन्तरं आर्षाच्च प्रशस्ततरोऽस्मिन् विवाहे पिता ऋत्विजे स्वयमेव कन्यामलङ्कृत्य यज्ञान्ते दक्षिणाकाले ऋत्विजे ददाति। यथा मनुः–

यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते।
अलंकृत्य सुतादानं दैवं धर्मं प्रचक्षते॥
(मनुस्मृती)

गृह्यसूत्रेऽपि–

ऋत्विजे वितते कर्मणि दद्यादलङ्कृत्य स दैवः।
दक्षिणासु दीयमानास्वन्तर्वेदि यदृत्विजे स दैवः॥
(गृह्यसूत्र)

फलम्– दैवोढाजः सुतश्चैव सप्त सप्त परावरान् इत्यादिना दैवविवाहोत्पन्नाः पुत्राः सप्तपरान् सप्तावरान् पुरुषांश्च मोचयति।

3. **आर्षविवाहः**—दैवापेक्षयावरं प्राजापत्यापेक्षया श्रेष्ठोऽस्मिन् विवाहे कन्यापिता वराद्धर्मार्थं धर्माय गोमिथुनादिकं गृहीत्वा न तु शुल्करूपं कन्यायै दातुं गृहीत्वा यथाशास्त्रं विवाहं सम्पादयति। तद्यथा मनुः–

एकं गोमिथुनं द्वे वा वरादादाय धर्मतः।
कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते॥

ग्रहणं निमित्तं प्रोच्यते वीरमित्रोदयेन–

धर्मनिमित्तो ह्यसौ सम्बन्धो न लोभनिमित्तकः।
कन्योपकरणदानसमर्थस्य तद्दानार्थं वेदितव्यम्॥

फलम्– आर्षोढाजः सुतस्त्रींस्त्रीन् षट् षट् कायोढजः सुतः इति मनुस्मृतिवचनादार्षोत्पन्नः पुत्रः त्रीन् पूर्वान् त्रीन् परान् एनसः मोचयतीति।

याज्ञवल्क्यः–आर्षस्तद्गोद्वयम् [illegible]।

4. **प्राजापत्यविवाहः**—विवाहेऽस्मिन् सहोभौ चरतां धर्मं कुरुतामिति वचसा नियम्य कन्यादानं क्रियते। गृह्यसूत्रेऽपि–

सह धर्मं चरत इति प्राजापत्यः। (गृह्यसूत्र)

सहोभौ चरतां धर्ममिति वाचानुभाष्य च।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः॥
(मनुस्मृती)

वीरमित्रोदयेऽपि–

सहधर्मक्रियाहेतोर्दानं [illegible]नात्।
अलंकृत्यैव कन्यायाः विवाहः स प्रजापतेः॥

फलम्– षट् कायोढजः इत्यादिना प्राजापत्यविवाहोत्पन्नः पुत्रः षट्पितॄन् षट्पुत्रादीन् आत्मानं चैनसः मोचयति।

5. **आसुरविवाहः**—अस्मिन् विवाहे कन्यायाः ज्ञातिभ्यः पित्रादिभ्यः कन्यायै यथाशक्ति धनं दत्त्वा स्वाच्छन्द्यात् क्रियमाणो विवाहः आसुरः। अतः एव याज्ञवल्क्यस्मृतौ–आसुरो द्रविणादानात्। मनुनाऽपि–

ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः।
कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते॥
(मनुस्मृती)

अत्र पत्नी अविवाहनीया [illegible] च भवतीति मैत्रायणीसंहितायां प्रोक्तमस्ति। तद्यथा–

अनृतं वा एषा करोति या पत्युः क्रीता सती अन्यैः सञ्चरति।

फलम्–

इतरेषु च शिष्टेषु नृशंसानृतवादिनः।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः॥

6. **गन्धर्वविवाहः**—गान्धर्वः समयान्मिथः इति याज्ञवल्क्यवचनात् कन्यावरयोः परस्परं सामान्यानुरागेण आलिङ्गनादिरूपः गान्धर्वः। तद्यथा मनुस्मृतौ–

इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च।
गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः॥
(मनुस्मृती)

मनुः कन्यावरयोः [illegible] [illegible] मैथुनार्थत्वात् न [illegible]।

वीरमित्रोदयेऽपि–

[illegible] क्रियते, गान्धर्वः प्रकीर्तितः।

[illegible]

फलमत्र मनुस्मृतौ–

इतरेषु च शिष्टेषु नृशंसानृतवादिनः।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः॥

कामुकतोऽयं विवाहः।

7. **राक्षसविवाहः**—[illegible] युद्धेन [illegible] [illegible] [illegible] [illegible] कृत्वा कन्याहरणं राक्षसविवाहः। मनुस्मृतौ यथा–

हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात्।
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते॥
(मनुस्मृती)

मनुना तु क्षत्रियाणां कृते प्रशस्तोऽयमिति स्वीकृतम्– राक्षसं क्षत्रियस्यैकमिति।

पूर्वोक्तवचनानन्तरं दर्शनेन एव सर्वेषां विवाहं प्रशस्तं कुर्वन्ति स इति बौधायनोऽपि क्षत्रियाणां कृते प्रशस्तोऽयं विवाह इति प्रतिपादयति यथा–

क्षत्रियाणां तु वीर्येण प्रशस्तं हरणं बलात्।

[illegible] पृथ्वीराजस्य संयुक्तायाः हरणं राक्षसविवाहोदाहरणम्।

8. **पैशाचविवाहः**—पैशाचः कन्यकाछलादिति याज्ञवल्क्यवचनात् निद्राभिभूतां मद्यमदविह्वलां शीलसंरक्षणेन रहितां विजनदेशे यत्र विवाहो मैथुनकर्मेव प्रवर्तते सोऽधमः पैशाचविवाहः प्रथितः। तच्च मनुः–

सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति।
स पापिष्ठो विवाहानां पैशाचश्चाष्टमोऽधमः॥

सर्वविधप्रकारेण निन्दितोऽयं विवाहः। मैथुनरतिकर्म एवास्य प्राधान्यता। फलमासुरसदृशमेव यथा–

इतरेषु च शिष्टेषु नृशंसानृतवादिनः।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः॥

वर्णानां धर्म्यविवाहः–

षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरो रवान्।
विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान्॥
(मनु-3/23)

चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कवयो विदुः।
राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः॥
गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ।

विवाहे वर्णविचारः–

सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः॥ (1)
शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते।
ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः॥
(2)

न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः।
कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्यते॥

ब्राह्मादिविवाहप्रशस्तफलम्–

ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः।
ब्रह्मवर्चस्विनः पुत्राः जायन्ते सम्मताः॥
शिष्टः सत्यगुणोपेता धनवन्तो यशस्विनः।
पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः॥

अशुभफलं तु आसुरादौ प्रोक्तम्।

(ठ) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— धर्मशास्त्रेषु प्रतिपादिताः कतिविधविवाहाः सन्ति?
उत्तरम्— अष्टविधविवाहाः।

2. **प्रश्नः**— के सन्ति अष्टविधविवाहाः?
उत्तरम्— ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः। गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः॥

3. **प्रश्नः**— मनुस्मृतौ ब्राह्मविवाहस्य किं लक्षणम्?
उत्तरम्— आच्छाद्य चार्चयित्वा च, श्रुतिशीलवते स्वयम्। आहूय दानं कन्यायाः ब्राह्मो धर्मः प्रकीर्तितः।

4. **प्रश्नः**— मनुस्मृतौ ब्राह्मविवाहस्य फलं किमुच्यते?
उत्तरम्— दशपूर्वान्वंश्यानात्मानं चैकविंशकम्। ब्राह्मीपुत्रः सुकृतन्मोचयेदेनसः पितॄन्।

5. **प्रश्नः**— ऋग्वेदे सोमसूर्ययोर्विवाहनाम किम्?
उत्तरम्— ब्राह्मविवाहः।

6. **प्रश्नः**— मनुस्मृतौ दैवविवाहस्य किं लक्षणम्?
उत्तरम्— यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते। अलंकृत्य सुतादानं दैवं धर्मं प्रचक्षते।

7. **प्रश्नः**— दैवविवाहोत्पन्नाः पुत्राः किं मोचयन्ति?
उत्तरम्— दैवोढजः सुतश्चैव सप्त सप्त परावरान्।

8. **प्रश्नः**— "यज्ञस्थऋत्विजे दैव" इति कस्य वचनम्?
उत्तरम्— याज्ञवल्क्यस्य।

9. **प्रश्नः**— मनुस्मृतौ आर्षविवाहस्य किं लक्षणम्?
उत्तरम्— एकं गोमिथुनं द्वे वा वरादादाय धर्मतः। कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते।

10. **प्रश्नः**— आर्षविवाहस्य किं फलम्?
उत्तरम्— आर्षोढाजः सुतस्त्रींस्त्रीन्षट् कायोढजः सुतः।

11. **प्रश्नः**— मनुस्मृतौ प्राजापत्यविवाहस्य किं लक्षणम्?
उत्तरम्— सहोभौ चरतां धर्ममिति वाचानुभाष्य च। कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः।

12. **प्रश्नः**— गृह्यसूत्रे सह धर्मं चरत इति प्राजापत्यः इति कस्य विवाहस्य लक्षणम्?
उत्तरम्— प्राजापत्यविवाहस्य।

13. **प्रश्नः**— प्राजापत्यविवाहोत्पन्नः पुत्रः कः मोचयति?
उत्तरम्— षट्पितॄन् षट्पुत्रादीन् आत्मानं चैनसः।

14. **प्रश्नः**— याज्ञवल्क्यस्मृतौ आसुरविवाहस्य किं लक्षणम्?
उत्तरम्— आसुरो द्रविणादानात्।

15. **प्रश्नः**— मनुस्मृतौ आसुरविवाहस्य किं लक्षणम्?
उत्तरम्— ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः। कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते।

16. **प्रश्नः**— याज्ञवल्क्यवचनात् गन्धर्वविवाहः कः?
उत्तरम्— गान्धर्वः समयान्मिथः।

17. **प्रश्नः**— मनुस्मृतौ गान्धर्वविवाहस्य किं लक्षणम्?
उत्तरम्— इच्छयान्योऽन्यसंयोगः कन्यायाश्च वरस्य च। गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः।

18. **प्रश्नः**— वीरमित्रोदयेन गान्धर्वविवाहे किं कथ्यते?
उत्तरम्— गान्धर्वस्तु क्रियाहीनः रागादेव प्रवर्तते।

19. **प्रश्नः**— दुष्यन्तशकुन्तलयोः विवाहो नाम किम्?
उत्तरम्— गान्धर्वविवाहः।

20. **प्रश्नः**— याज्ञवल्क्यवचनानुसारेण राक्षसविवाहस्य किं लक्षणम्?
उत्तरम्— राक्षसोयुद्धहरणादिति।

21. **प्रश्नः**— मनुस्मृतौ राक्षसविवाहस्य किं लक्षणम्?
उत्तरम्— हत्वा छित्वा च भित्वा च क्रोशन्तीं रुदतीं गृहात्। प्रसह्यकन्याहरणं राक्षसो विधिरुच्यते।

22. **प्रश्नः**— मनुना क्षत्रियाणां कृते प्रशस्तविवाहो किं स्वीकृतम्?
उत्तरम्— राक्षसं क्षत्रियस्यैकमिति।

23. **प्रश्नः**— याज्ञवल्क्यवचनानुसारेण पैशाचविवाहस्य किं लक्षणम्?
उत्तरम्— पैशाचः कन्यकाछलादिति।

24. **प्रश्नः**— सर्वविधप्रकारेण निन्दितो विवाहः कः?
उत्तरम्— पैशाचविवाहः।

25. **प्रश्नः**— मनुस्मृतौ पैशाचविवाहस्य किं लक्षणम्?
उत्तरम्— सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति। स पापिष्ठो विवाहानां पैशाचश्चाष्टमोऽधमः।

(ड) नारीधर्माः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

वैदिकसाहित्येषु उपनिषत्सु धर्मशास्त्रेषु च मातुः महत्त्वं गौरवं च अनेकधा प्रतिपादितम्। तैत्तिरीयोपनिषदि आचार्येण अन्तेवासिनं प्रति कृतोऽयमुपदेशः सर्वथा सार्थकः। स्वदिव्यगुणैः माता सततं पूजनीया। सा बालस्य पालनाय पोषणाय संवर्धनाय संरक्षणाय च स्वं सर्वस्वमपि समर्पयति। अत एव सा बालस्यापि सर्वस्वमेव। सा एव परा देवता–**'माता परं दैवतम्' मातृदेवो भव पितृदेवो भव'** (तै०1/11/2) इत्यनुशिष्यते। यजुर्वेदे माता पावयित्री शोधिका च प्रोच्यते। **'आपो अस्मान् मातरः शुन्धयन्तु'** (यजु०4/2)। मनुना मातुः महत्त्वं निर्दिश्यते यन्माता पितृसहस्रमपि गौरवेणातिरिच्यते। कथितं च–

उपाध्यायान्दशाचार्यः आचार्याणां शतं पिता।
सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते॥
(मनु०2/145)

स्वधैर्यौदार्यक्षमादिगुणगौरवात् सा पृथिव्या मूर्तिः एव मन्यते मनुना–

माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः॥
(मनु०2/226)

मनूक्तदिशा पित्रोर्गुरोश्च शुश्रूषणं सर्वोत्तमं तपः इति–

तयोर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा।
तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते॥
(मनु०2/228)

स्त्रीणां भर्त्रा विना यज्ञसिद्धिः न भवति। नापि भर्तुरनुमतिमन्तरेण व्रतोपवासौ किंतु भर्तृपरिचर्ययैव स्त्री स्वर्गलोके पूज्यते। कथितं च मनुना–

नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम्।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते॥
(मनु०5/155)

वैदिककालाद् आरभ्य इदानीं यावत् समाजे स्त्रीणां स्थानम् अतीव गौरवास्पदम् विद्यते। नारीशब्दस्यार्थः व्युत्पत्तिः–'न अरिः इति नारी', शब्दकोशग्रन्थेषु नुः नस्य वा धर्म्यां, इत्यपि व्युत्पत्तिः समुपलभ्यते। एवं सिद्ध्यति यत् पुरुषाणां कृते नारी सर्वथा मित्रवत् कार्यं करोति। नारी गृहिणी, गृहस्वामिनी, सहधर्मिणी, इत्यादिभिः विशेषणैः सम्बोध्यते स्म। जन्मनः विवाहकालं यावत् पितुः गृहे 'कन्या' इति पावनेन शब्देन वाच्यायाः अस्याः समाजे अस्माकं महत्त्वं परमस्ति। पत्नीरूपेण सा गृहस्वामिनीपदम् अलङ्करोति। नारी समाजस्य आधारशिला विद्यते। मानवजीवनस्य किमपि क्षेत्रं एतादृशं न विद्यते यस्मिन् स्त्रियाः सहयोगं न विद्यते। वैदिकयुगे नारी धार्मिक-आध्यात्मिकसामाजिकक्षेत्राणां नेतृत्वं करोतिस्म। सभ्यतायाः विकासे सा प्रयत्नशीला आसीत्। अतः मातृशक्तेः शास्त्रेषु महद् गौरवम् अनुश्रूयते। उक्तं च मनुना–

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रिया॥
(मनु०3/56)

संस्कृतसाहित्ये कथितमस्ति यत्–

मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।
आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः॥
(वृ०चा०श०2216)

पितुर्दशगुणा माता गौरवेणातिरिच्यते।।
(मनु०2/145)

भारतीयसंस्कृतौ नारीणां पूज्यतमं स्थानं विद्वद्भिः कथ्यते। अस्मिन् विषये आचार्य-याज्ञवल्क्येन उक्तम्-

रक्षेत् कन्यां पिता त्वेनां पतिः पुत्रास्तु वार्धके।
अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियः।।

अतः सत्यमेवोक्तम्- **जननी जन्मभूमिश्च स्वर्गादपि गरीयसी** इति। बालकान् प्रति मातृणाम् सहजः सरलः स्वाभाविकश्च स्नेहः भवति। अस्माभिः एतादृशः स्नेहः कुत्रापि नावलोक्यते। जननी पुत्राणां कृते स्वकीयं सर्वस्वमपि त्यक्तुं शक्नोति। माता एव श्रेष्ठानामपि श्रेष्ठा, पूज्यानामपि पूज्यतमा। अतएवोक्तं उपनिषदि-**मातृदेवो भव** इति। मानवः कदाचिदपि मातुरनृणतां दूरीकर्तुं न शक्नोति। अत एवोक्तं मनुना-

यं मातापितरौ क्लेशं सहेते संभवे नृणाम्।
न तस्य निष्कृतिः कर्तुं शक्या वर्षशतैरपि।।
(मनु०2/227)

स्त्रीणां कृते लज्जा अमोघं शस्त्रं वर्तते। भागवतपुराणे कथितमस्ति-

गृहेषु तनया भूषा भूषा संसत्सु पण्डिताः।
सुबुद्धिः पुंसु भूषा स्यात् स्त्रीषु भूषा सलज्जता।।
(भा०पुरा०)

स्त्रीणां लज्जा-विषये चाणक्यनीत्यां कथितमस्ति-

असंतुष्टा द्विजा नष्टाः संतुष्टाश्च महीभृतः।
सलज्जा गणिका नष्टाः निर्लज्जाश्च कुलांगनाः।
(चा०नी०दर्प०)

विधवानारीणां कृते विहित-उपदेशः मनुस्मृतिकारः कृतवान्। वृत्तिसंभवेऽपि पुष्पमूलफलैः पवित्रैश्च देहं क्षपयेदल्पाहारेण क्षीणं कुर्यात्। भर्तरि मृते व्यभिचारधिया परपुरुषस्य नामापि न उच्चारयेत्। एकपत्नीनां यो धर्मः प्रकृष्टतमस्तमिच्छन्ती मधुमांसमैथुनवर्जनात्मकब्रह्मचर्यशालिनी मरणपर्यन्तं तिष्ठेत्। कथ्यते यथा मनुना-

कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः।
न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु।।
(मनुस्मृतिः5/157)

आसीदामरणात्क्षान्ता नियता ब्रह्मचारिणी।
यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्।।
(मनुस्मृतिः5/158)

नारीधर्मक्रमे अष्टमैथुनस्य त्यागस्य उपदेशः धर्मशास्त्रे कथितमस्ति-

स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्।
संकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च।।
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।
विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम्।।

(ड) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता' इयं भावना कस्मिन् ग्रन्थे प्रकटिता विद्यते?
   उत्तरम्— मनुस्मृतौ।
2. **प्रश्नः**—बालस्य पालनाय पोषणाय संवर्धनाय संरक्षणाय च का स्वं सर्वस्वमपि समर्पयति?
   उत्तरम्— माता।
3. **प्रश्नः**— परा देवता-**माता परं दैवतम्, मातृदेवो भव** इति कुतः उद्धृतः?
   उत्तरम्— तैत्तिरीयोपनिषदि।
4. **प्रश्नः**—**आपो अस्मान् मातरः शुन्धयन्तु** इति कुतः प्रोच्यते?
   उत्तरम्—यजुर्वेदे।
5. **प्रश्नः**—उपाध्यायान्दशाचार्यः आचार्याणां शतं पिता। सहस्रं तु पितृन् माता गौरवेणातिरिच्यते।। इति केन उक्तम्?
   उत्तरम्— मनुस्मृतौ मनुना।
6. **प्रश्नः**— स्वधैर्यौदार्यक्षमादिगुणगौरवात् सा पृथिव्या मूर्तिः एव इति केन मन्यते?
   उत्तरम्— मनुस्मृतौ मनुना।
7. **प्रश्नः**— नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम्। पतिं शुश्रूषते येन तेन स्वर्गे महीयते।। इति केन कथितम्?
   उत्तरम्— मनुस्मृतौ मनुना।
8. **प्रश्नः**—वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः। पतिसेवा गुरौर्वासो गृहार्थोऽग्निपरिक्रिया। उक्तकथनं कस्य वर्तते?
   उत्तरम्— मनुमहोदयस्य।
9. **प्रश्नः**—रक्षेत् कन्यां पिता त्वेनां पतिः पुत्रस्तु वार्धके। अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियः। उक्तश्लोकः कस्य वर्तते?
   उत्तरम्— आचार्य-याज्ञवल्क्यस्य।

10. **प्रश्नः**—गृहेषु तनया भूषा भूषा संसत्सु पण्डिताः। सुबुद्धिः पुंसु भूषा स्यात् स्त्रीषु भूषा सलज्जता।। इति कस्मिन् पुराणे उद्धृतः?
    उत्तरम्— भागवतपुराणे।
11. **प्रश्नः**—स्त्रीणां लज्जा-विषये चाणक्यनीत्यां किं कथितमस्ति?
    उत्तरम्— असंतुष्टा द्विजा नष्टाः संतुष्टाश्च महीभृतः। सलज्जा गणिका नष्टाः निर्लज्जाश्च कुलांगनाः।
12. **प्रश्नः**—नारी कस्मिन् युगे धार्मिक-आध्यात्मिक-सामाजिकक्षेत्राणां नेतृत्वं करोतिस्म?
    उत्तरम्— वैदिकयुगे।
13. **प्रश्नः**—नारीधर्मक्रमे अष्टमैथुनत्यागस्य उपदेशविषये धर्मशास्त्रे किं कथितमस्ति?
    उत्तरम्— स्मरनं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्। संकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च।।
    एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।
    विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम्।।
14. **प्रश्नः**—नारी सर्वथा मित्रवत् कार्यं केषां कृते करोति?
    उत्तरम्— पुरुषाणां कृते।
15. **प्रश्नः**— विधवानारीणां कृते विहित-उपदेशविषये मनुस्मृतौ किमुक्तम्?
    उत्तरम्— कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः।
    न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु।
    आसीदामरणात्क्षान्ता नियता ब्रह्मचारिणी।
    यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्।।
16. **प्रश्नः**—नारी कैः विशेषणैः सम्बोध्यते स्म?
    उत्तरम्— गृहिणी, गृहस्वामिनी, सहधर्मिणी इत्यादिभिः।
17. **प्रश्नः**—सभ्यतायाः विकासे का प्रयत्नशीला आसीत्?
    उत्तरम्— स्त्रियः।

DD-Code-25 (ढ) कौटिलीयअर्थशास्त्रम् (आदितः दश-अध्यायपर्यन्तम्) वस्तुनिष्ठप्रश्नोत्तराणि

मनुष्याणां वृत्तिरर्थः, तस्याः पृथिव्याः लाभ-पालनोपायः शास्त्रम् अर्थशास्त्रम् इति कथ्यते। कौटिल्य-प्रणीतम् अर्थशास्त्रं भारतस्य राजनीति-अर्थ-विषयक एकः महत्त्वपूर्णग्रन्थः वर्तते। शौनककृतचरणव्यूहस्य मतानुसारं अर्थशास्त्रम् अथर्ववेदस्य उपवेदः अस्ति। अस्मिन् ग्रन्थे धर्मशास्त्रं, नीतिशास्त्रं, शिक्षाशास्त्रं, समाजशास्त्रं, कृषिशास्त्रं, चिकित्साशास्त्रम् इत्यादिकं विषयवस्तु वर्णितमस्ति। अस्मिन् ग्रन्थे 15 अधिकरणाः, 150 अध्यायाः, 180 प्रकरणाः, गद्यभागसहिता 6000 श्लोकाः विद्यन्ते। अयं महापुरुषः नन्दवंशस्य समूलोच्छेदं कृत्वा मौर्यसामाज्यस्य स्थापनां कृतवान्। कौटिल्यस्य अपरं नाम विष्णुगुप्तः चाणक्यश्चापि समुपलभ्यते। चन्द्रगुप्ताय अनेन चाणक्येन या राजनैतिकसंहिता निर्मिता सैव 'अर्थशास्त्रम्' इति नाम्ना अभिधीयते।

(क) विद्या–विद्यते अनया इति विद्या। कौटिल्यमते चतस्रः विद्याः भवन्ति। यथा–1. आन्वीक्षिकी विद्या, 2. त्रयीविद्या, 3. वार्ता, 4. दण्डनीतिः।

1. आन्वीक्षिकी विद्या–आन्वीक्षिकी नाम तर्कविद्या, अर्थशास्त्रकारः चाणक्यः लिखति–बलाबले चैतासां हेतुभिः अन्वीक्षमाणा आन्वीक्षिकी लोकस्य उपकरोति। व्यसने अभ्युदये च बुद्धिम् अवस्थापयति, प्रज्ञावाक्यक्रियावैशारद्यं च करोति।

2. त्रयीविद्या–साम-यजुः-ऋग्वेदाः त्रयः सम्मिलित-रूपेण 'त्रयी' इत्युच्यते। अथर्ववेद-इतिहासवेदौ, शिक्षा-कल्प-व्याकरण-निरुक्त-छन्द-ज्योतिषम् इति वेदाङ्गानि। एष त्रयीधर्मः चतुर्णां (ब्राह्मण-क्षत्रिय-वैश्य-शूद्र) वर्णानाम् (1. ब्रह्मचर्याश्रमः, 2. गृहस्थाश्रमः, 3. वानप्रस्थाश्रमः, 4. संन्यासाश्रमश्चेति) आश्रमाणां च स्वधर्मस्थापनाद् औपकारिकः। यथा ब्राह्मणस्य स्वधर्मः-अध्ययनं अध्यापनं यजनं दानं प्रतिग्रहश्चेति। क्षत्रियस्य स्वधर्मः-अध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणं च। वैश्यस्य स्वधर्मः-यजनं दानं कृषिपशुपाल्ये वणिज्या च। शूद्रस्य स्वधर्मः-द्विजातिशुश्रूषा वार्ता कारुकुशीलवकर्म च। 1. ब्रह्मचर्याश्रमे ब्रह्मचारिणः स्वाध्यायोऽग्निकार्याभिषेकौ भैक्षव्रतत्वमाचार्ये प्राणान्तिकी वृत्तिस्तदभावे गुरुपुत्रे सब्रह्मचारिणि वा। 2. गृहस्थाश्रमे-स्वधर्मः, स्वकर्माजीवः तुल्यैः असमानर्षिभिर्वैवाह्यं ऋतुगामित्वं च देव-पित्रातिथिभृत्येषु त्यागः शेषभोजनं च। 3. वानप्रस्थाश्रमे

ब्रह्मचर्यं भूमौ शय्या जटाऽजिनधारणम् अग्निहोत्राभिषेकौ देवतापितृतिथिपूजा वन्यश्चाहारः। 4. संन्यासाश्रमे संयतेन्द्रियत्वमनारम्भो निष्किञ्चनत्वं सङ्गत्यागो भैक्षममेकत्रारण्यवासो बाह्याभ्यन्तरं च शौचम्।

3. वार्ता–कृषिपशुपाल्ये वणिज्या च वार्ता। धान्य-पशुहिरण्यकुप्यविष्टप्रदानादौपकारिकी।

4. दण्डनीतिः–'आन्वीक्षिकी-त्रयी-वार्तानां योगक्षेम-साधनो दण्डः, तस्य नीतिर्दण्डनीतिः।' अलब्धलाभार्था, लब्धपरिरक्षणी, रक्षितविवर्धनी, वृद्धं तीर्थेषु प्रतिपादिनी च। न ह्येवंविधं वशोपनयनम् अस्ति भूतानां यथा दण्डः इति आचार्याः वदन्ति। परन्तु चाणक्यस्य मतमस्ति यत् तीक्ष्णदण्डो हि भूतानाम् उद्वेजनीयः, मृदुदण्डः परिभूयते च। अतः यथार्हदण्डः भवेत्। सुविज्ञातप्रणीतः हि दण्डः जनाः धर्मार्थकामैः योजयन्ति। कथ्यते यथा–

चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः।
स्वधर्मकर्माभिरतो वर्तते स्वेषु वेश्मसु।।

(ख) मन्त्रीणां नियुक्तिः–कौटिल्य-अर्थशास्त्रे मन्त्रीणां चयनं गुण-वैशिष्ट्यं च प्रदर्श्यन्ते–जानपदोऽभिजातः स्ववग्रहः कृतशिल्पः चक्षुष्मान् प्राज्ञो धारयिष्णुः दक्षो वाग्मी प्रगल्भः प्रतिपत्तिमान् उत्साहप्रभावयुक्तः क्लेशसहः शुचिर्मैत्रो दृढभक्तिः शीलबलारोग्यसत्त्वसंयुक्तः स्तम्भचापल्यवर्जितः संप्रियो वैराणामकर्तेत्यमात्यसंपत्।' इत्थं उपर्युक्तगुणोपेतान् मन्त्रिणः कुर्वीत।

(ग) अमात्यनियुक्तिः–मन्त्री-पुरोहितसखः राजा सामान्येषु अधिकरणेषु स्थापयित्वा अमात्यान् उपधाभिः शोधयेत्, किन्तु तत्र आत्मानं देवीं वा माध्यमं न कुर्यात्। भयोपधाम् अधिकृत्य प्रवहणनिमित्तम् एकोऽमात्यः सर्वान् अमात्यान् आवाहयेत्। तेनोद्वेगेन राजा तान् अवरुन्ध्यात्। अत एवोक्तम्–

तस्मात् बाह्यमधिष्ठानं कृत्वा कार्ये चतुर्विधे।
शौचाशौचममात्यानां राजा मार्गेत सत्रिभिः।।

अमात्यनियुक्तिविषये मतैक्यं न दृश्यते। यथा विशालाक्षस्य मतम्–"समानशीलव्यसनत्वात् गुह्यधर्माणः अमात्यान् कुर्वीत।" भारद्वाजस्य मतम्–"दृष्टशौच-सामर्थ्यत्वात् सहाध्यायिनो अमात्यान् कुर्वीत, यतो हि ते राज्ञः विश्वासपात्राः भवन्ति।" पराशरस्य मते–"ये राजानम् आपत्सु प्राणबाधयुक्तासु अनुगृह्णीयुः तान् अमात्यान् कुर्वीत, दृष्टानुरागत्वात्। आचार्यपिशुनस्य मते–"संख्यातार्थेषु कर्मसु नियुक्ता ये यथादिष्टमर्थं सविशेषं वा कुर्युः तान् अमात्यान् कुर्वीत, दृष्टगुणत्वादिति। बाहुदन्तीपुत्रेण कथ्यते–"अभिजन-प्रज्ञा-शौच-शौर्यरागयुक्तान् अमात्यान् कुर्वीत, गुणप्राधान्यात्। कौटिल्य-अर्थशास्त्रे 'सर्वमेवोत्पन्नम्, यतो हि कार्यसामर्थ्याद् पुरुषसामर्थ्यं कल्प्यते।' कथ्यते यथा–

विभज्यामात्यविभवं देशकालौ च कर्म च।
अमात्याः सर्व एवैते कार्याः स्युः न तु मन्त्रिणः।।
त्रिवर्गभयशुद्धान् अमात्यान् स्वेषु कर्मसु।
अधिकुर्याद् यथाशौचम् इत्याचार्या व्यवस्थिताः।।

(घ) गुप्तचराणां नियुक्तिः–कौटिल्यस्य अर्थनीतौ गुप्तचरस्य स्थानं महत्त्वपूर्णं वर्तते। नृपः गुप्तचराणां माध्यमेन प्रजायाः कष्टमवगन्तुं शक्यते। समाजस्य अन्तरिकस्थितेः ज्ञानाय गुप्तचरस्य द्वौ विभागौ स्तः। प्रथमः स्थायीगुप्तचरः, द्वितीयः भ्रमणशीलगुप्तचरः। स्थायीगुप्तचराणां नव-विभागा क्रियते स्म, संस्था नाम्ना अभिहिते भवन्ति। यथा-1. कापटिकः, 2. उदास्थिकः, 3. गृहपतिकः, 4. वैदेहकः, 5. तापसः, 6. सत्री, 7. तीक्ष्णः, 8. रसदः, 9. भिक्षुकीश्च गूढपुरुषाः उच्यन्ते।

(क) कापटिकः–परमर्मज्ञः प्रगल्भः छात्रः कापटिकः। तमर्थमानाभ्याम् उत्साह्य मन्त्री ब्रूयात् यत् राजानं मां च प्रमाणं कृत्वा यस्य यदकुशलं पश्यति तत्तदानीमेव प्रत्यादिशेति। (ख) उदास्थिकः–प्रव्रज्याप्रत्यवसितः प्रज्ञाशौचयुक्तः उदास्थिकः। स वार्ताकर्मप्रदिष्टायां भूमौ प्रभूतहिरण्यान्तेवासी कर्म कारयेत्। कर्मफलाच्च सर्वप्रव्रजितानां ग्रासाच्छादनावासान्प्रतिविदध्यात्। वृत्तिकामांश्च उपजपेत्, एतेनैव वेषेण राजार्थश्चरितव्यो भक्तवेतनकाले च उपस्थातव्यम्। सर्वप्रव्रजिताश्च स्वं स्वं वर्गम् उपजपेयुः।(ग) गृहपतिकः–कर्षको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो गृहपति-कव्यंजनः। सः कृषिकर्मप्रदिष्टायां भूमौ इति समानं पूर्वेण। (घ) वैदेहकः–वणिजको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो वैदेहकव्यंजनः। स वणिक्कर्मप्रदिष्टायां भूमाविति समानं पूर्वेण। (ङ) तापसः–मुण्डो जटिलो वा वृत्तिकामः तापसव्यंजनः। सानगराभ्यासे प्रभूतमुण्डजटिलान्तेवासी शाकं यवमुष्टिं वा मास-द्विमासान्तरं प्रकाशमश्नीयात्, गूढम् इष्टमाहारम्। वैदेहकान्तेवासिनश्च एनं समिद्धयोगैरर्चयेयुः। समेधाशास्तिभिश्च अभिगतानाम् अङ्गविद्यया शिष्यसंज्ञाभिश्च अल्पलाभम् अग्निदाहं चोरभयं दूष्यवधं तुष्टिदानं विदेश-वृत्तिज्ञानम् इदमद्य श्वो वा भविष्यति इदं वा राजा करिष्यति इति तदस्य गूढाः सत्रिणश्च संवादयेयुः। मन्त्री चैषां वृत्तिकर्मभ्यां वियतेत–

पूजिताश्चार्थमानाभ्यां राज्ञा राजोपजीविनाम्।
जानीयुः शौचमित्येताः पंचसंस्थाः प्रकीर्तिताः।।

द्वितीयप्रकारकाः भ्रमणशीला (संचार-नामका) गुप्तचराः भवन्ति–(च) सत्री–ये सामुद्रिक-विद्या-ज्योतिष-व्याकरणादि अङ्गानां शुभाशुभफलकविद्यायाः ज्ञाता वशीकरण-इन्द्रजाल-धर्मशास्त्र-शकुनशास्त्र-पक्षिशास्त्र-कामशास्त्रेषु तथा तत्सम्बन्धिनृत्येषु संगीतेषु निष्णातगुप्तचरान् सत्री इति कथ्यते। (छ) तीक्ष्णः–स्वदेशे निवसन्तः द्रव्याय स्व-प्राणं त्यज्यमानाः गज-व्याघ्रः सर्पादैः युद्धरताः तीक्ष्णा गुप्तचरा भवन्ति। (ज) रसदः–स्व-भ्रात्रादिस्नेहविहीना क्रूराः रसद-गुप्तचराः भवन्ति। (झ) भिक्षुकीः–परिव्राजिका-मुंडितबौद्ध-भिक्षुणी-वृषली-नारी-गुप्तचारिणः भवन्ति।

(ङ) राजर्षिवृत्तम्–राजर्षिणारिषड्वर्गपरित्यागेन इन्द्रियजयपूर्वकं वृद्धसंयोगेन प्रज्ञां, चारेण चक्षुः, उत्थानेन योगक्षेमसाधनम्, कार्यानुशासनेन स्वधर्मस्थापनं, विद्योपदेशेन विनयम्, अर्थसंयोगेन लोकप्रियत्वम्, हितेन वृत्तिं च सततं कुर्वीत। एवं वश्येन्द्रियः राजर्षिः परस्त्री-द्रव्य-हिंसाश्च वर्जयेत्। स्वप्नं लौल्यम् अनृतम् उद्धतवेशत्वम् अनर्थसंयोगं, अधर्मसंयुक्तं मानार्थसंयुक्तं व्यवहारं च वर्जयेत्। धर्मार्थाविरोधेन कामं सेवेत। न निःसुखः स्यात्। समं वा त्रिवर्गम् अन्योन्यानुबन्धम्। एको ह्यत्यासेवितो धर्मार्थकामानाम् आत्मानम् इतरौ च पीडयति। अर्थ एव प्रधान इति कौटिल्यः अर्थमूलौ हि धर्मकामाविति। सततं मर्यादां स्थापयेत् आचार्यान् अमात्यान् वा। य एनम् अपायस्थानेभ्यो वारयेयुः। छायानालिकाप्रतोदेन वा रहसि प्रमाद्यन्तम् अभितुदेयुः। यतो हि–

सहायसाध्यं राजत्वं चक्रमेकं न वर्तते।
कुर्वीत सचिवांस्तस्मात्तेषां च शृणुयान्मतम्।।

(च) इन्द्रियजयः अरिषड्वर्गत्यागः–कौटिल्य-अर्थशास्त्रे इन्द्रियजयस्य चर्चा वर्तते। इन्द्रियजयेन को लाभ-हानिः इति विषये विवेचनं वर्तते। विद्याविनयहेतुः इन्द्रियजयः, कामक्रोध-लोभ-मान-मद-हर्षत्यागात्कार्यः। कर्णत्वगक्षिजिह्वाघ्राणेन्द्रियाणां शब्द-स्पर्श-रूप-रस-गन्धेष्वविप्रतिपत्तिः इन्द्रियजयः। शास्त्रानुष्ठानं इन्द्रियजयः वा। कृत्स्नं हि शास्त्रमिदमिन्द्रियजयः। तद्विरुद्धवृत्तिः अवश्येन्द्रियः चातुरन्तोऽपि राजा सद्यो विनश्यति। यथा दाण्डक्यो नाम भोजः कामाद् ब्राह्मणकन्यामभिमन्यमानः सबन्धुराष्ट्रो विननाश करालश्च वैदेहः। कोपाज्जनमेजयो ब्राह्मणेषु विक्रान्तस्तालजङ्घश्च भृगुषु। लोभादैलश्चातुर्वर्ण्यमत्याहारयमाणः सौवीरश्चाजबिन्दुः। मानाद् रावणः परदारान् अप्रयच्छन् दुर्योधनो राज्यादंशं च। मदाद् दम्भोद्भवो भूतावमानी हैहयश्चार्जुनः। हर्षात् वातापिरगस्त्यमत्यासादयन्वृष्णिसंघश्च द्वैपायनमिति। कथितं च–

एते चान्ये च बहवः शत्रुषड्वर्गमाश्रिताः।
सबन्धुराष्ट्रा राजानो विनेशुरजितेन्द्रियः।।
शत्रुषड्वर्गमुत्सृज्य जामदग्न्यो जितेन्द्रियः।
अम्बरीषश्च नाभागो बुभुजाते चिरं महीम्।।

अतः अरिषड्वर्गत्यागेन अवश्यमेव इन्द्रियजयं कुर्यात्।

(ढ) वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—धर्मशास्त्रान्तर्गतमेव राजनीति-लक्षणमर्थशास्त्रं किम्?
   उत्तरम्— कौटिल्य-अर्थशास्त्रम्।
2. प्रश्नः—कौटिल्य-अर्थशास्त्रे कति अधिकरणानि सन्ति?
   उत्तरम्— (15) पञ्चदश।
3. प्रश्नः—कौटिल्य-अर्थशास्त्रे कति अध्यायाः सन्ति?
   उत्तरम्— (150) पञ्चाशताधिकशतम्।
4. प्रश्नः—कौटिल्य-अर्थशास्त्रम् कति प्रकरणेषु विभक्तम् अस्ति?
   उत्तरम्— 180 प्रकरणेषु।
5. प्रश्नः—"अर्थमूलौ हि धर्मकौ" सिद्धान्तोऽयं केन प्रतिपादितः?
   उत्तरम्— कौटिल्येन।
6. प्रश्नः—अर्थशास्त्रकार-कौटिल्यस्य समयः कोऽस्ति?
   उत्तरम्— 322 B.C.
7. प्रश्नः—कौटिल्य-अर्थशास्त्रे कति विद्याः वर्णिताः सन्ति?
   उत्तरम्— 4 चतुर्विद्याः।
8. प्रश्नः—चतुर्विद्यासु मानवाः कति विद्याः स्वीकुर्वन्ति?
   उत्तरम्— 3 तिस्रः।

9. प्रश्नः—वार्ता-दण्डनीतिश्च द्वे विद्ये कः स्वीकरोति?
उत्तरम्— बृहस्पतिः।

10. प्रश्नः—कस्य मते एका दण्डनीतिः एव विद्या?
उत्तरम्— शुक्राचार्यस्य।

11. प्रश्नः—का नाम आन्वीक्षिकी विद्या?
उत्तरम्— तर्कविद्या।

12. प्रश्नः—आन्वीक्षिकी विद्या कस्मिन् अधिकरणे वर्णिता?
उत्तरम्— प्रथम अधिकरणे।

13. प्रश्नः—सर्वविद्यानां सर्वधर्माणां च प्रदीपः को भवति?
उत्तरम्— आन्वीक्षिकी।

14. प्रश्नः—कौटिल्य-अर्थशास्त्रे गद्यभागसहिता कति श्लोकाः विद्यन्ते?
उत्तरम्— 6000 षट्-सहस्राणि।

15. प्रश्नः—कौटिल्यस्य अपरं नाम किम्?
उत्तरम्— विष्णुगुप्तः चाणक्यश्चापि समुपलभ्यते।

16. प्रश्नः—कौटिल्यमते चतस्रः विद्याः काः भवन्ति?
उत्तरम्— 1. आन्वीक्षिकी विद्या, 2. त्रयीविद्या, 3. वार्ता, 4. दण्डनीतिः।

17. प्रश्नः—त्रयीविद्या इत्यनेन किं ज्ञायते?
उत्तरम्— साम-यजुः-ऋग्वेदाः त्रयः सम्मिलितरूपेण 'त्रयी' इत्युच्यते।

18. प्रश्नः—अध्ययनं अध्यापनं यजनं याजनं दानं प्रतिग्रहश्चेति कस्य स्वधर्माः सन्ति?
उत्तरम्— ब्राह्मणस्य स्वधर्माः।

19. प्रश्नः—अध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणं च कस्य स्वधर्माः सन्ति?
उत्तरम्— क्षत्रियस्य स्वधर्माः।

20. प्रश्नः—यजनं दानं कृषिपाशुपाल्ये वणिज्या च कस्य स्वधर्माः सन्ति?
उत्तरम्— वैश्यस्य स्वधर्माः।

21. प्रश्नः—द्विजातिशुश्रूषा वार्ता कारुकुशीलव कर्म च कस्य स्वधर्माः सन्ति?
उत्तरम्— शूद्रस्य स्वधर्माः।

22. प्रश्नः—स्वाध्यायोऽग्निकार्याभिषेकौ भैक्षव्रतत्वमाचार्ये प्राणान्तिकी वृत्तिः इति कस्य धर्मः?
उत्तरम्— ब्रह्मचर्याश्रमे-ब्रह्मचारिणः।

23. प्रश्नः—स्वकर्माजीवः तुल्यैः असमानर्षिभिर्वैवाह्यं ऋतुगामित्वं च देव-पित्रातिथिभृत्येषु, त्यागः शेषभोजनं च कस्य धर्मविशेषः?
उत्तरम्— गृहस्थस्य।

24. प्रश्नः—ब्रह्मचर्यं भूमौ शय्या जटाऽजिनधारणम् अग्निहोत्राभिषेकौ देवतापित्रतिथिपूजा वन्यश्चाहारः कस्य धर्मविशेषः?
उत्तरम्— वानप्रस्थस्य।

25. प्रश्नः—संयतेन्द्रियत्वमनारम्भो निष्किञ्चनत्वं सङ्गत्यागो भैक्षमनेकत्रारण्यवासो बाह्याभ्यन्तरं च शौचम् इति कस्य धर्मविशेषः?
उत्तरम्— परिव्राजकस्य।

26. प्रश्नः—आन्वीक्षिकी-त्रयी-वार्तानां योगक्षेमसाधनो किं भवति?
उत्तरम्— दण्डनीतिः।

27. प्रश्नः—कस्य मते 'सर्वमेवोत्पन्नम्, यतो हि कार्यसामर्थ्याद् पुरुषसामर्थ्यं कल्प्यते' अमात्यनियुक्ते?
उत्तरम्— अर्थशास्त्री कौटिल्यस्य।

28. प्रश्नः—कस्य मते समानशीलव्यसनत्वात् गुह्यधर्माणः अमात्यान् कुर्वीत?
उत्तरम्— विशालाक्षस्य।

29. प्रश्नः—कस्य मते दृष्ट-शौचसामर्थ्यत्वात् सहाध्यायिनो अमात्यान् कुर्वीत?
उत्तरम्— भारद्वाजस्य।

30. प्रश्नः—अभिजन-प्रजा-शौच-शौर्यारागयुक्तान् अमात्यान् कुर्वीत इति कस्य मते?
उत्तरम्— बाहुदन्तीपुत्रस्य।

31. प्रश्नः—पितृपैतामहानमात्यान् कुर्वीत इति कस्य वचनम्?
उत्तरम्— कोणपदन्तस्य।

32. प्रश्नः—विद्या विनयहेतुः कः?
उत्तरम्— इन्द्रियजयः।

33. प्रश्नः—सेनापतेः नियुक्तेः आधारः भवति?
उत्तरम्— अर्थोपधा।

34. प्रश्नः—समाजस्य अन्तरिकस्थितेः ज्ञानाय गुप्तचरस्य कौ विभागौ स्तः?
उत्तरम्— 2 द्वौ।

35. प्रश्नः—गुप्तचरस्य कौ द्वौ विभागौ स्तः?
उत्तरम्— 1. स्थायीगुप्तचरः, 2. भ्रमणशीलगुप्तचरश्च।

36. प्रश्नः—स्थायीगुप्तचराणां नव-विभागाः के सन्ति?
उत्तरम्— 1. कापटिकः, 2. उदास्थिकः, 3. गृहपतिकः, 4. वैदेहकः, 5. तापसः, 6. सत्री, 7. तीक्ष्णः, 8. रसदः, 9. भिक्षुकीश्च।

37. प्रश्नः—वणिजको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो गुप्तचरः कः?
उत्तरम्— वैदेहकव्यंजनः।

38. प्रश्नः—कर्षको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो गृहपतिकव्यंजनः इति कः?
उत्तरम्— गृहपतिकव्यञ्जकः।

39. प्रश्नः—मुण्डो जटिलो वा वृत्तिकामः इति कः?
उत्तरम्— तापसव्यंजनः।

40. प्रश्नः—अर्थशास्त्रानुसारं 'परमर्मज्ञः प्रगल्भः छात्रः कः?
उत्तरम्— कापटिकः गुप्तचरः।

41. प्रश्नः—अरिषड्वर्गत्यागेन कः भवति?
उत्तरम्— इन्द्रियजयम्।

42. प्रश्नः—प्रव्रज्याप्रत्यवसितः प्रज्ञाशौचयुक्तः इति कः?
उत्तरम्— उदास्थिकः।

43. प्रश्नः—अर्थशास्त्रानुसारं प्रव्रज्याप्रत्यवसितः प्रज्ञाशौचयुक्तः कः?
उत्तरम्— उदास्थितः।

44. प्रश्नः—कौटिल्य-अर्थशास्त्रे जनपदानां स्थापनाविषयं कस्मिन् अधिकरणे उल्लिखितम्?
उत्तरम्— द्वितीयाधिकरणे।

(ण) मनुस्मृतिः (प्रथम-द्वितीय-सप्तम्-अध्यायमात्रम्) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

मनुस्मृतिग्रन्थस्य रचनाकारः आचार्यः मनुः वर्तते। स्मृतिकारेषु मनोः स्थानं सर्वोत्तमं वर्तते। अस्मिन् ग्रन्थे सर्वे धर्माः आहार-व्यवहार-प्रायश्चित्तानि इति त्रिषु विभागेषु, विभज्य काव्यरूपेण वर्णिताः सन्ति। तत्र स्मृति-प्रामाण्यात् श्रुति-प्रामाण्यं श्रेष्ठम् इति प्रतिपादितमस्ति। आचार्यमनुः भारतवर्षस्य सर्वप्रधानो धर्मनियामकः। इदं शास्त्रं न केवलं भारतवर्षे मान्यम्, अपितु श्याम-कम्बोज-फिलीपाइन-जावा-वाली-सुमात्रादि-स्थानेषु सम्प्रत्यपि मनुस्मृतिसम्मताः धर्मनियमाः स्वीकृताः दृश्यन्ते। अस्मिन् ग्रन्थे वर्णानां चतुर्णाम् आश्रमाणाञ्च धर्माः कर्तव्यकर्माः व्यवहारनियमाः राजनीतिक-व्यवस्था दण्डविधानानि पापानि प्रायश्चित्तानि च समुपलभ्यन्ते।

मनुस्मृतेः प्रथमाध्याये सृष्टिक्रमस्य निरूपणं दरीदृश्यते। तत्र स्वर्णमयाण्डे ब्रह्मणः उत्पत्तिः, देवस्य मानसिककालस्य निर्णयः, वर्णानां धर्माः आश्रमनियमानां वर्णनं कृतमस्ति। यक्ष-रक्षपिशाचादीनां सृष्टिः, पशु-मृग-मनुष्यादिसृष्टिः, वर्ष-मास-पक्ष-होरादिनिरूपणम्, चतुर्युगनिरूपणं, चतुर्वर्णानां गुणागुणं कर्मणां व्यवस्थादीनां जाति-कुलधर्मादीनाञ्च निरूपणं कृतमस्ति।

(1) संसारस्य उत्पत्तिः—मनुस्मृतेः प्रथमाध्याये सृष्टेः प्राक् प्रलयदशायां जगदिदं सर्वत्र तमोभूतम् अज्ञातलक्षणम् अप्रतर्क्यम् प्रसुप्तमिव आसीत्। तदा भगवान् विष्णुः आकाशादिमहाभूतान् व्यञ्जयन् प्रादुरासीत्। एवं अतीन्द्रियग्राह्यः सूक्ष्मः अव्यक्तः सनातनः अचिन्त्यः सर्वभूतमयः नारायणः स्वयमेव उद्बभौ। ततः पूर्वकल्पम् अभिधाय स्वकीयात् शरीरात् प्रजाः सिसृक्षुः स सर्वज्ञः आदौ जलम् एव ससर्ज, पुनश्च तासु अप्सु शक्तिमयं बीजम् अवासृजत्। तद् बीजं तु सहस्रांशुसमप्रभम् हैमम् अण्डम् अभवत्, तस्माद् हैमाण्डात् पितामहः ब्रह्मा स्वयं जज्ञे। ततः ब्रह्मा स्वर्गादीनां लोकानां, जरायुज-अण्डज-स्वेदज-उद्भिजादीनां जीवानाम् स्थावर-जंगमादीनां सकलप्रपंचानां सर्जनं कृतवान्।

(2) ब्राह्मणादि-चतुर्वर्णानां कर्तव्यकर्मणां विवेचनम्—मनुस्मृतेः प्रथमाध्याये सर्वेषां लोकानां रक्षार्थं प्रजापतेः मुखादिजातानां ब्राह्मणादीनां चतुर्वर्णानां दृष्य-दृष्यर्थानि कर्माणि निर्मितवान्। तत्र ब्राह्मणानां कृते अध्ययनं अध्यापनं यजनं याजनं दानं प्रतिग्रहं च षट्कर्माणि। कथ्यते यथा मनुना—

अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत्।। (1/88)

तत्र क्षत्रियाणां कृते प्रजानां रक्षणं दानं इज्या अध्ययनं विषयेष्वप्रसक्तिश्च पञ्चकर्माणि आदिशत्। यथोच्यते मनुना–

प्रजानां रक्षणं दानमिज्याध्ययनमेव च।
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः।। (1/89)

तथा पशुपालनं दानं इज्या अध्ययनं वाणिज्यं कृषिकार्यं लाभेन वित्तवर्धनं च सप्त-कर्माणि वैश्यस्य कल्पितवान्। मनुस्मृतेः प्रथमेऽध्याये कथ्यते यथा–

पशूनां रक्षणं दानमिज्याध्ययनमेव च।
वणिक्पथं कुसीदञ्च वैश्यस्य कृषिमेव च।। (1/90)

एवं प्रजापतिः ब्रह्मा शूद्रस्य द्विजाति-सेवात्मकम् एकं कर्म कल्पितवान्। मनुस्मृतेः प्रथमेऽध्याये कथ्यते यथा-

एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्।
एतेषामेव वर्णानां शुश्रूषामनसूयया।। (1/91)

मनुस्मृतेः द्वितीयाध्याये धर्मस्य प्रमाणम्, जातकर्म-नामकरण-चूडाकरण-उपनयन-केशान्तक-वेदाध्ययन-विधिः-आचार्यलक्षणादिविषयाणां संस्काराणाञ्च अनुष्ठानम्, ब्रह्मचारिणः व्रतधारणम्, शिष्यस्य कर्तव्यानि एवं गुर्वादीनामभिवादनादिविषयाणां सूक्ष्मरूपेण वर्णनं कृतमस्ति।

(3) प्रणव-प्रशंसा–मनुस्मृतेः द्वितीयाध्याये मनुना प्रणवॐकार इत्यस्य प्रशंसा कृतवान्। ॐकारः पूर्वो यासां, ताः ओंकारपूर्विकाः महाव्याहृतयः भूः भुवः स्वः इत्येताः अक्षरब्रह्मावाप्तिफलत्वेन अव्ययाः, त्रिपदा च सावित्री परब्रह्मणः प्राप्त्युपायं वेदस्य प्रधानभूतं वा। यथोच्यते मनुना–

अकारं चाप्युकारं च मकारं च प्रजापतिः।
वेदत्रयान्निरदुहद् भूर्भुवःस्वरितीति च।। (2/76)

ओंकारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः।
त्रिपदा चैव सावित्री विज्ञेयः ब्रह्मणो मुखम्।। (2/81)

अनेन प्रणवेन ब्रह्मज्ञानप्रकर्षेण मोक्षावाप्तिः भवति। अकारम् उकारं मकारं च प्रणवावयवभूतं वेदत्रयात् ऋग्यजुःसामवेदेभ्यः भूर्भुवःस्वरिति व्याहृतित्रयं च क्रमेण उद्धृतवान्। यः प्रतिदिनम् आलस्यरहितः सन् वर्षत्रयं यावत् ॐकार-महा-व्याहृतिपूर्वकं जपं कुरुते, सः वायुभूतः सन् परब्रह्म अवाप्नोति। कथितं च मनुना–

योऽधीतेऽहन्यहन्येतांस्त्रीणि वर्षाण्यतन्द्रितः।
स ब्रह्मपरमभ्येति वायुभूतः खमूर्तिमान्।। (2/82)

ओमिति ब्रह्माभिधानम्। यथोक्तम्–"तस्य वाचकः प्रणवः" अत एव "तज्जपस्तदर्थभावनम्" इत्युक्तं महर्षिणा पतञ्जलिना। केवलमेकमक्षरमेव सर्वश्रेष्ठम् उच्यते। प्राणायामः परं तपः। सावित्र्याः परः कोऽपि मन्त्रं नास्ति। मौनात् सत्यभाषणम्, सत्याचरणं परमं श्रेष्ठमस्ति। यथोच्यते मनुना-

एकाक्षरं परं ब्रह्म प्राणायामः परं तपः।
सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते।। (2/83)

यावन्तः वैदिका 'होमा' अग्निहोत्रादयो, ये च 'याग' ज्योतिष्टोमादयः, ते सर्वे क्षरन्ति, किन्तु ओंकारम् अक्षयफलम्। कथितं यथा मनुना-

क्षरन्ति सर्वा वैदिक्यो जुहोति यजतिक्रियाः।
अक्षरं त्वक्षरं ज्ञेयं ब्रह्म चैव प्रजापतिः।। (2/84)

(4) सन्ध्योपासना–मनुस्मृतेः द्वितीयाध्याये मनुना कथ्यते-आचमनपूर्वकं समाहितचित्तेन शुचौ प्रणवव्याहृतिपूर्वकं गायत्रीजपं कुर्वीत। तत्र पूर्वसन्ध्यां तु सूर्यदर्शनपर्यन्तं, पश्चिमसन्ध्यां तु नक्षत्रदर्शनपर्यन्तं, सावित्रीं जपन् उपविष्टः स्यात्। मनुना कथितं यथा–

पूर्वसन्ध्यां जपंस्तिष्ठेत् सावित्रीमर्कदर्शनात्।
पश्चिमां तु समासीनः सम्यगृक्षविभावनात्।। (2/101)

प्रातःकाले समासीनः गायत्रीं जपन् रात्रिकृतं पापं हन्ति एवं सायंकाले समासीनः गायत्रीं जपन् दिवाकृतं पापं विनश्यति। अत्र फलवत्त्वात् जपः प्रधानम्। यथोक्तं मनुना-सन्ध्ययोर्वेदविद् विप्रो वेदपुण्येन युज्यते। सहस्रकृत्वस्त्वभ्यस्य। सन्ध्योपासनबलेनैव दिने यदि वा रात्रौ यदज्ञानकृतं भवेत्, त्रिकालसन्ध्याकरणत्वात् तत्सर्वं प्रणश्यति।

मनुस्मृतेः सप्तमाध्याये राज्ञां धर्माः, राज्यशासनस्य युद्धादिनियमानां च उल्लेखः अस्ति। यथा क्रमशः–राज्ञः प्रशंसा, दण्डसृष्टि-दण्डप्रशंसा, विद्याग्रहणम्, मन्त्रीणां नियुक्तिः, दूतनियुक्तिः, दुर्गप्रकारः, अध्यक्षनियुक्तिः, धर्मार्थकामचिन्तनम्, अष्टविधकर्मादि-चिन्तनम्, व्यूहरचना विधिः, पराष्ट्रपीडनम्, मित्रप्रशंसा इत्यादिविषयाणां विवेचनं समुपलभ्यते।

(5) राज्ञः प्रशंसा–अस्मिन् संसारे राजा तु स्वकीयेन तेजसा भास्करवत् तपति। स राजा स्वप्रभावात् अग्निरूपं, वायुरूपं, सूर्यरूपं, चन्द्ररूपं, धर्मराजरूपं, कुबेररूपं, महेन्द्ररूपं च अस्ति। अतः 'मनुष्य' इति मत्वा बालोऽपि राजा नावमन्तव्यः, यतो नररूपेण एषा महती देवता वर्तते। अतः राजधर्मस्य अवज्ञा कदापि न करणीया। कथितं यथा मनुना–

बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति।। (7/8)

अग्निस्तु केवलम् असावधानमेव मनुष्यं दहति किन्तु राजाग्निः तु धनधान्यपूर्वकं सकुलं सर्वस्वं भस्मसात् करोति। यथोक्तं मनुना–

एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम्।
कुलं दहति राजाग्निः सपशुद्रव्यसंचयम्।। (7/9)

यस्य राज्ञः प्रसादे पद्मा, पराक्रमे विजयश्रीः, क्रोधे मृत्युः वसति, स एव सर्वतेजमयः इति कथ्यते मनुना-

यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः।। (7/11)

यः कोऽपि सम्भ्रमात् तं राजानं द्वेष्टि, स तु शीघ्रमेव विनश्यति, यतो हि राजा तस्य विनाशाय आशु मनः प्रकुरुते। कथ्यते यथा मनुना–

तं यस्तु द्वेष्टि संमोहात् स विनश्यत्यसंशयम्।
तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः।। (7/12)

(6) राजधर्मः, कर्तव्यकार्याणि–सप्तमे अध्याये मनुस्मृत्यनुसारं राजधर्मम्-अजितं भूमिहिरण्यादि जेतुमिच्छेत्। जितं प्रयत्नतो रक्षेत्। रक्षितं च वणिज्यादिना वर्धयेत्। वृद्धं च पात्रेभ्यो दद्यात्। यथोच्यते–

अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः।
रक्षितं वर्धयेच्चैव वृद्धं पात्रेषु निःक्षिपेत्।। (मनुस्मृति 7/99)

पुरुषार्थचतुष्टयसाधनपूर्वकं नित्यमुद्यतदण्डः स्यात्। अर्थात् नित्यं हस्त्यश्वादियुद्धादिशिक्षाभ्यासो करणीयं स्यात्। नित्यं च प्रकाशीकृत्यमस्त्रविद्यादिना पौरुषं प्रदर्शयेत्। एवं च नित्यं संवृतं संवरणीयं मन्त्राचारचेष्टादिकं कृतं स्यात्। तथा च नित्यं शत्रोर्व्यसनादिरूपच्छिद्रानुसंधाने तत्परः स्यात्। यस्मात् नित्योद्यतदण्डस्य जगदुद्विजेदिति तस्मात्सर्वप्राणिनो दण्डेनैवात्मसात्कुर्यात्। कथितं च–

नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः।
नित्यं संवृतसंवार्यो नित्यं छिद्रानुसार्यरेः।। (मनुस्मृतिः 7/102)

नित्यमुद्यतदण्डस्य कृत्स्नमुद्विजते जगत्।
तस्मात्सर्वाणि भूतानि दण्डेनैव प्रसाधयेत्।। (मनुस्मृतिः 7/103)

सर्वाणि भूतानि दण्डेन एव प्रसाधयेत्। अमात्यैः समं निश्छलव्यवहारं कुर्यात्। मन्त्रणा सर्वदा गोपनीया भवेत्। यथा बको जले मीनमतिनश्चलस्वभावमपि मत्स्यग्रहणादेकतानान्तःकरणश्चिन्तयत्येवं रहसि सुविचिन्तितरक्षस्यापि विपक्षस्य देशग्रहणादीन् अर्थान् चिन्तयेत्। एवं च सिंहवत् पराक्रमान् प्रदर्शयेत्। वृकवत् शत्रुनाशं व्यापादयेत्। तथा शशवत् शत्रुव्यूहात् विनिष्क्रमेत्। उक्तं यथा मनुस्मृतौ–

बकवच्चिन्तयेदर्थान्सिंहवच्च पराक्रमेत्।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत्।। (मनुस्मृतिः 7/106)

मनुस्मृत्यनुसारं राज्ञः कर्तव्यमस्ति यत् स्वयं रथस्थो रथं त्यक्त्वा स्थलारूढं न हन्यात्। तथा च नपुंसकं, बद्धाञ्जलिं, मुक्तकेशं, उपविष्टं, त्वदीयोऽहमित्यवादिनं न हन्यात्। सुप्तं, कवचरहितं, विवस्त्रं, अनायुधं, युद्धविरतं, प्रेक्षकं, अन्येन सह युध्यमानं च न हन्यात्। कथितं यथा–

न च हन्यात्स्थलारूढं न क्लीबं न कृताञ्जलिम्।
न मुक्तकेशं नात्मानं न तवास्मीति वादिनम्।। (मनुस्मृतिः 7/91)

न सुप्तं न विसन्नाहं न नग्नं न निरायुधम्।
नायुध्यमानं पश्यन्तं न परेण समागतम्।। (मनुस्मृतिः 7/92)

[illegible]

अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः॥
(मनुस्मृतिः-7.3)

[illegible] कथितं—

संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम्।
शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम्॥
(मनुस्मृतिः-7.88)

"आपदर्थं धनं रक्षेत्" इति श्रुत्वा [illegible] आपन्निवारणार्थं धनं [illegible] आत्मानं पुनः सर्वदा [illegible] रक्षेत्। उक्तं च नृपस्य कर्तव्यप्रसङ्गे मनुना—

आपदर्थं धनं रक्षेद् दारान् रक्षेद् धनैरपि।
आत्मानं सततं रक्षेद् दारैरपि धनैरपि॥
(मनुस्मृतिः-7.213)

दण्डः सर्वोपरि शासनं करोति, सर्वेषां [illegible] करोति, [illegible] कथ्यते। बुद्धिमन्तो जनाः दण्डमेव धर्मम् इति कथयन्ति। दण्डः राजा, दण्डः पुरुषः, दण्डः नेता, दण्डः शासकः, दण्डः चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः अस्ति, यथा मनुना—

दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः॥
(मनुस्मृतिः-7.18)

स राजा पुरुषो दण्डः स नेता शासिता च सः।
चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः॥
(मनुस्मृतिः-7.17)

इत्थं स्पष्टं भवति यत् राज्यस्य इच्छा एवं दण्डशक्तिः व्यक्ति-राष्ट्रं च धर्मस्य सीमां निर्धारयति। मनुना राजानं [illegible] कामजाः दश, [illegible] क्रोधजाः अष्टौ [illegible] राजा [illegible] स्वर्गं याति।

(३) व्यसनानां विवर्जनम्—मनुस्मृतेः सप्तमे अध्याये व्यसनानि विवेचितानि। विवर्जनीयानि इति [illegible] दश व्यसनानि कामसमुत्थानि, अष्टौ क्रोधजानि च। एतानि सर्वाणि व्यसनानि दुरन्तानि। अतः प्रयत्नेन विवर्जयेत् इत्युक्तं कथितं च मनुना—

दश कामसमुत्थानि तथाऽष्टौ क्रोधजानि च।
व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत्॥
(7.45)

यतो हि कामजेषु व्यसनेषु सक्तः नृपः अर्थधर्माभ्यां वियुज्यते, क्रोधजेषु सक्तस्तु स्वकीयेन प्राणेन अपि वियुज्यते। तत्र दश कामजानि व्यसनानि इत्थं उच्यन्ते— (1) मृगया, (2) अक्षक्रीडा, (3) दिवास्वप्नः, (4) परिवादः, (5) स्त्रीप्रसङ्गः, (6) मद्यपानं, (7) नृत्येषु आसक्तिः, (8) गीतेषु आसक्तिः, (9) वाद्येषु आसक्तिः, (10) व्यर्थभ्रमणं च उक्तं च—

मृगयाऽक्षो दिवास्वप्नः परीवादः स्त्रियो मदः।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः॥
(7.47)

एवं च अष्टौ क्रोधजानि व्यसनानि कथ्यन्ते— 1. पैशुन्यं, 2. साहसं, 3. द्रोहः, 4. ईर्ष्या, 5. असूया, 6. अर्थदूषणम्, 7. वाक्पारुष्यं, 8. दण्डपारुष्यं च। कथितं यथा—

पैशुन्यं साहसं द्रोह ईर्ष्याऽसूयार्थदूषणम्।
वाग्दण्डजं च पारुष्यं क्रोधजो भवति गणोऽष्टकः।
(7.48)

उभयोः काम-क्रोधगत-व्यसनयोः मूलं तु लोभ एव। अतः लोभम् एव यत्नेन त्यजेत्। व्यसन-मृत्योश्च व्यसनम् एव अतिकष्टकरं भवति, मृतः तु स्वर्गं गच्छति, किन्तु व्यसनी दिनप्रतिदिनम् अधोगतिम् एव व्रजति। यथा उच्यते—

व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते।
व्यसन्यधोऽधो व्रजति स्वर्यात्यव्यसनी मृतः॥
(7.53)

(४) दुर्गस्य रचना एवं प्रकाराणि— मनुस्मृतेः सप्तमे अध्याये दुर्गविषयकं विचारं प्रस्तौति। तत्र षट्प्रकाराणि दुर्गाणि विवेचितानि सन्ति। ते यथा— 1. धन्वदुर्गं, 2. महीदुर्गं, 3. जलदुर्गं, 4. वार्क्षदुर्गं, 5. नृदुर्गं, 6. गिरिदुर्गं च। यथोक्तम्—

धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा।
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरम्॥
(7.70)

विशेषेण षड्दुर्गेषु नृपः गिरिदुर्गमेव समाश्रयेत्, यतो हि बाहुगुण्येन गिरिदुर्गं विशिष्यते। यथा—

सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत्।
एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते।
(7.71)

यथा धन्वमहीवृक्षदुर्गेषु समाश्रित्य पशु पक्षिणः शत्रुभ्यः (व्याधादिभ्यः) सुरक्षिताः भवन्ति, तथैव नृपः अपि एतेषु दुर्गेषु सर्वथा सुरक्षितः भवति। यथोच्यते मनुना—

यथा दुर्गाश्रितानेतान्नोपहिंसन्ति शत्रवः।
तथाऽरयो न हिंसन्ति नृपं दुर्गसमाश्रितम्॥
(7.73)

यतो हि दुर्गस्थितः एकोऽपि योद्धा शतं योधयति, तथा शतं दशसहस्राणि योधयति। एतस्मात् राजा दुर्गनिर्माणं क्रियते। दुर्गमध्ये एव सुपर्याप्तम् आकारयुक्तं, सुरक्षितं, सर्वर्तुकं, जलवृक्षादिसमन्वितं शुभ्रम् आत्मनः गृहं कारयेत्। एतस्मिन् गृहे राजप्रासादे वा निवसन् नृपः योगक्षेमरक्षणे सर्वथा समर्थः भवति। कथ्यते यथा मनुस्मृतिकारमनुना—

एकः शतं योधयति प्राकारस्थो धनुर्धरः।
शतं दश सहस्राणि तस्माद् दुर्गं विशेष्यते॥ (7.74)
तस्य मध्ये सुपर्याप्तं कारयेद् गृहमात्मनः।
गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमन्वितम्॥ (7.76)

(ण) वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः— मनुस्मृति इति ग्रन्थस्य प्रवर्तकः कः?
उत्तरम्— स्वायम्भुवमनुः।

2. प्रश्नः— कति अध्यायाः सन्ति मनुस्मृतौ?
उत्तरम्— 12 द्वादश।

3. प्रश्नः— मनुस्मृतिग्रन्थे विचारः कः?
उत्तरम्— धर्मशास्त्र सम्बन्धि विचारः।

4. प्रश्नः— मनुस्मृतिग्रन्थे निरूपितः धर्मः कः?
उत्तरम्— श्रुतिप्रमाणको धर्मः।

5. प्रश्नः— वेदः अखिलं धर्मस्य मूलोऽस्ति इति कस्य कथनम्?
उत्तरम्— मनु महोदयस्य।

6. प्रश्नः— प्रथमः स्मृतिकारः कोऽस्ति?
उत्तरम्— मनुः।

7. प्रश्नः— मनुस्मृतौ कति श्लोकाः सन्ति?
उत्तरम्— (2694) [illegible] श्लोकाः।

8. प्रश्नः— मनुपुत्रः कः?
उत्तरम्— भृगुः।

9. प्रश्नः— सर्वज्ञानमयो कः?
उत्तरम्— वेदः।

10. प्रश्नः— भारतवर्षस्य सर्वप्रथमो धर्मशास्त्रकारः कः?
उत्तरम्— आचार्यमनुः।

11. प्रश्नः— मानवजातेः आदि पुरुषः कः?
उत्तरम्— मनुः।

12. प्रश्नः— मनुस्मृतिग्रन्थस्य प्रथमेऽध्याये विचारः कः?
उत्तरम्— विश्वसृष्टिसम्बन्धि विचारः।

13. प्रश्नः— ब्राह्मणानां कृते षट्कर्माणि कानि सन्ति?
उत्तरम्— अध्ययनं अध्यापनं यजनं याजनं दानं प्रतिग्रहं च।

14. प्रश्नः— क्षत्रियाणां कृते पञ्चकर्माणि कानि सन्ति?
उत्तरम्— प्रजानां रक्षणं दानं इज्या अध्ययनं विषयेष्वप्रसक्तिश्च।

15. प्रश्नः— वैश्यानां कृते सप्त कर्माणि कानि सन्ति?
उत्तरम्— पशूनां रक्षणं दानं इज्या अध्ययनं वाणिज्यं कृषिकर्म लाभेन वित्तवर्धनं च।

16. प्रश्नः— शूद्राणां कृते एकं कर्म किम्?
उत्तरम्— द्विजाति सेवाकर्मकम्।

17. प्रश्नः— आपो नारा इति प्रोक्ता आपो वै नरसूनवः ता यदस्यायनं पूर्वं इति कः?
उत्तरम्— नारायणः।

18. **प्रश्नः**—'आचारः परमो धर्मः' इति मनुस्मृतौ कस्मिन् अध्याये वर्तते?
उत्तरम्—प्रथमेऽध्याये।

19. **प्रश्नः**—मनुस्मृत्यनुसारं जरायुज-जीवः कः?
उत्तरम्—मृगः।

20. **प्रश्नः**—मनुस्मृत्यनुसारं अण्डजः जीवः कः?
उत्तरम्—मत्स्यः।

21. **प्रश्नः**—मनुस्मृत्यनुसारं उद्भिज्जः जीवः कः?
उत्तरम्—वृक्षादिः।

22. **प्रश्नः**—मनुस्मृत्यनुसारं स्वेदजः जीवः कः?
उत्तरम्—यूकादिः।

23. **प्रश्नः**—मनुस्मृत्यनुसारं अपुष्पा फलवन्तो ये, ते के सन्ति?
उत्तरम्—वनस्पतयः।

24. **प्रश्नः**—मनुमते पुष्पितः फलिनश्चैव के?
उत्तरम्—वृक्षाः।

25. **प्रश्नः**—मनुस्मृत्यनुसारं आकाशः कस्मात् उद्भूतः?
उत्तरम्—मनसः।

26. **प्रश्नः**—मनुस्मृत्यनुसारं वायुः कस्मात् जायते?
उत्तरम्—आकाशात्।

27. **प्रश्नः**—मनुस्मृत्यनुसारं अग्निः कस्मात् उद्भवति?
उत्तरम्—वायोः।

28. **प्रश्नः**—मनुस्मृत्यनुसारं पृथिव्याः प्रकृतिः कः?
उत्तरम्—आपः।

29. **प्रश्नः**— धर्मस्य प्रतिपाद्यविषयः, संस्काराः कस्मिन् अध्याये वर्तते?
उत्तरम्—द्वितीयेऽध्याये।

30. **प्रश्नः**— कः स्मृति-ग्रन्थः विधि-ग्रन्थो मन्यन्ते?
उत्तरम्— मनुस्मृतिग्रन्थः।

31. **प्रश्नः**—अन्नप्राशनं कदा कार्यम्?
उत्तरम्— षष्ठे मासि।

32. **प्रश्नः**—चूडाकरणसंस्कारः कदा कार्यः?
उत्तरम्— प्रथमे तृतीये वा वर्षे।

33. **प्रश्नः**—मनुमते सामवेदः कस्मात्?
उत्तरम्—सूर्यात्।

34. **प्रश्नः**—मनुमते ऋग्वेदः कस्मात्?
उत्तरम्—अग्नेः।

35. **प्रश्नः**—मनुमते यजुर्वेदः कस्मात्?
उत्तरम्—वायोः।

36. **प्रश्नः**—"कामात्मता न प्रशस्ता न चैवेहास्त्यकामता" इति सूक्तिः मनुस्मृतेः कस्मिन् अध्याये लिखितम् अस्ति?
उत्तरम्—द्वितीयेऽध्याये।

37. **प्रश्नः**— मनुस्मृत्यनुसारं ब्राह्मणानामुपनयनकालाः कति सन्ति?
उत्तरम्— (3) त्रयः।

38. **प्रश्नः**— 'धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः' इति इयमुक्तिः कुत्रोपलभ्यते?
उत्तरम्— मनुस्मृतौ।

39. **प्रश्नः**—नापृष्टः कस्यचिद् ब्रूयान्न चान्यायेन पृच्छतः- इति मनुस्मृतेः कस्मिन् अध्याये उल्लिखितम्?
उत्तरम्—द्वितीयेऽध्याये।

40. **प्रश्नः**—'प्रणव-प्रशंसा' कुत्र प्राप्यते?
उत्तरम्—मनुस्मृतौ।

41. **प्रश्नः**—मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत्। बलवान् इन्द्रियग्रामो विद्वांसमपि कर्षति। इति कस्मिन् अध्याये उल्लिखितम्?
उत्तरम्—द्वितीयेऽध्याये।

43. **प्रश्नः**— मनुस्मृतेः सप्तमाऽध्यायस्य प्रधानविषयः कः वर्तते?
उत्तरम्— राजधर्मः।

44. **प्रश्नः**—श्रुतिः कतिविधः, के च ते?
उत्तरम्— द्विविधः, 1. वैदिकी, 2. तान्त्रिकी च।

45. **प्रश्नः**— मनुस्मृतेः मतानुसारं कतिप्रकारकाणि दण्डाः भवन्ति?
उत्तरम्— चतुःप्रकारकाणि।

46. **प्रश्नः**— स्त्रियो रत्नान्यथो विद्या धर्मः शौचं सुभाषितम्। विविधानि च शिल्पानि समादेयानि सर्वतः।। इति कुतः?
उत्तरम्—मनुस्मृतितः।

47. **प्रश्नः**—"सन्ध्ययोर्वेदविद् विप्रो वेदपुण्येन युज्यते। सहस्रकृत्वस्त्वभ्यस्य" इति केन कथितः?
उत्तरम्—मनुस्मृतेः मनुना।

48. **प्रश्नः**—अधर्मेण च यः प्राह यश्चाधर्मेण पृच्छति। तयोरन्यतरः प्रैति विद्वेषं वाऽधिगच्छति।। इति कुत उद्धृतः?
उत्तरम्—मनुस्मृतितः।

49. **प्रश्नः**—स्मृतिकारानुसारेण धर्मस्य दश-लक्षणं किम्?
उत्तरम्—धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।

50. **प्रश्नः**— मनुस्मृतौ ब्राह्मणस्य उपनयन-संस्कारस्य उत्कृष्टसमयः कः?
उत्तरम्— गर्भाष्टमे वर्षे।

51. **प्रश्नः**—ब्राह्मणस्य केशान्तसंस्कारः कस्मिन् वर्षे विधीयते?
उत्तरम्—षोडशे।

52. **प्रश्नः**— मनुमतानुसारं कति विद्याः भवन्ति?
उत्तरम्—चतस्रः।

53. **प्रश्नः**— आपदर्थं धनं रक्षेद्दारान् रक्षेद् धनैरपि। आत्मानं सततं रक्षेद्दारैरपि धनैरपि।। इति मनुना कस्मिन् अध्याये उल्लिखितम्?
उत्तरम्—07 सप्तमाऽध्याये।

54. **प्रश्नः**— वेदाध्ययनस्य प्रारम्भे अन्ते च करय उच्चारणं कुर्यात्?
उत्तरम्—प्रणवस्य।

55. **प्रश्नः**— अभिवादनशीलस्य नित्यं वृद्धोपसेविनः। चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् इति कुतः उद्धृतः?
उत्तरम्—मनुस्मृतितः।

56. **प्रश्नः**— पूर्वसन्ध्यां किं दर्शनपर्यन्तं कुर्यात्?
उत्तरम्—सूर्यदर्शनपर्यन्तम्।

57. **प्रश्नः**— पश्चिमां सन्ध्यां किं दर्शनपर्यन्तं स्यात्?
उत्तरम्—नक्षत्रदर्शनपर्यन्तम्।

58. **प्रश्नः**—सरस्वती-दृषद्वत्योर्देवनद्योर्यदन्तरम् दैव-निर्मितम् देशः कः?
उत्तरम्—ब्रह्मावर्तः।

59. **प्रश्नः**— शिशोर्निष्क्रमणकालः कः?
उत्तरम्— द्वादशदिवसात् चतुर्थमासपर्यन्तम्।

60. **प्रश्नः**—विद्यारम्भः संस्कारः कदाऽपेक्षितः?
उत्तरम्—विद्यारम्भ संस्कारो विश्वामित्रस्याऽनुसारेण पञ्चमे वर्षेऽपेक्षितः।

61. **प्रश्नः**—हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि प्रत्यगेव प्रयागाच्च इति कः?
उत्तरम्—मध्यदेशः।

62. **प्रश्नः**— "व्रतानि यमधर्मांश्च——स्मृताः"
उत्तरम्—संकल्पजाः।

63. **प्रश्नः**— अंगुष्ठमूलस्य तले किं तीर्थं प्रचक्षते?
उत्तरम्—ब्राह्मतीर्थम्।

64. **प्रश्नः**— राजमण्डलस्य कति प्रकृतयः मनुना विहितः?
उत्तरम्—12 द्वादश।

65. **प्रश्नः**— मनुस्मृतौ राजमण्डलस्य भेदोपभेदपूर्विका कति प्रकृतयः उल्लिखिताः?
उत्तरम्—72 द्विसप्ततिः।

66. **प्रश्नः**— "जितेन्द्रियो हि शक्नोति वशे स्थापयितुम् प्रजा" इति कस्मिन् अध्याये उल्लिखितम्?
उत्तरम्—सप्तमेऽध्याये।

67. **प्रश्नः**—मनुस्मृत्यनुसारं व्यसनानां संख्या का?
उत्तरम्—10 दश।

68. **प्रश्नः**— दश कामजानि व्यसनानि कानि सन्ति?
उत्तरम्— (1) मृगया, (2) अक्षक्रीडा, (3) दिवास्वप्नः, (4) परीवादः, (5) स्त्रीप्रसंगः, (6) मद्यपानं, (7) नृत्येषु आसक्तिः, (8) गीतेषु आसक्तिः, (9) वाद्येषु आसक्तिः, (10) व्यर्थभ्रमणम् च।

69. **प्रश्नः**— अष्टौ क्रोधजानि व्यसनानि कानि सन्ति?
उत्तरम्—1. पैशुन्यं, 2. साहसं, 3. द्रोहः, 4. ईर्ष्या, 5. असूया, 6. अर्थदूषणम्, 7. वाक्पारुष्यं, 8. दण्डपारुष्यं च।

70. **प्रश्नः**— उभयोः काम-क्रोधगत-व्यसनयोः मूलं किम्?
उत्तरम्—लोभ एव।

71. **प्रश्नः**— मनुस्मृत्यनुसारं कति दुर्गाणि भवन्ति?
उत्तरम्—06 षट्।

72. प्रश्नः— कस्य दुर्गस्य उल्लेखः मनुस्मृतौ नास्ति?

उत्तरम्— वनदुर्गस्य।

73. प्रश्नः— मनुना कति प्रकारकाणि दुर्गाणि विवेचितानि, कानि च तानि?

उत्तरम्— षट्प्रकारकाणि, 1. धन्वदुर्गं, 2. महीदुर्गं, 3. जलदुर्गं, 4. वार्क्षदुर्गं, 5. नृदुर्गं, 6. गिरिदुर्गं च।

74. प्रश्नः—स्मृतिग्रन्थे ब्राह्मणेषु कथं ब्रह्मवेदिनः श्रेष्ठः?

उत्तरम्— ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः। कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवेदिनः।।

(ड) याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायमात्रम्) एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

याज्ञवल्क्यस्मृतिः त्रिषु अध्यायेषु विभक्ता अस्ति–1. आचारः, 2. व्यवहारः, 3. प्रायश्चित्तं च। व्यवहाराध्यायस्य साधारणव्यवहार-मातृकाप्रकरणे व्यवहारलक्षणं, सभासद्-लक्षणं, सभासदसंख्या, सभासदां दण्डः, ब्राह्मणानां दोषः, प्राड्विवाकः, प्राड्विवाकगुणाः, प्राड्विवाककार्यम्, व्यवहार-विषयः, व्यवहारस्य अष्टादशभेदाः, असंप्रतिपत्तिरूपम्, व्यवहार-चतुर्विधः, भाषाकरणप्रकारः, पक्षाभासाः, अनादेयव्यवहाराः, आदेयव्यवहाराः, उत्तरप्रकारः, उत्तरस्वरूपम्, चतुर्विधमुत्तरम्, एकस्मिन् व्यवहारे अनेकपक्षाणि व्यवहारपादानि च, अनुत्तरत्वे कारणानि, व्यवहारस्य चत्वारः पादाः इत्यादिविषयाः समुपलभ्यन्ते। व्यवहारमातृकाप्रकरणे प्रत्यभियोगः, प्रतिभूग्रहणम्, मिथ्या प्रतिभूकर्तव्यम्, कालविलम्बापवादः, अभियोक्तृकाराः, न्यायभेदः, दण्डपरिमाणम्, दण्डप्रकारः, असत्याभियोगः इत्यादीनां विषयाणाम् उल्लेखः प्राप्यते।

(1) ऋणादानं व्यवहारविषयककथा–याज्ञवल्क्यस्मृतेः ऋणदानं सप्तविधं मन्यते–1. ईदृशमृणं देयम्, 2. ईदृशमदेयम्, 3. अनेनाधिकारिणा देयम्, 4. अस्मिन् समये देयम्, 5. अनेन प्रकारेण देयम् इत्यधमर्णे (ऋणकर्तृसम्बन्धः) पञ्चविधम्। 6. उत्तमर्णे दानविधिः, 7. आदानविधिश्च (ऋणग्राहकसम्बन्धः) इति द्विविधम्। तत्र उत्तमर्णस्य दानविधिमाह–प्रतिमासं बन्धकं विश्वासार्थं। अशीतिमो भागो वृद्धिः धर्म्या भवति। बन्धकरहिते प्रयोगे तु ब्राह्मणादीनां क्रमेण द्वि-त्रि-चतुः-पञ्च-प्रतिशतं यावत् धर्म्यं भवति। इयं वृद्धिः प्रतिमासं गृह्यते। वृद्ध्या धनं गृहीत्वा अधिकलाभार्थम् अतिगहनं प्राणधनविनाशसंकटस्थानं प्रविशन्ति ते दशकं शतं दद्युः। ये च समुद्रगाः, ते विंशकं शतं (20%) प्रतिमासं दद्युः। उक्तं यथा–कान्तारगाभ्यां दशकं शतं समुद्रेभ्यश्च विंशकं शतम्। स्त्रीणां पशूनां पोषणासमर्थस्य तत्पुष्टिसन्ततिकामस्य भोगः सम्भवति तैलघृतादेर्वृद्धिग्रहणमन्तरेण चिरकाला-वस्थितस्य स्वकृतया वृद्ध्या वर्धमानस्य अष्टगुणा वृद्धिः स्यात्, वस्त्रधान्यहिरण्यानां चतुर्गुणा त्रिगुणा द्विगुणा च भवेत्। कथ्यते यथा–"रसस्याष्टगुणा परा, वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा"। अन्यच्च समानजातीयेषु धनिषु येन क्रमेण धनं गृहीतं, तेनैव क्रमेण अधमर्णिको राज्ञा दाप्यः, भिन्नजातीयेषु तु ब्राह्मणादिक्रमेण। ब्राह्मणादि-जातिरुत्तमर्णो हीनजातिं क्षत्रियादिकं निर्धनं ऋणनिवृत्त्यर्थं स्वजात्यनुरूपम् कर्म कारयेत्। पत्या कृतमृणं पत्नी नैव दद्यात्, पुत्रेण कृतं माता न दद्यात्, पुत्रेण कृतं पिता न दद्यात् तथा भार्याकृतं पतिर्न दद्यात्, यदि कुटुम्बार्थं येन केनापि कृतं तत् कुटुम्बिना देयम् एव। यथोक्तं महर्षिणा याज्ञवल्क्येन–

> गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः।
> दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरम्।। (2/41)

> हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्।
> ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम्।। (2/43)

> न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता।
> दद्यात् ऋते कुटुम्बार्थान् पतिः स्वीकृतं तथा।। (2/46)

(2) उपनिधि विवेचनम्–"पुमानुपनिधिर्न्यासः" उपनिधिर्न्यासश्च धरोहर-निक्षेपस्य नाम वर्तते। याज्ञवल्क्यानुसारम्–

> वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्प्यते।
> द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तत्।। (2/65)

विक्षेपद्रव्यस्य आधारभूतं वासनस्थं यद्द्रव्यं रूपसंख्यादिविशेषमनाख्याय अन्यस्य हस्ते रक्षणार्थं स्थाप्यते, तद् द्रव्यम् 'औपनिधिकम्' इति उच्यते। अतः तादृशम् औपनिधिकम् यस्मिन् स्थापितं तेन यथैव पूर्वमुद्रादिचिह्नितं तथैव स्थापकाय प्रत्यर्पणीयम्। यदि तदुपनिधिः राज्ञा उदकादिना दैवेन तस्करैः वा अपहृतं नष्टं वा तदा न दाप्यो, किन्तु यदि स्वामिना याच्यमानेऽपि न ददाति, तदा तस्योत्तरकाले विनष्टे जाते तद्द्रव्ये, मूल्यकल्पनया धनिने ग्रहीता दाप्यः, राज्ञे च तत्समं दण्डम् प्रतिदेयं भवति। यदि कोऽपि स्वेच्छया उपनिधितं द्रव्यम् आजीवनं व्यवहरति अथवा प्रयोगादिना लाभार्थमसौ उपभोगानुसारेण लाभानुसारेण च दण्ड्यः–
आजीवन् स्वेच्छया दण्ड्यो दाप्यस्तं चापि सोदयम्।

(3) लेखस्य प्रमाणम्–याज्ञवल्क्यस्मृतेः लेख्यप्रकरणे लेखस्य प्रमाणादि विवेचितमस्ति। लिखितं भुक्तिः साक्षिणश्च त्रिविधं प्रमाणं कीर्तितम्। तत्र लिखितं प्रमाणं लेखम्, तद्द्विविधम्–1. शासनम्, 2. जानपदं चेति। जानपदमपि द्विविधम्–1. स्वहस्तकृतम्, 2. अन्यहस्तकृतं चेति। तत्र स्वहस्तकृतमसाक्षिकम् अन्यकृतं ससाक्षिकं च, अनयोश्च देशाचारानुसारेण प्रामाण्यमवलोक्यते यथा–

> लेख्यं तु द्विविधं ज्ञेयं स्वहस्तान्यकृतं तथा।
> असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितैस्तयोः।।

धनिक-अधमर्णयोः यो अर्थो परस्परं स्वरुच्या इयत्काललेनैव एतावद् देयम्, इयती च प्रतिमासं वृद्धिः, इति कालान्तरे वस्तुतत्त्वनिर्णयार्थं साक्षिसंयुक्तं धनिकपूर्वकं च लेख्यम्। तस्मिन् लेखे संवत्सर-मास-पक्ष-तिथ्यादिकपूर्वकं धनिक-अधमर्णयोः नाम-जाति-गोत्रादिकानामपि उल्लेखः तत्र स्यात्, लेखस्य अन्ते अधर्मणः स्वहस्तेन लेख्ये विलिखेत् यत् ममामुकपुत्रस्य मतम् अभिप्रेतम्, यल्लेखेऽस्मिन् उपरि लिखितमस्ति। तदनन्तरं साक्षी तस्मिन् लेखे पितृनाम-लेखनपूर्वकम् अमुकनाम अहम् अस्मिन् अर्थे साक्षी अस्मि इति, स्वहस्तेन एकैकशो लिखेयुः। यदि अधमर्णः साक्षी वा लिपिज्ञो न भवति, तदा अधमर्णो अन्येन साक्षी च साक्ष्यान्तरेण सर्वसाक्षिसन्निधौ स्वमतं लेखयेत्। तदनन्तरं लेखस्य अन्ते लेखकः धनिक अधमर्णिकाभ्यां प्रार्थितेन मया अमुकेन अमुना सूनुना एतल्लेख्यं लिखितमिति अन्ते लिखेत्। यथोच्यते याज्ञवल्क्यस्मृतेः–

> समामासतदर्धाहर्नामजातिस्वगोत्रकैः।
> सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम्।। (2/85)

> समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत्।
> मतं मेऽमुकपुत्रस्य यदत्रोऽपरि लेखितम्।। (2/86)

> साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम्।
> अत्राहममुकः साक्षी लिखेयुरिति ते समाः।। (2/87)

> उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना।
> लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत्।। (2/88)

(4) दिव्यप्रमाणविवेचनम्–याज्ञवल्क्यस्मृतेः दिव्य-प्रमाणं तत् भेदं विवेचितमस्ति। दिव्यप्रमाणं त्रिविधं भवति। यथा–1. लिखितम्, 2. साक्षिः, 3. भुक्तिलक्षणम् इति मनुष्यप्रमाणम्। तदतिरिक्तं यद् मानुषं प्रमाणं तत्तु दिव्यप्रमाणमित्युच्यते। तत्तु तुला-अग्नि-जल-विष-कोशाः इत्युच्यन्ते। एतानि तुलादीनि दिव्यप्रमाणानि अभियुक्तोपरि शीर्षकस्थेऽभियुक्तस्य भवन्ति। शीर्षको शिरो व्यवहारस्य चतुर्थः पादो जय-पराजयलक्षणः तेन च दण्डो लक्ष्यते। राजद्रोह-अभिशंकायां ब्रह्महत्यादिपातक-अभिशंकायां च शिरस्थायिना विनाऽपि तुलादीनि दिव्यप्रमाणानि कुर्यात् महाचौर्याभिशंकायां च। यथोच्यते–

> राजभिः शंकितानां च निर्दिष्टानां च दस्युभिः।
> आत्मशुद्धिपराणां च दिव्यं देयं शिरो विना।।

तत्र पूर्वेद्युः उपोषितम् उदिते भास्करे सचैलं स्नानं दिव्यग्राहिणमाहूय राज्ञः सभ्यानां ब्राह्मणानां च सन्निधौ सर्वाणि दिव्यानि कारयेत् प्राड्विपाकः। यथोक्तम्–

> त्रिरात्रोपोषिताय स्युरेकरात्रोषिताय वा।
> नित्यं दिव्यानि देयानि शुचये चार्द्रवाससे।।

तत्र बालः, वृद्धः, स्त्री, ब्राह्मणः, अन्धः, पंगुः, रोगी च तुलया एव नियम्यते। क्षत्रियस्य कृते अग्निः। वैश्यस्य कृते जलम्। शूद्रस्य कृते विषम् एव दिव्यप्रमाणं भवति। यथोक्तं पितामहेन–

> ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः।
> वैश्यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेत्।।

(5) दिव्यप्रमाणेषु (क) अग्निदिव्यम्, (ख) विषविधिम्, (ग) उदकविधिश्च अवबोधनम्–

(क) अग्निदिव्यम्–याज्ञवल्क्यस्मृतौ कथितमस्ति यत् दिव्यकर्ता अग्निम् अभिलक्ष्य वदेत्–हे अग्ने! त्वं सर्वभूतानां जरायुज-अण्डज-स्वेदज-उद्भिज्जानां शरीराभ्यन्तरे अन्नपानादीनां पाचकत्वेन वर्तसे। हे क्रान्तिदर्शिन्! साक्षिवत् पुण्यपापेभ्यः सत्यं ब्रूहि। तस्य दिव्यकर्तुः एतद् वाक्यानन्तरं प्राड्विपाकः मन्त्रैः अभिमन्त्रितं पञ्चाशत्पलसंमितं अग्निवर्णं तप्तलौहपिण्डं तस्य उभयोः हस्तयोः उपरि निक्षिपेत्। यथा–

तस्येत्युक्तवतो लौहं पञ्चाशत्पलिकं समम्।
अग्निवर्णं न्यसेत्पिण्डं हस्तयोरुभयोरपि॥
(याज्ञ.2/105)

स पुरुषः, तं तप्तायःपिण्डं अञ्जलिना गृहीत्वा सप्तमण्डलानि शनैः शनैः व्रजेत्। तत्र षोडशांगुलप्रमाणं तु मण्डलं बोद्धव्यम्, मण्डलयोः मध्यान्तरालं च षोडशांगुलमेव। ततः अष्टमे मण्डले स्थित्वा नवमे मण्डले तप्तायःपिण्डं त्यक्त्वा, व्रीहिन् कराभ्यां मर्दयित्वा अदग्धहस्तश्चेत् शुद्धिम् आप्नुयात्। यथोच्यते–

स तमादाय सप्तैव मण्डलानि शनैर्व्रजेत्।
षोडशांगुलकं ज्ञेयं मण्डलं तावदन्तरम्॥
(याज्ञ.2/106)

दग्धहस्तश्चेत् अशुद्ध इति सिद्धम्। यस्तु संत्रासात्प्रस्खलन् हस्ताभ्याम् अन्यत्र दहते, तथाप्यशुद्धो न भवति। यदा गच्छतो अन्तराष्टममण्डलाद् अर्वागेव पिण्डः पतति दग्धादग्धत्वे वा संशयः तदा पुनर्हरेत्। यथोक्तम्–

मुक्त्वाग्निं मृदितव्रीहिरदग्धः शुद्धिमाप्नुयात्।
अन्तरा पतिते पिण्डे संदेहे वा पुनर्हरेत्॥
(याज्ञ.22107)

(ख) विषविधिम्–प्राड्विपाकः कृतोपवासो शिवं पूजयित्वा अभियुक्तस्य विषं व्यवस्थाप्य धर्मादिपूजां हवनान्तां विधाय, प्रतिज्ञापत्रं शोध्यस्य शिरसि निधाय विषम् अभिमन्त्रयते, हे विष/ त्वं ब्रह्मणः पुत्रः सत्यधर्मे व्यवस्थितश्चासि। अस्माद् अभिशापाद् त्रायस्व। यदि अभियुक्तः शुद्धः, तर्हि तस्य कृते अमृतरूपो भव। यथोच्यते–

त्वं विप्र ब्रह्मणः पुत्रः सत्यधर्मे व्यवस्थितः।
त्रायस्वास्मादभिशापात्सत्येन भव मेऽमृतम्॥
(याज्ञ.2/110)

एवम् उक्त्वा, अथवा उपर्युक्तमन्त्रेण हिमशैलजं विषं अभिमन्त्र्य स अभियुक्तः तं विषं भक्षयेत्। तच्च भक्षितं विषं यदि वेगैर्विना जीर्यति, तदा स अभियुक्तः शुद्धः भवति। यथोक्तम्–

एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैलजम्।
यस्य वेगैर्विना जीर्येच्छुद्धिं तस्य विनिर्दिशेत्॥
(याज्ञ.2/111)

(ग) उदकविधिम्–हे वरुण! 'सत्येन माम् अभिरक्षय त्वम्' इत्यनेन मन्त्रेण उदकम् अभिमन्त्र्य नाभिप्रमाणोदकस्थितस्य पुरुषस्योरू गृहीत्वा शोध्यो जले निमज्जेत्। निमज्जनसमकालं गते तस्मिन् जविन्येकस्मिन् पुरुषे अन्यो जवी शरपातस्थानस्थितः पूर्वमुक्तम् इषुम् आनीय जले निमग्नांगं यदि पश्यति, तदा स शुद्धो भवति। यथोक्तम्–

सत्येन माऽभिरक्ष त्वं वरुणेत्यभिशप्य कम्।
नाभिदघ्नोदकस्थस्य गृहीत्वोरू जलं विशेत्॥
(याज्ञ.2/108)

समकालमिषुं मुक्तमानीयान्यो जवी नरः।
गते तस्मिन् निमग्नांगं पश्येच्चेच्छुद्धिमाप्नुयात्॥
(याज्ञ.2/109)

(त) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—याज्ञवल्क्यस्मृतौ कियन्ति काण्डानि, कानि च तानि?
   उत्तरम्—त्रीणि काण्डानि, 1. आचारः, 2. व्यवहारः, 3. प्रायश्चित्तम्।
2. **प्रश्नः**— शुक्ल-यजुर्वेदेन सम्बद्धा स्मृतिः का?
   उत्तरम्— याज्ञवल्क्यस्मृतिः।
3. **प्रश्नः**—याज्ञवल्क्यस्मृतेः सम्पूर्णश्लोकसंख्या का:?
   उत्तरम्— 1009 श्लोकाः।
4. **प्रश्नः**—याज्ञवल्क्यस्मृतौ चतुर्दशविद्यानां चर्चा कस्मिन् काण्डे अस्ति?
   उत्तरम्— प्रथमे काण्डे।
5. **प्रश्नः**— स्मृत्यनुसारं कति महायज्ञाः?
   उत्तरम्— (5) पञ्च।
6. **प्रश्नः**—स्मृत्यनुसारं सदाचारस्य कियन्तो नियमाः?
   उत्तरम्— (10) दश नियमाः।

7. **प्रश्नः**—याज्ञवल्क्यस्मृतेः द्वितीयखण्डे कस्य सम्बन्धविचारः प्राप्यते?
   उत्तरम्— धर्मशास्त्र-अर्थशास्त्रयोः।
8. **प्रश्नः**—याज्ञवल्क्यस्मृतौ कतिविधाः पुत्राः वर्णिताः?
   उत्तरम्— (12) द्वादशविधाः।
9. **प्रश्नः**— स्मृत्यनुसारं नरकाः कतिविधाः?
   उत्तरम्— (21) एकविंशतिविधाः।
10. **प्रश्नः**— स्मृत्यनुसारं महापातकानि कानि?
    उत्तरम्— (5) पञ्च।
11. **प्रश्नः**—याज्ञवल्क्यस्मृतौ व्यवहाराध्याये कति प्रकरणानि सन्ति?
    उत्तरम्— 25 प्रकरणानि।
12. **प्रश्नः**—स्मृत्यनुसारं प्रधानधर्म कः?
    उत्तरम्—आचारः परमो धर्मः।
13. **प्रश्नः**—याज्ञवल्क्येन साक्षिणः कतिधा उक्ता?
    उत्तरम्— द्विधा।
14. **प्रश्नः**—अपराधसन्दर्भे याज्ञवल्क्यः दण्डं कतिधा विभक्तवान्?
    उत्तरम्— चतुर्धा।
16. **प्रश्नः**— धर्मस्य सामान्य-लक्षणं किम्?
    उत्तरम्— विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः। हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत॥
17. **प्रश्नः**—याज्ञवल्क्यस्मृतौ व्यवहाराध्याये कति दिव्यप्रयोगाः उल्लिखिताः सन्ति?
    उत्तरम्— 5 पञ्च।
18. **प्रश्नः**—श्रुतिशब्देन गृह्यन्ते/बुध्यन्ते?
    उत्तरम्— (4) वेदाः।
19. **प्रश्नः**—स्मृतिशब्देन किं ज्ञेयम्?
    उत्तरम्—धर्मशास्त्रम्।
20. **प्रश्नः**—धर्मपत्नीजः पुत्रः को भवति?
    उत्तरम्— औरसः।
21. **प्रश्नः**—सगोत्रेण इतरेण वा उत्पन्नः पुत्रः को भवति?
    उत्तरम्— क्षेत्रजः।
22. **प्रश्नः**—गृहे प्रच्छन्न उत्पन्नो पुत्रः भवति–
    उत्तरम्— गूढजः।
23. **प्रश्नः**—कन्यकाजातो पुत्रः को भवति?
    उत्तरम्— कानीनः।
24. **प्रश्नः**—दद्यान्माता वा यम् स पुत्रः किं नामधेयम्?
    उत्तरम्— दत्तकः।
25. **प्रश्नः**—याज्ञवल्क्यमते सामान्यद्रव्यप्रसभहरणम् किम्?
    उत्तरम्— साहसम्।
26. **प्रश्नः**— सम्पूर्ण-याज्ञवल्क्यस्मृतिः कस्मिन् छन्दसि विद्यते?
    उत्तरम्— अनुष्टुप् छन्दे।
27. **प्रश्नः**—याज्ञवल्क्यस्मृतौ व्यवहाराध्याये कति श्लोकाः सन्ति?
    उत्तरम्— 307 श्लोकाः।
28. **प्रश्नः**—त्रिविधदिव्यप्रमाणानि कानि?
    उत्तरम्— 1. लिखितम्, 2. साक्षिः, 3. भुक्तिलक्षणम्।
29. **प्रश्नः**—बालः, वृद्धः, स्त्री, ब्राह्मणः, अन्धः, पंगुः, रोगिणां कृते दिव्यप्रयोगः कः?
    उत्तरम्— तुला।
30. **प्रश्नः**—क्षत्रियस्य कृते दिव्यप्रयोगः कः?
    उत्तरम्— अग्निः।
31. **प्रश्नः**—वैश्यस्य कृते किं नाम दिव्यप्रयोगः?
    उत्तरम्— जलम्।
32. **प्रश्नः**—शूद्रस्य कृते दिव्यप्रयोगः कः?
    उत्तरम्— विषम्।
33. **प्रश्नः**— याज्ञवल्क्यस्मृतौ स्त्रीधर्म कतिधा उक्तम्?
    उत्तरम्— षड्धा।

14

पुराणेतिहासविवेचनम्

(EE-Code-73)

(क) पुराणलक्षणम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

स्त्रीशूद्रद्विजबन्धूनां न वेदश्रवणं मतम्।
तेषामेव हितार्थाय पुराणानि कृतानि च।।
(देवीभागवत)

पुरातनवृत्तान्तकथनरूपमाख्यानं पुराणम्। प्राचीनकाले यन्नवीनमासीत् तदेव पुराणमित्युच्यते। निरुक्तकारानुसारं यत्प्राचीनमपि नवीनमिव प्रतिभाति तदेव पुराणम्। मत्स्यपुराणे कथितं-'पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः' इति। एवं प्रकारेण यद्यपि पुराणस्य विभिन्नानि व्युत्पत्तिलभ्यानि अर्थानि प्रचलन्ति तथाऽपि प्रकृतिदृष्ट्या तस्य लक्षणं भिन्नप्रकारेण परिकल्पितमस्ति। तच्च पञ्चलक्षणात्मकं यथा मत्स्यपुराणे-

सर्गश्चाथ विसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम्।।
(म.पु.43/64)

अर्थात्यत्र जगतः प्रागवस्थामनुक्रम्य विकासक्रमैतिह्यविवरणं सर्गादिरूपेण वाक्यजालं तत्पुराणम्। जगतः सकलवस्तूनामुत्पत्तिः सर्गः। तद्विपरीतो प्रलयः ऋषीणां देवानाञ्च कुलपरम्परावर्णनं वंशः, सृष्टेः कालमानानां मनूनां वर्णनं मन्वन्तरं, महर्षिराजर्षिराज्ञाञ्च चरित्रवंशपरम्परावर्णनं वंशानुचरितम्। श्रीमद्भागवते तु दशलक्षणात्मकं पुराणमिति प्रोक्तं यथा-

सर्गश्चाथ विसर्गश्च वृत्तिः रक्षन्तराणि च।
वंशो वंशानुचरितं संस्था हेतुरपाश्रयः।।
दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः।
केचित् पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया।।
(भाग०पुरा०12/7/20)

अर्थात् पुराणं दशलक्षणं भवति। यथा-1. सर्गः, 2. विसर्गः, 3. वृत्तिः, 4. रक्षा, 5. अन्तराणि, 6. वंशः, 7. वंशानुचरितम्, 8. संस्था, 9. हेतुः, 10. अपाश्रयश्च। पुनश्च श्रीमद्भागवतस्य द्वितीयस्कन्धेऽपि पुराणस्य दशलक्षणमुक्तमस्ति। यथा-

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः।।

अनेन श्लोकेन कथितानि नामानि यथा-1. सर्गः, 2. विसर्गः, 3. स्थानम्, 4. पोषणम्, 5. ऊतयः, 6. मन्वन्तरम्, 7. ईशानुकथा, 8. निरोधः, 9. मुक्तिः, 10. आश्रयश्च। अत्र उभयोः प्रतिपादितानि नामानि असमानेऽपि तेषां भावः समानोऽस्ति।

पुराणानां पर्यालोचनया प्रतीयते यत् प्राचीनकाले जनकल्याणार्थं शास्त्र-सम्बन्धिन्यौ द्वे धारे प्रचलिते आस्ताम्-एका ऋषिधारा, द्वितीया च मुनिधारा। ऋषिभिः वेदं गृहीत्वा तस्य सुरक्षाया भारो गृहीतः। तथा मुनिभिः पुराणं गृहीत्वा प्रवचन-प्रचार-प्रसारस्य च कार्यं कृतम्। कथ्यते यथा मार्कण्डेयपुराणे-

उत्पन्नमात्रस्य पुरा ब्रह्मणोऽव्यक्तजन्मनः।
पुराणभेदान् वेदांश्च मुखेभ्योऽनुविनिसृताः।।
वेदान् सप्तर्षयस्तस्माज्जगृहुस्तस्य मानसाः।
पुराणं जगृहुश्चाद्या मुनयस्तश्च मानसाः।।

(1) **सर्गः- (सृज् + घञ्)** जगतः सकलवस्तूना-

मुत्पत्तिः सर्गः। श्रीमद्भागवतपुराणानुसारं सर्गस्य स्वरूपं निरूप्यते यत्-

अव्याकृत-गुणक्षोभान्महतस्त्रिवृतोऽहमः।
भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते।।
(भाग०पुरा०12/7/11)

अस्य तात्पर्यम्-यदा मूलप्रकृतिलीनः गुणः क्षुब्धः भवति तदा तस्याः महतत्त्वस्य उत्पत्तिर्भवति। तस्मात् सत्त्व-रजस्तमोगुणानाम् अहंकारम् उत्पद्यते। ततो त्रिविधेभ्योऽहंकारेभ्यः पञ्च- तन्मात्राणि एकादश-इन्द्रियाणि पञ्चमहाभूतानि च उत्पद्यन्ते।

(2) **प्रतिसर्गः- (प्रति + सृज् + घञ्)** प्रतिसर्ग इति शब्देन सृष्टेर्लयः (प्रलयस्य सृष्टेः) पुनः उद्भवस्य च वर्णनम् अभीप्यते। अस्य ब्रह्माण्डस्य प्रलयः चतुर्विधः-1. नैमित्तिकः, 2. प्राकृतिकः, 3. नित्यम्, 4. आत्यन्तिकश्चेति। येन प्रकारेण एकस्माद् बीजाद् अपरस्य बीजस्य उत्पत्तिर्भवति तथैव एकस्मात् जीवात् अपरस्य जीवस्य सृष्टिः भवति। परमेश्वरस्य अनुग्रहात् ब्रह्मा चराचरशरीरात्मकोपाधिविशिष्टजीवं सृजति। इयमेव प्रक्रिया विसर्गः इति कथ्यते। श्रीमद्भागवतपुराणानुसारं प्रतिसर्गस्य विसर्गस्य च लक्षणम्-

पुरुषानुगृहीतानामेतेषां वासनामयः।
विसर्गोऽयं समाहारो बीजाद् बीजं चराचरम्।।
(भाग०पु०12/7/12)

नैमित्तिकः प्राकृतिको नित्यं आत्यन्तिको लयः।
संस्थेति कविभिः प्रोक्ता चतुर्धास्य स्वभावतः।।

(3) **वंशलक्षणम्-**(वमति उद्गिरति वम् + श) वंश-शब्देन नृपाणां ऋषीणां देवादीनां च वंशावल्या वर्णनम् इष्टमस्ति। अर्थात् सर्वेषां राज्ञां भूत-भविष्य-वर्तमानकालिकी सन्तानपरम्परा वंशनाम्ना अभिधीयते। श्रीमद्भागवतपुराणानुसारं वंश-लक्षणम् अस्ति-

राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः।
(भाग०पु०12/7/16)

(4) **मन्वन्तरम्- (मनु + अन्तरम्)** मन्वन्तर-शब्देन प्रत्येकस्य मनोः कालः इत्यर्थः, तेषां विविधानां वृत्तानां सुव्यवस्थितम् उल्लेखो वर्णनं च मन्वन्तर-शब्देन अभीष्टं वर्तते। श्रीमद्भागवतपुराणानुसारं मन्वन्तरस्य लक्षणम् अस्ति-

मन्वन्तरे मनुर्देवा मनुपुत्राः सुरेश्वरः।
ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते।।
(भाग०पु०12/7/15)

अर्थात् मनु-देवता-मनुपुत्र-इन्द्र-सप्तर्षि-भगवदंशाश्च इत्यादिभिः युक्तः समयः मन्वन्तरम् इति कथ्यते।

(5) **वंशानुचरितम्-** अत्र त्रिशिष्टवंशोत्पन्नानां नृपादीनां विशदतया विशिष्टं चरितं वर्ण्यते। श्रीमद्भागवतपुराणानुसारं वंशानुचरितस्य लक्षणं अस्ति-

वंशानुचरितं तेषां वृत्तं वंशधराश्च ये।।
(भाग०पु०12/7/16)

वंशानुचरिते सूर्य-चन्द्रादि-वंशजानां राज्ञां तद्वंशधराणां च जीवनचरितं सविस्तरं प्रतिपाद्यते। पुराणेषु वंशानुचरितस्य महती आवश्यकता विद्यते।

श्रीमद्भागवतपुराणे पुराणं दशलक्षणमिति प्रतिपाद्यते। श्रीमद्भागवतपुराणानुसारं दशलक्षणस्य वर्णनं यथा-

पुराणलक्षणं ब्रह्मन् ब्रह्मर्षिभिर्निरूपितम्।
शृणुष्व बुद्धिमाश्रित्य वेदशास्त्रानुसारतः।।
(भाग०पु०12/7/8)

सर्गश्चाथ विसर्गश्च वृत्तिः रक्षान्तराणि च।
वंशो वंशानुचरितं संस्था हेतुरपाश्रयः।
(भाग०पु०12/7/9)

दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः।
केचित् पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया।।
(भाग०पु०12/7/10)

(6) **वृत्तिः-(स्त्री) (वृ + क्तिन्)** – अत्र वृत्तिशब्देन जीवानां कृत्याकृत्यवर्णनम्, भोजनाच्छदनादिकं तेषां जीवन-निर्वाहोपायाः, हेयोपादेयादिकं च निरूप्यन्ते। श्रीमद्-भागवतपुराणे कथ्यते च-

वृत्तिर्भूतानि भूतानां चराणामचराणि च।
कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा।।
(भाग०पु०12/7/13)

तत्र काचिद् वृत्तिः स्वेच्छया स्वीक्रियते, काचिच्च शास्त्रानुसारतः जीविकानिर्वाहार्थं वा।

(7) **रक्षा- (रक्ष् + भावे अ + टाप्)** अत्र वेदादीनां वर्णित-वैदिकधर्माणां च रक्षार्थं विष्णोः अवतारस्य वर्णनं भवति। अवतारग्रहणस्य विष्णोर्वेदसमर्थकानां पुण्यात्मनां

रक्षायाः विरोधिनां संहारस्य च वर्णनं भवति। यथोच्यते श्रीमद्भागवतपुराणे–

रक्षाच्युतावतारेहा विश्वस्यानुयुगे युगे।
तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः।।
(भाग०पु०12/7/14)

(8) **संस्था (सम् + स्था + अङ् + टाप्)** –अत्र संस्थाशब्देन सर्गस्यास्य प्रलयस्य वर्णनम् अभीष्टमस्ति। प्रलयश्च चतुर्विधो भवति–1. नैमित्तिकः, 2. प्राकृतिकः, 3. नित्यः, 4. आत्यन्तिकश्च।

(9) **हेतुः (हि + तुन्) (जन्महेतवः)** –हेतु-शब्देन जीवनस्य ग्रहणं भवति। जीवः संसारसृष्टेः कारणम्। स्वादृष्टबलेन विश्वसृष्टेः तथा प्रलयस्य कारणत्वेन अयं ज्ञायते। अयं अविद्याकर्मकारक इत्युच्यते। अत्र जाग्रत्-स्वप्न-सुषुप्ति-दशानां वर्णनं भवति। तदुक्तं भागवते–

हेतुर्जीवोऽस्य सर्गादिरविद्याकर्मकारकः।
तं चानुशयिनं प्राहुरव्याकृतमुतापरे।।
(भाग०-12/7/18)

(10) **अपाश्रयः**–अपाश्रयशब्देन तुरीयतत्त्वस्य ब्रह्मणो वर्णनम् अभीष्टमस्ति। जीवस्य तिस्रः वृत्तयः सन्ति–जाग्रदवस्था, स्वप्नावस्था, सुषुप्त्यवस्था च। एतासु तिसृषु अवस्थासु चैतन्यं निवसति। जाग्रदवस्थायां चैतन्यं विश्वनाम्ना, स्वप्नावस्थायां सुषुप्त्यवस्थायां च तैजसनाम्ना अभिधीयते। एतासु मायामयवृत्तिषु साक्षिरूपेण तुरीयतत्त्वरूपेण वा यल्लक्ष्यते, तदेव ब्रह्म अत्र अपाश्रयशब्देन प्रोच्यते। उच्यते श्रीमद्भागवतपुराणे–

व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु।
मायामयेषु तद् ब्रह्म जीववृत्तिष्वपाश्रयः।।
(भाग०पु०12/7/19)

एवं पञ्चलक्षणेन दशलक्षणेन च पुराणानां महत्त्वं वैशिष्ट्यं च प्रतिपाद्यते। संस्कृतवाङ्मये पुराणानामतीव गौरवास्पदं स्थानं विद्यते। धार्मिकदृष्ट्या एषां महत्त्वमधिकमस्ति। वेदविहितानां धर्माणां सरलसुबोधभाषायां वर्णनायैव पुराणानि विरचितानि। सत्स्वपि एवंविधेषु बहुविधलक्षणेषु पुराणपञ्चलक्षणेषु एव सर्वेषामन्तर्भावः भवति। यथा– सर्ग-विसर्ग-हेतु-ऊति = आश्रयापाश्रयाणाम्। प्रतिसर्गे संस्था-निरोधयोः। मन्वन्तरे अन्तरस्य। वंशवंशानुचरितयोः वृत्ति-स्थान-रक्षा-पोषण-ईशानुकथनम् अन्तर्भावः।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—पुराणस्य का परिभाषा?
उत्तरम्—पुरातनवृत्तान्तकथनरूपमाख्यानम्।

2. **प्रश्नः**—निरुक्तकारानुसारं पुराणस्य का परिभाषा?
उत्तरम्—यत्प्राचीनमपि नवीनमिव प्रतिभाति तदेव पुराणम्।

3. **प्रश्नः**—मत्स्यपुराणे पुराणस्य का परिभाषा कथिता?
उत्तरम्—पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः इति।

4. **प्रश्नः**—मत्स्यपुराणे पुराणस्य पञ्चलक्षणानि कानि?
उत्तरम्—सर्गश्चाथ विसर्गश्च वंशो मन्वन्तराणि च। वंशानुचरितं चैव पुराणं पञ्चलक्षणम्।।

5. **प्रश्नः**—सर्गश्चाथ विसर्गश्च वृत्तिः रक्षन्तराणि च। वंशो वंशानुचरितं संस्था हेतुरपाश्रयः।। दशभिर्लक्षणैयुक्तं पुराणं तद्विदो विदुः। केचित् पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया।। उक्तश्लोकः कुत्र भणितम्?
उत्तरम्—श्रीमद्भागवतपुराणे।

6. **प्रश्नः**—श्रीमद्भागवते पुराणस्य दशलक्षणानि कानि?
उत्तरम्—1. सर्गः, 2. विसर्गः, 3. वृत्तिः, 4. रक्षा, 5. अन्तराणि, 6. वंशः, 7. वंशानुचरितम्, 8. संस्था, 9. हेतुः, 10. अपाश्रयश्च।

7. **प्रश्नः**—अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः। मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः।। उक्तश्लोकः कुतः उद्धृतः?
उत्तरम्—श्रीमद्भागवतस्य द्वितीयस्कन्धात्।

8. **प्रश्नः**—श्रीमद्भागवतस्य द्वितीयस्कन्धे पुराणस्य कथितानि दशलक्षणानि कानि?
उत्तरम्—1. सर्गः, 2. विसर्गः, 3. स्थानम्, 4. पोषणम्, 5. ऊतयः, 6. मन्वन्तरम्, 7. ईशानुकथा, 8. निरोधः, 9. मुक्तिः, 10. आश्रयश्च।

9. **प्रश्नः**—उभयोः प्रतिपादितानि नामानि असमानेऽपि तेषां भावः कोऽस्ति?
उत्तरम्—समानोऽस्ति।

10. **प्रश्नः**—श्रीमद्भागवतपुराणानुसारं सर्गस्य किं स्वरूपम्?
उत्तरम्—अव्याकृत-गुणक्षोभान्महतस्त्रिवृतोऽहमः। भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते।।

11. **प्रश्नः**—सर्गः इत्यनेन किं ज्ञायते?
उत्तरम्—जगतः सकलवस्तूनामुत्पत्तिः सर्गः।

12. **प्रश्नः**—सत्व-रजस्तमोगुणैः किमुत्पद्यते?
उत्तरम्—अहंकारम्।

13. **प्रश्नः**—त्रिविधेभ्योऽहंकारेभ्यः कानि उत्पद्यन्ते?
उत्तरम्—पञ्च तन्मात्राणि एकादश इन्द्रियाणि पञ्चमहाभूतानि च।

14. **प्रश्नः**—प्रतिसर्गः इति शब्देन किं ज्ञायते?
उत्तरम्—सृष्टेर्लयः (प्रलयस्य सृष्टेः) पुनः उद्भवस्य च वर्णनम्।

15. **प्रश्नः**—ब्रह्माण्डस्य प्रलयः कतिविधः?
उत्तरम्—चतुर्विधः।

16. **प्रश्नः**—चतुर्विधः प्रलयः के सन्ति?
उत्तरम्—1. नैमित्तिकः, 2. प्राकृतिकः, 3. नित्यम्, 4. आत्यन्तिकश्चेति।

17. **प्रश्नः**—कस्य अनुग्रहात् ब्रह्मा चराचर-शरीरात्मकोपाधिविशिष्टजीवं सृजति?
उत्तरम्—परमेश्वरस्य।

18. **प्रश्नः**—श्रीमद्भागवतपुराणानुसारं प्रतिसर्गस्य किं लक्षणम्?
उत्तरम्—नैमित्तिकः प्राकृतिको नित्यं आत्यन्तिको लयः। संस्थेति कविभिः प्रोक्ता चतुर्धास्य स्वभावतः।।

19. **प्रश्नः**—श्रीमद्भागवतपुराणानुसारं विसर्गस्य किं लक्षणम्?
उत्तरम्—पुरुषानुगृहीतानामेतेषां वासनामयः। विसर्गोऽयं समाहारो बीजाद् बीजं चराचरम्।।

20. **प्रश्नः**—श्रीमद्भागवतपुराणानुसारं वंशस्य किं लक्षणम्?
उत्तरम्—राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः।

21. **प्रश्नः**—श्रीमद्भागवतपुराणानुसारं मन्वन्तरस्य किं लक्षणम् अस्ति?
उत्तरम्—"मन्वन्तरे मनुर्देवा मनुपुत्राः सुरेश्वरः। ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते।"

22. **प्रश्नः**—श्रीमद्भागवतपुराणानुसारं वंशानुचरितस्य लक्षणं किम्?
उत्तरम्—वंशानुचरितं तेषां वृत्तं वंशधराश्च ये।

23. **प्रश्नः**—श्रीमद्भागवतपुराणे वृत्तिः इत्यस्य किं लक्षणम्?
उत्तरम्—वृत्तिर्भूतानि भूतानां चराणामचराणि च। कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा।।

24. **प्रश्नः**— श्रीमद्भागवतपुराणे रक्षायाः किं लक्षणम्?
उत्तरम्—रक्षाच्युतावतारेहा विश्वस्यानुयुगे युगे। तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः।।

25. **प्रश्नः**—रक्षाशब्देन किमवबोध्यते?
उत्तरम्—वेदादीनां वर्णित-वैदिकधर्माणां च रक्षार्थं विष्णोः अवतारस्य वर्णनम्।

26. **प्रश्नः**—संस्थाशब्देन किम् अभीष्टमस्ति?
उत्तरम्—सर्गस्यास्य प्रलयस्य वर्णनम्।

27. **प्रश्नः**—श्रीमद्भागवतपुराणे जन्महेतवः लक्षणं किम्?
उत्तरम्—हेतुर्जीवोऽस्य सर्गादिरविद्याकर्मकारकः। तं चानुशयिनं प्राहुरव्याकृतमुतापरे।।

28. **प्रश्नः**—संसारसृष्टेः किं कारणम्?
उत्तरम्—जीवः।

29. **प्रश्नः**—श्रीमद्भागवतपुराणानुसारं अपाश्रयस्य किं लक्षणम् अस्ति?
उत्तरम्—व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु। मायामयेषु तद् ब्रह्म जीववृत्तिष्वपाश्रयः।।

30. **प्रश्नः**—अपाश्रयशब्देन किम् अभीष्टमस्ति?
उत्तरम्—तुरीयतत्त्वस्य ब्रह्मणो वर्णनम्।

31. **प्रश्नः**—जीवस्य तिस्रः वृत्तयः के सन्ति?
उत्तरम्—जाग्रदवस्था, स्वप्नावस्था, सुषुप्त्यवस्था च।

32. **प्रश्नः**—एतासु तिसृषु अवस्थासु किं निवसति?
उत्तरम्—चैतन्यम्।

33. **प्रश्नः**—जाग्रदवस्थायां चैतन्यं केन नाम्ना ज्ञायते?
उत्तरम्—विश्वनाम्ना।

34. **प्रश्नः**—स्वप्नावस्था सुषुप्त्यवस्था च केन नाम्ना अभिधीयते?
उत्तरम्—तैजसनाम्ना।

35. **प्रश्नः**—सर्ग-विसर्ग-हेतु-ऊति इति केषामन्तर्भावः?
उत्तरम्—आश्रयापाश्रयाणाम्।

36. **प्रश्नः**—प्रतिसर्गे-संस्था कयोः अन्तर्भावः?
उत्तरम्—निरोधयोः।

37. प्रश्नः—मन्वन्तरे कस्य अन्तर्भावः?
उत्तरम्—अन्तरस्य।

38. प्रश्नः—वंशवंशानुचरितयोः केषाम् अन्तर्भावः?
उत्तरम्—वृत्ति-स्थल-रक्षा-पोषण-ईशानुकथनम्।

39. प्रश्नः—प्राचीनकाले जनकल्याणार्थं शास्त्र-सम्बन्धिन्यौ के द्वे धारे प्रचलिते आस्ताम्?
उत्तरम्—एका ऋषिधारा, द्वितीया च मुनिधारा।

40. प्रश्नः—ऋषिभिः कं गृहीत्वा तस्य सुरक्षाया भारो गृहीतः?
उत्तरम्—वेदम्।

41. प्रश्नः—मुनिभिः कं गृहीत्वा प्रवचन-प्रचार-प्रसारस्य च कार्यं कृतम्?
उत्तरम्—पुराणम्।

(ख) पुराणभेदाः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

पुराणस्य पञ्च भेदाः सन्ति—1. महापुराणानि, 2. पुराणानि, 3. उपपुराणानि, 4. पुराणसंहिता, 5. इतिहासश्चेति। गुणसंख्याकालाधारेण पुराणानि त्रिधा विभज्यन्ते। संख्यायां अष्टादशपुराणानीति प्रतिपादितं देवीभागवते आद्याक्षरेण यथा—

म-द्वयं भ-द्वयं चैव ब्र-त्रयं व-चतुष्टयम्।
अ-ना-प-लिङ्ग-कू-स्कानि पुराणानि प्रचक्षते॥

विष्णुपुराणानुसारम् अष्टादशपुराणानि सन्ति यथा—

ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा।
तथान्यन्नारदीयं च मार्कण्डेयं च सप्तमम्॥
आग्नेयमष्टमञ्चैव भविष्यं नवमं तथा।
दशमं ब्रह्मवैवर्त्तं लैङ्गमेकादशं स्मृतम्॥
वाराहं द्वादशं चैव स्कन्दं चात्र त्रयोदशम्।
चतुर्दशं वामनकं कौर्मं पञ्चदशं तथा॥
मत्स्यं च गारुडं चैव ब्रह्माण्डञ्च ततः परम्।
महापुराणान्येतानि ह्यष्टदश महामुने॥
(विष्णुपुराणे-3/6221-24)

अष्टादशपुराणेषु प्रथमं ब्रह्मपुराणम् अन्तिमं ब्रह्माण्डपुराणं मध्ये ब्रह्मवैवर्तपुराणं च विद्यते। एतेन इदं अवबोध्यते यत् सृष्ट्यादौ ब्रह्मण एव आविर्भूय सर्वमिदं जगत् प्रलये ब्रह्मणि एव लीयते। ब्रह्मसृष्टिं विवर्णयन्ति एतानि महापुराणानि ब्रह्मणः आरभ्य अस्माकं ज्ञानं ब्रह्मपर्यन्तं समुपस्थापयन्ति। अत एवोक्तं हरिवंशपर्वणि—"**आदौ अन्ते च मध्ये च हरिः सर्वत्र गीयते**" इति। अष्टादशपुराणेषु एक एव भगवान् नारायणो विराजते। उच्यते यथा—

अष्टादशपुराणेषु दशभिर्गीयते शिवः।
चतुर्भिर्भगवान् ब्रह्मा द्वाभ्यां देवी तथा हरिः॥

एतान्येवाष्टदशपुराणाणि गुणाधारेण (देवस्तुत्याधारेण वा) सत्वरजस्तमस्संकीर्णभेदात् विभज्यते। तत्र विष्णुस्तुतिपरकानि विष्णुभागवतनारदगरुडादीनि सात्त्विकानि। ब्रह्मस्तुतिपरकानि ब्रह्मपद्मब्रह्मवैवर्तादीनि राजसिकपुराणानि। शिवस्तुतिपरकानि शिवमत्स्यकूर्मलिङ्गस्कन्दादीनि तामिसकपुराणानि। महापुराणपुराणोपपुराणपुराणसंहितेतिहासभेदात् पुराणानां पञ्च भेदाः विधीयन्ते। कालक्रमानुसारेणापि वायुब्रह्माण्डादीनि प्राचीनानि, भागवतकूर्मस्कन्दादीनि मध्यकालीनानि, अग्निविष्णुनारदपुराणानि अर्वाचीनानीति समालोचकैः निर्णीयन्ते। अत्र सात्त्विकानि पुराणानि मोक्षप्रदानि भवन्ति। राजसानि स्वर्गप्रदानि भवन्ति। तामसानि च पुराणानि नरकप्रदानि भवन्ति। कथ्यते यथा—

सात्त्विका मोक्षदाः प्रोक्ताः राजसाः स्वर्गदाः शुभाः।
तथैव तामसाश्चेति निरयप्राप्तिहेतवः॥
(उ०ख० 236/21)

पुराणानां भेदपरिचयः एवं श्लोकसंख्याः—

1. मत्यपुराणे-14000 श्लोकाः,
2. मार्कण्डेयपुराणे-9000 श्लोकाः,
3. भविष्यपुराणे-24, 500श्लोकाः,
4. भागवतपुराणे-18, 000 श्लोकाः,
5. ब्रह्माण्डपुराणे-12, 200श्लोकाः,
6. ब्रह्मपुराणे-13, 000 श्लोकाः,
7. ब्रह्मवैवर्तपुराणे-18, 000 श्लोकाः,
8. वामनपुराणे-10, 000 श्लोकाः,
9. वराहपुराणे-24, 000श्लोकाः,
10. विष्णुपुराणे-23, 000श्लोकाः,
11. वायुपुराणे-24, 000श्लोकाः,
12. अग्निपुराणे-16, 000श्लोकाः,

13. नारदपुराणे-25, 000श्लोकाः,
14. पद्मपुराणे-55, 000श्लोकाः,
15. लिङ्गपुराणे-11, 000श्लोकाः,
16. गरुडपुराणे-18, 000 श्लोकाः,
17. कूर्मपुराणे-18, 000श्लोकाः,
18. स्कन्दपुराणे-81, 100 श्लोकाः।

अष्टादश-उपपुराणानि—

1. सनत्कुमार, 2. नारसिंह, 3. स्कान्द, 4. शिवधर्म, 5. आश्चर्य, 6. नारदीय, 7. कापिल, 8. वामन, 9. औशनस, 10. ब्रह्माण्ड, 11. वारुण, 12. कालिका, 13. माहेश्वर, 14. साम्ब, 15. सौर, 16. पराशर, 17. मारीच, 18. भार्गव। देवीभागवते स्कन्दस्थाने शिवः, वामन-मानवः, ब्रह्माण्डः-आदित्यः, मारीचः-भागवतः, भागवतः-वसिष्ठः (एतन्नामपञ्चकम्)।

वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—गुणसंख्याकालाधारेण पुराणानि कतिधा विभज्यन्ते?
उत्तरम्—त्रिधा।

2. प्रश्नः—देवीभागवते आद्याक्षरेण संख्यायां अष्टदशपुराणानि कानि?
उत्तरम्—म-द्वयं भ-द्वयं चैव ब्र-त्रयं व-चतुष्टयम्।
अ-ना-प-लिङ्ग-कू-स्कानि पुराणानि प्रचक्षते॥

3. प्रश्नः—विष्णुपुराणानुसारम् अष्टादशपुराणानि कानि सन्ति?
उत्तरम्—ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं यथा।
तथान्यन्नारदीयं च मार्कण्डेयं च सप्तमम्॥
आग्नेयमष्टमञ्चैव भविष्यं नवमं तथा।
दशमं ब्रह्मवैवर्त्तं लैङ्गमेकादशं स्मृतम्॥
वाराहं द्वादशं चैव स्कन्दं चात्र त्रयोदशम्।
चतुर्दशं वामनकं कौर्मं पञ्चदशं तथा॥
मत्स्यं च गारुडं चैव ब्रह्माण्डञ्च ततः परं।
महापुराणान्येतानि ह्यष्टदश महामुने॥

4. प्रश्नः—अष्टादशपुराणेषु प्रथमं पुराणं किम्?
उत्तरम्—ब्रह्मपुराणम्।

5. प्रश्नः—अष्टादशपुराणेषु अन्तिमं पुराणं किम्?
उत्तरम्—ब्रह्माण्डपुराणम्।

6. प्रश्नः—अष्टादशपुराणेषु मध्ये किं पुराणम्?
उत्तरम्—ब्रह्मवैवर्तपुराणं च।

7. प्रश्नः—सृष्ट्यादौ ब्रह्मण एव आविर्भूय सर्वमिदं जगत् प्रलये कस्मिन् लीयते?
उत्तरम्—ब्रह्मणि।

8. प्रश्नः—महापुराणानि किं विवर्णयन्ति?
उत्तरम्—ब्रह्मसृष्टिम्।

9. प्रश्नः—महापुराणानि ब्रह्मणः आरभ्य अस्माकं ज्ञानं कियत् पर्यन्तं समुपस्थापयन्ति?
उत्तरम्—ब्रह्म-पर्यन्तम्।

10. प्रश्नः—**आदौ अन्ते च मध्ये च हरिः सर्वत्र गीयते** इति कुत्र कथ्यते?
उत्तरम्—हरिवंशपर्वणि।

11. प्रश्नः—अष्टादशपुराणेषु एक एव कः विराजते?
उत्तरम्—भगवान् नारायणः।

12. प्रश्नः—अष्टादशपुराणेषु दशभिः कः गीयते?
उत्तरम्—शिवः।

13. प्रश्नः—अष्टादशपुराणेषु चतुर्भिः कः गीयते?
उत्तरम्—भगवान् ब्रह्मा।

14. प्रश्नः—अष्टादशपुराणेषु द्वाभ्यां के गीयते?
उत्तरम्—देवी तथा हरिः।

15. प्रश्नः—अष्टादशपुराणानि गुणाधारेण (देवस्तुत्याधारेण वा) कस्मात् भेदात् विभज्यते?
उत्तरम्—सत्त्व-रजः-तमःसंकीर्णभेदात्।

16. प्रश्नः—विष्णुस्तुतिपरकानि विष्णुभागवतनारदगरुडादीनि कानि?
उत्तरम्—सात्त्विकानि।

17. प्रश्नः—ब्रह्मस्तुतिपरकानि ब्रह्मपद्मब्रह्मवैवर्तादीनि कानि?
उत्तरम्— राजसिकपुराणानि।

18. प्रश्नः—शिवस्तुतिपरकानि शिवमत्स्यकूर्मलिङ्ग-स्कन्दादीनि कानि?
उत्तरम्—तामिसकपुराणानि।

19. प्रश्नः—महापुराणपुराणोपपुराणपुराणसंहितेतिहासभेदात् पुराणानां कति भेदाः विधीयन्ते?
उत्तरम्—5 पञ्च।

20. **प्रश्नः**—कालक्रमानुसारेण प्राचीनानि पुराणानि कानि?
उत्तरम्—वायुब्रह्माण्डादीनि।

21. **प्रश्नः**—कालक्रमानुसारेण मध्यकालीनानि पुराणानि कानि?
उत्तरम्—भागवतकूर्मस्कन्दादीनि।

22. **प्रश्नः**—कालक्रमानुसारेण अर्वाचीनानि पुराणानि कानि?
उत्तरम्—अग्निविष्णुनारदपुराणानि।

23. **प्रश्नः**—सात्त्विकानि पुराणानि किं प्रदानि सन्ति?
उत्तरम्—मोक्ष-प्रदानि।

24. **प्रश्नः**—राजसानि पुराणानि किं प्रदानि सन्ति?
उत्तरम्—स्वर्गप्रदानि।

25. **प्रश्नः**—तामसानि पुराणानि किं प्रदानि सन्ति?
उत्तरम्—नरकाणि।

26. **प्रश्नः**—पं.बलदेवोपाध्यायेन पुराणानां कति श्रेण्यः कृताः?
उत्तरम्— तिस्रः। प्राचीनं पुराणं, मध्यकालीनं पुराणं, अर्वाचीनं पुराणम्।

26. **प्रश्नः**—अष्टादश-उपपुराणानि कानि सन्ति?
उत्तरम्—1. सनत्कुमार, 2. नारसिंह, 3. स्कान्द, 4. शिवधर्म, 5. आश्चर्य, 6. नारदीय, 7. कापिल, 8. वामन, 9. औशनस, 10. ब्रह्माण्ड, 11. वारुण, 12. कालिका, 13. माहेश्वर, 14. साम्ब, 15. सौर, 16. पराशर, 17. मारीच, 18. भार्गव।

(ग) भुवनकोशः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

भवन्त्यस्मिन्भूतानीति भुवनम्। पुराणेषु भौगोलिकदृष्ट्या ब्रह्माण्डे संस्थितानां भूर्भुवादिसप्तसत्त्वगुणबहुलानां ऊर्ध्वलोकानां अतलवितलादिसप्ततमोगुणबहुलानां अधःस्थितानां आहत्य चतुर्दशभुवनानां, तेषां स्थितिविस्तृतिवर्णनं भूगोले च स्थितानां वर्षद्वीपनदीसागरपर्वतादीनां विस्तृतया पर्यालोचनमेव भुवनकोशनाम्नाभिधीयते। एतदतिरिच्य भुवनकोशे ग्रहनक्षत्रताराणां सप्तविधवायुनाम्, रत्नादीनाञ्च वर्णनमवलोक्यते। विशिष्टतया भूलोके मेरुपर्वतस्थितिः, ततः पूर्वादिक्रमेण भद्राश्वजम्बूकेतुमालकुरूमहाद्वीपानां द्वीपेषु वर्षाणां यथा जम्बूद्वीपे भारतवर्षस्य तत्र च स्थितिः जम्बूप्लक्षशाल्मकुशक्रौञ्चादिसप्तद्वीपानां सीताचक्षुभद्रागङ्गालकनंदासिन्धुरादीनां नदीनां लवणेक्षुरसादिवेष्टितसमुद्राणां नानाविधवृक्षाणाञ्च सङ्कलनमेव भुवनकोशे भौगोलिकदृष्ट्या पर्यालोच्यते। यथा देवीभागवते–

> **सप्तद्वीपैः सप्तनाकैः सप्तपातालसंज्ञकैः।**
> **एभिर्लोकैश्च ब्रह्माण्डं ब्रह्मादिकृतमेव च॥**

चतुर्दशभुवनेषु ऊर्ध्वलोके षड्लोकाः आगच्छन्ति। ते यथा–1. सत्यलोकः, 2. तपोलोकः, 3. जनलोकः, 4. महर्लोकः, 5. स्वर्लोकः, 6. भुवर्लोकः। मध्यलोके–एकः 7. भूलोकः। ऊर्ध्वस्था सप्त लोकाः सत्त्वमयाः सन्ति, यत्र देवगणास्तिष्ठन्ति। अधःलोके 8. अतलः, 9. वितलः, 10. सुतलः, 11. तलातलः, 12. रसातलः, 13. महातलः, 14. पातालः आगच्छन्ति। तत्र अधस्तनाः सप्त लोकास्तमोगुणबहुला विद्यन्ते, यत्र असुरा एव केवलं निवसन्ति। एतेषु सर्वेषु भुवनेषु पाताललोकः स्वर्गलोकादपि सुन्दरमस्ति। एष लोकः सूर्यचन्द्रमसोः विद्यमानत्वात् प्रकाशमयः कान्तिमान् च। अत्र विष्णोः तामसीतनुः अनन्तः निवसति, एवं सः स्वकीयफणिमणीनां किरणैः दशदिशं प्रकाशयति। कथितं यथा ब्रह्मपुराणे–

> **स्वर्लोकादपि रम्याणि पातालानीति नारदः।**
> **प्राह स्वर्गसदो मध्ये पातालेभ्यो गतो दिनम्॥**
> (ब्रह्म–21/5)

चतुर्दशभुवनानां पर्यालोचनम् एव भुवनकोश इत्युच्यते। तत्र स्वायम्भुवमन्वन्तरस्य शुभसृष्टिः, त्रैलोक्यमण्डलस्य वर्णनम्। अर्थात् सागर-द्वीप-वर्ष-पर्वत-वन-नदीनां वर्णनञ्च अन्तर्भवन्ति। कूर्मपुराणाधारेण भूलोक-भुवर्लोकः-स्वर्लोकः-महर्लोकः-जनलोकः-तपोलोकः-सत्यलोकः एते सप्तलोकाः अण्डोद्भवाः सन्ति। यावत् स्थानं सूर्यचन्द्रमसोः किरणं गच्छति तत्स्थानं भूलोक इत्युच्यते। सूर्यस्य परिमण्डलात् यावत् भूलोकस्य विस्तारः, तावत् भुवर्लोकस्यापि विस्तारः। आकाशस्य ऊर्ध्वभागे यत्र ध्रुवनक्षत्रः विद्यते भुवर्लोकादारभ्य तद् ध्रुवनक्षत्रं यावत् विस्तृतं स्थानं स्वर्लोक इति कथ्यते। ध्रुवनक्षत्रात् एककोटियोजनविस्तारात्मकः महर्लोकः। तत्र कल्पस्याधिकारीगणाः निवसन्ति। महर्लोकादूर्ध्वं

कोटिद्वयात्मकः जनलोकः। तत्र ब्रह्मणः मानसपुत्राः सनन्दनादयः निवसन्ति। एवं जनलोकादूर्ध्वं कोटित्रयसमन्वितः लोकः तमोलोकः। तत्र दाहरहितः वैराजनाम देवता निवसति। तमोलोकादूर्ध्वं कोटिषट्केन संयुक्तः सत्यलोकः। तत्र अपुनर्मारकाः निवसन्ति। सः ब्रह्मलोक इत्युच्यते। तत्र योगामृतं पीत्वा विश्वतोमुखः विश्वात्मा योगिभिस्सह निवसन्ति। भूभागस्य अधः महातलादयः सप्तपातालाः वर्तन्ते। तत्र महातलः नानारत्नैः शोभितोऽस्ति। तत्र अनेकानि शुभ्रदेवमन्दिराणि सन्ति। तत्र अनन्तनागः, धीमान मुचुकुन्ददेवः, बलिश्च निवसति। रसातलः शैलमयः, तलातलः शर्करामयः, सुतलः पीतवर्णः, नितलः विद्रुम इव वर्णयुक्तः, वितलः श्वेतवर्णः, तलः कृष्णवर्णात्मकः वर्तते। एतेषु पातालेषु गरुड-वासुकि-विरोचन-हिरण्याक्ष-तक्षक-वैनतेय-कालनेमी-तारक-अग्निमुख-अन्तक-प्रह्लाद-कम्बल-नागराज-महाजृम्भ-हयग्रीव-शङ्कुकर्ण-नमुचि-इत्यादयः निवसन्ति।

भूलोकः नानाविधैः द्वीपैः, नदिभिः, सागरैः, महासागरैः, पर्वतैश्च परिव्याप्तोऽस्ति। महात्माप्रजापतेः हिरण्मयमेरुपर्वतं गर्भः, समुद्रम् तस्माद् गर्भान्निष्पन्दमानम् उदकम्, शिरःस्थानि पर्वताः सन्ति। पुराणपरम्परानुसारं मेरुपर्वतः इलावृतस्य मध्यभागे वर्तते। तस्य पर्वतस्य चतुर्पार्श्वे चत्वारः पर्वताः सन्ति। यथोच्यते वायुपुराणे–

> **अव्यक्तात् पृथिवीपद्मं मेरुपर्वतकर्णिकाम्।**
> (वायु०पु०34/37)

> **हिरण्मयस्तु यो मेरुस्तस्योत्थं तन्महात्मनः।**
> **गर्भोदकं समुद्राश्चः सिराद्यस्थीनि पर्वताः॥**
> (वायु०पु०5/80)

सप्तद्वीपा वसुमतीति यथा–1. जम्बूद्वीपः, 2. प्लक्षद्वीपः, 3. शाल्मलिद्वीपः, 4. कुशद्वीपः, 5. क्रौञ्चद्वीपः, 6. शकद्वीपः, 7. पुष्करद्वीपः। अत्र जम्बूद्वीप एव अस्माकं भारतवर्षम्।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—भुवनम् इत्यस्य का व्युत्पत्तिः?
उत्तरम्—भवन्त्यस्मिन्भूतानीति।

2. **प्रश्नः**—पुराणदृष्ट्या ब्रह्माण्डे कति भुवनानि सन्ति?
उत्तरम्—चतुर्दशभुवनानि।

3. **प्रश्नः**—पुराणं केषां परिप्रकाशकम्?
उत्तरम्—आध्यात्मिकचेतना-भूगोलविज्ञान-वास्तुविद्या-ज्योतिष-सामुद्रिकशास्त्र-धनुर्विद्यादीनाम्।

4. **प्रश्नः**—भुवनकोशनामकः एकः पक्षः किम्?
उत्तरम्—भूगोलशास्त्रम्।

5. **प्रश्नः**—पुराणेषु भौगोलिकदृष्ट्या ब्रह्माण्डे संस्थितानां चतुर्दशभुवनानि कानि?
उत्तरम्—भूर्भुवादिसप्तसत्त्वगुणबहुलानां ऊर्ध्वलोकानां अतलवितलादिसप्ततमोगुणबहुलानां अधःस्थितानां आहत्य।

6. **प्रश्नः**—भूगोले स्थितानां भुवनकोशानां केषां स्थितिविस्तृतिवर्णनम्?
उत्तरम्—वर्षद्वीपनदीसागरपर्वतादीनाम्।

7. **प्रश्नः**—एतदतिरिच्य भुवनकोशे केषां वर्णनमवलोक्यते?
उत्तरम्—ग्रहनक्षत्रताराणां सप्तविधवायूनाम्, रत्नादीनाञ्च विशिष्टतया भूलोके मेरुपर्वतस्थितिः।

8. **प्रश्नः**—देवीभागवते भुवनकोशविषये किं कथितमस्ति?
उत्तरम्—सप्तद्वीपैः सप्तनाकैः सप्तपातालसंज्ञकैः। एभिर्लोकैश्च ब्रह्माण्डं ब्रह्मादिकृतमेव च॥

9. **प्रश्नः**—चतुर्दशभुवनेषु ऊर्ध्वलोके के लोकाः सन्ति?
उत्तरम्—षड्लोकाः।

10. **प्रश्नः**—चतुर्दशभुवनेषु ऊर्ध्वलोके षड्लोकाः के सन्ति?
उत्तरम्—1. सत्यलोकः, 2. तपोलोकः, 3. जनलोकः, 4. महर्लोकः, 5. स्वर्लोकः, 6. भुवर्लोकः।

11. **प्रश्नः**—चतुर्दशभुवनेषु मध्यलोके को लोकः वर्तते?
उत्तरम्—भूलोकः।

12. **प्रश्नः**—चतुर्दशभुवनेषु अधःलोके के लोकाः सन्ति?
उत्तरम्—8. अतलः, 9. वितलः, 10. सुतलः, 11. तलातलः, 12. रसातलः, 13. महातलः, 14. पातालः।

13. **प्रश्नः**—सर्वोच्चभागः को लोकः?
उत्तरम्—सत्यलोकः।

14. **प्रश्नः**—सर्वनिम्नभागः को लोकः?
उत्तरम्—पातालः।

15. **प्रश्नः**—सर्वेषु भुवनेषु स्वर्गलोकादपि सुन्दरो लोकः कः?
उत्तरम्—पाताललोकः।

16. **प्रश्नः**—ऊर्ध्वस्थेषु सत्त्वमयेषु सप्त-लोकेषु के तिष्ठन्ति?
उत्तरम्—देवगणाः।

17. **प्रश्नः**—अधस्तनेषु तमोगुणबहुलेषु सप्त-लोकेषु के निवसन्ति?
उत्तरम्—असुराः।

18. **प्रश्नः**—चतुर्दशभुवनानां पर्यालोचनं किमुच्यते?
उत्तरम्—भुवनकोशः।

19. **प्रश्नः**—भुवनकोशेषु केषां वर्णनमन्तर्भवन्ति?
उत्तरम्—सागर-द्वीप-वर्ष-पर्वत-वन-नदीनां च।

20. **प्रश्नः**—अण्डोद्भवाः सप्तलोकाः के सन्ति?
उत्तरम्—भूलोक-भुवर्लोकः-स्वर्लोकः-महर्लोकः-जनलोकः-तपोलोकः-सत्यलोकः।

21. **प्रश्नः**—यावत् स्थानं सूर्यचन्द्रमसोः किरणं गच्छति तत्स्थानं किम्?
उत्तरम्—भूलोकः।

22. **प्रश्नः**—भुवर्लोकादारभ्य ध्रुवनक्षत्रं यावत् विस्तृतं स्थानं कस्य?
उत्तरम्—स्वर्लोकस्य।

23. **प्रश्नः**—ध्रुवनक्षत्रात् एककोटियोजनविस्तारात्मकः को लोकः?
उत्तरम्—महर्लोकः।

24. **प्रश्नः**—महर्लोके के निवसन्ति?
उत्तरम्—कल्पस्थाधिकारिगणाः।

25. **प्रश्नः**—जनलोकादूर्ध्वं कोटित्रिकेन संयुक्तः लोकः कः?
उत्तरम्—सत्यलोकः।

26. **प्रश्नः**—भूम्यस्य अधः के सन्ति?
उत्तरम्—महातलादयः सप्तपातालाः।

27. **प्रश्नः**—महातलस्य का विशेषता?
उत्तरम्—नानारत्नैः शोभितः, अनेकानि शुभ्रदेवमन्दिराणि।

28. **प्रश्नः**—महातले के निवसन्ति?
उत्तरम्—अनन्तनागः, धीमान् मुचुकुन्ददेवः, बलिश्च।

29. **प्रश्नः**—शैलमयः कः?
उत्तरम्—रसातलः।

30. **प्रश्नः**—शर्करामयः कः?
उत्तरम्—तलातलः।

31. **प्रश्नः**—सुतल-लोकस्य कः वर्णः?
उत्तरम्—पीतवर्णः।

32. **प्रश्नः**—विद्रुम इव वर्णयुक्तः कः?
उत्तरम्— नितलः।

33. **प्रश्नः**—वितल-लोकस्य वर्णः कः?
उत्तरम्—श्वेतवर्णः।

34. **प्रश्नः**—कृष्णवर्णात्मकस्य लोकस्य किं नाम?
उत्तरम्—तलः।

35. **प्रश्नः**—अधःलोकपातालेषु के निवसन्ति?
उत्तरम्—गरुड-वासुकि-विरोचन-हिरण्याक्ष-तक्षक-वैनतेय-कालनेमी-तारक-अग्निमुख-अन्तक-प्रह्लाद-कम्बल-नागराजः-महाजृम्भ-हयग्रीव-शङ्कुकर्ण-नमुचि-इत्यादयः।

36. **प्रश्नः**—पुराणपरम्परानुसारं मेरुपर्वतः इलावृत्तस्य कस्मिन् भागे वर्तते?
उत्तरम्—मध्यभागे।

37. **प्रश्नः**—सप्तद्वीपा वसुमतीत्यनेन के ज्ञायते?
उत्तरम्—1. जम्बूद्वीपः, 2. प्लक्षद्वीपः, 3. शाल्मलिद्वीपः, 4. कुशद्वीपः, 5. क्रौञ्चद्वीपः, 6. शकद्वीपः, 7. पुष्करद्वीपः।

38. **प्रश्नः**—अस्माकं भारतस्य अवबोधनं केन द्वीपेन भवति?
उत्तरम्—जम्बूद्वीपेन।

(घ) राजधर्मः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

'ब्रह्मणः बाहुजातस्य क्षत्रियस्य क्षात्रधर्म एव राजधर्मः' इति कथ्यते। प्रजानां रक्षैव क्षत्रियस्य परमो धर्मः। प्रजारक्षानिमित्तं राज्ञा शत्रवः जेतव्याः। नानायज्ञैः अग्निचयनं कार्यम्। वैराग्ये च सति वयोमध्ये तदन्ते वा वनं गन्तव्यम्। तच्च–

प्रजानां रक्षणं दानमिज्याध्ययनमेव च।
विषयेष्वप्रसक्तिश्च क्षात्रधर्मसमासतः॥
राज्ञो जेतव्याः शत्रवश्चोद्धताश्च
सम्यक् कर्त्तव्यं पालनं च प्रजानाम्।
अग्निश्चेयो बहुभिश्चापि यज्ञै-
रन्त्ये मध्ये वा वनमाश्रित्य स्थेयम्॥
(महाभारत)

अतः बाह्यान्तरशत्रुभिः प्रजारक्षणम्, दानं यज्ञोऽध्ययनम्, विषयेष्वनासक्तिश्चेति प्रमुखाः राजधर्माः। गीतायामपि शौर्यतेजधृत्यादिगुणोपेतो एव राजा, यथा–

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्मस्वभाजनम्॥

पुराणेष्वपि कामक्रोधलोभहर्षादीन् प्रत्ययान् विहाय धर्मन्यायदण्डनीतिभिः सम्पूर्णां प्रजां पुत्रमिव परिपालनमेव राजधर्मः। क्षत्रियः देवदुर्ल्लभलोकान् प्राप्य दिव्यसुखं लभते। राजा युद्धक्षेत्रे कथमपि बालं, वृद्धं, श्रान्तं, भीतं, शस्त्ररहितं शत्रुं, क्रन्दन्तं, युद्धविमुखं, साधनरहितम्, उद्यमरहितं, रोगिणं च नैव हिंस्यात्। केवलं युद्धसाधनयुक्तं प्रस्तुतमात्मतुल्यं च शत्रुं क्षत्रियः जेतुं प्रयतेत। प्रजारक्षणं, दानं, यज्ञोऽध्ययनं विषयेषु अनासक्तिश्च क्षात्रधर्माः भवन्ति।

गरुडपुराणानुसारं सादरं राजा काम-क्रोध-लोभ-मोह-हर्षादीन् प्रयत्नेन वर्जयेत्। राजा नात्युग्रो नातिनम्रः, अतः सामदानदण्डभेदनीतीषु कुशलः भवेत्। आमात्यमन्त्रीभिः राज्यस्थितिं विगण्य्य धर्मेण क्षितिं परिपालयन् राजा षष्ठांशः कररूपेण गृह्णीयात्। यथोच्यते–

राज्यं पालयते नित्यं सत्यधर्मपरायणः।
निर्जित्य परसैन्यानि क्षितिं धर्मेण पालयेत्॥
(गरूडपुराणे)

रागी राजसिकं स्वर्ग्यं कुरुते कर्म रागतः।
रागान्धाश्च राजसिकास्तेन राजा प्रकीर्तितः॥
(विष्णुपुराणे)

राजा स्वयं प्रयत्नेन षडङ्गस्य राज्यस्य रक्षां कुर्यात्। राजा लोकद्वयापेक्षी मृदुः कठोरो वा भवेत्। राजा सर्वदा सत्यधर्मपरायणो भूत्वा परसैन्यानि निर्जित्य धर्मेणैव क्षितिं पालयेत्। स तु धर्मात्मा पार्थिवो विजितेन्द्रियः सन् विष्णुमभ्यर्च्य गोब्राह्मणहिते रतः सन् प्रजाः पालयेत्। यस्तु परदारेषु मातृवत्, परद्रव्येषु लोष्टवत्, सर्वभूतेषु च आत्मवत् पश्यति स एव राजा पण्डितः। राजानं सुखे दुःखे च समो भवेत्। साधून्, ज्ञातकुलशीलांश्च जनान् नृपः मन्त्रिरूपेण नियोजयेत्। राजा जितेन्द्रियः सन् गोपनेन स्वकर्म कुर्यात्। वेदादिशास्त्र-सुनिश्चितान् ब्राह्मणान् स राजाऽपि पूजयेत्। वेदविदः शुचीन् वृद्धान् विप्रान् नित्यं सेवेत। संग्रामेष्वनिवर्तित्वं प्रजानां परिपालनं ब्राह्मणानां शुश्रूषा चैतानि त्रीणि कर्माणि राज्ञां परं श्रेयःसाधकानि। स च अर्थान् वकवच्चिन्तयेत्, सिंहवत्पराक्रमे, वृकवत् विलिम्पेत, शशवच्च विनिक्षिपेत्तथा शुकवत् दृढप्रहरी च भवेत्।

मनुस्मृत्यनुसारमुतमो राजा सर्वदा प्रातरुत्थाय वेदविदः शुचीन् ब्राह्मणान् सेवेत तथा तदाज्ञां पालयेत्। राजा सर्वदा जितेन्द्रियः सन् तिष्ठेत्, यतो हि जितेन्द्रियो राजा प्रजाः वशे स्थापयितुं शक्नोति। एवं च राजा अष्टादशव्यसनानि विवर्जयेत्। तेषु कामजन्येषु व्यसनेषु मद्यपानमक्षक्रीडा स्त्रियो मृगयाश्चेति व्यसनचतुष्टयमतीव दुःखदायकमेव। दुष्टस्य दण्डः, सुजनस्य पूजा, न्यायेन कोशस्य संप्रवृद्धिः। कथ्यते यथा अत्रिस्मृतौ–

दुष्टस्य दण्डः सुजनस्य पूजा
न्यायेन कोशस्य च संप्रवृद्धिः।
अपक्षपातोऽर्थिषु राष्ट्ररक्षा
पञ्चैव यज्ञाः कथिता नृपाणाम्॥

(विस्तरेण तु- 13. धर्मशास्त्रप्रकरणे (छ) राजधर्माः–पृष्ठ-836, द्रष्टव्यम्)

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—पुराणेषु कः राजधर्मः?
उत्तरम्—ब्रह्मणः बाहुजातस्य क्षत्रियस्य क्षात्रधर्म एव राजधर्मः।

2. **प्रश्नः**—क्षत्रियस्य परमो धर्मः कः?
उत्तरम्—प्रजारक्षणं, दानं, यज्ञोऽध्ययनं विषयेषु अनासक्तिश्च।

3. **प्रश्नः**—प्रजानां रक्षणं दानमिज्याध्ययनमेव च। विषयेष्वप्रसक्तिश्च क्षात्रधर्मसमासतः।। राज्ञो जेतव्याः शत्रवश्चोद्धताश्च। सम्यक् कर्त्तव्यं पालनं च प्रजानाम्। अग्निश्चेयो बहुभिश्चापि यज्ञैरन्त्ये मध्ये वा वनमाश्रित्य स्थेयम्। राजधर्मविषये उक्तश्लोकः कुत्र कथितमस्ति?
उत्तरम्—महाभारते।

4. **प्रश्नः**—प्रमुखाः राजधर्माः के सन्ति?
उत्तरम्—बाह्यान्तरशत्रुभिः प्रजारक्षणम्, दानं, यज्ञोऽध्ययनम्, विषयेष्वनासक्तिश्चेति।

5. **प्रश्नः**—शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्। दानमीश्वरभावश्च क्षात्रं कर्मस्वभाजनम्।। राजधर्मविषये उक्त श्लोकः कुत्र कथितमस्ति?
उत्तरम्— गीतायाम्।

6. **प्रश्नः**—पुराणेषु राजधर्मस्यार्थः कः?
उत्तरम्— कामक्रोधलोभहर्षादीन् प्रत्ययान् विहाय धर्मन्यायदण्डनीतिभिः सम्पूर्णां प्रजां पुत्रमिव परिपालनम्।

7. **प्रश्नः**—युद्धक्षेत्रे राजा कथमपि कान् नैव हिंस्यात्?
उत्तरम्— बालं, वृद्धं, श्रान्तं, भीतं, शस्त्ररहितं शत्रुं, क्रन्दन्तं, युद्धविमुखं, साधनरहितम्, उद्यमरहितं, रोगिणं च।

8. **प्रश्नः**—राज्यं पालयते नित्यं सत्यधर्मपरायणः। निर्जित्य परसैन्यानि क्षितिं धर्मेण पालयेत्।। इति राजधर्मविषये कुत्र उद्धृतः?
उत्तरम्— गरुडपुराणे।

9. **प्रश्नः**—राज्ञः कररूपेण किं गृह्णीयात्?
उत्तरम्— षष्ठांशः।

10. **प्रश्नः**—रागी राजसिकं स्वर्यं कुरुते कर्म रागतः। रागान्धश्च राजसिकास्तेन राजा प्रकीर्तितः।। इति राजधर्मविषये कुत्र उद्धृतः?
उत्तरम्— विष्णुपुराणे।

11. **प्रश्नः**—राज्ञः स्वभावविषये किं कथितमस्ति?
उत्तरम्— लोकद्वयापेक्षी मृदुः कठोरो वा भवेत्।

12. **प्रश्नः**—राज्ञः कर्तव्यविषये किं कथितमस्ति?
उत्तरम्— धर्मात्मा पार्थिवो विजितेन्द्रियः सन् विष्णुमभ्यर्च्य गोब्राह्मणहिते रतः सन् प्रजाः पालयेत्।

13. **प्रश्नः**—कः राजा पण्डितः?
उत्तरम्—परदारेषु मातृवत्, परद्रव्येषु लोष्टवत्, सर्वभूतेषु च आत्मवत् पश्यति।

14. **प्रश्नः**—राजानं सुखे दुःखे च कथं भवेत्?
उत्तरम्— समभावः।

15. **प्रश्नः**—नृपः मन्त्रिरूपेण कान् नियोजयेत्?
उत्तरम्— साधून्, ज्ञातकुलशीलांश्च जनान्।

16. **प्रश्नः**—त्रीणि *कर्माणि राज्ञां परं श्रेयःसाधकानि कानि?
उत्तरम्— संग्रामेष्वनिवर्तित्वं प्रजानां परिपालनं ब्राह्मणानां शुश्रूषा।

17. **प्रश्नः**—राज्ञः कर्तव्यविषये किं वत् भवेत्?
उत्तरम्—अर्थान् वकवच्चिन्तयेत्, सिंहवत्पराक्रमेत्, वृकवत् विलिम्पेत्, शशवच्च विनिक्षिपेत्तथा शुकवत् दृढप्रहरी च भवेत्।

18. **प्रश्नः**—मनुस्मृत्यनुसारमुत्तमस्य राज्ञः किं लक्षणम्?
उत्तरम्— सर्वदा प्रातरुत्थाय वेदविदः शुचीन् ब्राह्मणान् सेवेत तथा तदाज्ञां पालयेत्।

19. **प्रश्नः**—अष्टदशव्यसनानि कं विवर्जयेत्?
उत्तरम्— राजानम्।

20. **प्रश्नः**—दुष्टस्य दण्डः सुजनस्य पूजा न्यायेन क्रोशस्य च संप्रवृद्धिः। अपक्षपातोऽर्थिषु राष्ट्ररक्षा पञ्चैव यज्ञाः कथिता नृपाणाम्।। उक्तश्लोकः कुत्र कथितमस्ति?
उत्तरम्— अत्रिस्मृतौ।

(ङ) महाविद्या एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

जगन्मातुः भगवत्याः दुर्गायाः साक्षात्स्वरूपाः रुद्रस्य मार्गविरोधार्थं दशदिक्षु स्वाङ्गभूताः गुप्तविद्यारूपेण संकेतिताः दशमहाविद्याः आगमशास्त्रेषु महत्त्वपूर्णं स्थानं भजन्ते। तासाञ्चोल्लेखः यथा–

काली तारा महाविद्या षोडशी भुवनेश्वरी।
बगला छिन्नमस्ता च विद्या धूमावती तथा।।
मातङ्गी त्रिपुरा चैव विद्या च कमलात्मिका।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्तिताः।।

आगमशास्त्रेषु जगन्मातुः भगवत्याः साक्षात्स्वरूपाः दशमहाविद्याः विद्वद्भिः साधकैश्च गुप्तविद्यारूपेण संकेतिताः। यथा वरिवस्यारहस्ये कथितमस्ति–

साक्षाद्विद्यैव सा न ततो भिन्ना जगन्माता।
अस्याः स्वाभिन्नत्वं श्रीविद्यायाः रहस्यार्थः।।
(वरिवस्यारहस्यम्-2/107)

देवीभागवतपुराणस्यानुशीलनेन ज्ञायते यत् देवी एव परमं तत्त्वमस्ति, या निर्गुणा, नित्या, सर्वव्यापिका, कल्याणमयी, योगगता, जाग्रत्स्वप्नसुषुप्तिभ्यः परायां तुरीयावस्थायां विराजते। तस्याः तिस्रः सात्त्विकी राजसी तामसी चेति शक्तयः, क्रमशः लक्ष्मी-सरस्वती-कालीरूपेण प्रकटीभवन्ति। त्रिपुरा कालिका दुर्गा भवानी गिरिजा तथा। एताः पंचभगिन्यस्ता भवन्ति कुलदेवताः। गौरी पद्मा शची मेधा सावित्री विजया जया देवासना स्वधा स्वाहा मातरो लोकमातरः। दृष्टिः पुष्टिस्तथा तुष्टिरश्चात्मकुलदेवता, एते षोडशमातृकाः सन्ति।

दशमहाविद्यानां सम्बन्धः परम्परातः सतीशिवापार्वतीभिः सह भवति। एता अन्यत्र नवदुर्गा-शक्ति-चामुण्डा-विष्णुप्रियादिनामभिः पूजिताः भवन्ति। अस्यामवस्थायां सत्याः नेत्रद्वयं रक्तवर्णं सञ्जातम्। अधरः प्रकम्पितः सञ्जातः। क्रोधाग्नौ दग्धशरीरं महाभयानकमुग्रं च दृष्टम्। कालाग्निवन्महाभयानकरूपेण देवी मुण्डमालां धारितवती। जिह्वा बहिः निःसृता। शिरसि अर्धचन्द्रः सुशोभितः आसीत्। महादेवः देव्या एतादृशं विकरालरूपं दृष्ट्वा भयेन अधावत्। धावतः रुद्रस्य मार्गावरोधार्थं देवी दशदिक्षु स्वाङ्गभूताः दशदेवीः प्रकटितवती। देव्या एतानि एव रूपाणि दशमहाविद्याः भवन्ति। ताः यथा–1. काली, 2. तारा, 3. छिन्नमस्ता, 4. धूमावती, 5. बगलामुखी, 6. कमला, 7. त्रिपुरभैरवी, 8. भुवनेश्वरी, 9. त्रिपुरसुन्दरी, 10. मातङ्गी च।

शिवः देवीं प्रति एतेषां स्वरूपं यदा अपृच्छत् तदा सती स्वयमवदत्। यथा–

येयं ते पुरतः कृष्णा सा काली भीमलोचना।
श्यामवर्णा च या देवी स्वयमूर्ध्वं व्यवस्थिता।।
सेयं तारा महाविद्या महाकालस्वरूपिणी।
सव्येतरेयं या देवी विशिर्षातिभयप्रदा।।
इयं देवी च्छिन्नमस्ता महाविद्या महामते।
वामे तवेयं या देवी सा शम्भो भुवनेश्वरी।।
पृष्ठतस्तव या देवी बगला शत्रुसूदनी।
वह्निकोणे तवेयं या विधवारूपधारिणी।।
सेयं धूमावती देवी महाविद्या महेश्वरी।
नैर्ऋत्यां तव या देवी सेयं त्रिपुरसुन्दरी।।
वायौ या ते महाविद्या सेयं मतङ्गकन्यका।
ऐशान्यां षोडशी देवी महाविद्या महेश्वरी।।
अहं तु भैरवी भीमा शम्भो मा त्वं भयं कुरु।
एताः सर्वाः प्रकृष्टास्तु मूर्त्तयो बहुमूर्त्तिषु।।

अर्थात् शम्भोः सम्मुखे कृष्णवर्णा भयंकरनेत्रयुक्ता या देवी आसीत् सा काली, या श्यामवर्णा ऊर्ध्वभागे स्थिता सा महाकालस्वरूपिणी महाविद्या तारा, सव्येतरपार्श्वे स्थिता अत्यन्तभयदायिनी मस्तकरहिता देवी छिन्नमस्ता, शिवस्य वामभागे स्थिता महाविद्या भुवनेश्वरी, पृष्ठभागे स्थिता देवी शत्रुसंहारिणी बगला, अग्निकोणे विधवारूपधारिणी महेश्वरी महाविद्या धूमावती, नैर्ऋत्यकोणे त्रिपुरसुन्दरी, वायव्यकोणे मतङ्गकन्या महाविद्या मातङ्गी, ईशानकोणे महेश्वरीमहाविद्या षोड्शी चैवं प्रकारेण दशदेव्यः दशदिक्षु आसन्। एताः उपरिवर्णिता एव दशमहाविद्याः इति कथ्यते। एतासु काली-तारा-षोडशी-भुवनेश्वरी-छिन्नमस्ता महाविद्या एवं च त्रिपुरभैरवी-धूमावती-बगलामुखी-मातङ्गी-कमलाश्च सिद्धविद्याः इति कथ्यते।

1. **महाकाली**–शम्भोः सम्मुखे स्थिता कृष्णवर्णा भयङ्करनेत्रयुक्ता (काली) महाकाली प्रथमा अस्ति।

तस्यां विनिर्गतायां तु कृष्णा भूत्साऽपि पार्वती।
कालिकेति समाख्याता हिमाचलकृताश्रया।।
शवारूढां महाभीमां घोरदंष्ट्रां हसन्मुखीम्।
चतुर्भुजां खड्गमुण्डवराभयकरां शिवाम्।।

मुण्डमालाधरां देवीं ललज्जिह्वां दिगम्बराम्।
एवं संचिन्तयेत् कालीं श्मशानलयवासिनीम्॥

2. **तारा**–ऊर्ध्वभागे स्थिता श्यामवर्णा तारा, सा हिरण्यगर्भस्य शक्तिः, संहारकारिणी, अस्याः चतुर्भुजासु चत्वारः विषाक्तसर्पाः सन्ति। एषा देवी शवारूढा मुण्डखप्परधारिणी च अस्ति।

प्रत्यालीढपदार्पिताङ्घ्रिशवहृद्घोराट्टहासापरा,
खड्गेन्दीवरकर्त्रिखर्परभुजा हुंकारबीजोद्भवा।
खर्वानीलविशालपिङ्गलजटाजूटैकनागैर्युता
जाड्यं न्यस्य कपालकर्तृजगतां हन्त्युग्रतारा स्वयम्॥

3. **छिन्नमस्ता**–दक्षिणे मस्तकरहिता छिन्नमस्ता विश्वेऽस्मिन् निर्गमस्य उपचये आगमस्यापचये सति अस्याः प्राधान्यमङ्गीक्रियते। कृपाणखर्परधारिणी एषा देवी दिगम्बरी आस्ते।

प्रत्यालीढपदार्पिताङ्घ्रिशवहृद्घोराट्टहासापरा
दिग्वस्त्रां स्वकबन्धशोणितसुधाधारां पिबन्तीं मुदा।
नागाबद्धशिरोमणिं त्रिनयनां हृद्युत्पलालंकृताम्
रत्यासक्तमनोभवोपरिदृढां ध्यायेज्जवासन्निभाम्॥

4. **भुवनेश्वरी**–वामभागे तुङ्गकुचा नयनत्रययुक्ता भुवनेश्वरी बुद्धिगतविश्वस्य अधिष्ठानः त्र्यम्बकः शिवोऽस्ति। एषा देवी किरीटे चन्द्रं धारयति–

उद्यद्दिनद्युतिमिन्दुकिरीटां तुङ्गकुचां नयनत्रयुक्ताम्।
स्मेरमुखीं वरदाङ्कुशपाशां भीतिकरां प्रभजे भुवनेशीम्॥

5. **बगलामुखी**–पृष्ठभागे स्थिता शत्रुसंहारिणी बगलामुखी स्वयं पीतवर्णा अस्ति; तथा च पीतवर्णस्य वस्त्रमाभूषणानि धारयति–

जिह्वाग्रमादाय करेण देवीं वामेन शत्रुं परिपीडयन्तीम्।
गदाभिघातेन च दक्षिणेन पीताम्बराढ्यां द्विभुजां नमामि॥

6. **धूमावती**–अग्निकोणे विधवारूपधारिणी (शूर्पहस्ताभयसौम्यसुभगनेत्रा) धूमावती विश्वस्य अमाङ्गल्यपूर्णावस्थायाः अधिष्ठात्री अस्ति। एषा विधवा अस्ति।

विवर्णा चञ्चला दुष्टा दीर्घा च मलिनाम्बरा।
विमुक्तकुन्तला रुक्षा विधवा विरलद्विजा॥
काकध्वजरथारूढा विलम्बितपयोधरा।
शूर्पहस्तातिरूक्षा च धूतहस्ता वरानना॥

7. **त्रिपुरभैरवी**–नैर्ऋत्यकोणे अरुणकान्तियुक्ता त्रिपुरा-(त्रिपुरभैरवी) त्रिनेत्रा एषा मुकुटे चन्द्रं हस्ते च जपमालाविद्या-वर-अभयमुद्राः धारयति। क्षीयमाणविश्वस्य अधिष्ठानः दक्षिणामूर्ति-कालभैरवोऽस्ति।

उद्यद्भानुसहस्रकान्तिमरुणक्षौमां शिरोमालिकां
रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरम्।
हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविन्दश्रियम्
देवीं बद्धहिमांशुरत्नमुकुटां वन्दे सुमन्दस्मिताम्॥

8. **मातङ्गी**–वायव्यकोणे मतङ्गजा मातङ्गी शिवस्य शक्तिः अस्ति। एषा श्यामवर्णा, त्रिनेत्रा, नीलकमलकान्तियुक्ता अस्ति। मस्तके चन्द्रं धारयति। रत्नसिंहासनोपरि विराजते–

माणिक्यवीणामुपलालयन्तीं
मदालसां मंजुलवाग्विलासान्।
महेन्द्रनीलद्युतिकोमलाङ्गीं
मतङ्गकन्यां मनसा स्मरामि॥

9. **षोडशी**–ऐशान्याञ्च महेश्वरी महाविद्या षोडशी प्रशान्तहिरण्यगर्भः सूर्यः शिवोऽस्ति–

बालाऽर्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम्।
पाशाङ्कुशधरांश्चापं धारयन्तीं शिवां भजे॥
प्रवृद्धघोषणा सा तु भृकुटिकुटिलेक्षणा।
क्षुत्पिपासार्दिता नित्यं भयप्रदा कलहास्पदा॥

10. **कमला**–स्वर्णतुल्यकान्तिमयी कमला वैष्णवी शक्तिरस्ति। सदाशिव-पुरुषस्य शक्तिरेषा। एषा देवी चतुर्भुजायां वर-अभय-कमलद्वयं धारयति–

कान्त्या काञ्चनसंनिभां हिमगिरिप्रख्यैश्चतुर्भिर्भुजैः-
र्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम्।
विभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां
क्षौमाबद्धनितम्बबिम्बललितां वन्देरविन्दस्थिताम्॥

एवंप्रकारेण दशदेव्याः महाविद्यारूपेण संकेतिताः, एतासु कालीताराषोडशीभुवनेश्वरीछिन्नमस्ताः महाविद्याः तदन्याश्च सिद्धविद्याः प्रोच्यन्ते।

(ङ) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—जगन्मातुः भगवत्याः दुर्गायाः साक्षात्स्वरूपाः गुप्तविद्यारूपेण संकेतिताः काः सन्ति?
उत्तरम्—दशमहाविद्याः।

2. **प्रश्नः**—काः सन्ति दशमहाविद्याः?
उत्तरम्—काली तारा महाविद्या षोडशी भुवनेश्वरी। बगला छिन्नमस्ता च विद्या धूमावती तथा॥ मातङ्गी त्रिपुरा चैव विद्या च कमलात्मिका। एता दशमहाविद्याः सिद्धविद्याः प्रकीर्तिताः॥

3. **प्रश्नः**—साक्षाद्विद्यैव सा न ततो भिन्ना जगन्माता। अस्याः स्वाभिन्नत्वं श्रीविद्यायाः रहस्यार्थः॥ उक्तश्लोकः कुत्र कथ्यते?
उत्तरम्—वरिवस्यारहस्यम् इति ग्रन्थे।

4. **प्रश्नः**—देवी एव परमं तत्त्वमस्ति, या निर्गुणा, नित्या, सर्वव्यापिका, कल्याणमयी, योगगता, जाग्रत्स्वप्न-सुषुप्तिभ्यः परायां तुरीयावस्थायां विराजते। तस्याः तिस्रः सात्विकी राजसी तामसी चेति शक्तयः, क्रमशः लक्ष्मी-सरस्वती- कालीरूपेण प्रकटीभवन्ति इति कस्य पुराणस्य अनुशीलनेन ज्ञायते?
उत्तरम्— देवीभागवतपुराणस्यानुशीलनेन।

5. **प्रश्नः**—काः सन्ति कुलदेवताः?
उत्तरम्—त्रिपुरा कालिका दुर्गा भवानी गिरिजा तथा। एताः पंच भगिन्यस्ताः भवन्ति कुलदेवताः।

6. **प्रश्नः**—काः सन्ति षोडशमातृकाः?
उत्तरम्—गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः। दृष्टिः पुष्टिस्तथा तुष्टिश्चात्मकुलदेवता।

7. **प्रश्नः**—दशमहाविद्यानां सम्बन्धः परम्परातः कैः सह भवति?
उत्तरम्—सतीशिवापार्वतीभिः।

8. **प्रश्नः**—दशमहाविद्यायाः क्रमिकनामानि कानि?
उत्तरम्—1. काली, 2. तारा, 3. छिन्नमस्ता, 4. धूमावती, 5. बगलामुखी, 6. कमला, 7. त्रिपुरभैरवी, 8. भुवनेश्वरी, 9. त्रिपुरसुन्दरी, 10. मातङ्गी च।

9. **प्रश्नः**—शम्भोः सम्मुखे कृष्णवर्णा भयंकरनेत्रयुक्ता या देवी आसीत् सा का?
उत्तरम्—काली।

10. **प्रश्नः**—या श्यामवर्णा ऊर्ध्वभागे स्थिता सा महाकालस्वरूपिणी महाविद्या का?
उत्तरम्—तारा।

11. **प्रश्नः**—हिरण्यगर्भस्य शक्तिः, संहारकारिणी, चतुर्भुजासु चतुर्णां विषाक्तसर्पाणां धारिणी का?
उत्तरम्—तारा।

12. **प्रश्नः**—शवारूढा मुण्डखप्परधारिणी च देवी का?
उत्तरम्—तारा।

13. **प्रश्नः**—सव्येतरपार्श्वे स्थिता अत्यन्तभयदायिनी मस्तकरहिता देवी का?
उत्तरम्—छिन्नमस्ता।

14. **प्रश्नः**—निर्गमस्य उपचये आगमस्यापचये सति अस्याः प्रधानमङ्गे कृपाणखर्परधारिणी दिगम्बरी देवी का?
उत्तरम्—छिन्नमस्ता।

15. **प्रश्नः**—शिवस्य वामभागे स्थिता महाविद्या का?
उत्तरम्—भुवनेश्वरी।

16. **प्रश्नः**—तुङ्गकुचा नयनत्रययुक्ता बुद्धिगतविश्वस्य अधिष्ठानः त्र्यम्बकः शिवः इति का?
उत्तरम्—भुवनेश्वरी।

17. **प्रश्नः**—किरीटे चन्द्रं धारयति सा देवी का?
उत्तरम्—भुवनेश्वरी।

18. **प्रश्नः**—पृष्ठभागे स्थिता शत्रुसंहारिणी देवी का?
उत्तरम्—बगला।

19. **प्रश्नः**—स्वयं पीतवर्णा, पीतवर्णस्य वस्त्रमाभूषणानि धारयति सा देवी का?
उत्तरम्—बगला।

20. **प्रश्नः**—अग्निकोणे विधवारूपधारिणी महेश्वरी महाविद्या का?
उत्तरम्—धूमावती।

21. **प्रश्नः**—शूर्पहस्ताभयसौम्यसुभगनेत्रा, धूमावती विश्वस्य अमाङ्गल्यपूर्णावस्थायाः अधिष्ठात्री का?
उत्तरम्—धूमावती।

22. **प्रश्नः**—नैर्ऋत्यकोणे अरुणकान्तियुक्ता, मुकुटे चन्द्रं हस्ते च जपमालाविद्या-वर-अभयमुद्राः धारयति सा देवी का?
उत्तरम्—त्रिपुरभैरवी।

23. **प्रश्नः**—क्षीयमाणविश्वस्य अधिष्ठानः त्रिनेत्रा दक्षिणमूर्ति-कालभैरवोऽस्ति सा का?
उत्तरम्—त्रिपुरा।

24. **प्रश्नः**—वायव्यकोणे मतङ्गजा मातङ्गी शिवस्य शक्तिः, श्यामवर्णा, त्रिनेत्रा, नीलकमलकान्तियुक्ता देवी का?
उत्तरम्—मातङ्गी।

25. **प्रश्नः**—मस्तके चन्द्रं धारयति, रत्नसिंहासनोपरि विराजमाना देवी का?
उत्तरम्—मातङ्गी।

26. **प्रश्नः**—स्वर्णतुल्यकान्तिमयी वैष्णवी शक्तिः सदाशिव-पुरुषस्य शक्तिरेषा का?
उत्तरम्—कमला।

27. **प्रश्नः**—चतुर्भुजायां वर-अभय-कमलद्वयं धारयति सा देवी का?
उत्तरम्—कमला।

28. **प्रश्नः**—महाविद्याः काः कथयन्ति?
उत्तरम्—काली-तारा-षोडशी-भुवनेश्वरी-छिन्नमस्ता।

29. **प्रश्नः**—सिद्धविद्याः काः कथयन्ति?
उत्तरम्—त्रिपुरभैरवी-धूमावती- बगलामुखी-मातङ्गी-कमलांश्च।

(च) मुद्राः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

मुद्रास्वरूपविमर्शः—मुदं हर्षं राति ददातीति मुद्रा। मुद् प्रसन्ने इत्यस्माद्धातोः निष्पन्नोऽयं मुद्राशब्दः। तत्स्वरूपमज्ञात्वा तदनुष्ठानेन मन्त्रसिद्धिर्न भवतीत्यस्माद् हेतोः तन्त्रशास्त्रेषु मुद्रास्वरूपं वर्ण्यते। तान्त्रिकसाहित्ये तन्त्रक्रियायाः विशिष्टविभागोऽस्ति मुद्राः। मुद्राशब्दस्य प्रयोगः अगस्त्यस्य पत्न्याः लोपामुद्रायाः नामानुसारं कृतः। तन्त्रे संविदेन क्रियाशक्तिरूपेण विश्वस्य मोदनं द्रावणं च कुर्वती मुद्राख्यां लभते। उक्तञ्च यामलतन्त्रे—

मोदनात्सर्वदेवानां द्रावणात्पापसन्ततेः।
तस्मान्मुद्रेयमाख्याता मुनिभिस्तन्त्रवेदिभिः॥

स्वाङ्गुल्यो हि पञ्चभूतात्मिकाः अंगुष्ठाद्याः आकाश-वाय्वग्निसलिलभूरूपाः (पञ्चमहाभूतरूपाः), तासां संयोग-रूपसंकेतात् उपास्य देवता मोदकरः सानिध्यकरश्च भवति। अत एव—

मुद्रा चैव क्रियात्मिका तथा च मुद्राः देवताः सन्निधापकाः।

तत्र यागहोमध्यानदेवपूजापद्धतिरीत्या नानाविधानां आवाहनशंखलिङ्गादीनां मुद्राणां पर्यालोचनं तन्त्रशास्त्रेषु प्राप्यते। संध्याकाले सम्मुखादिमुद्राणां प्रयोगः क्रियते। मुख्यतया करजा-कायिकी विलाप मानसी इति चतस्रो मुद्राः। सर्वासां देवतानामानन्दपरिवर्द्धनं कृत्वा मुद्रया सर्वपापदूरीकरणं सम्भवति। तस्मात् तन्त्रवेत्ता विद्वांसः मुद्रा इति प्रवदन्ति। कुलार्णवतन्त्रे च उक्तमस्ति—

मुदं कुर्वन्ति देवानां मनांसि द्रावयन्ति च।
तस्मान्मुद्रा इति ख्याता दर्शितव्या कुलेश्वरी॥
(कुलार्णवे)

मुद्राणामावश्यकता—अनेके प्रकारकाः मुद्राः षोडशोपचारपूजावसरे, ध्यानसमये, देवावाहनसमये च व्यवह्रियन्ते। तत्र भिन्नभिन्नदेवानां कृते भिन्नभिन्नमुद्राणां व्यवहारः क्रियते। मुद्रासु सत्सु कतिमुद्राः सामान्यरूपेण सर्वेषां देवानां कृते व्यवह्रियन्ते कति च भिन्नाः भवन्ति। कथ्यते यथा—

अर्च्चने जपकाले च, ध्याने काम्ये च कर्मणि।
स्नाने चावाहने शङ्खे, प्रतिष्ठायां च रक्षणे॥
नैवेद्ये च तथा मन्त्रे, तत्तत्कल्पप्रकाशिते।
स्थाने मुद्राः प्रदेष्टव्याः, स्वस्वलक्षणा।

मुद्रावैशिष्ट्यम्—तत्स्वरूपमज्ञात्वा तदनुष्ठानेन मन्त्रसिद्धिर्न भवतीत्यस्माद् हेतोः क्रियात्मिकाणां मुद्राणां विशिष्टं महत्त्वं तन्त्रशास्त्रे प्रतिपाद्यते। यथा—**मुद्राः देवताः सन्निधापकाः**। यामलतन्त्रेऽपि—

मोदनात्सर्वदेवानां द्रावणात्पापसंततेः
तस्मान्मुद्रेयमाख्यतेति।

कालिकापुराणेऽपि—

मुद्रां विना तु यज्जाप्यं प्राणायामः सुरार्चनम्।
योगो ध्यानासनं चापि निष्फलानि तु भैरव॥

मेरुतन्त्रेऽपि वर्णितं यत् देवता—

मुद्राभिरेव तृप्यन्ति न पुष्पादिकपूजनैः।

घेरण्डसंहितायामपि—

मुद्राः सिद्धिदाः व्याधिमृत्युविनाशकाः।

इत्येवं प्रकारेण मुद्राः सिद्धिदाः साक्षान्मोक्षप्रसाधिनी च।

मुद्राणां भेदाः—तन्त्रालोके कररचनारूपा बाह्याः आन्तरा तु बन्धरूपा इति द्विविधाः मुद्राः प्रोक्ताः। स्वच्छन्दतंत्रे सर्वासां मुद्राणां त्रैविध्यमुक्तं यथा—

मनोजा गुरुवक्त्रस्था वाग्भवा मन्त्रसम्भवा।
देहोद्भवविक्षेपैः मुद्रेयं त्रिविधा स्मृता॥

यामलतन्त्रे करजा-कायिकी-विलापा-मानसी इति चतस्रो मुद्राः प्रथिताः। तन्त्रालोके करङ्किणीक्रोधनाभैरवीत्यादिमुद्राणां वर्णनं प्राप्यते। पञ्चरात्रिप्रभृतिषु वैष्णवागमेषु शङ्खचक्रभिः शरीरतापनं मुद्रापदेनोच्यते।

इहागच्छादिमुद्राः—

इहागच्छ द्विधा पृच्छेदिह तिष्ठ द्विधा पुनः।
इह शब्दात् सन्निधेहि, इह सन्निपदात्ततः॥
रुधस्व पदमाभाष्य, कुरुद्वयमतः परम्।
(सरस्वतीतन्त्रे)

आवाहनादि दशमुद्राः यथा तन्त्रसारे—

आवाहनं स्थापनं च सन्निधानं प्रकीर्त्तितम्।
स्यात्सन्निरोधः, सकलीकरणं चावगुण्ठनम्।
धेनुः पीयूषकरणं महामुद्रा तथैव च।
परमीकरणं चैव, दशमुद्राः प्रकीर्त्तिताः।
प्रयोजयेदिमां मुद्रां देवताह्वानकर्मणि॥
(तन्त्रसारे)

आवाहनी मुद्राः—आवाहनसमये देवतायाः मूलमन्त्र-मुच्चार्य सुषुम्नानाड्याः वर्त्मना तस्य देवस्य तेजःपुञ्जमानीय नासिकारन्ध्रमाध्यमेन बहिर्निष्कासनं कृत्वा हस्तस्थपुष्पैः सह योजनमेव आवाहनमुद्रायाः स्वरूपम्। कथ्यते यथा—

हस्ताभ्यामञ्जलीं बुध्वानामिकामूलपर्वणि।
अङ्गुष्ठौ निक्षिपेत्सेयं, मुद्रा त्वावाहनी स्मृता॥

सन्निरोधनी मुद्राः—"**अन्तःप्रवेशिताङ्गुष्ठ सैव संरोधिनी मता।**" अर्थादुभयोर्हस्तयोः अङ्गुली: एकत्रीकृत्य संयोगेन सन्निरोधनी मुद्रा भवति।

सकलीकरणम्—देवताङ्गे षडङ्गानां, न्यासः स्यात् सकलीकृतः। अर्थात् देवतायाः समीपे षडङ्गन्यासः—"हृदयाय नमः, शिरसे स्वाहा, शिखायै वषट्, कवचाय हुं, नेत्राभ्यां वौषट्/नेत्रत्रयाय वौषट्, अस्त्राय फट्," इति सकलीकरणम्।

अवगुण्ठनम्—वामहस्तं मुष्टिं कृत्वा तर्जनी समरेखामधोमुखीं च कृत्वा नैवेद्यं परितः दक्षिणावर्त्तभावेन आवर्तनमेव अवगुण्ठनमित्युच्यते। यथा—

सव्यहस्तकृता मुष्टि, दीर्घोऽमुखतर्जनी।
अवगुण्ठनमुद्रेयमभितो भ्रामितो मता॥

धेनुमुद्रा—हस्तद्वयमेकत्रीकृत्य दक्षिणहस्तस्य अनामिकया सह वामहस्तस्य कनिष्ठाङ्गुल्या, वामहस्तस्य अनामिकया सह दक्षिणहस्तस्य कनिष्ठिकायाः, दक्षिणहस्तस्य मध्यमया सह वामहस्तस्य तर्जन्या, वामहस्तस्य मध्यमया सह दक्षिणहस्तस्य तर्जन्याः तथा उभयो हस्तयोः वृद्धाङ्गुल्योः संयोजनपूर्वकम् अधोमुखीकरणं धेनुमुद्रा इत्युच्यते। उक्तं यथा—

दक्षनामा समायुक्ता, वामहस्तकनिष्ठिका।
वामनासासमायुक्ता, दक्षपाणिकनिष्ठिका।
दक्षस्य मध्यमाक्रान्ता, वामहस्तस्य तर्जनी।
संयुक्तौ कारयेद्विद्वान्, अङ्गुष्ठावुभयोरपि।
धेनुमुद्रा निगदिता, गोपिता साधकोत्तमैः।

दुर्गायाः षोडशमुद्रा—

लिङ्गमुद्रा योनिमुद्रा, व्यापिनी छत्रकं गदा।
घण्टादण्डं खेटकञ्च चक्रं शूलं शरं धनुः।
खड्गवीणे पद्मशंखे मुद्राः षोडश कीर्त्तिताः॥

इत्थमेव यागहोमध्यानदेवपूजापद्धत्याधरेण आवाहनादि दशमुद्राणां गणेशस्य दन्तशूलादिषोडशमुद्राणां विष्णोः शंखचक्रादिषोडशमुद्राणां शिवस्य आवाहनादिषोडशमुद्राणां दुर्गायाः लिङ्गादिषोडशमुद्राणां सूर्यस्याब्जादिषोडशमुद्राणां गायत्र्याश्च शंखादि द्वात्रिंशत् मुद्राणां वर्णनं तन्त्रशास्त्रे प्राप्यते। एतद्भिन्नमन्याः मुद्राः यथा—घण्टामुद्रा, छोटिकामुद्रा, नमस्कारमुद्रा, नाराचमुद्रा, करकच्छपिकामुद्रा, लेलिहमुद्रा, बहिर्मातृकामुद्रा, व्यापकमुद्रा, मत्स्यमुद्रा, अङ्कुशमुद्रा, गालिनीमुद्रा, द्रव्यमुद्रा, कूर्ममुद्रा, प्रार्थनामुद्रा, लक्ष्मीमुद्रा, सरस्वत्याः वीणामुद्रा, पुस्तकमुद्रा, व्याख्यानमुद्रा, अक्षमालामुद्रा, सप्तजिह्वामुद्रा, मृगमुद्रा, हंसमुद्रा, आसनमुद्रा, स्वागतमुद्रा, पद्ममुद्रा, अर्घ्यमुद्रा, आचमनीयमुद्रा, मधुपर्कमुद्रा, स्नानमुद्रा, वस्त्रमुद्रा, यज्ञोपवीतमुद्रा, आभरणमुद्रा, गन्धमुद्रा,

पुष्पमुद्रा, धूपमुद्रा, दीपमुद्रा, नैवेद्यमुद्रा, पञ्चप्राणाहुतिमुद्रा, संहारमुद्रा इत्यादयः तन्त्रसारादिग्रन्थे समुपलभ्यन्ते।

(छ) वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—मुद्राशब्दस्य का व्युत्पत्तिः?
उत्तरम्—मुदं हर्षं राति ददातीति मुद्रा।

2. प्रश्नः—तान्त्रिकसाहित्ये तन्त्रक्रियायाः कस्य विशिष्टविभागोऽस्ति?
उत्तरम्—मुद्रायाः।

3. प्रश्नः—मुद्राशब्दस्य प्रयोगः कस्या नामानुसारं कृतः?
उत्तरम्—अगस्त्यस्य पत्न्याः लोपामुद्रायाः।

4. प्रश्नः—मोदनात्सर्वदेवानां द्रावणात्पापसंततेः। तस्मान्मुद्रेयमाख्याता मुनिभिस्तन्त्रवेदिभिः।। मुद्राविषयकः कस्य तन्त्रशास्त्रस्य श्लोकः?
उत्तरम्—यामलतन्त्रस्य।

5. प्रश्नः—मुद्रा इत्यस्या का परिभाषा?
उत्तरम्—स्वाङ्गुल्यो हि पञ्चभूतात्मिकाः अंगुष्ठाद्याः आकाशवाय्वग्निसलिलभूरूपाः (पञ्चमहाभूतरूपाः), तासां संयोगरूपसंकेतात् उपास्यदेवता मोदकरः सान्निध्यकरश्च भवति।

6. प्रश्नः—मुद्राशब्दस्यार्थः कः?
उत्तरम्—"मुद्रा चैव क्रियात्मिका" तथा च "मुद्राः देवताः सन्निधापकाः"।

7. प्रश्नः—योगहोमध्यानदेवपूजापद्धतिरीत्या नानाविधानां आवाहनशंखलिङ्गादीनां मुद्राणां पर्यालोचनं कुत्र प्राप्यते?
उत्तरम्—तन्त्रशास्त्रेषु।

8. प्रश्नः—संध्याकाले केषां मुद्राणां प्रयोगः क्रियते?
उत्तरम्—सम्मुखादिमुद्राणाम्।

9. प्रश्नः—चतस्रो मुद्राः काः?
उत्तरम्—मुख्यतया करजा-कायिकी-विलापा-मानसी इति।

10. प्रश्नः—मुद्रया कानि कार्याणि साध्यानि सम्भवन्ति?
उत्तरम्—सर्वासां देवतानामानन्दपरिवर्द्धनं सर्वपापदूरीकरणं च।

11. प्रश्नः—तन्त्रवेत्ताविद्वांसः का प्रवदन्ति?
उत्तरम्—मुद्रा।

12. प्रश्नः—मुदं कुर्वन्ति देवानां मनांसि द्रावयन्ति च। तस्मान्मुद्रा इति ख्याता दर्शितव्या कुलेश्वरी।। मुद्रा विषयकाः श्लोकाः कुत्र उक्ताः सन्ति?
उत्तरम्—कुलार्णवतन्त्रे।

13. प्रश्नः—मुद्राणामावश्यकता केषु अवसरेसु व्यवह्रियन्ते?
उत्तरम्—अर्च्चने जपकाले च, ध्याने काम्ये च कर्मणि। स्नाने चावाहने शङ्खे, प्रतिष्ठायां च रक्षणे।।
नैवेद्ये च तथा मन्त्रे, तत्तत्कल्पप्रकाशिते। स्थाने मुद्राः प्रदेष्टव्याः, स्वस्वलक्षणा।

14. प्रश्नः—मुद्रा कति प्रकारकाः, मुख्यप्रयोगावसराः काः?
उत्तरम्—अनेके प्रकारकाः मुद्राः, षोडशोपचारपूजावसरे, ध्यानसमये, देवावाहनसमये च तत्र भिन्नभिन्नदेवानां कृते भिन्नभिन्नमुद्राणां व्यवहारः क्रियते।

15. प्रश्नः—मुद्रायाः किं वैशिष्ट्यम्?
उत्तरम्—तत्स्वरूपमज्ञात्वा तदनुष्ठानेन मन्त्रसिद्धिर्न भवतीत्यस्माद् हेतोः क्रियात्मिकाणां मुद्राणां विशिष्टं महत्त्वं तन्त्रशास्त्रे प्रतिपाद्यते। यथा–"मुद्राः देवताः सन्निधापकाः"।

16. प्रश्नः—मुद्रायाः वैशिष्ट्यविषये यामलतन्त्रे किमुक्तम्?
उत्तरम्—मोदनात्सर्वदेवानां द्रावणात्पापसंततेः तस्मान्मुद्रेयमाख्यतेति।

17. प्रश्नः—मुद्रायाः वैशिष्ट्यविषये कालिकापुराणे किमुक्तम्?
उत्तरम्—मुद्रां विना तु यज्जाप्यं प्राणायामः सुरार्चनम्। योगो ध्यानासनं चापि निष्फलानि तु भैरव।।

18. प्रश्नः—मुद्रायाः वैशिष्ट्यविषये घेरण्डसंहितायां किमुक्तम्?
उत्तरम्—मुद्राः सिद्धिदाः व्याधिमृत्युविनाशकाः।

19. प्रश्नः—सिद्धिदाः साक्षान्मोक्षप्रसाधिनी च काः?
उत्तरम्— मुद्राः।

20. प्रश्नः—तन्त्रालोके मुद्राणां भेदाः कतिधा?
उत्तरम्—द्विविधा मुद्रा, कररचनारूपा बाह्याः आन्तरा तु बन्धरूपा।

21. प्रश्नः—स्वच्छन्दतंत्रे सर्वासां मुद्राणां कतिविध्यं प्रोक्तम्?
उत्तरम्—त्रैविध्यम्, मनोजा गुरुवक्त्रस्था वाग्भवा मन्त्रसम्भवा। देहोद्भवविक्षेपैः मुद्रेयं त्रिविधा स्मृता।।

22. प्रश्नः—यामलतन्त्रे काः चतस्रो मुद्राः प्रथिताः?
उत्तरम्—करजा-कायिकी-विलापा-मानसी च।

23. प्रश्नः—इहागच्छादिमुद्राः सरस्वतीतन्त्रे काः?
उत्तरम्—इहागच्छ द्विधा पृच्छेदिह तिष्ठ द्विधा पुनः। इह शब्दात् सन्निधेहि, इह सन्निपदात्ततः।। रुधस्व पद्माभास्य, कुरुद्वयमतः परम्।।

24. प्रश्नः—तन्त्रसारे आवाहनादि दशमुद्राः काः?
उत्तरम्—आवाहनं स्थापनं च सन्निधानं प्रकीर्त्तितम्। स्यात्सन्निरोधः, सकलीकरणं चावगुण्ठनम्। धेनुः पीयूषकरणं महामुद्रा तथैव च। परमीकरणं चैव, दशमुद्राः प्रकीर्त्तिताः। प्रयोजयेदिमां मुद्रां देवताह्वानकर्मणि।।

25. प्रश्नः—आवाहनमुद्रायाः स्वरूपं किम्?
उत्तरम्—हस्ताभ्यामञ्जलीं बद्ध्वानामिकामूलपर्वणि। अङ्गुष्ठौ निक्षिपेत्सेयं, मुद्राङ्गुत्वावाहनी स्मृता।।

26. प्रश्नः—सन्निरोधनी मुद्राः काः?
उत्तरम्—अन्तःप्रवेशिताङ्गुष्ठा सैव संरोधनी मता। अर्थादुभयोर्हस्तयोः अङ्गुली: एकत्रीकृत्य संयोगेन सन्निरोधनी मुद्रा भवति।

27. प्रश्नः—सकलीकरणस्य किं स्वरूपम्?
उत्तरम्—देवताङ्गे षडङ्गानां, न्यासः स्यात् सकलीकृतः।

28. प्रश्नः—देवतायाः समीपे को षडङ्गन्यासः करणीयः?
उत्तरम्—हृदयाय नमः, शिरसे स्वाहा, शिखायै वषट्, कवचाय हुं, नेत्राभ्यां वौषट्/नेत्रत्रयाय वौषट्, अस्त्राय फट्।

29. प्रश्नः—अवगुण्ठनमित्यस्य किं स्वरूपम्?
उत्तरम्—वामहस्तं मुष्टिं कृत्वा तर्जनी समरेखामधोमुखीं च कृत्वा नैवेद्यं परितः दक्षिणावर्त्तभावेन आवर्त्तनमेव अवगुण्ठनमित्युच्यते।

30. प्रश्नः—धेनुमुद्रायाः किं स्वरूपम्?
उत्तरम्—हस्तद्वयमेकत्रीकृत्य दक्षिणहस्तस्य अनामिकया सह वामहस्तस्य कनिष्ठाङ्गुल्याः, वामहस्तस्य अनामिकया सह दक्षिणहस्तस्य कनिष्ठिकायाः, दक्षिणहस्तस्य मध्यमया सह वामहस्तस्य तर्जन्या, वामहस्तस्य मध्यमया सह दक्षिणहस्तस्य तर्जन्याः तथा उभयो हस्तयोः वृद्धाङ्गुल्योः संयोजनपूर्वकम् अधोमुखीकरणं धेनुमुद्रा इत्युच्यते।

31. प्रश्नः—दुर्गायाः षोडशमुद्रायाः किं स्वरूपम्?
उत्तरम्—लिङ्गमुद्रा योनिमुद्रा, व्यापिनी छत्रकं गदा। घण्टादण्डं खेटकञ्च चक्रं शूलं शरं धनुः। खड्गवीणे पद्मशंख्ये मुद्राः षोडश कीर्त्तिताः।।

32. प्रश्नः—गणेशस्य दशमुद्राणां किं स्वरूपम्?
उत्तरम्—योगहोमध्यानदेवपूजापद्धत्याधारेण आवाहनादि।

33. प्रश्नः—विष्णोः मुद्राणां किं स्वरूपम्?
उत्तरम्— दन्तशूलादिषोडशमुद्राणाम्।

34. प्रश्नः—शिवस्य मुद्राणां किं स्वरूपम्?
उत्तरम्—शंखचक्रादिषोडशमुद्रा।

35. प्रश्नः—एतद्भिन्नमन्याः मुद्राः काः?
उत्तरम्—घण्टामुद्रा, छोटिकामुद्रा, नमस्कारमुद्रा, नाराचमुद्रा, करकच्छपिकामुद्रा, लेलिहानमुद्रा, बहिर्मातृकामुद्रा, व्यापकमुद्रा, मत्स्यमुद्रा, अङ्कुशमुद्रा, गालिनीमुद्रा, द्रव्यमुद्रा, कूर्ममुद्रा, प्रार्थनामुद्रा, लक्ष्मीमुद्रा, सरस्वत्याः वीणामुद्रा, पुस्तकमुद्रा, व्याख्यानमुद्रा, अक्षमालामुद्रा, सप्तजिह्वामुद्रा, मृगमुद्रा, हंसमुद्रा, आसनमुद्रा, स्वागतमुद्रा, पद्ममुद्रा, अर्घ्यमुद्रा, आचमनीयमुद्रा, मधुपर्कमुद्रा, स्नानमुद्रा, वस्त्रमुद्रा, यज्ञोपवीतमुद्रा, आभरणमुद्रा, गन्धमुद्रा, पुष्पमुद्रा, धूपमुद्रा, दीपमुद्रा, नैवेद्यमुद्रा, पञ्चप्राणाहुतिमुद्रा, संहारमुद्रा इत्यादयः।

(FF-Code-25) (छ) रामायणः-1. रामायणस्य क्रमः 2. रामायणे आख्यानम्, 3. रामायण-कालिकः समाजः, 4. रामायणस्य उपजीव्यत्वं प्रेरकत्वं वा, 5. रामायणस्य साहित्यिकं महत्त्वम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

रामायणम्—वाल्मीकि एव संस्कृतभाषायाः आदिकविः अस्ति इति सर्वे भारतीयाः वैदेशिकाश्च विद्वांसः स्वीकुर्वन्ति। परवर्तीनि काले अस्माद् ग्रन्थादेव कथावस्तु आदाय अनेकैः कविभिः रामकथामाश्रित्य अनेकानि काव्यानि रचितानि। रामस्य अयनम् इति रामायणम् अर्थात् भगवतः श्रीरामचन्द्रस्य निवासस्थानं चरित्रवर्णनञ्च यत्र सुविराजते तदेव रामायणं कथ्यते। रमन्ते आनन्दानुभवन्ति योगिनः भक्तगणाः यत्र स रामः। तस्यैव निवासस्थानं रामायणं इति कथ्यते। रामायणं भारतवर्षस्य राष्ट्रियं काव्यमस्ति। भारतीयानां संस्कृति-सभ्यता च रामायणाध्ययनेन प्रकाशं आयाति।

रामायणस्य क्रमः—संस्कृतसाहित्ये रामायणपदेन वाल्मीकिविरचितं रामायणमेव प्रसिद्ध्यति। भारतीयैः रामायणम् आदिकाव्यं वाल्मीकिश्च तत्प्रणेतृत्वाऽऽदिकविः अभिधीयते। रामायणं महाभारतात् प्राचीनम्। रामायणे गंगाशोणयोः संगमात् श्रीरामगमनं वर्णितमस्ति। रामायणस्य रचनाकालः खीष्टपूर्व-पञ्चमशतकात्पूर्वमेव मन्यते। भारतस्य काप्येतादृशी भाषा नास्ति यत्र रामायणस्यानुवादो न जातः स्यात्। वैदेशिक्यो भाषा अपि रामायणस्यानुवादेनात्मानं धन्यं मन्यते। श्रीरामचन्द्रः आदर्शभ्राता आदर्शपतिः आदर्शपुत्रः आदर्शशासकः आदर्शमनुष्य-श्चासीदिति समर्थयितुमेव रामायणं निरमीयत, यत्र लक्ष्यं तत्सफलमभूत्। रामायणे चतुर्विंशतिः सहस्राणि श्लोकानामिति तत् चतुर्विंशतिसाहस्री संहितापदेनाभिधीयते। यावत् पर्यन्तं कवेः समक्षं वर्णनीयं वस्तु नागतं तावदयं मौनमादधौ, यदैव क्रौञ्चवधं करुणरसं दृष्टवान्, तदैवाकस्मादेवास्य मुखात् काव्यप्रवाहो निर्गतः, तदस्य काव्ये करुणरस एव प्रधानत्वं भजते। कविताया लोकहितमुद्देश्यं स्यादिति वाल्मीकिना कदापि न विस्मृतम्। अत एव चरित्रसृष्टौ वर्णने वा सर्वत्र कविरुच्चमादर्शं विचारं च व्यञ्जितवान्।

रामायणे कोशलनरेशस्य राजधानी 'अयोध्या' इति वर्णिता अस्ति। परन्तु बौद्ध-जैनग्रन्थेषु नगरमिदं 'साकेत' नाम्ना प्रसिद्धं दृश्यते। रामायणे दक्षिणभारतस्य बहुतर-प्रदेश-भूभागं अरण्यरूपेण वर्णितमस्ति। यत्र वानरजातिविशेषाः निवसन्ति स्म। रामायणे वैशाली-मिथिला चेति द्वे राज्ये वर्णिते स्तः।

रामायणस्य रचनाकालः बुद्धस्य प्रादुर्भावात् प्रागेव सिद्ध्यति। सर्वैः ख्यातिप्राप्ताः कवयः समालोचकाः रामायणे मुख्यो रसः करुण इति स्वीकृतश्च। आनन्दवर्धनाचार्येणोक्तं– "रामायणे हि करुणो रसः। स्वयमादिकविना सूचितः शोकः श्लोकत्वमागतः इत्येवंवादिना निर्व्यूढश्च। रामायणं न केवलं काव्यग्रन्थः, अपितु धर्मग्रन्थोऽप्यस्ति। मध्यकाले रामायणस्य लोकप्रियतात्यधिकाऽऽसीत्। अतः क्रमशः पञ्चदश, षोडश, सप्तदशशताब्दीषु रामायणस्य दशाधिकाः टीकाः जाताः। संसारे किमपि काव्यं लोकप्रियतायां रामायणस्य समतां कर्तुं न क्षमते, अत एव चास्य प्रचारोऽपि पूर्णतया जातः। वैदेशिक्यो भाषा अपि रामायणस्यानुवादेनात्मनं धन्यं मन्यते।

> **मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
> **यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।**
> (वा०रामायणे 1/2/15)

तमसा नदीतीरे व्याधः कश्चन क्रौञ्चमिथुनादेकमवधीत्। हृदयविदारिकां तद्घटनां दृष्ट्वा वाल्मीकिः स्वीयामनुभूतिं श्लोकरूपेण व्यक्तीकृतवान्। अर्थात् शोकः श्लोकत्वमागतः एषानुभूतिरेव रसानुभूतिरिति कविना परिभाषायाम् उच्यते। तस्य मुखाद् इदं वचनं श्लोकरूपैव निःसृतम्। तदनन्तरं तस्य समीपे जगत्स्रष्टा ब्रह्मा समुपस्थितः अभूत् वाल्मीकिं च उवाच? भो महर्षे त्वं रामस्य चरितं लिख। स रामस्य जीवनमाश्रित्य रामायणाख्यस्य महाकाव्यस्य रचनायां तत्परोऽभवत्। अस्मिन् काव्ये 24, 000 श्लोकाः तथा सप्तकाण्डानि सन्ति।

अस्मिन् रामायणमहाकाव्ये भाषायाः मधुरता, ओजःप्रसादगुण-समन्विता, रचनाशैली-कुशला, मनोहारि-भावनां भव्यता, रसानामास्वाद्यता, भारतीय-संस्कृतेः उपयोगिता, सभ्यतायाः सुस्पष्टचित्रता, आचार-संहितायाः सार्थकता, नीतिशिक्षायाः संग्राहकता, अलङ्काराणामाकर्षकता, विभिन्नशास्त्राणामुपादेयता, छन्दसां संगीतता (प्रवाहः) इत्यादयः विद्यते। रामायणमहाकाव्यं स्वदेशे विदेशे सर्वत्रैव विख्यातास्ति। इदं महाकाव्यं सार्ववर्णिकाणां शिक्षितानाम्-अशिक्षितानाम्, बालानां वृद्धानाम्, स्त्रीणां पुरुषाणां च समस्तानामेव भारतीयानां जनानां कृते सार्वकालिको

मनीषिमान्यो मानवधर्मग्रन्थो जातोऽस्तीति विद्वज्जना जानन्त्येव। श्रीभोजराजो रामायणचम्पूग्रन्थे तं मधुररचना-प्रचारचतुरं कवीनां मार्गदर्शकं चेति मन्यते-

> **मधुमयभणितीनां मार्गदर्शी महर्षिः।**
> (रामायणचम्पू-1/8)

तदुक्तमपि-

> **रामायणं नाम परं तु काव्यं**
> **सुपुण्यदं वै शृणुत द्विजेन्द्राः।**
> **यस्मिञ्छ्रुते जन्मजरादिनाशो**
> **भवत्यदोषः स नरोऽच्युतः स्यात्।।**

रामायणे आख्यानानि—आदिकाव्यरामायणे रामकथा-मतिरिच्य कतिचन मूलकथासम्बद्धाख्यानकानि कतिचन प्रसङ्गवशात् आख्यानानि उपलभ्यन्ते। यथा- (क) शुनःशेपाख्यानकम् (हरिश्चन्द्रोपाख्यानम्)। अत्र महर्षिविश्वामित्रस्य उपदेशेन अजीगर्तपुत्रः शुनःशेपः वरुणदेवं पूजयित्वा स्वस्य प्राणरक्षां कृतवान्। (ख) बालकाण्डम्-ऋष्यशृङ्गः अङ्गदेशाधिपतिः रोमपादस्य जामाता आसीत्। एतेषाम् आध्यक्ष्ये एव राज्ञः दशरथस्य पुत्रेष्टियज्ञः अभवत्। गङ्गावतरणाख्यानम्-राज्ञः सगरस्य अश्वमेधयज्ञादारभ्य तस्य प्रपौत्रेण भगीरथेन महता तपस्यया पृथिव्यां गङ्गावतरणस्य कथा बालकाण्डे वर्णिता अस्ति। (ग) रामायणे मरुतानामुत्पत्त्याख्यानम्, अहल्योद्धाराख्यानम्, कार्तिकेयोत्पत्त्याख्यानम्, मैत्रावरुणाख्यानम्, अष्टावक्राख्यानम्, मेनका-विश्वामित्राख्यानम्, पुरुरवाख्यानम् इत्यादीनि उल्लेखनीयानि सन्ति। एकश्लोकी-रामायणोपाख्यानानि-

> **आदौ रामतपोवनादिगमनं हत्वा मृगं काञ्चनं**
> **वैदेहीहरणं जटायुमरणं सुग्रीवसम्भाषणम्।**
> **बालीनिग्रहणं समुद्रतरणं लङ्कापुरीदाहनं**
> **पश्चाद्रावणकुम्भकर्णहननमेतद्धि रामायणम्।।1।।**
> (रामायणे)

> **चरितं रघुनाथस्य शतकोटिप्रविस्तरम्।**
> **एकैकमक्षरं पुंसां महापातकनाशनम्।।**

रामायणकालिकः समाजः—संस्कृतसाहित्ये रामायणपदेन वाल्मीकिविरचितं रामायणमेव प्रसिद्ध्यति। रामायणकालीनसमाजे परिवारस्य स्वरूपं पितृसत्तात्मकम् आसीत्। यथा-'पितरि शुश्रूषा तस्य वा वचनक्रिया'। पितुराज्ञया एव रामः वनम् अगच्छत्। पतिव्रता-स्त्रीषु सीता-कौशल्या-अनसूया-सुलोचना-इत्यादीनि नामानि प्रसिद्धानि आसन्। शिक्षायाः स्वरूपं मौखिकम् आसीत्। बालकाः प्रायः गुरुकुलेषु आचार्याणां सान्निध्ये उषित्वा अध्ययनं कुर्वन्ति स्म। वेदविद्यायाः अध्ययनन्तु सर्वेभ्य एव अत्यावश्यकमासीत्। तदानीं चत्वारः वर्णाः ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्राश्च, चत्वारः आश्रमाः–ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासाश्रमाः षोडशसंस्काराश्च–विवाहः, यज्ञोपवीतः इत्यादिः प्रचलिताः आसन्। रामायणकालीनसमाजे अष्टविधाः विवाहाः प्रचलिता आसन्। भारतीयसमाजस्य स्थितिः उन्नता आसीत्। समाजे सर्वेषामेव सुख-सौविध्यानि एवम् उन्नतेः अवसराः सम्प्राप्ता आसन्। अस्मिन् काव्ये 'कर्तव्यशिक्षा' सर्वजनोपयोगित्वं वर्तते। यथा-1. पितरं प्रति पुत्रस्य कर्त्तव्यम्, 2. भ्रातरं प्रति अनुजस्य कर्त्तव्यम्, 3. पतिं प्रति पत्न्याः कर्त्तव्यम्, 4. राजानं प्रति अमात्यस्य कर्त्तव्यम्, 5. स्वामिनं प्रति सेवकस्य कर्त्तव्यम्, 6. मित्रं प्रति मित्रस्य कर्त्तव्यम्, 7. प्रजाजनान् प्रति राज्ञः कर्त्तव्यम्। एतेनैव च हेतुना भारतवर्षस्य क्षेत्रे क्षेत्रे, कोणे कोणे, गेहे गेहे, जने जने च महाकाव्यरामायणं प्रति हार्दिकी श्रद्धा दृश्यन्ते।

भारतीयैः रामायणम् आदिकाव्यं वाल्मीकिश्च तत्प्रणेतृतयाऽऽदिकविः अभिधीयते। रामायणं महाभारतात् प्राचीनम्। रामायणस्य रचनाकालः खीष्टपूर्वपञ्चम-शतकात्पूर्वमेव मन्यते। भारतस्य काप्येतादृशी भाषा नास्ति यत्र रामायणस्यानुवादो न जातः स्यात्। वैदेशिक्यो भाषा अपि रामायणस्यानुवादेनात्मानं धन्यं मन्यते। श्रीरामचन्द्रः आदर्शभ्राता आदर्शपतिः आदर्शपुत्रः आदर्शशासकः आदर्शमनुष्य-श्चासीदिति समर्थयितुमेव रामायणं निरमीयत, यत्र लक्ष्ये तत्सफलमभूत्। रामायणे चतुर्विंशतिसहस्राणि श्लोकानामिति तत् चतुर्विंशतिसाहस्री संहितापदेनाभिधीयते। यावत् पर्यन्तं कवेः समक्षं वर्णनीयं वस्तु नागतं तावदयं मौनमादधौ, यदैव क्रौञ्चवधं करुणरसं दृष्टवान्, तदैवाकस्मादेवास्य मुखात् काव्यप्रवाहो निर्गतः, तदस्य काव्ये करुण रस एव प्रधानत्वं भजते। कविताया लोकहितमुद्देश्यं स्यादिति वाल्मीकिना कदापि न विस्मृतम्। अत एव चरित्रसृष्टौ वर्णने वा सर्वत्र कविरुच्चमादर्शं विचारं च व्यञ्जितवान्। सामान्यरूपेण सर्वजनानां पुरुषाणां-स्त्रीणाम्, ज्ञानीनाम्-अज्ञानाम्, धनिनां-निर्धनानाम्, आबालवृद्धं कण्ठाभरणताम् आपद्यते।

रामायणं सर्वत्र आद्रियते, भक्तानां भवनेषु च प्रतिदिनं पारायणीक्रियते। सत्यं कथ्यते भगवता वाल्मीकिना–

यावत् स्थास्यन्ति गिरयः, सरितश्च महीतले।
तावत् रामायणकथा, लोकेषु प्रचरिष्यति॥
(रामा०वालका०2/36)

रामायणस्य उपजीव्यत्वं प्रेरकत्वं वा–रामायणस्य उपजीव्यकाव्यानि नाटकानि च उद्यन्ति। यथा काव्यग्रन्थाः– (क) कालिदासस्य रघुवंशमहाकाव्यम्, (ख) कुमारदासस्य जानकीहरणम्, (ग) प्रवरसेनस्य सेतुबन्धः, (घ) क्षेमेन्द्रस्य रामायणमञ्जरी, (ङ) भट्टिमहोदयस्य भट्टिकाव्यम्। अन्यरामायणग्रन्थाः:–1. आध्यात्मरामायणम्, 2. अद्भुत-रामायणम्, 3. अगस्त्यरामायणम्, 4. आनन्दरामायणम्, 5. मकरन्दरामायणम्, 6. भुसुण्डिरामायणम्। नाटकानि–1. भासस्य प्रतिमानाटकम् अभिषेकनाटकम्। 2. मुरारिकवेः–अनर्घराघवम्, 3. भवभूतेः–महावीरचरितम्, उत्तररामचरितञ्च, 4. दिङ्नागस्य कुन्दमाला, 5. जयदेवस्य–प्रसन्नराघवम्, 6. दामोदरमिश्रस्य–हनुमन्नाटकम्। चम्पूकाव्यानि– 1. भोजराजस्य रामायणचम्पूः, 2. आनन्दभट्टस्य–रामकथा, 3. वेंकटाध्वरेः–उत्तरचम्पू, 4. लक्ष्मणभट्टस्य–चम्पूरामायणम्। काव्यविद्या-विद्भिः सुमहद्भिः अनेकैः काव्यकारैः महर्षिवाल्मीकिप्रणीताद् रामायणादेव कथानकांशं गृहीत्वा शैलीलीलाविलासं वा समादाय स्वीयानि स्वीयानि काव्यानि विरचितानि सन्ति।

रामायणस्य साहित्यिकं महत्त्वम्–आदिकाव्यं रामायणं संस्कृतवाङ्मयस्य अनुपमं रत्नं वर्तते। काव्यक्षेत्रे एतस्य विलक्षणं साहित्यिकमहत्त्वं वर्तते।

1. **रसः**– अत्र करुणरसस्य प्राधान्यम् रामायणे हि करुणो रसः।

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥
(वा०रामायणे 1/2/15)

2. **छन्दः**–आदिकविर्वाल्मीकिमुखात् निर्गतस्य अनुष्टुप्-छन्दसः एव अत्र प्राधान्यं वर्तते। सर्गान्ते अन्यच्छन्दांसि अपि प्राप्यन्ते।

3. **अलङ्कारः**–रामायणे अनुप्रास-उपमा-रूपक-उत्प्रेक्षा-अनन्वय-अर्थान्तरन्यासादिशब्दार्थालङ्काराः स्वाभाविकतया प्रयुक्ताः।

4. **भाषाभावश्च**–काव्यसौन्दर्यदृष्ट्या भाषा सहजा सरला प्रवाहात्मिका च वर्तते।

5. **रामायणे पञ्चसन्धयः**–बालकाण्डयोध्याकाण्डयोः मुखसन्धिः, अरण्यकाण्डे प्रतिमुखसन्धिः, किष्किन्धाकाण्डे गर्भसन्धिः, सुन्दरकाण्डे विमर्शसन्धिः, युद्धकाण्डे निर्वहणसन्धिः च विद्यते।

तस्मात् सत्यमेव शार्ङ्गधरो उवाच–

कवीन्दुं नौमि वाल्मीकिं यस्य रामायणीं कथाम्।
चन्द्रिकामिव चिन्वन्ति चकोरा इव साधवः।
(शा०प०-172)

सत्यं कथ्यते भगवता वाल्मीकिना–

यावत् स्थास्यन्ति गिरयः, सरितश्च महीतले।
तावत् रामायणकथा, लोकेषु प्रचरिष्यति॥
(रामा०वालका०2/36)

रामायणे यथास्थानं सर्वेषामपि रसानाम् अभिव्यक्तिः अवलोक्यते। कथितं च–

हास्य-शृङ्गार-कारुण्य-रौद्र-वीर-भयानकैः।
बीभत्साद्भुत-संयुक्तं काव्यमेतदगायताम्॥
(रा०वालका०4/9)

रामायणे भारतीयसंस्कृत्याः समुज्ज्वलं सुन्दरं एवं स्वाभाविकं चित्रणं प्राप्यते। स्कन्दपुराणे सत्यमुक्तम्–

रामायणं महाकाव्यं सर्ववेदेषु सम्मतम्।
सर्वपापप्रशमनं दुष्टग्रहनिवारणम्॥
धर्मार्थकाममोक्षाणां हेतुभूतं महाफलम्।
अपूर्वं पुण्यफलदं शृणुध्वं सुसमाहिताः॥
(स्कन्दपुरा०)

कविताकल्पद्रुमस्य कमनीयकोकिलम् इव वाल्मीकेः कूजनं कस्य नावर्जयति चेतः सचेतसः–

कूजन्तं रामरामेति, मधुरं मधुराक्षरम्।
आरुह्य कविताशाखां, वन्दे वाल्मीकि-कोकिलम्॥
(रामायणे)

रामायणमहाकाव्ये आगमानाम्-उपनिषदां-दर्शनानां-स्मृतीनां-विज्ञानानां-मनोविज्ञानानां-आयुर्वेद-धनुर्वेद-ज्योतिष-तन्त्रादीनां सारः तत्सम्बद्धा उपयोगिनो विषयाः च समुपस्थाप्यन्ते।

(छ) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— रामनवमी कस्मिन् मासे कस्यां च तिथौ भवति?
उत्तरम्—चैत्रशुक्लनवम्याम्।

2. **प्रश्नः**— इक्ष्वाकुवंशस्य राजगुरुः कः ?
उत्तरम्— वसिष्ठः।

3. **प्रश्नः**—पंचशतसर्गात्मकं काव्यं किमस्ति?
उत्तरम्— रामायणम्।

4. **प्रश्नः**—युद्धकाण्डं कस्मिन् काव्ये मिलति?
उत्तरम्— रामायणे।

5. **प्रश्नः**— राज्ञः दशरथस्य पुत्रेष्टियज्ञं कस्य आध्यक्ष्ये अभवत्?
उत्तरम्— ऋष्यशृङ्गस्य।

6. **प्रश्नः**— रावणस्य मातुलः लङ्काद्वीपस्य प्रथमः पालकश्च कः?
उत्तरम्— माल्यवान्।

7. **प्रश्नः**—संस्कृत-साहित्ये आदिकाव्यं किमस्ति?
उत्तरम्— रामायणम्।

8. **प्रश्नः**—आर्षकाव्येषु 'चतुर्विंशतिसाहस्री' काव्यं किमस्ति?
उत्तरम्— रामायणम्।

9. **प्रश्नः**—रामायणे कति काण्डानि सन्ति?
उत्तरम्— 07 सप्त काण्डानि।

10. **प्रश्नः**—रामायणे कति सर्गाः सन्ति?
उत्तरम्— 500सर्गाः।

11. **प्रश्नः**—रामायणस्य प्रणेता कः?
उत्तरम्— वाल्मीकिः।

12. **प्रश्नः**—अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः– इति सूक्तिः कुत्र उपलभ्यते?
उत्तरम्— रामायणे।

13. **प्रश्नः**—स्त्रिया भर्ता हि दैवतम् इति सूक्तिः कुत्र उपलभ्यते?
उत्तरम्— रामायणे।

14. **प्रश्नः**—गंगावतरणाख्यानं कुत्र मिलति?
उत्तरम्— रामायणस्य बालकाण्डे।

15. **प्रश्नः**—प्रतिमानाटकस्य उपजीव्यं किमस्ति?
उत्तरम्— रामायणम्।

16. **प्रश्नः**—कुन्दमाला-नाटकस्य उपजीव्यं किमस्ति?
उत्तरम्— रामायणम्।

17. **प्रश्नः**—भट्टिकाव्यं कस्य उपजीव्यम्?
उत्तरम्— रामायणस्य।

18. **प्रश्नः**—सेतुबन्धः कस्य उपजीव्यम्?
उत्तरम्— रामायणस्य।

19. **प्रश्नः**—'हरिश्चन्द्रोपाख्यानम्' कुत्र प्राप्यते?
उत्तरम्— रामायणे।

20. **प्रश्नः**—वाल्मीकिरामायणस्य सारसंक्षेपः कस्मिन् आख्याने प्राप्यते?
उत्तरम्— रामोपाख्याने।

21. **प्रश्नः**—रामायणे आरम्भिककाण्डानां समीचीनं क्रमं किम्?
उत्तरम्—बालकाण्डम्, अयोध्याकाण्डम्, अरण्य-काण्डम्, किष्किन्धाकाण्डम्।

22. **प्रश्नः**—रामायणे सञ्जीवनौषधिना को वैद्यः लक्ष्मणं पुनरुज्जीवितवान्?
उत्तरम्—सुषेणः।

23. **प्रश्नः**—'एडम्सब्रिज्' इत्यस्य रामायणे केन नाम्ना प्रसिद्धिरासीत्?
उत्तरम्—रामसेतुनाम्ना।

24. **प्रश्नः**— उर्मिला-लक्ष्मणयोः कति पुत्राः ?
उत्तरम्— द्वौ।

25. **प्रश्नः**—क्रौञ्चवध-घटना-सम्बद्ध-काव्यविशेषः कः?
उत्तरम्— रामायणम्।

26. **प्रश्नः**— आर्षकाव्यस्य उदाहरणं किमस्ति?
उत्तरम्— रामायणम्।

27. **प्रश्नः**— सीता 'लवकुशौ' कुत्र प्रसूतवती?
उत्तरम्—वाल्मीकेराश्रमे।

28. **प्रश्नः**— इन्द्रजित् मायया केन अस्त्रेण वानरप्रमुखान् रामलक्ष्मणौ च मूर्छितवान्?
उत्तरम्—ब्रह्मास्त्रेण।

29. प्रश्नः— सीतामपहृत्य गच्छता रावणेन सह प्रथमं कः युद्धमकरोत्?
उत्तरम्—जटायुः।

30. प्रश्नः— वाल्मीकेः पूर्वतनं नाम किमासीत्?
उत्तरम्—रत्नाकरः।

31. प्रश्नः— दशरथस्य पुत्र्याः नाम किम्?
उत्तरम्—शान्ता।

32. प्रश्नः— दशरथस्य तृतीयायाः पुत्रवध्वाः नाम किम्?
उत्तरम्—माण्डवी।

33. प्रश्नः— दशरथः कस्यां पत्न्यां पुत्रद्वयं प्राप्तवान्?
उत्तरम्— कनिष्ठायाम् (सुमित्रा)।

34. प्रश्नः— अशोकवनविध्वंसकः कः?
उत्तरम्—हनुमान्।

35. प्रश्नः— कुम्भनिकुम्भौ कस्य पुत्रौ?
उत्तरम्—कुम्भकर्णस्य।

36. प्रश्नः— कुम्भः केन हतः?
उत्तरम्— सुग्रीवेण।

37. प्रश्नः— निकुम्भः केन हतः?
उत्तरम्—हनुमता।

38. प्रश्नः—ऋष्यशृङ्गमहर्षिः कस्य जामाता?
उत्तरम्—दशरथस्य।

39. प्रश्नः— कैकस्याः कति पुत्राः, के च ते?
उत्तरम्—त्रयः, 1. रावणः, 2. कुम्भकर्णः, 3. विभीषणः।

40. प्रश्नः— कैकस्याः ज्येष्ठपुत्रवधू का?
उत्तरम्—मन्दोदरी।

41. प्रश्नः— 'रावणस्य नाभिमण्डले अमृतभाण्डोऽस्ति' इति कः कथयति?
उत्तरम्—विभीषणः।

42. प्रश्नः— सीताप्रतिकृत्या रामः कं यज्ञं करोति?
उत्तरम्—अश्वमेधयज्ञम्।

43. प्रश्नः— आदिकविः कः?
उत्तरम्— वाल्मीकिः।

44. प्रश्नः— कस्य महर्षेः पत्न्याम् 'इन्द्र' आसक्तः?
उत्तरम्—गौतमपत्न्याम् अहल्यायाम्।

45. प्रश्नः— इन्द्रं कः राक्षसपुत्रो जितवान्?
उत्तरम्—मेघनादः।

46. प्रश्नः— दशरथस्य कुलगुरु कः आसीत्?
उत्तरम्— वशिष्ठः।

47. प्रश्नः— रामायणे कति स्कन्धाः सन्ति?
उत्तरम्— 7 सप्त।

48. प्रश्नः—वाल्मीकि-रामायणे कस्य रसस्य प्रधानता वर्तते?
उत्तरम्—करुण-रसस्य।

49. प्रश्नः— लौकिकसंस्कृत-साहित्यस्य आदिकाव्यं किम्?
उत्तरम्—वाल्मीकिकृतं रामायणम्।

50. प्रश्नः— वाल्मीकिकृतरामायणे कति श्लोकाः सन्ति?
उत्तरम्—24, 000श्लोकाः।

51. प्रश्नः— रामायणस्य रचनाकालः कोऽस्ति?
उत्तरम्—500 ई. पूर्वम्।

52. प्रश्नः— श्रीरामः कस्य महर्षेः यज्ञम् अरक्षत्?
उत्तरम्—विश्वामित्रमहर्षेः।

53. प्रश्नः— 'वानरसेना' कस्मिन् अवतारे विष्णोः आसीत्?
उत्तरम्—श्रीरामावतारे।

54. प्रश्नः— कुञ्जरस्य पुत्री, केसरीनाम्नः पत्नी, हनुमतः माता च का?
उत्तरम्—अञ्जना।

55. प्रश्नः— 'अयोनिजा' इति कस्याः प्रातःस्मरणीयायाः विशेषणम्-?
उत्तरम्—सीतायाः।

56. प्रश्नः— शची-इन्द्रयोः पुत्रस्य नाम किम्?
उत्तरम्—जयन्तः।

57. प्रश्नः— 'अरुन्धती' कस्य ऋषेः पत्नी?
उत्तरम्—महर्षेः वशिष्ठस्य।

58. प्रश्नः— विश्वजित् यज्ञमसौ कृतवान्?
उत्तरम्—रघुः।

59. प्रश्नः— प्रहस्तः केन हतः?
उत्तरम्— लक्ष्मणेन।

60. प्रश्नः— मकराक्षं कः हतवान्?
उत्तरम्— श्रीरामः।

61. प्रश्नः— रामायणस्य रचनाकारः कः?
उत्तरम्—वाल्मीकिः।

62. प्रश्नः— कानि नृपदशरथपुत्र-पुत्रवधूनामानि सन्ति?
उत्तरम्—1. राम-सीता, 2. लक्ष्मण-उर्मिला, 3. भरत-माण्डवी, 4. शत्रुघ्नः-श्रुतिकीर्ति।

63. प्रश्नः—अतिकायः केन हतः?
उत्तरम्—लक्ष्मणेन।

64. प्रश्नः—केन अस्त्रेन लक्ष्मणः अतिकायं अमारयत्?
उत्तरम्—ब्रह्मास्त्रेण।

65. प्रश्नः—कुम्भकरणं कः अमारयत्?
उत्तरम्—श्रीरामः।

66. प्रश्नः—रावणं कः अमारयत्?
उत्तरम्—श्रीरामः।

67. प्रश्नः—मेघनादः केन हतः?
उत्तरम्—लक्ष्मणेन।

68. प्रश्नः—दारुकं कः अमारयत्?
उत्तरम्—लक्ष्मणः।

69. प्रश्नः—नरान्तकः केन हतः?
उत्तरम्—अंगदेन।

70. प्रश्नः—देवान्तकः केन हतः?
उत्तरम्— हनुमता।

71. प्रश्नः—अकम्पनं कः अमारयत्?
उत्तरम्—सुग्रीवः।

72. प्रश्नः—अक्षयकुमारः केन हतः?
उत्तरम्—हनुमता।

73. प्रश्नः—मारीचः केन हतः?
उत्तरम्—श्रीरामेण।

74. प्रश्नः—अहल्यायाः उद्धारः केन कृतः?
उत्तरम्— श्रीरामेण।

75. प्रश्नः—दशरथस्य चतुर्थपुत्रशत्रुघ्नस्य पत्नीनाम किम्?
उत्तरम्— श्रुतकीर्ति।

76. प्रश्नः— दशरथस्य प्रथमपुत्ररामस्य भार्यायाः किं नाम?
उत्तरम्— सीता।

77. प्रश्नः—वशिष्ठस्य पितुर्नाम किम्?
उत्तरम्— मित्रावरुणौ।

78. प्रश्नः— दशरथस्य द्वितीयायाः पुत्रवध्वाः नाम किम्?
उत्तरम्— उर्मिला।

79. प्रश्नः— अहल्या कस्य पुत्री आसीत्?
उत्तरम्—मुद्गलस्य।

80. प्रश्नः— अगस्त्यः कस्य पुत्रः आसीत्?
उत्तरम्— मित्रवर्णस्य।

81. प्रश्नः— अगस्त्यस्य अपरं नाम किम्?
उत्तरम्— कुम्भजः, घटोद्भवः।

82. प्रश्नः— वालिः कस्य राज्यस्य राजा आसीत्?
उत्तरम्— पंपापुरस्य।

83. प्रश्नः— बालिं कः अमारयत्?
उत्तरम्— रामः।

84. प्रश्नः— हनुमतः मातुर्नाम किमासीत्?
उत्तरम्—अंजनी।

85. प्रश्नः— दशरथं कौ अशपताम्?
उत्तरम्— श्रवणस्य पितरौ।

86. प्रश्नः—दशरथस्य पत्नीनां कानि नामानि?
उत्तरम्—कौशल्या, कैकेयी, सुमित्रा।

87. प्रश्नः—जनकपुरे शिवधनुः कः खण्डितवान्?
उत्तरम्— श्रीरामः।

88. प्रश्नः— सीता रामं सर्वप्रथमं कुत्र अपश्यत्?
उत्तरम्— पुष्पवाटिकायाम्।

89. प्रश्नः— रामायणे कियन्ति काण्डानि?
उत्तरम्— (7) सप्त।

90. प्रश्नः— 'शोकः श्लोकत्वमागतः' इयं सूक्तिः केन सम्बद्धा?
उत्तरम्— महर्षिणा वाल्मीकिना।

91. प्रश्नः— सुग्रीवस्य भार्यानाम किम्?
उत्तरम्—लोमा।

92. प्रश्नः— महाबलिबालेः पत्नीनाम किम्?
उत्तरम्—तारा।

93. प्रश्नः— अंगदः कस्य पुत्रः आसीत्?
उत्तरम्— बालेः।

94. प्रश्नः— हनुमान्: कस्य मंत्री आसीत्?
उत्तरम्— सुग्रीवस्य।

95. प्रश्नः— सुग्रीवस्य राजधानी कुत्र आसीत्?
उत्तरम्— किष्किन्धायाम्।

96. प्रश्नः— हनुमान् कस्य अवतारः मन्यते?
उत्तरम्— रुद्रस्य।

97. प्रश्नः— वाल्मीकि-रामायणस्य प्रथम-सप्तमकाण्डे किं मन्यते?
उत्तरम्— प्रक्षिप्तकाण्डम्।

98. प्रश्नः— 'चतुर्विंशतिसाहस्री संहिता' कथ्यते?
उत्तरम्— रामायणम्।

99. प्रश्नः— रामायणे मुख्यरूपेण प्रयुक्तं छन्दः किमस्ति?
उत्तरम्— अनुष्टुप्।

100. प्रश्नः— रामायणस्य अङ्गीरसः कः?
उत्तरम्— करुणः।

101. प्रश्नः— रघुवंशस्य उपजीव्यं काव्यं किमस्ति?
उत्तरम्— रामायणम्।

102. प्रश्नः— रामायणे कति सर्गाः विद्यन्ते?
उत्तरम्— (500)

103. प्रश्नः—आर्षकाव्येषु 'चतुर्विंशतिसाहस्री' संज्ञकं किमस्ति?
उत्तरम्— रामायणम्।

(FF-Code-25) (च) महाभारतम्- (क) महाभारतस्य क्रमः, (ख) महाभारते आख्यानम्, (ग) महाभारतकालिकः समाजः, (घ) महाभारतस्य उपजीव्यत्वं प्रेरकत्वं वा, (ङ) महाभारतस्य साहित्यिकं महत्त्वम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

महाभारतम्—इदं प्रायः सर्वे भारतीया विद्वांसो मन्यन्ते यत् महाभारतं प्राक् जयनाम्ना ततो भारतनाम्ना ततः परतश्च महाभारतनाम्ना प्रसिद्धम्। प्रथमं महाभारतमितिहासः पुराणमाख्यानकञ्चेति नामभिराख्यायते स्म। साम्प्रतिकास्तु महाभारतम् आचारशास्त्रं नीतिशास्त्रं धर्मार्थकाममोक्षाख्य-चतुर्वर्गसाधनं चामनन्ति। भारतं पञ्चमो वेदः इति सर्वत्र प्रचारितम्। एतत्प्रणेत्रा महर्षिणा व्यासेन अस्य 'जयो नामेतिहासोऽयम्' इति नाम चक्रे इति प्रबलं सम्भाव्यते। महाभारतं 24, 000 चतुर्विंशतिसहस्रश्लोकानामासीत्। प्रथमं हि महाभारतम् इतिहास इति पुराणमिति आख्यानमिति च आख्यायते स्म। भारतीयानां मतेन पर्यायवाचिनः खल्वेते त्रयः शब्दाः। नीतिविद्यायाश्च महान् आकारः धर्मार्थकाम-मोक्षचतुर्वर्गस्य प्राप्तिसाधनं खलु महाभारतमिति आशास्यते। अनेन गीताज्ञानेन विश्वस्य भृशमुपकृतमिति सर्वसम्मतम्।

वासुदेवस्य माहात्म्यं पाण्डवानाञ्च सत्यताम्।
दुर्वृत्तं धार्तराष्ट्राणामुक्तवान् भगवानृषिः।।

(क) महाभारतस्य क्रमः—महाभारतस्य प्रगतेः चरणत्रयं विद्यते। प्रथमचरणे जयनामकं काव्यशास्त्रं 8800 श्लोकपरिमितं व्यासकृतं धर्मचर्चामाश्रित्य वैशम्पायनाय श्रावितम्। द्वितीयचरणे-भारतनामकं महाकाव्यं वैशम्पायनकृतं 24 सहस्रश्लोकपरिमितं जनमेजयस्य नागयज्ञे जनमेजयाय श्रावितमभूत्। तृतीयचरणे महाभारतनामकं महाकाव्यमेतत् सौतिकृतम् एकलक्षश्लोकपरिमितं नैमिषारण्ये यज्ञकाले शौनकादिभ्यः ऋषिभ्यः श्रावितमभवत्। कथावस्तु-आदि-सभा-वन-विराट्-उद्योग-भीष्म-द्रोण-कर्ण- साल्व-सौप्तिक-स्त्री-शान्ति-अनुशासन-अश्वमेधा-ऽऽश्रमवासि-मौसल-महाप्रस्थानिक-स्वर्गारोहणाख्यानि अष्टादशपर्वाणि। महाभारतस्य रचनाकालस्तु 500 ई.पू. समयतः परतो न निर्मितं किन्तु कदाचित् पूर्वमेव निर्मितमिति प्रतीयते। अतः महाभारतस्य रचनाकालः 400 ईस्वीतः द्विशतवर्षपूर्वं मन्तव्य इति न्यायसङ्गतं प्रतिभाति। व्यासस्य लक्ष्यं भौतिकजीवनस्यासारतां प्रकाश्य प्राणिनां मोक्षमार्गे प्रवर्त्तनमेव व्यासस्य महाभारतप्रणयने उद्देश्यमासीत्। अत एवात्र शान्तो रसः प्रधानभूतः, वीरस्तु रसोऽङ्गभावं गतः।

(ख) महाभारते आख्यानानि—महाभारतस्य रचयिता कृष्णद्वैपायनवेदव्यासः आसीत्। अस्मिन् महति ग्रन्थे समासेन

वर्णितमितिवृत्तमेतदेव यद् उत्तरभारतस्य राज्ञो दुष्यन्तस्य पुत्रस्य भरतस्य वंशधरस्य शान्तनोः प्रपौत्रौ धृतराष्ट्रपाण्डवौ आस्ताम्। नेत्रहीनत्वात् पाण्डुरेव राजा अभूत्। कालान्तरेण पाण्डुः पञ्चत्वं गतः। धृतराष्ट्रस्य शतपुत्राः पाण्डोश्च पञ्चपुत्राः आसन्। द्यूतक्रीडायां पराजिताः पाण्डवाः द्वादशवर्षपर्यन्तं वनवासस्य वर्षैकञ्च यावताज्ञातवासस्य कठिनां यातनामसहन्। 'सूच्याग्रं नैव दास्यामि विना युद्धेन केशव' इति दुर्योधनस्य निश्चयेन पाण्डव-कौरवयोर्मध्ये कुरुक्षेत्रेऽष्टादशदिवसपर्यन्तं तुमुलं युद्धं सञ्जातः। दुर्योधनः पराजितः विजयस्तु पाण्डवानां हस्ते जातम्। तेषां ज्येष्ठः युधिष्ठिरः राजसिंहासनमतिष्ठत्। महाभारते अनेकाः कथाः ग्रन्थिताः सन्ति, यथा समस्तपञ्चकक्षेत्रस्य वर्णनं, जनमेजय-सरमायाः शापवर्णनं, आरुणिगुरुभक्तिकथा, उपमन्युकथा, वेदोक्त उत्तङ्कस्य गुरुभक्तिः उत्तङ्कस्य सर्पयज्ञस्य कृते जनमेजय-प्रोत्साहनस्य चर्चा कौरवपाण्डवयोः मध्ये प्रचलितयुद्धस्य वर्णनम् एतादृशानि अनेकानि आख्यानान्युपाख्यानानि सन्ति महाभारते। मुख्याख्यानकानि-कद्रूविनतोपाख्यानम् (आदिपर्वः), शकुन्तलोपाख्यानम् (आदिपर्वः), ययात्युपाख्यानम् (आदिपर्वः), शिशुपालोपाख्यानम् (सभापर्वः), मत्स्योपाख्यानम् (वनपर्वः), नलोपाख्यानम् (वनपर्वः), शिव्युपाख्यानम् (वनपर्वः), सावित्र्युपाख्यानम् (वनपर्वः), अम्बोपाख्यानम् (उद्योगपर्वः)।

(ग) महाभारतकालिकः समाजः—महाभारतं भारतस्य तत्कालीनाः धार्मिक-सामाजिक-राजनीतिक-क्रियायाः, परम्पराः उपस्थापयति। बहवः वीराः, नीतिज्ञाः सज्जनजनाः अपि नायक-खलनायकस्य अभिनय-कर्तुः रूपेण समाहिताः सन्ति। पञ्चकन्यकायाः अपि वर्णनं अस्मिन् महाभारते वर्तते। तदानीं चत्वारः वर्णाः ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्राश्च, चत्वारः आश्रमाः—ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासाश्रमाः षोडशसंस्काराश्च—विवाहः, यज्ञोपवीतः इत्यादयः प्रचलिताः आसन्। तदानीं समाजे अष्टविधाः विवाहाः, बहुपत्निविवाहप्रथा अपि प्रचलिता आसीत्। सतीप्रथाऽपि प्रचलिता आसीत्। तात्कालिक-कुन्ती-द्रौपदी-गान्धारी-सुभद्रादिषु नारीषु दायित्वबोधः आसीत्। तदानीं मातृपितृगुरूणां पूजनीयं स्थानम् आसीत्। महाभारतकाले प्रायः समाजस्य वातावरणं प्रदूषणयुक्तम् एवं विशेषतः राजपरिवारेषु अनीतिपूर्णा व्यवस्था स्थापिता आसीत्। समाजे अस्थिरता, जनेषु भौतिकान् पदार्थान् प्राप्तुमिच्छा, अहंभावप्रदर्शनस्य प्रबलोत्कण्ठा आसन्।

महर्षिव्यासो वर्षत्रयेण एतत् महाकाव्यं प्रणिनायेति तद्वचनादेव विज्ञायते। यथा—

त्रिभिर्वर्षैः सदोत्थाय कृष्णद्वैपायनो मुनिः।
महाभारतमाख्यानं कृतवानिदमुत्तमम्।।
(महा०1/56/32)

महाभारते लक्षश्लोकाः (शतसाहस्री संहिता) एवं च कथाविभागम् आश्रित्य 18 पर्वाणि सन्ति। महाभारतं भारतीयसभ्यतायाः संस्कृतेश्च भव्यस्वरूपबोधाय ग्रन्थरत्नमिदमावश्यकम्। भगवद्गीता-विष्णुसहस्रनाम-अनुगीता-भीष्मस्तवराज-गजेन्द्रमोक्ष-संज्ञकं च रत्नप्रदानादेवास्य पञ्चमवेदता। धर्मार्थकाममोक्षविषयकसम्यक् प्रबोधोऽत्रैव द्रष्टुं शक्यते।

महत्त्वाद् भारतत्वाच्च महाभारतमुच्यते।।

महाभारतस्य प्रमुखसन्देशः 'यतो धर्मस्ततो जयः' इति रूपेण प्रतिपादितः। यत्र मानवजीवनस्य सार एव दृश्यते। अस्य सिद्धान्तः निष्कामकर्म विद्यते। यथोक्तं गीतायाम्—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।। (गीता०)

(घ) महाभारतस्य उपजीव्यत्वं प्रेरकत्वं वा—महाभारते विविधमन्त्राणां शास्त्रीयतथ्यानां ज्ञानविज्ञानानां धर्म-श्रौत-गृह्यसूत्राणां कल्पानां स्मृतीनाञ्च दर्शन-पुराण-कला-शिल्पादीनां काव्य-नाटक-उपन्यासप्रभृतीनां समायोजनं समुचितप्रकारेण सन्नद्धम्। गौतम-कणाद-जैमिनि-प्रभृतिभिराचार्यैः महाभारतदर्शनविषयकतथ्यानां उपबृंहणं सूत्ररूपेण कृतम्। ग्रन्थोऽयं भारतीयानां यथार्थ-ज्ञानविज्ञान-शास्त्र-दर्शन-धर्मनीति-आचरणादीनां स्वरूपनिर्धारणे महदुपयोगी विद्यते। विषयतातिशयबाहुल्यसन्निवेशेन महाभारतं नाम ग्रन्थोऽयं **पञ्चमो वेद** अपि नाम्ना आख्यायते। भारतीय-वैदिकधर्मस्य संस्कृत्या च सविस्तरं चित्रणमपि अस्य मुख्यं लक्ष्यमस्ति। भारतीयसाहित्यस्य सर्वश्रेष्ठग्रन्थभगवद्गीता महाभारतस्य एव भागो विद्यते। विष्णुसहस्रनामानुगीतादयः आध्यात्मिकाः भक्तिपूर्णाः ग्रन्थाः अस्मात् ग्रन्थादेव उद्धृताः। व्यासः कर्मवादी आचार्यः। कर्मणा एव मानवः उन्नतिं कीर्तिं च लभते। कर्मणः पराङ्मुखो मानवो मानवो न विद्यते-**प्रकाशलक्षणा देवा मनुष्याः कर्मलक्षणाः।**
(अश्वमेध-43/201)

(क) महाकाव्यानि—माघस्य शिशुपालवधम्, श्रीहर्षस्य नैषधीयचरितम्, भारवेः किरातार्जुनीयम्।

(ख) नाटकानि–भासस्य दूतघटोत्कचम्-दूतवाक्यम्-कर्णभारम्-मध्यमव्यायोगम्-पञ्चरात्रम्-ऊरुभङ्गम् च, कालिदासस्य अभिज्ञानशाकुन्तलम्, भट्टनारायणस्य वेणीसंहारम्, राजशेखरस्य-बालभारतम्।

(ग) चम्पूकाव्यानि–त्रिविक्रमभट्टस्य नलचम्पू, अनन्तभट्टस्य भारतचम्पू, नारायणभट्टस्य पाञ्चालीस्वयंवरचम्पू, चन्द्रस्य द्रौपदीपरिणयचम्पू।

(ङ) महाभारतस्य साहित्यिकं महत्त्वम्– एवं विज्ञायते यत् महाभारतं सर्वप्रधानकाव्यं, सर्वदर्शनानां सारं स्मृति इतिहासचरित्रचित्रणस्य मञ्जूषिका पञ्चमो वेदः च विद्यते। महाभारतं हि नाम प्रौढाकारस्य ग्रन्थः। ग्रन्थोऽयं सहस्राणां हिन्दीसंस्कृतकाव्यानाञ्च उपजीव्यः वर्तते। भारतीयसंस्कृतौ अस्य सर्वाधिकं महत्त्वम्। भारतीयसंस्कृतिपरम्परायाम् इदं महाकाव्यं भारतीयसंस्कृत्याः सकला महदादर्शाः अर्थाश्चात्र विद्यन्ते। धर्मार्थकाममोक्षाणां पुरुषार्थचतुष्टयानां विशद-विवरणात्मकं परमरमणीयमादरणीयञ्च महाकाव्यमिदमस्ति। भारतीयसंस्कृतौ श्रुतिरिव प्रतिष्ठितम्। महाभारतस्य प्रमुखसन्देशः '**यतो धर्मस्ततो जयः**' इति रूपेण प्रतिपादितः। सद्गुणानां विजयोऽपि दर्शितः।

(क) गुणरीतिश्च–काव्यशास्त्रीयदृष्ट्या महाभारते 'पाञ्चालीरीतिः' वर्तते। यथा–

शब्दार्थयोः समो गुम्फः पाञ्चाली रीतिरिष्यते ग्रन्थोऽयम् ओज-प्रसाद-माधुर्यादिभिः सर्वै काव्यगुणैः परिपूर्णोऽस्ति।

(ख) रसः–महाभारते अङ्गीरसः 'शान्तरसः' अस्ति, तथापि भीष्म-द्रोण-कर्ण-शल्यादिषु पर्वसु वीररसस्य धारा अपि प्रवाहिता अस्ति।

(ग) अलङ्कारः–महाभारते शब्दालङ्कारेषु मुख्यरूपेण 'अनुप्रासः' अर्थालङ्कारेषु उपमा-रूपक-उत्पेक्षा-अर्थान्तरन्यासश्च दृश्यते। यथा–भीमो भीमपराक्रमः। अशोकः शोकनाशनः।

(घ) छन्दः–अधिकांशतः अनुष्टुप् छन्दः कुत्रचित् गद्यात्मको भागः अपि दृश्यते। यदा-कदा अन्येषां छन्दसामपि प्रयोगः अस्ति। 'अलंकृतैः शुभैः शब्दैः छन्दोवृत्तैश्च विविधैः' सौति।

(ङ) भाषाशैली–महाभारतस्य संवादात्मिका शैली एवञ्च भाषा सरला, गभीरा प्रभावोत्पादिका विद्यते। यथा–'मुहूर्तं ज्वलितं श्रेयो न च धूमाश्रितं चिरम्' एतेनैव महाकाव्यमेतत् विश्वसाहित्ये 'अनुपमकाव्यम्' अभवत्।

(ज) वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**— गङ्गा शान्तनोः अष्टौ पुत्राः समुत्पन्नाः, तत्र भीष्मः कतमः?
   उत्तरम्— अष्टमः।
2. **प्रश्नः**—महाभारते कः पुत्रानुमत्या दौत्येन च वृद्धावस्थायां विवाहमकरोत्?
   उत्तरम्— शान्तनुः।
3. **प्रश्नः**— वेदव्यासस्य माता का?
   उत्तरम्— सत्यवती।
4. **प्रश्नः**— पाण्डु-धृतराष्ट्र-विदुराणां जनकः कः?
   उत्तरम्— कृष्णद्वैपायनः (व्यासः)।
5. **प्रश्नः**—शकुन्तलोपाख्यानम् महाभारतस्य कस्मिन् पर्वणि प्राप्यते?
   उत्तरम्—आदिपर्वणि।
6. **प्रश्नः**—धृतराष्ट्र-पाण्डु-विदुरेषु त्रिषु कः शूद्रायाम् उत्पन्नः?
   उत्तरम्— विदुरः।
7. **प्रश्नः**— व्यासस्य सम्मुखं का नेत्रे पिधाय गतवती?
   उत्तरम्— अम्बिका।
8. **प्रश्नः**— कस्य महर्षेः शापवशात् यमधर्मराजः शूद्ररूपेण अवतरितः?
   उत्तरम्— माण्डव्यमहर्षेः।
9. **प्रश्नः**— कुन्त्या देवरः कः?
   उत्तरम्— विदुरः।
10. **प्रश्नः**— नकुलसहदेवौ कस्याः पुत्रौ?
    उत्तरम्— माद्र्याः।
11. **प्रश्नः**— गान्धारी कस्य पुत्री?
    उत्तरम्— गान्धारनरेशसुबलस्य।
12. **प्रश्नः**—राजा पाण्डुः हरिणवेषेण स्वपत्न्या सह विहरन्तं मुनिं मारितवान्, तस्य मुनेः नाम किम्?
    उत्तरम्— किन्दमपुनिः।
13. **प्रश्नः**— दुर्योधनप्रभृतीनां कौरवाणां भगिनी का?
    उत्तरम्— दुःशला।

14. **प्रश्नः**—हिडिम्बायां राक्षस्यां भीमसेनादुत्पन्नः पुत्रः कः?
    उत्तरम्—घटोत्कचः।
15. **प्रश्नः**—विराटराजसभायां पाण्डवाः कति वर्षाणि अवसन्?
    उत्तरम्—एकवर्षकालम्।
16. **प्रश्नः**—विराटराज्ये पाण्डवानां कानि नामानि?
    उत्तरम्— युधिष्ठिरः-वैयाघ्रपद्यम्, भीमसेनः-वल्लवः, अर्जुनः-बृहन्नला, नकुलः-ग्रन्थिकः, सहदेवः-अरिष्टनेमिः।
17. **प्रश्नः**—अज्ञातवाससमये पाण्डवपत्न्याः द्रौपद्याः नाम किमासीत्?
    उत्तरम्—सैरन्ध्री।
18. **प्रश्नः**—विराटराज्ञः सेनापतिः कः आसीत्?
    उत्तरम्— कीचकः।
19. **प्रश्नः**—कीचकः कस्याः भ्राता?
    उत्तरम्—सुदेष्णायाः।
20. **प्रश्नः**—उत्तरकुमारस्य रथसारथिः कः आसीत्?
    उत्तरम्—बृहन्नला।
21. **प्रश्नः**—महाभारतयुद्धे भीष्मः कतमे दिवसे बाणैः प्रसाधिताङ्गो निपपात?
    उत्तरम्— दशमे दिवसे।
22. **प्रश्नः**—धृष्टद्युम्नशिखण्डीद्रौपदेयान् पञ्चपुत्रान् च कः जघान?
    उत्तरम्—अश्वत्थामा।
23. **प्रश्नः**—श्रीकृष्णस्य ज्येष्ठपुत्रस्य नाम किम्?
    उत्तरम्—प्रद्युम्नः।
24. **प्रश्नः**—श्रीकृष्णस्य निर्वाणे कस्य व्याधस्य कर्तृत्वमासीत्?
    उत्तरम्—जरसस्य।
25. **प्रश्नः**—बभ्रुवाहनेन कः पाण्डवः निपातितः?
    उत्तरम्—अर्जुनः।
26. **प्रश्नः**—बभ्रुवाहनस्य माता का?
    उत्तरम्— उलूपी।
27. **प्रश्नः**—'इरावतः बभ्रुवाहनः अभिमन्युः'-इत्येते त्रयः कस्य पुत्राः?
    उत्तरम्—अर्जुनस्य।
28. **प्रश्नः**—निषदराजस्य हिरण्यधनुनामकस्य पुत्रः गुरुभक्तश्च कः?
    उत्तरम्—एकलव्यः।
29. **प्रश्नः**—क्रमशः दशदिनानि कौरवसेनापतिः कः आसीत्?
    उत्तरम्—भीष्मः।
30. **प्रश्नः**—अष्टादशादेनानि यावत् प्रवृत्ते कुरुक्षेत्रमहासंग्रामे कति सेनापतयः आसन्?
    उत्तरम्—चत्वारः।
31. **प्रश्नः**—आत्मनो वधोपायं कः स्वयमसूचयत्?
    उत्तरम्—भीष्मः।
32. **प्रश्नः**—महाप्रस्थानसमये धर्मराजं (युधिष्ठिरं) कः पशुः अनुगतवान्?
    उत्तरम्— श्वा (कुक्कुरः)।
33. **प्रश्नः**—'नपुंसको भव'-इति अर्जुनं का शप्तवती?
    उत्तरम्— ऊर्वशी।
34. **प्रश्नः**—पञ्चपाण्डवेषु कः हस्तिनापुरात् बहिः द्वादशवर्षाण्यवसत्?
    उत्तरम्—अर्जुनः।
35. **प्रश्नः**—धृतराष्ट्रस्य मन्त्री कः?
    उत्तरम्—सञ्जयः।
36. **प्रश्नः**—कयोः गुरुशिष्ययोर्मध्ये त्रयोविंशतिदिनानि युद्धमभवत्?
    उत्तरम्—परशुरामभीष्मयोः।
37. **प्रश्नः**—के सन्ति सप्त चिरजीविनः?
    उत्तरम्— अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः। कृपः परशुरामश्च सप्तैते चिरजीविनः॥
38. **प्रश्नः**—महाभारते कानि सन्ति अष्टादश पर्वाणि?
    उत्तरम्—आदि-सभा-वन-विराट्-उद्योग-भीष्म-द्रोण-कर्ण-साल्व-सौप्तिक-स्त्री- शान्ति- अनुशासना-ऽश्वमेधाऽऽश्रमवासि-मौसल-महाप्रस्थानिक- स्वर्गा-रोहणाख्यानि अष्टादशपर्वाणि।

39. **प्रश्नः**—अम्बाकारणात् भीष्मः केन गुरुश्रेष्ठेन सह युद्धं कृतवान्?
उत्तरम्—गुरु-परशुरामेण सह।

40. **प्रश्नः**—महाभारतमतानुसारेण अक्षौहिणीसेनायां अश्वानां संख्या का भवति?
उत्तरम्— 65, 610।

41. **प्रश्नः**—'समन्तपञ्चक' इति पदेन कस्य बोधो जायते?
उत्तरम्— कुरूक्षेत्रस्य।

42. **प्रश्नः**—महाभारतमतानुसारेण उत्तङ्कः कोऽस्ति?
उत्तरम्— गुरुभक्तः।

43. **प्रश्नः**—जनमेजयेन कस्य विदुषः पुरोहितपदम् अलंकृतम्?
उत्तरम्— सोमश्रणस्य।

44. **प्रश्नः**—महाभारतमतानुसारेण 'ऋचीक' शब्दस्य कोऽर्थः?
उत्तरम्— सूर्यः।

45. **प्रश्नः**—'मगधराज-शिरोमणि' इत्युपाधिना कस्य बोधो जायते?
उत्तरम्— जरासन्धस्य।

46. **प्रश्नः**—महर्षिच्यवनस्य पितुः नाम किमासीत्?
उत्तरम्— भृगुः।

47. **प्रश्नः**—श्रीकृष्णद्वैपायनस्य पितुः नाम किमस्ति?
उत्तरम्— पराशरः।

48. **प्रश्नः**—विचित्रवीर्यस्य पत्नी का आसीत्?
उत्तरम्— अम्बिका।

49. **प्रश्नः**— श्रीकृष्णद्वैपायनस्य मातुः नाम किमस्ति?
उत्तरम्— सत्यवती।

50. **प्रश्नः**—गान्धारप्रदेशस्य राजा कः आसीत्?
उत्तरम्— शकुनी।

51. **प्रश्नः**—मधुवंशस्य राजकुमारी का आसीत्?
उत्तरम्— सुभद्रा।

52. **प्रश्नः**—पाञ्चाली-शब्दस्य कोऽर्थः?
उत्तरम्— द्रौपदी।

53. **प्रश्नः**—उत्तरायाः पितुः नाम किम्?
उत्तरम्— मत्स्यराजो विराट्।

54. **प्रश्नः**—भीष्मपितामहस्य पितुः नाम किमस्ति?
उत्तरम्— शान्तनुः।

55. **प्रश्नः**—वीर अभिमन्योः माता नाम किम्?
उत्तरम्— सुभद्रा।

56. **प्रश्नः**—नकुलस्य मातुः नाम किम्?
उत्तरम्— माद्री।

57. **प्रश्नः**—सूतवंशशिरोमणिः कोऽस्ति?
उत्तरम्— लोकहर्षणः।

58. **प्रश्नः**—नृलोके महाभारतस्य कः प्रवचनकर्त्ता?
उत्तरम्— व्यासः।

59. **प्रश्नः**— महर्षिच्यवनस्य मातुः नाम किमासीत्?
उत्तरम्— पुलोमा।

60. **प्रश्नः**—कति प्रजापतयः प्रभवन्?
उत्तरम्— पञ्च।

61. **प्रश्नः**—जनमेजयः कस्य पुत्रः?
उत्तरम्—परीक्षितस्य।

62. **प्रश्नः**—सारमेयः कस्य पुत्रः?
उत्तरम्— सरमायाः।

63. **प्रश्नः**—अरुणः गरुड़स्य कः?
उत्तरम्— अग्रजः।

64. **प्रश्नः**—शेषनागस्य माता का आसीत्?
उत्तरम्— कद्रू।

65. **प्रश्नः**—जरत्का कस्य भगिनी?
उत्तरम्— वासुकेः।

66. **प्रश्नः**—परीक्षितस्य पिता कः?
उत्तरम्—अभिमन्युः।

67. **प्रश्नः**—'गीता' महाभारतस्य कस्मिन् पर्वणि वर्णितः?
उत्तरम्— भीष्मपर्वणि।

68. **प्रश्नः**— उत्तरा का आसीत्?
उत्तरम्— अभिमन्योः पत्नी।

69. **प्रश्नः**— महाभारतस्य लेखकः कः?
उत्तरम्— कृष्णद्वैपायनव्यासः वेदव्यासः।

70. **प्रश्नः**— सुभद्रा कस्य पत्नी आसीत्?
उत्तरम्— अर्जुनस्य।

71. **प्रश्नः**— द्रौपदी का आसीत्?
उत्तरम्— पाण्डवानां पत्नी।

72. **प्रश्नः**— महाभारतः कीदृशः ग्रन्थः अस्ति?
उत्तरम्— ऐतिहासिकः।

73. **प्रश्नः**— महाभारते कस्य रसस्य प्रधानता वर्तते?
उत्तरम्— शान्त-रसस्य।

74. **प्रश्नः**— महाभारतग्रन्थे कति श्लोकाः सन्ति?
उत्तरम्— 1, 00, 000 एकलक्षश्लोकाः।

75. **प्रश्नः**—महाभारतग्रन्थे कति पर्वाणि सन्ति?
उत्तरम्— 18 अष्टादशपर्वाणि।

76. **प्रश्नः**— 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्' इति कस्य ग्रन्थस्योक्तिः?
उत्तरम्— महाभारतस्य।

77. **प्रश्नः**—भीष्म-पितामहस्य युधिष्ठिरं प्रति मोक्षधर्म राजधर्मविषयकोपदेशः कस्मिन् पर्वणि उपलभ्यते?
उत्तरम्— शान्तिपर्वणि।

78. **प्रश्नः**— सत्यभामायाः पिता 'सत्रजित्' नामा सूर्यात् कं मणिं प्राप्तवान्?
उत्तरम्— स्यमन्तकमणिम्।

79. **प्रश्नः**— 'पञ्चमो वेदः' कः कथ्यते?
उत्तरम्— महाभारतम्।

80. **प्रश्नः**— 'हरिवंश-पुराणम्' कस्य काव्यस्याङ्गम्?
उत्तरम्— महाभारतस्य।

81. **प्रश्नः**— 'हरिवंश-पुराणम्' कियत्सु भागेषु विभक्तम्?
उत्तरम्— (3) त्रिषु भागेषु।

82. **प्रश्नः**— 'विष्णुसहस्रनामस्तोत्रम्' इदं कस्यांशः?
उत्तरम्— महाभारतस्य।

83. **प्रश्नः**— 'गजेन्द्रमोक्षः' अयं कस्यांशः?
उत्तरम्— महाभारतस्य।

84. **प्रश्नः**— धर्मे ह्यर्थे च कामे च मोक्षे च भरतर्षभ। यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।। इदं पद्यं केन ग्रन्थेन सम्बद्धम्?
उत्तरम्— महाभारतेन।

85. **प्रश्नः**— श्रीकृष्ण-शंखस्य किं नाम?
उत्तरम्—पाञ्चजन्यः।

86. **प्रश्नः**— श्रीकृष्णस्य गुरोर्नाम किम्?
उत्तरम्— सान्दीपनि।

87. **प्रश्नः**— सान्दीपनस्य पुत्रनाम किम्?
उत्तरम्— पुरन्दरः।

88. **प्रश्नः**— विराट-राजकुमारमुत्तरं कः अमारयत्?
उत्तरम्— शल्यः।

89. **प्रश्नः**—घटोत्कचं कः अमारयत्?
उत्तरम्— कर्णः।

90. **प्रश्नः**— कर्णः केन अस्त्रेण घटोत्कचं हतवान्?
उत्तरम्— इन्द्रप्रदत्तशक्त्यस्त्रेण।

91. **प्रश्नः**— दुःशलायाः पतिः कः आसीत्?
उत्तरम्— जयद्रथः।

92. **प्रश्नः**— मुचुकुन्दः कस्य वंशस्य राजा आसीत्?
उत्तरम्— इक्ष्वाकुवंशस्य राजा।

93. **प्रश्नः**— मुचुकुन्दस्य पितुर्नाम किम्?
उत्तरम्— मान्धाता।

94. **प्रश्नः**— कालयवनं कः दग्धवान्?
उत्तरम्— मुचुकुन्दः।

95. **प्रश्नः**— उग्रश्रवा कस्य पुत्रः आसीत्?
उत्तरम्—लोमहर्षस्य।

96. **प्रश्नः**—युयुधानः कस्य वंशस्य योद्धा आसीत्?
उत्तरम्— वृष्णिवंशावतंसः।

97. **प्रश्नः**— द्रोणाचार्यस्य महान्तः सैन्यसमूहान् कः भूमिगतं कृतवान्?
उत्तरम्— युयुधानः।

98. **प्रश्नः**— काः सन्ति पञ्चकन्यकाः?
उत्तरम्— अहल्या द्रौपदी तारा कुन्ती मन्दोदरी तथा। पञ्चकन्या स्मरेन्नित्यं महापातकनाशनम्।।

99. **प्रश्नः**— 'अवश्यमेव भोक्तव्यं कृत कर्म शुभाशुभम्' कस्येयमुक्तिः?
उत्तरम्—संजयस्य।

100. **प्रश्नः**— राज्ञः परीक्षितस्य कति पुत्राः आसन्, के च ते?
उत्तरम्— चत्वारः, 1. जनमेजयः, 2. श्रुतसेनः, 3. उग्रसेनः, 4. भीमसेनः।

101. **प्रश्नः**— च्यवनपुत्रस्य किं नाम आसीत्?
उत्तरम्— प्रभति।

102. **प्रश्नः**— प्रभतेः भार्यानाम किमस्ति?
उत्तरम्— घृताची नामिका अप्सरा।

103. **प्रश्नः**— प्रभति-घृताच्योः पुत्रनाम किम्?
उत्तरम्— रूरूः।

104. **प्रश्नः**—रूक्मदस्य भगिनी का आसीत्?
उत्तरम्— रूक्मिणी।

105. **प्रश्नः**—रूक्मिणीविवाहं रूक्मदः केन सह निश्चितम्?
उत्तरम्— शिशुपालेन सह।

106. **प्रश्नः**—रूक्मिणी कं पण्डितं कृष्णपार्श्वे प्रेषितवती?
उत्तरम्— सतानन्दपुरोहितम्।

107. **प्रश्नः**—रूक्मिणी कस्य राज्यस्य राजकुमारी आसीत्?
उत्तरम्—कुण्डिनपुरस्य।

108. **प्रश्नः**— भोजस्य दत्तकपुत्री का?
उत्तरम्—कुन्ती।

109. **प्रश्नः**— कुन्ती कस्या आत्मजा आसीत्?
उत्तरम्— सूरसेनस्य।

110. **प्रश्नः**— कुन्ती वशीकरणमन्त्रं केन प्राप्ता?
उत्तरम्— दुर्वाससाः।

111. **प्रश्नः**— गंगापुत्रः कः आसीत्?
उत्तरम्— भीष्मः।

112. **प्रश्नः**— द्रोणाचार्यस्य पत्नी का आसीत्?
उत्तरम्—कृपी।

113. **प्रश्नः**— द्रोणाचार्यः कस्य पिता आसीत्?
उत्तरम्— अश्वत्थाम्नः।

114. **प्रश्नः**— कीचकं कः अमारयत्?
उत्तरम्— भीमसेनः।

115. **प्रश्नः**— कीचकः कस्य राज्यस्य सेनापतिः आसीत्?
उत्तरम्— मत्स्यराज्यस्य।

116. **प्रश्नः**— उत्तरा कस्य पत्नी आसीत्?
उत्तरम्—अभिमन्योः।

117. **प्रश्नः**— छद्मवेशधारी वासुदेवः कः?
उत्तरम्— पाण्डकः।

118. **प्रश्नः**— पाण्डकस्य पत्नीनाम का?
उत्तरम्— तारा।

119. **प्रश्नः**— विष्णोः भार्यायाः किं नाम?
उत्तरम्— लक्ष्मी।

120. **प्रश्नः**— सूर्यस्य भार्यायाः किं नाम?
उत्तरम्—संज्ञा।

121. **प्रश्नः**— गणेशस्य प्रियभोज्यपदार्थं किम्?
उत्तरम्— मोदकम्।

122. **प्रश्नः**— दशावतारक्रमे विष्णोः प्रथमावतारः कः?
उत्तरम्— मत्स्यः।

123. **प्रश्नः**— संस्काराणां का संख्या कथ्यते?
उत्तरम्— 16 षोडश।

124. **प्रश्नः**— सत्यवत्याः पत्युर्नाम किम्?
उत्तरम्— शान्तनुः।

125. **प्रश्नः**— नर्मदा-नदीं धरायां कः आनीतवान्?
उत्तरम्— व्यासः।

126. **प्रश्नः**— 'महाभारते' कस्य वंशस्य इतिहासस्य वर्णनमस्ति?
उत्तरम्— चन्द्रवंशस्य।

127. **प्रश्नः**— सत्यवती कस्य धीवरस्य पुत्री आसीत्?
उत्तरम्—वासुराजस्य।

128. **प्रश्नः**— भीष्मस्य अपरं नाम किम्?
उत्तरम्— देवव्रतः।

129. **प्रश्नः**— कुंती कस्य पुत्री आसीत्?
उत्तरम्— शूरसेन यादवस्य।

130. **प्रश्नः**— द्रौपदी कस्य पुत्री आसीत्?
उत्तरम्—राज्ञः द्रुपदस्य।

131. **प्रश्नः**— अभिमन्युः कस्य पुत्रः आसीत्?
उत्तरम्—अर्जुनस्य।

132. **प्रश्नः**— अभिमन्योः मातुर्नाम किम्?
उत्तरम्— सुभद्रा।

133. **प्रश्नः**— अश्वत्थामा कस्य पुत्रः आसीत्?
उत्तरम्— द्रोणाचार्यस्य।

134. **प्रश्नः**— कृपाचार्यः कस्य पुत्रः आसीत्?
उत्तरम्— शरद्वानस्य।

135. **प्रश्नः**— कृपाचार्यः कस्य पौत्रः आसीत्?
उत्तरम्— गौतमस्य।

136. **प्रश्नः**— विदुरः कस्य पुत्रः आसीत्?
उत्तरम्—व्यासस्य।

137. **प्रश्नः**— व्यासः दिव्यदृष्टिं कस्मै प्रदत्तवान्?
उत्तरम्—संजयाय्।

138. **प्रश्नः**— जयद्रथः कस्य देशस्य राजा आसीत्?
उत्तरम्— सिन्धुदेशस्य।

139. **प्रश्नः**—दुर्योधनस्य भगिन्या दुःशलायाः भर्ता कः आसीत्?
उत्तरम्— जयद्रथः।

140. **प्रश्नः**— जयद्रथं कः अमारयत्?
उत्तरम्— अर्जुनः।

141. **प्रश्नः**— उल्लुकः कस्य पुत्रः आसीत्?
उत्तरम्— शकुनेः।

142. **प्रश्नः**— बलरामस्य पितरौ कौ स्तः?
उत्तरम्— रोहिणी-वासुदेवौ।

143. **प्रश्नः**— अर्जुनं गीतायाः उपदेशं कः दत्तवान्?
उत्तरम्— श्रीकृष्णः।

144. **प्रश्नः**— कृष्णद्वैपायनः कः?
उत्तरम्— वेदव्यासः।

145. **प्रश्नः**— 'जय'नामके ग्रन्थे कति श्लोकाः?
उत्तरम्— 8800।

146. **प्रश्नः**— महाभारते कति श्लोकाः सन्ति?
उत्तरम्— लक्षसंख्यकाः।

147. **प्रश्नः**— 'शतसहस्रीसंहिता' का अस्ति?
उत्तरम्— महाभारतम्।

148. **प्रश्नः**—'भारत'नामके महाकाव्ये कति श्लोकाः आसन्?
उत्तरम्— चतुर्विंशतिसहस्राणि।

149. **प्रश्नः**— महाभारतस्य प्रमुखः छन्दः कः?
उत्तरम्— अनुष्टुप्।

150. **प्रश्नः**— महाभारते अङ्गीरसः कः?
उत्तरम्— वीरः।

151. **प्रश्नः**—अभिज्ञानशाकुन्तलस्य उपजीव्यं काव्यं किमस्ति?
उत्तरम्— महाभारतम्।

152. **प्रश्नः**— महाभारतयुद्धं कति दिनानि यावत् प्राचलत्?
उत्तरम्— (18) अष्टादशदिनानि।

153. **प्रश्नः**—'नलोपाख्यानम्' कुत्र प्राप्यते?
उत्तरम्—वनपर्वणि।

154. **प्रश्नः**— 'जयाख्यम्' काव्यं किमस्ति?
उत्तरम्—महाभारतम्।

155. **प्रश्नः**— ऐतिहासिकं आर्षकाव्यं किमस्ति?
उत्तरम्— महाभारतम्।

156. **प्रश्नः**— उपजीव्यकाव्येषु केषां प्रमुखं स्थानं वर्तते?
उत्तरम्— रामायण-महाभारतयोः।

157. **प्रश्नः**— 'मत्स्योपाख्यानम्' कुत्र प्राप्यते?
उत्तरम्— वनपर्वणि।

158. **प्रश्नः**— 'कर्णभारम्' इति नाटकस्य किमुपजीव्यत्वं प्रेरकत्वं वा?
उत्तरम्— महाभारतम्।

159. **प्रश्नः**— गीतायां 'ज्ञान-कर्म-भक्तिः' समन्वये कृष्णस्य का उक्तिः?
उत्तरम्— मन्मना भव मद् भक्तो मद्याजी मां नमस्तु सः। मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥

160. **प्रश्नः**— पाण्डवानां राजपुरोहितस्य किं नाम आसीत्?
उत्तरम्— धौम्यः।

161. **प्रश्नः**— "शोकः श्लोकत्वमागतः" इयं सूक्तिः केन सम्बद्धा?
उत्तरम्— महर्षिणा वाल्मीकिना।

162. **प्रश्नः**— 'ज्ञानकर्मसन्यासयोगः' इति भगवद्गीतायाः कस्याध्यायस्य नाम?
उत्तरम्— चतुर्थाऽध्यायस्य।

163. प्रश्नः— श्रीमद्भगवद्गीतायाः अनुसारम् आत्मा कुतः श्रेष्ठः?
उत्तरम्— बुद्धेः।

164. प्रश्नः— उद्धव-गीतायाः प्रवक्ता कोऽस्ति?
उत्तरम्— वेदव्यासः।

165. प्रश्नः— आत्मनः अनीश्वरवादस्य वर्णनं कुत्र अस्ति?
उत्तरम्— गीतायाम्।

166. प्रश्नः— 'कर्मण्येवाधिकारस्ते' कस्य ग्रन्थस्य उक्तिरस्ति?
उत्तरम्— गीतायाः।

167. प्रश्नः— श्रीमद्भगवद् गीतायां कति अध्यायाः सन्ति?
उत्तरम्— 18 अष्टदशाध्यायाः।

168. प्रश्नः— गीतायाः उपदेशः कुत्र प्रदत्तवान्?
उत्तरम्— कुरुक्षेत्रे।

169. प्रश्नः— 'योगः कर्मसु कौशलम्' इति कस्मिन् ग्रन्थे अस्ति?
उत्तरम्— गीतायाम्।

170. प्रश्नः— 'राजा कालस्य कारणम्' कस्मिन् ग्रन्थे कथितमस्ति?
उत्तरम्— महाभारते।

171. प्रश्नः— निर्णयसिन्धु इत्यस्य रचनाकारः कः?
उत्तरम्— कमलाकरः।

172. प्रश्नः— कानि पञ्चपाण्डवनामानि सन्ति?
उत्तरम्— 1. युधिष्ठिरः, 2. भीमः, 3. अर्जुनः, 4. नकुलः, 5. सहदेवः।

173. प्रश्नः— महाभारतस्य खिलपर्वं किं कथ्यते?
उत्तरम्— हरिवंशम्।

174. प्रश्नः— महाभारतस्य काभ्यां नामभ्यां प्रसिद्धिरभूत्?
उत्तरम्— प्रथमं-जयः, द्वितीयं-भारतम्।

175. प्रश्नः— श्रीमद्भगवद्गीतायाः एकादशाध्यायस्य नाम किम्?
उत्तरम्— विश्वरूपदर्शनयोगः।

176. प्रश्नः— श्रीमद्गीतायाः अनुसारं बुद्धेः परतः कः?
उत्तरम्— आत्मा।

177. प्रश्नः— भगवद्गीतायां श्लोकसङ्ख्या का?
उत्तरम्— 700 सप्तशतानि।

178. प्रश्नः— 'मामेकं शरणं व्रज' इति कस्मिन् ग्रन्थे अस्ति?
उत्तरम्— गीतायाम्।

(GG.Code.73/25) (झ) (क) पुराणव्युत्पत्तिः परिभाषा च, (ख) पुराणमहत्त्वम्, (ग) महापुराणानि उपपुराणानि च, (घ) पौराणिकसृष्टिविज्ञानम्, (ङ) पुराणानि लौकिककलाश्च, (च) पौराणिकाख्यानञ्च एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

(क) पुराणव्युत्पत्तिः परिभाषा च—धार्मिकदृष्ट्या पुराणस्य महत्त्वमधिकम्। वेदविहितानां धर्माणां सरलसुबोधभाषायां वर्णनं प्राप्यते। यथा—

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति॥

मत्स्यपुराणे कथितं—**पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः** इति। एवं प्रकारेण यद्यपि पुराणस्य विभिन्नानि व्युत्पत्तिलभ्यानि अर्थानि प्रचलन्ति तथाऽपि प्रकृतिदृष्ट्या तस्य लक्षणं भिन्नप्रकारेण परिकल्पितमस्ति। तच्च पञ्चलक्षणात्मकं यथा मत्स्यपुराणे—

सर्गश्चाथ विसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम्॥
(म.पु.43/64)

अर्थात्र जगतः प्रागवस्थामनुक्रम्य विकासक्रमैतिह्यविवरणं सर्गादिरूपेण वाक्यजालं तत्पुराणम्। जगतः सकलवस्तूनामुत्पत्तिः सर्गः। तद्विपरीतो प्रलयः ऋषीणां देवानाञ्च कुलपरम्परावर्णनं वंशः, सृष्टेः कालमानानां मनूनां वर्णनं मन्वन्तरं, महर्षिराजर्षिराज्ञाञ्च चरित्रवंशपरम्परावर्णनं वंशानुचरितम्। श्रीमद्भागवते तु दशलक्षणात्मकं पुराणमिति प्रोक्तं यथा—

सर्गश्चाथ विसर्गश्च वृत्तिः रक्षान्तराणि च।
वंशो वंशानुचरितं संस्था हेतुरपाश्रयः॥
दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः।
केचित् पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया॥
(भाग०पुरा०12/7/20)

अर्थात् पुराणं दशलक्षणं भवति। यथा-1. सर्गः, 2. विसर्गः, 3. वृत्तिः, 4. रक्षा, 5. अन्तराणि, 6. वंशः, 7. वंशानुचरितम्, 8. संस्था, 9. हेतुः, 10. अपाश्रयश्च। पुनश्च श्रीमद्भागवतस्य द्वितीयस्कन्धेऽपि पुराणस्य दशलक्षणमुक्तमस्ति।

पुराणस्य व्युत्पत्तिलभ्यानि अर्थानि—

1. **यस्मात्पुरा ह्यनतीदं पुराणं सैव तत्स्मृतम्।**
निरुक्तस्य यो वेद सर्वपापैः प्रमुच्यते॥
2. पुरा परम्परां वक्ति पुराणं तेन वै स्मृतम्। (वायुपुराणे)
3. पुरा एतदभूदिति पुराणम्। (ब्रह्माण्डपुराणे)
4. पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः। (मत्स्यपुराणे)
5. पुराणं पुरातनवृत्तान्तकथनरूपमाख्यानम्। (सायणः)
6. पुरा नवं भवति। (यास्कः)
7. पुरा भवमिति पुराणम्। (पाणिनिः)
8. पुराणमाख्यानं पुराणम्। (महाभारते)
9. विश्वसृष्टेरितिहासः पुराणम्। (मधुसूदनसरस्वती)
10. वेदाख्यानोपनिबन्धप्रायं पुराणम्। (राजशेखरः)

(ख) पुराणानां महत्त्वम्—भारतीयसंस्कृतेः सभ्यतायाः च अवबोधनाय पुराणानां नितरां महत्त्वमस्ति। पुराणविषये यो निर्देशितः स केवलं आदिमपुराणसम्बन्धको ज्ञेयः, यदा धर्मसिद्धान्ताः तीर्थमाहात्म्यानि धर्माङ्गान्तराणि चेति बहुविधं अर्थजातं न खलु पुराणनिक्षिप्तमभूत्। इदानीं तु पुराणेषु उपदेशप्रकरणानि सङ्ख्यया इतिहासप्रकरणानि अपि वर्तमानानि पश्यामः। तत्र च अनैतिहासिक्यः कथाः, विष्णुदशावतारवर्णनानि, देवपूजाविधयः, पर्व-व्रतनियमाश्चेति नानाविषयाः उपलभ्यन्ते। वेदप्रामाण्येन पुराणप्रामाण्यं खलु प्रख्यायते। वायुपुराणे च वेदपुराणत्वमात्मनः उद्दिष्टम्। पुराणसंख्याविषये मतभेदो नास्ति, सर्ववादिसिद्धं तेषां अष्टादशत्वम्। कस्यापि मानवसमाजस्य इतिहासः तावन्न पूर्णो मन्यते, यावत्तस्य सृष्टेः प्रारम्भकालतः इतिहासो न प्रस्तूयते। पाश्चात्य-शिक्षाप्रभाविता विद्वांसो नैतदनुमोदयन्ति स्म, अत एव ते पुराणानि सत्यानि न स्वीकुर्वन्ति स्म, परं सम्प्रति दृष्टिकोणपरिवर्तनं जातम्। सुसंस्कृतया दृष्ट्या भारतीयमितिहासं जिज्ञासमानानां कृते पुराणानि निधय इव। बहुषु पुराणेषु वेदसंहितानाम्ना तेषां व्यवहारो दृश्यते, वेदाध्ययनेन च यत् फलं तदेव, तद् अतिशयानं वा, फलं पुराणाध्ययनेन निगदितम्। चतुर्वेदज्ञाने सति पुराणज्ञानहीनः न श्रेष्ठः। उक्तं च वायुपुराणे—

यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः।
न चेत् पुराणं स विद्यात् नैव स स्याद् विचक्षणः॥
(वायुपुराण)

धर्मार्थकाममोक्षात्मकचतुर्वर्गसाधनाद् वेदत्वं प्रतिपाद्यते। पुराणं पञ्चमो वेद इति आद्रियते। उक्तं च श्रीमद्भागवतपुराणे—

इतिहासपुराणं च पञ्चमो वेद उच्यते॥ (भा०पु०)

संस्कृतसाहित्ये पुराणानामतीव गौरवास्पदं स्थानं विद्यते। धार्मिकदृष्ट्या एषां महत्त्वमधिकमस्ति। सर्वजनहिताय सर्वजनबोधाय च प्रसादगुणोपेतायाः पद्धत्या समाश्रयेण पुराणानां महत्त्वं प्रतिपदम् आलक्ष्यते। वेदतत्त्वार्थजातं सारल्येन अवगमयितुमेव एतेषां प्रवृत्तिः। वेदविहितानां धर्माणां सरलसुबोधभाषायां वर्णनायैव पुराणानि विरचितानि।

(ग) महापुराणानि उपपुराणानि च—

पुराणस्य पञ्च भेदाः सन्ति—1. महापुराणानि, 2. पुराणानि, 3. उपपुराणानि, 4. पुराणसंहिता, 5. इतिहासश्चेति। गुणसंख्याकालाधारेण पुराणानि त्रिधा विभज्यन्ते। संख्यायां अष्टादशपुराणानीति प्रतिपादितं देवीभागवते आद्याक्षरेण यथा—

म-द्वयं भ-द्वयं चैव ब्र-त्रयं व-चतुष्टयम्।
अ-ना-प-लिङ्ग-कू-स्कानि पुराणानि प्रचक्षते॥

विष्णुपुराणानुसारम् अष्टादशपुराणानि सन्ति। यथा—

ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं यथा।
तथान्यन्नारदीयं च मार्कण्डेयं च सप्तमम्॥
आग्नेयमष्टमञ्चैव भविष्यं नवमं तथा।
दशमं ब्रह्मवैवर्त्तं लैङ्गमेकादशं स्मृतम्॥
वाराहं द्वादशं चैव स्कन्दं चात्र त्रयोदशम्।
चतुर्दशं वामनकं कौर्मं पञ्चदशं तथा॥
मात्स्यं च गारुडं चैव ब्रह्माण्डञ्च ततः परम्।
महापुराणान्येतानि ह्यष्टादश महामुने॥
(विष्णुपुराणे-3/6221-24)

अष्टादशपुराणेषु प्रथमं ब्रह्मपुराणम् अन्तिमं ब्रह्माण्डपुराणं मध्ये ब्रह्मवैवर्तपुराणं च विद्यते। एतेन इदं अवबोध्यते यत् सृष्ट्यादौ ब्रह्मण एव आविर्भूय सर्वमिदं जगत् प्रलये ब्रह्मणि एव लीयते। ब्रह्मसृष्टिं विवर्णयन्ति एतानि महापुराणानि ब्रह्मणः आरभ्य अस्माकं ज्ञानं ब्रह्मपर्यन्तं समुपस्थापयन्ति। अत एवोक्तं हरिवंशपर्वणि-**आदौ अन्ते च मध्ये च हरिः सर्वत्र गीयते** इति। अष्टादशपुराणेषु एक एव भगवान् नारायणो विराजते। उच्यते यथा-

> **अष्टादशपुराणेषु दशभिर्गीयते शिवः।**
> **चतुर्भिर्भगवान् ब्रह्मा द्वाभ्यां देवी तथा हरिः॥**

एतान्येवाष्टादशपुराणानि गुणाधारेण (देवस्तुत्याधारेण वा) सत्त्वरजस्तमस्संकीर्णभेदात् विभज्यन्ते। तत्र विष्णुस्तुतिपरकानि विष्णुभागवतनारदगरुडादीनि सात्त्विकानि। ब्रह्मस्तुतिपरकानि ब्रह्मपद्मब्रह्मवैवर्तादीनि राजसिकपुराणानि। शिवस्तुतिपरकानि शिवमत्स्यकूर्मलिङ्गस्कन्दादीनि तामसिकपुराणानि। महापुराणपुराणोपपुराणपुराणसंहितेतिहासभेदात् पुराणानां पञ्च भेदाः क्रियन्ते। कालक्रमानुसारेणापि वायुब्रह्माण्डादीनि प्राचीनानि, भागवतकूर्मस्कन्दादीनि मध्यकालीनानि अग्नि-विष्णुनारदपुराणानि अर्वाचीनानीति समालोचकैः निर्णीयन्ते। अत्र सात्त्विकानि पुराणानि मोक्षप्रदानि भवन्ति। राजसानि स्वर्गप्रदानि भवन्ति। तामसानि च पुराणानि नरकप्रदानि भवन्ति। कथ्यते यथा-

> **सात्त्विका मोक्षदाः प्रोक्ताः राजसाः स्वर्गदाः शुभाः।**
> **तथैव तामसाश्चेति निरयप्राप्तिहेतवः॥**
> (उ०ख० 236/21)

पुराणानां भेदपरिचयः एवं श्लोकसंख्याः-

1. मत्स्यपुराणे-14000 श्लोकाः,
2. मार्कण्डेयपुराणे-9000 श्लोकाः,
3. भविष्यपुराणे-24, 500श्लोकाः,
4. भागवतपुराणे-18, 000 श्लोकाः,,
5. ब्रह्माण्डपुराणे-12, 200श्लोकाः,
6. ब्रह्मपुराणे-13, 000 श्लोकाः,
7. ब्रह्मवैवर्तपुराणे-18, 000 श्लोकाः,
8. वामनपुराणे-10, 000 श्लोकाः,
9. वराहपुराणे-24, 000श्लोकाः,
10. विष्णुपुराणे-23, 000 श्लोकाः,
11. वायुपुराणे-24, 000श्लोकाः,
12. अग्निपुराणे-16, 000 श्लोकाः,
13. नारदपुराणे-25, 000श्लोकाः,
14. पद्मपुराणे-55, 000 श्लोकाः,
15. लिङ्गपुराणे-11, 000श्लोकाः,
16. गरुडपुराणे-18, 000 श्लोकाः,
17. कूर्मपुराणे-18, 000श्लोकाः,
18. स्कन्दपुराणे-81, 100 श्लोकाः।

अष्टादश-उपपुराणानि-

1. सनत्कुमार, 2. नारसिंह, 3. स्कान्द, 4. शिवधर्म, 5. आश्चर्य, 6. नारदीय, 7. कापिल, 8. वामन, 9. औशनस, 10. ब्रह्माण्ड, 11. वारुण, 12. कालिका, 13. माहेश्वर, 14. साम्ब, 15. सौर, 16. पराशर, 17. मारीच, 18. भार्गव। देवीभागवते स्कन्दस्थाने शिवः, वामन-मानवः, ब्रह्माण्डः-आदित्यः, मारीचः-भागवतः, भागवतः-वसिष्ठः (एतन्नामपञ्चकम्)।

(ङ) पौराणिकसृष्टिविज्ञानम्-पुराणानां पञ्च-लक्षणानाम् मुख्यं लक्षणं सृष्टिः विद्यते। पौराणिकसृष्टिविज्ञाने सांख्यदर्शनस्य सृष्टिविद्या अवबोध्यते। सांख्ये सृष्टेः विकासः प्रधानस्य पुरुषस्य च एतयोः उभयोः तत्त्वयोः पारस्परिकप्रभावस्य तथा संयोगस्य परिणतं फलं वर्तते। एतयोः उत्पत्तिः विष्णोः अस्तित्वम् आश्रितास्ति। विष्णुपुराणे कथितमस्ति यत् विष्णोः परमस्वरूपाद् प्रधानं पुरुषश्च द्वे रूपे उद्भवतः तथा विष्णोः तृतीयरूपद्वारा एतौ उभौ सृष्टिसमये संयुक्तौ भवतः। तथा प्रलयदशायां वियुक्तौ भवतः। भगवतः विष्णोः कालशक्तिद्वारैव विश्वस्य सृष्टिं तथा प्रलयं करोति। पुराणेषु नवविधसृष्टेः वर्णनं प्राप्यते। ब्रह्मपुराणे 1. प्राकृतसर्गः, 2. वैकृतसर्गः, 3. प्राकृत-वैकृतसर्गः प्राकृतसर्गस्य संख्या त्रयः एवं वैकृतसर्गस्य संख्या पञ्च एवं प्राकृत-वैकृतसर्गस्य संख्या एक एवास्ति। एवं सर्गाणां सम्मिलितसंख्या नव अस्ति। अस्मिन् सर्गे ब्रह्मणः मानसात् सनक-सनन्दन-सनातन-सनत्कुमार-नामधेयाः सदैव पञ्चहायनयुक्ताः कुमाराः बालयोगिनः समुत्पन्नाः अभुवन्। विष्णुपुराणानुसारतः अविद्यासर्गः ब्रह्मसर्गान्तर्गतं वर्तते। द्वितीयः भूतसर्गः, तृतीयः तन्मात्राणां सर्गः, इमे त्रयः प्राकृतसर्गाः उच्यन्ते। अस्मादनन्तरं जनानां सृष्टिर्भवति। एते उत्पद्यमानाः जनाः वृक्षाः पशवः देवाः मनुष्याश्च सन्ति। श्रीमद्भागवतस्य तृतीयस्कन्धे

दशमे अध्यायानुसारं सृष्टिभेदाः निर्दिष्टाः तेषामनुसारेण षट् प्राकृतसर्गाः 1. महान्, 2. अहंकारः, 3. भूतानि (तन्मात्राणि), 4. इन्द्रियाणि, 5. देवाः, 6. तमः। त्रयो वैकृतसर्गाः 1. वृक्षाः, 2. तिर्यक्, 3. मनुष्याः इत्थं मतौ मिलित्वा नवधा सृष्टिर्भवति।

(च) पुराणानि लौकिककलाश्च-पुराणः अनन्तज्ञानराशेः भण्डारः अस्ति। पुराणेषु कथाभागस्य अधिकता वर्तते। किन्तु तत्र नाना पाठकेभ्यः अनेका विद्या कलाः, विज्ञानादीनां वर्णनं प्राप्यते। पुराणेषु वर्णितकलायाः विशालता वर्तते। यथा-

1. **वास्तुकला**-पुराणेषु वर्णितगृहनिर्माणकला तत्कालीनसमाजस्य समृद्धतायाः वैभवशालित्वस्य उत्कृष्टतां प्रदर्श्यते। स्थापत्यकलायाः सम्बन्धः वास्तुकलया सह वर्तते। येषु नगरनिर्माणम्, ग्रामनिर्माणम्, भवननिर्माणम्, राजप्रासाद-निर्माणम्, देवमन्दिरनिर्माणम्, शयन-गृहम्, भोजनशाला-गृहम्, आयुध-गृहम्, विभिन्न-प्रतिमा-मन्दिरादिनिर्माणादि श्रेष्ठतया सह वर्णितोऽस्ति। वास्तुकलायाः विशेषविवेचनं मत्स्यपुराणे, अग्निपुराणे, गरुडपुराणे वर्तते। वास्तुशास्त्रस्य प्रमुखाचार्याः- भृगु-अत्रि-वशिष्ठ-विश्वकर्मा-मय-नारद-नग्नजित्-भगवान् शंकर-इन्द्र-ब्रह्मा-कुमार-नन्दीश्वर-शौनक-गर्ग-वासुदेव-अनिरुद्ध-शुक्र-बृहस्पतिः इति अष्टादश वर्तन्ते। अन्धकासुरवधसमये भगवतः शंकरस्य ललाटात् स्वेदबिन्दु-पातेन उत्पन्नः वास्तुपुरुषनाम्नः प्रसिद्धः, तस्य शरीरे 64 एवं 81 देवानां वासस्य चर्चा पुराणेषु वर्णितास्ति।

2. **शिल्पकला**-हस्तयोः सम्पादितविविधकलाः शिल्पविद्यापदवाच्या भवन्ति। 'विश्वकर्मा प्रभासस्य पुत्रः शिल्पी प्रजापतिः' इति कथ्यते। विविधशिल्पानां ज्ञाता वास्तुकारः-रथकारः-मालाकारः-कांस्यकारः-लौहकारः-काष्ठकारः-स्वर्णकारः-मणिकारः-कुम्भकारादिनामभिः ज्ञायते। मत्स्य एवं विष्णुधर्मोत्तरपुराणेषु शिल्पकलायाः विस्तृतवर्णनं प्राप्यते।

3. **चित्रकला**-चित्रकला चित्रशास्त्रं वा अतिप्राचीनविद्या वर्तते। पुराणेषु भगवान् नारायणः अस्याः कलायाः आद्याचार्यः प्रवर्तको वा कथ्यते। भगवान् नर-नारायणः बदरिकाश्रमे इन्द्रमानमर्दनाय त्रैलोक्यसुन्दरी अद्वितीयरूपलावण्यसम्पन्ना उर्वशी नाम्नी अप्सरायाः उत्पद्यते। चित्रकलायाः माहात्म्यविषये कथितमस्ति-

> यथा सुमेरुः प्रवरो नगानां
> यथाण्डजानां गरुडः प्रधानः।
> यथा नराणां प्रवरः क्षितीश-
> स्तथा कलानामिह चित्रकल्पः॥
> (3.43.39)

4. **प्रतिमाशास्त्रं मूर्तिकला वा**-मूर्तिकलाया मुख्यरूपेण शास्त्रानुसारं प्रतिमायाः लक्षणानि निर्दिष्टानि। पुराणेषु विष्णुधर्मोत्तरपुराणे, अग्निपुराणे, मत्स्यपुराणे मूर्तिकलाविषयकवर्णनं वर्तते।

5. **संगीतकला**-भारतीयसाहित्ये गीत-संगीतशास्त्रे भणितमस्ति यत् ये जनाः संगीतकलाविहीनाः ते साक्षात्पशु-सदृशाः भवन्ति। [illegible] वा कथनित्वा अष्टादशविद्यासु स्थानं प्रदीयते। संगीतकलायाः आद्याचार्यः सूत मागधौ स्तः। पुराणेषु [illegible] उल्लेखो प्राप्यते। यथा हाहा हूहू तुम्बुरु नारदः विश्वावसुः, उग्रसेनः, सम्प्रति: [illegible] उर्णायुः, धृतराष्ट्रः, सूर्यवर्चसम्। पौराणिकवाद्ययन्त्रेषु वीणा-वेणु-मृदङ्ग-तूर्य-भेरी-पटह-शंख-काहल-गोमुखाणां नामोल्लेखो प्राप्यते।

6. **नृत्यकला**-पौराणिकसाहित्ये नृत्यकला अपि संगीतकलायाः प्रमुखः अंगः वर्तते। संगीत नृत्यस्य तथा नृत्यं संगीतस्य सहयोगी महान् उपकारी च मन्यते। उभयोः अन्योन्याश्रितः। पुराणेषु देवैः सह अप्सरसां नृत्यप्रसंगः प्राप्यते। लीलापुरुषोत्तमः भगवान् श्रीकृष्णः नृत्यकलायाः पारंगत-आचार्यः आसीत्। गोप्या सह रासक्रीडारतस्य श्रीकृष्णस्य संगीतमयनृत्यः अत्यधिकभावोत्पादकता उत्पद्यते स्म। कथ्यते यथा-

> **रासगेयं जगौ कृष्णो यावत्तारस्वरध्वनिः।**
> **साधु कृष्णेति कृष्णेति तावता द्विगुणं जगुः॥**

(छ) पौराणिकाख्यानम्-पञ्चाङ्गानि पुराणस्य चाख्यानमितरत् स्मृतम् पञ्चलक्षणातिरिक्तं पुराणेषु लोकोपयोगिनः चत्वारः विषयाः विशेषरूपेण संगृह्यन्ते-1. आख्यानम्, 2. उपाख्यानम्, 3. गाथा, 4. कल्पशुद्धिः। पौराणिक आख्यानविषये वेदव्यासस्य कथनम्-

> **आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः।**
> **पुराणसंहितां चक्रे पुराणार्थविशारदः॥**
> (विष्णुपुराणे)

विष्णुपुराणस्य टीकायां आचार्यः श्रीधरः आख्यानविषये कथयति–

स्वयं दृष्टार्थकथनं प्राहुराख्यानकं बुधाः।
श्रुतस्यार्थस्य कथनमुपाख्यानं प्रचक्षते।।

यत्स्वयं दृष्टं स्यात् तत् आख्यानमिति कथ्यते। तथा श्रुतस्य वृत्तस्य कथनमुपाख्यानम् इति कथ्यते। यथा–रामायणस्य रामकथा आख्यानम्, एकदेशे विद्यमानसुग्रीवस्य कथानकः उपाख्यानं वर्तते। आख्यानशब्दस्य प्रयोगः कात्यायनः स्ववार्तिके–"आख्यानाख्यायिकेतिहासपुराणेभ्यश्च" क्रियते। आख्यानं तदस्ति यस्मिन् स्वयं दृष्टार्थस्य कथनं क्रियते अर्थात् एवंविधस्य अर्थस्य प्रकाशनं यस्य साक्षात्कारः वक्त्रा स्वयं कृतोऽस्ति एतद् विपरीतं श्रुतस्य अर्थस्य कथनमुपाख्यानमभिधीयते। अर्थात् वक्तृ-द्वारा परम्परया श्रुतस्य नानुभूतस्य अर्थस्य प्रकाशनम् उपाख्यानशब्देन अभिहितं भवति। अर्थात् आकारेण यत् महत् वा वृहद् भवेत् तद् आख्यानं कथयिष्यते तथा स्वल्पआकारयुक्तं यत्कथानकं भवेत् तदुपाख्याननाम्ना अभिधास्यते।

अतः स्पष्टमस्ति यत्प्राचीनग्रन्थेषु 'आख्यानस्य' एव बहुलप्रयोगः इतिहासाय तथा पुराणाय कृतोऽस्ति। अर्थात् महाभारतग्रन्थः आख्यानम् इतिहासः इतिहासोत्तमः कथयति परन्तु महाभारतं स्वस्मै (आत्मनः कृते) आख्याननामधेयस्यापि प्रयोगं करोति।

वस्तुनिष्ठ प्रश्नोत्तराणि

1. **प्रश्नः**—पुराणस्य लक्षणं किमस्ति?
उत्तरम्— मन्वन्तरं वंशानुचरितं च।

2. **प्रश्नः**—पुराणस्य का परिभाषा?
उत्तरम्— वेदविहितानां धर्माणां सरलसुबोधभाषायां वर्णनमेव पुराणम्।

3. **प्रश्नः**— पुराणानां संख्या कियती।
उत्तरम्— अष्टादश।

4. **प्रश्नः**— के सन्ति अष्टादशपुराणानि?
उत्तरम्—1. मत्यपुराणम्, 2. मार्कण्डेयपुराणम्, 3. भविष्यपुराणम्, 4. भागवतपुराणम्, 5 ब्रह्माण्डपुराणम्, 6. ब्रह्मपुराणम्, 7. ब्रह्मवैवर्त्तपुराणम्, 8. वामनपुराणम्, 9. वराहपुराणम्, 10. विष्णुपुराणम्, 11. वायुपुराणम्, 12. अग्निपुराणम्, 13. नारदपुराणम्, 14. पद्मपुराणम्, 15. लिङ्गपुराणम्, 16. गरुडपुराणम्, 17. कूर्मपुराणम्, 18. स्कन्दपुराणम्।

5. **प्रश्नः**— कति उपपुराणानि, कानि च तानि ?
उत्तरम्— 18-अष्टादश। 1. सनत्कुमारः, 2. नरसिंहः, 3. नन्दः, 4. शिवधर्मः, 5. दुर्वाससः, 6. नारदीयः, 7. कपिलः, 8. वामनः, 9. उशनसः, 10. मानवः, 11. वरुणः, 12. कलिः, 13. महेश्वरः, 14. साम्बः, 15. सौरः, 16. पराशरः, 17. मारीचः, 18. भार्गवः।

6. **प्रश्नः**— 'व'चतुष्टयं किम्?
उत्तरम्— वामनपुराणम्, वराहपुराणम्, विष्णुपुराणम्, वायुपुराणम्।

7. **प्रश्नः**— 'म'द्वयं किम्?
उत्तरम्— मत्स्यपुराणम्, मार्कण्डेयपुराणम्।

8. **प्रश्नः**— 'भ'द्वयं किम्?
उत्तरम्—भविष्यपुराणम्, भागवतपुराणम्।

9. **प्रश्नः**— 'ब्र'त्रयं किम्?
उत्तरम्— ब्रह्माण्डपुराणम्, ब्रह्मपुराणम्, ब्रह्मवैवर्त्तञ्च।

10. **प्रश्नः**— 'अ'एकं किम्?
उत्तरम्— अग्निपुराणम्।

11. **प्रश्नः**— 'ना'एकं किम्?
उत्तरम्—नारदपुराणम्।

12. **प्रश्नः**— 'प' एकं किम्?
उत्तरम्— पद्मपुराणम्।

13. **प्रश्नः**— 'लिं' एकं किम्?
उत्तरम्— लिङ्गपुराणम्।

14. **प्रश्नः**— 'ग' एकं किम्?
उत्तरम्— गरुड़पुराणम्।

15. **प्रश्नः**— 'कू' एकं किम्?
उत्तरम्— कूर्मपुराणम्।

16. **प्रश्नः**— 'स्क' एकं किम्?
उत्तरम्— स्कन्दपुराणम्।

17. **प्रश्नः**—कस्मिन् पुराणे 'ब्रह्म-वैष्णव-शैव-सौर-प्रतिसर्ग' इति पञ्च पर्वाणि सन्ति?
उत्तरम्— भविष्यपुराणे।

18. **प्रश्नः**—ब्रह्म-प्रकृति-गणेश-श्रीकृष्णजन्मखण्डाश्चेति चत्वारः खण्डाः कस्य पुराणस्य सन्ति?
उत्तरम्— ब्रह्मवैवर्तपुराणस्य।

19. **प्रश्नः**— विष्णुपुराणे प्रलयः कतिविधः निर्दिष्टः?
उत्तरम्—चतुर्विधः प्रलयः। (नित्यः, नैमित्तिकः, प्राकृतः आत्यन्तिकश्च।)

20. **प्रश्नः**— भक्तिः कतिधा भवति?
उत्तरम्— नवधा।

21. **प्रश्नः**— ऋषीणां सप्तभेदाः के?
उत्तरम्— ब्रह्मर्षिः, देवर्षिः, महर्षिः, परमर्षिः, काण्डर्षिः, श्रुतर्षिः, राजर्षिः।

22. **प्रश्नः**— 'कालमाधवः' इति कस्य शास्त्रस्य ग्रन्थः?
उत्तरम्— धर्मशास्त्रस्य।

23. **प्रश्नः**—अष्टादशपुराणेषु प्राचीनतमं पुराणं किमस्ति?
उत्तरम्—ब्रह्मपुराणम्।

24. **प्रश्नः**—मौर्यवंशीय-राज्ञां वर्णनं कस्मिन् पुराणे वर्तते?
उत्तरम्—विष्णुपुराणे।

25. **प्रश्नः**— सर्वशास्त्राणां प्रथमं ब्रह्मणा किं स्मृतम्?
उत्तरम्— पुराणम्।

26. **प्रश्नः**— वैजयन्तीकोशग्रन्थस्य अपरं प्रसिद्धं नाम किम्?
उत्तरम्— यादवकोषः।

27. **प्रश्नः**— अमरकोशस्य अपरं नाम किम्?
उत्तरम्—नामलिङ्गानुशासनम्।

28. **प्रश्नः**— पद्मपुराणः कति खण्डेषु विभक्तमस्ति?
उत्तरम्—पञ्चखण्डेषु।

29. **प्रश्नः**— व्यासस्य पितामहः कः?
उत्तरम्—शक्तिः।

30. **प्रश्नः**— 'परोपकारः पुण्याय पापाय परपीडनम्' इति कस्य वचनद्वयम्?
उत्तरम्—व्यासस्य।

31. **प्रश्नः**— 'प्रस्थानत्रयम्' इति प्रसिद्धे ग्रन्थत्रये कोऽयं ग्रन्थः नान्तर्भवति?
उत्तरम्— श्रीमद्भागवतम्।

32. **प्रश्नः**— पुराणेषु 'लक्ष्मीः' कतिभिः नामभिः वर्णिता?
उत्तरम्— 8 अष्टाभिः।

33. **प्रश्नः**— भगवतः विष्णोः कति अवताराः प्रसिद्धाः?
उत्तरम्— 10 दश।

34. **प्रश्नः**—मत्स्यावतारे 'भगवान् विष्णुः' कं राक्षसं हतवान्?
उत्तरम्— हयग्रीवम्।

35. **प्रश्नः**— भगवान् विष्णुः कच्छपरूपं धृत्वा कं अचलम् उत्थापितवान्?
उत्तरम्— मन्दराचलम्।

36. **प्रश्नः**— समुद्रमन्थनात् कः मणिः उद्गतः?
उत्तरम्— कौस्तुभमणिः।

37. **प्रश्नः**— समुद्रमन्थनात् उद्गतस्य अश्वस्य किं नाम?
उत्तरम्— उच्चैःश्रवा।

38. **प्रश्नः**— जले निमग्नां पृथ्वीमुद्धर्तुं 'भगवान् विष्णुः' कम् अवतारम् अगृह्णत्?
उत्तरम्— वराहावतारम्।

39. **प्रश्नः**— वराहावतारे 'भगवान् विष्णुः' कम् अहनत्?
उत्तरम्— हिरण्याक्षम्।

40. **प्रश्नः**— स्तम्भमध्यात् कोऽयं भगवान् प्रकटोऽभूत्?
उत्तरम्—नृसिंहः।

41. **प्रश्नः**— रेणुकाजमदग्न्योः ऋषिदम्पत्योः पुत्रः कः?
उत्तरम्— परशुरामः।

42. **प्रश्नः**— इन्द्रस्य वाहनं किं तस्य नाम च किम्?
उत्तरम्— गजः-ऐरावतः।

43. **प्रश्नः**— नलकूबरः कस्य पुत्रः?
उत्तरम्— कुबेरस्य।

44. **प्रश्नः**— अलकापुरी कस्य राजधानी?
उत्तरम्— कुबेरस्य।

45. **प्रश्नः**—यमधर्मराजस्य पितरौ कौ?
उत्तरम्— संज्ञा-सूर्यौ।

46. **प्रश्नः**— जीवानां शुभाशुभकर्मणोरङ्कनं कः करोति?
उत्तरम्— चित्रगुप्तः।

47. **प्रश्नः**— देवचिकित्सकौ सूर्यपुत्रौ कौ?
उत्तरम्— अश्विनीकुमारौ।

48. **प्रश्नः**— देवसेनापतिः स्कन्दपुराणोपदेष्टा च कः?
उत्तरम्— कार्तिकेयः।

49. **प्रश्नः**— शाल्वदेशस्य राज्ञः सत्यवतः पत्नी का?
उत्तरम्— सावित्री।

50. **प्रश्नः**— 'सत्यवान्' कस्य पुत्रः?
उत्तरम्— द्युमत्सेनस्य।

51. **प्रश्नः**—यमराजं प्रसाद्य स्वपत्युः प्राणान् का पुनः प्राप्तवती?
उत्तरम्—सावित्री।

52. **प्रश्नः**—कोऽयं महर्षि यः ब्रह्म-विष्णु-महेश्वराणां चरित्रं परीक्षितुं गतः?
उत्तरम्— भृगुमहर्षिः।

53. **प्रश्नः**— प्रसिद्धः त्रिशङ्कुपुत्रः कः?
उत्तरम्— हरिश्चन्द्रः।

54. **प्रश्नः**—कुम्भयोनिः, कुम्भजन्मा, घटोद्भवः, कलशयोनिः इति कं कथयन्ति?
उत्तरम्— अगस्त्यमहामुनिम्।

55. **प्रश्नः**— विदर्भराजपुत्री अगस्त्यमुनेश्च पत्नी का?
उत्तरम्— लोपामुद्रा।

56. **प्रश्नः**— 'दम-दान्त-दमन' इति त्रयः कस्याः भ्रातरः?
उत्तरम्— दमयन्त्याः।

57. **प्रश्नः**— दमयंतीं पत्नीत्वेन प्राप्तुं के देवाः नलं दूतरूपेण विदर्भदेशं प्रेषितवन्तः?
उत्तरम्— इन्द्रः वरुणः यमः अग्निः इति चत्वारः।

58. **प्रश्नः**—मूलप्रकृतौ त्रिगुणविक्षोभात् जगतः विविध-पदार्थानां उत्पत्तिरेव कः उच्यते?
उत्तरम्—सर्गः।

59. **प्रश्नः**— 'शर्मिष्ठा' कस्य पुत्री?
उत्तरम्— वृषपर्वणः।

60. **प्रश्नः**—कार्तवीर्यः कस्य देशस्य राजा बभूव?
उत्तरम्— हैहयदेशस्य।

61. **प्रश्नः**—कार्तवीर्यार्जुनं कः अहनत्?
उत्तरम्— परशुरामः।

62. **प्रश्नः**—कोऽयं सूर्यवंशीयो राजा, येन षष्टिसहस्रं पुत्रा उत्पादिता?
उत्तरम्— सगरः।

63. **प्रश्नः**—कोऽयं प्रयत्नः सगरस्य प्रपौत्रनाम्ना अद्यापि प्रसिद्धः?
उत्तरम्— भगीरथप्रयत्नः।

64. **प्रश्नः**—रेणुका कस्य माता आसीत्?
उत्तरम्— परशुरामस्य।

65. **प्रश्नः**— 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' इति पंक्तिरियं कुत्र लभ्यते?
उत्तरम्— वैशेषिकसूत्रसारे।

66. **प्रश्नः**—'काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः' इति श्लोकवाक्यं केन कथितम्?
उत्तरम्— भगवता श्रीकृष्णेन।

67. **प्रश्नः**— आचार्याः स्ववादानुगुणमयोजयन्?
उत्तरम्—अद्वैतवादः-शङ्कराचार्यः, विशिष्य- द्वैतवादः-रामानुजाचार्यः, द्वैतवादः-मध्वाचार्यः, द्वैताद्वैतवादः-निम्बार्काचार्यः, शुद्धाद्वैतवादः- वल्लभाचार्यः।

68. **प्रश्नः**—स्वकनिष्ठिकाङ्गुल्या भगवान् श्रीकृष्णः कं पर्वतम् उद्धृतवान्?
उत्तरम्— गोवर्धनपर्वतम्।

69. **प्रश्नः**— अहिंसायाः अवतारः कः?
उत्तरम्— बुद्धः।

70. **प्रश्नः**— धर्मशास्त्रेषु भगवतो विष्णोः दशमावतारः कः वर्णितः?
उत्तरम्— कल्कि-अवतारः।

71. **प्रश्नः**— विश्वामित्रस्य तपस्याभङ्गं का कृतवती?
उत्तरम्—मेनका।

72. **प्रश्नः**— समुद्रमन्थनात्परं विष्णुः किं रूपं धृत्वा अमृतं पायितवान्?
उत्तरम्— मोहनीरूपम्।

73. **प्रश्नः**—भगवतः कृष्णस्य मातुः नाम किम्?
उत्तरम्— देवकी।

74. **प्रश्नः**—सूर्यदेवः कतिभिः नामभिः पूज्यते?
उत्तरम्— 108 नामभिः।

75. **प्रश्नः**— विष्णोः कति नामानि प्रसिद्धानि?
उत्तरम्— 1000 नामानि।

76. **प्रश्नः**— हस्तस्य भूषणं किम्?
उत्तरम्—दानम्।

77. **प्रश्नः**— केन शुद्धिः?
उत्तरम्—स्नानेन।

78. **प्रश्नः**— केन तृप्तिः?
उत्तरम्— भोजनेन।

79. **प्रश्नः**— केन मुक्तिः?
उत्तरम्— ज्ञानेन।

80. **प्रश्नः**— परोपकाराय के फलन्ति?
उत्तरम्— वृक्षाः।

81. **प्रश्नः**— कानि अष्टगन्धानि?
उत्तरम्—1. अगरः, 2. तगरः, 3. चन्दनम्, 4. कस्तूरी, 5. रक्तचन्दनम्, 6. कुङ्कुमः, 7. देवदारु, 8. केसरः।

82. **प्रश्नः**— के सप्तर्षयः सन्ति?
उत्तरम्—1. मरीच, 2. अंगिरा, 3. अत्रिः, 4. पुलस्त्य, 5. पुलहः, 6. क्रतुः, 7. वशिष्ठः।

83. **प्रश्नः**— काः अष्टसिद्धयः सन्ति?
उत्तरम्—1. अणिमा, 2. महिमा, 3. गरिमा, 4. लघिमा, 5. प्राप्तिः, 6. प्राकाम्यम् 7. ईशित्वम्, वशित्वम्।

84. **प्रश्नः**— काः सप्तमृत्तिकाः सन्ति?
उत्तरम्—1. घोटकशाला, 2. गजशाला, 3. बांबी, 4. सरित्सङ्गमः, 5. तड़ागः, 6. राजद्वारः, 7. वेश्यालयः।

85— **प्रश्नः**— कानि सप्तधान्यानि सन्ति?
उत्तरम्—1. यवः, 2. धान्यम्, 3. तिलः, 4. कंगनी, 5. मुद्गः, 6. चणकः, 7. साँवाँ।

86. **प्रश्नः**— के नवनिधयः सन्ति?
उत्तरम्—1. महापद्मः, 2. पद्म, 3. शङ्खः, 4. कच्छपः, 5. मुकुन्दः, 6. कुन्दः, 7. खर्वः।

87. **प्रश्नः**— के पञ्चवायवः सन्ति?
उत्तरम्— 1. प्राणः, 2. अपानः, 3. व्यानः, 4. उदानः, 5. समानः।

88. **प्रश्नः**— कामस्य के पञ्चशराः सन्ति?
उत्तरम्—1. अरविन्दपुष्पम् (उन्मादक बाण) 2. अशोकपुष्पम् (तापक बाण) 3. चूतपुष्पम् (शोषकबाण) 4. नवमल्लिका (स्तम्भकबाण) 5. नीलोत्पलपुष्पम् (सम्मोहकबाण)।

89. **प्रश्नः**—के पञ्चदेवाः (वृक्षाः) सन्ति?
उत्तरम्—1. आम्रम्, 2. जम्बू, 3. कपित्थः, 4. वटः, 5. बिल्वः।

90. **प्रश्नः**— के सन्ति षोडशोपचाराः?
उत्तरम्—1. पाद्यम्, 2. अर्घ्यम्, 3. आचमनम्, 4. स्नानम्, 5. वस्त्रम्, 6. आभूषणम्, 7. गन्धः, 8. पुष्पम्, 9. धूपः, 10. दीपः, 11. नैवेद्यम्, 12. आचमनम्, 13. ताम्बूलम्, 14. स्तवपाठः, 15. तर्पणम्, 16. नमस्कारः।

100. **प्रश्नः**— देवाणां पञ्चवृक्षाः के सन्ति?
उत्तरम्—मन्दारः, 2. पारिजातः, 3. सन्तानः, 4. कल्पवृक्ष, 5. हरिचन्दनम्।

101. **प्रश्नः**— के षड्रसाः सन्ति?
उत्तरम्— 1. मधुरम्, 2. लवणम्, 3. कटुः, 4. तिक्तः, 5. कषायः, 6. अम्लः।

102. **प्रश्नः**— के सप्तस्वराः?
उत्तरम्—सा रे ग म प ध नि (संक्षेपाक्षर) 1. षड्जः, 2. ऋषभः, 3. गान्धारः, 4. मध्यमः, 5. पञ्चमम्, 6. धैवतः, 7. निषदः।

103. **प्रश्नः**— कानि चतुर्विधवाद्यानि सन्ति?
उत्तरम्— 1. ततः, आनद्धः, 3. सुषिरः, 4. घनः।

104. **प्रश्नः**— के द्विविधनृत्ये स्तः?
उत्तरम्—1. लास्यः, 2. ताण्डवः।

105. **प्रश्नः**— के नवरसाः सन्ति?
उत्तरम्—1. शृंगारः, 2. वीरः, 3. करुणः, 4. हास्यः, 5. रौद्रः, 6. वीभत्सः, 7. भयानकः, 8. अद्भुतः, 9. शान्तः।

106. **प्रश्नः**— के चतुर्दश-मन्वन्तराः सन्ति?
उत्तरम्—1. स्वायम्भुवः, 2. स्वारोचिषः, 3. औत्तमि, 4. तामसि, 5. रैवतः, 6. आयुषः, 7. वैवस्वतः, 8. सावर्णि, 9. दक्षसावर्णि, 10. ब्रह्मसावर्णि, 11. धर्मसावर्णि, 12. रौद्रसावर्णि, 13. रौच्यसावर्णि, 14. भौत्यसावर्णि।

107. **प्रश्नः**— के सप्तसमुद्राः सन्ति?
उत्तरम्—1. क्षीरसागरः, 2. लवणसागरः, 3.

दधिसागरः, 4. घृतसागरः, 5. मद्यसागरः, 6. इक्षुसागरः, 7. स्वादुसागरः।

108. **प्रश्नः**— जम्बूद्वीपस्य नववर्षाः के?
उत्तरम्—1. भारतवर्षः, 2. किम्पुरुषः, 3. हरिवर्षः, 4. रम्यवर्षः, 5. हिरण्यवर्षः, 6. कुरुवर्षः, 7. भद्राश्ववर्षः, 8. केतुमालवर्षः, 9. इलावृत्तवर्षः।

109. **प्रश्नः**— के पञ्चमहायज्ञाः सन्ति?
उत्तरम्—1. ब्रह्मयज्ञः, 2. देवयज्ञः, 3. अतिथियज्ञ, 4. पितृयज्ञः, 5. भूतयज्ञः।

110. **प्रश्नः**—के त्रयः अग्नयः सन्ति?
उत्तरम्— दक्षिणाग्निः, 2. गार्हपत्याग्निः, 3. आहवनीयाग्निः।

111. **प्रश्नः**— जपस्य कं भेदत्रयं अस्ति?
उत्तरम्— 1. वाचिकजपः, 2. उपांशुजपः, 3. मानसिकजपः।

112. **प्रश्नः**— काः षाड्गुण्यनीतयः?
उत्तरम्— 1. सन्धिः, 2. विग्रहः, 3. यानः, 4, आसनः, 5. द्वैधी, 6. आश्रयः।

113. **प्रश्नः**— के चत्वारोपायाः सन्ति?
उत्तरम्— 1. सामः, 2. दामः, 3. दण्डम्, 4. भेदः।

114. **प्रश्नः**— काः अक्षौहिणी सेना सन्ति?
उत्तरम्—गजाः-21, 870, रथिनः-21, 870, अश्वारोहिणः-65, 610, पदातयः-1, 09, 350, सर्वसैनिकाः = 2, 17, 700।

115. **प्रश्नः**— काः दशदिशः सन्ति?
उत्तरम्—1. प्राची, 2. आग्नेयीम्, 3. अवाची, 4. नैर्ऋत्यम्, 5. प्रतीची, 6. वायव्यम्, 7. उदीची, 8. ऐशानम्, 9. ऊर्ध्वम्, 10 अधोदिशः।

116. **प्रश्नः**— कानि पञ्चरत्नानि?
उत्तरम्— 1. सुवर्णम्, 2. हीरकम्, 3. मौक्तिकम्, 4. पद्मरागः, 5. नीलरागः।

117. **प्रश्नः**— 'दुर्गासप्तशती' इत्यस्य वर्णनं कस्मिन् पुराणे वर्तते?
उत्तरम्— मार्कण्डेय-पुराणे।

118. **प्रश्नः**—यज्ञस्य कति प्रकाराः के च ते?
उत्तरम्—5 पञ्च, 1. ऋषियज्ञः, 2. देवयज्ञः, 3. भूतयज्ञः, 4. अतिथियज्ञः, 5. पितृयज्ञः।

119. **प्रश्नः**— 'तमसो मा ज्योतिर्गमय' इदं वाक्यं कस्याम् उपनिषदि?
उत्तरम्— बृहदारण्यकोपनिषदि।

120. **प्रश्नः**— काः सन्ति चतुर्दशविद्याः?
उत्तरम्— अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।
पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश।। (वि.पु.)

121. **प्रश्नः**— काः सन्ति अष्टादशविद्याः?
उत्तरम्— आयुर्वेदो धनुर्वेदो गान्धर्वश्चेत्यनुक्रमात्।
अर्थशास्त्रं परं तस्मात् विद्या ह्यष्टदश स्मृताः।।
(वि.पु.)

122. **प्रश्नः**— कला कतिप्रकारकाः भवन्ति?
उत्तरम्— 64 चतुष्षष्टिप्रकारकाः।

123. **प्रश्नः**— शिल्पं कतिप्रकारकं भवति?
उत्तरम्— 18 अष्टदशप्रकारकम्।

124. **प्रश्नः**— ब्रह्मकर्म कतिप्रकारकं भवति?
उत्तरम्— 9 नवप्रकारकम्।

125. **प्रश्नः**— क्षात्रकर्म कतिविधं भवति?
उत्तरम्— 7 सप्तविधम्।

126. **प्रश्नः**— प्राचीन-भारते काः तिस्रः लिपयः आसन्?
उत्तरम्—1. ब्राह्मीलिपिः, 2. खरोष्ठीलिपिः, 3. सिन्धुलिपिः।

127. **प्रश्नः**— प्राचीन-भारते जातेः आधारः कः आसीत्?
उत्तरम्— गुणः कर्म च।

128. **प्रश्नः**—प्रलयः सृष्टेः पुनः प्रादुर्भावश्च केन नाम्ना उच्यते?
उत्तरम्— प्रतिसर्गेण।

129. **प्रश्नः**—गुप्तसाम्राज्यस्य वर्णनं कस्मिन् पुराणे वर्तते?
उत्तरम्— वायुपुराणे।

130. **प्रश्नः**— कुम्भकेतुं कः हतवान्?
उत्तरम्— प्रद्युम्नः।

131. **प्रश्नः**— कुम्भकेतुदैत्यस्य पत्नी का?
उत्तरम्— कामिनी।

132. **प्रश्नः**— मायावती कस्य पत्नी आसीत्?
उत्तरम्— शम्बरासुरस्य।

133. **प्रश्नः**—यदुवंशविनाशाय कृष्णं का पतिव्रतानारी शापं प्रदत्तवती?
उत्तरम्— कुम्भकेतोः पत्नी कामिनी।

134. **प्रश्नः**—मनोः मनुपुत्राणां देवतायाः, इन्द्रस्य ऋषेः भगवतः अंशावताराणाम् एतेषां षण्णां घटकानां वर्णनं कुत्र अभिधीयते?
उत्तरम्— मन्वन्तरं।

135. **प्रश्नः**— विष्णु-विषयक-पुराणं किं कथ्यते?
उत्तरम्— सात्विकम्।

136. **प्रश्नः**— ब्रह्मविषयक-पुराणं किं कथ्यते?
उत्तरम्— राजसम्।

137. **प्रश्नः**— शिवविषयकपुराणं किं कथ्यते?
उत्तरम्— तामसम्।

138. **प्रश्नः**— अष्टादशपुराणेषु सर्वदीर्घः पुराणः कः, तस्मिन् कति श्लोकाः सन्ति?
उत्तरम्— स्कन्दपुराणम्-81, 100 श्लोकाः।

139. **प्रश्नः**—अष्टदशपुराणेषु सर्वलघुपुराणः कः, तस्मिन् कति श्लोकाः सन्ति?
उत्तरम्— मार्कण्डेयपुराणम्-9000श्लोकाः।

140. **प्रश्नः**— पुराणस्य कानि पञ्चलक्षणानि?
उत्तरम्— 1. सर्गः, 2. प्रतिसर्गः, 3. वंशः, 4. मन्वतरः, 5. वंशानुचरितम्।

141. **प्रश्नः**— पुराणेषु पंचदेवानां कानि नामानि सन्ति?
उत्तरम्— 1. ब्रह्मा, 2. विष्णुः, 3. शिवः, 4. गणेशः, 5. सूर्यः।

142. **प्रश्नः**— कानि दशावतारनामानि सन्ति?
उत्तरम्—1. मत्स्यः, 2. कच्छपः, 3. वराहः, 4. नृसिंहः, 5. वामनः, 6. परशुरामः, 7. रामः, 8. बलरामः, 9. बुद्धः, 10. कल्किः।

143. **प्रश्नः**— कानि नवदुर्गानामानि सन्ति?
उत्तरम्—1. शैलपुत्री, 2. ब्रह्मचारिणी, 3. चन्द्रघण्टा, 4. कूष्माण्डा, 5. स्कन्दमाता, 6. कात्यायनी, 7. कालरात्रिः, 8. महागौरी, 9, सिद्धिदात्री।

144. **प्रश्नः**—सर्वाधिकप्रसिद्धं प्रियतमं च महापुराणं कोऽस्ति?
उत्तरम्—भागवतपुराणम्।

145. **प्रश्नः**— भानामती कस्य धात्री-माता आसीत्?
उत्तरम्— प्रद्युम्नस्य।

146. **प्रश्नः**— कानि द्वादशज्योतिर्लिङ्गनामानि सन्ति?
उत्तरम्—1. सोमनाथः, 2. मल्लिकार्जुनः, 3. महाकालेश्वरः, 4. ओङ्कारेश्वरः 5. वैद्यनाथः, 6. भीमशङ्करः, 7. रामेश्वरः, 8. नागेश्वरः, 9. विश्वनाथः, 10. त्र्यम्बकेश्वरः, 11. केदारनाथः, 12. घुष्मेश्वरः।

147. **प्रश्नः**— पुराणानां रचनाकारः कोऽस्ति?
उत्तरम्— वेदव्यासः।

148. **प्रश्नः**—देवी-संतोषी कस्य पुत्री आसीत्?
उत्तरम्— गणेशस्य।

149. **प्रश्नः**—कस्मिन् पुराणे शिवस्य अष्टाविंशति अवताराणां विस्तरेण सह वर्णनं कृतम्?
उत्तरम्—लिङ्गपुराणे।

150. **प्रश्नः**—श्रीमद्भागवतपुराणे कति स्कन्धाः सन्ति?
उत्तरम्— 12 द्वादश स्कन्धाः।

151. **प्रश्नः**— धनं गृहीत्वा कृतो विवाहः कः कथ्यते?
उत्तरम्— प्राजापत्यः।

152. **प्रश्नः**— अभिचाराः कति सन्ति?
उत्तरम्— चत्वारः।

153. **प्रश्नः**— शिवस्य अवतारस्य वर्णनं कुत्र प्राप्यते?
उत्तरम्— कूर्मपुराणे।

154. **प्रश्नः**—गोयुग्मं दत्वा कः विवाहः भवति?
उत्तरम्— आर्ष-विवाहः।

155. **प्रश्नः**— उपाकर्म कस्मिन् कार्ये भवति?
उत्तरम्— वेदारम्भे।

156. **प्रश्नः**— धर्मशास्त्रस्य सामग्री कस्मिन् पुराणे अस्ति?
उत्तरम्—ब्रह्मपुराणे।

157. **प्रश्नः**— राजा कः भवति?
उत्तरम्— क्षत्रियः।

158. **प्रश्नः**— पुत्राः कति सन्ति?
उत्तरम्— 12 द्वादश।

159. प्रश्नः— मन्त्री कः भवति?
उत्तरम्— ब्राह्मणः।

160. प्रश्नः— निम्बार्कमते एकादश्यां वेधः कदा भवति?
उत्तरम्— 52 घड़ी।

161. प्रश्नः— सृष्टिः कतिविधा:? कास्ता:?
उत्तरम्—चतुर्विधा। प्राकृतिकी, ब्राह्मी, मानसी, मैथुनीसृष्टिः।

162. प्रश्नः— राक्षसमाता का आसीत्?
उत्तरम्— दितिः।

163. प्रश्नः— 'द्वादशस्कन्धाः' कस्मिन् पुराणे सन्ति?
उत्तरम्— श्रीमद्भागवतपुराणे।

164. प्रश्नः— कस्मिन् पुराणे अलंकारस्य वर्णनमस्ति?
उत्तरम्— अग्निपुराणे।

165. प्रश्नः— अग्निपुराणस्य रचनाकारः कः?
उत्तरम्— व्यासः।

166. प्रश्नः—विष्णुपुराणस्य द्वितीयाध्याये कस्य वर्णनमस्ति?
उत्तरम्— सृष्टेः।

167. प्रश्नः— भागवत-पुराणस्य रचनाकारः कः?
उत्तरम्— व्यासः।

168. प्रश्नः— देवमाता का आसीत्?
उत्तरम्— अदितिः।

169. प्रश्नः—उद्भिजविद्यायाः प्रकाशकः पुराणविशेषः कः?
उत्तरम्— भविष्यपुराणम्।

170. प्रश्नः— काव्यशास्त्रस्य वर्णनं कस्मिन् पुराणे वर्तते?
उत्तरम्— अग्निपुराणे।

171. प्रश्नः—पं.बलदेव उपाध्यायमते प्राचीन-पुराणेषु कानि पुराणानि मन्यन्ते?
उत्तरम्—वायु-ब्रह्माण्ड-मार्कण्डेय-मत्स्य पुराणानि।

172. प्रश्नः—पं.बलदेव उपाध्यायानुसारं मध्यकालीन-पुराणानि कानि?
उत्तरम्—श्रीमद्भागवत-कूर्म-स्कन्द-पद्मपुराणानि।

173. प्रश्नः—पं.बलदेव उपाध्यायानुसारं अर्वाचीन-पुराणानि कानि?
उत्तरम्—भविष्यपुराणम्, ब्रह्मपुराणम्, ब्रह्मवैवर्त-पुराणम्, वामनपुराणम्, वराहपुराणम्, विष्णुपुराणम्, अग्निपुराणम्, नारदपुराणम्, लिङ्गपुराणम्, गरुडपुराणम्।

174. प्रश्नः— विष्णुपुराणे कति अध्यायाः कति श्लोकाश्च विद्यन्ते?
उत्तरम्— 126 अध्यायाः, 23,000 श्लोकाः।

175. प्रश्नः— नारदपुराणानुसारेण अध्यात्मरामायणस्य उपजीव्य-ग्रन्थः कः?
उत्तरम्— ब्रह्माण्डपुराणम्।

176. प्रश्नः— भागवतपुराणस्य प्रवक्ता कोऽस्ति?
उत्तरम्— शुकदेवः।

177. प्रश्नः— नाट्यशास्त्रस्य सामग्री कुत्र अस्ति?
उत्तरम्— अग्निपुराणे।

178. प्रश्नः— रामानुजसम्प्रदायस्य सामग्री कुत्र प्राप्यते?
उत्तरम्— विष्णुपुराणे।

179. प्रश्नः— मतान्तरेण नारदपुराणस्य स्थाने कस्य पुराणस्य गणना भवति?
उत्तरम्— शिवपुराणस्य।

180. प्रश्नः— श्राद्धावसरे जनाः कस्य पुराणस्य पाठं कुर्वन्ति?
उत्तरम्— गरुडपुराणस्य।

181. प्रश्नः— देवीभागवते कति स्कन्धाः सन्ति?
उत्तरम्— 12 द्वादश स्कन्धाः।

182. प्रश्नः— अष्टादश-पुराणानां लेखकः कः?
उत्तरम्— वेद-व्यासः।

183. प्रश्नः— श्रीमद्भागवतपुराणे कियन्तः श्लोकाः सन्ति?
उत्तरम्— 18, 000 अष्टादशसहस्राणि।

184. प्रश्नः— 'विद्यावतां भागवते परीक्षा' इति केन सम्बद्धा अस्ति?
उत्तरम्— श्रीमद्भागवतेन।

185. प्रश्नः— 'रास-पञ्चाध्यायी' इति कस्य पुराणस्य विषयः?
उत्तरम्— श्रीमद्भागवतस्य।

186. प्रश्नः— "पुराणं कस्मात्? पुरा नवम् भवति" इति कस्य पुराणव्युत्पत्तिः?
उत्तरम्—यास्कस्य।

187. प्रश्नः— "यस्मात् पुरा हि अनति इदं पुराणम्" इति कस्य वचनमस्ति?
उत्तरम्— वायुपुराणस्य।

188. प्रश्नः— भक्तराजस्य प्रह्लादस्य पुत्रः कः?
उत्तरम्— विरोचनः।

189. प्रश्नः—"वेदानां वास्तविकं स्वरूपं पुराणेषु एव वर्णितम्" इति कस्य उक्तिः?
उत्तरम्— ब्रह्माण्डपुराणस्य।

190. प्रश्नः— गृह्यसूत्रेषु कति संस्काराणां वर्णनं विद्यते?
उत्तरम्— 42 द्विचत्वारिंशत्।

191. प्रश्नः— कानि सन्ति सुभाषितानि?
उत्तरम्— पुराणेष्वितिहासेषु तथा रामायणादिषु। वचनं सारभूतं यत् तत् सुभाषितमुच्यते।।

193. प्रश्नः— स्वर्गीयाः देवाः के सन्ति?
उत्तरम्— द्यौः, वरुणः, मित्रः, आदित्यः, सूर्यः, सविता, पूषा, विष्णुः, अश्विन्, उषा, रात्र्यादिश्च।

194. प्रश्नः— वायवीयाः देवाः के सन्ति?
उत्तरम्— इन्द्रः, रुद्रः, मरुतः, वायुः, अपानपात्, पर्जन्यः, आप आदयः।

195. प्रश्नः— के सन्ति पार्थिवदेवाः?
उत्तरम्— पृथिवी, अग्निः, बृहस्पतिः, सोमादयश्च।

196. प्रश्नः— व्यासाऽनुसारेण पुण्यं किम्?
उत्तरम्—परोपकारः।

197. प्रश्नः— पापं किं भवति?
उत्तरम्— परपीडनम्।

198. प्रश्नः— सतां विभूतयः किमर्थं भवन्ति?
उत्तरम्— परोपकाराय।

199. प्रश्नः— भारतीय-संस्कृतौ जनानां मध्ये समन्वयः कथं विलोक्यते?
उत्तरम्— आचारेण, व्यवहारेण, शीलेन, संस्कारादिना च।

200. प्रश्नः—स्नानावसरे मानसपटले भारतवर्षस्य अखण्डरूपस्य चित्रं कस्मिन् मन्त्रे प्रस्तुतं भवति?
उत्तरम्—गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु।। इति मन्त्रे।

201. प्रश्नः— "गुरूणां चैव सर्वेषां मातैव परमो गुरुः" इत्ययं विचारः कस्य विद्यते?
उत्तरम्— व्यासस्य।

202. प्रश्नः— सत्ययुगस्य परिमाणं किमस्ति?
उत्तरम्— 4800 दिव्यवर्षम्, मानवस्य-1728000।

203. प्रश्नः— त्रेतायुगस्य परिमाणं किमस्ति?
उत्तरम्— 3600 दिव्यवर्षम्, मानवस्य-1296000।

204. प्रश्नः— द्वापरयुगस्य परिमाणं किमस्ति?
उत्तरम्— 2400 दिव्यवर्षम्, मानवस्य-864000।

205. प्रश्नः— कलियुगस्य परिमाणं किमस्ति?
उत्तरम्— 1200 दिव्यवर्षम्, मानवस्य-432000।

206. प्रश्नः— नरकासुरः कस्या कुण्डलम् अपहृतवान्?
उत्तरम्— देवमातुः-अदितेः।

207. प्रश्नः— नरकासुरं कः अमारयत्?
उत्तरम्— कृष्णः।

208. प्रश्नः—नरकासुरस्य हननसमये कृष्णेन सह का आसीत्?
उत्तरम्— सत्यभामा।

209. प्रश्नः—"ऋचः सामानि छन्दांसि पुराणं यजुषा सह" इति कुतः उद्धृतः?
उत्तरम्— अथर्ववेदात्।

210. प्रश्नः— सर्वाधिक-दीर्घकालीन-युगः कः?
उत्तरम्— सत्ययुगः।

211. प्रश्नः—कस्य मते पुराणानि ब्रह्मणः आद्याः सृष्टिः इति?
उत्तरम्— ब्रह्माण्डपुराणस्य।

212. प्रश्नः— तन्त्रशास्त्रानुसारं यन्त्रं कतिविधम्?
उत्तरम्— 2 द्विविधम् 1. नित्य-यन्त्रं, 2. भाव-यन्त्रम्।

213. प्रश्नः— महापुराणस्य कानि दश लक्षणानि?
उत्तरम्— 1. सर्गः, 2. विसर्गः, 3. वृत्तिः, 4. रक्षा, 5. मन्वन्तरः, 6. वंशः, 7. वंशानुचरितम्, 8. संस्था, 9. हेतुः, 10. अपाश्रयः।

214. प्रश्नः—मत्स्यपुराणे वास्तुशास्त्रस्य अष्टादश-उपदेष्टारः के सन्ति?
उत्तरम्— 1. भृगुः, 2. अत्रिः, 3. वसिष्ठः, 4.

विश्वकर्मा, 5. मयः, 6. नारदः, 7. नग्नजितः, 8. शंकरः, 9. इन्द्रः, 10. ब्रह्मा, 11. कुमारः, 12. नन्दीश्वरः, 13. शौनकः, 14. गर्गः, 15. वासुदेवः, 16. अनिरुद्धः, 17. शुक्रः, 18. बृहस्पतिः।

215. **प्रश्नः**—पद्मपुराणस्य चतुर्थे खण्डे कस्य लोकस्य वर्णनमस्ति?
उत्तरम्—पाताललोकस्य।

216. **प्रश्नः**— चतुर्दशभुवनेषु पृथिव्या उपरि सप्तलोकाः कुत्र?
उत्तरम्— ऊर्ध्वलोके।

217. **प्रश्नः**— ब्रह्मपुराणस्य अपरं नाम किम्?
उत्तरम्— आदिपुराणम्।

218. **प्रश्नः**— मार्कण्डेय-पुराणे कति अध्यायाः सन्ति?
उत्तरम्— 138 अध्यायाः।

219. **प्रश्नः**— कस्य पुराणस्य उत्तरखण्डं प्रेतखण्डं कथ्यते?
उत्तरम्— गरुडपुराणस्य।

220. **प्रश्नः**— कस्मिन् पुराणे रत्नस्य परीक्षणविधिः कथ्यते?
उत्तरम्— गरुडपुराणे।

221. **प्रश्नः**— कस्मिन् पुराणे सर्वेषां पुराणानां विषयसूचिः प्राप्यते?
उत्तरम्— नारदपुराणे।

222. **प्रश्नः**—सूर्यस्य प्रथमकिरणं कस्या उन्नतेः विधायकमस्ति?
उत्तरम्— भौतिक-उन्नतेः।

223. **प्रश्नः**— सूर्यस्य सप्तकिरणानि कस्या उन्नतेः विधायकानि सन्ति?
उत्तरम्— आध्यात्मिक-उन्नतेः।

224. **प्रश्नः**— सूर्यः अश्वस्य रूपं गृहीत्वा याज्ञवल्क्यं कस्य उपदेशं दत्तवान्?
उत्तरम्— शुक्ल-यजुर्वेदस्य।

225. **प्रश्नः**— उज्जैने प्रकट-ज्योतिर्लिंगस्य किं नाम?
उत्तरम्— महाकालेश्वरः।

226. **प्रश्नः**— शिवस्य मुख्य-उपासनाविग्रहः अस्ति?
उत्तरम्— लिङ्गमूर्तिः।

227. **प्रश्नः**— सम्पूर्णजलराशिः केन प्रकटीभूतः?
उत्तरम्— विष्णुना।

228. **प्रश्नः**— विष्णोः निःश्वासेन कस्य प्रकटनम् अभूत्?
उत्तरम्— श्रुतेः।

229. **प्रश्नः**— विष्णोः लोकस्य किं नाम?
उत्तरम्— वैकुण्ठः।

230. **प्रश्नः**— गणेशस्य भार्याः कति ?
उत्तरम्— 2 द्वे।

231. **प्रश्नः**—गणेशस्य वाहनः कः?
उत्तरम्— मूषकः।

232. **प्रश्नः**—पितुराज्ञया परशुरामः केषां शिरश्छेदनं कृतवान्?
उत्तरम्— मातुः रेणुकायाः, ज्येष्ठत्रिभ्रातृणाञ्च।

(छ) पुराणेतिहासस्य ग्रन्थाः ग्रन्थकाराश्च–

क्र.	ग्रन्थाः	ग्रन्थकाराः
1.	अष्टादश-पुराणानि	व्यासः
2.	महाभारत	महर्षि वेदव्यासः
3.	रामायणम्	महर्षि वाल्मीकि
4.	ईश्वरगीता	भास्कराचार्यः
5.	उद्धवगीता	भास्कराचार्यः
6.	पाण्डवगीता	भास्कराचार्यः
7.	रामगीता	गौड़पादाचार्यः
8.	शक्तिगीता	गौड़पादाचार्यः
9.	अवधूतगीता	गौड़पादाचार्यः
10.	हंसगीता	गौड़पादाचार्यः
11.	श्रीमद्भगवद्गीताभाष्य	शंकराचार्यः
12.	श्रीमद्भगवद्गीता-सुबोधिनी	श्रीधरः
13.	श्रीमद्भगवद्गीता-गूढार्थतत्त्वालोक	बच्चा झा
14.	श्रीमद्भगवद्गीता-अद्वैतांकुश	बच्चा झा
15.	श्रीमद्भगवद्गीता-गूढार्थदीपिका	मधुसूदन सरस्वती
16.	गीतातत्त्वामृत	विष्णुतीर्थ
17.	महाभारत दुर्घटार्थप्रकाशिनि	विमल बोध

(HH-Code-73) (ज) ब्रह्मचारिगृहस्थ-वानप्रस्थ-संन्यासिनां कर्त्तव्यानि एवं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि

(क) ब्रह्मचर्याश्रमः–जन्मतः पञ्चविंशतिवर्षपर्यन्तं ब्रह्मचर्याश्रमकालः भवतीति धर्मशास्त्राभिमतम्। जातकर्मनामकरणोपनयनसमावर्तनादिसंस्कारैः आश्रमेऽस्मिन् ब्राह्मणादीनां शरीरं सांसारिकाध्यात्मिकधार्मिकदृष्ट्या पवित्रीक्रियते। आश्रमेऽस्मिन् मृगचर्मादीनां वस्त्राणां दण्डमेखलायज्ञोपवीतादीनां धारणं छत्रोपानहधारणञ्च गन्धमाल्यनृत्यगीतालापमैथुनादीनां त्यागः सर्वेभ्यो ब्राह्मणक्षत्रियविड्भ्यो विधीयते। तद्यथा–

अजिनं दण्डकाष्ठञ्च मेखलाञ्चोपवीतकम्।
धारयेदप्रमत्तश्च ब्रह्मचारी समाहितः।।
छत्रञ्चोपानहञ्चैव गन्धमाल्यादिवर्जयेत्।
नृत्यगीतमथालापं मैथुनञ्च विवर्जयेत्।।
(लघुहारीतस्मृतिः)

इन्द्रियनिग्रहपूर्वकं रागद्वेषादिविषयान् परित्यज्य गुरुसान्निध्यपूर्वकं वेदवेदाङ्गानामध्ययनं (षडंगो वेदोऽध्येयो ज्ञेयश्च) सन्ध्योपासनञ्च ब्रह्मचर्याश्रमधर्मः। भोजने मांसादीनां परित्यागपूर्वकं भिक्षाटनं आश्रमेऽस्मिन् विधीयते।

ब्रह्मचर्याश्रममहत्त्वम्–भारतीयसंस्कृतौ आश्रमव्यवस्थायां सर्वेषां मूलकत्वेन धर्माचाराहिंसासत्यव्रतादीनां पोषकत्वेन ब्रह्मचर्याश्रमः निम्नलिखितकारणैरपि महत्त्वपूर्णं स्थानं बिभर्ति–

1. धर्मशास्त्रप्रतिपादितानां जातकर्मनामकरणोपनयनसमावर्तनादीनां विधायकः।
2. षडंगो वेदोऽध्येयो ज्ञेयश्चेत्यादिना गुरुसान्निध्यपूर्वकं वेद-वेदाङ्गानां अध्ययने संरक्षकश्च।
3. आचाराहिंसासमभावशिष्टाचारादीनां पालनं इन्द्रियनिग्रहपूर्वकं वीर्यरक्षणञ्च आश्रमेऽस्मिन् विधीयते।
4. विप्रो वृक्षः तस्य मूलं च सन्ध्येत्यादिना सन्ध्यागायत्र्युपासनया धर्मबोधकत्वेन महत्त्वम्।

अन्यश्लोकाः ब्रह्मचर्यविषयकाः:–

वर्जयेन्मधुमांसं च गन्धं माल्यं रसान्स्त्रियः।
शुक्तानि यानि सर्वाणि प्राणिनां चैव हिंसनम्।।
(मनुस्मृते)

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः।।
(शब्दकल्पद्रुमे)

आश्रमे ब्राह्मणादीनां वस्त्राणि–

कार्ष्णरौरववास्तानि चर्माणि ब्रह्मचारिणः।
वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च।।
मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या शणतान्तवी।
मुञ्जालाभे तु कर्तव्याः कुशाश्मन्तकबल्वजैः।।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा।
कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृत्तं त्रिवृत्।।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्।
क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवी।।
ब्राह्मणो वैल्वपालाशौ क्षत्रियो वाटखादिरौ।
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः।।

दक्षस्मृतिः–

स्वीकरोति यदा वेदं चरेद्वेदव्रतानि च।
ब्रह्मचारी भवेत्तावदूर्ध्वं स्नातो भवेद् गृही।।

द्विविधाः ब्रह्मचारिणः–

उपकुर्वाणकस्त्वाद्यो द्वितीयो नैष्ठिकः मही।

(ख) गृहस्थाश्रमः–समावर्तनसंस्कारादनन्तरं ब्राह्मणादिवर्णाः स्वकुलोचितां वर्णोचितां च सुलक्षणां भार्यां परिगृह्य विवाहसंस्कारेण संस्कृताः सन्तः गृहस्थाश्रमे प्रविशन्ति। आश्रमेऽस्मिन् स्ववर्णोचितं कर्मपालनं सन्ध्याग्निहोत्रदर्शादीनां यज्ञानां विधानं परिवारपोषणञ्च परमलक्ष्यम्। गृहस्थानां कृते देवभूतपितृब्रह्मनृयज्ञानां (पञ्चमहायज्ञानाम्) विधानं कर्तव्यमिति धर्मशास्त्राभिमतम्। तत्रोच्यते–

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्।।
पञ्चैतान्यो महायज्ञान् यो हापयति शक्तितः।
स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते।।

एवमेव हिरण्यादिदानं वैश्वदेवबलिकर्मशिक्षा-कृषिकर्माण्यपि गृहस्थाश्रमे प्रशस्तानि। पित्रादीन्नरकादुद्धारार्थं पितृपुत्रऋणान्मुक्तये च पुत्ररत्नप्राप्तिः, वंशवृद्धिः गृहस्थाश्रमस्य मूलोद्देश्यमिति दिक्।

गृहस्थाश्रमस्य वैशिष्ट्यम्–

यथा वायुः समाश्रित्य वर्तन्ते सर्वजन्तवः।
तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः।।

इति मनुवचनात् सर्वे आश्रमाः गार्हस्थ्यमूलका एव। गृहस्थ एव यजनं याजनं तपः दानं कृषिकर्म च विदधाति, अतः गृहस्थप्रसादादेव त्रयोऽप्याश्रमाः पुष्टिताः भवन्ति–

गृहस्थ एव यजते गृहस्थस्तप्यते तपः।
दाता चैव गृहस्थः स्यात् तस्माच्छ्रेष्ठो गृहाश्रमी।।
(शंखस्मृतिः)

गृहस्थारम्भादेव धर्मव्यवस्था परिचलति, कुलवृद्धिः जायते, समाजे वर्णसङ्करता नोत्पद्यते इति महाभारतेऽप्युक्तम्। पित्रादीनामुद्धारार्थं पुत्ररत्नप्राप्तये पितृऋणाद् मुक्तये च आश्रमोऽयं महत्त्वपूर्णः। पञ्चमहायज्ञानां पालनेन अनुष्ठानेन वा सामाजिकव्यवस्थायाः संचालने चतुर्विधपुरुषार्थप्राप्तये गृहस्थाश्रमोऽयं विशिष्टं स्थानं भजते, यथा हि व्यासस्मृतौ–

गृहाश्रमात् परो धर्मो नास्ति नास्ति पुनः पुनः।

गृहस्थाश्रममधिकृत्य श्लोकाः–

हिरण्यदानं गोदानं पृथिवीदानमेव च।
एष धर्मो गृहस्थस्य सारभूत उदाहृतः।।
(लघुहारीतस्मृतिः)

सर्वेषामपि चैतेषां वेदस्मृतिविधानतः।
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान्बिभर्ति हि।।
(मनुस्मृतिः)

यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम्।
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्।।
यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः।
एवं गृहस्थमाश्रित्य सर्वे जीवन्ति भिक्षवः।।
(वसिष्ठः)

चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः।
दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः।।
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा।
एते गृहस्थप्रभवाः चत्वारः पृथगाश्रमाः।।
(पराशरस्मृतिः)

नापुत्रस्य लोकोऽस्ति–

अथातः सम्प्रवक्ष्यामि गृहस्थाश्रममुत्तमम्।
य आधारोऽन्याश्रमाणां भूतानां प्राणिनां तथा।।

ऋणत्रयच्छेदकारि धर्मार्थकामसिद्धिदम्।
एतत्सर्वं स्थितं स्त्रीषु शीलवृत्तान्वितासु च।।
(कश्यपः)

कश्चिद् गृहाश्रमसमो न परोऽस्ति धर्मः।
(वशिष्ठः)

(ग) वानप्रस्थाश्रमः–गृहस्थस्य यदा केशपलितं अपत्यस्यापि अपत्यं भवेत्तदा भार्यया सह अथवा तां पारिवारिकदायित्वञ्च पुत्रेषु निक्षिप्य विगतविषयरागतया वनमाश्रयेदिति वानप्रस्थाश्रमप्रसङ्गे धर्मशास्त्राभिमतम्। अत एव मनुना–

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः।
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्।।

आश्रमेऽस्मिन् जटाश्मश्रुलोमनखानि वल्कलवासांसि च धारयेत्। वनोद्भवैः अन्नशाकमूलफलादिभिरेव चतुर्थे अष्टमे प्रहरे पक्षान्ते मासान्ते वा स्वपक्वैव भुञ्जीयात्, अथवा वायुभक्षोऽपि भवेत्। सर्वथा मधुमांसादिपदार्थानां वर्जनं कुर्यात्–

वर्जयेन्मधुमांसं च भौमानि कवकानि च।
भूस्तृणं शिग्रुकं चैव श्लेष्मातकफलानि च।।

इत्थं अरण्ये वसता वेदाभ्यासः पञ्चाग्नियज्ञः त्रिकालस्नानं तपः अग्निहोत्रपञ्चाग्नियज्ञानां चातुर्मास्यतुरायणदक्षिणायनानि श्रौतकर्मणाञ्च सम्पादनं यथाविधि कुर्यादिति दिक्। वानप्रस्थसम्बन्धिनः श्लोकाः–

अग्निहोत्रं समादाय गृह्यं चाग्निपरिच्छदम्।
ग्रामादरण्यं निःसृत्य निवसेन्नियतेन्द्रियः।।
स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समाहितः।
दाता नित्यमनादाता सर्वभूतानुकम्पकः।।
(मनुस्मृतिः)

कृतकृत्यस्य वानप्रस्थ्यम्। (बुधस्मृतिः)

पुत्रमुत्पाद्य वनवासं कृत्वा अकृष्टपच्यफलादि भक्षयित्वा ईश्वराराधनं यः करोति स वानप्रस्थः। (शब्दकल्पद्रुमः)

भूमौ मूलफलाशित्वं स्वाध्यायस्तप एव च।
संविभागो यथान्यायं धर्मोऽयं वनवासिनः।।
(भागवतम्)

(घ) संन्यासाश्रमः–आयुषः तृतीयभागे वानप्रस्थाश्रमे तपसा ये ध्यानपराः विरक्ताश्च भवन्ति तेषां कृते आयुषः चतुर्थभागः संन्यासाश्रमे परिव्राजकत्वेन यापनीयमिति धर्मशास्त्राभिमतं यथा–

वनेषु च विहृत्यैव तृतीयं भागमायुषः।
चतुर्थमायुषो भागं त्यक्त्वा सङ्गान् परिव्रजेत्।।

आश्रमोऽयं ब्रह्मबोधकः मोक्षसाधनभूतः। देवपितृ-ऋषीणां त्रयाणां ऋणमपाकृत्य चतुर्थे संन्यासाश्रमे प्रवेष्टव्यः। आश्रमेऽस्मिन् अग्निं स्वात्मनि संरोप्य मंत्रवित् पुरुषः संन्यासं धारयेत्, तल्लक्षणञ्च यथा–

अग्नीनात्मनि संस्थाप्य द्विजः प्रव्रजितो भवेत्।
योगाभ्यासरतः शान्तो ब्रह्मविद्यापरायणः।।

आश्रमेऽस्मिन् देवपितृमानुषेभ्यो आत्मने च यज्ञं (श्राद्धं) कुर्यात्। स्नानध्यानजपव्रतोपवासादीनामनुष्ठानं विधेयम्। आश्रमेऽस्मिन् दण्डं श्यामवर्णगोकेशनिर्मितरज्जोः धारणं भिक्षाटनञ्च कर्तव्यम्।

संन्यासाश्रमश्लोकाः–

विरक्तस्य पारिव्रज्यम्। (बुधस्मृतिः)
तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत्।
संन्यासीह स विज्ञेयो वानप्रस्थाश्रमे स्थितः।।
(कल्पद्रुमे)

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः।।
(मनुः-6/35)

प्राजापत्यं निरूप्येष्टिं सर्ववेदसदक्षिणम्।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्।।
(मनुः-6/38)

अधीत्य विधिवद् वेदान्पुत्रांश्चोत्पाद्य धर्मतः।
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्।।
(मनुः-6/39)

त्रिदण्डं वैष्णवं सम्यक् संततं समपर्वकम्।
वेष्टितं कृष्णगोवालरज्जुमच्चतुरङ्गुलम्।।
(हारीतस्मृतिः)

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः।।
(गीतायाम्)

(ज) वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—जन्मना जातिः, कर्मणा वर्णः, भारते कति विद्यन्ते?
   उत्तरम्— चत्वारः (ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः)।
2. प्रश्नः—धर्मशास्त्रानुसारं भारतवर्षे कति आश्रमाः सन्ति?
   उत्तरम्—चत्वारः (ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यास)।
4. प्रश्नः—के सन्ति षड्विधः स्मार्त्तधर्मः?
   उत्तरम्— 1. वर्णधर्मः, 2. आश्रमधर्मः, 3. वर्णाश्रमधर्मः, 4. गुणधर्मः, 5. निमित्तधर्मः, 6. साधारणधर्मश्चेति।
5. प्रश्नः—आश्रमविशेषे वर्णविशेषस्य कृते निर्धारितः धर्मः कः?
   उत्तरम्— वर्णाश्रमधर्मः।
6. प्रश्नः—ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा। एते गृहस्थप्रभवाः चत्वारः पृथगाश्रमाः।। इति कस्य स्मृतिग्रन्थस्य वचनम्?
   उत्तरम्— पराशरस्मृतेः।
7. प्रश्नः—दण्डी च मेखली चैव ह्यधःशायी तथा जटी। गुरुशुश्रूषणं भैक्ष्यं विद्यार्थे ब्रह्मचारिणः। उक्त श्लोकः कस्य पुराणस्य वर्तते?
   उत्तरम्— वायुपुराणस्य।
8. प्रश्नः—सर्वेषु आश्रमेषु ब्राह्मणाणां, क्षत्रियाणां, वैश्यानां, शूद्राणां धर्म किं कथ्यते?
   उत्तरम्— वर्णाश्रमधर्मः।
9. प्रश्नः—गृहस्थाश्रमस्य अधिकारिणः के भवन्ति?
   उत्तरम्— सर्वे वर्णाः।
10. प्रश्नः—ब्रह्मचर्याश्रमस्य अधिकारिणः के भवन्ति?
    उत्तरम्— ब्राह्मण-क्षत्रिय-वैश्याः।
11. प्रश्नः—वानप्रस्थाश्रमस्य अधिकारिणः कौ भवतः?
    उत्तरम्— ब्राह्मण-क्षत्रियौ भवतः।
12. प्रश्नः—संन्यासाश्रमस्य अधिकारिणः के?
    उत्तरम्— ब्राह्मणा एव।
13. प्रश्नः—वर्णाश्रमधर्मविषयं सम्यक् कुत्र प्रतिपादितमस्ति?
    उत्तरम्— मनुस्मृतौ, याज्ञवल्क्यस्मृतौ, पुराणादिषु।
14. प्रश्नः—ब्राह्मणानां कृते निर्धारितानि षट्कर्माणि कानि सन्ति?
    उत्तरम्—अध्ययनम् अध्यापनं यजनं याजनं दानं प्रतिग्रहश्च।

15. प्रश्नः—क्षत्रियाणां कृते निर्धारितानि कर्माणि कानि सन्ति?
उत्तरम्— शौर्यं तेजः धृतिः दक्षता युद्धप्रियता दानभावः राजगुणश्च।

16. प्रश्नः—क्षत्रियसम्बद्धानि तथ्यानि कानि?
उत्तरम्— क्षदति रक्षति जनान् इति क्षत्रः।

17. प्रश्नः—वैश्यानां कृते निर्धारितानि कर्माणि कानि सन्ति?
उत्तरम्— कृषिसम्पादनं पश्वादीनां रक्षणं वाणिज्य-सञ्चालनं आस्तिकता।

18. प्रश्नः—शूद्राणां कृते निर्धारितानि कर्माणि कानि सन्ति?
उत्तरम्— परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्।

19. प्रश्नः—धर्मशास्त्राभिमतं ब्रह्मचर्याश्रमकालः कः?
उत्तरम्— जन्मतः पञ्चविंशतिवर्षपर्यन्तम्।

20. प्रश्नः—जातकर्मनामकरणोपनयनसमावर्तनादिसंस्काराः कस्मिन् काले निर्धारिताः?
उत्तरम्— ब्रह्मचर्याश्रमकाले।

21. प्रश्नः—ब्रह्मचर्याश्रमकाले विहितसंस्कारैः किं फलं भवति?
उत्तरम्— शरीरं सांसारिकाध्यात्मिकधार्मिकदृष्ट्या पवित्रीक्रियते।

22. प्रश्नः—ब्रह्मचर्याश्रमधर्मः किं विधीयते?
उत्तरम्— इन्द्रियनिग्रहपूर्वकं रागद्वेषादिविषयान् परित्यज्य गुरुसान्निध्यपूर्वकं वेदवेदाङ्गानामध्ययनम्।

23. प्रश्नः—सर्वे आश्रमाः गार्हस्थ्यमूलकाः-इति कस्य वचनम्?
उत्तरम्— मनु-महोदयस्य।

24. प्रश्नः—गृहस्थाश्रमस्य किं परमलक्ष्यम्?
उत्तरम्— स्ववर्णोचितं कर्मपालनं सन्ध्याग्निहोत्र-दर्शादीनां यज्ञानां विधानं परिवारपोषणञ्च।

25. प्रश्नः—धर्मशास्त्राभिमताः गृहस्थानां कृते पञ्चमहायज्ञाः के सन्ति?
उत्तरम्— देवभूतपितृब्रह्मनृयज्ञाः।

26. प्रश्नः—गृहस्थाश्रमे कानि प्रशस्तानि सन्ति?
उत्तरम्—हिरण्यादिदानं वैश्वदेवबलिकर्मशिक्षा-कृषिकर्माणि।

27. प्रश्नः—यजनं याजनं तपः दानं कृषिकर्म च के विदधति?
उत्तरम्— गृहस्था एव।

28. प्रश्नः—पितृऋणाद् मुक्तये को आश्रमः महत्त्वपूर्णः?
उत्तरम्— गृहस्थाश्रमः।

29. प्रश्नः—चतुर्विधपुरुषार्थप्राप्तये कस्य आश्रमस्य विशिष्टं स्थानम्?
उत्तरम्— गृहस्थाश्रमस्य।

30. प्रश्नः—यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम्। तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्।। यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः। एवं गृहस्थमाश्रित्य सर्वे जीवन्ति भिक्षवः।। गृहस्थाश्रमप्रसङ्गे कस्य कथनम्?
उत्तरम्— वसिष्ठस्य।

31. प्रश्नः—धर्मशास्त्राभिमतं वानप्रस्थाश्रमस्य किं लक्षणम्?
उत्तरम्— केशपलितं अपत्यस्यापि अपत्यं भवेत्तदा भार्यया सह वनमाश्रयेदिति।

32. प्रश्नः—शब्दकल्पद्रुमे वानप्रस्थाश्रमस्य का परिभाषा?
उत्तरम्— पुत्रमुत्पाद्य वनवासं कृत्वा अकृष्टपच्यफलादि भक्षयित्वा ईश्वराराधनम्।

33. प्रश्नः—श्रौतकर्मणां सम्पादनं कस्मिन् आश्रमे भवति?
उत्तरम्— वानप्रस्थाश्रमे।

34. प्रश्नः—ब्रह्मबोधकः मोक्षसाधनभूतो आश्रमः कः?
उत्तरम्— संन्यासाश्रमः।

35. प्रश्नः—देवपितृ-ऋषीणां त्रयाणां ऋणमपाकृत्य कस्मिन् आश्रमे प्रवेष्टव्यः?
उत्तरम्— चतुर्थे संन्यासाश्रमे।

36. प्रश्नः—संन्यासाश्रमे परिव्राजकत्वेन यापनीयमिति इति कस्य अभिमतम्?
उत्तरम्— धर्मशास्त्राभिमतम्।

37. प्रश्नः—देवपितृमानुषेभ्यो आत्मने च यज्ञं (श्राद्धं) कस्मिन् आश्रमे कुर्यात्?
उत्तरम्— संन्यासाश्रमे।

38. प्रश्नः—स्नानध्यानजपव्रतोपवासादीनामनुष्ठानं कस्मिन् आश्रमे विधेयम्?
उत्तरम्— संन्यासाश्रमे।

39. प्रश्नः—दण्डं श्यामवर्णगोकेशनिर्मितरज्जोः धारणं भिक्षाटनञ्च कस्मिन् आश्रमे कर्तव्यम्?
उत्तरम्— संन्यासाश्रमे।

40. प्रश्नः— संन्यासप्रसन्दर्भे गीतायां श्रीकृष्णेन किं कथितम्?
उत्तरम्— काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः। सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः।।

41. प्रश्नः—धर्मः मुख्यतः कतिविधः के च ते?
उत्तरम्— द्विविधः, श्रौतधर्मः स्मार्तधर्मश्चेति।

42. प्रश्नः—स्मार्तधर्मः कतिविधः?
उत्तरम्— षड्विधः।

43. प्रश्नः—स्मृतिग्रन्थेषु गुणकर्मविभागशः केषां धर्मो वर्णितः?
उत्तरम्— ब्राह्मणक्षत्रियविट्शूद्रां धर्मः वर्णितः।

(HH-Code-73) (ट) नारायणस्वरूपम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

भूतैर्यदा पञ्चभिरात्मसृष्टैः पुरा
विराजं विरचय्य तस्मिन्।
स्वांशेन विष्टः पुरुषाभिधान-
मवाप नारायण आदिदेवः।।
(भागवत-11/4/3)

नारायणस्वरूपम्- (क) ॐ ध्यायेत् सत्यं गुणातीतं गुणत्रयसमन्वितम्। लोकनाथं त्रिलोकेशं पीताम्बरधरं हरिम्। इन्दीवरदलश्यामं शंखचक्रगदाधरम्। नारायणं चतुर्बाहुं श्रीवत्सपदभूषितम्। (ख) नारायणपुरुषदृष्टेन षोडशर्चेन सहस्रशीर्षा-इत्यनुवाकेन पुरुषसूक्तेतिनाम्ना ख्यातेन मन्त्रसमूहेन नारायणात्मना भावयित्वा स्तौति। परमपुरुषनारायणात्मना ध्यानसमय एवोक्तपुरुषसूक्तमन्त्रान् ब्रह्माऽपि पठति। अतः मनसा पुरुषसूक्तेन परमपुरुषो नारायणो हि प्रथमं स्तूयते। भणितं यथा-

लक्ष्मीशं सृष्टित्रातारं क्षीरसागरशायिनम्।
वैकुण्ठवासिनं विष्णुं वन्दे सर्वफलप्रदम्।।

अस्मिन् विषये सायणस्य कथनमस्ति-**नारायणार्थं सूक्तमेव इदं नारायणम्**। (ग) कूर्मपुराणे ईश्वर-सम्बन्धिमान्यता वर्तते यत् स एक एव नारायणः अस्ति, सः आत्मानं रूपद्वये द्वयोः ब्रह्मा च विभक्तये। यथा-नावाभ्यां विद्यते ह्यन्यो लोकानां परमेश्वरः। एका मूर्तिर्द्विधा भिन्ना नारायणपितामहौ विद्येते। (घ) ॐ अमोघं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम्। हृषीकेशं जगन्नाथं वागीशं वरदायकम्। गुणत्रयं गुणातीतं गोविन्दं गरुडध्वजम्। जनार्दनं जनानन्दं जानकी-वल्लभं जयम्। प्रणमामि सदा सत्यनारायणमतः परम्। दुर्गमे विषमे घोरे शत्रुभिः परिपीडिते। विवधापत्सु दृष्टेषु तथान्येस्वप्रियद्भयम्। नामान्येतानि संकीर्त्य ईप्सितम्मूल-माप्नुयात्। सत्यनारायणं देवं वन्देहं कामदं प्रभुम्। लीलया च ततं विश्वं येन तस्मै नमो नमः। (ङ) ॐ नमस्ते विश्वरूपाय शङ्खचक्रधराय च। पद्मनाभाय देवाय हृषीकपतये नमः। नमोऽनन्तस्वरूपाय त्रिगुणात्मविभाविने। (च) नारायणः एवैकः ईदृशः च सर्वज्ञः। (छ) नारायणस्य शान्तिरूपो विद्यते-चतुर्भुजनारायणः, द्विभुजो विष्णुः, रामः, कृष्णः। (ज) नारायणस्य अशान्तिरूपो विद्यते-नरसिंहः, वराहः। (झ) स्कन्दपुराणे रेवाखण्डे नारायणस्य विस्तृतवर्णनं प्राप्यते। यथा-नारायणं नमस्कृत्य नरं चैव नरोत्तमम्। देवीं सरस्वतीं चैव ततो जयमुदीरयेत्। (ञ) ॐ त्वदीयं वस्तु गोविन्द! तुभ्यमेव समर्पये। गृहाण सुमुखो भूत्वा प्रसीद पुरुषोत्तम।

वस्तुनिष्ठ प्रश्नोत्तराणि

1. प्रश्नः—'सत्यं गुणातीतं गुणगणत्रयसमन्वितम्' इति कस्य स्वरूपम्?
उत्तरम्—नारायणस्य।

2. प्रश्नः—लोकनाथं त्रिलोकेशं पीताम्बरधरं इन्दीवर-दलश्यामं शंखचक्रगदाधरं, चतुर्बाहुं श्रीवत्सपद-भूषितमित्यनेन कः?
उत्तरम्—श्रीहरिः।

3. प्रश्नः—पुरुषसूक्तौ कस्य स्वरूपस्य वर्णनं क्रियते?
उत्तरम्—सहस्रशीर्षा परमपुरुषो नारायणस्य।

4. प्रश्नः—लक्ष्मीशं सृष्टित्रातारं क्षीरसागरशायिनम्। वैकुण्ठवासिनं विष्णुं वन्दे सर्वफलप्रदम्।। उक्तश्लोकेन कः अवबोध्यते?
उत्तरम्—वैकुण्ठवासि विष्णुः।

5. प्रश्नः—"नारायणार्थं सूक्तमेव इदं नारायणम्" इति कस्य कथनम्?
उत्तरम्—सायणस्य।

6. प्रश्नः—कूर्मपुराणे ईश्वरसम्बधि का मान्यता वर्तते?
उत्तरम्—स एक एव नारायणः अस्ति, सः आत्मानं

रूपद्वये ह्यो ब्रह्मा च विभक्तये। यथा-नावाभ्यां विद्यते ह्यन्यो लोकानां परमेश्वरः। एका मूर्तिर्द्विधा भिन्ना नारायणपितामहौ विद्येते।

7. **प्रश्नः**—ॐ अमोघं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम्। हृषीकेशं जगन्नाथं वागीशं वरदायकम्। गुणत्रयं गुणातीतं गोविन्दं गरुडध्वजम्। जनार्दनं जनानन्दं जानकीवल्लभं जयम्। प्रणमामि सदासत्यनारायणमतः परम्। दुर्गमे विषमे घोरे शत्रुभिः परिपीडिते। विवधापत्सु दृष्टेषु तथान्येष्वपि यद्भयम्। नामान्येतानि संकीर्त्य ईप्सितम्मूलमाप्नुयात्। सत्यनारायणं देवं वन्देहं कामदं प्रभुम्। लीलया च ततं विश्वं येन तस्मै नमो नमः। एते कस्य देवस्य स्वरूपस्य वर्णनं विद्यन्ते?

उत्तरम्—नारायणस्वरूपस्य।

8. **प्रश्नः**—ॐ नमस्ते विश्वरूपाय शङ्खचक्रधराय च। पद्मनाभाय देवाय हृषीकपतये नमः। नमोऽनन्तस्वरूपाय त्रिगुणात्मविभाविने। इति कः?

उत्तरम्—नारायणः।

8. **प्रश्नः**—एक एव सर्वज्ञः कः?

उत्तरम्—नारायणः।

9. **प्रश्नः**—नारायणस्य शान्तरूपो कः विद्यते?

उत्तरम्—चतुर्भुजनारायणः, द्विभुजो विष्णुः, रामः, कृष्णः।

10. **प्रश्नः**—नारायणस्य अशान्तरूपो कः वर्तते?

उत्तरम्—नरसिंहः, वराहः।

11. **प्रश्नः**—नारायणस्य विस्तृतवर्णनं कुत्र प्राप्यते?

उत्तरम्—स्कन्दपुराणे रेवाखण्डे।

12. **प्रश्नः**— नारायणस्य निवासः कुत्र वर्तते?

उत्तरम्—वैकुण्ठे।

13. **प्रश्नः**—नारायणस्य पत्नीनाम किम्?

उत्तरम्—लक्ष्मी।

14. **प्रश्नः**—संसारस्य पालनकर्ता कः?

उत्तरम्—नारायणः।

(HH-Code-73) (ठ) दशावताराः (1. मत्स्यः, 2. कच्छपः, 3. वाराहः, 4. नृसिंहः, 5. वामनः, 6. परशुरामः, 7. रामः, 8. कृष्ण-बलरामौ, 9. बुद्धः, 10. कल्किः) एवं तत्सम्बन्धिवस्तुनिष्ठ प्रश्नोत्तराणि

1. मत्स्यावतारवर्णनम्–जयदेवस्य गीतगोविन्दे यथा-

प्रलयपयोधिजले धृतवानसि वेदम्।
विहितवहित्रचरित्रमखेदम्।।
केशवधृतमीनशरीरं जय जगदीश हरे।। (1)

प्रलयकालीनसमुद्रे सृष्टिकर्तुर्ब्रह्मणः सुप्तावस्थायां सृजनशक्तिलुप्तावस्थायां हयग्रीवदैत्यद्वारा अपहृतवेदान् भगवान् तं हत्वा ब्रह्माणं श्रुतयः अददत्। एवं च राजर्षिसत्यव्रतं सप्तर्षीन् ब्रह्मतत्त्वस्य उपदेशं प्रदीयते स्म। कथ्यते यथा श्रीमद्भागवतपुराणे–

प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः
श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा।
दितिजमकथयद् यो ब्रह्म सत्यव्रतानां
तमहमखिलहेतुं जिह्ममीनं नतोऽस्मि।।
(श्रीमद्भागवत-8/24/61)

कृतयुगस्य प्रारम्भे सत्यव्रत-नाम्ना विख्यातः एकः राजर्षिः आसीत्। स एव वैवस्वत-मनुः वर्तते। राजा सत्यव्रतः क्षमाशीलः, समस्तश्रेष्ठगुणसम्पन्नः, सुखे-दुःखे च समभावः एकः वीर-पुरुषः आसीत्। पुत्रं राज्यभारं अर्पित्वा सः तपे मलयपर्वते संलग्नः। दशसहस्त्रवर्षव्यतीते सति ब्रह्मा राज्ञः समक्षे प्रकटयित्वा उक्तम्-"वरं वृणीष्व"? विनम्र राजा सत्यव्रतः अकथयत्–प्रलयकाल-उपस्थिते सति अहं चराचर-समस्त-भूत-समुदायस्य रक्षयितुं समर्थो भवेयमिति वरं देहि। विश्वात्मा ब्रह्मा "एवमस्तु" इति कथयित्वा अन्तर्हितो अभूत्। देवगणाः राज्ञोपरि पुष्पवृष्टिं कृतवन्तः।

एकदिवसस्य घटना वर्तते यत् राजर्षि सत्यव्रतः नद्यां स्नानं कृत्वा तर्पणकार्ये तत्परः आसीत्, तस्मिन् काले जलेन सह एका लघु मीना तस्य अञ्जल्यां आगता, राजा जलेन सह तं पुनः नद्यां समर्पितः। तत्परं सा मीना अतिकारुण्येन सह राज्ञा अकथयत्–'राजन्! भवान् दयालुः अस्ति, भवान् ज्ञायते यत् विशालजलजन्तवः लघुजन्तून् भक्षयन्ति, पुनः भवान् माम्

नद्यां कथं निपातितः? राजा सत्यव्रतः तस्य मीनस्य दीनतापूर्णवाणीं श्रुत्वा तं स्व-कमण्डलौ स्थापयित्वा स्व-आश्रमे आनयत्। एकैव रात्रौ तस्याकारं अतिवृद्धिकारणात् तस्यानुरोधेन अतिविशालपात्रे, सरोवरे स्थापितः, स मीनः स्व-शरीर-वृद्धया परिव्याप्ते सति राजा तं समुद्रे निपात्यते। मत्स्यभगवतः मधुरवचनं श्रुत्वा सत्यव्रतस्य बुद्धिः मोहाच्छन्नो अभूत्। सः विनम्रभावेन अपृच्छत् को भवान्? एकदिवसे एव शतयोजनाकारे आच्छादितो भवान् निश्चयमेव साक्षात् सर्वशक्तिमान् सर्वव्यापी श्रीहरिः वर्तते। अहं ज्ञातुमिच्छामि यत् कस्मात् कारणात् भवता मत्स्यरूपं धार्यते। राज्ञः वचनं श्रुत्वा मत्स्यभगवान् अकथयत्-"भो शत्रुसूदन! अद्यतः सप्तदिने भूःलोकादि त्रयो लोकाः प्रलयपयोधेः निमग्नाः भविष्यन्ति। प्रलयकालिकी जलराशौ त्रिलोक-निमग्ने सति मम प्रेरणया एका विशाल-नौका तव पार्श्वे आगच्छति, त्वं समस्त ओषधिः, समस्तबीजा, सूक्ष्मशरीराः, सप्तर्षिभिः सह नौकायां स्थापितो भूत्वा वासुकी-नागद्वारा तं नावं मम अंगे बधान। तव 'परब्रह्म'सम्बन्धिप्रश्नस्योत्तरमपि दास्यामि। इति कथयित्वा मत्स्यभगवान् अन्तर्हितो अभवत्। पूर्वकथनानुसारं राजा तथैव कृतवान्। राजा सत्यव्रतस्य स्तवनेन मत्स्यरूपधारी-पुरुषोत्तमभगवान् प्रलय-पयोधौ विहरित्वा तत्त्वज्ञानस्य उपदेशं कृतवान्। यः मत्स्यपुराणनाम्ना प्रसिद्धो वर्तते। कथ्यते यथा–

गोविप्रसुरसाधूनां छन्दसामपि चेश्वरः।
रक्षामिच्छंस्तनुर्धत्ते धर्मस्यार्थं तथैव हि।।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—प्रलयपयोधिजले धृतवानसि वेदम्। विहित-वहित्रचरित्रमखेदम्।। इत्यनेन जयदेवः कस्यावतारस्य वर्णनं करोति?

उत्तरम्—मत्स्यावतारस्य।

2. **प्रश्नः**—समुद्रे प्रलयकालीनस्थितिः कदा भवति?

उत्तरम्—सृष्टिकर्तुर्ब्रह्मणः सुप्तावस्थायां सृजनशक्तिः लुप्तावस्थायाम्।

3. **प्रश्नः**—हयग्रीवदैत्यद्वारा अपहृतवेदान् कः आनीतवान्?

उत्तरम्—भगवान् श्रीहरिः।

4. **प्रश्नः**—राजर्षि सत्यव्रतं सप्तर्षीन् च ब्रह्मतत्त्वस्य उपदेशं केन प्रदीयते स्म?

उत्तरम्—भगवता मत्स्येन।

5. **प्रश्नः**—प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा। दितिजमकथयद् यो ब्रह्म सत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं नतोऽस्मि।। मीनावतारविषयकः उक्तश्लोकः कुतः उद्धृतः?

उत्तरम्—श्रीमद्भागवतपुराणात्।

6. **प्रश्नः**—कृतयुगस्य प्रारम्भे विख्यातः एकः कः राजर्षिः आसीत्?

उत्तरम्—सत्यव्रतः।

7. **प्रश्नः**— वैवस्वत-मनुः कः वर्तते?

उत्तरम्—राजा सत्यव्रतः।

8. **प्रश्नः**—क्षमाशीलः, समस्तश्रेष्ठगुणसम्पन्नः, सुखे-दुःखे च समभावः एकः वीर-पुरुषः कः आसीत्?

उत्तरम्—सत्यव्रतः।

9. **प्रश्नः**—पुत्रं राज्यभारं अर्पयित्वा सत्यव्रतः तपस्यार्थे कुत्र गतः?

उत्तरम्—मलयपर्वते।

10. **प्रश्नः**— तपसि दशसहस्त्रवर्षव्यतीते सति ब्रह्मा सत्यव्रतं किं वरं प्रदीयते?

उत्तरम्—प्रलयकाल-उपस्थिते सति त्वं चराचर-समस्त-भूत-समुदायस्य रक्षयितुं समर्थो भव।

11. **प्रश्नः**—तर्पणकार्ये तत्परस्य राजर्षि सत्यव्रतस्य अञ्जल्यां कः आगतः?

उत्तरम्—मीनः।

12. **प्रश्नः**—मीनो अतिकारुण्येन सह राज्ञा किं अकथयत्?

उत्तरम्—'राजन्! भवान् दयालुः अस्ति, भवान् ज्ञायते यत् विशालजलजन्तवः लघुजन्तून् भक्षयन्ति।

13. **प्रश्नः**—एकैव रात्रौ तस्याकारे अतिवृद्धिकारणात् तस्यानुरोधेन राजा तं कुत्र निपातितः?

उत्तरम्—समुद्रे।

14. **प्रश्नः**— कस्य मधुरवचनं श्रुत्वा सत्यव्रतस्य बुद्धिः मोहाच्छन्नो अभूत्?

उत्तरम्—मत्स्यभगवतः।

15. **प्रश्नः**— कस्मात् कारणात् भगवता मत्स्यरूपं धार्यते?

उत्तरम्—समस्त ओषधिः, समस्तबीजा, सूक्ष्मशरीराः, सप्तर्षिभिः रक्षणार्थम्।

16. **प्रश्नः—** मीनभगवता सिंहे नौकाबन्धनार्थं कस्य उपयोगः कृतवान्?

उत्तरम्—वासुकीनागस्य।

17. **प्रश्नः—**राजन्यं सत्यव्रतं च ब्रह्मतत्त्वस्य ज्ञानं केन प्रदीयते?

उत्तरम्—भगवान् मीनः।

18. **प्रश्नः—**मत्स्यपुराणस्य रचनाकारः कः?

उत्तरम्—वेदव्यासः।

19. **प्रश्नः—** मत्स्यपुराणे कति श्लोकाः सन्ति?

उत्तरम्—14000 श्लोकाः।

2. **कच्छपावतारवर्णनम्**—जयदेवस्य गीतगोविन्दे यथा-

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे।
धरणिधरणकिणचक्रगरिष्ठे।।
केशवधृतकच्छपरूप जय जगदीश हरे।। (2)

भगवतः कच्छप (कूर्म) धारणसमये तस्य पृष्ठे भ्राम्यन्मन्दरगिरिः आसीत्। पृष्ठ-कण्डूयमानेन परमप्रभावशाली श्वास-वायुना समुद्रस्य जले धक्यते। भणितं यथा श्रीमद्भागवतपुराणे-

पृष्ठे भ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयना-
न्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु वः।
यत्संस्कारकलानुवर्तनवशाद् वेलानिभेनाम्भसां
यातायातमतन्द्रितं जलनिधेर्नाद्यापि विश्राम्यति।।
(श्रीमद्भागवत-12/13/2)

विष्णुपुराणे एका कथा वर्तते, कथायाः सारं इत्थं विद्यते—विद्याधरी द्वारा अत्यन्त-सुगन्धितमाला महर्षिदुर्वाससं अददत्, सा माला महर्षिः इन्द्रं दत्तवान्, इन्द्रः तां मालां ऐरावतमस्तके अस्थापयत्, ऐरावतः तां मालां महीतले क्षिप्ता। कथ्यते यथा विष्णुपुराणे-

मया दत्तमिमां मालां यस्मान्न बहु मन्यसे।
त्रैलोक्यश्रीरतो मूढ विनाशमुपयास्यसि।।
मद्दत्ता भवता यस्मात् क्षिप्ता माला महीतले।
तस्मात् प्रणष्टलक्ष्मीकं त्रैलोक्यं ते भविष्यति।।
(विष्णुपुराण-1/9/14-16)

भयाक्रान्तशचीपतिः महर्षिचरणयोः निपत्य प्रार्थयामास। तथापि महर्षिः कथयति—

नाहं क्षमिष्ये बहुना किमुक्तेन शतक्रतो।
विडम्बनामिमां भूयः करोत्यनुनयात्मिकाम्।।
(विष्णुपुराण-1/9/24)

उदास इन्द्रः अमरावतीमगच्छत्। तत्क्षणेन अमरेन्द्रसहित-त्रैलोक्यस्य वृक्ष-तृण-लतादयः क्षीणाः श्रीहताः विनष्टाश्च अभूवन्। असहाय-निरुपाय-दुर्बल-देवगणाः वेदवाण्यां श्रीभगवतः स्तूयन्ते। उक्तं यथा भागवतपुराणे-

स त्वं नो दर्शयात्मानमस्मत्कारणगोचरम्।
प्रपन्नानां दिदृक्षूणां सस्मितं ते मुखाम्बुजम्।।
(श्रीमद्भागवत-8/5/45)

देवगणानां स्तवेन संतुष्टः अमिततेजस्वी भगवान् विष्णुः समुपस्थितः। देवानां निवेदनमिदमस्ति-

त्वमार्त्ताः शरणं विष्णो प्रयाता दैत्यनिर्जिताः।
वयं प्रसीद सर्वात्मंस्तेजसाप्याययस्व नः।।
(विष्णुपुराण-1/1/72)

पुनः सशक्ताय युष्मभ्यं जरा-मृत्युनिवारिणी सुधा अपेक्षिता वर्तते। सुधा समुद्र-मन्थनेन प्राप्ता भविष्यति। अतः यूयं कृते सामनीतिमवलम्बयित्वा असुरैः सह सन्धिः आवश्यकम्। समुद्रे सम्पूर्णं ओषधिं ददतु तत्परं मन्दरगिरिं मथानी एवं नागराजवासुकिनागस्य नेती निर्माय मम सहायतया समुद्र-मन्थनं कुर्वन्तु। देवगणाः दैत्यराजबलिसमीपे गत्वा समुद्र-मन्थनस्य योजनां प्रकाशितवान्। अमृते देव-दैत्यानां समानभागो भविष्यति, अस्योपरि सहमतिः अभूत्। योजनानुसारं कार्यभूते सति आधाररूपे श्रीभगवान् विचित्र-कच्छपस्य रूपं धारयित्वा समुद्रे मन्दरगिरेः तले अगच्छत्। भगवतः कच्छपावतारस्य एकलक्षयोजनकृतोपरि मन्दरगिरिः स्थापितवान्। समुद्र-मन्थनकार्यसम्पन्नं स्यात्। एतदर्थं श्रीभगवान् शक्ति-संवर्द्धनाय असुरेषु असुररूपेण, देवेषु देवरूपेण, वासुकीनागे निद्रारूपेण प्रविष्टः।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः—**क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे। धरणिधरणकिणचक्रगरिष्ठे।। इति कस्यावतारस्य अवधारणा?

उत्तरम्—कच्छपावतारस्य।

2. **प्रश्नः—**भगवतः कच्छप (कूर्म) धारणसमये तस्य पृष्ठे भ्राम्यद् को गिरिः आसीत्?

उत्तरम्—मन्दरगिरिः।

3. **प्रश्नः—**विष्णुपुराणानुसारं विद्याधरी द्वारा अत्यन्त-सुगन्धितमाला कं अददत्?

उत्तरम्—महर्षिदुर्वासम्।

4. **प्रश्नः—**महर्षिदुर्वासा माला कं दत्तवान्?

उत्तरम्—इन्द्रम्।

5. **प्रश्नः—** इन्द्रः तां मालां कं प्रदत्तः?

उत्तरम्—ऐरावतम्।

6. **प्रश्नः—** मस्तकात् ऐरावतः तां मालां कुत्र क्षिप्ता?

उत्तरम्—महीतले।

7. **प्रश्नः—**मया दत्तमिमां मालां यस्मान्न बहु मन्यसे। त्रैलोक्यश्रीरतो मूढ विनाशमुपयास्यति।। मद्दत्ता भवता यस्मात् क्षिप्ता माला महीतले। तस्मात् प्रणष्टलक्ष्मीकं त्रैलोक्यं ते भविष्यति। कस्य पुराणस्य श्लोकोऽयम्?

उत्तरम्—विष्णुपुराणस्य।

8. **प्रश्नः—** भयाक्रान्तः शचीपतिः कस्य महर्षिचरणयोः निपत्य प्रार्थयामास?

उत्तरम्—महर्षिदुर्वाससः।

9. **प्रश्नः—**नाहं क्षमिष्ये बहुना किमुक्तेन शतक्रतो। विडम्बनामिमां भूयः करोत्यनुनयात्मिकाम्।। कस्य पुराणस्य कथनमिदम्?

उत्तरम्—विष्णुपुराणस्य।

10. **प्रश्नः—**उदास इन्द्रः असहाय-निरुपाय-दुर्बल-देवगणैः कं स्तूयन्ते?

उत्तरम्—वेदवाण्यां श्रीभगवतः।

11. **प्रश्नः—**विष्णुपुराणे देवानां निवेदनं किमस्ति?

उत्तरम्—त्वमार्त्ताः शरणं विष्णो प्रयाता दैत्यनिर्जिताः। वयं प्रसीद सर्वात्मंस्तेजसाप्याययस्व नः।।

12. **प्रश्नः—**पुनः सशक्ताय युष्मभ्यं किम् अपेक्षितो वर्तते?

उत्तरम्—जरा-मृत्युनिवारिणी-सुधा।

13. **प्रश्नः—**सुधा केन प्राप्ता भविष्यति?

उत्तरम्— समुद्र-मन्थनेन।

14. **प्रश्नः—**यूयं सामनीतिमवलम्बयित्वा कैः सह सन्धिः करणीया?

उत्तरम्—असुरैः सह।

15. **प्रश्नः—**समुद्रमथनावसरे मथानी कः अभूत्?

उत्तरम्—मन्दरगिरिः।

16. **प्रश्नः—**समुद्रमथने नेती कस्य अभवत्?

उत्तरम्—वासुकिनागस्य।

17. **प्रश्नः—**समुद्रमथनक्रमे कस्योपरि सहमतिः अभूत्?

उत्तरम्—अमृते प्राप्ते देव-दैत्यानां समानभागो भविष्यति।

18. **प्रश्नः—**समुद्रमथनक्रमे मन्दरगिरेः तले कः आधाररूपम्?

उत्तरम्—श्रीभगवान् विचित्र-कच्छपस्य रूपम्।

19. **प्रश्नः—**भगवतः कच्छपावतारः कति योजनाकृतिः मन्दरगिरिः स्थापितवान्?

उत्तरम्—एकलक्षयोजनकृतोपरि।

20. **प्रश्नः—**समुद्र-मन्थनकार्यसम्पन्नतायां शक्ति-संवर्द्धनाय श्रीहरिः कैः कैः रूपैः प्रविष्टः?

उत्तरम्—असुरेषु असुररूपेण, देवेषु देवरूपेण, वासुकीनागे निद्रारूपेण।

3. **वाराहावतारवर्णनम्**– जयदेवस्य गीतगोविन्दे यथा–

वसति दशनशिखरे धरणी तव लग्ना
शशिनि कलङ्ककलेव निमग्ना।
केशवधृतसूकररूप जय जगदीश हरे।। (3)

स्रुक्तुण्डसामस्वरधीरनादप्राग्वंशकायाखिलसत्रसन्धे।
पूर्तेष्टधर्मश्रवणोऽसि देव सनातनात्मन् भगवन् प्रसीद।। (विष्णुपु०-1/4/34)

भगवान् वाराहावतारप्रसङ्गे एका कथा प्रचलिता आसीत्। आसक्ति-विहीना समस्तलोकेषु आकाशमार्गेण विचरणयोग्याः चतुर्मुखब्रह्मणः मानसपुत्राः सनकादि ऋषयः भगवद्दर्शनाय वैकुण्ठगमनं कृतवन्तः। षष्ठद्वारं प्रवेशोपरान्ते सप्तमद्वारे जय-विजयनामकौ द्वौ द्वारपालौ दिगम्बरवृत्तस्य परिहासेन सह मार्गमवरोधयतः। सनकादिऋषयः शान्तभावेन तौ अवबोधयन्ति परन्तु भेदबुद्धेः दृढता, पार्षदपदस्य अहंभावयुक्तकारणैः तपस्वी-ऋषयः तौ शापं दत्तवन्तः यत् वैकुण्ठात् निष्क्रम्य पापपूरितयोनिषु गच्छतम्।

यत्र काम-क्रोध-लोभः त्रि-शत्रुः निवसति। स्व-पार्षदयोः व्यवहारमेवं सनकादयश्च शापं ज्ञात्वा पद्मनाभ-श्रीहरिः

लक्ष्म्या सह तत्रागतः। भगवान् कमलनयनस्य दर्शनेन, अलौकिकगन्धेन सनकादयः आकुलोऽभूत्। श्रीमद्भागवत-पुराणे भगवतः स्वरूपवर्णनमित्थं वर्तते–

ते वा अमुष्य वदनासितपद्मकोश-
मुद्वीक्ष्य सुन्दरतराधरकुन्दहासम्।
लब्धाशिषः पुनरवेक्ष्य तदीयमङ्घ्रि-
द्वन्द्वं नखारुणमणिश्रयणं निदध्युः।।
(श्रीमद्भागवत-3/15/44)

सनकादयः भगवतः प्रत्यक्षदर्शनं कृत्वा ते निखिल-सृष्टिनायकस्य स्तुतिः एवं तस्य मङ्गलमयचरणकमलयोः प्रणामं कुर्वन्ति स्म। वैकुण्ठवासी-श्रीहरिः तेषां प्रसंशायां कथयति-मुनिवर! जय-विजयौ मम पार्षदौ स्तः। भवतः अपराधिनः, भवन्तः दण्डं विधायं उचितं अकुर्वन्। ब्राह्मणाः मम परम-आराध्यो वर्तते। सत्यता तु इदं वर्तते यत् भवतः शापः मम प्रेरणया अभूत्। इमौ द्वौ दैत्ययोनौ जन्म लेभे, किन्तु क्रोधावेशयुक्त-एकाग्रताकारणात् शीघ्रमेव मम पार्श्वे पुनरागमिष्यतः।

असमय-कामनापूर्तिकारणात् कश्यप-दितिसंयोगेन द्वौ क्रूरकर्मा पुत्रौ अभवताम्। इमौ द्वौ जन्मग्रहणोपरान्तैव पर्वताकारः परमपराक्रमी अभवताम्। तयोर्नामनि हिरण्यकशिपुः हिरण्याक्षश्च आस्ताम्। द्वयोर्भ्रातरयोर्मध्ये अति-प्रीतिः आस्ताम्। हिरण्याक्षः ब्रह्मणः सृष्टि-रचनायाः धारणाशक्तिं धरां अपहृत्य रसातले अगच्छत्। सर्वान्तर्यामी सर्वलोक-महेश्वर-भगवतः स्मृतिभूते सति अकस्मात् पद्मयोनेः नासाछिद्रतः अङ्गुष्ठकारसदृशः एकः श्वेत-वराह-शिशुः उत्पन्नोऽभूत्। तत्क्षणैव सः विशाल-गज-सदृशः अभूत्। वराह-भगवतः स्वरूपं श्रीमद्भागवतपुराणे इत्थं वर्तते–

उत्क्षिप्तवालः खचरः कठोरः
सदा विधुन्वन् खररोमशत्वक्।
खुराहताभ्रः सितदंष्ट्र ईक्षा-
ज्योतिर्बभासे भगवान्महीध्रः।।
घ्राणेन पृथ्व्याः पदवीं विजिघ्रन्
क्रोडापदेशः स्वयमध्वराङ्गः।
करालदंष्ट्रोऽप्यकरालदृग्भ्या-
मुद्वीक्ष्य विप्रान् गुणतोऽविशत्कम्।।
(श्रीमद्भा०3213/27-28)

वराहरूपी भगवान् अतिवेगेन जलं विहाय रसातले अगच्छत्। तत्र सम्पूर्णजनानां आश्रयभूतां धरामपश्यत्। वराहरूपिणं भगवन्तं दृष्ट्वा प्रसन्ना धरा तस्य स्तुतिः कृतवती। यथा विष्णुपुराणे–

नमस्ते पुण्डरीकाक्ष शङ्खचक्रगदाधर।
मामुद्धरास्मादद्य त्वं त्वत्तोऽहं पूर्वमुत्थिता।।
भवतो यत्परं तत्त्वं तन्न जानाति कश्चन।
अवतारेषु यद्रूपं तदर्चन्ति दिवौकसः।।
यत्किञ्चिन्मनसा ग्राह्यं यद्ग्राह्यं चक्षुरादिभिः।
बुद्ध्या च यत्परिच्छेत्तुं तद्रूपमखिलं तव।।
मूर्तामूर्तमदृश्यं च दृश्यं च पुरुषोत्तम।
यच्चोक्तं यच्च नैवोक्तं मयात्र परमेश्वरः।।
तत्सर्वं त्वं नमस्तुभ्यं भूयो भूयो नमो नमः।।
(विष्णुपुराण-1/4/12717-19-24)

पृथिव्याः स्तुतिं श्रुत्वा भगवान् वराहः घर्घर इति शब्देन गर्जनां कृतवान्। यथा विष्णुपुराणे–

ततः समुत्क्षिप्य धरां स्वदंष्ट्रया
महावराहः स्फुटपद्मलोचनः।
रसातलादुत्पलपत्रसंनिभः
समुत्थितो नील इवाचलो महान्।।
(विष्णुपु०124/26)

महावराहः स्वदंष्ट्रया पृथिवीं समुत्थित्वा रसातलात् बहिः आनयत्। एवं च युद्धेच्छुकः हिरण्याक्षः वरुणदेवद्वारा प्रतिपक्षी-श्रीहरेः स्थानं ज्ञानाय नारदपार्श्वे गतः, सः श्वेतवराहस्य रसातलगमनस्य वार्तां कथितवान्। श्रीहरिः पृथिवीं व्यवहारयोग्यस्थले स्थापयित्वा आधारशक्तेः संचार्यते। तत्परं वीरवरहिरण्याक्षेण सह भगवतः वराहस्य भयंकर-संग्रामोऽभूत्। संग्रामे हिरण्याक्षस्य मृत्युः अभवत्। सुरसमुदायः भगवतः वराहस्य स्तुतिः कुर्वन्ति स्म। यथा श्रीनरसिंहपुराणे–

विहाय रूपं वाराहं तीर्थे कोकेति विश्रुते।
वैष्णवानां हितार्थाय क्षेत्रं तद्रूपमुत्तमम्।।
(श्रीनरसिंहपु०39/16)

वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—वसति दशनशिखरे धरणी तव लग्ना। शशिनि कलङ्ककलेव निमग्ना। अनेन जयदेवः कस्यावतारस्य वर्णनं क्रियते?
उत्तरम्— वराहावतारस्य।

2. प्रश्नः—स्रुक्तुण्डसामस्वरधीरनादप्राग्वंशकायाखिल-सत्रसन्धे। पूर्तेष्टधर्मश्रवणोऽसि देव सनातनात्मन् भगवन् प्रसीद।। कस्य पुराणस्य श्लोकोऽयम्?
उत्तरम्—विष्णुपुराणस्य।

3. प्रश्नः—आसक्ति-विहीना समस्तलोकेषु आकाशमार्गेण विचरणयोग्याः चतुर्मुखब्रह्मणः मानसपुत्राः के सन्ति?
उत्तरम्—सनकादिऋषयः।

4. प्रश्नः—भगवद्दर्शनाय वैकुण्ठगमनं के कृतवन्तः?
उत्तरम्— सनकादिऋषयः।

5. प्रश्नः—सप्तमद्वारे जय-विजयनामकौ द्वौ द्वारपालौ दिगम्बरवृत्तयस्य परिहासेन सह केषां मार्गमवरोधतः?
उत्तरम्—सनकादिऋषीणाम्।

6. प्रश्नः—सनकादिऋषयः अहंभावयुक्तकारणैः कान् शापं प्रदीयते?
उत्तरम्—जय-विजयनामकौ द्वौ द्वारपालौ।

7. प्रश्नः—जय-विजयनामकौ द्वौ द्वारपालौ किं शापं दत्तवन्तः?
उत्तरम्—वैकुण्ठात् निष्क्रम्य पापपूरितयोनिषु गच्छतम्।

8. प्रश्नः—श्रीमद्भागवतपुराणे भगवतः स्वरूपवर्णनं किम्?
उत्तरम्—ते वा अमुष्य वदनासितपद्मकोशमुद्वीक्ष्य सुन्दरतराधरकुन्दहासम्। लब्धाशिषः पुनरवेक्ष्य-तदीयमङ्घ्रिद्वन्द्वं नखारुणमणिश्रयणं निदध्युः।।

9. प्रश्नः—असमय-कामनापूर्तिकारणात् काभ्यां संयोगाभ्यां द्वौ क्रूरकर्मा पुत्रौ अभवताम्?
उत्तरम्—कश्यप-दितिसंयोगाभ्याम्।

10. प्रश्नः—तयोर्नामनि के आस्ताम्?
उत्तरम्—हिरण्यकशिपुः हिरण्याक्षश्च।

11. प्रश्नः—ब्रह्मणः सृष्टि-रचनायाः धारणशक्तिः धरायाः अपहृत्य रसातले कः अगच्छत्?
उत्तरम्—हिरण्याक्षः।

12. प्रश्नः—सर्वान्तर्यामी पद्मयोनेः नासाछिद्रतः कस्य उत्पन्नोऽभूत्?
उत्तरम्—अङ्गुष्ठकारसदृशः एकः श्वेतवराहशिशोः।

13. प्रश्नः—श्रीमद्भागवतपुराणे वराह-भगवतः स्वरूपं किमस्ति?
उत्तरम्—उत्क्षिप्तवालः खचरः कठोरः सदा विधुन्वन् खररोमशत्वक्। खुराहताभ्रः सितदंष्ट्र ईक्षाज्योतिर्बभासे भगवान्महीध्रः।। घ्राणेन पृथ्व्याः पदवीं विजिघ्रन् क्रोडापदेशः स्वयमध्वराङ्गः। करालदंष्ट्रोऽप्य-करालदृग्भ्यामुद्वीक्ष्य विप्रान् गुणतोऽविशत्कम्।।

14. प्रश्नः—रसातलं आगत्य वराहभगवान् किं अपश्यत्?
उत्तरम्—सम्पूर्णजनानां आश्रयभूतां धरामपश्यत्।

15. प्रश्नः—विष्णुपुराणानुसारं वराह-भगवन्तं दृष्ट्वा प्रसन्ना धरा का स्तुतिः कृतवती?
उत्तरम्—नमस्ते पुण्डरीकाक्ष शङ्खचक्रगदाधर। मामुद्धरास्मादद्य त्वं त्वत्तोऽहं पूर्वमुत्थिता।। भवतो यत्परं तत्त्वं तन्न जानाति कश्चन। अवतारेषु यद्रूपं तदर्चन्ति दिवौकसः।। यत्किञ्चिन्मनसा ग्राह्यं यद्ग्राह्यं चक्षुरादिभिः। बुद्ध्या च यत्परिच्छेत्तुं तद्रूपमखिलं तव।। मूर्तामूर्तमदृश्यं च दृश्यं च पुरुषोत्तम। यच्चोक्तं यच्च नैवोक्तं मयात्र परमेश्वरः।। तत्सर्वं त्वं नमस्तुभ्यं भूयो भूयो नमो नमः।।

16. प्रश्नः—विष्णुपुराणानुसारं पृथिव्याः स्तुतिं श्रुत्वा भगवान् वराहः किं कृतवान्?
उत्तरम्—ततः समुत्क्षिप्य धरां स्वदंष्ट्र्या महावराहः स्फुटपद्मलोचनः। रसातलादुत्पलपत्रसंनिभः समुत्थितो नील इवाचलो महान्।।

17. प्रश्नः—महावराहः स्वदंष्ट्र्या समुत्थित्वा रसातलाद् बहिः कं आनयत्?
उत्तरम्—पृथ्वीम्।

18. प्रश्नः—श्रीहरिः पृथिवीं व्यवहारयोग्यस्थले स्थापयित्वा कस्य संचार्यते?
उत्तरम्—आधारशक्तेः।

19. प्रश्नः—युद्धेच्छुकं हिरण्याक्षं कः हतवान्?
उत्तरम्—भगवान् वराहः।

20. प्रश्नः—श्रीनरसिंहपुराणानुसारं सुरसमुदायः भगवतः वराहस्य स्तुतिः किमर्थं कुर्वन्ति स्म?
उत्तरम्—विहाय रूपं वाराहं तीर्थे कोकेति विश्रुते। वैष्णवानां हितार्थाय क्षेत्रं तद्रूपमुत्तमम्।।

4. नृसिंहावतारवर्णनम्— जयदेवस्य गीतगोविन्दे यथा–

तव करकमलवरे नखमद्भुतशृङ्गम्
दलितहिरण्यकशिपुतनुभृङ्गम्।।
केशवधृतनरहरिरूप जय जगदीश हरे।। (4)

भ्रातः हिरण्याक्षस्य वधोपरान्तं सन्तप्तहिरण्यकशिपुः दैत्यान्दानवान् संसारे अत्याचारस्य आज्ञां विधाय स्वयं महेन्द्राचले अगच्छत्। हृदये विष्णुं प्रति वैरभावं स्थाप्य घोर-तपस्यायां संलग्नोऽभूत्। इन्द्रः तपस्या-निरतहिरण्यकशिपुं दृष्ट्वा दैत्योपरि आक्रमणं कृत्वा तान् रसातलं प्रेषितवान्। एवं च राजमहले प्रवेशं कृत्वा राजरानीकयाधूम् वंदीकृतः। तस्मिन् समये सा गर्भवती आसीत्। मार्गे नारदस्य परामर्शानुसारं तां विहाय सः अमरावतीं गतवान्। नारदेन कयाधूं स्व-आश्रमे आनीतवान्। एवं च गर्भस्थ-बालकं लक्ष्यं कृत्वा तत्त्वज्ञानस्य उपदेशं दीयते स्म। स एव बालकः भगवद्भक्त-प्रह्लादः अभवत्। हिरण्यकशिपोः तपस्यया प्रसन्नः ब्रह्मा तस्य समीपे आगत्य वरं याचय इति कथितवान्। हिरण्यकशिपुः अकथयत्-यदि भवान् माम् अभीष्टवरं दातुमिच्छति तर्हि भवता निर्मितेन केनापि प्राणिना, सुर-असुर-नागादि केनापि मम मृत्यु न स्यात्, अस्त्र-शस्त्रेण, पृथिव्यां आकाशे, कुत्रापि मम मृत्युर्न स्यात्। युद्धे अपराजितस्य, अक्षयस्य ऐश्वर्यस्य च वरं देहि। तथास्तु कथयित्वा ब्रह्मा स्व-लोकं गतवान्। हिरण्यकशिपु अपि स्व-राजधानीं आगतः, नारद-आश्रमात् कयाधू एवं प्रह्लादः अपि आगताः। प्रह्लादं शिक्षाग्रहणार्थं गुरु-आश्रमे प्रेषितवान्। एकस्मिन् दिवसे हिरण्यकशिपु स्नेहेन प्रह्लादं शिक्षाविषयकज्ञानं प्रति अपृच्छत्। प्रह्लादः भगवद्भक्तेः प्रशंसां कृतवान्। क्रोधातुर-हिरण्यकशिपुः प्रह्लादस्य हननाय आदेशं दत्तवान् परन्तु अजेय-प्रह्लादः निष्कण्टकः आसीत्। एकस्मिन् दिवसे हिरण्यकशिपु प्रह्लादेन अकथयत् तव ईश्वरः कुत्र अस्ति? यदि अस्मिन् खम्भे अस्ति तर्हि अहं कथं न दृश्ये? प्रह्लादः अकथयत् माम् तु खम्भे अपि ईश्वरं दृश्ये। क्रोधातुरो हिरण्यकशिपुः खम्भोपरि प्रहारं कृतवान्। तत्र एका भयंकर-घटना घटिता-

सत्यं विधातुं निजभृत्यभाषितं
व्याप्तिं च भूतेष्वखिलेषु चात्मनः।
अदृश्यतात्यद्भुतरूपमुद्वहन्
स्तम्भे सभायां न मृगं न मानुषम्।।
(श्रीमद्भा०7/8/18)

सभागारे भयंकररूपं भगवन्तं नृसिंहं दृष्ट्वा हिरण्यकशिपुः हस्ते गदां गृहीत्वा युद्धे तत्परः। तत्परं सभागारस्य द्वारे जंघे स्थाप्य नृसिंहः विदीर्णं कृत्वा अमारयत्। ब्रह्माद्वारा प्रेरितेन प्रह्लादः नृसिंहपार्श्वे गत्वा प्रार्थनां कृतवान्। प्रह्लादस्य प्रार्थनया नृसिंहभगवान् शान्तोऽभवत्। श्रीमद्भागवते भणितमस्ति-

प्रह्लाद भद्र भद्रं ते प्रीतोऽहं तेऽसुरोत्तम।
वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृणाम्।।
मामप्रीणत आयुष्मन् दर्शनं दुर्लभं हि मे।
दृष्ट्वा मां न पुनर्जन्तुरात्मानं तप्तुमर्हति।।
प्रीणन्ति ह्यथ मां धीराः सर्वभावेन साधवः।
श्रेयस्कामा महाभागाः सर्वासामाशिषां पतिम्।।
(श्रीमद्भा०7/9/52-54)

भगवान् नृसिंहः प्रह्लादमभयप्रदानेन सह वरमपि प्रदानं कृतवान्। प्रह्लादः अकथयत् हे श्रीहरि मम हृदये कस्मिन् समयेऽपि कामनायाः बीजं अंकुरितं न स्यात्। तथास्तु कथयित्वा नृसिंहदेवः ततः अन्तर्धानमभवत्।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—तव करकमलवरे नखमद्भुतशृङ्गम्। दलित-हिरण्यकशिपुतनुभृङ्गम्।। अनेन कस्य अवतारस्य वर्णनं कृतं जयदेवेन?
   उत्तरम्—नरसिंहावतारस्य।
2. **प्रश्नः**—भ्राता-हिरण्याक्षस्य वधोपरान्ते सन्तप्त-हिरण्यकशिपुः दैत्यान्दानवान् संसारे अत्याचारस्य आज्ञां विधाय स्वयं कुत्र अगच्छत्?
   उत्तरम्—महेन्द्राचले।
3. **प्रश्नः**—हृदये विष्णुं प्रति वैरभावं-स्थाप्य घोर-तपस्यायां कः संलग्नोऽभूत्?
   उत्तरम्—हिरण्यकशिपुः।
4. **प्रश्नः**—तपस्या-निरतं हिरण्यकशिपुं दृष्ट्वा दैत्योपरि कः आक्रमणं कृत्वा कान् रसातलं प्रेषितवान्?
   उत्तरम्— दैत्यान्।
5. **प्रश्नः**— राजरानीकयाधू का आसीत्?
   उत्तरम्—हिरण्यकशिपोः भार्या।
6. **प्रश्नः**—गर्भवती-राजरानीकयाधूं वंदी कः कृतवान्?
   उत्तरम्—इन्द्रः।
7. **प्रश्नः**—नारदस्य परामर्शानुसारं कयाधूः कुत्र निवासिता?
   उत्तरम्—नारदस्य स्व-आश्रमे।
8. **प्रश्नः**—गर्भस्थ-बालकं लक्ष्यं कृत्वा तत्त्वज्ञानस्य उपदेशं केन दीयते स्म?
   उत्तरम्—देवर्षिनारदेन।

9. **प्रश्नः**—बालकः भगवद्भक्त-प्रह्लादः कः?
   उत्तरम्—हिरण्यकशिपोः आत्मजः।
10. **प्रश्नः**—हिरण्यकशिपुः प्रसन्नब्रह्मणः किमिच्छिन् वरदानं याचितवान्?
    उत्तरम्—भवता निर्मितेन केनापि प्राणिना, सुर-असुर-नागादि केनापि मम मृत्युर्न स्यात्, अस्त्र- शस्त्रेण, पृथिव्यां आकाशे, कुत्रापि मम मृत्युर्न स्यात्। युद्धे अपराजितस्य, अक्षयस्य ऐश्वर्यस्य च वरं देहि।
11. **प्रश्नः**—हिरण्यकशिपुः स्नेहेन शिक्षाविषयकज्ञानं प्रति कं अपृच्छत्?
    उत्तरम्—प्रह्लादम्।
12. **प्रश्नः**—प्रह्लादः कस्य प्रशंसां कृतवान्?
    उत्तरम्—भगवद्भक्तेः।
13. **प्रश्नः**—क्रोधातुर-हिरण्यकशिपुः प्रह्लादं हननाय कान् आदेशं दत्तवान्?
    उत्तरम्—दैत्यसैनिकान्।
14. **प्रश्नः**—ईश्वरस्य स्थितिविषयकप्रश्ने प्रह्लादेन किमुत्तरितम्?
    उत्तरम्—मयि, त्वयि, तस्मिन्, खम्भे इत्यादिस्थलेषु।
15. **प्रश्नः**— प्रह्लादस्योत्तरं प्रति क्रुद्धेन हिरण्यकशिपुना किं कृतम्?
    उत्तरम्—क्रोधातुरहिरण्यकशिपुः खम्भोपरि प्रहारं कृतवान्।
16. **प्रश्नः**—सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु न चात्मनः। अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम्।। उक्त श्लोकः कुत्र उद्धृतः?
    उत्तरम्—श्रीमद्भागवतपुराणे।
17. **प्रश्नः**— सभागारे कं दृष्ट्वा हिरण्यकशिपु हस्ते गदां गृहीत्वा युद्धे तत्परः?
    उत्तरम्—भयंकररूपं भगवन्तं नृसिंहम्।
18. **प्रश्नः**—सभागारस्य द्वारे जंघे स्थाप्य नृसिंहः विदीर्णं कृत्वा कं अमारयत्?
    उत्तरम्—हिरण्यकशिपुम्।
19. **प्रश्नः**—कस्य प्रार्थनया नृसिंहभगवान् शान्तोऽभवत्?
    उत्तरम्—प्रह्लादस्य।
20. **प्रश्नः**—कः प्रह्लादमभयप्रदानेन सह वरमपि प्रदानं कृतवान्?
    उत्तरम्—श्रीनृसिंहभगवान्।

5. **वामनावतारः**– जयदेवस्य गीतगोविन्दे यथा-

छलयसि विक्रमणे बलिमद्भुतवामन।
पदनखनीरजनितजनपावन।।
केशवधृतवामनरूप जय जगदीश हरे।। (5)

पूर्वकालस्य वार्ता अस्ति, सुर-असुरमध्ये व्याप्तयुद्धे देवता पराजितोऽभूत्। स्वर्गोपरि दैत्येश्वर-बलेः साम्राज्यं स्थापितः। इन्द्रादिदेवगणाः ब्रह्मणः पार्श्वे गत्वा वन्दनां कृतवान्। ब्रह्मा क्षीरसागरस्य उत्तरतटे कठिनतपसे आदेशं दत्तवान्। कश्यपस्य नेतृत्वे देवगणाः नारायणस्य वेदोक्त 'परमस्तव' नामकस्तोत्रद्वारा वन्दनां कृतवन्तः। भगवान् विष्णुः उपस्थित्वा अभीष्टवराय आश्वासितम्। देवगणाः अदितिगर्भतः जन्मग्रहणाय निवेदिताः। नारायणस्य आश्वासनोपरान्ते देवगणाः कश्यपाश्रमे आगताः। वामनपुराणे नारायणस्य वरदानविषयककथनम्-

कृतः प्रसादो हि मया तव देवि यथेप्सितम्।
स्वांशेन चैव ते गर्भे सम्भविष्यामि कश्यपात्।।
तव गर्भे समुद्भूतस्ततस्ते ये त्वरातयः।
तानहं च हनिष्यामि निवृत्ता भव नन्दिनि।।
(वामनपु०28/10-11)

श्रद्धा-भक्तिपूर्णस्तुतिः कृते सति भगवान् चतुर्भुज-रूपस्य परित्यागं कृत्वा स्वयं वामनाकृतिरूपे परिवर्तितवान्। कश्यपादिब्रह्मर्षिगणाः वामनस्य उपनयनादिसंस्काराः कृतवन्तः। भणितं यथा वामनपुराणे महर्षिभरद्वाजेन-

ब्रह्मन् व्रजामि देहाज्ञां कुरुक्षेत्रं महोदयम्।
तत्र दैत्यपतेः पुण्यो ह्यमेधः प्रवर्तते।।
(वामनपु०88/52)

तदा भगवान् वामनः ब्रह्मचारीवेषे परम-पवित्रकुरुक्षेत्रे बलिद्वारा आयोजित-अश्वमेध-यज्ञस्थले गतवान्। तत्र श्वेत-वस्त्र-पुष्प-चन्दनादि धारयित्वा ऋषिकन्या पत्नी विन्ध्यावली सह यज्ञकर्मणि तत्पराः आसन्। शुक्राचार्यः शुभलक्षण-सम्पन्नश्वेताश्वं तारकाक्षस्य नेतृत्वे धरोपरि विचरणार्थं विमोचितवान्। ध्यानयोगेन शुक्राचार्यः अवगतं यत् वामनः किमर्थमागच्छति एवं कोऽपि दानं नास्ति दाने कथितवान्, परन्तु राजाबलिः शुक्राचार्यस्य आज्ञां अमान्यं कृतवान्, कुपित-

शुक्राचार्यः तं राजलक्ष्म्या भ्रष्टस्य शापं प्रदत्तवान्। तस्मिन् समये सुरगणैः सह भगवान् वामनः यज्ञशालायां अगच्छत्। राजाबलिद्वारा दानग्रहणहेतु अनुरोधोपरि वामनरूपधारी भगवान् विष्णुः गम्भीर-वाण्यामकथयत्। यथा वामनपुराणे–

ममाग्निशरणार्थाय देहि राजन् पदत्रयम्।
सुवर्णग्रामरत्नादि तदर्थिभ्यः प्रदीयताम्।।
(वामनपु०31/44)

एतावता दैत्यपते कृतकृत्योऽस्मि मार्गणे।
अन्येषामर्थिनां वित्तमिच्छया दास्यते भवान्।।
(वामनपु०31/46)

गजाश्वभूहिरण्यादि तदर्थिभ्यः प्रदीयताम्।
एतावता त्वहं चार्थी देहि राजन् पदत्रयम्।।
(वामनपु०91/16)

महात्मा-वामनस्य याचनोपरान्तं तु राजाबलिः पदत्रयं दानाय संकल्पं कृतवान्। ततः परं वामनः सर्वदेवमयरूपं धारयित्वा एकपगेन चराचरसहितधरां अङ्गीकृतः, द्वितीयपगेन स्वर्ग-मह-जन-आकाश-तमोलोकान् आच्छादितः, तृतीयपगेन ब्रह्माण्डोदरस्य भेदनं कृत्वा निरालोकप्रदेशं आच्छादयित्वा दैत्येन्द्रेण अकथयत् यत् मम तृतीयपगं पूरय अथवा ममाधीनं बन्धने आगच्छतु। कथ्यते यथा श्रीमद्भागवते–

इन्द्रसेन महाराज याहि भो भद्रमस्तु ते।
सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः।।
न त्वामभिभविष्यन्ति लोकेशाः किमुतापरे।
त्वच्छासनातिगान् दैत्यांश्चक्रं मे सूदयिष्यति।।
रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छदम्।
सदा सन्निहितं वीर तत्र मां द्रक्ष्यते भवान्।।
(श्रीमद्भा०8/22/33-35)

एवं मधुसूदनः दैत्यराजबलिना पत्नी-पुत्रसहितः तान् सुतललोकगमनाय कथयित्वा स्वयं धरां गृहीत्वा ब्रह्मणा एवं देवगणैः सह इन्द्रपार्श्वे अगच्छत्। तत्र इन्द्रं स्वर्गाधिपतिं तथा च देवगणान् यज्ञभाग्भोजिनः स्थापयित्वा अन्तर्हितः अभूत्।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—छलयसि विक्रमणे बलिमद्भुतवामन। पदनखनीरजनितजनपावन।। अनेन जयदेवः कस्य अवतारस्य चर्चां कृतवान्?
उत्तरम्—वामनावतारस्य।

2. **प्रश्नः**—पूर्वकाले सुर-असुरमध्ये व्याप्तयुद्धे के पराजिताऽभूवन्?
उत्तरम्—देवगणाः।

3. **प्रश्नः**—स्वर्गोपरि कस्य साम्राज्यं स्थापितः?
उत्तरम्—दैत्येश्वर-बलेः।

4. **प्रश्नः**—इन्द्रादिदेवगणाः कश्यपस्य नेतृत्वे क्षीरसागरस्य उत्तरतटे 'परमस्तव'नामकस्तोत्रद्वारा कस्य वन्दनां कृतवन्तः?
उत्तरम्—नारायणस्य।

5. **प्रश्नः**—देवगणाः कं अदितिगर्भतः जन्मग्रहणाय निवेदितवन्तः?
उत्तरम्—नारायणम्।

6. **प्रश्नः**—वामनपुराणे नारायणस्य वरदानविषयककथनं किम्?
उत्तरम्—कृतः प्रसादो हि मया तव देवि यथेप्सितम्। स्वांशेन चैव ते गर्भे सम्भविष्यामि कश्यपात्।। तव गर्भे समुद्भूतस्ततस्ते ये त्वरातयः। तानहं च हनिष्यामि निवृत्ता भव नन्दिनि।।

7. **प्रश्नः**—श्रद्धा-भक्तिपूर्णस्तुतिः कृते सति भगवान् चतुर्भुजरूपस्य परित्यागं कृत्वा स्वयं कस्मिन् रूपे परिवर्तितवान्?
उत्तरम्—स्वयं वामनाकृतिरूपे।

8. **प्रश्नः**—वामनपुराणे महर्षिभारद्वाजेन किं कथ्यते?
उत्तरम्—ब्रह्मन् व्रजामि देहाज्ञां कुरुक्षेत्रं महोदयम्। तत्र दैत्यपतेः पुण्यो हयमेधः प्रवर्तते।।

9. **प्रश्नः**—भगवान् वामनः ब्रह्मचारीवेषे परम-पवित्रकुरुक्षेत्रे कस्य यज्ञे गतवान्?
उत्तरम्—बलिद्वारा आयोजित-अश्वमेध-यज्ञस्थले।

10. **प्रश्नः**—यज्ञस्थले श्वेत-वस्त्र-पुष्प-चन्दनादि धारणीया ऋषिकन्या का?
उत्तरम्—बलेः पत्नी विन्ध्यावली।

11. **प्रश्नः**—शुक्राचार्यः शुभलक्षणसम्पन्नश्वेताश्वं कस्य नेतृत्वे धरोपरि विचरणार्थं विमोचितवान्?
उत्तरम्—तारकाक्षस्य नेतृत्वे।

12. **प्रश्नः**—केन ध्यानयोगेन अवगतं यत् वामनः किमर्थमागच्छति?
उत्तरम्—शुक्राचार्येण।

13. **प्रश्नः**—शुक्राचार्यस्य नास्ति कोऽपि दानमिति आज्ञां अमान्यं कः कृतवान्?
उत्तरम्—राजाबलिः।

14. **प्रश्नः**— बलिं राजलक्ष्म्या भ्रष्टस्य शापं केन प्रदत्तः?
उत्तरम्—शुक्राचार्येण।

15. **प्रश्नः**—सुरगणैः सह भगवान् वामनः कस्य यज्ञशालायां अगच्छत्?
उत्तरम्—राजाबलिद्वारा आयोजित-यज्ञशालायाम्।

16. **प्रश्नः**—वामनपुराणानुसारं दानग्रहणहेतु अनुरोधोपरि वामनरूपधारी भगवान् विष्णुः गम्भीर-वाण्यां किमकथयत्?
उत्तरम्—ममाग्निशरणार्थाय देहि राजन् पदत्रयम्। सुवर्णग्रामरत्नादि तदर्थिभ्यः प्रदीयताम्। एतावता दैत्यपते कृतकृत्योऽस्मि मार्गणे। अन्येषामर्थिनां वित्तमिच्छया दास्यते भवान्।। गजाश्वभूहिरण्यादि तदर्थिभ्यः प्रदीयताम्। एतावता त्वहं चार्थी देहि राजन् पदत्रयम्।।

17. **प्रश्नः**—महात्मा-वामनस्य याचनोपरान्तं तु राजाबलिः किं दानाय संकल्पं कृतवान्?
उत्तरम्—पदत्रयदानाय।

18. **प्रश्नः**—भगवान् वामनः किं रूपं धारयित्वा एकपगेन चराचरसहितधरां अङ्गीकृतः?
उत्तरम्—सर्वदेवमयरूपम्।

19. **प्रश्नः**—द्वितीयपगेन कान् लोकान् अङ्गीकृतः?
उत्तरम्—स्वर्ग-मह-जन-आकाश-तमोलोकान्।

20. **प्रश्नः**—तृतीयपगेन कान् लोकान् अङ्गीकृतः?
उत्तरम्—ब्रह्माण्डोदरस्य भेदनं कृत्वा निरालोकप्रदेशं बलिं पर्यन्तम्।

21. **प्रश्नः**—श्रीमद्भागवते भगवतः वामनस्य का उक्तिः?
उत्तरम्—इन्द्रसेन महाराज याहि भो भद्रमस्तु ते। सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः।। न त्वामभिभविष्यन्ति लोकेशाः किमुतापरे। त्वच्छासनातिगान् दैत्यांश्चक्रं मे सूदयिष्यति।। रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छदम्। सदा सन्निहितं वीर तत्र मां द्रक्ष्यते भवान्।।

22. **प्रश्नः**—मधुसूदनः दैत्यराजबलिना पत्नी-पुत्रसहितः कस्मिन् लोकगमनाय आदिष्यते?
उत्तरम्—सुतललोकगमनाय।

23. **प्रश्नः**—भगवता वामनेन इन्द्रं देवान् च कानि दत्वा अन्तर्हितं भूयतेस्म?
उत्तरम्—इन्द्रं स्वर्गाधिपत्यं देवगणान् च यज्ञाभागभोक्तृत्वं दत्वा।

6. परशुरामावतारवर्णनम्-जयदेवस्य गीतगोविन्दे यथा–

क्षत्रियरुधिरमये जगदपगतपापम्।
स्नपयसि पयसि शमितभवतापम्।।
केशव धृतभृगुपतिरूप जय जगदीश हरे।। (6)

महर्षिजमदग्नितः एवं पतिपरायणा पत्नी रेणुका गर्भात् पञ्चपुत्राः उत्पन्ना अभूत्। तेषां नामानि रुमण्वान्, सुषेण, वसु, विश्वावसु, परशुराम आसन्। येषु परशुरामः निखिल-सृष्टिनायकः श्रीविष्णोः आवेशावतारः वर्तते। परशुरामः भगवतः शंकरस्य आराधना कैलाशपर्वते कृतवान्। संतुष्ट-महादेवः तं अनेकमस्त्रशस्त्रसहितदिव्यपरशुं प्रदीयते। बाल्यकालादेव परशुरामः अत्यन्त-वीर, पराक्रमी, अस्त्र-शस्त्रविद्यायाः प्रेमी, त्यागी, तपस्वी एवं सुन्दरः आसीत्।

परशुरामसम्बन्धे एका कथा प्रचलिता आसीत्। एकदा माता रेणुका जलग्रहणाय यमुनातटे गतवती। तत्र गन्धर्वराज-चित्ररथः अप्सरासहितः जलक्रीडायां तत्परः, रेणुकायाः भावः दूषितो अभूत्, इदं ज्ञात्वा जमदग्निः क्रुद्धो अभवत्। आगते सति पुत्रैः अकथयत्–इयं पापिनीं वधं कुरुत। तत्र समुपस्थिताः चत्वारः पुत्राः मातृस्नेहवशात् स्तम्भिताः आसन्। तस्मिन् समये परशुरामः आगतः, क्रुद्धपिता जमदग्निः तेन अकथयत्–त्वं स्व-दुष्ट-माता- सहित एते चत्वारो भ्रातृन् वधं कुरु। परशुरामः मातासहितचतुर्णां भ्रातृणां मस्तकं खण्डयित्वा पृथक् कृतवान्। क्रोध-शान्ते सति महर्षिजमदग्निः वरयाचनार्थं परशुरामं अकथयत्। परशुरामः अकथयत्–मातासहित मम चत्वारो भ्रातरः पुनः जीवनाधारय, एवं मया हननात्मकस्मृतिः न स्यात्, युद्धे मम समक्षे सर्वे पराजिता भवेयुः। तथास्तु इति कथयित्वा महर्षिजमदग्निः सर्वं पुनर्जीवनं प्रदीयते स्म।

एकदा सहस्रार्जुनः महर्षिजमदग्नेः आश्रमे आगतः। महर्षिणा कामधेनोः द्वारा ससैन्यं तस्य अद्भुत-स्वागतं कृतवान्। शूरशिरोमणि सहस्रार्जुनः कामधेनोः याचना जमदग्निना

कृतवान्। जमदग्निः अकथयत् कामधेनुः मम समस्तधर्म-कर्मस्य जननी विद्यते। अतः धेनुं दातुमसमर्थोऽहम्। शक्तिसम्पन्नः सहस्त्रार्जुनः बलात् धेनुं गृहीत्वा माहिष्मतीपुरे अगच्छत्। समिधां गृहीत्वा परशुरामः आश्रमे आगते सति गो-हरण-वृत्तान्तं श्रुत्वा क्रोधाभावे अस्त्र-शस्त्रं गृहीत्वा माहिष्मतीपुरे अनुगच्छत्। तत्र गत्वा सैन्य-सहितसहस्त्रार्जुनं हत्वा धेनुं गृहीत्वा आश्रमे आगच्छत्। सहस्त्रार्जुनस्य दश-सहस्त्रपुत्राः युद्धभूमितः पलायिताः। किन्तु पितृनिर्देशानुसारं प्रायश्चित्तार्थं परशुरामः तीर्थाटने गतवान्। वीरसहस्त्रार्जुनस्य कायर-पुत्राः पितृहत्याप्रतिशोधकारणैः ध्यानमग्नमहर्षिजमदग्निं हतवान्। आश्रममपि विनष्टः। मातुः करुणक्रन्दनं श्रुत्वा परशुरामः माहिष्मतीपुरीं गत्वा सहस्त्रार्जुनस्य पञ्चपुत्रान् विहाय सर्वान् पुत्रान् हतवान्। सहस्त्रार्जुनस्य पञ्चपुत्राः जयध्वजः, शूरसेनः, वृषभः, मधुः, ऊर्जितः युद्धक्षेत्रात् पलायिताः। अत्युग्र-परशुरामः धरायाः कुकर्मी-पातकी-क्षत्रियाणां संहारः कृतवान्। भगवान् परशुरामः एकविंशतिवारं धरां क्षत्रियविहीनां कृतवान्। परशुरामेण भारद्वाजपुत्रद्रोणं भीष्ममपि अस्त्रविद्यां शिक्ष्यते।

वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—क्षत्रियरुधिरमये जगदपगतपापम्। स्नपयसि पयसि शमितभवतापम्।। अनेन जयदेवः कस्यावतारस्य वर्णनं कृतवान्?
   उत्तरम्—परशुरामावतारस्य।
2. प्रश्नः—महर्षिजमदग्नितः एवं पतिपरायणा पत्नी रेणुका-गर्भात् कति पुत्राः आसन्?
   उत्तरम्—पञ्चपुत्राः।
3. प्रश्नः—महर्षिजमदग्नेः पञ्चपुत्राणां नामानि कानि?
   उत्तरम्—रुमण्वान्, सुषेण, वसु, विश्वावसु, परशुरामः।
4. प्रश्नः—परशुरामः निखिलसृष्टिनायकः श्रीविष्णोः को अवतारः?
   उत्तरम्—आवेशावतारः।
5. प्रश्नः—भगवतः शंकरस्य आराधना कैलाशपर्वते कः कृतवान्?
   उत्तरम्—भगवान् परशुरामः।
6. प्रश्नः— संतुष्ट-महादेवेन परशुरामं किं प्रदीयते?
   उत्तरम्—अस्त्र-शस्त्रसहितदिव्यपरशुम्।
7. प्रश्नः—बाल्यकालात् एव अत्यन्त-वीर, पराक्रमी, अस्त्र-शस्त्रविद्यायाः प्रेमी, त्यागी, तपस्वी एवं सुन्दरः कः आसीत्?
   उत्तरम्—परशुरामः।
8. प्रश्नः—केन दर्शनेन रेणुकायाः भावः दूषितः अभूत्?
   उत्तरम्—अप्सरासहितः जलक्रीडायां तत्परः गन्धर्वराज-चित्ररथेन।
9. प्रश्नः—क्रुद्धो जमदग्निः पुत्रैः किमकथयत्?
   उत्तरम्—इयं पापिनीं वधं कुरुत।
10. प्रश्नः—समुपस्थिताः चत्वारो पुत्राः कस्मात् कारणात् स्तम्भिताः आसन्?
    उत्तरम्—मातृस्नेहवशात्।
11. प्रश्नः—क्रुद्धपिता जमदग्निः परशुरामेण किं अकथयत्?
    उत्तरम्—त्वं स्व-दुष्टा-माता-सहित एते चत्वारो भ्रातृन् वधं कुरु।
12. प्रश्नः—पितुः आज्ञया परशुरामः किं कृतवान्?
    उत्तरम्—माता-सहित चतुर्णां भ्रातृणां मस्तकं खण्डयित्वा पृथक् कृतवान्।
13. प्रश्नः—क्रोध-शान्ते सति महर्षिजमदग्निः वरयाचनार्थं कं अकथयत्?
    उत्तरम्—परशुरामम्।
14. प्रश्नः—तपोसिद्धपित्रा परशुरामः किं याचितवान्?
    उत्तरम्—माता-सहित मम चत्वारो भ्रातरः पुनः जीवनं धारय, एवं मया हननात्मकस्मृतिः न स्यात्, युद्धे मम समक्षे सर्वे पराजिता भवेयुः।
15. प्रश्नः—तथास्तु कथयित्वा महर्षि जमदग्निः किं प्रदीयते स्म?
    उत्तरम्—सर्वं पुनर्जीवनम्।
16. प्रश्नः—महर्षिजमदग्नेः आश्रमे सैन्यसहितः कः आगतः?
    उत्तरम्—सहस्त्रार्जुनः।
17. प्रश्नः—महर्षिः कस्याः सहयोगेन ससैन्यं तस्य अद्भुत-स्वागतं कृतवान्?
    उत्तरम्—कामधेनोः।
18. प्रश्नः—शूरशिरोमणि सहस्त्रार्जुनः कस्याः याचना जमदग्निना कृता?
    उत्तरम्—कामधेनोः।

19. प्रश्नः—धेनुं दातुमसमर्थे सति शक्तिसम्पन्नः सहस्त्रार्जुनः बलात् धेनुं गृहीत्वा कुत्र अगच्छत्?
    उत्तरम्—माहिष्मतीपुरे।
20. प्रश्नः—समिधां गृहीत्वा परशुरामः आश्रमे आगते सति गो-हरण-वृत्तान्तं श्रुत्वा क्रोधावेगेन किं कृतवान्?
    उत्तरम्—अस्त्र-शस्त्रं गृहीत्वा माहिष्मतीपुरं अनुगच्छत्।
21. प्रश्नः—माहिष्मतीपुरे गत्वा परशुरामः किं कृतवान्?
    उत्तरम्—सैन्य-सहितं सहस्त्रार्जुनं हत्वा धेनुं गृहीत्वा आश्रमे आगच्छत्।
22. प्रश्नः—सहस्त्रार्जुनस्य दश-सहस्त्रपुत्राः कुतः पलायिताः?
    उत्तरम्—युद्धभूमितः।
23. प्रश्नः—पिता-निर्देशानुसारं प्रायश्चित्तार्थं परशुरामः कुत्र गतवान्?
    उत्तरम्—तीर्थाटने।
24. प्रश्नः—वीर सहस्त्रार्जुनस्य कायर-पुत्राः पितृहत्याप्रति-शोधकारणैः किं कृतवन्तः?
    उत्तरम्—ध्यानमग्नमहर्षिजमदग्निं हतवान्।
25. प्रश्नः—मातुः करुणक्रन्दनं श्रुत्वा परशुरामः किं कृतवान्?
    उत्तरम्—माहिष्मतीपुरीं गत्वा सहस्त्रार्जुनस्य पञ्चपुत्रान् विहाय सर्वान् पुत्रान् हतवान्।
26. प्रश्नः—सहस्त्रार्जुनस्य के पञ्चपुत्राः युद्धक्षेत्रात् पलायिताः?
    उत्तरम्—जयध्वजः, शूरसेनः, वृषभः, मधुः, ऊर्जितः।
27. प्रश्नः—अत्युग्र-परशुरामः किं कृतवान्?
    उत्तरम्—धरायाः कुकर्मी-पातकी-क्षत्रियाणां संहारः।
28. प्रश्नः—भगवान् परशुरामः कति वारं धरां क्षत्रियविहीनां कृतः?
    उत्तरम्—एकविंशतिवारम्।
29. प्रश्नः—परशुरामेण अस्त्रविद्या के शिक्ष्यन्ते?
    उत्तरम्—भारद्वाजपुत्रद्रोणं भीष्ममपि।

7. रामावतारवर्णनम्—जयदेवस्य गीतगोविन्दे यथा-

वितरसि दिक्षु रणे दिक्पतिकमनीयम्।
दशमुखमौलिबलिं रमणीयम्।।
केशवधृतरघुपतिवेष जय जगदीश हरे।। (7)

संतानहीनः अयोध्यानरेशदशरथः उत्तराधिकारिणः अभावकारणात् कुलगुरुवशिष्ठस्य शरणे आगतः। तिस्रः भार्यायुक्तः सन्तानहीनः महाराजदशरथः गुर्वाश्रमं गत्वा गुरोः आदेशेन शृंगीऋषिद्वारा पुत्रेष्टियज्ञस्य अनुष्ठानं कृतवान्। यज्ञे अग्निदेवः प्रत्यक्षीभूय चरुप्रदानं कृतवान्। चरुपानेन तिस्रो साम्राज्ञी गर्भवती अभूत्। कौशल्यागर्भतः रामस्य, कैकेयीगर्भतः भरतस्य, सुमित्रागर्भतः लक्ष्मण-शत्रुघ्नयोः जन्म अभूवन्। भगवतः रामस्य जन्म चैत्रस्य नवमीतिथौ अभूत्। चत्वारो कुमाराः गुरुकुले शास्त्र-शस्त्रयोः शिक्षां प्राप्तवन्तः। दशरथस्य जीवने प्रसन्नता आगच्छति स्म।

देवगणाः लङ्काधिपः पुलस्त्यस्य पौत्रेण राक्षसराजरावणेन संत्रस्तः अभूत्। कुबेरस्य लघुभ्राता वेदज्ञः भूते सति राक्षसः आसीत्। दानवेन्द्रमयस्य पुत्री मन्दोदरी तस्य भार्या आसीत्। रावणः ऋषीणां ब्राह्मणानां देवानां धर्मस्य च शत्रुः आसीत्। देवराज-इन्द्रः पराजितः। धरायां चहुओर-भयंकर-अधार्मिक-कृत्यं व्याप्तमासीत्। रावणः शिवस्य महान् भक्तः आसीत्। विश्वामित्रः स्व-यज्ञ-विध्वंसैः महाराजदशरथस्य पार्श्वे गत्वा राम-लक्ष्मणौ यज्ञरक्षार्थं अयाचयत्। राम-लक्ष्मणौ विश्वामित्रेण सह प्रस्थानं कृतवन्तौ। राक्षसी ताडका, सुबाहु इत्यादयः राक्षसाः रामबाणेन हतवान्। मारीचः रामस्य 'फल'हीनबाणस्य आघातेन शत-योजने अपतत्। विश्वामित्रस्य यज्ञपूर्णं कृत्वा गुरोः आज्ञां शिरोधार्य राम-लक्ष्मणौ गुरुणा सह विदेहराजजनकस्य आमन्त्रणे आयोजिते सीतास्वयंवरे अगच्छन्। गौतमाश्रमे पाषाणभूता अहल्यायाः उद्धारं कृत्वा श्रीरामः जनकपुर्यां शंकरस्य महाधनुषपिनाकं त्रोऽयित्वा सीतया सह विवाहं कृतवान्। राम-परशुरामसंवादः एवं अयोध्यानरेशस्य समक्षे चत्वारो भ्रातृणां विवाहः जनकपुर्यां सम्पन्नः। अयोध्याप्रत्यागते सति गुरुदेवस्य परामर्शानुसारं श्रीरामस्य राज्याभिषेकः आयोजितः। परन्तु मोहवशात् माता कैकेयी 'भरतं राज्यं रामं चतुर्दशवर्षं यावत् वनवासं" इति राज्ञा याचितवती। श्रीरामः पत्नी-अनुज-लक्ष्मणेन सह वनं गतवान्। पुत्रवियोगेन दशरथस्य देहावसानं अभूत्। पितुः अन्त्येष्टिं कृत्वा भरतः रामं अयोध्याप्रत्यागमनाय प्रयत्नं कृतः, परन्तु रामस्य दृढताकारणात् भरतः तस्य चरणपादुकां गृहीत्वा रामस्थाने शासनं कृतवान्। श्रीरामः चित्रकूटे निवासितः, तत्र

रावणस्य भगिनी शूर्पणखाया: वासनाविषयकप्रस्तावस्य उपेक्षाकारणात् आक्रमितां शूर्पणखां लक्ष्मण: नाक-कान-विहीना कृतवान्। तत्र श्रीराम: खर-दूषणादि-राक्षसा: अमारयत्। तत्परं रावण: मारीच-सहयोगेन सीताया: अपहरणं कृतवान्। पवनकुमार-हनुमता सहयोगेन सुग्रीवेण सह मैत्री, बालिहननम्, लंकापुरीदहनम्, एवं विभीषणं विहाय रावणसहितसर्वे राक्षसान् राम-लक्ष्मणाभ्यां हन्यन्ते।

चतुर्दशवर्षव्यतीते सति श्रीराम: पुष्पकविमानै: अयोध्यां प्रत्यागता:। श्रीराम: कौसलस्य चक्रवर्ति-सिंहासनोपरि वैदेह्या सह विराजमान: अभूत्। 'रामराज्ये' सुव्यवस्था, धर्म:, शान्ति:, सदाचारादयस्य पूर्णता वर्तते। एकादश-सहस्रवर्षपर्यन्तं श्रीराम: दिव्यशासनं कृतवान्। भगवान् राम: मर्यादापुरुषोत्तम: विद्यते। संस्कृतसाहित्ये रामायणपदेन वाल्मीकिविरचितं रामायणमेव प्रसिद्ध्यति। श्रीरामचन्द्र: आदर्शभ्राता आदर्शपति: आदर्शपुत्र: आदर्शशासक: आदर्शमनुष्यश्चासीदिति समर्थयितुमेव रामायणं निरमीयत, यत्र लक्ष्ये तत्सफलमभूत्। रामायणे चतुर्विंशति: सहस्राणि श्लोकानामिति तत् चतुर्विंशतिसाहस्री संहितापदेनाभिधीयते।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्न:**—वितरसि दिक्षु रणे दिक्पतिकमनीयम्। दशमुखमौलिबलिं रमणीयम्।। अनेन जयदेवमहोदयेन कस्यावतारस्य वर्णनं क्रियते?
उत्तरम्—रामावतारस्य।
2. **प्रश्न:**—संतानहीन: अयोध्यानरेशदशरथ: उत्तराधिकारिण: अभावकारणात् कस्य शरणे आगत:?
उत्तरम्—कुलगुरुवशिष्ठस्य।
3. **प्रश्न:**—राजादशरथस्य कति भार्या आसीत्?
उत्तरम्—तिस्र: भार्या।
4. **प्रश्न:**—सन्तानहीन: महाराजदशरथ: गुर्वाश्रमे गत्वा गुर्वादेशेन शृंगीऋषिद्वारा कस्य अनुष्ठानं कृतवान्?
उत्तरम्—पुत्रेष्टियज्ञस्य।
5. **प्रश्न:**—यज्ञे अग्निदेव: प्रत्यक्षीभूय किं प्रदानं कृतवान्?
उत्तरम्—चरूं।
6. **प्रश्न:**—कौशल्यागर्भत: कस्य जन्मोऽभवत्?
उत्तरम्—रामस्य।
7. **प्रश्न:**—कैकेयीगर्भत: कस्य जन्मोऽभवत्?
उत्तरम्—भरतस्य।
8. **प्रश्न:**—सुमित्रागर्भत: कयो: जन्मोऽभवताम्?
उत्तरम्—लक्ष्मण-शत्रुघ्नयो:।
9. **प्रश्न:**—भगवत: रामस्य जन्म कस्मिन् तिथौ अभूत्?
उत्तरम्—चैत्रस्य नवमीतिथौ।
10. **प्रश्न:**—चत्वारो कुमारा: कुत्र शास्त्र-शस्त्रयो: शिक्षां प्राप्तवन्त:?
उत्तरम्—गुरुकुले।
11. **प्रश्न:**—देवगणा: केन संत्रस्ता:?
उत्तरम्—लङ्काधिप: पुलस्त्यस्य पौत्रेण: राक्षसराजरावणेन।
12. **प्रश्न:**—कुबेरस्य लघुभ्राता वेदज्ञ: भूते सति कर्मणा क: आसीत्?
उत्तरम्—राक्षस:।
13. **प्रश्न:**—रावणस्य भार्या का आसीत्?
उत्तरम्—दानवेन्द्रमयस्य पुत्री मन्दोदरी।
14. **प्रश्न:**—रावण: केषां शत्रु: आसीत्?
उत्तरम्—ऋषीणां ब्राह्मणानां देवानां धर्मस्य च।
15. **प्रश्न:**—रावण: कस्य महान् भक्त: आसीत्?
उत्तरम्— शिवस्य।
16. **प्रश्न:**—विश्वामित्र: स्व-यज्ञ-विध्वंसै: महाराज-दशरथस्य पार्श्वे गत्वा यज्ञरक्षार्थं कौ अयाचयत्?
उत्तरम्—राम-लक्ष्मणौ।
17. **प्रश्न:**—राम-लक्ष्मणौ विश्वामित्रेण सह कान् राक्षसान् अमारयत्?
उत्तरम्—राक्षसी ताडका, सुबाहु इत्यादय:।
18. **प्रश्न:**—मारीच: रामस्य 'फल'हीनबाणस्य आघातेन कति योजने अपतत्?
उत्तरम्—शत-योजने।
19. **प्रश्न:**—गुर्वाज्ञां शिरोधार्य राम-लक्ष्मणौ गुरुणा सह कुत्र अगच्छन्?
उत्तरम्—विदेहराजजनकस्य आमन्त्रणे आयोजित-सीतास्वयंवरे।

20. **प्रश्न:**—गौतमाश्रमे पाषाणभूताया: अहल्याया: उद्धारं क: कृतवान्?
उत्तरम्—श्रीराम:।
21. **प्रश्न:**—जनकपुर्यां शंकरस्य महाधनुषपिनाकं त्रोटयित्वा सीतया सह विवाहं क: कृतवान्?
उत्तरम्—भगवान् श्रीराम:।
22. **प्रश्न:**—अयोध्यानरेशस्य समक्षे चत्वारो भ्रातृणां विवाह: कुत्र सम्पन्न:?
उत्तरम्—जनकपुर्यां।
23. **प्रश्न:**—अयोध्याप्रत्यागते सति गुरुदेवस्य परामर्शानुसारं कस्य राज्याभिषेक: आयोजित:?
उत्तरम्—श्रीरामस्य।
24. **प्रश्न:**—मोहवशात् माता कैकेयी राज्ञा किं याचितवती?
उत्तरम्—भरताय राज्यं रामाय चतुर्दशवर्षं यावत् वनवासं।
25. **प्रश्न:**—श्रीराम: पत्न्या अनुजलक्ष्मणेन सह कुत्र गतवान्?
उत्तरम्—वनम्।
26. **प्रश्न:**—पुत्रवियोगेन कस्य देहावसानं अभूत्?
उत्तरम्—दशरथस्य।
27. **प्रश्न:**—पितु: अन्त्येष्टिं कृत्वा भरत: रामं कुत्र प्रत्यागमनाय प्रयत्नं कृत:?
उत्तरम्—अयोध्यां प्रत्यागमनाय।
28. **प्रश्न:**—रामस्य दृढताकारणात् तस्य चरणपादुकां गृहीत्वा रामस्थाने शासनं क: कृतवान्?
उत्तरम्—रामभक्तभरत:।
29. **प्रश्न:**—चित्रकूटे निवासित: श्रीरामस्य समक्षे का आगता?
उत्तरम्—रावणस्य भगिनी शूर्पणखा:।
30. **प्रश्न:**—वासनाविषयकप्रस्तावस्य उपेक्षाकारणात् आक्रमितां शूर्पणखां नाक-कान-विहीना क: कृतवान्?
उत्तरम्—लक्ष्मण:।
31. **प्रश्न:**—श्रीराम: चित्रकूटे कान् राक्षसान् अमारयत्?
उत्तरम्— खर-दूषणादि-राक्षसान्।
32. **प्रश्न:**—रावण: मारीच-सहयोगेन कस्या: अपहरणं कृतवान्?
उत्तरम्—सीताया:।
33. **प्रश्न:**—सीताया: अन्वेषणं क: कृतवान्?
उत्तरम्—पवनकुमार-हनुमान्।
34. **प्रश्न:**—श्रीराम: केन सह मैत्री कृतवान्?
उत्तरम्—सुग्रीवेन सह।
35. **प्रश्न:**—बालीं क: अमारयत्?
उत्तरम्—श्रीराम:।
36. **प्रश्न:**—लंकापुरीदहनं केन कृतम्?
उत्तरम्—हनुमता।
37. **प्रश्न:**—रावणं क: अमारयत्?
उत्तरम्—श्रीराम:।
38. **प्रश्न:**—रावणपुत्रमेघनादं क: अमारयत्?
उत्तरम्—लक्ष्मण:।
39. **प्रश्न:**—लंकाया: राज्यं क: प्रदीयते?
उत्तरम्—विभीषणम्।
40. **प्रश्न:**—चतुर्दशवर्षव्यतीते सति श्रीराम: पुष्पकविमानै: कुत्र प्रत्यागत:?
उत्तरम्—अयोध्यां प्रत्यागत:।
41. **प्रश्न:**—कौसलस्य चक्रवर्ति-सिंहासनोपरि वैदेह्या सह क: विराजमानोऽभूत्?
उत्तरम्—श्रीराम:।
42. **प्रश्न:**—रामराज्ये कस्य पूर्णता वर्तते?
उत्तरम्—सुव्यवस्था, धर्म:, शान्ति:, सदाचारादयस्य।
43. **प्रश्न:**—श्रीराम: दिव्यशासनं कियद्वर्षपर्यन्तं कृतवान्?
उत्तरम्—एकादश-सहस्रवर्षपर्यन्तम्।
44. **प्रश्न:**—भगवान् राम: केन रूपेण विख्यात:?
उत्तरम्—मर्यादापुरुषोत्तमरूपेण।
45. **प्रश्न:**—संस्कृतसाहित्ये रामायणपदेन कस्य ग्रन्थस्य प्रसिद्धि:?
उत्तरम्—वाल्मीकिविरचितं रामागणस्य।
46. **प्रश्न:**—आदर्शभ्राता आदर्शपति: आदर्शपुत्र: आदर्शशासक: आदर्शमनुष्यश्च क:?
उत्तरम्—श्रीरामचन्द्र:।

8. **कृष्णबलरामावतारवर्णनम्**–जयदेवस्य गीतगोविन्दे यथा–

वहसि वपुषि विशदे वसनं जलदाभम्।
हलहतिभीतिमिलितयमुनाभम्।।
केशव धृतहलधररूप जय जगदीश हरे।। (8)

द्वापरे धरायाः भारहरणाय भगवतः बलरामस्यावतारं विद्यते। मातुः देवक्याः सप्तमगर्भे योगमाया गोकुले नन्दगृहस्य रोहिणीगर्भे सङ्कर्षणद्वारा स्थापितवान्। श्रीकृष्णबलरामौ परस्परं नित्यौ अभिन्नौ वर्तेते। सत्ययुगस्य कन्या रेवत्या सह तस्य विवाहः अभूत्। श्रीकृष्णस्य अभिभावकत्वे बलरामस्य महत्त्वपूर्णभूमिका वर्तते।

द्वापरस्य अन्तकाले अस्मिन् देशे कृष्णरूपेण अवतरितः। भाद्रमासस्य कृष्णपक्षस्य अष्टम्यां तिथौ अर्द्धनिशायां द्वादशवादने भगवतः श्रीकृष्णस्य जन्म अभवत्। अस्य पितुः नाम वसुदेवः मातुः नाम देवकी आसीत्। अस्य माता देवकी कंसस्य भगिनी आसीत्। भगवतः दशावतारेषु श्रीकृष्णस्य अवतारः पूर्णकलावताररूपेण मन्यते। विवाहानन्तरं देवकीव-सुदेवयोः स्वगृहं प्रति आगमनकाले मार्गे एव एका आकाशवाणी सञ्जाता यद् अनयोः अष्टमगर्भादुत्पन्नः बालकः कंसस्य हन्ता भविष्यति। आकाशवाण्या विभीषितेन उग्रसेनात्मजेन कंसेन विवाहानन्तरमेव देवकी-वसुदेवौ कारागारे निगडितौ। तत्र तयोः अनेकासु सन्ततिषु अष्टमः श्रीकृष्णः सम्बभूव। अयं हि भगवतो विष्णोर्लीलावतारः भाद्रपदे मासि कृष्णे पक्षे अष्टम्यान्तिथौ रोहिणीनक्षत्रे निशीथे देवक्याः कुक्षितः जन्म लेभे। तदानीं देवकी-वसुदेवौ तं निर्निमेषपक्ष्मणा ददर्शतुः। तदानीं कंसेन भयभीतौ स्वपितरौ दृष्ट्वा बालकोऽवदत् "हे तात! मां यशोदापार्श्वे नन्दगृहे नीत्वा तत्र यशोदागर्भाद् सम्भूतां कन्यकाम् अत्र समानय।" पित्रा वसुदेवेन तथैव कृतम्। अपरेद्युः प्रातःकाले कारागाररक्षकैः सुतोत्पत्तिं श्रुत्वा कंसः शीघ्रं तत्रागत्य तामेव योगमायां कन्यकां हन्तुमुद्यतोऽभवत्। परञ्च आकाशे उत्सर्प्यया कन्यया एवमुक्तम् यत् **किमर्थं मां हन्तुं प्रयत्नं करोषि तव हन्ता तु अन्यत्र एव उत्पन्नः विद्यते** इति।

बाल्यावस्थायामेव कंसेन प्रेषितानां पूतनावकासुरप्रभृतीनां राक्षसानां वधमकरोत्। श्रीकृष्णः व्रजे एकादशवर्षं यावत् निवसित्वा कंसः छलछद्मना बलरामकृष्णौ स्वभागिनेयौ मथुरायामाह्वयत्। तत्र चाणूरमुष्टिकाभ्यां सह तयोर्मल्लयुद्धं बलरामकृष्णयोर्जिघांसयाऽकारयत्। तस्मिन् मल्लयुद्धे तौ चाणूरमुष्टिकौ हत्वा कंसमपि निजघ्नतुः। कंसं हत्वा स्वपितरौ कारागारादमुंचताम्। अत्रैव मधुपुरे वसुदेवसद्मनि निवसन्तौ, विद्यामधीयन्तौ, तारुण्यमभजताम्। बलरामस्य ककुद्मकन्यया रेवत्या सह परिणयो जातः। श्रीकृष्णस्य च कुण्डिनपुरस्य राज्ञो भीष्मकस्य कन्यया रुक्मिण्या सह पाणिग्रहणं जातम्।

पृथ्वीपुत्र-भौमासुरः वरुणस्य छत्रं, माता-अदितेः कुण्डलानि हरित्वा, युद्धे देवानां पराजितवान्। इन्द्रस्य श्रीकृष्णशरणे आगते सति सत्यभामया सह श्रीकृष्णः गरुडारूढयुद्धस्थले आगतः। एवं भौमासुरं हत्वा षोडश-सहस्र-नरेन्द्रकन्यायाः वंदीमुक्तं कृत्वा तेषाम् उद्धारः अपि कृतवान्। अनिरुद्धविमुक्ताय वाणासुरेण सह युद्धं कृत्वा पराजितवान्। श्रीकृष्णः पौण्ड्रकस्य संहारः, शिशुपालस्य हननमपि कृतवान्।

कृष्णः महद्राजनीतिज्ञोऽभवत्। उत्तरभारतस्य राज्ञो दुष्यन्तस्य पुत्रस्य भरतस्य वंशधरस्य शान्तनो प्रपौत्रौ धृतराष्ट्रपाण्डवौ आस्ताम्। नेत्रहीनत्वात् पाण्डुरेव राजा अभूत्। कालान्तरेण पाण्डुः पञ्चत्वं गतः। धृतराष्ट्रस्य शतपुत्राः पाण्डोश्च पञ्चपुत्राः आसन्। द्यूतक्रीडायां पराजिताः पाण्डवाः द्वादशवर्षपर्यन्तं वनवासस्य वर्षैकञ्च यावताज्ञातवासस्य कठिनां यातनामसहन्। महाभारतयुद्धस्य सूत्रधारः श्रीकृष्णः विद्यते। पाण्डवैः सह श्रीकृष्णस्य मातृत्वसम्बन्धः आसीत्। पाण्डवानां जननी साम्राज्ञी कुन्ती कृष्णस्य पितृष्वसा आसीत्। दुर्दैववशात् द्यूते पराजिताः पाण्डवाः द्वादशवर्षपर्यन्तं वनवासं वर्षैकं च अज्ञातवासमतीत्यारण्यात् परावृत्य स्वकीयं राज्यार्द्धं कृष्णमुखेन ययाचिरे परं स्वार्थान्धो दुर्योधनस्तु कृष्णस्य राज्यार्द्धं संदेशः अस्वीकृतवान्। उक्तं च **सूच्यग्रं नैव दास्यामि विना युद्धेन केशव** इति। दुर्योधनस्य निश्चयेन पाण्डव-कौरवयोर्मध्ये कुरुक्षेत्रेऽष्टादशदिवसपर्यन्तं तुमुलं युद्धं सञ्जातः। तस्मिन् युद्धे श्रीकृष्णः पाण्डवानां पक्षं स्वीकृत्य अर्जुनस्य सारथ्यं अंगीचकार। तदोभयोः सेनयोर्मध्ये सीदन्ति मम गात्राणि मुखं च परिशुष्यति इत्याद्युक्तवते विषादं च गतायार्जुनाय कर्मयोगमुपादिशम्। यथा–

मन्मना भव मद् भक्तो मद्याजी मां नमस्तु सः।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः।।
कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसङ्ग्रहमवा... सम्पश्यन् कर्तुमर्हसि।।

दुर्योधनः पराजितः विजयस्तु पाण्डवानां हस्ते जातम्। तेषां ज्येष्ठः युधिष्ठिरः राजसिंहासनमतिष्ठत्। श्रीकृष्णः पाण्डवानां एकमात्रवंशधरः उत्तरापुत्र-परीक्षितं पुनर्जीवनं प्रदत्तवान्। एवं धर्म-संस्थापनार्थं मानवरूपेण स्वलीलां विधाय श्रीकृष्णः शताधिकविंशतिवर्षस्य अवस्थां परिसमाप्य मानवशरीरम् अत्यजत्। श्रीकृष्णस्य चरितं पूर्णतायाः ज्वलन्त-प्रतीको वर्तते। भगवत्तांके षड्गुणानां परिपूर्णं यथा-1. ऐश्वर्यः, 2. धर्मः, 3. यशः, 4. शोभा, 5. ज्ञानं, 6. वैराग्यं इति श्रीकृष्णे समस्तनिष्ठायाः पूर्णता भवति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—वहसि वपुषि विशदे वसनं जलदाभम्। हलहतिभीतिमिलितयमुनाभम्।। कवि जयदेवः अत्र कस्यावतारस्य वर्णनं करोति?
   उत्तरम्—कृष्णबलरामावतारयोः।
2. **प्रश्नः**— द्वापरे धरायाः भारहरणाय कमवतारं विद्यते?
   उत्तरम्—भगवतः बलरामस्यावतारम्।
3. **प्रश्नः**—योगमाया गोकुले नन्दगृहस्य कस्मिन् गर्भे सङ्कर्षणद्वारा स्थापितवान्?
   उत्तरम्—रोहिणीगर्भे।
4. **प्रश्नः**— परस्परं नित्यौ अभिन्नौ कौ?
   उत्तरम्—श्रीकृष्णबलरामौ।
5. **प्रश्नः**—सत्ययुगस्य कन्यया रेवत्याः सह कस्य विवाहोऽभूत्?
   उत्तरम्—बलरामस्य।
6. **प्रश्नः**—श्रीकृष्णस्य अभिभावकत्वे कस्य महत्त्वपूर्ण-भूमिका वर्तते?
   उत्तरम्—बलरामस्य।
7. **प्रश्नः**—द्वापरस्य अन्तकाले अस्मिन् देशे कः कृष्णरूपेण अवतरितः?
   उत्तरम्—भगवान् विष्णुः।
8. **प्रश्नः**— श्रीकृष्णस्य जन्म कदा अभूत्?
   उत्तरम्—भाद्रमासस्य कृष्णपक्षस्य अष्टम्यां तिथौ अर्द्धनिशायां द्वादशवादने।
9. **प्रश्नः**— श्रीकृष्णस्य पितुः नाम किम्?
   उत्तरम्—वसुदेवः।
10. **प्रश्नः**— श्रीकृष्णस्य मातुः नाम किम्?
    उत्तरम्—देवकी।
11. **प्रश्नः**— माता देवकी कस्य भगिनी आसीत्?
    उत्तरम्—कंसस्य।
12. **प्रश्नः**— भगवतः दशावतारेषु श्रीकृष्णस्य अवतारं केन रूपेण मन्यते?
    उत्तरम्—पूर्णकलावताररूपेण।
13. **प्रश्नः**— आकाशवाणी कदा सञ्जाता?
    उत्तरम्—विवाहोपरान्त-देवकीवसुदेवयोः स्वगृहं प्रति आगमनकाले मार्गे।
14. **प्रश्नः**— आकाशवाण्याः का भाषा?
    उत्तरम्—अनयोः अष्टमगर्भादुत्पन्नः बालकः कंसस्य हन्ता भविष्यति।
15. **प्रश्नः**— आकाशवाण्या विभीषितेन उग्रसेनात्मजेन कंसेन किं कृतम्?
    उत्तरम्—देवकी-वसुदेवौ कारागारे निगडितौ।
16. **प्रश्नः**— देवकी-वसुदेवौ अनेकासु सन्ततिषु अष्टमः कः सम्बभूव?
    उत्तरम्—श्रीकृष्णः।
17. **प्रश्नः**— कंसेन भयभीतौ स्वपितरौ दृष्ट्वा श्रीकृष्णः किमकथयत्?
    उत्तरम्—हे तात! मां यशोदापार्श्वे नन्दगृहे नीत्वा तत्र यशोदागर्भाद् सम्भूतां कन्यकाम् अत्र समानय।
18. **प्रश्नः**— अपरेद्युः प्रातःकाले कारागाररक्षकैः सुतोत्पत्तिं श्रुत्वा कंसः किं कृतवान्?
    उत्तरम्—शीघ्रं तत्रागत्य तामेव योगमायां कन्यकां हन्तुमुद्यतोऽभवत्।
19. **प्रश्नः**—आकाशे उत्सर्प्यया कन्यया किमुक्तम्?
    उत्तरम्—किमर्थं मां हन्तुं प्रयत्नं करोषि तव हन्ता तु अन्यत्र एव उत्पन्नः विद्यते।
20. **प्रश्नः**—बाल्यावस्थायामेव कंसेन प्रेषितानां पूतनावका-सुरप्रभृतीनां राक्षसानां कः वधमकरोत्?
    उत्तरम्—श्रीकृष्णः।
21. **प्रश्नः**—श्रीकृष्णः व्रजे कियत् वर्षं यावत् निवसितः?
    उत्तरम्—एकादशवर्षम्।

22. प्रश्नः—छलछद्मना बलरामकृष्णौ स्वभागिनेयौ कः मथुरायामाह्वयत्?
उत्तरम्—कंसः।

23. प्रश्नः— मल्लयुद्धे बलरामकृष्णौ कौ अहताम्?
उत्तरम्—चाणूरमुष्टिकौ।

24. प्रश्नः— कंसं कः अमारयत्?
उत्तरम्—श्रीकृष्णः।

25. प्रश्नः— श्रीकृष्णस्य विवाहः कुत्र, कया सह अभवत्?
उत्तरम्—कुण्डिनपुरस्य राज्ञो भीष्मकस्य कन्यया रुक्मिण्या सह।

26. प्रश्नः— वरुणस्य छत्रं, माता-अदितेः कुण्डलानि हरित्वा, युद्धे देवानां कः पराजितवान्?
उत्तरम्—पृथ्वीपुत्र-भौमासुरः।

27. प्रश्नः— भौमासुरं कः अमारयम्?
उत्तरम्—श्रीकृष्णः।

28. प्रश्नः— अनिरुद्धविमुक्त्यै वाणासुरेण सह युद्धं कृत्वा कः पराजितवान्?
उत्तरम्—श्रीकृष्णः।

29. प्रश्नः— पौण्ड्रकस्य संहारः, शिशुपालस्य हननं कः कृतवान्?
उत्तरम्—श्रीकृष्णः।

30. प्रश्नः— धृतराष्ट्रस्य कति पुत्राः आसन्?
उत्तरम्—शतपुत्राः।

31. प्रश्नः— पाण्डोः कति पुत्राः आसन्?
उत्तरम्—पञ्चपुत्राः।

32. प्रश्नः—द्यूतक्रीडायां पराजिताः पाण्डवाः कियत् वर्षपर्यन्तं वनवासमज्ञातवासं च कृतवन्तः?
उत्तरम्—द्वादशवर्षपर्यन्तं वनवासं वर्षैकञ्च यावताज्ञातवासम्।

33. प्रश्नः— महाभारतयुद्धस्य सूत्रधारः कः?
उत्तरम्—श्रीकृष्णः।

34. प्रश्नः— पाण्डवैः सह श्रीकृष्णस्य को सम्बन्धः?
उत्तरम्—मातृत्वसम्बन्धः।

35. प्रश्नः— दुर्योधनस्तु कृष्णस्य राज्यार्द्धं संदेशः केन शब्देन अस्वीकृतवान्?
उत्तरम्—सूच्यग्रं नैव दास्यामि विना युद्धेन केशव।

36. प्रश्नः—दुर्योधनस्य निश्चयेन पाण्डव-कौरवयोर्मध्ये कुरुक्षेत्रे कियत् दिवसपर्यन्तं तुमुलं युद्धं सञ्जातः?
उत्तरम्—अष्टादशदिवसपर्यन्तम्।

37. प्रश्नः— तस्मिन् युद्धे श्रीकृष्णस्य का भूमिका?
उत्तरम्—श्रीकृष्णः पाण्डवानां पक्षं स्वीकृत्य अर्जुनस्य सारथ्यं अंगीचकार।

38. प्रश्नः— अर्जुनं कर्मयोगस्य उपदेशः कः प्रदत्तः?
उत्तरम्—श्रीकृष्णः।

39. प्रश्नः— महाभारतयुद्धे कः पराजितः?
उत्तरम्—दुर्योधनः पराजितः।

40. प्रश्नः— राजसिंहासनस्य अधिकारी कः अभूत्?
उत्तरम्—ज्येष्ठपाण्डवः युधिष्ठिरः।

41. प्रश्नः— पाण्डवानां एकमात्रवंशधरं उत्तरापुत्र-परीक्षितं पुनर्जीवनं कः प्रदत्तवान्?
उत्तरम्—श्रीकृष्णः।

42. प्रश्नः—श्रीकृष्णस्यावतारः पूर्णतायाः ज्वलन्त-प्रतीको कथं वर्तते?
उत्तरम्—भगवतांके षड्गुणानां परिपूर्णं यथा-1. ऐश्वर्यः, 2. धर्मः, 3. यशः, 4. शोभा, 5. ज्ञानं, 6. वैराग्यं इति श्रीकृष्णे समस्तनिष्ठायाः पूर्णताः भवति।

9. **बुद्धावतारवर्णनम्**— जयदेवस्य गीतगोविन्दे यथा–

निन्दसि यज्ञविधेरहह श्रुतिजातम्।
सदयहृदयदर्शितपशुघातम्।।
केशव धृतबुद्धशरीर जय जगदीश हरे।। (9)

बौद्धधर्मस्य प्रवर्तकस्य महाराजशुद्धोदनस्य यशस्वि-पुत्रगौतमबुद्धस्य रूपमेव श्रीभगवान् अवतरितवान्। पुराणवर्णितभगवतः बुद्धदेवस्य प्राकट्यं गयासमीपे कीकटदेशे (मगध) अभूत्। तस्य पुण्यात्मनः पितुः नाम 'अजय' कथ्यते। माता-मायादेवीगर्भतः अजनसुत-बुद्धभगवतः चर्चा वर्तते यः भगवतः विष्णोः एकविंशति अवताररूपे पूजितो विद्यते। कथ्यते यथा श्रीमद्भागवते–

ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम्।
बुद्धो नाम्नाजनसुतः कीकटेषु भविष्यति।।
(श्रीमद्भा० 1/3/24)

भगवान् विष्णुः स्वयं बुद्धस्य अवतारः अभूत् अतः तं बुद्धमपि कथ्यते। भणितं यथा भागवतपुराणे–

नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने।।
(श्रीमद्भा० (10/40/22)

आचार्यक्षेमेन्द्रः बुद्धावतारस्य हेतुतायाः निर्देशत्वे लिखति–

काले प्रयाते कलिविप्लवेन
राजग्रहोग्रे भगवान् भवाब्धौ।
मज्जत्सु सम्मोहजले जनेषु
जगन्निवासः करुणान्वितोऽभूत्।।

देवीभागवते पशुहिंसापरकदोषपूर्णयज्ञे विघातकस्य रूपेण बुद्धस्य स्मरणं क्रियते–

दुष्टयज्ञविघाताय पशुहिंसानिवृत्तये।
बौद्धरूपं दधौ योऽसौ तस्मै देवाय ते नमः।।
(देवीभागवत)

कल्किपुराणे दशावतारस्य स्तुति-प्रसक्ते बुद्धस्य स्तुतिं सर्वैः भिन्नरूपेण कृतं स्यात्–"**पुनरिह विधिकृतवेद-धर्मानुष्ठानविहितनानादर्शनसंघृणः संसारकर्मत्यागविधिना ब्रह्माभासविलासचातुर्री प्रकृतिविमाननामसम्पादयन् बुद्धावतारस्त्वमसि।** गोस्वामिना श्रीतुलसीदासेनापि विनय-पत्रिकायां दशावतारस्य स्तुतिक्रमे भगवतः बुद्धस्य पशुवधमूलकयज्ञहिंसायाः निन्दकरूपेण स्तूयते। यथा–

प्रबल पाखंड महि-मंडलाकुल देखि,
निंद्यकृत अखिल मख कर्म-जालं।
शुद्ध बोधैकघन, ज्ञान-गुणधाम, अज
बौद्ध-अवतार वंदे कृपालं।।
(विनय-पत्रिका-52/8)

दैत्यानां शक्तिवर्द्धिते सति देवगणाः स्वर्गात् पलायिताः। दैत्याः सुव्यवस्थितसाम्राज्यस्य कामनया इन्द्रेण अपृच्छत्–शुद्धभावेन इन्द्रः अकथयत्–'सुस्थिरशासनाय यज्ञ एवं वेदविहित-आचरणमावश्यकं वर्तते। असहाय-निरुपाय-दुःखी देवगणाः जगत्पतिः श्रीविष्णुः पार्श्वे गत्वा करुण-प्रार्थनां कृतवान्। देवानां अनुरोधेन श्रीभगवान् बुद्धस्य रूपं धारयित्वा हस्ते मार्जनीं गृहीत्वा मार्गं स्वच्छं कृत्वा च गच्छति स्म। एवं तर्हि भगवान् बुद्धः दैत्यानां समीपे गत्वा उपदेशं प्रदत्तवान्। यज्ञस्य आयोजनं पापजन्यो वर्तते। यज्ञेन जीवहिंसा भवति। यज्ञस्य प्रज्वलित-अग्नेः एव कतिजीवाः भस्मीभूताः भवन्ति स्म। अहं जीवहिंसा-परित्राणाय हस्ते मार्जनीं गृहीत्वा मार्गं शोधयामि ततरं गच्छामि।

संन्यासी बुद्धदेवस्य उपदेशेन दैत्यगणाः प्रभाविताऽभवन्। ते यज्ञ-वैदिक-आचरणस्य परित्यागं कृतवन्तः। परिणामतः ते क्षीणाः शक्तिहीनाः च अभवन्। शक्तिहीने सति देवगणाः दैत्योपरि आक्रमणं कृतवन्तः। असमर्थदैत्याः पराजिताः प्राणरक्षार्थं यत्र-तत्र पलायितवन्तः। देवगणाः पुनः स्वर्गस्य अधिकारिणः अभूवन्। एवं प्रकारेण संन्यासीवेषे भगवान् बुद्धः त्रैलोक्यस्य मङ्गलं कृतवान्।

वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—निन्दसि यज्ञविधेरहह श्रुतिजातम्। सदय-हृदयदर्शितपशुघातम्।। अनेन जयदेवः कस्यावतारस्य वर्णनं करोति?
उत्तरम्—बुद्धावतारस्य।

2. प्रश्नः— भगवान् बुद्धावताररूपं किम्?
उत्तरम्—बौद्धधर्मस्य प्रवर्तकः महाराजशुद्धोदनस्य यशस्वी पुत्रः गौतमबुद्धस्य रूपमेव।

3. प्रश्नः—पुराणवर्णितभगवतः बुद्धदेवस्य प्राकट्यं कस्मिन् देशे अभूत्?
उत्तरम्—गयासमीपे कीकटदेशे (मगध)।

4. प्रश्नः— बुद्धस्य पुण्यात्मनः पितुः नाम किम्?
उत्तरम्—अजय।

5. प्रश्नः— बुद्धस्य मातुः नाम किम्?
उत्तरम्—मायादेवी।

6. प्रश्नः— भगवतः विष्णोः एकविंशति अवताररूपे कः पूजितो विद्यते?
उत्तरम्—भगवान् बुद्धः।

7. प्रश्नः—ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम्। बुद्धो नाम्नाजनसुतः कीकटेषु भविष्यति।। उक्त श्लोकः कुतः उद्धृतः?
उत्तरम्—श्रीमद्भागवतपुराणात्।

8. प्रश्नः— नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने। अनेन किं ज्ञायते?
उत्तरम्—भगवान् विष्णुः स्वयं बुद्धस्य अवतारः।

9. प्रश्नः— आचार्यक्षेमेन्द्रः बुद्धावतारस्य हेतुतायाः निर्देशत्वे किं लिखति?
उत्तरम्—काले प्रयाते कलिविप्लवेन राजग्रहोग्रे भगवान्

भवाब्धौ। मज्जत्सु सम्मोहजले जनेषु जगन्निवासः करुणान्वितोऽभूत्।।

10. प्रश्नः—देवीभागवते पशुहिंसापरकदोषपूर्णयज्ञे विघातकरूपेण बुद्धस्य स्मरणं कथं क्रियते?

उत्तरम्—दुष्टयज्ञविघाताय पशुहिंसानिवृत्तये। बौद्धरूपं दधौ योऽसौ तस्मै देवाय ते नमः।।

11. प्रश्नः— कल्किपुराणे बुद्धस्य स्तुतिः सर्वैः भिन्नरूपेण कथं कृतं स्यात्?

उत्तरम्—पुनरिह विधिकृतवेदधर्मानुष्ठानविहित-नानादर्शनसंसृष्टः संसारकर्मत्यागविधिना ब्रह्माभास-विलासचातुरीं प्रकृतिविमाननामसम्पादयन् बुद्धावतारस्त्वमसि।

12. प्रश्नः—विनय-पत्रिकायां दशावतारस्य स्तुतिक्रमे भगवान् बुद्धः पशुवधमूलकयज्ञहिंसायाः निन्दकरूपेण केन स्तूयते?

उत्तरम्—गोस्वामिना श्रीतुलसीदासेन।

13. प्रश्नः— दैत्यैः सुव्यवस्थितसाम्राज्यस्य कम्पनया इन्द्रेण किं अपृच्छत्?

उत्तरम्— सुस्थिरशासनाय यज्ञ एवं वेदविहित-आचरणस्यावश्यकम्।

14. प्रश्नः—देवानां अनुरोधेन श्रीभगवता किं रूपं धारितवान्?

उत्तरम्—बुद्धस्य रूपम्।

15. प्रश्नः— हस्ते मार्जनीं गृहीत्वा मार्गं स्वच्छं कृत्वा च कः गच्छति स्म?

उत्तरम्—भगवान् बुद्धः।

16. प्रश्नः— भगवान् बुद्धः दैत्यानां समीपे गत्वा किं उपदेशं प्रदत्तवान्?

उत्तरम्—यज्ञस्य आयोजनं पापजन्यो वर्तते। यज्ञेन जीवहिंसा भवति। अहं जीवहिंसा-परित्राणाय हस्ते मार्जनीं गृहीत्वा मार्गं शोधयामि तत्परं गच्छामि।

17. प्रश्नः— भगवतः बुद्धस्योपदेशेन दैत्याः किं कृतवन्तः?

उत्तरम्—यज्ञ-वैदिक-आचरणस्य परित्यागः।

18. प्रश्नः— संन्यासीवेषेण भगवान् बुद्धः किं कृतवान्?

उत्तरम्—त्रैलोक्यस्य मङ्गलम्।

10. **कल्किभगवतः अवतारवर्णनम्**— जयदेवस्य गीतगोविन्दे यथा-

म्लेच्छनिवहनिधने कलयसि करवालम्।
धूमकेतुमिव किमपि करालम्।।
केशव धृतकल्किशरीरं जय जगदीश हरे।। (10)

श्रीमद्भागवते कल्किस्वरूपविषये कथितमस्ति यत्-

चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः।
धर्मत्राणाय साधूनां जन्म कामापनुत्तये।।
(श्रीमद्भा०12/2/17)

अधुना कलियुगस्य प्रथमचरणे पञ्चसहस्रवर्षाणि व्यतीतानि वर्तन्ते। कलियुगे उत्तरोत्तर-धर्म-सत्य-पवित्रता-क्षमा-दया-आयु-बल-स्मरणशक्तेश्च लोपो भविष्यति। व्यावहारिक-सत्यः सत्यनिष्ठता समाप्ता भविष्यति। छल-कपटयोः पटु एव व्यवहारकुशलो भविष्यति। माता-पिता-गुरुजनाः उपेक्षिताः भविष्यन्ति। ब्राह्मण-क्षत्रिय-वैश्य-शूद्रेषु ये शक्तिसम्पन्नाः भविष्यन्ति ते एव शासनं करिष्यन्ति। कलिप्रभावेण प्राणिनां शरीरः लघुः क्षीणः रोगग्रस्तश्च भविष्यति। महाभारतस्य वनपर्वे कलियुगस्य वर्णनमित्थं वर्तते-

पुत्रः पितृवधं कृत्वा पिता पुत्रवधं तथा।
निरुद्वेगो बृहद्वादी न निन्दामुपलप्स्यते।।
म्लेच्छीभूतं जगत् सर्वं भविष्यति न संशयः।
हस्तो हस्तं परिमुषेद् युगान्ते समुपस्थिते।।
(महा०वन०190/28/38)

अधर्मस्य वृद्धिः, धर्मस्य निन्दा, नार्यः कठोर-स्वभावयुक्ता, कटुवादिनी, पतिसेवा-विमुक्ताः भविष्यन्ति। सर्वत्र पाप-पीडा, दुःख-दारिद्र्य, क्लेश-अनीति, अनाचारादयः व्याप्ता भविष्यन्ति। तस्मिन् समये सम्भलग्रामे विष्णुयशानामक अत्यन्त-पवित्रः, सदाचारी एवं श्रेष्ठब्राह्मणकुले निखिल-सृष्टिसर्जकः, पालकः, संहारकः परब्रह्म परमेश्वरः भगवान् कल्कि-रूपे अवतरितो भविष्यति। भणितं यथा महाभारतस्य वनपर्वे-

मनसा तस्य सर्वाणि वाहनान्यायुधानि च।
उपस्थास्यन्ति योद्धारश्च शस्त्राणि कवचानि च।।
स धर्मविजयी राजा चक्रवर्ती भविष्यति।
स चेमं संकुलं लोकं प्रसादमुपनेष्यति।
उत्थितो ब्राह्मणो दीप्तः क्षयान्तकृदुदारधीः।।
(महा०वन०190/94-96)

भगवान् शंकरः स्वयं कल्किभगवन्तं शस्त्रास्त्रस्य शिक्षणं दास्यति। एवं भगवान् परशुरामः तस्य वेदोपदेष्टा अभूत्। सः भगवान् कल्किः देवदत्त नाम शीघ्रगामी अश्वोपरि आरूह्य राज्ञः वेषे जगति व्याप्तनीच-स्वभावजन्यानां म्लेच्छानां संहारः करिष्यति। परमपुण्यमयः भगवान् कल्किः भूमण्डलस्य सम्पूर्णपातकीनां दुराचारिणां दुष्टानाञ्च विनाशं कृत्वा अश्वमेधनामकमहान् यज्ञं करिष्यति एवं यज्ञे सम्पूर्णधरां ब्राह्मणेभ्यः दानं दास्यन्ति। वीरवरकल्किभगवतः करकमलेन धरायाः सम्पूर्ण-दस्यूनां विनाशं अधर्मस्य नाशं स्वाभाविकधर्मस्य उत्थानं भविष्यति। कथ्यते यथा महाभारतस्य वनपर्वे-

स्थापयित्वा च मर्यादा स्वयम्भुविहिताः शुभाः।
वनं पुण्ययशःकर्मा रमणीयं प्रवेक्ष्यति।।
तच्छीलमनुवर्त्स्यन्ति मनुष्याः लोकवासिनः।
(महा०वन०191/2-3)

एवं सर्वभूतात्मा सर्वेश्वरः भगवतां कल्कीनां अवतरिते भूते सति धरायां पुनः सत्ययुगस्य प्रतिष्ठा भविष्यति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्नः—म्लेच्छनिवहनिधने कलयसि करवालम्। धूमकेतुमिव किमपि करालम्।। अनेन आचार्य जयदेवेन कस्यावतारस्य वर्णनं क्रियते?

उत्तरम्—कल्किभगवतः।

2. प्रश्नः—श्रीमद्भागवते कल्किस्वरूपविषये किं कथितमस्ति?

उत्तरम्—चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः। -धर्मत्राणाय साधूनां जन्मकर्मापनुत्तये।।

3. प्रश्नः—अधुना कलियुगस्य प्रथमचरणे कति वर्षाणि व्यतीतानि?

उत्तरम्—पञ्चसहस्रवर्षाणि।

4. प्रश्नः—कलियुगे उत्तरोत्तरं केषां लोपो भविष्यति?

उत्तरम्—धर्म-सत्य-पवित्रता-क्षमा-दया-आयु-बल-स्मरणशक्तेश्च।

5. प्रश्नः—कलियुगे केषां समाप्तिः भविष्यति?

उत्तरम्—व्यावहारिक-सत्यस्य सत्यनिष्ठतायाः।

6. प्रश्नः—कलियुगे केषामुपेक्षा भविष्यति?

उत्तरम्—माता-पिता-गुरुजनानाम्।

7. प्रश्नः—ब्राह्मण-क्षत्रिय-वैश्य-शूद्रेषु ये शक्तिसम्पन्नाः भविष्यन्ति ते एव किं करिष्यन्ति?

उत्तरम्—शासनम्।

8. प्रश्नः—कलिप्रभावेण प्राणिनां शरीराणि किम्प्रकाराणि भविष्यन्ति?

उत्तरम्—लघुः-क्षीणः-रोगग्रस्ताश्च।

9. प्रश्नः—महाभारतस्य वनपर्वे कलियुगस्य वर्णनं कीदृशं वर्तते?

उत्तरम्—पुत्रः पितृवधं कृत्वा पिता पुत्रवधं तथा। निरुद्वेगो बृहद्वादी न निन्दामुपलप्स्यते। म्लेच्छीभूतं जगत् सर्वं भविष्यति न संशयः। हस्तो हस्तं परिमुषेद् युगान्ते समुपस्थिते।।

10. प्रश्नः—कलियुगे अन्यानि कानि परिवर्तनानि भविष्यन्ति?

उत्तरम्—अधर्मस्य वृद्धिः, धर्मस्य निन्दा, नार्यः कठोर-स्वभावयुक्ता, कटुवादिनी, पतिसेवा-विमुक्ता भविष्यन्ति। सर्वत्र पाप-पीडा, दुःख-दारिद्र्य, क्लेश-अनीति, अनाचारादयः व्याप्ता भविष्यन्ति।

11. प्रश्नः—कल्किभगवान् कुत्र अवतारग्रहणं करिष्यति?

उत्तरम्—सम्भलग्रामे विष्णुयशानामक अत्यन्तपवित्रः, सदाचारी एवं श्रेष्ठब्राह्मणकुले।

12. प्रश्नः—महाभारतस्य वनपर्वे भगवान् कल्कि-अवतारविषये किं कथ्यते?

उत्तरम्—मनसा तस्य सर्वाणि वाहनान्यायुधानि च। उपस्थास्यन्ति योद्धाश्च शस्त्राणि कवचानि च।। स धर्मविजयो राजा चक्रवर्ती भविष्यति। स चेमं संकुलं लोकं प्रसादमुपनेष्यति। उत्थितो ब्राह्मणो दीप्तः क्षयान्तकृदुदारधीः।।

13. प्रश्नः—कल्किभगवन्तं शस्त्रास्त्रस्य शिक्षणं कः दास्यति?

उत्तरम्—स्वयं भगवान् शंकरः।

14. प्रश्नः—कल्किभगवन्तं वेदोपदेष्टा कः अभूत्?

उत्तरम्—भगवान् परशुरामः।

15. प्रश्नः—भगवान् कल्किः किं करिष्यति?

उत्तरम्—देवदत्त नामक शीघ्रगामी अश्वोपरि आरूह्य

राज्ञः वेषे जगति व्याप्तनीच-स्वभावजन्यानां म्लेच्छानां संहारः करिष्यति परमपुण्यमयः भगवान् कल्किः।

16. **प्रश्नः**—भूमण्डलस्य सम्पूर्णपातकीनां दुराचारिणां दुष्टानाञ्च विनाशं कृत्वा अश्वमेधनामक महान् यज्ञं कः करिष्यति?
उत्तरम्—भगवान् कल्किः।

17. **प्रश्नः**—यज्ञान्ते भगवान् कल्किः सम्पूर्णधरां केभ्यः दाने दास्यति?
उत्तरम्—ब्राह्मणेभ्यः।

18. **प्रश्नः**—महाभारतस्य वनपर्वे वीरवरकल्किभगवतः कार्यविषये किं कथ्यते?
उत्तरम्—स्थापयित्वा च मर्यादां स्वयम्भुविहिताः शुभाः।
वनं पुण्ययशःकर्मा रमणीयं प्रवेक्ष्यति।।
तच्छीलमनुवर्त्स्यन्ति मनुष्या लोकवासिनः।

19. **प्रश्नः**—सर्वभूतात्मा सर्वेश्वरः भगवतां कल्कीनां अवतरणभूते सति धरायां पुनः कस्य युगस्य प्रतिष्ठा भविष्यति?
उत्तरम्—सत्ययुगस्य।

(HH-Code-73) (ड) मणिद्वीपवर्णनम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

महाराजजनमेजयं व्यासः कथयति श्रूयते यथा-ब्रह्मलोकात् ऊर्ध्वभागे सर्वलोकोऽस्ति स एव मणिद्वीपः अस्ति यत्र देवी विराजते। सर्वेषु लोकेषु श्रेष्ठकारणात् एव सर्वलोक इति नामधेयो वर्तते। अयं लोकः कैलास-वैकुण्टगोलोकेभ्योऽपि अधिको महान् उत्तमश्च सर्वलोको विद्यते, यत्र जगज्जननी भगवती देव्याः निवासस्थानं वर्तते। कथ्यते यथा देवीभागवतपुराणे–

सर्वस्मादधिको यस्मात्सर्वलोकस्ततः स्मृतः।।
(दे०भा०पु०मणि-2)

कैलासादधिको लोको वैकुण्ठादपि चोत्तमः।।
(दे०भा०पु०मणि-3)

मणिद्वीपस्य चहुर्दिशि वहुयोजनविस्तीर्णो तावदेव हि गम्भीरः अमृतस्य सागरः विद्यमानो विद्यते। भणितं यथा देवीभागवतपुराणे–

बहुयोजनविस्तीर्णे गम्भीरस्तावदेव हि।
मणिद्वीपस्य परितो वर्तते तु सुधोदधिः।।
(दे०भा०पु०मणि-3)

पवनस्य आघातेन तरङ्गशतसङ्कुलेन परिपूर्णं च रत्नाच्छवालुकायुक्तो झषशङ्खसमाकुलः वर्तते। एवं च मत्स्यशंखैः सम्पन्नः, शीतलजलकणैः शोभायमानः, तथा अनेकप्रकारस्य ध्वजसमायुक्तैः, नानाविध-आवागमन-संलग्नपोतैः मण्डितः अयं मणिद्वीपो विद्यते। अस्मिन् मणिद्वीपे चतुर्द्वारसमायुक्तो शतान्वितः द्वारपालाः द्वीपस्य संरक्षणार्थं तत्पराः विद्यन्ते। कांस्यसालाद् उत्तरे तु ताम्रसालः प्रकीर्तितो वर्तते, एवं चतुरस्रसमाकारः उन्नत्या सप्तयोजनपरिणामयुक्तस्य द्वीपस्य वर्णनं प्राप्यते। द्वयोः सालयोर्मध्ये एका कल्पवाटिका वर्तते येषां तरूणां पुष्पाणि स्वर्ण-सदृशानि आभायुक्तानि सन्ति इति कथ्यन्ते। अस्याः कल्पवाटिकायाः सुरक्षा वसन्तऋतुः करोति। पुष्पस्य सेवनं कृत्वा मदमत्तः वसन्तः पुष्पसिंहासनोपरि विराजमानो वर्तते। तस्य मुखाकृति मुस्कानयुक्तः मधुश्री एवं माधवश्री इति नामिके द्वे भार्ये स्तः। अत्र ताम्रसालाद् अग्रे एकः सीससालः अस्ति। तस्यापि समुच्छ्रायः सप्तयोजन-संख्यकः इति कथ्यते। द्वयोः सालयोर्मध्ये सन्माननामिका वाटिका वर्तते। अस्याः वाटिकायाः नायकः ग्रीष्मऋतुः अस्ति तस्य शुक्रश्री शुचिश्री नामिके द्वे भार्ये स्तः। सीससालस्याग्रे सप्तयोजनपरिमितो कूटमयः सुन्दरः परकोटे विद्यते। द्वयोः परकोटयोर्मध्ये हरिचन्दनस्य एका वाटिका अस्ति। तत्र स्थायी मेघोपरि आसीनः वर्षाऋतुः विद्यते। वर्षाऋतोः द्वादश प्रियशक्तयः सन्ति। ताः शक्तयः–1. नभः श्री, 2. नभस्य श्री, 3. स्वरस्या, 4. रस्यमालिनी, 5. अम्बा, 6. दुला, 7. निरलि, 8. अभ्रमन्ती, 9. मेघयन्तिका, 10. वर्शयन्ती, 11. चिपुणिका, 12. वारिधारा सन्ति। याः सदा मदविह्वलाः विद्यन्ते। पीत्तलपरकोटस्याग्रे सप्तयोजनपरिमिता एकः पंचलौह-निर्मितपरकोटो वर्तते। पञ्चलौहात्मकः सालमध्ये मन्दारवाटिका वर्तते। विकाररहितः शरद् ऋतुं अत्रत्यः अधिष्ठाता कथ्यते। अस्य इक्षुलक्ष्मी ऊर्जलक्ष्मी च नामिके द्वे भार्ये स्तः। अस्य मणिद्वीपस्य पूर्वदिशायां उन्नतशिखरयुक्ता अमरावतीपुरी

अस्ति। यत्र इन्द्रः विराजमानः विद्यते। अस्य मणिपुरस्य अग्निकोणे अग्निसदृशः प्रज्वलिता वह्निपुरी वर्तते। यत्र अग्निदेवः 'स्वाहा' 'स्वधा' समायुक्तो द्वाभ्यां शक्तिभ्यां सह निवसति।

मणिद्वीपस्य दक्षिणदिशायां यमपुरी अस्ति, यत्र सूर्यपुत्र-यमराजः चित्रगुप्तादि मन्त्रीगणैः सह स्व-भटैर्वेष्टितः हस्ते दण्डं धारयित्वा स्व-शक्तिभिः सह निवसन्ति। कथ्यते यथा देवीभागवतपुराणे–

याम्याशालायां यमपुरी तत्र दण्डधरो महान्।
स्वभटैर्वेष्टितो राजन् चित्रगुप्तपुरोगमैः।।
(दे०भा०पु०मणि-82)

अस्य मणिद्वीपस्य नैर्ऋत्यकोणे राक्षस्यां राक्षसैः परिवारितः निवसन्ति। येषु खड्गधारी निर्ऋतिः स्व-शक्तिभिः सह तत्र विद्यमानः वर्तन्ते। एवं पश्चिमदिशायां वरुणलोके वारुणीपानैः विह्वलः पाशधारीप्रतापवान् वरुणराजः निवसन्ति। तथा मणिद्वीपस्य वायुकोणे वायुलोको वायुस्तत्राधितिष्ठति। ध्वजहस्तो विशालाक्षो मृगवाहने संस्थितः। मणिद्वीपस्य उत्तरदिशायां महान् यक्षलोकोऽस्ति। तत्र यक्षाधिराजः कुवेरः वृद्धिऋद्ध्यादिशक्तिभिः सह नवभिर्निधिभिर्युक्तः तथा मणिभद्रः-पूर्णभद्रः-मणिमान्-मणिकन्धरः-मणिभूषः-मणिस्रग्वी-मणिकार्मुकधारकादयैः सह निवसन्ति। मणिद्वीपस्य ईशानकोणे रुद्रलोको महत्तरः सम्प्रोक्तः, यत्र ईशानदिक्पतिः शिवः अधिपतिः वर्तते।

मणिद्वीपे अष्टमातृका, षोडश शक्तयः, नवरत्नानां वर्णनम्–1. अष्टमातृकाः एताः सन्ति–1. ब्राह्मी, 2. माहेश्वरी, 3. कौमारी, 4. वैष्णवी, 5. वाराही, 6. इन्द्राणी, 7. चामुण्डा (इति सप्तमातरः), 8. महालक्ष्मी इति। कथ्यते यथा देवीभागवतपुराणे–

प्रतिब्रह्माण्डमातृणां ताः समष्टय ईरिताः।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।।
वाराही च तथेन्द्राणी चामुण्डाः सप्त मातरः।
अष्टमी तु महालक्ष्मीर्नाम्ना प्रोक्तास्तु मातरः।।
(दे०भा०पु०मणि-57, 58)

2. मणिद्वीपे षोडश शक्तयः एताः सन्ति–1. कराली, 2. विकराली, 3. उमा, 4. सरस्वती, 5. श्री, 6. दुर्गा, 7. उषा, 8. लक्ष्मी, 9. श्रुतिः, 10. स्मृतिः, 11. धृतिः, 12. श्रद्धा, 13. मेधा, 14. मतिः, 15. कान्तिः, 16. आर्या इति। कथ्यते यथा देवीभागवतपुराणे–

कराली विकराली च तथोमा च सरस्वती।।
श्री दुर्गोषा तथा लक्ष्मीः श्रुतिश्चैव स्मृतिर्धृतिः।
श्रद्धा मेधा मतिः कान्तिरार्या षोडश शक्तयः।।
(दे०भा०पु०मणि-68, 69)

3. मणिद्वीपे नवरत्नानां नवमणीनां वा वर्णनम्–1. पद्मरागमणिः, 2. गोमेदमणिः, 3. वज्रमणिः (हीरा), 4. वैदूर्यमणिः, 5. इन्द्रनीलमणिः, 6. मुक्तामणिः, 7. महामरकतमणिः, 8. स्फटिकमणिः, 9. चूडामणिः एताः सन्ति।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—महाराजजनमेजयं मणिद्वीपस्य वर्णनं केन श्राव्यते?
उत्तरम्—व्यासेन।

2. **प्रश्नः**— ब्रह्मलोकात् ऊर्ध्वभागे को लोको वर्तते?
उत्तरम्—सर्वलोकोऽस्ति स एव मणिद्वीपः।

3. **प्रश्नः**— जगज्जननी देवी कुत्र विराजते?
उत्तरम्—मणिद्वीपे।

4. **प्रश्नः**— कस्मात् कारणात् सर्वलोक इति नामधेयो वर्तते?
उत्तरम्—सर्वेषु लोकेषु श्रेष्ठकारणात्।

5. **प्रश्नः**—कैलास-वैकुण्ठ-गोलोकेभ्योऽपि अधिको महान् उत्तमश्च लोकः कः?
उत्तरम्—सर्वलोकः (मणिद्वीपम्)।

6. **प्रश्नः**—गम्भीरः अमृतस्य सागरः कुत्र विद्यमानो विद्यते?
उत्तरम्—मणिद्वीपस्य चहुर्दिशिः बहुयोजनविस्तीर्णः तावदेव।

7. **प्रश्नः**— देवीभागवतपुराणे मणिद्वीपस्य वर्णनं किम्?
उत्तरम्—पवनस्य आघातेन तरङ्गशतसङ्कुलः परिपूर्णं च रत्नाच्छवालुकायुक्तो झषशङ्खसमाकुलः वर्तते। एवं च मत्स्यशंखैः सम्पन्नः, शीतलजलकणैः शोभायमानः, तथा अनेकप्रकारस्य ध्वजसमायुक्तैः, नानाविध-आवागमनसंलग्नपोतैः मण्डितः।

8. **प्रश्नः**—मणिद्वीपे कति द्वारं, द्वीपस्य संरक्षणार्थं कति द्वारपालाः सन्ति?
उत्तरम्—चतुर्द्वारसमायुक्तो शतान्वितः द्वारपालाः।

9. प्रश्नः— मणिद्वीपे ताम्रसालः कुत्र वर्तते?
उत्तरम्—कांस्यसालाद् उत्तरे।

10. प्रश्नः— देवीभागवतपुराणे ताम्रसालद्वीपस्य वर्णनं कथं प्राप्यते?
उत्तरम्—चतुरस्रासमाकारः उन्नत्या सप्तयोजन-परिणामयुक्ता।

11. प्रश्नः— मणिद्वीपे कल्पवाटिका कुत्र वर्तते?
उत्तरम्—द्वयोः सालयोर्मध्ये एका कल्पवाटिका वर्तते।

12. प्रश्नः— अस्याः कल्पवाटिकायाः सुरक्षा कः करोति?
उत्तरम्—वसन्तर्तुः।

13. प्रश्नः— वसन्तस्य कति भार्या, के च ते?
उत्तरम्—मुखाकृतिमुस्कानयुक्ताः मधुश्री एवं माधवश्री इति नामिके द्वे भार्ये स्तः।

14. प्रश्नः— सप्तयोजनसंख्यके: सीससालः कुत्र अस्ति?
उत्तरम्—ताम्रसालाद् अग्रे।

15. प्रश्नः— सम्माननामिका वाटिका वर्तते?
उत्तरम्—द्वयोः सालयोमध्ये।

16. प्रश्नः— ग्रीष्मर्तुः कस्याः वाटिकायाः नायकः?
उत्तरम्—सम्मानवाटिकायाः।

17. प्रश्नः— ग्रीष्मर्तोः कति भार्या, के च ते?
उत्तरम्—शुक्रश्री शुचिश्री नामिके द्वे भार्ये स्तः।

18. प्रश्नः— सप्तयोजनपरिमिता कूटमयः सुन्दरः परकोटो कुत्र विद्यते?
उत्तरम्—सीससालस्याग्रे।

19. प्रश्नः— हरिचन्दनस्य एका वाटिका कुत्र अस्ति?
उत्तरम्—द्वयोः परकोटयोर्मध्ये।

20. प्रश्नः— तत्र स्थायी मंचोपरि आसीनः कः?
उत्तरम्—वर्षार्तुः।

21. प्रश्नः— वर्षार्तोः द्वादश प्रियशक्तयः काः सन्ति?
उत्तरम्—1. नभः श्री, 2. नभस्य श्री, 3. स्वरस्या, 4. रस्यमालिनी, 5. अम्बा, 6. दुला, 7. निरति, 8. अभ्रमन्ती, 9. मेघयन्तिका, 10. वर्शयन्ती, 11. चिपुणिका, 12. वारिधारा।

22. प्रश्नः— सप्तयोजनपरिमित एकः पंचलौह-निर्मित परकोटो कुत्र वर्तते?
उत्तरम्—पीत्तलपरकोटस्याग्रे।

23. प्रश्नः— मणिद्वीपे मन्दारवाटिका कुत्र वर्तते?
उत्तरम्—पञ्चलौहात्मकः सालयोर्मध्ये।

24. प्रश्नः— विकाररहितः शरद् ऋतुः कस्य अधिष्ठाता वर्तते?
उत्तरम्—पञ्चलौहात्मकस्य।

25. प्रश्नः— शरद् ऋतोः कति भार्या, के च ते?
उत्तरम्—इक्षुलक्ष्मी ऊर्जलक्ष्मी च नामिके द्वे भार्ये स्तः।

26. प्रश्नः— उन्नतशिखरयुक्ता अमरावतीपुरी अस्ति?
उत्तरम्—मणिद्वीपस्य पूर्वदिशायाम्।

27. प्रश्नः— अमरावतीपुर्यां कः विराजमानः विद्यते?
उत्तरम्—इन्द्रः।

28. प्रश्नः— अग्निसदृशी प्रज्वलितवह्निपुरी कुत्र वर्तते?
उत्तरम्—मणिपुरस्य अग्निकोणे।

29. प्रश्नः— 'स्वाहा' 'स्वधा' समायुक्तो द्वाभ्यां शक्तिभ्यां सह कः निवसति?
उत्तरम्—अग्निदेवः।

30. प्रश्नः—यमपुरी कुत्र अस्ति?
उत्तरम्—मणिद्वीपस्य दक्षिणदिशायाम्।

31. प्रश्नः— सूर्यपुत्र-यमराजः चित्रगुप्तादि मन्त्रीगणैः सह स्व-भटैर्वेष्टितः हस्ते दण्डं धारयित्वा स्व-शक्तिभिः सह कुत्र निवसति?
उत्तरम्—यमपुर्याम्।

32. प्रश्नः— मणिद्वीपस्य नैर्ऋत्यकोणे के निवसन्ति?
उत्तरम्—राक्षस्यः राक्षसैः परिवारितः निवसन्ति।

33. प्रश्नः— मणिद्वीपस्य पश्चिमदिशायां को लोकः, तत्र कः निवसति?
उत्तरम्—वरुणलोकः, वारुणीपानेन विह्वलः पाशधारी प्रतापवान् वरुणराजः।

34. प्रश्नः— मणिद्वीपस्य वायुकोणे को लोकः, तत्र कः अधितिष्ठति?
उत्तरम्—वायुलोको वायुस्तत्राधितिष्ठति।

35. प्रश्नः— मणिद्वीपस्य उत्तरदिशायां को लोकः?
उत्तरम्—यक्षलोकः।

36. प्रश्नः—यक्षलोकस्य अधिराजः कः?
उत्तरम्—यक्षाधिराजः कुबेरः।

37. प्रश्नः—वृद्धिऋद्ध्यादिशक्तिभिः सह नवभिर्निधि-भिर्युक्तः कः?
उत्तरम्—यक्षाधिराजः कुबेरः।

38. प्रश्नः— मणिभद्रः-पूर्णभद्रः-मणिमान्- मणिकन्धरः-मणिभूषः-मणिस्रग्वी- मणिकार्मुकधारकादयैः सह के निवसन्ति?
उत्तरम्—यक्षलोकाधिपतिः।

39. प्रश्नः— मणिद्वीपस्य ईशानकोणे को लोकः?
उत्तरम्—रुद्रलोको महत्तरः सम्प्रोक्तः, यत्र ईशानदिक्पतिः शिवः अधिपतिः वर्तते।

40. प्रश्नः— मणिद्वीपे अष्टमातृकाः के: सन्ति?
उत्तरम्—1. ब्राह्मी, 2. माहेश्वरी, 3. कौमारी, 4. वैष्णवी, 5. वाराही, 6. इन्द्राणी, 7. चामुण्डा (इति सप्तमातरः), 8. महालक्ष्मी।

41. प्रश्नः— षोडश शक्तयः काः सन्ति?
उत्तरम्—1. कराली, 2. विकराली, 3. उमा, 4. सरस्वती, 5. श्री, 6. दुर्गा, 7. उषा, 8. लक्ष्मी, 9. श्रुतिः, 10. स्मृतिः, 11. धृतिः, 12. श्रद्धा, 13. मेधा, 14. मतिः, 15. कान्तिः, 16. आर्या इति।

42. प्रश्नः—नवरत्नानि (नव-मणि) कानि सन्ति?
उत्तरम्—1. पद्मरागमणिः, 2. गोमेदमणिः, 3. वज्रमणिः (हीरा), 4. वैदूर्यमणिः, 5. इन्द्रनीलमणिः, 6. मुक्तामणिः, 7. महामरकतमणिः, 8. स्फटिकमणिः, 9. चूडामणिः।

(HH-Code-73) (ढ) श्रीकृष्णचरितम् एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

श्रीकृष्णः धर्मस्य संस्थापनार्थाय, साधूनां परित्राणाय, दुष्कृतानां च विनाशाय जन्म लेभे। कथ्यते यथा गीतायां श्रीकृष्णः—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे-युगे।।

श्रीकृष्णचन्द्रः इन्दीवरदलश्यामम्, इन्दीवरलोचनं षोडशकलापूर्णम् वर्तते। भगवन्तं श्रीकृष्णचन्द्रं भारतीया विष्णोरवतारमिति वदन्ति जनाः। अपरे पुनः योगिराट् महात्मेति स्वीकुर्वन्ति। नूनं महापुरुषाः सुदुस्तरे आपत्पयोधौ मज्जतोन्मज्जतोऽनेकान् जनानुद्धर्तुं स्वतनुना जगदिदम् अलंकुर्वन्ति। ते च महापुरुषा द्विविधाः तत्रैके कर्मपाशबद्धाः फलभोगिनः, अपरं पुनस्तद्भिन्नाः कर्मबन्धनं विनैव जगतो हितकामनयाऽऽयान्ति-यान्ति च। एतादृशेषु एव द्वितीयप्रकारकेषु आसीद् भगवान् श्रीकृष्णः।

द्वापरस्य अन्तकाले अस्मिन् देशे कृष्णरूपेण अवतरितः। भाद्रमासस्य कृष्णपक्षस्य अष्टम्यां तिथौ अर्द्धनिशायां द्वादशवादने भगवतः श्रीकृष्णस्य जन्म अभवत्। अस्य पितुः नाम वसुदेवः मातुः नाम देवकी आसीत्। अस्य माता देवकी कंसस्य भगिनी आसीत्। भगवतः दशावतारेषु श्रीकृष्णस्य अवतारः पूर्णकलावताररूपेण मन्यते। विवाहानन्तरं देवकीवसुदेवयोः स्वगृहं प्रति आगमनकाले मार्गे एव एका आकाशवाणी सञ्जाता यद् अनयोः अष्टमगर्भादुत्पन्नः बालकः कंसस्य हन्ता भविष्यति। आकाशवाण्या विभीषितेन उग्रसेनात्मजेन कंसेन विवाहानन्तरमेव देवकी-वसुदेवौ कारागारे निगडितौ। तत्र तयोः अनेकासु सन्ततिषु अष्टमः श्रीकृष्णः सम्बभूव। अयं हि भगवतो विष्णोर्लीलावतारः भाद्रपदे मासि कृष्णे पक्षे अष्टम्यान्तिथौ रोहिणीनक्षत्रे निशीथे देवक्याः कुक्षितः जन्म लेभे। तदानीं देवकी-वसुदेवौ तं निर्निमेषपक्ष्मणा ददर्शतुः। कथम्भूतः स आसीदिति वर्णयन् बादरायणिः श्रीमद्भागवते दशमस्कन्धे पूर्वार्धे तृतीयाऽध्याये जगाद-तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदायुधम्। श्रीवत्सपदां गलशोभिकौस्तुभं पीताम्बरं सान्द्रपयोदसौभगम्। महार्हवैडूर्य-किरीटकुण्डलत्विषा परिष्वक्तसहस्रकुन्तलम्। उद्दामकांचीबर्हणादिभिर्विरोचमानं वसुदेव ऐक्षत। तदानीं कंसेन भयभीतौ स्वपितरौ दृष्ट्वा बालकोऽवदत् "हे तात! मां यशोदापार्श्वे नन्दगृहे नीत्वा तत्र यशोदागर्भाद् सम्भूतां कन्यकाम् अत्र समानय।" पित्रा वसुदेवेन तथैव कृतम्। अपरेद्युः

प्रातःकाले कारागाररक्षकैः सुतोत्पत्तिं श्रुत्वा कंसः शीघ्रं तत्रागत्य तामेव योगमायां कन्यकां हन्तुमुद्यतोऽभवत्। परञ्च आकाशे उत्सर्प्यया कन्यया एवमुक्तम् यत् **किमर्थं मां हन्तुं प्रयत्नं करोषि तव हन्ता तु अन्यत्र एव उत्पन्नः विद्यते** इति।

श्रीकृष्णचन्द्रः नन्दगृहे यशोदया पोषितः सन् शुक्लपक्षस्य चन्द्र इव प्रतिदिनम् अवर्धत। तस्य वर्धनेन सह कंसस्य व्याकुलतापि वृद्धिमायाति। तस्य मधुरेण वेणुवादनध्वनिना सर्वे मन्त्रमुग्धाः भवन्तिस्त। बाल्यकाले यमुनातटे अन्यैः ग्वालबालैः सह धेनूः अचारयत्। गोपीनां मनांसि तु हृद्यचोरयत्। तासां मनस्तु मदनमोहने श्रीकृष्णे सदासक्तम् आसीत्। राधा तस्य रतिप्रिया सुदामा च सहपाठिसखा आसीत्। श्रीकृष्णः गोपीनां पात्रेभ्यः दधिं नवनीतं च चोरयित्वा स्वमित्रेभ्यः अददत् स्वयमपि आस्वादयत्।

बाल्यावस्थायामेव कंसेन प्रेषितानां पूतनाबकासुरप्रभृतीनां राक्षसानां वधमकरोत्। कंसः छलछद्मना बलरामकृष्णौ स्वभागिनेयौ मथुरायामाह्वयत्। तत्र चाणूरमुष्टिकाभ्यां सह तयोर्मल्लयुद्धं बलरामकृष्णयोर्जिघांसयाऽऽकारयत्। तस्मिन् मल्लयुद्धे तौ चाणूरमुष्टिकौ हत्वा कंसमपि निजघ्नतुः। कंसं हत्वा स्वपितरौ कारागारादमुंचताम्। अत्रैव मधुपुरे वसुदेवसद्मनि निवसन्तौ, विद्यामधीयन्तौ, तारुण्यमभजताम्। बलरामस्य ककुद्मकन्यया रेवत्या सह परिणयो जातः। श्रीकृष्णस्य च कुण्डिनपुरस्य राज्ञो भीष्मकस्य कन्यया रुक्मिण्या सह पाणिग्रहणं जातम्।

कृष्णः महद्राजनीतिज्ञोऽभवत्। उत्तरभारतस्य राज्ञो दुष्यन्तस्य पुत्रस्य भरतस्य वंशधरस्य शान्तनोः प्रपौत्रौ धृतराष्ट्रपाण्डवौ आस्ताम्। नेत्रहीनत्वात् पाण्डुरेव राजा अभूत्। कालान्तरेण पाण्डुः पञ्चत्वं गतः। धृतराष्ट्रस्य शतपुत्राः पाण्डोश्च पञ्चपुत्राः आसन्। द्यूतक्रीडायां पराजिताः पाण्डवाः द्वादशवर्षपर्यन्तं वनवासस्य वर्षैकञ्च यावतज्ञातवासस्य कठिनां यातनामसहन्। महाभारतयुद्धस्य सूत्रधारः श्रीकृष्णः विद्यते। पाण्डवैः सह श्रीकृष्णस्य मातृत्वसम्बन्धः आसीत्। पाण्डवानां जननी साम्राज्ञी कुन्ती कृष्णस्य पितृष्वसा आसीत्। दुर्दैववशात् द्यूते पराजिताः पाण्डवाः द्वादशवर्षपर्यन्तं वनवासं वर्षैकं च अज्ञातवासमतीत्यारण्यात् परावृत्य स्वकीयं राज्यार्द्धं कृष्णमुखेन ययाचिरे परं स्वार्थान्धो दुर्योधनस्तु कृष्णस्य राज्यार्द्ध संदेशः अस्वीकृतवान्। उक्तं च **सूच्यग्रं नैव दास्यामि विना युद्धेन केशव** इति। दुर्योधनस्य निश्चयेन पाण्डव-कौरवयोर्मध्ये कुरुक्षेत्रेऽष्टदशदिवसपर्यन्तं तुमुलं युद्धं सञ्जातः। तस्मिन् युद्धे श्रीकृष्णः पाण्डवानां पक्षं स्वीकृत्य अर्जुनस्य सारथ्यं अंगीचकार। तदोभयोः सेनयोर्मध्ये सीदन्ति मम गात्राणि मुखं च परिशुष्यति इत्याद्युक्तवते विषादं च गतायार्जुनाय कर्मयोगमुपादिशम्। यथा–

मन्मना भव मद् भक्तो मद्याजी मां नमस्तु सः।
मामेवैष्यसि युक्तवैवमात्मानं मत्परायणः।।
कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसङ्ग्रहमेवाऽपि सम्पश्यन् कर्तुमर्हसि।।

दुर्योधनः पराजितः विजयस्तु पाण्डवानां हस्ते जातम्। तेषां ज्येष्ठः युधिष्ठिरः राजसिंहासनमतिष्ठत्। एवं धर्म-संस्थापनार्थं मानवरूपेण स्वलीलां विधाय श्रीकृष्णः शताधिकविंशतिवर्षस्य अवस्थां परिसमाप्य मानवशरीरम् अत्यजत्।

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—धर्मस्य संस्थापनार्थाय, साधूनां परित्राणाय, दुष्कृतां च विनाशाय कः जन्म लेभे?
उत्तरम्—श्रीकृष्णचन्द्रः।

2. **प्रश्नः**—द्वापरस्य अन्तकाले अस्मिन् देशे कृष्णरूपेण कः अवतरितः?
उत्तरम्—भगवान् विष्णुः।

3. **प्रश्नः**—इन्दीवरदलश्यामम् इन्दीवरलोचनं षोडश-कलापूर्ण को वर्तते?
उत्तरम्—श्रीकृष्णचन्द्रः।

4. **प्रश्नः**—भावतः श्रीकृष्णस्य जन्म कदा अभवत्?
उत्तरम्—भाद्रमासस्य कृष्णपक्षस्य अष्टम्यां तिथौ अर्द्धनिशायां द्वादशवादने।

5. **प्रश्नः**—श्रीकृष्णस्य पितुः नाम मातुः नाम च के आस्ताम्?
उत्तरम्—पितुः नाम वसुदेवः, मातुः नाम देवकी।

6. **प्रश्नः**—कंसस्य भगिनी का आसीत्?
उत्तरम्—श्रीकृष्णस्य माता देवकी।

7. **प्रश्नः**—भगवतः दशावतारेषु पूर्णकलावताररूपी अवतारः कः मन्यते?
उत्तरम्—श्रीकृष्णस्य अवतारः।

8. **प्रश्नः**—एका आकाशवाणी कदा सञ्जाता?
उत्तरम्—विवाहानन्तरं देवकीवसुदेवयोः स्वगृहं प्रति आगमनकाले मार्गे एव।

9. **प्रश्नः**—आकावाण्याः भाषा का?
उत्तरम्—अनयोः अष्टमगर्भादुत्पन्नः बालकः कंसस्य हन्ता भविष्यति।

10. **प्रश्नः**—आकाशवाण्या विभीषितेन उग्रसेनात्मजेन कंसेन विवाहानन्तरमेव देवकी-वसुदेवौ कुत्र निगडितौ?
उत्तरम्—कारागारे।

11. **प्रश्नः**—कारागारे तयोः अनेकासु सन्ततिषु अष्टमपुत्रः कः सम्बभूव?
उत्तरम्—श्रीकृष्णः।

12. **प्रश्नः**—कंसेन भयभीतौ स्वपितरौ दृष्ट्वा बालको कृष्णः किमवदत्?
उत्तरम्— हे तात! मां यशोदापार्श्वे नन्दगृहे नीत्वा तत्र यशोदागर्भाद् सम्भूतां कन्यकाम् अत्र समानय।

13. **प्रश्नः**—अपरेद्युः प्रातःकाले कारागाररक्षकैः सुतोत्पत्तिं श्रुत्वा कंसः किं कृतवान्?
उत्तरम्—शीघ्रं तत्रागत्य तामेव योगमायां कन्यकां हन्तुमुद्यतोऽभवत्।

14. **प्रश्नः**—आकाशे उत्सर्प्यया कन्यया किमुक्तम्?
उत्तरम्—किमर्थं मां हन्तुं प्रयत्नं करोषि तव हन्ता तु अन्यत्र एव उत्पन्नः विद्यते।।

15. **प्रश्नः**—नन्दगृहे यशोदया पोषितः सन् शुक्लपक्षस्य चन्द्र इव प्रतिदिनं कः अवर्धत?
उत्तरम्—श्रीकृष्णचन्द्रः।

16. **प्रश्नः**—कस्य मधुरेण वेणुवादनध्वनिना सर्वे मन्त्रमुग्धाः भवन्तिस्त?
उत्तरम्—श्रीकृष्णचन्द्रस्य।

17. **प्रश्नः**—बाल्यकाले यमुनातटे अन्यैः ग्वालबालैः सह धेनूः कः अचारयत्?
उत्तरम्—कृष्णगोपालः।

18. **प्रश्नः**—कासां मनस्तु मदनमोहने श्रीकृष्णे सदासक्तम् आसीत्?
उत्तरम्— गोपीनाम्।

19. **प्रश्नः**—राधा कस्य रतिप्रिया सुदामा च सहपाठिसखा आसीत्?
उत्तरम्—श्रीकृष्णचन्द्रः।

20. **प्रश्नः**—गोपीनां पात्रेभ्यः दधिं नवनीतं च चोरयित्वा स्वमित्रेभ्यः कः अददत् स्वयमपि आस्वादयत्?
उत्तरम्—वासुदेवकृष्णः।

21. **प्रश्नः**—बाल्यावस्थायामेव कंसेन प्रेषितानां पूतनाबकासुरप्रभृतीनां राक्षसानां वधं कः अकरोत्?
उत्तरम्—बालश्रीकृष्णः।

22. **प्रश्नः**—छलछद्मना बलरामकृष्णौ स्वभागिनेयौ मथुरायां कः आह्वयत्?
उत्तरम्—कंसः।

23. **प्रश्नः**—मल्लयुद्धे चाणूरमुष्टिकौ हत्वा कंसमपि कौ निजघ्नतुः?
उत्तरम्—बलरामकृष्णौ।

24. **प्रश्नः**—कंसं हत्वा कः स्वपितरौ कारागारादमुंचताम्?
उत्तरम्—श्रीकृष्णः।

25. **प्रश्नः**—ककुद्मकन्यया रेवत्या सह कस्य परिणयो जातः?
उत्तरम्—बलरामस्य।

26. **प्रश्नः**—कुण्डिनपुरस्य राज्ञो भीष्मकस्य कन्यया रुक्मिण्या सह कस्य पाणिग्रहणं जातम्?
उत्तरम्—श्रीकृष्णस्य।

27. **प्रश्नः**—महद्राजनीतिज्ञो कः अभवत्?
उत्तरम्—श्रीकृष्णः।

28. **प्रश्नः**—धृतराष्ट्रपाण्डवौ कौ आस्ताम्?
उत्तरम्—उत्तरभारतस्य राज्ञो दुष्यन्तस्य पुत्रस्य भरतस्य वंशधरस्य शान्तनोः प्रपौत्रौ आस्ताम्।

29. **प्रश्नः**—कस्य नेत्रहीनत्वात् पाण्डुरेव राजा अभूत्?
उत्तरम्—धृतराष्ट्रस्य।

30. **प्रश्नः**—धृतराष्ट्रस्य कति पुत्राः आसन्?
उत्तरम्—शतपुत्राः आसन्।

31. **प्रश्नः**—पाण्डुमहोदयस्य कति पुत्राः आसन्?
उत्तरम्—पञ्चपुत्राः आसन्।

32. प्रश्न:—कै: कर्तैः पाण्डवाः इन्द्रप्रस्थं नगरं अलंकृत्य वर्षाणि तत्र शासनं कृतम्?
उत्तरम्—षट्त्रिंशद् वर्षाणि।

33. प्रश्न:—महाभारतयुद्धस्य सूत्रधार: क:?
उत्तरम्—श्रीकृष्ण:।

34. प्रश्न:—पाण्डवै: सह श्रीकृष्णस्य क: सम्बन्ध: आसीत्?
उत्तरम्—मातुलपुत्रत्व: आसीत्।

35. प्रश्न:—दुर्योधनस्तु कृष्णस्य सम्मुखे संधि: अस्वीकृत्य किं कथितवान्?
उत्तरम्—सूच्यग्रं नैव दास्यामि विना युद्धेन केशव।

36. प्रश्न:—दुर्योधनस्य निश्चयेन पाण्डव-कौरवयोर्मध्ये कुरुक्षेत्रे कति दिवस-पर्यन्तं तुमुलं युद्धं सञ्जात:?
उत्तरम्—अष्टादशदिवसपर्यन्तम्।

37. प्रश्न:—युद्धे श्रीकृष्ण: केषां पक्षं स्वीकृत्य अर्जुनस्य सारथ्यं अंगीचकार?
उत्तरम्—पाण्डवानाम्।

38. प्रश्न:—अर्जुनाय कर्मयोगं केन उपादिशम्?
उत्तरम्—श्रीकृष्णचन्द्रेण।

39. प्रश्न:—महाभारतयुद्धे क: पराजित:?
उत्तरम्—दुर्योधन:।

40. प्रश्न:—महाभारतयुद्धे विजयस्तु केषां हस्ते जातम्?
उत्तरम्—पाण्डवानाम्।

41. प्रश्न:—पाण्डवेषु क: राजसिंहासनमतिष्ठत्?
उत्तरम्—ज्येष्ठ: युधिष्ठिर:।

42. प्रश्न:—धर्म-संस्थापनार्थं मानवरूपेण स्वलीलां विधाय श्रीकृष्ण: कति वर्षस्य अवस्थां परिसमाप्य मानवशरीरं अत्यजत्?
उत्तरम्—शताधिकविंशतिवर्षस्य अवस्थाम्।

(HH-Code-73) (ख) महाभारतकालीन-सामाजिक-व्यवस्था एवं तत्सम्बन्धिवस्तुनिष्ठ-प्रश्नोत्तराणि

हिन्दूनां धार्मिकग्रन्थोऽयं महाभारत:। महाभारते अस्माकं जातीयेतिहासो विद्यते। भारतीयसंस्कृतसाहित्यस्य सर्वश्रेष्ठो ग्रन्थ: श्रीमद्भगवद्गीता अस्यैवांश:। विष्णुसहस्रनाम, अनुगीता, भीष्मस्तवराज:, गजेन्द्रमोक्ष:, श्रीमद्भगवद्गीता एते पञ्च महाभारतस्य रत्नांशा: सन्ति। महाभारतं हि नाम भारतीयसंस्कृतेरनुपमं महाकाव्यम्। अस्मिन् ग्रन्थे कौरवपाण्डवयो: युद्धवर्णनप्रसंगे महाकविना व्यासेन वैदिकधर्मस्य वैदिकसंस्कृते: भारतीयदर्शनस्य च अन्याख्यै: आख्यानोपाख्यानै: सदैव धर्मार्थकाममोक्षाणां परमरमणीयं व्याख्यानं कृतम्। अत: अमुं महनीयं महाकाव्यं विद्वांस: "विश्वकोश" इति नाम्ना प्रथयन्ति। उक्तं च महाभारते स्वयमेव महाकविना व्यासेन—

धर्मे ह्यर्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥

महाभारतग्रन्थे कर्मानुसारेण जातिव्यवस्थावर्णनमस्ति।
यथा—

न विशेषोऽस्ति वर्णानां सर्वं ब्राह्ममिदं जगत्।
ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्वर्णतां गतम्॥

सर्वभक्षरतिर्नित्यं सर्वकर्मकरोऽशुचि:।
त्यक्तवेदस्त्वनाचार: स वै शूद्र इति स्मृत:॥
शूद्रे चैतद् भवेल्लक्ष्यं द्विजे तच्च न विद्यते।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणत्वं नियच्छति॥

इदं महाभारतम् आदि-सभा-वन-विराटादिभि: अष्टादशभि: पर्वभि: उपनिबद्धम्। अस्मिन् प्रधानकथोपन्यासेन सह अनेकानि सामाजिकानि आख्यानोपाख्यानानि अंकितानि सन्ति, तेषु शाकुन्तलोपाख्यानम्, मत्स्योपाख्यानम्, सावित्र्युपाख्यानम्, रामोपाख्यानम्, नलोपाख्यानं च प्रधानभूतानि सन्ति। अस्मिन् महाभारते वर्ण्य-विषयाणां विविधता वर्तते। तत्र पुराणेतिहासं धर्मशास्त्रं अर्थशास्त्रं च एकत्र दरीदृश्यन्ते। सांगवेदानुपरेख्य अपि तत्र समुल्लसन्ति। कथ्यते यथा—

धर्मशास्त्रमिदं पुण्यमर्थशास्त्रमिदं परम्।
मोक्षशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना॥
अष्टादश पुराणानि धर्मशास्त्राणि चैव हि।
वेदा: साङ्गास्तथैकत्र भारतं चैकत: स्थितम्॥

निश्चयेन महाभारतं न आख्यानम् अपितु समग्रसंस्कृतवाङ्मयस्य सारभूतम्। सर्वलोकप्रियत्वाय निखिलमपि वैदिकं लौकिकं तथ्यम्, दर्शनम्, शास्त्रसारम्, आख्यानम्,

आचारशास्त्रम्, अन्यान्यपि लोकोपयोगितत्त्वम् अत्र प्रस्तूयते। एतानि सन्ति महाभारतस्य वैशिष्ट्यम् एवञ्च महाभारतकालीनसामाजिक व्यवस्था। महाभारतकालीनसमाजे मातृपितृगुरूणां पूजनीयं स्थानम् आसीत्। तदानीन्तनस्य भीष्मस्य पितृभक्ति: एकलव्यार्जुनयो: गुरुभक्ति: सुप्रसिद्धा एव। तात्कालिक-कुन्ती-द्रौपदी-गान्धारी-सुभद्रादिषु नारीषु दायित्वबोध: अधिकारानुकूलनस्य सामर्थ्यम् आसीत्। पुत्रपुत्र्यो: भेद: न आसीत्। यथैवात्मा तथा पुत्र: पुत्रेण दुहिता समा। बहुपत्नीविवाहप्रथा अपि प्रचलिता आसीत्। छात्रा: गुरुकुलं गत्वा पठन्ति स्म। तदानीम् आन्वीक्षिकी वार्ता दण्डनीति आयुर्वेदादीनां शिक्षा दीयते स्म। यज्ञ-अध्ययन-दानादिभि: ब्राह्मणस्य, प्रजा द्वारा प्राप्त-षष्ठांशभागै: राज्ञ:, कृषि-पशुपालन-वाणिज्यादिभि: वैश्यस्य, द्विजादित्रयाणां वर्णानां सेवया शूद्रस्य जीविकोपार्जनं भवति स्म।

वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्न:—महाभारतस्य गरिमासूक्ति: का?
उत्तरम्—यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।

2. प्रश्न:—हिन्दूनां धार्मिकग्रन्थ: क:?
उत्तरम्—महाभारत:।

3. प्रश्न:—अस्माकं जातीयेतिहासो कुत्र विद्यते?
उत्तरम्—महाभारते।

4. प्रश्न:—भारतीयसंस्कृतसाहित्यस्य सर्वश्रेष्ठो ग्रन्थ: क:?
उत्तरम्—श्रीमद्भगवद्गीता।

5. प्रश्न:—श्रीमद्भगवद्गीता कस्य ग्रन्थस्य अंश:?
उत्तरम्—महाभारतस्य।

6. प्रश्न:—महाभारतस्य पञ्च-रत्नांशा: के सन्ति?
उत्तरम्—विष्णुसहस्रनाम, अनुगीता, भीष्मस्तवराज:, गजेन्द्रमोक्ष:, श्रीमद्भगवद्गीता।

7. प्रश्न:—कौरवपाण्डवयो: युद्धवर्णनप्रसंगे महाकविना व्यासेन वैदिकधर्मस्य वैदिकसंस्कृते: भारतीयदर्शनस्य च अन्याख्यै: आख्यानोपाख्यानै: सदैव धर्मार्थकाममोक्षाणां परमरमणीयं व्याख्यानं कस्मिन् ग्रन्थे कृतम्?
उत्तरम्—महाभारतग्रन्थे।

8. प्रश्न:—महनीयं महाकाव्यं विद्वांस: 'विश्वकोष' इति नाम्ना कं ग्रन्थं प्रथयन्ति?
उत्तरम्—महाभारतग्रन्थम्।

9. प्रश्न:—धर्मे ह्यर्थे च कामे च मोक्षे च भरतर्षभ। यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥ उक्त-श्लोक: केन कुत: उद्धृतवान्?
उत्तरम्—महाभारते स्वयमेव महाकविना व्यासेन।

10. प्रश्न:—महाभारतम् काभि: अष्टादशभि: पर्वभि: उपनिबद्धम्?
उत्तरम्—आदि सभा-वन-विराट-उद्योग-भीष्म-द्रोण-कर्ण-शल्य-सौप्तिक-स्त्री-शान्ति-अनुशासन-अश्वमेध-आश्रम-वासि-महाप्रस्थानिक-स्वर्गारोहण-पर्वभि:।

11. प्रश्न:—महाभारते प्रधानभूतानि कानि आख्यानोपाख्यानानि सन्ति?
उत्तरम्—शाकुन्तलोपाख्यानम्, मत्स्योपाख्यानम्, सावित्र्युपाख्यानम्, रामोपाख्यानम्, नलोपाख्यानं च।

12. प्रश्न:—धर्मशास्त्रमिदं पुण्यमर्थशास्त्रमिदं परम्। मोक्षशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना।अष्टादश पुराणानि धर्मशास्त्राणि चैव हि। वेदा: साङ्गास्तथैकत्र भारतं चैकत: स्थितम्।। इत्यादय: एकत्र कुत्र दरीदृश्यन्ते?
उत्तरम्—महाभारते।

13. प्रश्न:—संस्कृतवाङ्मयस्य सारभूतं ग्रन्थं किम्?
उत्तरम्—महाभारतम्।

14. प्रश्न:—मातृपितृगुरूणां पूजनीयं स्थानं कस्मिन् कालीनसमाजे वर्तते?
उत्तरम्—महाभारतकालीनसमाजे।

15. प्रश्न:—भीष्मस्य पितृभक्ति: एकलव्यार्जुनयो: गुरुभक्ति: कस्मिन् काले सुप्रसिद्धा?
उत्तरम्—महाभारतकाले।

16. प्रश्न:—यथैवात्मा तथा पुत्र: पुत्रेण दुहिता समा इत्यस्य को भाव:?
उत्तरम्—पुत्रपुत्र्यो: अभेदात्मकभाव:।

17. प्रश्न:—बहुपत्निविवाहप्रथा कस्मिन् काले प्रचलिता आसीत्?
उत्तरम्—महाभारतकाले।

18. प्रश्न:—महाभारतकालीनसमाजे ब्राह्मणस्य किं कर्तव्यम्?
उत्तरम्—यज्ञ-अध्ययन-दानादिग्रहणम्।

19. प्रश्न:—महाभारतकालीनसमाजे वैश्यस्य किं कर्तव्यम्?
उत्तरम्—कृषि-पशुपालन-वाणिज्यादिकार्यम्।

(HH-Code-73) विदुरनीतिः एवं तत्सम्बन्धिवस्तुनिष्ठप्रश्नोत्तराणि

संस्कृतसाहित्ये छन्दोबद्ध-कवितायां महाभारतमष्टादशसु पर्वसु विभक्तं वर्तते। तस्मिंश्च आदि-सभा-वन-विराट-उद्योग-भीष्म-द्रोण-कर्ण-शल्य-सौप्तिक-स्त्री-शान्ति-अनुशासन-अश्वमेध-आश्रम-वासि-महाप्रस्थानिक-स्वर्गारोहणपर्वाणि सन्ति। उद्योगपर्वणि वर्णितं 'विदुरनीति' महाभारतस्य एकः अत्यन्त-प्रसिद्धः परम-उपादेयश्च प्रसङ्गो वर्तते। अस्मिन् प्रसङ्गे विदुरः राज्ञा धृतराष्ट्रं लोक-परलोकस्य कल्याणकारी वार्ताः अवबोधयति स्म। उद्योगपर्वणः अष्टाध्यायेषु (33 अध्यायतः 40 अध्यायपर्यन्तं) विभक्ताः प्रसङ्गानुसारं नीतिपरकज्ञानं प्रदत्तवान्। येषु व्यवहारकुशलता, वार्ताः, नीतिः, सदाचारः, धर्मः, सुख-दुःख प्राप्तेः साधनम्, त्वन्वः ग्राह्यगुणानां कर्माणां च निर्णयः, त्यागस्य महिमा, न्यायस्य स्वरूपम्, सत्यः, परोपकारः, क्षमा, अहिंसा, मित्रस्य लक्षणम्, कृतघ्नस्य दुर्दशा, निर्लोभता इत्यादयः विशदवर्णनेन सह राजधर्मस्य सुन्दरं निरूपणं क्रियते।

प्रथमाध्याये 128 श्लोकाः सन्ति। येषु पण्डितस्य एवं पाण्डित्यस्य लक्षणं प्रतिपादितम्। ये जनाः अधिकधनं-विद्यां-ऐश्वर्यं प्राप्ते सति मदमत्ताः न भवन्ति ते पण्डिताः। यथा–

अर्थं महान्तमासाद्य विद्यामैश्वर्यमेव वा।
विचरत्यसमुन्नद्धो यः स पण्डित उच्यते॥
(विदुरनीति-1/45)

बुद्धिमतो प्रयुक्ताः बुद्धिः राज्ञा सह सम्पूर्णराष्ट्रं विनश्यति। कथ्यते यथा विदुरेण–

एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद् राष्ट्रं सराजकम्॥
(वि०नी०-1/48)

समुद्रस्य द्वितीयतटोपरि गमनार्थं नाव एव एकमात्रसाधनम्, तथैव स्वर्गाय एकमात्रसोपानं सत्यं वर्तते। विदुरेण यथा कथ्यते–

एकमेवाद्वितीयं तद् यद् राजन्नावबुध्यसे।
सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव॥
(वि०नी०1/52)

क्षमा असमर्थ-जनानां गुणः, समर्थजनानां भूषणं भवति। संसारे क्षमा वशीकरणरूपो वर्तते। शान्तिखड्गः करं यस्य दुर्जनः किं करिष्यति। कथ्यते यथा विदुरमहोदयेन–

सोऽस्य दोषो न मन्तव्यः क्षमा हि परमं बलम्।
क्षमा गुणो ह्यशक्तानां शक्तानां भूषणं क्षमा॥
(वि०नी०-1/54)

ऐश्वर्यमुन्नतिर्वा इच्छता जनान् निद्रा तन्द्रा भयं क्रोधमालस्यं दीर्घसूत्रतायाः त्यागं करणीयम्। यथा–

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।
निद्रा तन्द्रा भयं क्रोधमालस्यं दीर्घसूत्रता॥
(वि०नी०-1/83)

स्त्रीविषयक-आसक्तिः, द्यूतम्, मृगया, मद्यपानं, वचनस्य कठोरता, कठोर-दण्डं, धनस्य दुरुपयोगः- एते सप्त दोषाः राज्ञः सदा त्याग-योग्याः भवन्ति। भणितं यथा–

स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पञ्चकम्।
महच्च दण्डपारुष्यमर्थदूषणमेव च॥
(वि०नी०-1/97)

महाराज-धृतराष्ट्रं प्रति विदुरः कथयति–राजलक्षणैः सम्पन्नः भवतः आज्ञाकारी युधिष्ठिरः त्रिभुवनस्य नृपः भवितुं योग्यः एवं धरायाः शासकः भवेत्। कथ्यते यथा द्वितीयाध्याये–

राजा लक्षणसम्पन्नस्त्रैलोक्यस्यापि यो भवेत्।
शिष्यस्ते शासिता सोऽस्तु धृतराष्ट्र युधिष्ठिरः॥
(वि०नी०-2/84)

यज्ञः, दानं, अध्ययनं, तपः एतानि चत्वारि सज्जनैः सह नित्यसम्बद्धः एवं इन्द्रियनिग्रहः, सत्यता, सरलता, कोमलता एतानि चत्वारि सन्तजनाः अनुयान्ति। यज्ञः अध्ययनं, दानं, तपः, सत्यः, क्षमा, दया, अलोभः इति अष्टविधः धर्मस्य मार्गो वर्तते। कथ्यते यथा विदुरेण–

इज्याध्ययनदानानि तपः सत्यं क्षमा दया।
अलोभः इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः॥
(वि०नी०-3/56)

विदुरानुसारं ब्राह्मणः, गौ, कुटुम्बी, बालकः, स्त्री, अन्नदाता, शरणागताः एते अवध्याः भवन्ति। भणितं यथा स्वग्रन्थे–

अवध्या ब्राह्मणा गावो ज्ञातयः शिशवः स्त्रियः।
येषां चान्नानि भुञ्जीत ये च स्युः शरणागताः॥
(वि०नी०-4/66)

राजलक्ष्म्याः अधिकारिणः के भवन्ति? धृतराष्ट्रस्य प्रश्नोत्तरे विदुरस्य वचनम्-

संनियच्छति यो वेगमुत्थितं क्रोधहर्षयोः।
स श्रियो भाजनं राजन् यश्चापत्सु न मुह्यति॥
(वि०नी०-5/51)

कुत्र-कुत्र क्रोधोपरि नियंत्रण-विषयकचर्चाक्रमे विदुरः कथयति–देवता, ब्राह्मणः, राजा, वृद्धः, बालकः, रोगिणामुपरि उत्पन्नं क्रोधं प्रयत्नेन नियन्तव्यः। यथा भणितम्–

देवतेषु प्रयत्नेन राजसु ब्राह्मणेषु च।
नियन्तव्यः सदा क्रोधो वृद्धबालातुरेषु च।
(वि०नी०-6/30)

सप्तैता समिधः श्रियः के सन्ति अस्य प्रश्नस्योत्तरे विदुरेण कथ्यते यथा–

धृतिः शमो दमः शौचं कारुण्यं वागनिष्ठुरा।
मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः॥
(वि०नी०-6/38)

अस्मिन् लोके कः नराधिपः वर्जनीयो (त्यागयोग्यो) वर्तते, प्रसङ्गेऽस्मिन् विदुरस्य कथनम्–

असंगविभागी दुष्टात्मा कृतघ्नो निरपत्रपः।
तादृङ्नराधिपो लोके वर्जनीयो नराधिपः॥
(वि०नी०-6/39)

कानि त्रीणि कार्याणि ब्रह्महत्यासमानि सन्ति इति जिज्ञासाक्रमे विदुरस्य वचनम्–

अनृते च समुत्कर्षो राजगामि च पैशुनम्।
गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया॥
(वि०नी०-7/3)

विद्यामिच्छया विद्यार्थी किं त्यजेत् इत्यस्मिन् प्रश्नोत्तरे विदुरः कथयति–

सुखार्थिनं कुतो विद्या नास्ति विद्यार्थिनः सुखम्।
सुखार्थी वा त्यजेद् विद्यां विद्यार्थी वा त्यजेत् सुखम्॥
(वि०नी०-8/4)

वस्तुनिष्ठप्रश्नोत्तराणि

1. **प्रश्नः**—अष्टादशसु पर्वसु विभक्तं ग्रन्थं किम्?
   उत्तरम्—महाभारतम्।
2. **प्रश्नः**—महाभारते कानि सन्ति अष्टादशपर्वाणि?
   उत्तरम्—आदि-सभा-वन-विराट-उद्योग-भीष्म-द्रोण-कर्ण-शल्य-सौप्तिक-स्त्री-शान्ति-अनुशासन-अश्वमेध-आश्रम-वासि-महाप्रस्थानिक-स्वर्गारोहण-पर्वाणि।
3. **प्रश्नः**—महाभारतस्य एकः अत्यन्त-प्रसिद्धः परम-उपादेयश्च प्रसङ्गः कः?
   उत्तरम्—विदुरनीतिः।
4. **प्रश्नः**—राजानं धृतराष्ट्रं लोक-परलोकस्य कल्याणकारी वार्ताः कः अवबोधयति स्म?
   उत्तरम्—विदुरः।
5. **प्रश्नः**—अष्टाध्यायेषु विभक्तं प्रसङ्गानुसारं नीतिपरकज्ञानं कुत्र प्राप्यते?
   उत्तरम्—महाभारतस्य उद्योगपर्वणि।
6. **प्रश्नः**—प्रथमाध्याये कति श्लोकाः सन्ति?
   उत्तरम्—128 श्लोकाः।
7. **प्रश्नः**—विदुरनीत्यनुसारं पण्डितस्य किं लक्षणम्?
   उत्तरम्—अर्थं महान्तमासाद्य विद्यामैश्वर्यमेव वा। विचरत्यसमुन्नद्धो यः स पण्डित उच्यते॥
8. **प्रश्नः**—बुद्धिर्बुद्धिमतोत्सृष्टः हन्याद् राष्ट्रं सराजकम्। अनेन श्लोकेन किं ज्ञायते?
   उत्तरम्—बुद्धेर्प्रबलता तस्य सदुपयोगश्च।
9. **प्रश्नः**—विदुरः सत्यस्य प्रशंसा केन प्रकारेण कृतः?
   उत्तरम्—एकमेवाद्वितीयं तद् यद् राजन्नावबुध्यसे। सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव॥
10. **प्रश्नः**—असमर्थ-जनानां गुणः समर्थजनानां भूषणं कः?
    उत्तरम्—क्षमा।
11. **प्रश्नः**—नरकस्य त्रिविधानि द्वाराणि के सन्ति?
    उत्तरम्—कामः क्रोधस्तथा लोभः, तस्मादेतत्त्रयं त्यजेत्।
12. **प्रश्नः**—षड् दोषाः के सन्ति?
    उत्तरम्—निद्रा तन्द्रा भयं क्रोधमालस्यं दीर्घसूत्रता॥

13. प्रश्न:—राज्ञः कानि सप्तदोषाणि त्याज्यानि भवन्ति?
उत्तरम्—स्त्रीविषयक-आसक्तिः, द्यूतम्, मृगया, मद्यपानं, वचनस्य कठोरता, कठोर-दण्डं, धनस्य दुरुपयोग:।

14. प्रश्न:—विदुरनीतिग्रन्थस्य द्वितीयाध्याये कति श्लोकाः सन्ति?
उत्तरम्—86 श्लोकाः।

15. प्रश्न:—राज्य लक्षणसम्पन्नस्त्रैलोक्यस्यापि यो भवेत्। शिष्यस्ते शासिता सोऽस्तु धृतराष्ट्र युधिष्ठिरः।। उक्त-श्लोकमाध्यमेन विदुरः कस्य प्रशंसां करोति स्म?
उत्तरम्—युधिष्ठिरस्य।

16. प्रश्न:—विदुरनीतिग्रन्थस्य तृतीयाध्याये कति श्लोकाः सन्ति?
उत्तरम्—77 श्लोकाः।

17. प्रश्न:—सज्जनैः सह नित्यसम्बद्धानि चत्वारि कानि?
उत्तरम्—यज्ञः, दानं, अध्ययनं, तपः।

18. प्रश्न:—सन्तः कनाः चत्वारि कानि अनुयान्ति?
उत्तरम्—इन्द्रियनिग्रहः, सत्यता, सरलता, कोमलता।

19. प्रश्न:—अष्टविधः धर्मस्य मार्गाः कानि सन्ति?
उत्तरम्—यज्ञः अध्ययनं, दानं, तपः, सत्यः, क्षमा, दया, अलोभः।

20. प्रश्न:—विदुरनीतिग्रन्थस्य चतुर्थाध्याये कति श्लोकाः सन्ति?
उत्तरम्—74 श्लोकाः।

21. प्रश्न:—विदुरानुसारं के अवध्याः सन्ति?
उत्तरम्—ब्राह्मणः, गौ, कुटुम्बी, बालकः, स्त्री, अन्नदाता, शरणागताः।

22. प्रश्न:—विदुरनीतिग्रन्थस्य पञ्चमाध्याये कति श्लोकाः सन्ति?
उत्तरम्—64 श्लोकाः।

23. प्रश्न:—राजलक्ष्म्याः अधिकारिणः के भवन्ति?
उत्तरम्—सोनियच्छति यो वेगमुत्थितं क्रोधहर्षयोः। स श्रियो भाजनं राजन् यश्चापत्सु न मुह्यति।।

24. प्रश्न:—विदुरनीतिग्रन्थस्य षष्ठाध्याये कति श्लोकाः सन्ति?
उत्तरम्—47 श्लोकाः।

25. प्रश्न:—केषु उत्पन्नं क्रोधं प्रयत्नेन नियन्तव्यः?
उत्तरम्—देवता-ब्राह्मण-राजा-वृद्ध-बालक-रोगिषु च।

26. प्रश्न:—सप्तैता समिधः श्रियः के सन्ति?
उत्तरम्—धृतिः शमो दमः शौचं कारुण्यं वागनिष्ठुरा। मित्राणां चानभिद्रोहः सप्तैता समिधः श्रियः।।

27. प्रश्न:—कः नराधिपः वर्जनीयो (त्यागयोग्यो) वर्तते?
उत्तरम्—असंविभागी दुष्टात्मा कृतघ्नो निरपत्रपः। तादृङ्नराधिपो लोके वर्जनीयो नराधिपः।।

28. प्रश्न:—विदुरनीतिग्रन्थस्य सप्तमाध्याये कति श्लोकाः सन्ति?
उत्तरम्—85 श्लोकाः।

29. प्रश्न:—क्रोधं कथं जयेत्?
उत्तरम्—अक्रोधेन।

30. प्रश्न:—असाधुं कथं जयेत्?
उत्तरम्—सद्व्यवहारेण (साधुना)।

31. प्रश्न:—कृपणं कथं जयेत्?
उत्तरम्—दानेन।

32. प्रश्न:—असत्यं कथं जयेत्?
उत्तरम्—सत्येन।

33. प्रश्न:—विदुरनीतिग्रन्थस्य अष्टमाध्याये कति श्लोकाः सन्ति?
उत्तरम्—32 श्लोकाः।

34. प्रश्न:—कानि त्रीणि कार्याणि ब्रह्महत्यासमानि सन्ति?
उत्तरम्—अनृते च समुत्कर्षो राजगामि च पैशुनम्। गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया।।

35. प्रश्न:— विद्यामिच्छया विद्यार्थी किं त्यजेत्?
उत्तरम्—सुखार्थिनं कुतो विद्या नास्ति विद्यार्थिनः सुखम्। सुखार्थी वा त्यजेद् विद्यां विद्यार्थी वा त्यजेत् सुखम्।।

विगत वर्षों के वस्तुनिष्ठ प्रश्न एवं उनके उत्तर

1. धर्म का मूल स्रोत है–
क. श्रुति ख. पुराण
ग. इतिहास घ. ज्योतिष

2. 'कुमारिल भट्ट' के अनुसार धर्म है–
क. पूजा ख. शास्त्रविहित कर्म
ग. यज्ञ घ. भक्ति

3. 'प्रभाकर' के मत में प्रमाण हैं–
क. पाँच(5) ख. दस(10)
ग. सात(7) घ. छः(6)

4. कुमारिलमत में 'प्रामाण्यग्राहक प्रमाण' है–
क. प्रत्यक्ष ख. अनुमान
ग. शाब्द घ. अर्थापत्ति

5. 'न्यायसिद्धान्तदीप' के रचयिता हैं–
क. शशधर ख. विद्याधर
ग. गदाधर घ. मथुरानाथ

6. 'दीधिति' के रचयिता हैं–
क. रघुनाथ ख. मथुरानाथ
ग. गदाधर घ. शशिधर

7. जिसका 'अभाव' हो, उसे कहते हैं–
क. प्रतियोगि ख. अनुयोगि
ग. अनुपलब्ध घ. उभयात्मक

8. 'प्रमाणवार्त्तिक' के लेखक हैं–
क. धर्मकीर्ति ख. दिङ्नाग
ग. उमास्वामी घ. जयतीर्थ

9. माधवाचार्य ने प्रचार किया–
क. त्रिवर्तत्व ख. विष्णुसर्वोत्तमत्व
ग. विष्णुमिथ्यात्व घ. जगन्मिथ्यात्व

10. 'न्यायामृत' के रचयिता हैं–
क. जयतीर्थ ख. व्यासतीर्थ
ग. वादिराज घ. भावबोधाचार्य

11. बाल्यकाल में माधवाचार्य का नाम था–
क. वासुदेव ख. पूर्णप्रज्ञ
ग. जयतीर्थ घ. आनन्दतीर्थ

12. माध्वाचार्य के प्रमुख भाष्यकार हैं–
क. व्यासतीर्थ ख. जयतीर्थ
ग. रघूत्तमतीर्थ घ. वासुदेव

13. धर्मशास्त्र शब्द का अर्थ है–
क. स्मृति ख. तन्त्र
ग. सूत्र घ. आगम

14. 'राजन्' शब्द का अर्थ है–
क. क्षत्रिय ख. अभिषिक्त
ग. उच्च घ. धनी

15. श्राद्ध करने का प्रथम अधिकारी होता है–
क. क्रीत पुत्र ख. औरस पुत्र
ग. क्षेत्रज पुत्र घ. दत्तक पुत्र

16. 'महापातक' के प्रकार होते हैं–
क. पाँच ख. आठ
ग. दस घ. चार

17. महाभारत क्या है–
क. पुराण ख. इतिहास
ग. आख्यान घ. काव्य

18. 'शान्ता' थी–
क. दशरथ की पुत्री ख. राम की पुत्री
ग. ऋषिकन्या घ. विदुषी

19. 'मामेकं शरणं व्रज' किसमें है–
   क. मानस ख. गीता
   ग. रामायण घ. रघुवंशम्

20. शक्ति पूजा वर्णित है–
   क. देवीभागवत में ख. भागवत में
   ग. रामायण में घ. नारदपुराण में

21. 'अलंकार सम्बन्धी' मिलती है–
   क. महाभारत में ख. अग्निपुराण मे
   ग. रामायण में घ. आगम में

22. 'प्रत्यभिज्ञाहृदय' कृति है–
   क. क्षेमराज की ख. अभिनवगुप्त की
   ग. महेश्वर की घ. सोमानन्द की

23. 'अधिकारों' की संख्या है–
   क. पाँच ख. छः
   ग. आठ घ. चार

24. 'भाट्टों' के प्रमाण हैं–
   क. आठ (8) ख. छः (6)
   ग. सात (7) घ. पाँच (5)

25. 'जैमिनि दर्शन' में अध्याय हैं–
   क. दस (10) ख. बारह (12)
   ग. पन्द्रह (15) घ. पाँच (5)

26. 'प्रकरण-पञ्चिका' के रचयिता हैं–
   क. भवनाथ ख. शालिकनाथ
   ग. मण्डनमिश्र घ. पार्थसारथि मिश्र

27. 'अन्विताभिधानवाद' के प्रवर्तक हैं–
   क. प्रभाकर ख. शंकर
   ग. कुमारिल घ. नैयायिक

28. 'अभिहितान्वयवाद' के प्रवर्तक हैं–
   क. प्रभाकर ख. भट्ट
   ग. मीमांसक घ. वेदान्ती

29. 'मीमांसासूत्र' के रचयिता हैं–
   क. जैमिनि ख. व्यास
   ग. पराशर घ. पतञ्जलि

30. 'मीमांसादर्शन' में अध्याय हैं–
   क. बारह (12) ख. पन्द्रह (15)
   ग. दस (10) घ. बीस (20)

31. 'सादृश्य' को पृथक् पदार्थ मानते हैं–
   क. भाट्ट ख. प्रभाकर
   ग. मनु घ. माध्व

32. ज्ञान से होता है–
   क. मोक्ष ख. अपवर्ग
   ग. बुद्धि घ. धन

33. 'सर्वधर्मान् परित्यज्य' उक्ति है–
   क. गीता की ख. मनुस्मृति की
   ग. रामायण की घ. पुराण की

34. माध्व वेदान्त में प्रमाणों की संख्या है–
   क. चार (4) ख. तीन (3)
   ग. पाँच (5) घ. दो (2)

35. 'तत्त्वप्रकाशिका' कृति है–
   क. जयतीर्थ की ख. व्यासतीर्थ की
   ग. शालिकनाथ की घ. माध्व की

36. 'निर्णयसिन्धु' के रचयिता हैं–
   क. कमलाकर भट्ट ख. प्रभाकर
   ग. नीलकण्ठ घ. वासुदेव

37. 'गोयुग्म लेकर' विवाह होता है–
   क. दैव विवाह ख. आर्ष विवाह
   ग. ब्राह्म विवाह घ. गान्धर्व विवाह

38. 'नान्दीश्राद्ध' होता है–
   क. श्राद्ध में ख. शुभ कर्म में
   ग. अशुभ में घ. यज्ञ में

39. 'अशौच' की परमावधि है–
   क. पन्द्रह दिन ख. दस दिन
   ग. बीस दिन घ. एक माह

40. अनुसूया किसकी पात्र हैं–
   क. शाकुन्तलम् ख. रघुवंश
   ग. महाभारत घ. रामायण

41. 'योगः कर्मसु कौशलम्' उक्ति है–
   क. गीता की ख. मनुस्मृति की
   ग. रामायण की घ. अभिज्ञानशाकुन्तलम् की

42. 'पाश' कितने प्रकार हैं–
   क. चार (4) ख. पाँच (5)
   ग. आठ (8) घ. तीन (3)

43. तन्त्रसार के रचयिता हैं–
   क. अभिनवगुप्त ख. क्षेमराज
   ग. माध्व घ. क्षेमेन्द्र

44. प्रतिपुष्पम् समास है–
   क. द्वन्द्व ख. अव्ययीभाव
   ग. तत्पुरुष घ. कर्मधारय

45. 'दुग्धस्य पानम्' में षष्ठी विभक्ति किस अर्थ में है–
   क. कर्मणि ख. कर्त्तरि
   ग. सम्बन्धे घ. पाने योगे

46. 'अभाव' को प्रमाण स्वीकारते हैं–
   क. प्रभाकर ख. भाट्ट मत
   ग. वेदान्ती घ. नैयायिक

47. 'सादृश्य' को पदार्थ मानते हैं–
   क. वेदान्ती ख. प्रभाकर
   ग. कुमारिल घ. शंकर

48. 'स्वतः प्रामाण्यवाद' स्वीकारते हैं–
   क. मीमांसक ख. पौराणिक
   ग. वेदान्ती घ. नैयायिक

49. 'तत्त्वचिन्तामणि' के रचयिता हैं–
   क. रघुनाथ ख. गंगेशोपाध्याय
   ग. मथुरानाथ घ. गदाधर

50. नव्य न्यायमतानुसार निर्विकल्प ज्ञान विषय हैं–
   क. एक ख. तीन
   ग. दो घ. चार

51. नव्य न्यायमतानुसार 'समवाय' है–
   क. तीन ख. एक
   ग. दो घ. चार

52. सांख्यप्रवचनभाष्य के कर्त्ता हैं–
   क. विज्ञानभिक्षु ख. शंकराचार्य
   ग. पञ्चशिख घ. उत्पलाचार्य

53. 'प्रणव' वाचक है–
   क. प्रकृति का ख. ईश्वर का
   ग. जगत् का घ. धर्म का

54. जैन में अस्तिकाय की संख्या है–
   क. सात (7) ख. पाँच (5)
   ग. चार (4) घ. आठ (8)

55. 'प्रतीत्यसमुत्पाद' के समर्थक हैं–
   क. जैन ख. बौद्ध
   ग. चार्वाक घ. मीमांसक

56. 'रेखागणित' मिलता है–
   क. शुल्बसूत्र में ख. धर्मसूत्र में
   ग. गृह्यसूत्र में घ. कहीं नहीं

57. माधवमत में जीव ब्रह्म में सम्बन्ध है–
   क. भेद ख. अभेद
   ग. भेदाभेद घ. प्रगाढ़

58. किस 'प्रामाण्यवाद' को माध्व मानते हैं–
   क. स्वतः ख. परतः
   ग. दोनों घ. कोई नहीं

59. माध्व मतानुसार वेद है–
   क. अपौरुषेय ख. पौरुषेय
   ग. ऋषिप्रणीत घ. कोई नहीं

60. 'मन्वर्थमुक्तावलीकार' हैं–
   क. काशीनाथ ख. कमलाकर
   ग. कुल्लूकभट्ट घ. जीमूतवाहन

61. राजा कौन होता है–
   क. क्षत्रिय ख. गुणवान्
   ग. अभिषिक्त घ. महापुरुष

62. हरिवंश है–
   क. पुराण ख. खिल
   ग. काव्य घ. इतिहास

63. 'भक्ति' प्रतिपादित है–
   क. शाडिल्यभक्तिसूत्र में ख. भागवत में
   ग. महाभारत में घ. देवीभागवत में

64. 'प्रह्लादगीता' के वक्ता हैं–
   क. व्यास ख. प्रह्लाद (भागवत)
   ग. अंगिरा ऋषि घ. अत्रि ऋषि

65. रामानुज सम्प्रदाय की सामग्री मिलती है–
   क. वामनपुराण में ख. ब्रह्मपुराण में
   ग. विष्णुपुराण में घ. वाराहपुराण में

66. 'सांख्य भाष्य' है–
क. ईश्वरकृष्ण का ख. उत्पलदेव का
ग. वाचस्पति का घ. विज्ञानभिक्षु का

67. 'सांख्यतत्त्वकौमुदी' के लेखक हैं–
क. कपिल ख. वाचस्पति
ग. विज्ञानभिक्षु घ. ईश्वरकृष्ण

68. शक्ति को अतिरिक्त पदार्थ मानते हैं–
क. प्रभाकर ख. कुमारिल
ग. शंकर घ. मनु

69. 'यमल' शब्द का अर्थ होता है–
क. जोड़ा ख. स्त्री, पुरुष
ग. एक काल में पैदा घ. कोई नहीं

70. 'त्रिपुटी प्रत्यक्ष' को कौन मानता है–
क. कमलाकर ख. प्रभाकर
ग. माध्व घ. जयतीर्थ

71. 'अनेकान्तवाद' कौन मानता है–
क. बौद्ध ख. जैन
ग. चार्वाक घ. नैयायिक

72. 'जयतीर्थ' किसके समर्थक हैं–
क. शंकर ख. भाट्ट
ग. वल्लभ घ. माध्व

73. माध्वमतानुसार सृष्टि है–
क. प्रकृति ख. जगत्-परिणाम
ग. प्रकृति-परिणाम घ. पुरुष-परिणाम

74. ज्ञान एवं कर्म से युक्त है–
क. भागवत ख. रामायण
ग. महाभारत घ. गीता

75. भक्ति से युक्त है–
क. रामायण ख. महाभारत
ग. भागवत घ. मनुस्मृति

76. 'मिताक्षरा टीका' है–
क. गौतमस्मृति की ख. हारीतस्मृति की
ग. याज्ञवल्क्यस्मृति की घ. मनुस्मृति की

77. 'निर्णयसिन्धु' के रचयिता हैं–
क. कमलाकर ख. कुमारिल
ग. प्रभाकर घ. शंकर

78. मनुस्मृति के टीकाकार हैं–
क. उव्वट ख. कैयट
ग. महिमभट्ट घ. कुल्लुकभट्ट

79. अक्षान् दीव्यति में कर्मसंज्ञक सूत्र है–
क. कर्मणि द्वितीया ख. दिवस्तदर्थस्य
ग. दिवः कर्म च घ. दिवः कर्मणि

80. त्रिमुनि में समास है–
क. तत्पुरुषः ख. बहुव्रीहिः
ग. कर्मधारयः घ. अव्ययीभावः

81. प्रभाकर कौन ख्याति मानते हैं–
क. अख्याति ख. ख्याति
ग. सत्ख्याति घ. असत्ख्याति

82. 'ऋजुविमला' के रचयिता हैं–
क. शालिकनाथ ख. जगदीश
ग. जयतीर्थ घ. रघुनाथ

83. ज्ञान को अनुमेय मानते हैं–
क. मीमांसक ख. वेदान्ती
ग. नैयायिक घ. वैयाकरण

84. शक्तिवाद के प्रणेता हैं–
क. वाचस्पति ख. बच्चा झा
ग. गदाधर घ. अनन्त

85. 'पर्वतो वह्निमान्' में साध्यतावच्छेदक सम्बन्ध है–
क. असमवाय ख. सम्बन्ध
ग. समवाय घ. संयोग

86. सांख्यमतानुसार प्रकृति का प्रथम विकार है–
क. अहंकार ख. अणु
ग. पञ्चतन्मात्र घ. महत्

87. 'नैरात्मवाद' मानते हैं –
क. बौद्ध ख. जैन
ग. नैयायिक घ. मीमांसक

88. योग मत में आसन का लक्षण है–
क. स्थितप्रज्ञः ख. मनःशान्तिः
ग. स्थितकरणम् घ. स्थिरसुखम्

89. विवर्तवाद के प्रवर्तक हैं–
क. रामानुज ख. शंकर
ग. माध्व घ. वल्लभ

90. अन्धकार को द्रव्य मानते हैं–
क. मीमांसक ख. नैयायिक
ग. भाट्ट घ. वेदान्ती

91. मनुस्मृति में अध्याय हैं–
क. बीस ख. दस
ग. बारह घ. सोलह

92. 'न स्त्री स्वातन्त्र्यमर्हति' मिलता है–
क. रामायण ख. अभिज्ञानशाकुन्तलम्
ग. महाभारत घ. मनुस्मृति

93. 'सहसा विदधीत न क्रियाम्' है–
क. अभिज्ञान-शाकुन्तलम् ख. गीता
ग. किरातार्जुनीयम् घ. शिशुपालवधम्

94. 'कुम्भस्य समीपं' इसका समस्त रूप है–
क. उपरिकुम्भम् ख. अधिकुम्भम्
ग. परिकुम्भम् घ. उपकुम्भम्

95. शाब्दी भावना को स्वीकारते हैं–
क. सांख्य ख. न्याय
ग. मीमांसा घ. चार्वाक

96. घटाभाव का प्रतियोगितावच्छेदक होता है–
क. घटत्वम् ख. द्रव्यत्वम्
ग. पृथिवीत्वम् घ. पदार्थत्वम्

97. सांख्य-मतानुसार इन्द्रिय उत्पन्न होते हैं–
क. अहंकारात् ख. पुरुषात्
ग. भूतेभ्यः घ. प्रधानात्

98. विज्ञानवाद को स्वीकारते है–
क. वैभाषिक ख. सैत्रान्तिक
ग. योगाचार घ. अद्वैतवेदान्त

99. अनेकान्तवाद को मानते हैं–
क. जैन ख. बौद्ध
ग. चार्वाक घ. सांख्य

100. वेद का पौरुषेयत्व मानते हैं–
क. वैदान्तिनः ख. मीमांसकाः
ग. चार्वाकाः घ. बौद्धाः

101. देहात्मवाद को मानते हैं–
क. सांख्य ख. नैयायिक
ग. चार्वाक घ. बौद्ध

102. विष्णु के सर्वोत्तमत्व के प्रतिपादक हैं–
क. शंकर ख. गौतम
ग. कपिल घ. माधव

103. 'जहदजहल्लक्षणा' को स्वीकार करता है–
क. अद्वैत वेदान्त ख. वैशेषिक
ग. सांख्य घ. बौद्ध

104. 'उपमान' प्रमाण को मानते हैं–
क. वैशेषिक ख. न्याय
ग. योग घ. बौद्ध

105. सांख्य मतानुसार प्रकृति का द्वितीय विकार है–
क. महान् ख. अहंकार
ग. तन्मात्र घ. इन्द्रिय

106. 'आरम्भवाद' का समर्थन करते हैं–
क. रामानुजीय ख. माध्व
ग. अद्वैत घ. नैयायिक

107. जगत् को सत्य मानता है–
क. शून्यवाद ख. अद्वैतवाद
ग. विज्ञानवाद घ. विशिष्टाद्वैतवाद

108. 'अध्यासवाद' के प्रतिपादक हैं–
क. रामानुज ख. माध्व
ग. शंकर घ. श्रीपतिपण्डित

109. 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' उक्ति है–
क. मनुस्मृति ख. रामायण
ग. महाभारत घ. गीता

110. 'स्थितः पृथिव्या इव मानदण्डः' उक्ति है–
क. रघुवंशम् ख. शिशुपालवधम्
ग. कुमारसम्भवम् घ. किरातार्जुनीयम्

111. 'अभिषेकनाटक' की वस्तु का मूल है–
क. भागवत ख. महाभारत
ग. रामायण घ. पद्मपुराण

112. आगम का एक पाद होता है–
क. कैवल्यपाद ख. चर्यापाद
ग. साधनपाद घ. स्मृतिपाद

113. तम को अतिरिक्त पदार्थ मानते हैं–
 क. माध्व ख. प्रभाकर
 ग. बौद्ध घ. भट्ट

114. अनुपलब्धि का विषय क्या है–
 क. अभाव ख. अर्थापत्ति
 ग. सादृश्यज्ञान घ. विभ्रम

115. न्याय मत में मन का परिमाण है–
 क. अणु ख. अपरिमित
 ग. विभु घ. अन्य

116. अनुमान को प्रमाण नहीं मानता है–
 क. बौद्ध ख. चार्वाक
 ग. जैन घ. शंकर

117. अथर्ववेद में पाया जाता है–
 क. कर्मकाण्ड ख. ज्ञानकाण्ड
 ग. विज्ञानकाण्ड घ. अर्थकाण्ड

118. 'चक्रारपंक्तिरिव गच्छति भाग्यपंक्ति:' किसमें पाया जाता है–
 क. शाकुन्तलम् ख. स्वप्नवासवदत्तम्
 ग. रघुवंशम् घ. रामायण

119. 'त्रय: समुदित हेतु:' कौन मानता है?–
 क. जगन्नाथ ख. कुन्तक
 ग. मम्मट घ. आनन्दवर्धन

120. मीमांसासूत्र के रचयिता हैं–
 क. गौतम ख. विज्ञानभिक्षु
 ग. ईश्वरकृष्ण घ. जैमिनि

121. श्रुतिप्रमाण की प्रधानता प्रतिपादित है–
 क. वैशेषिकदर्शन ख. जैनदर्शन
 ग. मीमांसादर्शन घ. न्यायदर्शन

122. मम्मटोक्त काव्यप्रयोजन हैं–
 क. पाँच ख. छ:
 ग. सात घ. तीन

123. प्राणी कर्म के द्वारा क्या सञ्चय करता है?–
 क. अपूर्व ख. धर्म
 ग. पाप घ. अर्थ

124. आत्मनिष्ठ गुण होता है–
 क. रूप ख. संख्या
 ग. धर्म घ. शब्द

125. जातिबाधक होता है–
 क. स्वरूप ख. असम्बन्ध
 ग. समवाय घ. संयोग

126. मूर्तगुण होता है–
 क. ज्ञान ख. शब्द
 ग. कृति घ. रूप

127. सांख्यजन्य परिमाण होता है–
 क. घटपरिमाण ख. त्रसरेणुपरिमाण
 ग. तूलकपरिमाण घ. पटपरिमाण

128. सम्प्रज्ञातसमाधि होती है–
 क. सप्तधा ख. पञ्चधा
 ग. त्रिधा घ. चतुर्धा

129. 'ब्रह्म सत्यं जगन्मिथ्या'– यह सिद्धान्त है–
 क. अद्वैतवेदान्त का ख. बौद्धदर्शन का
 ग. जैनदर्शन का घ. सांख्यदर्शन का

130. 'परिणामवाद' किनका सिद्धान्त है–
 क. वेदान्ती ख. सांख्य
 ग. नैयायिक घ. मीमांसक

131. चित्त का विस्तार और दीप्ति होती है–
 क. माधुर्य में ख. ओज में
 ग. प्रसाद में घ. किसी में नहीं

132. अवन्तिखण्ड है–
 क. श्रीमद्भागवत-पुराण में ख. ब्रह्मवैवर्तपुराण में
 ग. स्कन्दपुराण में घ. पद्मपुराण में

133. वेदान्त में अद्वैत शब्द से इन दोनों का अभेद अभीष्ट है–
 क. जीवजगतो: ख. जीवब्रह्मणो:
 ग. प्रकृतिपुरुषयो: घ. भक्तभगवतो:

134. पञ्चीकरण प्रक्रिया है–
 क. न्याये ख. सांख्ये
 ग. वेदान्ते घ. मीमांसायां

135. मीमांसा में लिङ्ग का स्वरूप -
 क. व्याप्तिविशिष्टम् ख. सामर्थ्यविशिष्टम्
 ग. यौगिक: शब्द: घ. धर्माभिव्याहार:

136. अभाव पदार्थ न स्वीकार करने वाले मीमांसक हैं–
 क. मण्डनमिश्र ख. कुमारिल
 ग. शबर घ. प्रभाकर

137. पृथक्त्व अन्योन्याभाव से भिन्न है। क्योंकि–
 क. भावाभावरूपत्वात् ख. प्रतीतिवैलक्षण्यात्
 ग. भावरूपत्वात् घ. कारणभेदात्

138. क्षणभङ्गवाद का सिद्धांत है–
 क. जैनदर्शन ख. बौद्धदर्शन
 ग. न्यायदर्शन घ. वैशेषिकदर्शन में

139. आस्तिक भारतीय दर्शन का लक्ष्य है–
 क. भुक्ति ख. मुक्ति
 ग. व्यवहृति घ. संसृति

140. अपुत्र का स्वर्गवास होने पर उसके दाय को कौन प्राप्त करता है?–
 क. पिता ख. पत्नी
 ग. मित्र घ. माता

141. छलपूर्वक कन्या का विवाह है–
 क. प्राजापत्य ख. गान्धर्व
 ग. पैशाच घ. ब्राह्म

142. बुद्धितत्व का विमर्श है–
 क. जैनदर्शने ख. बौद्धदर्शने
 ग. चार्वाकदर्शने घ. आगमे

143. प्रत्यय के स्वरूप का विचार किया जाता है–
 क. पूर्वमीमांसायाम् ख. न्याये
 ग. आगमे घ. बौद्धदर्शने

144. अद्वैतवेदान्त दर्शन में ब्रह्म स्वीकृत कहा जाता है–
 क. व्यापक ख. अव्यापक
 ग. बहुविध घ. त्रिविध

145. न्यायदर्शन का सिद्धान्त है–
 क. प्रधानकारणवाद ख. सत्कार्यवाद
 ग. परमाणुकारणवाद घ. ब्रह्मकारणवाद

146. सांख्यदर्शन में जगत्कारण होता है–
 क. ब्रह्म ख. माया
 ग. प्रधान घ. ईश्वर

147. योगदर्शन में ईश्वर है–
 क. जगत्कर्ता ख. पुरुषविशेष:
 ग. प्रकृते: परिणाम: घ. ब्रह्मस्वरूप:

148. 'ब्रह्मणो जिज्ञासा' इसमें 'ब्रह्मण:' में होता है–
 क. कर्तरि षष्ठी ख. शेषे षष्ठी
 ग. अनादरे षष्ठी घ. कर्मणि षष्ठी

149. 'अथातो धर्मजिज्ञासा' यह सूत्र मिलता है–
 क. वैशेषिकसूत्रे ख. योगसूत्रे
 ग. वेदान्तसूत्रे घ. मीमांसासूत्रे

150. द्वैतमत में मोक्षसाधन होता है–
 क. भक्ति ख. कर्म
 ग. कर्मसमुच्चित ज्ञान घ. केवल ज्ञान

151. द्वैतमत में जगत् होता है–
 क. मिथ्या ख. अनिर्वचनीय
 ग. सत्य घ. असत्य

152. व्यवहार के पाद होते हैं–
 क. चत्वार: ख. त्रय:
 ग. पञ्च घ. षट्

153. नारियों के पुनर्विवाह के प्रतिपादक हैं–
 क. मनु ख. याज्ञवल्क्य
 ग. नारद घ. वशिष्ठ

154. रासपञ्चाध्यायी है–
 क. महाभारते ख. अग्निपुराणे
 ग. श्रीमद्भागवते घ. श्रीमद्रामायणे

155. यह मुद्रा पूजा में प्रयुक्त होती है–
 क. मृगोमुद्रा ख. हंसीमुद्रा
 ग. सूकरीमुद्रा घ. धेनुमुद्रा

156. विशेषपदार्थ होता है–
 क. अनित्यद्रव्येषु ख. नित्यद्रव्येषु
 ग. गुणेषु घ. समवाये

157. ईश्वर के अस्तित्व में प्रमाण है–
क. अनुपलब्धिः ख. प्रत्यक्षम्
ग. अनुमानम् घ. उपमानम्

158. विवर्त्तवाद किस दर्शन का सिद्धान्त है?–
क. योगदर्शनस्य ख. पूर्वमीमांसादर्शनस्य
ग. वेदान्तदर्शनस्य घ. सांख्यदर्शनम्

159. नागार्जुन प्रर्वतक है–
क. शून्यवादस्य ख. स्याद्वादस्य
ग. अद्वैतवादस्य घ. द्वैतवादस्य

160. परिणामवाद सिद्धान्त है–
क. नैयायिकानाम् ख. वेदान्तिनाम्
ग. मीमांसाकानाम् घ. सांख्यानाम्

161. ब्राह्मणों का मरणाशौच कितने दिन का होता है–
क. दश ख. नव
ग. पञ्चदश घ. त्रिंशत्

162. रस सर्वदा होता है–
क. शब्दरूप ख. वाच्यरूप
ग. अर्थरूप घ. व्यंग्यरूप

163. इसमें शिवस्वरूप का विचार किया जाता है–
क. मीमांसायाम् ख. आगमे
ग. पुराणे घ. दर्शने

164. अद्वैत आचार्यों से प्रतिपादित किया हुआ ख्यातिवाद है–
क. अनिर्वचनी-यख्यातिः ख. अख्यातिः
ग. सत्ख्यातिः घ. अन्यथाख्यातिः

165. चोदनालक्षणोऽर्थो धर्मः-यह किसने कहा है?–
क. शबरेण ख. जैमिनिना
ग. लौगाक्षिभास्करेण घ. कृष्णयज्वना

166. परामर्श नामक ज्ञानविशेष की प्रस्तुति है–
क. प्रत्यक्षप्रमाणप्रसङ्गे ख. अनुमानप्रमाणप्रसङ्गे
ग. उपमानप्रमाणप्रसङ्गे घ. शब्दप्रमाणप्रसङ्गे

167. विपर्यय है–
क. पदार्थविशेषः ख. रसविशेषः
ग. अभावविशेषः घ. अयथार्थविशेषः

168. 'त्रिविधमनुमानमिष्टम्'-यह किनका मत है?–
क. मीमांसकानाम् ख. सांख्यानाम्
ग. नैयायिकानाम् घ. भाट्टानाम्

169. योगदर्शन में प्रतिपादित सिद्धियाँ हैं–
क. त्रयः ख. चत्वारि
ग. पञ्च घ. षट्

170. अनुभूति ही प्रमाण है-किसका मत है?–
क. चार्वाकमतम् ख. बौद्धमतम्
ग. अद्वैतमतम् घ. द्वैतमतम्

171. सरसिजमनुविद्धं शैवलेनापि रम्यम्-यह उक्ति मिलती है–
क. शिशुपालवधे ख. रघुवंशे
ग. अभिज्ञानशाकुन्तले घ. किरातार्जुनीये

172. मम्मट के मत में रस कितने हैं?–
क. नव ख. दश
ग. पञ्च घ. षड्

173. 'जन्मादि'-कौन सा समास है?–
क. तत्पुरुषः ख. बहुव्रीहिः
ग. कर्मधारयः घ. अव्ययीभावः

174. सन्निकर्षषट्क प्राप्त होता है–
क. प्रत्यक्षप्रमाणप्रसङ्गे ख. अनुमानप्रमाणप्रसङ्गे
ग. अनुपलब्धिप्रमाण-प्रसङ्गे घ. आगमप्रमाणप्रसङ्गे

175. अवैदिक दर्शनों में से एक है–
क. क्षणिकवादः ख. विवर्तवादः
ग. परिणामवादः घ. सत्कार्यवादः

176. शतपथब्राह्मण में कितने अध्याय हैं?–
क. शत ख. पञ्चाशत्
ग. चत्वारिंशत् घ. त्रिंशत्

177. भगवद्गीता किस ग्रन्थ का भाग है–
क. महाभारत ख. ब्रह्माण्डपुराण
ग. रामायण घ. स्कन्दपुराण

178. सांख्यमत में मानुषक सर्ग हैं–
क. मानाविधः ख. त्रिविधः
ग. चतुर्विधः घ. एकविधः

179. बौद्धमत के अनुसार प्रत्यक्ष का विषय है–
क. सामान्यलक्षणम् ख. स्वलक्षणम्
ग. नाम घ. जातिः

180. 'हिरण्यबाहुः'-इसका क्या अर्थ है?–
क. इन्द्रः ख. शिवः
ग. यमः घ. दिक्पालः

181. मनु मत में सुरा कितने प्रकार की है?–
क. पञ्चविधा ख. त्रिविधा
ग. नवविधा घ. षड्विधा

182. स्मार्तधर्म है–
क. पञ्चविधः ख. षड्विधः
ग. नवविधः घ. चतुर्विधः

183. उपादानलक्षणा का उदाहरण है–
क. गामानय ख. कुन्ताः प्रविशन्ति
ग. गौर्वाहिकः घ. गङ्गायां घोषः

184. यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः-यह उक्ति मिलती है–
क. नैषधे ख. किरातार्जुनीये
ग. अभिज्ञानशाकुन्तले घ. मालविकाग्निमित्रे

185. अद्वैतवेदान्त मत में मोक्ष है–
क. असिद्धः ख. अनवाप्यः
ग. सिद्धः घ. उत्पाद्यः

186. जातकर्म कब करना चाहिये–
क. जन्मनः प्राक् ख. प्राङ्नाभिवर्धनात्
ग. अशौचापगमात् घ. अशौचापगमात् परम् प्राक्

187. स्नातक कितने प्रकार के हैं–
क. त्रिविधः ख. षड्विधः
ग. नवविधः घ. द्विविधः

188. 'जातं वंशे भुवनविदिते पुष्करावर्तकानाम्' यह उक्ति है–
क. नैषधे ख. रघुवंशे
ग. मेघदूते घ. कुमारसंभवे

189. अद्वैतवेदान्त मत में महावाक्य का अर्थ है–
क. जीवब्रह्मभेदपरः ख. जीवमात्रपरः
ग. जीवब्रह्मैक्यपरः घ. जगत्सत्यत्वपरः

190. अनुमिति में व्यापार होता है–
क. व्याप्तिज्ञानम् ख. पक्षता
ग. परामर्शः घ. व्याप्तिः

191. योगमत में क्लेश है–
क. त्रिविधः ख. चतुर्विधः
ग. पञ्चविधः घ. सप्तविधः

192. 'नवतत्त्वानि तन्मते'-किसका मत है?–
क. बौद्धमते ख. जैनमते
ग. सांख्यमते घ. जैमिनिमते

193. सांख्यदर्शन योग दर्शन से इस विषय में भिन्न होता है–
क. तत्त्वविषये ख. प्रमाणविषये
ग. पुरुषविषये घ. ईश्वरविषये

194. सर्वदर्शनसंग्रह का कर्ता है–
क. हरिभद्रसूरिः ख. सायणाचार्यः
ग. माधवाचार्यः घ. शङ्कराचार्यः

195. 'ज्ञानेनापवर्गः'- किस मत से है?–
क. सांख्यमते ख. न्यायमते
ग. जैमिनिमते घ. चार्वाकमते

196. द्वैतवेदान्त में जीव और ब्रह्म का है–
क. अभेदः ख. भेदः
ग. भेदाभेदः घ. अभावः

197. द्वैतवेदान्त में विश्व है–
क. असत्यम् ख. सत्यम्
ग. अनिर्वचनीयम् घ. शून्यम्

198. धर्मशास्त्र में सुवर्ण शब्द का अर्थ है–
क. षोडशमाष-परिमितः सुवर्णः ख. त्रसरेणुपरिमितः
ग. माषपरिमितः घ. भिक्षापरिमितः

199. आत्रेये-शब्द का अर्थ है?–
क. पतिता ख. व्याभिचारिणी
ग. विवाहिता घ. रजस्वला

200. ब्रह्मसूत्र का दूसरा नाम है?–
क. शारीरिकसूत्रम् ख. मीमांसासूत्रम्
ग. धर्मसूत्रम् घ. शारीरकसूत्रम्

201. अद्वैतवादियों के अनुमान के कितने अवयव हैं?–
क. त्रयः ख. चत्वारः
ग. पञ्च घ. षट्

202. अभावपदार्थ स्वीकार नहीं करते–
क. भाट्टाः ख. प्राचीननैयायिकाः
ग. नव्यनैयायिकाः घ. प्राभाकराः

203. 'व्रीहीनवहन्ति' है–
क. अधिकारविधिः ख. नियमविधिः
ग. परिसङ्ख्याविधिः घ. विशिष्टविधिः

204. अनुमिति का करण है–
क. व्याप्तिः ख. उदाहरणम्
ग. साध्यम् घ. व्याप्तिज्ञानम्

205. घट के प्रति अन्यथासिद्धत्व है–
क. दण्डस्य ख. कुलालस्य
ग. चक्रस्य घ. दण्डरूपस्य

206. सांख्यों का अनुमान–
क. चतुर्विधम् ख. त्रिविधम्
ग. पञ्चविधम् घ. षड्विधम्

207. योगसूत्र के अनुसार नियम हैं–
क. त्रयः ख. चत्वारः
ग. पञ्च घ. षट्

208. योगसूत्र के अनुसार ब्रह्मचर्य-प्रतिष्ठा में होता है–
क. वीर्यनाशः ख. वीर्यलाभः
ग. निद्राजयः घ. वैराग्यलाभः

209. धर्म का मूल प्रमाण है–
क. उपनिषद् ख. भारतीय संविधान
ग. मनुस्मृति घ. वेद

210. व्यङ्ग्यार्थ का नामान्तर है–
क. वाच्यार्थ ख. तात्पर्यार्थ
ग. प्रतीयमानार्थ घ. लक्ष्यार्थ

211. पुराणों का स्वरूप है–
क. उपदेशप्रधान ख. इतिहासप्रधान
ग. युद्धप्रधान घ. विनोदप्रधान

212. 'अहिंसा परमो धर्मः'- यह उक्ति है–
क. उपनिषदि ख. महाभारतस्य शान्तिपर्वणि
ग. कालिकापुराणे घ. अनुशासनपर्वणि

213. वेदान्ताध्ययन का अधिकारी है–
क. स्नातकः ख. यजमानः
ग. पुरोहितः घ. साधनपट्कसम्पन्नः प्रमाता

214. प्रयाज कितने हैं?–
क. चत्वारः ख. पञ्च
ग. सप्त घ. नव

215. विशेष और नित्य द्रव्य में सम्बन्ध होता है–
क. स्वरूपः ख. तादात्म्यम्
ग. विशेषणता घ. समवायः

216. सांख्यमत में कार्य है–
क. शून्यम् ख. असत्
ग. सत् घ. सदसत्

217. सांख्यमत में प्रधान कारण है–
क. विवर्तः ख. परिणामतः
ग. साक्षित्वात् घ. स्रष्टृत्वात्

218. 'द्वादशायतनानि' का किसने निरूपण किया है?–
क. सांख्यैः ख. जैमिनीयैः
ग. पाशुपतैः घ. बौद्धैः

219. वाजसनेय कौन है?–
क. गौतमः ख. नारदः
ग. वशिष्ठः घ. याज्ञवल्क्यः

220. ब्रह्मचारी के कितने प्रकार हैं?–
क. चतुर्विधः ख. द्विविधः
ग. पञ्चविधः घ. नवविधः

221. आत्मगुण कितने हैं?–
क. अष्टौ ख. पञ्च
ग. दश घ. एकादश

222. 'इति हंतुस्तदुद्भवं'- यह किसकी उक्ति है?–
क. महिमभट्टस्य ख. अभिनवगुप्तस्य
ग. मम्मटस्य घ. भोजस्य

223. 'समत्वं योग उच्यते'- यह वाक्य है–
क. हरिवंशे ख. भगवद्गीतायाम्
ग. गुरुगीतायाम् घ. श्रीमद्भागवते

224. ब्रह्मसूत्र के अनुसार शास्त्र की योनि क्या है?–
क. जगत् ख. ब्रह्म
ग. जीवः घ. शून्यम्

225. अद्वैतवेदान्त का स्थापक कौन है?–
क. बादरायणः ख. शङ्कराचार्य
ग. गौडपादः घ. मधुसूदनसरस्वतिः

226. विवाहों में श्रेष्ठ है–
क. प्राजापत्यः ख. राक्षसः
ग. आसुरः घ. ब्राह्मः

227. श्राद्ध के लिये प्रशस्त काल है–
क. प्रातः ख. अपराह्नः
ग. मध्याह्नः घ. अरुणोदयः

228. सुराओं में मुख्य है–
क. गौड़ी ख. पैष्टी
ग. माध्वी घ. द्राक्षा

229. काव्यप्रकाश के अनुसार लक्षणा है–
क. त्रिविधा ख. चतुर्विधा
ग. पञ्चविधा घ. षड्विधा

230. दुर्गासप्तशती-अंशविशेष है–
क. देवीभागवतस्य ख. मार्कण्डेयपुराणस्य
ग. रामायणस्य घ. शिवपुराणस्य

231. श्मशान, भवन, काञ्चन और चन्दन में सर्वथा भेदभावशून्य होते हैं–
क. कौलाः ख. संन्यासिनः
ग. गृहस्थाः घ. चाण्डालाः

232. अद्वैतमतानुसार अविद्या है–
क. अनादिः सान्ता च ख. सादिः अनन्ता च
ग. अनादिः अनन्ता च घ. सादिः सान्ता च

233. मीमांसा में लिङ्ग होता है–
क. चतुर्विधम् ख. द्विविधम्
ग. षड्विधम् घ. पञ्चविधम्

234. ज्योतिष्टोम में पशुयाग होते हैं–
क. पञ्च ख. सप्त
ग. चत्वारः घ. त्रयः

235. 'स्त्रीधन' शब्द यौगिक है–
क. जीमूतवाहनमते ख. शूलपाणिमते
ग. विज्ञानेश्वरमते घ. गौतममते

236. 'जानकीहरणम्' महाकाव्य के रचयिता हैं–
क. कालिदास ख. भास
ग. कुमारदास घ. चण्डीदास

237. 'अथातो ब्रह्मजिज्ञासा' इसमें 'अथ' शब्द का अर्थ होता है–
क. मङ्गलम् ख. अधिकारः
ग. आनन्तर्यम् घ. प्रश्नः

238. मनु के मतानुसार धर्म के प्रमाण होते हैं–
क. षट् ख. पञ्च
ग. चत्वारि घ. त्रीणि

239. शान्तिपर्व में बल के अंग हैं–
क. षट् ख. सप्त
ग. पञ्च घ. नव

240. अग्निपुराणानुसार राजा के दोनों पायों में भेद हैं–
क. पञ्च ख. नव
ग. चत्वारः घ. त्रयः

241. पुराण के अनुसार ब्रह्माण्ड में भुवन होते हैं–
क. अष्टादश ख. चतुर्दश
ग. त्रीणि घ. एकादश

242. अज्ञान का दूसरा नाम है–
क. प्रधानम् ख. प्रकृतिः
ग. अविद्या घ. अव्यक्तम्

243. शङ्कराचार्य का जन्मस्थान है–
क. कालडी ख. काञ्ची
ग. काशी घ. कनकशृङ्गा

244. पदजन्यपदार्थोपस्थिति है–
क. शक्तिज्ञानम् ख. शाब्दबोधः
ग. व्यापारः घ. करणम्

245. आत्यन्तिक दुःखनिवृत्ति होती है–
क. धर्मात् ख. तत्वज्ञानात्
ग. गुरुवन्दनात् घ. औषधपानात्

246. समाधि के विघ्न होते हैं–
क. चत्वारः ख. अष्टौ
ग. त्रयोदश घ. पञ्चदश

247. नृसिंहवतार का वर्णन है–
क. श्रीमद्भागवते ख. अग्निपुराणे
ग. वायुपुराणे घ. कालिकापुराणे

248. 'कारकः' में प्रत्यय है–
क. कः ख. ण्वुल्
ग. अण् घ. वरच्

249. 'राजा राजसूयेन यजेत्' यह विध्युक्तयाग है–
क. स्मार्तयाग ख. श्रौतयाग
ग. पाकयाग घ. ब्रह्मयाग

250. कामनासम्भव के व्यसन होते हैं–
क. दश ख. आठ
ग. पञ्च घ. एकादश

उत्तरमाला

1. (क) 2. (ख) 3. (क) 4. (ख)
5. (क) 6. (क) 7. (क) 8. (क)
9. (ख) 10. (ख) 11. (क) 12. (ख)
13. (क) 14. (ख) 15. (ख) 16. (क)
17. (ख) 18. (क) 19. (ख) 20. (क)
21. (ख) 22. (ख) 23. (ख) 24. (ख)
25. (ख) 26. (ख) 27. (क) 28. (ख)
29. (क) 30. (क) 31. (क) 32. (क)
33. (क) 34. (ख) 35. (क) 36. (क)
37. (ख) 38. (ख) 39. (ख) 40. (क)
41. (क) 42. (क) 43. (क) 44. (ख)
45. (क) 46. (ख) 47. (ख) 48. (क)
49. (ख) 50. (क) 51. (ख) 52. (क)
53. (ख) 54. (ख) 55. (ख) 56. (क)
57. (क) 58. (क) 59. (क) 60. (ग)
61. (ग) 62. (ख) 63. (क) 64. (ख)
65. (ग) 66. (ग) 67. (ग) 68. (क)
69. (क) 70. (ख) 71. (ख) 72. (घ)
73. (ग) 74. (घ) 75. (ग) 76. (ग)
77. (क) 78. (घ) 79. (ग) 80. (घ)
81. (क) 82. (क) 83. (क) 84. (ग)
85. (ग) 86. (घ) 87. (क) 88. (घ)
89. (ख) 90. (क) 91. (ग) 92. (घ)
93. (घ) 94. (घ) 95. (ग) 96. (क)
97. (क) 98. (ग) 99. (क) 100. (ग)
101. (ग) 102. (घ) 103. (क) 104. (ख)
105. (ख) 106. (घ) 107. (ग) 108. (ग)
109. (क) 110. (क) 111. (ग) 112. (ख)
113. (घ) 114. (क) 115. (क) 116. (ख)
117. (ग) 118. (ख) 119. (ग) 120. (घ)
121. (ग) 122. (ख) 123. (क) 124. (ग)
125. (ख) 126. (घ) 127. (ख) 128. (घ)
129. (क) 130. (ख) 131. (ख) 132. (ग)
133. (ख) 134. (ग) 135. (ख) 136. (घ)
137. (ख) 138. (ख) 139. (ख) 140. (ख)
141. (ग) 142. (घ) 143. (ग) 144. (क)
145. (ग) 146. (ग) 147. (ख) 148. (घ)
149. (घ) 150. (क) 151. (ग) 152. (क)
153. (ख) 154. (ग) 155. (घ) 156. (ख)
157. (ग) 158. (ग) 159. (क) 160. (घ)
161. (क) 162. (घ) 163. (ख) 164. (क)
165. (ख) 166. (ख) 167. (घ) 168. (ख)
169. (क) 170. (घ) 171. (ग) 172. (क)
173. (ख) 174. (क) 175. (क) 176. (क)

177. (क) 178. (घ) 179. (घ) 180. (ख)
181. (ख) 182. (ख) 183. (ख) 184. (ग)
185. (ग) 186. (ख) 187. (क) 188. (ग)
189. (ग) 190. (ग) 191. (ग) 192. (ख)
193. (घ) 194. (ग) 195. (क) 196. (ख)
197. (घ) 198. (क) 199. (घ) 200. (घ)
201. (क) 202. (ग) 203. (घ) 204. (क)
205. (घ) 206. (ख) 207. (ग) 208. (ख)
209. (घ) 210. (ग) 211. (ख) 212. (ख)
213. (घ) 214. (ख) 215. (घ) 216. (ग)
217. (ख) 218. (घ) 219. (ग) 220. (ख)
221. (क) 222. (ग) 223. (ख) 224. (ख)
225. (ग) 226. (घ) 227. (ग) 228. (ख)
229. (घ) 230. (ख) 231. (क) 232. (क)
233. (ख) 234. (घ) 235. (ग) 236. (ग)
237. (ग) 238. (ग) 239. (क) 240. (घ)
241. (ख) 242. (ग) 243. (क) 244. (ग)
245. (ख) 246. (ख) 247. (क) 248. (घ)
249. (ख) 250. (क)

Code- 73 June-12 PAPER-III
SANSKRIT TRADITIONAL SUBJECTS
संस्कृत परम्परागत विषय: प्रश्नपत्र-111

Maximum Marks : 150

अस्मिन् प्रश्नपत्रे पञ्चसप्ततिः (75) बहुविकल्पीया प्रश्नाः सन्ति। तेषु प्रतिप्रश्नमङ्कद्वयम्। सर्वे प्रश्नाः समाधेयाः।

1. वेदपुरुषस्य चक्षुर्भवति–
(A) धर्मशास्त्रम् (B) **ज्योतिषम्**
(C) व्याकरणम् (D) छन्दः **(Ans-B)**

2. शनिः द्वादशराशिं-----भुंक्ते–
(A) द्वादशवर्षाणि (B) विंशतिवर्षाणि
(C) **त्रिंशतिवर्षाणि** (D) एकवर्षम् **(Ans-C)**

3. भौमः ----नीचस्थो भवति–
(A) मेषराशौ (B) वृषभराशौ
(C) धनुराशौ (D) **कर्कराशौ (Ans-D)**

4. वृहस्पतिः----उच्चस्थो भवति–
(A) मेषराशौ (B) वृषभराशौ
(C) सिंहराशौ (D) **कर्कराशौ (Ans-D)**

5. सूर्यस्य संक्रमणे----दक्षिणगोलो भवति–
(A) मेषराशौ (B) वृषभराशौ
(C) वृश्चिकराशौ (D) **तुलाराशौ (Ans-D)**

6. भौमस्य राशिः---वर्तते–
(A) मिथुनम् (B) कर्कः
(C) कन्या (D) **मेषः (Ans-D)**

7. वृद्धिसंज्ञा-विधायकं सूत्रमस्ति–
(A) वृद्धिरेचि (B) इको गुणवृद्धिः
(C) तद्धितेष्वचामादेः (D) **वृद्धिरादैच् (Ans-D)**

8. उभयपदार्थ प्रधानो--- भवति–
(A) द्विगुः (B) बहुव्रीहिः
(C) अव्ययीभावः (D) **द्वन्द्वः (Ans-D)**

9. "कर्मणा यमभिप्रैति" स–
(A) करणम् (B) अधिकरणम्
(C) अपादानम् (D) **सम्प्रदानम् (Ans-D)**

10. मनुमतेन धर्मस्य ---प्रमाणानि भवन्ति–
(A) षट् (B) पञ्च
(C) त्रीणि (D) **चत्वारि (Ans-D)**

11. वर्णव्यवस्थायां---- एकजातिरस्ति–
(A) ब्राह्मणः (B) क्षत्रियः
(C) वैश्यः (D) **शूद्रः (Ans-D)**

12. 'वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः'----इति धर्मलक्षणमस्ति–
(A) आपोदेवस्य (B) कृष्णयज्वनः
(C) जैमिनेः (D) **लौगाक्षिभास्करस्य (Ans-D)**

13. न्यायदर्शने---- प्रमाणानि भवन्ति–
(A) षट् (B) त्रीणि (C) पञ्च
(D) **चत्वारि (Ans-D)**

14. हेत्वाभासाः सन्ति–
(A) सप्त (B) अष्टौ
(C) दश (D) **पञ्च (Ans-D)**

15. सत्कार्यवादोऽस्ति–
(A) योगिनाम् (B) नैयायिकानाम्
(C) बौद्धानाम् (D) **सांख्यानाम् (Ans-D)**

16. शान्तिपर्वणि बलस्यांगानि सन्ति–
(A) सप्त (B) नव (C) पञ्च (D) **षट् (Ans-D)**

17. अग्निपुराणानुसारेण राज्ञः उपायेषु दानस्य भेदाः भवन्ति–
(A) पञ्च (B) नव
(C) चत्वारः (D) **त्रयः (Ans-D)**

18. पुराणानुसारेण ब्रह्माण्डे भुवनानि भवन्ति–
(A) अष्टदश (B) त्रीणि
(C) एकादश (D) **चतुर्दश (Ans-D)**

19. द्युस्थान-देवता अस्ति–
(A) रुद्रः (B) सोमः
(C) पर्जन्यः (D) **विष्णुः (Ans-D)**

20. दानस्तुतिसूक्तानि संहितायां सन्ति–
(A) माध्यन्दिनसंहिता (B) तैत्तिरीयसंहिता
(C) काण्वसंहिता (D) **ऋग्वेदसंहिता (Ans-D)**

21. ऋग्वेदभाष्यकारो नास्ति–
(A) वेङ्कटमाधवः (B) सायणः
(C) आत्मानन्दः (D) **उव्वटः (Ans-D)**

22. 'अनलङ्कृती पुनः क्वापि' इति मतमस्ति–
(A) भामहस्य (B) कुन्तकस्य
(C) जयदेवस्य (D) **मम्मटस्य (Ans-D)**

23. भरतेन नाट्ये ---रसाः स्मृताः–
(A) षट् (B) नव (C) दश (D) **अष्टौ (Ans-D)**

24. 'सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम्' इति कस्य लक्षणमस्ति–
(A) रूपकालङ्कारस्य (B) काव्यलिङ्गालङ्कारस्य
(C) संकरालङ्कारस्य (D) **दीपकालंकारस्य (Ans-D)**

25. मानवकेन्द्रितो वादः अस्ति–
(A) ईश्वरास्तित्ववादः (B) अनीश्वरवादः
(C) उपयोगितावादः (D) **अस्तित्ववादः (Ans-D)**

26. जे.एस्.मिल् महोदयः कस्य प्रवर्तकोऽस्ति–
(A) **उपयोगितावादस्य** (B) मानववादस्य
(C) प्रत्ययवादस्य (D) अनीश्वरवादस्य **(Ans-A)**

27. अस्तित्ववादिनः न स्वीकुर्वन्ति–
(A) **विश्वसत्ताम्** (B) व्यक्तिस्वतन्त्रसत्ताम्
(C) सुखास्तित्वम् (D) आत्मास्तित्वम् **(Ans-A)**

28. अद्वैतवेदान्तस्य वादोऽस्ति–
(A) सङ्घातवादः (B) परिणामवादः
(C) **विवर्तवादः** (D) आरम्भवादः **(Ans-C)**

29. अज्ञानस्य अपरं नाम अस्ति।
(A) प्रधानम् (B) प्रकृतिः (C) **अविद्या** (D) अव्यक्तम् **(Ans-C)**

30. शङ्कराचार्यस्य जन्मस्थानं वर्तते।
(A) **कालडी** (B) काञ्ची
(C) काशी (D) कनकशृङ्गा **(Ans-A)**

31. अधिमासो भवति–
(A) **असङ्क्रान्तमासः** (B) द्विसंक्रान्तमासः
(C) श्रावणमासः (D) नाक्षत्रमासः **(Ans-A)**

32. अभिजित् नक्षत्रं भवति–
(A) विशाखायाः प्रथमचरणम्
(B) अनुराधायाः प्रथमचरणम्
(C) धनिष्ठायाः तृतीयचरणम्
(D) **उत्तराषाढायाः चतुर्थचरणम् (Ans-D)**

33. राहोः पूर्णदृष्टिर्भवति–
(A) प्रथमस्थाने (B) द्वितीयस्थाने
(C) तृतीयस्थाने (D) **पञ्चमस्थाने (Ans-D)**

34. सूर्यग्रहणं भवति–
(A) **अमायां शराभावे** (B) अमावास्यायाम्
(C) पौर्णमास्याम् (D) रात्रौ **(Ans-A)**

35. सूर्यस्य राशि ----संक्रमणे ऋतुर्भवति–
(A) एक (B) **द्वय**
(C) एकादश (D) द्वादश **(Ans-B)**

36. सावण मासे----दिनानि भवन्ति–
(A) **त्रिंशद्** (B) एकोनत्रिंशत्
(C) एकत्रिंशत् (D) अष्टाविंशति **(Ans-A)**

37. व्याकरणाध्ययनस्य प्रयोजनं भवति–
(A) यशःप्राप्तिः (B) अर्थप्राप्तिः
(C) व्यवहारज्ञानम् (D) **वेदानां रक्षा (Ans-D)**

38. ध्वनयः समुपोहन्ते---तैर्न भिद्यते–
(A) शब्दात्मा (B) अर्थात्मा
(C) **स्फोटात्मा** (D) काव्यात्मा **(Ans-C)**

39. 'कारकः' इत्यत्र प्रत्ययोऽस्ति–
(A) कः (B) **ण्वुल्** (C) अण् (D) वरच् **(Ans-B)**

40. अज्ञातार्थज्ञापको वेदभागो भवति–
(A) प्रकरणम् (B) स्थानम्
(C) **विधिः** (D) अपूर्वम् **(Ans-C)**

41. यागस्य प्राशस्त्यज्ञानं भवति–
(A) वेदाध्ययनात् (B) शास्त्राध्ययनात्
(C) यागानुष्ठनात् (D) **अर्थवादात् (Ans-D)**

42. 'राजा राजसूयेन यजेत्'–इति विध्युक्तयागो भवति–
(A) स्मार्तयागः (B) **श्रौतयागः**
(C) पाकयज्ञः (D) ब्रह्मयज्ञः **(Ans-B)**

43. पदजन्यपदार्थोपस्थितिर्भवति–
(A) शक्तिज्ञानम् (B) शाब्दबोधः
(C) **व्यापारः** (D) करणम् **(Ans-C)**

44. ईश्वरात्मनि गुणाः सन्ति–
(A) नव (B) दश
(C) चतुर्दशः (D) **अष्टौ (Ans-D)**

45. आत्यन्तिकदुःखनिवृत्तिर्भवति–
(A) धर्मात् (B) **तत्त्वज्ञानात्**
(C) गुरुवन्दनात् (D) औषधपानात् **(Ans-B)**

46. नित्यमनुमानगम्यं त्रिगुणात्मकं च–
(A) ईश्वरः (B) मनः
(C) **प्रधानम्** (D) ज्ञानम् **(Ans-C)**

47. समाधेः भवन्ति विघ्नाः–
(A) चत्वारः (B) **अष्टौ**
(C) त्रयोदश (D) पञ्चदश **(Ans-B)**

48. क्षीरस्य प्रवृत्तिर्यथा तथा प्रवर्तते–
(A) पुरुषः (B) गुणाः
(C) **प्रधानम्** (D) महत् **(Ans-C)**

49. शून्यवाद-क्षणभङ्गवादौ---दर्शने भवतः–
(A) जैन (B) **बौद्ध**
(C) चार्वाक (D) द्वैताद्वैत? **(Ans-B)**

50. वेदप्रामाण्यं नाङ्गीकरोति----।
(A) वैशेषिकदर्शनम् (B) **चार्वाकदर्शनम्**
(C) सांख्यदर्शनम् (D) अद्वैतदर्शनम् **(Ans-B)**

51. स्वरूपानुपमर्देन रूपान्तरावभासो भवति–
(A) परिणामवादः (B) **विवर्तवादः**
(C) सङ्घातवादः (D) विषयतावादः **(Ans-B)**

52. उव्वट-महीधरयोः भाष्यमस्ति–
(A) सामवेदस्य (B) ऋग्वेदस्य
(C) काण्ववेदस्य (D) **शुक्लयजुर्वेदस्य (Ans-D)**

53. शुक्लयजुर्वेदसम्बद्धं गृह्यसूत्रमस्ति–
(A) **पारस्करगृह्यसूत्रम्**
(B) आश्वालायनगृह्यसूत्रम्
(C) बौद्धायनगृह्यसूत्रम्
(D) शौनकगृह्यसूत्रम् **(Ans-A)**

54. शुक्लयजुषः शाखा वर्तते–
(A) काण्वो (B) राणायनीय
(C) कठ (D) **माध्यन्दिनी (Ans-D)**

55. 'यथावस्थितज्ञेय विषयीकारित्वं प्रमाणम्' लक्षणमिदं---उक्तम्–
(A) प्रमाणलक्षणे (B) प्रमाणपद्धत्याम्
(C) **प्रमाणचन्द्रिकायाम्** (D) वेदान्तपरिभाषायाम् **(Ans-C)**

56. प्रमाणविषयनिरूपणार्थं ब्रह्मतर्कमुदाहृतम्---
(A) मायावादखण्डने (B) **विष्णुतत्त्वविनिर्णये**
(C) तत्त्वसंख्याने (D) उपाधिखण्डने **(Ans-B)**

57. व्यासराजरचितप्रपञ्चमिथ्यात्वानुमानखण्डन-टिप्पणी-कथ्यते–
(A) पदार्थमञ्जरी (B) **मन्दारमञ्जरी**
(C) टीका (D) वाक्यार्थदीपिका **(Ans-B)**

58. बलयुक्ता राजानोऽपि नष्टाः भवन्ति–
(A) **विनयरहिताः** (B) करियुक्ताः
(C) तुरगयुक्ताः (D) शस्त्रयुक्ताः **(Ans-A)**

59. विवाहेषु अधमोऽस्ति–
(A) राक्षसः (B) **पैशाचः**
(C) गान्धर्वः (D) आसुरः **(Ans-B)**

60. सुरासु मुख्या भवति–
(A) गौडी (B) माध्वी
(C) द्राक्षी (D) **पैष्टी (Ans-D)**

61. "वाच्य एव वाक्यार्थः" इति यं वदन्ति ते–
(A) अभिहितान्वयवादिनः (B) **अन्विताभिधानवादिनः**
(C) भक्तिवादिनः (D) व्यक्तिवादिनः **(Ans-B)**

62. "----रससिद्धस्य स्थिरं काव्यस्य जीवितम्" वर्तते–
(A) वैचित्र्यम् (B) सौभाग्यम्
(C) **औचित्यम्** (D) लावण्यम् **(Ans-C)**

63. "रसस्याङ्गिनो धर्माः उत्कर्षहेतवश्च प्रोक्ताः"–
(A) अलङ्काराः (B) **गुणाः**
(C) वर्णाः (D) दोषाः **(Ans-B)**

64. विदुरः नीतिं---बोधयति–
(A) श्रीकृष्णम् (B) **धृतराष्ट्रम्**
(C) दुर्योधनम् (D) युधिष्ठिरम् **(Ans-B)**

65. नृसिंहावतारस्य वर्णनमस्ति–
(A) **श्रीमद्भागवते** (B) अग्निपुराणे
(C) वायुपुराणे (D) कालिकापुराणे **(Ans-A)**

66. 'म-द्वयं भ-द्वयम्' इत्यादि पुराणश्लोकः वर्तते–
(A) मार्कण्डेयपुराणे (B) भविष्योत्तरपुराणे
(C) **देवीभागवतपुराणे** (D) पद्मपुराणे **(Ans-C)**

67. आगमाभिधेयः शब्दः भवति–
(A) **तन्त्रम्** (B) पुराणम्
(C) धर्मशास्त्रम् (D) श्रौतसूत्रम् **(Ans-A)**

68. शाक्तानां भावाः सन्ति–
(A) **त्रयः** (B) सप्त (C) पञ्च (D) षट् **(Ans-A)**

69. इदं वैष्णवागमेषु अन्तर्भवति–
(A) सौरतन्त्रम् (B) **पाञ्चरात्रम्**
(C) गाणपत्यतन्त्रम् (D) अभेदागमः **(Ans-B)**

70. ज्ञाननिर्वर्त्यं भवति–
(A) दुःखम् (B) धर्मः
(C) **जगत्** (D) जीवः **(Ans-C)**

71. जीव एव भवति–
(A) माया (B) अनित्यम्
(C) **ब्रह्म** (D) मोक्षः **(Ans-C)**

72. प्रस्थानत्रयभाष्यकर्ता भवति–
(A) वल्लभाचार्यः (B) मण्डनमिश्रः
(C) मधुसूदनः (D) **शङ्कराचार्यः (Ans-D)**

73. कामसम्भवव्यसनानि----भवन्ति–
(A) **दश** (B) अष्टौ
(C) पञ्च (D) एकादश **(Ans-A)**

74. 'भर्तृस्नेहविषयतया स्त्रियः कुलं----भवति"–
(A) **दीप्तम्** (B) नष्टम्
(C) दग्धम् (D) जलप्लावितम् **(Ans-A)**

75. 'रमणीयार्थप्रतिपादकः शब्दः" काव्यमिति लक्षणम्–
(A) मम्मटस्य (B) **जगन्नाथस्य**
(C) दण्डिनः (D) विश्वनाथस्य **(Ans-B)**

Code- 25 June-12 PAPER-III

SANSKRIT TRADITIONAL SUBJECTS

संस्कृत परम्परागत विषय: प्रश्नपत्र-111

Maximum Marks : 150

अस्मिन् प्रश्नपत्रे पञ्चसप्ततिः (75) बहुविकल्पीया प्रश्नाः सन्ति। तेषु प्रतिप्रश्नमङ्कद्वयम्। सर्वे प्रश्नाः समाधेयाः।

1. राजन्तमध्वराणामिति पठ्यते–
   (A) पृथिवीसूक्ते **(B) अग्निसूक्ते**
   (C) विष्णुसूक्ते (D) वाक्सूक्ते **(Ans-B)**
2. कति लक्षणयुक्तो ग्रन्थवाचको ब्राह्मणशब्दः?
   (A) द्वादश (B) पञ्चदश
   (C) दश (D) अष्ट **(Ans-C)**
3. पौर्णमासेष्टौ कति प्रयाजाः भवन्ति?
   (A) सप्त (B) दश (C) अष्ट **(D) पञ्च (Ans-D)**
4. पञ्चमहायज्ञाः किमर्थमनुष्ठीयन्ते?
   (A) ज्वरशान्तये (B) वास्तुदोषविनिवृत्तये
   (C) पञ्चसूनादोषनाशाय (D) धनलाभाय **(Ans-C)**
5. शुनःशेपाख्याने प्राधान्येन स्तुतः देवः कः?
   (A) कुबेरः (B) इन्द्रः
   (C) विष्णुः **(D) वरुणः (Ans-D)**
6. मन्त्रेषु अनुदात्तस्वराङ्कनं क्रियते–
   (A) मध्ये (B) उपरिष्टात्
   (C) अधः (D) वामतः **(Ans-C)**
7. यज्ञविधिमधिकृत्य मन्त्रव्याख्यानं क्रियते–
   (A) अरविन्देन (B) विन्टरनित्सेन
   (C) दयानन्देन **(D) सायणेन (Ans-D)**
8. एषु अर्वाचीनो वेदभाष्यकारो न वर्तते–
   (A) मैक्समूलरः (B) वेबरः
   (C) अरविन्दः **(D) सायणः (Ans-D)**
9. ईशावास्योपनिषद् केन वेदेन सम्बद्धा?
   (A) ऋग्वेदेन (B) कृष्णयजुर्वेदेन
   (C) शुक्लयजुर्वेदेन (D) सामवेदेन **(Ans-C)**
10. 'कविर्मनीषी परिभूः स्वयम्भूः' कुत्रेयमुक्तिः?
    (A) भगवद्गीतायाम् (B) ईशावास्योपनिषदि
    (C) कठोपनिषदि (D) श्रीमद्भागवते **(Ans-C)**
11. एतेषु सारथिः कः उच्यते?
    (A) आत्मा (B) शरीरम्
    (C) मनः **(D) बुद्धिः (Ans-D)**
12. अश्वस्य मेध्यस्य लोमानि कानि उच्यन्ते?
    (A) ऋतवः (B) दिशः (C) नक्षत्राणि **(D) ओषधयश्च वनस्पतयश्च (Ans-D)**
13. 'विद्यया विन्दतेऽमृतम्' इति कुत्रोपदिष्टम्?
    (A) ईशावास्योपनिषदि **(B) केनोपनिषदि**
    (C) तैत्तिरीयोपनिषदि (D) कठोपनिषदि **(Ans-B)**
14. 'उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत' इति कुत्रोपदिश्यते?
    (A) भगवद्गीतायाम् (B) श्रीमद्भागवते
    (C) कठोपनिषदि (D) केनोपनिषदि **(Ans-C)**
15. 'युवा स्यात् साधुयुवा' इति कुत्रोपदिश्यते?
    (A) तैत्तिरीयोपनिषदि (B) वृहदारण्यकोपनिषदि
    (C) कठोपनिषदि (D) केनोपनिषदि **(Ans-A)**

16. सन्ध्यक्षराणि कति?
    (A) त्रीणि **(B) चत्वारि**
    (C) अष्टौ (D) द्वादश **(Ans-B)**
17. ह्रस्वस्वरभक्तेरुच्चारणकालो भवति–
    (A) त्रिमात्राकालः (B) द्विमात्राकालः
    (C) एकमात्राकालः **(D) अर्धमात्राकालः (Ans-D)**
18. राष्ट्राभिवर्द्धनसूक्तं कस्यां शाखायां विद्यते?
    (A) शाकलशाखायाम् (B) काण्वशाखायाम्
    (C) जैमिनीयशाखायाम् **(D) शौनकशाखायाम् (Ans-D)**
19. अग्निष्टोमयागो वर्तते–
    (A) पाकयज्ञः (B) हविर्यज्ञः
    (C) सोमयज्ञः (D) स्मार्तयज्ञः **(Ans-C)**
20. गायत्रीच्छन्दसि कियन्तो वर्णाः भवन्ति?
    (A) 20 **(B) 24** (C) 28 (D) 32 **(Ans-B)**
21. निरुक्तानुसारं पञ्चमो भावविकारः कः?
    (A) जायते **(B) अपक्षीयते**
    (C) वर्धते (D) विनश्यति **(Ans-B)**
22. समुद्द्रवन्त्यस्मादाप इत्यनेन को निर्दिश्यते?
    (A) मेघः (B) ह्रदः **(C) समुद्रः** (D) नदी **(Ans-C)**
23. 'चित्' इति निपातो वर्तते–
    (A) निषेधार्थे **(B) उपमार्थे**
    (C) शब्दार्थे (D) प्रयोगार्थे **(Ans-B)**
24. माङ्गलिक आचार्यो महतः शास्त्रस्य मङ्गलार्थमादितः किं प्रयुङ्क्ते?
    (A) काव्यम् (B) नित्यशब्दम्
    (C) अनित्यशब्दम् **(D) सिद्धशब्दम् (Ans-D)**
25. "इजादेश्च गुरुमतोऽनृच्छः" इति सूत्रेण किं विधीयते?
    (A) आम् (B) इट् (C) वृद्धिः (D) गुणः **(Ans-A)**
26. अधोऽङ्कितानां युग्मानां समीचीनां तालिकां चिनुत–
    (A) (B)
    (A) प्राचां ष्फ 1. क्रियातिपत्तौ
    (B) लिङ्निमित्ते लृङ् 2. तृतीयान्यतरस्याम्
    (C) प्रेष्यब्रुवोर्हविषो 3. तद्धितः
    (D) तुल्यार्थैरतुलोपमाभ्यां 4. देवतासम्प्रदाने
    (A) (B) (C) (D)
    (A) 2 3 1 4
    (B) 3 2 4 1
    (C) 3 1 4 2
    (D) 4 2 3 1 **(Ans-C)**
27. "आख्यानोपयोगे" इति सूत्रस्योदाहरणं किम्?
    (A) मातुर्निलीयते कृष्णः (B) नटस्य गाथां शृणोति
    (C) उपाध्यायादधीते (D) हिमवतो गङ्गा प्रभवति **(Ans-C)**
28. 'केशक' इत्यत्र कन् प्रत्ययः केन सूत्रेण विधीयते?
    (A) विभुक्तादिभ्योऽण् **(B) स्वाङ्गेभ्यः प्रसिते**
    (C) कुल्माषादञ् (D) पूर्वादिनिः **(Ans-B)**
29. पाणिनीयशिक्षानुसारं लिखितपाठकः कः भवति?
    (A) उत्तमः (B) उत्तमोत्तमः **(C) अधमः** (D) श्रेष्ठः **(Ans-C)**
30. पारिवारिकवर्गीकरणस्य कति प्रमुखभेदाः?
    (A) चतुर्दश (B) षोडश
    (C) अष्टादश (D) विंशतिः **(Ans-C)**
31. भारोपीयपरिवारे भारत-ईरानीवर्गः कस्मिन् वर्गे?
    (A) केन्टुमवर्गः **(B) शतंवर्गः**
    (C) चीनीपरिवारः (D) आर्मीनीपरिवारः **(Ans-B)**
32. रुद्रदाम्नः गिरनारशिलालेखे सुदर्शनतडागस्य कः पुनर्निर्माता?
    (A) पुष्पगुप्तः (B) तुषारस्फः
    (C) चक्रपालितः **(D) सुविशाखः (Ans-D)**
33. 'शोणो धावति' इत्यत्र का लक्षणा?
    (A) भागलक्षणा (B) जहल्लक्षणा
    (C) अजहल्लक्षणा (D) जहदजहल्लक्षणा **(Ans-C)**
34. वेदान्तानुसारं कतिविधः समाधिः?
    (A) द्विविधः (B) त्रिविधः
    (C) चतुर्विधः (D) पञ्चविधः **(Ans-A)**

35. 'वेदान्त'शब्दस्य पर्याय: क:?
(A) न्यायदर्शनम् (B) पूर्वमीमांसा
(C) उत्तरमीमांसा (D) सांख्यदर्शनम् **(Ans-C)**

36. सांख्यदर्शने कति प्रमाणानि स्वीकृतानि?
(A) एक: (B) द्वौ **(C) त्रीणि** (D) चत्वारि **(Ans-C)**

37. सांख्यदर्शने सूक्ष्मशरीरं कति तत्त्वात्मकम्?
(A) एकादश (B) द्वादश
(C) अष्टादश (D) पञ्चविंशति: **(Ans-C)**

38. पुरुषस्य निवर्तकं वाक्यम् उच्यते?
(A) विधि: (B) मन्त्र:
(C) निषेध: (D) अर्थवाद: **(Ans-C)**

39. अर्थसंग्रहस्य क: प्रणेता?
(A) लौगाक्षिभास्कर: (B) कुमारिलभट्ट:
(C) शम्भुभट्ट: (D) आपदेव: **(Ans-A)**

40. विनियोगविधे: सहकारिभूतानि प्रमाणानि कति?
(A) पञ्च **(B) षट्** (C) दश (D) एकादश **(Ans-B)**

41. "सुलभा: पुरुषा राजन् सततं प्रियवादिन:।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभ:।।" श्लोकममुं रावणासुरम्प्रति क: उक्तवान्?
(A) कुम्भकर्ण: (B) सुग्रीव:
(C) विभीषण: **(D) मारीच:** **(Ans-D)**

42. लोकेऽतिप्रसिद्धा 'श्रीमद्भगवद्गीता' महाभारतस्य कस्मिन् पर्वण्युपनिबद्धा?
(A) अरण्यपर्वणि **(B) भीष्मपर्वणि**
(C) शान्तिपर्वणि (D) विराटपर्वणि **(Ans-B)**

43. रावणासुरात् सीताया: विमुक्ति: अनया स्वप्ने दृष्टा–
(A) मन्दोदर्या (B) तारया
(C) त्रिजटया (D) कैकेय्या **(Ans-C)**

44. कीचकस्य वधं महाभारतस्य कस्मिन् पर्वण्युपवर्णितम्?
(A) उद्योगपर्वणि **(B) विराटपर्वणि**
(C) शल्यपर्वणि (D) द्रोणपर्वणि **(Ans-B)**

45. कस्मिन् पुराणे काव्यशास्त्रसम्बन्धिविषया: सर्वे उट्टङ्किता: वर्तन्ते?
(A) ब्रह्मपुराणे (B) ब्राह्माण्डपुराणे
(C) नारदपुराणे **(D) अग्निपुराणे** **(Ans-D)**

46. मौर्यवंशराजानां चरितं कस्मिन् पुराणे वर्णितम्?
(A) वायुपुराणे (B) वराहपुराणे
(C) वामनपुराणे **(D) विष्णुपुराणे** **(Ans-D)**

47. ऋष्यशृङ्गमुने: चरितं रामायणस्य कस्मिन् काण्डे वर्णितम्?
(A) अयोध्याकाण्डे (B) अरण्यकाण्डे
(C) सुन्दरकाण्डे **(D) बालकाण्डे** **(Ans-D)**

48. अर्थशास्त्रस्य द्वितीयाधिकरणं वर्तते–
(A) विनयाधिकारिकम् (B) धर्मस्थीयम
(C) अध्यक्षप्रचार: (D) कण्टकशोधनम् **(Ans-C)**

49. अमात्योत्पत्ति: कुत्र उपदिष्ट:?
(A) कण्टकशोधने (B) धर्मस्थीये
(C) षाड्गुण्ये **(D) विनयाधिकारिके** **(Ans-D)**

50. कृतयुगस्य कालावधि: उक्त:–
(A) 1000 दैववर्षात्मक: (B) 2000 दैववर्षात्मक:
(C) 3000 दैववर्षात्मक: **(D) 4000दैववर्षात्मक:** **(Ans-D)**

51. निष्क्रमणसंस्कार: कर्तव्य:–
(A) प्रथमे मासि (B) द्वितीये मासि
(C) तृतीये मासि **(D) चतुर्थे मासि** **(Ans-D)**

52. मृगया गण्यते–
(A) कामजगणे (B) क्रोधजगणे
(C) लोभजगणे (D) मोहजगणे **(Ans-A)**

53. विवादेषूपदर्शितो व्यवहारो वर्तते–
(A) एकपात् (B) द्विपाद्
(C) त्रिपात् **(D) चतुष्पाद्** **(Ans-D)**

54. स्मृत्योर्विरोधे क: बलवान्?
(A) व्यवहार: **(B) न्याय:**
(C) राजा (D) न्यायाधीश: **(Ans-B)**

55. 'प्रतिबध्नाति हि श्रेय: पूज्यपूजाव्यतिक्रम:'– कस्येयमुक्ति:?
(A) कामधेनो: (B) नन्दिन्या: (C) दिलीपस्य **(D) वसिष्ठस्य** **(Ans-D)**

56. 'नमुचिद्विषा'–इत्यस्य पदस्य कोऽर्थ:?
(A) नारदेन **(B) इन्द्रेण**
(C) रावणेन (D) माघेन **(Ans-B)**

57. 'सर्वथा न कंचन स्पृशन्ति शरीरधर्माणमुपतापा:– कस्माद् ग्रन्थादेतत् वाक्यमुद्धृतम्–
(A) दशकुमारचरितम् (B) हर्षचरितम्
(C) नैषधीयचरितम् **(D) कादम्बरी** **(Ans-D)**

58. श्रीकृष्णस्य संमुखम् गौरवर्ण: नारद: कस्याभिरामताम् अचोरयत्?
(A) सूर्यस्य (B) कृष्णस्य
(C) चन्द्रमस: (D) बलदेवस्य **(Ans-C)**

59. इति हेतुस्तदुद्भवे इति कस्य मतम्?
(A) जगन्नाथस्य (B) हेमचन्द्रस्य
(C) वाग्भटस्य **(D) मम्मटस्य** **(Ans-D)**

60. उपमानोपमेययो: बिम्बप्रतिबिम्बत्वं चेत् कस्तत्रालङ्कार:?
(A) निदर्शनालङ्कार: (B) दीपकालङ्कार:
(C) व्यतिरेकालङ्कार: **(D) दृष्टान्तालङ्कार:** **(Ans-D)**

61. ध्वनिप्रभेदेषु उत्कृष्ट: क:?
(A) अलङ्कारध्वनि: (B) भावध्वनि:
(C) रसध्वनि: (D) वस्तुध्वनि: **(Ans-C)**

62. "हतोऽपि लभते स्वर्गं जित्वा तु लभते यश:" इति कुत्र वर्तते?
(A) उरुभङ्गे (B) दूतवाक्ये
(C) कर्णभारे (D) मध्यमव्यायोगे **(Ans-C)**

63. "यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया" कस्य वचनमिदम्?
(A) दुष्यन्तस्य **(B) कण्वस्य**
(C) शारद्वतस्य (D) गौतम्या: **(Ans-B)**

64. "वितरति गुरु: प्राज्ञे विद्यां यथैव तथा जडे" इत्युक्ति: कस्मिन् नाटके आयाति?
(A) महावीरचरिते (B) मालतीमाधवे
(C) मालविकाग्निमित्रे **(D) उत्तररामचरिते** **(Ans-D)**

65. मुखसन्धे: अङ्गानि कति?
(A) द्वादश (B) त्रयोदश
(C) चतुर्दश (D) एकादश **(Ans-A)**

66. मुद्राराक्षसनाटके मुद्रा केन सम्बद्धा भवति?
(A) मलयकेतुना (B) चाणक्येन
(C) चन्द्रगुप्तेन **(D) राक्षसेन** **(Ans-D)**

67. नाट्यशास्त्रस्य अभिनवभारती इति व्याख्याया: कर्ता क:?
(A) आनन्दवर्धन: (B) भरत:
(C) अभिनवगुप्त: (D) धनञ्जय: **(Ans-C)**

68. सात्त्विकभावानां संख्या भवति–
(A) त्रयस्त्रिंशत् (B) नव
(C) अष्टौ (D) अष्टादश **(Ans-C)**

69. पण्डितराजजगन्नाथानुसारं सामान्यवस्तुध्वनि: गुणभूत-व्यंग्यप्रकाराश्च कस्मिन् काव्यप्रभेदेऽन्तर्भवन्ति?
(A) उत्तमोत्तमकाव्ये **(B) उत्तमकाव्ये**
(C) मध्यमकाव्ये (D) अधमकाव्ये **(Ans-B)**

70. तर्कसंग्रहे कति द्रव्याणि?
(A) चत्वारि (B) सप्त **(C) नव** (D) षट् **(Ans-C)**

71. तर्कसंग्रहे अभावस्य कति भेदा:?
(A) द्वौ **(B) चत्वार:** (C) षट् (D) अष्टौ **(Ans-B)**

72. न्यायस्य प्रतिज्ञादि–अवयवा: कति सन्ति?
(A) त्रय: **(B) पञ्च** (C) सप्त (D) नव **(Ans-B)**

73. तर्कसंग्रहे गुणा: सन्ति–
(A) द्वादश (B) पञ्चदश
(C) अष्टादश **(D) चतुर्विंशति:** **(Ans-D)**

74. कतिविध: रस: तर्कसंग्रहानुसारम्?
(A) द्विविध: (B) चतुर्विध:
(C) षड्विध: (D) अष्टविध: **(Ans-C)**

75. कति सन्ति हेत्वाभासा:?
(A) त्रय: **(B) पञ्च** (C) नव (D) द्वादश **(Ans-B)**